CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिसंस्कृता

सिद्धान्तकौमुदी

भट्टोजिदीक्षितकृतिः

विशेष-विवृति-सहिता

प्रतिसंस्कर्ता

सोमनाथ शर्म्मा

पण्डितराजः

नेपालएकेडेमीसदस्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिसंस्कृता

सिद्धान्तकौमुदी

भट्टोजिदीक्षितकृतिः

विशेष-विवृति-सहिता

प्रतिसंस्कर्ता

सोमनाथ शर्म्मा

पण्डितराजः

नेपालएकेडमीसदस्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकः—
नेपाल एकेडमी
काष्ठमण्डपः
नेपाल

संशोधकः—
पुण्यप्रसाद शर्मा अर्ज्याल
व्याकरणाचार्यः
कपिलवस्तु (तौलिहवा) नेपाल

सर्वाधिकारः
सुरक्षितः

प्रथमं संस्करणम्
२०१५ वैक्रमाब्दः

मुद्रकः—
विश्वनाथ भार्गव
मनोहर प्रेस, जतनबर,
वाराणसी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

2

ने. वे. वि.

श्री नवराज शर्मा कट्टेल

गोरखा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



श्री ५ महाराजाधिराज

(चान्सलर, नेपाल एकेडेमी)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री:

ROYAL PALACE.
Kathmandu, Nepal
Date- बि. सं. २०१५

हिमवत्खण्डले साहित्य, कला र ज्ञान–विज्ञानको क्षेत्रमा अतीत कालदेखि दिइ आएको विशेष योग-दानको महत्वलाई सबैले बुझेकै छन् — ऐतिहासिक कारणहरूले गर्दा त्यस परम्परामा बीचमा पर्न आएका व्यवधानलाई अब पन्छाएर नेपाल एकेडेमी देशको मौलिक परम्परालाई युगानुकूल बाटोमा अग्रसर गराउन चाहन्छ — यसको प्रयत्नले देशका आवश्यकताहरूको क्रमशः पूर्ति गर्नेछ, र साथै देशान्तरमा पनि हाम्रो जीवनको परिचय दिनेछ भन्ने आशा गर्दछु —

श्री ५ महाराजाधिराज,
चान्सलर,
नेपाल एकेडेमी.

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुवादः

राजप्रासादः

काष्ठमण्डपम्

विक्रम संवत् २०१५

हिमवत्खण्डेन साहित्यकलाविज्ञानक्षेत्रेषु पुराकालतः प्रदीयमानस्य विशिष्टयोगदानस्य महत्त्वं सर्वैर्विदितमेवास्ति ।

ऐतिहासिकैर्निमित्तैस्तत्परम्परायां मध्ये जायमानं व्यवधानमतः परमपसार्य नेपालविद्वत्परिषद् शस्य मौलिकीं प्रक्रियां युगानुकूले वर्त्मन्यग्रे प्रवर्तयितुमीहते ।

अस्याः प्रयत्नो देशस्यापेक्षाः क्रमशः पूरयिष्यति देशान्तरेष्वप्यस्मज्जीवनस्य परिचयं दास्यतीत्याशासे—

श्री ५ महाराजाधिराजः

नेपालविद्वत्परिषदः

सर्वाध्यक्षः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

卐

समर्पणम्

श्रीपञ्चकाञ्चितानां
विद्याप्रेमावदातहृदयानाम् ।
नेपालभूपतीनां
गुणोज्ज्वलानां महेन्द्रदेवानाम् ॥
विकसितकरसरसिजयोः
सरसच्छायाप्रदानतत्परयोः ।
संस्कृतमेतं स्तबकं
समादरेणानतः—

समर्पयति
सोमनाथ शर्म्मा
(सिग्द्यालः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोमनाथशर्म्मा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्चिदावेदनम्

अप्रमेयात्पूर्वसमयादन्तरान्तरा सम्भवतो व्याघातान्विषह्य गुरुलघुधाराप्रवाहगत्याऽद्ययावदनुवर्तमाना संस्कृतविद्या प्राचीनपरम्परागताया आर्यसंस्कृतेः परमवलम्बनम्। यस्यां प्राक्तनाचार्याणां तपःसहचरविचारपरिमार्जितास्वन्तर्भूमिकासु प्रतिभाताः सूक्ष्मातिसूक्ष्मा आध्यात्मिका बाह्या अपि भूयांसो विषया ओताः प्रोता विभाव्यन्ते। येषां सर्वतोमुखेन ज्योतिषाऽनादेः समयादार्यसंस्कृतिरत्युज्ज्वलां स्थितिं प्रपेदे। संस्कृतविद्याया आर्यसंस्कृतेश्च सहजीवनमवधार्यते। येनैकस्या रक्षणमपरस्या रक्षणमनुरुणद्धि। करालकालाजगरग्रासावशिष्टेषु सहस्रशो ग्रन्थेष्वद्यापि संस्कृतविद्याऽऽत्मनो बहुमुखं गहनातिगहनं प्रतिभानमावेदयति। अस्या एवाश्रयणेन प्रोद्बुद्धैर्गभीरैर्विचारैः, अपरिहार्यैः सिद्धान्तैः, तत्त्वावमर्शिभिरुपदेशैः, विशिष्टैर्निबन्धैः, निर्मलैराचारैः, पवित्रैश्चरित्रैः, प्रोज्ज्वलैर्जीवनैरार्यजगतः प्रोच्चा स्थितिरादर्शरूपमवाप। अशेषपुमर्थसाधनायोन्मीलितं तृतीयं चक्षुरियमासीत्। सेयं लौकिकानलौकिकाँश्च शतशः सदर्थान्यथावदवबोध्याभ्युदयं निःश्रेयसश्च साधयन्ती देवगवीविभूतिर्बहुशो धाराभिः स्रुतेनातिमधुरेण रसेन लोकाँश्चिरमाप्याययति।

आर्यसंस्कृतेः संस्कृतविद्येवास्या देववाणी प्रचारसाधनं दृढमवधार्यते। सेयं दैवी वाणी न केवलं श्रौती धर्मानुबन्धिनी वा, अपि तु विश्ववाङ्मयेषु सर्वप्राथम्येन सिद्धान्तिते वैदिके विभागे प्रथमं प्रादुर्भूय यथासमयं स्मार्तेषु, पौराणिकेषु, भारताद्यैतिहासिकेषु, आध्यात्मिकेषु दर्शनेषु, रामायणादिकाव्येषु, अभिनेयेषु रूपकेषु, आख्यानोपाख्यानेषु, एवं शारीरिक-भौतिक नैतिक-शिल्पकला-वार्तादिव्यावहारिकविषयेष्वपि स्वामवबोधकशक्तिं प्रसार्याऽसामान्यां प्रतिष्ठां प्रतिपेदे। दैव्या शक्त्याऽवष्टब्धा, बहोः समयाद्विशिष्टैः शिष्टैः संमान्यमानेयं गैर्वाणी वाणी बाह्यानाभ्यन्तरान्सरलान्गहनान्स्थूलान्सूक्ष्मानप्यशेषान्विषयानवबोधयन्ती सर्वभावावबोधक्षमा बौद्धजैनादिसम्प्रदायान्तरेषु देशान्तरेष्वपि प्रसरन्ती सर्वतः सम्भावनाभाजनमभूत्। बहून्समयाननुवर्तमानेयं याथार्थ्येनामरवाणी, एवमेव दीर्घकालमनुवर्तिष्यते चेति दृढः प्रत्ययः।

सर्वतः प्रसिद्ध्या लोकैः सुबोधासौ व्यावहारिक्यपि भाषाऽभूदेव। यच्चिरस्थायिषु सर्वसाधारणेषु शिलालेखादिष्वप्युपादीयते। यास्क-भरत-पाणिनिप्रभृतिभिः प्राचीनाचार्यैर्लौकिकभाषाशब्देनाप्यसौ निर्दिश्यते। सर्वसामान्यमनोरञ्जनाय प्रदर्श्यमानेषु रूपकेष्वपि प्राकृतभाषान्तरैः सह पाठ्यत्वेनासौ प्रावेश्यत। कालवशेन विकृत्या प्राकृतापभ्रंशदेश्यादिभाषान्तराण्यपि साक्षात्परम्परया च प्रसुवानेयमार्यभाषावंशस्य वर्षीयसी प्रसूरिति सम्भाव्यते परीक्षकैः। न केवलमार्यशाखीयासु, किन्तु बाह्यासु द्वीपान्तरीयास्वपि बहुशः प्राचीनभाषासु न्यूनाधिकमात्रया तत्समास्तद्भवाश्च प्रतिच्छायाशब्दा उपलभ्यमाना अस्या विश्वव्यापिनं प्रभावमवधारयन्ति।

अतिपुराकालादुदेत्य प्रसृत्य च लौकिकालौकिकसर्वव्यवहारनिर्वाहिकेयं संस्कृतभाषाऽनन्तशब्दसम्भृतो महानिधिः यस्याः सहस्रद्वयमप्यतिशयाना मूलधातवः, तेषां वाच्यलकारादिभेदैरसंख्यान्याख्यातरूपाणि, तेभ्यः प्रत्ययान्तैः साध्या नामादयः शब्दाः, तेषामपि लिङ्गसंख्याकारकादिविशेषसिद्धानि बहुशो रूपाणि, नामादीनां मिथो योगेन जायमानानि दीर्घातिदीर्घसमस्तशब्दस्वरूपाणि; एवमप्यवशिष्टाः केचन रूढाश्चेति नेयत्तया शब्दानां परिच्छेदो विधातुं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शक्यते । एकैकस्य वक्तव्यस्यावबोधाय क्रमो बहुधा शब्दविन्यासः, अनेकधा भङ्गीभिः शब्दोपयोगः, बहुशः शब्दानां प्रकरणादिभिरवधार्या नानार्थाश्चैनां विशिंषन्ति । इत्थम्भावोस्या महद्गौरवस्थानम् । विशिष्टभाषायाः प्रकृतिसिद्धा ईदृशा विशेषा एनामुच्चतमे पदे प्रतिष्ठापयन्ति । तामिमां महनीयतामसमीक्षमाणाः केचनास्यां क्लिष्टतां दुरूहतां जटिलताञ्चारोपयन्तु नाम, परं भाषामर्मविदः प्रेक्षावन्तस्त्विमां सविशेषं संमानयन्त्येव । द्वीपान्तरपर्यन्तं विश्वविद्यालयेष्वप्यस्याः समादरो महिमानं व्यनक्ति ।

इत्थमगाधवैभवसम्पन्नाया एतस्या अनन्तशब्दराशेः प्रतिपत्तौ प्रतिपदपाठं वर्षसहस्रेणाप्यनिर्वहणीयमनभ्युपायं पश्यद्भिरिन्द्रादिभिः पूर्वाचार्यैर्लघुनोपायेन बह्ववगमहेतवे व्याकरणशास्त्रमाविरकारि । व्याकरणं नाम भाषाया रक्षाकवचम्, येन तदीयानि शब्दस्वरूपाणि चिरायानुवर्त्यन्ते । अतः खलु सहस्रशो वर्षैरन्तरितेष्वपि संस्कृतपूर्वलेखेष्वर्वाचीनानामर्थावबोधः सुखेन सम्पद्यते । द्वित्रशतवर्षान्तरेणैव रूपान्तरं दुर्बोधतां चापद्यमानेषु भाषान्तरेष्विवास्यां संस्कृतभाषायां बहुकालातीताया-मप्यर्थावबोधने न भवत्यक्षमता इत्यनुभवो द्रढयति ।

परं समयः परिवर्तमानो विषयान्तराणीव शब्दं व्यवहारमपि परिवर्तयति । पूर्वैर्व्याकृत्य दर्शिताः केचन शब्दाः पश्चादुपेक्ष्यमाणा दुर्बोधा अपरिचेया अपि जायन्ते । पूर्वैरुपेक्षिता अपि कतिपये व्यवहारायापेक्ष्यन्ते । शब्दानां विन्यासशैल्यपि परिवर्तमाना न चिरमेकरूपावतिष्ठते । विभिन्नसमयानां कवीनां निबन्धॄणां वा पूर्वैकसूत्रावनद्धानामपि पृथग्भूताः शब्दविन्यास-शैल्यो लक्ष्यन्ते । यतो लेखशैलीमालोच्यैतत्कालिकोयं लेख इति सूक्ष्मेक्षिकया साधयन्ति प्रेक्षावन्तः ।

वैयाकरणा आचार्याः सामयिकं व्यवहारं बहिर्दृशाऽनुसन्दधाना अन्तर्दृशं व्याकरणनिबन्धने व्यापारयन्ति अतः खलु व्याकरणं शब्दानामनुशासनमुच्यते सामयिकं व्यवहारमनुरुद्ध्य पूर्वाचार्यैर्गुरुलघूनि व्याकरणानि निरमीयन्त । तदात्वे व्यवहारपर्याप्तदृष्ट्या निबद्धं व्याकरणं समयान्तरे न्यूनाधिकं सम्भाव्यमानमन्यथा परिष्क्रियते । पाणिनेः पूर्वमपि नैके संस्कृतव्याकरणस्य निबन्धारो बभूवुः, तेषां क्वचनांशेषु दृष्टिकोणा अपि व्यभिद्यन्तेति स्वसूत्रेषु तद्विहितैरनुस्मरणैर्निर्देशैर्विन्नियत एव । कालो ग्रसति सर्वाणि । पूर्वेषां व्याकरणेषु लीनेषु लीयमानेषु च तत्परम्परां परिरक्ष्य लोकान्पथि प्रवर्तयितुं भगवता पाणिनिना वैदिकानां लौकिकानाञ्च संस्कृतशब्दानां प्रायः सामस्त्येनावबोधाय पर्याप्तमसान्यं व्याकरणमष्टाध्याय्या निबद्धम्, यदीयं गुणगौरवानुरूपं सविशेषं व्याख्यानं पतञ्जलिना, एवमन्यैरपि व्याख्यान्तराणि व्यधायिषत । तस्यैव समयोचितेन प्रक्रियोपयोगिरूपेण निबन्धनं भट्टोजिदीक्षितेन सिद्धान्तकौमुदीनाम्ना व्यरचि । तच्च सामञ्जस्येन लोकैराद्रियमाण-मनेकैर्विद्वद्भिष्टीकोपटीकादिभिरुत्तरोत्तरं परिष्कृतं परितः प्रसिद्ध्या सादरं पापठ्यमानमद्यापि विशेषतः प्रसिद्धिसंमान-माप्नोतीति न वेदनीयमस्ति ।

समयचक्रस्य परिवृत्तिशीलतया पूर्वव्यवहारमनुसन्धाय व्युत्पादिता अपि बहुशः शब्दा महाकविभिरप्यप्रयुज्यमानाः केवलं व्याक्रियायामवतिष्ठन्ते । गवाङ्शब्दस्य सप्तविंशत्यधिकपञ्चशतरूपेष्वेकमपि न प्रयोगायोपादीयते, संस्कर्तृशब्दस्याष्टो-त्तरशतप्रस्तारेष्वेक द्वा एवोपादीयन्ते, अदद्र्यच्-अमुमुयच्-अतियुष्मद्-अत्यस्मद् इत्यादिशब्दरूपाणि चोपेक्षितानि । धातवोपि परिमिता एव व्यवहारपथमवतरन्ति । एवं सति तत्र तत्र गता ईदृशा अंशाः सामस्त्येन ज्ञानायोपयोगिनोपि व्यावहारिकाय ज्ञानाय नोपयुज्यन्ते । व्यवहारमनुवर्तमानानामननुवर्तमानानाञ्च व्युत्पादने प्रसार्यमाणा दृष्टिर्महाभाराक्रान्ता साधारणविषयेष्वपि ध्यानाधानाय कुण्ठीभवति व्याकरणस्यादृष्टं फलमस्तु नाम, दृष्टं फलं शब्दसिद्धेः प्रयोगौचित्यस्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बोध्यार्थस्य परिज्ञानञ्चापरिहार्यमेव। यथावदपरिज्ञाय प्रयुक्तानि शब्दरत्नानि सुवर्णघटितान्यप्यमार्मिकतां ज्ञपयन्ति। एतदेवानुसन्धायोच्यते एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति। कविनाप्युक्तम्—

गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ इति

किञ्च—जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥

इत्युदयनाचार्योक्तन्यायेन प्रौढतरायाः संस्कृतविद्यायास्तदध्ययनाध्यापनशक्तेरप्युत्तरोत्तरं ह्रासोऽनुभूयते। साङ्गसरहस्यचतुर्वेदग्रहणधारणार्थावबोधप्रचारणक्षमा शक्तिः क्षीयमाणा एकस्यापि व्याकरणादेः शास्त्रस्य यथावदवगमे प्रयोगोपयोगादिषु क्रमशः शैथिल्यमुपैति। अध्ययनाध्यापनप्रक्रियाप्यपचीयते। वैयाकरणाः शब्दव्युत्पादनेन, प्रयोक्तारोऽव्युत्पन्नानामिव शब्दानां विन्यासेनैव कृतकृत्यतां मन्यन्ते। शब्दसिद्धेः प्रयोगस्य च समन्वयेन दृढीकृतं ज्ञानं विज्ञानरूपतामुपैति। महाभाष्यकृतस्तत्र तत्र प्रासङ्गिकोक्तयः प्राचां प्रयोगपर्यवसायिनि शब्दसिद्धिज्ञाने तात्पर्यं द्योतयन्ति।

प्राक्समये संस्कृतविद्यायाः सर्वतः प्रचारेण संस्कृतशब्दानां साधारणबोधस्य सम्पर्कवशादयत्नसिद्धतया विशेषावबोधायैव व्याकरणादेरध्ययनमपेक्षणीयमासीत्। ततश्च व्याकरणादेर्विशिष्टांशेष्वेवाध्येतॄणामध्यापकानां परीक्षकाणाञ्च विशेषदृष्ट्या तादृशा विज्ञेयाः परीक्षणीया विषयाः परिमिता एव भवन्तो न भारायासन्। पर्याप्तेन समयेन ज्ञानविज्ञानसम्पन्ना विद्वांसो बहवो बभूवुः।

अद्यत्वे तूत्तरोत्तरं प्रचारे व्यवहारे चापचीयमाने साधारणा अपि शब्दा विशेषायिताः पाठाभ्यासावपेक्षन्ते। अस्यां लोकस्थितौ सामान्यतः कविभिर्लेखकैरुपयोज्यानां शब्दानां तत्सम्बन्धिनां नियमानां प्रज्ञपनेन शैक्षाः संस्कृतव्यवहारक्षमाः सम्पादनीया भवन्ति। विशेषानप्युपादायो परिभूमिकामारोढुं पूर्वग्रन्थाः सन्त्येव। महाभाष्यादिषु तत्र तत्र सामान्यबोधायाप्युपयोगिनो विषया उक्तय उपपत्तयो लक्ष्यन्ते तानपि सङ्गृह्य शिक्षिताः शैक्षाश्चतुरस्रदृष्टयो भवेयुः। निरुक्तानां शब्दानामर्थज्ञानं, प्रयोगसङ्गमनं, प्रसङ्गसम्बद्धविषयान्तरपरिज्ञानमपि संस्कारदार्ढ्यायोपयुज्यते। एवं सति श्रौतशब्दविषयाँल्लौकिकानपि व्यवहारतो बहिर्भूतानंशानपश्चाद्विशेषतो बुभुत्सूनां कृते पूर्वग्रन्थेष्वेवावशेष्य, अपरिहार्यानेवांशानुपादाय बोधदार्ढ्याधायिन्या सरलया रीत्या पूर्वसिद्धायाः सिद्धान्तकौमुद्याः संस्करणं विधीयमानं बोधायोपयोगाय, लाघवाय, रुचये च जायेत। तत्रापि सर्वसामान्यबोधायोपादेयानंशान्सरलप्रक्रियया सह मूले विशदीकृत्य, क्वाचित्कान्विशेषबोधोपयोगिनोंऽशान्विशिष्टोपपत्त्यादींश्च पृथग्विवरणादिरूपेण प्रतिप्रघट्टकं संयोज्य निबन्धनं प्रियहितं सम्पद्येत।

इत्येवमनुसन्धाय सिद्धान्तकौमुद्याः समयोपयोगिव्यावहारिकरूपेण प्रतिसंस्करणे प्रेक्षावतां प्रोत्साहनया कृतसाहसः प्रावर्तिषि।

अस्य प्रतिसंस्करणस्य दिग्दर्शनम्—

(१) सामान्या अपरिहेयांशा मूलभागे, क्वाचित्का विशिष्टांशा उपपत्तयो बोधस्फूर्त्याधायिनो विशेषाश्च विवृतिभागे निर्दिष्टाः।

(२) तान्येव सूत्रवृत्तिव्याख्यानानि, केवलं क्वचिदस्फुटार्थानि वाक्यानि पदान्तरयोगेन स्पष्टीकृतानि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परीक्षापयोगाय तत्र तत्र प्रक्रियापि दर्शिता। काशिकादिगतान्युपयोगीनि वार्तिकादीन्यपि प्रवेशितानि। नियमानां बोधदार्ढ्यायोदाहरणानि प्रायो बहुलीकृतानि।

(३) विप्रकीर्णानि समानविषयाणि सूत्राणि प्राय एकत्र दर्शितानि, येन तद्विषये जायमाना विशेषाः अष्टाध्यायी-क्रमप्राप्तो बाध्यबाधकभावश्च सुगमतां यान्ति।

(४) प्रकरणानि यथापूर्वमनुक्रान्तानि। वचनविषये विकीर्णानि सूत्राणि एकत्रीकृत्य प्रकरणान्तरं, नामादिपद-विभागस्य प्रकरणान्तरं च यथास्थानं निवेशितम्।

(५) संज्ञा-परिभाषा-सुबन्त-तिङन्त-कृदन्त-समास-तद्धितप्रकरणेषु सर्वसाधारणप्रक्रियोपयोगिसूत्राणि पूर्वमेकत्र निबद्धानि, येन ते ते भागा विशेषेणाभ्यस्ताश्चिरमुपयोगिनो भवन्ति।

(६) प्रारम्भे लिङ्ग-वचन-विभक्त्य-व्यय-समासा-ख्यातादिप्रकरणेषु चावतरणिकारूपेण पूर्वमनुसन्धेया विषयाः, अन्ते विषयविशेषाः परिशेषरूपेण च सव्याख्याभिः कारिकाभिर्निबध्य संयोजिताः सन्ति।

(७) प्रतिप्रकरणं विभिन्नावान्तरविषया एकैकप्रघट्टकरूपेण विभज्य विवृतिभागैर्व्यवच्छिद्य सुबोधाः सम्पादिताः सन्ति।

(८) धातूनां बहुलतया विभिन्ननियमावनद्धरूपतया चातिजटिले गहने आख्यातप्रकरणे व्यवहाराय पर्याप्ताँ-स्तृतीयांशप्रायानेव तान्मूले उपादाय हलन्ताजन्तसेडनिटस्तत्तत्पदिनोऽन्त्यवर्णानुक्रमेण वर्गशो विभज्य सप्रक्रियं संक्षिप्य दर्शितैराख्यातरूपैर्माधवीयधातुवृत्तिशैल्या उपसर्गयोगि-वाच्यान्तर-णिच्सन्कृतप्रत्ययान्तरूपान्तरैरपि सह तन्निर्देशः कृतोस्ति। क्वाचित्कप्रयोगविषयाः प्रायस्तावन्तो धातव उपयोगस्थलैः सह तदनुक्रमेण विवृतौ संक्षिप्य निर्दिष्टाः। अवशिष्यमाणास्तु धातव आदर्शग्रन्थेष्वेव परिशेषिताः। इत्थं व्यवहारदृशा सुबोधदृशा चैतत्प्रकरणस्य रूपान्तरे परिणमनमकारि।

(९) क्वाचित्कप्रयोगोपयोगिनो मूलभागानपि विशेषविवृतौ निवेश्य भाष्यवृत्तिशब्दखण्डादिग्रन्थान्तरेषूपलभ्या बोधाधिक्यकृत उपपत्तयो, व्युत्पादका विशेषाः, क्वचन शाब्दबोधविषया, उपादेयशङ्कासमाधयो, दुर्घटप्रयोगसिद्धयो, दुरूहसूत्रार्थाश्चैवमादयो विशेषास्तत्र तत्र निर्दिष्टाः सन्ति। प्रसङ्गवशेन विज्ञेयानि बाह्यान्यनुसन्धेयान्यपि धियश्चतुर्दिशं प्रसरणाय यथास्थानमनुप्रवेशितानि सन्ति।

(१०) उदाहरणशब्दार्था अस्फुटा कोष्ठकेषु स्फुटीकृताः। साधितशब्दानां कानिचित्प्रयोगस्थलान्यपि प्रतिप्रघट्टक-मनुदर्शितानि। तेन शब्दार्थपरिज्ञाने प्रयोगसङ्गमनेपि दृष्टिः प्रसरेत्।

इत्येवं व्यावहारिकीं प्रायोगिकीं व्युत्पादिकां दृशमुपादाय विहितेऽस्मिन्प्रतिसंस्करणे उचितप्रक्रियया सह प्रायोऽशेषतो रूपाणां प्रदर्शनेन, तत्तत्प्रकरणेषूपक्रमपरिशेषयोजनेन, प्रयोगस्थलप्रश्नादिनिदर्शनेन विस्तारितोपि मूलभागः पिण्डार्थमानेन लघुः सुगमश्च दृश्येत। विवृतिगतान्विशेषाननुसन्धायाध्यापकैरवबोध्यमाना अन्तेवासिनः सुबोधाश्चतुरस्रधियो जायेरन्नित्याशास्यते। आन्तरमुद्देश्यमंशेनापि पूर्यमाणं निबन्धनश्रमं सफलयदन्तरात्मनः सन्तोषाय भवेदित्यलं विस्तरेण।

परिकरश्लोकाः—

आर्याणां श्रुतिरादिसम्पदनया शास्त्राण्यनुप्राणिता-
न्येतेषां परिशीलनं प्रियहितं लोकद्वयश्रेयसे।
ज्ञानं मानवजन्मलभ्यममृतं, विज्ञानमास्वादनं,
प्रोद्यत्संस्कृतविद्यया तदुदयद्वारं समुद्घाटयते॥ १॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शब्दा बिन्दुतुलां दधत्यगणिता गीर्वाणवागर्णवे,
ते हि व्याकरणं विना न सुगमाः, प्रोक्तं तदेतन्मुखम् ।
तेषां साधनमर्थतोऽनुगमनं संरक्षणं चान्ततः
कर्तुं साधनमुत्तमं निगदितं तद्व्याक्रियाप्रक्रिया ॥ २ ॥

ज्ञातव्या विषया हिताय शतशः प्राच्याः प्रतीच्या अपि
व्येति व्याकरणाङ्गणे विलुठतामेवानुकूलं वयः ।
तत्सोपानपथेन सत्वरमुपारुह्योन्नता भूमिकाः
प्राप्तव्यं पदमुज्ज्वलं कथमिति व्याक्षेप उज्जृम्भते ॥ ३ ॥

शब्दानव्यवहार्यतामुपगतान्व्याकर्तुमायासनाद्
व्युत्पत्तिप्रदयुक्तिसूक्तिविषयज्ञानं वरं पश्यता ।
ऊहापोहदिशा समुन्नमयितुं प्रायोगिकीं पद्धतिं
कौमुद्याः प्रतिसंस्कृतिर्विरचिता शिक्षार्थिनां प्रीतये ॥ ४ ॥

विश्वख्यातमहर्षिपाणिनिवचो—व्याख्यानवृन्दोज्ज्वलां
शिक्षां व्याकरणस्य कालशिथिलां धारानुवृत्तामपि ।
आलोच्य व्यवहारसौष्ठवकृते व्युत्पत्तये चाञ्जसा
व्यापारोयमुदारदृक्प्रणयिनां तोषाय जायेत किम् ॥ ५ ॥

नेपालावनिमण्डनायित—जगन्नाथद्विजस्यात्मजो
लक्ष्म्या निर्मलशीलपुण्यसरितः स्नेहाश्रयो गर्भजः ।
आचार्याङ्घ्रिरजोभिषेकसुभगोऽसौ सोमनाथाभिधो
वृत्तिं माधुकरीं प्रदर्श्य चिनुते रुच्यान्कणान्सर्वतः ॥ ६ ॥

कर्मब्रह्मविचार-कापिलवचः—साहित्य-पातञ्जल-
न्याय-व्याकरणोदधिष्वनुतटं भूयः परिभ्राम्यतां ।
दिष्ट्या पावनदेशिकास्य पवनोद्धूताः कणाः केचन
प्राप्तास्तत्स्वरसो रसेन सुधियां प्रीत्यै पुरो धीयते ॥ ७ ॥

स्वर्याता गिरिजाऽऽत्मजः प्रथमतः, शान्तिः सुता निर्धवा,
दोलाख्या ललिताप्यपत्यरहिताऽशीते—रुपान्ते वयः ।
अन्तेवासिपरम्परास्वभिरुचिं सस्नेहमातन्वती
विद्यासन्ततितन्तुदीपकविभां पुष्णात्वसौ कौमुदी ॥ ८ ॥

सुधियां विधेयः—

सोमनाथ शर्म्मा

नेपालाभिजनः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भारतशासनद्वारा सम्मानपत्रप्राप्तानां

साहित्यवाचस्पति (हि० सा० सा०)

वाचस्पति (का० हि० वि० वि०)

पदवीविभूषितानां

वाराणसेय संस्कृत विश्वविद्यालयस्य

सम्मानितप्राध्यापकानां

म० म० श्रीगिरिधरशर्मचतुर्वेदमहोदयानां

विशिष्टसम्मतिः

नेपालाभिजनैर्विद्वत्प्रकाण्डैः श्रीसोमनाथसिग्द्यालमहाशयैः प्रतिसंस्कृता विशेषविवृतिसंहिता वैयाकरणसिद्धान्तकौमुदी बहुषु प्रकणेषु मयालोचिता। अत्र महाविदुषा ग्रन्थकृता मूलस्यापि प्रतिसंस्कारो विहितः, तदुपरि विवृतिरपि च लिखिता। छात्राणां जिज्ञासिता विषया मूल एव संनिवेशिताः, यथा कथं भाषाया उद्गम इति आगममार्गेणारम्भ एव दर्शितम्, किं नाम संस्कृतभाषायां लिङ्गतत्त्वमिति स्त्रीप्रत्ययारम्भे, विभक्तीनां कथं क्रियाभिः सम्बन्ध इति शाब्दबोधप्रकारश्च कारकप्रकरणे इत्यादि। अन्यदपि यत्र यत्रापेक्षितम्, तत्रोदाहरणबाहुल्यं मूल एव संनिवेशितम्। प्रक्रियासु च मूलपरिष्कारे उदाहरणबाहुल्यं च विशेषेण श्रमः कृतः। गणेषु श्रीमता भट्टोजिदीक्षितेन सर्वोऽपि धातुपाठः संगृहीतः, अत्र तु येषां विरलः प्रयोगः, नैव वा येऽद्यत्वे प्रयुज्यन्ते, ते धातवो निष्कासिताः। अन्यच्च यद्यत्कृतं तत्सर्वं ग्रन्थकृतैव भूमिकायां प्रदर्शितमिति विज्ञायेतैव पाठकैः। विवृतौ च महाभाष्यं मुख्यतयाधारीकृतम्, शास्त्रान्तरीया विषयाश्चापि यथोपयोगं तत्र तत्र विवृताः। मनोरमा-शेखरयोस्तु विषयाः क्वचिदेव संगृहीताः काठिन्यमपहातुम्। यद्यपि लोकरुचेर्विभिन्नता दुष्परिहरा, विचारभेदश्चापि दुर्निवार इति क्वचन मदीयो विचारभेदः सम्भवत्येव, मद् दृष्टावुपयोगिनोऽपि च केचन विचारा नात्र संगृहीता इति शक्यते वक्तुम्, तथापि सोऽयं प्रतिसंस्कारः समयोपयोगी, बहुपरिश्रमसाध्यश्चेति निर्व्याजं हृदयेन ब्रवीमि। प्रतिसंस्कृतो ग्रन्थोऽयमस्मिन्काले छात्राणां विदुषां च महान्तमुपयोगमावक्ष्यतीति प्रचारं चास्य सोत्कण्ठः कामये। श्रीमता नेपालमहाराजेन ग्रन्थमीदृशं प्रकाश्य संस्कृतवाङ्मयस्य महानुपकारः कृतः, स च विद्वद्भिः प्रचारद्वारेण सफलतां नेय इति प्रार्थये।

दिनाङ्क चैत्र शु० १ शुक्रवासरे
सं० २०१७

गिरिधरशर्मा चतुर्वेदः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रसादचिह्नानि पुरःफलानि

२०१५ वैक्रमाब्द मार्गशुक्लाष्टम्यां वाराणस्यां रामघट्ट-शान्तिकुटीरभवने

विद्वद्गोष्ठी

नेपालराज्यप्रतिष्ठितैर्न्यायव्याकरणसाहित्यादिशास्त्रप्रौढपाण्डित्यशालिभिरास्तिकमूर्धन्यैः पण्डितप्रवरैः श्रीसोमनाथशर्मशास्त्रिमहोदयैर्बहुपरिश्रम्य निबद्धं सिद्धान्तकौमुद्याः सव्याख्यं नवं प्रतिसंस्करणं विशिष्टविद्वत्सभासु समुपस्थापितम्। तदिदं विशिष्टं ग्रन्थरत्नं व्यवहारोपयोगितया व्युत्पादकतया च वैयाकरणानामन्येषां च संस्कृतानुरागिणां विदुषां महते प्रमोदाय, अन्तेवासिनामुपयोगाय, सौविध्याय चानुकूलमवश्यं प्रकाशनीयमिति निर्धार्यते।

तदिदमपरमपि धन्यवादास्पदं यत्—संस्कृतवाङ्मयरक्षाव्रतैः वीरराजन्यकुलमुकुटालङ्कारैः संमाननीयनेपालराज श्री ५ मन्महाराजाधिराज महेन्द्रवीरविक्रमशाहदेवमहोदयैः नेपालएकेडमी महासंस्थाद्वारा अस्य ग्रन्थस्य प्रकाशनमङ्गीकृतमिति सप्रमोदमभिनन्दयामः।

वयं वाराणसेया विद्वांसः स्तुत्यस्यास्य निबन्धस्य प्रकाशनं समर्थयामहे।

सभापतिः—

श्रीनारायणशास्त्री खिस्ते—महामहोपाध्यायः, साहित्यवारिधिः,
वाराणसेय राजकीयसंस्कृतमहाविद्यालयभूतपूर्वाध्यक्षः, विद्वत्परिषदध्यक्षश्च।

श्रीराजेश्वरशास्त्री द्राविडः—पण्डितराजः, साङ्गवेदविद्यालयाध्यक्षः।

श्रीहरिराम शुक्लः—न्यायाचार्यः, साङ्गवेदविद्यालयन्यायाध्यापकः।

श्रीताराचरणभट्टाचार्यः—साहित्याचार्यः, टीकमाणिसंस्कृतकालेजभूतपूर्वाध्यक्षः।

श्रीपूर्णचन्द्राचार्यः—व्याकरणाचार्यः, रामानुजसंस्कृतकालेजभूतपूर्वाध्यक्षः।

श्रीराजनारायण शुक्लः—न्यायाचार्यः, विद्वत्परिषत्मन्त्री, वाराणसेयशास्त्रार्थमहाविद्यालयाध्यक्षश्च।

श्रीकमलाकान्त मिश्रः—व्याकरण-वेदान्ताचार्यः, गोयनकासंस्कृतमहाविद्यालयाध्यक्षः।

श्रीकालीप्रसाद मिश्रः—व्याकरणाचार्यः, हिन्दूविश्वविद्यालयीयसंस्कृतमहाविद्यालयभूतपूर्वाध्यक्षः।

श्रीनिरीक्षणपति मिश्रः—व्याकरणाचार्यः, हिन्दूविश्वविद्यालयव्याकरणप्राध्यापकः।

श्रीरामप्रसाद त्रिपाठी—न्यायव्याकरणाचार्यः, हिन्दूविश्वविद्यालयव्याकरणप्राध्यापकः।

श्रीबदरीनाथ शुक्लः—न्यायवेदान्ताचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयन्यायविभागाध्यक्षः।

श्रीअनन्तशास्त्री फडके—व्याकरणाचार्यः, मीमांसातीर्थः,
वाराणसेयसंस्कृतविश्वविद्यालयेतिहासपुराणविभागाध्यक्षः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीमुकुन्दशास्त्री खिस्ते—साहित्याचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयसाहित्यविभागाध्यक्षः ।
श्रीमुरलीधर मिश्रः—व्याकरणवेदान्ताचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयव्याकरणविभागाध्यक्षः ।
श्रीबालकृष्णशर्म पञ्चोली—व्याकरणाचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयव्याकरणप्राध्यापकः ।
श्रीराजनारायण त्रिपाठी—व्याकरणाचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयव्याकरणप्राध्यापकः ।
श्रीविभूतिभूषण भट्टाचार्यः—न्यायाचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयग्रन्थपालः ।
श्रीयोगेश्वर झा—व्याकरणकेसरी, मुमुक्षुभवनसंस्कृतविद्यालयव्याकरणप्रधानाध्यापकः ।
श्रीब्रह्मदेव शुक्लः—व्याकरणाचार्यः, श्रीदाउजीसंस्कृतविद्यालयव्याकरणप्रधानाध्यापकः ।
श्रीरघुवीर पाण्डेयः—व्याकरणाचार्यः, श्रीचन्द्रसंस्कृतकालेजप्रधानाध्यापकः ।
श्रीचन्द्रबलि द्विवेदी—व्याकरणाचार्यः, अग्रवालसंस्कृतविद्यालयाध्यक्षः ।
श्रीरामअवध पाण्डेयः—व्याकरणाचार्यः, एम० ए०, बिरलासंस्कृतकालेज व्याकरणप्राध्यापकः ।
श्रीकृष्णमोहन ठक्कुरः—व्याकरणसाहित्यवेदान्ताचार्यः, एम० ए०, हिन्दूविश्वविद्यालयीय-रणवीरसंस्कृत-पाठशालाध्यक्षः ।
श्रीकृष्णमणि त्रिपाठी—व्याकरणसाहित्यसांख्ययोगपुराणेतिहासाचार्यः, एम० ए०, साहित्यरत्नम्, भारतीयसाहित्यविद्यालयव्यवस्थापकः ।
श्रीदिवाकर जोशी—व्याकरणाचार्यः, स्याद्वादविद्यालयव्याकरणप्राध्यापकः ।
श्रीरामप्रीत द्विवेदी—व्याकरणाचार्यः, दयालुसंस्कृतपाठशालाप्रधानाध्यापकः ।
श्रीदामोदर भट्टराई—वेदाचार्यः, हरिहरसंस्कृतपाठशालाध्यक्षः ।
श्रीकरुणाकर पनेरुः—सांख्यवेदान्तकाव्यतीर्थः, दुग्धविनायक वाराणसी ।
श्रीकेशवशर्मा वास्तोला—वेदान्ताचार्यः, नेपालीसंस्कृतविद्यालयप्रधानाध्यापकः ।
श्रीपूर्णचन्द्रोपाध्यायः—व्याकरणाचार्यः, केसरविद्यालयव्याकरणाध्यापकः ।

श्रीविद्वद्वरसोमनाथशर्मभिः प्रतिप्रकरणं प्रतिविषयञ्च प्रतिसंस्कृता तदाह्वया सिद्धान्तकौमुदी सव्याख्या मया समवलोकिता, अस्यां तत्र तत्रावसरप्राप्ता व्याकरणसिद्धान्ता उपपादिताः, वर्णमातृकाणाञ्च भाषान्तरवर्णमातृकाभ्य औचित्यं प्रतिपादितं मूलानि उपपत्तीश्च समाश्रित्य । विप्रकीर्णानि च सूत्राणि प्रकरणकल्पनया सञ्चितानि । प्रयोगाणाञ्च व्यवहारभूमयः प्रदर्शिताः । धातूनाञ्च यथासम्भवं प्रयोगा उपन्यस्ताः । कारकाणाञ्च विप्रतिपत्तिभूमयो महताऽऽयासेन सिद्धान्तावधारणेन परिष्कृताः इति सर्वं सम्प्रधार्याहं संमन्ये इयं कृतिः करिष्यति विनेयानां महतीमुपकृतिमिति ।

रघुनाथशर्मा
व्याकरणाचार्यः
वाराणसेयसंस्कृतविश्वविद्यालय-
वेदान्तविभागाध्यक्षः

१७ । १ । ५६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयानुक्रमणिका

पूर्वार्द्धे

उपक्रमः	१
वर्णसमाम्नायः	३
प्रत्याहाराः	५
स्वरभेदाः	६
व्यञ्जनभेदाः	७
स्थानप्रयत्नाः	८
सावर्ण्यम्	९
संज्ञाविशेषाः	११
परिभाषादिविधयः	१३
सन्धिप्रकरणम्	१६
अच्सन्धिः	१७
हल्सन्धिः	२५
विसर्गसन्धिः	३१
स्वादिसन्धिः	३३
पदप्रकरणम्	३६
सुबन्तप्रकरणम्	४१
अजन्तपुंलिङ्गप्रकरणम्	४२
,, स्त्रीलिङ्गप्रकरणम्	५६
,, नपुंसकलिङ्गप्रकरणम्	६३
हलन्तपुंलिङ्गप्रकरणम्	६८
,, स्त्रीलिङ्गप्रकरणम्	८२
,, नपुंसकलिङ्गप्रकरणम्	८५
सर्वनामप्रकरणम्	९१
विशेषणप्रकरणम्	१०३
अव्ययप्रकरणम्	११४
लिङ्गप्रकरणम्	१२४
स्त्रीप्रत्ययाः	१२७
वचनप्रकरणम्	१४१
विभक्तिप्रकरणम्	१४८
विभक्तयः	१५०
समासप्रकरणम्	१८६
सामान्यसमासः	१९१
अव्ययीभावसमासः	१९२
तत्पुरुष ,,	१९८
कर्मधारय ,,	२१३
द्विगु ,,	२२१
बहुव्रीहिसमासः	२२८
द्वन्द्व ,,	२३८
एकशेषः	२४३
सर्वसमासान्ताः	२४५
अलुक्समासः	२४७
समासाश्रयविधयः	२५१
तद्धितप्रकरणम्	२६३
अपत्याधिकारः	२६६
रक्ताद्यर्थाः	२७७
चातुरर्थिकाः	२८७
शैषिकाः	२९०
प्राग्दीव्यतीयाः	३०८
प्राग्वहतीयाः	३११
प्राग्घितीयाः	३१८
छयदधिकारः	३२०
आर्हीयाः	३२३
प्राग्वतीयाः	३२९

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुल्यार्हभावकर्मार्थाः	३३४	तनादयः	१५१
पाञ्चमिकाः	३३९	क्र्यादयः	१५४
मत्वर्थीयाः	३४३	चुरादयः	१६१
प्राग्दिशीयाः	३५३	णिजन्तप्रकरणम्	१७८
प्रागिवीयाः	३५६	सन्नन्तप्रकरणम्	१८४
स्वार्थिकाः	३६४	यङन्तप्रकरणम्	१९१
द्विरुक्तप्रकरणम्	३७३	यङ्लुक् प्रकरणम्	१९४
		नामधातु ,,	१९८
उत्तरार्द्धे		आख्यातविशेषप्रकरणम्	२०५
तिङन्तप्रकरणम्	१	पदव्यवस्था	२०८
भ्वादयः	८	भावकर्मतिङ्प्रकरणम्	२२१
भ्वाद्यन्तर्गणिकाः	७७	कर्मकर्तृप्रकरणम्	२२८
अदादयः	९२	लकारार्थ ,,	२३१
जुहोत्यादयः	१०९	कृदन्त ,,	२४४
दिवादयः	११५	कृत्यप्रत्ययाः	२४५
स्वादयः	१२९	पूर्वकृदन्तप्रकरणम्	२५२
तुदादयः	१३४	उणादिप्रकरणम्	२७८
रुधादयः	१४७	उत्तरकृदन्तप्रकरणम्	३०६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः

प्रतिसंस्कृता

सिद्धान्तकौमुदी

(विशेष-विवृतिसहिता)

उपक्रमः—

संविन्मयीं क्रमोन्मेषाल्लोकतन्त्रप्रवर्तिनीम् ।
आम्नातां बहुधाचार्यैर्देवीं वाचमुपास्महे ॥१॥

अव्यक्तपरचिद्रूपा वाग्देवी क्रमशो विकासेन वैखरीरूपा भूत्वा लोकव्यवहारं प्रवर्तयति, या पूर्वाचार्यैरनेकधा निरूपिता परिशीलिता च तां देवीं वाचमुपास्महे ।

विशेष-विवृतिः—

अनुत्तरमुमाश्लिष्टमिन्दुशेखरमक्षरम् ।
निगमागमविद्यानामादितत्त्वमुपास्महे ॥

वि. १ कुण्डलिनीमधिष्ठिता पराचिच्छक्तिः क्रमेणोन्मिषन्ती नाभौ पश्यन्तीरूपा, हृदये मध्यमारूपा भूत्वा कण्ठप्रदेशाद्वैखरीरूपेणाभिव्यक्ता मनोभावान्प्रकाश्य लोकव्यवहारं निर्वाहयति, सेयं ज्योतिर्मयी वाग्देवी पूर्वैर्बहुधोपासिता । उक्तं च पुञ्जराजेन—"त्रीणि ज्योतींषि त्रयः प्रकाशाः— योयं जातवेदाः, यश्च पुरुषेष्वान्तरः प्रकाशः, यश्च प्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशः, तत्रेदं सर्वमुपनिबद्धं यावत्स्थास्नु चरिष्णु च" इति । कविनाप्युक्तम्—"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते" इति ।

वि. २ शब्दतत्त्वविषये पूर्वाचार्याणां बहुशो दर्शनानि—नादाभिव्यङ्ग्यं स्फोटाख्यं निरवयवं नित्यं द्रव्यं शब्द इति वैयाकरणा मीमांसकाश्च, कार्यकारणोभयविरोधी आगमापायी श्रोत्रग्राह्य आकाशस्याव्याप्यवृत्तिगुणः शब्द इति तार्किकाः, परा चिच्छक्तिरेव क्रमशोभिव्यक्ता शब्द इति तन्त्रविदः, चिच्छक्तेः शब्दाद्यात्मकभूतोत्पत्तिवादिनो वेदान्तिनोपि प्रायः चितः शब्दवादमुपोद्बलयन्ति । शब्दोत्पत्तिप्रक्रियायामपि विभिन्नाः प्राचां दृष्टयः—"वायुः खात्, शब्दस्तत्, सङ्करोपहितः, स सङ्घातादीन्वाक् (शुक्लयजुःप्रातिशाख्ये)" इत्यादिना नाभेः प्रयत्नप्रेरितो वायुः कण्ठताल्वादिस्थानेषु जिह्वाग्रादिकरणव्यापारेण सङ्घट्टं प्राप्तस्तत्तद्वर्णात्मको भवतीति शिक्षाकृद्भिः प्रतिपाद्यते । पाणिनिनापि स्वशिक्षायामात्मा बुद्ध्या समेत्यार्थान्नित्यादिनैवमेव निरूप्यते । शब्दतन्मात्राभ्यः स्थूलशब्दोत्पत्तिं वदन्तः सांख्यपातञ्जलाः शब्दाणुभ्यः स्थूलशब्दोत्पत्तिं मन्यन्ते । गान्धर्वविदोपि श्रुतिभ्यस्तु स्वराः सप्तेति श्रुत्याख्यानामणूनां सङ्घातं स्थूलशब्दं वदन्ति । पुद्गलाख्येभ्यः शब्दाणुभ्यः स्थूलशब्दनिष्पत्तिं वदन्त आर्हता अप्येतन्मतं प्रायोनुवर्तन्ते । कुण्डलिनीगता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परा चिदेव ज्ञानेच्छाक्रियाशक्तिभिः समुच्छ्वसन्ती पश्यन्ती—मध्यमा—वैखरीरूपैर्विकसन्ती चतुर्थ्यामवस्थायां व्यक्त-शब्दात्मिका भवतीति ज्ञानस्य शब्दात्मकतां तन्त्रविदो वदन्ति। "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" इति श्रुतिरप्येतन्मतमुपष्टम्भनाति। आख्यातोपयोगे इति सूत्रव्याख्यायां "ज्योतिर्वज्ज्ञानानि भवन्ति" इति भाष्योक्तिमादाय "उपाध्यायज्ञानानि भिन्नानि भिन्नशब्दरूपतामापा-द्यमानानि सन्ततान्युच्यन्ते, ज्ञानस्य शब्दरूपतापत्तिरिति दर्शनमत्र भाष्यकारस्य" इति कैयटविवरणेन ज्ञानस्यैव शब्दरूपत्वं पतञ्जलेरभिमतं वेद्यते। मञ्जूषाकृदादिभिरपि परचितो मध्यमादिक्रमेण विकासवाद उपदर्शितः। तदेवं शब्दविषये वायुवादोऽणुवादो ज्ञानवादश्चेति त्रीणि मुख्यानि प्रस्थानानि। तदिदं मतत्रयं भर्तृहरिणा ब्रह्मकाण्डे—"लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना। स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते॥ अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः। छायातपतमः-शब्दभावेन परिणामिनः॥ अथेदमान्तरं रूपं सूक्ष्मवागात्मना स्थितम्। व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥" इति प्रत्येकं निर्दिश्य, "वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते। कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थितः॥" इत्यन्ते उपसंहृतम्। वंश्यादौ वायोः शब्दोदयाद्वायुवादं, शब्दानुकृतियन्त्रचक्रिकादौ एकैकवर्णध्वनेराविर्भावाय बहूनां बिन्दूनां सङ्घटनादणु-वादं, यथा यथान्तर्ज्ञानोदयस्तथा तथा वागुदयाज्ज्ञानवादमुपोद्बलयन्ती तर्कदृष्टिरपि नाद्यापि शब्दतत्त्वमवधारयतीत्यतिगहन-मिदं यथाप्रतिभातं निरूप्यते तैर्थिकैः। उक्तं चाभियुक्तैः—"यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्य-थैवोपपाद्यते॥"

धर्म्यां वाचमपोद्धृत्य रक्षोहादेः प्रवर्तकाः।
शब्दानुशासनाचार्या गमयन्ति परं पदम्॥२॥

अभ्युदयनिश्रेयसयोरुपकुर्वाणान्पुण्यान्संस्कृतशब्दाननादिसिद्धानविकारेण रक्षितुमूहितुं लघुनो पायेन बहुशोवबोधयितुं च प्रकृतिप्रत्ययादिविभागकल्पनया व्याकृतवन्तः शब्दानुशासनस्याचार्या नित्यसत्यं पदं बोधयन्ति प्रापयन्ति च।

वि. "अथ शब्दानुशासन"मिति वैदिकानां लौकिकानाञ्चानादिसिद्धानां पुण्यानां साधुशब्दानां प्रकृतिप्रत्ययादि-विभागकल्पनेनान्वाख्यानरूपमनुशासनं व्याकरणशास्त्रे क्रियते इति भाष्यकृताभिहितम्। एकस्यापि साधुशब्दस्य बहवोऽप-भ्रंशाः, लघीयानुपादानाय साधुशब्दोपदेशः, गरीयान्हानायापशब्दनिर्देशः, अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः, बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदं शब्दानां पारायणं प्रोवाच तथापि नान्तं जगामेति लघुनोपायेन साधुशब्दानवगन्तुं व्याकरणमावश्यकम्। अनुशिष्यन्ते विविच्यन्तेनेन शब्दा इत्यनुशासनं व्याकरणशास्त्रम्। "वाग्वै पराच्यव्याकृतासीत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति, तामिन्द्रो मध्यतोवक्रम्य व्याकरोत्" इत्यव्याकृतामप्रमेयां दैवीं वाचं व्याकर्तुं देवैः प्रार्थितेनेन्द्रेणादौ व्याकरणस्य निर्देशनात्तदुपक्रमं व्याकरणमवगम्यते। ततो महर्षिपरम्परया काशकृत्स्नापिशल्यादि-भिश्च निबद्धं व्याकरणमनुसन्धाय कारुणिकेन भगवता पाणिनिनाष्टाध्यायीसूत्रैस्तत्संग्रहणं, तत्सूत्राणां कुणिप्रभृतिभिरा-चार्यैर्विवरणं, कात्यायनवार्तिकवाक्यान्यन्तर्भाव्य पतञ्जलिना महाभाष्यरूपं व्याख्यानं, तदनुयायिभिरर्वाचीनैरप्याचार्यैर्बहुशो निबन्धनैस्तदुपबृंहणं च व्यधायि। तेनेदं सर्वाङ्गपरिपूर्णं पाणिनीयं व्याकरणं बहोः कालाल्लोकैराद्रियमाणं तदाचार्यान्वि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शेषयति। साधुभिर्व्याकरणसंस्कृतैः शब्दैर्व्यवहर्तव्यं, तैरेवेहामुत्र चाभ्युदयः, उक्तं च वार्तिककृता—"शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देने"ति। त एव साक्षाद्वाचकाः, तदपभ्रंशास्तु साधुशब्दानन्तरा कृत्वा केवलं व्यवहारनिर्वाहकाः।

"शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते॥

यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥"

इत्याद्युक्तेः साधुशब्दानामवयवशो विभज्य निर्वचनं ज्ञायमानं पुरुषार्थः, न च तत्रोपायान्तरं लघीयोऽन्यदस्ति व्याकरणात्। अनादिताऽनपभ्रष्टताऽभ्युदययोग्यता, व्याकरणपरिकर्मिते चेतसि परीक्षकाणां रत्नतत्त्ववच्चकासती शब्दानामवान्तरजातिर्वा साधुत्वं, तत्प्रज्ञापनं व्याकरणस्य मुख्यं प्रयोजनमिति पदमञ्जरीकारः। रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति पारम्परिकाणि प्रयोजनानि भाष्यकृता निर्दिष्टानि—व्याकरणेन यथावद्विज्ञातेन वेदानां साधूनां लौकिकशब्दानां चाविकारेण परिरक्षणं, कार्योपयोगिशब्दान्तरपरिणामरूप ऊहः, सषडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यागमपरिपालन, मनन्तशब्दानां लघुनोपायेन परिज्ञानं, स्वराद्यसन्देहश्च। अपशब्दप्रयोगेण म्लेच्छा माभूम, दुष्टाञ्छब्दान् माप्रयुङ्क्ष्महि, अनर्थकं माधिगीष्महि, शब्दप्रयोगकुशला भवेम, अविद्वांसो माभूम, विभक्तिविदो भवेम, आर्त्विजीना भवेम, शब्दऋषभविदो भवेम, दृष्टश्रुतवाचो भवेम, सक्तुमिव तितउना वाचं पुनीमहि, अपशब्दप्रयोगेण प्रायश्चित्तीया माभूम, कृत्तद्धितादिविशेषविदो भवेम, सत्यदेवाः स्यामेति चाध्येयं व्याकरणमिति भाष्यकारः।

सिद्धान्तकौमुदी भट्टैर्निबद्धा प्रक्रियाध्वना।
प्रतिसंस्क्रियते लोकदृष्ट्या व्युत्पत्तिहेतवे ॥३॥

पाणिनीयमष्टाध्यायीव्याकरणं श्रीभट्टोजिदीक्षितेन प्रक्रियोचितक्रमेण प्रक्रियाप्रकाशक्रमेण वा यथाविभागं परिवर्त्य विवृत्य च निबद्धा सिद्धान्तकौमुदी लोकोपयोगितया विश्रुतास्ति। सैवेयमिदानीन्तनलोकव्यवहारदृशाऽसामयिकाननावश्यकानंशानुद्धृत्य यत्र तत्र प्रकीर्णान्बोधोपयोगिनः सामान्यान्विशेषाँश्च विषयान् मूले विवृतौ च यथार्हमनुप्रवेश्य प्रतिसंस्क्रियते।

वर्णसमाम्नायः—

अइउण्। ऋऌक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या णादयः, लण्सूत्राकारश्चेत्संज्ञकाः। हकारादिष्वकारस्तु सुखेनोच्चारणार्थ एव।

वि. १ निरंशा व्यक्तशब्दा वर्णाः। ते स्वरा व्यञ्जनानि चेति द्विधा। स्वयं राजन्ते व्यञ्जनसाहाय्यं विनापि स्वातन्त्र्येणोच्चार्यन्ते इति स्वरा अकारादयः। विशेषेणाञ्जन्ति स्वरसाहाय्येनैवोच्चार्यमाणतयाऽग्रतः पश्चाद्वा स्वरेण सह मिलन्तीति व्यञ्जनानि कादीनि। उक्तं च उच्चैरुदात्त इति सूत्रभाष्ये—"नपुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति, अन्वर्थं च निर्वचनं, स्वयं राजन्ते इति स्वराः, अन्वग्भवति (अनुगच्छति) इति व्यञ्जनम्" इति। "विविधं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गच्छत्यनुपरागवशादित्ययमर्थः पर्यायान्तरेण भाष्यकृताऽभिहितः" इति प्रदीपे। "स्वर्यन्ते पठ्यन्ते इति स्वराः" इत्युव्वटीये। "यः स्वयं राजते तं तु स्वरमाह पतञ्जलिः। उपरि स्थायिनानेन व्यङ्ग्य व्यञ्जनमुच्यते" इति तैत्तिरीय-प्रातिशाख्यव्याख्यायाम्। लेखे कृष्णादिवर्णैरभिव्यज्यमानतयाऽकारादिरेखासङ्केता वर्णाः, तदभेदोपचारादुच्चामार्यणा अकारादयोपि वर्णा उच्यन्ते। लिख्यमाना वर्णसङ्केताः सूच्यादिभिरुल्लिख्यमानतया लेखाः, मष्यादिभिर्लिप्यमानतया लिपयः अप्युच्यन्ते। संख्यासङ्केतास्तु चिन्हरूपतया अङ्काः कथ्यन्ते। वर्णा नित्यत्वमते स्वतः, अनित्यत्वमतेपि लेखेन चिरकालावस्थायितयाऽक्षराण्यप्यभिधीयन्ते। उक्तं च वार्तिके—"अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्" इति। शिक्षासु—"स्वरोऽक्षरम्, सव्यञ्जनोऽव्यञ्जनो वा स्वरोऽक्षरम्, व्यञ्जनं स्वराङ्गम्" इत्याद्युक्तेस्तन्मते केवलव्यञ्जनानि नाक्षराण्यपितु सव्यञ्जना अव्यञ्जना वा स्वरा एव। पाणिनिना त्वक्षरसमाम्नाये स्वराणां व्यञ्जनानाञ्चोपदेशादिहोभये अप्यक्षराणि वर्णाश्च। वर्णमातृकोपदेशोऽक्षर(वर्ण)समाम्नाय इत्युच्यते। अत्र स्वाभीष्टक्रमेण वर्णोपदेशः प्रत्याहारार्थः, प्रत्याहारो लाघवार्थः। उक्तं च वार्तिककृता—"वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते। तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते॥ धर्म्यश्चायमुपदेशः" इति। भाष्यकृताप्युक्तम्—"सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते" इति।

वि. २ वर्णास्तु पूर्वसम्प्रदाये पाणिनीयशिक्षायां—"त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते स्थिता" इति, ह्रस्व-दीर्घप्लुता अइउऋवर्णा, ह्रस्वप्लुतौ लृकारौ, दीर्घप्लुता एचः, पञ्चविंशतिः स्पर्शाः, यादयोऽष्टौ, चत्वारो यमाः, अनुस्वार-विसर्गजिह्वामूलीयोपध्मानीया एते त्रिषष्टिः; ह्रस्वदीर्घानुस्वारभेदेन चतुःषष्टिः; शुक्लयजुःप्रातिशाख्ये—हुमितिनासिक्येन सह पञ्चषष्टिः; तैत्तिरीयप्रातिशाख्ये—षोडश स्वराः, पञ्चविंशतिः स्पर्शाः, चत्वारोन्तःस्थाः, षडूष्माणः, विसर्गानुस्वारळकाराः, पञ्च नासिक्याश्चेत्यूनषष्टिः; ऋक्प्रातिशाख्ये—ह्रस्वदीर्घा अको दश, एचश्चत्वारः, कादिहान्तास्त्रयस्त्रिंशज्जिह्वामूलीयोपध्मा-नीयविसर्गानुस्वारा इत्येकपञ्चाशत्; एचां सन्ध्यक्षरतया द्व्यात्मकत्वेन पृथगगणने सप्तचत्वारिंशत्; तन्त्रप्रक्रियायां—ह्रस्व-दीर्घा अकः, एचश्चत्वारः, विसर्गानुस्वारौ, कादयोहान्तास्त्रयस्त्रिंशत् क्षकारश्चेति पञ्चाशद्वर्णमातृकाः आदिक्षान्तवर्णानुपादाय अक्षमालेति व्यवह्रियन्ते इति स्वस्वप्रस्थानपरिपाट्या विभिन्नसंख्याभिर्वर्णाः परिगण्यन्ते। प्राच्याचार्याभिमतोऽक्षमाला-सम्प्रदायो व्यावहारिकः सर्वसाधारणश्च।

वि. ३ प्राच्यानामार्याणां पञ्चाशद्वर्णमातृकासु गलबिलादोष्ठान्तं कण्ठताल्वमूर्धदन्तौष्ठेषु कचटतपवर्गाणामुत्पत्ति-स्थानक्रमेणानुक्रमः, तत्रापि पूर्वं श्वासाघोषयोः प्रथमद्वितीययोस्ततो नादघोषयोस्तृतीयचतुर्थयोस्तत्रापि पूर्वमल्पप्राणस्य ततो महाप्राणस्य ततो नासिक्यस्य पञ्चमस्य निवेशः, तदनु अन्तःस्थानां, तदनूष्मणां, ततः काचित्कोष्मणो ळकारस्य, सर्वान्ते संयुक्तव्यञ्जनस्य क्षकारस्य, व्यञ्जनेभ्यः पूर्वं स्थानक्रमेण अभिनवगुप्ततन्त्रालोकोक्तरीत्याऽनुत्तरेच्छोन्मेषादिक्रमेण वा प्रधानस्वराणां, तदनु सन्ध्यक्षरस्वराणां, ततः सर्वस्वरयोगिनोरनुस्वारविसर्गयोर्निवेश इति सोपपत्तिको विन्यासक्रमः। भोटाख्याङ्गलादिवर्णमातृकासु न तथा क्रमोपपत्तयः, निरर्थकानुबन्धयोगः, सर्वत्रोच्चारणेष्वनैकरूप्यं, वर्णानां न्यूनतया केषाञ्चिदुच्चारणानां वर्णयोगादिना निर्वहणीयता च, चीनाक्षराणामसंख्येयतापीति सोपपत्तिका निरनुबन्धाऽनुगतोच्चारणा व्यवहारनिर्वाहिकेयं प्राच्याऽक्षमाला शिरोधार्या निर्धार्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ४ पाणिनीयशिक्षायां वेदानुकूलत्रिचतुःषष्टिवर्णोपदेशेप्येषु चतुर्दशसूत्रेषु अकाराद्युपदेशेन तत्सवर्णानां दीर्घादीनामपि लाभान्न तेषां पृथगुपदेशः। उक्तं च भाष्ये—"आकृत्युपदेशात्सिद्धम्, अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति, एवमिवर्णादिः" इति। ऋलृवर्णयोर्मिथः सावर्ण्येपि विभिन्नजातितया क्लृप्त इत्यादौ प्लुतसिद्धये तत्सावर्ण्यस्यानित्यताज्ञापनेन च पृथगुपदेशः। लृकारस्तु दीर्घो न, ह्रस्वोपि क्लृपावेव। एदैतोरोदौतोश्च स्थानप्रयत्नसाम्येपि सावर्ण्यनिषेधात्पृथगुल्लेखः। एचस्त्वकारेकारादियोगात्मकतया सन्ध्यक्षराणि, तेष्वव्यपवृक्तावयवतयाऽवयवाश्रयो विधिर्न। जिह्वामूलीयोपध्मानीयानुस्वारविसर्गयमानां कार्यानुरोधेनाऽकारोपरि शर्षुचान्तः पाठाभ्युपगमेन न स्पष्टोपदेशः। हकारस्याऽटि प्रवेशेन अर्हेणेत्यत्राङ्व्यवाये णत्वसिद्ध्यर्थं, शलि प्रवेशेनाऽधुक्षदित्यत्र शलन्तधातोः क्ससिद्ध्यर्थं च हकारस्य द्विरुपदेशः इति स्वप्रक्रियालाघवाय त्रिचत्वारिंशदेव वर्णा उपदिष्टाः। एषु सूत्रेष्वादितश्चतुर्भिः क्रमशः कण्ठ्यतालव्यौष्ठ्यमूर्धन्यदन्त्या मूलस्वराः सन्ध्यक्षरस्वराश्च निर्दिष्टाः, ततो दशभिर्व्यञ्जनानि, तत्रापि द्वाभ्यां यणसम्प्रसारणाभ्यां मिथो विनिमयेन स्वरव्यञ्जनोभयस्थानीया अन्तःस्थाः, ततः प्रत्याहारानुरोधिक्रमेण वर्गाणां पञ्चमचतुर्थतृतीयद्वितीयप्रथमाः, ततः शेषा ऊष्माणो निर्दिष्टाः। इत्थं सर्वप्रक्रियामूलभूतप्रत्याहारसिद्ध्युपयोगिक्रमेण व्यवस्थितवर्णविन्यासकौशलं दर्शयन्तीमानि चतुर्दशसूत्राणि महेश्वरप्रसादस्फुरितानि समग्रस्यास्य व्याकरणस्य मूलसूत्राणि।

वि. ५ एष्वकारादीनां स्वरूपेणानुकार्यरूपेण वा सतोप्यर्थवत्त्वस्याविवक्षितत्वान्न स्वाद्युत्पत्तिः, उत्पत्तावप्यव्ययत्वेन लोपो वा; वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्स्वरसन्धिरपि नेति प्रदीपकारः। वर्णानामसन्देहेन बोधहेतोः, संहिताया अविवक्षणात्, स्वराणां चादिपाठेन निपातानां प्रगृह्यतया प्रकृतिभावाद्वा न सन्धिः, लाघवदृशा कारप्रत्योपि न कृतः।

प्रत्याहाराः—

हलन्त्यम् (१-३-३) हलितिसूत्रेऽन्त्यमित्स्यात्। इति हल्सूत्रान्त्यलस्येत्त्वे, आदिरन्त्येन सहेता (१-१-७१) अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। इति हादिहान्तानां हल्संज्ञासिद्धौ, हलन्त्यम् (१-३ ३) उपदेशेन्त्यं हल् इत्स्यात्। उपदेश आद्योच्चारणम्। इति तत्तत्सूत्रान्त्यणादीनामित्त्वे आदिरन्त्येनेति अइउवर्णानामणसंज्ञा। एवम् इक् इति इउऋलवर्णानाम्, एङ् इति एओवर्णयोः, अच् इत्यकाराद्यौकारान्तानां, हश्िति हादिहान्तानाम्, अलिति अकारादिहान्तानां संज्ञा। एवं यण् अट् जश् अश् शल् इत्यादयः। आदिरन्त्येनेति कृताः संज्ञा प्रत्याहाराः, प्रत्याहारैः इकोयणचीत्यादिशास्त्रलाघवम्। उपदेशेऽजनुनासिक इत् (१-३-२) उपदेशेऽनुनासिकोच् इत्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। इति लणसूत्राकारस्य अनुनासिकतयेत्त्वे तमन्त्यं हयवरेति रेफमादिं गृहीत्वादिरन्त्येनेति रलयोः रप्रत्याहारः, तेन रलयोर्बोधः।

वि. १ इतो लोपविधानेन एतीति इत् इत्यन्वर्थेयं संज्ञा। पाणिन्याद्याचार्याणामाद्योच्चारणमुपदेशः। उक्तं च "धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्। आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः" इति। प्रतिज्ञानुनासिक्या इत्यस्य पाणिनीयशास्त्रे इमे वर्णा अनुनासिकाः पठिता इति प्रतिज्ञया (व्यवहारेण) विज्ञेयं भवतीत्यर्थः। एवमात्मनेपदिधातुष्वनुदात्ता अपि व्यवहारतो विज्ञेयाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २ हलन्त्यमिति सूत्रस्यावृत्त्या एकेन हलि हल्सूत्रेऽन्त्यमिदित्यर्थेन हलो लस्येत्त्वे हल्प्रत्याहारसिद्धौ द्वितीयेन हल् (हल्प्रत्याहारान्तर्गतं) अन्त्यमिदित्यर्थेनान्येषामनुबन्धानां णादीनामित्त्वेन प्रत्याहारान्तराणां सिद्धिः। अन्यथा प्रथमार्थमात्रकरणे हल्प्रत्याहारमात्रस्य सिद्धिर्नत्वन्येषाम्, द्वितीयार्थमात्रकरणे हल्प्रत्याहारसिद्धिं विना इत्पदार्थाज्ञानम्, इत्पदार्थज्ञानं विना हल्प्रत्याहारासिद्धिरित्यन्योन्याश्रयदोष आपद्येत, सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति न्यायेन नैकस्यार्थद्वयमत उभयार्थप्रतीतये सूत्रस्यावृत्तिः।

वि. ३ प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अनेनेति प्रत्याहारो नाम विवक्षितवर्णानां संक्षिप्तसङ्केतः। यथाहि लोके तवाभिधानादित्याद्यक्षरमात्रेणापि तार्दर्यवासुकिबोधस्तथात्र व्याकरणे आद्यन्तवर्णसङ्केतैरन्त्यवर्जमादिमध्यवर्णानां बोधः। प्रत्याहारेषु मध्यगतानामपि सूत्रान्तानुबन्धवर्णानां तु न ग्रहः; अन्यथा अनुनासिक इत्यत्र ककारस्याप्यचि ग्रहेण इकारस्य यणापत्त्या तथा निर्देशो नोपपद्येत। उक्तं च वार्तिककृता—"प्रत्याहारेनुबन्धानां कथमज्ग्रहणेषु न। आचारादप्रधानत्वा-ल्लोपश्च बलवत्तरः" इति। प्रत्याहारास्तु-ङ्णण (पूर्व) वटान्ता अङ् यञ् अण् छव् अट् इत्येकैकम्, षान्तौ झष् भषौ द्वौ, कणा (उत्तर) न्ता अक् इक् उक् इण् अण् यण् इति त्रयः, चमान्ता अच् इच् एच् ऐच्, अम् यम् ङम् जम् इति चत्वारः, यरान्ता अय् मय् झय् खय् चय्, अर् खर् शर् झर् चर् इति पञ्च, शलान्ता अश् बश् जश् झश् हश् वश्, अल् हल् वल् रल् झल् शल् इति षट्, इति रप्रत्याहारेण सह चतुश्चत्वारिंशत्। उक्तं च—एकैकं ङ्णणवटैः, षेण द्वौ, त्रय इह कणाभ्याम्। चत्वारस्तु चमाभ्यां, पञ्च यराभ्यां, शलाभ्यां षट् इति।

स्वरभेदा:—

ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१-२-२७) उ इत्येकमात्रिकः, ऊ इति द्विमात्रिकः, ऊ३ इति त्रिमात्रिकः। एषां वामुच्चारणकाल इवोच्चारणकालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। उच्चैरुदात्तः (१-२-२९) ताल्वादिषु स्वस्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्। नीचैरनुदात्तः (१-२-३०) ताल्वादिषु स्वस्थानेष्वधोभागे निष्पन्नोजनुदात्तसंज्ञः स्यात्। समाहारः स्वरितः (१-२-३१) समाहारो मिश्रः। उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन्सोऽच्स्वरितसंज्ञः स्यात्। तस्यादित उदात्तमर्धह्रस्वम् (१-२-३२) ह्रस्वग्रहणमतन्त्रम्। स्वरितस्यादावर्धमुदात्तं बोध्यम्, उत्तरार्द्धं परिशेषा-दनुदात्तम्। मुखनासिकावचनोऽनुनासिकः (१-१-८) मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनु-नासिकसंज्ञः स्यात्। तद्भिन्नोऽननुनासिकः। तदित्थं ह्रस्वदीर्घप्लुतानामुदात्तानुदात्तस्वरितानाम-नुनासिकाननुनासिकयोश्च भेदेन अ इ उ ऋ वर्णा अष्टादशधा, लृवर्णो दीर्घाभावाद्द्वादशधा, एचो ह्रस्वाभावाद्द्वादशधा।

वि. उ ऊ ऊ ३ इति कुक्कुटशब्दानुकरणम्। ऊकाल इत्युच्चारणकालः। एकमात्रो ह्रस्वः, द्विमात्रो दीर्घः, त्रिमात्रः प्लुतः, व्यञ्जनं त्वर्धमात्रिकम्। प्लुतेषु ३इति मात्रासङ्केतः। उच्चैर्नीचैरिति स्वरस्योच्चत्वं नीचत्वं न विवक्षित-मपितु ताल्वादिस्थानानामुच्चभागे नीचभागे चोत्पन्नत्वमेव, तेनोपांशुपठितस्यापि स्थानभागविशेषेण तथात्वं भवति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थानानुक्रमस्य कण्ठादित्वेपि प्राक्सम्प्रदायानुरोधेन ताल्वादित्वं व्यवहृतम् । वर्णानां सन्धिक्रियानिर्देशे इको यणिति तालु-स्थानीयानां सर्वप्रथममुल्लेखात्किल ताल्वादिकत्वमभ्युपगतं स्यात् । उदात्ते उच्चार्यमाणे गात्राणामायामः, कण्ठविवरस्य संवरणं, वायोः शनैर्निष्क्रमणेन गलावयवशोषणात्स्वरस्य रूक्षता (अस्निग्धता); अनुदात्ते तूच्चार्यमाणे गात्राणामन्ववसर्गः (शैथिल्यं), कण्ठविवरस्य विवरणं, वायोर्महत्त्वेन शीघ्रं निष्क्रमणे गलावयवानामशोषणात्स्वरस्य स्निग्धता (मृदुता) च भवति; उदात्तानुदात्तत्वमिश्रे स्वरिते आदितोर्धमात्रांशे उदात्तता शेषांशेऽनुदात्तता । उत् (उपरिभागे) आत्तः (गृहीतः) उदात्तः, अनुत् (अधोभागे) आत्तः (गृहीतः) अनुदात्तः, स्वरौ (उदात्तानुदात्तत्वे) अंशभेदेन जाते अस्येति स्वरितः इत्यन्वर्थानीमानि नामानि । उदात्तादिव्यवहारो वेदे प्रसिद्धतरः । तत्रानुदात्तेऽधस्तिर्यग्रेखया, स्वरिते उपरि लम्बरेखया, उदात्ते अविशेषेण परिचयो विधीयते; यजुर्वेदे हस्तस्य उपर्यधोमध्यभागावस्थापनेनापि स्वरविशेषो व्यक्तीक्रियते । यथा आये इत्यत्राकारैकारावुदात्तौ, अर्वाङ् इत्यत्राद्याकारोनुदात्तः । नासिका नाम अन्तरास्ये वितते चर्मविशेषे सम्बद्धा रेखा, तामनुगतः (तस्यामपि वायोराघातेन निष्पन्नः) अनुनासिकस्तद्भिन्नोऽननुनासिकः । अचोऽनुनासिका अननुनासिकाश्च । अणोऽप्रगृह्यस्यानुनासिक इति सूत्रान्तरेणाप्रगृह्यस्याणोऽवसानस्थस्यानुनासिको वा विधीयते, यथा—दधिँ दधि । अन्यत्रापि क्वचनानुनासिको विधीयते । व्यञ्जनेषु य व ला अनुनासिका अननुनासिकाश्च, वर्गपञ्चमा अनुनासिका एव, अन्ये त्वननुनासिकाः । अपञ्चमेष्वनुनासिकेषु तत्प्रत्यायनाय उपर्यर्धचन्द्रचिह्नं विन्दुद्वयं वा लिख्यते । अनुस्वारोप्यनुनासिक एव ।

व्यञ्जनभेदाः—

कादयो मावसानाः स्पर्शाः; तेषु क-च-ट-त-प वर्गाः पञ्च । ते कु चु टु तु पु शब्दैरपि व्यवह्रियन्ते । यणो (य व र लाः)ऽन्तस्थाः । शलः (श ष स हाः) ऊष्माणः । अनुस्वारविसर्गजिह्वामूलीयोपध्मानीया अयोगवाहाः । ते त्वकारोपरि शर्षु चान्तः पठिततया स्वरा व्यञ्जनानि वा । अचः स्वराः; तेभ्यः परौ अं अः इत्यनुस्वारविसर्गौ । ≍क ≍प इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ ।

वि. वर्णेषु स्वस्थानकरणस्पर्शोद्भवाः कादयः पञ्चविंशतिः स्वस्थानानि स्पृशन्तीति स्पर्शाः । स्पर्शोष्मणामन्तः(मध्ये) तिष्ठन्तीति य व र ला अन्तःस्थाः ईषत्स्पृष्टतया समीपस्था इति वा । ऊष्मा वायुस्तत्प्रधानाः श ष स हा ऊष्माणः । स्वर्यन्ते इति स्वराः,ताननुगत इत्यनुस्वारः । "अनुस्वर्यते पश्चार्द्धेन स्वरवदुच्चार्यते इत्यनुस्वारः" इति तैत्तिरीयप्रातिशाख्यव्याख्यायाम् । विशेषेण सृज्यते (क्षिप्यते) इति विसर्गः, वायोर्विसर्जनेनोद्भूतो वा विसर्गः विसर्जनीयः । योगो वर्णसमाम्नायोपदेशस्तद्रहिता अपि वहन्ति (व्यवहारमनुवर्तन्ते) इत्ययोगवाहा इति भाष्यकारः । "अकारादिना वर्णेन सहभूताः सत्तां वहन्ति(आत्मलाभं प्राप्नुवन्ति) इत्ययोगवाहाः" इति शुक्लयजुःप्रातिशाख्यव्याख्यायाम् । न विद्यते योगः (संयोगः) वर्णान्तरेषु ते अयोगाः, वाहाः, (व्यावहारिकाः) इत्यप्यन्यत्र निर्वचनम् । अयोगवाहाः केवलं न प्रयुज्यन्तेऽपितु स्वरैः सह मिलन्ति । जिह्वामूलोद्भवो जिह्वामूलीयः । उरस उपध्मानोद्भव उपध्मानीयः । अग्निः पलिक्क्निः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यादौ यमलरूपेण वर्तमाना गकारादयो यमा अप्ययोगवाहाः, ते तु वेद एव व्यवह्रियन्ते। जिह्वामूलीयोपध्मानीयौ तु वेद इव लोकेपि भवतः, परं विसर्गेण सह वैकल्पिकतया लेखसौकर्येण प्रायो विसर्गात्मना प्रदर्श्येते।

स्थानप्रयत्नाः—

मुखस्यान्तर्यो वर्णो यत्र निष्पद्यते, तस्य तत्स्थानम्। कण्ठ-तालु-मूर्ध-दन्तो-ष्ठ-नासिका-जिह्वा-मूलानि स्थानानि। अकु (कवर्ग) ह विसर्जनीयानां कण्ठः। इचु (चवर्ग) यशानां तालु। ऋटु (टवर्ग) रषाणां मूर्धा। लृतु (तवर्ग) लसानां दन्ताः। उपू (पवर्ग) पध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठौष्ठम्। वकारस्य दन्तौष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य। इति स्थानानि। यत्नो द्विधा—आभ्यन्तरः (अन्तरवयवगतः), बाह्यः (बहिरवयवगतः) च। आभ्यन्तरश्चतुर्धा—स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। ईषत्स्पृष्टमन्तस्थानाम्। विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्; प्रक्रियादशायां तु विवृतमेव। बाह्यप्रयत्नस्त्वेकादशधा—विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। वर्गाणां प्रथमद्वितीयाः खयः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां (खरां) विवारः श्वासोऽघोषश्च, अन्येषां (हशां) संवारो नादो घोषश्च। वर्गाणां प्रथमतृतीयपञ्चमा यरलवाश्चाल्पप्राणाः, अन्ये द्वितीयचतुर्थौ शल (शषसहाः) श्च महाप्राणाः। स्वरा उदात्तानुदात्तस्वरिताः। इति प्रयत्नाः। बाह्यप्रयत्ना यद्यपि सवर्णसंज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्ते।

वि. १ ओष्ठात्प्रभृति प्राक्काकलकादास्यमिति भाष्ये। काकलकश्चुबुकस्याधस्ताद्ग्रीवायामुन्नतप्रदेश इति कैयटः। तदन्तर्यस्मिन्नंशे जिह्वाग्रादीनां करणानामुपश्लेषेण यस्य वर्णस्योत्पत्तिरभिव्यक्तिर्वा तत्तस्य स्थानमुच्यते। पाणिनीयशिक्षायाम्–"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च" इत्युक्तम्। पञ्चमयुतोऽन्तस्थसंयुतश्च हकार औरस्यः, असंयुक्तस्तु कण्ठ्यः, अहौ कण्ठ्यौ, कवर्गो जिह्वामूलीयः, अयोगवाहा आश्रय(स्वाश्रयभूतस्वर) स्थानभागिन इत्यपि विशेषः। ऋक्प्रातिशाख्यादिषु शिक्षान्तरेषु च विसर्गहकाराबुरःस्थानीयौ, ककारो जिह्वामूलीयः, रेफो वार्त्स्यः (दन्तमूलोपर्युच्छूनप्रदेशो वर्त्सस्तत्र भवः) इत्यादिः स्थानविशेषोपि निर्दिष्टः। एवं तत्र तत्र विशेषेऽनुभवभेदो मूलम्।

वि. २ वर्णोत्पत्तेः पूर्वं जायमानः कारणरूपः, अन्तरवयवेषु जायमानतया पुरुषान्तरेणालक्ष्यो वा प्रयत्नविशेष आभ्यन्तरः। तत्र करणं जिह्वा तदग्रोपाग्रमध्यमूलानि वा। शिक्षादिषु हन्वाद्यन्तरवयवविशेषा अपि करणतया निर्दिष्टाः। नाभेरुत्थितस्य वायोराघातेन करणव्यापारविशेषेण वा स्वस्थानेषु पूर्णस्पर्शे स्पृष्टम्, ईषत्स्पर्शे ईषत्स्पृष्टं, विप्रकर्षे (दूरावस्थाने) विवृतं, सन्निकर्षे (समीपावस्थाने) संवृतं प्रयतनं तत्तद्वर्णविशेषाभिव्यक्तौ निमित्तम्। आभ्यन्तरप्रयत्न एव करणं (असाधारणहेतुः) इत्यपि करणविषये मतभेदः। वर्णोत्पत्तेरनन्तरं जायमानः कार्यरूपः, बहिरवयवेषु जायमानतया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परेणापि लक्ष्यो वा सावर्ण्यानुपयोगी प्रयत्न (व्यापार) विशेषो बाह्यः। तत्र गलबिलस्य (कण्ठनलिकायाः) विवरणं (विकासः) विवारः, संवरणं (सङ्कोचः) संवारः, स्वरस्यानुरणनं नादः, तद्रहितः फुस्याकारः स्वरः श्वासः, स्वरस्य गम्भीरता घोषः, अगम्भीरता अघोषः, अन्तर्वायोरल्पा मात्रा अल्पप्राणः, महती मात्रा महाप्राणः। उदात्तादयः पूर्वोक्ताः। "विवारसंवारौ कण्ठविलस्य विकाससङ्कोचौ, नादो वर्णोत्पत्त्यनन्तरभावी अनुरणनशब्दः, तद्भिन्नः श्वासः, घोषः शब्दस्य स्थूलता, अघोषो ह्रस्वता" इत्युद्योते। नलिकायाः सङ्कोचे वायोः सङ्कीर्णमार्गेण प्रसह्य बहिर्निर्गमनात्स्वरस्य स्थूलता तीक्ष्णतयाऽनुरणनं च, नलिकाया विकासे तु वायोर्विशालमार्गेणाञ्जसा निर्गमनात्स्वरस्य ह्रस्वताऽननुरणनं च युज्यत एव; तथानुभूयते च नालिकावाद्येषु। श्वासनादौ पश्चाद्भाविपरिणामरूपतयाऽनुप्रदानमिति व्यवह्रियेते। उक्तं च ऋक्प्रातिशाख्ये —"वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां नादतां वा वक्त्रीहायामुभयं चान्तरोभौ॥ ता वर्णानां प्रकृतयो भवन्ति श्वासोऽघोषाणामितरेषां तु नादः। सोष्मोष्मणां घोषिणां श्वासनादौ तेषां स्थानं प्रतिनादात्तदुक्तम्" इति। एभिरेव स्थानकरणप्रयत्नादिविशेषैरान्तरवायोर्वर्णविशेषात्मनाऽभिव्यक्तिः। उक्तं च— "अनुप्रदानात्संसर्गात्स्थानात्करणविभ्रमात्। जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः। भिद्यन्ते पञ्चधा वर्णाः" इति। शिक्षादिषु विशेषान्तराण्यपि निर्दिष्टानि।

वि. ३ वर्णोत्पत्तिप्रक्रिया चेत्थमुपवर्णिता पाणिनिना--"आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥ मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः॥ वर्णाञ्जनयते तेषां विभागः पञ्चधा मतः। स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः॥" इति। उद्योते सावर्ण्यसूत्रव्याख्याने एवं विवृतम्—"शब्दप्रयोगेच्छयोत्पन्नयत्नान्नाभिप्रदेशादूर्ध्वं प्रेरितो वायुर्मूर्धपर्यन्तं गत्वा ततः प्रतिनिवृत्तो यत्नविशेषसाहाय्येन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकमाघातविशेषेण वर्णानभिव्यनक्ति, ततो यत्नविशेषेण परावृत्तिसमये गलविवरादीनां विकासान्करोति" इति। शब्दकौस्तुभेपि — "नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन्नुरः प्रभृतीनि स्थानान्याहन्ति, ततो वर्णस्य, तदभिव्यञ्जकध्वनेर्वा (स्फोटवादिमते) उत्पत्तिः, तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक्स्पृशन्ति तदा स्पृष्टता, ईषद्यदा तदा ईषत्स्पृष्टता, समीपावस्थानमात्रे संवृतता, दूरत्वे विवृतता। अत एव इचुयशानां तालव्यत्वाविशेषेपि तालुस्थानेन सह जिह्वाग्रादीनां चवर्गोच्चारणे कर्तव्ये सम्यक्स्पर्शः, यकारे ईषत्स्पर्शः, शकारेकारयोस्तु दूरेवस्थितिरित्यादिकमनुभवं शिक्षाकारोक्तिं चानुसृत्य विवेचनीयम्। बाह्याः प्रयत्ना एकादश। एते वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वायौ उत्पद्यन्ते, अत एव बाह्याः। गलबिलस्य संकोचात्संवारः, तस्यैव विकासाद्विवारः, एतौ संवृतत्वविवृतत्वाभ्यामाभ्यन्तराभ्यां भिन्नावेव, तयोः समीपदूरावस्थानात्मकत्वात्" इति। एवंप्रायमेवान्यत्रापि।

सावर्ण्यम्—

तुल्यास्यप्रयत्नं सवर्णम् (१-१-९) ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् (वा)। एदैतोरोदौतोश्च न मिथः सावर्ण्यम्, ऐऔजिति पृथक्सूत्रारम्भसामर्थ्यात्। अकारहकारयोरिकारशकारयोः ऋकारषकारयो-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऌकारसकारयोश्च मिथः सावर्ण्ये प्राप्ते, नाज्झलौ (१-१-१०) आकारसहितोऽच् आच्, स च हल्चेत्येतौ मिथः सवर्णौ न स्तः। तेन दधि इत्यस्य हरति, शीतलं, षष्ठं, सान्द्रमित्येतेषु परेषु यणसवर्णदीर्घादिकं न, अन्यथा अजादिषु दीर्घादीनामिव हकारादीनामपि ग्रहात्तदापद्येत। अणुदित्सवर्णस्य चाप्रत्ययः (१-१ ६९) प्रतीयते विधीयते इति प्रत्ययः, कुचुटुतुपु एते उदितः, अविधीयमानोऽण् उदिच्च सवर्णस्य ग्राहकः स्यात्। अत्राऽण् लणसूत्रणकारेण ग्राह्यः, तथैव व्याख्यानात्। तदेवमविधीयमाना अ इ उ वर्णा अष्टादशानां स्वभेदानां ग्राहकाः, ऋकारोऽष्टादशधा, ऌकारो द्वादशधा, अनयोर्मिथः सावर्ण्यादेतौ त्रिंशद्भेदानां ग्राहकौ, एचो द्वादशानां स्वभेदानां ग्राहकाः, अननुनासिका यवला अनुनासिकाननुनासिकयोर्द्वयोर्ग्राहकाः, कुचुटुतुपु एते स्ववर्ग्याणां पञ्चानां ग्राहकाः। तपरस्तत्कालस्य (१.१.७०) तः परो यस्मात् तात्परश्च तपरः, स उच्चार्यमाणसमकालस्यैव संज्ञा (बोधकः) स्यात्। तेन अत् इत् उत् आत् ईत् ऊत् एत् ओत् इत्यादयः स्वसमानकालानां षण्णामेव ग्राहकाः। एवं तात्परत्वेपि ऋऌवर्णयोः सावर्ण्येन ऋत् ॠदिति द्वादशानां ग्राहकाः।

वि. १ तुल्यास्येत्यत्र आस्यं वर्णस्थानम्, प्रकृष्टो यत्नः प्रारम्भयत्नो वा प्रयत्नः इत्याभ्यन्तर एव न बाह्यः, आभ्यामेकस्य समानोन्यो वर्णः सवर्णः। ऋऌवर्णयोः स्थानभेदेपि वाचनिकं मिथः सावर्ण्यम्, तेन होतृ ऌकार इत्यत्र सवर्णदीर्घः। एदैतोरोदौतोश्च स्थानप्रयत्नसाम्येपि निषेधान्न सावर्ण्यम्, तेन एकारेण ऐकारस्य ओकारेण औकारस्य न ग्रहः। अकारहकारादीनां स्थानप्रयत्नसाम्येपि अज्झलोः सावर्ण्यनिषेधान्नैकेनापरस्य ग्रहः, तेन दधि हरतीत्यत्र यण् दधि शीतलमित्यत्र सवर्णदीर्घश्च न। नाज्झलावित्यस्यावसरे ततःपश्चास्तनस्याणुदिदितिसवर्णग्राहकशास्त्रस्यानिष्पत्तेर्वर्णसमाम्नायपठितानामेव अकारादीनामच्त्वेन ग्रहाद्दीर्घाचां हलां च नाज्झलाविति सावर्ण्यनिषेधाभावेन आकारहकारयोरप्यनिषेधे प्राप्ते आकारसहितोच् आच् इत्याकारप्रश्लेषेण तयोरपि सावर्ण्यनिषेधाद्विश्वपाभिरित्यत्र हकारेणाऽऽकारस्याग्रहात् होढइति ढत्वं न। आकारप्रश्लेषे लिङ्गं तु कालसमयवेलास्वित्यत्र लकारोत्तरमाकारनिर्देशः, अन्यथा तत्राऽऽकारस्य हस्येव ढत्वं संयोगान्तलोपो वाऽऽपद्येत। दीर्घेकारशकारादीनां तु वाचनिकनिषेधाभावेन सत्यपि सावर्ण्ये न कापि हानिः। आभ्यन्तरप्रयत्नं पञ्चधा विभज्य ईषद्विवृतमूष्मणां विवृतं स्वराणामित्यकारहकारादीनां प्रयत्नभेदाभ्युपगमे तु सावर्ण्याप्राप्तेर्नाज्झलाविति सूत्रं प्रत्याख्येयमित्यपि मतम्।

वि. २ अणुदिति अविधीयमानस्याणः उदितश्च सवर्णग्राहकताविधानेन इकोयणचीत्यादौ इगजादिपदैरिकारादिसवर्णानां दीर्घादीनामपि ग्रहात् गौरी-अत्र दधि-आनयेत्यादावपि यण्, यणस्तु विधीयमानतया न स्वसवर्णानुनासिकग्राहकता। ऋकारऌकाराभ्यां तु सावर्ण्यात्त्रिंशतो ग्रहः। एऐ, ओऔ इत्यनयोः सावर्ण्ये एकेनैवापरस्य ग्रहादैऔजिति सूत्रारम्भवैयर्थ्यापत्त्याऽनयोः सावर्ण्यं नेत्यवगमान्नैकेनापरस्य ग्रहः। अविधीयमान इति उदिदित्यत्र चान्वेति, तेन विधीयमानोप्युदित्सवर्णान्गृह्णात्येव, अतः कुहोश्चुः चोः कुरित्यादौ चुकुशब्दाभ्यां पञ्चानां स्ववर्ग्याणां ग्रहः। पूर्वतः परतो वा तकारयोगेन निर्देशस्थले ह्रस्वो दीर्घो वा यादृशो निर्दिष्टस्तज्जातीयषट्कस्यैव ग्रहः, तेन अदेङ् गुणः वृद्धिरादैच् इत्यादौ अकारेणाऽऽकारस्य आकारेणाऽकारस्य, एङैज्भ्यां प्लुतानां च न ग्रहः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संज्ञाविशेषाः—

वृद्धिरादैच् (१-१-१) आदैच्च वृद्धिसंज्ञः स्यात्। अदेङ् गुणः (१-१-२) अदेङ् च गुणसंज्ञः स्यात्। हलोनन्तराः संयोगः (१-१-७) अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः। नवेति विभाषा (१-१-४४) निषेधविकल्पयोर्विभाषासंज्ञा स्यात्। इग्यणः सम्प्रसारणम् (१-१-४५) यणः स्थाने प्रयुज्यमानो य इक्स सम्प्रसारणसंज्ञः स्यात्। अदर्शनं लोपः (१-१-६०) प्रसक्तस्यादर्शनं (अनुच्चारणं) लोपसंज्ञं स्यात्। प्रत्ययस्य लुक्श्लुलुपः (१-१-६१) लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्। अचोऽन्त्यादि टि (१-१-६४) अचां मध्ये योन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। अलोऽन्त्यात्पूर्व उपधा (१-१-६५) अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। स्वं रूपं शब्दस्याशब्दसंज्ञा (१-१-६८) शब्दस्य स्वं रूपं संज्ञि (बोध्यं) स्यात्, शब्दशास्त्रे या संज्ञा तां विना। येनविधिस्तदन्तस्य (१-१-७२) विशेषणं तदन्तस्य संज्ञा (बोधकं) स्यात्स्वस्य च रूपस्य। भूवादयो धातवः (१-३-१) क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। ह्रस्वं लघु (१-४-१०) ह्रस्वं लघुसंज्ञं स्यात्। संयोगे गुरु (१-४-११) संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्। दीर्घं च (१-४-१२) दीर्घं च गुरुसंज्ञं स्यात्। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१-४-१३) यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्। सुप्तिङन्तं पदम् (१-४-१४) सुबन्तं तिङन्तं च पदसंज्ञं स्यात्। नः क्ये (१-४-१५) क्ये परे नान्तमेव पदसंज्ञं स्यात्। सिति च (१-४-१६) सिति प्रत्यये परे पूर्वं पदसंज्ञं स्यात्। स्वादिष्वसर्वनामस्थाने (१-४-१७) कप्प्रत्ययावधिष्वसर्वनामस्थानेषु स्वादिषु परेषु पूर्वं पदसंज्ञं स्यात्। यचि भम् (१-४-१८) यकारादिष्वजादिषु चासर्वनामस्थानेषु स्वादिषु परेषु पूर्वं भसंज्ञं स्यात्। पदसंज्ञापवादः। तसौ मत्वर्थे (१-४-१९) तकारान्तं सकारान्तं शब्दस्वरूपं मत्वर्थे प्रत्यये परे भसंज्ञं स्यात्। प्राग्रीश्वरान्निपाताः (१-४-५६) अधिरीश्वरे इत्यतः प्राक् निपाता इत्यधिकारः। चादयोऽसत्त्वे (१-४-५७) लिङ्गसंख्यान्वययोग्यं द्रव्यं सत्त्वम्। अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः। प्रादयः (१-४-५८) प्रादयो निपातसंज्ञाः स्युः। उपसर्गाः क्रियायोगे (१-४-५९) प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। गतिश्च (१-४-६०) प्रादयः क्रियायोगे गतिसंज्ञाश्च स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः। परः सन्निकर्षः संहिता (१-४-१०९) वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्। विरामोऽवसानम् (१-४-११०) वर्णानामभावोऽवसानसंज्ञः स्यात्। इति प्रथमाध्यायगतसंज्ञाविशेषाः, एवमन्येपि तत्र तत्र वक्ष्यन्ते।

वि. १ सूत्रादौ वृद्धिशब्दो मङ्गलार्थः। उक्तं च भाष्ये—"छन्दोवत्सूत्राणि, न च यथा लोके तथा व्याकरणे, प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्णेनाप्यनर्थकेन भवितुं किम्पुनरियता सूत्रेण। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते, मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि च, अध्येतारश्च वृद्धियुक्ता यथा स्युः" इति।

वि. २ यथाहि ह्रस्वदीर्घादयः शब्दा अन्वर्थाः, तथैव इकारोकारादीनां गुणेन एकारोकारादिभावे स्वरस्य गुणनं सन्ध्यक्षरभावेन वर्धनरूपं भवति, ततोऽप्यकारेकारोकारादीनामाकारैकारौकारादिभावेन वृद्धौ मात्रानुक्रमादिसंवर्धनं भवतीति गुणवृद्धिशब्दावप्यन्वर्थौ प्रतीयेते; एवं व्यञ्जनस्यार्धमात्रिकतया यवरलानां स्थानेषु एकमात्रिकाणाम् इउऋऌ-वर्णानां भावे सम्प्रसारणं भवति, ईदृशा ह्रस्व-दीर्घ-प्लुत-सवर्ण-संयोग-सर्वनाम-प्रातिपदिक-सम्प्रसारणादयो यौगिका अन्वर्थाः संज्ञाशब्दाः प्राचीनैर्व्यवहृता गुरुभूता अपि पाणिनिना गृहीताः स्युः, टिघुभादयस्तु योगार्थहीनाः केवलं प्रक्रियानिर्वाहाय सङ्केतमात्ररूपा लाघवदृष्टिमता नवकल्पिता भवेयुः। अतः केचनातिसंक्षिप्ता अर्थहीनाः, केचनान्वर्था महान्त इति द्विविधाः संज्ञाशब्दा दृश्यन्ते। तेनान्यत्रापि महासंज्ञासु योगार्थानुसन्धानं व्युत्पादनायोपयुज्यते।

वि. ३ हलोनन्तरा इत्यत्र हलौ च हलश्चेत्येकशेषेण द्वयोर्हलोर्बहूनां च हलां संयोगसंज्ञा। संयोग इत्यन्वर्थतया समुदायस्यैवेयं संज्ञा नत्वेकशः। बहूनां हलां श्लेषेपि द्वयोर्द्वयोरेव संयोगः इति तु शेखरकारः। याज्ञवल्क्यशिक्षायां तु अयःपिण्डः अग्निरिति, दारुपिण्डः अश्व इति, ऊर्णापिण्डः अश्मन्निति, ज्वालापिण्डः ब्रह्मन्निति, मृत्पिण्डः संस्थामिति, वायुपिण्डः द्यौष्पितेति वज्रपिण्डः दुष्कृतिरिति संयोगविभेदा वैदिकशब्देषु निर्दिष्टाः। लोके तु मृदुसंयोगो घनसंयोगश्चेति द्वैविध्यं, प्रह्वयोर्मृदुसंयोगेन पूर्वस्वरस्य ह्रस्वस्य वैकल्पिकं गुरुत्वमन्यत्र घनसंयोगेन गुरुत्वमेवेत्यनुसन्धेयम्।

वि. ४ नवेति नवाशब्दयोः स्वंरूपमिति न्यायेन स्वरूपपरत्वं न स्यादित्यर्थमिति शब्दः, तेनार्थपरतया नेति निषेधो वेति विकल्पश्च द्वयं मिलितमिह शास्त्रे विभाषाशब्दार्थं इत्यनेन सूत्रेण बोध्यते। विभाषा हि त्रिविधा—वर्णाश्रमेतरे इत्यत्र द्वन्द्वेचेति सर्वनामसंज्ञाया नित्यं निषेधे प्राप्ते विभाषाजसीतिविकल्पः प्राप्तविभाषा, द्वितीयस्मै द्वितीयायेत्यत्र तीयस्य सर्वादावपाठात्सर्वनामसंज्ञाया अप्राप्तौ तीयस्य ङित्सुवेति विकल्पोऽप्राप्तविभाषा; श्वयते-र्लिटि सम्प्रसारणस्य अपित्सु वचिस्वपीति प्राप्तौ पित्सु अप्राप्तौ च विभाषाश्वेरिति विकल्प उभयत्रविभाषा। नवेतिसूत्राभावे भावाभावयोर्विकल्परूपत्वेन विधिमुखेन भवति न भवति चेति विधाने प्राप्तिस्थले विधान-वैयर्थ्येनाप्राप्तिस्थलेषु पित्स्वेव विकल्पः स्यात्, कित्सु त्वस्याप्रवृत्तेर्वचिस्वपीति नित्यं स्यात्; निषेधमुखेन न भवति भवति चेति विधानेऽप्राप्तिस्थले निषेधवैयर्थ्येन प्राप्तिस्थलेष्वपित्स्वेव विकल्पः स्यात् पित्सु त्वस्याप्रवृत्त्या अभाव एव स्यात्, क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेनेत्युभयथा विधानं तु वाक्यभेदभयेन न सम्भवति, अतो विभाषाश्वेरित्य-स्योभयत्रविभाषात्वं न स्यादितीदं सूत्रमारब्धम्। ततश्च विभाषाशब्दार्थस्य निषेधविकल्परूपोभयात्मकतया पूर्वं किति प्राप्तिस्थले निषेधेन प्राप्त्यप्राप्तिस्थले समीकृत्य भावाभावरूपविकल्पप्रवृत्त्या पित्सु अपित्सु च सर्वत्र विभाषा श्वेरिति विकल्पः सिद्ध्यति। एवं च निषेधसमुच्चितो विकल्पो विभाषाशब्दार्थ इति पर्यवस्यति। प्राप्तविभाषायां भवनांशस्य, अप्राप्तविभाषा-यामभवनांशस्य प्राप्तत्वेन विध्यनर्हतयेतरांशस्यैव विधेयतया नास्य सूत्रस्योपयोगः, किन्तूभयत्रविभाषायामेव। भाष्ये तु विभाषाशब्दस्य केवलं विकल्पपरत्वेपि लक्ष्यानुरोधेन क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन प्रवृत्त्युपपत्तेरेतत्सूत्रस्यानावश्यकता सूचिता।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ५ स्वंरूपमिति सर्वत्र शब्दस्यार्थपरत्वेन अग्नेर्ढगित्यादौ अग्न्यर्थाड्ढकोऽसम्भवेन वाचके लक्षणयाऽग्नि-वाचकशब्दादित्यर्थे वन्ह्यादिशब्देभ्योपि ढगापत्तिः स्यादित्यग्न्यादिशब्दस्य स्वरूपपरत्वं बोध्यते। तेनाग्निशब्दादेव ढक् नतु वन्ह्यादेः। परमेवं न्यायेन टिघुभादिशब्दानामपि स्वरूपपरत्वे अचघेरिति घिशब्द एव प्रवर्तेत न तु हर्यादाविति घ्यादिसंज्ञाशब्दानां न स्वरूपपरत्वं किन्त्वर्थपरत्वमेवेति बोधयितुमशब्दसंज्ञेत्युक्तम्। स्वंरूपमिति रूपशब्देनार्थवच्छब्दस्वरूपं विवक्ष्यते, तेन कुशे काशे इत्याद्यन्तर्गतशेशब्दस्य शेइति प्रगृह्यसंज्ञा न।

वि. ६ येनविधिरित्यस्य येन विशेषणभूतेन विधिः स तदन्तसमुदायस्य स्वस्य स्वरूपस्य च ग्राहको भवतीत्यर्थः। तेन एरच् इत्यत्र इवर्णान्तादच्स्यादित्यर्थः। परं समासविधौ प्रत्ययविधौ च तदन्तग्रहणं न। यथा द्वितीयाश्रितेतिसमास-विधौ श्रितान्तस्याग्रहणात्परमकष्टश्रित इति न समासः, नडादिभ्यःफगिति प्रत्ययविधौ नडाद्यन्तस्याग्रहणात्सूत्रनडस्या-पत्यमित्यर्थे न फक्। किन्तु समासविधौ प्रत्ययविधावपि उगिद्ग्रहणे वर्णग्रहणे च तदन्तविधिर्भवत्येव, तेन महतीत्य-त्रेवातिमहतीत्यत्रापि उगितश्चेति ङीप्, अतइञित्यत्र अकारान्तस्य ग्रहाद्दाक्षिरिति च सिद्ध्यति।

वि. ७ सुप्तिङन्तमित्यत्र येनविधिरित्येव तदन्तत्वलाभेप्यन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नेति ज्ञापयति, तेन ईदूदेद्द्विवचनमित्यत्र द्विवचवस्यैव ग्रहो नतु तदन्तस्य, अतः कुमार्योरगारं कुमार्यगारमित्यत्र प्रगृह्यत्वं प्रकृतिभावश्च न। संहितायां परः सन्निकर्षोऽर्धमात्राधिककालेनाव्यवधानम्।

परिभाषादिविधयः—

इको गुणवृद्धी (१-१-३) गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते। आद्यन्तवदेकस्मिन् (१-१-२१) एकस्मिन्क्रियमाणं कार्यमादाविव अन्त इव स्यात्। आद्यन्तौ टकितौ (१-१-४६) टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः। मिदचोऽन्त्यात्परः (१-१-४७) अचां मध्ये योन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात्। षष्ठी स्थानेयोगा (१-१-४९) अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या। स्थानेऽन्तरतमः (१-१-५०) स्थानं प्रसङ्गः, प्रसङ्गे सति सदृशतम आदेशः स्यात्। स्थानेनार्थेन गुणेन (बाह्यप्रयत्नेन) प्रमाणेन (मात्राविशेषेण) च सादृश्यम्। यत्रानेकविधमान्तर्यं (सादृश्यं) तत्र स्थानत आन्तर्यं बलीयः। अलोऽन्त्यस्य (१-१-५२) षष्ठीनिर्दिष्टस्यान्त्यस्य आदेशः स्यात्। ङिच्च (१-१-५३) ङिदनेकालप्यन्त्यस्यैव स्यात्। अनेकाल्सूत्रा-पवादः। आदेः परस्य (१-१-५४) परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। अनेकाल्शित्सर्वस्य (१-१-५५) अनेकाल् शिच्च सर्वस्यैव स्यात्। अलोन्त्यसूत्रापवादः। स्थानिवदादेशोऽनल्विधौ। (१-१-५६) आदेशः स्थानिवत्स्यान्नतु स्थान्यलाश्रयविधौ अचः परस्मिन्पूर्वविधौ (१-१-५७) परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। अल्विध्यर्थमिदम्। न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु (१-१-५८) पदान्तविधौ द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशः स्थानिवन्न स्यात्। द्विर्वचनेचि (१-१-५९) द्वित्वनिमित्तेऽचि परेऽजादेशः स्थानिवत्स्यात् द्वित्वे कर्तव्ये। प्रत्ययलोपे प्रत्ययलक्षणम् (१-१-६२) प्रत्यये लुप्तेऽपि तदाश्रितं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यं स्यात्। न लुमताङ्गस्य (१-१-६३) लुक् श्लु लुप् एते लुमन्तः, लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात्। तस्मिन्निति निर्दिष्टे पूर्वस्य (१-१-६६) सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्। तस्मादित्युत्तरस्य (१-१-६७) पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम्। अचश्च (१-२-२८) ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र अच इति षष्ठ्यन्तं पदमुपतिष्ठते। यथासंख्यमनुदेशः समानाम् (१-३-१०) समसम्बन्धी विधिर्यथासंख्यं स्यात्। स्वरितेनाधिकारः (१-३-११) स्वरितत्वप्रयुक्तं शब्दस्वरूपमधिकृतं बोध्यम्। आकडारादेका संज्ञा (१-४-१) इत ऊर्ध्वं कडाराः कर्मधारये इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया, या पराऽनवकाशा च। तेन शसादावचि भसंज्ञैव न पदत्वम्। विप्रतिषेधे परं कार्यम् (१-४-२) तुल्यबलविरोधे परं कार्यं स्यात्। परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः 'परि'। पूर्वत्रासिद्धम् (८-२-१) अधिकारोऽयम्। तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। असिद्धं बहिरङ्गमन्तरङ्गे (परि)। अकृतव्यूहाः पाणिनीयाः (परि)। निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः। इति परिभाषादिविधयः।

वि. १ संज्ञासूत्रं सर्वेषु स्वप्रदेशेषूपतिष्ठते, परिभाषा त्वनियमे नियमकारिणी सती स्वप्रदेशे वर्तमानापि सर्वान्प्रदेशानभिप्रकाशयति, अधिकारस्तु स्वसीमान्तमनुवर्तते।

वि. २ गुणवृद्धिशब्दौ निर्दिश्य गुणवृद्धिविधान एव इक इति, ह्रस्वदीर्घप्लुतशब्दान्निर्दिश्य तद्विधान एव अच इत्युपतिष्ठते, अनुवादे परिभाषाणामनुपस्थितेः। तेन मिदेर्गुणः सिचिवृद्धिरित्यादाविक इत्युपतिष्ठते, नतु वृद्धिर्यस्याचामित्यादौ वृद्धेरनुवादे, त्यदादीनामः दिव औदित्यादौ गुणवृद्धिशब्देनानिर्देशे च। ह्रस्वोनपुंसके इत्यादावच इत्युपतिष्ठते, नतु दिवउदित्यत्र।

वि. ३ शब्दस्य शब्देन सह त्रयः सम्बन्धाः—आनन्तर्यं सामीप्यं प्रसङ्गश्च। उदुपधाया गोहः शासइदङ्हलोरित्यत्रोपधासन्निधानादवयवषष्ठीनिर्णयेन गोहः शासः स्थाने माभूदित्यर्थमनिर्धारितसम्बन्धविशेषेत्युक्तम्। दर्भाणां स्थाने शरैः प्रस्तरितव्यमित्यत्र स्थानशब्दस्य प्रसङ्गार्थकताप्रसिद्धेः स्थानं प्रसङ्ग इत्युक्तम्। प्रसङ्गः प्राप्तिः, तेन इकोयणचीत्यादौ इकः प्रसङ्गे (उच्चारणप्राप्तौ) यण्स्यात् (यणुच्चारणं कर्तव्यम्) इत्यर्थेन यणः प्रवृत्तिरिको निवृत्तिः। यः प्रसक्तो निवर्तते स स्थानी, यो निवर्तयति स स्थानिनिवृत्तये आदिश्यते इत्यादेशः। प्राप्यमाणानां मध्ये स्थानेनार्थेन गुणेन वाऽतिसदृश आदेशो भवति। यथा दध्यत्र मध्वरिरित्यादौ स्थानसादृश्येन इकारस्य यकारः उकारस्य वकारः। वातण्ड्ययुवतिरित्यादौ वतण्डापत्यवाचिनो वतण्डीशब्दस्य पुंवद्भावे तदर्थको वातण्डयशब्द एव न तु वतण्डशब्दो भवति। वाग्घरिरित्यत्र गुणेन (बाह्यप्रयत्नेन) तुल्यतया हकारस्य पूर्वसवर्णो घकारः। अदसोसेर्दादुदोम इति प्रमाण (मात्रा)सादृश्येन ह्रस्वस्य उकारः दीर्घस्य ऊकारः। गुणादिसादृश्येभ्यः स्थानसादृश्यस्य बलीयस्तया चेता स्तोतेत्यादौ गुणे प्रमाणेन सदृशोऽकारो न, किन्तु स्थानसादृश्येन इकारस्य एकारः उकारस्य ओकारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ४ स्थान्यादेशयोः पृथक्त्वात्स्थान्याश्रयकार्यमादेशे प्रापयितुं स्थानिवद्भावातिदेशः, स्थानिभूतालाश्रयविधौ कर्तव्ये तु स्थानिवत्त्वं न। धात्वङ्गकृतद्धिताव्ययसुप्तिङ्पदादेशाः स्थानिवद्भवन्ति। अस्तेर्भूरिति धात्वादेशस्य धातुवद्भावेन अचो यदिति यति भव्यम्, किमः क इत्यङ्गादेशस्याङ्गवत्त्वेन इनादेशे केन, ल्यबादेः कृदादेशस्य कृद्वत्त्वेन ह्रस्वस्य पिति कृतीति तुकि प्रकृत्य, अव्ययादेशस्य ल्यबादेरव्ययत्वेन सुब्लुकि प्रकृत्य, सुबादेशस्य यस्य सुप्त्वेन सुपि चेति दीर्घे वृक्षाय, तिङादेशस्य तमादेस्तिङ्वत्त्वेन अकुरुतमित्यादेः पदत्वम्, वसादेः पदादेशस्य पदवत्त्वेन ग्रामो वः स्वमित्यादौ रुत्वमित्यादयः सिद्ध्यन्ति। वत्करणेन स्थानिधर्ममात्रातिदेशादाङोयमहनइति आहत आवधिष्टेत्युभयत्रात्मनेपदम्। अला निमित्तेन विधिः, अलः परस्य विधिः, अलो विधिः, अलि विधिश्चाल्विधिः, तेन व्यूढोरस्केनेत्यत्र विसर्गस्थानिकसकारस्य विसर्गत्वमाश्रित्याट्त्वेन अड्व्यवाये णत्वे अल्विधौ स्थानिवत्त्वाभावेन न णत्वम्; द्यौरित्यत्र दिव औदिति वकारस्थानिकौकारस्य हल्त्वमाश्रित्य हलः परस्य सोर्हल्ङ्यादिलोपे अलः परस्य विधौ स्थानिवत्त्वाभावेन लोपो न; द्युकाम इत्यत्र दिव उदिति स्थानिभूतोकारस्य वत्वमाश्रित्य लोपोव्योरिति वलोपे अलोविधौ स्थानिवत्त्वाभावेन लोपो न; क इष्ट इत्यत्र यजेः क्ते यस्थानिकसम्प्रसारणेकारस्य यत्वमाश्रित्य हशृत्वेन हशि चेत्युत्वे अलिविधौ स्थानिवत्त्वाभावेन नोत्वम्। रामायेत्यत्र सुबादेशस्य यस्य सुप्त्वमाश्रित्य सुपि चेति दीर्घे आदेशभूतयकाररूपालाश्रयत्वेपि स्थानिभूतालाश्रयत्वाभावेन स्थानिवत्त्वसिद्ध्यर्थं स्थानिभूतालाश्रयेत्युक्तम्। अल्विधित्वेपि स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये परनिमित्ताजादेशस्य स्थानिवद्भावप्रतिप्रसवाद्वव्रश्चेत्यत्राभ्यासरेफसम्प्रसारण ऋकारस्योरदत्त्वस्याल्विधित्वेपि स्थानिभूताचः पूर्वत्वेन दृष्टस्य विधौ स्थानिवत्त्वेन सम्प्रसारणतया नसम्प्रसारणे इति निषेधादृकारस्य पुनः सम्प्रसारणं न।

वि. ५ पदान्तविध्यादिषु स्थानिवद्भावनिषेधेन कानिसन्तीत्यत्र पदान्तविधेर्यणादेशस्य प्रसक्तये अस्तेरल्लोपस्य न स्थानिवत्त्वम्; सुध्युपास्य इत्यत्र धस्य द्वित्वे कर्तव्ये अच्परत्वापत्तये यकारस्य न स्थानिवत्त्वम्; यायावर इत्यत्र आकारलोपप्रसक्तये, चिकीर्षक इत्यत्रेकारस्यानुदात्तत्वे कर्तव्ये, शिण्ढीत्यत्र परसवर्णे कर्तव्ये, शिंषन्तीत्यत्रानुस्वारे कर्तव्ये, प्रतिदीव्न इत्यत्रेकारस्य दीर्घे कर्तव्ये चाल्लोपस्य न स्थानिवत्त्वम्; सग्धिरित्यत्र जश्त्वे कर्तव्ये, जक्षतुरित्यत्र चर्त्वे कर्तव्ये चोपधालोपो न स्थानिवत्। द्वित्वे कर्तव्ये द्वित्वनिमित्तेचि परेऽजादेशस्य स्थानिवद्भावप्रतिप्रसवात्पप्तुरित्यत्राल्लोपस्य, जग्मतुरित्यत्रोपधालोपस्य स्थानिवत्त्वेन द्विर्वचनसिद्धिः।

वि. ६ तस्मिन्निति सप्तम्यन्तस्य, तस्मादिति पञ्चम्यन्तस्य शब्दस्योपलक्षणम्। सप्तम्यन्तार्थं निमित्तीकृत्य विधीयमानं कार्यं तदव्यवहितपूर्वस्य, पञ्चम्यन्तार्थं निमित्तीकृत्य विधीयमानं कार्यं तदव्यवहितोत्तरस्य भवति। तेन इकोयणचीत्यत्र अचीतिसप्तमीनिर्देशेन विहितो यण् अजव्यवहितपूर्वस्येकः, उदःस्थास्तम्भोरित्यत्र उद इति पञ्चमीनिर्देशेन विहितः पूर्वसवर्णस्तदव्यवहितोत्तरयोः स्थास्तम्भोर्भवति।

वि. ७ परनित्यान्तरङ्गापवादानां मध्ये पूर्वापेक्षया परस्य, परापेक्षया नित्यान्तरङ्गापवादानां, नित्यापेक्षयान्तरङ्गापवादयोः, अन्तरङ्गापेक्षयापवादस्य बलीयस्त्वं भवति। पूर्वत्वं परत्वं चाष्टाध्यायीसूत्रक्रमेण, नित्यत्वं कृतेप्यकृतेपि प्राप्तिः, अल्पापेक्षत्वमन्तरङ्गत्वं, बहु पेक्षत्वं बहिरङ्गत्वं, सर्वथा निरवकाशत्वमपवादत्वम्। यथा तुदतीत्यत्र परमपि लघूपधगुणं बाधित्वा नित्यत्वेन शः, उभये इत्यत्र परमपि प्रथमचरमेति विकल्पं बाधित्वान्तरङ्गत्वेन सर्वादीनीति नित्यं सर्वनामसंज्ञा, दध्नेत्यत्र परमपि सर्वादेशं बाधित्वाऽपवादत्वेन ङिच्चेत्यन्तादेशोऽनङ्, ग्रामणिनी कुले इत्यत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इकोचीति नुमं नित्यमपि बाधित्वाऽन्तरङ्गतया ह्रस्वोनपुंसक इति ह्रस्वः, दैत्यारिरित्यत्र परमपि सवर्णदीर्घं बाधित्वाऽन्तरङ्गत्वेनाद्गुणे यणि च प्राप्ते ऽपवादत्वेन सवर्णदीर्घः। विप्रतिषेधसूत्रेण परं बलवत्, अक्लृप्ताभावकस्य नित्यशास्त्रस्याभावकल्पनापेक्षया क्लृप्ताभावकस्यानित्यशास्त्रस्यैव तत्कल्पनं युज्यत इति नित्यस्य बलवत्त्वे बीजम्, अन्तरङ्गस्य बलवत्वमसिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया, अपवादस्य बलवत्त्वे बीजं तु येननाप्राप्तिन्यायः।

वि. ८ पूर्वत्रासिद्धमित्यस्याष्टमाध्याय द्वितीयपादप्रथमसूत्रस्य स्वतन्त्रविधित्वे त्रिपाद्या एव पूर्वं प्रत्यसिद्धत्वं लभ्येतेति त्रिपाद्यामपि पूर्वं प्रति परस्यासिद्धत्वलाभायाधिकारविधित्वमुक्तम्, तेन अ अइति संवृतविधेः सकलपूर्वपिक्षयाऽसिद्धत्वेन प्रक्रियादशायां ह्रस्वावर्णस्य विवृतत्वमेव, परिनिष्ठितदशायामेव संवृतत्वम्। त्रिपाद्यामप्युत्तरस्य पूर्वं प्रत्यसिद्धतया अनड्वा नित्यत्र संयोगान्तलोपासिद्धया नलोपो न। इदं चासिद्धत्वं शास्त्रदृष्टावेव न तु वास्तविकम्, अकृतव्यूहा इत्यस्य विशिष्ट ऊहो व्यूहः (विनाशोन्मुखनिमित्तकं कार्यं,) न कृतोयैस्ते पाणिनोया इति निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः। अयमेव सन्निपातपरिभाषाविरोधः, अत्र प्रक्षालनाद्धि पङ्कस्येति न्यायो लिङ्गम्। यथा निषेदुषीमित्यत्रान्तरङ्गतया प्राप्तोपि क्वसोरिट् भाविना सम्प्रसारणेन वलादित्वं नङ्क्ष्यतीत्यालोच्य न क्रियते।

प्रश्नाः—व्याकरणं नाम किम्, कान्यस्य प्रयोजनानि, व्याकरणं कुतः प्रवृत्तम्। स्वरव्यञ्जनयोः को विशेषः। सवर्णाः कीदृशाः, सवर्णसंज्ञा किमर्था, अज्झलोः सावर्ण्यं न वा। आदेशा आद्यन्तस्थानीयाः कीदृशाः, टित् कित् मित् एते कुत्र कस्यावयवा भवन्ति। प्रयत्ना बाह्या आभ्यन्तराश्च के लोप लुक्श्लुलुपां को विशेषः। संज्ञा परिभाषा च किंरूपा। आदेशस्य स्थानिसदृशत्वं क्व भवति क्व वा न। लघुगुरुनिपातोपसर्ग संयोगावसानपदार्थाः के। स्वराणां व्यञ्जनानां च कति प्रभेदाः। स्वरूपमिति सूत्रस्य किं तात्पर्यम्। तपरत्वे को विशेषः। प्रत्याहारपदार्थः कः किमस्य प्रयोजनम्। हलन्त्यसूत्रस्यावृत्तौ किं प्रयोजनम्।

सन्धिप्रकरणम्

सन्धिः—

वर्णयोः सन्निहितयोर्योगः सन्धिः स पञ्चधा।
तत्र लोपागमादेशाः, क्वचित्तु प्रकृतौ स्थितिः ॥४॥

सन्निहितयोर्वर्णयोर्विकारेणाविकारेण वा योगः (सन्धानं) सन्धिः, स च स्वर (अच्) सन्धिः, व्यञ्जन (हल्) सन्धिः, विसर्गसन्धिः, स्वादिसन्धिः, प्रकृतिभावश्चेति पञ्चधा। सन्धौ क्वचिद्वर्णलोपः, क्वचिद्वर्णान्तरागमः (अनुप्रवेशः), क्वचिद्वर्णान्तरादेशः (अन्यात्मकता), इति विकारविशेषाः, क्वचित्त्वविकारेण प्रकृतौ (स्वरूपे) स्थितिर्भवति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(१) अच्सन्धिः—नर ईश-नरेशः, सूर्य उदय-सूर्योदयः, तथा एव-तथैव।

(२) हल्सन्धिः—सत् चित्-सच्चित्, दुष् त-दुष्टः, राजन् छादय-राजँश्च्छादय।

(३) विसर्गसन्धिः—रामः करोति, बालः शेते बालश्शेते, नमः करोति-नमस्करोति।

(४) स्वादिसन्धिः—एकः देवः-एको देवः, शिवः अहं-शिवोहम्, सः एव—स एव।

(५) प्रकृतिभावः—कवी इमौ, अहो इमे, गुरू एतौ, एहि राम अत्रोपविश।

सन्धिः पदे समासेपि मध्ये, धातूपसर्गयोः।
वाक्ये पदानां पद्यार्धे नित्यो, गद्ये विवक्षया ॥५॥

संहितैकपदे नित्या, नित्या धातूपसर्गयोः; नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते—इत्युक्त्या समासेऽसमासेपि पदाभ्यन्तरे, धातूपसर्गयोः, पद्यार्धे पदानां मिथश्च संहिताया नित्यतया एषु नित्यं सन्धिः, गद्यवाक्ये तु मिथः पदानां संहिताविकल्पेन संहिताया विवक्षायां सन्धिः, अविवक्षायां न सन्धिः।

(१) एकपदे—हरे ए-हरये, विष्णो ए-विष्णवे, भव अति-भवति।

(२) समासे—नर इन्द्र-नरेन्द्रः, जगत् ईश-जगदीशः, मनस् रथ-मनोरथः।

(३) धातूपसर्गयोः—अनु अभवत्-अन्वभवत्, प्र अर्थयते-प्रार्थयते।

(४) पद्यार्धे—स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः॥

(५) गद्ये—गुरोः गृहम् तत्र अस्ति—गुरोर्गृहं तत्रास्ति। अत्र एषः अस्ति—अत्रैषोस्ति।

अच्सन्धिः—

यण्—संहितायाम् (६. १. ७२) इत्यधिकृत्य, इको यणचि (६. १. ७७) इकः स्थाने यणस्यादचि संहितायां विषये। सुधीभिरुपास्य इति समासेऽन्तः सुब्लोपे सुधी उपास्य इति स्थिते ईकारस्य तालव्यस्य स्थानेन्तरतम इति तादृशे यणि यकारे सुध्य् उपास्य इति जाते, अनचि च (८.४.४७) अचः परस्य यरो द्वे वा स्तो नत्वचि। इति धस्य द्वित्वे, झलां जश् झशि (८. ४. ५३) पदान्ते झलां जशः स्युर्झशि। इति पूर्वधस्य जशि दन्त्ये दकारे सुद्ध्य् उपास्य इति जाते दधयानां संयोगसंज्ञायां, संयोगान्तस्य लोपः। (८. २-२३) संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्। इति यलोपे प्राप्ते, यणः प्रतिषेधो वाच्यः (वा) इति निषेधे अज्झीनो वर्णः परं धावतीति दधयानामुत्तरयोगे सुद्ध्युपास्यः, द्वित्वाभावपक्षे जश्त्वाभावेन सुध्युपास्यः। उकारस्य यणि वकारे मधु अरि-मद्ध्वरिः मध्वरिः, ऋकारस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रेफे धातृ अंश—धात्रंशः धात्रंशः, लृकारस्य लकारे लृ आकृति-लाकृतिः। एवं यद्यपि, इत्याह, देव्युवाच, प्रत्येकं, पित्रिच्छा, गुर्वासनं, मात्रुक्तिः, स्वागतम्।

वि. १ प्रत्याहारग्रहणे तद्वाच्यवाच्ये निरूढलक्षणया इकः अचीति प्रत्याहारवाच्येकारादिवाच्यानां सवर्णानां दीर्घादीनामपि ग्रहः, भाव्यमानस्याणः सवर्णाग्राहकतया यण्शब्देन चतुर्णामेव यादीनां ग्रहः, तेन यथासंख्यन्यायाप्रवृत्तेः स्थानत आन्तरतम्येन इकारादिस्थानेषु यकारादयः। अचीत्यौपश्लेषिकसप्तम्या अजुपश्लिष्टस्य (अच्समीपस्थस्य) इको यण्, सामीप्यं च कालतो वर्णतश्चाव्यवधानम्, ततश्चौपश्लेषिकसप्तम्यैवेष्टसिद्धेः संहितायामित्यधिकारो नावश्यक इति भाष्ये प्रत्याख्यातः। तस्मिन्निति निर्दिष्टेपूर्वस्येति अजव्यवहितपूर्वस्येको यणिति कथनमपि नावश्यकम्, औपश्लेषिकसप्तमीबलेनैव धकारव्यवहितस्य सुध्युकारस्य पकारव्यवहितस्य उपेत्युकारस्य च यणोऽप्रवृत्तेः। संहितायामित्युक्त्याऽसंहितायां तदविवक्षास्थलेपि न यण्, तेन देवी उवाचेत्यपि साध्वेव।

वि. २ सुध्युपास्य इत्यत्र यकारस्य स्थानिवत्त्वेनाच्त्वमादायानचिचेति द्वित्वाप्राप्तिस्तु न, तस्याल्विधित्वेन स्थानिवद्भावाभावात्; अल्विधित्वेपि अचःपरस्मिन्निति स्थानिवत्त्वं न, द्विर्वचने कर्तव्ये नपदान्तेति तन्निषेधात्। अत्र **यणो मयो द्वे वाच्ये** (वा) इति यणः परस्य मय इव विभक्तिव्यत्ययेन मयः परस्य यणोपि द्वित्वविधाने पक्षे यकारस्यापि द्वित्वं भवति, तेन धकारयकारयोर्द्वित्वविकल्पेन द्धिं द्ध्रियं, द्धिधमेकयं, द्धियमेकध, मेकधमेकयमिति चत्वारि रूपाणि भवन्ति। इह न भूसुधियोरिति यणिणषेधस्तु न, अजादौ सुपि पर एव तन्निषेधात्। इकोऽसवर्णे इति चात्र न प्रवर्तते, नसमास इति निषेधात्।

वि. ३ **अचो रहाभ्यां द्वे** (८-४-४६) अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। हरि अनुभव, नहि अस्ति इत्यत्र यणि यस्य द्वित्वविकल्पे हर्य्यनुभवः हर्यनुभवः, नह्य्यस्ति नह्यस्ति। **सर्वत्र शाकल्यस्य** (८-४-५१) यत्र यत्र द्वित्वं विहितं तत्र तत्र शाकल्यमते न। अर्कः ब्रह्मा। **दीर्घादाचार्याणाम्** (८-४-५२) दीर्घात्परस्य यरो द्वित्वं न आचार्याणां मते। दात्रं पात्रम्। **हलो यमां यमि लोपः** (८-४-६४) हलः परस्य यमो लोपो वा स्याद्यमि। इति लोपपक्षे द्वित्वाभावपक्षे च हर्यनुभव इत्येकयं रूपम्। यमां यमीति यथासंख्यविज्ञानान्नेह लोपः—माहात्म्यं तादात्म्यम्।

अयादि—एचोऽयवायावः (६-१-७८) एचः क्रमात् अय् अव् आय् आव् एते स्युरचि। एकारादीनां चतुर्णां स्थानेषु यथासंख्यमयादयश्चत्वार आदेशाः। हरे ए-हरये, विष्णो ए-विष्णवे, नै अक-नायकः, पौ अक-पावकः। एवं स्थितये, गतये, गुरवे, शम्भवे, शायकः, भावकः, चयनं, लवनं, भवनम्। पदान्ते तु हरे एहि, विष्णो इह, श्रियै उद्यतः, गुरौ उत्सुकः इत्यादावयाद्यादेशेषु, **लोपः शाकल्यस्य** (८-३-१९) अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वा स्यादशि परे। इति यवयोर्वा लोपः, लोपपक्षे पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धतया पुनर्न स्वरसन्धिः। हर एहि हरयेहि, विष्ण इह विष्णविह, श्रिया उद्यतः श्रियायुद्यतः, गुरा उत्सुकः गुरावुत्सुकः। एवं तस्मा इदं तस्मायिदम्, सर्व इह सर्वयिह, रवा उदिते रवावुदिते। **वान्तो यि प्रत्यये** (६-१-७९) यकारादौ प्रत्यये परे ओदौतोरवावौ स्तः। गो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi अच सन्धि

यम्-गव्यम्। गोर्विकार इत्यर्थे गोपयसोरिति यत्। नौ यम्—नाव्यम्। नावा तार्यमित्यर्थे नौवयोधर्मेति यत्। एवं भव्यं हव्यं शङ्क्यं श्राव्यम्। गोयूतौ छन्दस्युपसंख्यानम् (वा), अध्वपरिमाणे च (वा) गो यूति-गव्यूतिः (क्रोशयुगम्), ऊतियूतीति यूतिशब्दो निपातितः। धातोस्तन्निमित्तस्यैव (६-१-८०) यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव स्यान्नान्यस्य। पूर्वसूत्रेण सिद्धौ नियमा(परिसंख्या)र्थमिदम्। लव्यम्, लुञो यति गुणेऽवादेशः। अवश्यलाव्यम्, लुञ आवश्यकार्थे ण्यति वृद्धावावादेशः। एवं भव्यं भाव्यं श्रव्यं श्राव्यम्। क्षय्यजय्यौ शक्यार्थे (६-१-८१) शक्यार्थे बोध्ये क्षय्य जय्यावित्ययादेशो निपात्यते। क्षेतुं शक्यं-क्षय्यम्। जेतुं शक्यं-जय्यम्। क्षिजिभ्यां यति गुणेऽयादेशः। शक्यार्थ इत्युक्तेर्नेह-क्षेतुं योग्यं क्षेयं पापम्, जेतुं योग्यं जेयं मनः। क्रय्यस्तदर्थे (६-१-८२) क्रयणार्थे बोध्ये क्रय्य इत्ययादेशो निपात्यते। क्रेतारः क्रीणीयुरिति बुद्ध्याऽऽपणे प्रसारितं-क्रय्यम्। क्रीणातेर्यति गुणेऽयादेशः। अतदर्थे तु न—क्रेतुं योग्यं-क्रेयं वस्तु।

वि. १ अयादिषु यथासंख्यन्यायः। परमेचां सन्ध्यक्षरतया संवृताऽकारकण्ठतालव्यस्य एकारस्य तादृशोऽय्, संवृताऽकारकण्ठोष्ठ्यस्य ओकारस्य तादृशोऽव्, विवृताऽऽकारकण्ठतालव्यस्य ऐकारस्य तादृश आय्, विवृताऽऽकारकण्ठोष्ठ्यस्य औकारस्य तादृश आव् आन्तरतम्येनैव सिद्धतीति यथासंख्यसूत्रं नेहावश्यकम्। एचामयादिषु अपदान्तस्थले यवयोर्योग एव, पदान्तस्थले तु यवयोर्लोपविकल्पेन रूपद्वयम्। तत्रोच्चारणसौकर्येण अयायादेशयोर्लोपपक्षम् अवावादेशयोरलोपपक्षमादाय प्रयोगः प्रायिकः। कानि सन्ति कौ स्त इत्यादावस्तेरल्लोपस्य स्थानिवद्भावेन यणावादेशौ तु न, नपदान्तेति पदान्ते स्थानिवद्भावनिषेधात्।

वि. २ गव्यं नाव्यमित्यत्र भसंज्ञया पदत्वाभावाल्लोपःशाकल्यस्य हलिसर्वेषामिति वलोपाभावेपि गव्यूतिरित्यत्र समासान्तर्विभक्तिमादाय पदत्वाद्वकारलोपस्तु न, वान्तोयीत्यत्र लोपोव्योर्वलीति लुप्तस्य वकारान्तरस्य प्रश्लेषाभ्युपगमेन श्रूयमाणवकारान्तादेशस्य विधानेन तथाभूतस्यैवाध्वपरिमाणेचेत्यत्राप्यनुवृत्तेः। गोर्यूतावित्यस्य छान्दसत्वेन लोकेपि प्राप्त्यर्थमध्वपरिमाणे चेत्यारम्भः।

वि. ३ तन्निमित्तस्यैवेत्युक्त्या वेञ्धातोः कर्मणि लटि यकि वचिस्वपीति सम्प्रसारणे पूर्वरूपे उकारस्य दीर्घे आङा सह गुणे ओकारे लुङि आटश्चेति बृद्धयौकारे ओयते औयत इत्यत्र ओकारौकारयोः परादिवद्भावेन धात्ववयवत्वेपि यादिप्रत्ययनिमित्तकत्वाभावाद्वान्तादेशो न। धातोरेवैच इति विपरीतनियमेन बाभ्रव्य इत्यादौ वान्तादेशाभावाभावायेष्टनियमावधारणार्थं तन्निमित्तस्यैवेत्येवकारः।

एकादेशसन्धयः—

गुणः—एकः पूर्वपरयोः (६-१-८४) इत्यधिकृत्य, आद्गुणः (६-१-८७) अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात्संहितायाम्। उप इन्द्र—उपेन्द्रः, रमा ईश-रमेशः, गङ्गा उदकं-गङ्गोदकम्, तव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऊहः-तवोहः। कण्ठयतालव्ययोरवर्णेवर्णयोस्तादृश एकारः, कण्ठ्योष्ठ्ययोरवर्णोवर्णयोस्तादृश ओकारः। एवं सूर्योदयः, परमेश्वरः, दैवेच्छा, महेन्द्रः, चन्द्रोपमः। उरण् रपरः (१-१-५१) ऋ इति त्रिंशतः संज्ञेत्युक्तं, तत्स्थाने योऽण् स र(र-ल)परः सन्नेव प्रवर्तते। कृष्ण ऋद्धिरित्यत्रैकदेशसाम्येन कण्ठ्ये ऽकारे प्राप्ते रपरत्वविधानेनान्तरतम्यादकारस्थले अर् गुणे कृष्णर्द्धिः। ऌकारस्थले त्वल्गुणः तव ऌकारः-तवल्कारः। एवं महर्षिः, राजर्षिः, तवर्द्धिः, ममर्णम्।

वि. कृष्णर्द्धिरित्यत्र अचोरहाभ्यामिति धकारद्वित्वेन, झरो झरि सवर्णे (८-४-६५) हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि। इति पक्षे लोपेन च द्वित्वाभावे लोपे सत्येकधम्, असति लोपे द्वित्वलोपयोः सतोर्वा द्विधं, सति द्वित्वे लोपाभावे त्रिधमिति त्रीणि रूपाणि। धस्य द्वित्वे पूर्वधस्य जश्त्वेन दत्वं च। तवल्कार इत्यत्र यणः परस्य मयो द्वे वाच्य इति पक्षे ककारस्य द्वित्वेन अनचिचेति लस्य द्वित्वविकल्पेन लस्यैव द्वित्वं, कस्यैव द्वित्वं, द्वयोर्द्वित्वं, नोभयोर्द्वित्वमिति रूपचतुष्टयं वैचित्र्यम्। ऌकारस्याऽव्यावहारिकतयाऽल्गुणः क्वाचित्क एव।

वृद्धिः—वृद्धिरेचि (६-१-८८) अवर्णादेचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्ण एकत्वं-कृष्णैकत्वम्, गङ्गा ओघ-गङ्गौघः, देव ऐश्वर्य-देवैश्वर्यम्, मम औत्सुक्यं-ममौत्सुक्यम्। अवर्णस्य एकारैकारयोश्च स्थाने कण्ठतालव्य ऐकारः, अवर्णस्य ओकारौकारयोश्च स्थाने कण्ठौष्ठ्य औकारः। एवं सदौदार्यम्, सर्वौषधिः, सहैव, तथैव, दुग्धौदनः, महौषधम्, ममौचित्यम्। एत्येधत्यूठ्सु (६-१-८९) अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। एङिपररूपमाद्गुण इत्यनयोरपवादः। उप एति-उपैति, उप एधते-उपैधते। एजाद्योरित्युक्तेर्नेह-उप इत-उपेतः। प्रष्ठ ऊह-प्रष्ठौहः अत्रोठ् परः। अक्षादूहिन्यामुपसंख्यानम् (वा) अक्ष ऊहिनी-अक्षौहिणी सेना। स्वादीरेरिणोः (वा) स्व ईर-स्वैरम् (स्वच्छन्दम्)। स्वेन ईरितुं शीलमस्य अस्या वा स्वैरी स्वैरिणी (कुलटा)। प्रादूहोढोढ्येषैष्येषु (वा) प्र ऊह-प्रौहः, प्र ऊढ-प्रौढः (पूर्णः), प्र ऊढि-प्रौढिः, प्र एष-प्रैषः (प्रेरणोक्तिः), प्र एष्य-प्रैष्यः (भृत्यः)। ऋते च तृतीयासमासे (वा) सुखेन ऋतः (युक्तः)-सुखार्तः। एवं दुःखार्तः रपरत्वेन आर्। तृतीयेत्युक्तेरिह तु गुण एव-परमश्चासौ ऋतः-परमर्तः।

वि. १ कृष्णैकत्वमित्यादौ संज्ञाप्रमाणत्वादिति निर्देशेन पूरणगुणेति निषेधस्यानित्यत्वाभ्युपगमात्कृष्णस्यैकत्वमित्यादिः षष्ठीसमास इति केचित्। अन्ये तु गुणवाचकेन सह षष्ठीसमासनिषेधेन हे कृष्ण हे देव इति सम्बोधने पृथक्पदं मन्यन्ते। संख्यादिशब्दा न गुणवचना इति समासनिषेधो नेत्यपि समाधानम्।

वि. २ प्रष्ठं वहतीत्यर्थे वहेर्ण्विप्रत्यये वेर्लोपे उपधालोपे प्रष्ठवाट्, शसि वाह ऊठि पूर्वरूपे प्रष्ठ ऊह इत्यवस्थायां वृद्धौ प्रष्ठौहः। एत्येधत्योः, प्रष्ठौह इत्यत्र सम्प्रसारणपूर्वरूपयोः प्रत्ययलक्षणेन ण्विप्रत्ययमादाय लघूपधगुणेन ओकारे च वृद्धिरेचीत्यनेनैव वृद्धेः सिद्धौ एत्येधत्यूठ्ष्विति सूत्रं किमर्थमिति न शङ्क्यम्, एत्येधत्योर्वृद्धिरेचीति बाधित्वा एङिपररूप

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अच् सन्धि

मिति पररूपापत्तेः, प्रष्ठौह इत्यत्र लघूपधगुणे कर्तव्ये पूर्वरूपस्य बहिरङ्गतयाऽसिद्धत्वेन लघूपधगुणाभावे आद्गुण इति गुणापत्तेश्च तद्द्वयं बाधितुमस्य वृद्धिविधेरावश्यकत्वात्। पुरस्तादपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायेनेयं वृद्धिरेङिपररूपमित्यस्यैव बाधिका न त्वोमाङोश्चेत्यस्येति अव आ इहीत्यत्र अवैहीति वृद्धिरसाधुरेव, प्रयुक्तं च—अवेहि मां किङ्करमष्टमूर्तेरिति।

वि. ३ अक्षौहिणीशब्दार्थस्तु—'अक्षौहिण्याः सप्ततिरष्टशतान्येकविंशतिसहस्रम् द्विरदास्तथा रथा तत्त्रिपञ्चगुणा काश्च तुरङ्गनराः' इति २१८७० गजास्तावन्तो रथाः, ६५६१० अश्वाः, १०९३५० पदातय इत्येकाऽक्षौहिणी। अत्र पूर्वपदात्संज्ञायामग इति णत्वम्। अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति ऊढशब्देन क्तवत्वन्तैकदेशोढशब्दस्याग्रहणात्प्रोढवानित्यत्र गुण एव। इष इच्छायामिति तुदादेः, इष गताविति दिवादेः, इष आभीक्ष्ण्ये इति क्र्यादे श्चैषां घञि ण्यति च एष एष्य इत्यत्र परे पररूपे प्राप्ते वृद्धिः। ईष उञ्छे ईष गतिहिंसादर्शनेषु इत्यनयोस्तु दीर्घोपधत्वेन आद्गुण इति गुणे प्रेषः प्रेष्यः।

वि. ४ प्रवत्सतरकम्बलवसनार्णदशानामृणे (वा) प्रार्णम् (प्रकृष्ट ऋणम्), वत्सतरार्णम्, कम्बलार्णम्, वसनार्णम् (वत्सतरादिरूपमृणम्), ऋणार्णम् (ऋणापनयनार्थमृणान्तरम्), दशार्णो देशः, नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च। उपसर्गादृति धातौ (६-१-९१) अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। गुणापवादः। प्र ऋच्छति-प्रार्छति उपार्छति। अन्तादिवच्चेति रेफस्य पदान्तत्वे खरवसानयोरिति विसर्गस्तु न, उभयथर्क्षु कर्तर्षिदेवतयोरिति निर्देशेन पदान्तरेफस्य विसर्गाभावबोधनात्। तेन सुखार्त इत्यपि सिद्धति। उपसर्गेणैव धातोराक्षेपेण लाभसम्भवे धाताविति योगविभागात्पुनर्वृद्धिविधानेन परोपि ऋत्यक इति पाक्षिकः प्रकृतिभावोनेन बाध्यते।

पररूपम्—एङि पररूपम् (६-१-९४) अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्। वृद्धिरेचीत्यस्यापवादः। प्र एजते (कम्पते)-प्रेजते, उप ओषति-उपोषति, प्र ओषति-प्रोषति। एवे चानियोगे (वा) अनियोगोऽनवधारणम्। क्व एव-क्वेव (क्व नु) भोक्ष्यसे, अद्य एव अद्येव(अद्यनु)। अवधारणार्थे तु वृद्धिरेव, तवैव ममैव अद्यैव। ओत्वोष्ठयोः समासे वा (वा) स्थूल ओतुः (बिडालः)-स्थूलोतुः स्थूलौतुः। बिम्बवदोष्ठौ यस्य यस्या वा-बिम्बोष्ठः-ष्ठी बिम्बौष्ठः-ष्ठी। महोष्ठः महौष्ठः। असमासे तु वृद्धिरेव-तवौष्ठः।

वि. शकन्ध्वादिषु पररूपं वाच्यम् (वा) तच्च टेः। शक अन्धुः-शकन्धुः (शककूपः)। कर्क अन्धु-कर्कन्धुः (वदरम्)। सीमन्तः केशवेशे (गण) सीमा अन्त-सीमन्तः (केशवेशः), अन्यत्र सीमान्तः (सीम्नोऽन्तः)। मनस् ईषा-मनीषा (बुद्धिः), हल ईषा-हलीषा, लाङ्गल ईषा-लाङ्गलीषा (हलपद्धतिः)। कुल अटा-कुलटा (पुंश्चली)। पतन्त्यञ्जलयो यस्मिन् पतत् अञ्जलि-पतञ्जलिः (भाष्यकारः)। सारङ्गः पशुपक्षिणोः (गण) सार अङ्गः-सारङ्गः (मृगः पक्षी वा)। अन्यत्र साराङ्गः (दृढदेहः)। ओमाङोश्च (६-१-९५) ओमि आङि च आत्परे पररूपमेकादेशः स्यात्। शिवाय ओंनमः- शिवायोंनमः। शिव आ.इहि इत्यत्र पूर्वं धातुरुपसर्गेण युज्यते, धातूपसर्गयोः कार्यमन्तरङ्गमिति न्यायेन पूर्वं गुणे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिव एहीति जाते, अन्तादिवच्चेत्याङ्परत्वेन वृद्धिं बाधित्वानेन पररूपे शिवेहि। **अव्यक्तानुकरणस्यात इतौ** (६-१-९८) ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात्। पटत् इति-पटिति। **एकाचो न** (वा) अदिति। **डाचि बहुलं द्वे भवतः** (वा) **तस्य परमाम्रेडितम्** (८-१-२) द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात्। **नाम्रेडितस्यान्त्यस्य तु वा** (६-१-९९) आम्रेडितस्य पररूपं न स्यात्, अन्त्यस्य तु तकारमात्रस्य वा स्यात्। पटत् पटत् इति-पटत्पटेति। पररूपाभावपक्षे तु झलांजश इति जश्त्वे पटत्पटदिति।

सवर्णदीर्घः—अकः सवर्णे दीर्घः (६-१-१०१) अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्य अरि-दैत्यारिः, सिंह आसनं-सिंहासनम्, सदा अत्र-सदात्र, श्री ईश-श्रीशः, विष्णु उदय-विष्णूदयः। समानस्थाना दीर्घा आकारादयः। **ऋति सवर्णे ऋ वा** (वा) होतृ ऋकार-होतृकारः होतॄकारः। पितृ ऋणं-पितृणं-पितॄणम्, पक्षे ऋत्यक इति वक्ष्यमाणः प्रकृतिभावः। एवं तदाहम्, गौरीश्वरः, भानूदयः, साधूहः, पितॄद्धिः, महाशयः, गजाननः, महात्मा।

वि. नाज्झलावित्यज्झलोः सावर्ण्यनिषेधेन हलि परे दीर्घप्रसक्तेरिह अचीति किमर्थमनुवर्तनीयमिति न शङ्क्यम्, सवर्णग्राहकशास्त्रस्य प्रागनिष्पत्तेर्नाज्झलाविति निषेध आक्षरसमाम्नायिकानामेव न तु दीर्घप्लुतानामपि, अत एवाऽऽकारे-निषेधायाऽऽकारप्रश्लेष इति पूर्वोक्ततया दीर्घेकारशकारादीनां सावर्ण्येन कुमारी शेते इत्यादौ सवर्णदीर्घवारणायाचीत्-स्यावश्यकत्वात्। अत्र यथासंख्यन्यायेनैवेष्टसिद्धेः अकोकिदीर्घ इत्येव सुवचमिति वदन्ति।

पूर्वरूपम्—एङः पदान्तादति (६-१-१०९) पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। अयवादे-शापवादः। हरे अव-हरेव, विष्णो अत्र-विष्णोत्र। एवं रामेऽनुगतः, गृहेऽवस्थितः, सखेऽद्य, वायोऽत्र, शम्भोऽनुकम्पस्व। **सर्वत्र विभाषा गोः** (६-१-१२२) लोके वेदे चैङन्तस्य गोरति वा प्रकृति-भावः स्यात्पदान्ते। **अवङ् स्फोटायनस्य** (६-१-१२३) अतीति निवृत्तम्। अचि परे पदान्ते गोरवङ् वा स्यात्। पक्षे पूर्वरूपम्—गो अग्रम्, गवाग्रम्, गोग्रम्। एङन्तस्येत्युक्तेर्नेह प्रकृतिभावः-चित्रग्व-ग्रम्। पदान्त इत्युक्तेर्नेहावङ्-गवि। व्यवस्थितविभाषयात्र नित्यमवङ्-गवाक्षः। **इन्द्रे च** (६-१-१२४) गोरवङ् स्यादिन्द्रे परे। गो इन्द्र-गवेन्द्रः। अवङि आद्गुणः।

वि. भावाभावोभयस्य विभाषाशब्दार्थतया क्वचिद्भाव एव, क्वचिदभाव एव, क्वचिदुभयमिति लक्ष्यानुसारेण व्यवस्थिताया विभाषाया अभ्युपगमात् गवाग्रमित्यत्रोभयं, गवाक्ष इत्यत्र तु भाव एव। गवेन्द्र इत्यत्रापि व्यवस्थित-विभाषयैवेष्टसिद्धेरिन्द्रे चेति सूत्रं नावश्यकम्। गवां किरणानामक्षीवेति समासे अक्ष्णोऽदर्शनादिति समासान्ते निष्पन्नो गवाक्षशब्दो वातायने रूढः, पुंस्त्वं लोकात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकृति भाव:

प्रयोगाः—गवाक्षात्प्रेक्षते स्वामी । इत्युवाच तदाग्रजः । यद्यप्येवं तथापीदं हृदयेनोच्यतेऽनृतम् । उपोषिताभ्यामिव लोचनाभ्याम् । नाव्याः सुप्रतरा नद्यः । गव्यातपरं नामृतम् । क्रय्यानीमानि वस्तूनि । महात्मानो महर्षयः । सूर्योदये स्नातुमुपैति गङ्गाम् ।

प्रश्नाः—गुणवृद्धिसवर्णदीर्घपररूपपूर्वरूपाणि क्व भवन्ति, एषां शब्दार्थाः के । पदान्तेऽपदान्ते च एचां कः सन्धिः । समानस्वरयोः कः सन्धिः । ऋकारस्य गुणवृद्ध्योः को विशेषः । एषु सन्धीन्वर्णय—विद्यार्थी गव्यमिच्छति । सदैवाहं गृहेस्मि । राजोवाच तदैवास्मान् । ततोपीदं महत्तरम् ।

प्रकृतिभावः—

प्लुतप्रगृह्या अचि नित्यम् (६·१·१२५) प्लुताः प्रगृह्याश्च वक्ष्यन्ते, तेऽचि नित्यं प्रकृत्या स्युः । एहि कृष्ण३ अत्र गौश्चरति, हरी एतौ । **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** (६·१·१२७) पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्यु र्ह्रस्वश्च वा । चक्री अत्र-चक्रि अत्र चक्र्यत्र, ह्रस्वप्रकृतिभावयोरभावे यण् । कुमारी अत्र कुमारि अत्र कुमार्यत्र । पदान्ता इत्युक्ते नेह-गौर्यौ । न समासे (वा) वाप्यामश्वः-वाप्यश्वः, सुधीभिरुपास्यः-सुध्युपास्यः, । **ऋत्यकः** (६.१.१२८) ऋति परे अकः प्राग्वत् । ब्रह्मा ऋषिः-ब्रह्म ऋषिः ब्रह्मर्षिः पक्षेगुणेऽर् । राजा ऋषिः-राज ऋषिः, राजर्षिः । समासेप्ययं प्रकृतिभावः-सप्तऋषीणां, सप्तर्षीणाम् ।

वि. प्लुतप्रगृह्ये त्यत्र नित्यमिति अयमेव प्रकृतिभावो नित्यं स्याद्वाक्यान्तर इव कार्यान्तरसमुच्चितो माभूदित्येवमर्थम्, तेन हरी एतौ इत्यत्र ह्रस्वसमुच्चितप्रकृतिभावो न । इकोसवर्णे इत्यत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावेसिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये । पदान्ते इको दीर्घत्वे ह्रस्वः प्रकृतिभावश्च, ह्रस्वस्थले तु सन्धिः ।

वाक्यस्य टेः प्लुत उदात्त : (८.२.८२) इत्यधिकृत्य, **प्रत्यभिवादेऽशूद्रे** (८.२.८३) अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्स चोदात्तः । अभिवादये देवदत्तोहम्–आयुष्मान्भव देवदत्त३ । अभिवादये गार्ग्योऽहम्-आयुष्मानेधि गार्ग्य३ । अशूद्रविषय इत्युक्तेनेह-अभिवादये तुषजकोहम्–आयुष्मानेधि तुषजक । **स्त्रियां न** (वा) अभिवादये गार्ग्यहम्– आयुष्मती भव गार्गि । नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते । नेह– आयुष्मानेधि । भोराजन्यविशां वेति वाच्यम् (वा) आयुष्मानेधि भो३, भो वा । आयुष्मानेधीन्द्रवर्म३न्, वर्मन् वा । आयुष्मानेधीन्द्रपालित३ पालित वा । **दूराद्धूते च** (८.२.८४) दूराद्धूते यद्वाक्यं तस्य टेः प्लुतः स्यात् । सक्तून् पिब देवदत्त३ । पलायस्व देवदत्त३ । प्लुतत्वेऽचि परे प्रकृतिभावान्न सन्धिः । आगच्छ कृष्ण३ अत्र गौश्चरति । आयुष्मान्भव देवदत्त३ अहं तव कुशलं कामये ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. १ त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति। अभिवाद्यमानः (आशिषं वाच्यमानः) गुरुराशिषं प्रयुङ्क्ते स प्रत्यभिवादः। गुरुरिति मान्यस्योपलक्षणम्। अभिवादये इत्यस्य नमस्कारपूर्वकमाशिषं वाचयामीत्यर्थः। अभिवादित आयुष्मानेधीति प्रत्यभिवदति। आयुष्मत्त्वस्य विशेषणत्वात्सम्बोधनविभक्त्यभावः। अभिवादनविधिरापस्तम्बेन दर्शितः—"दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोभिवादयीत, उरःसमं राजन्यः, मध्यसमं वैश्यः, नीचैः शूद्रः, प्राञ्जलिः तिष्ठन्प्रातरभिवादमभिवादयीत असावहं भो इति।" असाविति स्वनामनिर्देशः। प्रत्यभिवादनप्रकारो मनुनोक्तः—"आयुष्मान्भव सौम्येति विप्रो वाच्योऽभिवादने। अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः" इति। तत्र स्त्रीशूद्रविषये प्रत्यभिवादे वाक्यान्ते प्लुतो न, भो राजन्यविशां प्लुतो वा, ब्राह्मणविषये नित्यं प्लुतः, प्रत्यभिवादवाक्यान्ते नामगोत्रप्रयोगे प्लुतः, भोशब्देष्ठ विशेषवचनात्।

वि. २ यत्र प्रदेशे स्थितस्य प्रयत्नोच्चारितं शब्दं बोध्यमानो न शृणोति किंत्वधिकं प्रयत्नमपेक्षते तद्दूरम्। हूतग्रहणं सम्बोधनमात्रोपलक्षणं, तेनाह्वानाभावेपि प्लुतः। दूराह्वाने वाक्यान्ते यत्र सम्बोधनपदं तत्रायं प्लुत इष्यते, तेनेह न—देवदत्त आगच्छ।

वि. ३ हैहेप्रयोगे हैहयोः (८·२·८५) एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्। हे३राम, राम हे३, हे३देवदत्त। हैहयोः पुनर्ग्रहणमनन्त्यस्यापि यथा स्यादिति। **गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्** (८·२·८६) दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। एकैकग्रहणं पर्यायार्थम्। दे३वदत्त, देवदा३त्त देवदत्त३। गुरोरित्युक्त्या वकारात्परस्याऽकारस्य तु न। कृष्ण३ कृष्ण। अनृत इत्युक्त्या ऋकारस्य न प्लुतः। अत्र प्राचामिति योगविभागेन सर्वः प्लुतोऽनेन विकल्प्यते, तेन प्लुतपक्षे प्रकृतिभावस्तदभावे तु न। एवं च द्वैपायनो विरहकातर आजुहाव पुत्रेति ईदृशः प्रयोग उपपद्यते।

ईदूदेद्द्विवचनं प्रगृह्यम् (१-१-११) ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। प्रगृह्यत्वे प्रकृतिभावः। हरी एतौ, विष्णू इमौ, गुरू आगच्छतः, गङ्गे अमू, पचेते इह, माले इह। **अदसो मात्** (१-१-१२) अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। अमी अत्र। **निपात एकाजनाङ्** (१-१-१४) एकोच् निपात आङ्वर्जः प्रगृह्यः स्यात्। इ विस्मये, उ वितर्के। इ इन्द्रः उ उमेशः। आ एवं नु मन्यसे। आ एवं किल तत्। आ इति वाक्यस्मरणयोरङित्, अन्यत्र ङित्। ङित्तु न प्रगृह्यः-ईषदुष्णम्-ओष्णम्। **ओत्** (१-१-१५) ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः। आहो इदम्। उताहो इति। **सम्बुद्धौ शाकल्यस्येतावनार्षे** (१-१-१६) सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे। विष्णो इति, विष्ण इति, विष्णविति। प्रगृह्यत्वे प्रकृतिभावस्तदभावेऽवादेशस्तत्र पक्षे वकारलोपः। शम्भो इति, शम्भ इति, शम्भविति। **मय उञो वो वा** (८-३-३३) मयः परस्य उञो वो वा स्यादचि। किम् उ उक्तमित्यत्र उञो निपातएकाजि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi हल सन्धि

प्रगृह्यतया प्रकृतिभावेऽनेन पक्षे वकारः वत्वाभावे प्रकृतिभाव एव। किम्वुक्तम् किमुउक्तम्। वत्वस्यासिद्धत्वान्नानुस्वारः।

वि. १. मणीवोष्ट्रस्य लम्वेते प्रियौ वत्सतरौ ममेत्यत्र वशब्दो वाशब्दो वा इवार्थकः, नत्विवशब्दः तेन ईदूदेदित्यस्य कुतो न प्रवृत्तिरिति शङ्काऽपास्ता। तथैव दम्पतीवेत्यप्युपपद्यते। अदसोमादित्यत्र मादित्यनुपादाने ईदूदेद्द्विवचनमित्यतः साहचर्यनियमेन ईदूदेदिति सर्वानुवृत्त्या अमुकेत्रेत्येकारस्थलेपि प्रगृह्यत्वेन प्रकृतिभावः स्यात् तदुपादाने तु मकारोत्तरमेकारस्यासम्भवेन एकारवर्जमीदूतोरेवानुवृत्त्या नात्रातिप्रसङ्गः।

वि. २ "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्" इत्युक्त्या ईषदाद्यर्थक आकार आङ् रूपस्तत्र प्रगृह्यत्वाभावान्न प्रकृतिभावः, पूर्वप्रक्रान्तवाक्यार्थस्यान्यथात्ववोधने स्मरणार्थे च आकारो नाऽऽङ् रूपस्तत्राङित्त्वेन प्रगृह्यत्वे प्रकृतिभावः। यत्र क्वचिदपि प्रगृह्यत्वे प्लुतत्वे वा स्वरविच्छेदायामादिर्विकृतिविशेषस्तथात्वेऽग्रिमस्वरेण सह न सन्धिरित्यनुसन्धेयम्।

प्रयोगा :—अहो इमे सम्प्रति किन्नु कुर्वते। अहो अमीभिः किमकारि शोभनम्। गुरो इत्युवाचान्तेवासी। आगच्छ गोपाल इहास्महे वयम्। अमू अनर्थं कुरुतः। अमी अद्य वनं गताः। किमु उक्तं त्वयाधुना। आ एवमुक्तं मया।

प्रश्नाः—प्रकृतिभावो नाम कः। प्लुतत्वे को विशेषः। प्रगृह्यसंज्ञायाः किं प्रयोजनम्। प्रत्यभिवादे प्लुतः क्व प्रयोज्यः क्वा न प्रयोज्यः। अधस्तनस्थलेषु प्लुतप्रगृह्यप्रकृतिभावानुपपादयत—एहि राम अत्रेदं पश्य। अहो अहमिहैवास्मि। कवी इमौ कल्पनायाम्। आयुष्मान्भव सौम्य रामशर्म३न्। वर्धेते अधुना बालौ। शिशू इमौ क्रीडतः। पश्य सखे अत्र नृत्यन्ति नर्तकाः।

हल्सन्धिः —

श्चुत्वम्—स्तोः श्चुना श्चुः (८·४·४०) सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। पूर्वतः परतो वा योगः। यथासंख्यं सकारस्य शकारस्तवर्गस्य चवर्गः। हरिस् शेते—हरिश्शेते। रामस् चिनोति—रामश्चिनोति। सत्‌चित्—सच्चित्। राजन् जय—राजञ्जय। एवं भवच्चरणम्, भवाञ्जीवतु, हरिश्चन्द्रः, तज्जयः, तच्चिनोति। शात् (८·४·४४) शात्परस्य तवर्गस्य श्चुत्वं न स्यात्। विश्नः प्रश्नः।

वि. कुचुटुतुपु एते उदितः सवर्णपञ्चग्राहकाः। अत्र स्थानिनिमित्तयोर्न यथासंख्यनियमः, शादितिनिषेधाल्लिङ्गात्, अपितु स्थान्यादेशयोरेव, तेन सस्य शः, तवर्गस्य चवर्गः क्रमिकः। सच्चिदित्यत्र श्चुत्वस्यासिद्धत्वात्पूर्वं जस्त्वेन तस्य दत्वे, दस्य श्चुत्वेन जकारे, जस्य खरिचेति चर्त्वेन चकारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्टुत्वम्—ष्टुना ष्टुः (८-४-४१) सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः। यथा-संख्यन्यायेन सकारस्य षकारस्तवर्गस्य टवर्गः। रामस् षष्ठः—रामष्षष्ठः। रामस् टीकते-रामष्टीकते पेष् ता-पेष्टा। तद् टीका-तट्टीका। राजन् ढौकसे-राजण्ढौकसे। एवं दुष्टः, पिष्टं, भवड्डमरुः तड्ढक्का, मनष्षष्ठम्। न पदान्ताट्टोरनाम् (८-४-४२) पदान्ताट्टवर्गात्परस्याऽनामः स्तोः ष्टुर्न स्यात्। षट् सन्तः, षट् ते। मधुलिट् तरति। अनाम्नवतिनगरीणामिति वाच्यम् (वा) षण्णाम्, षण्णवतिः, षण्णगर्यः। तोः षि (८-४-४३) तवर्गस्य षकारे परे न ष्टुत्वम्। सन् षष्ठः, भवान् षोडशः।

वि. ष्टुत्वेपि स्थान्यादेशयोर्यथासंख्यनियमेन सस्य षस्तवर्गस्य टवर्गः। स्थानिनिमित्तयोस्तदभावे तोः षीति लिङ्गम्। तद् टीकेत्यत्र दस्य ष्टुत्वेन डत्वे डस्य खरिचेति चर्त्वेन टः। नपदान्तादित्यत्र पदान्तोक्त्या इट्टे इत्यत्रापदान्तटवर्गात्परस्य तकारस्य न ष्टुत्वनिषेधः। टोरित्यनुक्तौ ष्टुनाष्टुरित्यतः ष्टुनेत्यस्य विभक्तिविपरिणामेनान्वयात्पदान्ताट्टवर्गादिव षकारात्परस्यापि निषेधे सर्पिष्टममित्यत्र सर्पिष्ष्तममितिस्थितौ स्वादिष्वसर्वनामस्थान इत्यन्तर्विभक्तिमाश्रित्य पदत्वेन ष्टुत्वनिषेधः स्यादिति तदनुवृत्तिवारणाय टोरित्युक्तम्। अनामिति लुप्तषष्ठीकम्। ष्टुत्वनिषेधे नाम्न एव पर्युदासो न किन्तु नवतिनगर्योरपीति वार्तिकारम्भः।

जश्त्वचर्त्वे—झलां जशोऽन्ते (८-२-३९) पदान्ते झलां जशः स्युः। स्थानत आन्तर्यम्। जगत् ईश्वरः-जगदीश्वरः। वाच्-क् ईशः—वागीशः। भवत् उक्तं-भवदुक्तम्। ककुभ् अधिपति-ककुबधिपतिः। एवं महदुक्तिः, शरदुदयः, त्वगिव। झलां जश् झशि (८-४-५३) लभ् ता-धा—लब्धा, लभ् तुं-धुं—लब्धुम्। लभ् तव्यं-धव्यं—लब्धव्यम्। खरि च (८-४-५५) खरि परे झलां चरः स्युः। भिद्-भेद् ता—भेत्ता। भिद्-भेद् तुम्-भेत्तुम्। छिद्-छेद् तव्यं-छेत्तव्यम्। युयुध् सते-युयुत्सते। लभ-लिभ् सा-लिप्सा। तद् कर-तत्करः। वावसाने (८-४-५६) अवसाने झलां चरो वा स्युः। वाक् वाग्। त्वक् त्वग्। मधुलिट् मधुलिड्। रामात् रामाद्। तत् तद्।

वि. लब्धा लब्धुमित्यादौ पूर्वं झषस्तथोर्धोधइति तस्य धत्वे सति भस्य जश्त्वेन बत्वम्। त्वज् रुज् इत्यादौ पूर्वं जस्य चोःकुरिति कुत्वेन गत्वे गस्य चर्त्वेन कः। तेन पदान्ते कवर्गस्येव चवर्गस्यापि चर्त्वे ककारः। झलां खरि परे पदान्तेऽपदान्तेपि चर्त्वम्, अन्यत्र तु अवसाने चर्त्वविकल्पेन जश्त्वचर्त्वे, जश्त्वमात्रं वा, खर्भिन्ने झशि परे जश्त्वमात्रमिति विवेकः।

छत्वम्—शश्छोऽटि (८-४-६३) पदान्ताज्झयः परस्य शस्य छो वा स्यादटि। तद् शिव इत्यत्र दस्य श्चुत्वेन जत्वे चर्त्वेन चत्वे शस्य छत्वे तच्छिवः, छत्वाभावे तच्शिवः। छत्वममीति वाच्यम् (वा) तद् श्लोकेन-तच्छ्लोकेन। एवं तच्छ्माया, मच्छ्मरणं, भवच्छ्लोकः, तच्छ्लाघा। अमीत्युक्तेर्नेह वाक् श्च्योतति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हल सन्धि

वि. तच्छिव इत्यादौ जश्त्वचर्त्वोत्तरं शस्य छत्वं न तु ततः प्राक् चर्त्वं प्रति छत्वस्यासिद्धत्वात्। शश्छोटीत्यत्र शश्छोमीति पठनीयमिति वार्तिकाशयः, तेन तच्छ्लमश्रुणेत्यपि सिध्यति।

अनुनासिकः—यरोऽनुनासिकेऽनुनासिको वा (८-४-४५) यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतद् मुखम्-एतन्मुखम्। प्राक् न्यायः-प्राङ्न्यायः। एवं तन्मौढ्यम्, मधुलिण्णयति। प्रत्यये भाषायां नित्यम् (वा) तन्मात्रम्, चिन्मयम्। पदान्तस्येत्युक्तेर्नेह—वेद्मि वध्नाति।

वि. एतन्मुखमित्यादौ दन्तस्थानस्पृष्टप्रयत्नसाम्यादनुनासिको नकारः। चतुर्मुख इत्यत्र प्रयत्नभेदेपि स्थानसाम्येन रेफस्यानुनासिको णकारस्तु न, स्थानेन प्रयत्नेन चान्तरतमे स्पर्शे चरितार्थस्यानुनासिकविधेः स्थानमात्रेण सदृशे रेफे प्रवृत्त्यभावात्; स्थानेन्तरतमउरणरपर इति सूत्रविन्यासे अन्तरतमे इति सप्तम्यन्तपाठस्यापि लाभेन सदृशतमे स्थानिन्यादेशः स्यादित्यर्थेन स्थानेन प्रयत्नेन च सदृशे स्थानिन्येवास्य विधेः प्रवृत्तेः, यूनि लब्धे तु युवतिर्जरठे रमते कथमितिन्यायात्। अत्र प्रत्ययावयवेऽनुनासिके परे नित्यमनुनासिकविधेर्मदोदग्राःककुद्मन्त इति प्रयोगस्तु मादुपधायाश्चेति यवादिगणे ककुदिति-दकारपाठसामर्थ्यादुपपादनीयः। यवादावपठितेभ्यो मतुपो वत्वविधानात् वाग्वतीत्येव भवितुमर्हति नतु वाङ्मतीति चानुसन्धेयम्।

अनुस्वारपरसवर्णौ—मोऽनुस्वारः (८-३-२३) मान्तस्य पदस्यानुस्वारः स्याद्धलि। हरिम् वन्दे—हरिं वन्दे, पिण्डम् हरति—पिण्डं हरति, वनम् याति—वनं याति। अलोन्त्यस्येति मस्याऽनुस्वारः। एवं जनं रमयति, पुत्रं पश्यति, शय्यायां शेते। हलीत्युक्तेर्नेह—त्वमत्र, किमिह। पदस्येत्युक्तेर्नेह—गम्यते रम्यते। **नश्चापदान्तस्य झलि (८-३-२४)** नस्य मस्य चापदान्तस्यानुस्वारः स्याज्झलि परे। यशान् सि-यशांसि, आक्रम् स्यते—आक्रंस्यते। एवं पयांसि, अवगंस्यते। झलीत्युक्तेर्नेह—गम्यते रम्यते। अपदान्तस्येत्युक्तेर्नेह—राजन् भुङ्क्ष्व। **अनुस्वारस्य ययि परसवर्णः (८-४-५८)** ययि परेऽनुस्वारस्य परसवर्णः स्यात्। अन् कितः—अङ्कितः। नस्यानुस्वारे परसवर्णोऽनुनासिको ङकारः। वन् चितः—वञ्चितः। कुन् ठित—कुण्ठितः। शाम् त—शान्तः। एवं सञ्चितः गुम्फितः। **वा पदान्तस्य (८-४-५९)** पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वम् करोषि-त्वङ्करोषि, त्वं करोषि। अहम् चिनोमि-अहञ्चिनोमि, अहं चिनोमि। एवं कथण्डमरुः कथं डमरुः, एवम्मन्यसे एवं मन्यसे। सम् यन्ता-सँय्यन्ता संयन्ता, सम् वत्सरः—सँव्वत्सरः संवत्सरः। यम् लोकं-यँल्लोकं यं लोकम्। एष्वनुस्वारस्य परसवर्णपक्षेऽनुनासिका यवलाः, पक्षान्तरेऽनुस्वार एव। **तोर्लि (८-४-६०)** तवर्गस्य लकारे परे परसवर्णः स्यात्। तद् लय-तल्लयः। विद्वान् लिखति—विद्वाँल्लिखति। नस्यानुनासिको लकारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं जगल्लयः, तल्लीनः, महाँल्लोभः, भवाँल्लुनाति। **मो राजि समः क्वौ** (८-२-३५) क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। अनुस्वारापवादः। सम्राट्।

वि. नकारस्यापदान्तस्यैव झलि परेऽनुस्वारस्तत्रापि ययि परे परसवर्णः, शलि परे त्वनुस्वार एव; मकारस्य तु पदान्तस्यापदान्तस्यापि हलि परेऽनुस्वारः, तस्य पदान्तस्य ययि परे विकल्पेन अपदान्तस्य तु नित्यं परसवर्णः, शलि परे त्वनुस्वार एव। कुर्वन्तीत्यत्र नस्यानुस्वारे परसवर्णे च तस्यासिद्धत्वाद्रषाभ्यामिति न णत्वम्।

पूर्वसवर्ण :—उदः स्थास्तम्भोः पूर्वसवर्णः (८-४-६१) उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्। उद् स्थानम्, उद् स्तम्भनमित्यत्रानेन आदेःपरस्येति सकारस्याघोषमहाप्राणस्य तादृशे परसवर्णे थकारे, थस्य-**झरो झरि सवर्णे** (८-४-६५) हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि। इति पक्षे लोपे दस्य चर्त्वे उत्थानम् उत्तम्भनम्, लोपाभावे तु उत्थ्थानम्, उत्थ्तम्भनम्। थकारस्य खरिचेति चर्त्वं तु न, चर्त्वं प्रति थकारस्यासिद्धत्वात्। एवम् उत्थितः उत्थाय उत्तम्भितः **झयो होऽन्यतरस्याम्** (८-४-६२) झयः परस्य हस्य वा पूर्वसवर्णः स्यात्। वाच् हरिरित्यत्र कुत्वे जश्त्वे च वाग् हरिरिति स्थितौ संवारनादघोषमहाप्राणस्य हस्य तादृशे पूर्वसवर्णे वर्गचतुर्थे घकारे वाग्घरिः, पूर्वसवर्णाभावपक्षे वाग्हरिः। एवं तद्धितः तद्धासः मधुलिड्ढसति।

वि. पूर्ववर्णानां झयां सवर्णेषु स्ववर्ग्येषु पञ्चसु हस्य स्थानसादृश्यं क्वचित्सर्वेषु क्वचिन्न कुत्रापि, आभ्यन्तरप्रयत्नसादृश्यं न कुत्रापीति बाह्यप्रयत्नैः सदृशः पूर्वसवर्णो भवति।

ङमुडाद्यागमः—ङमो ह्रस्वादचि ङमुण्नित्यम् (८-३-३२) ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात्। ङमिति प्रत्याहारः। ङणनान्तेभ्य पदेभ्यः परस्याचष्टित्वेनाद्यवयव यथासंख्यं ङुट् णुट् नुडागमाः। प्रत्यङ् आत्मा-प्रत्यङ्ङात्मा, सुगण् ईश—सुगण्णीशः सन् अच्युतः-सन्नच्युतः। एवं प्रत्यङ्ङिह, भवन्निह, गच्छन्नस्ति। **छे च** (६-१-७३) ह्रस्वस्य छे परे तुगागमः स्यात्। कित्वादूह्रस्वस्यान्तावयव स्तुक्। श्चुत्वस्यासिद्धत्वात्तुकस्तकारस्य जश्त्वेन दत्वे चर्त्वस्यासिद्धत्वाद्दस्य श्चुत्वेन जत्वे चर्त्वेन चत्वे, स्व छाया—स्वच्छाया। वृक्ष छाया—वृक्षच्छाया श्चुत्वस्यासिद्धत्वाज्जस्य चोःकुरिति कुत्वं न। एवं राजच्छत्रम्, अवच्छेदकः, परिच्छिन्नः **आङ्माङोश्च** (६-१-७४) एतयोश्छे परे तुक्स्यात्। पदान्ताद्वेति विकल्पापवादः। आच्छादयति आच्छन्नः, माच्छिदत्। **दीर्घात्** (६-१-७५) दीर्घाच्छे परे तुक्स्यात्। दीर्घस्यायं तुक् नतु छस्य सेनासुराच्छायेति ज्ञापकात्। चेच्छिद्यते। **पदान्ताद्वा** (६-१-७६) दीर्घात्पदान्ताच्छे परे तुग्वा स्यात्। लक्ष्मीच्छाया लक्ष्मीछाया। गौरीच्छत्रं गौरीछत्रम्, रम्भाच्छलं रम्भाछलम्। ङः सि धुट्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हल् सन्धि

(८-३-२९) डात्परस्य सस्य धुट् वा स्यात्। षष्शब्दषस्य जश्त्वेन डत्वे चर्त्वे षट् सन्त इति स्थिते चर्त्वस्यासिद्धत्वाड्डात्परत्वेनानेन टित्वात्सस्याद्यवयवे धुटि धस्य चर्त्वेन तत्वे षट्त्सन्तः, धुडभावपक्षे षट् सन्तः। एवं षट्त्सन्ति षट् सन्ति, षट्त्सु षट्सु। नश्च (८-३-३०) नान्तात्परस्य सस्य धुट् वा स्यात्। सन् सः-सन्त्सः सन्सः धस्य चर्त्वम्। एवं भवान्त्सः भवान्सः, विद्वान्त्सः विद्वान्सः।

वि. ङ्णोः कुक्टुक् शरि (८-३-२८) ङकारणकारयोः पदान्तयोः कुक्टुकावागमौ वा स्तः शरि परे। कुक्टुकोरसिद्धत्वाज्जश्त्वं न। चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा) प्राङ् षष्ठः सुगण् षष्ठ इत्यत्र यथासंख्यं ङकारस्य कुकि णकारस्य टुकि अन्तावयवे ककारटकारयोः पक्षे द्वितीयादेशेन खत्वे ठत्वे च पक्षे कुक्टुकोरभावे च प्राङ्ख्षष्ठः प्राङ्क्षष्ठः प्राङ् षष्ठः, सुगण्ठ्षष्ठः सुगण्ट्षष्ठः सुगण् षष्ठः। शि तुक् (८-३-३१) पदान्तस्य नस्य शे परे तुग्वा स्यात्। सन् शम्भुरित्यत्र नस्यान्तावयवे तुकि, तस्य श्चुत्वेन चत्वे, नस्य श्चुत्वेन ञत्वे शश्छोटीति शस्य छत्वे झरोझरीति चलोपे सञ्छम्भुः, चलोपाभावे सञ्च्छम्भुः, छत्वाभावे सञ्च्शम्भुः, तुगभावे श्चुत्वमात्रे सञ् शम्भुः। उक्तं च—अछौ, अचछा, अचशा, अशाविति चतुष्टयम्। रूपाणामिह तुक्छत्वचलोपानां विकल्पनात्।

रुत्वम्—समः सुटि (८-३-५) समो रुः स्यात्सुटि। संपूर्वकृधातोस्तृचि संपरिभ्यामिति सुटि सम् स्कर्ता इत्यत्र अलोन्त्यन्यायेन मस्य रुत्वे सर्स्कर्ता इति जाते, अत्रानुनासिकः पूर्वस्य तु वा (८-३-२) अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्। इति सकाराकारस्य पक्षेऽनुनासिकत्वे, अनुनासिकात्परोऽनुस्वारः (८-३-४) अनुनासिकादिति ल्यब्लोपे पञ्चमी। अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्। इति पक्षेऽनुस्वारे; खरवसानयोर्विसर्जनीयः (८-३-१५) खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्। इति विसर्गे विसर्जनीयस्यस इति बाधित्वा वाशरीति पाक्षिकविसर्गे प्राप्ते, संपुंकानां सो वक्तव्यः (वा) इति सकारे सँस्स्कर्ता संस्स्कर्ता। एवं सँस्स्कारः संस्स्कारः, सँ-संस्स्कृतम्।

वि. समो वा लोपमेके इति भाष्योक्त्या समो मस्य लोपपक्षे लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयम्, तत्रानचिचेति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्, अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्याततयाऽनुस्वारस्याप्यच्त्वेनाचः परत्वात्। अनुनासिकवतां त्रयाणां शरःखय इति कद्वित्वे षट्, अनुस्वारवतामनुस्वारस्याप्यनचिचेति द्वित्वे द्वादश, एषामष्टादशानां पूर्वं तकारस्य अचोरहाभ्यामिति द्वित्वविकल्पे, प्रथमतकारस्य यणोमय इति पुनर्द्वित्वविकल्पे एकतं द्वितं त्रितमिति चतुष्पञ्चाशत्। तेषु-अणोऽप्रगृह्यस्यानुनासिकः (८-४-५७) अप्रगृह्यस्याणोऽनुनासिको वा स्यात्। इत्यन्त्याऽऽकारस्यानुनासिकविकल्पे संस्कर्तेत्यत्राष्टोत्तरशतं रूपाणि। संस्कृतव्याकरणे संस्कृतशब्दस्याप्येवंविधाः प्रस्तारभेदाः साधुशब्दानामानन्त्यं निश्चाययन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुमः खय्यम्परे (८-३-६) अम्परे खयि पुम्शब्दस्य रुः स्यात्। पुमान्कोकिल इति कर्मधारये सुब्लुकि संयोगान्तसलोपे पुम्कोकिल इत्यत्र मस्य रुत्वे अनुनासिकानुस्वारविकल्पे खरवसानयोरिति रेफस्य विसर्गे संपुंकानामिति सत्वे पुँस्कोकिलः पुंस्कोकिलः। एवं पुमान् पुत्रः-पुँ-पुंस्पुत्रः। पुमांसं चलति-पुँ-पुंश्चली (कुलटा)। अम्पर इत्युक्त्या नेह-पुंक्षीरम्। खयीत्युक्त्या नेह-पुंदासः। ख्याञादेशे न (वा) पुंख्यानम्। नश्छव्यप्रशान् (८-३-७) अम्परे छवि नान्तस्य पदस्य रुः स्यान्न तु प्रशान्शब्दस्य। शार्ङ्गिन् छिन्धीत्यत्र नस्य रुत्वेऽनुस्वारेऽनुनासिके वा रेफस्य विसर्गे विसर्जनीयस्येति सत्वे श्चुत्वे शार्ङ्गिँश्छिन्धि शार्ङ्गिंश्छिन्धि। एवं चक्रिँ-क्रिंस्त्रायस्व, भवाँ-वांश्छादयति, भवाँ-वांस्तरति, वृक्षाँ क्षांश्चिनोति। पदस्येत्युक्त्या नेह-हन्ति। अम्परे इत्युक्त्या नेह-सन्त्सरुः। छवीत्युक्त्या नेह-भवान्करोति। नॄन्पे (८-३-१०) नॄन्नकारस्य रुर्वा स्यात्पकारे परे। नॄन्पाहीत्यत्र नस्य रुत्वेऽनुनासिकानुस्वारयो रेफस्य विसर्गे विसर्जनीयस्येति सत्वे प्राप्ते, कुप्वोः ≍क ≍पौ च (८-३-३७) कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः, चाद्विसर्गः। इति विसर्गोपध्मानीयविकल्पे पक्षे रुत्वाभावे च नॄँ≍पाहि, नॄं≍पाहि, नॄँः पाहि, नॄंः पाहि, नॄन्पाहि। एवं नॄन्पश्य नॄन्प्रीणातीत्यादौ। कानित्यस्य वीप्सायां द्विर्वचने द्वितीयस्याम्रेडितसंज्ञायां, कानाम्रेडिते (८-३-१२) कान्नकारस्य रुः स्यादाम्रेडिते परे। इति प्रथमनकारस्य रुत्वे तत्पूर्वाकारस्यानुनासिकत्वेऽनुस्वारे वा रेफस्य विसर्गे सत्वं बाधित्वा कुप्वोरिति प्राप्ते संपुंकानामिति सत्वे, किं वा—कस्कादिषु च (८-३-४८) इण्विण उत्तरस्य विसर्गस्य षः स्यादन्यत्र तु सः। इति सत्वे काँस्कान् कांस्कान्। कः कः इत्यत्र, कुतः कुतः आगत इत्यर्थेऽणि अव्ययानां भमात्रेटिलोप इति टिलोपे आदिवृद्धौ कौतः कुत इत्यत्र च कस्कादित्वेन सत्वे कस्कः कौतस्कुतः। सर्पिः कुण्डिका धनुः कपालमित्यत्र इण उत्तरत्वात्षत्वे सर्पिष्कुण्डिका धनुष्कपालम्। भास्कर इत्यत्र तु सत्वम्। आकृतिगणोऽयम्।

वि. पुंस्कोकिल इत्यत्र विसर्जनीयस्येत्यनेनैव सत्वसिद्धावपि व्युत्पत्तिपक्षे अप्रत्ययस्येति षत्वपर्युदासादिदुदुपधस्येत्यप्रवृत्त्या कुप्वोरिति प्राप्तौ अव्युत्पत्तिपक्षे तु तेनैव षत्वप्राप्तौ सत्वार्थं संपुंकानामिति पुंग्रहणम्। कांस्कानित्यत्र तु कस्कादेराकृतिगणत्वेनैव सत्वसिद्धेरत्र कान्ग्रहणं नावश्यकम्। येन नाप्राप्ते यो विधिरारभ्यते स तस्यैवापवाद इति न्यायेन कुप्वोरिति विसर्जनीयस्य स इत्यस्यैवापवादको नतु शर्परे विसर्जनीय इत्यस्यापि, तेन वासः क्षौममित्यादौ विसर्ग एव।

प्रयोगा :—हरिश्शरणमस्माकम्। दुष्टैर्निष्पिष्टशान्तयः। षण्णामिन्द्रियाणां परवशः। इक्षुच्छायनिषादिन्यः। अस्माँस्त्रायस्व सङ्कटात्। पुंस्कोकिलानां रुतम्। कस्कः काँस्कान्न पश्यति। अतः परं न गच्छामि। अधर्मेण जगल्लयः। लाभाल्लोभः प्रवर्तते। जगन्नाथो मच्छरणम्। प्रार्थयामो जगद्धितम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विसर्गसन्धि

प्रश्नाः—श्चुत्वष्टुत्वयोः को विशेषः। नकारमकारयोः पदान्तयोरपदान्तयोश्च कतिधा सन्धयः। छकारे चकारयोग आवश्यको न वा। अधस्तनवाक्येषु सन्धिविशेषान्निरूपय—दानाच्छ्रेयोनुपालनम्। उद्गच्छन्नङ्कुरः छिन्नः। परिच्छेदो हि पाण्डित्यम्। अङ्कानां वामतो गतिः। भवाँस्त्राता न कश्चन। संस्कारो नान्यथा भवेत्। अवेहि मां किङ्करमष्टमूर्तेः। निष्टप्तं सुवर्णमुज्ज्वलं भवति। महद्भयमुपस्थितम्। निश्चिनोति मे मनः। जगदीशश्शरणम्। तन्मयं मनः। सच्चिदानन्दरूपः।

विसर्गसन्धिः—

विसर्जनीयस्य सः (८-३-३४) खरि परे विसर्जनीयस्य सः स्यात्। विष्णुः त्राता–विष्णुस्त्राता। जनाः तरन्ति—जनास्तरन्ति। लोकः तिष्ठति—लोकस्तिष्ठति। श्चुना योगे श्चुत्वं, ष्टुना योगे ष्टुत्वमपि-वृक्षश्छादयति, जनश्चिनोति, हरिष्टीकते, हरेश्छत्रम्। **शर्परे विसर्जनीयः** (८-३-३५) शर्परे खरि विसर्जनीयस्य विसर्ग एव स्यान्नत्वन्यत्। कः त्सरुः (खड्गमुष्टिः)। अयः क्षुरः, घनाघनः क्षोभणः, वासः क्षौमम्, भवतः क्षेत्रम्। **वा शरि** (८-३-३६) शरि परे विसर्जनीयस्य विसर्ग एव वा स्यात्। पक्षे सत्वम्। यथायोगं श्चुत्वं ष्टुत्वमपि। हरिः शेते, हरिश्शेते। बालः शयितः, बालश्शयितः। वायुः सरति, वायुस्सरति। गतः सायम्, गतस्सायम्। मासः षष्ठः, मासष्षठः। **खर्परे शरि वा विसर्गलोपो वक्तव्यः** (वा) पक्षे विसर्गः सत्वं च। रामः स्थाता—रामः स्थाता, रामस्स्थाता, लोकः स्फुरति—लोकः स्फुरति, लोकस्स्फुरति। **कुप्वोः ≍क ≍पौ च** क≍करोति कः करोति। धीर≍पुरुषः धीरः पुरुषः। भृत्य≍खनति भृत्यः खनति। आम्र≍फलति, आम्रः फलति,

---

वि. १ कुप्वोरिति वर्गग्रहेपि जिह्वामूलीयोपध्मानीययोः कखाभ्यां पफाभ्यां प्राग्वर्तितानियमेन प्रथमद्वितीययोरेव ग्रहः; एवमुत्तरसूत्रेषु, तेन तृतीयादिषु परेषु न प्रवृत्तिः।

वि. २ **सोऽपदादौ** (८-३-३८) विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः। **पाशकल्पकाम्येष्विति वाच्यम्** (वा) पयस्पाशम् (कुत्सितं पयः) याप्ये पाशप्। यशस्कल्पम् (ईषदसमाप्तं यशः) ईषदसमाप्तौ कल्पप्। यशस्कम् (कुत्सितं यशः) कुत्सिते कः। यशस्काम्यति (आत्मनो यश इच्छति) इच्छायां काम्यच्। एवं यशस्काम्या पयस्काम्या। **काम्ये रोरेवेति वाच्यम्** (वा) नेह–गीः काम्यति। अपदादावित्युक्तेर्नेह–(पयः कामयते)। **अनव्ययस्येति वाच्यम्** (वा) नेह–प्रातः कल्पम्। **इणः षः** (८-३-३९) इणः परस्य विसर्गस्य षः स्यात्पूर्वविषये। सर्पिष्पाशं सर्पिष्कल्पं सर्पिष्कं सर्पिष्काम्यति।

नमस्पुरसोर्गत्योः (८-३-४०) गतिसंज्ञयोरनयोर्विसर्गस्य सः स्यात्कुप्वोः परयोः। नमस्करोति, नमस्कारः, नमस्कृत्य। साक्षात्प्रभृतीनिचेति कृञो योगे वा गतिसंज्ञा, तदभावे नमः करोति। पुरस्कारः पुरस्कृत्य। पुरोव्ययमिति नित्यं गतिसंज्ञा। अगतित्वान्नेह-पुरः (नगराणि) प्रविशति। **इदुदुपधस्य चाप्रत्ययस्य** (८-३ ४१) इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः परयोः। निष्प्रत्यूहम् (निर्विघ्नम्)। आविष्कृतम् प्रादुष्कृतम् दुष्कृतम् बहिष्कृतम् आविष्कारः प्रादुष्कृत्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहिष्कारः। अप्रत्ययस्येत्युक्तेर्नेह–अग्निः करोति, वायुः करोति। मुहुसः प्रतिषेधः (वा) मुहुःकामा तिरसोऽन्यतरस्याम् (८-३-४२) तिरसो विसर्गस्य सो वा स्यात्कुप्वोः परयोः। तिरस्करोति तिरः करोति। तिरस्कारः तिरःकारः। द्विस्त्रिश्चतुरिति कृत्वोऽर्थे (८-३-४३) कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षो वा स्यात्कुप्वोः परयोः। द्विष्करोति द्विःकरोति। त्रिष्करोति त्रिःकरोति। चतुष्पठति चतुःपठति। कृत्वोऽर्थ इत्युक्त्या नेह विकल्पः–चतुष्कपालः। इदुदुपधस्येति नित्यं षः। इसुसोः सामर्थ्ये (८-३-४४) इसुसोर्विसर्गस्य षो वा स्यात्कुप्वोः परयोः सामर्थ्ये। सामर्थ्यमिह व्यपेक्षा। व्युत्पत्तिपक्षेऽप्रत्ययस्येति पर्युदासादिदुदुपधस्येत्यप्राप्तौ वचनम्। षत्वाभावे कुप्वोरिति वा विसर्गः। सर्पिष्करोति सर्पि≍करोति सर्पिःकरोति। धनुष्करोति धनु≍करोति धनुःकरोति। यजुष्पठति यजु≍पठति यजुःपठति। सामर्थ्योक्त्या नेह–तिष्ठतु सर्पिः पिब त्वमुदकम्। नित्यं समासेऽनुत्तरपदस्थस्य (८-३-४५) इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात्कुप्वोः परयोः। सर्पिष्कुण्डिका, धनुष्कपालम्, सर्पिष्पानम्, धनुष्फलम्, यजुष्पाठः। अनुत्तरपदस्थस्येत्युक्तेर्नेह–परमसर्पिः कुण्डिका, शुक्लयजुःपाठः, महाधनुःफलम्। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य (८-३-४६) अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सः स्यात्करोत्यादिषु परेषु नतूत्तरपदस्थस्य। अयस्कारः (लोहकारः) अयस्कामः (लोहकामः), अयस्कंसः (लोहपानपात्रम्), अयस्पात्रम्, अयस्कुशा (अयः सहिता कुशा) अयस्कर्णी (लोहतुल्यकर्णी)। अनव्ययस्येत्युक्तेर्नेह–स्वःकामः। समास इत्युक्तेर्नेह–यशः करोति। अधःशिरसी पदे (८-३-४७) एतयोर्विसर्गस्य सः स्यात्पदशब्दे परे। अधस्पदम् (पदस्याधः) शिरस्पदम् (शिरःस्थानम्)।

त्रि. इदुदुपधस्येति एकादेशशास्त्रनिमित्तकस्य न षत्वं, कस्कादिषु भ्रातुष्पुत्रशब्दपाठसामर्थ्यात्। तेनेह न–मातुः कृपा। पुंमुहुसोः प्रतिषेधो वक्तव्य इति भाष्योक्तावपि पुंशब्दे संपुंकानामित्यनेनैव गतार्थतया मुहुसः प्रतिषेध इत्येवोक्तम्। पदानां परस्परसान्निध्येन मिथोन्वयो व्यपेक्षा, सा च वाक्यभेदे न भवति।

प्रयोगाः—अधःकृताम्भोधरमण्डलानाम्। पयःपानं भुजङ्गानाम्। पुरस्कृता वर्त्मनि पार्थिवेन। नाधर्मश्चरितो लोके सद्यः फलति गौरिव। मुनित्रयं नमस्कृत्य। आविष्कारः पदार्थानाम्। कांस्त्वं दृष्टवाँस्तत्र। निष्प्रत्यूहं समाप्यते। श्रीरामः शरणं परम्। अयस्पात्रे न भक्षय। यजुष्पाठादूबहिष्कृतः।

प्रश्नाः—खरि, शरि, खर्परे शरि, शर्परे खरि वा विसर्गस्य का विकृतयः। जिह्वामूलीयोपध्मानीयौ क्व। इसुसोर्विसर्गस्य समासेऽसमासे वा को विशेषः। षकारस्य सकारस्य च क्व विधिः। अधस्तनपदेषु सन्धीन्वर्णय—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वादि सन्धि

नमस्कृत्य गुरुन्वद्ये। जनः क्षुब्धः किं विचारयति। यजुष्पारायणं कुरु। पात्राद्बहिष्कृतः। इतस्ततो भ्रमति। मामकाः पाण्डवाश्चैव। क्षेत्रं कः खनति। मलिनमिदमयस्पात्रम्। तिरस्कारो हृदयं व्यथयति। शुक्लयजुःपारायणं पापघ्नम्। स्तोत्रं चतुष्पठति। जनास्तिष्ठन्तु वर्त्मनि। पयःपात्रमिहानय।

स्वादिसन्धिः—

शिवशब्दात्सौ शिवस् अर्च्य इत्यत्र, ससजुषो रुः (८-२-६६) पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात्। इति जश्त्वं बाधित्वा सस्य रुत्वे, भोभगो इति यत्वं बाधित्वा, अतो रोरप्लुतादप्लुते (६-१-११३) अप्लुतादतः परस्य रोः उः स्यादप्लुतेऽति। इति रेफस्योत्वे, प्रथमयोः पूर्वसवर्णः (६-१-१०२) अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात्। इति प्राप्ते, नादिचि (६-१-१०४) अवर्णादिचि परे न पूर्वसवर्णदीर्घः। इति निषेधे आद्गुण इत्योकारैकादेशे एङः पदान्तादिति पूर्वरूपे शिवोऽर्च्यः। एवं रामस् अत्र–रामोत्र। शिवस् अहं–शिवोहम्। श्वस् अयम्–श्वोयम्। ह्यस् अद्य–ह्योद्य। अत अतीति तपरकरणान्नेह–देवा अत्र, श्व आगन्ता। रोरित्युकारानुबन्धरेफस्य ग्रहणादिह नोत्वम्–भ्रातरद्य, प्रातरयम्।

वि. १ एहि सुश्रोत३ अत्र स्नाहीत्यत्र प्लुतस्यासिद्धत्वादतः परत्वेनोत्ववारणार्थमप्लुतादित्युक्तम्। तद्विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यं, दीर्घनिवृत्त्या चरितार्थत्वात्। तिष्ठतु पय अ३ग्निदत्त इत्यत्र गुरोरनृत इति प्लुतेऽकारे परे उत्ववारणार्थमप्लुत इत्युक्तम्।

वि. २ रेफस्योत्वे शिव उ अर्च्य इत्यवस्थायां गुणापवादेन प्राप्तस्य पूर्वसवर्णदीर्घस्य निषेधे सति, गुणे यणि च प्राप्ते एकपदसम्बन्धिवर्णद्वयापेक्षिणो गुणस्यान्तरङ्गत्वं पदद्वयसम्बन्धिवर्णद्वयापेक्षिणो यणो बहिरङ्गत्वमिति असिद्धं बहिरङ्गमन्तरङ्गे इति गुणः।

शिवस् वन्द्य इत्यत्र सस्य रुत्वे, हशि च (६-१-११४) अप्लुतादतः परस्य रोः उ स्याद्धशि। इति रेफस्योत्वे आद्गुण इति गुणे शिवो वन्द्यः। एवं रामो गतः, बालो हसति, एको देवः, उन्नतो वृक्षः। रोरित्युक्त्या नेह–भ्रातर्गच्छ प्रातर्गच्छ। देवास् इह इत्यत्र सस्य रुत्वे, भोभगोअघोअपूर्वस्य योऽशि (८-३-१७) एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। इति रेफस्य यादेशे लोपः शाकल्यस्येति पक्षे यलोपे तस्यासिद्धत्वेनासन्धौ देवा इह, देवायिह। एवं जना आ(या)गताः, लक्ष्म्या ई(यी)श्वरः, स्त्रिया उ(यु)क्तिः, लोका इ(यि)मे। भोस् भगोस् अघोस् इति सम्बोधनार्थकाः सान्ता निपाताः, तेषां सस्य रुत्वे रोर्यत्वे कृते, व्योर्लघुप्रयत्नतरः शाकटायनस्य (८-३-१८) पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशिपरे। इति यस्य पक्षे लघूच्चारणत्वे, ओतो गार्ग्यस्य (८-३-२०) ओकारात्परस्य पदान्तस्यालघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजार्थं नतु विकल्पार्थम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यलघुप्रयत्नपक्षे यलोपे पक्षान्तरे तदभावे भो अच्युत भो यच्युत। भगो अघो अच्युत-यच्युत। हलि सर्वेषाम् (८-३-२२) भो भगो अघोअपूर्वस्य लघ्वलघूच्चारणस्य यस्य लोपः स्याद्धलि सर्वेषां मते। भो देवाः, भो लक्ष्मीः, भो विद्वन्, भगो नमस्ते, अघो याहि, देवा नम्याः, जना यान्ति। हलीत्युक्तेर्नेह—देवा इह देवायिह। लोपः शाकल्यस्येति वा लोपः।

वि. १ सस्य रुत्वस्थल एव रेफस्य अतोरोरिति हशिचेत्युत्वं भो भगो इति यत्वं च। प्रातर् पुनर् अन्तर् भ्रातर् मातर् इत्यादौ तु रेफ एव न रुरिति नात्रोत्वयत्वप्रवृत्तिः। भो भगो इत्यत्र अशीत्युक्तेर्नेह—देवाः सन्ति। यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्, नह्ययमल्विधिः, रोरिति-समुदायरूपाश्रयणात्।

वि. २ यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणो लघुप्रयत्नः, पदान्तयवयोरशि परे शाकटायनमते लघुप्रयत्नता तत्पक्षे न यलोपः, मतान्तरे त्वलघुप्रयत्नतया लोपः। पुंलिङ्गैकवचने मतुवसोरुसम्बुद्धावित्यत्र पठितेन विभाषा भवद्भगवदघवतामोच्चावस्येति वार्तिकेन निष्पादितानां भो इत्यादिशब्दानां ग्रहणेन भो हरे इत्यादिष्विवापि तदन्यत्र द्विवचनादौ स्त्रीनपुंसकयोश्च भो हरिहरौ भो देवाः भो लक्ष्मीः भो विद्वद्वृन्द भो गङ्गे इत्यादौ लोपसिद्धये भोसादिनिपातानामिह ग्रहणम्।

रोऽसुपि (८-२-६९) अन्हो रेफादेशः स्यान्नतु सुपि। अहन्निति रुत्वस्यापवादेन रेफविधानान्नोत्वादि। अहरहः अहर्गणः। सुपि परेत्वहन्निति रुत्वेनोत्वे अहोभ्याम्-भिः। रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा) अहोरूपम् (अन्हो रूपम्) गतमहो रात्रिरेषा। एकदेशविकृतस्यानन्यत्वात् अहोरात्रः। अहोरथन्तरम् (अहश्च रथन्तरं सामविशेषश्च)। अहरादीनां पत्यादिषु वा रेफः (वा) विसर्गापवादः। अहर्पतिः अहःपतिः (सूर्यः), गीर्पतिः गीःपतिः (बृहस्पतिः), धूर्पतिः धूःपतिः। पक्षे उपध्मानीयो विसर्गो वा।

वि. अहरहरित्यत्र वीप्सायां द्विर्वचनम्। सुबन्तत्वेपि सुपो धातुप्रातिपदिकयोरिति लुकि नलुमतेतिप्रत्ययलक्षणनिषेधान्न सुप्परकत्वम्। गीष्पतिर्धिषणो गुरुरिति त्वपपाठ एव।

पुनर् रमते इत्यत्र, रो रि (८-३-१४) रेफस्य रेफे परे लोपः स्यात्। इति पूर्वरेफलोपे, ढ्लोपे पूर्वस्य दीर्घोऽणः (६-३-१११) ढरेफलोपनिमित्तभूते ढकारे रेफे च परे पूर्वस्याणो दीर्घः स्यात्। इति दीर्घे पुना रमते। एवं हरी रम्यः, शम्भूराजते, अन्ताराष्ट्रियः, स्वाराज्यम्। मनस् रथ इत्यत्र सस्य रुत्वे जाते, हशिचेत्युत्वे रोरीति रेफलोपे च प्राप्ते विप्रतिषेधे परं कार्यमिति परत्वाद्रेफलोपे प्राप्ते, पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वे मनोरथः। एवं मनोरमः, यशोधनः, पयोराशिः, वयोरत्नम्।

वि. पूर्वत्रासिद्धमिति शास्त्रासिद्धत्वं कार्यासिद्धत्वं चेति पक्षद्वयम्। तत्र शास्त्रासिद्धत्वपक्ष एव युक्तः, कार्यासिद्धत्वे ह्यारोपस्य निरधिष्ठानत्वाभावेन कार्यप्रवृत्तेरावश्यकतया परत्वात्त्रैपादिककार्ये जाते तत्राभावप्रतियोगित्वारोपेपि देवदत्तस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न पुनरुन्मज्जनमिति न्यायेन स्थानिभूतरोरभावाद्धशिचेत्युत्वाप्राप्तिः स्यात्, शास्त्रासिद्धत्वे तु प्रवृत्त्युन्मुखस्य त्रैपादिकशास्त्रस्यैवासिद्धत्वारोपात्परशास्त्रस्योच्छेदबुद्ध्या विप्रतिषेधेपरंकार्यमिति न प्रवर्तते, तदुक्तं पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति, ततश्च स्थानिनो निवृत्त्यभावेन पूर्वशास्त्रप्रवृत्तिनिराबाधेत्युत्वं सम्पद्यते।

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६-१-१३२) अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि नतु नञ्समासे। एष विष्णुः, स शम्भुः, एष जनः, स विद्वान्। अककारेत्युक्तेर्नेह–एषको रुद्रः। नञ्समासे तु लोपो न–असः शिवः। हलीत्युक्तेर्नेह-एषोऽत्र। सोऽचि लोपे चेत्पादपूरणम् (६-१-१३४) सस् इत्यस्य सोर्लोपः स्यात् अचि, पादश्चेल्लोपे सत्येव पूर्येत। पादशब्देन ऋक्पाद एव गृह्यत इति वामनः, अविशेषाच्छ्लोकपादोपीत्यपरे। सैष दाशरथी रामः। लोपे सत्येवेत्युक्त्यात्र तु न लोपः–स एवमुक्त्वा मघवन्तमुन्मुखः, सोहमाजन्मशुद्धानाम्।

प्रयोगाः—यशोधनो धेनुमृषेर्मुमोच। एष ते रुद्र भागोस्तु यदुच्छिष्टोऽध्वरस्य वै। ऋषी राममुवाचेदम्। स राज्यं गुरुणा दत्तम्। स तत्र मञ्चेषु मनोज्ञवेषान्। भो भो राजानः श्रूयताम्। यशः–पयोराशिरभूत्करकल्पतरोस्तव। गता निशा इमाः साधु। जयन्ति धर्मेण तपस्विनोमी।

प्रश्नाः—तदेतच्छब्दयोः सुलोपः क्व। जसः सोर्वा सकारस्य क्व लोपः क्व वा विकारान्तरम्। लघुप्रयत्नत्वमलघुप्रयत्नत्वं च किम्, तेन च को विशेषः। रो रेफस्य च किं विशेषकार्यम्। अधस्तनवाक्येषु प्रतिपदं सन्धि व्यवस्थापयत—

वृद्धो जनो दुःखशतानि भुङ्क्ते। महाजनो येन गतः स पन्थाः। भो राम मामुद्धर। गभीरोयं पयोराशिः। नैष साधू रमते। गता एता महापदः। मनोरथः सम्प्रति पूरणीयः। पुनः पुनरुवाचेदम्। शिष्यस्तेहं शाधि मां त्वां प्रपन्नम्। धर्मो जयति नानृतम्। इत्याह स मुनिस्तदा। सेवनीया महात्मानः। विस्तराद्वद तां कथाम्। पुनरेवमुवाचेदम्। निश्चलो भव सर्वदा। यस्मादभ्युदयो निःश्रेयसश्च स धर्मः।

इति वर्ण-सन्धिप्रकरणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदप्रकरणम्

पदम्—

विभक्त्यन्तं पदं ज्ञेयं, विभक्ती सुप्तिङौ मतौ ।
प्रकृतिस्तत्र मूलांशः, प्रत्ययास्तु विभक्तयः ॥६॥

सुप्तिङन्तं पदम् (१-४-१४) सुबन्तं तिङन्तं च पदं स्यात् । अपदं न प्रयुञ्जीतेति नियमात् पदत्वमापन्नः सार्थक एव शब्दः प्रयोगयोग्यो भवति । पदेषु प्रकृत्यंशः प्रत्ययांशश्चेत्यंशद्वयं भवति, तद्द्वयं मिलित्वैकं पदं प्रयोगयोग्यं जायते । उक्तं च—न केवला प्रकृतिः प्रयोक्तव्या, न च केवलः प्रत्यय इति ।

वि. १ श्रोत्रग्राह्यो गुणविशेषः शब्दः, स च व्यक्तवर्णविभागो व्यक्तस्तदन्योऽव्यक्तः । व्यक्तोप्यर्थावबोधकः सार्थकः अर्थानवबोधको निरर्थकः । वाद्यादिसमुद्भवो निरर्थकोऽव्यक्तशब्दो ध्वनिमात्रमुच्यते । सार्थकोपि संस्कृतोऽपभ्रंशश्चेति द्विधा। शास्त्रेषु प्रायः संस्कृताः सार्थकशब्दा व्यवह्रियन्ते, ते हि प्रकृतिप्रत्ययादियोगसंस्कारपरिशुद्धतया अपूर्वविशेषोत्पादकतया धर्म्याः शिष्टपरिगृहीताश्च भवन्ति । संस्कृता अपि वेदेषु व्यवहृता वैदिकाः, लोकेपि व्यवह्रियमाणा लौकिकाः शब्दाः। वैदिकलौकिकयोरेकजातीयत्वेपि क्वचन संस्कारविशेषात्स्वरूपविशेषः । वैदिकशब्दगता विशेषाः शिक्षाप्रातिशाख्यादिषु केचन पाणिनीयेपि दर्शिताः । लौकिके व्याकरणे साधारणलोकव्यवहारोपयोगिशब्दानां साधुता प्रदर्श्यते । वर्णैः पदं, पदैर्वाक्यं, वाक्यैः सन्दर्भः सिद्ध्यति । एभिर्वर्णपदवाक्यसन्दर्भैर्व्यवहारयात्रा प्रवर्त्यते । तत्र वर्णमात्रं प्रायो निरर्थकमपि, तन्निष्पन्नानि पदानि तु सार्थकान्येव । वर्णसम्बन्धिनः स्थानप्रयत्नसन्ध्यादिविशेषान्निरूप्यातः परं पदसम्बधिनो विशेषा निरूप्यन्ते ।

वि. २ विभक्त्यन्तं पदमिति गौतमः । अर्वाचां तार्किकाणां मते तु सार्थकं पदम्, तन्मते प्रकृतिभागः प्रत्ययभागोपि पदं भवति, ततश्च घटमानयेत्यत्र घटः कर्मत्वमानयनं कृतिरित्यर्थवन्ति घट अम् आनि लोट् इति चत्वारि पदानि; परमेतन्मतेपि विभक्त्यन्तमेव प्रयोगयोग्यम् । वैयाकरणानां मते विभक्त्यन्तस्यैव पदत्वेन घटमानयेति पदद्वयमेव ।

सुबन्ते प्रातिपदिकं प्रकृतिः, प्रत्ययाः सुपः ।
तिङन्ते प्रकृतिर्धातुः, प्रत्ययास्तु तिङो मताः ॥७॥

सुबन्तपदेषु प्रातिपदिकभागः प्रकृतिः सुपः प्रत्ययाः, तिङन्तपदेषु धात्वंशः प्रकृतिः तिङः प्रत्ययाः। दधि मध्वित्यादिषु प्रायोऽव्ययेषु च प्रत्ययभागस्य, स्तः सन्तीत्यादौ क्वचन प्रकृतिभागस्यादर्शनेपि लुप्तांशमनुसन्धाय स्फुटमस्फुटं वांऽशद्वयं सर्वत्रानुसन्धेयम् ।

वि. प्रकरोति नानारूपाणि दर्शयतीति प्रकृतिर्मूलकारणम् । सांख्योक्तायाः प्रकृतेर्बहुशः परिणामा इवात्रापि प्रातिपदिकस्य धातोर्वैकस्यापि प्रत्ययादियोगेन नानाविधानि विकृतिरूपाणि निष्पद्यन्ते इत्यन्वर्थः प्रकृतिशब्दः । सुबन्तशब्देषु मूलभूता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नामसर्वनामविशेषणशब्दाः तिङन्तशब्देषु धातवः प्रकृतयः। मूलशब्दं प्रति एति (गच्छति संमिलति) इति प्रत्ययः पुच्छभूतांशः। प्रत्यययोगेन विना प्रकृतिमात्रादर्थाप्रतीतेः प्रत्याययति अर्थविशेषं बोधयति अर्थबोधने द्वारीभवति वेति प्रत्यय इत्यपि निर्वचनान्तरम्। तेच सुपस्तिङश्च मुख्याः पदत्वनिर्वाहकाः। कृत्तद्धितादयोपि प्रत्ययविशेषाः। प्रकृतिः प्रत्ययश्चार्थवन्तौ। प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, प्रकृत्यर्थः प्रधानं प्रत्ययार्थ उपसर्जनं, प्रत्ययाः प्रकृत्यर्थोपसर्जनीभूतं स्वार्थं बोधयन्तीति चोभयथाप्युच्यते। प्रत्ययार्थः कश्चन प्रकृत्यर्थे उपसर्जनं (अन्वयि) भवति, कश्चन प्रकृत्यर्थापेक्षया प्रधानं अन्वीयमानं भवति। यथा गृहं गच्छतीत्यत्र एकत्वं कर्मत्वं च द्वितीयाप्रत्ययार्थस्तयोरेकत्वं प्रकृत्यर्थे विशेषणं, कर्मत्वं प्रकृत्यर्थस्य विशेष्यं, तेन एकत्वाश्रयगृहनिष्ठकर्मत्वनिरूपकं गमनमित्यर्थः पर्यवस्यति।

पदभेदाः—

नामाख्याताव्ययानीति संक्षेपात्त्रिविधं पदम्।
सुबन्तं नाम, तिङ्योग्याख्यात, मव्ययमव्ययम् ॥८॥

सुबन्तं नाम तिङन्तमाख्यातं च नानारूपं भवतीति विकारि, अव्ययं तु सदैकस्वरूपतया निर्विकारमिति विकार्यविकारिभेदेन द्विधा पदम्। नामाख्यातयोः सुप्तिङन्ततया पृथग्गणने त्रिविधं पदं भवति। अव्ययानां वस्तुतो लुप्तविभक्तिकनामत्वेपि निर्विकारतया पृथङ् निर्देशः।

वि. चिरं चिरेण चिराय चिरस्येति क्वचनाव्ययेषु नानारूपाणीव प्रतिभान्ति, परं तानि न प्रत्यययोगेन निष्पन्नानि, किन्तु विभक्त्यन्तप्रतिरूपाणि मूलाव्ययान्येव। अपदिशमित्याद्यव्ययीभावे विभक्तिभेदेन अपदिशमपदिशेनापदिशे इत्यादिरूपविभागेपि प्रायोदृष्ट्याऽव्ययं निर्विकारमुच्यते। नव्येतीत्यव्ययमिति प्राचां निर्वचनमपि प्रायिकमेव।

तत्राद्यं केवलं नाम, सर्वनाम, विशेषणम्।
इत्यर्थतस्त्रिधा, तेन समष्ट्या पञ्चधा पदम् ॥९॥

अर्थतो नामापि केवलं नाम, सर्वनाम, विशेषणमिति त्रिधा। (क) सजीवं निर्जीवं मूर्तममूर्तं धर्मि धर्ममात्रं वा किञ्चन परिच्छिद्य यद्बोधयति तत्केवलं नाम–ईश्वरः माता पिता गुरुः मनः स्वर्गः नगरं गृहं पुण्यं पापं धैर्यमित्यादि। (ख) प्रकरणाद्यनुसारेण सर्वस्य यस्य कस्यापि नामार्थस्य बोधकं परिगणितं सर्वनाम–युष्मद् अस्मद् तद् यद् किम् एतद् इत्यादि। (ग) यस्य कस्यापि वस्तुनोऽपरिच्छेदेन कश्चन गुणक्रियादिधर्मविशेषं पुरस्कृत्य व्यावर्तकं तद्धर्मिणः सामान्यतो बोधकं विशेषणं–रक्तः नीलः स्थूलः पाचकः एकः शतं सहस्रमित्यादि। क्रियायाः प्राधान्येन बोधकं वाक्यपूरकमाख्यातं–गच्छति पठति अकरोत् भविष्यतीत्यादि। सर्वत्रैकरूपं लिङ्गसंख्यादिवर्जितमव्ययं—प्रातः सायम् उच्चैः अधः च अपीत्यादि। इत्येवं नाम सर्वनाम विशेषणमिति त्रिधा नामानि, आख्यातमव्ययं चेति पदं पञ्चविधं भवति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. १ प्राचीनैः पदं सार्थकमित्येकं, सुबंन्तं तिङन्तमिति द्विधा, अव्ययं नामापि निर्विकारतया पृथक्कृत्य नामाख्याता-व्ययानीति त्रिधा, अव्ययेषूपसर्गनिपातौ पृथक्कृत्य उपसर्गेतराणि निपातत्वेन सङ्गृह्य नामाख्यातोपसर्गनिपाता इति चतुर्धा, अर्वाचीनैर्नाम त्रिधा विभज्य उपसर्गनिपातावव्ययत्वेन सङ्गृह्य नामसर्वनामविशेषणाख्याताव्ययानीति पञ्चधा निरूप्यते।

वि. २ नामाख्यातोपसर्गनिपातभेदैश्चतुर्धा विभाग आर्षः प्रत्नश्च। प्रातिशाख्ये निरुक्ते चोक्तम्—"चत्वार्याहुः पद-जातानि नामाख्यातोपसर्गनिपाताश्चे" ति। शब्दान्तरयोगेनैव प्रयोज्याः प्रपरेत्यादय उपसर्गाः, पृथक्प्रयोज्याश्चादयो निपाता इत्यनयोर्विशेषः। नमत्याख्यातार्थं प्रति विशेषणीभवतीति नाम, पूरकत्वेन विश्रामधामतया वाक्ये प्राधान्येन आ समन्तात् ख्यातमित्याख्यातम्, उपसृज्यन्ते नियमतः शब्दान्तरैर्धातुभिः सह मिलित्वैव प्रयुज्यन्ते इत्युपसर्गाः, निपतन्ति वाक्यार्थं विशेषयितुं तन्मध्ये प्रविशन्तीति निपाताः, इत्यन्वर्था एताः संज्ञाः। उक्तं च प्रातिशाख्ये—"तन्नाम येनाभिदधति सत्त्वं, तदाख्यातं येन भावं स धातुः। उपसर्गा विंशतिरर्थवाचकाः, सहेतराभ्यामितरे निपाताः॥ (इतराभ्यां नामाख्याताभ्यां सह भूत्वार्थवाचका उपसर्गा इतरे निपाता इत्यर्थः)। "क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्। सत्त्वाभिधायकं नाम निपाताः पादपूरणाः" इति। "यस्याभिधेयं नियमेन क्रियाविशेषमाकाङ्क्षति तन्नामे" ति तात्पर्यटीकाकारः। "यद्वाच्या क्रिया परा-नाकाङ्क्षा स्वयमेव प्रधानं तदाख्यात" मिति मञ्जूषाकारः। सर्व-नामार्थग्राहकतया सर्वनामानि, नामार्थविशेषकतया विशेषणानीत्येते अप्यन्वर्थे। उक्तं च सर्वनामसूत्रभाष्ये—"सर्वेषां यानि नामानि तानि सर्वनामानी"ति। अर्थानुरूपा एताः संज्ञाः शब्देषूपचर्यन्ते।

नाम वस्तुपरिच्छेदि, सर्वनामाखिलार्थकम्।
नानाजातीयतद्रूपबोधकं तु विशेषणम्॥ १०॥
असत्त्वार्थकमाख्यातं, निपाता अपि तादृशाः।
अस्वतन्त्रश्चोपसर्गो धात्वर्थस्य विशेषकः॥ ११॥

वस्तुविशेषपरिच्छेदकाः पित्रादिशब्दा नामानि, प्रकरणाद्यनुसारेण विवक्षितसकलनामार्थबोधकानि सर्वयत्तदादीनि सर्वनामानि, वस्त्वपरिच्छेदेन नामार्थविशेषकाणि शुक्लनीलादीनि विशेषणानि, इत्येतानि सत्त्वार्थानि, प्राधान्येन क्रियाबोधकानि पचति भवतीत्यादीन्याख्यातानि, वाक्यार्थविशेषाय तदन्तरनुप्रविष्टाश्चादयो निपाताः, परतन्त्रा धात्वर्थमात्रविशेषकाः प्रपरादय उपसर्गा इत्येषां भेदः।

वि. सत्वरूपा असत्त्वरूपाश्च पदार्थाः। सीदन्त्यस्मिन्गुणक्रियासंख्या इति सत्त्वं द्रव्यमिति चादिसूत्रे प्रदीपकारः। उक्तं च हरिणा—"वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः॥ सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥ यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रम-रूपत्वात्सा क्रियेत्यभिधीयते।" इति। यदुपलक्षणतया सर्वनामशब्देन निर्देष्टुं शक्यते, साक्षाल्लिङ्गेन संख्यया चान्वेति, विशेषणेनेदमिति भेत्तुं (परिच्छेत्तुं) च शक्यते, तद्द्रव्यं सत्त्वमिति चोच्यते; नानाजातीयद्रव्यवर्ती आगमापायी सर्वनाम्ना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनिर्देश्यतया विशेषणेनापरिच्छेद्यतया च सत्त्वावस्थाबहिर्भूतो धर्मविशेषो गुणः, पूर्वापरीभूत नानास्पन्दसमुच्चयविशेषो बुद्ध्यैकत्वेन व्यपदिश्यमानः क्रिया भाव इति चोच्यते । नामार्थाः सत्त्वरूपाः आख्यातोपसर्गनिपातार्थास्त्वसत्त्वरूपाः केच–नाव्ययार्थाः सत्त्वरूपा अपि भवन्ति । यथा–माता पिता दया धैर्यमित्याद्यर्था लिङ्गसंख्याभिर्युज्यन्ते यत्तदादिभिर्निर्देष्टुं शक्यन्ते, विद्वान्दयालुर्महतीत्यादिविशेषणैरपि परिच्छिद्यन्ते इतीदृशानि नामानि सत्त्ववाचीनि; आख्यातार्थाः प्रपरेत्याद्यव्ययार्थाश्च न सर्वनामभिर्निर्दिश्यन्ते न वा विशेषणेन परिच्छिद्यन्ते न च लिङ्गसंख्याभिर्युज्यन्ते इतीदृशान्यसत्त्ववाचीनि; स्वरादीनि कानिचिदेवाव्ययानि सत्त्ववाचीनि । सर्वनामानि विशेषणानि च सत्त्वार्थान्यपि जात्यपरिच्छेदकतया गौणानि नामानि । नाम्नां द्रव्यार्थत्वेन स्वतो लिङ्गसंख्ये, सर्वनाम्नां विशेषणानां च द्रव्यापरिच्छेदकतया स्वतो न लिङ्गसंख्ये, अपितु स्वग्राह्यविशेष्यनामार्थद्वारैव । उक्तं च सर्वादिसूत्रभाष्ये—"सर्वेषां नामानि सर्वनामानी" ति, नञ्सूत्रभाष्ये—"गुणवचनानां (गुणोपसर्जनद्रव्यवाचकानामित्युद्योते) शब्दानामाश्रयतो लिङ्गवचनानीति" च । धात्वर्था अव्ययार्था अपि पाकः पचनं पक्तिः प्रकर्ष उत्कर्षः समुच्चयो विकल्प इत्यादिभिः शब्दैरभिधीयमानास्तु लिङ्गसंख्यान्वयिनः सर्वनामग्राह्या विशेषणपरिच्छेद्या एवेतीदृशाः शब्दाः सत्त्वार्थानि नामानि ।

यौगिकोंऽशार्थगमको, रूढोऽखण्डार्थबोधकः ।
योगरूढस्तूभयात्मा चेति नामाऽर्थतस्त्रिधा ॥१२॥

अवयवार्थमात्रमादाय प्रवर्तमानः पाचकः(पाककर्ता), नागरिकः(नगरेभवः), राजपुरुषः(राज्ञः पुरुषः) इत्यादिर्यौगिकः । अवयवार्थस्याभावेन भावेपि तदनपेक्षया रूढि (लोकप्रसिद्धि) मात्रमादाय प्रवर्तमानः भूः लता गौः अश्वः वृक्ष इत्यादी रूढः, योगार्थ रूढिश्चोभयमादाय प्रवर्तमानः पङ्कजं (पङ्कोत्पन्नं कमलजातीयं), सौधः (सुधया लिप्तं राजादिगृहं), भूरुहः (भूम्युत्पन्नो वृक्षजातीयः) इत्यादि योगरूढः ।

वि. यौगिकशब्दानां व्युत्पत्तिनिमित्त (अवयवलभ्यं) मेव प्रवृत्तिनिमित्तं, तच्च व्याकरणादिप्रक्रिययावगम्यते; रूढशब्दानां त्ववयवार्थस्य प्रतिभासेऽप्रतिभासेपि रूढ्यनुसारेण समुदायलभ्यार्थमात्रं प्रवृत्तिनिमित्तं, तच्च कोशशिष्टोपदेशादितोऽवगम्यते; योगरूढशब्दानां तु अवयवार्थः समुदायार्थश्चोभयं मिलितं प्रवृत्तिनिमित्तं, तच्च व्याकरणप्रक्रियासहकृतेन कोशव्यवहारादिनावगम्यते । तेन पङ्कजशब्दस्य योगार्थमात्रमादाय शैवालादौ, रूढ्यर्थमात्रमादाय स्थलकमले न प्रयोगोऽपितु पङ्कोत्पन्ने कमलजातीय एव । एवमन्यत्रापि । योगाद्रूढिर्बलीयसीति न्यायेन योगार्थमात्रमादाय सर्वत्र प्रवृत्तिर्न, किन्तु विशेषार्थे, तेन रूढिर्नवास्य शब्दस्येति विवेचनमावश्यकं शब्दप्रवृत्तौ । रूढ्यभाव एव यौगिकार्थमात्रमादाय प्रवृत्तिरित्यनुसन्धेयम् ।

शब्दाः सिद्धाः साधिताश्च, सिद्धा धात्वादयो मताः ।
सुप्तिङ् कृत्तद्धिताद्यन्ताः समस्ता अपि साधिताः ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याकरणे अव्युत्पादिता भूकृप्रभृतयो मूलधातवः, यत्तदादयः सर्वनामशब्दाः, चोक्षरूक्षडित्थ-कपित्थादयो नामशब्दाः, स्वरादयश्चादयश्चाखण्डाः शब्दविशेषाः सिद्धाः (अव्युत्पन्नाः); धात्वादि-प्रकृतिभ्यः सुप्तिङ्कृत्तद्धितादिप्रत्यययोगेन समासेन च निष्पादिताः सखण्डाः शब्दाः साधिताः (व्युत्पन्नाः) उच्यते। नाम्नां लिङ्गवचनविभक्तिविशेषैर्धातूनां वाच्यपदलकारपुरुषवचनविशेषैर्जाय-मानानि रूपाण्यपि साधितान्येव।

वि. १ मूलधातुभ्यो णिजादिप्रत्यययोगेन निष्पादिता विशेषधातवः, नामादिभ्यो निष्पादिता नामधातवः, शब्द-विशेषेभ्यः प्रत्यययोगेन निष्पादिता अव्ययविशेषा अपि साधिता एव। सर्वे शब्दा धातुभ्यो निष्पन्नाः साधिता एवेति शाक-टायनमतम्। उक्तं च "नाम हि धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोक" मिति। तन्मते मूलधातव एव सिद्धाः। भवतीति भूः (भू-क्विप्), गच्छतीति गौः (गम् डोस्), वृश्च्यते इति वृक्षः (व्रश्च-क) इत्यादिष्ववयवयोगः कल्प्यमानोपि स्पष्टं नोपलक्ष्यते, मण्डं पाति पिबति वा मण्डपः, मण्डं लातीति मण्डलमित्यवयवयोगः सम्भवन्नप्यनुपयो-गितयोपेक्ष्यते इति एतादृशा रूढशब्दाः सिद्धाः, लक्ष्यमाणोपयुज्यमानावयवयोगाः साधिता इति विभजनीयम्।

वि. २ साधितशब्दा नानाजातीयेभ्यो नानाजातीया निष्पाद्यन्ते। यथा नाम्नो नाम-पुत्र-पौत्रः, विशेषणं श्री-श्रीमान्, आख्यातं-पुत्र-पुत्रीयति, अव्ययं-गृह-गृहतः, सर्वनाम्नः नाम स्व-स्वत्वं, सर्वनाम किम्-कतरः, विशेषणं तद् तदीयः, आख्यातं त्वत्-त्वद्यति, अव्ययं-किम्-कदा; विशेषणात् नाम धीर-धैर्यम्, सर्वनाम-अन्य-अन्यतर, विशेषणं रक्त-रक्ततरः, आख्यातं-मृदु-म्रदयति, अव्ययं पश्चिम-पश्चिमतः, आख्यातात् नाम पिबति खादति-पिबतखादता, विशेषणं पचति-पचतिकल्पः, आख्यातं पचति-पचतकि, अव्ययं पचति-पचतितराम्, अव्ययात्-नाम ॐ ॐकारः, विशेषणं सदा सदातनः, आख्यातं-स्वः-स्वःकाम्यति, अव्ययं यथा-यथायथम्। एवमन्येपि विज्ञेयाः।

प्रयोगाः—किं किं न साधयति कल्पलतेव विद्या। काचः काञ्चनसंसर्गाद्धत्ते मारकतीं श्रियम्। वृक्षाणां शाखासु वानरा उत्प्लवन्ते। विद्याधनं सर्वधनप्रधानम्। ज्ञाने मौनं क्षमा शक्तौ। रूक्षाणि वचनान्यस्य। हंसमध्ये वको यथा। विनीतं सर्वे प्रशंसन्ति।

प्रश्नाः—पदं नाम किम्, तत्कतिविधम्। प्राचामर्वाचां च पदविभागः कतिधा। नामाख्यातोपसर्गनिपातानां कानि लक्षणानि। नाम्नः कति प्रभेदाः, तेषां को विशेषः। रूढयौगिकयोगरूढानां को विशेषः। सिद्धाः साधिताश्च कीदृशाः। अधस्तनवाक्यगतानि पदानि परिचिनुत—

ईश्वरो लोकान्सृष्ट्वा स्वकर्मसु प्रावर्तयत्। जगति नानाविधानि वस्तूनि दृश्यन्ते। पाणिनिर्जनान्व्युत्पादयितुमष्टाध्यायीं रचयामास। राजानः सौधेषु निवसन्ति। दिवानिशं शास्त्राणां परिशीलनमन्तर्दृशमुन्मीलयति। सादिनोऽश्वान्नाशीरेषु भ्रामयन्ति। नहि ज्ञानेन सदृशं पवित्रमिह विद्यते। मयूरा बर्हं प्रसार्य नृत्यन्ति। ईश्वरः शरणं मम।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुबन्तप्रकरणम्—

साधारणविधयः—

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (१-२-४५) धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। कृत्तद्धितसमासाश्च॰ (१-२-४६) कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः। प्रत्ययः (३-१-१) परश्च (३-१-२) आपञ्चमाध्यायसमाप्तेरधिकाराविमौ। ङ्याप्प्रातिपदिकात् (४-१-१) ङ्यन्तादाबन्तात्प्रातिपदिकाच्चेत्यपि आपञ्चमसमाप्तेरधिकारः। स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४-१-२) ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। विभक्तिश्च (१-४-१०४) सुप्तिङौ विभक्तिसंज्ञौ स्तः। सुबिति सुप्रभृतिसुप्पर्यन्तानां प्रत्याहारः। सु औ जस् प्रथमा, अम् औट् शस् द्वितीया, टा भ्याम् भिस् तृतीया, ङे भ्याम् भ्यस् चतुर्थी, ङसि भ्याम् भ्यस् पञ्चमी, ङस् ओस् आम् षष्ठी, ङि ओस् सुप् सप्तमी इति प्राचां संज्ञास्ताभिरिहापि व्यवहारः। प्रथमा सम्बोधनार्थाऽन्या चेति द्विधा। सुपः (१-४-१०३) सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः। द्व्येकयोर्द्विवचनैकवचने (१-४-२२) द्वित्वैकत्वयोरेते स्तः। बहुषु बहुवचनम् (१-४-२१) बहुत्वे बहुवचनं स्यात्। सुङस्योरुकारेकारौ उपदेशेऽजनुनासिक इति, औट्सुपोष्टकारपकारौ हलन्त्यमितीत्संज्ञकौ। चुटू (१-३-७) प्रत्ययाद्यौ चुटू इतौ स्तः। इति जसो जकारः टा-टकारश्चेत्संज्ञकः। लशक्वतद्धिते (१-३-८) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः शकारः ङिङेङसिङसां ङकारश्चेत्संज्ञकः। न विभक्तौ तुस्माः (१-३-४) विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। इति जस्शस्ङसिङसोभिस्भ्यसां सकारस्य, अम्भ्यामामां मकारस्य चेत्त्वनिषेधः। तस्य लोपः (१-३-९) तस्येतो लोपः स्यात्। इति इतां लोपः। तेन सुपां–स् औ अस्, अम् औ अस्, आ भ्याम् भिस्, ए भ्याम् भ्यस्, अस् भ्याम् भ्यस्, अस् ओस् आम्, इ ओस् सु इत्याकृतयः शिष्यन्ते।

वि. १ डित्थकपित्थादिष्वव्युत्पन्नशब्देषु उणादिशब्दानामव्युत्पत्तिपक्षे तेष्वपि अर्थवदितिसूत्रेण, व्युत्पन्नेषु कृत्तद्धितान्तेषु समस्तेषु च कृत्तद्धितेतिसूत्रेण प्रातिपदिक संज्ञा। एवं रामादिशब्दानामप्यव्युत्पन्नरूढत्वाभ्युपगमपक्षे पूर्वसूत्रेण, रमादिधातुभ्यो घञादिषु व्युत्पन्नत्वपक्षे उत्तरसूत्रेणेयं संज्ञा। घनवनादिषु प्रतिवर्णं प्रातिपदिकसंज्ञायां संख्याकारकाद्यभावाद्विभक्त्यन्तराभावेपि हुंफडादिभ्य इवौत्सर्गिकप्रथमैकवचनोत्पत्तिः, हल्ङ्यादिलोपाभ्युपगमेपि नलोपादिकं च माभूदित्यर्थमर्थवदित्युक्तम्। धातोः प्रातिपदिकसंज्ञायां हनधातोर्लङि अहन्नित्यत्र प्रातिपदिकान्तत्वेन नलोपो माभूदित्यर्थमधातुरित्युक्तम्। हरिषु करोषीत्यत्र सुप्तिङोस्तदन्तयोर्वा प्रातिपदिकसंज्ञायां पदादित्वेन षत्वाभावो माभूदित्यर्थमप्रत्यय इत्युक्तम्। समासानां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धातुप्रत्ययभिन्नार्थवत्त्वेन व्युत्पत्तिपक्षेपि पूर्वसूत्रेणैव संज्ञासिद्धौ उत्तरसूत्रे समासग्रहणं यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैवेति नियमार्थम्, तेन वाक्यस्य नेयं संज्ञा, अन्यथा तत्रापि प्रातिपदिककार्यं प्रसज्येत ।

वि. २ को धातुः किं प्रातिपदिकं कः प्रत्यय इत्याथर्वणश्रुत्यादिदृष्टपूर्वव्यवहारानुसारेण सूत्रकृता धातुप्रकृतिप्रत्ययप्रातिपदिकादिसंज्ञाशब्दा गुरुभूता अप्यन्वर्थतया तथैवोपात्ताः । प्रतिपदं भवं प्रातिपदिकमिति प्रयोगयोग्येषु नानाविभक्त्यन्तपदेषु विकृतिरूपेषु प्रकृतित्वेनानुस्यूय वर्तमानो घटपटादिर्मूलशब्दः प्रातिपदिकम् । सुबन्तपदप्रकृतिष्वेव प्रातिपदिकशब्दः प्राचां व्यवहारे रूढः । नामसर्वनामविशेषणानां त्रिविधानां प्रातिपदिकानां नामत्वेन व्यवहारान्नाम प्रातिपदिकमित्यभिन्नार्थं पर्यवस्यति । तिङन्तपदप्रकृतयो भ्वादयस्तु नानालङ्कारपात्रादिमूलप्रकृतयः सुवर्णलोहादय इव धातुत्वेन व्यवह्रियन्ते । प्रकृतिप्रत्ययशब्दयोरप्यन्वर्थत्वमुक्तमेव ।

वि. ३ ङ्याप्प्रातिपदिकादित्यत्र प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्येव ङ्याबन्तयोरपि ग्रहणसिद्धौ ङ्याब्ग्रहणं ङ्याबन्तादेव तद्धितोत्पत्तिः स्यात् ङ्याब्भ्यां प्राङ् माभूदित्येवमर्थम्, अन्यथा एतिका आर्यकेत्यत्र एतार्यशब्दाभ्यां ङ्यापौ बाधित्वा पूर्वं के पश्चाट्टापि आकारस्थानिकाकाराभावेन प्रत्ययस्थादितीत्वे एतिका आर्यिकेत्येव स्यात्, ङ्याब्ग्रहणसामर्थ्यात्तु एतशब्दात्तोपधत्वेन वैकल्पिके ङीपि नत्वे च जाते के पूर्वह्रस्वे पुनष्टापि एनिकेति, पक्षान्तरे टापि के पूर्वह्रस्वे पुनष्टापि प्रत्ययस्थादितीत्वे एतिकेत्यपि रूपम्, आर्यशब्दात्पूर्वं टापि ततः के पूर्वह्रस्वे पुनष्टापि आकारस्थानिकाकारतया उदीचामात इतीत्वविकल्पे आर्यिका आर्यकेति द्विधा रूपं निष्पद्यते ।

अजन्तपुंलिङ्गप्रकरणम्—

अकारान्ताः—

राम शब्दः—रमन्ते योगिनोस्मिन्नित्यर्थे रमधातोरधिकरणे घञि उपधावृद्धौ राम इति व्युत्पत्तिपक्षे कृत्तद्धितेतिसूत्रेण, अव्युत्पन्नरूढशब्दत्वपक्षे अर्थवत्सूत्रेण प्रातिपदिकसंज्ञायां स्वौजसमौडिति सुपि प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमेति प्रथमायां द्व्येकयोर्द्विवचनैकवचने इति एकत्वार्थे एकवचने सुप्रत्यये उकारस्येत्संज्ञया लोपे ससजुषोरुरिति सस्य रुत्वे खरवसानयोरिति रेफस्य विसर्गे रामः । रामश्च रामश्चेति विग्रहे द्वन्द्वापवादेन—**सरूपाणामेकशेष एकविभक्तौ** (१.२.६४) एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते । इत्येकशेषे यः शिष्यते स लुप्यमानार्थाभिधायीत्येकेनैव रामशब्देन रामद्वयप्रतीतौ द्व्येकयोरिति द्वित्वार्थे द्विवचने औप्रत्यये राम औ इत्यत्र वृद्धिं बाधित्वा प्रथमयोः पूर्वसवर्णः इति पूर्वसवर्णदीर्घे प्राप्ते नादिचीति निषेधे वृद्धिरेचीति वृद्धौ रामौ । रामश्च रामश्च रामश्चेति विग्रहे एकशेषे बहुत्वार्थे बहुषु बहुवचनमिति बहुवचने जसि राम अस् इत्यत्र सवर्णदीर्घं बाधित्वा, **अतो गुणे** (६.१.९७) अपदान्तादतो गुणे परतः पररूपमेकादेशः स्यात् । इति प्राप्ते परत्वात्प्रथमयोरिति पूर्वसवर्णदीर्घे सस्य रुत्वविसर्गयोः रामाः ।

वि. १ सरूपाणामिति सूत्रस्य येषां शब्दानां सर्वासु विभक्तिषु सारूप्यमेव न तु क्वापि वैरूप्यं दृश्यते तेषामेवैकशेष इत्यर्थः । तेन जननीवाचिनः परिच्छेत्तृवाचिनश्च मातृशब्दस्य भ्यामादौ मातृभ्यामित्यादिसारूप्येपि औजसादिषु जननी-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाचिनो मातरौ मातर इति परिच्छेत्तृवाचिनस्तु मातारौ मातार इति वैरूप्यमिति न तयोरेकशेषः, किन्तु जननीवाचिनोः किंवा परिच्छेत्तृवाचिनोरेव मातृशब्दयोरेकशेषः । एवमन्यत्रापि ज्ञेयम् । तद्बोधनायैव सरूपाण्येव दृष्टानीत्युक्तम् । एकविभक्तावित्यस्य प्रत्येकविभक्तावित्यर्थः । घटश्च कलशश्च घटौ कलशौ वा इत्यादिषु तु विरूपाणामपि समानार्थानामिति वार्तिकेनैकशेषो वक्ष्यते ।

वि. २ पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायेन अतोगुण इति अकःसवर्णेदीर्घ इत्यस्यैव बाधको न तु प्रथमयोःपूर्वसवर्ण इत्यस्यापीति रामा इत्यत्र सवर्णदीर्घं बाधित्वा अतोगुण इति प्राप्ते परत्वात्पूर्वसवर्णदीर्घः ।

सम्बोधनप्रथमायां सौ राम स् इत्यत्र, एकवचनं सम्बुद्धिः (२.३.४९) सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्। इति सम्बुद्धिसंज्ञायां, यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (१.३.१३) इति राम इत्यस्याङ्गसंज्ञायां, एङ् ह्रस्वात्सम्बुद्धेः (६.१.६९) एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्। इति सलोपे हे राम। द्विबहुवचनयोः पूर्ववत् हेरामौ हेरामाः।

वि. १ यस्मात्प्रत्ययविधिरित्यत्र तदादीत्युक्त्या भवामि भविष्यामीत्यादौ भवभविष्येति विकरणविशिष्टस्याङ्गसंज्ञा । यः प्रत्ययो यस्मात्पर इत्युक्तौ इदम्शब्दाद्वतुपि वादेशस्य घस्येयादेशे इदम इशादेशे यस्येतिचेतीकारलोपे ङीपि प्रत्ययमात्रशेषे तस्मिन्परे स्त्री इयतीत्यत्र स्त्रीशब्दस्याङ्गत्वं ततश्च स्त्रिया इतीयङ् प्रसज्येत, तन्माभूदित्यर्थं विधिरित्युक्तम् । प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वाङ्गत्वं माभूदित्यर्थं प्रत्यये परे इत्युक्तम् ।

वि. २ एङ् ह्रस्वादित्यस्याङ्गाधिकारस्थत्वाभावेऽपि सम्बुद्धेः प्रत्ययत्वेन तत्प्रकृतेरङ्गत्वस्याऽर्थाल्लाभेन तत्र एङ् ह्रस्वादित्यस्य विशेषणतया एङन्ताद्ध्रस्वान्ताच्चाङ्गादित्यर्थकरणेन कतरशब्दस्य सम्बुद्धौ सोरदडादेशे टिलोपे कतरत् इत्यत्र तकारस्य ह्रस्वात्परत्वेऽपि अङ्गस्य रेफान्तत्वाद्ध्रस्वान्ताङ्गात्परत्वाभावेन लोपो न । हे हरे हे विष्णो इत्यत्र परत्वान्नित्यत्वाच्च पूर्वं सम्बुद्धिनिमित्तकगुणे कृते ह्रस्वात्परत्वाभावेऽपि सुलोपसिद्धये एङ् ग्रहणम् । हे भो इत्यादयः सम्बोधनबोधका निपाताः, ते च प्रयोगे नावश्यकाः ।

कर्मणि द्वितीयेति अनुक्ते कर्मणि द्वितीयायामेकवचने अमि राम अम् इति स्थिते सवर्णदीर्घापवादेन अतोगुण इति पररूपे तद्बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते, अमि पूर्वः (६.१.१०७) अकोऽम्यचि परे पूर्वरूपमेकादेशः स्यात्। इति पूर्वरूपे रामम्। द्विवचने औटि पूर्ववद्वृद्धौ रामौ। बहुवचने शसि राम-अस् इत्यत्र सवर्णदीर्घापवादेन अतोगुणइति प्राप्ते तद्बाधेन पूर्वसवर्णदीर्घे, तस्माच्छसो नः पुंसि (६.१.१०३) पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि। इति सस्य नत्वे, अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२) अट्कवर्गपवर्गआङ् नुम् एतैर्व्यस्तैर्यथासम्भवमिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे। इति णत्वे प्राप्ते, पदान्तस्य (८.४.३७) पदान्तस्य नस्य णत्वं न स्यात्। इति निषेधे रामान्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. अट्कुप्वाङित्यत्र समानमेकपदं तच्चाखण्डपदमेवेह विवक्षितं, तेन रामनामेत्यादौ समासेनैकपदत्वेपि अखण्डपदत्वाभावान्न णत्वम्। पदव्यवायेपीति निषेधं बाधितुमाङ्ग्रहणं, तेन पर्याणद्धमित्यत्र णत्वम्। नुम्ग्रहणमनुस्वारोपलक्षणार्थम्, अयोगवाहानामट्सूपदेशस्योक्तत्वादनुस्वारस्याप्यट्त्वेनैव संग्रहात्तत्यक्तुं शक्यम्।

कर्तृकरणयोस्तृतीयेति अनुक्ते कर्तरि करणे च तृतीयायामेकवचने टाप्रत्यये राम आ इत्यत्र सवर्णदीर्घे प्राप्ते राम इत्यस्याङ्गसंज्ञायाम्, अङ्गस्य (६.४.१) इत्यधिकृत्य, टाङसिङसामिनात्स्याः (७.१.१२) अदन्तादङ्गात्परेषां टादीनामिनादय आदेशाः स्युः। इति इनादेशे आद्गुण इति गुणे अट्कुप्वाङिति णत्वे रामेण। द्विवचने भ्यामि अङ्गसंज्ञायाम्, सुपि च (७.३.१०२) यञादौ सुपि परे अतोङ्गस्य दीर्घःस्यात्। इत्यकारस्याऽऽकारे रामाभ्याम्। बहुवचने भिसि अङ्गत्वे, अतो भिस ऐस् (७.१.९) अकारान्तादङ्गाद्भिस ऐस् स्यात्। इत्यनेकाल्त्वात्सर्वादेशे वृद्धौ सस्य रुत्वविसर्गयोः रामैः।

वि. यद्यप्यत्र भिस एस्विधानेपि वृद्ध्या रामैरिति सिध्यति, न चातोगुण इति पररूपशङ्का, इसमविधाय एस्विधानसामर्थ्यादेव तदसम्भवात्; तथापि एदैतोर्द्विमात्रत्वाविशेषात्प्रक्रियालाघवाच्च ऐस्विधिः, वेदे-नद्यैरित्यादिरूपसिद्ध्यर्थमप्यैस्विधानमावश्यकम्,

चतुर्थीसम्प्रदान इति चतुर्थ्यामेकत्वे ङयि राम ए इत्यत्र वृद्धौ प्राप्तायामङ्गसंज्ञायां, ङेर्यः (७.१.१३) अतोङ्गात्परस्य ङे इत्यस्य यादेशः स्यात्। इति यादेशे स्थानिवद्भावेन यादेशस्य सुप्त्वात्सुपिचेति दीर्घे रामाय। द्वित्वे पूर्ववत् रामाभ्याम्। बहुत्वे भ्यसि अङ्गत्वे सुपिचेति दीर्घे प्राप्ते, बहुवचने झल्येत् (७.३.१०३) झलादौ बहुवचने सुपि परे अतोङ्गस्य एकारः स्यात्। इत्यकारस्य एत्वे सस्य रुत्वविसर्गयोः रामेभ्यः। अपादाने पञ्चमीति पञ्चम्यामेकत्वे ङसौ राम अस् इत्यत्र अङ्गत्वे टाङसिङसोः ङसेः आदित्यादेशे सवर्णदीर्घे अन्त्यतकारस्य जश्त्वेन दत्वे वावसान इति चर्त्वविकल्पे रामात्-द्। द्वित्वबहुत्वयोर्भ्याम्भ्यसोः पूर्ववत् रामाभ्याम् रामेभ्यः।

वि. रामायेत्यत्र यञादित्वं सुप्त्वं च निमित्तीकृत्य सुपिचेति दीर्घे कर्तव्ये यञंशे आदेशगतयकाररूपालाश्रयत्वे स्थानिभूतालाश्रयत्वाभावेन अनल्विधावितिनिषेधाप्रवृत्तेर्यादेशस्य सुप्त्वं नानुपपन्नम्। उपजीवकमुपजीव्यस्य विघातकं न भवतीत्यर्थिकया सन्निपातलक्षणोविधिरनिमित्तं तद्विघातस्येति परिभाषया अदन्तत्वनिमित्तको यादेशोऽदन्तत्वविघातके दीर्घे निमित्तं कथमिति तु न शङ्क्यं, कष्टाय क्रमणे इति निर्देशेन तत्परिभाषाया अनित्यत्वज्ञापनेनात्राऽप्रवृत्तेः। एत्वविधौ बहुवचने इत्युक्त्या रामः रामस्येत्यत्र, झलीत्युक्त्या रामाणामित्यत्र, सुपीत्युक्त्या पचध्वमित्यत्र च नैत्वम्।

षष्ठीशेष इति षष्ठ्यामेकत्वे ङसि राम अस् इत्यत्राङ्गसंज्ञया सवर्णदीर्घं बाधित्वा टाङसिङसामिनात्स्याः स्यादेशे रामस्य। द्वित्वे ओसि वृद्धिप्राप्तावङ्गसंज्ञायां, ओसि च (७.३.१०४) ओसि परे अतोङ्गस्य एकारः स्यात्। इत्येकारे अयादेशे सस्य रुत्वविसर्गयोः रामयोः। बहुत्वे आमि सवर्णदीर्घे प्राप्ते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. पु.

संज्ञायां, ह्रस्वनद्यापो नुट् (७.१.५४) ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्। इति नुडागमेन राम नाम् इति जाते, नामि (६.४.३) नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्। इति दीर्घे अट्कुप्वाङ्ि्ति णत्वे रामाणाम्। सप्तम्यधिकरणेचेति सप्तम्यामेकत्वे ङौ राम इ इत्यत्र गुणैकादेशे रामे। द्वित्वे ओसि पूर्ववत् रामयोः। बहुत्वे सुपि राम सु इत्यत्राङ्गसंज्ञया बहुवचनेझल्येदित्येत्वे, अपदान्तस्य मूर्धन्यः (८.३.५५) आपादसमाप्तेरधिकारः। इणकोः (८.३,५७.) इत्यधिकृत्य, आदेशप्रत्यययोः (८.३.५९) इणकवर्गाभ्यां परस्यापदान्तस्य आदेशरूपस्य प्रत्ययावयवस्य च सकारस्य मूर्धन्यादेशः स्यात्। इति विवृताघोषस्य सस्य तादृशे षे रामेषु। एवं कृष्ण-मुकुन्द-देव-शिव-हर-प्रभृतयः।

वि. १. रामस्येत्यत्र सकारस्य अनचिचेति द्वित्वपक्षे सकारद्वयम्, खरिचेति पूर्वसस्य चर्त्वेऽप्यान्तरतम्यात्स एव न तु तः, अल्पप्राणतया स्पृष्टतया च प्रयत्नभेदात्, अत एव सःस्यार्द्धेति तादेशारम्भः। रामाणामित्यत्र सन्निपातपरिभाषा-विरोधात्परोपि सुपिचेति दीर्घो न प्रवर्तत इति नामीत्यस्यारम्भः। फलविशेषाभावेपि न्यायानुरोधेन शास्त्रप्रवृत्तेर्भाष्योक्तत्वात्। नामीत्यनेन त्वारम्भसामर्थ्यात्परिभाषा बाध्यते। रामाभ्यामित्यादौ सावकाशतया सुपिचेत्यस्य तु नारम्भसामर्थ्यम्। षत्वविधौ इणकोरित्युक्त्या रामस्येत्यत्र, आदेशप्रत्यययोरित्युक्त्या सुपिसौ सुपिस इत्यत्र, अपदान्तस्येत्युक्त्या हरिस्तत्रे-त्यादौ न षत्वम्।

वि. २. सर्वनामसु विशेषो वक्ष्यते। विशेषवर्जमकारान्तपुंलिङ्गशब्दानां रामशब्दवद्रूपाणि। परं निमित्तयो रषयोः सत्वासत्वाभ्यां व्यवधानविशेषेण च टायामामि च णत्वतदभावावनुसन्धेयौ, यथा कृष्णेन देवेन देवानाम् हरेण हराणामित्यादि।

प्रयोगा :—रामो राजमणिः सदा विजयते, रामं रमेशं भजे, रामेणाभिहता निशाचरचमू रामाय तस्मै नमः। रामान्नास्ति परायणं मम परं, रामस्य दासोस्म्यहं, रामे चित्तलयः सदा भवतु मे हेराम! मामुद्धर।

अकारान्तेषु विशेषाः—

निर्जरशब्दः (देवः)–निष्क्रान्तो जरायाः निर्गता जरा यस्मादिति वा समासे गोस्त्रियोरिति ह्रस्वे निष्पन्नः। जराया जरसन्यतरस्याम् (७.२.१०१) जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदाङ्गाधिकारे तस्य तदन्तस्य च ग्रहणमिति जराशब्दस्येव तदन्तनिर्जरशब्दस्यापीह ग्रहादने-कालत्वात्सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवन्तीति एकदेशविकृतमनन्यवद्भवतीति च अजादि-विभक्तौ जरशब्दस्य स्थाने पक्षे जरसादेशः पक्षान्तरे हलादौ च रामवत्। निर्जरः निर्जरसौ निर्जरौ निर्जरसः निर्जराः, हेनिर्जर० निर्जरसं निर्जरं निर्जरसौ निर्जरौ निर्जरसः निर्जरान्. निर्जरसा निर्जरेण निर्जराभ्याम् निर्जरैः, निर्जरसे निर्जराय निर्जराभ्याम् निर्जरेभ्यः, निर्जरसः निर्जरात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्जराभ्याम् निर्जरेभ्यः, निर्जरसः निर्जरस्य निर्जरसोः निर्जरयोः निर्जरसां निर्जराणाम्, निर्जरसि निर्जरे निर्जरसोः-निर्जरयोः निर्जरेषु। टादिषु पक्षे इनादीन्बाधित्वा परत्वाज्जरस्।

वि. वृत्तिकृता तु टाङस्योः पूर्वविप्रतिषेधेन इनातोः कृतयोः सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसादेशे निर्जरसिन निर्जरसात् इति रूपे, नतु निर्जरसा निर्जरस इति केचिदित्युक्तम्। तथा भिसि निर्जरसैरित्युक्तम्; तदनुसारिभिश्च षष्ठ्येकवचने निर्जरस्येत्येव रूपमुक्तम्। एतच्च भाष्यविरुद्धम्।

पादशब्दः (चरणः)-पादः पादौ पादाः पादम् पादौ। शसादिषु-पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु (६·१·६३) पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक आस्य एषां पद् दत् नस् मास् हृद् निश् असन् यूषन् दोषन् यकन् शकन् उदन् आसन् इत्यादेशा वा स्युः शसादौ। इति पादशब्दस्य पदादेशः। पदः पादान् पदा पादेन पद्भ्यां पादाभ्यां पद्भिः पादैः इत्यादि। एवं दन्तशब्दः सुटि रामवत् दन्तः दन्तौ दन्ताः दन्तं दन्तौ। शसादिषु पक्षे दत् इत्यादेशः। सुडनपुंसकस्य (१-१-४३) स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीवस्य। स्वादिष्वसर्वनामस्थाने (१-४-१७) कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्। यचि भम् (१-४-१८) यकारादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्। आकडारादेका संज्ञा (१-४-१) इत ऊर्ध्वं कडाराः कर्मधारये इत्यतः प्रागेकस्य एकैव संज्ञा ज्ञेया। या पराऽनवकाशा च। तेन शसादावचि भसंज्ञैव नपदत्वमतो जश्त्वं न, भ्यामादौ हलादौ तु पदत्वेन जश्त्वम्, सुपि तु चर्त्वमपि-दतः दन्तान् दता दन्तेन दद्भ्यां दन्ताभ्यां दद्भिः दन्तैः इत्यादि। एवं मास शब्दः सुटि रामवत्, मासः मासौ मासाः मासं मासौ। शसादौ पक्षे मास् इत्यादेशः, भ्यामादौ हलि परे पदत्वेन मासः सस्य रुत्वे यत्वे यलोपः। मासः मासान् मासा मासेन माभ्यां मासाभ्यां माभिः मासैः इत्यादि।

वि. यूषशब्दो मण्डवाची पुंसि, तस्य शसादिषु पक्षे यूषन्नादेशे अजादिषु भसंज्ञया अल्लोपोन इत्यकारलोपः, ङौतु विभाषाङिश्योरिति अल्लोपो वा, रषाभ्यांनोणः समानपदे इति णत्वम्। पक्षे रामवत्। यूषः-षौ-षाः-षं-षौ, यूष्णः यूषान् यूष्णा यूषेण, यूषभ्यां, यूषन्नादेशे हलि पदत्वान्नलोपःप्रातिपदिकान्तस्येति नलोपः। यूषाभ्याम् यूषभिः यूषैः, यूष्णे यूषाय यूषभ्यां-भ्यः यूषाभ्यां-भ्यः, यूष्णः यूषात् यूषभ्यां-भ्यः यूषाभ्यां-भ्यः, यूष्णः यूषस्य यूष्णोः यूषयोः यूष्णां यूषाणाम्, यूष्णि यूषणि यूषे यूष्णोः यूषयोः यूषसु यूषेषु। नासिका निशाशब्दौ स्त्रियाम्, हृदय उदक आस्यशब्दाः असृज् यकृत् शकृत्शब्दाश्च क्लीबे वक्ष्यन्ते। दोष्शब्दस्य नपुंसकत्वं दोषणीति भाष्यनिर्देशात्, तेन दक्षिणं दोर्निशाचर इति सङ्गच्छते। भुजबाहूप्रवेष्टोदोः इति साहचर्यात्पुंस्त्वमपि, तेन दोषं तस्य तथाविधस्य भजत इत्यप्युपपद्यते। पद्दन्निति सूत्रे प्रभृतिग्रहणं प्रकारार्थम्, तथा च औङः श्यामपि दोषन्नादेशः, अतएव भाष्ये ककुद्दोषणी इत्युदाहृतम्। तेन पदङ्घ्रिश्चरणोऽस्त्रियाम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वान्तं हृन्मानसं मन इति प्रथमैकवचनेपि पत् हृत् इति, आसन्यं (आस्ये भवं) प्राणमूचुः इति चोपपद्यते। पद्दन्न इत्यत्र केचिच्छन्दसीत्यनुवर्त्य छन्दसीमानादेशान्वदन्ति। परे पुनर्भाषायामपि पदादिशब्दप्रयोगबाहुल्येन अविशेषेणेच्छन्ति।

वि. २ द्वयोरन्होर्भव इति तद्धितार्थेद्विगौ ठञो लुकि, विगतमहः इति प्रादिसमासे, अन्हःसाय इत्येकदेशिसमासे राजाहः-सखिभ्यष्टजिति टचि अन्होन्ह इत्यन्हादेशे द्व्यन्ह व्यन्ह सायान्ह शब्दाअकारान्ताः पुंसि, तेषां रामशब्दवद्रूपाणि, ङौतु-संख्याविसायपूर्वस्यान्हस्याहन्नन्यतरस्यां ङौ (६-३-११०) संख्यादिपूर्वस्यान्हस्य अहन्नादेशो वा स्यान्ङौ। इत्य-हन्नादेशविकल्पे तदादेशपक्षे विभाषाङिश्योरित्यल्लोपविकल्पेन-द्व्यन्हि द्व्यहनि द्व्न्हे, व्यन्हि व्यहनि व्यन्हे, सायान्हि सायाहनि सायान्हे इति।

प्रयोगाः—निर्जरैरहमिकापरैस्तृषा। न पादेन स्पृशेदग्निम्। आवध्नाति पदोर्लोहम्। दन्तयोर्हन्ति कुञ्जरम्। दद्भिर्दशति बालकः। भव्या निर्जरसां सेवा। भाद्रे मासि सिते पक्षे। दुष्टः पद्भां प्रहरति। मासस्य द्विरधीते।

आकारान्ताः—

विश्वपा शब्दः (विश्वरक्षकः)-विश्वं पातीत्यर्थे विच्प्रयत्ययेनिष्पन्नः। आबन्तत्वाभावान्न सुलोपः विश्वपाः। औङि विश्वपा औ इत्यत्र पूर्वसवर्णदीर्घे प्राप्ते, दीर्घाज्जसि च (६-१-१०५) दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात्। इति निषेधेन वृद्धौ विश्वपौ। जसि सवर्णदीर्घे विश्वपाः। सम्बोधने न विशेषः। अमिपूर्वः विश्वपाम् विश्वपौ, शसि भसंज्ञायां पूर्वसवर्णदीर्घे प्राप्ते, आतो धातोः (६-४-१४०) आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात्। इत्याकारलोपे विश्वपः। एव मजादौ सर्वत्र भसंज्ञायामाकारलोपः विश्वपा विश्वपाभ्यां-भिः विश्वपे विश्वपाभ्यां-भ्यः विश्वपः-पाभ्यां-भ्यः विश्वपः-पोः-पाम्, विश्वपि-पोः-पासु। एवमाकारान्तधात्वन्ता गोपा सोमपा शङ्खध्मा मधुपा प्रभृतयः। हाहा शब्दः (गन्धर्वविशेषः)-हाहाः हाहौ हाहाः हाहाम्-हौ-हाः हाहा हाहाभ्यां-भिः हाहै-हाभ्यां-भिः हाहाः-हाभ्यां-भ्यः हाहाः-हौः-हाम् हाहे-हौः-हासु। आकारान्तधात्व-भावेन नाकारलोपः सर्वत्र सन्धिकार्यम्।

वि. विश्वपाशब्दे औङि नादिचीत्येव पूर्वसवर्णदीर्घनिषेधे सिद्धे जसि सत्यपि पूर्वसवर्णदीर्घे ह्यत्यभावेपि दीर्घाजसीति सूत्रं गौर्यौ गौर्य इत्याद्यर्थमारब्धं न्याय्यत्वादिहाप्युपन्यस्तम्। आतोधातोरित्यत्र आत इति योगविभागात्क्वचिदन्यत्रा-प्याकारलोपः क्त्वा-क्त्वः श्रा-श्नः।

इकारान्ता :—

हरि शब्दः (विष्णुः)-हरतीत्यर्थे हृधातोरिन्प्रत्यये निष्पन्नः। सौ हरिः, औङि प्रथमयोः पूर्वसवर्णः हरी, जसि पूर्वसवर्णदीर्घे प्राप्ते, जसि च (७.३.१०९) ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे। इति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इकारस्य गुणे एकारे अयादेशे रुत्वविसर्गयोः हरयः। सम्बुद्धौ, ह्रस्वस्य गुणः (७.३.१०८) ह्रस्वस्य गुणः स्यात्सम्बुद्धौ। इति गुणे एङ्ह्रस्वादिति सम्बुद्धिलोपे हेहरे हे हरी हेहरयः। अमिपूर्वः हरिम् हरी हरीन् पूर्वसवर्णदीर्घे तस्माच्छसो न इति नत्वम्। शेषोघ्यसखि (१.४.७) अनदीसंज्ञौ ह्रस्वौ यौ इवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्। इति घिसंज्ञायां तृतीयैकवचने, आङो नाऽस्त्रियाम् (७.३.१२०) घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा प्राचाम्। इति नादेशे अट्कुप्वाङिति णत्वे हरिणा हरिभ्यां हरिभिः। ङयि घेर्ङिति (७.३.१११) घिसंज्ञस्य ङिति सुपि गुणः स्यात्। इति गुणे अयादेशे हरये हरिभ्यां-भ्यः। ङसिङसोः घेर्ङितीति गुणे, ङसिङसोश्च (६.१.११०) एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्। इति पूर्वरूपे रुत्वविसर्गयोः हरेः हरिभ्यां-भ्यः हरे-हर्योःयण्, हरीणाम् नुटि नामीति दीर्घे णत्वम्। ङौ, अच्च घेः (७.३.११९) इदुद्भ्यां परस्य ङेरौत्स्यात् घेरकारोन्तादेशश्च। इति ङेरौत्वे एरत्वे च वृद्धौ हरौ हर्योः हरिषु इणः परत्वात्षत्वम्। एवं रवि कवि अग्नि वन्हि-प्रभृतयः, भूपति-प्रजापति-नृपति-प्रभृतिसमस्तपतिशब्दाश्च।

वि. हरिरित्यत्र विसर्गस्याऽकारोपरि पाठेनान्त्वात्तस्मिन्परे इकारस्य यण् तु न शङ्क्यः, यणि कर्तव्ये विसर्जनीयस्यासिद्धत्वात्। शेषोघ्यसखीत्यत्र नदीसञ्ज्ञकादन्यः शेषः, शेषत्वोक्त्या नेह-मत्यै। तदनुक्तावपि आकडारादिति नियमेन नदीत्वे घिसंज्ञाया अनसक्तेर्न वैरूप्यापत्तिरितीह शेषग्रहणं स्पष्टार्थमेव। ह्रस्वोक्त्या नेह-ग्रामण्ये। आङोनेत्यत्र अमुना कुलेनेति क्लीवेपि नादेशार्थं पुंसीत्यनुक्त्वा अस्त्रियामित्युक्तं, नेह-मत्या।

सखि शब्दः (मित्रं)—अनङ् सौ (७.१.९३) सख्युरङ्गस्याऽनङादेशःस्यात्सौ परे। इति ङित्वेनान्त्येकारस्य स्थाने अनादेशे सखन् स् इति स्थिते अलोन्त्यादिति खाकारस्योपधासंज्ञायाम्, सर्वनामस्थाने चासम्बुद्धौ (६.४.८) नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे इत्युपधादीर्घे, अपृक्त एकाल्प्रत्ययः (१-२-४१) एकालप्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्। इति सस्यापृक्तत्वे, हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल् (६-१-६८) हलन्तात्परं, दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसि इत्येतदपृक्तं हल्लुप्यते। इति सलोपे; न लोपः प्रातिपदिकान्तस्य (८-२-७) नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः स्यात्। इति नलोपे सखा। औङि-सख्युरसम्बुद्धौ (७-१-९२) सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्। इति प्रत्ययस्य णिद्वत्वे, अचोञ्णिति (७-२-११५) ञिति णिति च परे अजन्ताङ्गस्य वृद्धिः स्यात्। इतीकारस्य वृद्धावैकारे आयादेशे सखायौ, एवं सखायः। सम्बुद्धौ त्वनङोभावे ह्रस्वस्यगुण इति गुणे एङ्ह्रस्वादिति सुलोपे हेसखे सखायौ-यः सखायम् सखायौ। शसि असर्वनामस्थानतया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ.पु.

वृद्ध्यभावात्पूर्वसवर्णदीर्घे सस्य नत्वे सखीन्। असखीत्युक्त्या घिसंज्ञाभावेन न तत्कार्याणि। यणि सख्या सखिभ्यां-भिः, सख्ये सखिभ्यां-भ्यः। ङसिङसोर्यणि सख्यस् इति जाते, ख्यत्यात्परस्य (६-१-११२) खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात्। इति अस्योत्वे रुत्वविसर्गयोः सख्युः, सख्योः सखीनाम् नुटि दीर्घः। ङौ सवर्णदीर्घे प्राप्ते, औत् (७-३-११८) इदुद्भ्यां परस्य ङेरौत्स्यात्। इत्यौत्वे यणि सख्यौ, सख्योः सखिषु।

वि. १ वर्णान्तरेणासम्बद्ध अपृक्त इत्यन्वर्था संज्ञा। सु ति सि सम्बन्ध्यपृक्तहलो लोपे हल्ङ्याब्भ्य इत्युक्त्या नेह—ग्रामणीः। दीर्घादित्युक्तेर्नेह-अतिखट्वः। सुतिसीत्युक्तेर्नेह-अभैत्सीत्। अत्र सिचः सस्य लोपो न, तिपा सहचरितस्य सिपो ग्रहणेन सिचोऽग्रहणात्। अपृक्तेत्युक्तेः विभर्तीत्यत्र तलोपो न। द्वितीयहल्ग्रहणाद्बिभेदेत्यत्रान्त्याकारस्य न लोपः। प्रथम-हल्ग्रहणाभावे राजेत्यत्र सस्य संयोगान्तलोपे तस्यासिद्धत्वान्नलोपो न स्यादिति तदुपादानं, ततश्च षाष्ठेनानेन सलोपे असिद्धयभावान्नलोपः।

वि. २ शोभनः सखा इत्यर्थे अनङ् णिद्वद्भावयोराङ्गत्वात्तदन्तेपि प्रवृत्या सुसखा सुसखायौ सुसखायः। समुदायस्य सखिरूपत्वाभावेन असखीनिषेधाप्रवृत्तेर्घिसंज्ञया तत्कार्ये सुसखिना सुसखये। ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावेन ख्यत्यादित्युत्त्वाभावेन सुसखेः। सुसखौ। एवमतिशयितः सखा अतिसखा अतिसखायौ-यः। परमः सखा यस्य परमसखा-खायौ-यः गौणत्वेप्यनङ् णित्वे। सखीमतिक्रान्तोऽतिसखिः लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह टच्। अत्र गोस्त्रियोरिति ह्रस्वे निष्पन्नस्य सखिशब्दस्य लाक्षणिकत्वेन लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति नियमेनाग्रहणादनङ् णित्वे न भवतः, तेन अतिसखिः अतिसखी अतिसखयः इत्यादि हरिवत्।

पति शब्दः (स्वामी)—पातेर्डतौ निष्पन्नः। पतिः पती पतयः हेपते पतिम् पती पतीन् एत-त्पर्यन्तं हरिवत्। टादौ घिसंज्ञाप्राप्तौ, पतिः समास एव (१-४-८) पतिशब्दः समास एव घिसंज्ञः स्यात्। इति नियमनेन असमस्तपतिशब्दे न घिसंज्ञा तत्प्रयुक्तकार्याणि च। तेन अजादिषु यण्। पत्या पतिभ्यां-भिः, पत्ये पतिभ्यां-भ्यः। ङसिङसोर्यणि ख्यत्यादित्युत्वे पत्युः पतिभ्यां-भ्यः पत्युः पत्योः पतीनाम्, औदिति ङेरौत्वे यणि पत्यौ पत्योः पतिषु। समस्तपतिशब्दे तु घिसंज्ञाकार्याणि भूपतिना भूपतये भूपतेः भूपतौ अन्यत्र हरिवदेव। एवं श्रीपति-स्थपति-नृपत्यादयः।

वि. सीतायाः पतये नमः, क्लीवे च पतिते पतौ, कृष्णस्य सखिरर्जुनः, सखिना वानरेन्द्रेण इत्यादिविरूपरूपाणि तु पतिरित्याख्यातः पतिः सखिरित्याख्यातः सखिरित्यर्थे तत्करोति तदाचष्टे इति णौ टिलोपे तदन्तादौणादिके इप्रत्यये णि लोपे निष्पन्नयोर्लाक्षणिकपतिसखिशब्दयोर्लक्षणप्रतिपदोक्तयोरितिन्यायेन सूत्रोक्त पति-सखि-शब्दाभ्यामग्रहणाद्घिसंज्ञया हरिशब्दवन्निष्पन्नानीति प्रयोगसिद्धये कल्पनीयम्।

प्रयोगाः—हरिर्हरति पापानि। पत्युः प्रजानां महिमा विशेषः। प्रजापतये स्वाहा। सखा गरी-यान् शत्रुश्च कृत्रिमस्तौहि कार्यतः। हरये नम इत्युच्चैर्मुच्यते सर्वपातकात्। नरपतेरति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तरां प्रथितं यशः। सख्युः संमानमाचर। पत्युः सखायं मनुते। पत्यौ प्रेम समाचर। कवे: काव्यं मधुरम्।

ईकारान्ताः—

नद्यन्तो बहुश्रेयसी शब्दः (बहुकल्याणः)—बह्व्यः श्रेयस्यो यस्येति समासे स्त्रियाःपुंवदिति पूर्वपदस्य पुंवत्वे गोस्त्रियोरुपसर्जनस्येति ह्रस्वस्य ईयसो बहुव्रीहेर्नेतिवाच्यमिति निषेधे निष्पन्नः दीर्घङ्यन्तत्वाद्धल्ङ्याभ्य इतिसुलोपे बहुश्रेयसी। औजसोर्दीर्घाज्जसि चेति पूर्व सवर्णदीर्घनिषेधे यणि बहुश्रेयस्यौ-यस्यः। सम्बुद्धौ-यू स्त्र्याख्यौ नदी (१.४.३) ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः प्रथमलिङ्गग्रहणं च (वा) पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः। इति बहुश्रेयसीशब्दस्य नदीसंज्ञायाम्, अम्बार्थनद्योर्ह्रस्वः(७-३-१०७) अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्सम्बुद्धौ। इत्यन्त्येकारस्य ह्रस्वे अम्बार्थनद्योर्गुण इत्यनुक्त्वा ह्रस्वविधिसामर्थ्याद्ध्रस्वस्यगुण इति गुणेऽसति एङ्ह्रस्वादिति सम्बुद्धिलोपे हे बहुश्रेयसि-यस्यौ-यस्यः। अमिपूर्वः बहुश्रेयसीम्-यस्यौ-यसीन् पूर्वसवर्णदीर्घे नत्वम्। अघित्वान्नघिसंज्ञाकार्याणि बहुश्रेयस्या-सीभ्याम्-भिः। ङयि नदीसंज्ञायाम्, आण्नद्याः (७-३-११२) नद्यन्तात्परेषां ङितामाडागमः स्यात्। इति टित्वेनाद्यवयवे आकारे, आटश्च (६-४-९०) आटोचिपरे वृद्धिरेकादेशः स्यात्। इत्याकारैकारयोरैकारे यणि बहुश्रेयस्यै-सीभ्याम्-भ्यः। ङसिङसो र्नदीसंज्ञायामाडागमे वृद्धौ यणि रुत्वविसर्गयोः बहुश्रेयस्याः—सीभ्याम्—भ्यः, बहुश्रेयस्याः-यस्योः आमि नद्यन्तात्परत्वान्नुटि यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इति न्यायेन नामोऽप्यास्ग्रहणे ग्रहादाडागमे प्राप्तेपि विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति तदभावे, बहुश्रेयसीनाम्। ङौ नदीत्वे सवर्णदीर्घे प्राप्ते, ङेराम्नद्याम्नीभ्यः (७-३-११६) नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम्स्यात्। इत्यामादेशे नुटं बाधित्वा परत्वादाडागमे आटश्चेति वृद्धौ पुनर्नुटि प्राप्तेपि विप्रतिषेधेयद्बाधितमिति न्यायेन तदभावे यणि बहुश्रेयस्याम्-यस्योः-यसीषु। एवमन्ये नद्यन्ताः। धात्वन्तो ग्रामणी शब्दः (ग्रामनेता) ग्रामं नयतीत्यर्थे ग्रामपूर्वकनीधातोः सत्सूद्विषेत्यादिना क्विपि अग्रग्रामाभ्यां नयतेर्णोवाच्य इति णत्वे निष्पन्नः। अङ्यन्तत्वान्न सुलोपः ग्रामणीः। औजसोर्दीर्घाज्जसिचेति पूर्वसवर्णदीर्घनिषेधे अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६-४-७७) श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोर्भ्रू इत्येतस्य चाङ्गस्य इयङुवङौ स्तोऽजादौ प्रत्यये परे, इतीयङि प्राप्ते, एरनेकाचोऽसंयोगपूर्वस्य (६-४-८२) धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोङ्गस्य यणस्यादजादौ प्रत्यये परे। इति यणि ग्रामण्यौ ग्रामण्यः। नदीत्वाभावेन ह्रस्वाभावे न सम्बुद्धिलोपः हेग्रामणीः-ण्यौ-ण्यः, अमिपूर्व इति इयङं च बाधित्वा परनेकाच इति यणि ग्रामण्यम्-ण्यौ-ण्यः शसि पूर्व सवर्णदीर्घमियङं च बाधित्वा यण्। एवमजादौ यण् ग्रामण्या-णीभ्याम्-भिः ग्रामण्ये-णीभ्याम्-भ्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. पु.

ग्रामण्यः-णीभ्याम्-भ्यः, ग्रामण्यः-ण्योः-ण्याम्, ङौ नद्यन्तत्वेन ङे राम्नद्याम्नीभ्य इत्यामि यणि ग्रामण्याम्-ण्योः-णीषु, एवमग्रणी। सेनानीप्रभृतयः—सुधी शब्दः (विद्वान्)—सुष्ठु ध्यायति शोभना धीर्यस्येति वा सुधीः अङ्यन्तत्वान्न सुलोपः। अजादौ परे एरनेकाच इति यणि प्राप्ते, न भूसुधियोः (६-४-८५) एतयोर्यण् न स्यादचि सुपि। इति निषेधेन अचिश्नुधात्विति इयङि सुधियौ सुधियः हेसुधी :-धियौ-यः,सुधियम्-यौ-यः, सुधिया-धीभ्याम्-भिः, सुधिये-धीभ्याम्-भ्यः, सुधियः-धीभ्याम्-भ्यः, सुधियः-योः-याम्, सुधियि-योः-धीषु। एवं धात्ववयवसंयोगपूर्वकाः सुश्री-यवक्री-प्रभृतयः, गतिकारकेतरपूर्वपदस्य यण् नेष्यते इति यण्निषेधेन तादृशाः शुद्धधी-परमधीप्रभृतयश्च।

वि. १ दुर्धीशब्दस्य दुःस्थिता धीर्येषामिति विग्रहे यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति बुद्धिगुणवाचिनो धीशब्दस्य क्रियावाचित्वाभावेनाऽगतित्वाद्यण्निषेधादियङि दुर्धीः दुर्धियौ दुर्धियः। एवं परमधीः परमधियौ-धियइत्यादि।

वि. २. प्रधीशब्दो द्विधा-प्रध्यायतीत्यर्थे ध्यायतेः सम्प्रसारणं चेति क्विपि सम्प्रसारणे सम्प्रसारणाच्चेति पूर्वरूपे हल इति दीर्घे निष्पन्न एकः। अस्य अजादौ सर्वत्र एरनेकाचइति यणेव अस्त्रीत्वान्नदीकार्यं न, प्रधीः-ध्यः, हेप्रधीः, प्रध्यम्-ध्यौ-ध्यः, प्रध्या-धीभ्यां-भिः, प्रध्ये-धीभ्याम्-भ्यः, प्रध्यः-धीभ्याम्-भ्यः प्रध्यः-ध्योः-ध्याम्, प्रध्यि ध्योः-धीषु। प्रकृष्टा धीर्यस्येति बहुव्रीहौनिष्पन्नोन्यः। अस्य धीशब्दस्य स्त्रीत्वेन प्रथमलिङ्गग्रहणंचेतिनदीत्वान्नदीकार्याणि, सम्बुद्धौ हेप्रधि, ङयिप्रध्यै ङसिङसोः प्रध्याः, आमि प्रधीनाम्, ङौ प्रध्याम् इति विशेषः! अन्यत्पूर्ववत्।

वि. ३ वातमित्युपपदे माङ ईप्रत्यये निष्पन्नो वातप्रमीशब्दः(वातमृगः)-अङ्यन्तत्वान्न सुलोपः औजसोर्दीर्घाजसिचेति पूर्वसवर्णदीर्घनिषेधेयण् वातप्रमीः-म्यौ-म्यः हेवातप्रमीः-म्यौ-म्यः, अमिपूर्वः वातप्रमीम्-म्यौ-मीन्, वातप्रम्या-मीभ्याम्-भिः, वातप्रम्ये-भीभ्याम्-भ्यः, वातप्रम्यः-मीभ्याम् भ्यः, वातप्रम्यः-म्योः-म्याम् दीर्घत्वान्न नुट्। ङौ तु सवर्णदीर्घः वातप्रमी-म्योः-मीषु। एवं ययी-पप्यादयः। यान्त्यनेनेति ययीः(मार्गः) पाति लोकमिति पपीः(सूर्यः)। क्विबन्तवातप्रमीशब्दस्य तु ईकारान्त-धातुत्वादेरनेका-च इति यणि अमि शसि ङौ च वातप्रम्यम् वातप्रम्यः वातप्रम्यि इति विशेषः।

प्रयोगा :—सुधियां समाजोयम्। अप्यग्रणीर्मन्त्रकृतामृषीणाम्। सेनान्यमालीढमिवासुरास्त्रैः। सुश्रियः सुधियो लोके। स एषां ग्रामणीः। अग्रणीर्ग्रामणीरसौ।

उकारान्ताः—

शम्भुशब्दः (शिवः)-हरिशब्दवत्प्रक्रिया। शम्भुः शम्भू शम्भवः जसिचेतिगुणेऽवादेशः। सम्बुद्धौ ह्रस्वस्यगुण इत्युकारस्य गुणे एङ्ह्रस्वादिति सम्बुद्धिलोपः हेशम्भो-म्भू-म्भवः, शम्भुम् शम्भून्। टादौ घिसंज्ञाकार्याणि शम्भुना-भुभ्याम्-भुभिः शम्भवे-म्भुभ्याम् म्भ्यः, शम्भोः शम्भुभ्यां-भ्यः शम्भोः शम्भ्वोः शम्भूनाम् ङौ अच्चघेः शम्भौ शम्भ्वोः शम्भुषु। एवं वायु-भानु-वटु-गुरु-विष्णु-तरु-बाहु प्रभृतयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रोष्टुशब्दः (शृगालः)–क्रुशधातोस्तुनि निष्पन्नः। सौ सर्वनामस्थानसंज्ञायां, तृज्वत्क्रोष्टुः (७-१-९५) क्रोष्टुशब्दस्तृजन्तेन तुल्यं वर्तते असम्बुद्धौ सर्वनामस्थाने परे। इति क्रोष्टुशब्दस्थाने क्रोष्टृ इत्यादेशे, ऋतो ङिसर्वनामस्थानयोः (७-३-११०) ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्। इति प्राप्ते, ऋदुशनस्पुरुदंसोऽनेहसां च (७-१-९४) ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे। इति ङित्वादन्त्यऋकारस्थाने अनादेशे क्रोष्टन्स् इति स्थिते, अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (६-४-११) अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। इत्यकारस्याऽऽकारे हल्ङ्याबिति सुलोपे नलोपःप्रातिपदिकेति नलोपे क्रोष्टा। औङादौ तृज्वद्भावे ऋतोङीति गुणे रपरे अप्तृन्निति दीर्घे क्रोष्टारौ-रः असम्बुद्धावित्युक्तेः सम्बुद्धौ न तृज्वद्भावः ह्रस्वस्य गुण इति गुणे एङ्ह्रस्वादिति सलोपे हेक्रोष्टो हेक्रोष्टारौ-रः क्रोष्टारम्-रौ, शसादेरसर्वनामस्थानतया तृज्वद्भावाभावे पूर्वसवर्णदीर्घे सस्य नत्वे क्रोष्टून्। क्रोष्टु आ इत्यत्र, विभाषा तृतीयादिष्वचि (७-१-९७) अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। इति तृज्वद्भावपक्षे ऋकारस्य यणि रत्वे क्रोष्ट्रा, तृज्वत्त्वाभावे घिसंज्ञया नादेशे क्रोष्टुना। क्रोष्टुभ्याम्-भिः, तृज्वद्भावे यणि क्रोष्ट्रे, अन्यत्र घित्वाद्गुणावादेशयोः क्रोष्टवे क्रोष्टुभ्याम्-भ्यः। ङसिङसोस्तृज्वद्भावे, ऋत उत् (६-१-१११) ऋदन्तान्ङसिङसोरति परे उकार एकादेशः स्यात्। इति ऋकारस्य उर्भावे क्रोष्टुर्स् इति स्थिते, रात्सस्य (८-२-२४) रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। इति सलोपे रेफस्य विसर्गे क्रोष्टुः, तृज्वत्वाभावे घित्वाद्गुणे ङसिङसोश्चेति पूर्वरूपे क्रोष्टोः, क्रोष्टुभ्याम्-भ्यः, क्रोष्टुः क्रोष्टोः ओसि तृज्वत्वे यणि क्रोष्ट्रोः अन्यत्र यणि क्रोष्ट्वोः। आमि परत्वात्तृज्वद्भावे प्राप्ते, नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वा) इति नुटि नामीति दीर्घे क्रोष्टूनाम्। ङौ तृज्वत्त्वे ऋतोङीति अर्गुणे क्रोष्टरि अन्यत्र अच्च घेरित्यौत्वे क्रोष्टौ क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टुषु।

वि. १ नप्त्रादीनामपि तृजन्तत्वादेव सिद्धे अप्तृन्नित्यत्र तेषां ग्रहणं व्युत्पत्तिपक्षे उणादिनिष्पन्नानां तृन्तृजन्तानां संज्ञाशब्दानां दीर्घो भवति चेन्नप्त्रादीनामेवेति नियमार्थम्, तेन पितृभ्रातृप्रभृतीनां न दीर्घः। उद्गातृशब्दस्य तु समर्थसूत्रे उद्गातार इति भाष्यप्रयोगाद्भवति। धातृशब्दस्त्वौणादिको न, कतृप्रभृतयस्तु न संज्ञाशब्दा अपीत्येषां दीर्घः।

वि. २ क्रोष्टन् स इति स्थिते एकदेशमनन्यवद्भवतीति तृजन्तत्वाद्दीर्घः। सर्वनामस्थानेचासम्बुद्धाविति दीर्घे सिद्धेपि परत्वादप्तृन्नित्यनेनैव दीर्घो न्याय्यः।

प्रयोगाः—शम्भोः पदं निर्भयम्। गुरुणैवमाज्ञप्तोस्मि। ववौ वायुः सुदुस्पर्शः। वटवो वेदमधीयते। क्रोष्टुः स्वनो रौद्रः। भानुना भासितं विश्वम्। विष्णवे नैवेद्यमर्पयति। तरूणां शाखाः प्रचलन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. पु.

ऊकारान्ताः—

हुहूशब्दः (गन्धर्वविशेषः)—हुहूः, दीर्घाज्जसिचेति पूर्वसवर्णदीर्घनिषेधे यणि हुह्वौ हुह्वः। हेहुहूः-ह्वौ-ह्वः। अमिपूर्वः हुहूम्-ह्वौ-हून् पूर्वसवर्णदीर्घे नत्वम्। यणि हुह्वा हुहूभ्याम्-भिः, हुह्वे-हूभ्याम्-भ्यः, हुह्वः-हूभ्याम्-भ्यः-हुह्वः-ह्वोः-ह्वाम्, हुह्वि-ह्वोः-हूषु।

नद्यन्तः अतिचमू शब्दः (चमूमतिक्रान्तः)-अतिचमूः-म्वौ-म्वः। प्रथमलिङ्गग्रहणंचेति नदीसंज्ञायां नदीकार्याणि। सम्बुद्धौ अम्बार्थनद्योरिति ह्रस्वे सुलोपः हेअतिचमु-म्वौ म्वः। अतिचमूम्-म्वो-मून्, अतिचम्वा-मूभ्यां-भिः, नदीसंज्ञया आडागमे वृद्धौ अतिचम्वै मूभ्याम् भ्यः, अतिचम्वाः-मूभ्यां-भ्यः, अतिचम्वाः-म्वोः-मूनाम्, ङयि नदीत्वेन आमादेशे अतिचम्वाम्-म्वोः-मूषु।

धात्वन्तः खलपूशब्दः (खलशोधकः—खलं पुनातीत्यर्थे पूञः क्विपि निष्पन्नः। खलपूः। औजसोर्दीर्घाज्जसिचेति पूर्वसवर्णनिषेधे अचिश्नुधात्विति उवङि प्राप्ते, ओः सुपि (६-४-८३) धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि। इति यणि खलप्वौ खलप्वः। अनदीत्वेन ह्रस्वाभावान्न सम्बुद्धिलोपः हेखलपूः प्वौ-प्वः। एवमेवाजादौ यण् खलप्वम्-प्वौ प्वः, खलप्वा-पूभ्यां-भिः, खलप्वे पूभ्यां-भ्यः, खलप्वः पूभ्यां-भ्यः खलप्वः-प्वोः-प्वाम् खलप्वि-प्वोः-पूषु। एवं सुल्वादयः।

स्वयम्भूशब्दः (ब्रह्मा)-स्वयंभवतीत्यर्थे क्विपि निष्पन्नः। स्वयम्भूः, औङादौ ओःसुपीतिप्राप्तस्य यणो नभूसुधियोरिति निषेधे अचिश्नुधात्विति उवङि स्वयम्भुवौ-वः, हेस्वयम्भूः-भुवौ-वः, स्वयम्भुवम्-वौ-वः, स्वयम्भुवा-भूभ्यां-भिः, भुवे-भूभ्यां-भ्यः भुवः-भूभ्यां-भ्यः, स्वयम्भुवः-वोः-वाम्, स्वयम्भुवि वोः-भूषु। एवं स्वभू-आत्मभू-उरोभू प्रभृतयः, धात्ववयवसंयोगपूर्वाः कटप्रूप्रभृतयश्च।

वर्षाभूशब्दः (भेकः)-वर्षायां भवतीत्यर्थे क्विप्। वर्षाभूः। अजादौ उवङि प्राप्ते, वर्षाभ्वश्च (६-४-८४) वर्षाभूशब्दस्य यण् स्यादचि सुपि। इति यणि वर्षाभ्वौ वर्षाभ्वः, हे वर्षाभूः-भ्वौ-भ्वः। वर्षाभ्वम्-भ्वौ-भ्वः इत्यादि खलपूवत्। दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः (वा) इति यण्विधानेन दृन्भू-करभू-पुनर्भूशब्दानामप्येवम्।

वि. वर्षाभूशब्दे अजादौ औजसोः इकोयणचीति यणोपवादेन प्राप्तस्य पूर्वसवर्णदीर्घस्य दीर्घाज्जसिचेति निषेधे पुनः प्राप्तं यणं बाधित्वा अचिश्नुधात्विति प्राप्तमुवङं बाधित्वा प्राप्तस्य ओःसुपीति यणो नभूसुधियोरिति निषेधे पुनरुवङः प्रसक्तौ वर्षाभ्वश्चेति यण्।

प्रयोगा :—हाहाहुहूश्चैवमाद्या गन्धर्वाः। उरोभुवा कुम्भयुगेन जृम्भितम्। स्वयम्भूरसृजज्जगत्। निशम्यात्मभुवा गीतम्। चतुराननं आत्मभूः। हुहूर्गन्धर्वसत्तमः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋकारान्ता :–

धातृशब्दः (ब्रह्मा)–सौ ऋतोङिसर्वनामस्थानयोरिति गुणे प्राप्ते ऋदुशनस्पुरुदंसोनेहसाञ्चेत्य- नङि धातन्स् इति स्थिते अप्तृन्निति दीर्घे सुलोपे नलोपे धाता, औङादौ सर्वनामस्थाने ऋतोङीति गुणे रपरे अप्तृन्निति दीर्घे धातारौ धातारः। सम्बुद्धौ अनङोऽभावे ऋतोङीति गुणे रात्सस्येति सलोपे रेफस्य विसर्गे हे धातः-तारौ-रः, धातारम्-रौ। शसि पूर्वसवर्णदीर्घे नत्वे धातॄन्। यणि धात्रा धातृभ्याम्-भिः, धात्रे-तृभ्यां-भ्यः। ङसिङसोः ऋतउदित्युत्वे रपरे रात्सस्येति सलोपे विसर्गे धातुः तृभ्याम्-भ्यः, धातुः धात्रोः। आमि नुटि नामीति दीर्घे, ऋवर्णान्नस्यणत्वं वाच्यम् (वा) इति णत्वे धातॄणाम्। ङौ ऋतोङीतिगुणे धातरि धात्रोः धातृषु। एवं नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-प्रशास्तृ- उद्गातृशब्दाः।

पितृ शब्दः (जनकः)–व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वेन सर्वनामस्थानेषु अप्तृन्निति दीर्घो न, अन्यत्सर्वं पूर्ववत्। पिता पितरौ-रः, हेपितः-तरौ-रः, पितरम्-रौ-तॄन्, पित्रा-तृभ्यां- भिः, पित्रे-तृभ्यां-भ्यः, पितुः-तृभ्यां-भ्यः, पितुः पित्रोः पितॄणाम्, पितरि पित्रोः पितृषु। एवं भ्रातृ- जामातृ-प्रभृतयः।

वि. उणादिषु नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ इति सूत्रे एते व्युत्पादिताः। पातीति पिता, भ्राजते इति भ्राता, जायां मातीति जामाता। उणादिष्वव्युत्पादिता नामेवतृन्तृजन्तानां दीर्घः, तत्र व्युत्पादितेषु नप्त्रादीनामेवेति नियमेन धात्रादिषु नप्त्रादिषु च दीर्घः, पित्रादिषु न दीर्घः।

नृ शब्दः (मनुष्यः)– सौ ऋदुशनसित्यनङि नन्स् इति स्थिते अप्तृन्नित्यप्राप्त्या सर्वनामस्थाने चासम्बुद्धाविति नान्तत्वप्रयुक्ते दीर्घे हल्ङ्यादिलोपे नलोपे ना। औङादौ ऋतोङीति गुणे रपरे नरौ नरः। सम्बुद्धौ ऋतोङीति गुणे हल्ङ्यादिलोपे विसर्गे हेनः नरौ-रः नरम् नरौ। शसि पूर्वसवर्णदीर्घे नत्वे नॄन्। टादावचि यणि रः न्रा नृभ्याम-भिः, न्रे नृभ्यां-भ्यः ङसिङसोः ऋतउदि- त्युत्वे रात्सस्येति सलोपे विसर्गे नुः नृभ्यां-भ्यः, नुः न्रोः आमि नुटि नामीति नित्यं दीर्घे प्राप्ते, नृ च (६-४-६०) नृ इत्येतस्य नामि वा दीर्घः स्यात्। इति विकल्पे ऋवर्णान्नस्येति णत्वे नृणाम् नॄणाम् ङौ ऋतोङीति गुणे नरि न्रोः नृषु।

वि. स्त्रियां नृनरशब्दयोः नृनरयोर्वृद्धिश्चेति नारीशब्दो गौरीवत्। ॠऌकारैकारान्ताः पुंशब्दा न व्यावहारिकाः

ओकारान्तः—

गो शब्दः (वृषः)–सौ, गोतो णित् (७-१-९०) गोशब्दात्परं सर्वनामस्थानं णिद्वत्स्यात्। इति णिद्वत्त्वे अचोञ्णितीति-ओकारस्य वृद्धावौकारे गौः, औङादौ णिद्वत्त्वेन वृद्धावावादेशे गावौ गावः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ.पु.

सम्बुद्धौ णिद्वत्त्वेन वृद्धौ एङः परत्वाभावान्न सुलोपः हेगौः गावौ-वः। अमि शसि च—
औतोऽम्शसोः (६-१-९३) आ ओत इति च्छेदः। ओकारादम्शसोरचि परे आकार एकादेशः
स्यात्,। इति पूर्वपरयोराकारादेशे गाम्, गावौ गाः शसि आकारैकादेशः। असर्वनामस्थानेषु
णिद्वत्त्वाभावान्न वृद्धिः, अजादाववादेशेः गवा गोभ्याम्-भिः गवे गोभ्यां-भ्यः। ङसिङसोश्चेति पूर्वरूपे
गोःगोभ्याम्-भ्यः, गोःगवोःगवाम्, गवि गवोः गोषु।

वि. गोतोणिदित्यत्र ओतोणिदितिवाच्यम् ओकारान्ताद्विहितं सर्वनामस्थानमिति विहितविशेषणं च वक्तव्यम्, तेन शोभना द्यौरितिबहुव्रीहौ निष्पन्ने सुद्योशब्देपि णिद्वद्भावेन वृद्धौ सुद्यौः सुद्यावौ सुद्यावः इत्याद्यपि सिद्ध्यति। ओकारान्तात्परमित्यनुक्त्वा विहितमित्युक्त्या हेभानो हेभानव इत्यत्र ओकारात्परत्वेपि ततो विहितत्वाभावान्न णिद्वत्त्वम्। गोशब्दस्य स्त्रीलिङ्गेप्येवमेव रूपाणि।

ऐकारान्तः—

रै शब्दः (धनम्)-सुप्रभृतिहलादौ-रायो हलि (७-२-८५) रैशब्दस्य आकारोऽन्तादेशः स्याद्धलादिविभक्तौ। इत्यात्वे रुत्वविसर्गयोः राः। अजादिष्वायादेशः, रायौ रायः, हेराः रायौ-यः, रायम् रायौ-यः राया राभ्याम्-भिः, राये राभ्याम्-भ्यः, रायः राभ्याम्-भ्यः, रायः रायोः रायाम्, रायि रायोः रासु।

औकारान्तः—

ग्लौ शब्द (चन्द्रः)—हलादौ न विकारः अजादावावादेशः। ग्लौः ग्लावौ ग्लावः, हे ग्लौः ग्लावौ-वः, ग्लावम्-वौ-वः, ग्लावा ग्लौभ्याम्-भिः, ग्लावे-ग्लौभ्याम्-भ्यः, ग्लावः-ग्लौभ्याम्-भ्यः, ग्लावः ग्लावोः ग्लावाम्, ग्लावि ग्लावोः ग्लौसु।

वि. औतोम्शसोरिति नेह प्रवर्तते, ऐऔजिसूत्रारम्भसामर्थ्येन ओदौतोः सावर्ण्याभावात्।

प्रयोगाः—गवांसञ्चारभूमयः गावस्तृणमिवारण्ये। गावो विश्वस्य मातरः। बली गौः शकटे युक्तः। ग्लौर्मृगाङ्कः कलानिधिः। तेषां रायो विनश्यन्ति।

प्रश्नाः—स्वादयः प्रत्ययाः के। सम्बुद्धिपदार्थः कः इनात्स्यादेशाः केषां भवन्ति। इकारोकारऋकारान्तशब्दाः कतिविधाः। पति-भूपतिशब्दयोः को विशेषः। णत्वषत्वे क्व। शम्भु-स्वयम्भूशब्दयोः को विशेषः। नद्यन्तधात्वन्तेकारोकारान्तयोः के विशेषाः। अधस्तनवाक्यगतान्यजन्तपुलिङ्गशब्दरूपाणि विवृणुत—

ज्येष्ठो भ्राता पितुः समः। पुत्रा इव गुरोः शिष्याः। आपदामपहर्तारं दातारं सर्वसम्पदाम्। सुधियः सर्वदा मान्याः। वसन्ति साधव आश्रमे। रविर्लोकोंस्तापयति। सख्युः संमानमकरोत्। वायुना नीयते तृणम्। गोभ्यो घासं देहि। जामाता दशमो ग्रहः। दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि। श्रद्धा विश्वस्य कर्तरि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अजन्तस्त्रीलिङ्गप्रकरणम्

आकारान्ताः—

रमा शब्दः (लक्ष्मीः) रमधातोः पचाद्यचि टापि निष्पन्नः। प्रत्ययान्तत्वादप्रातिपदिकत्वे ङ्याप्प्रातिपदिकादिति ङ्यापोः पृथग्ग्रहणेन प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि परिभाषया वा स्वादयः। हल्ङ्याब्भ्य इति सुलोपे रमा। औङि रमाशब्दस्याङ्गसंज्ञायाम्, औङ आ (७-१-१८) आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा। इत्यौङः शीभा स्थानिवद्भावेन प्रत्ययत्वाल्लशक्वतद्धिते इति शस्येत्त्वे लोपे दीर्घाज्जसिचेति पूर्वसवर्णनिषेधे गुणै देशे रमे। जसि पूर्वसवर्णदीर्घनिषेधेऽपि सवर्णदीर्घे रुत्वविसर्गयोः रमाः। सम्बुद्धौ, सम्बुद्धौ (७-३-१०६) आप एकारः स्यात्सम्बुद्धौ। इति परत्वात्प्रतिपदोक्तत्वाच्च हल्ङ्यादिलोपं बाधित्व एकारे एङ्ह्रस्वादिति सम्बुद्धिलोपे हे रमे हेरमे हेरमाः। अमिपूर्वः रमाम् रमे रमाः पूर्वसवर्णदी पुंस्त्वाभावान्नत्वाभावः। टायामङ्गत्वे, आङि चापः (७ ३-१०५) आङि ओसि च परे आबन्ताङ्गस्य एका स्यात्। इत्येत्वेऽयादेशे रमया, रमाभ्याम्-भिः। ङयि, याडापः (७-३ ११३) आपः परस्य ङि नस्य याडागमः स्यात्। इति टित्वेन पूर्वावयवे याटि वृद्धिरेचीति वृद्धौ रमायै माभ्याम्-भ्यः। ङसि ङसोर्याडागमे सवर्णदीर्घे रुत्वविसर्गयोः रमायाः-माभ्याम्-भ्यः। रमायाः। ओसि आङिचापइत्येत्वे यादेशे रमयोः। आमि आबन्तत्वेन ह्रस्वनद्याप इति नुटि पर्जन्यवल्लक्षणप्रवृत्त्या नामीति दी अट्कुप्वाङिति णत्वे रमाणाम्। ङौ ङेराम्नद्याम्नीभ्य इत्यामादेशे याडागमे सवर्णदीर्घे रमायाम् रमये रमासु। एवं विद्या-लता-दया-गङ्गा-यमुना-वनिता-सीमा प्रभृतयः।

अम्बा शब्दः (माता)-सम्बुद्धौ अम्बार्थनद्योरिति ह्रस्वे एङ्ह्रस्वादिति सम्बुद्धिलोपे हे अम् इति विशेषः। अन्यत्सर्वं रमावदेव अम्बा अम्ब अम्बाः इत्यादि। अम्बिकाशब्दस्य तु असंयुक्त ये डलकास्तद्वतां ह्रस्वो न (वा) इति ह्रस्वनिषेधेन सर्वं रमावत् अम्बिका अम्बिके अम्बिका हेअम्बिके-के-काः इत्यादि।

वि. मातृवाचकयोः अक्का अल्लाशब्दयोरपि सम्बुद्धौ अम्बार्थनद्योरिति ह्रस्वे हेअक्क हेअल्ल इति रूपार्थमसंयु डलकेत्युक्तम्। अम्बार्थं द्व्यक्षरं यदीतिवचनात् द्व्यच्कानामम्बार्थानां ह्रस्व इत्युक्तौ न तद्वार्तिकापेक्षा। अस्याऽऽङ्गल तदन्तविधिना जगदम्बाशब्दस्यापि द्व्यच्काम्बाशब्दान्ततया ग्रहणेन जगदम्ब इति रूपं सिद्धत्येव।

जरा शब्दः (वार्धक्यं)-जॄष्वयोहानाविति धातोः षिद्भिदादिभ्योऽङित्यङि ऋदृशोऽङिगुण इ गुणेऽदन्तत्वाट्टापि निष्पन्नः। अजादिविभक्तिषु जरायाः विकल्पेन जरसादेशेरूपद्वयम्, जरसादेश

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. स्त्री.

भावपक्षे हलादौ च रमावत् । जरा जरसौ जरे जरसः जराः, हेजरे जरसौ जरे जरसः जराः, जरसा जरया जराभ्याम्-भिः, जरसे जरायै-राभ्याम्-भ्यः, जरसः जरायाः-राभ्याम्-भ्यः, जरसः जरायाः जरसोः जरयोः जरसां-जराणाम्, जरसि जरायाम् जरसोः-रयोः जरासु ।

वि. औङि शीभावादामि नुटः परत्वाज्जरस् । केचित्तु पूर्वविप्रतिषेधेन शीभावे सन्निपातपरिभाषाया अनित्यत्वेन जरसादेशे औङि जरसी इति रूपमाहुः तत्तु पूर्वविप्रतिषेधस्य भाष्यापरिगणितेष्वप्रवृत्तेः सन्निपातपरिभाषायाः सर्वत्रानित्यत्वे प्रमाणाभावाच्च निर्मूलम् । जरसादेशेपि स्थानिवद्भावेनाऽऽबन्तत्वमादाय औङआपः आङिचापः याडापः ह्रस्वनद्यापः ङेरामित्येषां प्रवृत्तिस्तु न, अनल्विधाविति स्थानिवत्त्वनिषेधात् एत्वादिविधीनामनल्विधित्वेपि आङिचाप इत्यादिषु आबितिप्रश्लेषेण आकाररूपस्यैवापः सर्वत्र ग्रहणाच्च ।

नासिका शब्दः (नासा)-सुटि रमावदेव नासिका-के-काः हेनासिके-के-काः, नासिकाम्-के । शसादिषु पक्षे पद्दन्नइति नसादेशे नसः नसा नोभ्याम् नोभिः हलादौ स्वादिष्विति पदसंज्ञायां ससजुषोरिति रुत्वे हशिचेत्युत्वे गुणैकादेशः । नसे नोभ्याम्-भ्यः, नसः नोभ्याम्-भ्यः, नसः नसोः नसाम्, नसि नसोः नःसु नस्सु वाशरीतिविकल्पः, नसादेशाभावपक्षे नासिकाः, नासिकया-काभ्याम्-भिः, नासिकायै-काभ्याम्-भ्यः, नासिकायाः-काभ्याम्भ्यः, नासिकायाः-कयोः-कानाम्, नासिकायाम्-कयोः-कासु इति रमावदेव । निशा शब्दः (रात्रिः)-सुटि रमावदेव निशा-शे-शाः हेनिशे-शे-शाः, निशाम्-शे । शसादिषु पद्दन्नइतिपक्षेनिश्इत्यादेशे निशःनिशा, हलादौ पदसंज्ञायाम् व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (८-२-३६) व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशःस्याज्झलि पदान्ते च । इति शस्य छत्वे झलांजशोन्ते इति जश्त्वेन डकारे निड्भ्याम् निड्भिः, निशे निड्भ्याम्-भ्यः, निशःनिड्भ्याम्-भ्यः, निशः निशोः निशाम्, निशि निशोः, सुपि शस्य छत्वे जश्त्वेन डत्वे डःसिधुडितिपक्षे धुडागमे चर्त्वेन धस्य तकारे डस्यटकारे निट्त्सु, धुडभावे डस्यैव चर्त्वे निट्सु । निशादेशाभावपक्षे निशाः निशया निशाभ्याम्-भिः इत्यादि रमावत् ।

वि. १. निट्त्सु निट्सु इत्यत्र चर्त्वस्यासिद्धत्वात् चयोद्वितीया इति टतयोः ठथौतु न, नपदान्ताट्टोरनामिति तकारस्यष्टुत्वनिषेधः । षकारस्य जश्त्वात्प्राक् षढोःकःसीति कत्वमपि न जश्त्वं प्रति षढोरित्यस्यासिद्धतयाऽप्रवृत्तेः ।

वि. २. केचित्तु व्रश्चादिसूत्रे धातोरित्यनुवर्तयन्ति, तन्मतेऽस्यात्राप्रवृत्तेः निशः शकारस्य जश्त्वेन जत्वे निज्भ्याम् निज्भिः निज्भ्यः इति, जश्त्वस्यासिद्धतया चोःकुरिति कुत्वंन, सुपिशस्य जश्त्वेन जत्वे सस्य श्चुत्वेन शत्वे, जस्य चर्त्वेन चत्वे, शस्य शश्छोटीति छत्वविकल्पे निच्छु निच्शु इति रूपविशेषः ।

पृतना शब्दः (सेना)-अस्य मांसपृतनासानूनांमांस्पृत्स्नवोवाच्याःशसादौवा (वा) इति शसादौ पृत् इत्यादेशे पृतः पृता पृद्भ्याम्-भिः इत्यादि, तदभावे शसादौ सुटि च रमावत् पृतना-ने-नाः इत्यादि । गां पातीत्यर्थे स्त्रीलिङ्गो गोपा शब्दः पुंलिङ्गविश्वपाशब्दवदेव न विशेषः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—क्षमया पृथिवीसमः। रमायाः पति विष्णुः। जरया जीर्णः। विद्या विनयेन शोभते। पुष्पैराच्छन्नालता। तृष्णां छिन्धि भज क्षमाम्। नासिकामा च्छादयति स्म। जगदम्ब मां पाहि। त्रायस्व जगदम्बिके। निशि दधि न भक्षयेत्। जरसा पीडितोऽस्म्यहम्। यमुना गङ्गामुपतिष्ठते। नसोर्नस्यं ददात्यसौ।

इकारान्ताः—

मति शब्दः (बुद्धिः)-सुटि हरिवत् मतिः मती मतयः हेमते-ती-तयः, मतिं मती, शसिपूर्वसवर्णदीर्घे स्त्रीत्वान्नत्वाभावे मतीः। स्त्रीत्वान्नादेशाभावे यणि मत्या मतिभ्याम्-भिः। ङयि ङितिह्रस्वश्च (१-४-६) इयङुवङ्स्थानौनित्यस्त्रीलिङ्गौ ईदूतौह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति। पक्षे नदीसंज्ञायामाण्नद्या इत्याडागमे मति आ ए इत्यत्र आटश्चेति वृद्धौ यणि मत्यै। नदीत्वाभावे घिसंज्ञायां घेर्ङितीतिगुणे यादेशे मतये मतिभ्याम्-भ्यः। ङसिङसोर्नदीत्वपक्षे आडागमे वृद्धौयणि रुत्वविसर्गयोः मत्याः, नदीत्वाभावे घित्वे गुणे ङसिङसोश्चेति पूर्वरूपे रुत्वविसर्गौमतेः मतिभ्याम्-भ्यः। मत्याः मते, यणि मत्योः, आमि नुटि दीर्घे मतीनाम्। ङौनदीत्वेङेराम्नीति प्राप्तमामं बाधित्वा औदित्यौत्वे प्राप्ते इदुद्भ्याम् (७-३-११७) नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेरास्स्यात्। इत्यामादेशे आडागमे वृद्धौ यणि मत्याम्, नदीत्वाभावे घित्वे अच्चघेरित्यौत्वात्वयोर्वृद्धौ मतौ मत्योः मतिषु। एवं बुद्धि-गति-स्थिति-श्रुति-स्मृति-सिद्धि-शुद्धि प्रभृतयः।

प्रयोगाः—सिद्ध्ये सर्वकर्मणाम्। श्रुतौ स्मृतौ चादरं कुरुत। बुद्ध्याः पारमुपेयुषः। तप्तं तपः सुगत्यै। स्थितिरेवंविधा स्मृतेः। शुद्धिं कुरुत पात्राणाम्। मतिस्तव सुनिर्मला। दृष्टिर्धीरा मतिः सूक्ष्मा।

ईकारान्ताः—

गौरी शब्दः (पार्वती) गौरादित्वान्ङीषि यस्येतिचेत्यकारलोपे निष्पन्नः। हल्ङ्याबितिसुलोपे गौरी। दीर्घाज्जसिचेति पूर्वसवर्णदीर्घनिषेधे यणि गौर्यौ गौर्यः अचोरहाभ्यांद्वे इति यस्य द्वित्वपक्षे यद्वयमपि। सम्बुद्धौ यूस्त्र्याख्यौनदीति नदीसंज्ञायामम्बार्थनद्योरिति ह्रस्वे एङ्ह्रस्वादिति सम्बुद्धिलोपे हेगौरि-र्यौ-र्यः, अमिपूर्वः गौरीम् गौर्यौ गौरीः पूर्वसवर्णदीर्घे स्त्रीत्वान् नत्वाभावः। अजादौ यणि गौर्या-रीभ्याम्-भिः ङित्सु नदीसंज्ञायामाडागमे वृद्धौ यणि गौर्यै-रीभ्याम्-भ्यः, गौर्याः-रीभ्याम्-भ्यः, गौर्याः यणिगौर्योः गौरीणाम् नुटि णत्वम्। ङौ नदीत्वे ङेराम्नद्यामित्यामि नुटं बाधित्वा, ऽऽमागमे वृद्धौ पुनर्नुटोविप्रतिषेधेयद्बाधितंमिति न्यायेनाप्रवृत्तौ यणि गौर्याम् गौर्योः गौरीषु। एवं नदी-वाणी-कुमारी-देवी-भगिनी-सखी-प्रभृतयोङ्यन्ताः। सखीशब्दे प्रातिपदिकग्रहणे लिङ्गविशि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. स्त्री.

ष्टस्यापि ग्रहणादनङि णिद्धद्भावे च प्राप्ते विभक्तौ (विभक्तिनिमित्तककार्ये) लिङ्गविशिष्टाग्रहणमिति परिभाषयाऽग्रहणेन तदभावः सखी सख्यौ सख्यः इत्यादि गौरीवदेव ।

लक्ष्मी शब्दः (रमा) लक्षेर्मुट्चेति लक्षधातोरीप्रत्यये मुटि निष्पन्नः । अङ्यन्तत्वान्न सुलोपः लक्ष्मीः अयमेवविशेषः शेषं गौरीवत् लक्ष्म्यौ-लक्ष्म्यः हे लक्ष्मि इत्यादि । एवं तरी तन्त्री-प्रभृतयः ।

वि. केचित्तुलक्ष्म्यादावपि कृदिकारादक्तिनइतिवैकल्पिकं ङीषमाहुः ङीषितु सुलोपोभवत्येव । अतोलक्ष्मीर्लक्ष्मीहरि-प्रियाइतिद्विरूपकोशः ।

स्त्री शब्दः (नारी)–स्त्यायतेस्यां गर्भइत्यर्थे स्त्यायतेड्ँटि टिलोपयलोपयोष्टित्वान्ङीपि निष्पन्नः । ङ्यन्तत्वात्सुलोपः स्त्री । औङादौ अधात्विकारत्वा दचिश्नुधात्वित्यप्राप्ते यणादिकं बाधित्वा स्त्रियाः (६-४-७९) स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे । इति इयङि स्त्रीयौ स्त्रियः । सम्बुद्धौ नदीत्वे अम्बार्थेतिह्रस्वे सम्बुद्धिलोपे हेस्त्रि-यौ-यः । अमि शसि च नित्यमियङि प्राप्ते वाऽम्शसोः (६-४-८०) अमि शसि च स्त्रिया इयङ् वा स्यात् । इति इयङि स्त्रियम् । इयङो ऽभावे अमिपूर्वः स्त्रीम् । स्त्रियौ स्त्रियः इयङोऽभावे पूर्वसवर्णदीर्घे स्त्रीः । अजादौ सर्वत्रेयङ् स्त्रिया स्त्रीभ्याम्–भिः । ङयि ङसिङसोश्च नदीसंज्ञायामाडागमे वृद्धौ इयङि स्त्रियै स्त्रीभ्याम्-भ्यः, स्त्रियाःस्त्रीभ्याम्-भ्यः स्त्रियाः स्त्रियोः । आमिनदीत्वे इयङं बाधित्वा परत्वान्नुटि णत्वे स्त्रीणाम् । ङौ नदीत्वे ङेरा-मित्यामि आटि वृद्धौ इयङि स्त्रियाम् स्त्रियोः स्त्रीषु ।

श्रीशब्दः (लक्ष्मीःशोभाच)-श्रयतीत्यर्थे क्विब्वचीत्यादिना क्विपि प्रकृते दीर्घे निष्पन्नः । अङ्य-न्तत्वान्न सुलोपः । औङादौ दीर्घाज्जसिचेति पूर्वसवर्णदीर्घनिषेधे एकाच्त्वात्संयोगपूर्वकत्वाच्च परनेकाच इत्यप्राप्त्या इकोयणचीति बाधित्वा धात्ववयवेवर्णान्तत्वादचिश्नुधात्विति इयङि श्रियौ श्रियः । सम्बुद्धौ यूस्त्र्याख्याविति नदीत्वे प्राप्ते नेयुवङ् स्थानावस्त्री (१-४-४) इयङुवङोः स्थितिर्ये-योस्तावीदूतौ नदीसंज्ञौ नस्तो नतु स्त्री । इति निषेधेन अम्बार्थनद्योरित्यप्रवृत्तौ रुत्वविसर्गयोः हे श्रीः श्रियौ-यः । अमि पूर्वरूपं बाधित्वेयङि श्रियम् श्रियौ, शसि पूर्वसवर्णदीर्घं बाधित्वा इयङि श्रियः । यणंबाधित्वा इयङि श्रिया श्रीभ्याम्-भ्यः । ङित्सु ङितिह्रस्वश्चेति नदीत्वपक्षे आडागमे वृद्धावियङि, नदीत्वाभावे इयङि श्रियै श्रिये श्रीभ्याम्-भ्यः, श्रियाः श्रियः श्रीभ्याम्-भ्यः, श्रियाः श्रियः इयङि श्रियोः । आमि नित्यं नदीत्वप्राप्तौ वामि (१-४-५) इयङ वङ् स्थानौ स्त्र्याख्यौ यू (ईऊ) आमि वा नदीसंज्ञौस्तो नतुस्त्री । इति नदीत्वपक्षे नुटि णत्वे श्रीणाम् , नदीत्वाभावे इयङि श्रियाम् । ङौ नदीत्वपक्षे ङे रामित्यामि आटि वृद्धौ इयङि श्रियाम् , अनदीत्वे इयङि श्रियि श्रियोः श्रीषु । एवं धी-भी-ह्री-प्रभृतयः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. प्रध्यायतीत्यर्थे क्विपि, प्रकृष्टा धीर्यस्या इति समासे वा निष्पन्नस्य प्रधीशब्दस्य पदान्तरसमभिव्याहारं विना स्त्र्यर्थबोधकत्वं नित्यस्त्रीत्वमिति वादिनां वृत्तिकारादीनांमतेनित्यस्त्रीत्वेन एरनेकाचइति यणा इयङो वाधना न्नेयङुवङ् स्थानेति निषेधाप्रवृत्त्या यूस्त्र्याख्याविति नदीसंज्ञया तद्विशेषकार्येषु लक्ष्मीशब्दवद्रूपाणि; लिङ्गान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति वादिनः कैयटस्य मते तु पुंस्यपि वर्तमानस्यास्य नित्यस्त्रीत्वाभावेन नदीत्वतत्कार्ययोरभावेन पुंवदेव रूपाणि। प्रकृष्टा धीरिति विग्रहे तु मतद्वयेपि नित्यस्त्रीत्वान्नदीकार्येषु लक्ष्मीवद्रूपाणि। परं क्विपि द्विधा समासेपि अमि शसि च पूर्वरूपपूर्वसवर्णदीर्घौ बाधित्वा एरनेकाच इति यणि प्रध्यम् प्रध्य इति लक्ष्मीशब्दतो विशेषः।

वि. २ सुष्ठु ध्यायतीत्यर्थे क्विपि सुष्ठु धीर्यस्या इति समासे वा निष्पन्नस्य सुधीशब्दस्य वृत्तिकारादिमते नित्यस्त्रीत्वेन नभूसुधियोरिति यणिनषेधेनेयङः प्रवृत्तेर्नेयङुवङ्स्थानावस्त्रीति नित्यनदीत्वनिषेधात् ङितिह्रस्वश्च वामीतिवैकल्पिकनदीसंज्ञया श्रीशब्दवद्रूपाणि; कैयटमते तु नित्यस्त्रीत्वेन नदीत्वाभावात्पुंवदेव रूपाणि; सुष्ठुधीरिति विग्रहे तु मतद्वयेपि नित्यस्त्रीत्वेन नेयङुवङितिनिषेधेन ङितिह्रस्वश्च वामीत्यनयोः प्रवृत्त्याश्रीशब्दवद्रूपाणि।

वि. ३ ग्रामणीशब्दस्य तु ग्रामनयनस्य स्वभावतः पुंधर्मतया स्त्रीबोधकपदान्तरसहयोगं विना स्त्रियामप्रवृत्तेर्मतद्वयेपि नित्यस्त्रीत्वाभावेन नदीत्वाभावात्स्त्रियामपि पुंवदेव रूपाणि। एवं खलप्वादीनामपि खलपवनादे रुत्सर्गतः पुंधर्मतया मतद्वयेपि नित्यस्त्रीत्वाभावेनाऽनदीत्वात्स्त्रियामपि पुंवदेव रूपाणि।

प्रयोगा :—भिया देयं ह्रिया देयम्। नद्यां स्नाति धार्मिकः। श्रियः परिरुग्णाच्चैवम्। स्त्रियः श्रियश्च लोकेस्मिन्न विशेषोस्ति कश्चन। वाणी वाणोवभूवेह। देयाल्लक्ष्म्याः पतिः श्रियम्। देव्या दत्तवरा साध्वी। हला प्रियसखि क्व प्रस्थतासि। कुमार्या भ्राता। भगिन्यै द्रविणं ददौ। एवमुक्तः स्त्रियं प्राह। स्त्रीरपश्यंमनोरमाः।

उकारान्ता :–

धेनुशब्दः (प्रसूतागौः)-ङित्सु ङितिह्रस्वश्चेति वैकल्पिकनदीसंज्ञया नदीकार्याणि पक्षे घिसंज्ञया तत्कार्याणीति मतिशब्दवत्प्रक्रिया गुणे उकारस्यौकारोवादेशः यणि वकार इति साधारणो विशेषः धेनुः-नू-नवः, हे धेनो-नू-नवः, धेनुम्-नू नूः धेन्वा-नुभ्याम्-भिः, धेन्वै धेनवे धेनुभ्याम्-भ्यः, धेन्वाः धेनोः धेनुभ्याम् भ्यः, धेन्वाः धेनोः धेनूनाम्, धेन्वाम् धेनौ धेन्वोः धेनुषु एवं तनु रज्जु प्रभृतयः।

क्रोष्टुशब्दस्य स्त्रियाम् स्त्रियां च (७-१-९६) स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते। इति तृज्वद्भावेन ऋदन्तत्वे ऋन्नेभ्योङीप् (४-१-५) इतिङीप्प्रत्यये कोष्ट्री इतीकारान्तं स्वरूपं तस्य क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्य इत्यादि रूपाणि गौरीवत्।

प्रयोगाः—यशोधनो धेनुमृषेर्मुमोच। धेन्वा तदध्यासितकातराक्ष्या। तनौ ममुस्तत्र न कैटभद्विषः। तनं त्यक्त्वा दिवं ययौ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. स्त्री.

उकारान्ताः—

वधू शब्दः (स्नुषा) धात्ववयवोवर्णाभावान्नोवङ् यणि उकारस्य वकारः। गौरीशब्दवत्प्रक्रियया रूपाणि–वधूःवध्वौ वध्वः, हेवधु-ध्वौ-ध्वः, वधूम्-ध्वौ-धूः, वध्वा-धूभ्याम्-भिः, वध्वै-धूभ्याम्-भ्यः, वध्वाः-धूभ्याम्-भ्यः, वध्वाःवध्वोः वधूनाम् वध्वाम् वध्वोः वधूषु। एवं फलवाचकजम्बू चमू-सरयू श्वश्रूप्रभृतयः। भ्रू शब्दः (नेत्ररोम) श्रीशब्दवत्प्रक्रिया, अजादिषु अचिश्नुधात्विति उवङ्, नित्यस्त्रीत्वेपि नेयङुवङ्स्थानाविति नित्यनदीत्वनिषेधे ङित्सुआमि च ङितिह्रस्वश्चवामीत्यनयोः प्रवृत्त्या रूपद्वयम्। भ्रूः भ्रुवौ भ्रुवः, हेभ्रूः-भ्रुवौ-वः भ्रुवम्-वौ-वः, भ्रुवा-भ्रूभ्याम् भिः भ्रुवै भ्रुवे भ्रूभ्याम्-भ्यः, भ्रुवाःभ्रुवः भ्रूभ्याम्-भ्यः, भ्रुवाः वः-वोः भ्रूणाम् भ्रुवाम्, भ्रुवाम् भ्रुवि भ्रुवोः भ्रुषु। एवं शोभनेभ्रुवौयस्याः इतिसमासेनिष्पन्नःसुभ्रूशब्दभ्रूशब्दश्च।

वि. भ्रमेश्च डूरितिनिष्पन्नस्य भ्रूशब्दस्य स्त्रिप्रत्ययान्तत्वाभावेन गोस्त्रियोरितिह्रस्वस्याभावान्नेयङुवङ्स्थानाविति भ्रूशब्दस्य तदन्तस्य नदीत्वनिषेधेन अम्बार्थनद्योरित्यस्याप्रवृत्तेः सुलोपाभावात् हेसुभ्रूरितिवक्तव्ये हापितः 'क्वासि हेसुभ्रु इतिभट्टिप्रयोगः, विमानितासुभ्रु पितुर्गृहे, कुतः इति कालिदासप्रयोगः, सुभ्रु त्वंकुपितेत्यपास्तमशनमिति प्रयोगश्च प्रामादिकः, केचित्सामान्ये नपुंसकत्वमाश्रित्य कुशकाशावलम्बनेन समर्थयन्ति।

पुनर्भू शब्दः (दिधिषुः)-अजादौ दृन्करपुनःपूर्वस्य भुवोयणवक्तव्य इति यण्, तेन नेयङुवङ्स्थानाविति निषेधाभावेन नित्यस्त्रीत्वात्सम्बुद्धौ अम्बार्थनद्योरिति ह्रस्वःङित्सु आडागमः आमिनद्यन्तत्वाद्यणंबाधित्वा परत्वान्नुटि, रेफनकारयोभिन्नपदस्थत्वादट्कुप्वाङिति णत्वाप्राप्तौ एकाजुत्तरपदे णः (८-४-१२) एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्यनित्यं णत्वं स्यात्। इति णत्वम्। ङौ आमादेशः पुनर्भूः-र्भ्वौ-र्भ्वः, हेपुनर्भु-र्भ्वौ-र्भ्वः, पुनर्भ्वम्-र्भ्वौ-र्भ्वः, पुनर्भ्वा-र्भूभ्याम्-भिः, पुनर्भ्वै-र्भूभ्याम्-भ्यः, पुनर्भ्वाः-र्भूभ्याम्-भ्यः, पुनर्भ्वाः-र्भ्वोः पुनर्भूणाम् पुनर्भ्वाम्-र्भ्वोः-र्भूषु। एवंपुनर्नवावाची वर्षाभूशब्दः। वह्वादिभ्यश्चेतिवैकाल्पिकङीषि तु वर्षाभ्वीशब्दो गौरीवत्।

वि. भेकवाचकस्तु वर्षाभूशब्दः पुंसि स्त्रियां च। स्त्रियां कैयटमते नित्यस्त्रीत्वाभावेन नदीत्वाभावे अम्बार्थनद्योरित्यप्रवृत्त्या हे वर्षाभूः, वृत्तिकारमतेतु नित्यस्त्रीत्वेन नदीत्वे ह्रस्वे हे वर्षाभु। अजादौ एरनेकाच इति यणो नभूसुधियोरिति निषेधे प्राप्ते वर्षाभ्वश्चेति पुनर्यणो विधानेन सम्बुद्धिवर्जं वर्षाभूः – र्भ्वौ-र्भ्व इत्यादि पुनर्भूवत्। स्वयम्भूशब्दस्य ब्रह्मणि रूढत्वेन यौगिकस्य तस्य पदान्तरं विना स्त्रियामप्रवृत्तेवृत्तिकारमते अनेकलिङ्गत्वेन कैयटमतेपि नित्यस्त्रीत्वाभावेन स्त्रियामपि पुंवदेव रूपाणि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—वधूर्मधूकस्रजमुत्ससर्ज । वक्रे भुवावतितरां वचनं ततोपि । दिवं मरुत्वानिव भोक्ष्य भुवम् । भुवः पतिरपां पतिः । सरय्वाः सरितस्तटे । चतुष्कन्धेव सा चमूः । श्वश्रूश्चिरं रोदिति वीरश्चमूनां पतिः । स भुवं पालयामास ।

ऋकारान्ताः—

स्वसृ शब्दः (भगिनी)—सावसेर्ऋन्निति सावुपपदे असधातोः ऋन्प्रत्यये निष्पन्नः । स्त्रियां ऋन्नेभ्य इति ङीपि प्राप्ते, न षट्स्वस्रादिभ्यः (४-१-१०) षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ स्तः । इति निषेधेन ऋकारान्त एव । स्वस्रादय स्तु–स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा याता मातेति सप्तैते स्वस्रादय उदाहृताः । स्वसृशब्दस्य धातृशब्दप्रक्रियया रूपाणि । सर्वनाम स्थानेषु अप्तृन्निति दीर्घः, केवलं शसि स्त्रीत्वान्नत्वाभावो विशेषः । स्वसा स्वसारौ-रः, हे स्वस सारौ-रः स्वसारम्–रौ-स्वसॄः स्वस्रा स्वसृभ्याम्–भिः, स्वस्रे-सृभ्याम्-भ्यः, स्वसुः-सृभ्याम्-भ्यः स्वसुः स्वस्रोः स्वसॄणाम्, स्वसरि स्वस्रोः स्वसृषु । एवं पितृष्वसृ मातृष्वसृ पितुःस्वसृ मातुः स्वसृ शब्दाः । मातृशब्दः (जननी)-अस्य पितृशब्दप्रक्रियया रूपाणि । अप्तृन्नितिनियमेन सर्वनाम स्थानेषु न दीर्घः, शसि स्त्रीत्वेन नत्वाभाव एव विशेषः । माता मातरौ-रः हेमातः तरौ-रौः मातरम्-रौ मातॄः मात्रा-तृभ्याम्-भिः, मात्रे-तृभ्याम्-भ्यः, मातुः-तृभ्याम्-भ्यः मातुः मात्रोः मातॄणाम् मातरि मात्रोः मातृषु । एवं ननान्दृ दुहितृ यातृ शब्दाः ।

वि. स्वस्रादिभिन्नास्तृन्तृजन्ताः कर्तृ दातृ भोक्तृ द्रष्टृ श्रोतृ ज्ञातृ शब्दास्तु स्त्रियामृन्नेभ्य इति ङीबन्ताः कर्त्री दात्री भोक्त्री द्रष्ट्री श्रोत्री ज्ञात्री इत्यादीकारान्ता गौरीवत् ।

प्रयोगाः—पितुर्दशगुणं माता गौरवेणातिरिच्यते । नयनयोरीहालिहो यातरः । मातृस्वसुः पुत्रा मातृबान्धवाः पितुःस्वसुः पुत्राः पितृबान्धवाः । ननान्दुर्दुहितरः प्रियाः । सर्वासां यातॄणा मेकैव दुहिता प्रिया । स्वसारमाश्वास्य जगाम ।

ओ-ऐकारान्ताः—

गो शब्दः (स्त्रीगवी)—अस्य स्त्रियामपि पुंवदेव रूपाणि । एवं द्योशब्दः । रै शब्दः–अस्यस्त्रियामपि पुंवदेव रूपाणि ।

वि. कर्मधारयतत्पुरुषसमासयोर्गोशब्दाट्टच्प्रत्ययेन राजगवः (राज्ञो गौः) नीलगवः (नीला गौः) इत्यादयोऽकारान्त शब्दा रामवत्, स्त्रियां टित्वान्ङीपि राजगवी, नीलगवी शतगवी-सहस्रगवीत्यादय ईकारान्तशब्दा गौरीवत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. न.

औकारान्तः—

नौशब्दः (तरणिः)—अस्य ग्लौशब्दप्रक्रियया रूपाणि । नौः नावौ नावः, हे नौः नावौ—वः नावम्-वौ-वः, नावा नौभ्याम्-भिः, नावे नौभ्याम्-भ्यः, नावः नौभ्याम्-भ्यः, नावः-वोः-वाम्, नावि नावोः नौषु ।

प्रयोगाः—नमो गोभ्यः श्रीमतीभ्यः । गावो विश्वस्य मातरः । गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः, गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् । नावा तरन्ति यात्रिकाः । वणिजो नावि वस्तूनि स्थापयन्ति । द्यौरीशो मरुतां पतिः ।

प्रश्नाः—नदीसंज्ञा केषाम् । जराशब्दे को विशेषः । श्री-स्त्री शब्दयोः को विशेषः । नदीसंज्ञाकार्याणि कानि । ऋकारान्तशब्देषु को विशेषः । इयङुवङौ कीदृशेषु शब्देषु । लक्ष्मीगौरीशब्दयोः को विशेषः । याडागमः क्व भवति । ङेरामादेशः क्व भवति । अधस्तनवाक्येषु अजन्तस्त्रीलिङ्ग शब्दरूपाणि विवृणुत—

दुर्गा दुर्गतिहारिणी । विद्या ददाति विनयम् । भगिन्याः प्रियसखीयम् । जामाता दुहितुः पतिः । सङ्गतिः श्रेयसी सताम् । श्रिया दुरापः कथमीप्सितो भवेत् । मायया कल्पिता सृष्टिः । न लक्ष्मीर्विद्यया विना । सुशीलया स्त्रिया गृहे श्रीः । नारीणां भूषणं लज्जा । गौर्याः मातामेनका । कुमारी लभते पतिम् । नावो नद्यामुत्प्लवन्ते ।

अजन्तनपुंसकलिङ्गप्रकरणम्—

अकारान्ताः—

ज्ञानशब्दः (बोधः)—भावे ल्युडन्तः । स्वमोः अङ्गसंज्ञायाम्, स्वमोर्नपुंसकात् (७-१-२३) क्लीबादङ्गात्परयोः स्वमोर्लुक् स्यात् । इति लुकि प्राप्ते, अतोऽम् (७-१-२४) अतोऽङ्गात्क्लीबात्स्वमोः राम् स्यात् । इत्यमादेशे अमिपूर्व इति पूर्वरूपे ज्ञानम् । औटोः, नपुंसकाच्च (७-१-१९) क्लीबात्पर-स्यौङः शी स्यात् । इति श्यादेशे ज्ञान ई इति स्थिते भसंज्ञायाम्, यस्येति च (६-४-१४८) भस्ये-वर्णावर्णयोर्लोपः स्यात् ईकारे तद्धिते च परे । इत्यकारलोपे प्राप्ते, औङः श्यां प्रतिषेधो वाच्यः (वा) इति निषेधे नादिचीति पूर्णसवर्णदीर्घनिषेधे गुणैकादेशे ज्ञाने । जश्शसोः—जश्शसोः शिः (७-१-२०) क्लीबादनयोः शिः स्यात् । इति श्यादेशे ज्ञान इ इति स्थिते, शि सर्वनामस्थानम् (१-१-४२) शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात् । इति तत्संज्ञायाम्, नपुंसकस्य झलचः (७-१-७२) झलन्तस्या-जन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे । इति मित्वादन्त्यादचः परं नुमि ज्ञानम् इ इति जाते अकारस्योपधासंज्ञया सर्वनामस्थानेचासम्बुद्धाविति दीर्घे ज्ञानानि । प्रथमाद्वितीययोर-विशेषः । सम्बुद्धौ सोरमि पूर्वरूपे एङ्ह्रस्वादिति मकारमात्रलोपे हेज्ञान हेज्ञाने ज्ञानानि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयादिष्वविशेषेण रामशब्दवत्। एवं धन-वन-फल-गृह-क्षेत्र-रत्न-प्रभृतयः। णत्वनिमित्तस णत्वम् छिद्रं छिद्रे छिद्राणि।

वि. सम्बुद्धावमि पूर्वरूपे पूर्वरूपाकारस्य अन्तादिवच्चेतिपूर्वान्तत्वेनादन्ताङ्गत्वे उभयत आश्रयणे नान्तादिवत् अमोप्यादित्वाभावेन मकारमात्रस्य सम्बुद्धित्वाभावाल्लक्ष्यानुरोधेन एङ्ह्रस्वादित्यत्र सम्बुद्ध्याक्षिप्तस्याङ्गस्य सम्बुद्धा न्वीय तदवयवे हल्येवान्वयादेङन्तादह्रस्वान्ताच्चाङ्गात्परो यः सम्बुद्ध्यवयवो हल् तस्य लोप इत्यर्थेन मकारमात्रस तथात्वेन लोपो निर्बाधः ॥

अजरशब्दः (दैवतं)-अविद्यमाना जरा यस्य कुलस्येति बहुव्रीहौ गोस्त्रियोरिति ह्रस्वे निष्पन्न स्वमोरमादेशे पूर्वरूपे अदन्तत्वनिमित्तकस्यामस्तद्विघातके जरसादेशे सन्निपातपरिभाषया नि त्तत्वाभावेन जरसादेशाभावे अजरम्। औङि शीभावे विकल्पेन जरसादेशे अजरसी अज जश्शसोः शिभावे परत्वेन जरसादेशे झलन्तत्वान्नपुंसकस्येति नुमि अजरन्स् इ इति ज सान्तमहतः संयोगस्य (६.४-१०) सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्य सम्बुद्धौ सर्वनामस्थाने परे। इत्युपधायाः पूर्वमात्रोपलक्षणतयाऽकारस्य दीर्घे नकारस्यानुस् अजरांसि। जरसादेशाभावे अजन्तत्वान्नपुंसकस्येति नुमि सर्वनामस्थानेचेति दीर्घे अजरा सम्बुद्धौ सोरमि पूर्वरूपे सन्निपातपरिभाषया जरसादेशाभावे एङ्ह्रस्वादिति मकार हे अजर अजरसी-जरे अजरांसि-राणि। तृतीयादिषु पुंलिङ्गनिर्जरशब्दवत्। हृदय-उ आस्यशब्दाः (मनः जलं मुखम्—एषां सुटि ज्ञानवत्)। हृदयं-ये-यानि, उदकं-के-कानि, आ स्ये-स्यानि हेहृदय उदक आस्य। शसादिषु पद्दन्नोमास्सिति हृदयस्य हृद्, उदकस्य उद आस्यस्य आसन्नित्यादेशविकल्पेन तदभावे ज्ञानवदेव। शसि शीभावे हृदयस्य हृदा नपुंसकस्येति नुमि नस्यानुस्वारपरसवर्णयोः हृन्दि। टादिषु हृदा हृद्भ्याम्-भिः, हृद्भ्याम् भ्यः, हृदः-द्भ्याम्-भ्यः, हृदः-दोः-दाम् हृदि हृदोःहृत्सु। शसि शौ उदकस्य उदन्ना सर्वनामस्थानेचेति दीर्घे उदानि, टादिष्वजादिषु उदन्नादेशे अल्लोपोन इत्यकारलोपे उ हलादिषु स्वादिष्वसर्वनामस्थाने इति पदत्वेन नलोपःप्रातिपदिकान्तस्येति नलोपे उदभ्याम्- उद्ने-दभ्याम्-भ्यः, उद्नः दभ्याम्-भ्यः, उद्नः-द्नोः-द्नाम्, ङौ विभाषाङिश्योरित्यल्लोपविकल्पे उ उदनि उद्नोः उदसु। शसि शौ आस्यस्य आसन्नादेशे सर्वनामस्थानेचेति दीर्घे आसानि। ट ष्वजादिषु अल्लोपोन इत्यकारलोपे हलादिषु पदत्वेन नलोपे आस्ना आसभ्याम्—भिः, आ सभ्याम्-भ्यः, आस्नः-सभ्याम-भ्यः, आस्नः-स्नोः-स्नाम्, ङौ अल्लोपविकल्पे आस्नि आ आस्नोः आससु।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अ. न्.

वि. १. मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा (वा) इति क्लीबलिङ्ग मांसशब्दस्य शसादौ मांस् इत्यादेशे मांसि मांसा मान्भ्यामित्यादि रूपाणि पक्षे भवन्ति, सुटि शसादौ पक्षान्तरे च मांसम्-से-सानि मांसेन मांसाभ्यामित्यादि ज्ञानवत्। पद्दन्नइतिसूत्रे प्रभृतिग्रहणं प्रकारार्थमिति लोकेपि क्वचिदिति कैयटोक्त्या सुत्यपि पदाद्यादेशे पत् पदौ पदः, हृत् हृदी हृन्दि इत्यादिप्रयोगोऽप्युपपद्यते।

श्रियं पातीत्यर्थे आकारान्तश्रीपा-शब्दस्य क्लीबे, ह्रस्वो नपुंसके प्रातिपदिकस्य (१-२-४७) क्लीबे अजन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। इति ह्रस्वे अकारान्तः श्रीप-शब्दो ज्ञानवत्। श्रीपायेत्यादौ सन्निपातपरिभाषया आतोधातोरित्याकारलोपो न।

प्रयोगाः—नहि ज्ञानेन सदृशम्। फलानि पुष्पाणि वनेषु सन्ति। हृदि प्रेम न वर्तते। पुराणि दुर्गाणि निशातमायुधम्। हृदयं तस्य निर्मलम्। अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे।

इकारान्तः—

वारिशब्दः (जलं)—स्वमोर्नपुंसकादिति स्वमोर्लुकि वारि। औङि श्याम्, इकोचि विभक्तौ (७-१-७३) इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ। इति पूर्वसवर्णं बाधित्वा नुमागमे अट्कुप्वाङ्निति णत्वे वारिणी। जश्शसोः शौ नुमि सर्वनामस्थाने चेति दीर्घे णत्वे वारीणि। सम्बुद्धौ सोर्लुकि नलुमतेति निषेधस्यानित्यत्वात्प्रत्ययलक्षणेन ह्रस्वस्यगुण इति सम्बुद्धिनिमित्तके गुणे हेवारे, प्रत्ययलक्षणाभावपक्षे गुणाभावे हेवारि, हेवारिणी वारीणि, टायां नुमागमे प्राप्ते घिसंज्ञया परत्वादाङोनाऽस्त्रियामिति नाभावे णत्वे वारिणा वारिभ्याम्-भिः। ङित्सु परत्वान्नुमं बाधित्वा घेर्ङितीति गुणे प्राप्ते,वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन (वा) इति पूर्वं नुमि णत्वे वारिणे वारिभ्याम्-भ्यः वारिणः वारिभ्याम्-भ्यः। वारिणः, ओसि यणं बाधित्वा नुमि णत्वे वारिणोः, आमि परत्वान्नुटं बाधित्वा नुमि प्राप्ते नुमचिरतृज्वद्भावेति पूर्वविप्रतिषेधेन नुटि नामीति दीर्घे णत्वे वारीणाम्। ङौ अच्चघेरिति परमप्यौत्वं बाधित्वा पूर्वविप्रतिषेधेन नुमि णत्वे वारिणि वारिणोः वारिषु।

वि. भ्यामादिहलादिषु नुमि सत्यपि नलोपःप्रातिपदिकान्तस्येति नलोपेन, सम्बुद्धौ सम्बुद्धेर्लुका लुप्तत्वान्नलुमतेति प्रत्ययलक्षणनिषेधे नुमः प्राप्त्यभावादिकोचिविभक्तावित्यत्र अज्ग्रहणवैयर्थ्यापत्त्या नलुमतेतिनिषेधस्यानित्यत्वं ज्ञाप्यते, तेन सम्बुद्धौ प्रत्ययलक्षणेन नुमो वारणाय अचीति सार्थकं भवति। आमि नुम्नुटोः सामान्यतोऽविशेषेपि नुमो मित्वेनाङ्गान्ततया नामरत्वाभावेन नामीति दीर्घाप्राप्तिः, नुटस्तु टित्वेनाऽऽमादित्वान्नामीतिदीर्घ उपपद्यते इति नुमं व्यावर्त्य नुट्।

दधिशब्दः—स्वमोर्लुकि दधि। औङः श्यामिकोचीति नुमि दधिनी। जश्शसोः शौ नुमि दीर्घे दधीनि। सम्बुद्धौ सोर्लुकि प्रत्ययलक्षणपक्षे गुणे तदभावे च तदभावे हेदधे दधि दधिनी-धीनि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

टादिष्वजादिषु, अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः (७-१-७५) एषामनङ् स्याट्टादावचि। इति ङित्त्वे इकारस्यानादेशे दधन् आ इत्यत्र अल्लोपोन इत्यकारलोपे दध्ना दधिभ्याम्-भिः, दध्ने-धिभ्याम्-भ्यः, दध्नः-धिभ्याम्-भ्यः, दध्नः-ध्नोः-ध्नाम्, ङौ विभाषेत्यल्लोपविकल्पे दध्नि दधनि दध्नोः दधिषु। एवं सक्थि अस्थि-अक्षिशब्दाः। सुष्ठु धीर्यस्य कुलस्य सुष्ठु ध्यायति वेत्यर्थे सुधीशब्दस्य क्लीबलिङ्गे ह्रस्वोनपुंसक इति ह्रस्वे सुधिशब्दः सिद्धो वारिवत्। सुधि सुधिनी सुधीनि, हेसुधे-सुधि-धिनी-धीनि। टादिष्वजादिषु, तृतीयादिषु भाषितपुंस्कं, पुंवद्गालवस्य (७.१.७४) प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं पुंवद्वा स्याट्टादावचि। इति पुंवद्भावेन नुमोऽभावे नभूसुधियोरिति यणिनषेधे अचिश्नुधातिवति इयङादेशे सुधिया, पुंवत्त्वाभावपक्षे इकोचीति नुमि सुधिना सुधिभ्याम्-भिः एवमजादिषु पुंवद्भावे इयङि पुंवद्रूपाणि। ह्रस्वान्तत्वाद्ध्यामादौ ह्रस्वान्तत्वं विशेषः, पुंवत्त्वाभावे नुमि वारिशब्दवद्रूपाणि। सुधिये सुधिने-धिभ्याम्-भ्यः सुधियः सुधिनः-धिभ्याम्-भ्यः, सुधियः सुधिनः सुधियोः सुधिनोः सुधियाम् सुधिनाम् सुधियि सुधिनि सुधियोः सुधिनोः सुधिषु। एवं शुचि अनादिप्रभृतिशब्दानां पुंवत्त्वे हरिवत्, तदभावे वारिवत्।

उकारान्ताः—

मधुशब्दः (क्षौद्रम्)—स्वमोर्लुकि मधु, औङः श्यां नुमि मधुनी, जश्शसोः शौ नुमि दीर्घे मधूनि। सम्बुद्धौ सोर्लुकि प्रत्ययलक्षणेन गुणे तदभावे च हेमधो मधु मधुनी मधूनि। टायां घित्वेन नादेशे मधुना-धुभ्याम्-भिः। ङित्सु परत्वाद्घेर्ङितीति गुणे प्राप्ते पूर्वविप्रतिषेधेन नुमि मधुने-धुभ्याम्-भ्यः मधुनः-धुभ्याम्-भ्यः, मधुनः-नोः-मधूनाम् नुमचीति नुटि नामीति दीर्घः, मधुनि-नोः-धुषु। एवं वस्तु अम्बु-अश्रु-जतु-जानु-अलाबु-प्रभृतयः।

वि. मधु मद्ये पुष्परसे मधु क्षौद्रे मधुर्वसन्ते चैत्रे चेति कोशान्मधुशब्दस्य पुंनपुंसकयोः सत्त्वेपि नपुंसके मद्यत्वादेः पुंसि वसन्तत्वादेः प्रवृत्तिनिमित्तस्य भेदेन भाषितपुंस्कत्वाभावेन तृतीयादिष्विति पुंवद्भावविकल्पाभावात्क्लीवे मधुने मधुनः मधुनोरित्याद्येव। पुंस्येव मधवे मधोरित्यादि। एवं पीलुर्वृक्षः, तत्फलं पीलु इति पुंनपुंसकयोः पीलुर्वृक्षत्व—पीलुफलत्वरूपयोः प्रवृत्तिनिमित्तयोर्भेदेन नपुंसके पुंवत्त्वाभावात्पीलुने इत्याद्येव, पुंस्येव पीलवे इत्यादि। उक्तं च-पीलुर्वृक्षः फलं पीलु पीलुने नतु पीलवे। वृक्षे निमित्तं पीलुत्वं, तज्जत्वं तत्फले पुनः ॥ इति।

वि. २. क्लीबलिङ्गसानुशब्दस्य मांसपृतनासानूनामिति शसादौ स्नु-इत्यादेशे स्नूनि स्नुना स्नुभ्यामित्यादिरूपान्तराणि पक्षे भवन्ति, सुटि शसादौ पक्षान्तरे च सानु सानुनी सानूनि इत्यादि मधुवत्।

ऋकारान्ताः—

कर्तृशब्दः तृन्तृजन्तः—स्वमोर्लुकि नलुमतेति प्रत्ययलक्षणनिषेधात् ऋदुशनसित्यनङोऽभावे कर्तृ, औङि श्यामिकोचीति नुमि ऋवर्णान्तस्येति णत्वे कर्तृणी, जश्शसोः शौ नुमि दीर्घे णत्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तॄणि। कर्तृत्वरूपप्रवृत्तिनिमित्तैक्येन भाषितपुंस्कतया तृतीयादिष्विति टाद्यजादौ पुंवत्त्वविकल्पेन तत्पक्षे यणि, तदभावे नुमि णत्वे कर्त्रा कर्तृणा कर्तृभ्याम्-भिः, कर्त्रे कर्तृणे-तृभ्याम्-भ्यः, ङसिङसोः पुंवत्त्वे ऋतउदिति उत्वे रपरत्वे रात्सस्येति सलोपे विसर्गे कर्तुः, पुंवत्त्वाभावे नुमि णत्वे कर्तृणः-तृभ्याम्-भ्यः, कर्तुः कर्तृणः कर्त्रोः कर्तृणोः नुमचिरेतिनुटि दीर्घे कर्तॄणाम्, ङौ पुंवत्त्वे ऋतोङीति गुणे कर्तरि, पक्षान्तरे नुमि णत्वे कर्तृणि, कर्त्रोः कर्तृणोः कर्तृषु। एवं भाषितपुंस्काः दातृ-विधातृ-ज्ञातृ-द्रष्टृ-श्रोतृ-हर्तृ-प्रभृतयस्तृन्तृजन्ताः।

वि. ओकारान्ताः प्रद्यो इत्यादयः, ऐकारान्ताः प्ररै इत्यादयः, औकारान्ताः सुनौ इत्यादयः शब्दाः क्लीवे ह्रस्वोनपुंसक इति ह्रस्वे, एच इग्घ्रस्वादेशे (१·१·४८) आदिश्यमाने ह्रस्वे एच इगेव स्यात्। इति इग्विधानेन प्रद्यु प्ररि सुनु इत्यादय इ-उकारान्ता भवन्ति, ते च न व्यावहारिकाः।

प्रयोगाः—दध्यानय वरानने। वारिणा क्लिन्नवस्त्रः। मधु चिन्वन्ति मधुपाः। अम्बुनि मज्जन्त्यलाबूनि। सक्थिन् भग्ने कुतो गतिः। शतत्रयमस्थ्नां शरीरे भवति। दध्ना लिप्तमुखः कृष्णः। दातृ भोक्तृ कुलं सर्वम्। मित्रे दातरि निर्वृतिः। यथेच्छं विधातृणि मनांसि न किमपि नियन्तृ।

प्रश्नाः—नपुंसकलिङ्गे स्वमोः को विशेषः। सम्बुद्धौ को विशेषः। भाषितपुंस्कं नाम किम्, तत्र को विशेषः। तृन्तृजन्तानां पुंलिङ्गतो नपुंसकलिङ्गे के विशेषाः। नुम् केषां पूर्वविप्रतिषेधेन वाधकः। अल्लोपविकल्पः क्व।

अधोनिर्दिष्टवाक्यगतान्यजन्तनपुंसकलिङ्गशब्दरूपाणि विवृणुत—तीर्थे वारिणि मज्जति। पूज्यते विमलं कुलम्। गाङ्गं वारि मनोहारि। दुग्धं बलं वर्धयति। विद्याधनं सुखसाधनम्। विकसन्ति कमलानीव वदनानि। विशाले तस्य लोचने। वस्तूनि बहुशः सन्ति। वनेषु मधुगन्धिषु। अमृतं विदुषां मुखे। शतान्यक्षीणि शक्रस्य। फलैः पुष्पैश्च मधुरैः। श्यामायमानानि वनानि पश्यन्।

इत्यजन्तप्रकरणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हलन्तपुंलिङ्गप्रकरणम्

हकारान्ताः—

मधुलिह्शब्दः (भ्रमरः)—मधु लेढीत्यर्थे मधुपूर्वकलिहधातोः क्विपि निष्पन्नः। सौ हल्ङ्याबिति सुलोपे, हो ढः (८-२-३१) हस्य ढः स्याज्झलि पदान्ते च। इति पदान्तत्वाद्धस्य ढत्वे जश्त्वं बाधित्वा वैकल्पिकचर्त्वेन टत्वे, पक्षे जश्त्वेन डत्वे मधुलिट्-ड्। अजादिषु योग एव, भ्यामादौ हलि पदत्वात् हस्य ढत्वे झलांजशोन्ते इति जश्त्वम् मधुलिहौ-हः हे मधुलिट्-ड्-हौ-हः, मधुलिहम्-हौ-हः मधुलिहा-लिड्भ्याम्-भिः, मधुलिहे-लिड्भ्याम्-भ्यः, मधुलिहः-लिड्भ्याम्-भ्यः, मधुलिहः-होः-हाम्, मधुलिहि-लिहोः। सुपि ढत्वे जश्त्वेन डत्वे चर्त्वस्यासिद्धत्वेन ततः पूर्वं डःसिधुडिति धुटो धस्य जश्त्वचर्त्वाभ्यां तत्वे पूर्वस्यापि चर्त्वेन टत्वे मधुलिट्त्सु, धुडभावे डस्यैव चर्त्वे मधुलिट्सु। ए भूरुह्-अम्भोरुह् प्रभृतयः।

वि. हलन्तेषु हयवरडित्यादिवर्णसमाम्नायक्रमेण हकारान्तादयः शब्दा निर्दिष्टाः। सुपि चर्त्वस्यासिद्धतया चयोद्वितीय इति तस्य थत्वं टस्य ठत्वं च न। नपदान्ताट्टोरितिनिषेधेन धुट्पक्षे तस्य, तदभावे सस्य च न ष्टुत्वम्।

गोदुह्शब्दः (गोदोग्धा)—गां दोग्धीत्यर्थे दुहधातोः क्विपि सिद्धः। सौ हल्ङ्यादिलोपे हस्य ढत्वे प्राप्ते, दादेर्धातोर्घः (८-२-३२) उपदेशे (धातुपाठे) दादेर्धातोर्हस्य घः स्यात् झलि पदान्ते च। इति घत्वे, एकाचो बशो भष् झषन्तस्य स्ध्वोः (८-२-३७) धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे पदान्ते च। इति दुहमात्रस्यापि व्यपदेशिवद्भावेन धात्ववयवत्वाद्दकारस्य धकारे घस्य चर्त्वजश्त्वयोः गोधुक्-ग् गोदुहौ-हः, हे गोधुक्-ग् हौ-हः, गोदुहम्-हौ-हः, गोदुहा, हलादौ घत्वे जश्त्वे स्वादिष्विति पदत्वाद्भष्भावेन दस्य धत्वे गोधुग्भ्याम्-भिः, गोदुहे-धुग्भ्याम्-भ्यः, गोदुहः-धुग्भ्याम्-भ्यः, गोदुहः-होः-हाम्, गोदुहि-होः। सुपि हस्य घत्वे दस्य भष्भावे घस्य जश्त्वेन गत्वे, चर्त्वस्यासिद्धत्वेन पूर्वमादेशप्रत्यययोरिति सस्य षत्वे गस्य चर्त्वे गोधुक्षु। एवं महिषीदुहादयः।

वि. दामलिह्शब्दादिच्छार्थे क्यचि दामलिहशब्दस्य नामधातोर्दकारादित्वेऽप्युपदेशे तथात्वाभावेन हस्य घत्वाभावार्थमुपदेशे दादेर्धातोरित्युक्तम्। गर्दभमाचष्टे इत्यर्थे गर्दभशब्दाण्णयन्तात्क्विपि णिलोपे निष्पन्ने गर्दभ्शब्दे गर्दभ् धातोरेकाच्त्वाभावेन भष्भावाप्राप्त्या एकाचोबशोभषित्यत्र धातोरवयवो य एकाज्झषन्त इति वैयधिकरण्येनान्वयः कृतः, तेन तत्र गर्दभ्धात्ववयवस्य दभ् इत्यस्य तथात्वे भषि गर्धप् इति रूपसिद्धिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रुह् शब्दः (द्रोहकर्ता)-द्रोग्धीत्यर्थे द्रुहेः क्विपि निष्पन्नः। सौ हल्ङ्यादिलोपे द्रुहेर्दादित्वाद्धोढ इति ढत्वं बाधित्वा दादेरिति नित्यं घत्वे प्राप्ते, वा द्रुहमुहष्णुहष्णिहाम् (८-२-३३) एषां हस्य वा घः स्याज्झलि पदान्ते च। इति पक्षे घत्वे भष्भावेन दस्य धत्वे चर्त्वविकल्पे जश्त्वे च ध्रुक्-ग्, घत्वाभावे ढत्वे दस्य धत्वे चर्त्वविकल्पे जश्त्वे ध्रुट्-ड्। द्रुहौ-हः। हे ध्रुक्-ग् ध्रुट्-ड् द्रुहौ-हः; द्रुहं-हौ-हः द्रुहा, हलादौ पदत्वेन घत्वपक्षे भष्भावे जश्त्वे, घत्वाभावे ढत्वे भष्भावे जश्त्वे ध्रुग्भ्याम्-भिः ध्रुड्भ्याम्-भिः, द्रुहे ध्रुग्भ्याम्-भ्यः ध्रुड्भ्याम्-भ्यः, द्रुहः ध्रुग् ध्रुड्भ्याम्-भ्यः, द्रुहः-होः-हाम्, द्रुहि द्रुहोः। सुपि घत्वपक्षे भष्भावे षत्वे चर्त्वे ध्रुक्षु, घत्वाभावे ढत्वे भष्भावे ढस्य जश्त्वेन डत्वे डसि-धुडिति धुट्पक्षे चर्त्वद्वये, धुडभावे चर्त्वे ध्रुट्त्सु ध्रुट्सु। एवं सोपपदा सुरद्रुह् मित्रद्रुह धर्म-द्रुहादयः; मुहस्नुहस्निहान्ता सर्व मुह्-लोकस्निहादयश्च। मुहस्नुहस्निहेषु निमित्ताभावेन भष्भा-वाभावो विशेषः।

अनडुह्शब्दः (वृषः)—अनो वहतीत्यर्थे अनःपूर्वाद्वहेः क्विपि वस्य सम्प्रसारणे पूर्वरूपे निष्पन्नः। सौ-चतुरनडुहोराम्रुदात्तः (७-१-९८) अनयोराम्स्यात्सर्वनामस्थाने स चोदात्तः। इति मित्त्वा-दन्त्याचः परमाकारे यणि अनड्वाह् स् इति जाते, सावनडुहः (७-१-८२) अस्य नुम्स्यात्सौ परे। इत्याकारात्परं नुमि हल्ङ्याबिति सुलोपे हस्य संयोगान्तस्य लोपे अनड्वान्। औङादौ सर्वनाम-स्थाने चतुरनडुहोरित्यामि यणि अनड्वाहौ-हः। सम्बुद्धावामि प्राप्ते, अम्सम्बुद्धौ (७-१-९९) चतुरनडुहोरम्स्यात्सम्बुद्धौ। इत्यमागमे यणि नुमि हल्ङ्यादिलोपे संयोगान्तलोपे हे अनड्वन् अनड्वाहौ-हः। शसाद्यजादिषु योगे अनडुहः अनडुहा। हलादौ पदत्वे, वसुस्रंसुध्वंस्वनडुहां दः (८-२-७२) सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते। इति हस्य दत्वे अनडुद्भ्याम्-भिः। अनडुहे-डुद्भ्याम्-भ्यः, अनडुहः-डुद्भ्याम्-भ्यः; अनडुहः-होः-हाम् अनडुहि-होः अनडुत्सु पदत्वेन हस्य दत्वे चर्त्वम्। स्त्रियामनडुही-अनड्वाही शब्दौ गौरीवत्।

वि. सावनडुह इत्यत्र आदित्यधिकारादवर्णात्परोयं नुम् अत उपजीव्यत्वाद्विशेषविहितेनापि नुमा सौ आम्न बाध्यते, सम्बुद्धौ अमा च नुम्न बाध्यते। नुम्विधिसामर्थ्याद्वसुस्रंस्विति दत्वं न, संयोगान्तलोपस्यासिद्धत्वान्नलोपोपि न।

तुरासाह्शब्दः (इन्द्रः)–तुरां (त्वरां) साहयतीत्यर्थे ण्यन्तात्सहेः क्विपि अन्येषामपीति पूर्वदीर्घे सिद्धः। सोर्लोपे हस्य ढत्वे जश्त्वेन डत्वे, सहेः साडः सः (८.३.५६) साड्रूपस्य सहेः सस्य मूर्धन्या-देशः स्यात्। इति षत्वे चर्त्वपक्षेपि साड इति पदान्तोपलक्षणत्वेन षत्वे तुराषाट्-ड् तुरासाहौ-हः हेतुराषाट्-ड्-हौ-हः, तुरासाहम्-हौ-हः-हा, साडइति पदान्तोपलक्षणत्वेन भ्यामादौ ढत्वषत्वजश्त्वेषु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुराषाड्भ्याम्-भिः, तुरासाहे-षाड्भ्याम्-भ्यः, तुरासाहः-षाड्भ्याम्-भ्यः, तुरासाहः-होः-हाम्-हि तुराषाट्त्सु तुराषाट्सु पक्षे धुटि चर्त्वम् ।

वि. विश्वं वहतीत्यर्थे ण्विप्रत्यये वृद्धौ णिजन्ताद्विचि वा सिद्धस्य विश्ववाह्शब्दस्यापि ढत्वचर्त्वादौ विश्ववाट् विश्ववाहौ-हः-हम्-हौ । शसाद्यजादौ भसंज्ञायाम्, वाह ऊठ् (६-४-१३२) भस्य वाहः सम्प्रसारणमूठ् स्यात् । वस्योकारे, सम्प्रसारणाच्च (६-१-१०८) सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात् । इति पूर्वरूपे विश्व ऊह अस् इत एत्येधत्यूठ्सु इति वृद्धौ विश्वौहः विश्वौहा विश्ववाड्भ्याम्-भिः इत्यादि । एवं प्रष्ठवाट् प्रष्ठौहः प्रष्ठवाड्भ्याम् ।

प्रयोगाः—निजौजसोज्जासयितुं जगद्द्रुहाम् । मधुलिहां झङ्कार आनन्दयति । आहिताग्निर् इ्वांश्च । अनडुद्भ्यो यवसमाहर । गोदुहां प्रमुखः कृष्णः । अम्भोरुहां केसराः । धर्मद्रुहः पतन्ति भूरुहां छायया छन्नः ।

नकारान्ताः—

राजन्शब्दः (नृपः)—राजत इत्यर्थे राजेः कनिनि सिद्धः । सौ लोपापेक्षया परत्वात्सर्वनामस्था चेत्युपधादीर्घे हल्ङ्यादिलोपे नलोपःप्रातिपदिकेति नलोपे राजा । औङादौ सर्वनामस्थाने उपध दीर्घे राजानौ-नः । सम्बुद्धौ दीर्घाभावे हल्ङ्यादिलोपे नलोपप्राप्तौ, न ङिसम्बुद्ध्योः (८-२-८ नस्य लोपो न स्यान्ङौ सम्बुद्धौ च । इति निषेधे हेराजन् राजानौ-नः,राजानम्-नौ । शसादिष्वजादि भसंज्ञायामल्लोपोन इत्यकारलोपे जस्य श्चुत्वेन ञत्वे जञोर्ज्ञः राज्ञः राज्ञा, भ्याभादौ हलि पदत्वे नलोपे सति भ्यामि सुपिचेति दीर्घे, भिसि ऐसादेशे, भ्यसि सुपिचेति एत्वे प्राप्ते, नलोपः सुप्स्वरसंज्ञा तुग्विधिषु कृति (८-२-२) सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र इत्यसिद्धतयाऽदन्तत्वाभावाद्दीर्घाद्यभावे राजभ्याम्-भिः, राज्ञे राजभ्याम्-भ्यः, राज्ञः राजभ्याम्-भ्यः राज्ञः-ज्ञोः-ज्ञाम् । ङौ विभाषाङिश्योरित्यल्लोपविकल्पे राज्ञि राजनि राज्ञोः राजसु । एवं मूर्धन् उक्षन्-महिमन्-गरिमन्-पामन् इत्यादयः । राजन्शब्दस्य स्त्रियां राज्ञी ।

वि. राजेत्यत्र लोपं बाधित्वा परत्वाद्दीर्घे पुनर्हल्ङ्यादिलोपे कर्तव्ये विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्याय पुनः प्रसङ्गविज्ञानात्सिद्धमित्यसार्वत्रिकत्वान्न प्रवर्तते । ङौ नलोपनिषेधस्तु छन्दसि ङेर्लुकि प्रत्ययलक्षणेन पर व्योमन्नित्यादौ उपयुज्यते । उत्तरपदेन सह समासे ङिलोपे तु ङावुत्तरपदे प्रतिषेधो वक्तव्य इति नङिसम्बुद्ध्योरि निषेधस्य निषेधे ब्रह्मणि निष्ठा यस्य सः ब्रह्मनिष्ठः राजनि भक्तिः राजभक्तिरित्यादौ नलोपः । राज्ञ इत्यादावल्लोप स्थानिवद्भावे चवर्गायोगात् श्चुत्वाप्राप्तिस्तु न शङ्क्या, श्चुत्वे कर्तव्ये पूर्वत्रासिद्धमिति स्थानिवद्भावाभावात् । बहिर्भू भसंज्ञायाः स्वादिप्रत्ययाद्यपेक्षितया बहिरङ्गस्याल्लोपस्य श्चुयोगमात्रापेक्षितयान्तरङ्गे श्चुत्वे कर्तव्ये असिद्धं बहिरङ्गमन्तर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यसिद्धत्वेन अकारेण व्यवधानात्कथं श्चुत्वमित्यपि न शङ्क्यम्, असिद्धं वहिरङ्गमिति परिभाषायाः षष्ठाध्यायोक्ताया यथोद्देशं संज्ञापरिभाषमिति तत्रैवोत्पत्तिदेशे वर्तमानतया तां प्रति त्रैपादिकस्य श्चुत्वस्यैवाऽसिद्धतया अदर्शनेन तद्विषये परिभाषायास्तस्या अप्रवृत्तेः, कार्यकालपक्षस्तु लक्ष्यानुरोधान्नेहाश्रीयते इति श्चुत्वोपपत्तेः। सुब्विध्यादिवर्जमन्यत्र नलोपस्यासिद्धत्वाभावेन राजाश्व इत्यादौ सवर्णदीर्घः, दण्डिषु इत्यादौ षत्वं च।

यज्वन् शब्दः (याज्ञिकः)—सुटि राजवत् यज्वा यज्वानौ-नः हेयज्वन्-ज्वानौ-नः-यज्वानम्-नौ, शसादावल्लोपे प्राप्ते, न संयोगाद्वमन्तात् (६.४.१३७)वकारमकारान्तसंयोगात्परस्याऽनोऽकारस्य लोपो न स्यात्। इति निषेधे यज्वनः-ना यज्वभ्याम्-भिः हलि पदत्वेन नलोपे तदसिद्धया दीर्घाद्यभावः। यज्वने-ज्वभ्याम्-भ्यः, यज्वनः-ज्वभ्याम्-भ्यः, यज्वनः-नोः-नाम्, यज्वनि-नोः यज्वसु। एवं सुत्वन्-सहयुध्वन्-अध्वन्-अथर्वन्-सुपर्वन्-आत्मन्-ब्रह्मन्-शर्मन्-वर्मन्-इत्यादयः संयुक्तवमान्ताः।

वृत्रहन्शब्दः (इन्द्रः)-वृत्रं हतवानित्यर्थे ब्रह्मभ्रूणवृत्रेषुक्विबिति क्विपि सिद्धः। सौ-इन्हन्पूषार्यम्णां शौ (६-४-१२) एषां शावेवोपधाया दीर्घो नान्यत्र। इति सर्वनामस्थानेचेत्युपधादीर्घस्य निषेधे प्राप्ते, सौ च (६-४-१३) इन्नादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सौ। इत्युपधादीर्घे सुलोपे वृत्रहा। औङादौ शावेवेति नियमाद्दीर्घाभावे एकाजुत्तरपदेण इति नस्य णत्वे वृत्रहणौ-णः। सम्बुद्धौ दीर्घाभावे सुलोपे नङिसम्बुद्ध्योरिति नलोपनिषेधे हे वृत्रहन्-हणौ-हणः। वृत्रहणम्-हणौ, शसाद्यजादिषु भत्वेन अल्लोपे, हो हन्तेर्ञ्णिन्नेषु (७-३-५४) ञिति णिति प्रत्यये नकारेच परे हन्तेर्हस्य कुत्वं स्यात्। इत्यान्तरतम्येन हस्य घत्वे घ्नित्यस्य स्थानिवद्भावेन हन्रूपतयैकाच्त्वात् एकाजुत्तरपद इति णत्वप्राप्तौ, अत्पूर्वस्य (८-४-२२) हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य। इति नियमान्निषेधे वृत्रघ्नः वृत्रघ्ना। हलादिषु पदत्वेन नलोपे वृत्रहभ्याम्-भिः, वृत्रघ्ने-हभ्याम्-भ्यः, वृत्रघ्नः-हभ्याम्-भ्यः, वृत्रघ्नः-घ्नोः-घ्नाम्। ङौ विभाषाङिश्योरित्यल्लोपपक्षे णत्वाभावे वृत्रघ्नि, अल्लोपाभावे अत्पूर्वस्येति णत्वे वृत्रहणि वृत्रघ्नोः वृत्रहसु। एवं ब्रह्महन्-भ्रूणहन्-आत्महन् बालहन्नित्यादयः। आत्महन्नादौ निमित्ताभावाण्णत्वाभावो विशेषः। स्त्रियां ङीपि भ्रूणघ्नी गोघ्नी पतिघ्नी इत्यादयो गौरीवत्। क्लीबे तु जश्शसोः शौ इन्हन्नित्युपधादीर्घः आत्महन्-हनी-हानि इति विशेषः, तृतीयादौ पुंवदेव।

वि. हन्तेः अत्पूर्वस्येति योगविभागसामर्थ्याद्वृत्रघ्न इत्यादौ अनन्तरस्य विधिर्वा प्रतिषेधोवेति न्यायं बाधित्वा हन्तेरित्यनेनैव एकाजुत्तरपदे इत्यनेन प्राप्तमपि णत्वमत्पूर्वस्येति नियम्य निषिध्यते। वृत्रघ्न इत्यादौ होहन्तेरिति नकारे परे कुत्वविधेः सामर्थ्यादल्लोपो न स्थानिवदिति नकारपरतया कुत्वम्। वृत्रघ्न इत्यादौ वैकल्पिकं णत्वमिति माधवोक्तं तु भाष्यवार्तिकविरुद्धम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूषन्शब्दः (सूर्यः)-सौचेत्युपधादीर्घे सोर्नस्य च लोपे पूषा । इन्हन्नित्युपधादीर्घनिषेधे अट्कु
प्वाङिति णत्वे पूषणौ-णः । नङिसम्बुद्ध्योरिति नलोपस्य पदान्तस्येति णत्वस्य च निषेधे हेपूषन्-
पणौ-णः । पूषणम्-णौ । शसाद्यजादौ अल्लोपे, रषाभ्यां नो णः समानपदे (८-४-१) एकपदस्थाभ्यां
रेफषकाराभ्यां परस्य नस्य णः स्यात् । इति णत्वे पूष्णः-ष्णा । हलादौ नलोपे पूषभ्याम्-भिः, पू
पूषभ्याम्-भ्यः, पूष्णः-षभ्याम्-भ्यः, पूष्णः-ष्णोः-ष्णाम्, ङावल्लोपविकल्पे पूष्णि पूषणि अट्कुप्वाङि
णत्वम्, पूष्णोः पूषसु । एवमर्यमन्शब्दः ।

शार्ङ्गिन् शब्दः (विष्णुः)-शार्ङ्गमस्यास्तीत्यर्थे इन्नन्तः । सौ इन्हन्निति निषेधे प्राप्ते सौचेत्यु
पधादीर्घे सुलोपे नलोपे शार्ङ्गी, अट्कुप्वाङिति णत्वे शार्ङ्गिणौ-णः । सम्बुद्धौ नलोपणत्वयोर्निषे
हे शार्ङ्गिन्-णौ-णः । शार्ङ्गिणम्-णौ-णः-णा । हलादौ पदत्वेन नलोपे शार्ङ्गिभ्याम्-भिः, शार्ङ्गि
ङ्गिभ्याम्-भ्यः, शार्ङ्गिणः-ङ्गिभ्याम्-भ्यः, शार्ङ्गिणः-णोः-णाम्-णि-णोः शार्ङ्गिषु । एवं हस्तिन्-वाजि
पक्षिन्-वर्हिन्-प्राणिन्-अन्तेवासिन्नित्यादय इन्नन्ताः । एषु णत्वनिमित्तवत्त्वे णत्वं तदसत्त्वे तदभा
इति विशेषः । इन्नन्ताः स्त्रियां ङीपि हस्तिनी-योगिनी-इत्यादयो गौरीवत् ।

वि. अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेनच तदन्तविधिं प्रयोजयन्तीति वचनेन विनि-ग्मिनि-प्रत्ययान्तानां यशस्वि
वाग्मिन्नित्यादीनामपि इन्हन्नित्यत्र इन्नन्तत्वेन ग्रहणम् ।

मघवन् शब्दः(इन्द्रः)-मघवा बहुलम् (६-४-१२८) मघवन्शब्दस्य वा तृ इत्यन्तादेशः स्यात्
इति ऋकारस्येत्त्वेन नकारस्य तकारादेशे मघवच्छन्दः । सौ-उगिदचां सर्वनामस्थानेऽधातोः
(७-१-७०) अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे । इति नुमागमे
मघवन्त्स् इत्यत्र हल्ङ्याबिति सुलोपे तस्य संयोगान्तस्य लोपे तदसिद्धेर्नलोपाभावे सर्वनामस्थाने
चेत्युपधादीर्घे मघवान् । औङादौ नुमागमे मघवन्तौ-वन्तः । सम्बुद्धौ नुमि सलोपे संयोगान्त
लोपे उपधादीर्घनलोपयोरभावे हेमघवन्-वन्तौ-वन्तः । मघवन्तम्-वन्तौ । शसादावचि योगे हलादौ
पदत्वेन जश्त्वे मघवतः-वता मघवद्भ्याम्-भिः, मघवते-वद्भ्याम्-भ्यः, मघवतः-वद्भ्याम्-भ्यः, मघ
वतःतोः-ताम्, मघवति-तोः-वत्सु । तृत्वाभावपक्षे सुटि राजवत् । सावुपधादीर्घे सुलोपे नलोपे
औङादौ उपधादीर्घे मघवा मघवानौ-नः, सम्बुद्धौ दीर्घाभावे सुलोपे हेमघवन्-वानौ-नः, मघ
वानम्-वानौ । शसादावचि भत्वेनाल्लोपे प्राप्ते, श्वयुवमघोनामतद्धिते (६-४-१३३) अन्नन्तानां भसं
ज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात् । इति वस्योकारे यणि प्राप्ते, सम्प्रसारणाच्च (६-१-१०८)
सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात् । इति पूर्वरूपे मघ उन् अस् इत्यत्र गुणैकादेशे रुत्वविसर्गयोः
मघोनः, मघोना । हलादौ पदत्वेनन लोपे तदसिद्ध्या दीर्घाद्यभावे मघवभ्याम्-भिः, मघोने मघवभ्याम्-
भ्यः, मघोनः-वभ्याम्-भ्यः, म घोनः-नोः-नाम्, मघोनि-नोः मघवसु । स्त्रियां ङीपि मघोनीशब्दः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. मघवानित्यत्रोपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति बहुलग्रहणात्। श्वन्नुक्षन्मघवन्निति निपातनात्, मघः (धनं) अस्यास्तीत्यर्थे मतुपि मघवच्छब्दस्यापि सिद्धेर्मघवाबहुलमिति सूत्रं कैयटेन प्रत्याख्यातम्, तन्नयुक्तं तथात्वे संयोगान्तलोपस्यासिद्धत्वात्-न्यादेशे दीर्घाभावापत्तेः सूत्रे बहुलग्रहणात्तु दीर्घे कर्तव्ये संयोगान्तलोपासिद्धिर्न।

श्वन्शब्दः (कुक्कुरः) सुटि राजवत् श्वा श्वानौ-नः, हेश्वन् श्वानौ नः, श्वानम् नौ। शसादावचि भत्वे श्वयुवमघोनामतद्धिते इति वकारस्योकारे यणं बाधित्वा सम्प्रसारणाच्चेति पूर्वरूपे शुनः शुना। हलादौ पदत्वेन नलोपे भत्वाभावेन सम्प्रसारणाभावे श्वभ्याम्-भिः, शुने श्वभ्याम्-भ्यः, शुनः श्वभ्याम् भ्यः, शुनः-नोः-नाम्, शुनि-नोः श्वसु। स्त्रियांङीपि शुनीशब्दो गौरीवत्। युवन्शब्दः (तरुणः) सुटि राजवत्। युवा युवानौ युवानः, हेयुवन्-वानौ-नः, युवानम्-नौ। शशादावचि भत्वेन श्वयुवेति सम्प्रसारणे पूर्वरूपे युउन् अस् इति जाते उकारयोः सवर्णदीर्घे, लक्ष्ययोर्वकारयकारयोर्भेदेन लक्ष्ये लक्षणं सकृदेव प्रवर्तते इति नियमाप्रवृत्त्या श्वयुवेति यकारस्य पुनः सम्प्रसारणे प्राप्ते न सम्प्रसारणे सम्प्रसारणम् (६-१-३७) सम्प्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात्। इति यूनः, यूना। हलादौ पदत्वेन सम्प्रसारणाभावे नलोपे युवभ्याम्-भिः, यूने युवभ्याम्-भ्यः, यूनः-वभ्याम्-भ्यः, यूनः-नो-नाम्, यूनि-नोः युवसु। स्त्रियां युवतिशब्दो मतिवत् युवतीशब्दो गौरीवदिति द्विधा।

वि. नसम्प्रसारणेसम्प्रसारणमिति ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणे पूर्वं यणः पश्चात्सम्प्रसारणनिषेधः, व्यत्यये तु द्वयोरप्यापत्त्यासूत्रवैयर्थ्यात्।

अर्वन्शब्दः (अश्वः) सावुपधादीर्घेहल्ङ्याब्भ्यादिलोपे नलोपे अर्वा। औङादौ अर्वणस्त्रसावनञः (६-४-१२७)। नञा रहितस्य अर्वन्नित्यस्याङ्गस्य तृ इत्यन्तादेशः स्यान्नतु सौ। इति नस्य तादेशे उगिदचामिति नुमि नस्यानुस्वारे परसवर्णे पुनर्नकारे अर्वन्तौ अर्वन्तः। सम्बुद्धौ त्रादेशाभावेन सुलोपे नङिसम्बुद्ध्योरिति नलोपनिषेधे हेअर्वन् अर्वन्तौ-न्तः, अर्वन्तम्-न्तौ। शसादौ नुमभावे अर्वतः अर्वता, हलादौपदत्वेन जश्त्वे अर्वद्भ्याम्-भिः, अर्वते-वद्भ्याम्-भ्यः, अर्वतः-वद्भ्याम्-भ्यः, अर्वतः-तोः-ताम् अर्वति तोः अर्वत्सु। नञ्समासे अनर्वन् शब्दस्य तु त्रादेशाभावेन यज्ववद्रूपाणि।

पथिन्शब्दः (मार्गः) सौ, पथिमथ्यृभुक्षामात् (७-१-८५) एषामाकारोन्तादेशः स्यात्सौ परे। इति आ-आदिति प्रश्लेषेण नस्याऽननुनासिके आकारे, इतोऽत्सर्वनामस्थाने (७-१-८६) पथ्यादेरिकारस्याऽकारः स्यात्सर्वनामस्थाने परे। इतीकारस्याऽकारे, थोन्थः (७-१-८७) पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे। इति थस्य न्थादेशे पन्थ आ स् इत्यत्र सवर्णदीर्घे रुत्वादौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पन्थाः। औङादौ आत्वाभावे इकारस्याऽकारे थस्य न्थादेशे सर्वनामस्थाने चेत्युपधा… पन्थानौ-नः, हेपन्थाः-नौ-नः, पन्थानम्-नौ। शसादावचि भत्वे, भस्य टेर्लोपः (७-१-… भसंज्ञस्य पथ्यादेष्टेर्लोपः स्यात्। इति इन्भागलोपे पथः पथा। हलादौ पदत्वेन नलोपे पथिभ्… भिः, पथे-थिभ्याम्-भ्यः, पथः-थिभ्याम्-भ्यः, पथः-थोः-थाम्, पथि-थोः पथिसु नलोपः। एवं मथि… शब्दस्य मन्थाः मन्थानौ-नः मथः-मथा मथिभ्यामित्यादि। ऋभुक्षिन्शब्दस्य ऋभुक्षाः क्षाणौ-क्षा… ऋभुक्षणः-क्षणा ऋभुक्षिभ्यामित्यादि।

वि. स्त्रियांनान्तत्वान्ङीपि भत्वाट्टिलोपे सुपथी सुमथी नगरी, अनृभुक्षी सेना इत्यादि गौरीवत्। क्लीबे स्वमो… नलुमतेतिप्रत्ययलक्षणनिषेधेनाऽत्वाभावे सुपथि वनम् सम्बुद्धौ नपुंसकानांनलोपो वा वाच्यः (वा) इति नलोपे हे सुपथि सुपथिन्, औङि भत्वाट्टिलोपे सुपथी, जश्शसोः शौ सर्वनामस्थाने इत्व न्थादेशदीर्घेषु सुपन्थानि।

वि. २ तत्पुरुषकर्मधारयसमासयो राजन् पथिन् शब्दौ टच्प्रत्ययेनाऽकारान्तौ, महाराजः महाराजेन महाराजा… महाराजेषु, राजपथः राजपथेन राजपथाभ्यामित्यादि रामवत्। यथा महाराजो राजपथे रथेन सञ्चरति।

प्रयोगा :—ऋषिरथर्वा शान्तिकं चक्रे। राजा स यज्वा। धन्विनामग्रणीरयम्। प्रका… प्रीयत यज्वनां प्रियः। गुणिनी गुणज्ञो रमते। ब्रह्मघ्नो निष्कृति र्नास्ति। श्वानं युवानं मघव… माह। स एवमुक्त्वा मघवन्तमुन्मुखः। आरूढः शत्रुमूर्धनि। भगः पूषार्यमादित्यः। शुनः पु… मिव व्यर्थम्। पन्थानं प्रतिपद्यस्व।

धकारान्ता :—

बुधशब्दः (ज्ञाता)–बुध्यतेः कर्तरि क्विपि सिद्धः। सोर्हल्ङ्यादिलोपे भष्भावेन बस्यभत्वे घस्य… पक्षे जश्त्वे भुत्-द् अजादिषु योगे बुधौ बुधः, हेभुत्-बुधौ-धः बुधम् धौ-धः बुधा भुद्भ्याम्… पदत्वेन भष्भावे जश्त्वम्। बुधे भुद्भ्याम्: भ्यः बुधः-भुद्भ्याम्-भ्यः बुधः-धोः-धाम् बुधि-धोः… एवं युध् श्वाविध्-रुध्-व्यध्-प्रभृतयः निमित्ताभावान्नैषु भष्भावः।

जकारान्ता :—

ऋत्विज्शब्दः (यज्ञकर्मकरः)—ऋतौ यजतीत्यर्थे, ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्… (३-२-५९) एभ्यः क्विन् स्यात्। इति ऋतुपूर्वयुजेः क्विनि कनयोरिकारस्य च लोपे वस्यापृक्… वेरपृक्तस्य (६-१-६७) अपृक्तस्य वस्य लोपः स्यात्। इति लोपेन सर्वापहारे वचिस्वपीति सम्प्रसारणे इकारे पूर्वरूपे यणि निष्पन्नः। सौ हल्ङ्यादिलोपे, क्विन्प्रत्ययस्यकुः (८-… क्विन्प्रत्ययोयस्मात्तस्यकवर्गोऽन्तादेशः स्यात्पदान्ते। इति जस्य कुत्वेन गत्वे चर्त्वविकल्पे ऋत्वि… अजादौ योगे ऋत्विजौ-जः हेऋत्विक्-ग्-ऋत्विजौ-जः ऋत्विजम्-जौ-जः- जा ऋत्विग्भ्या…

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह.पु.

हलादौ पदत्वेन कुत्वम् । ऋत्विजे-त्विग्भ्याम्-भ्यः ऋत्विजः-त्विग्भ्याम्-भ्यः ऋत्विजःजोः-जाम्-जि-जोः ऋत्विक्षु कुत्वे षत्वे क्षः। एवं भूभुज् तनुत्यज् वणिज् प्रभृतयः, तथा उर्ज् शब्दस्य ऊर्क्-ग् ऊर्जौ ऊर्जः ऊर्ग्भ्याम् ऊर्क्षु इत्यादि ।

युज्शब्दः (सम्बन्धी) युनक्तीत्यर्थे ऋत्विग्दधृगितिक्विन्प्रत्यये तस्य सर्वांशलोपे निष्पन्नः । सौ, युजेरसमासे (७-१-७१) युजेः सर्वनामस्थाने नुम्स्यादसमासे । इति परत्वात्पूर्वं नुमि ततो हल्ङ्यादिलोपे संयोगान्तजलोपे क्विन्प्रत्ययस्येति नस्य कुत्वेनानुनासिके ङकारे युङ्। औङादौ नुमि नस्यानुस्वारे परसवर्णे ञकारे तदसिद्ध्या, चोःकुः (८-२-३०) चवर्गस्य कवर्गः स्याज्झलि पदान्तेच । इति ञस्य कुत्वाभावे युञ्जौ युञ्जः । हेयुङ्-ञ्जौ-ञ्जः, युञ्जम्-ञ्जौ शसादावचि नुमभावे, हलादौ पदत्वेन कुत्वे गकारे युजः-जा युग्भ्याम्-भिः, युजे युग्भ्याम्-भ्यः, युजः-युग्भ्याम्-भ्यः, युजः-जोः-जाम्, युजि-जोः युक्षु कुत्वे चर्त्वे षत्वम् ।

वि. १ समासे तु सुयुज् कार्ययुज् इत्यादौ युजेरसमासे इत्युक्तेर्नुमभावे क्विन्प्रत्यस्येति कुत्वस्यासिद्धत्वाच्चोःकुरिति कुत्वेन गत्वे चर्त्वविकल्पे सुयुक्-ग् । अजादौ योगे हलादौ कुत्वे सुयुजौ-जः सुयुग्भ्याम्-भिरित्यादि । यथा कर्मयुक्स्यादकथितमित्यादि । युजेरसमास इत्यत्रेकारनिर्देशेन युजिर् योगे इत्यस्यैव ग्रहात् युज्यते (समाधत्ते) इत्यर्थे युज समाधावित्यस्यापि नुमोभावे असमासेपि युक् युजौ युज इत्याद्येव ।

वि. २. खजिमतिवैकल्पे इत्यस्मात्कर्तरि क्विपि इदित्वान्नुम्यनुस्वारपरसवर्णयोः खञ्जशब्दः । सौ हल्ङ्यादिलोपे जस्य संयोगान्तलोपे निमित्तापाये नैमित्तिकस्याप्यपायइति ञस्य पुनर्नभावे संयोगान्तलोपस्यासिद्धत्वान्नलोपाभावे खन् । अजादौ योगे खञ्जौ खञ्ज इत्यादि, हलादौ पदत्वेन जस्य संयोगान्तलोपे ञस्य पुनर्नभावे संयोगान्तलोपस्यासिद्धत्वान्नलोपाभावे खन्भ्याम्-भिः खन्सु इत्यादि ।

विराज्शब्दः (विराट्पुरुषः)—विशेषेण राजतइत्यर्थेक्विपि निष्पन्नः । सौ हल्ङ्यादिलोपे व्रश्चभ्रस्जेति जस्य षत्वे षस्य जश्त्वेन डत्वे चर्त्वविकल्पे विराट्-ड् । अजादिषु योगे विराजौ-जः, हेविराट्-जौ-जः, विराजम्-जौ-जः, विराजा हलादौ पदत्वेन षत्वे जश्त्वे विराड्भ्याम्-भिः, विराजे-राड्भ्याम्-भ्यः, विराजः-ड्भ्याम्-भ्यः, विराजः जोः-जाम्, विराजि-जोः, सुपि पदत्वेन षत्वे जश्त्वे धुड्विकल्पे चर्त्वे विराट्त्स, एवं सम्राज्-विभ्राज्-विश्वसृज्-परिमृज्-परिव्राज्-भृस्ज्-प्रभृतयः ।

वि. १ व्रश्चेति षत्वविधौ राजिसाहचर्यात् टुभ्राजृदीप्ताविति फणादेरेव ग्रहो नतु भ्राजृदीप्तावित्यस्य, अस्य तु चोःकुरिति कुत्वे विभ्राक् ग् विभ्राजौ-जः विभ्राग्भ्याम् विभ्राक्षु ।

वि. २ परित्यज्य सर्वं व्रजतीत्यर्थे परिपूर्वव्रजधातोः परौव्रजेःषःपदान्ते (उणादि) परावुपपदे व्रजेः क्विप्स्याद्दीर्घश्च पदान्तविषये षत्वं च । इति क्विब्दीर्घयोः परिव्राज्शब्दः, व्रश्चेत्यप्राप्ता वनेनैव पदान्ते षत्वे जश्त्वचर्त्वयोः परिव्राट्-ड् परिव्राजौ-जः परिव्राड्भ्याम् परिव्राट्त्सु परिव्राट्सु इत्यादिरूपाणि विराड्वदेव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि॰ ३ भृज्जतीत्यर्थे भ्रस्जपाके इत्यस्मात्क्विपि ग्रहिज्येतिसम्प्रसारणे पूर्वरूपे भृस्जशब्दः। सौ हल्ङ्यादिलो
स्कोःसंयोगाद्योरन्ते च (८-२-२९) पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। इति सलो
व्रश्चेति जस्य षत्वे जश्त्वे चर्त्वे भृट्-ड्। अजादौ सस्य श्चुत्वेन शत्वे जश्त्वेन जत्वे भृजौ भृजः 'भृजम्' जौ जः इत्यादि
हलादौ पदत्वेन सकारलोपे जस्य षत्वे जश्त्वे भृड्भ्याम् भिः-भ्यः सुपि धुडागमविकल्पे चर्त्वे च भृट्त्सु भृट्सु।

प्रयोगाः—विराजमस्सृजत्प्रभुः। ऋत्विजो यजन्ति। नोदतिष्ठत्तदा विराट्। परिव्राड्यो
युक्तश्च। भूभुजामग्रणीरसौ। दयायुजा तेन निरीक्षिता वयम्। युधि प्रवर्तते सेनानीः। भू
गुरून्भार्गरुधः करीन्द्रात्। अयुजि नयुगरेफतो यकारः। ऋत्विग्भिः संस्तुतो रुद्रः। सम्रा
सुराणां मघवा। दत्ता महीभुजा गावः।

दकारान्ताः—

सुहृद्शब्दः (मित्रं)—शोभनं हृदयं यस्येति समासे हृदयस्य हृदादेशे निष्पन्नः। हलादिषु ज
खरिचत्वे अजादिषु योगे सुहृत्-द सुहृदौ-हृदः हेसुहृत्-द्-दौ-दः। सुहृदम्-दौ-दः-दा सुहृद्भ्याम्
भिः-सुहृदे भ्याम्-भ्यः,-सुहृदः-भ्याम्-भ्यः सुहृदः दोः-दाम्-दि-दोः-सुहृत्सु। एवं क्रव्याद्-वेदविद्-उद्भि
छिद्-प्रभृतयः क्विवन्ता अन्येपि दान्ताः।

सुपाद्शब्दः (शोभनपादः)—शोभनौ पादौ यस्येति समासे संख्यासुपूर्वस्येति पादशब्दान्तलो
निष्पन्नः सुटि सुहृद्वत् सुपात्-द् सुपादौ-दः दम्-दौ। शसाद्यजादिषु भत्वे पादःपत् (६-४-१३०)
पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्। इति पदादेशे सुपदः सुप
हलादौ भत्वाभावेन न पदादेशः सुपाद्भ्याम्-भिः सुपदे-पाद्भ्याम्-भ्यः, सुपदः-पाद्भ्याम्-भ्यः
सुपदः-दोः-दाम् सुपदि-दोः सुपात्सु। एवं द्विपाद्-एकपाद्-बहुपाद्-प्रभृतयः।

थकारान्ताः—

अग्निमथ् शब्दः (अग्निमन्थकः)—अग्निं मथ्नातीत्यर्थे मथ्नातेः क्विपि अनिदितामिति नलो
निष्पन्नः। सौ हल्ङ्यादि लोपे जश्त्वे चर्त्वविकल्पे अजादौ योगे हलादौ पदत्वेन जश्त्वे अग्नि
मत्-द् अग्निमथौ-थः-थम्-थौ-थः-था अग्निमद्भ्याम्-भिः अग्निमथे-मद्भ्याम्-भ्यः, अग्निमथ
थोः-थाम्-थि-थोः अग्निमत्सु। एवम् दधिमथ्-समुद्रमथ्-इत्यादयः।

प्रयोगाः—मर्मच्छिदः संसारभावाः। वेदविदां वरेण्यः। द्विपदां मनुजः श्रेष्ठः। सुहृदो हितक
रिणः। तत्त्वविद्भिरिदं निर्णीतम्। क्रव्याद्भिर्लुप्तमेतत्। समुद्रमथो देवाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चकारान्ताः—

पयोमुच् शब्दः (मेघः)—पयो मुञ्चतीत्यर्थे पयःपूर्वान्मुञ्चतेः क्विपि सिद्धः। सौ हल्ङ्यादिलोपे चोःकुरितिकुत्वे जश्त्वे चर्त्वविकल्पे पयोमुक्-ग् पयोमुचौ-मुचः, मुचम्-चौ-चः-चा पयोमुग्भ्याम् -भिः, पयोमुचे-मुग्भ्याम्-भ्यः पयोमुचः-मुग्भ्याम्-भ्यः, पयोमुचः-चोः-चाम् , पयोमुचि चोः पयोमुक्षु कुत्वे षत्वम्। एवंजलमुच्-प्रभृतयः प्राच्शब्दः (पूर्वः) प्रकर्षेणाञ्चतीत्यर्थे प्रपूर्वादञ्चतेर्गत्यर्थात् ऋत्विग्दधृगिति क्विन्प्रत्यये नस्य सर्वापहारे, अनिदितां हल उपधायाः क्ङिति (६·४·२४) हलन्तानामनिदिता मङ्गानामुपधाया नस्य लोपः स्यात्किति ङिति च परे। इति न लोपे प्राच्शब्दः सौ उगिदचामिति नुमि हल्ङ्यादिलोपे चस्य संयोगान्तस्य लोपे नस्य क्विन्प्रत्ययस्येति कुत्वेन ङकारे प्राङ् औङादौ नुमि नस्यानुस्वारपरसवर्णयोः प्राञ्चौ प्राञ्चः, हे प्राङ् प्राञ्चौ-ञ्चः, प्राञ्चम्-ञ्चौ, नस्य श्चुत्वं तु न अनुस्वारं प्रति तस्यासिद्धत्वात्। शसादौ प्रत्ययोत्पत्त्यनन्तरं प्राप्स्यमाणेनापि अच इत्यनेन अकृतव्यूहाः पाणिनीया इति परिभाषा बलात्सवर्ण दीर्घाभावे प्र-अच्-अस् इत्यत्र असर्वनामस्थान स्थत्वेन नुमोऽभावे भत्वे अचः (६·४·१३८) लुप्तनकारस्या ञ्चतेर्भस्या कारस्य लोपः स्यात्। इत्यकारलोपेप्रच्-अस् इत्यत्र, चौ (६·३·१३८) लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्। इति पूर्व दीर्घे प्राच,ः प्राचा। हलादौ पदत्वेन चस्य कुत्वे जश्त्वे प्राग्भ्याम्-भिः, प्राचे प्राग्भ्याम्-भ्यः, प्राचः प्राग्भ्याम्-भ्यः, प्राचः-चोः-चाम् ; प्राचि-चोः सुपि कुत्वे षत्वे प्राक्षु।

वि. प्राच् शब्दस्य अचः चौ इति अल्लोपपूर्वदीर्घयोरभावेपि प्राच इत्यादिसिद्धावपि प्रतीच इत्याद्यर्थमनयोरावश्यकतया प्रक्रियाप्राप्ते सूत्रे अत्रापि प्रवर्तेत।

पूजार्थकादञ्चधातोः क्विन्प्रत्यये तु अनिदितामिति नलोपे प्राप्ते, नाञ्चेःपूजायाम् (६-४-३०) पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात्। इति निषेधे प्राञ्च शब्दः। ततः सौ उगिदचामित्यत्र न लोपिनोऽञ्चतेरेव ग्रहणान्नुमभावे हल्ङ्यादिलोपे चस्य संयोगान्तलोपे नस्य कुत्वे प्राङ् औङादौ नलोपनुमोरभावेन योगमात्रे प्राञ्चौ प्राञ्चः, हेप्राङ् प्राञ्चौः,-ञ्चः, प्राञ्चम्। प्राञ्चौ। शसाद्यजादिष्वपि नलोपाभावेन अचः चौइत्यनयोरप्रवृत्त्या योगमात्रे प्राञ्चः प्राञ्चा। हलादौ पदत्वेन संयोगान्तचलोपे अनुस्वारपरसवर्णयोर्निवृत्तौ नस्य क्विन्प्रत्ययस्येतिकुत्वेन ङत्वे प्राङ्भ्याम्-भिः, प्राञ्चे प्राङ्भ्याम्-भ्यः, प्राञ्चः-ङ्भ्याम्-भ्यः, प्राञ्चः-ञ्चो- ञ्चाम् , प्राञ्चिः-ञ्चोः, सुपि संयोगान्तचलोपे परावृत्तस्य नस्य कुत्वेनङत्वे ङ्णोः कुक्टुक्शरीति कुगागमे कस्य चयो द्वितीयाइतिपक्षे खत्वे सस्य षत्वे प्राङ्खषु, द्वितीयाभावे प्राङ्क्षु, कुगभावे प्राङ्षु।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. अञ्चु गतिपूजनयोरित्यञ्चतेरुभयार्थकतया सुटि द्वयोरर्थयोः प्रक्रियाविशेषेपि रूपसाम्यं, शसादिषु तु रूपे वैषम्यम्। गत्यर्थकत्वे प्रकर्षेण गतिमतः, पूजार्थकत्वे प्रकर्षेण पूजकस्य बोधः। वस्तुतस्तु अञ्चतेर्न पूजार्थत्वं किन्तु पूजाव्यञ्जकत्वमेव, अञ्चतेः समाधानमव्याकुलत्वरूपमर्थः, तेन गतेः पूज्यत्वं गम्यते, अतोऽञ्चतीत्यस्य अव्याकुलं गच्छतीत्यर्थः इति अञ्चोनपादानइति सूत्रभाष्यकैयटयोः। तेन गत्यर्थत्वे केवलं गमनं, पूजार्थत्वे अव्याकुलत्वेन पूजितं गमनम् इति बोध्यम्।

एवम् अव-अञ्चतिपरा-अञ्चतीत्यर्थे अव-परापूर्वकाञ्चधातोः क्विनि अवाच् पराच्शब्दयोः पूजाया मवाञ्च् पराञ्च् शब्दयोश्च रूपाणि। एवंप्रायाः प्रत्यञ्च सम्यञ्च-सध्र्यञ्च उदञ्च-तिरश्च शब्दाः। तेषु प्रत्यञ्चतीत्यर्थे प्रातिपूर्वादञ्चतेः क्विनि यणि गतौ नलोपे प्रत्यच् शब्दः पूजायांनलोपाभावे प्रत्यञ्च शब्दः, द्वयोः सुटि प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रत्यञ्चम् प्रत्यञ्चौ। शसादिषु गतौ अजादिषु नलोपे नुमभावे स्वनिमित्तस्याकारस्य लोपोन्मुखतया अकृतव्यूहाइति यणोप्यप्रवृत्तौ प्रति अच्-अस्-इति स्थिते अच इत्यल्लोपे चाविति इकारदीर्घे प्रतीचः प्रतीचा प्रतीचे इत्यादि। हलादौ यणि कुत्वे जश्त्वे प्रत्यग्भ्याम्-भि सुपि कुत्वे षत्वे प्रत्यक्षु। पूजायामजादिषु योगे हलादौ संयोगान्त चलोपे प्रतिनिवृत्तस्य नस्य कुत्वेन ङत्वे कुगागमस्यद्वितीयादेशस्य च विकल्पे प्रत्यङ्क्षु प्रत्यङ्क्षु प्रत्यङ्षु। सङ्गतमञ्चतीत्यर्थे सम्पूर्वादञ्चतेः क्विनि समः समि (६-३-९३) अप्रत्ययान्तेऽञ्चतौ परेसमः समिरादेशः स्यात्। इति सम्यादेशे यणि गतौ नलोपे सम्यच् शब्दः, पूजायां तदभावे सम्यञ्च्शब्दः। सह अञ्चतीत्यर्थे सहपूर्वादञ्चतेः क्विनि सहस्य सध्रिः (६-३-९५) अप्रत्ययान्तेऽञ्चतौ सहस्य सध्र्यादेशः स्यात् इति सध्र्यादेशे यणि गतौ नलोपे सध्र्यच्शब्दः, पूजायां तदभावे सध्र्यञ्च्शब्दः। अनयोरपि प्रत्यच्-प्रत्यञ्चवद्रूपाणि। सम्यङ्-ञ्चौ-ञ्चः समीचः समीचा सम्यग्भ्याम्, सम्यञ्चः ञ्चा सम्यङ्भ्यामित्यादि सध्र्यङ्-ञ्चौ-ञ्चः सध्रीचा सध्र्यग्भ्याम् सध्र्यञ्चः ञ्चा सध्र्यङ्भ्यामित्यादि। तिरः अञ्चतीत्यर्थे तिरःपूर्वादञ्चतेः क्विनि गतौनलोपे तिरस्-अच्, पूजायां तदभावे तिरस् अञ्च् इति जाते द्वयोः सुटि तिरसस्तिर्यलोपे (६-३-९४) अलुप्ताकारेऽञ्चतौ परे तिरसस्तिर्यादेशः स्यात्। इति तिर्यादेशे यणि तिर्यङ् तिर्यञ्चौ-ञ्चः-ञ्चम्-ञ्चौ। शसादिषु गतौ अजादिषु नलोपे नुमभावे अच इत्यल्लोपे तिर्यादेशाभावे चकारात्पूर्वस्वराभावेन चाविति दीर्घाभावे तिरश्चः तिरश्चा तिरश्चे तिरश्चः-श्चोः-श्चाम्-श्चि, हलादौ तिर्यादेशे यणि कुत्वे जश्त्वे तिर्यग्भ्याम्-भिः-भ्यः तिर्यक्षु; पूजायां तिर्यादेशे यणि अजादौ योगे तिर्यञ्चः तिर्यञ्चा इत्यादि, हलादौ चलोपे ङत्वे तिर्यङ्भ्याम् भिरित्यादि, सुपि कुग्द्वितीययोर्विकल्पे षत्वे तिर्यङ्क्षु तिर्यङ्क्षु तिर्यङ्षु। उदगञ्चतीत्यर्थे उत्पूर्वादञ्चतेः क्विनि गतौ नलोपे उदच्शब्दः, पूजायां तदभावे उदञ्चशब्दः। द्वयोः, सुटि उदङ् उदञ्चौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ञ्चः-ञ्चम्-ञ्चौ। शसादिषु गतौ अजादिषु नलोपे नुमभावे अच इत्यकारलोपे प्राप्ते उदईत् (६-४-१३९) उच्छब्दात्परस्य लुप्तनकारस्याकारस्याञ्चतेर्भस्याकारस्य ईत्स्यात्। इति ईत्वे उदीचः उदीचा उदीचे इत्यादि, हलादौ ईत्वाभावे कुत्वे जश्त्वे उदग्भ्याम्-भिरित्यादि, सुपि कुत्वे षत्वे उदक्षु; पूजाया मजादिषु योगे, हलादिषु चलोपे कुत्वे उदञ्चः उदञ्चा उदङ्भ्यामित्यादि सुपि चलोपे कुत्वे कुग्द्वितीययोर्विकल्पे उदङ्क्षु उदङ्ख्षु उदङ्षु।

वि. विश्वगञ्चति देवानञ्चतीत्यर्थे विष्वग्देवपूर्वादञ्चतेः क्विनि विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये (६-३-९२) अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्तेऽञ्चतौ परे। इति विष्वक्शब्दे अग्भागस्य देवशब्देऽकारस्य अद्र्यादेशे यणि विष्वद्र्यञ्च् देवद्र्यञ्च इत्यनयोर्गतौ नलोपे पूजायां तदभावे द्वयोः सुटि विष्वद्र्यञ्चौ-ञ्चः-ञ्चम्-ञ्चौ, देवद्र्यङ् देवद्र्यञ्चौ-ञ्चः-ञ्चम् ञ्चौ इति शसादिषु गतौ अजादिषु नलोपे नुमभावे अकृतव्यूहाइति यणोप्यभावे अच इत्यल्लोपे चाविति दीर्घे विश्वद्रीचः-चा, देवद्रीचः-चा इत्यादि, हलादौ यणि कुत्वे जश्त्वे विष्वद्र्यग्भ्याम्-भिः देवद्र्यग्भ्यां भिरित्यादि सुपि विश्वद्र्यक्षु देवद्र्यक्षु इति पूजायामजादिषु योगे हलादौ चलोपे नस्य कुत्वे कुग्द्वितीययोर्विकल्पे विष्वद्र्यञ्चः-ञ्चा विश्वद्र्यङ्भ्याम् विष्वद्र्यङ्क्षु विश्वद्र्यङ्ख्षु विष्वद्र्यङ्षु, देवद्र्यञ्चः-ञ्चा देवद्र्यङ्भ्याम् देवद्र्यङ्क्षु देवद्र्यङ्ख्षु देवद्र्यङ्षु इत्यादि प्रत्यङ्वत्।

प्रयोगा :—पयोमुचां पङ्क्तिषु विद्युतेव। दुर्बला अश्रुमुचः। प्राचामवाचां च मतिर्विभिन्ना। प्राञ्चः प्राहुरेवम्। विद्यायाः सध्रीचा विनयेन भूषितः। उदीचां मतेनैवम्। आप्राचः कामरूपा-द्रुहिणसुतनदप्लाविताद्राप्रतीचः। पराञ्चो देवाः। तिरश्चां गतिराकाशे समीचां जनानाम्।

तकारान्ता :—

भूभृत्शब्दः (राजा पर्वतश्च) भुवं बिभर्तीत्यर्थे भूपपदभृञ्धातोः क्विप्प्रत्यये तुकि निष्पन्नः। हलादौ जश्त्वमजादौ योग एव। भूभृत्-द् भूभृतौ-तः भूभृतम्-तौ-तः, भूभृता भूभृद्भ्याम्-भिः भूभृते-भूभृद्भ्याम्-भ्यः, भूभृतः- भूभृद्भ्याम्-भ्यः भूभृतः-तोः-ताम्, भूभृति-तोः-भृत्सु एवं परभृत्-कर्मकृत्-दिनकृत्-शत्रुजित्-महीभृत्-प्रभृतयः।

शकारान्ता :—

विश्शब्दः (प्रजा) विशतेः क्विपि सिद्धः सौ हल्ङ्याब्भ्यादिलोपे व्रश्चेति शस्य षत्वे जश्त्वेन डत्वे वा चर्त्वे विट्-ड् विशौ विशः अजादौ योग एव, हलादौ पदत्वेन षत्वे जश्त्वम्। विशम्-शौ-शः, विशा विड्भ्याम्-भिः, विशे ड्भ्याम्-भ्यः, विशः-ड्भ्याम्-भ्यः, विशः-शोः-शाम्, विशिशोः, सुपि षत्वे जश्त्वे धुड्विकल्पे चर्त्वे विट्त्सु विट्सु।

भूमिस्पृश्शब्दः (भूस्पर्शी)-भूमिं स्पृशतीत्यर्थे भूमिपूर्वकस्पृशधातोः स्पृशोऽनुदके क्विन् (३-२-५८) अनुदके सुप्युपपदे स्पृशेः क्विन्स्यात्। इति क्विनि सर्वापहारे सिद्धः। सौ हल्ङ्याब्भ्यादिलोपे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्विन्प्रत्ययेत्यस्यासिद्धत्वात्पूर्वं व्रश्चेति षत्वे जश्त्वेन डत्वे ततः कुत्वेन गत्वे चर्त्वविकल्पे भूमि स्पृक्-ग् भूमिस्पृशौ-शः, स्पृशम्-शौ-शः-स्पृशा। हलादौ पदत्वेन षत्वे जश्त्वे कुत्वे भूमिस्पृग्भ्याम् भिः, स्पृशे-स्पृग्भ्याम्-भ्यः स्पृशः-ग्भ्याम्-भ्यः भूमिस्पृशः-शोः-शाम्-स्पृशि-शोः, सुपि षत्व-जश्त्व-कुत्व चर्त्वेषु षत्वे भूमिस्पृक्षु। एवं शस्त्रस्पृश्-करस्पृश् मन्त्रदृश् प्रभृतयः।

षकारान्ताः :—

अहिद्विष्शब्दः (गरुडः इन्द्रश्च)-अहिंद्वेष्टीत्यर्थे अहिपूर्वकाद्द्विषेः क्विपि निष्पन्नः, सौ हल्ङ्या दिलोपे जश्त्वचर्त्वयोः अहिद्विट्-ड्-द्विषौ-द्विषः, अहिद्विषम्-द्विषौ-षः, अहिद्विषा, हलादौ जश्त्वे अहि द्विड्भ्याम्-भिः,-द्विषे-द्विड्भ्याम्-भ्यः,-द्विषः-द्विड्भ्याम्-भ्यः-द्विषः-षोः-षाम्-द्विषि-षोः, सुपि जश्त्वे धुड्विकल्पे चर्त्वे अहिद्विट्त्सु-द्विट्षु, एवं द्विष्-कंसद्विष् विप्रुष्-श्रीजुष्-प्रभृतयः।

दोष् शब्दः (बाहुः) दमेर्डोस्प्रत्यये डित्वसामर्थ्यादभस्यापि टेर्लोपे प्रत्ययावयवसस्य षत्वे निष्पन्नः। सौ हल्ङ्यादिलोपे रुत्वं प्रति षत्वस्यासिद्धत्वात्ससजुषोरिति रुत्वे विसर्गे दोः अजादौ योगे दोषौ-षः हेदोः- षौ षः, दोषम्-षौ। शसादिषु पद्दन्नइति वा दोषन्नादेशे अजादि भत्वेन अल्लोपोन इत्यल्लोपे रषाभ्यामिति णत्वे दोष्णः दोष्णा। हलादिषु पदत्वे नलोपःप्रातिपदि कान्तस्येति न लोपे दोषभ्याम्-भिः, दोष्णे-षभ्याम्-भ्यः, दोष्णः-षभ्याम्-भ्यः दोष्णः-ष्णोः-ष्णाम्। ङि विभाषाङिश्योरित्यल्लोपविकल्पे णत्वे दोष्णि दोषणि, दोष्णोः दोषसु नलोपः। शसादिषु दोषन्ना देशाभावपक्षे अजादिषु योगे हलादौ पदत्वे न रुत्वे दोषः दोषा दोर्भ्याम्-भिः, दोषे दोर्भ्याम्-भ्यः दोषः-र्भ्याम्-भ्यः, दोषः-षोः-षाम्, दोषि दोषोः रुत्वे वाशरीति वा विसर्गे दोःषु दोष्षु।

प्रयोगाः- धनुर्भृतः संयति लब्धकीर्तयः। विशांपतिरसौ। त्वमग्रणीर्मन्त्रदृशामृषीणाम् कंसद्विषोनुग्रहः। दोष्णांचैतत्किमेतत्फलम्। दोर्भ्यामब्धिंतितीर्षति। विद्याजुष सज्जनाः। काव्य कृतःसूक्तयः। फलपुष्पपुषो वृक्षाः।

सकारान्ता :—

पुंस् शब्दः (पुरुषः) पूञ्धातोर्डुम्सुन्प्रत्यये टिलोपे निष्पन्नः। सौ विवक्षिते पुंसोऽसुङ् (७-१-८९ सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्। इति ङित्वे नान्त्यसस्य असादेशे पुमस्-स् इत्य उगित्त्वे न उगिदचामिति नुमागमे सान्तमहत इतिदीर्घे हल्ङ्यादिलोपे संयोगान्त सलोपे तदसि द्धया नलोपाभावे पुमान्। औङादौ असुङादेशे नुमि सान्तेतिदीर्घे नस्यानुस्वारे पुमांसम् पुमांसौ सम्बुद्धौ सान्तमहत इत्यत्रासम्बुद्धावित्युक्तेर्दीर्घाभावे हेपुमन् पुमांसौ-सः, पुमांसम्-सौ। शसा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह. पु.

दावसर्वनामस्थानत्वेनासुङ्नुम्दीर्घाभावेन योगे पुंसः पुंसा। हलादौ पदत्वेन संयोगान्तसलोपे निमित्तापायादनुस्वारनिवृत्तौ मस्यानुस्वारपरसवर्णाभ्यां पुनर्मत्वे पुम्भ्याम्-भिः, पुंसे पुम्भ्याम्-भ्यः, पुंसः पुम्भ्याम्-भ्यः पुंसः-सोः-साम्, पुंसि-सोः। सुपि पदत्वेन संयोगान्तसलोपेऽनुस्वार-निवृत्तौ मस्य पुनरनुस्वारे नुम्विसर्जनीयशर्व्यवायेपीत्यत्र नुम्स्थानिकानुस्वारस्यैव ग्रहणेन षत्वाभावे पुंसु।

वि. समस्ते परमपुंस्शब्दे सुबुत्पत्तेः पूर्वमेवाऽसुङादेशे मकारोत्तराकारस्य समासान्तोदात्तत्वसिद्धये पुंसोसुङित्यत्र सर्वनामस्थाने विवक्षित इत्युक्तम्, अन्यथा असुङः पूर्वं सुबुत्पत्तौ पकारोत्तराकारस्य तथात्वमापद्येत। बहुपुंसीत्यादौ उगितश्चेति ङीप्सिद्ध्यर्थं कृतेन डुम्सुन्प्रत्ययस्योगित्त्वेनैव उगिदचामिति नुमोपि सिद्धौ असुङः उकार उच्चारणार्थ एव न तस्येत्त्वमपेद्यते।

उशनस् शब्दः (शुक्रः)—सौ ऋदुशनस्पुरुदंशोनेहसांचेत्यन्त्यसकारस्यानङादेशे उशनन्स् इत्यत्र सर्वनामस्थानेचेत्युपधादीर्घे हल्ङ्यादिलोपे नलोपःप्रातिपदिकेति नलोपे उशना। औङाद्यजादौ योगे उशनसौ-सः। सम्बुद्धौ–अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः (वा) इत्यनङादेशे नलोपे सुलोपे हे उशन, अनङि नलोपाभावे हे उशनन्, अनङोभावे रुत्वविसर्गयोः हे उशनः उशनसौ-सः। उशनसा, हलादौ पदत्वेन सस्य रुत्वे हशिचेत्युत्वे गुणैकादेशे उशनोभ्याम्-भिः उशनसे उशनोभ्याम्-भ्यः, उशनसः-नोभ्याम्-भ्यः, उशनसः-सोः-साम्, उशनसि-सोः वाशरीति वा विसर्गे उशनःसु उशनस्सु।

अनेहस् शब्दः (समयः)—अस्य सम्बुद्धावनङभावेन हे अनेह इत्येकमेव रूपम्। अन्यत्सर्वमुशनस् शब्दवदेव अनेहा-हसौ-हसः अनेहोभ्यामित्यादि।

वेधस् शब्दः (ब्रह्मा)—सौ, अत्वसन्तस्य चाधातोः (६-४-१४) अत्वन्तस्य धातुभिन्नासन्तस्य चोप-धाया दीर्घः स्यादसम्बुद्धौ सौ परे,। इत्यकारस्य हल्ङ्यादिलोपे सस्य रुत्वविसर्गयोः वेधाः। अजादौ योगे वेधसौ-सः। सम्बुद्धौ दीर्घाभावे सुलोपे रुत्वविसर्गयोः हे वेधः-धसौ-सः, वेधसम्-सौ-सः वेधसा। हलादौ पदत्वेन सस्य रुत्वोत्वगुणेषु वेधोभ्याम्-भिः वेधसे-धोभ्याम्-भ्यः, धोभ्याम्-भ्यः, वेधसःसोःसाम्, वेधसि-सोः, सुपि वाशरीति पक्षे विसर्गे वेधःसु वेधस्सु। एवं सु-मनस्-विडौजस-चन्द्रमस्-प्रचेतस्-प्रभृतयः।

वि. सुमनस्शब्दो देववाचकः पुंसि, पुष्पवाचकस्तु स्त्रियाम्, रूपाणि समानान्येव, परमेष शब्दः प्रायो बहुवचनान्त एव प्रयुज्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—उशना जीवयामास। वेधाः ससर्ज भूतानि। विडौजाः पाकशासनः। चन्द्रमस रात्रिः प्रकाश्यते। अन्यस्मिन्ननेहसि। सुमनसां प्रसादः। चन्द्रमसि नीलिमा दृश्यते।

प्रश्नाः—षान्तशब्देषु के विशेषाः। नान्तशब्देषु कति प्रभेदाः। इन्नन्तशब्देषु को विशेषः। पथिन्शब्दे विशेषप्रक्रिया। श्वन्-युवन्-शब्दयोस्तुल्यता न वा। ङावल्लोपविकल्पः केषु शब्देषु। पुंस्शब्दस्य सौ सम्बुद्धौ च विशेषः। षान्तशब्दे को विशेषः। अधस्तनवाक्यगतानि हलन्तपुंलिङ्गशब्दरूपाणि विवृणुत—

परस्य पुंसः स्मरणं शुभाय। समुदिते चन्द्रमसि दिनकृति वा तमोपसरति। नोदतिष्ठत्तदा विराट्। दत्ता म भृता गावः। पथि तेषां समागमः। श्वानौ द्वौ श्यामशबलौ। नयविदः कार्यकुशलाः। अम्भोरुहां केसराः। पु विश्वसृजां सत्रे। पुमांसस्ते सुदुर्जयाः। पुंसामेकान्ततः श्रेयः। सुहृद्भिः सह सङ्गतः। सम्राट् परिव्राजमाह। वि मीश उवाचेदम्। युवानोपि न चञ्चलाः। दोष्णोर्बलं दर्शय।

हलन्तस्त्रीलिङ्गप्रकरणम्—

हकारान्तः—

उपानह् शब्दः (पादत्राणं)—उपपूर्वान्नहःधातोः सम्पदादित्वात्क्विपि नहिवृतीत्यादिना दी निष्पन्नः।सौ हल्ङ्यादिलोपे होढ इति प्राप्ते, नहो धः(८-२-३४)नहो हस्य धः स्याज्झलि पदान्ते च। इ हस्य धत्वे जश्त्वचर्त्वविकल्पे उपानत्-द्। अजादौ योगे उपानहौ-नहः, हेउपानत्-द्-हौ-हः, उपानह हौ-हः, उपानहा, हलादौ पदत्वेन धत्वे जश्त्वे उपानद्भ्याम्-भिः, उपानहे-नद्भ्याम्-भ्यः, उपानह नद्भ्याम्-भ्यः, उपानहः-होः-हाम् उपानहि-होः–नत्सु।

वि. छन्दोविशेषवाची उष्णिह्शब्दस्तु ऋत्विग्दधृगिति क्विन्प्रत्ययान्तः। सौ क्विन्प्रत्ययस्येति कुत्वेन घत्वे जश्त्वचर्त्वे उष्णिक्-ग् उष्णिहौ-हः, हलादौ पदत्वेन कुत्वे जश्त्वेउष्णिग्भ्यामित्यादि, सुपि कुत्वे जश्त्वचर्त्वयोः षत्वे उष्णिक्षु इत्यादि कुत्वमत्र विशेषः।

वकारान्तः—

दिव् शब्दः (आकाशः)—सौ, दिव औत् (७-१-८४) दिवितिप्रातिपदिकस्य औत् स्यात्सौ इत्यन्त्यवस्यौत्वे यणि अल्विधित्वेन औकारस्य स्थानिवत्त्वाभावाद्रूपहल्त्वाभावात्सोर्लोपाप्राप्ते रुत्वविसर्गयोः द्यौः। अजादिषु योगे दिवौ दिवः, हेद्यौः दिवौ-वः, दिवम्-वौ-वः दिवा। हलादि दिव उत् (६-१-१३१) दिवोन्तादेश उकारः स्यात्पदान्ते। इति वस्योत्वे यणि द्युभ्याम्-भिः, दि द्युभ्याम्-भ्यः, दिवः द्युभ्याम्-भ्यः, दिवः-वोः-वाम्, दिवि-वोः-द्युषु उत्वे यणि षत्वम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह. स्त्री.

रेफान्ताः—

गीर् शब्दः (वाणी)-गृधातोः क्विपि ॠतइद्धातोरिति इर्भावे सिद्धः। सौ हल्ङ्यादिलोपे र्वोरुपधाया दीर्घ इकः (८-२-७६) रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात्पदान्ते। इति दीर्घे रेफस्य विसर्गे गीः। अजादौ योगे गिरौ गिरः हेगीः गिरौ-रः, गिरम्-रौ-रः गिरा, हलादौ पदत्वे-नोपधाया दीर्घे गीर्भ्याम्-भिः, गिरे-र्भ्याम्-र्भ्यः, गिरः-र्भ्याम्-र्भ्यः, गिरः-रोः-राम्, गिरि-रोः। सुपि पदत्वेन दीर्घे रोःसुपीति नियमेन विसर्गाभावे षत्वे गीर्षु। एवं पुर्-धुर्-द्वार्-प्रभृतयः।

अन्नन्ताः—

सीमन् शब्दः (सीमा)-राजन्शब्दवत्। सीमा सीमानौ सीमानः, हे सीमन्-मानौ-नः, सीमानम्-नौ सीम्नः सीम्ना सीमभ्याम्-भिः, सीम्ने-मभ्याम-भ्यः, सीम्नः-मभ्याम्-भ्यः, सीम्नः-म्नोः-म्नाम्, सीम्नि सीमनि सीम्नोः सीमसु। एवं पामन् प्रभृतयः।

भकारान्ताः—

ककुभ् शब्दः (दिशा)—सौ हल्ङ्यादिलोपे जश्त्वचर्त्वविकल्पे ककुप्-ब् ककुभौ-भः, अजादौ योगः हलादौ जश्त्वे ककुब्भ्यामित्यादि। सुपि जश्त्वचर्त्वयोः ककुप्सु। एवं त्रिष्टुभ्-अनुष्टुभ् प्रभृतयः।

धकारान्ताः—

वीरुध् शब्दः (लता)—सौ हल्ङ्यादिलोपे जश्त्वे चर्त्वे वीरुत्-द् वीरुधौ वीरुधः अजादौ योगः हलादौ जश्त्वे वीरुद्भ्यामित्यादि सुपि वीरुत्सु। एवं क्षुध्-युध्-समिध्-प्रभृतयः।

जकारान्ताः—

स्रज् शब्दः (माला)—सृजधातोः क्विन्प्रत्यये सृजिदृशोर्झल्यमकितीति अमागमे यणि निष्पन्नः। सौ हल्ङ्यादिलोपे क्विन्प्रत्ययस्येति कुत्वे चर्त्वविकल्पे स्रक्-ग्, अजादौ योगे स्रजौ स्रज इत्यादि। हलादौ पदत्वेन कुत्वे स्रग्भ्यामित्यादि, सुपि कुत्वे चर्त्वे षत्वे स्रक्षु। एवं रुज् प्रभृतयः।

दकारान्ताः—

सम्पद् शब्दः (श्रीः)-सौ हल्ङ्यादिलोपे चर्त्वविकल्पे सुपि चर्त्वे अन्यत्र योगमात्रे सम्पत्-द् सम्पदौ-दः सम्पद्भ्याम्-भिः सम्पत्सु इत्यादि। एवं विपद् आपद् शरद् संसद् ककुद् संविद् प्रतिपद् उपनिषद् मृद्—प्रभृतयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चकारान्ताः—

वाच् शब्दः (वाणी)–सौ हल्ङ्यादिलोपे क्विबन्तत्वात् चोःकुरिति कुत्वे जश्त्वचर्त्वविकल्पे वाक्-ग् वाचौ वाचः अजादौ योगः, भ्यामादौ पदत्वेन कुत्वे जश्त्वे वाग्भ्याम्-भिरित्यादि, सुपि पदत्वेन कुत्वे जश्त्वचर्त्वयोः सस्य षत्वे वाक्षु। एवं रुच्-त्वच्-शुच-ऋच्-प्रभृतयः।

तकारान्ताः—

सरित् शब्दः (नदी)–सोर्लोपे जश्त्वचर्त्वविकल्पे सरित्-द्। अजादौ योगे हलादौ जश्त्वे सरितौ सरितः सरिद्भ्याम् सरित्सु। एवं तडित्-विद्युत्-योषित्-समित्-प्रभृतयः।

पकारान्ताः—

अप् शब्दः (जलम्)–नित्यं बहुवचनान्तः। जसि अप्तृन्निति दीर्घे आपः हे आपः। शसाद्यजादि योगः अपः अपाम्। भिसादिषु–अपो भि (७-४-४८) अपस्तकारःस्याद्भादौ प्रत्यये परे। इति पस्य तत्वे पदत्वेन जश्त्वे अद्भिः अद्भ्यः सुपिजश्त्वचर्त्वयोः अप्सु।

शकारान्ताः—

दिश् शब्दः (ककुप्)–ऋत्विग्दधृगिति क्विन्प्रत्ययान्तः। सौ हल्ङ्यादिलोपे व्रश्चेति पत्वे षस्य जश्त्वेन डत्वे डस्य क्विन्प्रत्ययस्येति कुत्वेन गत्वे चर्त्वविकल्पे दिक्-ग्। अजादिषु योगे हलादौ पदत्वेन षत्वे डत्वे गत्वे च दिशौ दिशः दिशा दिग्भ्याम् दिक्षु। सुपि षत्वडत्वगत्वेषु चर्त्वे सुपि षत्वम्। एवं दृश्-विदिश्प्रभृतयः।

वि. दृशः क्विन्तत्वेपि त्यदादिषुदृशेरिति क्विन्विधानात्क्विन्प्रत्ययस्येत्यत्र क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात्किप्यपि क्विन्प्रत्ययस्येति पदान्ते कुत्वम् दृक्-ग् दृग्भ्याम् दृक्षु इत्यादि।

षकारान्ताः—

त्विष् शब्दः (कान्तिः)–सुलोपे जश्त्वचर्त्वयोः त्विट्-ड् त्विषौ त्विषः अजादौ योगः। हलादौ पदत्वेन जश्त्वे त्विड्भ्याम्-भिरित्यादि। सुपि पदत्वेन जश्त्वे धुड्विकल्पे चर्त्वे त्विट्त्सु त्विट्सु। एवं रुष्-तृष्-विप्रुष्-विष् प्रभृतयः। प्रावृष् शब्दस्तु प्रायो बहुवचनान्त एव प्रयुज्यते प्रावृषः प्रावृड्भिः-भ्यः प्रावृट्त्सु प्रावृट्सु।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आशिष् शब्दः (शुभाशंसा)–आङ्पूर्वकशासधातोः क्विपि आशासः क्वावित्युपधाया इत्वे शासिवसीति षत्वे निष्पन्नः। सौ हल्ङ्यादिलोपे रुत्वं प्रति षत्वस्यासिद्धत्वेन ससजुषोरिति रुत्वे र्वोरुपधाया इत्युपधादीर्घे रेफस्य विसर्गे आशीः। अजादिषु योगे आशिषौ-षः-षा इत्यादि, हलादौ पदत्वे षत्वस्यासिद्धत्वाद्रुत्वे र्वोरुपधाया इति दीर्घे आशीर्भ्याम्-भिरित्यादि। सुपि पदत्वे षत्वासिद्ध्या रुत्वे उपधादीर्घे रेफस्य विसर्गे, नुम्विसर्जनीयशर्व्यवायेपि (८-३-५८) एतैः प्रत्येकं व्यवधानेपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्। इति सस्य षत्वे विसर्गस्य वाशरीति पक्षे विसर्गे आशीःषु, विसर्गस्य षत्वपक्षे सस्य ष्टुत्वेन षत्वे आशीष्षु।

सकारान्तः—

भास् शब्दः (कान्तिः)–सुलोपे सस्य रुत्वविसर्गयोः भाः। अजादिषु योगे भासौ भासः इत्यादि, हलादौ पदत्वेन रुत्वे भोभगोरिति यत्वे हलिसर्वेषामिति यलोपे भाभ्याम्-भिरित्यादि, सुपि रुत्वे विसर्गे वाशरीति विकल्पे, पक्षे सत्वे भाःसु भास्सु।

प्रयोगाः—उपानहौ परिधाय। दिवि तारकाः प्रकाशन्ते। तस्य भासा सर्वमिदं विभाति। आशीर्भिः समृद्धोस्मि। गिरामधिदेवतायाः। सर्वाः ककुभो व्याप्नोति। ऋचां पारायणं जगौ। क्षुधा व्याकुलोस्मि। दिवं भूमिं च निर्ममे। युधि वीरा न बिभ्यति। धुरमुद्वोढं समर्थः। वाचमुवाच कौत्सः। अप एव ससर्जादौ।

प्रश्नाः—अप्-प्रावृष् सुमनस्-शब्देषु कतमद्वचनम्। अजादिषु निर्विशेषाः शब्दाः के। क्विन्प्रत्ययान्तेषु को विशेषः। भकारादौ परे अप्–दिव्–शब्दयोः को विशेषः। र्वोरुपधायादीर्घः क्व। अधस्तनवाक्यगतानि हलन्तस्त्रीलिङ्गशब्द-रूपाणि विवृणुत—विद्युदिवास्थिरा सम्पत्। सम्पदि यस्य न हर्षो विपदि विषादः। पुरि पुरि विनिवृत्ता मानिनीमानचर्चा। धुरि धुर्यो नियुज्यते। सतीव योषित्प्रकृतिः सुनिश्चला। समिधमाधेहि। दिशां सीमसु कीर्तयः। स्रग्भिर्विभूषिता द्वारः। समिति लब्धकीर्तयो वीराः। सरितमुत्ततार। त्वचं स मेध्यां परिधाय। शुचं जहौ। वधूर्मधूकस्रजमुत्ससर्ज। सम्पदा सुस्थिरंमन्यः। मधु तिष्ठति वाचि योषिताम्।

हलन्तनपुंसकलिङ्गप्रकरणम्—

हकारान्तः—

स्वनडुह् शब्दः (सद्वृषयुक्त)—शोभना अनड्वाहो यस्य शकटस्येति बहुव्रीहौ सिद्धः। स्वमोर्हल्ङ्यादिलोपं बाधित्वा स्वमोर्नपुंसकादिति लुकि नलुमताङ्गस्येति प्रत्ययलक्षणनिषेधेन चतुरनडुहोरित्यप्रवृत्तौ वसुस्रंसिवति हस्य दत्वे चर्त्वविकल्पे स्वनडुत्-द्। औङः श्यां स्वनडुही। जश्शसोः शौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वनामस्थानसंज्ञायां चतुरनडुहोरित्यमागमे यणि नपुंसकस्येति नुमि नस्यानुस्वारे स्वनड्वांसि। तृतीयादिषु स्वनडुहा स्वनडुद्भ्यामित्यादि पुंवत्।

वकारान्तः—

विमलदिव् शब्दः (निर्मलाकाशयुक्त)—विमला द्यौर्यस्मिन्दिने इति बहुव्रीहौ निष्पन्नः। स्वमोर्लुकि प्रत्ययलक्षणनिषेधेन दिवऔदित्यप्राप्त्या दिवउदिति वकारस्योकारे यणि विमलद्यु। औङः श्यां सा सान्तर्गतदिव्शब्दोत्तरविभक्तेः प्रत्ययलक्षणेन दिवउदित्युत्वप्राप्तौ, उत्तरपदत्वेचापदादिविधौ प्रतिषे (वा) इति प्रत्ययलक्षणनिषेधेनोत्वाभावे विमलदिवी। जश्शसोः शौ अझलन्तत्वान्नुमभा विमलदिवि। तृतीयादौ स्त्रीलिङ्गदिव्शब्दवत् विमलदिवा विमलद्युभ्यामित्यादि।

वि. समासे दिव्शब्दोत्तरविभक्तेः सुपोधात्विति लुका लुप्तत्वेपि पदसंज्ञायाः सुबन्तधर्मत्वेनाङ्गधर्मत्वाभावान्नलुमतेति निषेधाप्रवृत्तेः प्रत्ययलक्षणे पदत्वे उत्वप्राप्त्या वार्तिकेन उत्तरपदस्य पदत्वव्यपदेशे प्रत्ययलक्षणं न भवति पदादिविधिं वर्जयि त्वेति तन्निषेधे पदत्वाभावान्नोत्वम्। राजपुरुष इत्यादौ पूर्वस्य पदत्वेन नलोपसिद्ध्यर्थमुत्तरपदस्येति, दधिसेचावित्य त्तरपदोत्तरलुप्तविभक्तिमादाय पदत्वेन सात्पदाद्योरिति षत्वनिषेधस्योपपत्तये पदादिविधिं वर्जयित्वेत्युक्तम्।

नकारान्ताः—

ब्रह्मन् शब्दः (परब्रह्म)—स्वमोर्लुकि नलोपःप्रातिपदिकेति नलोपे ब्रह्म। औङः श्यामट्कुप्वाङि णत्वे नसंयोगाद्वमन्तादिति निषेधेन विभाषाङिश्योरित्यल्लोपाभावे ब्रह्मणी। जश्शसोः शौ स नामस्थानत्वेन सर्वनामस्थानेचेति दीर्घे णत्वे, ब्रह्माणि। सम्बुद्धौ, सम्बुद्धौ नपुंसकानां नलोपो वाच्यः (वा) इति नलोपविकल्पे हे ब्रह्म हे ब्रह्मन् ब्रह्मणी ब्रह्माणि। तृतीयादौ पुंलिङ्गब्रह्मशब्दव एवं कर्मन्-शर्मन्-वर्मन्-चर्मन्-लक्ष्मन्-सद्मन्-वर्त्मन्-प्रभृतयः।

वि. विधातृ-ब्राह्मण-क्षत्रियबोधका ब्रह्मन्-शर्मन्-शब्दाः पुंसि, परब्रह्म-कल्याण-कवचवाचकास्तु नपुंसके इ र्थतो विशेषः।

अहन् शब्दः (दिनं)—स्वमोर्लुकि प्रत्ययलक्षणाभावेन रोऽसुपीति नस्य रेफादेशे अहः। औङ श्यां विभाषाङिश्योरित्यल्लोपविकल्पे अह्नी अहनी जश्शसोः शौ सर्वनामस्थानत्वेनाल्लोपाभा उपधादीर्घे अहानि। सम्बोधनेप्येवम्। टाद्यजादिषु अल्लोपोन इत्यल्लोपे अह्ना। भ्यामादिहला पदत्वेन, अहन् (८-२-२८) अहन्नित्यस्य रुः स्यात्पदान्ते। इति नस्य रुत्वे हशिचेत्युत्वे गुणेकादे अहोभ्याम्-भिः अह्ने अहोभ्याम्-भ्यः, अह्नः अहोभ्याम्-भ्यः, अह्नः-ह्नोः-ह्नाम्। ङौ विभाषाङिश्यो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रित्यल्लोपविकल्पे अह्नि अहनि अह्नोः। सुपि पदत्वेन अहन्निति रुत्वे विसर्गे वाशरीतिविकल्पे अहःसु अहस्सु।

वि. १ अहःअहोभ्यामित्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते अहन्निति सूत्रमावर्त्य तयोः प्रथमेन पदान्ते अहन्नित्येव स्यान्नतु नलोप इत्यर्थकेन नलोपाभावे द्वितीयेन रुत्वविधिः।

वि. २ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति निषेधस्य प्रत्ययविधिमात्रविषयकत्वेन अहन्शब्दान्तस्यापि रत्वरुत्वे, तेन दीर्घाण्यहानि यस्मिन्निति समासे पुंलिङ्गे दीर्घाहा निदाघः। इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन असुपीतिनिषेधाद्रत्वाभावे रुः तस्यासिद्धत्वान्नान्तलक्षण उपधादीर्घः। सम्बुद्धौ हल्ङ्यादिलोपे प्रत्ययलक्षणेन असम्बुद्धावित्युक्तोपधादीर्घाभावे रुत्वोत्वयोः हे दीर्घाहः निदाघः दीर्घाहानौ दीर्घाहानः दीर्घाह्ना दीर्घाहोभ्यामित्यादि।

नामन् शब्दः (संज्ञा)—स्वमोर्लुकि नलोपे नाम। औङः श्यां विभाषाङिश्योरित्यल्लोपविकल्पे नाम्नी नामनी। जश्शसोः शौ सर्वनामस्थानत्वेनाल्लोपाभावे उपधादीर्घे नामानि। सम्बुद्धौ हल्ङ्यादिलोपे सम्बुद्धौ नपुंसकानामिति नलोपविकल्पे हेनाम हेनामन् नाम्नी नामनी नामानि। टाद्यजादिषु अल्लोपे नाम्ना, हलादौ पदत्वेन नलोपे नामभ्याम्-भिः, नाम्ने-मभ्याम्-भ्यः, नाम्नः-म्नो-म्नाम्, ङौ विभाषाङीत्यल्लोपविकल्पे नाम्नि नामनि नाम्नोः नामसु। एवं दामन्-सामन्-धामन्-व्योमन्-रोमन्-प्रेमन्-हेमन्-प्रभृतयः,

इन्नन्तः केशिन् शब्दः (केशवत्)—स्वमोर्लुकि नलोपे केशि, औङ श्यां केशिनी। जश्शसोः शौ इन्हन्नित्युपधादीर्घे केशीनि। सम्बुद्धौ स् लोपे नलोपविकल्पे हे केशिन्-शिनी-शीनि। टाद्यजादिषु योगे भ्यामादौ नलोपे णत्ववर्जं शार्ङ्गिन्शब्दवत् केशिना केशिभ्याम् भिरित्यादि। एवं दण्डिन्-योगिन्प्रभृतय इन्नन्ताः।

जकारान्तः—

असृज् शब्दः (रुधिरम्)—स्वमोर्लुकि सम्पदादित्वात्क्विबन्तत्वेपि ऋत्विग्दधृगिति सृजेः क्विन्विधानाक्विन्प्रत्ययस्येति कुत्वप्राप्तौ तदसिद्धतया चोःकुरिति प्राप्तं कुत्वं बाधित्वा व्रश्चेति षत्वे षस्य क्विन्प्रत्ययस्येति कुत्वेन खत्वे जश्त्वचर्त्वविकल्पे असृक्-ग्। औङः श्याम् असृजी। जश्शसोः शौ नपुंसकस्येति नुम्यनुस्वारपरसवर्णयोः असृञ्जि संबोधनेप्येवम्। टाद्यजादिषु योगे असृजा असृजे असृज इत्यादि, हलादौ पदत्वेन षत्वे कुत्वे जश्त्वे असृग्भ्यामित्यादि। सुपि षत्वकुत्वजश्त्वचर्त्वेषु सुपः षत्वे असृक्षु। शसादिषु पक्षे पद्दन्निति आसन्नादेशे शौ नान्तत्वादुपधादीर्घे असानि। टादिष्वल्लोपोन इत्यल्लोपे अस्ना, हलि पदत्वेन नलोपे असभ्याम्-भिः, अस्ने असभ्याम्-भ्यः अस्नः-सभ्याम्-भ्यः, अस्नः-स्नोः-स्नाम्, ङावल्लोपविकल्पे अस्नि असनि अस्नोः असस्सु इत्यपि रूपाणि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दकारान्ताः—

हृद् शब्दः (हृदयं)-स्वमोर्लुकि चर्त्वविकल्पे, औङः श्यां, जश्शसोः शौ नुमनुस्वारपरसव टादिषु योगे, सुपि चर्त्वे हृत्-द्-हृन्दी हृन्दि, हृदा हृद्‌भ्याम्-भिः हृदे हृदः हृदि हृत्सु इत्यादि। भिद्-छिद्-प्रभृतयः।

चकारान्तः—

प्राच् शब्दः (पूर्वः)-प्रकर्षेणाञ्चतीत्यर्थे ऋत्विग्दधृगिति क्विन्प्रत्यये गतौ नलोपे निष्पन्न स्वमोर्लुकि क्विन्प्रत्ययस्येति कुत्वे प्राक्-ग्, औङः श्यां प्राची, जश्शसोः शौ नुम्यनुस्वारपरसवर्ण प्राञ्चि, पूजायां तु नलोपाभावे प्राञ्च् शब्दः। स्वमोर्लुकि नुमभावे संयोगान्तचलोपे नस्य कु प्राङ्, औङः श्यां प्राञ्ची जश्शसोः शौ प्राञ्चि, तृतीयादौ पुंवत्। एवं पराच् अवाच् उदच् प्रत तिरश्च्-शब्दानां पराक्-ग् पराची पराञ्चि, पराङ् पराञ्ची पराञ्चि; अवाक्-ग् अवाची अवा अवाङ् अवाञ्ची अवाञ्चि; उदक्-ग् उदीची, उदईत् उदञ्चि, उदङ् उदञ्ची उदञ्चि; प्रत्यक्-ग् प्रतं प्रत्यञ्चि, प्रत्यङ् प्रत्यञ्ची प्रत्यञ्चि; तिरसस्तिर्यादेशे तिर्यक्-ग् तिरश्ची तिर्यञ्चि, तिर्यङ् तिर्य तिर्यञ्चि इत्यादि। शेषं पुंवत्।

वि. गामञ्चतीति विग्रहे गोपूर्वादञ्चतेः ऋत्विग्दधृगित्यादिना क्विन्प्रत्यये गत्यर्थे नलोपे पूजायां नलोपा अवङ् स्फोटायनस्येत्यवङि पक्षे सर्वत्रविभाषागोरिति प्रकृतिभावे पक्षे पूर्वरूपे च प्रस्तारभेदेन स्वमोः गवा गोअक्-ग् गोक्-ग्-, गवाङ् गोअङ् गोङ् औङः-श्यां-गतौ भत्वादच इत्यल्लोपे गोची, पूजायां गवाञ्ची गोअञ्ची गो जश्शसोः शौ नुमि गतौ पूजायां च गवाञ्चि गोअञ्चि गोञ्चि, टादौ अचि गवाञ्चा गोअञ्चा गोञ्चा इत्यादि। हलादौ ग ग्भ्याम् गोअग्भ्याम् गोग्भ्याम्, गवाङ्भ्याम् गोअङ्भ्याम् गोङ्भ्यामित्यादि सुपि गतौ गवाक्षु गोअक्षु गो पूजायां ङान्तानां पक्षे ङ्णोः कुगिति कुकि गवाङ्क्षु गोअङ्क्षु गोङ्क्षु गवाङ्षु गोअङ्षु गोङ्षु इति। अय संग्रहः—गवाक्‌शब्दस्य रूपाणि क्लीवेर्चागतिभेदतः;असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम्। स्वम्सुप्सु नव षड् षट्के स्यु-स्त्रीणि जश्शसोः। चत्वारि शेषे दशके रूपाणीति विभावय॥ तत्राप्यन्त्यानांहलाम् अनचिचेति द्वित्व कल्पे स्वरस्य अणोप्रगृह्यस्येत्यनुनासिकविकल्पे च ५२७ रूपाणि प्रस्तारभेदेन भवन्ति। उक्तं च—ऊह्यमेषां द्विर्वच नुनासिकविकल्पनात्। रूपाण्यश्वाद्रिभूतानि भवन्तीति मनीषिभिरिति॥

तकारान्ता:—

जगत्‌शब्दः (लोकः) स्वमोर्लुकि जश्त्वचर्त्वविकल्पे औङः श्यां, जश्शसोः शौ नुम्यनुस्वारप सवर्णयोः, टाद्यजादिषु योगे हलादौ जश्त्वे सुपि चर्त्वे च जगत्-द् जगती जगन्ति जगता जगद्भ्या भिरित्यादि। एवं वियत्-शकृत्-यकृत्प्रभृतयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. शसादिषु शकृत्–यकृत्–शब्दयोः पद्दन्निति पक्षे शकन् यकन् इत्यादेशयोः असृज्शब्दस्यासन्नादेश इव शकानि शक्ना शकभ्याम् शक्ने शक्नः शक्नि शकनि शकसु, यकानि यक्ना यकभ्याम् यक्ने यक्नः यक्नि यकनि यकसु इत्यादि रूपान्तराण्यपि भवन्ति ।

षकारान्ता :—

धनुष् शब्दः (कार्मुकम्)–धनेरुस्प्रत्यये षत्वे निष्पन्नः। स्वमोर्लुकि षत्वस्यासिद्धत्वात्ससजुषोरिति रुत्वे विसर्गे धनुः। औङः श्यां धनुषी। जश्शसोः शौ नुमि षत्वस्यासिद्धत्वात्सान्तमहत इति दीर्घे नुम्विसर्जनीयेति षत्वे नश्चेत्यनुस्वारे धनूंषि। अजादिषु योगे भ्यामादिषु पदत्वेन षत्वस्यासिद्धत्वाद्रुत्वे सुपि रुत्वविसर्गयोर्वाशरीति विकल्पे धनुषा धनुर्भ्याम् -भिः, धनुषे-र्भ्याम्-र्भ्यः, धनुषः-र्भ्याम्-र्भ्यः धनुषः-षोः-षाम्, धनुषि-षोः धनुःषु धनुष्षु। एवं चक्षुष्-सर्पिष्-यजुष्-हविष्-वपुष्-आयुष्-प्रभृतय इस्-उसन्ताः ।

सकारान्ताः—

पयस् शब्दः (जलं दुग्धं च)-स्वमोर्लुकि रुत्वविसर्गयोः पयः, औङः श्यां पयसी, जश्शसोः शौ नुमि सान्तमहतइति दीर्घे नश्चेत्यनुस्वारे पयांसि। अजादिषु योगे हलादौ पदत्वेन रुत्वे हशिचेत्युत्वे गुणे, सुपि रुत्वविसर्गयोर्वाशरीति विकल्पे पयसा पयोभ्याम्-भिः, पयसे-योभ्याम्-भ्यः, पयसः-योभ्याम्-भ्यः, पयसः-सोः साम्, पयसि-सोः पयःसु पयस्सु। एवं मनस्-यशस्-सरस्-तपस्-रजस्-वचस्-नभस्-अनस्-ओजस्-प्रभृतयः।

प्रयोगाः—दाम्ना बद्ध उलूखले। ब्रह्मणि स्थितः। पुरस्कृता वर्त्मनि पार्थिवेन। बहुभिरहोभिरागतः। अन्हां शतं व्यतीयाय। पतत्यधो धाम विसारि सर्वतः। जगन्ति यस्यां सविकासमासत। पयः पिब। यशसा दिशो भासय। धनुष्टङ्कारः। हृदि प्रेमाभिवर्धते। मनसा कर्मणा वाचा।

प्रश्नाः—पुंनपुंसकयोर्ब्रह्मशब्दयोः को विशेषः। अहन्शब्दे किं विशेषकार्यम्। इन्नन्तशब्दे को विशेषः। नान्तानां सम्बुद्धौ नलोपो न वा। अधस्तन वाक्यगतानि हलन्तनपुंसकशब्दरूपाणि विवृणुत—

अनांस्यनडुद्युक्तानि। जुहोति हविरर्चिषि। धनुष्यमोघं समधत्त सायकम्। यशोभिर्भूषितं जगत्। असंख्यानि लोमानि शिरसि। शर्म सद्मनि वर्त्मनि। हेम्नो रूपं मनोहरम्। ऋचो यजूंषि सामानि। हरेर्नामैव शर्मदम्। वर्मणा छन्नगात्रः। रजसा छादिता दिशः। अहनि सूर्यः प्रकाशते। व्योम्नि त्वं व्योमरूपोसि तेजः सर्वत्र तेजसि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वनामप्रकरणम्

सर्वनामानि द्विधा-सर्वादीनि त्यदादीनि च। त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः। सर्वादीनि सर्व- मानि (१-१-२७) सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। सर्वादीनितु-सर्व विश्व उभ उ- डतर-डतम-प्रत्ययान्त अन्य अन्यतर इतर त्वत् त्व नेम सम सिम, पूर्वपरावरदक्षिणोत्तरापराधरा- व्यवस्थायामसंज्ञायाम् (गण) (संज्ञाभिन्ना नियमेनावधिसापेक्षार्थबोधकाः पूर्वादिशब्दाः। स्वमज्ञाति- ख्यायाम् (गण) ज्ञातिधनभिन्नवाचकः स्वशब्दः। अन्तरं बहिर्योगोपसंव्यानयोः (गण) (बाह्य-प- धानीयवस्त्रवाचको ऽन्तरशब्दः) इति। त्यदादीनि तु-त्यद्, तद्, यद्, एतद्, इदम् अदस्, एक, युष्मद्, अस्मद्, भवतु (त्) किम् इति। एतानि पञ्चत्रिंशत्सर्वनामानि।

वि. १ सर्वेषां नाम्नां बोधकतया सर्वनामान्यन्वर्थानि, सर्वादीनि रूपविशेषानुरूप्येण सर्वनामसु गणितानि, त्यदादी- सर्वभाषासंमतानि सर्वनामानि। त्यदादीन्यपि सर्वादिषु गण्यन्ते, तथापि त्यदादेः संबोधनाभावेन पृथग्विभागः। संज्ञोपस- भूतास्तु न सर्वादयः, महासंज्ञाकरणेन सर्वार्थबोधानुगुणानामेवात्र गणे सन्निवेशात्, अतस्तादृशानां सर्वनामका- भवति; यथा सर्वो नाम कश्चित् तस्मै सर्वाय, अतिक्रान्तः सर्वमतिसर्वः तस्मात् अतिसर्वात्। कतरदतिक्रान्तमति- कुलम्। अतश्च विष्णुसहस्रनामादिपठितानां सर्वयत्तत्किमादिसंज्ञाशब्दानामसर्वनामतया नमो योगे सर्वाय यदे- काय नम इत्येव, नतु सर्वस्मै यस्मै तस्मै कस्मै नम इति प्रयोज्यम्।

वि. २ सर्वादीनीत्यत्र सर्व आदिर्यस्य समुदायस्येति तद्गुणसंविज्ञानो बहुव्रीहिः, तेन सर्वशब्दघटितः समुदायः- सार्थः; समुदायेऽचरितार्था संज्ञा आनर्थक्यात्तदङ्गेष्विति न्यायेनावयवेष्ववतरन्ती अविशेषात्सर्वशब्देपि भवति, सर्वेषामिति लिङ्गात्। सर्वाद्यन्तस्याप्यनुपसर्जनस्येयं संज्ञा, द्वन्द्वे चेति ज्ञापकात्; तेन परमसर्वत्रेति त्रल्, परम- कानित्यकच्च सिद्ध्यति।

वि. ३ सर्वनामानि त्रिलिङ्गानि। अर्थत एकशब्द एकवचनान्त एव, उभद्विशब्दौ द्विवचनान्तावेव, उभयश- द्विवचनमस्ति नास्तीति मतभेदः। डतर-डतम-प्रत्ययान्ताः कतर-कतम-यतर-यतम-ततर-ततम-शब्दाः, अन्यतरा- शब्दौ स्वभावाद्द्विबहुविषये निर्धारणे वर्तेते, तयोरन्यतरशब्दः सर्वनाम, नत्वन्यतमशब्दः। त्वत्-त्वशब्दावन्या- क्वाचित्कौ। समशब्दः सर्वपर्यायोत्र गृह्यते तुल्यपर्यायस्तु न, यथासंख्यमनुदेशः समानामिति ज्ञापकात्। सिमशब्दः- बोधकः, नेम इत्यर्धे, एतौ क्वाचित्कौ। पूर्वादयः सप्त शब्दा नियमेनावधिसापेक्षार्थबोधकाः संज्ञाभिन्ना एवेह गृह्यन्ते, इशास्तु न, दक्षिणा गाथकाः कुशला इत्यर्थः, उत्तराः कुरवः देशविशेषा इत्यर्थः। स्वशब्द आत्मात्मीयवाचक- गृह्यते, ज्ञातिधनवाची तु न, स्वाः ज्ञातयोऽर्था वा। अन्तरशब्दोबाह्य-परिधानीययोर्वाचक एवेह गृह्यते, तत्रापि पूः- अविशेषणीभूत एव, नेह अन्तरायां पुरि अन्तरायां न-गर्याम्। त्यदादिषु त्यच्छब्दः क्वाचित्कः। एका द्विशब्दौ विशेषणी- वपि रूपानुसारेणात्र गणितौ। भवच्छब्दो भातेर्डवतुप्रत्यये निष्पन्न एवेह गृह्यते, नतु भवतेः शतृप्रत्यये निष्पन्नः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स. प्र.

सर्वनामविशेषविधयः—

जसः शी (७-१-१७) अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। सर्वनाम्नः स्मै(७-१-१४) अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्। ङसिङ्योः स्मात्स्मिनौ (७-१-१५) अतः सर्वनाम्न एतयोरेतौ स्तः। आमि सर्वनाम्नः सुट् (७-१-५२) अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्। टित्वेन आद्यवयवः सकारः। स्त्रियाम्–सर्वनाम्नः स्याड्ढ्रस्वश्च (७-३-११४) आबन्तात्सर्वनाम्नः परस्य ङितः स्याडागमः स्यादापश्च ह्रस्वः। शेषं पुंसि रामवत्, स्त्रियां रमावत्, क्लीबे ज्ञानवत्।

सर्वादीनि-त्रिलिङ्गानि—

सर्वशब्दः त्रिलिङ्गः स्त्रियां टाबन्तः। पुंसि-सर्वः सर्वौ सर्वे पूर्वसवर्णदीर्घं बाधित्वा जसः शीति श्यादेशे पश्चात्प्राप्तस्य नादिचीति निषेधे गुणः। हे सर्व-र्वौ-र्वे। सर्वम्-र्वौ-र्वान्, सर्वेण-र्वाभ्याम्-र्वैः। ङयि स्मैइत्यादेशे सर्वस्मै-र्वाभ्याम्-र्वेभ्यः, ङसि स्मादादेशे सर्वस्मात्-र्वाभ्याम् र्वेभ्यः, सर्वस्य सर्वयोः, आमि सुडागमे बहुवचन इत्येत्वे षत्वे सर्वेषाम्। ङौ स्मिन्नादेशे सर्वस्मिन् सर्वयोः सर्वेषु। क्लीबे-सर्वम् सर्वे सर्वाणि हे सर्व-र्वे सर्वाणि, सर्वम्-र्वे-र्वाणि। तृतीयादौ पुंवत्। स्त्रियाम्-सर्वा सर्वे सर्वाः, हे सर्वे सर्वे-र्वाः सर्वाम्-र्वे-र्वाः, सर्वया-र्वाभ्याम्-भिः। ङयि याडागमं बाधित्वा स्याडागमे पूर्वाकारह्रस्वे च वृद्धौ सर्वस्यै-र्वाभ्याम्-भ्यः, ङसिङसोः स्याडागमे, आपो ह्रस्वे सवर्णदीर्घे रुत्वविसर्गयोः सर्वस्याः-र्वाभ्याम्-भ्यः, सर्वस्याः सर्वयोः, टावासहैकादेशस्य सवर्णदीर्घस्य पूर्वान्तत्वेन लिङ्गविशिष्टपरिभाषया सर्वाशब्दस्यापि सर्वनामतया आमि नुटं बाधित्वासुडागमे सर्वासाम्। ङौ ङेरामित्यामादेशे परत्वात् सुटं बाधित्वा स्याडागमे आपो ह्रस्वे सवर्णदीर्घे सर्वस्याम् सर्वयोः सर्वासु। एवं विश्वादयोऽप्यकारान्ताः।

वि. सर्वविश्वशब्दयोः कृत्स्नवाचित्वेपि विवक्षितवर्गव्यक्तिसर्वबोधकत्वेन वर्गव्यक्तिभेदमादाय द्विबहुवचनयोः प्रयोगो भवति; यथा मित्रसेना शत्रुसेना च सर्वे युद्धाय संनद्धे। रामः कृष्णः शिवश्च सर्वे पूज्याः। क्वचिदेकवचनेनापि सर्वेषां बोधः यथा-मत्तः सर्वं प्रवर्तते, सर्वस्य जगतः प्रभुः, विश्वस्य लोकस्येशः।

डतरडतमप्रत्ययान्तानां कतरकतमादीनामन्यान्यतरेतरशब्दानां च पुंसि सर्ववत्, स्त्रियामाबन्तानां सर्वावत् रूपाणि। क्लीबेतु स्वमोः सम्बुद्धौ च अद्ड्डतरादिभ्यः पञ्चभ्यः (७-१-२५) एभ्यः क्लीबेभ्यः स्वमोरदडादेशः स्यात्। इत्यदादेशे, टेः (६-४-१४३) डिति परे भस्य टेर्लोपः स्यात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यन्त्याकारलोपे अवसानदकारस्य चर्त्वविकल्पे कतरत्-द्, अन्यत्-द् अन्यतरत्-द् इतरत्-द्। शेषं कतरे कतराणीत्यादि सर्वशब्दवत्। एवं यतर-यतम-ततर-ततम-शब्दानाम्।

वि. एकतरशब्दस्य एकाच्प्राचामिति डतरप्रत्ययान्ततया स्वमोरद्डादेशे प्राप्ते एकतरात्प्रतिषेधो वक्तव्यः (वा) इति निषेधेन एकतरम्-तरे-तराणीत्यादि सर्वशब्दवत्। अन्यतमशब्दस्तु अव्युत्पन्नप्रातिपदिकस्वरूपो नतु डतमप्रत्ययान्त इति नात्र अद्डादेशो, नवा सर्वादिकार्याणीति तस्य राम-रमा-ज्ञानशब्दवद्रूपाणि।

प्रयोगाः—सर्वस्य लोचनं शास्त्रम्। विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः। अ... दुरुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम्। कतमद्भवते रोचते। अन्यस्मै दीयतामिदम्। वि... सर्वेषां नयनान्युन्मीलन्ति। सर्वासां नारीणां सतीत्वं परमो धर्मः। सर्वे स्वदेशं गताः। सर्वस्या भु... पतिः। सर्वस्मिन्नात्मास्ति।

सर्वनामसु विशेषाः—

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् (१-१-३४) एतेषामसंज्ञायां गणपाठात्सर्वत्र प्राप्ता सर्वनामसंज्ञा जसि वा स्यात्। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। नियमेनावधिसापेक्षार्थे वर्तमानानां पूर्वादिशब्दानां जसि सर्वनामसंज्ञा विकल्पेन भवतीत्यर्थः। स्वमज्ञातिधनाख्यायाम् (१-१-३५) ज्ञातिधनभिन्नवाचिनः (आत्मात्मीयवाचिनः) स्वशब्दस्य गणपाठात्सर्वत्र प्राप्ता सर्वनामसंज्ञा जसि वा स्यात्। अन्तरं बहिर्योगोपसंव्यानयोः (१-१-३६) बा... परिधानीये चार्थे वर्तमानस्यान्तरशब्दस्य गणपाठात्सर्वत्र प्राप्ता सर्वनामसंज्ञा जसि वा स्या... पूर्वादिभ्यो नवभ्यो वा (७-१-१६) पूर्वादिभ्यो नवभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्त... पूर्वशब्दः पुंसि-पूर्वः पूर्वौ, जसि सर्वनामसंज्ञाविकल्पेन तत्पक्षे श्यादेशे पूर्वे, अन्यत्र पूर्वाः, हे पू... र्वौ-र्वे-र्वाः, पूर्वम्-र्वौ-र्वान्, पूर्वेण-र्वाभ्याम्-र्वैः, पूर्वस्मै-र्वाभ्याम्-र्वेभ्यः, ङसौ स्माद्विकल्पे पूर्वस्मा... पूर्वात्-र्वाभ्याम्-र्वेभ्यः, पूर्वस्य-र्वयोः-र्वेषाम् ङौ स्मिन्विकल्पे पूर्वस्मिन् पूर्वे-र्वयोः-र्वेषु। क्लीं... पूर्वम्-र्वे-र्वाणि, हेपूर्व-र्वे-र्वाणि, पूर्वम्-र्वे-र्वाणि। तृतीयादौ पुंवत्। स्त्रियाम्-पूर्वा-र्वे-र्वाः, पूर्वे-र्वे-र्वाः, पूर्वाम् र्वे-र्वाः, पूर्वया-र्वाभ्याम्-र्भिः, पूर्वस्यै-र्वाभ्याम्-र्भ्यः, पूर्वस्याः-र्वाभ्याम्-... पूर्वस्याः-र्वयोः-र्वासाम्, पूर्वस्याम्-र्वयोः-र्वासु। एवं पराऽवरदक्षिणोत्तराऽपराऽधर-स्वाऽन्तर-शब्दाः। नबहुव्रीहौ (१-१-२९) बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्। तेन त्वकं पि... यस्य त्वत्कपितृकः अहकं पिता यस्य मत्कपितृक इति बहुव्रीहौ सर्वनामत्वाभावेन अव्ययस... नाज्ञामकच्प्राक्टेरिति नाऽकच्, किन्तु क एव। तृतीयासमासे (१-१-३०) अत्र सर्वनामसंज्ञा न स्यात्। मासेन पूर्वो मासपूर्वस्तस्मै मासपूर्वाय, तस्मात् मासपूर्वात्, तस्मिन् मासपूर्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स.ना.

तृतीयासमासार्थवाक्येपि न, मासेन पूर्वाय,-पूर्वात्,-पूर्वे। एवं शब्दान्तरेष्वपि। द्वन्द्वे च (१-१-३१) द्वन्द्वे सर्वनामसंज्ञा न स्यात्। वर्णाश्च आश्रमाश्च इतरे च तेषां वर्णाश्रमेतराणाम्। अत्र सर्वनामसंज्ञानिषेधेन न सुट्। विभाषा जसि (१-१-३२) जसाधारे शीभावे कर्तव्ये द्वन्द्वे सर्वनामसंज्ञा वा स्यात्। तेन शीविकल्पे वर्णाश्रमेतरे वर्णाश्रमेतराः।

वि. १ कृते बहुव्रीहौ तु अन्यपदार्थप्रधानतया संज्ञोपसर्जनीभूतास्तु न सर्वादयः इत्यनेनैव गतार्थतया सूत्रवैयर्थ्यात् चिकीर्षिते इत्युक्तम्, तेन लौकिकविग्रहवाक्ये सर्वनामतया अकचि सत्यपि अलौकिकविग्रहावस्थायामेव सर्वनामत्वनिषेधेनाऽकजभावात्कप्रत्यय एव, अन्यथा समासोत्तरमुपसर्जनत्वेनाभावेपि अलौकिकविग्रहावस्थायां सर्वनामत्वेऽकच्सम्भवात्समासे तच्छ्रवणं जायेत।

वि. २ विभाषादिक्समासे बहुव्रीहावित्यतः समास इत्यनुवर्तमाने पुनः समासग्रहणेन तृतीयासमासीयलौकिकविग्रहवाक्यरूपगौणसमासस्यापि ग्रहणात्तृतीयासमासार्थवाक्येपि सर्वनामतानिषेधः।

वि. ३ द्वन्द्वेचेति समुदायस्यैव निषेधो नत्ववयवानाम्। नचैवमितरशब्दस्य सर्वनामतया तदन्तविधिना वर्णाश्रमेतराणामित्यत्र सुट्प्रसङ्गः, सर्वनाम्नोविहितस्यामः सुडितिव्याख्यानात्; अत्राऽऽमः समुदायादेव विहितत्वात् तस्यचाऽसर्वनामत्वात्, इतरशब्दमात्रस्य सर्वनामत्वेप्यामस्ततो विहितत्वाभावेन सुटोऽप्रसक्तेः।

वि. ४. विभाषा जसीत्यत्र जस्-इ इतिसूत्राद्व्युत्पत्तिवैचित्र्येण जस्स्थानिके शीभावे कर्तव्ये इति विशेषार्थेन कार्यान्तरे सर्वनामत्वाभावात् वर्णाश्रमेतरकाइत्यत्र क एव नाकच्।

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च (१-१-३३) एते जसः कार्यं प्रति सर्वनामसंज्ञा वा स्युः। तेन प्रथमादिशब्दानां जसि सर्वनामसंज्ञायां शीभावोऽन्यत्र न। तयप्प्रत्ययस्तेन तदन्ता ग्राह्याः। प्रथमे प्रथमाः, चरमे चरमाः, द्वितये द्वितयाः, अल्पे अल्पाः, अर्धे अर्धाः, कतिपये कतिपयाः। एषां सर्वादिष्वपाठात् शेषं रामशब्दवत्। नेमे नेमाः। अस्य सर्वादौ पाठाच्छेषं सर्वशब्दवत्। क्लीबे प्रथमम् प्रथमे प्रथमानीत्यादि ज्ञानशब्दवत्। स्त्रियां टापि प्रथमा-मे-माः इत्यादि रमाशब्दवत्। एवं चरमाल्पकतिपयशब्दानां त्रिषु लिङ्गेषु रूपाणिअन्येषां प्रायः पुंस्येव। विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् (वा) इति तीयप्रत्ययान्तयोर्द्वितीयतृतीयशब्दयोर्ङिद्विभक्तिषु सर्वनामसंज्ञाविकल्पेन पुंनपुसकयोः ङयि द्वितीयस्मै द्वितीयाय, तृतीयस्मै तृतीयाय, ङसौ द्वितीयस्मात् द्वितीयात्, तृतीयस्मात् तृतीयात्, ङौ द्वितीयस्मिन् द्वितीये, तृतीयस्मिन् तृतीये इति रूपद्वयम्, अन्यत्र रामज्ञानशब्दवत्। स्त्रियां-विभाषा द्वितीयातृतीयाभ्याम् (७-३-११५) आभ्यां ङितो वा स्याट् स्यादापश्च ह्रस्वः। इति स्याड्ढ्रस्वयोर्विकल्पेन ङयि द्वितीयस्यै द्वितीयायै, तृतीयस्यै तृतीयायै, ङसिङसोः द्वितीयस्याः द्वितीयायाः तृतीयस्याः तृतीयायाः, ङौ द्वितीयस्याम् द्वितीयायाम्, तृतीयस्याम् तृतीयायाम् इति रूपद्वयम्, अन्यत्र रमाशब्दवत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. विभाषाद्वितीयेति सूत्राभावेपि विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानमिति वार्तिकेन पुंसीव स्त्रियामपि ङित्सु सर्वनामताविकल्पेन स्याड्ढ्रस्वविकल्पसिद्धेरिदं सूत्रं त्यक्तुं शक्यम् ।

विभाषा दिक्समासे बहुव्रीहौ (१-१-२८) अत्र सर्वनामसंज्ञा वा स्यात् । उत्तरस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा दिक् उत्तरपूर्वा इति दिङ्नामान्यन्तराल इति बहुव्रीहिसमासे निष्पन्नस्य उत्तरपूर्वाशब्दस्य सर्वनामसंज्ञाविकल्पेन स्याडागमस्य सुटश्च विकल्पे ङयि उत्तरपूर्वस्यै-र्वायै, ङसिङसोः उत्तरपूर्वस्याः-र्वायाः, आमि उत्तरपूर्वासाम्-र्वाणाम्, ङौ उत्तरपूर्वस्याम्-र्वायाम् इति रूपद्वयम् । शेषं रमावत् । एवं दक्षिणपूर्वा-पूर्वोत्तरा-दक्षिणोत्तरादीनाम् ।

वि. दिङ्नामान्यन्तराल इति प्रतिपदोक्तस्य दिक्समासस्येह ग्रहणान्नेह-या उत्तरा सा पूर्वा यस्या उन्मुग्धायाः सा उत्तरपूर्वा नारी, तस्यै उत्तरपूर्वायै । बहुव्रीहिग्रहणं स्पष्टार्थम् । गौणत्वादप्राप्ते विभाषेयम्, नतु नबहुव्रीहाविति निषेधे प्राप्ते, तस्य अलौकिकप्रक्रियावाक्यगतसर्वादिविषयकत्वात्, अस्य तु समासविषयकत्वात् ।

प्रयोगाः—वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः । नगरात्पूर्वस्यां दिशि मन्दिरम् । दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि । प्रथमे छात्राः प्रशस्यन्ते । द्वितीयस्मै दीयतामिदम् । तत्र दक्षिणपूर्वस्यां वापी । प्रतस्थे दक्षिणां दिशम् । चरमे वयसि स्थितः ।

त्यदादीनि त्रिलिङ्गानि—

तद् शब्दः–पुंसि,सौ; **त्यदादीनामः (७-२-१०२)** एषामकारोऽन्तादेशः स्याद्विभक्तौ । इत्यन्त्यदकारस्य अत्वे त अस् इत्यत्र सवर्णदीर्घं बाधित्वा अतोगुणे इति पररूपे, **तदोः सः सावनन्त्ययोः (७-२-१०६)** त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ परे । इति तस्य सत्वे रुत्वविसर्गयोः सः । औङादिषु विभक्त्युत्पत्त्यनन्तरं त्यदादीनाम इत्यत्वे पररूपे त-इतिशब्दस्वरूपे अकारान्तशब्दकार्येषु सर्वादिगणविशेषकार्येषु च सर्वशब्दवद्रूपाणि, तौ ते, तम् तौ तान्, तेन ताभ्याम् तैः, तस्मै ताभ्याम् तेभ्यः, तस्मात् ताभ्याम् तेभ्यः, तस्य तयोः तेषाम् तस्मिन् तयोः तेषु । क्लीबे-स्वमोर्लुकि प्रत्ययलक्षणाभावात् विभक्त्यभावेन अत्वपररूपसत्वाभावेऽन्त्यदकारस्य चर्त्वविकल्पे तत्-द्, औङादावत्वे पररूपे त-इतिशब्दस्वरूपानन्तरं श्यादौ ते तानि, तृतीयादौ पुंवत् । स्त्रियाम्-अत्वपररूपोत्तरं टापि सवर्णदीर्घे ता इत्याकारान्तशब्दरूपोत्तरमावन्तशब्दकार्येषु सर्वादिविशेषकार्येषु च सर्वाशब्दवद्रूपाणि-सा ते ताः, ताम् ते ताः, तया ताभ्याम् -भिः, तस्यै ताभ्याम्-भ्यः; तस्याः ताभ्याम्-भ्यः, तस्याः तयोः तासाम्, तस्याम् तयोः तासु ।

वि. त्यदादीनाम इत्यत्र द्विपर्यन्तानामेवेष्टिः इत्युक्त्या युष्मदस्मद्भवत्किम्शब्दवर्जंत्यदादिष्वस्य प्रवृत्तिः, त्यच्छन्दस्तु न व्यावहारिकः । त्यदादीनां सम्बोधनं नास्तीत्युत्सर्गः । संज्ञोपसर्जनीभूतास्तु न सर्वादय इत्युक्तम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स.ना.प्र.

यद् शब्दः- अस्यापि पुंसि त्यदादीनाम इत्यत्वे पररूपे य-इत्यदन्तं क्लीबेऽप्यौङादावत्वे पररूपे तथैव शब्दस्वरूपं, स्त्रियामत्वे पररूपे टापि सवर्णदीर्घे या-इत्यावन्तं शब्दस्वरूपम्। ततस्तदोः इतिसत्ववर्जं सर्वाणि कार्याणि तच्छब्दवदेव। पुंसि यः यौ ये, यम् यौ यान्, येन याभ्याम् यैः, यस्मै याभ्याम् येभ्यः, यस्मात् याभ्याम् येभ्यः; यस्य ययोः येषाम्, यस्मिन् ययोः येषु। क्लीबे यत्-द् ये यानि, तृतीयादौ पुंवत्। स्त्रियां या ये याः, याम् ये याः, यया याभ्याम्-भिः, यस्यै याभ्याम्-भ्यः, यस्याः याभ्याम्-भ्यः, यस्याः ययोः यासाम्, यस्याम् ययोः यासु।

वि. यच्छब्दः पूर्वापरसम्बन्धं बोधयति, तेनैकस्मिन्वाक्ये यच्छब्दसत्त्वे वाक्यान्तरे तत्समानाधिकरणपदार्थनिर्देशकास्तदेतदिदम्शब्दा भवन्ति, यथा-यो गतः स आगतः, यस्य विद्या निर्मला एतस्यान्तर्दृष्टिः प्रसरति, अयमतीव धार्मिकः, यस्यकदाप्यकार्ये न प्रवृत्तिः, पदार्थनिर्देशकेषु तदेतदिदमदस्शब्देषु तच्छब्दो बुद्धिस्थमुपस्थितम्, इदमेतच्छब्दौ समीपस्थम्, अदःशब्दो दूरस्थं बोधयति। उक्तंच-इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदोरूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षं विजानीयात्।

एतद् शब्दः— अस्यापि पुंसि सर्वत्र क्लीबे औङादौ च विभक्तिप्रत्ययोत्तरं त्यदाद्यत्वे पररूपे एत इत्यदन्तं, स्त्रियामत्वे पररूपे टापि सवर्णदीर्घे एता-इत्याबन्तंशब्दस्वरूपम्। ततः सर्वाणि कार्याणि तच्छब्दवदेव। सौ तदोःसाविति तस्य सत्वे आदेशरूपस्यास्य सस्य षत्वमपि। पुंसि-एषः एतौ एते, एतम् एतौ एतान्, एतेन एताभ्याम् एतैः, एतस्मै एताभ्याम् एतेभ्यः, एतस्मात् एताभ्याम् एतेभ्यः, एतस्य एतयोः एतेषाम्, एतस्मिन् एतयोः एतेषु। क्लीबे-एतत्-द् एते एतानि। टादौ पुंवत्। स्त्रियाम्-एषा एते एताः, एताम् एते एताः, एतया एताभ्याम्-भिः, एतस्यै एताभ्याम्-भ्यः, एतस्याः एताभ्याम्-भ्यः, एतस्याः एतयोः एतासाम्, एतस्याम् एतयोः एतासु। किञ्चित्कार्यं विधातुं निर्दिष्टस्य कार्यान्तरं दर्शयितुं पुनर्निर्देशनमन्वादेशः, तत्र सर्वेषु लिङ्गेषु; द्वितीयाटौस्स्वेनः (२-४-३४) द्वितीयायां टा ओस् अनयोश्च परत इदमेतदोः एन-इत्यादेशः स्यात्। इति एत इत्यस्य स्थाने एनादेशेन द्वितीया टा ओस् एषु नकारयुक्तानि रूपान्तराण्यपि। पुंसि-एनम् एनौ एनान् एनेन एनयोः, क्लीबे-एनत् एने एनानि एनेन एनयोः, स्त्रियाम्-एनाम् एने एनाः एनया एनयोः। यथा-अनेन व्याकरणमधीतम् एनं काव्यमध्यापय। एतयोः पवित्रं कुलम् एनयोः प्रभूतं धनम्। अन्वादेशे नपुंसके एनद्वक्तव्य इति द्वितीयैकवचने क्लीबे एनत्।

वि. एतत्तदोः सुलोपोकोरनञ्समासे हलीति विहितः सुलोप एतत्प्रयोगे न विस्मरणीयः, यथा—एष ते रुद्रभागोस्तु। एष लोकस्य पालकः। एष मे दक्षिणो बाहुः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदम् शब्दः—पुंसि-सौ त्यदाद्यत्वे प्राप्ते, इदमो मः (७-२-१०८) इदमो मस्य मः स्यात् परे। इति मस्य तथात्वे, इदोऽय् पुंसि (७-२-१११) इदम इदोऽय् स्यात्सौ पुंसि। इति इद्भाग अयादेशे हल्ङ्याबिति सुलोपे अयम्। औङि त्यदाद्यत्वेन मस्याऽत्वे दीर्घापवादेन पररू औ इत्यत्र, दश्च (७-२-१०९) इदमो दस्य मः स्याद्विभक्तौ। इति दस्य मत्वे पूर्वसवर्णदीर्घ नादिचीति निषेधे वृद्धिरेचीति वृद्धौ इमौ। जसि अत्वे पररूपे दस्य मत्वे जसः शीभावे सवर्णदीर्घनिषेधेन गुणैकादेशे इमे। अमि अत्व-पररूप-मत्व-पूर्वरूपेषु इमम्। इमौ। शसि अ पररूप-मत्व-पूर्वसवर्णदीर्घेषु सस्य नत्वे इमान्। टायामत्वपररूपयोः दश्चेति मत्वं बाधि अनाप्यकः (७-२-११२) अककारस्य इदम इदोऽन्स्यादापि विभक्तौ। आबिति टाइत्यारभ्य पकारेण प्रत्याहारः। इति इद्भागस्याऽनादेशे टाया इनादेशे गुणे अनेन। भ्यामि अत्वे प अनादेशं बाधित्वा, हलि लोपः (७-२-११३) अककारस्य इदम इदो लोपः स्यादापि हलादौ। अलोन्त्यन्यायेन दस्य लोपे प्राप्ते, नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे (वा) इत्युक्त्या इकारय लोपेन अकारशेषे तस्यादन्तत्वाभावेन सुपिचेत्यप्राप्तौ आद्यन्तवदेकस्मिन्निति अकारमात्रस्य दन्ततया दीर्घे आभ्याम्। भिसि अत्वे पररूपे अनादेशं बाधित्वा इदो लोपे ऐसादेशे नेदमदसोरकोः (७-१-११) अककारयोरिदमदसोर्भिस ऐस्न स्यात्। इति निषेधे बहु झल्येदित्येत्वे रुत्वविसर्गयोः एभिः। ङयि अत्वे पररूपे नित्यत्वेन अनादेशात्पूर्वं स्मै आदेशे प दनादेशं बाधित्वा हलिलोप इतीद्भागलोपे अस्मै। आभ्याम् एभ्यः। ङसावत्वे पररूपे पूर्ववत् दादेशे इदो लोपे अस्मात् आभ्याम् एभ्यः। ङसि अत्वे पररूपे स्यादेशे इदो लोपे अ ओसि अत्वपररूपयोः अनाप्यक इत्यनादेशे ओसिचेत्येत्वेऽयादेशे रुत्वविसर्गयोः अनयोः। अत्वे पररूपे नित्यत्वादनादेशं बाधित्वा सुडागमे हलिलोप इति इदो लोपे एत्वे षत्वे ए ङौ अत्वे पूर्वरूपे पूर्ववत् स्मिन्नादेशे इदो लोपे अस्मिन् अनयोः। सुप्यत्वे पररूपे इदो एत्वे षत्वे एषु। क्लीबे- स्वमोर्लुकि प्रत्ययलक्षणाभावेन दश्चेत्यादीनामप्रवृत्तौ इदम्। औ अत्वे पररूपे दस्य मत्वे श्यादेशे पूर्वसवर्णदीर्घनिषेधेन गुणे इमे। जश्शसोः अत्वपररू शिभावे नपुंसकस्येति नुमि सर्वनामस्थाने चेति दीर्घे इमानि। शेषं पुंवत्।

स्त्रियां-सौ यः सौ (७-२-११०) इदमो दस्य यः स्यात्सौ। इति दस्य यत्वे त्यदाद्य धित्वा इदमो इति मस्थितौ हल्ङ्याबिति सुलोपे इयम्। औङि औटि च अत्वे टापि दश्चेति मत्वे इमा-औ इत्यत्र श्यादेशे गुणे इमे। जश्शसोः अत्वे पररूपे टापि पूर्वसवर्णदीर्घे रुत्वविसर्गयोः इमाः। अम्यत्वपररूपटाप्सवर्णदीर्घमत्वेषु पूर्वरूपे इमाम्। इमाः। टायामत्वपररूपटाप्सवर्णदीर्घेषु अनादेशे आङि चाप इत्येत्वे अयादेशे अ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्याम्भिस्भ्यस्सु अत्वपररूपटाप्सवर्णदीर्घेषु इदो लोपे आभ्याम् आभिः, ङयि अत्वपररूपटाप्सु नित्यत्वादनादेशं बाधित्वा स्याडागमे ह्रस्वे आटश्चेति वृद्धौ अनादेशं मत्वं च बाधित्वा इदो लोपे अस्यै आभ्याम् आभ्यः। ङसिङसोः अत्वपररूपटाप्सवर्णदीर्घस्याडागमह्रस्ववृद्धिषु इदो लोपे रुत्वविसर्गयोः अस्याः आभ्याम्-आभ्यः, अस्याः। ओस्यत्वपररूपटाप्सु इदोऽनादेशे आङिचाप इत्येत्वेऽयादेशरुत्वविसर्गेषु अनयोः। आमि अत्वपररूपटाप्सवर्णदीर्घेषु सुटि इदो लोपे आसाम्। ङौ अत्वपररूपटाबादौ ङेरामि स्याडागमे वृद्धौ इदो लोपे अस्याम्। अनयोः। सुप्यत्वपररूपटाबादौ इदो लोपे आसु। एतच्छब्द इव इदमोऽप्यन्वादेशे द्वितीयाटौस्सु इद एनादेशे पुंसि एनम् एनौ एनान् एनेन एनयोः, क्लीबे एनत् एने एनानि एनेन एनयोः, स्त्रियाम् एनाम् एने एनाः एनया एनयोः इति रूपाण्यपि भवन्ति।

वि. इदोऽय्पुंसीति पुंसि विशेषविधेः क्लीवे सोर्लुकालुप्तत्वाच्च परिशेषात् यः साविति स्त्रियामेव प्रवर्तते। अकारयोरिति तत्र तत्र ककाररााहित्योक्तिः साकच्कव्यावृत्त्यर्थम्, तेन अकचि इमकया इमकाभ्याम् इमकैः।

अदस् शब्दः- पुंसि-सौ त्यदाद्यत्वे प्राप्ते, अदस औ सुलोपश्च (७·२·१०७) अदस औकारोऽन्तादेशः स्यात्सौ सुलोपश्च। इति सस्य औत्वे सुलोपे वृद्धौ तदोः सः साविति दस्य सत्वे असौ। औङादिषु त्यदाद्यत्वे पररूपे अद इति शब्दस्वरूपोत्तरं विशेषकार्याणि। औङि अद औ इत्यत्र वृद्धौ, अदसोऽसेर्दादु दो मः (८-२-८०) अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। सूत्रे उइति ह्रस्वदीर्घयोः समाहारद्वन्द्वः। आन्तरतम्यात्ह्रस्वव्यञ्जनयोरेकार्धमात्रयोर्ह्रस्वः, दीर्घस्य द्विमात्रस्य दीर्घ ऊकारः। इति ऊत्वमत्वयोः अमू:। जसि अदेत्युत्तरं श्यादेशे नादिचीति पूर्वसवर्णदीर्घनिषेधाद्गुणे अदे इति स्थिते, एत ईद्बहुवचने (८-२-८१) अदसो दात्परस्य एत ईत् स्याद्दस्य मश्च बह्वर्थोक्तौ। इति मीत्वे अमी। अद अमित्यत्र परत्वात्पूर्वरूपं बाधित्वा प्राप्तयोरुत्वमत्वयोरसिद्धत्वात्पूर्वरूपे अदसोसेरिति मुत्वे अमुम्। अमू। शसि अद-अस् इत्यत्र पूर्वसवर्णदीर्घे सस्य नत्वे मूत्वे अमून्। टायामद-आ इत्यत्र मुत्वे घिसंज्ञायां नादेशे कर्तव्ये कृते च मुत्वस्यासिद्धत्वे प्राप्ते, न मु ने (८-२-३) नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात्। इति निषेधे अमुना। भ्यामि अद इत्यत्र सुपिचेति दीर्घे मूत्वे अमूभ्याम्। अद भिस् इत्यत्र नेदमदसोरित्यैस्निषेधे बहुवचने झल्येदित्येत्वे एतईदिति मीत्वे अमीभिः। ङयि अद इत्यतः स्मायादेशे मुत्वे षत्वे अमुष्मै, अमूभ्याम्, भ्यसि एत्वेन मीत्वे अमीभ्यः। ङसौ अद इत्युत्तरं स्मादादेशे मुत्वे षत्वे अमुष्मात्। अमूभ्याम् अमीभ्यः। ङसि-अमुष्य। ओसि अद इत्युत्तरमोसिचेत्येत्वेयादेशे मुत्वे अमुयोः। अद-आम् इत्यत्र सुटि बहुत्वादेत्वे षत्वे अमीषाम्, ङौ अदइत्युत्तरं स्मिन्नादेशे मुत्वे षत्वे अमुष्मिन् अमुयोः, अद सु इत्यत्र बहुत्वेनैत्वे मीत्वे षत्वे अमीषु।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्लीबे-स्वमोर्लुकि प्रत्ययलक्षणाभावेन त्यदाद्यत्वाभावे रुत्वविसर्गयोः अदः। औङि शीभावे अत्वे पररूपे गुणे अदे-इत्यत्र मूत्वे अमू। जश्शसोः शौ अत्वे पररूपे नपुंसकस्य नुमि सर्वनामस्थानेचेत्युपधादीर्घे मूत्वे अमूनि। शेषं पुम्वत्। स्त्रियां-सौ पुंवत् अस औङादिषु त्यदाद्यत्वे पररूपे टापि सवर्णदीर्घे अदाइति शब्दस्वरूपोत्तरं विशेषकार्याणि। औ श्यादेशे गुणे मूत्वे अमू। जश्शसोः अदाशब्दोत्तरं सवर्णदीर्घे मूत्वे रुत्वविसर्गयोः अमू अदा-अमित्यत्र पूर्वरूपे मूत्वे अमूम् अमू अमूः। टायामदा इत्युत्तरमाङिचापइत्येत्वे ऽयादेशे मु अमुया। भादिषु अदा इत्युत्तरं मूत्वे अमूभ्याम् अमूभिः। ङसिङसोः अदा-इत्युत्तरं स वृद्धौ मुत्वे षत्वे अमुष्याः अमूभ्याम् अमूभ्यः, अमुष्याः। ओसि अदा इत्युत्तरं आङि इत्येत्वे ऽयादेशे मुत्वे रुत्वविसर्गयोः अमुयोः। अदा-आमित्यत्र सुटि मूत्वे षत्वे अमूषा ङौ अदा इत्युत्तरमामिस्याटि ह्रस्वे वृद्धौ मुत्वे षत्वे अमुष्याम् अमुयोः। अदा-सु इत्यत्र मुत्वे ष अमूषु।

वि. १ नमुने इत्यत्र नेइति विषयसप्तम्या नाभावे कर्तव्ये कृते चेत्यर्थः। मुत्वे कृते तस्याऽसिद्धत्वे घेः परत्वा नाभावो न स्यादिति कर्तव्ये इत्युक्तम्, कृतेपि नाभावे मुत्वस्यासिद्धत्वे सुपिचेति दीर्घापत्तिः स्यादिति कृते चेत्यु तेनोभयतोऽसिद्धत्वाभावान्नाभावो न तु दीर्घ इति अमुनेत्यस्य सिद्धिः।

वि. २ अदस्शब्दादकचि सौ—औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च (वा) इति प्रतिषेधः योगशिष्टस्योत्वस्य तदभावेऽप्रवृत्तेः असकौ असुक इति स्त्रियाममुकी इति रूपाणि। तेन अमुकः अमुकी अदकः स्यस्यैव न्याय्यत्वे अमुकशर्मा अमुकी देवो इति च प्रयोगोऽसाधुरेवेति केचित्, अदश्शब्दपर्यायोऽमुकशब्दोऽव्युत्पन्नो साधुरेवेति केषाञ्चित्समाधानम्।

युष्मद् अस्मद् शब्दौ त्रिषु लिङ्गेषु सरूपौ। तत्र युष्मच्छब्दो मध्यमपुरुषं (सम्बोध्यं), अस्मच्छ उत्तमपुरुषं (वक्तारं) बोधयति। आभ्यां सौ, ङे प्रथमयोरम् (७-१-२८) युष्मदस्मद्भ्यां परस्य इत्येतस्य प्रथमाद्वितीययोश्च अमादेशः स्यात्। इति सोरमादेशे, मपर्यन्तस्य (७-२-९१) इत्यधि त्वाहौ सौ (७-२-९४) युष्मदस्मदोर्मपर्यन्तस्य त्व-अह इत्येतावादेशौ स्तः सौ परे। इति मा भागयोः त्व अह इत्यादेशयोः त्व-अद्-अम्, अह-अद्-अम् इति जाते, शेषे लोपः (७-२- आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्। इति दकारलोपे अतो इति पूर्वाकारयोः पररूपे अमिपूर्व इत्युत्तराकारयोः पूर्वरूपे त्वम् अहम्। औङि ङे प्रथमयोरित्य युवावौ द्विवचने (७-२-९२) द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ। इति युवाव शयोः युव-अद्-अम्, आव-अद्-अम् इति जाते शेषेलोप इति प्राप्ते, प्रथमायाश्चद्विवचने भाषा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स.ना.पु.

(७-२-८८) इह युष्मदस्मदोराकारोन्तादेशः स्यात्। इति दस्य आत्वे पूर्वाकारयोः पररूपे उत्तराऽऽकारेण सह सवर्णदीर्घे अमा सह पूर्वरूपे युवाम् आवाम्। जसि अमि कृते, यूयवयौ जसि (७-२-९३) युष्मदस्मदोर्मपर्यन्तस्य यूयवयौ स्तो जसि। इति यूयवयादेशयोः यूय-अद्-अम् वय-अद्-अम् इति जाते पररूपे शेषेलोप इति दकारलोपे पूर्वरूपे यूयम् वयम्।

वि. १. त्वम् स्त्री, अहम् स्त्री इत्यत्र त्व-अम् अह-अम् इति स्थिते परमपि पूर्वरूपं बाधित्वा अन्तरङ्गत्वाट्टापः प्रास-ङ्गा तु सामआकमिति सूत्रभाष्ये अलिङ्गे युष्मदस्मदी इत्युक्ततया स्त्रीत्वाभावान्निवार्यते। वस्तुतस्तु ङे प्रथमयोरमिति त्रभाष्ये युष्मानस्मानित्यत्र तस्माच्छसोन इत्येव नत्वसिद्धौ शसोनेति विधिवैयर्थ्यमाशङ्क्य स्त्रियां नपुंसके च युष्मान्ब्राह्मणीः स्मान्ब्राह्मणीः पश्य, युष्मान्ब्राह्मणकुलानि अस्मान्ब्राह्मणकुलानि पश्येत्यादौ नत्वार्थं शसोनेत्यावश्यकमिति, स्वमोर्नपुं-कादित्यधिकारे नेतराच्छन्दसीति सूत्रभाष्ये नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेनेति चोक्त्या युष्मद-मदोरपि लिङ्गान्यभिप्रेतानि भाष्यकृतः। अलिङ्गे युष्मदस्मदी इत्युक्तिस्तु पुंस्त्रीनपुंसकलिङ्गपदान्तरसमभिव्याहारं विना ष्मदस्मद्भ्यां लिङ्गविशेषो न प्रतीयते इत्येवंपरेति तत्रैव भाष्ये स्पष्टम्, एवं सति शेषेलोप इत्यत्र शेष इति स्थानिनोऽ-करणत्वविवक्षया सप्तमी, तेन मपर्यन्ताच्छेषस्य अद्इत्यस्य लोपः, सच परोप्यन्तरङ्गे अतोगुणे कृते प्रवर्तते, अतोऽदन्त-ाभावान्न टाबित्युपपादनीयम्। एतच्च त्यदादीनाम इति सूत्रभाष्ये।

वि. २. युवावाविति सूत्रे मपर्यन्तस्येत्युक्तौ अकचि युवकाम् आवकाम् युवकाभ्यामावकाभ्यामित्यत्र साकच्कस्य ादेशौ माभूताम्, त्वयामयेत्यत्र सकलशब्दस्थाने त्वमादेशयोर्योचीति यत्वे त्व्या म्या इति रूपापत्तिश्च माभूदित्यर्थं पर्यन्तस्येत्युक्तम्।

वि. ३. शेषेलोप इति अदो लोपपक्षे अप्राप्तावपि दकारमात्रलोपपक्षे अदन्तत्वाज्जसः शीभावः प्राप्तोपि अङ्गकार्ये ते पुनर्नाङ्गकार्यमित्युक्त्या, ङे प्रथमयोरमित्यत्र मकारान्तरप्रश्लेषेण अम् मान्त एवावशिष्यते न तु विक्रियते इति व्याख्यया परिह्रियते।

अमि ङेप्रथमयोरित्यमि, त्वमावेकवचने (७-२-९७) एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ। इति त्व-मादेशयोः त्व-अद्-अम्, म-अद्-अम् इति जाते शेषलोपं बाधित्वा, द्वितीयायां च (७-२-८७) युष्मदस्मदोराकारः स्याद्द्वितीयायाम्। इत्यन्त्यदस्याऽऽत्वे पररूपे सवर्णदीर्घे पूर्वरूपे च त्वाम् माम्। युवाम् आवाम् दकारस्याऽऽत्वं द्वितीयायां चेति विशेषः, अन्यत्पूर्ववत्। शसि द्वितीयायां चेति दस्यात्वे अकाराऽऽकारयोः सवर्णदीर्घे अमादेशे प्राप्ते, शसो न (७-१-२९) युष्म-दस्मद्भ्यां परस्य शसो नकारः स्यात्। इति आदेःपरस्येति आद्यकारस्य नत्वेऽन्त्यसकारस्य संयोगान्त-लोपे युष्मान् अस्मान्। टायां त्वमावेकवचन इति मपर्यन्तस्य त्वमादेशयोः पररूपे शेषलोपं बाधित्वा, योऽचि (७-२-८९) अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः। इति दस्य यत्वे त्वया मया। भ्यामि युवावादेशयोः पररूपे युवद्भ्याम् आवद्भ्यामिति जाते, युष्मदस्मदोरनादेशे (७-२-८६)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनयोराकारः स्यादनादेशे हलादौ विभक्तौ। इत्यन्त्यस्य दस्य आत्वे सवर्णदीर्घे युवाभ्याम् आवाभ्याम्। भिसि युष्मदस्मदोरित्यात्वे सवर्णदीर्घे रुत्वविसर्गयोः युष्माभिः अस्माभिः। ङे त्वमादेशयोः प्राप्तौ, तुभ्यमह्यौ ङयि (७-२-९५) अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। तुभ्यमह्यादेशयोः ङे प्रथमयोरित्यमादेशे तुभ्य-अद्-अम् मह्य-अद्-अम् इति जाते पूर्वाकारे पररूपे शेषेलोप इति दलोपे पूर्वरूपे तुभ्यम् मह्यम्। युवाभ्याम् आवाभ्याम्। भ्यसोभ्यम् (७-१-३०) भ्यसो भ्यम् अभ्यम् वा आदेशः स्यात्। इति भ्यसो भ्यमादेशे शेषेलोप इति दकारलोपे अङ्गवृत्ते पुनर्नाङ्गकार्यमिति नियमेन बहुवचनेझल्येदित्येत्वाभावे युष्मभ्यम् अस्मभ्यम्।

वि. अभ्यमिति पदच्छेदेन अभ्यमादेशे तु शेषेलोप इति अन्त्यदकारलोपपक्षे अभ्यमो झलादित्वाभावेन एत्वाभावे पररूपे, अदो लोपपक्षे तु अदन्ताङ्गत्वाभावेनापि एत्वाभावे युष्मभ्यमस्मभ्यमिति रूपसिद्धिः।

ङसौ त्वमावेकवचन इति त्वमादेशयोः, एकवचनस्य च (७-१-३२) आभ्यां पञ्चम्येकवचनस्य अत्स्यात्। इत्यनेकाल्त्वात्सर्वादेशे त्व-अद्-अत् म-अद्-अत् इत्यत्र शेषेलोप इति दलोपे पूर्वाकारे(युष्म)स्तृतीयाकारस्य च पररूपद्वये त्वत् मत्। युवाभ्याम् आवाभ्याम्। पञ्चम्या अत् (७-१-३१) आभ्यामेक पञ्चम्या भ्यसोऽत्स्यात्। इति भ्यसोऽदादेशे शेषेलोप इति दलोपे पररूपे युष्मत् अस्मत्। तवममौ ङसि (७-१-२६) अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि। इति तवममादेशयोः, युष्मदस्मद्भ्यां ङसोऽश् (७-१-२७) आभ्यां ङसोऽश् स्यात्। इति शित्वेन अ इति सर्वादेशे तव-अद्-अ मम-अद्-अ इति दलोपे त्रयाणामकाराणां पररूपद्वये तव मम। ओसि युवावाविति मपर्यन्तस्य युवावादेशे शेषलोपं बाधित्वा योचीति दस्य यत्वे युव अ-योस् आव-अ-योस् इत्यत्र पररूपे रुत्वविसर्गे युवयोः आवयोः। आमि, साम आकम् (७-१-३३) आभ्यां परस्य साम आकम्स्यात्। इत्याकमादेशे दलोपे युष्म-आकम् अस्म-आकम् इति जाते अदन्तत्वात्सुटि प्राप्तेपि भाविनः सुटो निवृत्त्यर्थं साम इति सूत्रे ससुट्कनिर्देशेन तन्निवृत्तौ सवर्णदीर्घे युष्माकम् अस्माकम्। ङौ त्वमावेकवचन इति त्वमादेशयोः त्वअद्-इ म-अद-इ इत्यत्र योचीति दस्य यत्वे पररूपे त्वयि मयि। युवयोः आवयोः। सुपि युष्मदस्मदोरनादेश इति दस्य आत्वे सवर्णदीर्घे युष्मासु अस्मासु।

अनयोः रूपविशेषाः—

पदस्य (८-१-१६) पदात् (८-१-१७) अनुदात्तं सर्वमपादादौ (८-१-१८) इत्यधिकृत्य, युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ (८-१-२०) पदात्परयोरपादादौ स्थितयोरनयोः षष्ठीचतुर्थीद्वितीयाविशिष्टयोः वाम् नौ इत्यादेशौ स्तः। बहुवचनस्य वस्नसौ (८-१-२१) उक्तविधयोरनयोः षष्ठ्यादि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वचनान्तयोर्वस्नसौ स्तः। वान्नावोरपवादः। तेमयावेकवचनस्य (८-१-२२) उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोः ते मे एतौ स्तः। त्वामौ द्वितीयायाः (८-१-२३) द्वितीयैकवचनान्तयोरनयोः त्वा मा एतौ स्तः। इति पदात्परत्वे पादादौ अवर्तमानत्वे द्वितीयायां त्वा मा, वाम् नौ, वः नः इति; चतुर्थ्यां ते मे, वाम् नौ, वः नः इति; षष्ठ्यां ते मे, वाम् नौ, वः नः इति रूपाणि भवन्ति। यथा-श्रीशस्त्वाऽ(त्वाम्) वतु माऽ(माम्) पीह, दत्ता ते (तुभ्यं) मे (मह्यं) पि शर्म सः। स्वामी ते (तव) मे (मम) पि स हरिः, पातु वा (युवाम्) मपि नौ (आवाम्) विभुः। सुखं वां (युवाभ्याम्) नौ (आवाभ्याम्) ददात्वीशः, पतिर्वा (युवयोः) मपि नौ (आवयोः) हरिः। सोव्याद्वो (युष्मान्) नः (अस्मान्) शिवं वो (युष्मभ्यम्) नो (अस्मभ्यम्) दद्यात् सेव्योत्र वः (युष्माकम्) स नः (अस्माकम्)।

वि. वान्नावादयः पदात्परत्वाभावेन वाक्यादौ, पदात्परत्वेपि पादादौ वर्तमानत्वे च न भवन्ति–त्वां पातु मां पातु, वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु। षष्ठीचतुर्थीद्वितीयास्थयोरित्युक्त्या श्रूयमाणविभक्तिकयोरेव, नेह–इतियुष्मत्पुत्रः (युष्माकं पुत्रः) इत्यस्मत्पुत्रः (अस्माकं पुत्रः) ब्रवीति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः (वा) एकतिङ् वाक्यम् (वा) नेह–ओदनं पच, तव भविष्यति।

एते वान्नावादय आदेशाः अनन्वादेशे वा वक्तव्याः (वा) अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोस्ति धाता तव भक्तोस्ति इति वा। अन्वादेशे–तस्मै ते नमः। न च-वा-हा-हैव-युक्ते (८-१-२४) चादि पञ्चकयोगे एते आदेशा न स्युः। हरिस्त्वां मां च रक्षतु। कथं त्वां मां वा न रक्षेत्। हरिर्युष्मानेव पश्यति। युक्तग्रहणात्साक्षाद्योग एवायं निषेधः, परम्परासम्बन्धे तु स्यादेव–हरो हरिश्च मे स्वामी। पश्यार्थैश्चानालोचने (८-१-२५) अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः। चेतसा त्वां समीक्षते। परम्परासम्बन्धेप्ययं निषेधः-भक्तस्तव रूपं ध्यायति। आलोचने तु-भक्तस्त्वा पश्यति चक्षुषा। सपूर्वायाः प्रथमाया विभाषा (८-१-२६) विद्यमानपूर्वात्प्रथमान्तात्परयोरनयोरन्वादेशेऽप्येते आदेशा वा स्युः। भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्, त्वा मा इति वा। साऽऽमन्त्रितम् (२-३-४८) सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात्। आमन्त्रितं पूर्वमविद्यमानवत् (८-१-७२) पूर्वमामन्त्रितमविद्यमानमिव स्यात्। इति सम्बोधनप्रथमान्तस्याविद्यमानवद्भावेन पदात्परत्वाभावान्नेह अग्ने-तव। देवास्मान्पाहि। सर्वदा रक्ष देव नः इत्यत्र तु देवेत्यस्याविद्यमानवत्वेपि ततः पूर्वं रक्षेत्येतदाश्रित्यादेशः। नामन्त्रिते समानाधिकरणे सामान्यवचनम् (८-१-७३) विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत्स्यात्। हरे दयालो नः पाहि इत्यत्र हरे इत्यामन्त्रितस्याप्यविद्यमानवत्त्वाभावेन नसादेशः। विभाषितं विशेषवचने (बहुबचनम्) (८-६-७४)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते परे अविद्यमानवद्वा। यूयं प्रभवो देवाः शरण्य युष्मान्भजे वो भजे इति वा। इहान्वादेशेपि वैकल्पिकादेशः।

भवत् शब्दः— संमान्यबोधकः पुंस्त्रीलिङ्गः—भातेर्डवतुप्रत्यये टिलोपे निष्पन्नः। पुंसि सौ अत्वसन्तस्य चाधातोः (६-४-१४) अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य च असम्बुद्धौ सौ परे। इति परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ उपधादीर्घे उगिदचामिति नुमि भवान्त्-स् इति जाते सोर्हल्ङ्याबिति लोपे संयोगान्तस्य तस्य लोपे भवान्। औङि नुमि भवन्तौ जसि नुमि रुत्वविसर्गयोः भवन्तः। सम्बुद्धावुपधादीर्घाभावे नुमि सतयोर्लोपे हे भवन्-वन्तौ-न्तः भवन्तम्-न्तौ। शसाद्यजादौ नुमभावे योगेन भवतः भवता इत्यादि, भ्यामादौ पदत्वेन जश्त्वे भवद्भ्यामित्यादि, सुपि चर्त्वे भवत्सु। स्त्रियामुगित्त्वान्ङीपि भवतीशब्दो गौरीवत्।

वि. द्विपर्यन्तानामेवेष्टिरित्युक्त्या भवच्छब्दस्य सम्बोधनेपि प्रयोगः। हे मनः! भवतो रोदनं नोचितमित्याद्युदे विशे नपुंसकलिङ्गेपि प्रयुज्यते। तत्र भवत् भवती भवन्ति इति जगद्वत्, शेषं पुंवत्। भवच्छब्दे अत्र तत्रेत्यादियोगे संमान विशेषबोधः। तेषामप्येवं रूपाणि। अत्रभवान् तत्रभवान्। भूधातोः शतृप्रत्यये निष्पन्नो भवच्छब्दस्तु नात्र गण्यते, तस्य भवन् भवन्तौ भवन्तः, भवत् भवन्ती भवन्ति, भवन्ती भवन्त्यौ भवन्त्य इत्यादि।

किम् शब्द स्त्रिलिङ्गः—पुंसि सौ, किमः कः (७-२-१०३) किमः कः स्याद्विभक्तौ। इति क इत्यादेशे सर्वशब्दवत्। कः कौ के, कम् कौ कान्, केन काभ्याम् कैः, कस्मै काभ्याम् केभ्यः, कस्मात् काभ्याम् केभ्यः, कस्य कयोः केषाम्, कस्मिन् कयोः केषु। क्लीबे स्वमोर्लुकि प्रत्ययलक्षणाभावे किम्। औङादौ कादेशे सर्वशब्दवत् के कानि शेषं पुंवत्। स्त्रियां विभक्त्युत्पत्तौ कादेशे अदन्तत्वाट्टापि सवर्णदीर्घे का इति शब्दस्वरूपात्सामान्यविशेषकार्येषु सर्वाशब्दवत् का के काः, काम् के काः, कया काभ्याम् काभिः, कस्यै काभ्याम्-भ्यः, कस्याः काभ्याम्-भ्यः, कस्याः कयोः कासाम्, कस्याम् कयोः कासु।

वि. द्विपर्यन्तानामेवेष्टिरिति किम्शब्दस्य संबोधनेपि प्रयोग उचितः, परं स न व्यावहारिकः। किम्शब्द प्रष्टव्यबोधकः-तद्रूपेषु चित्-चन-अपि-शब्दानां योगे प्रश्नार्थत्यागेन अनवधारणार्थकता भवति। यथा—कश्चित् केचन कस्यापि काचित् किञ्चित्।

प्रयोगाः—यो जानाति स पण्डितः। यस्य तस्य तरोर्मूलं येन केनापि पेषयेत्। एतस्या पतिरूर्जितः। अमुमाह्वयति। अस्याङ्कलक्ष्मीर्भव। इमानि पुष्पाणि मनोहराणि। कस्मिंश्चिद्देशे कोपि विशिष्टविद्वान्भवति। अमुना किमेवमुच्यते। नमस्त्रिमूर्तये तुभ्यम्। अस्माकं शरणं हरिः शिवो रक्षतु नः सदा। सम्बन्धो नौ स्थिरो भवेत्। महत्पुण्यं त्वया कृतम्। भवति भिक्षां मे देहि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रश्नाः—सर्वनामानि कतिविधानि कानि तानि। अर्थविशेषे सर्वनामानि कानि। विभक्तिविशेषे सर्वनामत्वं केषाम्। सर्वनामविशेषकार्याणि कानि। त्यदादिषु केषां रूपसाम्यम्। युष्मदस्मदो र्विशेषादेशाः के, ते कुत्र भवन्ति। अदःशब्दे मुत्व-मूत्व-मीत्वव्यवस्था कीदृशी।

अधस्तनवाक्यगतानि सर्वनामरूपाणि विवृणुत—

अस्मास्वधीनं किमु निष्पृहाणाम्। युष्मासु मे महान्स्नेहः। कोऽस्ति धन्यो मदन्यः। सुखं ददातु वः शिवः। अमुष्य पुत्रः किं विधत्ते। तत्रभवद्भिरिदं साधु विधीयते। येन केनाप्युपायेन प्राणानां परिरक्षणम्। विश्वेभ्यो देवेभ्यो नमः। परस्परविरोधे तु यूयं यूयं वयं वयम्। सर्वेषु लोकेषु गतिर्विचित्रा। तव मम च महदन्तरम्। प्रणामास्तेषु सर्वदा। अमूः स्त्रियः पुण्यतमाः। अहो अमीषां चरितं पवित्रम्। नमस्ते।

विशेषणप्रकरणम्

विशेषणशब्दाः—

विशेषणानि- गुणविशेषणानि संख्याविशेषणानि चेति द्विधा। विशेषणशब्दा नियतलिङ्गादिवर्जं प्रायः सर्वे विशेष्यनिघ्नाः (विशेष्यानुसारिणः) त्रिलिङ्गाः। तत्र पुंनपुंसकयोर्मूलप्रातिपदिकानि समानानि, क्विबन्तहलन्तादयः केचन शब्दाः स्त्रियामपि समानाः। अन्येषु शतृ-मतु-वतु-क्तवतु-क्त्रसु-वसु-इयसुन्नादिप्रत्ययान्ता उगिदन्ताः, ल्युडादिप्रत्ययान्ताष्टितः, ष्वुन्नादिप्रत्ययान्ताः षितः, अण्-अञ्-ढ-कन्-क्वरबादिप्रत्ययान्ताः; स्वस्रादिवर्जं तृन्तृच्प्रत्ययान्ता ऋकारान्ताः, इनि-विनि-णिन्यादिप्रत्ययान्ता इन्नन्ताश्चैवमादयः स्त्रियामीकारान्ताः, उकारान्ता गुणवाचकास्तु पक्षे ईकारान्ताः, अन्ये क-तव्यानीयादिप्रत्ययान्ताः स्त्रियामाकारान्ताः, अक (ण्वुल् वुञ्) प्रत्ययान्तास्तु प्राय इकारगर्भा आकारान्ता भवन्ति। संख्याविशेषणेषु लिङ्गवचनादिविशेषः पश्चाद्वक्ष्यते।

गुणविशेषणानि :—

रक्त शब्दः (रक्तवर्णः)-पुंसि रक्तः रक्तौ रक्ताः इत्यादि रामवत्, क्लीबे रक्तं रक्ते रक्तानि इत्यादि ज्ञानवत्, स्त्रियां रक्ता रक्ते रक्ताः इत्यादि रमावत्। एवं नील-पीत-मसृण-दीर्घ-शुष्क-स्थिर-चल-गत-दृष्ट-श्रुत-दर्शनीय-रमणीय-कर्तव्य-द्रष्टव्य-करणीय-लभ्य-तदीय-मदीय-शयान-कुर्वाण-धुर्य-गरिष्ठ-गुरुतर-गुरुतम-प्रभृतयः।

कारक शब्दः (कर्ता)-अकप्रत्ययान्तः। पुंसि कारक-:कौ-काःइत्यादि रामवत्, क्लीबे कारकं-के-कानि-इत्यादि ज्ञानवत्, स्त्रियां कारिका-के-काः इत्यादि रमावत्। एवं हारक तारक-धारक-लेखक-पाठक-दर्शक-बोधक-प्रभृतयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गौर शब्दः (गौरवर्णः)। पुंसि गौरः-रौ-राः इत्यादि रामवत्, क्लीबे गौरं-रे-राणि इत्यादि ज्ञा वत्, स्त्रियां गौरी गौर्यौ इत्यादि नदीवत्। एवं खेचर-नर्तक-वैष्णव-माथुर-यादृश-जित्वर-नश्व प्रभृतयः।

शुचि शब्दः (पवित्रः)-पुंसि शुचिः-ची-चयः इत्यादि हरिवत्, स्त्रियां शुचिः-ची-चयः इत्या मतिवत्, क्लीबे शुचि शुचिनी शुचीनि इत्यादि वारिवत्, तृतीयादिषु भाषितपुंस्कमिति ट जादिषु पक्षे पुंवत्त्वे घिसंज्ञायां हरिवदपि। शुचिना शुचिने शुचये, शुचिनः शुचेः शुचयोः शुचि शुच्योः शुचीनाम् शुचिनि शुचौ। एवमनादिप्रभृतयः।

मृदु शब्दः (कोमलः) पुंसि मृदुः मृदू मृदवः इत्यादि भानुवत्। स्त्रियां वोतोगुणवचनादि ङीब्विकल्पेन पक्षे मृद्वीशब्दो मृद्वी-द्व्यौ-द्व्यः इत्यादि गौरीवत्, ङीबभावे मृदुः-दू-दवः इत्य धेनुवत्, क्लीबे मृदु-दुनी दूनि इत्यादि मधुवत्, टाद्यजादिषु तृतीयादिति पक्षे पुंवत्त्वे घिसं मृदुना मृदुने मृदवे मृदुनः मृदोः मृदुनोः मृद्वोः मृदुनि मृदौ इति मधु-भानुवत्। एवं गु लघु प्रभृतयः।

दातृ शब्दः (दानकर्ता)—पुंसि दाता-तारौ-रः इत्यादि धातृवत्। स्त्रियां ङीपि दात्रीश दात्री-त्र्यौ-त्र्यः इत्यादि गौरीवत्। क्लीबे दातृ-तृणी-तॄणि। तृतीयाद्यजादिषु पुंवत्त्वविकल्प दातृणा दात्रा दातृणे दात्रे दातृणः दातुः दातृणि दातरि इत्यादि क्लीबलिङ्गकर्तृशब्दवत्। हर्तृ-पठितृ-द्रष्टृ--श्रोतृ-प्रभृतयः।

प्रयोगाः—शुचि गोतृप्तिकृत्तोयम्। मृदुनि तव शरीरे तूलराशाविवाग्निः। लघावास्त शेते। तीव्रौषधस्य लघ्वी मात्रा। शुचीनां श्रीमतां गेहे। दातृ भोक्तृ कुलं तस्य। शास्ता मृत यमः। यादृशी तादृशी नेयम्। कालिका दुःखहारिका। श्रुताः कथाः।

धनिन् शब्दः (श्रीमान्) धनमस्यास्तीत्यर्थे इन्नन्तः। पुंसि शार्ङ्गिन्शब्दवत्। सौ इन्हन्निति प्राप्ते सौचेत्युपधादीर्घे सुलोपे नलोपे धनी धनिनौ धनिनः। सम्बुद्धौ नङिसम्बुद्ध्योरिति नलोपा हेधनिन्-नौ-नः, धनिनम्-नौ-नः अजादौ योगे हलादौ पदत्वेन नलोपे धनिना-निभ्याम् धनिने-निभ्याम्-भ्यः, धनिनः–निभ्याम्-भ्यः, धनिनः-नोः-नाम् धनिनि-नोः-निषु। क्लीबे स्वमो धनि। श्यां धनिनी धनीनि शावुपधादीर्घः। तृतीयादिषु पुंवत्। स्त्रियामृन्नेभ्य इति ङीपि धनि न्यौ-न्य इत्यादि गौरीवत्। एवं गुणिन्-मानिन्-दण्डिन्-मायाविन्-वाग्मिन्-मनोहारिन्-दा प्रभृतय इति विनि-ग्मिनि-णिन्यन्ताः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महत्शब्दः (विशालः)–वर्तमाने पृषन्महज्जगच्छतृवच्चेति महेरतिप्रत्यये निष्पन्नः। पुंसि सौ शतृवत्त्वेनोगित्वादुगिदचामिति नुमि सान्तमहत इत्युपधादीर्घे हल्ङ्यादिलोपे संयोगान्ततलोपे तदसिद्ध्या नलोपाभावे महान्। औङादौ सर्वनामस्थाने उपधादीर्घे महान्तौ-न्तः। सम्बुद्धौ नुम्युपधादीर्घाभावे हल्ङ्यादिलोपे संयोगान्तलोपे हेमहन्-हान्तौ-न्तः, महान्तम्-न्तौ। शसाद्यजादौ योगे हलादौ पदत्वेन जश्त्वे महतः महता महद्भ्याम्-भिः, महते-द्भ्याम्-भ्यः, महतः-द्भ्याम्-भ्यः, महतः-तोः-ताम्, महति-तोःमहत्सु। क्लीबे स्वमोर्लुकि जश्त्वचर्त्वविकल्पयोः महत्-द्, औङः-श्यां महती, जश्शसोः शौ सर्वनामस्थाने नुमि उपधादीर्घे महान्ति। तृतीयादिषु पुंवत्। स्त्रियां शतृवत्त्वेनोगित्वान्ङीपि महती-त्यौ-त्यः इत्यादि गौरीवत्।

भवत् शब्दः (विद्यमानः)–भवतेर्लटः शतृप्रत्यये शब्गुणावादेशेषु निष्पन्नः। पुंसि सौ उगिदचामिति नुमि अत्वन्तत्वाभावेनाऽत्वसन्तस्येति दीर्घाभावे हल्ङ्यादिलोपे संयोगान्तलोपे तदसिद्ध्या नलोपाभावे भवन्, औङादौ सर्वनामस्थाने नुमि दीर्घाभावे भवन्तौ-न्तः। हे भवन्-न्तौ-न्तः, भवन्तम्-न्तौ। अजादौ योगे हलादौ पदत्वेन जश्त्वे भवतः भवता भवद्भ्याम्-भिः, भवते-द्भ्याम्-भ्यः, भवतः-द्भ्याम्-भ्यः, भवतः-तोः-ताम्, भवति-तोः-भवत्सु। क्लीबे स्वमोर्लुकि भवत्, औङः श्याम्, आच्छीनद्योर्नुम् (७-१-८०) अवर्णान्तादङ्गात्परो यः शतुरवयवस्तकारस्तदन्तस्याङ्गस्य नुम्वा स्यात् शीनद्योः परतः। इति विकल्पे प्राप्ते, शप्श्यनोर्नित्यम् (७-१-८१) शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम्स्यात् शीनद्योः परतः। इति नित्यं नुमि भवन्ती। जश्शसोः शौ सर्वनामस्थाने उगिदचामिति नुमि भवन्ति। तृतीयादिषु पुंवत्। स्त्रियामुगितश्चेति ङीपि ईकारस्य नदीत्वेन आच्छीनद्योरिति विकल्पापवादेन शप्श्यनोरिति नित्यं नुमि भवन्तीशब्दः भवन्ती भवन्त्यौ भवन्त्यःइत्यादि गौरीवत्। एवमेव शब्विकरणभ्वादिधातुभ्यः श्यन्विकरणदिवादिधातुभ्यः शब्विकरणणिच्सन्नन्तादिविकृतिधातुभ्यश्च शतृप्रत्यये निष्पन्नाः पचत्-न्ती, गच्छत्-न्ती, दीव्यत्-न्ती, त्रस्यत्-न्ती, कथयत्-न्ती, जिगमिषत्-न्ती दित्सत्-न्ती, पुत्रीयत्-न्ती प्रभृतयः।

वि. आच्छीनद्योरित्यत्र अवर्णान्तादङ्गात्परः शतृप्रत्यय इत्युक्तौ तुदधातोः शतरि शविकरणे पररूपैकादेशस्य पूर्वान्तत्वे शतुरवर्णान्ताङ्गात्परत्वाभावात्, परादित्वे अवर्णान्ताङ्गाभावात् उभयत आश्रयणे अन्तादिवत्त्वनिषेधान्नुम्न स्यादिति तत्सिद्धये अवर्णान्ताङ्गात्परोयः शतुरवयवस्तकार इत्युक्तम्। ङीप्प्रत्ययेकारमात्रस्यापि नदीत्वप्रयोजकतया नदीत्वेन व्यवहाराच्छतुस्तकारस्य नद्याः परत्वमुपपद्यते।

ददत् शब्दः–(दान कर्ता) ददातेर्लटः शत्रादेशे शपः श्लौ द्वित्वाभ्यासह्रस्वाकारलोपेषु सिद्धः। पुंसि सौ उगिदचामिति नुमि प्राप्ते, उभे अभ्यस्तम् (६-१-५) षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुदिते अभ्यस्तसंज्ञे स्तः। जक्षित्यादयः षट् (६-१-६) षड्धातवोन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसंज्ञाः स्युः। इत्यभ्यस्तत्वे, नाभ्यस्ताच्छतुः (७-१-७८) अभ्यस्तात्परस्य शतुर्नुम्न स्यात्। इति नुम्निषेधे हल्ङ्यादिलोपे ददत्। अजादिषु योग एव ददतौ-तः हेददत्-तौ-तः ददतम्-तौ-तः। ददता दद्भ्यामित्यादि। क्लीबे ददत् ददती श्यां नुम्निषेधः जश्शसोः शौ नित्यं नुम्निषेधे प्राप्ते, वा नपुंसकस्य (७-१-७९) अभ्यस्तात्परो यः शतृप्रत्ययस्तदन्तस्य क्लीबस्य नुम्वा स्यात्सर्वनामस्थाने। इति विकल्पे ददन्ति ददति, तृतीयादिषु पुम्वत्। स्त्रियां ङीपि नुम्निषेधे ददती ददत्यौ ददत्य इत्यादि गौरीवत्। एवं जुहोत्यादिधातुभ्यः शतरि दधत्-ती बिभ्यत्-ती जुह्वत्-ती प्रभृतयः, जक्षादिभ्यः शतरि जक्षत्-ती जाग्रत्-ती, दरिद्रत्-ती, शासत्-ती चकासत्-ती शब्दाश्च अभ्यस्ताः।

वि. जक्षित्यादय इत्यत्र तद्गुणसंविज्ञानबहुव्रीहौ षडित्युक्त्या सप्तमस्य वेवीङो न ग्रहणमतद्गुणसंविज्ञानबहुव्रीहौ जक्षस्य न ग्रहणमतो जक्षेति पृथक्पदं कृत्वा इतिशब्देन जक्षं पुनर्गृहीत्वा इति आदिर्येषामित्यतद्गुणसंविज्ञानबहुव्रीहिः जक्षेत्यादयः षट् जक्षितिश्च सप्तम इत्यर्थः। एषु दीधीङ् वेवीङोश्छन्दोमात्रविषयत्वेन व्यावहारिकाः पञ्च।

यात् शब्दः (गन्ता)–यातेर्लटः शतरि अदादित्वाच्छपो लुकि सिद्धः। पुंसि सौ उगिदचामिति नुमि हल्ङ्यादिसंयोगान्तलोपयोर्नलोपाभावे यान्। औङादिषु भवद्वत् यान्तौ यान्तः, हेयान्-न्तौ-न्तः यान्तं-न्तौ, यातः याता याद्भ्यामित्यादि। क्लीबे स्वमोर्लुकि यात्। औङः श्यामाच्छीनद्योरिति नुमि यान्ती याती, जश्शसोः शौ उगिदचामिति नुमि यान्ति। तृतीयादिषु पुंवत्। स्त्रियां आच्छीनद्योरिति नुम्विकल्पे यान्ती याती, यान्त्यौ-न्त्यः यात्यौ-त्यः इत्यादि गौरीवत्। एवं भास्नादि आकारान्तादादिभ्यः, शविकरणतुदादिभ्यः, श्नम्विकरणरुधादिभ्यः, श्नाविकरणक्र्यादिभ्यः, लृडन्तेभ्यः सर्वेभ्यश्च धातुभ्यः शतरि निष्पन्ना अवर्णान्ताङ्गकाः भात्-न्ती-ती, स्नान्-न्ती-ती तुदन्-न्ती-ती, लिखन्-न्ती-ती, रुन्धन्-न्ती-ती-भिन्दन्-न्ती-ती, क्रीणत्-न्ती-ती पुनत-न्ती-ती भविष्यत-न्ती-ती श्रोष्यत्-न्ती-ती प्रभृतयः।

कुर्वत् शब्दः (कर्ता)–कृञो लटः शतरि उप्रत्यये ऋकारस्य गुणे अतउदित्युत्वे यणि निष्पन्नः। पुंसि कुर्वन्-न्तौ-न्तः-न्तम्-न्तौ कुर्वतः कुर्वता कुर्वद्भ्यामित्यादि भवच्छब्दवत्। क्लीबे स्वमोर्लुकि कुर्वत् औङः श्यां नुमभावे कुर्वती, जश्शसोःशौ उगिदचामिति नुमि कुर्वन्ति। तृतीयादिषु पुंवत् स्त्रियां ङीपि अवर्णान्ताङ्गाभावान्नुमभावे कुर्वती-त्यौ-त्यः इत्यादि गौरीवत्। एवं हलन्तेभ्यः अवर्णान्त स्वरान्तेभ्यश्चादादिधातुभ्यः श्नुविकरण-स्वादिधातुभ्यः उविकरणतनादिधातुभ्यश्च शतरि निघ्नन्-ती, रुदन्-ती, स्तुवन्-ती गायन्-ती चिन्वन्-ती तन्वन्-ती प्रभृतयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. शत्रन्तेषु पुंनपुंसकयोरभ्यस्तानभ्यस्तयोरेव नुमभावभावकृतो विशेषः, स्त्रियां सर्वेषामीकारान्तता, तत्र भ्वादि दिवादि-चुरादिषु णिच्सन्क्यच्काम्यजाद्यन्तेषु च नित्यं नुम्, अभ्यस्तेषु आकारेतरस्वर-हलन्तादादिषु स्वादितनादिषु च नुमभावः, आकारान्तादादिषु तुदादि-रुधादि-क्र्यादिषु सर्वेषां लृटि स्ये च नुम्विकल्पः इति क्लीबे औङि श्यां स्त्रियां सौ च साम्यमिति च विशेषमनुसन्धाय रूपाणि प्रवर्तनीयानि ।

श्रीमत्शब्दः (धनी)-श्रीरस्यास्तीत्यर्थे मतुप्प्रत्यये निष्पन्नः । पुंसि सौ परं नित्यं च नुमं बाधित्वा निरवकाशत्वापत्त्या सामर्थ्यादत्वसन्तस्येत्यादौ दीर्घे तत उगिदचामिति नुमि हल्ङ्यादिसंयोगान्त-लोपयोर्नलोपाभावे श्रीमान्, औङादौ दीर्घाभावे सर्वनामस्थाने नुमि श्रीमन्तौ-न्तः, हेश्रीमन्-न्तौ-न्तः श्रीमन्तम्-न्तौशसाद्यजादिषु योगे हलादौ जस्त्वे श्रीमतः श्रीमता श्रीमद्भ्यामित्यादि महद्वत्, क्लीबे स्वमोर्लुकि औङः श्यां, सर्वनामस्थाने जश्शसोः शौ उगिदचामिति नुमि श्रीमत् श्रीमती श्रीमन्ति । तृतीयादिषु पुंवत् । स्त्रियामुगित्वेन ङीपि श्रीमती-मत्यौ-मत्यः इत्यादि गौरीवत् । एवं मतु-वतु-क्तवतु-प्रत्ययान्ता अत्वन्ताः धीमत्-ती इक्षुमत्-ती धेनुवत्-ती दयावत्-ती, गतवत्-ती, श्रुतवत्-ती, कृतवत्-ती प्रभृतयः ।

प्रयोगाः—वैजयन्त्यः स्फुरन्त्यः । गायन्त्यः कलमधुराणि गोपवध्वः । अधीतवान्द्वापरादौ । श्रीमतां धीमतां वचः । स्नातीस्तीर्थेषु गोपिकाः । महान्ति कार्याणि कुरुष्व नित्यम् । सरितः कुर्वती गाधाः । इष्वन्तो वनानि । ज्योतिष्मतीस्तारकाः । गतवन्ति दिनानि । स्पृहावती वस्तुषु केषु मागधी ।

लघीयस्शब्दः (अतिलघुः)-अतिशयेन लघुरित्यर्थे इयसुन्नन्तः । पुंसि सौ उगिदचामिति नुमि सान्तमहत इति दीर्घे हल्ङ्यादिलोपे संयोगान्तसलोपे नलोपाभावे लघीयान् । औङादौ सर्वनामस्थाने नुम्युपधादीर्घे नस्यानुस्वारे लघीयांसौ लघीयांसः । सम्बुद्धौ नुम्युपधादीर्घाभावे हेलघीयन्-यांसौ-सः । लघीयांसम्-सौ, शसादावचि योगे हलादौ पदत्वेन सस्य रुत्वोत्वगुणेषु लघीयसः सा-लघीयोभ्याम्-भिः, लघीयसे-योभ्याम्-भ्यः, लघीयसः-योभ्याम्-भ्यः, लघीयसः-सोः-साम्, लघीयसि-सोः, सुपि रुत्वे वाशरीति विसर्गविकल्पे लघीयःसु लघीयस्सु । क्लीबे स्वमोर्लुकि सस्य रुत्वविसर्गयोः लघीयः, औङि श्यां लघीयसी, जश्शसोः शौ नुम्युपधादीर्घेनुस्वारे लघीयांसि । तृतीयादौ पुंवत् । स्त्रियामुगित्वेन ङीपि लघीयसी-स्यौ-स्यः इत्यादि गौरीवत् । एवं गरीयस्-पटीयस्-दवीयस्-भूयस्-प्रेयस् ज्यायस् प्रभृतय इयसुन्नन्ताः ।

विद्वस् शब्दः (ज्ञाता)-वेत्तेर्लटः शतरि वस्वादेशे सिद्धः । पुंसि सौ उगिदचामिति नुमि सान्तमहत इति दीर्घे हल्ङ्यादिसंयोगान्तलोपयोः विद्वान्, औङादौ नुम्युपधादीर्घेनुस्वारे विद्वांसौ विद्वांसः । सम्बुद्धौ नुमि दीर्घाभावे हेविद्वन्-द्वांसौ-सः, विद्वांसम्-सौ । शसादावचि भसंज्ञायाम्, वसोः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्प्रसारणम् (६-४-१३१) वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। इति वस्योकारे सम्प्रसारणाच्चे पूर्वरूपे वसुप्रत्ययावयवस्य सस्य षत्वे शसः सस्य रुत्वविसर्गयोः विदुषः विदुषा। हलादि पदत्वेन वसुस्रंस्विति सस्य दत्वे विद्वद्भ्याम्-भिः, विदुषे विद्वद्भ्याम्-भ्यः, विदुषः-द्भ्याम्-भ्यः विदुषः-षोः-षाम् विदुषि-षोः, सुपि पदत्वेन दत्वे चर्त्वे विद्वत्सु। क्लीबे स्वमोर्लुकि वसुस्रंस्वि दत्वे चर्त्वविकल्पे विद्वत्-द्। औङि श्यां भत्वेन सम्प्रसारणे पूर्वरूपे षत्वे विदुषी। जश्शसोः उगिदचामिति नुमि सान्तमहत इति दीर्घेनुस्वारे विद्वांसि। तृतीयादौ पुंवत्। स्त्रियामुगित्वेन ङीं भत्वेन सम्प्रसारणे पूर्वरूपे षत्वे विदुषी विदुष्यौ विदुष्य इत्यादि गौरीवत्। एवं लिटः क्वसु भाषायां सदवसश्रुव इति क्वस्वन्ताः निषेदिवस्-दुषी, अध्यूषिवस्-ध्यूषुसी, शुश्रुवस्-श्रूषु उपेयिवस्-युषी, तस्थिवस्-स्थुषी प्रभृतयः।

प्रयोगाः—तं तस्थिवांसं नगरोपकण्ठे। दवीयो वर्त्म दृश्यते। भूयसी दक्षिणेयम्। श्रेयां बहुविघ्नानि। म्रदीयसीमपि घनम्। विदुषी मूर्धनि सा बिभर्ति यान्। प्रेयोभिराप्तैः निर्गतोसौ। उपेयुषो मोक्षपथं मनस्विनः।

स्त्रीपुंसयोः समाः क्विप्क्विन्प्रत्ययान्ताः—

जगद्द्रुह् शब्दः—जगते द्रुह्यतीत्यर्थे क्विबन्तः। द्वयो-जगद्ध्रु ट-ड्-क्-ग् जगद्द्रुहौ-हः इत्यादि द्रु शब्दवत्। क्लीबे स्वमोः पुंवत्, जगद्द्रुही जगद्द्रुंहि-शेषं पुंवत्। एवं धर्मद्रुह्-मित्रस्निहादयः अन्नकिर् शब्दः—अन्नं किरतीत्यर्थे क्विबन्तः। द्वयोः अन्नकीः-किरौ-किरः गीरशब्दवत्। क्लीं अन्नकीः-किरी-किंरि शेषं पुंवत्। एवं यशःकिर् धान्यकिरादयः। मार्गरुध् शब्दः—मार्गं रुणद्धीत्य क्विबन्तः। द्वयोः मार्गरुत्-ध्-रुधौ-रुध इत्यादि वीरुध्वत्। क्लीबे मार्गरुत्-द् रुधी रुन्धि शे पुंवत्। एवं कार्यरुध्-मर्माविध्-प्रभृतयः। कार्ययुज्शब्दः—कार्यं युनक्तीत्यर्थे क्विन्नन्तः। द्वयो कार्ययुक्-ग्-युजौ-युजः इत्यादि स्रज्वत्। क्लीबे कार्ययुक्-ग्-युजी युञ्जि शेषं पुंवत्। एवं तनुत्य अन्नभुज्-हव्यभुज्-देहभाज्प्रभृतयः। लोकसृज् शब्दः लोकंसृजतीत्यर्थे क्विन्नन्तः। द्वयोः—लोकसृट् सृजौ सृजः इत्यादि विराड्वत्। क्लीबे लोकसृट्-ड् सृजी-सृञ्जि शेषं पुंवत्। एवं प्रजासृज्-विश्व सृज्-देवभ्राज्-प्रभृतयः। मर्मभिद् शब्दः—मर्म भिनत्तीत्यर्थे क्विबन्तः। द्वयोः मर्मभित्-द् भिदौ भि इत्यादि सुहृद्वत्। क्लीबे मर्मभित्-द् भिदी भिन्दि शेषं पुंवत्। एवं देहच्छिद्-तमोनुद्-हृदयभिद्प्रभृ तयः। कार्यकृत् शब्दः-कार्यं करोतीत्यर्थे क्विबन्तः। द्वयोः कार्यकृत्-द् कृतौ कृतः इत्यादि भूभृद्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्लीबे कार्यकृत्-द्-कृती कृन्ति शेषं पुंवत्। एवं कर्मकृत्-दयाभृत् शत्रुजित् धनुर्भृत्-प्रभृतयः। लोकद्विष् शब्दः-लोकं द्वेष्टीत्यर्थे क्विवन्तः। द्वयोःलोकद्विट्-ड्-द्विषौ-द्विषः इत्यादि अहिद्विष्वत्। क्लीबे लोकद्विट्-ड्-द्विषी-द्वींषि शेषं पुंवत्। एव दयाजुष्-रत्नमुष्-क्षेत्रकृष्-जलशुष्-प्रभृतयः। घृतस्पृश् शब्दः-घृतं स्पृशतीत्यर्थे क्विबन्तः। द्वयोः घृतस्पृक्-ग्-स्पृशौ-स्पृशः इत्यादि भूमिस्पृश्वत्। क्लीबे घृतस्पृक्-ग्-स्पृशी-स्पृंशि शेषं पुंवत्। एवं हृदयस्पृश्-शस्त्रस्पृश्-दूरदृश्-प्रभृतयः।

प्रयोगाः-धर्मद्रुहां नास्ति निष्कृतिः। हविर्भुजो देवाः। पतिद्विषो नार्यो निन्द्यन्ते। सर्वाः क्षेत्रकृषः प्रजाः। "भिन्दि वचांसि न ब्रूत। धनुर्भृतोप्यस्य दयार्द्रभावः। दूरदृशामृषीणाम्। हृदयच्छिदः संसारः। मुक्तिः काश्यां तनुत्यजः। निजौजसोज्जासयितुं जगद्द्रुहाम्। वनवतानवता किमहिद्रुहा।

तादृश् शब्दः—तच्छब्दपूर्वकादृशेः, त्यदादिषुदृशोऽनालोचने कञ्च (३-२-६०) त्यदादिषूपपदेषु अज्ञानार्थादृशेर्धातोः कञ्स्याच्चात्क्विन्। इति क्विन्प्रत्यये, आसर्वनाम्नः (६-३-६१) सर्वनाम्न आकारोन्तादेशः स्याद्दृग्दृशवतुषु। इत्यन्त्यस्य दस्यात्वे निष्पन्नः। द्वयोःसौ हल्ङ्यादिलोपे क्विन्प्रत्यय-स्येति कुत्वस्यासिद्धत्वात्पूर्वं व्रश्चेतिषत्वे जश्त्वेन डत्वे क्विन्प्रत्ययस्येति कुत्वे चर्त्वविकल्पे तादृक्-ग् अजादौ योगे तादृशौ-शः तादृग्भ्याम् तादृक्षु इत्यादि भूमिस्पृश्वत्। क्लीबे तादृक-ग् तादृशी तादृंशि शेषंपुंवत्। एवं यादृश् त्वादृश् मादृश् युष्मादृश अस्मादृश् एतादृश् भवादृश् शब्दाः। इदम् किम्पूर्वकात्तु क्विनि, इदंकिमोरीश्की (६-३-९०) इदम्किमोः ईश्कीआदेशौ स्तो दृग्दृशवतुषु। इति इदम ई किमः की इत्यादेशयोः ईदृश् कीदृश्शब्दौ। अदस्पूर्वात्दृशेः क्विनि आसर्वनाम्न इत्यात्वे सवर्णदीर्घे अदादृश् इत्यत्र अदसोसेरिति मूत्वे अमूदृश् शब्दः। समानपूर्वात् दृशेः, समानान्ययोश्चेति वाच्यम् (वा) इति क्विनि, दृग्दृशवतुषु (६-३-८९) एषु समानस्य सः स्यात्। इति सादेशे सदृश्शब्दः। अन्य-पूर्वकदृशेः क्विनि आसर्वनाम्न इत्यात्वे सवर्णदीर्घे अन्यादृश् शब्दः। एषामपि तादृश्शब्दवत्।

वि. एषां कञ्प्रत्ययपक्षेतु तादृश यादृश त्वादृश मादृश युष्मादृश ईदृश कीदृश एतादृश अन्यादृश सदृश इत्यादयोऽका-रान्तशब्दाः पुंसि रामवत् क्लीबे ज्ञानवत्, स्त्रियां कञन्तत्वान्ङीपि तादृशी यादृशी इत्यादय ईकारान्ताः, तादृशी-श्यौ-श्यः-इत्यादि गौरीवत्। क्सोपि वाच्यः (वा) इति क्स प्रत्यये तु सर्वनाम्नां दृक्षे च इत्यात्वे तादृक्ष यादृक्षेत्याद योप्यकारान्ताः शब्दाः, स्त्रियां टापि आकारान्ताः राम-ज्ञान-रमावद्रूपाणि।

प्रयोगाः भवादृशां बुद्धिरतीव तीव्रा। यादृशी तादृशी नेयम्। ईदृशः पुरुषस्यैतादृंशि वचनानि। कीदृशी व्यवस्थेयम्। सदृशी तव शूर सा परम्। मतिरुत्पद्यते तादृग् व्यवसायश्च तादृशः, सहाया-स्तादृशाश्चैव यादृशी भवितव्यता।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संख्याविशेषणानि—

एक शब्दः–नित्यमेकवचनान्तस्त्रिलिङ्गः सर्वनामसंज्ञया तत्कार्याणि च, पुंसि एकः एकम् ए
एकस्मै एकस्मात् एकस्य एकस्मिन्। क्लीबे एकम् शेषं पुवत्। स्त्रियां टाबन्तः एका एकाम् ए
एकस्यै एकस्याः एकस्याः एकस्याम्।

वि. 'एकोन्यार्थे प्रधाने च प्रथमे केवले तथा, साधारणे समाने च संख्यायां च प्रयुज्यते'। संख्यायामेवासौ नि
वचनान्तः, अर्थान्तरे बहुवचनान्तोपि बहुवचनेपि सर्वनामकार्याणि, यथा एके (अन्ये) इत्थमाहुः। एकेषां (अन्ये
मते नैवमिदम्।

द्वि शब्दः-नित्यं द्विवचनान्तस्त्रिलिङ्गः सर्वनामसंज्ञाः,पुंनपुंसकयोस्त्यदाद्यत्वेऽकारान्तः, स्त्रिया
टापि आकारान्तः। पुंसि द्वौ२द्वाभ्याम्३द्वयोः२, क्लीबे द्वे द्वे शेषं पुंवत्। स्त्रियां द्वे द्वे शेषं पुंवत्

त्रि शब्दः-नित्यं बहुवचनान्तस्त्रिलिङ्गः पुंसि जसिचेति गुणेऽयादेशे त्रयः, शसि पूर्वसवर्णदीर्घे
त्रीन् त्रिभिः-भ्यः आमि, त्रेस्त्रयः (७-१५३) त्रिशब्दस्य त्रयादेशः स्यादामि। इति त्रयादेशे नुटि
णत्वे त्रयाणाम्, त्रिषु। क्लीबे जश्शसोः शौ सर्वनामस्थानत्वेन इकोचीति नुमि सर्वनामस्थाने
दीर्घे णत्वे त्रीणि, शेषं पुंवत्। स्त्रियां, त्रिचतुरोः स्त्रियां तिसृचतसृ (७-२-९९) स्त्रीलिङ्गयोरेतयोरेत
देशौ स्तो विभक्तौ परतः। इति सर्वत्र तिसृ इत्यादेशे जसि ऋतोङीति गुणे शसि पूर्वसवर्णदीर्घे
प्राप्ते-अचि र ऋतः (७-२-१००) तिसृचतसृ एतयो ऋकारस्य रेफादेशः स्यादचि। इति रेफे ति
तिस्रः तिसृभिः-भ्यः, आमि तिसृआमित्यत्र नुटं बाधित्वा रेफादेशे प्राप्ते, नुमचिरतृज्वद्भावेगुणे
नुट् पूर्वविप्रतिषेधेन (वा) इति नुटि नामीति प्राप्ते, न तिसृचतसृ (६-४-४) एतयोर्नामि दीर्घो न स्या
इति निषेधे णत्वे तिसृणाम् तिसृषु।

चतुर् शब्दः–नित्यं बहुवचनान्तस्त्रिलिङ्गः। पुंसि जसि सर्वनामस्थानत्वेन चतुरनडुहोरित्याम्
यणिरुत्वविसर्गयोः चत्वारः। शसादौ योगः चतुरः चतुर्भिः-भ्यः। आमि, षट्चतुर्भ्य
(७-१-५५) षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात्। इति नुटि रषाभ्यामिति
अचो रहाभ्यां द्वे (८-४-४६) अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। इति णका
द्वित्वविकल्पे चतुर्ण्णाम् चतुर्णाम्। सुपि खरवसानयोरिति विसर्गे प्राप्ते, रो
(८-३-१६) सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य। इति निषेधे आदेशप्रत्यययोरिति
अचोरहाभ्यामिति द्वित्वे प्राप्ते, शरोऽचि (८-४-४९) अचि परे शरो न द्वे स्तः। इति निषेधे चतु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्लीबे जश्शसोः शौ सर्वनामस्थानत्वेन चतुरनडुहोरित्यामि र्याण चत्वारि। शेषं पुंवत्। स्त्रियां त्रिचतुरोरिति चतसृ इत्यादेशः, चतसृ अस् इत्यत्र अचिरऋत इति रेफादेशे चतस्रः। चतसृभिः-भ्यः। आमि चतसृ आमित्यत्र रेफे प्राप्ते पूर्वविप्रतिषेधेन नुटि नतिसृचतसृ इति दीर्घनिषेधे णत्वे चतसृणाम् चतसृषु।

पञ्चन् शब्दः-नित्यं बहुवचनान्तस्त्रिषु लिङ्गेषु सरूपः। ष्णान्ता षट् (१-१-२४) षान्ता नान्ता च संख्या षट्-संज्ञा स्यात्। इति षट्संज्ञायाम्, षड्भ्यो लुक् (७-१-२२) षड्भ्यः परयोर्जश्शसोर्लुक्स्यात्। इति जश्शसोर्लुकि नलोपे पञ्च। हलादौ पदत्वेन नलोपे पञ्चभिः-भ्यः, आमि षट्चतुर्भ्यश्चेति नुटि प्रातिपदिकान्तनलोपेऽपि तदसिद्धत्या नामीति दीर्घाप्राप्तौ, नोपधायाः (६-४-७) नान्तस्योपधाया दीर्घः स्यान्नामि परे। इति दीर्घे नलोपे पञ्चसु। एवं सप्तन् नवन् दशन् एकादशन्प्रभृतयो नान्ताः।

षष् शब्दः-नित्यं बहुवचनान्तस्त्रिषु लिङ्गेषु सरूपः। षट्संज्ञायां षड्भ्य इति जश्शसोर्लुकि षस्य जश्त्वेन डत्वे चर्त्वविकल्पे षट् ड्। पदत्वेन जश्त्वे षड्भिः भ्यः। आमि षट्चतुर्भ्य इति नुटि जश्त्वे अनामिति पर्युदासेन ष्टुत्वेन नस्य णत्वे विकल्पापवादेन प्रत्ययेभाषायांनित्यमिति डकारस्यानुनासिके णकारे षण्णाम्। सुपि जश्त्वे डःसीतिधुड्विकल्पेन चर्त्वे षट्त्सु षट्सु।

अष्टन् शब्दः-नित्यं बहुवचनान्तस्त्रिषु लिङ्गेषु सरूपः। जश्शसोः, अष्टन आ विभक्तौ (७-४-८४) अष्टन आत्वं स्याद्धलादौ विभक्तौ। इत्यप्राप्तावपि, अष्टाभ्य औश् (७-१ २१) कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्। अष्टभ्य इति वक्तव्ये अष्टाभ्य इति कृतात्वनिर्देशो जश्शसोरप्यात्वं ज्ञापयति। तेनाष्टनो नकारस्याऽऽत्वे सवर्णदीर्घे अस: स्थाने औ इत्यादेशे वृद्धौ अष्टौ। हलादित्वादष्टनआ इत्यात्वे सवर्णदीर्घे अष्टाभिः-भ्यः। आमि नुटि कृते हलादित्वादात्वे अष्टानाम् अष्टासु। अष्टनो दीर्घादिति सूत्रे दीर्घग्रहणेनाष्टन आत्वं वैकल्पिकं ज्ञाप्यते। तेनात्वाभावपक्षे षट्त्वेन जश्शसोर्लुकि नलोपे अष्ट अष्ट अष्टभिः-भ्यः अष्टानाम् अष्टसु इति पञ्चन्शब्दवत्।

विंशति-त्रिंशत्-चत्वारिंश-त्पञ्चाशत्षष्टि-सप्तत्य-शीति-नवति-कोटि-शब्दाः विशेष्यस्यान्यथालिङ्गेऽपि स्त्रियामेव, शत-सहस्रा-युत-प्रयुत-लक्षा-र्बुदादि-शब्दाः क्लीब एव भवन्ति। तावत्संख्याया एकत्वे एकवचनं, द्वित्वे द्विवचनं, बहुत्वे बहुवचनम्। विशेष्यशब्दास्त्वेषां सर्वत्र बहुवचनान्ता एव। विंशत्यादीनामिकारान्तानां मतिशब्दवत्, त्रिंशदादीनां सरिच्छब्दवत्, शतसहस्रादीनां ज्ञानशब्दवद् रूपाणि। पूरणार्थकाः प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चमादयस्तु विशेष्यानुसारेण सर्वेषु लिङ्गवचनेषु, न्यूहार्थका द्वय-द्वितय-त्रय-त्रितयादयस्तु क्लीबे स्त्रियां वा सर्वेषु वचनेषु प्रयुज्यन्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. १ अयमत्र संग्रहः— विंशत्यादावनावृत्तावैक्यं संख्येयसंख्ययोः। त्र्याद्यास्तु भूम्नि संख्येये द्व्येकौ तद्वचनौ मतौ प्रायः शतादयः क्लीबे विंशत्याद्याः स्त्रियां मताः। दशान्ताः पूरणार्थाश्च त्रिषु व्यूहार्थका द्वयोः। (क) एकादयोऽष्टादशान्ताः संख्येयमात्रबोधका विशेष्यनिघ्ना त्रिलिङ्गा एकद्विवर्जं बहुवचनान्ता एव। (ख) ऊनविंशत्यादयः परार्धान्ताः संख्या-वाचिनो नामजातीयाः संख्येयवाचिनो विशेषणजातीयाश्च भवन्ति; संख्यावाचित्वे संख्येयवस्तुबोधकशब्दे षष्ठी, संख्येयवाचित्वे विशेष्यानुसारिणी तेषु विभक्तिः। उभयथापि ऊनविंशत्यादि नवनवत्यन्ताः कोटिशब्दश्च स्त्रियामेव, कोटि-वर्जं शतादयः परार्धान्ताः क्लीब एव, एषूभयथापि तावत्संख्यानामेकत्व-द्वित्व-बहुत्वानुसारेण एक-द्वि-बहुवचनानि, संख्येयवस्तुबोधकनामशब्दास्तु सदा बहुवचनान्ता एव (ग) तत्संख्यापूरकार्थकाः प्रथमादयः सर्वे विशेषणशब्दाः विशेष्यानुसारिलिङ्गवचनविभक्त्यन्ता भवन्ति (घ) तावत्सङ्घबोधका द्वयादयस्तु नामजातीयाः प्रायः स्त्रीक्लीबलिङ्गाः समूहगतैकत्वद्वित्वाद्यनुसारेण तेषु वचनानि भवन्ति। यथा (क) एकः पुरुषः एका स्त्री एकं कुलम्, द्वौ पुरुषौ द्वे स्त्रियौ द्वे कुले, त्रयश्चत्वारो वा पुरुषाः, तिस्रश्चतस्रो वा स्त्रियः, त्रीणि चत्वारि वा वस्तूनि, पञ्च षट् सप्त दश एकादश अष्टादश वा पुरुषाः स्त्रियो वस्तूनि वा। (ख) संख्यायां-जनानां स्त्रीणां वस्तूनां वा विंशतिः, विंशती, विंशतयः, त्रिंशत् त्रिंशतौ त्रिंशतः, शतं शते शतानि इत्यादि, संख्येये-विंशतिः-ती-तयः त्रिंशत्-तौ-तः, शतं-ते-तानि वा पुरुषाः स्त्रियो वस्तूनि वा। (ग) प्रथमश्छात्रः, प्रथमा स्त्री; प्रथमं कुलम्, द्वितीयः तृतीयः चतुर्थः पञ्चमः एकादशः विंशः शततमो वा जनः, द्वितीया तृतीया चतुर्थी पञ्चमी एकादशी विंशी शततमी वा स्त्री; द्वितीयं तृतीयं चतुर्थं पञ्चमं एकादशं विंशं शततम् वा गृहम्। (घ) पुरुषयोः स्त्रियोः वस्तुनोर्वा द्वयं द्वितयं द्वयी द्वितयी वा। तेषां त्रयं-यी त्रितयं-यी च तुष्टयं-यी, पञ्चतयं-यी षट्कं सप्तकं दशकं शतकं सहस्रकम्, पञ्च शतकानि इत्यादि।

वि. २ दशकावान्तरसंख्यासु एकद्व्यादिशब्दाः समासेनैकीभूता अनेकधा विकृता भवन्ति, नवयोगस्थलेषूत्तरदशक-शब्दे एकोनशब्दः सम्बध्यते। यथा एकादश द्वादश त्रयोदश अष्टादश त्रयस्त्रिंशत् एकोनविंशतिः ऊनविंशतिः नवनवतिः इत्यादि।

प्रयोगाः—शतं ब्राह्मणानामन्त्रय। अद्य षष्ठी तिथिः। महाभारते लक्षं श्लोकाः सन्ति। चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्। अदणोर्द्वयं विकसितम्। पुस्तकानां विंशती अवशिष्येते। शततमेऽध्याये किमुक्तम्। एकादश्यां न भुञ्जीत। रूप्यकाणां सहस्रमस्ति। अदेयमासीत्त्रयमेव भूपतेः।

उभशब्दः–नित्यं द्विवचनान्तः सर्वनामसंज्ञकस्त्रिलिङ्गः–सर्वशब्दवत्। पुंसि उभौ उभाभ्याम् उभयोः। क्लीबे उभे उभे शेषं पुंवत्। स्त्रियां उभाशब्दः उभे उभे शेषं पुंवत्

वि. उभयशब्दः सर्वनामसंज्ञकः अवयवद्वययुतबोधकः। अस्य द्विवचनं नास्तीति कैयटः उभयः उभये उभयस्मै-स्मात्-स्मिन् इत्यादि। यथा-उभयो मणिः उभये देवमनुष्याः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुशब्दः-अनिश्चितबहुवाची प्रायो बहुवचनान्तः—पुंसि बहवः बहून् इत्यादि शम्भुशब्दवत् क्लीबे बहूनि इत्यादि मधुशब्दवत्। स्त्रियां बह्वादिभ्यश्चेति ङीषि बह्वीशब्दो गौरीशब्दवत्।

वि. परिमाणाधिक्यादि बोधको बहुशब्दस्तु एकवचनेपि प्रयुज्यते। अल्पस्य हेतोर्बहु हातुमिच्छन्। बहुना समयेनागतोयम्, बहोः कालादृदृष्टं त्वपरमिव मन्ये वनमिदम्।

कति शब्दः-जिज्ञास्यबहुवाची नित्यं बहुवचनान्तस्त्रिषु लिङ्गेषु सरूपः। बहुगणवतुडति संख्या (१-१-२३) एते संख्यासंज्ञाः स्युः। डति च (१-१-२४) डत्यन्ता संख्या षट्संज्ञा स्यात्। इति संख्यासंज्ञायां षट्संज्ञायां च षड्भ्योलुगिति जश्शसोर्लुकि कति कतिभिः-भ्यः कतीनाम् कतिषु। युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः।

वि. अनिश्चित संख्येयवाची कतिपयशब्द त्रिलिङ्गः स्त्रियामाकारान्तः पुंसि जसि प्रथम चरमेति सर्वनामसंज्ञाविकल्पेन कतिपये कतिपयाः रूपान्तराणि राम ज्ञान रमावत्। प्रायेणायं बहुवचनेषु प्रयुज्यते।

प्रयोगाः—उभौ यदि व्योम्नि पृथक्प्रवाहौ। उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। कतिभिर्दिनैरागतस्त्वम्। तत्र कति वस्तूनि सन्ति।

विशेष्यापेक्षया विशेषणं, विशेषणापेक्षया विशेष्यं भवति। वस्तुपरिच्छेदकं विशेष्यं प्रधानं गुणादिना तद्व्यावर्तकं विशेषणमप्रधानं भवति। प्रधानानुसारि अप्रधानमिति विशेषणं विशेष्यनिघ्नं (विशेषवर्जं विशेष्यानुसारिलिङ्गवचनविभक्तिकं) भवति। विशेषणजातीयोपि शब्दो विशेष्यान्तरविवक्षायामप्रधानं च भवति। सर्वनामानि क्वचिद्विशेषणानि क्वचिद्विशेष्याण्यपि भवन्ति। यथा न सा सभा यत्र न सन्ति वृद्धाः। स्थूलाल्लघु सतां प्रियम्। रामो राजा बभूव। शिवो देवः प्रसीदतु। महान्विद्वान्प्रशस्यते। सर्वे जना निर्गताः। एष देवः। सुजनं तं वन्दे।

श्नाः—विशेषणानि कीदृशानि। कानि विशेषणानि स्त्रीपुंसयोः समानानि भवन्ति। विशेषणशब्देषु स्त्रियां प्रकृतिशब्दाः कीदृशा भवन्ति। संख्याविशेषणेषु लिङ्गवचनव्यवस्थाविशेषः कस्मिन् शब्दे कीदृशः। मतु-वतु-क्तवतु-इयसुन् वसु-तृप्रत्ययान्तशब्दाः स्त्रियां कीदृशा भवन्ति। शत्रन्तेषु नुम्भावाभावव्यवस्था का। त्यदादिषूपपदेषु दृशेः कन्क्विप्प्रत्यययोः कीदृशाः शब्दाः, तेषु को विशेषः। अधस्तनवाक्यगतान्विशेषणशब्दांस्तेषां विशेष्यशब्दांश्च निरूपयत।

बलीयसी केवलमीश्वरेच्छा। मर्मभिन्दि वचांसि ते। त्वादृशानां शुभा गिरः। बहूनामप्यसाराणां संहतिः कार्यसाधिका। विरक्ताः सत्पुरुषाश्चतुर्थमाश्रमं प्रविशन्ति। अष्टादशपुराणानि चक्रे सत्यवतीसुतः। चतस्रो वेदसंहिताः। एकः पार्थो धनुष्मताम्। कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः। तथापि शुश्रूषुरहं गरीयसीर्गिरोथवा श्रेयसि केन तृप्यते। अगरीयान्न पदं नृपश्रियः। उद्वहेत्सदृशीं भार्यामसपिण्डां यवीयसीम्। गावश्चरन्त्यो विपिने समन्तात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अव्ययप्रकरणम्

स्वरादिनिपातमव्ययम् (१-१-३७) स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । न व्येति रूपविकारै परिवर्तते इत्यव्ययम् । उक्तं च-सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु य व्येति तदव्ययम् ॥ स्वरादयः, चादयोनिपाताः, अन्ये च शब्दविशेषा इति त्रिविधान्यव्ययानि प्रादय उपसर्गाः, प्रत्यादयःकर्मप्रवचनीयाश्च निपातेष्वन्तर्भवन्ति ।

वि. १ भाष्यकारोद्धृतायाः सदृशमित्याद्याथर्वणश्रुतिकारिकायाः—"लिङ्गविशेषप्रतिपादने सामर्थ्याभावात्त्रिषु लिङ्गे साधनप्रधानानामपि शक्त्यन्तरा (कारकान्तरा) नावेशात् क्रियाप्रधानानाञ्च शक्तिसम्बन्धाभावात्कारकेषु, एकत्वादि वचनेषु च सर्वेषु यत्र व्येति नानात्वं न गच्छति तदव्ययम् । अव्ययीभावस्य शक्तिलिङ्गविशेषावेशेपि वचनादव्ययत्वं स्वत्यादीनां कर्मप्रवचनीयसंज्ञा । तत्र यान्यसत्त्वभूतार्थाभिधायीन्यव्ययानि तेषां लिङ्गादिभिरयोगः, तेषां द्रव्यधर्मत्वात् सत्त्ववाचिनामपि शब्दशक्तिस्वाभाव्यात्तदयोगः, यथा युष्मदस्मदोर्लिङ्गायोगः" इति प्रदीपाभिमता व्याख्या । "स्त्रीपुं पुंसकत्वानि सत्त्वगुणाः एकत्वद्वित्वबहुत्वानि च, एतानर्थान्केचिद्वियन्ति केचिन्न वियन्ति, ये न वियन्ति तदव्यय इति भाष्ये । "उन्मत्तगङ्गमित्यादीनां तु वाचनिकमव्ययत्वमव्ययीभाव इति महासंज्ञया सूच्यते" इत्युद्योते ।

वि. २ निपातानामेकाचां प्रगृह्यसंज्ञा, स्वरादीनां त्वेकाचामपि न, निपाता आद्युदात्ता इति स्वरेऽपि विशे स्वराद्यर्थे शोभनं स्वः अत्युच्चैर्वद इति विशेषणयोगोपि, निपातार्थे नामार्थस्याभेदेनान्वयायोग्यत्वाद्विशेषणयोगोपि नेत् स्वरादिनिपातयोर्विशेषः । उक्तं च शब्दशक्तौ—"स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाद्भ्रमः । स्वराद्यन्यो निपातो विविधश्चादियोगतः" इति । निपाता अद्रव्यवाचिन एव, स्वरादयस्तु द्रव्यार्था अद्रव्यार्थाश्च । स्वस्ति (कर्म) वाचयं स्वस्ति (कर्ता) स्तात्; स्वः (कर्म) पश्य । स्वः (अपादानं) आगतः; स्वः (अधिकरणं) तिष्ठ इति स्वरादौ क्रियासम्बन्धेऽ कारकशक्तिदर्शनात्, लोहितगङ्गमित्यादौ द्रव्यधर्मनपुंसकत्वदर्शनाच द्रव्यार्थत्वं स्पष्टमेव । उक्तं च भाष्ये—"किञ्चिदव्य च्चैर्नीचैरिति विभक्त्यर्थप्रधानं, हिरुक्पृथगिति क्रियाप्रधानं, तद्धितश्चापि यत्रेति विभक्त्यर्थप्रधानं नानाविनेति क्रियाप्रधा न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोस्ति "इति ।" अन्येत्वाहुः किञ्चिदव्ययं क्रियाप्रधानं, किञ्चित्साधनप्रधानम नापि क्रियाप्रधानं नापि साधनप्रधानं, यथा स्वः पश्य लोहितगङ्गमुन्मत्तगङ्गं देश इति तथाचात्र नपुंसकत्वम्" इतिप्रदी

स्वरादयःप्रचलिताः—स्वर् स्वर्गे परलोके च । अन्तर् मध्ये । प्रातर् प्रत्यूषे । पुनर् अप्रथ विशेषे च । एते रेफान्तास्तेन स्वर्यातीत्यादौ नोत्वम् । उच्चैस् महति । नीचैस् अल्पे । शनै क्रियामान्द्ये । तिरस् परिभवेऽन्तर्धाने तिर्यगर्थे च । बहिस् बाह्ये । भूयस् पुनरर्थे सामीप्ये च ह्यस् अतीतेह्नि । श्वर् अनागतेन्हि । एते सान्तास्तेन उच्चैर्वक्तीत्यादौ रुत्वम् । ऋते अन्तरे विना वर्जने । युगपत् एककाले । आरात् दूरसमीपयोः । पृथक् भिन्ने । दिवा दिवसे । न रात्रौ निशि । सायं निशामुखे । चिरं बहुकाले । मनाक् ईषत् अल्पे । जोषं सुखे मौने च तूष्णीं मौने । समया समीपे मध्ये च । निकषा अन्तिके । स्वयम् आत्मनेत्यर्थे । वृथा मुधा व्यर्थे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नञ् निषेधे। श्रद्धा स्फुटावधारणयोः। वत् (तेनतुल्यंक्रियाचेद्वतिः तत्रतस्येवेति वतिप्रत्ययान्तम्) तुल्ये। अन्तरा मध्ये विनार्थे च। शम् सुखे। सहसा आकस्मिकाविमर्शयोः। नाना अनेकविनार्थयोः। स्वस्ति मङ्गले। स्वाहा देवहविर्दाने। स्वधा पितृहविर्दाने। अलं भूषणपर्याप्तिशक्तिवारणनिषेधेषु। वषट् वौषट् श्रौषट् यज्ञहविर्दाने। अन्यत् अन्यार्थे। अस्ति (विभक्तिप्रतिरूपकं) सत्तायाम्। उपांशु अप्रकाशोच्चारणे रहस्ये च। विहायसा आकाशे। मृषा मिथ्या वितथे। पुरा अविरते चिरातीते भविष्यदासन्ने च। मिथो मिथस् रहसि सहार्थे च। प्रायस् बाहुल्ये। अभीक्ष्णं पौनःपुन्ये। साकं सार्धं सहार्थे। नमस् नतौ। धिक् निन्दाभर्त्सनयोः। आम् अङ्गीकारे। मा माङ् निषेधे। आकृतिगणोयम्। तेन—कामं स्वाच्छन्द्ये। प्रकामम् अतिशये। साम्प्रतं न्याय्ये। परं किन्त्वर्थे ईषदुत्कर्षे च। साक्षात् प्रत्यक्षे। साचि तिर्यगर्थे। सत्यम् अर्धाङ्गीकारे। मङ्क्षु आशु सपदि झटिति द्राक् तरसा शैघ्र्ये। संवत् वर्षे। अवश्यं निश्चये। बलवत् अतीव अतिशये। प्रादुस् आविस् प्रकाशे। अनिशं नित्यदा सदा अजस्रं सन्ततं सातत्ये। उषा प्रभाते। रोदसी द्यावापृथिव्योः। ओम् अङ्गीकारे ब्रह्मणि च। भूर् पृथिव्याम्। भुवर् अन्तरिक्षे। सुष्ठु प्रशंसायाम्। दुष्ठु निकृष्टे। सु पूजायाम्। आः आश्चर्ये। कु कुत्सिते ईषदर्थे च। अञ्जसा तत्त्वे शैघ्र्ये च। अलं विनाशे। स्थाने युक्तार्थे। चिराय चिररात्राय चिरं चिरस्य चिरेण चिरात् चिरार्थे। शुदि शुक्लपक्षे। वदि कृष्णपक्षे। इत्यादि।

चादयः प्रचलिताः—च समुच्चयादौ। वा विकल्पादौ। ह प्रसिद्धौ। अह अद्भुते खेदे च। एव अवधारणादौ। एवम् उक्तपरामर्शे। नूनं निश्चये तर्के च। शश्वत् पौनःपुन्ये नित्ये सहार्थे च। युगपत् एककाले। भूयस् पुनरर्थे आधिक्ये च। चेत् यद्यर्थे। कच्चित् इष्टप्रश्ने। किञ्चित् ईषदर्थे। हन्त हर्षविषादानुकम्पावाक्यारम्भेषु। माङ् नञ् निषेधादौ। यावत् तावत् साकल्यावधिमानावधारणेषु। श्रौषट् वौषट् वषट् यज्ञहविर्दाने। स्वाहा अग्नौ देवहविर्दाने। स्वधा पितृहविर्दाने। तुम् तुङ्कारे। तथाहि निदर्शने। खलु निषेधवाक्यालङ्कारनिश्चयेषु। किल इवार्थे वार्तायामलीके च। अथो अथ मङ्गलानन्तरारम्भप्रश्न कार्त्स्न्येषु। सुष्ठु प्रशंसायाम्। स्म अतीते। उपसर्गविभक्तिप्रतिरूपकाश्च अवदत्तं-(उपसर्गप्रतिरूपकं) अहंयुः (सुब्विभक्तिप्रतिरूपकं) अस्तिक्षीरा-(तिङ्विभक्तिप्रतिरूपकं)।अ सम्बोधनाधिक्षेपनिषेधेषु। आ वाक्यस्मरणयोः। इ सम्बोधनजुगुप्साविस्मयेषु। ई उ ऊ ए ऐ ओ औ सम्बोधने। यथाकथा च अनादरे। अङ्ग है हे भो अये सम्बोधने। विषु नानार्थे। एकपदे अकस्मादित्यर्थे। आतः इतोर्थे। चादिरप्याकृतिगणः। तेन्- यत् तत् हेतौ। आहोस्वित् विकल्पे। व पादपूरणे इवार्थे च। हुम् भर्त्सने। इव सादृश्ये। अद्यत्वे इदानीमित्यर्थे। इत्यादि।

वि. १ अप्रचलिताः स्वरादयः—सनुतर् अन्तर्धाने। ऋधक् सत्ये। अवस् बाह्ये। हेतौ निमित्ते। इद्धा प्राकाश्ये। शमि अर्थे जुगुप्सिते च। सना सनत् सनात् नित्ये। उपधा भेदे। ज्योक् कालभूयस्त्वे। कं जले सुखे च। क्षमा क्षान्तौ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रबाहुकं प्रवाहिका समकाले ऊर्ध्वार्थे च। आर्यहलं बलात्कारे। हिरुक् वर्जने। अम् शैघ्र्ये अल्पे च। प्रताम् ग्लानौ प्रशाम् समानार्थे। प्रतान् विस्तारे। मिथु द्वावित्यर्थे। ताजक् शैघ्र्ये। आनुषक् आनुपूर्व्ये, अनुषक् अनुभावे। श्वः शीघ्रसाम्प्रतिकयोः, नृगिति शैघ्र्यार्थे। एवमन्येपि। चादयः—सूपत् कूपत् प्रश्ने प्रशंसायां च। कुवित् भूर्यर्थे प्रशं च। यत्र अनवक्लृप्त्यादौ। नेत् शङ्काप्रतिषेधादौ। चण् चेदर्थे। नह प्रत्यारम्भे। माकि माकिं नकि वर्जने। त्वै विं वितर्कयोः। द्वै न्वै वितर्के। रै दाने अनादरे च। आदह उपक्रमहिंसाकुत्सनेषु। शुक शैघ्र्ये। पाट् प्याट् सम्बो ध हिंसाप्रातिलोम्यपादपूरणेषु। पुत् कुत्सायाम्। सम् सर्वतोभावे। कम् पादपूरणे। शुकम् अतिशये। अनु वित शंवत् अन्तःकरणे आभिमुख्ये च। चटु चाटु प्रियवाक्ये। एवमन्येपि। एषु केचन क्वाचित्काः।

वि. २ तत्साहश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः। अब्राह्मणः, नग अदृष्टम्, अनुदरा, अगौः, अधर्मः एषु क्रमश एतेर्थाः। विशेषतो नञः प्रसज्यप्रतिषेधः (निषेधोऽभावरूपः), पर्यु (तद्भिन्नो भावरूपः) चार्थः। न गच्छतीत्यादौक्रियान्वये गमनाभावादिः प्रसज्यप्रतिषेधोर्थः; अधर्म इत्यादावुत्तरपदार्थ विरोधिभावरूपः पर्युदासोर्थः। उक्तंच—"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोसौ क्रियया सह नञ् "प्रधानत्वं विधेर्यत्र निषेधस्याप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" इति। यथा न कलञ्जं भक्षयेदि कलञ्जभक्षणाभावः प्रसज्यप्रतिषेधः, तस्य व्रतमित्यधिकारे नेक्षेतोद्यन्तमादित्यमित्यत्र ईक्षणविरोधिसङ्कल्परूपः, इत्यत्र धर्मविरोधिपापरूपो भावः पर्युदासः प्रतीयते। एवकारस्यावधारणमर्थः, स द्विधा अयोगव्यवच्छेदो न्ययोगव्यवच्छे क्रियया सह योगेऽयोगव्यवच्छेदः, यथा नीलो घटो भवत्येवेत्यादौ। नामादिभिः सह योगेऽन्ययोगव्यवच्छेदः, यथा एव धनुर्धरः रम्यमेवेदमित्यादौ।

वि. ३. स्वरादेश्चादेश्च स्वरविभेदेन क्वचिद्विशेषणयोगायोगविशेषेण च पृथग्गणविभागः। एतदनुसारेण च्छन्दा एकत्रैव गणे, केचित्तूभयथा व्यवहारेणोभयत्र निर्दिष्टाः। द्वयोराकृतिगणत्वेनान्येपि व्यवहृताः शब्दा उचिते निवेशनीयाः। खाट् फूत् थूत् इत्यादयोऽनुकरणशब्दा अप्यव्ययेषु गण्यन्ते। त्वामस्मिवच्मीत्यत्राहमर्थकमस्मीति, उवाचे आहेति, बभूवेत्यर्थे आसेति च विभक्तिप्रतिरूपकमव्ययम्। अहङ्कारः अहमहमिका अहंभावः अहंमन्यः त्वङ्कारः मम अस्तिवादः नास्तिवादः इत्यादौ समस्तत्वे विभक्त्यन्तत्वेन वर्तितुमसमर्थाः अहं त्वं मम अस्ति नास्तीत्यादयः शब्दा क्तिप्रतिरूपकाण्यव्ययान्येव। स्वरादीनां चादीनां च प्रयोगवाक्यानि शब्दकौस्तुभे प्रपञ्चितानि।

प्रयोगाः-छायेव या स्वर्जलधेर्जलेषु। स्वर्यातस्य ह्यपुत्रस्य। प्रातः सन्ध्यामुपासीत। चिरं चरो राजराजस्य दध्यौ। विलङ्घ्य लङ्कां निकषा हनिष्यति। त्वामन्तरा तामरसायता सहसा विदधीत न क्रियाम्। दिवः प्रसूनं सहसा पपात। मा कुरु धनजनयौवनगर्वम्। त्वं च सद्यो विवदावहै। रम्यमेवेदम्।

अन्येऽव्ययशब्दाः—

तद्धितश्चासर्वविभक्तिः (१-३-३८) यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् परिगणनं कर्तव्यम्-तसिलादयः प्राक्पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्य इति। परिगणनात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पचतिरूपं (प्रशस्तं पचति) पचतिकल्पम् (ईषत्पचति। कृन्मेजन्तः (१-१-३९) कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्। स्मारं स्मारम्। नामं नामम्। क्त्वातोसुन्कसुनः(१-१-४०)एतदन्तमव्ययं स्यात्। कृत्वा गत्वा विधाय। अव्ययीभावश्च (१-१-४१) अव्ययीभावसमासोऽव्ययं स्यात्। अधिहरि यथाक्रमम्।

वि. १ तद्धितश्चेतिसूत्रभाष्ये द्वयेकयोरिति सूत्रभङ्गेन द्विबह्वर्थयोर्द्विबहुवचने अन्यत्रौत्सर्गिकमेकवचनमिति विधानादेकवचनस्य सार्वत्रिकतया अलिङ्गसंख्येभ्योऽव्ययेभ्योप्यौत्सर्गिकमेकवचनं सर्वविभक्तीनां भवति, तथा च यस्मात्सर्वा विभक्तयो न भवन्तीति बहुवचनप्रकृतिकबहुव्रीहिर्नोचितः, किन्तु यस्मात् सर्वा वचनत्रितयात्मिका विभक्तिर्नोत्पद्यते इति समासेन यस्मात्सर्वा विभक्तिर्नोत्पद्यत इत्यर्थो वृत्तौ दर्शितः, एवं च पचतिरूपमित्यादेरप्यसर्वविभक्तिकत्वेनाव्ययत्वप्रसङ्गे तद्वारणाय परिगणनं कर्तव्यमित्युक्तम्।

वि. २ अव्ययेभ्यः सप्तानामपि विभक्तीनां त्रीण्यपि वचनानि भवन्ति तानि तु लुप्यन्ते इति, सप्तानामेकवचनान्येवेति, प्रथमाया एव वचनत्रयमिति, प्रथमाया एकवचनमेवेति च पक्षचतुष्टयं ग्रन्थेषूपलभ्यते; तत्र प्रथमैकवचनमेवेति चतुर्थ एव पक्षः क्षोदक्षमः, इतरत्तु पक्षत्रयमभ्युच्चयवादेनैवोपन्यस्यते न तु तात्त्विकमिति शब्दकौस्तुभे। अश्रूयमाणविभक्तिकमव्ययमविभक्तीत्युच्यते इति प्रदीपे। तथात्वे दधिमध्वादावतिप्रसङ्गात्क्वचिदप्यश्रूयमाणविभक्तिकमिति वाच्यम्।

वि. ३ मेजन्त इति कृत एव विशेषणं नतु कृदन्तस्य। एजन्तमव्ययं जीवसे पिबध्यै इत्यादिकं छन्दस्येव। उदेतोः विसृपः इत्यादिषु तोसुन्कसुनावपि छन्दस्येव। अव्ययीभावस्य यद्यपि लिङ्गसंख्याकारकयोगोस्ति तथापि वचनादव्ययत्वमिति शब्दकौस्तुभे।

अव्ययादाप्सुपः (२-४-८२) अव्ययाद्विहितस्याऽऽपः सुपश्च लुक्स्यात्। तत्र शालायाम्। सदृशं त्रिषु लिङ्गेष्विति भाष्योक्ता श्रुतिर्लिङ्गसंख्याकारकाभावपरा। वगाहः पिधानमित्यादिषु व-पि-शब्दौ न निपातान्तरे, किन्तु भागुरिमतेऽवाप्योरकारलोपेनावशिष्टांशावुपसर्गावेव। उक्तं च-"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपञ्चैव हलन्तानां यथा वाचा निशा दिशा"। इति

वि. १ अव्ययाद्विहितस्येत्युक्त्या उच्चैरतिक्रान्त इति विग्रहे अत्यादयः क्रान्ताद्यर्थे इति समासे औङि अत्युच्चैसौरित्यत्र अव्ययेषु केवलोच्चैःशब्दपाठेनाव्ययसंज्ञायां तदन्तस्य ग्रहणसम्भवेपि सर्वनामसंज्ञायामुक्तस्य उपसर्जनस्य प्रतिषेध इत्यस्यात्राप्यनुवृत्त्या अत्युच्चैः-शब्दस्योपसर्जनत्वेनाग्रहणादव्ययसंज्ञाया अभावेन ततो विहितस्यौङः अव्ययात्परत्वेप्यव्ययाद्विहितत्वाभावान्न लोपः। अव्ययमिति महासंज्ञया न व्येतीत्यन्वर्थतालाभेन अत्युच्चैः अत्युच्चैसौ अत्युच्चैस इति प्रविकारिणो न संग्रहः। अलिङ्गमव्ययमित्युक्त्याव्ययेषु लिङ्गाभावेनाऽऽपः सुपश्च प्रसक्त्यभावात्तल्लुग्विधानमत्र व्यर्थमिति शङ्कायां प्रत्ययलक्षणेन पदत्वसिद्धयर्थं प्रसक्तादर्शनरूपलुग्विधानमभिमतं सूत्रकृत इति भाष्यकारेण प्रतिपादितम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २ तद्धितश्चेति सूत्रभाष्ये स्त्रीपुंनपुंसकत्वानि सत्त्वगुणाः एकत्व-द्वित्व-बहुत्वानि च एतानर्थान्न ये वि तदव्ययमिति स्पष्टमुक्तेः अव्ययानां लिङ्गसंख्ययोरभावेन सदृशंत्रिषुलिङ्गेष्वित्याथर्वणश्रुतिस्तु विभक्तिवचनपदयोः संख्यापरत्वादव्ययेषु लिङ्गसंख्याकारकाणामभावमेव बोधयति, नतु तत्र लुप्यमानविभक्त्यभावम्। लिङ्गसंख्याकारका भावोप्ययं चादिनिपातेष्वेव नतु स्वरादौ, तत्र केषु चिल्लिङ्गसंख्याकारकसम्बन्धस्य दर्शितत्वात्। ततश्च लिङ्गेषु वि वचनेष्विति सप्तमी षष्ठीचानादर इत्यनादरार्था, तेन लिङ्गसंख्याकारकाण्यनादृत्य यन्न व्येति विकारं न प्राप्नोति सदृशमेकप्रकारमेव तदव्ययमिति श्रुत्यर्थः सङ्गमनीयः।

वि. ३ वष्टिभागुरिरित्यस्य भाष्येऽदर्शनेन अकारान्तादेव टापो विधानेन च निश् दिशोर्धात्वोरिगुपधत्वेन का दन्तत्वाच्चापि निशा दिशेति शब्दसंभवेपि वाचाशब्दस्त्वसाधुरेवेति शेखरकारः।

प्रयोगाः—कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यः। नामं नामं घनश्यामम्। उञ्छः कणश आदानम्। समन्ताद्विहरन्पुरो ययौ। यदा यथा च कुरुते। यथाशक्ति करोम्यहम्। इतस्ततो विहर्तुं निश्चय दातुं भोक्तुं च शक्नोति।

परिशिष्टम्—

प्रयोगतः शब्दयोगि क्रियान्वय्यथ योजकम्।
भावोद्गारकमित्येवं चतुर्धाऽव्ययमीरितम् ॥१४॥

अव्ययानि(क) कानिचिन्नामभिः सहैव प्रयोज्यानि कर्मप्रवचनीयस्वरूपाणि अभिप्रत्यादीनि धातु सहैव प्रयोज्यान्युपसर्गस्वरूपाणि प्रपरेत्यादीनि चाऽस्वतन्त्राणि शब्दयोगीनि,(ख) कानिचित्क्रि देशकालप्रकारादिबोधकानि यत्र तत्र तदा सम्यगादीनि क्रियान्वयीनि, (ग) कानिचिदनेकप रनेकवाक्ययोर्वा समुच्चयविकल्पादिबोधनेन योजकानि अपि च वेत्यादीनि, (घ) कानिचिद्धर्षशो श्चर्यादिमनोभावोद्गारकाणि हन्त धिक् अहो इत्यादीनि चेति प्रयोगतश्चतुर्विधानि भवन्ति। (क) गृहं प्रति, आ वनात्, प्रत्यागच्छति अनुभवति, (ख) अधो गच्छति, अद्य पठामि, सम्यक् वक्तुमिच्छति; (ग) हरोहरिश्च पूज्यौ, तदिदं वा देहि, गच्छसि चेद्वस्त्रं परिधेहि; (घ) हन्त ल महानिधिः, अहह! महाननर्थः, अहो! दर्शनीया इत्यादि।

अव्ययं साध्यदेशादिबोधकं कारकार्थकम्।
क्रियाविशेषणं किञ्चित्तथा नामविशेषणम् ॥ १५ ॥

(क) कानिचिदव्ययानि साध्यसाधनदेशकालादि बोधयित्वा क्रियायामन्वयीनि कारकार्था (ख) कानिचित्क्रियायाः प्रकारादि बोधयित्वा क्रियायामन्वयीनि क्रियाविशेषणानि, (ग) कानि चिन्नाम्नां गुणादि बोधयित्वा नामान्वयीनि नामविशेषणानि च भवन्ति। यथा (क) कर्म-स्वा वाचयति, साधु ब्रूते, मिथ्या भाषते, अस्तं गतः; करण-सहसा निर्गतः, स्वयं करोति, दि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुःखान्मुक्तः; सम्प्रदान-यष्टुं प्रवर्तते, तस्य कृते रचयति; अपादान-तत आगतः, आदितः कथय; अधिकरण-तत्रास्ति, दिवा निर्गतः, रहसि मन्त्रयति, सायमागमिष्यति; (ख) उच्चैर्भाषते, सम्यक्पठति, प्रसह्य पलाययौ, शनैः कथय, पुनः कथय; (ग) उच्चैस्तरुः, उच्चैः पदमुपागतः, मिथ्या वार्त्तं विवर्जय, स तूष्णीं भवति, चन्द्र इवायम् इत्यादि ।

विभक्तिप्रतिरूपाणि वाक्यालङ्कारकाण्यपि ।

शब्दानुकृतिरूपाणि प्रकीर्णान्यव्ययान्यपि ॥ १६ ॥

(क) कानिचिदव्ययानि सुप्तिङ्विभक्त्यन्तसदृशानि, (ख) कानिचिद्वाक्यशोभाकारकाणि, (ग) कानिचिच्छब्दानुकरणस्वरूपाणि, (घ) कानिचित्प्रकीर्णान्यपि भवन्ति । यथा-(क) चिराय चिरेण सहसा रहसि यत् तत् अस्तु भवतु अस्तिक्षीरा; (ख) मम तावन्मतमिदम् , अथह स वाव, का नाम बाला, किमिव हि न दुःखं रघुपतेः; (ग) शूत्कारः, फेत्कारः, पटपटाकरोति, रणत्कारः, झणझणध्वनिः; (घ) अतीव मूर्खः, न सुन्दरः, स एव, अलं तृप्तये, कच्चित्कुशली, ईषद्रक्तम् इत्यादि ।

वि. तरसा सहसा अञ्जसेत्यादीनि तृतीयान्तसदृशानि रहसीत्यादीनि सप्तम्यन्तसदृशान्यव्ययान्येव नतु सुबन्तानि, यां रूपान्तराभावात्, चिरं चिरेण चिराय चिरात् चिरस्य इति बहुरूपाण्यपि रूपान्तराभावेन सुबन्तप्रतिरूपकाण्येव न सुबन्तानि । एवं ममताऽहन्तेत्यादिशब्दान्तर्गतान्यहंममेत्यादीन्यपि अन्यथानुपपत्त्या विभक्त्यन्तप्रतिरूपकाण्येव ।

नानार्थानि समार्थानि द्विरुक्तानि दृढीकृतौ ।

संयुक्तानि विशेषार्थे सापेक्षाणि च कानिचित् ॥४॥

कानिचिदव्ययानि नानार्थानि, कानिचिदेकार्थतया पर्यायभूतानि, कानिचिदतिशयदार्ढ्यादिबोधनाय द्विरुक्तानि, कानिचिद्विशेषार्थबोधकतया संयुक्तानि, कानिचिद्वाक्यभेदेन द्वितीयसापेक्षाणि च भवन्ति ।

नानार्थानि—

अथ अथो-मङ्गले-अथातो ब्रह्मजिज्ञासा; आरम्भे-अथ वाक्यविचारः; आनन्तर्ये-प्रथमं कलाऽभवदथाऽर्धमथो हिमदीधितिः स्फुटमभूदुदितः; कार्त्स्न्ये-अथ धर्मं व्याख्यास्यामः; प्रश्ने-अथ भगवाँल्लोकानुग्रहाय कुशली काश्यपः; समुच्चये-गणितमथ कलाम् ; यद्यर्थे-अथ कौतुकमावेदयामि; तद्यर्थे-न चेन्मुनिकुमारोयमथ कोस्य व्यपदेशः; पक्षान्तरे-शब्दो नित्योऽथानित्यः । अपि-सम्भावनायाम् अपि जीवेत्स ब्राह्मणशिशुः; प्रश्ने अपि सन्निहितोत्र कुलपतिः, शङ्कायाम्-अप्याज्ञया शासितुरात्मना वा; समुच्चये-वस्त्रं पुस्तकमपि नष्टम् ; निन्दायाम् अपि जायां त्यजसि । अयि-प्रश्ने-अयि स्वशक्त्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपसि प्रवर्तसे; अनुनये-अयि विवेकश्रान्तमुक्तं भवत्या; सम्बोधने-अयि प्रियसखि। अये-विषा... अये देवपादोपजीविनोऽवस्थेयम्; विस्मये-अये भगवत्यरुन्धती प्राप्ता; क्रोधे-अये मय्येव भ्रुकुटीप... संवृत्तः; स्मरणे-अये रामो दाशरथिः। अलम्-पर्याप्तौ-तस्यालमेषा क्षुधितस्य तृप्त्यै; निषेधे-अलं भू... पाल तव श्रमेण; शक्तौ-त्रयाणामपि लोकानामलमस्मि निवारणे; भूषणे-अलङ्क्रियतामिदमासन... इति-समाप्तौ-इति प्रथमः स्तवकः; हेतौ-त्वं नागत इत्यहमेवागतः; प्रकारे-रामाभिधानो हरिरित्यु... च; निर्देशे-नारद इत्यबोधि सः। किल-वार्तायाम्-जघान कंसं किल वासुदेवः; अलीके-प्रसह्य सि... किल तां चकर्ष; हेतौ-नाहं गच्छामि स किलैवमुक्तवान्; अरुचौ-त्वं किल योत्स्यसे। खलु-निषे... निधारितेर्थे लेखेन खलूक्त्वा खलु वाचिकम्; वाक्यालङ्कारे-तत्रैव; जिज्ञासायाम्-... खलु युवा धन्योऽधरं पास्यति; अनुनये-न खलु न खलु बाणः सन्निपात्योयमस्मिन्; हेतौ-न वि... कठिनाः खलु स्त्रियः। नञ्—सादृश्ये-अब्राह्मणोयम्; निषेधे न गच्छ; अन्यत्वे-अनीलं वस्त्र... अल्पत्वे-अनुदरा कन्या; अप्राशस्त्ये-अकार्यमिदम्; विरोधे-अधर्मः। ननु—प्रश्ने-ननु सम... तत्कार्यम्; अवधारणे-त्वया नियस्या ननु दिव्य चक्षुषा; अनुज्ञायाम्-ननु गच्छतु भवान्; सानु... सम्बोधने-ननु मानव किमत्र भवानेकाकी निवसति। नाम—प्राकाश्ये-हिमालयो नाम नगाधिरा... अभ्युपगमे-एवमस्तु नाम; क्रोधे-ममापि नाम परैः परिभवः; सम्भावने-करोतु नाम नीतिज्ञो न... सायमितस्ततः; आश्चर्ये-अन्धो नाम पर्वतमारोक्ष्यति; अलीके-भीतो नामाऽवप्लुत्य। बत-खे... अहो बत महत्पापं कर्तुं व्यवसिता वयम्; विस्मये-चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्र... अनुकम्पायाम्- क्व बत हरिणकानां जीवितं चातिलोलम्; सन्तोषे-अनुभवन्ति सकृत्सकलेन्द्रि... एयभिमुखागतमिष्टजनं बत। सह—सादृश्ये-दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह; सम्ब... त्याज्यं राज्यं खलैः सह; यौगपद्ये-पपात भूमौ सह सैनिकाश्रुभिः; साकल्ये-सतृणमभ्यवहर... विद्यमानत्वे-सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। हन्त—हर्षे-हन्त प्रवृत्तं सङ्गीतम्; विष... हन्त हन्त गतः कान्तः; वाक्यारम्भे-हन्त ते कथयिष्यामि; अनुकम्पायाम्-हन्त हन्यतेयं तप... दुर्वृत्तैः। एवमन्यान्यपि व्यवहारतो ज्ञेयानि।

समानार्थानि—

अग्रार्थे-पुरो याहि; अग्रतः पश्य, अग्रे गच्छ; पुरस्ताद्दृश्यते। अतिशयार्थे-अत्यन्तं कुपि... नृपः; बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः; अतीव रक्तः; अतितरां कुपितः। अधोर्थे-... स्याधः, अधस्तादूगच्छ मर्त्यलोकम्; नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण; अवाङ्मुख...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधुनेत्यर्थे-इदानीं पाठं पठ; सूर्यस्तपति साम्प्रतम्; अधुना किं कृतं तेन, सम्प्रत्यसाम्प्रतं वक्तुम्, एतर्हि को गच्छति। ईषदर्थे-ईषत्प्रकम्पते वायुः; मनागपि न वक्ति; किञ्चिद्भीतदृशेक्षते। ऊर्ध्वार्थे-गिरेरुपरि; खट्वाया उपरिष्टात्; तत ऊर्ध्वम्, उच्चैः पदमुपागतः। चिरकालार्थे-भवाँश्चिराद्दृष्टः; चिरेण समागतोऽयम्; श्वश्रूश्चिरं रोदिति; परिचयचिन्हं चिराय जायेत। पौनःपुन्ये-मुहुःपश्यति; पुनःपुनः पीड्यमानः; अभीक्ष्णमागच्छति; असकृद्दोष्ठौ निर्दशति; शश्वत्पाठमभ्यस्यति; भूयो विलपति। बाहुल्ये-प्रायो भृत्या निर्धनं सन्त्यजन्ति; प्रायेण लोको गतानुगतिकः; प्रायशो धनिनः सन्ति; भूयसा तत्र विद्वांसः। मध्यार्थे—पुरं वनं चान्तरा मार्गः; गृहस्यान्तः प्रकोष्ठः; पुस्तकस्य मध्ये वर्तते; सङ्कटद्वयमन्तरेण प्राप्तः। वर्जने-त्वामन्तरेण कः शक्तः; भवन्तमृते दुःखितः सः; विद्यया विना मूढः; त्वत्तः पृथङ् नास्ति मे बन्धुः। विकल्पार्थे-त्वं काव्यं वा पठसि; किंवा व्याकरणम्, उत तर्कम्; आहो वेदम्; आहोस्वित्पुराणम्; अथवा साहित्यम्; किमुत ज्यौतिषम्। शीघ्रार्थे-ब्रूहि शीघ्रम्; झटिति प्रविश गेहे; य आशु कवितां करोति; अन्हाय तावदरुणेन तमो निरस्तम्; मङ्क्षूदपाति परितः पटलैरलीनाम्; अञ्जसा जयति लोकम्। सदेत्यर्थे-सदा वहति मारुतः; सर्वदा त्वां नमामि; आश्रयत्यनिशमीश्वरं बुधः; 'अजस्रं' हस्तावास्फालयति। सद्य इत्यर्थे-सहसा विदधीत न क्रियाम्; एवमुक्तः सपदि प्रत्युवाच; सद्यो ब्रूहि; अयमेकपदे तया वियोगः; अकस्मादागतं दुःखम्। सर्वतोर्थे-परिजनो राजानमभितः स्थितः; गृहं परित उद्यानम्; समन्ताद्वाति मारुतः; समन्ततोऽन्वेषय; सर्वतो हस्तौ प्रसारयति; विष्वक्सेनमुपाश्रय। सहार्थे-अनेन सार्द्धं विहर; त्वया सहाहं गच्छामि; लक्ष्मणेन समं रामः, शिष्यैः साकं गुरुरागतः। एवमन्यान्यपि व्यवहारतो ज्ञेयानि।

द्विरुक्तानि दार्ढ्यातिशयबोधकानि——

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्। एवमेवम्। हन्त हन्त गतः कान्तः। चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रम्। अलमलमतिमात्रं साहसेनामुना ते। मुहुर्मुहुर्मामनुरुणद्धि। पुनः पुनरपि पृच्छयमानो न प्रत्युवाच। हा हा किमेवं संवृत्तम्। शनैः शनैर्गच्छ। उपर्युपरि प्लवसे ज्ञानोदन्वतः। नमो नमः श्रीमद्भ्यः। भूयो भूयो वहति पवनः। अधोधो गच्छति। यावद्यावदुपदिश्यते तावत्तावदसौ वक्रीभवति। यतो यतो निवर्त्यते ततस्ततः प्रवर्तते। ईषदीषच्चाल। नाहं न जानामि। एवमन्यत्रापि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संयुक्तानि विशेषार्थबोधकानि—

रामो गतः अथ किम् (वाढम्)। तृणेन कार्यं भवतीश्वराणां किमङ्ग (किं वक्तव्यं) वाग्घस्त वता नरेण। इतस्ततः (परितः) परिक्रामति। स्वयं रोपितेषु तरुष्वपि स्नेहः किम्पुनः (कि वक्तव्यम्) अङ्गसम्भवेषु। अपि नाम (किमु) रामभद्रः पुनरपीदं वनमलङ्कुर्यात्। विना सीत देव्या किमिव हि (किन्तु) न दुःखं रघुपतेः। परावृत्तः प्रीतेः कथमिव (कुतः) रसं वेत्तु पुरुष किमिति (कुतः) स न गतः। तेनेह स्खलितास्मि नाथ पतितां किन्नाम (कुतः) नालम्बसे तथा च (एवंसति)। किन्तु, परन्तु (विशेषस्तु)। यद्यपि (शङ्क्यते) तथापि (समाधीयते इत्यादिषु व्यवहारानुसारेणार्थविशेषाः प्रतीयन्ते।

द्वितीयसापेक्षाणि वाक्ययोजकानि—

यद्यप्येवं तथापि न युक्तिसहम्। यदि जिगमिषसि तर्हि शीघ्रमेव याहि। तपः क्व वत्से क तावकं वपुः। यथा दृष्टं तथा लिखितम्। वृष्टिस्तु जाता परमल्पैवाभूत्। भवाननुमन्यते चे तर्हि साधयामि कार्यम्। वस्तु तस्य न केवलं विभोगुणवत्ताऽपि परप्रयोजनम्।

किमो योगे चिच्चनाद्य यच्छब्दस्य स्थितावपि।
यत्तदोः सहभावेपि बोध्यतेऽनवधारणम् ॥ १८ ॥

किंशब्दरूपैः सह चिच्चनापिशब्दयोगे, तत्र यच्छब्दस्यापि योगे च, तथा यत्तच्छब्दयोः स भावेन योगेपि अनवधारणरूपो विशेषार्थः प्रतीयते। यथा-कश्चन पुरुषः किमप्यनुक्त्वा कु चिज्जगाम। क्वचिदपि देशे कोपिः जनः काञ्चन विद्यामधीयानः कामपि प्रतिष्ठां लब्धुं शक्नोति तत्र तत्र वनोद्देशे गत्वा महौषधीरन्वेषय। यथा तथापि कार्यं सम्पादयितुं यं कमप्युपायमाव येन केनाप्युपायेन कार्यं साधनीयम्। यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया। यस्य त तरोर्मूलं येनकेनापि पेषयेत्। यस्मै तस्मै प्रदातव्यं यद्वा तद्वा भविष्यति।

यथोचितं प्रयोज्यानि भावोद्गारकराण्यपि।
शोकादिकं व्यञ्जयति देवनामाद्यपि क्वचित् ॥ १९ ॥

लोकव्यवहारानुसारेण यथौचित्यं हर्षशोकादिव्यञ्जकानि भावोद्गारकाण्यव्ययानि प्रयोज्या क्वचिद्देवनामादिकमपि शोकादिभावोद्गारकं भवति। यथा—सम्बोधने-सानुनये-अयि प्रियसखि ससंमाने-भोगुरो भोराजन्; सोद्घोषणे-भोभो राजानः श्रूयताम्; साडम्बरे-हंहो तिष्ठ सखे सखे मधुना; साक्षेपे-रेपामर, अरे दुष्ट, अरे रे वाचाट; नाटकीये-हला प्रियसखि; सप्रणये-अङ्ग कच्चिद शली गुरुः; सानुकम्पे-ननु मानं कमलाक्षि मा कृथाः; सामान्ये-हे सखे, ए राम। अङ्गीक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्रमुत्वे-ओमित्युवाच प्रभुः; शोभने-बाढं, युक्तमुक्तं भवता; सोपेक्षे-अस्तु, ज्ञास्यसि कालेन। प्रशंसने-साधु साधु। शोके-सदुःखे-पाषाणोपम हा कृतघ्नहृदय; सबहुपीडे-अहह दारुणो दैव-निर्घातः। देवनामानि—हरिहरि शरण्यं विधेः करुणा। शिवशिव तानि लुठन्ति गृद्ध्रपादे। राम राम किमेवं संवृत्तम्। एवं-शान्तं पापम्, अब्रह्मण्यमब्रह्मण्यमित्यादीन्यप्युद्गारबोधकानि।

प्रयोगाः—हा देवि धीरा भव। न कच्चित्कस्यचिन्मित्रम्। चित्रं चित्रमनाकाशे कथं सुमुखि चन्द्रमाः। हा हा धिक्परगृहवासदूषणं यत्। यथेच्छसि तथा कुरु। एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्। नोपरुणद्धि चेत्कार्यभारो भवद्भिः क्षणमिह विश्रम्यताम्। इतस्ततो धावति दैवपीडितः। हरिहरि शरण्यं विधेः करुणा।

प्रश्नाः—अव्ययं नाम किम्। अव्ययानां कति भेदाः। नानार्थाव्ययानि कानि। किमोऽनवधारणार्थता कथं भवति। अव्ययानां योगे को विशेषः। विभक्तिप्रतिरूपकाव्ययानि कीदृशानि। अव्ययेषु लिङ्गसंख्यायोगो न वा। कारकार्थाव्ययानि कानि। अधस्तनवाक्यगतान्यव्ययानि विवृणुत—

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ, यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्। मम पुनरीदृशं भागधेयम्। अथ श्वः किं भविष्यति। प्रातः समुत्थाय ययौ विहर्तुम्। शर्करामभि पिपीलिकाः। न मां त्रातुं तातः प्रभवति न चाम्बा न भवती। यावदसौ स्नातुं प्रवृत्तस्तावत्पङ्के निमग्नः। वस्तुमिच्छसि चेद्वस। साधु साधु त्वमेवं निपुणोसि। वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे। पशूनामप्यपत्येषु स्नेहः किम्पुनर्मानुषाणाम्।

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्गप्रकरणम्

लिङ्गम्—

स्त्रीपुंसामान्यजातीनां गमकं लिङ्गमर्थगम् ।
तद्द्विधा व्यक्तमव्यक्तं, शब्दे तदुपचारतः ॥ २० ॥

पदार्थाः केचन स्त्रीजातिकाः, केचन पुंजातिकाः केचन निर्विशेषाः सामान्यजातिका भवन्ति तत्तत्पदार्थगतजातिविशेषपरिचायकं लिङ्गमुच्यते। तच्च क्वचिल्लोकवेद्यं व्यक्तं, क्वचिदुपदेशमात्रगम्यमव्यक्तं भवति। अर्थगतं लिङ्गं तादात्म्येन शब्देषूपचर्यते।

वि. उक्तंच वार्तिककृता—"स्तनकेशवती नारी, लोमशः पुरुषः स्मृतः। उभयोरन्तरं यच्च तदभावे नपुंसकम्" इति। तेन स्तनकेशादिमत्वं स्त्रीत्वं, लोमशत्वादि पुंस्त्वं, तदुभयभिन्नत्वं नपुंसकत्वं पर्यवस्यति। एतत्तु लौकिकं लिङ्गम्।

व्यक्तं प्राकृतिकं प्रायश्चेतनेष्ववगम्यते ।
औपदेशिकमव्यक्तं प्रायेणाचेतने मतम् ॥ २१ ॥

प्रायश्चेतनेषु पदार्थेषु स्थूलदृशापि वेद्यं प्राकृतिकं व्यक्तं लिङ्गं भवति, अचेतनेषु तु शास्त्रोपदेशगम्यमौपदेशिकमव्यक्तं लिङ्गं भवति। यथा पिता भ्राता राजा गुरुः देवः अश्वः हंसः मत्स्यः इत्यादिषु पुंलिङ्गं, माता स्वसा राज्ञी देवी अश्वा हंसी मत्सी इत्यादिषु स्त्रीलिङ्गं प्रकृतिसिद्धं विदितमप्युपदेशमवगम्यते; अचेतनेषु वृक्षः ओदनः दण्डः महिमा इत्यादिषु पुंलिङ्गं, लता नगरी लेखनी विद्या इत्यादिषु स्त्रीलिङ्गं, गृहं चैत्रं वनं छत्रं धैर्यमित्यादिषु नपुंसकलिङ्गं कोशव्याकरणलिङ्गानुशासनाद्युपदेशत एवावगम्यते।

वि. चेतनेषु स्त्रीपुंभावस्य व्यक्ततया एतदर्थकोयं शब्दः पुंसि स्त्रियां वेति प्रायः स्पष्टं बुध्यते, क्वचित्तु चेतनेष्वपि प्राकृतिकलिङ्गविसंवादो भवति, सचोपदेशतो गम्यः। यथा-देवता मक्षिका शारिकेत्यादयः पुंबोधनेपि स्त्रियां, कीटः मत्कुणः पशुः परिवारः दाराः इत्यादयः स्त्रीबोधनेपि पुंसि, कुटुम्बं कलत्रं रक्षः इत्यादयः पुंस्त्रीबोधनेपि क्लीबे (नपुंसके) प्रयुज्यन्ते। अचेतनेषु तु आलयः निलयः आरामः वृक्षः देहः लाभ इत्यादयः पुंसि, कुटी शाला लता लेखनी उपानत् तनूः इत्यादयः स्त्रियां, गृहं चैत्रं छत्रं शरीरं वपुः धैर्यमित्यादयः क्लीबे इति शास्त्रकृदाद्युपदेशानुसन्धानं विना नावगम्यते। समानेप्यर्थे दाराः (पुं.) भार्या (स्त्री) कलत्रं (नपुं), कायः (पुं) तनूः (स्त्री) वपुः (नपुं), मार्गः (पुं) सरणिः (स्त्री) (नपुं) इत्यादिषु लिङ्गविशेषमवगन्तुमुपदेश एव साधनम्।

स्त्रीत्वं संस्त्यानमन्तर्द्धिः, पुंस्त्वं प्रसव उद्गमः ।
नपुंसकत्वं सामान्यं स्थितिमात्रमुदीर्यते ॥२२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शास्त्रीयमेतद्गुणिनां भावानां परिणामिनाम् ।
यथाविवक्षं शिष्टानां प्रयोगनियतं मतम् ॥२३॥

वस्तुतोवयवानां गुणानां वा संस्त्यानमपचयोऽन्तर्द्धिः स्त्रीत्वं, तेषां प्रसव उपचय उद्भवः पुंस्त्वं, साम्यं समानावस्था निर्विशेषा स्थितिर्नपुंसकत्वमिति शास्त्रकृतां मतम् । तेन चेतनेष्वचेतनेषु वा गुणावयवादीनां यत्रापचयोऽल्पतान्तर्धानं वा विवक्षितं तत्र स्त्रीत्वं, यत्रोपचयो महत्ता उत्कर्ष आविर्भावो वा विवक्षितस्तत्र पुंस्त्वं, यत्रोपचयापचयादिविशेषाविवक्षया साधारणं स्थितिमात्रं विवक्षितं तत्र नपुंसकत्वं भवति । ततश्च शब्दानां लिङ्गानुसारेण तत्पदार्थेषु गुणावयवादीनामुपचयापचयसाम्यावस्थाः प्रतीयन्ते । यथा—वृक्षः पर्वतः कुम्भ इत्यादौ कठिनत्वमहत्त्वस्थूलत्वादिकः पुंधर्मः, लता शिला घटीत्यादौ मृदुत्वह्रस्वत्वाल्पत्वादिकः स्त्रीधर्मः, पत्रं पुष्पं वनमित्यादौ साम्यावस्था क्लीबधर्मः प्रतीयते । सर्वेषां भावानां परिणामशीलतया पुनःपुनरवस्थापरिवर्तनाल्लिङ्गानुसारेण तदुचितावस्थाविशेषवान्स स पदार्थः शब्देन प्रतीयते । प्राचीनैरेतदवस्थानुसारिविवक्षया व्यवस्थापितं लिङ्गमर्वाचीनैरनुसर्तव्यं, नपुनः स्वेच्छया परिवर्ततव्यम् ।

वि. १. एकस्मिन्नप्यर्थे दाराः भार्या कलत्रमिति त्रिधा व्यवहारेपि पुंलिङ्गदारशब्देन पारुष्याप्रधृष्यत्वादिपुंधर्मवती, स्त्रीलिङ्गभार्याललनादिशब्देन मृदुत्वसारल्यादिस्त्रीधर्मवती, नपुंसकलिङ्गकलत्रशब्देन निर्विशेषा नारी प्रत्याय्यते । एवं तटः तटी तटमिति त्रिधा व्यवहारेपि लिङ्गभेदेन तदर्थे महत्त्वह्रस्वत्वसामान्यादिर्धर्मविशेषः प्रत्याय्यते । एवं न्यायेनैक-द्वि-त्रिलिङ्गशब्देष्वर्थगतो धर्मविशेषोवगम्यते । परं विवक्षयाऽनेकलिङ्गत्वसम्भवेपि शब्दविशेषेषु प्राचीनैः सूक्ष्मदृग्भिर्नियतैकलिङ्गता द्विलिङ्गता त्रिलिङ्गता वा यथा व्यवस्थापिता सैव शिष्टैः परिगृहीता लोकैरनुस्रियते ।

वि.२ स्त्रियामिति सूत्रभाष्ये-स्तनकेशवती नारी लोमशः पुरुष इत्यादिलौकिकलिङ्गाभ्युपगमे भ्रकुंशे (स्त्रीवेशपुरुषार्थके) स्त्रीत्वाद्टापः प्रसक्तिः, चञ्चाः (तृणमयपुरुषान्) वध्रिकाः (चर्मपुरुषान्) खरकुटीः (खराच्छन्नकुटीः) पश्येत्यादौ पुंस्त्वाच्छसो नत्वप्रसक्तिः, खट्वावृक्षयोः स्त्रीत्वपुंस्त्वविशेषाप्रसक्तिः, तटादौ सर्वलिङ्गत्वसाधकाभावश्चेति संस्त्यानप्रसवस्थितय एव लिङ्गानि, गुणानां शब्दादीनां सङ्घातविशेषा एव घटादय इति सांख्यादिदर्शनानुसारेण सर्वेषां भावानां गुणसंघातरूपतया तेषां गुणानामाविर्भावोपचयविवक्षायां पुंस्त्वं तिरोभावापचयविवक्षायां स्त्रीत्वं, स्थितिसाम्यविवक्षायां नपुंसकत्वं भवति, विवक्षानुसारेण तटादिषु लिङ्गत्रयस्य क्वचिल्लिङ्गद्वयस्य क्वचिदेकलिङ्गस्य व्यवस्थया भ्रकुंशचञ्चादिशब्देष्वपि तत्तल्लिङ्गत्वमुपपद्यते । प्राचां सूक्ष्मा दृष्टिरेव व्यवस्थाया मूलं, शिष्टलोकव्यवहारतश्च तद्विज्ञानमिति साधु निरूपितम् । उक्तंच हरिणा—"प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते । आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते ॥ सन्निधाने निमित्तानां किञ्चिदेव प्रवर्तकम् । यथा वृक्षादिशब्दानां लिङ्गेषु नियमस्तथा ॥ भावतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः । यद्यद्धर्मेऽङ्गतामेति तत्तल्लिङ्गं प्रचक्षते" ॥ इति । इत्येवं भावतत्त्वविदां पूर्वेषां व्यवहार एव लिङ्गव्यवस्थानियामकः, तदनुरूप एव प्रयोगो धर्म्यः इत्यनुसन्धेयम् । सूत्रकारोपि तदशिष्यंसंज्ञाप्रमाणत्वादिति लिङ्गस्य लोकव्यवहारसिद्धतयाऽवाचनिकत्वं वक्ष्यति । स्थूलदृशामस्माकं तु विशेषविज्ञाने उपदेश एव साधनम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्गव्यवहार :—

स्त्रियां ङ्याब्क्तिन्तलाद्यन्तं य्वन्तमेकाक्षरं तथा।
स्त्रीभूनदीलताविद्युत्सेनारात्र्यादिवाचि च ॥२४॥

ङी-(ङीप्ङीष्ङीन्)-आप् (टाप् डाप् चाप्)-क्तिन्-तल्-अङ्-अ-युच्-आदिप्रत्ययान्ताः, ई-ऊ-रान्ता एकाक्षराः, प्रायः स्त्रीजाति-पृथिवी-नदी-लता-विद्युत्-सेना-रात्रि-श्री-दिग्द्युति-पङ्क्ति-आदिवाचकाः शब्दाः स्त्रियां प्रयुज्यन्ते। क्वचिदेतद्वाचिशब्देषु विशेषः।

पुंसीमनिज्घञजबाद्यन्तं पुंव्यक्तिबोधकम्।
प्रायः स्वर्गाग्निशैलाब्धितरुमेघादिवाचि च ॥२५॥

इमनिच्-घञ्-अच्-अप् आदिप्रत्ययान्ताः, पुंव्यक्तिबोधकाः, प्रायः स्वर्ग-वह्नि-पर्वत-समुद्र-मेघ-यक्ष-केश-शरादिवाचकाश्च शब्दाः पुंसि प्रयुज्यन्ते। क्वचिद्विशेषोऽपि।

भावक्तल्युट्ष्यञ्त्वादि प्रत्ययान्तं नपुंसके।
मुखाद्यम्बुवनच्छिद्रधातुपद्मादिवाचि च ॥२६॥

भावार्थकक्त-ल्युट्-ष्यञ्-त्व-अण्-आदिप्रत्ययान्ताः, प्रायो मुख-नेत्र-जल-वन-छिद्र-धातु-पद्म-पत्र-पुष्प-चित्तादिवाचकाश्च शब्दाः क्लीब प्रयुज्यन्ते। क्वचिद्विशेषोऽपि।

मिथुने मणियष्ट्यादि, दण्डकुण्डादि चास्त्रियाम्।
विशेषणं सर्वनाम त्रिषु, सामान्यमव्ययम् ॥२७॥

मणि-यष्टि-मुष्टि-मरीचि-रेणुप्रभृतयः शब्दाः स्त्रियां पुंसि च, दण्ड-कुण्ड-पुस्तक-शृङ्ग-पुच्छ-कण्टक-पल्लव-प्रभृतयः शब्दाः पुंसि नपुंसके च, सर्वनामशब्दा विशेषणशब्दाः-(अजहल्लिङ्ग-अपि त्रिषु लिङ्गेषु प्रयुज्यन्ते। अव्ययं त्वव्यक्तलिङ्गतया सामान्यार्थे क्लीबलिङ्गं भवति।

केचित्स्त्रीपुंसयोर्भिन्नाः, केचित्स्त्रीप्रत्यये स्त्रियाम्।
जातिपुंयोगयोः केचिद्भिन्नाः, केऽप्यर्थभेदतः ॥२८॥

केचिच्छब्दाः पुंसि स्त्रियां च स्वतो भिन्नाः, यथा-पिता-माता, भ्राता-वधूः, सारसः लक्ष्मणा, वरटा इत्यादयः, केचित्पुंबोधकेभ्यः स्त्रीप्रत्ययेषु स्त्रीबोधका भवन्ति, यथा-पतिः-पत्नी, राजा-देवः-देवी, हंसः-हंसी, अश्वः-अश्वा, नरः-नारी इत्यादयः, केचित् स्त्रीप्रत्ययान्ता अपि जातौ अस्य स्त्रीति पुंयोगबोधने च प्रत्ययभेदेन भिन्नाः, यथा-शूद्रा क्षत्रिया क्षत्रियाणी अर्या अर्या महाशूद्रीति जातौ, शूद्री क्षत्रियी अर्यी महाशूद्रा इति शूद्रस्य स्त्रीत्यादि पुंयोगबोधने, केचिदर्थ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्ययभेदे भिन्नाः भवन्ति। यथा-जानपदी (वृत्तिः) अन्या जानपदा, स्थली अकृत्रिमा, अन्या स्थला, कवरी केशपाशः कवरा चित्रा, पाणिगृहीती भार्या, पाणिगृहीता पाणौ गृहीता।

प्रयोगाः-माता मित्रं पिता चेति स्वभावात्त्रितयं हितम्। आयुः कर्म च वित्तं च विद्या निधनमेव च। राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये। दिशः प्रसेदुर्मरुतो ववुः सुखाः। रूपं तदोजस्वि तदेव वीर्यम्। पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।

स्त्रीप्रत्ययाः—

स्त्रियाम् (४-१-३) अधिकारोयं समर्थानामिति यावत्। अजाद्यतष्टाप् (४-१-४) अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप्स्यात्। अजादयः-अजशब्दात्स्त्रियां टापि सवर्णदीर्घे अजा। एवम् अश्वा एडका चटका मूषिका कोकिला कुञ्चा खट्वा वाला वत्सा होडा मन्दा जेष्ठा कनिष्ठा मध्यमा। अकारान्ताः—रक्ता कृशा रम्या हृष्टा श्रुता शान्ता इत्यादयः। शूद्रा चामहत्पूर्वा जातिः (वा) शूद्रा (शूद्रजातीया स्त्री), पुंयोगे तु शूद्री (शूद्रस्य स्त्री), अमहत्पूर्वेत्युक्ते नेह-महाशूद्री (आभीरी आभीरस्य स्त्री वा)। मूलान्नञः (वा) अमूला (मूलहीना) पाककर्णेति ङीषोपवादः।

वि. १. स्त्रीत्वमपि प्रातिपदिकस्यैवार्थः, टाबादयस्तु स्त्रीत्वस्य द्योतका एव। अजादिष्वप्यदन्तत्वेनैव टापः सिद्धा-[...]पि अदन्तत्वप्रयुक्तटाबपवादेन अजा अश्वा एडका मूषिकेत्यत्र जातेरस्त्रीविषयादिति ङीषः प्राप्तौ, बाला वत्सेत्यत्र [...]यसि प्रथम इति ङीषः प्राप्तौ तद्बाधेन टाबर्थमजादीनां पृथगुल्लेखः, ज्येष्ठकनिष्ठमध्यमानां पुंयोगेपि ङीपो बाधेन टाबर्थं, [को]किलशब्दस्य जातावपि ङीषो बाधेन टाबर्थमजादौ पाठः।

वि. २. क्षत्रियाच्छूद्रायामुत्पन्ना उग्रा, तस्यां ब्राह्मणादुत्पन्न आभीरो महाशूद्रः, तज्जातीया तस्य स्त्री च महाशूद्री। [...]फला भस्त्रफला सत्पुष्पा प्राक्पुष्पा प्रत्यक्पुष्पा इत्यादिषु पाककर्णेति ङीषोपवादेन टाबर्थं सम्भस्त्राजिनशणपिण्डेभ्यः [फ]लात्, सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् इति वार्तिकद्वयम्।

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः (७-३-४४) प्रत्ययस्थात्ककारात्पूर्वस्याऽकारस्य इकारः स्यादा-[...]पि परे; स आप् सुपः परो न चेत्। टापि कात्पूर्वस्य अस्येत्वम्। कारक-कारिका। एवं पाठिका [...]र्शिका स्थापिका हारिका जटिलिका मुण्डिका। अत इत्युक्तेनेह-नौका राका। असुप इत्युक्तेनेह [ब]हवः परिव्राजका यस्यां सा इति समासे सुपोलुकि बहुपरिव्राजका। आपीत्युक्तेनेह-कारकः। मामकनरकयोरुपसंख्यानम् (वा) ममेयं मामिका। अणि ममकादेशे प्रत्ययककाराभावेनाप्राप्तौ वचनम्। नरान्कायति नरिका। त्यक्त्यपोश्च (वा) दाक्षिणात्यिका (दक्षिणदिक्स्था)। इहत्यिका (इहभवा)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उदीचा मात इति विकल्पस्यापवादः। न यासयोः (७-३-४५) यत्तदोरस्य इन्नस्यात्। यका सा
यत्तदोः सावकचि टाप्। त्यकनश्च निषेधः (वा) उपत्यका (पर्वतासन्नभूमिः)। अधि
(पर्वतोर्ध्वभूमिः)। त्रिपकादीनांच (वा) क्षिपका ध्रुवका कन्यका चटका। स्वार्थे कः। त
ज्योतिषि (वा) तारका (नक्षत्रं कनीनिका च), अन्यत्र तारिका (तारणकर्त्री)। वर्णका तान्तवे
वर्णका (प्रावरणविशेषः। अन्यत्र वर्णिका (स्तोत्री अन्यर्थविशेषव्याख्या च)। वर्तका शकुनौ प्रा
(वा) वर्तका (पक्षिविशेषः), उदीचां मते वर्तिका। शकुनेरन्यत्रापि वर्तिका। अष्टका पितृ
(वा) अश्नन्ति ब्राह्मणा यस्यां सा अष्टका (पित्र्याऽष्टमी), अन्यत्र अष्टिका (अष्टा
सूतकापुत्रिकावृन्दारकाणां वेति वाच्यम् (वा) वा अ इति छेदेन कात्पूर्वस्याऽकारादेशो वेत्यर्थः
पुत्रिका शब्दे ङीन इकारस्याऽकारादेशः अन्यत्रेत्वबाधनार्थमकारस्यैव पक्षेऽकारः। सूतिका
(प्रसूता)। पुत्रका पुत्रिका (पुत्रीकृता) वृन्दारका वृन्दारिका (मुख्या)। उदीचामातः स्थाने यक
(७-३-४६) यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। या
दार्याशब्दात् स्वार्थे के केऽण इत्याकारह्रस्वे आर्यकशब्दात्पुनष्टापि अस्येत्वविकल्पे आ
आर्यका। एवं चटकिका चटकका, क्षत्रियिका क्षत्रियका, मूषिकिका मूषकका। यकपूर्वेत्यु
अश्विका प्रत्ययस्थादिति नित्यमित्वम्।

वि. १. तान्तवे प्रावरणे वाच्य एव वर्णका, अन्यत्र तु वर्णिका भागुरी लोकायते, पक्षिविशेषे वाच्य एव
वर्तिका वर्तकेति, शकुनेरन्यत्र तु नित्यमेवेत्वं, वर्तिका भागुरी लोकायतस्येति काशिकोक्तौ भागुरीव्याख्या टीका
इति हरदत्तोक्तेर्लोकायतग्रन्थस्य भागुरिव्याख्या वर्णिका वर्तिका नामाऽऽसीदिति ज्ञायते।

वि. २. भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि (७-३-४७) स्वेतिलुप्तषष्ठीकम्। एषामत इद्वा स्यान्नञ्पूर्वाणा
तदन्तविधिनैव सिद्धौ नञ्पूर्वाणामपीति स्पष्टार्थम्। भस्त्राग्रहणमुपसर्जनार्थमन्यत्र तूत्तरसूत्रेणैव सिद्धम्। भस्त्रिका
अभस्त्रिका अभस्त्रका। अजि-जका, स्वि-स्वका। अभाषितपुंस्काच्च (७-३-४८) अभाषितपुंस्काद्विहितस्य
स्थाने अत इद्वा स्यात्। गङ्ग-ङ्गिका, खट्व-ट्विका। आदाचार्याणाम् (७-३-४९) पूर्वसूत्रविषये आत्वं स्यादाचा
गङ्गाका खट्वाका। भाषितपुंस्के तु नित्यमित्वं शुभ्रिका।

टाबृचि (४-१-९) ऋचि वाच्यायां पादन्ताट्टाप्स्यात्। द्विपदा एकपदा त्रिपदा चतुष्पदा
पादोन्यतरस्यामिति ङीपोऽपवादः। डाबुभाभ्यामन्यतरस्याम् (४-१-१२) मन्नन्तादन्नन्ताद्बहु
डाब्वा स्यात्। डित्वसामर्थ्याट्टिलोपः। सीमन्-सीमा सीमे सीमाः। दामन्-दामा-मे-माः।
पामा-मे-माः। बहवो यज्वानो यस्यां सा बहुयज्वा-ज्वे-ज्वाः। बहवो राजानो यस्यां सा बहु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्जा:। डाबभावे नान्ताः सीमा-मानौ नः, दामा-मानौ-नः, पामा-मानौ-नः, बहुयज्वा-ज्वानौ-नः, बहुराजा-जानौ-नः। यङश्चाप् (४-१-७४) यङन्तात्स्त्रियां चाप् स्यात्। यङिति ञ्यङ्ष्यङोर्ग्रहः। आम्बष्ठ्या (अम्बष्ठस्यापत्यं स्त्री), कौसल्या (कोसलस्यापत्यं स्त्री) वृद्धेत्कोसलेतिञ्यङ्। वाराह्या (वराहस्यापत्यं स्त्री), बालाक्या (बलाकस्यापत्यं स्त्री) अतइञि अणिञोरिति ष्यङादेशः।

वि. मन्नन्तादन्नन्ताद्बहुव्रीहेश्च ङीन्निषेधात् दामन्सीमन्पामन्बहुयज्वन्नादिशब्दानां डाबभावे नान्तत्वमेव, उपधालोपिनोऽन्तबहुव्रीर्ङीपो विकल्पनाद्बहुराजन्नादिशब्दस्य डाबभावे पक्षे ङीपि बहुराज्ञीत्यपि, ङीपोप्यभावे नान्तत्वम्।

ऋन्नेभ्यो ङीप् (४-१-५) ऋकारान्तेभ्यो नान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् स्यात्। कर्तृ-कर्त्री ङीपि यण्। एवं हर्त्री दात्री भोक्त्री द्रष्ट्री श्रोत्री। दण्डिन्-दण्डिनी। एवं धनिनी गुणिनी यशस्विनी मायाविनी मनोहारिणी तारिणी। उगितश्च (४-१-६) उगिति प्रत्याहारः। उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप्स्यात्। उगिद्द्विविधं प्रातिपदिकं प्रत्ययश्च। भवतु-भवती, महत्-महती। एवं बृहती जगती पृषती। पचत् (पचशतृ) पचन्ती। एवं भवन्ती कारयन्ती करिष्यन्ती दास्यन्ती। शप्श्यनोरिति नित्यं नुम्। तुदन्ती तुदती, भान्ती भाती आच्छीनद्योरिति वा नुम्। ददती दधती शासती नाभ्यस्तादिति नुमोभावः। उगिदचामित्यत्राज्ग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमान्नेह-उखातः स्रंसतीतिउखास्रत्। अञ्चतेस्तु भवत्येव। प्रादिपूर्वादञ्चतेः क्विनि नलोपे ङीपि भत्वेनाऽच इत्यकारस्य चाविति दीर्घे उद ईत्वे च प्राची प्रतीची अवाची उदीची।

वि. १ समासप्रत्ययविधौ तदन्तविधिप्रतिषेधस्य उगिद्वर्णग्रहणवर्जमिति प्रतिप्रसवेन तदन्तविधेरुगिदन्तादित्युक्तम्। भवतुशब्दस्याव्युत्पन्नस्य सर्वादौ पाठात् महदादिशब्दानां शतृवद्भावेन उगित्त्वाद्व्यपदेशिवद्भावेनोगिदन्तता। अतिभवती अतिमहतीत्यादौ तु स्वत उगिदन्तता। भातेर्डवतुरिति व्युत्पत्तौ तु भवच्छब्दस्य प्रत्ययांशे उगित्त्वेन उगिदन्तता।

वि. २ वनो र च (४-१-७) वन्नन्तात्तदन्ताच्च प्रातिपदिकात्स्त्रियां ङीप्स्यात्। वन्निति ङ्वनिप्क्वनिब्वनिपां सामान्यग्रहणम्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणमिति प्रातिपदिकविशेषणात्तदन्तान्तमपि गृह्यते। सुञ् ङ्वनिप् सुत्वन्-सुत्वरी। धा क्वनिप्-धी वन्-धीवरी। शृ वनिप्-शर्वन्-शर्वरी। अतिसुत्वरी अतिधीवरी परलोकदृश्वरी। वनो न हस इति वक्तव्यम् (वा) हशन्ताद्धातोर्विहितो यो वन् तदन्तात्तदन्तान्ताच्च ङीब्रश्च नेत्यर्थः। राजानं योधितवती राजयुध्वा। सहयोधितवती सहयुध्वा। बहुव्रीहौ वा (वा) अनो बहुव्रीहेरितिनिषेधेऽपवादः। बहवो धीवानो यस्यां सा बहुधीवरी, पक्षे डाबुभाभ्यामिति डापि बहुधीवा। पादोऽन्यतरस्याम् (४-१-८) पाद इति कृतसमासान्तः पाच्छब्दः, तदन्तात्प्रातिपदिकात् ङीब्वास्यात्। द्वौपादौ यस्याः सा द्विपदी द्विपात्। बहुव्रीहौ संख्यासुपूर्वस्येत्यन्त्याकारलोपे ङीपि भत्वेन पादः पदिति पदादेशः। एवं त्रिपदी। त्रिपात् चतुष्पदी चतुष्पात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न षट्स्वस्रादिभ्यः (४-१-१०) षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च स्त्रीप्रत्ययो न स्यात्। पञ्च। नान्तलक्षणङीब्निषेधे जश्शसोर्लुकि नलोपे अदन्तत्वाट्टापि प्राप्ते षट्संज्ञां प्रति नलोपस्यासिद्धत्वादनेन टापोऽपि निषेधः। एवं सप्त अष्ट नव दश। स्वस्रादिषु ऋदन्तलक्षणङीपो निषेधः। दुहिता ननान्दा याता माता तिस्रः चतस्रः। **मनः** (४-१-११) मन्नन्तान्न ङीप्स्यात्। सीमा-मानौ-नः। दामन्-दामा-मानौ नः। पामन्-पामा-मानौ-नः। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति इहापि न—अतिमहिमा-मानौ-नः। **अनो बहुव्रीहेः** (४-१-१२) अन्नन्ताद्बहुव्रीहेर्न ङीप्स्यात्। बहवो यज्वानो यस्यां सा बहुयज्वा-ज्वानौ-नः। सुपर्वा सुकर्मा। डाबुभाभ्यामिति मन्नन्तेऽन्नन्तबहुव्रीहौ च पक्षे डाबुक्तः। **अन उपधालोपिनोऽन्यतरस्याम्** (४-१-२८) अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वा ङीप्स्यात्। पक्षे डाप्ङीब्निषेधौ। बहवो राजानो यस्यां सा बहुराज्ञी-ज्ञ्यौ-ज्ञ्यः। बहुराजा-जे-जाः, बहुराजा-राजानौ-नः। नसंख्यादेर्द्वन्तादित्युपधालोपनिषेधविषये तु पूर्वसूत्रस्य प्रवृत्तिः।

वि. सीमन्पामन्शब्दौ स्त्रियाम्, दामन् शब्दस्तु स्त्रियां क्लीबे च। मन्नन्तादन्नन्तबहुव्रीहेश्चानुपधालोपिनस्त्वका डाप् पक्षे ङीब्निषेधश्चेति रूपद्वयम्, उपधालोपिनस्तु ङीप्डाब् निषेधश्चेति रूपत्रयम्। दामान्तबहुव्रीहेस्तु ङीब्न

अनुपसर्जनात् (४-१-१४) अधिकारोऽयं यूनस्तिरित्यभिव्याप्य। अयमेव स्त्रीप्रत्यये तदन्तविधिं ज्ञापयति। **टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः** (४-१-१५) अत इत्यनुवर्तते। अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्। टितः-कुरुचर (चरट्)-कुरुचरी खेचरी जलचरी नद (नदट्)-नदी। ढक्-सौपर्णेयी; वैनतेयी, अण्-ऐन्द्री, वैष्णवी, शैवी, औत्सी अञ्-औत्सी, भारती, दैवी। द्वयसजादि-ऊरुद्वयसी ऊरुदघ्नी ऊरुमात्री (ऊरुप्रमाणा), जानुदघ्नी-मात्री। तयप्-पञ्चतयी (पञ्चावयवा), चतुष्टयी, दशतयी। ठक्-आक्षिकी, वार्षिकी सन्तिकी। कञ्-यादृशी, तादृशी, मादृशी; अस्मादृशी, त्वादृशी, युष्मादृशी, कीदृशी, ईदृशी दृशी भवादृशी। क्वरप्-इत्वरी, जित्वरी, नश्वरी। ताच्छीलिके णेऽपि (परि) चौरी **नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्** (वा) स्त्रैणी पौंस्नी, शाक्तिकी आढ्यङ्करणी, सुभगङ्करणी तरुणी, तलुनी।

वि. क्त्वादेशे ल्यपि घुमास्थेति ङ्किति विहितस्येत्त्वस्याल्विधित्वेन स्थानिवद्भावाभावत आतिदेशिककित्त्वस्य प्राप्तावपि नल्यपीति निषेधेन लिङ्गेनानुबन्धकार्येऽनल्विधाविति निषेधाप्रवृत्तेर्ज्ञापनेन वक्ष्यमाणेत्यत्र स्थानिनो लृटः कारयोरित्त्वेन लमात्रनिमित्तकङीप्विधेरल्विधित्वेऽप्यनुबन्धकार्यतया निषेधाप्रवृत्तेर्लृ डादेशस्य शानचः स्थानि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...टित्वादुगित्वाच्च ङीप्प्राप्तिस्तु न शङ्क्या, लिङादेशावयवस्य यासुटः स्थानिवत्त्वेनैव ङित्त्वे सिद्धे यासुट्परस्मैपदेषूदा-त्तो ङिच्चेति पुनर्ङित्त्वविधानस्य सामर्थ्येन लाश्रयमनुबन्धकार्यमादेशानां नेति ज्ञापनात्स्थानिवद्भावमूलकटित्त्वोगित्त्वा-प्राप्तेः। यदि तु तथा ज्ञापने ब्रूतादित्यत्र तुह्योस्तातङ्ङित्याश्रितस्य लाश्रितत्वाभावात्स्थानिवत्त्वेन पित्वसम्पत्त्या ब्रुव-ईडिति पिति विहितस्येडागमस्य दुर्वारतापत्तेः, भाष्ये पिच्च ङिन्न ङिच्च पिन्नेत्युक्त्या तिबादिष्वौपदेशिकेन पित्त्वेनाति-देशिकस्य ङित्त्वस्य बाधेन तिप्सिप्मिप्सु ङित्त्वार्थं यासुटो ङित्त्वस्य चारितार्थ्याच्च न तथा ज्ञापनमित्युच्यते तदापि हलः-श्नः शानज्झाविति श्नः शित्त्वस्य स्थानिवद्भावेन सिद्धावपि शानचः शित्करणस्य सामर्थ्येन क्वचिदनुबन्धकार्येप्यनल्विधा-विति प्रतिषेध इति ज्ञापनेनानल्विधाविति निषेधस्य प्रवृत्त्या स्थानिवत्त्वप्रयुक्तटित्वोगित्त्वयोरसिद्धेः। अतष्टावेवात्र युक्तः। अत्र शित्त्वस्य भाष्ये प्रत्याख्यानात्प्रत्युत शित्त्वस्य तथा ज्ञापकत्वे सेह्यपिच्चेति हेरपित्त्वस्य तातङो ङित्त्वस्य च वैयर्थ्यमिति भाष्ये दूषणाभिधानाच्चात्र स्थानिवत्त्वेन टित्त्वादुगित्त्वाच्च ङीबेवोचितः, टापः प्रयोगस्त्वसाधुरेवेत्यपि केचित्। ...नादितया ङीपो बाधेन टाबेवेत्यपि केचित्।

वि. २. ठक्ठञोर्भेदेनोपादानं ठनो निवृत्त्यर्थम्। तरुणतलुनयोर्वयसि प्रथम इति ङीपः प्राप्तावपि गौरादिषु पाठेन ...पवादे ङीषि स्वरे विशेषापत्तेर्ङीबर्थमुपसंख्यानम्।

वि. ३. यञश्च (४.१.१६) यञन्तात्स्त्रियां ङीप्स्यात्। गार्ग्यशब्दान्ङीपि हलस्तद्धितस्येति यलोपात्परत्वेन यस्येति-...यकारलोपे हलस्तद्धितस्येति यकारलोपे गार्गी। एवं वात्स्य-वात्सी। अनपत्याधिकारस्थान्नङीप् (वा)। द्वीपे ...भवा द्वैप्या। अधिकारग्रहणान्नेहापि-देवस्यापत्यं दैव्या। पक्षे, प्राचां ष्फ तद्धितः (४.१.१७) यञन्तात्ष्फो वा स्या-त्स्त्रियां स च तद्धितः। षः प्रत्ययस्य (१.३.६) प्रत्ययस्यादिः ष इत्स्यात्। इति षस्येत्त्वे नलोपे आयनेयीय इति ...आयन्नादेशे तद्धितान्तत्वात्प्रातिपदिकत्वेन फेनोक्तेपि स्त्रीत्वे षित्त्वसामर्थ्यात्षिद्गौरादिभ्यश्चेति ङीषि णत्वे गार्ग्यायणी, ...वात्स्यायनी। सर्वत्र लोहितादिकतन्तेभ्यः (४.१.१८) लोहितादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात्। लौहित्य-लौहित्यायनी, कात्य-कात्यायनी।

वयसि प्रथमे (४.१.२०) प्रथमवयोवाचिनोऽदन्तात्स्त्रियां ङीप्स्यात्। कुमारी किशोरी। वयस्यचरम इति वाच्यम् (वा) वधूटी चिरण्टी। यौवनवाचिनावेतौ। कन्यायाः कनीन चेति निर्देशात्कन्याया न। अत इत्युक्तेर्नेह-शिशुः।

वि. कालकृतशरीरावस्था वयः, तच्चोपचयरूपं पूर्वमपचयरूपमुत्तरमिति द्विधा; पिता रक्षति कौमारे भर्ता रक्षति यौवने, पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हतीति दर्शनात् कौमारं यौवनं वार्धकमिति त्रिधा; आद्ये वयसि नाधीतं, द्वितीये नार्जितं धनम्, तृतीये न तपस्तप्तं चतुर्थे किं करिष्यतीति दर्शनाद्बाल्यं यौवनं मध्यत्वं वार्धकमिति चतुर्धापि वि-भज्यते। एषु द्विधा विभाग आर्षः पक्षश्च वयसि प्रथमे इति सूत्रकृताभिप्रेतः, अत्र यौवनमपि प्रथमं वयः, तेन ...कृत्यादीनामपि सूत्रादेव सिद्धिः। वार्तिककृता तु त्रिधा चतुर्धा वा विभागपक्षमादाय यौवनस्य द्वितीयतया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत्रेणाप्राप्तौ वयस्यचरम इत्युक्तम् । कुमारी-किशोरीशब्दौ तु प्रथमवयोवाचिनावेव न पुंयोगाभाववाचिनौ, प्रयोगात् । वृद्धकुमारीति तु पुंयोगाभावसाधर्म्यमादाय गौणः प्रयोगः । अनन्यपूर्विकां कान्तां पिण्डां यवीयसीमिति वैवाहिककन्यानिर्देशस्मृतौ यवीयसीमित्यस्यार्षकल्पव्यवहारानुसारेणातिप्रथमवयस्काम् युवाल्पयोः कनन्यतरस्यामिति युवाल्पयोः कनादेशोऽप्यनयोः समानार्थत्वं व्यनक्ति । यौवनस्य द्वितीयवयस्त्वपक्षे तु यवीयसीमित्यस्यातियुवतीमित्यर्थेन प्रौढाविवाहविधिः प्रसज्येत, नच तद्युक्तं, स्मृतिवचनान्तरविरोधापत्तेः । शब्दतो वयोवाचिन एव ग्रहः, तेन उत्तानशया लोहितपादा इत्यादेर्बालाबोधकत्वेऽपि अबालाया अपि व्याप्त्या उत्तानशायिन्या अलक्तादिना लोहितपादाया अपि बोधकतया न वयोवाचितेति टाबेव । द्विवर्षा-त्रिवर्षादीनां शा... तादिविशेषणतयापि व्यवहारसम्भवेन न प्रथमवयोवाचितेतीदृशेभ्योऽप्यदन्तत्वाट्टाबेव, शास्त्रोक्तविवाहसंस्कार... पुरुषसंप्रयोगाभावः कन्याशब्दप्रवृत्तिनिमित्तं नतवक्षतयोनित्वं, कुन्त्याः पुरुषसंप्रयोगेऽपि कन्यात्वानपायात् । या तु ... संस्कारेण विना पुरुषेण सम्प्रयुज्यते सा कन्यात्वं न जहातीति कन्यायाः कनीनचेतिसूत्रे हरदत्तोक्तेः, तेन कन्याश... वयोवाचित्वाभावेन, तद्वाचित्वेऽपि कन्यायाः कनीनचेतिसूत्रनिर्देशप्रामाण्येन न तत्र ङीप् । शिशुशब्दस्तु वयोवा... नादन्तः ।

द्विगोः (४-१-२१) अदन्ताद्द्विगोर्ङीप्स्यात् । त्रयाणां लोकानां समाहारः त्रिलोकी । एवं पञ्च... दशमूली, शतमूली । त्रिफला त्र्यनीका इत्यत्र तु अजादित्वाट्टाप् । अकारान्तोत्तरपदो द्विगुः स्त्रियाम्... पात्राद्यन्तस्य तु न । पञ्चपात्रं त्रिभुवनम् । **पुरुषात्प्रमाणेऽन्यतरस्याम् (४-१-२४)** प्रमाणे पुरुष... द्विगोर्ङीब्वा स्यात्तद्धितलुकि । द्वौ पुरुषौ प्रमाणमस्याः द्विपुरुषी द्विपुरुषा वा परिखा । एवं त्रि... त्रिपुरुषा । प्रमाणे द्वयसजादेः प्रमाणेलोर्द्विगोर्नित्यमिति लुक् ।

वि. **अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि (४-१-२२)** अपरिमाणान्ताद्विस्ताद्यन्ताच्च द्विगोः... स्यात्तद्धितलुकि सति । पञ्चभिरश्वैः क्रीता पञ्चाश्वा । आर्हीयठकोऽध्यर्धेति लुक् । द्वौ विस्तौ (अक्षपरिमाणं ... पचति (द्रावयति) द्विविस्ता । मूषा । द्वावाचितौ (भारदशकद्वयं) वहति द्व्याचिता शकटी । प्राग्वहतीयठञो लुक् । कम्बलाभ्यां क्रीता द्विकम्बल्या । **काण्डान्तात्क्षेत्रे (४-१-२३)** क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि ... काण्डे प्रमाणमस्या द्विकाण्डा क्षेत्रभक्तिः (विभागः) । षोडशहस्तप्रमाणो दण्डः काण्डम् । एवं त्रिकाण्डा चतुष्का... प्रमाणमायामः, पञ्चहस्तायामः पुरुषः । पञ्चारत्निः पुरुष इति शुल्वसूत्रात् । ऊर्ध्वमानं किलोन्मानं परिमाणं तु ... आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ॥ अक्षेत्रे तु ङीप्-द्विकाण्डी रज्जुः । द्विहस्ता भित्तिरितिवु मात्रचो...

बहुव्रीहेरूधसो ङीष् (४.१.२५) ऊधोन्ताद्बहुव्रीहेः स्त्रियां ङीष्स्यात् । ङीब्ङीषोः स्वरे वि... कुण्डमिव ऊधः (स्तनौ) यस्याः सा इति बहुव्रीहौ समासान्तेऽनङि कुण्डोधन्निति जाते ... डाबुभाभ्यामिति वैकल्पिके डापि अनउपधालोपिनइति वैकल्पिके ङीपि तदभावे अन्नेभ्यः ... प्राप्तस्य ङीपोऽनोबहुव्रीहेरिति निषेधे च प्राप्ते ऽनेन ङीषि भत्वेनाल्लोपोन इत्युपधालोपे, ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घ्नी गौः। एवं घटोध्नी महोध्नी। अस्त्रियां तु अनङपि न, तद्विधौ स्त्रियामित्युपसंख्यानात्। महोधाः पर्जन्यः, कुण्डोधो धैनुकम् (धेनुसमूहः)। संख्याव्ययादेर्ङीप् (४.१.२६) संख्याव्ययादे-रूधोन्तादुबहुव्रीहेर्ङीप्स्यात्। ङीषोपवादः। द्वे ऊधसी यस्याः सा द्व्यूध्नी, एवम् अत्यूध्नी निरूध्नी। दामहायनान्ताच्च (४.१.४७) संख्यादेरित्यनुवर्तते, नाव्ययमिति। संख्यादेर्बहुव्रीहेर्दामान्ताद्धायना-न्ताच्च ङीप्स्यात्। दामन्ते डाबुभाभ्यामनन्यतरस्याम् अनउपधालोपिनः अनोबहुव्रीहेरिति डाब्ङीप्निषेधेषु प्राप्तेषु, हायनान्तेऽदन्तत्वाट्टापि प्राप्ते वचनम्, द्वे दाम्नी यस्याः सा द्विदाम्नी, त्रिदाम्नी। अल्लोपोन इत्युपधालोपः। द्वौ हायनौ यस्याः सा द्विहायनी बाला। त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् (वा) वयोवाचकस्यैव हायनस्य ङीब्णत्वं चेष्यते (वा) त्रिहायणी चतुर्हायणी बाला। वयसोऽन्यत्र तु टाबेव-द्विहायना त्रिहायना चतुर्हायना शाला।

वि. बहुव्रीहेरित्युक्त्या नेह—ऊधोतिक्रान्ता अत्यूधाः, संख्याव्ययादेरित्यादिग्रहणाद्मध्ये व्यवधानेपि भवति द्विविधोध्नी त्रिविधोध्नी। दामहायनान्तेत्यत्राव्ययानुवृत्तेर्नेह—उत्क्रान्तं दाम यस्याः सा उद्दामा वडवा निर्दामा वत्सा।

अन्तर्वत्पतिवतोर्नुक् (४.१.३२) एतयोः स्त्रियां नुक्स्यात्। गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते, अन्तरस्त्यस्यां गर्भ इत्यत्रान्तः शब्दस्याधिकरणबोधकतया ऽस्तिसामानाधिकरण्याभावा-दप्राप्तौ मतुप्, पतिवदित्यत्र वत्वं च निपात्यते, अन्तावयवे नुकि अन्तर्वत्न् पतिवत्न् इति जाते नान्तत्वाद्दन्नेभ्य इति ङीपि अन्तर्वत्नी (गाभणी), पतिवत्नी (सधवा)। अन्यत्र तु अन्तरस्त्यस्यां शालायां घट इति वाक्यमेव। पतिमती पृथिवी। पत्युर्नो यज्ञसंयोगे (४.१.३३) पतिशब्दस्य स्त्रियां नकारादेशःस्याद्यज्ञेन सम्बन्धे बोध्ये। पतिशब्दान्तेकारस्य नकारादेशे नान्तलक्षणे ङीपि पत्नी वसिष्ठस्य (वसिष्ठकर्तृकयज्ञफलभोक्त्री)। दम्पत्योः सहाधिकारात्, यजमानस्य पत्नी। विभाषा सपूर्वस्य (४.१.३४) पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य स्त्रियां नकारादेशो वा स्यात्, नत्वे ङीप्, गृहस्य पतिः (स्वामिनी)—गृहपत्नी गृहपतिः। अनु-पसर्जनस्येत्युत्तरार्थमनुवृत्तमिह न पत्युर्विशेषणं, किन्तु तदन्तस्य, तेन बहुव्रीहावपि भवति। दृढः पतिर्यस्याः सा दृढपत्नी दृढपतिः। वृषलः पतिर्यस्याः सा वृषलपत्नी वृषलपतिः। एवं वृद्धपत्नी वृद्धपतिः। अयज्ञसंयोगपरत्वादप्राप्तविभाषेयम्। नित्यं सपत्न्यादिषु (४-१-३५) सपत्न्यादिषु नित्यं नकारादेशः स्यात्। पूर्वेण विकल्पे प्राप्ते वचनम्, समानस्य सभावोपि निपात्यते। समानः (एकः) पतिर्यस्याः सा सपत्नी, एकःपतिर्यस्याः सा एकपत्नी, एवं वीरपत्नी पुत्रपत्नी भ्रातृपत्नी।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. यज्ञसंयोग-इत्युक्त्या अपशूद्राधिकरणे शूद्राणां यज्ञाधिकारनिराकरणेन, पाणिग्रहणाद्धि सहत्वं सर्वकर्मसु इत्युक्त्या च द्विजातीनां सवर्णायां विवाहितायां भार्यायामेव केवलः पत्नीशब्दः प्रयोज्यः; समस्तत्वेतूत्तरसूत्रे यज्ञसंयोग इत्यसम्बन्धात् धर्मपत्नी शूद्रपत्नी वृषलपत्नी इत्यादौ नत्वम्। वृषलस्य पत्नीति व्यस्तप्रयोगस्तु पत्नीव पत्नीत्युपचारादुपपाद्यः उक्तं च भाष्यकृता—"तुषजकस्य पत्नीत्युपचारात्सिद्ध" मिति। पत्नी वाचरतीत्यर्थे आचारक्विबन्तात्कर्तरि क्विब्वेति प्रौढिवादमात्रं, स्त्रियामाचारक्विवन्तशब्दप्रकृतिकक्विबन्ता न सन्तीति अनुपसर्जनादिति सूत्रभाष्योक्तेः। सपूर्वस्येत्यत्र पूर्वशब्दः पूर्वावयवपरः, तेन समस्त एवेदम्; नेह-गवां पतिः (स्वामिनी) स्त्री। सपत्न्यादिषु बहुव्रीहिराश्रीयते तेन वीरपत्नी भ्रातृपत्नीत्यादावपि बहुव्रीहिरेव। षष्ठीतत्पुरुषे तु पत्युर्नोयज्ञसंयोग इति सिद्धेन पत्नीशब्देन सह समासे विभाषाप्रवृत्तिः।

वर्णादनुदात्तात्तोपधात्तो नः (४-१-३९) वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप्स्यात् तकारस्य नकारादेशश्च। एनी एता (श्वेता), रोहिणी रोहिता (रक्ता), हरिणी हरिता। त्रीण्येतानि यस्याः सा त्रेणी शलली। वर्णान्तस्यानुपसर्जनत्वाभावात् णत्वं त्विहार्षम्। **पिशङ्गादुपसंख्यानम्** (वा) पिशङ्गी पिशङ्गा। **असितपलितयोर्न** (वा) असिता (कृष्णा), पलिता (जरसा शुक्ला)। **अन्यतो ङीष्** (४-१-४०) तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष्स्यात्। कल्माषी (चित्रा), सारङ्गी (शवला)।

वि. वर्णादनुदात्तादित्युक्तेर्नेह–श्वेता। घृतादीनां चेत्यन्तोदात्तोयम्। अत इत्यनुवृत्तेर्नेह-शितिः स्त्री। अवदात-शब्दस्तु न वर्णवाचो किन्तु शुद्धवाची। उक्तं च–त्रीणि यस्यावदातानि विद्या योनिश्च कर्म च। एतत्त्रयं विजानीयाद् ब्राह्मणाग्र्यस्य लक्षणम्" इति, तेनावदाता इत्यत्र न ङीष्। अन्यतोङीषित्यत्रापि अनुदात्तादित्युक्तेर्नेह-कपिला कृष्णा अन्तोदात्तावेतौ। वर्णानां तणतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तस्थले शिष्टानामनुदात्ततया एतादीमामनुदात्तान्तता, कल्माषी सारङ्गीति मध्योदात्ततयाऽनुदात्तान्तता।

षिद्गौरादिभ्यश्च (४-१-४१) षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष्स्यात्। षितः- नर्तकी, खनकी, रजकी, ष्वुन्प्रत्ययान्ता इमे। गौरादयः- गौरी, द्रोणी (काष्ठाम्बुवाहिनी)। हरिणी, श्वन्-शुनी, आमलकी, वदरी, विम्बी, आढकी, शकुली, वेतसी अतसी, सूर्मी (लोहशङ्कुः), घातकी, सल्लकी, नटी, आग्रहायणी, सुन्दरी, बृहती, मातामही, पितामही, पटी, पिण्डी। **पिप्पल्यादयश्च** (गण) पिप्पली, हरीतकी। **अनडुहः स्त्रियामाम्वा** (वा), अनडुही अनड्वाही। **सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः** (६-४-१४९) एषामवयवस्याङ्गस्योपधाया यस्य लोपः स्यात्। **मत्स्यस्य ङ्याम्** (वा) **सूर्यागस्त्ययोश्छे च ङ्यां च** (वा) **तिष्यपुनर्वस्वोर्नक्षत्राणि यलोप इति वाच्यम्** (वा) मत्स्य-मत्सी, सूरी, मातरिषिच्चेति षित्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितां ङीषिति बोध्यम् तेनेह न-दंष्ट्रा। जानपद-कुण्ड-गोण-स्थल-भाज-नाग-काल-नील-कुश-कामुक -कवराद् वृत्त्यमत्रावपन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्रिमा-श्राणा-स्थौल्य-वर्णानाच्छादनायोविकार-मैथुनेच्छा-केशवेशेषु (४-१-४२) जानपदादिभ्य एकादशभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष्स्यात्। जानपदी वृत्तिः, अन्या जानपदा उत्सादित्वादञन्तत्वेन टिड्ढाणञिति ङीप्याद्युदात्तः। कुण्डी अमत्रं (पात्रं) अन्या कुण्डा (दाह्या), गोणी आवपनं (धान्यादिनिक्षेपपात्रम्), अन्या गोणा (तन्नाम्नी), स्थली अकृत्रिमा भूमिः, अन्या स्थला (कृत्रिमभूमिः), भाजी श्राणा (यवागूः), अन्या भाजा (सेव्या), नागी स्थूला (गजवत्स्थूला), अन्या नागा (सर्पवद्दीर्घा), कालि वर्णः, अन्या काला (क्रूरा), नीली अनाच्छादनं (वस्त्रभिन्नम्), अनाच्छादनेपि न सर्वत्र किन्तु–नीलादौषधौ (वा) नीली। प्राणिनि च (वा) नीली गौः। संज्ञायां वा (वा) नीली नीला। अन्या नीला (नीलया रक्ता शाटी), कुशी अयोविकारः (फाल इति प्रसिद्धा), अन्या कुशा (औदुम्बरशङ्कुः), कामुकी (रिरंसुः), अन्या कामुका (धनादीच्छुः), कबरी केशपाशः, अन्या कबरा (चित्रा)। शोणात्प्राचाम् (४-१-४३) शोणशब्दान्ङीष्वा स्यात्। शोणी शोणा (रक्ता)।

वि. जानपदेत्यादिनाऽर्थविशेषेषु ङीष्, तेनार्थान्तरेषु यथाप्राप्तं ङीप्टापौ। अमृते जारजः कुण्ड इति जातिविशेषवाचकात्कुण्डशब्दात्तु स्त्रियां जातिलक्षणो ङीष्भवत्येव। अमत्रेऽस्त्रीविषयत्वादप्राप्तो ङीषनेन विधीयते न तु नियम्यते। शोणशब्दस्य वर्णवाचकत्वेनैव सिद्धौ ङीषः पुनर्विधानं प्राचां मत एवेति नियमार्थं, तेन मतान्तरे टाबेव।

वोतोगुणवचनात् (४-१-४४) उदन्ताद्गुणवाचिनो ङीष्वा स्यात्। मृद्वी मृदुः। पट्वी पटुः। गुर्वी गुरुः। लघ्वी लघुः। उदन्ताद्गुणवाचिन इत्युक्तेर्नेह-शुचिः, आखुः। खरुसंयोगोपधान्न (वा) खरुः (पतिस्वरा कन्या) पाण्डुः (शुभ्रा)। बह्वादिभ्यश्च (४-१-४५) एभ्यो ङीष्वा स्यात्। बह्वी बहुः। पद्धती पद्धतिः। शकटी शकटिः। शक्तिः शस्त्रे (ग) शक्ती शक्तिः। अशस्त्रेतु शक्तिः (सामर्थ्यम्) यष्टी यष्टिः। कृदिकारादक्तिनः (ग) रात्री रात्रिः। सर्वतोऽक्तिन्नर्थादित्येके (ग) नेह अजननिः गतिः मतिः। इतः प्राण्यङ्गात् (ग) धमनी धमनिः। चन्द्रभागान्नद्याम् (ग) चन्द्रभागी चन्द्रभागा।

वि. "सत्त्वेनिविशतेऽपैति पृथग्जातिषु दृश्यते, आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः। उपैत्यन्यज्जहात्यन्यद्दृष्टो द्रव्यान्तरेष्वपि, वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः" ॥ इति भाष्ये परिभाषितो नानाजातीयद्रव्यवर्ती आगमापायी क्रियाभिन्नो द्रव्यभिन्नो गुणः। गुणमुक्तवान्गुणवचन इति गुणोपसर्जनद्रव्यवाचिनामेवेहग्रहः, रूपादीनां त्वतथात्वान्नेह ग्रहः। खरुत्वं वरणायोत्कण्ठेति गुणवाचितया प्राप्तौ तन्निषेधः। बहुशब्दस्य गुणवचनत्वेनैव प्राप्तौ बह्वादिपाठो नित्यं छन्दसीत्युत्तरसूत्रार्थः। वस्तुत आकडारसूत्रभाष्योक्त्या संख्याशब्दो न गुणवाचीति पूर्वेणाप्राप्तौ तद्ग्रहणं सार्थकम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुंयोगादाख्यायाम् (४-१-४८) या पुमाख्या पुंयोगात्स्त्रियां वर्तते ततो ङीष्स्यात्। गोपस्य स्त्री गोपी। ङीषि यस्येतीतीकारलोपः। गणकस्य स्त्री गणकी। एवं रजकी धीवरी शूद्री ब्राह्मणी। **पालकान्तान्न** (वा) गोपालिका अश्वपालिका। **सूर्याद्देवतायां चाब्वाच्यः** (वा) सूर्यस्य स्त्री देवता सूर्या। अदेवतायां तु सूरी कुन्ती। सूर्यतिष्येति यलोपः। **इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिमा-रण्य-यव-यवन-मातुला-चार्याणामानुक्** (४-१-४६) एषामानुगागमः स्यान्ङीष् च। इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते तत्र, ङीषिसिद्धे आनुगागममात्रं विधीयते, इतरेषां चतुर्णामुभयम्। इन्द्रस्य स्त्री इन्द्राणी। एवं वरुणानी भवानी शर्वाणी रुद्राणी मृडानी। **हिमारण्ययोर्महत्त्वे** (वा) महद्धिमं हिमानी। महदरण्यमरण्यानी। **यवाद्दोषे** (वा) दुष्टो यवो यवानी। **यवनाल्लिप्याम्** (वा) यवनानां लिपिर्यवनानी। **मातुलोपाध्याययोरानुग्वा** (वा) मातुलान्नित्यं प्राप्ते उपाध्यायादप्राप्ते विभाषेयम्। मातुलस्य स्त्री मातुलानी मातुली। उपाध्यायस्य (अध्यापकस्य) स्त्री उपाध्यायानी उपाध्यायी। या तु स्वयमेवाध्यापिका; तत्र-**ङीष्वावाच्यः** (वा) उपाध्यायी उपाध्याया। पुंयोगाभावान्नानुक्। **आचार्यादणत्वं च** (वा) आचार्यस्य स्त्री आचार्यानी। पुंयोग इत्युक्तेः स्वयमेवाध्यापिका आचार्या। **अर्यक्षत्रियाभ्यां वा स्वार्थे** (वा) अर्याणी अर्या (स्वामिनी वैश्या वा) क्षत्रियाणी क्षत्रिया। पुंयोगे तु अर्यी (वैश्यस्त्री) क्षत्रियी (क्षत्रियस्त्री)। ब्रह्माणीति तु ब्रह्माणमानयति (जीवयति) इति कर्मण्यणि बोध्यम्।

वि. १ पुंयोगा दाख्यायामित्यस्य पुंयोगमाश्रित्य लक्षणया स्त्रियां वर्तमानाच्छब्दात् ङीषित्यर्थः। पुंवाचक एव लक्षणया स्त्रियां वर्तते प्रत्ययस्तु स्त्रीत्वाभिव्यञ्जक एव। तेन गोपस्य स्त्रियां गोपालकत्वाभावेपि तद्भार्यात्वेन व्यवहारः। तस्या अपि गोपालकत्वे तु टावेव गोपा। पुंयोगश्चात्र अकुर्वती पापं भर्तृकृतान्बधबन्धादीन्यथा लभते तच्छब्दमपीति भाष्यस्वारस्येन दाम्पत्यलक्षणः सम्बन्धविशेष एव, तेन गोपस्य माता श्वश्रूर्मातुलानीत्यर्थे पुं दाम्पत्याभावेन न गोपीव्यवहारः। दुहितरि देवकी केकयी रेवती पुत्रीत्यादयस्तु गौरादिपाठेन ङीषि उपपाद्या शेखरकारः। तेनेदृशेषु न पुंयोगलक्षणो ङीष्। "अत्र पुंसो योगः सम्बन्धमात्रं नतु दम्पतिभाव एवेत्याग्रहः जन्यजनकभावोपि गृह्यते, संकोचे मानाभावात्। तेन कौसल्ययाऽसावि सुखेन रामः, प्राक्केकयीतो भरतस्ततोभूदि भट्टिप्रयोगः सङ्गच्छते। केकयस्य दुहिता केकयी। जनपदशब्दात्क्षत्रियादञित्यञितु कैकयीति स्यात्। नप्राच्यभ प्रतिषेधेन तद्राजाकारस्य लुगभावात्। तथाच कालिदासः कैकेयि कामाः फलिता स्तवेति" इति तत्त्वबोधिनी पुंयोगादित्युक्तेर्नेह देवदत्ता। आख्याग्रहणान्नेह प्रसूता। जातप्रसवा वाचकस्यास्यशब्दस्य पुंयोगनिमित्तक प्रसवनि स्त्रियांवर्तमानस्यापि पुंवचकत्वाभावात्। गोपालिकेत्यत्र पालयतीति पालक इति ण्वुलि गवां पालक इति तृज कर्तरीति कारकषष्ठोसमास निषेधेन शेषषष्ठो समासे टापि समासावयवसुपः परत्वेनेत्वानुपपत्तिरतो गोपाल

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोपाल इति कर्मण्यणि ततः स्वार्थे के टापि केन व्यवधाने सुपः परत्वाभावेनेत्त्वमुपपादनीयम्। किंवा शेषषष्ठीसमासेपि वस्तुतः कारकत्वेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति पूर्वमेव समासे टापि सुपः परत्वाभावेनेत्त्व-मुपपादनीयम्।

वि. २. इन्द्रवरुणेतिसूत्रे यवनशब्दोल्लेखेन सूत्रकृतः समयेपि यवनाः परिचिता आसन्, वार्त्तिकोक्तेर्यवनलिपयोपि सिद्धा आसन्निति प्रतीयते। तेन लिपीनां प्रचारोऽनर्वाचीनो निश्चीयते।

वि. ३ "उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते। एकदेशमुपाध्यायः। मन्त्र-व्याख्याकृदाचार्यः। यस्माद्धर्मानाचिनोति स आचार्यः" इति स्मृतिवाक्येष्वाचार्योपाध्याययोर्विशेषः। "पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवचनं तथा। युगान्तरे ब्रह्मवादिन्यः स्त्रिय आसन्" इत्याद्युक्तेर्गार्गी-मैत्रेय्यादीनां ब्रह्मवादिनीनामुपनिषत्सूपलम्भाद्वैदिककल्पमाश्रित्य स्वयं व्याख्यात्रीमध्यापिकां वा बोधयतामाचार्योपा-ध्यायान्यादिशब्दानामर्था बोद्धव्याः। एवं च जातेरस्त्रीविषयादित्यत्र वक्ष्यमाणानां गोत्रंचचरणैःसहेत्युदाहरणानां कठी बह्वृचीत्यादीनामपि नानुपपत्तिः, पश्चाद्ब्रह्मचर्यादिनियमानां स्त्रीभिः पालनस्याशक्यतया किल कलिवर्ज्यप्रकरणे नारीणामुपनयनं वेदाध्ययनादि च स्मृतिकारैर्निषिद्धं, तदनुसारेण स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरेति व्यवस्थापितम्। तत्त्वे स्त्रीणां वेदाध्यापनव्याख्यानाद्यभावेन वेदमूलकशास्त्राध्ययनप्रवचनादिकमेवादायोपाध्यायान्याचार्यादिव्यवहारो योग्यो व्यवस्थापनीयः।

वि. ४. क्रीतात्करणपूर्वात् (४-१-५०) करणपूर्वात्क्रीतशब्दान्तात्प्रातिपदिकात् स्त्रियां ङीष् स्यात्। वस्त्रेण क्रीयते या सा वस्त्रक्रीती। क्वचिन्न-रूप्यकक्रीता धनक्रीता। क्तादल्पाख्यायाम् (४-१-५१) करणादेः क्तान्ताद-दन्तात् स्त्रियां ङीष्वा स्यात् अल्पत्वे द्योत्ये। अभ्रेण लिप्ता अभ्रलिप्ती द्यौः (अल्पेनाभ्रेणाच्छन्ना)। अल्पाख्यायामित्युक्तेर्नेह-चन्दनलिप्ता अङ्गना। बहुव्रीहेश्चान्तोदात्तात् (४-१-५२) बहुव्रीहेः क्तान्तादन्तोदान्तादन्तात् स्त्रियां ङीष्स्यात्। अजातिपूर्वादिति वक्तव्यम् (वा) तेन बहुनञ्सुखादिपूर्वान्न। उरुभिन्ना। नेह-बहुक्रीता। जातान्तान्न (वा) जाता दन्ता यस्याः सा दन्तजाता। जातिकालसुखादिभ्यःपरानिष्ठावाच्येति परनिपातः। पाणिगृहीती भार्यायाम् (वा) पाणिगृहीती (विधिवदूढा), अन्या पाणिगृहीता (पाणौ गृहीता)। अस्वाङ्गपूर्वपदाद्वा (४-१-५३) अस्वाङ्गपूर्वात्पूर्वोक्ताद्वा ङीष् स्यात्। पूर्वेण नित्यं प्राप्ते विकल्पः। सुरापीती सुरापीता। अन्तोदात्तादित्येव नेह-वस्त्रच्छन्ना।

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (४-१-५४) असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तादन्तात्प्राति-पदिकाद्वा ङीष्स्यात्। चन्द्र इव मुखं यस्याः सा चन्द्रमुखी चन्द्रमुखा। केशानतिक्रान्ता अतिकेशी अतिकेशा माला। एवं व्याघ्रमुखी- मुखा। सुकेशी-शा। असंयोगोपधादित्युक्तेर्नेह- सुगुल्फा पद्मनेत्रा। अनुपसर्जनत्वान्नेह- शिखा। नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च (४-१-५५) उपसर्जनभूतनासिकादिशब्दान्तेभ्यः स्त्रियां वा ङीष्स्यात्। आद्ययोर्बह्वज्लक्षणो निषेधो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बाध्यते, पुरस्तादपवादन्यायात्। ओष्ठादीनां पञ्चानान्त्वसंयोगोपधादिति पर्युदासे वचनं मध्येपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः। तुङ्गनासिकी तुङ्गनासिका। एवं कृशोदरी-रा, बिम्बोष्ठी-ष्ठा, दीर्घजङ्घी-ङ्घा, समदन्ती-न्ता, चारुकर्णी-र्णा, तीक्ष्णशृङ्गी-ङ्गा। अङ्गगात्रकण्ठेभ्यो वक्तव्यम् (वृत्तौ) स्वङ्गी-ङ्गा, मृदुगात्री-त्रा, कम्बुकण्ठी-ण्ठा। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। पुच्छाच्च (वा) सुपुच्छी-च्छा। कबरमणिविषशरेभ्यो नित्यम् (वा) कबरं (चित्रं) पुच्छं यस्याः कबरपुच्छी मयूरी। मणिपुच्छी, विषपुच्छी, शरपुच्छी। उपमानात्पक्षाच्च पुच्छाच्च (वा) नित्यम्। उलूकस्येव पक्षौ यस्याः सा उलूकपक्षी शाला। उलूकपुच्छी सेना। न क्रोडादिबह्वचः (४-१-५६) क्रोडाद्यन्ताद्बह्वजन्ताच्च ङीष् न स्यात्। स्वाङ्गाच्चेति प्राप्तस्य निषेधः। कल्याणक्रोडा। आ[illegible] नामुरः क्रोडा। द्विशफा, भिन्नगुदा, दीर्घघोणा, शुभ्रनखा। क्रोडादिराकृतिगणः। सुभगा सु[illegible] बह्वचः-पृथुजघना, दीर्घललाटा। सहनञ्विद्यमानपूर्वाच्च (४-१-५७) सहादिपूर्वात्प्रातिपदिकात् [illegible] न स्यात्। सकेशा, अकेशा, विद्यमानकेशा, अनासिका, अनुदरा, अशृङ्गा, विद्यमानदन्ता, सन[illegible] नखमुखात्संज्ञायाम् (४-१-५८) नखमुखान्तात्प्रातिपदिकात्संज्ञायां स्त्रियां ङीष् न स्यात्। शूर्प[illegible] पूर्वपदात्संज्ञायामिति णत्वम्। गौरमुखा। असंज्ञायां तु ताम्रमुखी। दिक्पूर्वपदान्ङीप् (४-१-[illegible]) दिक्पूर्वपदात्स्वाङ्गान्तात्प्रातिपदिकात्परस्य ङीषो ङीबादेशः स्यात्। स्वाङ्गाच्चेति ङीषो ङी[illegible] स्वरविभेदार्थम्। प्राङ्मुखी-खा, प्रत्यङ्मुखी-खा। नेह-प्राक्क्रोडा प्राग्जघना। सख्यशि[illegible] भाषायाम् (४-१-६२) एतौ ङीषन्तौ भाषायां निपात्येते। सखी अशिश्वी (शिशुरहिता)।

वि. स्वस्यावयविनोङ्गं स्वाङ्गमित्युक्तौ सुमुखा शालेत्यादावतिव्याप्तिः, मुखशब्दार्थस्य प्राग्भागस्य शालावयव[illegible] सुकेशी रथ्येत्यत्राव्याप्तिः, केशानां रथ्याङ्गत्वाभावात्, अतः स्वाङ्गं त्रिधा परिभाष्यते—अद्रवं मूर्तिमत्स्वाङ्गं प्राणि[illegible] विकारजमिति। द्रवरहितं मूर्ति (अवयवसंयोगः) मत् प्राणिषु वर्तमानं रोगादिविकाराजन्यं स्वाङ्गमुच्यते। [illegible] खा कन्या। द्रवत्वान्नेह—सुस्वेदा। अमूर्तत्वान्नेह-सुज्ञाना। अप्राणिस्थत्वान्नेह—सुमुखा शाला। विकारजत्[illegible] सुशोफा। २—अतत्स्थं तत्र दृष्टं चेति। तदानीमप्राणिस्थमपि कदाचित्प्राणिनि दृष्टं स्वाङ्गमुच्यते। सुकेशी [illegible] रथ्या। ३—तेन चेत्तत्तथायुत मिति। येनाङ्गेन प्राणिरूपं वस्तु यथायुतं, तेन तत्सदृशेनाङ्गेन अप्राणिरूपं [illegible] प्राणिवद्युतं चेदप्राणिनि दृष्टमपि स्वाङ्गमुच्यते। सुस्तनी सुस्तना प्रतिमा। सुमुखी सुमुखा शिलापुत्रिका।

जातेरस्त्रीविषयादयोपधात् (४-१-६३) जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः [illegible] ङीष्स्यात्। ब्राह्मणी, वृषली, हंसी, कुक्कुटी। अस्त्रीविषयादित्युक्तेर्नेह-मक्षिका। अयोपधा[illegible] क्तेर्नेह-क्षत्रिया। योपधप्रतिषेधे हयगवयमुकयमत्स्यानामप्रतिषेधः (वा) हयी, गवयी [illegible]

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गवयः), मुकयी (चतुष्पाज्जातिविशेषः), मत्सी मनुषी। मत्स्यस्य ङ्यामिति यलोपः मनुष्यस्य हलस्तद्धितस्येति यलोपः। इतो मनुष्यजातेः (४-१-६५) इकारान्तान्मनुष्यजातिवाचिनः स्त्रियां ङीष् स्यात्। अवन्ती कुन्ती दाक्षी। जातेरित्यनुवर्तमाने पुनर्जातिग्रहणाद्योपधादपि—औदमेयी।

वि. १ नित्यमेकमनेकानुगतं सामान्यमिति तार्किकोक्तजात्युपादाने शुक्लादिगुणस्य नित्यैकत्वपक्षे तत्रातिव्याप्तिः, औपगवी कठीत्यादावव्याप्तिः, सवर्णेभ्यः सवर्णासु जायन्ते हि सजातय इति स्मृत्युक्तजन्मसिद्धब्राह्मणत्वादिजात्युपादाने युवत्यादेरग्रहणे युवतितरेत्यत्र जातेश्चेति पुंवद्भावनिषेधो न स्यादिति भाष्यकृतैवं त्रिधा जातिः परिभाषिता—१—आकृतिग्रहणा जातिरिति। आकृतिरवयवसंस्थानं तदभिव्यङ्ग्या मनुष्यत्वादिजातिः। वृषलत्वादीनां संस्थानानभिव्यङ्ग्यतया तत्सङ्ग्रहायोक्तं २—लिङ्गानां च नसर्वभाक्, सकृदाख्यातनिर्ग्राह्येति। असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः। तेन वृषलत्वादीनां संग्रहः। शुक्लत्वादिव्यावृत्तये लिङ्गानां च न सर्वभागिति। तथाप्यौपगवत्ववसिष्ठत्वकठत्वादीनां सकृदाख्यानेनाग्राह्यत्वात्संस्थानानभिव्यङ्ग्यतया चासंग्रहात्तत्संग्रहायोक्तं—३—गोत्रं च चरणैः सहेति। गोत्रमपत्यं, चरणं शाखाध्येतृत्वं, तेनापत्यप्रत्ययान्तत्वं शाखाविशेषाध्येतृत्वं च जातिः। तेनौपगवत्वादीनामपि ग्रहः। एवं त्रिधा निर्वचने तटस्तटीतटमिति सर्वलिङ्गत्वेपि तटत्वादीनां संस्थानाभिव्यङ्ग्यतया, वृषलत्वादीनामसर्वलिङ्गत्वेपि सकृदाख्यातनिर्ग्राह्यतया, औपगवत्वादीनामपत्यप्रत्ययान्ततया, कठत्वादीनां शाखाविशेषाध्येतृत्वरूपतया जातित्वेन तद्वाचिषु स्त्रियां ङीष्। ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठेन ङीना ङीष्बाध्यते। "अपर आह-प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः। असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः" इति यावद्द्रव्यभावी बहुव्यक्तिगतोऽसर्वलिङ्गधर्मो जातिरिति लक्षणान्तरमपि भाष्यकृता निर्दिष्टम्। कौमारादेरयावद्द्रव्यभावित्वेनोत्तरलक्षणानाक्रान्ततया तन्मते जातित्वाभावेन जातेश्चेति पुंवद्भावानिषेधात्कुमारभार्य इति, पूर्वमते आकृतिग्राह्यतया जातित्वेन पुंवद्भावनिषेधात्कुमारीभार्य इति, अनयोर्मतयोः फलभेदः।

वि. २. पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च (४.१.६४) पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयात् (नियतस्त्रीलिङ्गा) दपि ङीष्स्यात्। पूर्वेणाप्राप्तौ वचनम्, ओदनपाकी, शङ्कुकर्णी, शालपर्णी, शङ्खपुष्पी, दासीफली, दर्भमूली, गोवाली। एते ओषधिविशेषे रूढा जातिवाचिनः। पुष्पफलमूलोत्तरपदेषु यतो ङीष्नेष्यते ते अजादौ पठिताः, सत्पुष्पा प्रत्यक्पुष्पा प्रान्तपुष्पा शतपुष्पा संफला भस्त्राफला अजिनफला अमूला।

उङुतः (४-१-६६) उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः ब्रह्मबन्धूः वीरबन्धूः। कुरुनादिभ्य इति ण्यस्य स्त्रियामवन्तीति लुक्। अयोपधादित्युक्तेर्नेह-अध्वर्युर्ब्राह्मणी। अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम् (वा) रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव। अलाबूः, (तुम्बी), कर्कन्धूः (वदरी)। अप्राणीत्युक्तेर्नेह-कृकवाकुः (कुक्कुटी)। रज्ज्वादिपर्युदासान्नेह-रज्जुः हनुः। बाह्वन्तात्संज्ञायाम् (४-१-६७) बाह्वन्तात्प्रातिपदिकात्संज्ञायामूङ् स्यात्। भद्रबाहूः (तन्नाम्नी स्त्री)। संज्ञायामित्युक्तेर्नेह-वृत्तबाहुः। पङ्गोश्च (४-१-६८) पङ्गुशब्दात्स्त्रियामूङ् स्यात्। पङ्गूः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्त्री। श्वशुरस्योकाराकारलोपश्च (वा) श्वश्रूः। पुंयोगलक्षणङीषोपवादः। ऊरूत्तरपदादौ... (४-१-६९) उपमानवाचिपूर्वपदादूरूत्तरपदात्प्रातिपदिकात्स्त्रियामूङ् स्यात्। करभाविवोरू यस्याः सा करभोरूः। एवं रम्भोरूः, स्तम्भोरूः। औपम्य इत्युक्त्या नेह-वृत्तोरूः महोरूः स्त्री।

वि. संहितशफलक्षणवामादेश्च (४.१.७०) संहितादिपूर्वपदादूरूत्तरपदात्प्रातिपदिकात्स्त्रियामूङ् स्या... अनौपम्यार्थमिदम्। संहितौ (संश्लिष्टौ) ऊरू यस्याः सा संहितोरूः। शफौ (शफाविवश्लिष्टौ) ऊरू यस्याः सा शफो... लक्षणौ (लक्षणयुक्तौ), वामौ (सुन्दरौ) ऊरू यस्याः सा लक्षणोरूः वामोरूः। सहितसहाभ्यां चेति वक्तव्यम्। सहितौ (हितेन युक्तौ) सहौ (मर्दनादिक्षमौ) ऊरू यस्याः सा सहितोरूः सहोरूः। संज्ञायाम् (४.१.७२) कद्रुकमण्ड... स्त्रियां संज्ञायामूङ् स्यात्। कद्रूः (नागमाता) कमण्डलूः (काचिन्मृगी)।

शार्ङ्गरवाद्यञो ङीन् (४-१-७३) शार्ङ्गरवादेरञो योकारस्तदन्ताच्च जातिवाचिनो ङीन्स्या... शार्ङ्गरवी, ब्राह्मणी, गौतमी, चण्डाली। नृनरयोर्वृद्धिश्च (गण) नृ-नर-नारी। अजन्ता... और्वी। जातेरित्यनुवृत्तेर्जातिलक्षणे ङीषनेन बाध्यते न पुंयोगलक्षणोऽपि, तेन पुंयोगे ङीषेव। त... (४-१-७६) आपञ्चमसमाप्तेरधिकारोऽयम्। यूनस्तिः (४-१-७७) युवन्शब्दात्स्त्रियां तिप्र... स्यात्स च तद्धितः। नान्तलक्षणङीपोपवादः, तिप्रत्यये स्वादिष्विति पदत्वान्नलोपः युवतिः।

वि. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद्युवन्शब्दस्येव युवतिशब्दस्यापि प्रातिपदिकत्वेन सुबुत्पत्तेः प्राति... पदिकसंज्ञार्थं तद्धितत्वविधानस्यानावश्यकतया तद्धिताधिकार उत्तरार्थः। अत्रानुपसर्जनादित्यस्य सम्बन्धान्नेह-... युवानो यस्यां सा बहुयुवा। नान्तलक्षणङीपोऽनोबहुव्रीहेरिति निषेधे डाबुभाभ्यामिति डाप्। युवतीभिः परिवृत इ... दीर्घान्तो युवतीशब्दस्तु यु मिश्रणे इत्यस्मात् शत्रन्तादुगित्त्वेन ङीपि बोध्यः।

प्रयोगाः—दाक्षीपुत्रस्य पाणिनेः। ऐण्या शलल्या केशान्विनीय। रम्भोरूः कश्चिन्म... रुचिस्ते। द्रौपदी च यशस्विनी। पयस्विनीः शीलवतीर्हेमश्रृङ्गीश्च गा ददौ। परिव्राजि... विनोद्यमाना। प्रभातकल्पा शशिनेव शर्वरी। दौवारिकी द्वारसमीपमेत्य। चतुष्टयी शब्दा... प्रवृत्तिः। मृण्मयी मूर्तिरेषा। स्पृहावती वस्तुषु केषु मागधी। आयासयित्री वां भविष्य... तारिका हारिका वा।

प्रश्नाः—लिङ्गं नाम किम्। जातौ पुंयोगे च को विशेषः। टित्सु षित्सु च कः स्त्रीप्रत्ययः। इकारान्तेषु उकारा... च शब्देषु केषु के प्रत्ययाः। शूद्री शूद्रा अर्याणी अर्या हिमानी नीली मयूरी कबरी एषु के प्रत्ययाः। अधस्तनवा... स्त्रीलिङ्गशब्देषु स्त्रीप्रत्ययानुपपादय—

मदनमपि गुणैर्विशेषयन्ती रविरिव मूर्तिमती विभाति सेयम्। अभिव्यक्तायां चन्द्रिकायां किं दीपिकया। ... प्रहिणीपदं युवतयो वामाः कुलस्याधयः। बलीयसी केवलमीश्वरेच्छा। म्रदीयसीमपि घनामनल्पगुणकलि... प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव। भवत्योः प्रियसखीं पृच्छामि। पाणिगृहीतीसहितः। ऐन्द्री गजसमा... वामोरूरतिशयमाप विभ्रमस्य।

Jayatu Sanskritam, Kathmandu, Nepal

वचनप्रकरणम्

संख्यानुरूपं वचनं, संख्यार्थेषु यथोदितम् ।
ग्राहके ग्राह्यसंख्यातो, व्यूहार्थे व्यूहसंख्यया ॥२६॥

संख्याबोधकं वचनम् । द्व्येकयोर्द्विवचनैकवचने (१-४-२२) बहुषु बहुवचनम् (१-४-२१) प्रकृत्यर्थस्य एकत्वं द्वित्वं बहुत्वं वा यथा विवक्ष्यते तदनुसारेण एक-द्वि-बहु-वचनानि भवन्ति । यथा-पुरुषो गच्छति, पुरुषौ गच्छतः, पुरुषाः गच्छन्ति । लता विकसिता, लते विकसिते, लताः विकसिताः, मधुरं फलं, मधुरे फले, मधुराणि फलानि । संख्याबोधकेषु एकशब्द एकवचनान्तः, द्वयुभशब्दौ द्विवचनान्तौ, त्र्यादयोष्टादशान्ता बहुवचनान्ता एव, एते संख्येयवाचकाः । ऊनविंशत्यादयस्तु संख्यासंख्येयोभयवाचकाः, बह्वर्थत्वेपि तावत्संख्याया एकत्वे एकवचने, द्वित्वे द्विवचने, बहुत्वे बहुवचने प्रयुज्यन्ते इत्यादि पूर्वमुक्तमेव । विवक्षितग्राहके सर्वादौ त्यदादौ च ग्राह्यसंख्यानुसारेण त्रीणि वचनानि भवन्ति । यथा-सर्वं जगन्नश्यति, सर्वे रोदसी विधात्रा सृष्टे, सर्वे लोकाश्चराचराः, रामः कृष्णश्चोभौ गतौ, काव्यं कौमुदी चोभे बोधप्रदे, रामः कृष्णो गोपालश्चैते गताः । व्यूहार्थके व्यूहसंख्यानुसारेण त्रीणि वचनानि भवन्ति । यथा सेना सेने सेनाः, वर्गः वर्गौ वर्गाः, यूथं यूथे यूथानि ।

वि. "अन्वयव्यतिरेकाभ्यां हि शब्दार्थनिश्चयः, यस्य शब्दस्यान्वये योर्थः प्रतीयते व्यतिरेके च व्यतिरिच्यते स स्यार्थः, वृक्षः वृक्षौ वृक्षाः इत्यादौ तत्तद्वचनान्वये सा सा संख्या प्रतीयते व्यतिरेके च व्यतिरिच्यते सत्यपि प्रकृत्यर्थे, न मन्यामहे वचनार्थः संख्ये"ति पदमञ्जरीकारः । उच्यतेनेनेति वचनमन्वर्थं संख्याबोधकं सुबादि । संख्याया अपि प्रातिपदिकार्थत्वे वचनं संख्याया द्योतकमेव, अन्यथा तु वाचकम् । द्व्येकयोरिति भावप्रधाननिर्देशेन द्वित्वैकत्वयोरित्यर्थः । एवं बहुशब्देपि । अन्यथा द्व्येकेष्विति स्यात् । बहुष्विति बहुवचनं तु आश्रयद्रव्यगतं बहुत्वं धर्मे आरोप्य कृतम् । न बहुरोदन इत्यादौ वैपुल्यवाचकबहुशब्दे बहुवचनं न । बहुत्वं तु त्रित्वचतुष्ट्वादिपरार्धपर्यन्तसंख्याव्यापकधर्मविशेषः इति पिञ्जलाधिकरणसिद्धान्तः । वृक्षादिशब्दानामवयविवाचकत्वेन अवयविसंख्यानुसारेणैकवचनादि, न त्ववयवगतबहुत्वमादाय बहुवचनम्, एवमेव सेनावनादिशब्दानां नानाव्यक्तिसमुदायवाचकत्वेनावयवव्यक्तिबहुत्वेपि प्रकृत्यर्थसमूहसंख्यानुसारेण वचनानि । दारादिशब्दविशेषेषु प्रकृत्यर्थैकत्वेपि अवयव्यवयवाभेदविवक्षयाऽवयवबहुत्वमादाय बहुवचनप्रयोगो वाचनिकः । एकोन्यार्थे प्रधाने चेति निर्देशान्नानार्थ एकशब्द एकत्ववाची एकवचनान्त-एको जन इति, अन्याद्यर्थकस्तु बहुवचनान्त एव इत्येके (अन्ये) मन्यन्ते इति । द्व्येकयोरितिसूत्रे एकवचनमिति योगविभागेन द्विबहुवचनयोबोधकयोरप्राप्तौ एकवचनविधानात् संख्याविशेषानिर्धारणे निःसंख्येभ्योऽव्ययादिभ्योप्येकवचनं साधुत्वार्थं भवति ।

CC-0. Digitized by eGangotri and MIDF- Delhi

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् (१-२-५८) जातिबोधने एकस्मिन्नभिधेये बहुव
वा स्यात् । पक्षे एकवचनम् । ब्राह्मणाः-पूज्याः ब्राह्मणः पूज्यः । संपन्ना यवाः सम्पन्नो यवः । प
ब्रीहयः पक्वो ब्रीहिः । जात्याख्यायामित्युक्तेर्नेह-देवदत्तः यज्ञदत्तः । एकस्मिन्नित्युक्तेर्नेह-व्रीहिय
संख्याप्रयोगे प्रतिषेधो वक्तव्यः (वा) तेनेह न- एको ब्रीहिः सम्पन्नः सुभिक्षं करोति। **अस
द्वयोश्च** (१-२-५९) एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवचनं वा स्यात्। वयं ब्रूमः। पक्षे
ब्रवीमि, आवां ब्रूवः। **सविशेषणस्य प्रतिषेधो वक्तव्यः** (वा) अहं देवदत्तो ब्रवीमि। निपुणाव
ब्रूवः। **युष्मदि गुरावेकेषाम्** (वृत्तिः) तेन गुरौ वक्तव्ये एकत्वेपि युष्मदि बहुवचनं वा। यू
गुरवः, त्वं मे गुरुः।

वि. १ आकृत्यधिकरणन्यायेन घटादिशब्दानां जातिवाचकतया जातेश्चैकत्वेन तस्यां वाच्यायामेकवचनप्राप्तौ बहुवचनार्थं जात्याख्यायामिति । "यद्यपि गुणरूपा संख्या द्रव्यधर्मो न जात्यादाविति वैशेषिकैः परिभाषितं त मेदगणनारूपा संख्या सर्वत्र । उक्तं च—"द्विष्ठिप्रस्थसुवर्णादि मूर्तभेदाय कल्पते । क्रियाभेदाय कालस्तु संख्या भेदिका इति । त एव वैशेषिकाश्चतुर्विंशतिगुणाः पञ्च कर्माणीति व्यवहरन्त्येव" इति हरदत्तः । "जात्यर्थो बहुव त्यर्थेन तद्विशेषणानामजातिशब्दानामपि सम्पन्नादीनां बहुवचनमुपपद्यते" इति काशिकाकारः । परं जातिव्यक्त्योस्तादा जातिमुखेन व्यक्त्यभिधाने एकवचनं-व्यक्तिमुखेन जात्यभिधाने बहुवचनं च सिद्धमित्येतत्सूत्रं नावश्यकमिति पदमञ्ज

वि. २ अस्मच्छब्दः प्रत्यगात्मनि वर्तते सचैकस्तस्य कथं द्वित्वयोग इत्याशङ्क्य अयं मे द्वितीय आत्मेत्यादिव्य दन्यत्राप्यात्मत्वारोपेण, त्वं चाहं चावामित्येकशेषेण वाऽनेकार्थत्वं सम्भवतीति समाहितं हरदत्तेन । अस्मच्छब्दस्य चनान्तत्वे तदर्थस्यैकत्वं द्वित्वं बहुत्वं वा प्रकरणान्निर्धार्यते, सविशेषणस्य प्रतिषेधइति तूद्देश्य विशेषणस्थल एव, विशेषणस्थले तु एकत्वे बहुवचनमपि; तेन त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः, सा बाला वयमप्रगल्भ इत्याद्यप्युपपद्यते । "इमानीन्द्रियाणि कदाचित्स्वातन्त्र्येण विवक्षितानि भवन्ति यथा, इदं मेऽक्षि सुष्ठु पश्यति, अयं मे सुष्ठु शृणोतीति; कदाचित्पारतन्त्र्येण विवक्षितानि भवन्ति, यथाऽनेनाक्ष्णा सुष्ठु पश्यामि, अनेन कर्णेन सुष्ठु शृणो यदा स्वातन्त्र्येण विवक्षा तदा बहुवचनं, यदा पारतन्त्र्येण विवक्षा तदैकद्विवचने" इति भाष्योक्त्या अहङ्कार मिन्द्रियाणां स्वातन्त्र्ये कर्तृत्वेन तान्यादाय वयमिति बहुवचनं, पारतन्त्र्ये आत्मानमेवादाय अहमित्येकवचनं इत्यस्य सूत्रस्यानावश्यकता बोध्यते । "सम्प्रत्ययप्रामाण्याच्च युष्मदि गुरौ पक्षे बहुवचनं सिद्ध" मिति कैयट आचार्याः कथयन्ति डित्थाः कथयन्तीत्यादिशिष्टव्यवहारवत् यूयं गुरव इत्यादिप्रयोगस्याप्युपपत्तेर्युष्मदि गुरावेके वृत्त्युक्तिः प्रत्याख्याता ।

वि. ३. युष्मदर्थस्य संमाने, अस्मदर्थस्य वर्गाभिप्राये, गर्वप्रौढ्यादितात्पर्ये वा युष्मदस्मच्छब्दयोः, संमाने नाम विशेषणानामपि क्वचिद्बहुवचनप्रयोगो भवति । यथा यूयं किमभिधानाः, युष्माकं किं गोत्रम्, अस्माभिरित्यमा भवन्तः क्व प्रस्थिताः, ते इत्थमादिशन्ति, वृद्धानां वचनं ग्राह्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—देवानामसुराणां च सेने संमिलिते मिथः। विद्या ह्येताश्चतुर्दश। चतुर्दश सहस्राणि राक्षसा राममभ्ययुः। उभौ यदि व्योम्नि पृथक्प्रवाहौ। वयसो विंशती गते। सर्वाः सेनाः सुसन्नद्धाः। साधयामो वयम्। अत्रभवन्तः प्रमाणम्। सम्पन्नाः शालयः। यूयं प्रभवः। इत्याहुः शङ्कराचार्याः। अस्मान्साधु विचिन्त्य संयमधनान्। वयमपि (दुष्यन्तः) भवत्योः सखीगतं पृच्छामः। व्याघ्रो वनं सेवते।

फल्गुनीप्रोष्ठपदानां च नक्षत्रे (१-२-६०) अनयोर्द्वयोर्नक्षत्रयोर्बहुवचनं वा स्यात्। उदिते पूर्वे फल्गुन्यौ, उदिताः पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे, पूर्वाः प्रोष्ठपदाः। तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् (१-२-६३) अनयोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसङ्गे नित्यं द्विवचनं स्यात्। तिष्य एकः पुनर्वसू द्वौ, तेषां द्वन्द्वो बह्वर्थः। तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू। पर्यायाणामपि यथा स्यादिति नक्षत्रग्रहणम्। तेन पुष्यपुनर्वसू, सिध्यपुनर्वसू।

वि. "फल्गुना-समीपगते चन्द्रमसि फल्गुनाशब्दो वर्तते, बहवस्तेर्थास्तत्र युक्तं बहुवचनम्, यदा तयोरेवाभिधानं तदा द्विवचनं भविष्यति" इति भाष्योक्त्या इदमपि सूत्रमनावश्यकं बोध्यते। नक्षत्र इति वर्तमाने पुनर्नक्षत्रोक्तिः पर्यायाणामपि ग्रहणार्था।

लुपि युक्तवद्व्यक्तिवचने (१-२-५१) व्यक्तिर्लिङ्गं, वचनं संख्येति पूर्वाचार्यसङ्केतः। लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। पञ्चालानां निवासो जनपदः पञ्चालाः अणो लुप्। एवं कुरवः अङ्गाः वङ्गाः कलिङ्गाः। अङ्गानां राजा अङ्गाः। तद्राजप्रत्ययस्य लुप्। एवं वङ्गाः कलिङ्गाः मगधाः मत्स्याः सुह्माः पुण्ड्राः। हरीतक्यादिषु व्यक्तिः (वा) एषु लिङ्गमेव प्रकृतिवत्। हरीतक्याः फलानि हरीतक्यः फलप्रत्ययस्य लुक्। खलतिकादिषु वचनम् (वा) एषु वचनमेव प्रकृतिवत्। खलतिकस्य (तन्नाम्नः) पर्वतस्यादूरभवानि वनानि—खलतिकं वनानि। विशेषणानां चाजातेः (१-२-५२) लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा। पञ्चाला रमणीया बह्वन्ना बहुक्षीरघृताः। गोदौ (ग्रामविशेषः) रमणीयौ बह्वन्नौ। अजातिरित्युक्त्या नेह-पञ्चाला जनपदः, गोदौ ग्रामः। जात्यर्थस्यायं युक्तवद्भावनिषेधः, तेन जातिद्वारा विशेषणानामप्ययं निषेधः। पञ्चाला जनपदो बह्वन्नो रमणीयः गोदौ ग्रामो बह्वन्नो रमणीयः। जनपदग्रामयोर्विशेषणं बह्वन्नादि। पञ्चालादिविशेषणत्वे तु तदानुरूप्यमेव। पञ्चाला जनपदो बह्वन्नाः सुभिक्षा रमणीयाः। गोदौ ग्रामो बह्वन्नौ सुभिक्षौ रमणीयौ। मनुष्यलुपि प्रतिषेधः (वा) मनुष्यरूपे लुबर्थे विशेषणानां युक्तवद्भावो न, लुबन्तस्यतु भवतीत्यर्थः। चञ्चा (तृणमयः पुमान्)। अभिरूपः मनुष्यार्थाणो लुप्।

वि. १. यस्कादिभ्यो गोत्रे, यञञोश्च, अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च, बहच इञः प्राच्यभरतेषु, तिक कितवादिभ्योन्यतरस्यां द्वन्द्वे, आगस्त्यकौण्डिन्ययो रगस्ति कुण्डिनच् इत्यादिभिर्गोत्रार्थकप्रत्ययस्य, जनपदशब्दात्क्षत्रियादञित्यादि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भिर्विहिततस्य तद्राजप्रत्ययस्य तद्राजस्य बहुषु तेनैवास्त्रियामिति, जनपदे लुबिति चातुरर्थिकप्रत्ययस्य, फले तद्विशेषे च वि... रावयवयोरुत्पन्नस्य प्रत्ययस्य फले लुगिति, हरीतक्यादिभ्यश्चेति एकत्वे बहुत्वेपि फलप्रत्ययस्य च लुग्विधीयते। तेषु क्ष... यजनपदोभयवाचकशब्देभ्यो बहुत्वे लुग्विधानेन बहुवचनान्तप्रकृतिक प्रत्ययलुपि प्रकृतिवल्लिङ्गवचने विधीयेते। हरीतक्या... दिभ्यो लुकि तु लिङ्गमात्रं वार्तिकेनातिदिश्यते। यथा गोत्रप्रत्ययलोपे इक्ष्वाकोरपत्यम् ऐक्ष्वाकः-कौ इक्ष्वाकवः, यस्य... गोत्रापत्यं यास्कः-स्कौ यस्काः, एवं गार्ग्यः-र्ग्यौ गर्गाः वात्स्यः-स्यौ वत्साः; तद्राजप्रत्ययलोपे अङ्गानां राजा आङ्गः आ... एवं वाङ्गः वङ्गाः मागधः मगधाः पाञ्चालः पञ्चालाः, जनपदप्रत्ययलोपे पञ्चालानां निवासो जनपदः पञ्चालाः। एवं कु... मत्स्याः अङ्गाः वङ्गाः मगधाः। फले लुकि लिङ्गमात्रं प्रकृतिवत्-आमलक्याः फलम् आमलकी, फलानि आमलक्यः; वदरं वदराणि हरीतकी हरीतक्यः, खलतिकादिषु वचनमात्रं प्रकृतिवत्-खलतिकं वनानि, वरणाः नगरम्। लुप... जातिवाचकभिन्नानां तद्विशेषणानामपि तद्वल्लिङ्गवचने।

वि. २. क्षत्रियजनपदोभयवाचकशब्देभ्य एव लुब्विधानादतथात्वे-जनकानां रघूणां च सम्बन्धः कस्य न ... रघूणामन्वयं वक्ष्ये, निरुध्यमाना यदुभिः कथञ्चित् इत्यादौ लुबभावेन बहुवचनप्रयोगस्तु तदपत्येषु निरूढलक्षणया ब... त्वेनोपपादनीयः।

प्रयोगाः—वङ्गानुत्खाय तरसा। आत्मा संरक्षितः सुह्मैः। प्रतिजग्राह कालिङ्गः। गलितवय... मिक्ष्वाकूणामिदं हि कुलव्रतम्। श्रियः कुरूणामधिपस्य पालनीम्। अङ्गान्वङ्गान्कलिङ्गांश्च सुम्हि... न्निवसन्ति ते। अङ्गेभ्यो मगधान्प्रत्याजगाम।

तदशिष्यं संज्ञाप्रमाणत्वात् (१-२-४३) युक्तवद्वचनं न कर्तव्यं; संज्ञायाः (व्यवहारस्य) प्रमा... त्वात्। पञ्चालादयः शब्दा जनपदादिषु रूढा एव न यौगिकाः तत्र लिङ्गवचने स्वभावसिद्धे न त... प्रतिपाद्ये इत्यर्थः। लुब्योगाप्रख्यानात् (१-२-४४) लुबपि नैव कर्तव्यः, अवयवार्थस्येहाप्रतीतेः। ... तत्र रूढतया तद्धित एव न, किं लुपो विधानेनेत्यर्थः। योगप्रमाणे च तदभावेऽदर्शनं स्यात् (१-२-४५) यदि हि योगस्य (अवयवार्थस्य) इदं बोधकं स्यात्तदा तदभावे न दृश्येत। यौगिक... क्षत्रियादिसम्बन्धरहिते शूद्रस्वामिकेपि देशे कथं तथा प्रयुज्येतेत्यर्थः। प्रधानप्रत्ययार्थवचनम... स्यान्यप्रमाणत्वात् (१-२-५६) प्रत्ययार्थः प्रधानमित्येवं रूपं वचनमशिष्यमर्थस्य लोकत एव सिद्धेः... लोकत एव शब्दार्थप्रतीतेः किं यत्नेनेत्यर्थः। कालोपसर्जने च तुल्यम् (१-२-४७) अतीताया र... पश्चार्धेन आगामिन्याः पूर्वार्धेन च सहितो दिवसोऽद्यतनः, विशेषणमुपसर्जनमित्यादि पूर्वाचा... परिभाषितं, तत्राप्यशिष्यत्वं समानं, लोकप्रसिद्धेः। एवं न्यायेन मत्वर्थे बहुव्रीहिः, पूर्वपद... प्रधानोऽव्ययीभाव इत्यादिकमपि लोकव्यवहारलभ्यत्वान्नोपदेश्यम्।

वि. अङ्गपञ्चालादिक्षत्रियसम्बन्धाभावेपि सम्प्रति शूद्रादिराजके जनपदेपि प्रयुज्यमानतया क्षत्रिययोग... वयवार्थं विनैव अङ्गपञ्चालादिशब्दाः क्षत्रिये जनपदे च रूढाः, ते च आपो दारा इत्यादिवद्बहुवचनान्ता एव ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(प्रयुज्यन्ते) इत्युक्तेः सामञ्जस्येन नात्र तद्राजजनपदार्थकः प्रत्ययस्तल्लोपलोपश्चेति लोपमनुसन्धाय युक्तवद्भावेन बहुत्वोपदेशो न कार्यः इति लुब्विधायकानि बहुत्वविधायकानि च पूर्वाचार्यानुसारीणीमानि सूत्राणि नावश्यकानि; एवं प्रत्ययार्थ-प्राधान्य-कालविशेषो-पसर्जनादिपरिभाषाविशेषाः प्राचीनोक्ता अपि नावश्यकाः, लोकत एवार्थप्रतीतेरिति तदशिष्य-मित्यादिसूत्रपञ्चकप्रषट्कार्थः। तेनेमानि सूत्राणि प्रत्याख्यानपराण्येव न विधायकानि।

लोकव्यवहारः—

परिमेये धर्ममात्रे वस्तुमात्रे च दर्शिते।
एकत्वं प्रायशो लोके, विशेषे तु यथोचितम् ॥३०॥

जलघृतसुवर्णादौ परिमेयपदार्थे, धर्ममात्रे, वस्तुमात्रे वा प्रदर्श्यमाने प्राय एकवचनं लोके प्रयुज्यते। यथा–जलमानय। घृतं क्षारितम्। सुवर्णं महार्घम्। धैर्यमौदार्यं गाम्भीर्यं च महान्गुणः। विनयेन विद्या शोभते। पुष्पं मूलं फलं च। एष्वपि क्वचित्प्रकारभेदेनानेकत्वविवक्षायां तु द्विबहुवचने अपि। यथा तव मम च धैर्ययोर्महदन्तरम्, एषां विदुषां शास्त्रेषु पाण्डित्यानि उच्चावचानि दृश्यन्ते। गङ्गाया जलं, गङ्गायमुनयोर्जले, गङ्गायमुनासरस्वतीनां जलानि। देवाः मनुष्याः पशवो वयांसि।

पुंभूम्न्येवासुदारादि, स्त्रीभूम्न्यप्सर आदिकम्।
श्रीमदाद्यं भूम्नि माने व्यक्त्यैक्येपि प्रयुज्यते ॥ ३१ ॥

असुदारादिशब्दविशेषा एकव्यक्तिबोधनेपि लिङ्गविशेषे बहुवचन एव, संमानबोधने श्रीम-दादयः शब्दा अपि बहुवचने प्रयुज्यन्ते। यथा–पुंबहुवचने-असवः प्राणाः दाराः अक्षताः लाजाः गृहाः सुमनसः (देवाः); स्त्रीबहुवचने- अप्सरसः आपः सुमनसः (पुष्पाणि) वर्षाः सिकताः समाः। संमाने-श्रीमन्तः भवन्तः यूयम् आचार्याः गुरवः पितृपादाः।

ऐक्येपि बह्वर्थबोधो जनलोकादिशब्दतः।
ऐक्यं बहुत्वं जात्यर्थे समष्टि व्यष्टि दृष्टितः ॥ ३२ ॥

जनलोकादिशब्दानां समस्तानामसमस्तानां वा निर्देशे एकवचनप्रयोगेपि जातिवाचकतया बहुव्यक्तिबोधः, तेन समष्टितात्पर्येणैकवचनं व्यष्टितात्पर्येण बहुवचनं वोभयथा प्रयुज्यते। तथा जातिवाचकशब्दानामपि। यथा–जन एवं मन्यते। जनाः एवं कथयन्ति। लोक एवं वक्ति। लोकाः कथयन्ति। वधूजनो लज्जते। विद्वज्जनं सेवय। विद्वज्जनास्तत्र वसन्ति। व्याघ्रो मृगं भक्षयति। व्याघ्रा मृगान्भक्षयन्ति। क्षत्रियः शूरो भवति। क्षत्रियाः शूरा भवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नियमेन द्विवचनं पुष्पवद्रोदआदिषु ।
अर्थाद्द्विवचनौचित्यं स्तननेत्रादिकेष्वपि ॥ ३३ ॥

रोदःपुष्पवदादयः शब्दा उभयबोधकतया द्विवचनान्ता एव प्रयोज्याः, यथा-रोदसी, द्यावापृथिव्यौ, द्यावाभूमी, स्ववैद्यौ, नासत्यौ, दस्रौ, आश्विनेयौ, पुष्पवन्तौ (चन्द्रसूर्यौ)। युगलात्मकपदार्थबोधकेषु स्तननेत्रकर्णादिष्वपि प्रायो द्विवचनप्रयोग उचितः, क्वचन विशेषसंख्याबोधनीयत्वे एक-बहुवचनप्रयोगोऽपि। यथा-नेत्राभ्यां पश्यति। हस्ताभ्यां गृहाण। पादौ प्रक्षालयति। स्तनयोर्मुखं गोपय। कर्णौ पिधेहि। विशेषबोधने तु-अदणा काणः। हस्तैर्पद्ममपरेण पुस्तकं दधाना। शक्रः सहस्रेण चक्षुभिः पश्यति। नेत्रैः पपुस्तृप्तिमनाप्नुवन्त्यः।

वि. दम्पत्यादिशब्दानां व्यक्तिद्वयबोधकत्वेन एकयुगलबोधने द्विवचनान्तता, अनेकयुगलबोधने बहुवचनान्तता नत्वेकवचनान्तता। यथा-दम्पती पूजय, दम्पतयः समाहूताः। गौदौ ग्राम इति गोदशब्दस्यैकबोधनेपि द्विवचनान्तता। मिथुन-युग-युगल-युग्म-द्वन्द्वादिशब्दानां व्यक्तिद्वयबोधकत्वेपि व्यूहवाचकन्यायेन द्विकसंख्यानुसारेण सर्वेषु वचनेषु प्रयोगः। हंसमिथुनं हंसमिथुने हंसमिथुनानि। एवं-युगं युगे युगानि, युग्मं युग्मे युग्मानि।

प्रयोगाः—वधूजनश्चन्द्रमधश्चकार। मैथिली तस्य दाराः। यत्र विद्वज्जनो नास्ति। शीतस्पर्शवत्य आपः। न बाहुभ्यां नदीं तरेत्। पङ्क्त्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां पूरयन् रोदसी ध्वानैः। छात्रवर्गो वसत्यत्र। एकेन हस्तेनाभिवादनं नोचितम्। पादेन खञ्जः।

लिङ्गवद्वचनं सर्वनामसु ग्राह्यसंख्यया।
विशेषणेषु च विना विशेषेण विशेष्यवत् ॥ ३४ ॥

यन्नामशब्दस्य प्रातिनिध्येन यत्सर्वनामोपादीयते तन्नामानुसारेणैव तत्सर्वनाम्नि लिङ्गवद्वचनमपि प्रयुज्यते; विशेषणशब्देष्वपि अजहल्लिङ्गवचनवर्जं विशेषान्तरबोधकत्वं विना लिङ्गं वचनं विशेष्यवदेव। यथा-विद्वांसस्तत्र सन्ति, तान् (विदुषः) आमन्त्रय। रामः कृष्णश्चोभौ ग… सा (वधूः) लज्जते। सर्वेप्येते जनाः सुशीला दृश्यन्ते। हितं मनोहारि च दुर्लभं वचः।

वि. विशेषणानां गुणक्रियादिवाचकतया न स्वतो लिङ्गं संख्या च, किन्तु नञ्सूत्रभाष्ये "आश्रयतो लिङ्गवचनानी"त्युक्तेः सामानाधिकरण्येनाश्रयभूतानां विशेष्याणामेव लिङ्गवचनान्येभिर्गृह्यन्ते, आश्रयाश्च बहुविधा इति विशेषणशब्दाः प्रायो लिङ्गत्रये वर्तमाना आश्रयाधीनतया विशेष्यनिघ्ना उच्यन्ते, वचनमप्येषां विशेष्याधीनं किन्तु क्वचिदुपपत्तिविशेषैरनुशासनविशेषैश्च नियतलिङ्गवचनतया वैषम्यं भवति। यत्र विशेष्यगतसंख्यातो भिन्नं संख्यान्तरं बोधनीयं तत्र विशेषणे विभिन्नं वचनं भवति, उक्तं च व्युत्पत्तिवादे—"विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया यत्राविवक्षितत्वं तत्रैव विशेष्यविशेषणयोः समानवचनकत्वनियमः" इति। यथा वेदानां चतुष्ट्वं…

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वदीयप्रामाण्यस्यैक्यविवक्षया वेदाः प्रमाणमिति, हेतूनां त्रित्वेपि तत्समुदाये एकहेतुत्वविवक्षया शक्तिर्निपुणताभ्यास- श्चेति हेतुः इति। क्वचन शब्द विशेषस्य नियतबहुवचनाद्यनुसारेणाऽऽनुशासनिकं लिङ्गवचनवैषम्यं भवति। यथा मैथिली तस्य दाराः, कलत्रं तस्य राधिका।

एकार्थभावादारोपादौपम्याद्वा विशेषणे।
विशेष्यस्यैव वचनं वैषम्यं तु विशेषतः ॥३५॥

एकार्थबोधकतया सामानाधिकरण्येन आरोपेण उपमानभावेन वा विशेषणीभूतेषु शब्देषु विना विशेषं विशेष्यानुसारि वचनं भवति। यथा–ऐकार्थ्ये- शुक्लं वस्त्रं, पुष्पिता लताः, रक्ते नयने प्रफुल्लानि पुष्पाणि, रघू राजा, सप्त महर्षयः। आरोपे- गुणानां सागरो देवः। बुद्धिर्बलं दृश्यते। यशसो भाजनानि ते। वैद्यानां शारदी माता। श्रुतिस्मृती उभे नेत्रे। औपम्ये- धनमिव विद्या। चन्द्र इव मुखम्। हृदयानीव मित्राणि। गुरुर्देव इवास्माकम्। लोहदण्डाविव बाहू।

वि. एकार्थत्वं प्रकारभेदेप्येकार्थपर्यवसायित्वम्, आरोपो विभिन्नयोरपि पदार्थयोः सादृश्यादिकमन्तर्भाव्य कल्पितोऽभेदः, औपम्यं वस्तुनोर्विभेदेपि गुणक्रियादिना सादृश्यम्। ऐकार्थ्ये वास्तविकेनैक्येन अजहल्लिङ्गबचनवर्जं विशेषणे विशेष्यवल्लिङ्गवचनता स्वतः, आरोपे काल्पनिकेनैक्येन औपम्ये सदृशपरतया विशेष्यपर्यवसानेन विशेष्यविशेष- णयोर्वस्तुतो विभिन्नतया यथास्वं लिङ्गवचने परं तत्र लिङ्गवैषम्येपि विना विशेषं समानवचनत्वं न्याय्यम्, विशेषे विभेदोपि। यथा–गुणाः पूजास्थानम्। सम्पदः पदमापदाम्। स मे प्राणा इव। गावो मे धनम्। शास्त्रमन्तर्नेत्रम्। सागर इव गुणानामसौ।

प्रयोगाः—त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्। उर्वशी सुकुमारं प्रहरणं महेन्द्रस्य। इक्ष्वाकुवंश्यः ककुदं नृपाणाम्। कन्या रत्नमिवेदृशी। ममापि दुर्योधनस्य शङ्कास्थानं पाण्डवाः। कृतः शरव्यं हरिणा तवासुराः। हितं मनोहारि च दुर्लभं वचः। त्रयश्चैते महागुरवः-माता पिता आचार्यश्च।

प्रश्नाः—जात्यर्थे कतमद्वचनम्। युष्मदस्मदोरैक्येपि द्विबहुवचने क्व। नियतवचनाः शब्दाः कीदृशाः। आरोपोपमानविशेषणयोर्विशेष्यनिघ्नता न वा। परिमेय–व्यूह–धर्मवाचकेषु वचनव्यवस्था कीदृशी। नियमेन द्विवचनं बहुवचनं वा क्व। एकवचने बह्वर्थबोधः क्व। अधस्तनवाक्यगतेषु पदेषु वचनानि व्यवस्थापयत–

वेदाः प्रमाणं स्मृतयः प्रमाणम्। राजा मित्रं केन दृष्टं श्रुतं वा। इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः। अभि- रिनायं कोपेन ज्वलितः। दशरूप्यकाण्युपायनमर्पितम्। विद्या विवादाय धनं मदाय। मेनका नामाप्सरसः। नानातीर्थो- दकैः शुद्धैः। महाराजदशरथस्य धर्मदाराः प्रियसखी मे कौशल्या। त्वमहं चोभौ शास्त्रे विवदावहे। इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति। चतुर्दश विद्या उज्ज्वलं ज्योतिः।

———

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभक्तिप्रकरणम्—

उपक्रमः—

विभक्तयो नामभवाः सुपस्तास्तु त्रिधा मताः ।
कारकेष्वथ सम्बन्धे विशेषोपपदस्थितौ ॥ ३६ ॥

विभक्तयो द्विधा सुपस्तिङश्च, नामशब्देभ्यः सुपः, धातुभ्यस्तिङो भवन्ति। तत्र सुपः कार्थे, सम्बन्धमात्रार्थे, उपपद(समीपस्थपदविशेष)योगे चेति त्रिधा भवन्ति। क्रियया कर्तृत्वकर्मत्वादिसम्बन्धविशेषबोधिन्यः कारकविभक्तयः, क्रियेतरैः सह सम्बन्धसामान्यबोधि सम्बन्धविभक्तयः, सन्निहितपदविशेषयोगहेतुकाः सम्बन्धबोधिन्य उपपदविभक्तयः।

वि. सम्बन्धसामान्यबोधकविभक्तिभ्यः उपपद (पदविशेष) योगहेतुकविभक्तयः, उपपदविभक्तिभ्योपि कारक विभक्तयः प्रबला भवन्ति। यथा तेन सहेत्यत्र सम्बन्धसामान्ये षष्ठीं बाधित्वा सहशब्दयोगे तृतीया, हरिं नमस्क नमः शब्दयोगे चतुर्थीं बाधित्वा नमस्करणक्रियाकर्मणि द्वितीया। एवमन्यत्र।

फलव्यापारयोर्धातुः, फलभेदात्क्रियाभिदा।
क्रियायाः साधनं षोढा कारकं, तत्क्रियान्वयि ॥ ३७ ॥

धातुभिः किञ्चित्फलोत्पादका व्यापारविशेषा बोध्यन्ते, तेन यत्किमपि फलं तदनुकूलो व्यापा धात्वर्थः। व्यापारस्य स्पन्दादिरूपस्य सामान्यतोऽविभेदेपि फलभेदेन भेदात्क्रियाया विभे यैः साधनैः क्रिया निष्पाद्यन्ते तानि कारकाणि, तत्पदानि कारकपदानि, तद्विभक्तयः कारक कय उच्यन्ते। कारकपदार्थाः क्रियायां, कारकपदानि क्रियापदेऽन्वीयन्ते।

वि. १ सर्वेषां धातूनां किञ्चित्फलोत्पादकव्यापारोर्थः, फलमात्मधारणादि, तदनुकूलव्यापारः करचरणादि क्वचिदन्तर्यत्नविशेषोपि। यथा-भवने फलमात्मधारणं, तदनुकूलव्यापारो यत्नविशेषः, शयनेऽवयवविश्रान्तिः फलं, कूलव्यापारः शरीरप्रसारणादिः; पचनेऽन्नादेर्विक्लित्तिः फलं, तदनुकूलव्यापारोऽधिश्रयणादिरधःश्रयणान्तः; गमने ग्रामादेः संयोगः, तदनुकूलव्यापारः पादचालनादिः; पतने विभागः फलं, तदनुकूलव्यापारः स्पदादिः; इति फलव्यापा शब्दयमिलित आत्मधारणानुकूलव्यापारो भूधातोः, अवयवविश्रान्त्यनुकूलव्यापारः शीङ् धातोः, विक्लित्यनुकूल पचधातोः, संयोगानुकूलव्यापारो गमधातोः; विभागानुकूलव्यापारः पतधातोरर्थः। एवमन्येषामपि धातूनां तत्तत्फल व्यापारविशेषा अर्था अनुसन्धेयाः। व्यापाराणां स्वरूपतो भेदानवगमेपि फलभेदेन भेदाद्भवनशयनपचनगमनपतनादि विभिद्यन्ते। मीमांसकमते तु फलमेव धात्वर्थः व्यापारस्तु प्रत्ययार्थ इति। तन्न, लः कर्मणि चेति सूत्रविरोधात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकर्मकाकर्मकपरिच्छेदानापत्तेश्चेति मञ्जूषायाम् ।[२] धात्वर्थभूत: प्रधानव्यापारः कर्तरि, फलं तु क्वचित्कर्तर्येव, क्वचित्तु कर्मणि जायते । प्रधानव्यापाराश्रयः कर्ता; प्रधानव्यापारानाश्रयः फलाश्रयः कर्म । यत्र फलमपि व्यापाराश्रये कर्तर्येव साक्रियाऽकर्मिका, यत्र व्यापाराश्रयात्कर्तुरन्यस्मिन्नेव फलमुत्पद्यते सा क्रिया सकर्मिका । यथा भवने आत्मधारणं, शयने विश्रान्तिः, पतने विभागः फलं मुख्यव्यापाराश्रये कर्तर्येवेति तादृश्यः क्रिया अकर्मिकाः, पचने विक्लितिः फलं तण्डुलादौ, गमने संयोगः फलं ग्रामादौ मुख्यव्यापाराश्रयात्कर्तुरन्यस्मिन्नुत्पद्यते इति तादृश्यः क्रियाः सकर्मिकाः । तेन धातवः केचनाऽकर्मकाः, केचन सकर्मकाः । उक्तं च-फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृत इति ।

वि. २ घटपटादिवस्तूनि यथा सिद्धानि दृश्यन्ते, न तथा पचनादिक्रियाः सिद्धाः पिण्डीभूता दर्शयितुं शक्यन्ते, किन्त्वारम्भात्समाप्तिपर्यन्तं प्रचलन्त्य एवावबोध्यन्ते इति क्रिया साध्यजातीयैव भवति, सिद्ध्युत्तरं तस्याः स्वरूपत एवाऽपायात् । सेयं साध्यभूता क्रिया यैः साधनैःर्यावद्भिर्मिलित्वा साध्यते तानि तावन्ति क्रियासाधनानि (निष्पादकानि) कारकाणीत्युच्यन्ते । कारकेषु साधनं शक्तिरित्यपि व्यवहारः प्राचाम् । यथाहि- शयने शयिता पुरुषः; शयनस्थानं शय्यादि, शयनकालो रात्र्यादिः; पचने पाचको जनः, पाच्यमन्नं, पाकसाधनं दार्वादि, पाकस्थानं महानसादि, पाककालो दिनादिः; लेखने लेखकः पुरुषः, लेख्यं श्लोकादि, लेखसाधनं मसीलेखन्यादि, लेखाधारः पत्रादिः; दाने दाता जनः, देयं रूप्यकादि, दानोद्देश्यं छात्रादि; पतने पतितृ पत्रादि, पातावधिर्वृक्षादिः, पातस्थानं भूम्यादि इत्येवं यत्र यावन्ति साधनानि भवन्ति अपेक्ष्यन्ते च तत्र तावन्ति कारकाणि, तत्पदेषु यथानियमं कारकविभक्तयः ।

क्रियायां कारकं कर्ता कर्माऽथ करणं परम् ।
सम्प्रदानमपादानं तथाधिकरणं च षट् ॥३८॥

कर्ता कर्म करणं सम्प्रदानमपादानमधिकरणमिति षट् कारकाणि । सर्वाणि कारकाणि स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियां निष्पादयन्ति । क्रियायाः प्राधान्येन निष्पादको मुख्य व्यापाराश्रयः कर्ता, साध्यः फलाश्रयः कर्म, यद्द्वारा क्रियानिष्पत्तिस्तत्साधनं करणं; दानादेरुद्देश्यं सम्प्रदानं, विभागादेरवधिः अपादानं, यत्र देशे काले वस्तुनि वा क्रिया स क्रियाधारोऽधिकरणं भवति । सर्वासु क्रियासु सर्वाणि कारकाणि भवन्तीति न नियमः । कर्ता सर्वत्र, कर्म सकर्मिकास्वेव, करणं प्रायः सर्वत्र, सम्प्रदानं दानादिषु, अपादानं विभागादिषु, अधिकरणं प्रायः सर्वत्रेति क्रियानुसारेण भवन्ति । तेषु यथावसरं विवक्षितान्येव प्रयुज्यन्ते । कारकेषु—कर्तरि उक्ते प्रथमा क्वचिदनुक्ते तृतीया, कर्मणि अनुक्ते द्वितीया क्वचिदुक्ते प्रथमा, करणे तृतीया, सम्प्रदाने चतुर्थी, अपादाने पञ्चमी, अधिकरणे सप्तमी, अकारकेषु सम्बन्धे षष्ठीति विभक्तीनां सामान्यनियमः । यथाहि-शिष्याः गृहे पाठमभ्यस्यन्ति । धनिकः पर्वणि याचकेभ्योऽन्नं ददाति । वृद्धो दण्डेनाऽऽसनादुत्तिष्ठति । नदी वर्षासु वेगेन वहति । बालकः सोपानाद्भूमौ पतति । वयं पद्भ्यां गृहाद्आपणं गच्छामः । प्रभाते सूर्य उदेति । राज्ञः पुरुषः । मम पुस्तकम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभक्तय :—

प्रथमा—प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२-३-४६) प्रातिपदिकं नाम। यस्मा... योऽर्थो नियमेनावबुध्यते स तस्य प्रातिपदिकस्यार्थः। द्वन्द्वान्ते श्रूयमाणस्य मात्रशब्दस्य प्र... योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्या... अलिङ्गेषु (अव्ययेषु) नियतलिङ्गेषु च प्रातिपदिकार्थमात्रे– उच्चैः नीचैः कृष्णः श्रीः ज्ञा... अनियतलिङ्गेषु लिङ्गमात्राधिक्ये– तटः तटी तटम्, रक्तः रक्ता रक्तम्; सः सा तत्। परि... वाचकेषु परिमाणमात्रे– द्रोणो व्रीहिः, प्रस्थस्तण्डुलः, पलं सुवर्णम्, कर्षं क्षेत्रम्। द्रोण... पलकर्ष-परिमाणपरिच्छिन्नो व्रीह्यादिरित्यर्थः। संख्यावाचकेषु संख्यामात्रे– एकः द्वौ ... चत्वारि बहवः।

वि. १. प्रातिपदिकेन (प्रकृतिनामशब्देन) नियमत उपस्थाप्यमानोर्थः प्रातिपदिकार्थः, प्रत्ययार्थस्तु न प्राति... कार्थः। तत्र सरूपसूत्रभाष्ये "आकृत्यभिधानाद्वैकं वाजप्यायनः, द्रव्याभिधानं व्याडिः" इत्यादिसन्दर्भेण सर्वा... गोषु गोव्यवहारात्, ब्राह्मणो न हन्तव्य इत्यादिधर्मशास्त्राणामपि तज्जातीययावद्धननिषेधार्थत्वात्, एकयाकृत्या... व्यवहारे सौकर्यात्, व्यक्तिमात्रपरत्वे पुरोडाशसंस्कारादेः सकृत्कृते शास्त्रार्थः कृतो भवतीति न्यायेन प्रतियागं कर्तव्य... वगमात्, श्येनचित्यादौ श्येनादेराकृतिपरत्वात्, प्रतिबिम्बेपि मुखादिव्यवहाराच्च, व्यक्तेरपदार्थत्वेप्यग्न्यानयने पा... तद्द्वारैव व्यवहारनिष्पत्तेः आकृतिः (सामान्यावयवसंस्थानं) तदभिव्यङ्ग्या जातिर्वा पदार्थ इति वाजप्यायनम... व्यक्तिपरत्व एव ब्राह्मणः ब्राह्मणीत्यादिभेदसिद्धेः, व्यक्तावेव यागीयपश्वालम्भनादेर्विधेयत्वात्, जात्यर्थत्वे सर्वोच्छेद... श्वा मृत इत्यादिव्यवहारानुपपत्तेः, खण्डमुण्डादिवैरूप्यस्य शुक्लादिगुणसंख्यादिविशेषस्य व्यक्तावेव समन्वयाच्च व्य... पदार्थ इति व्याडिमतम्। उभयं सङ्गमयितु "मुभयोरुभयं पदार्थः, आकृतिवादिन आकृतिः प्रधानं व्यक्तिर्गु... व्यक्तिवादिनो व्यक्तिः प्रधानमाकृतिर्गुणभूता; द्रव्याश्रितगुणलिङ्गसंख्यादीनामाकृतावपि व्यवहारश्च" इति प्र... दनात् आकृतिः (प्रवृत्तिनिमित्तं) व्यक्तिः (द्रव्यं) च द्विकं प्रातिपदिकार्थः लिङ्गादिकन्तु प्रत्ययार्थ इति; पूर्वोक्त... पक्षोपादाने एकमेव प्रातिपदिकार्थ इति; नामादिभ्यो विनापि प्रत्ययं स्त्रीत्वादिबोधात्, लिङ्गानुशासनस्य प्रकृ... दर्शनात्; स्वमोर्नपुंसकात् नपुंसकस्य झलच इति प्रकृतौ लिङ्गव्यवहारात्, टाबादिभिः स्त्रीत्वस्य द्योत्यत्वोक्तेः... प्रत्ययार्थत्वे प्राधान्यापत्तेश्च लिङ्गमपि प्रकृत्यर्थ इति त्रिकं प्रातिपदिकार्थः, संख्याकारके तु प्रत्ययार्थाविति; दधि... विनापि प्रत्ययं प्रकृतित एव संख्याप्रतीतेः संख्यया सह चतुष्कं, किंवा वाचिका द्योतिका वा स्युर्द्वित्वादीनां वि... इत्युक्तेः संख्यामात्रस्य विभक्त्यर्थत्वे कारकेण सह चतुष्कं प्रातिपदिकार्थ इति; जातिलिङ्गसंख्याकारकपञ्चकं प्रातिपदि... प्रत्ययाः केवलं व्यञ्जका इति पञ्च पक्षा स्तत्तदुक्तियुक्तिविशेषतः सिद्ध्यन्ति; एषु पञ्चकपक्ष एव ज्यायानिति मन्त्र... निष्कर्षः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २. पञ्चकृत्वेण लिङ्गसंख्यादीनामपि प्रकृत्यर्थतया प्रातिपदिकार्थे प्रथमेत्येवसिद्धौ लिङ्गादीनां सूत्रे पृथगुपा-
दानेन विषयविभागः। अलिङ्गेषु नियतलिङ्गेषु च प्रातिपदिकार्थे प्रथमा, तटस्तटीतटमित्याद्यनियतलिङ्गेषु प्रकृतितो
लिङ्गानिश्चयाल्लिङ्गमात्रे विशेषार्थे प्रथमा, द्रोणप्रस्थपलादिशब्दैर्मानोन्मानपरिमाणविशेषस्यैव प्रतीतेस्तेषु सामान्यपरि-
माणरूपार्थे प्रथमा, प्रकृत्यर्थस्य विशेषस्याभेदसम्बन्धेन प्रत्ययार्थे सामान्यपरिमाणे, तस्य परिच्छेद्यत्वसम्बन्धेन व्रीह्यादा-
न्वयेन द्रोणाभिन्नपरिमाणपरिच्छिन्नो व्रीहिरित्याद्यर्थः पर्यवस्यति। एकद्वयादिशब्दैः प्रकृतिभिरेव संख्यावगमादुक्ता-
र्थानामप्रयोग इति न्यायेन प्रत्ययाप्रसक्तौ वचनमात्र इति विशेषवचनेन संख्यामात्रार्थे प्रथमा। प्रत्ययाभावेऽपदत्वेनाप्र-
योज्यत्वापातात्प्रकृत्यर्थसंख्यायामेव प्रथमा, प्रकृतिप्रत्ययौ मिलितावेव संख्यां बोधयत इति प्रकृत्यर्थस्यैव प्रत्ययेनानुवादा-
नुपपत्तिः, अनुवादेन न वा पौनरुक्त्यदोषः।

वि. ३. मात्रपदस्य द्वन्द्वान्ते श्रूयमाणतया प्रत्येकं योगो न तु वचन एव, वृत्तं वृत्तेणेत्यादावपि प्रातिपदिकार्थबोधेन
प्रथमापत्तेः–प्रातिपदिकार्थमात्र इत्युक्तम्। तत्र कर्मत्वादेरप्यधिकस्य बोधान्न प्रथमा। एवं च तटस्तटीतटमित्यादौ तदतिरि-
क्तस्य लिङ्गस्यापि प्रतीतेस्तत्सङ्ग्रहाय लिङ्गमात्राधिक्येपीति। द्रोणः प्रस्थ इत्यादौ प्रकृत्यर्थविशेषातिरिक्तसामान्यपरिमाण-
स्यापि प्रतीतेस्तत्संग्रहाय परिमाणमात्र इति। एको द्वावित्यादौ प्रकृतित एव संख्याप्रतीतेः पदत्वसिद्धयेनुवादरूपेण संख्या-
यामपि प्रथमा। अतश्च लिङ्गपरिमाणसंख्यातिरिक्तरहितप्रातिपदिकार्थे प्रथमेति पर्यवस्यति। केचित्तु कर्मत्वादिकारकबोध-
कत्वस्यैव वर्ज्यतया कर्मत्वादिबोधने बाधकानां द्वितीयादिविधीनां प्रवृत्त्या उत्सर्गतस्तदितरेष्वेव प्रथमाविधिप्रवृत्तेः प्रातिपदि-
कार्थे प्रथमा अर्थे प्रथमा इत्येव सुवचमिति वदन्ति। अव्ययेभ्यः सर्वेभ्यः प्रातिपदिकार्थे प्रथमायां तस्या लुकि पदत्वसिद्धिः;
षष्ठीशेष इति शेषषष्ठ्यां लुकि पदत्वनिष्पत्तावपि उच्चैस्ते इत्यादौ सपूर्वायाःप्रथमायाविभाषेति तयादेशसिद्ध्यर्थं प्रथमाया
आवश्यकता।

**सम्बोधने च (२-१-४७) सम्बोधनेपि प्रथमा स्यात्। मात्रग्रहणात् सम्बोधनाधिक्ये पूर्वेणा-
प्राप्तौ वचनम्। हे राम, हेकृष्ण, ए गोविन्द, भो देवाः। हे भो इत्यादयः सम्बोधनाभिव्यञ्जकाः,
ते च प्रयोगे नावश्यकाः, तैर्विनापि सम्बोधनप्रतीतेः।**

वि. सम्बोधनमभिमुखीकृत्य ज्ञापनम्। प्रातिपदिकार्थे संबोधनाधिक्येपि प्रथमा स्यादिति सूत्रार्थः। सम्बोधन-
विभक्तिरनुवाद्य एव विषये, न तु विधेये, तेन हे शूर राजन् सार्वभौमो भवेत्यत्रानुवाद्ये शूरे राजनि च सम्बोधन-
विभक्ति नंतु विधेये सार्वभौमे। सम्बोधनपदार्थस्य युष्मद्भवच्छब्दार्थ एवान्वयः। हे राम अहं गच्छामीत्यादौ युष्म-
च्छब्दाश्रवणेपि त्वं जानीहीत्यध्याहारेण युष्मच्छब्द एवान्वयः इत्युक्तं मञ्जूषायाम्। सम्बोधनं कर्तृकारकमिति
वृद्धोक्तिः; परं युष्मदर्थस्यकर्तृत्व एव तस्यापि कर्तृत्वमन्यथा तु न। हे राम तव गृहं क्वेत्यादौ सम्बोधनमक्रियान्वय्यपि।
तच्च वाक्यान्तर्गतम्, तेन हे राम गृहमित्यादौ पदात्परत्वेन तयादेशः। उक्तं च-सम्बोधनपदं यच्च तत्क्रियाया
विशेषणम्। व्रजानि देवदत्तेति निघातोत्र तथासति।

प्रयोगा :— तरुच्छाया तोयं यदपि तपसो योग्यमशनं फलं वा मूलं वा तदपि न पराधीन-

Jayatu Sanskritam, Kathmandu, Nepal

मिह वः। हे राम मामुद्धर। गोविन्द द्वारकावासिन्। अयमियमिदम्। पलं सुवर्णम्। मा
मित्रं पिता सखा। वृद्धः वृद्धा वृद्धम्।

कारकद्वितीया–कारके (१-४-२३) इत्यधिकृत्य। कर्तुरीप्सिततमं कर्म (१-४-४९) कर्तुः क्रि
ऽऽप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। अनभिहिते (२-३-१) इत्यधिकृत्य। कर्मणि द्वि
(२-३-२) अनुक्ते कर्मणि कारके द्वितीया स्यात्। हरिं भजति। ओदनं पचामि।
लिख। ग्रामं गच्छति। पुष्पमवाचिनोत्। अभिहिते तु कर्मणि प्रातिपदिकार्थे प्रथ
अभिधानं प्रायेण तिङ्कृत्तद्धितसमासैः। तिङा–हरिः सेव्यते। कृता–लक्ष्म्या सेवितो हरिः
तद्धितेन–शतेन क्रीतः–शत्यः। समासेन–प्राप्त आनन्दो यं– प्राप्तानन्दश्चैत्रः। प्रायेणेत्युक्त्या क्वचि
पातेनाप्यभिधानम्। विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् (न युज्यते)। नारद इत्य
सः। एषु तिङादिभिरुक्तेषु कर्मसु द्वितीयाया अभावात्प्रातिपदिकार्थे प्रथमा।

वि. १. द्रव्यगता क्रियाजननशक्तिः कारकं साधनं शक्तिरित्यप्युच्यते। कारकाण्यर्थभूतानि द्रव्याणि, वि
यस्तद्वाचकपदेषु। व्याकरणे शब्दार्थयोस्तादात्म्यव्यवहारात्कर्मणि द्वितीयेत्यादि। कर्मत्वे वाच्ये द्वितीयेत्यादिगूढं
प्रकृतधातूपात्तव्यापारप्रयोज्यफलेन आप्तुं(सम्बन्धुं)मिष्यमाणं कर्म, तस्मिँस्तिङादिभिरनुक्ते द्वितीयेत्यर्थः।
भजतीत्यत्र प्रीत्यनुकूलव्यापार रूपभजनक्रियायाः फलेन प्रीत्या हरिः प्रीत्याश्रयो भवत्विति सम्बन्धुमिष्यमाण
कर्मभूतेऽनुक्ते च हरौ द्वितीया। एवं तण्डुलं पचतीत्यत्र विकृतिरूपफलाश्रयत्वेनेष्टस्य तण्डुलस्य, ग्रामं गच्छति
संयोगरूप फलश्रयत्वेनेष्टस्य ग्रामस्य कर्मत्वेन द्वितीया।

वि. २ क्रियायाः फलमुत्पत्तिर्विकृतिः संस्कृतिः प्राप्तिश्चेति चतुर्धा, तदनुसारेण उत्पाद्यं (निर्वर्त्यं) विकार्यं सं
प्राप्यं चेति कर्म चतुर्विधम्। यथा-उत्पाद्यं-कटं करोति, गृहं रचयति, पत्रं लिखतीत्यादि। विकृतौ प्रकृतिकर्म वि
कर्म चेति द्वे यथा—सुवर्णं (प्र.) कुण्डलं (वि.) करोति, काष्ठं (प्र.) भस्म (वि.) रचयति, पाषाणं (प्र.)
(वि.) करोति। संस्कार्यं यथा-भाण्डानि मार्जयति, गृहं संस्करोति, भूषणमुज्ज्वलयति। प्राप्यं (सम्बद्ध
यथा–पाठं पठति, ग्रामं गच्छति, वेदमधीते, कथां शृणोति। एवमन्यत्राप्यूह्यम्। उक्तं च हरिणा—"नि
विकार्यं च प्राप्यं चेति त्रिधा मतम्। यदसज्जायते सद्वा जन्मना यत्प्रकाश्यते॥ तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थि
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत्॥ किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सि
न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते" इति। अत्र संस्कार्यं विकार्येऽन्तर्भाव्य त्रैविध्यमुक्तम्।

वि. ३ कर्तुरीप्सिततममित्युक्त्या क्रियाफलाश्रयो भवत्विति कर्त्रिच्छाविषयस्यैवेप्सिततमत्वेन कर्मत्वं भवति।
माषेष्वश्वं बध्नातीत्यत्र निवृत्त्यनुकूलव्यापाररूपबन्धनफलेन निवृत्त्या युज्यतामिति बन्धनकर्त्रिच्छाविषयस्याश्वस्यैव कर्म
द्वितीया, माषास्त्वश्वस्यैवेप्सिता न कर्तुरिति, तेषामकर्मतया तत्र विषयाधिकरणे सप्तमी। कर्तुरीप्सित (उद्देश्य
मित्यनुक्त्वा ईप्सिततममिति कथनेन प्रधानोद्देश्यस्यैव ग्रहणात्पयसा ओदनं भुङ्क्ते इत्यत्र ओदनस्यैव प्रधानोद्देश्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भोजनकर्मत्वाच्चत्र द्वितीया, पयसस्तु सामान्यत उद्देश्यत्वेपि प्रधानोद्देश्यत्वाभावादुपस्कारकत्वेन करणत्वाच्चत्र तृतीया, नह्यसौ केवलं पयःपानेन तुष्यति किन्तु तत्संस्कृतेनौदनेनैवेति पयसो नेप्सिततमत्वम्। यदातु पयसोपीप्सिततमत्वं तदा पयः पिबति, पय ओदनं चानयतीति द्वितीया भवत्येव। अधिशीङ्स्थासांकर्मेत्यतः कर्मपदानुवृत्तौ तत्सहचरितस्याधारस्याप्यनुवृत्त्या आधारभूतकर्मणि गेहं प्रविशतीत्यादावेव कर्मत्वेन द्वितीया स्यान्नतु हरिं भजतीत्यादाविति आधारनिवृत्त्यर्थं सूत्रे कर्मग्रहणम्।

वि. ४ कर्तृवाच्याख्यातेन कर्तुः कर्मवाच्याख्यातेन कर्मणोभिधानादुक्ते कर्तरि कर्मणि च तृतीयाद्वितीययोरप्राप्त्या प्रातिपदिकार्थसूत्रेण प्रथमैव। यथा-भक्तो हरिं भजति, भक्तेन हरिर्भज्यते। कारकाणां प्रातिपदिकार्थत्वाभावे अनभिहिते कर्मत्वे द्वितीयेति, संख्याया एवाऽप्रातिपदिकार्थत्वे कर्मगतसंख्यायामनुक्तायां द्वितीयेत्यर्थः। एवं न्यायेन तृतीयाविधिरप्यनुसन्धेयः। नानाक्रियासाधारणकर्मादेरेकत उक्तत्वेऽन्यतोऽनुक्तत्वे च प्रधानक्रियानुसारेणैवोक्तत्वानुक्तत्वे ग्राह्ये। तेन ओदनः पक्त्वा भुज्यते इत्यत्र पाकभोजनयोः कर्मण ओदनस्य क्त्वान्तक्रिययानुक्तत्वेपि प्रधानाख्यातक्रिययोक्तत्वान्न तत्र द्वितीया। तण्डुलानोदनं पचति, सुवर्णं कुण्डले करोति, काष्ठानि भस्म करोतीत्यादौ प्रकृतिविकृतिकर्मणोर्द्वयोरनुक्ततया द्वितीया; तण्डुला ओदनं भवन्ति, सुवर्णं कुण्डले भवति, काष्ठानि भस्म भवन्तीत्यादौ प्रकृतिविकृतिकर्त्रोर्द्वयोरुक्ततया प्रथमा। कर्मणिवाच्ये तण्डुला ओदनं पच्यन्ते, सुवर्णं कुण्डले क्रियते, काष्ठानि भस्म क्रियन्ते इत्यादौ उभयोः कर्मणोरुक्ततया प्रथमा। आख्याते संख्या तु वाच्यभूतप्रकृतिकर्तृकर्मानुसारिण्येव। उक्तं च "प्रकृतेर्विकृतेर्वापि यत्रोक्तिः स्याद्द्वयोरपि। गृह्णाति वाचकः संख्यां प्रकृतेर्विकृतेर्नहि"। विषवृक्षोपीत्यादौ क्रियार्थक्रियायामेव तुमुन्ण्वुलाविति विहितस्य तुमुनः क्रियान्तराभावेऽनुपपत्तेः इष्यते इत्यध्याहृत्य विषवृक्षोपि स्वयं संवर्ध्य यच्छेत्तुमिष्यते तदसाम्प्रत (नयुक्त) मित्यर्थेन आख्यातेनैवाभिहिततया कर्मणि वृक्षे न द्वितीया, नतु निपातेनाभिधानम्, निपातानां द्योतकत्वपक्षे तु निपातेन सर्वथा अभिधानमिति निपातेनापि क्वचिदभिधानमिति न वाच्यमिति शेखरकारः।

वि. ५ भाष्ये कटं करोति भीष्ममुदारं दर्शनीयं चेत्यत्र कटपदद्वितीयया कर्मत्वस्योक्ततया तद्विशेषणेषु भीष्मादिषु कर्मत्वेपि द्वितीया न स्यादिति तिङ्कृत्तद्धितसमासैरेवाभिधानमिति परिगणनमुक्तम्। तत्र "कटोपि कर्म भीष्मादयोपि तत्र कर्म णीत्येव सिद्धम्, अथवा कट एव कर्म, तत्सामानाधिकरण्याद्भीष्मादिभ्योपि द्वितीया भविष्यति" इति भाष्योक्त्या, "यद्यत्करोतिक्रिययाप्तुमिष्टतमं तत्सर्वं द्रव्यं गुणश्च, नह्यसौ कटमात्रेण तुष्यति, तत्र करोति क्रियायां पृथक्सर्वेषां कर्मत्वे प्रत्येकं द्वितीयोत्पत्तिः, पश्चात्तु एकवाक्यतया विशेष्यविशेषणभावः। यद्यपि गुणद्रव्ययोः करोतिना सम्बन्धस्तथापि तमप्श्रुत्या प्रकर्षस्याश्रितत्वाच्चाद्रव्यस्यैव क्रियान्तरे उपयोक्ष्यमाणत्वादीप्सिततमत्वात् कर्मसंज्ञा न गुणस्येति मत्वाह अथवेति। भीष्मादीनां स्वयमकर्मत्वेपि विशेष्यसम्बन्धिन्यैव विभक्त्या भाव्यं तदेकयोगक्षेमत्वात्। केवलानां प्रातिपदिकानां प्रयोगानऽर्हत्वात्। यथेश्वरसुहृदः स्वयं निर्धना अपि तदीयेन तत्फलभाज एवं गुणा अपि," इति कैयटव्याख्यानेन च विशेषणानामपि क्रियान्वयितया तेषु कारकविभक्तिः, स्वविशेष्येषु तु पश्चादन्वयः, किंवा स्वविशेष्येष्वेव साक्षादन्वयेपि तत्सामानाधिकरण्येन तत्समानैव विभक्तिर्युक्ता, ततश्च विशेषणानां विशेष्यान्वयितया क्रियान्वयाभावेनाऽकारकत्वात्कथं तत्र कारकविभक्तिरिति शङ्का न कार्या। क्रियायामन्वयोत्तरं विशेष्येन्वयः किंवा विशेष्येऽन्वयोत्तरं क्रियायां पार्ष्णिकान्वयो भवतु उभयथापि क्रियान्वयेन कारक-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभक्तिरेव। ईदृशः पार्ष्णिकान्वय आरुण्याधिकरणे निर्दिष्टः। क्वचिदपारतन्त्र्येणान्वये —वृद्ध नासांश्च मन्यते तु न विशेष्यविशेषणाभावोपि। एवंरीत्या विशेषणेषु विशेष्यसमानविभक्तय उपपन्ना एवेति सूत्रकृता विशे विभक्तेरविधानान्न्यूनतेति शङ्कावसरो न।

तथायुक्तं चानीप्सितम् (१-४-५०) ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्म स्यात्। ईप्सिते पूर्वमुक्तम्, द्वेष्योपेक्ष्यसङ्ग्रहार्थमिदम् द्वेष्यं यथा-ओदनं भुञ्जानो विषं भुङ्क्ते चौरान्पश्यति। पलायमानोऽहिं लङ्घयति। कण्टकान्मृद्नाति। उपेक्ष्यं यथा-ग्रामं गच्छंस्तृणं स्पृशति। भुञ्जानो नेत्रे निमीलयति। गच्छन्भित्तीः स्पृशति।

वि. तथायुक्तमिति ईप्सितवत्क्रियाफलाश्रयः। ईप्सितादन्यदनीप्सितं द्वेष्यमुपेक्ष्यं च। यदा तु मुमूर्षोर्वि ष्पितमेव तत्र पूर्वेणैव, यदात्वनीप्सितमपि अगत्या भ्रमप्रमादादिना वा क्रियाफलाश्रयो भवति तदास्योदाहरणम्। मार्गेऽहिं पश्यति, चौरैराक्रान्तः कण्टकगुल्मं प्रविशति, व्याघ्राद्भीतो नदीमवगाहते, गुड इति विषं भक्षयति, न्पिपीलिकां मृद्नाति। यच्च नेष्टं नाप्यनिष्टं तदुपेक्ष्यं नतूपेक्षाविषयः, नदी कूलं कषतीत्यादावचेतने उपेक्षा त्वाभावात्। यथा-अ वनङ्गुलीर्भनक्ति। पठन् भित्तिं प्रेक्षते। ईप्सिततमे पूर्वेण द्वेष्योपेक्ष्ययोरनेन कर्मत्वम्, ईप्सि तु वारणार्थक्रियास्थले वारणार्थानामीप्सित इत्यपादानत्वेन पञ्चमी, यवेभ्यो गां वारयतीति। व्यञ्जनादौ तृतीया जलेनौषधं भक्षयति। फलाश्रयः कर्मेति सामान्योक्तौ ईप्सिततमद्वेष्योपेक्ष्याणां सङ्ग्रहेपि वारणार्थे ईप्सितमात्रे प्रसङ्गः स्यादिति तत्पृथक्काराय कर्तुरीप्सिततमं तथायुक्तंचानीप्सितमिति द्वयमावश्यकम्।

अकथितं च (१-४-५१) अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। द्विक गौणकर्मार्थमिदम्। दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम्। कर्मयुक्स्यादकथितं स्यान्नीहृकृष्वहाम्॥ दुहादीनां द्वादशानां नीप्रभृतीनां चतुर्णां च कर्मणा यद्युज्यते तदेवाकथितं परिगणनं कर्तव्य मित्यर्थः। अपादानत्वादिविशेष योग्यमपि तथा अविवक्षितं क्रियान्वयि (का अकथितं कर्म भवति। यथा गां (गोः) पयो दोग्धि। बलिं (बलेः) वसुधां याचते। तण्डुलान् (तण् ओदनं पचति। गर्गान् (गर्गेभ्यः) शतं दण्डयति। व्रजं (व्रजे) गामवरुणद्धि। माणवकं (माणव पन्थानं पृच्छति। वृक्षम् (वृक्षात्) फलान्यवचिनोति। शिष्यं (शिष्याय) धर्मं ब्रूते शास्ति देवदत्तं (देवदत्तात्) शतं जयति। क्षीरनिधिं (क्षीरनिधेः) सुधां मथ्नाति। देवदत्तं (देवद शतं मुष्णाति। ग्रामम् (ग्रामे) अजां नयति, हरति, कर्षति, वहति वा। अर्थनिबन्धनेयं संज्ञा। राजानं (राज्ञः) धनं भिक्षते। शिष्यं (शिष्याय) धर्मं भाषते, अभिधत्ते, वक्ति वा। क्रियान् कारकत्वं एवेयं संज्ञा, नेह गोः पयो दोग्धि। वृक्षस्य फलान्यवचिनोति। तण्डुलानामोदनं पच अपादानत्वादिविशेषविवक्षायां तु यथोचितं पञ्चम्यादयः। वृक्षात्फलान्यवचिनोति। शि धर्मं शास्ति। तण्डुलैरोदनं पचति। ग्रामे अजां नयति।

Jayatu Sanskritam, Kathmandu, Nepal

वि. १. अपादानत्वादिविशेषकथाभिरविषयीकृतत्वादकथितमुच्यते। कर्मयुगिति मुख्यकर्मणा सह सम्बध्य क्रियान्वयीत्यर्थः। क्रियान्तरकारकेष्वपि सम्बन्धसामान्ये षष्ठ्यां नटस्य शृणोतीत्यादावतिप्रसङ्गवारणाय दुह्याजिति परिगणनम्। गां पयो दोग्धीत्यादौ पयआदीनामीप्सिततमत्वेन मुख्यं कर्मत्वं, गवादीनां पयआदावन्वयेऽकारकत्वेन शेषे षष्ठी, क्रियान्वयये तु अपादानत्वादिविशेषविवक्षायां पञ्चम्यादि, सामान्यकारकत्व विवक्षायामकथितकर्मत्वेन द्वितीया। एतद्विहितं गौणं कर्म अतदर्थत्वात् क्रियायाः, यदर्था क्रिया तन्मुख्यम्। परिगणिता एते धातवो द्विकर्मकाः विशेषविवक्षया विभक्त्यन्तरयोग्यं गौणं, विभक्त्यान्तरायोग्यं मुख्यं कर्म। द्विकर्मकेषु कर्मणि वाच्ये दुह्यादेर्गौणं, न्यादेर्मुख्यं कर्म वाच्यं सत्प्रथमान्तमन्यत्त्ववाच्यं द्वितीयान्तं, वाच्यानुसारिचाख्यातं भवति। उक्तं च गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहामिति। यथा गावो दुह्यन्ते पयः। राजा धनानि याच्यते। ग्रामं नीयन्ते अजाः। द्विकर्मकेष्वेकमात्रमपि कर्मोल्लिख्यते कर्मणि वाच्ये तदेव वाच्यं भवति। गां दोग्धि। पयो दोग्धि। गौर्दुह्यते। पयोदुह्यते।

वि. २ वस्तुतो द्विकर्मकधात्वर्थे फलांशद्वयं भवति, मुख्यव्यापारजन्यमुख्यफलाश्रयो मुख्यं कर्म पारम्परिकफलाश्रयो गौणं कर्म। यथा द्रवद्रव्यविभागानुकूलः—क्षरणव्यापारानुकूलव्यापारो दुहेरर्थः क्षरणव्यापाररूपमुख्यफलाश्रयः पयो मुख्यं कर्म, विभागरूपपारम्परिक फलाश्रयो गौर्गौणं कर्म। द्वयोः फलाश्रयत्वविवक्षायां द्वितीया, विभागे गोरवधित्वविवक्षायामपादानत्वेन पञ्चमी, पयसि गोः सम्बन्धमात्रविवक्षायां षष्ठी। एवमन्यत्राप्यूह्यम्।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता सणौ (१-४-५२) प्रत्यवसानं भक्षणम्। गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां च अणौ यः कर्ता स णौ कर्म स्यात्। गत्यर्थे–शत्रवः स्वर्गमगच्छन्-तान्स्वर्गमगमयत्। बुद्ध्यर्थे–देवा अमृतमाश्नन्,-देवानमृतमाशयत्। शब्दकर्मणि-विधिर्वेदमध्यैत। विधिं वेदमध्यापयत्। अकर्मके-पृथ्वी सलिले आस्त,-पृथ्वीं सलिले आसयत्। गत्याद्युक्तेर्नेह-देवदत्त ओदनं पचति-पाचयत्योदनं देवदत्तेन यज्ञदत्तः। प्रेर्यकर्तुः कर्मत्वाभावेऽनुक्ततया तृतीयैव। अणौ कर्तुरित्युक्तेर्नेह-देवदत्तो यज्ञदत्तं गमयति तं विष्णुदत्तः प्रेरयति-गमयति देवदत्तेन यज्ञदत्तं विष्णुदत्तः। एयन्तकर्तुः कर्मत्वाभावेनानुक्ततया तृतीया। नीवह्योर्न (वा) गत्यर्थत्वेन कर्मत्वप्राप्तौ निषेधः। नाययति वाहयति वा भारं भृत्येन। नियन्तृकर्तृकस्य वहेरनिषेधः (वा) वहेर्निषेधप्राप्तौ प्रतिप्रसवः। वाहयति रथं वाहान्सूतः। आदिखाद्योर्न (वा) भक्षणार्थतया कर्मत्वप्राप्तौ निषेधः। आदयति खादयति वाऽन्नं वटुना। अहिंसार्थस्येत्युक्तेर्नेह निषेधः-भक्षयति वलीवर्दान्सस्यम्। जल्पतिप्रभृतीनामुपसंख्यानम् (वा) गत्याद्यर्थाभावादप्राप्तौ वचनम्। जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः। दृशेश्च (वा) दर्शयति हरिं भक्तान्। दृशेः पुनर्विधानात्सूत्रे बुद्धीति ज्ञानसामान्यार्थस्यैव ग्रहणं ज्ञाप्यते। तेनेह न-स्मारयति घ्रापयति वा तत् देवदत्तेन। शब्दायतेर्न (वा) धात्वर्थसंगृहीतकर्मतयाऽकर्मकत्वेन प्राप्तौ निषेधः। शब्दाययति देवदत्तेन। हृक्रोरन्यतरस्याम् (१-४-५३) हृक्रोरणौ यः कर्ता स णौ वा कर्म-

CC-0. Digitized by eGangotri and MIDF- Delhi

संज्ञः स्यात् । उभयत्र विभाषेयम् । हारयति कारयति वा भृत्यं भृत्येन वा कटम् । गत्याद्यर्थाभावेनाप्राप्तौ विकल्पः, अभ्यवहारयति सैन्धवान्सैन्धवै र्वा । भक्षणार्थत्वात्प्राप्तौ विकल्पः । विकारयति सैन्धवान्सैन्धवै र्वा । अकर्मकत्वात्प्राप्तौ विकल्पः । अभिवादिदृशोरात्मनेपदे वेति वाच्यम् (वा) अभिवादयते देवं भक्तं भक्तेन वा । अप्राप्तौ विकल्पः । दर्शयते देवं भक्तं भक्तेन वा । दृशेश्चेति नित्यं प्राप्ते आत्मनेपदे विकल्पः, परस्मैपदे तु न विकल्पः अभिवादयति देवं भक्तेन । दर्शयति देवं भक्तान् ।

वि. १ गतिबुद्धीत्यादौ णीति हेतुमतिणिच एव ग्रहो नतु चुरादिणिचोपि । प्रेरणार्थकणिजन्तक्रियासु शब्दायवर्जं सर्वेष्वकर्मकेषु अणौकर्तुः कर्मत्वेन सकर्मकत्वमेव, सकर्मकेषु तु अनियन्तृकर्तृक वह–नीवर्जगत्यर्थकेषु सामान्यज्ञानार्थकेषु परस्मैपददृशधातौ आदिखाद्यहिंसार्थक भक्षभिन्नभक्षणार्थेषु शब्दकर्मकेषु जल्पत्यादिषु च अणौ कर्तुः कर्मत्वेन द्विकर्मकत्वम्, हृकृधात्वोरात्मनेपदिदृशाभिवदधात्वोश्चाणौ कर्तुर्णौ कर्मत्वविकल्पेन पक्षे द्विकर्मकत्वम् । अन्यत्र सर्वत्राणौ कर्तुरनुक्तत्वेन तृतीयान्तत्वं, ण्यन्तकर्तुस्तु कर्तरि वाच्ये उक्तकर्तृत्वेन प्रथमान्तता, कर्मणि वाच्ये तृतीयान्ततेति द्विकर्तृकत्वं...

वि. २ क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा भवति, तस्यामवस्थायां कैश्चिच्चैतन्याभ्युपगमात्, स्वामिनो वा द्रष्टव्येति कैयटो हरदत्तश्च । इदमुपलक्षणं, वीजावस्थायामपि भक्षणे हिंसासत्त्वादित्युद्योतकारः । तेन भक्षयति वलीवर्दान् सस्यमित्यत्र हिंसार्थत्वान्न निषेधः जल्पतिप्रभृतीनामिति जल्पति लपति आभाषते इति भाष्ये । स्मारयत्येनं वनगुल्मस्येति तु भाष्यप्रयोगात्समर्थनीयम् ।

वि. ३ अत्राकर्मकग्रहणे कालकर्मणामुपसंख्यानं कर्तव्यमिति भाष्योक्त्यात्र अकर्मकाणामिति येषां देशकालादिभिन्नं कर्म न संभवति त एव गृह्यन्ते, देशकालादिकर्मकास्तु मूलतोऽकर्मका अकर्मकेष्वेव गण्यन्ते, तेन आस्ते चैत्रो मासम् आसयति चैत्रम्, गोदोहमासयति चैत्रम् इत्यादावकर्मकानुसारेण द्वितीया । सकर्मकाणां कर्मणोऽविवक्षायामपि मौलिकं सकर्मकत्वमेव व्यवह्रियते, तेन पाचयति देवदत्तेनेत्यादौ तृतीयैव । शब्दायधातुः शब्दकरणार्थकतया धात्वर्थोपात्तकर्मतयाऽकर्मक एव, धात्वर्थबहिर्भूतकर्मवत्त्वस्यैव सकर्मकत्वात् । तेनाकर्मकत्वेन प्राप्तौ तन्निषेधवार्तिकम् ।

वि. ४ हेतुमण्णिजन्तानां कर्मणि वाच्ये "बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया, प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः" इत्युक्तेः बुध्यर्थेषु भक्षणार्थेषु शब्दकर्मकेषु च पूर्वं कर्म, कर्मत्वमापन्नः प्रयोज्यकर्ता वाऽन्यतरद्वाच्यं प्रथमान्तं तदनुरूपमाख्यातम्, अवाच्यं कर्मान्तरं तु द्वितीयान्तं भवति । अन्यत्र कर्म त्वमापन्नः प्रयोज्यकर्ता वाच्यस्तदनुरूपमाख्यातं पूर्वकर्म त्ववाच्यं द्वितीयान्तं भवति । यथा-बोध्यते माणवको धर्मं, धर्मो माणवकं वा, भोज्यते बालमोदनः, ओदनं बालो वा, वाच्यते श्लोकः शिष्यं, श्लोकं शिष्यो वा । गम्यते भृत्यो ग्रामम् । आस्यते चैत्रः ।

क्रियाविशेषणानांकर्मत्वं क्लीबत्वमेकत्वं च । तेन तेषु द्वितीयैकवचनमेव । मधुरं वक्ति । सुखं निवेदयति । स्तोकं पचति । मृदु श्रावयति । अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् (वा) अनत्यन्तसंयोगार्थं वचनम्, अत्यन्तसंयोगे तु कालाध्वनोरिति सिद्धम् । देशो ग्रामसमूहात्मकः कुरुपाञ्चालादिः, नतु ग्रामादिरपि । कालोऽहोरात्रसमूहो मासः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावः कालपर्यवसायिनी क्रिया। अध्वा गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिः। कुरून्स्वपिति (कुरुषु निद्राति)। मासमास्ते (मासे वर्तते)। गोदोह(गोदोहन काल) मास्ते। क्रोशमास्ते (क्रोशे वर्तते)।

वि. १ पचतीत्यादौ पचादेः पाकादिः क्रिया, तिबादेः कृतिरर्थः, तेन कृत्या साध्या पाकादिक्रिया बोध्यते। आख्यातार्थकृतेः साध्यतया कर्मस्थानीयो धात्वर्थः। अतएव पचति-पाकं करोति, गच्छति-गमनं करोतीति विवरणम्। स्तोकं पचतीत्यादौ क्रियाविशेषणस्य स्तोकादेरभेदेन धात्वर्थेऽन्वया त्तदपि कर्मस्थानीयं, तदीयं कर्मत्वं चाख्यातेनाऽनभिहितमिति तत्र द्वितीया, तत्र लिङ्गसंख्याविशेषयोरनवगमात्सामान्ये नपुंसकमौत्सर्गिकं साधुत्वार्थमेकवचनं च युज्यते। तदीयं कर्मत्वं न शाब्दं न वा मुख्यं, किन्तु द्वितीयासिद्ध्यर्थमार्थमातिदेशिकमेवेति सर्वत्रानभिहिततया स्तोकं पच्यते, स्तोकं स्थीयते, स्तोकं कृत इत्यादिर्द्वितीययैव व्यवहारः। उक्तं च पदमञ्जर्याम्—"आख्यातेन हि क्रिया साध्यमानावस्थोच्यते चलति-चलनं करोतीति, अतस्तद्विशेषणं स्तोकादि कर्म भवति स्तोकं चलनं करोती" ति। "स्तोकं पचतीत्यादौ मध्ये द्वितीययाऽवरोधेपि स्तोकमृद्वादेर्धात्वर्थपाकादावभेदान्वयो व्युत्पत्तिसिद्ध इत्यभेदान्वयबोधौपयिकाकाङ्क्षोपगमात्क्रियाविशेषणस्थले न द्वितीयातिरिक्त विभक्तिः, क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात्। कथं स्तोकः पाकः, कृदन्तविशेषणत्वात् धात्वर्थैकाधिकरण्येतु स्तोक मोदनस्य पाक इति स्यादेव" इति व्युत्पत्तिवादे गदाधरः। तेन प्रत्ययार्थे भावेऽभेदेनान्वये स्तोकः पाक इति, धात्वर्थेऽभेदेनान्वये स्तोकं पाक इत्युभयथा व्यवहारः। मञ्जूषाकृता-फलं धात्वर्थत्वमभ्युपगम्य, तण्डुलं पचतीत्यादौ तण्डुलस्य विक्लित्या श्रयत्वात्कर्मत्वं, विक्लितिरूप फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वाच्चत्वमत एव तत्समानाधिकरणे स्तोकादौ कर्मत्वं व्यवस्थापितम्। शब्दशक्तौ जगदीशेन—क्रियायां प्रकारी भूतोपि स्तोकादिर्न कारकं, सुपाऽनुपस्थाप्यत्वात् द्वितीया तु क्लीबलिङ्गवदानुशासनिकी, धात्वर्थप्रकारीभूत सुबर्थत्वमेवकारकत्वमित्यस्याऽकारकत्वं व्यवस्थापितम्। मीमांसायां तु कर्मोत्पत्तिविधौफलस्य साध्वत्वेन फलस्य विधाने वानुवादे वा यागः करणमिष्यते इति धात्वर्थस्य करणत्वमभिप्रेत्य अग्निहोत्रं जुहोतीत्यत्र अग्निहोत्रहोमेनेष्टं (फलं) भावयेदिति बोधाभ्युपगमेपि दध्नाजुहोतीत्यादि गुणविधौ होमस्य साध्यत्वं स्वीकृत्य दध्ना होमं साधयेदिति धात्वर्थस्य कर्मत्वेन बोधोऽपि स्वीक्रियत एव। एवञ्च धात्वर्थसमानाधिकरणस्तोकादेः कर्मत्वमुपपद्यते।

वि. २. अकर्मक धातुभिर्योग इत्यनत्यन्त संयोगार्थमिति प्राचीनः पन्थाः, परमिदं भाष्ये न दृश्यते। किन्तु अकर्मकधातूनां द्विकर्मकत्वसाधनाय "कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां देशश्चे" ति वाक्यमनुवादरूपेण निर्दिष्टं, तेन व्याप्तिरर्थः प्रतीयत एव, व्याप्तेरविवक्षायां त्वधिकरणविभक्तिरेव युक्तेति कालाध्वनोरितिसूत्र भाष्यतो वगम्यते।

अधिशीङ्स्थासां कर्म (१-४-४६) अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिकरणसंज्ञापवादः। ग्राममधिशेतेऽधितिष्ठति वैकुण्ठं हरिः। पर्वतमध्यास्ते। पीठमधिष्ठितः। गृहमध्यासीनः। अभिनिविशश्च (१-४-४७) अभिनीत्येतत्संघात पूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम्। परिक्रयणे सम्प्रदान मन्यतरस्यामित्यतोन्यतरस्यामिति मण्डूकप्लुत्यानुवर्त्य व्यवस्थितविभाषाश्रयणात्क्वचिन्न पापेऽभिनिवेशः। उपान्वध्याङ्वसः (१-४-४८) उपादि पूर्वस्य वसते-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राधारः कर्म स्यात्। ग्राममुपवसति। नगरमधिवसति। उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः। अभुक्त्यर्थस्य तु न (वा) वने उपवसति।

वि. एष्वर्थेष्वभिनिविष्टानामिति भाष्यप्रयोगः क्वचिन्नेति व्यवस्थितविभाषायां मानम्। वसेरश्यर्थस्यप्रतिषेध वार्तिके अर्थशब्दो निवृत्तिपरस्तेन भोजननिवृत्तेर्लाभः। गत्यर्थाकर्मक सूत्रभाष्ये हरिदिनमुपोषित इत्युदाहरणे स्थितिरर्थः भोजननिवृत्तिस्त्वार्थिकीति अभुक्त्यर्थत्वात्कर्मत्वाभाव उपपादनीयः।

प्रयोगा :—महाश्वेता कादम्बरीमनामयं पप्रच्छ। उपाध्यायेन त्वमासनं ग्राहितः। स बन्धयामास प्लवगैर्लवणाम्भसि। कः पयो दोग्धि पाषाणम्। मां सरस्वतीरमनाययत्। तिष्ठति लोकमोजसा। दृढं बद्धोस्मि स्नेहेन। गाढं मां परिष्वजस्व। चन्द्रापीडो शिलापट्टमधिशिश्ये। आर्योदापयतु मे गमनानुज्ञां तातेन। कः परैस्तामपहारयेत्।

उपपदद्वितीया—उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषुततोन्यत्रापि दृश्यते (वा) द्विरुक्तस्य परमाम्रेडितम्। उभयतः (पार्श्वयोः) कृष्णं गोपाः। सर्वतो ग्रामम्। धि लमम्। उपर्युपरि (ऊर्ध्वं समीपे) लोकं हरिः। अध्यधि (उपरि समीपे) लोकम्। अ (अधः समीपे) ग्रामम्। अभित-परित-समया-निकषा-हा-प्रतियोगेपि (वा) अभितो गृहम्। परितः। ग्रामं समया (समीपे) निकषा (समीपे) लङ्काम्। हा कृष्णाभक्तम्। बुभुक्षितं न प्रति भाति किञ्चित्। धिङ्मूर्खेत्यत्र निषिद्धाचरणमित्याध्याहार्यम्। अन्तरान्तरेण युक्ते (२-३-४) आभ्यां योगे द्वितीया स्यात्। अन्तरा (मध्ये) त्वां मां हरिः। अन्तरेण (विना) धनं न सु त्वामन्तरेण कः शक्तः। दिवं भूमिश्चान्तरा।

वि. उपपदविभक्तयः सम्बन्धसामान्यार्थकतया प्रायः षष्ठ्यपवादरूपा ज्ञेयाः। विशेषविध्यभावे सम्बन्धे (शेषे) भवति। उभसर्वतसोरित्यत्र उभसर्वयोः साहचर्यात्सर्वनामभ्यो विहितस्तसिलेव गृह्यते, नत्वाद्यादिभ्यस्तसिः, तेन इत्यत्र तसेश्चेति विहितस्तसिलादेशो बोध्यः। ततोन्यत्रापि दृश्यत इत्यस्यैव प्रपञ्चोभितःपरितइत्यादि। अनाम्रे पर्यादिषु सत्सु तु षष्ठ्येव। गृहस्योपरि। खट्वाया अधः। उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः इतितु उपरिबुद्धीनां (उ बुद्धीना) मुपरिचरन्तीत्यर्थेऽनाम्रेडितत्वे षष्ठी।

कर्मप्रवचनीयाः (१-४-८३) इत्यधिकृत्य, प्राग्रीश्वरान्निपाता इति पर्यन्तमधिकारः। अनुर् (१-४-८४) लक्षणं निमित्तम्। लक्षणे द्योत्येऽनुः कर्मप्रवचनीयसंज्ञः स्यात्। गत्युपसर्गसंज्ञापवा कर्मप्रवचनीययुक्ते द्वितीया (२-३-८) कर्मप्रवचनीयेन योगे द्वितीया स्यात्। जपमनु प्राव (हेतुभूतजपोपलक्षितं वर्षणमभूत्) लक्षणेत्थंभूतेतिसिद्धे पुनर्विधानात्परापि हेतौ तृतीया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बाध्यते। तृतीयार्थे (१-४-८५) तृतीयार्थे साहित्ये द्योत्येऽनुरुक्तसंज्ञः स्यात्। नदीमनु अवसिता (नद्यासह सम्बद्धा) सेना। पर्वतमनु गता वनराजिः। सहार्थतृतीयापवादः। हीने (१-४-८६) हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं (हरेर्हीनाः) सुराः। अनु शाकटायनं वैयाकरणाः। उपोधिके च (१-४-८७) अधिके हीने च द्योत्ये उपेत्यव्ययं प्राग्वत्। अधिके सप्तमी वक्ष्यते उपखार्यां द्रोणः। हीन एव द्वितीया। उप हरिं (हरेर्हीनाः) सुराः। उपशाकटायनं वैयाकरणाः। लक्षणे-त्थंभूताख्यान-भाग-वीप्सासु प्रतिपर्यनवः (१-४-९०) लक्षणाद्यर्थेषु विषयभूतेषु प्रत्यादयः कर्मप्रवचनीयसंज्ञाः स्युः। लक्षणं ज्ञापकं, तत्र-वृक्षं प्रति परि अनु वा विद्युत् (वृक्षज्ञाप्या विद्युत्)। इत्थं भूताख्यानं तत्प्रकारं प्राप्तस्योपपादनं, तत्र–भक्तो विष्णुं प्रति परि अनु वा (विष्णुभक्तः)। भागोंऽशः, तत्र-लक्ष्मीर्हरिं प्रति परि अनु वा (हरेर्भागः)। वीप्सा कात्स्र्न्येन सम्बन्धः, तत्र-वृक्षं वृक्षं प्रति परि अनु वा (सर्वान्वृक्षान्) सिञ्चति। वीप्सायां द्विरुक्तिः। अत्रोपसर्गत्वाभावान्न षत्वम्। सेके वृक्षस्य कर्मत्वेपि प्रत्यादिना सह सम्बन्धेन प्राप्तायाः शेषषष्ठ्या अपवादः।

वि. १ अभिरभागे (१-४-९१) भागवर्जे लक्षणादौ अभिः कर्मप्रवचनीयः स्यात्। हरिमभि भक्तोयम्। देवं देवमभि षिञ्चति। सुः पूजायाम् (१-४-९४) पूजायां सु कर्मप्रवचनीयः स्यात्। सु सिक्तम्। सु स्तुतम्। अनुपसर्गत्वान्न षः। अतिरतिक्रमणे च (१-४-९५) अतिक्रमणे पूजायाञ्चाऽतिः कर्मप्रवचनीयः स्यात्। अति देवान्कृष्णः (देवेभ्यो ऽधिकः देवानां पूज्यो वा)।

वि. २ क्रियापदेन सह प्रयुज्यमानतायां ये कर्म (क्रियां) प्रोक्तवन्तः (द्योतितवन्तः) सम्प्रति तु क्रियाविशेषं न द्योतयन्ति किन्तर्हि क्रियानिरूपितं सम्बन्धविशेषं ते कर्मप्रवचनीयाः उपसर्गसदृशाः प्रत्यादय इत्यन्वर्थेयं संज्ञा। शाकल्यसंहितामनु प्रावर्षदित्यत्र अनुः अनुभूयत इत्यत्रेव न क्रियाविशेषं द्योतयति, नापि षष्ठीवत्सम्बन्धसामान्यं संहितामिति द्वितीयास्तत्वात्, नापि प्रादेशं (विमाय) परि लिखतीत्यादाविव क्रियाविशेषमाक्षिपति, किन्तु संहिताप्रवर्षणयोर्द्वितीयाभिहितं सम्बन्धं हेतुहेतुमद्भावरूपे विशेषेऽवस्थापयति। उक्तं च हरिणा—"क्रियाया द्योतको नायं न सम्बन्धस्य वाचकः, नापि क्रिया पदाक्षेपी, सम्बन्धस्य तु भेदकः" इति। क्वचित्तु प्रवृत्तिनिमित्ताभावेपि सुः पूजायामतिरतिक्रमणे चेति वचनसामर्थ्यादियं संज्ञेति पदमञ्जर्याम्।

वि. ३ लक्ष्यतेनेनेति लक्षणं ज्ञापकं चिन्हं, करणमपि लक्षणं भवति, येन पुनः पुनर्लक्ष्यते न तदेव लक्षणं किन्तु ज्ञापकरूपि निमित्तत्वाय कल्पते तदपि लक्षणमिति भाष्योक्तिः, लक्षणेत्थंभूतेत्यत्र लक्षणं ज्ञापकमात्रं, यथा वृक्षमनु विद्योतते विद्युदिति। अनुर्लक्षण इत्यत्र तु हेतुभूतं लक्षणं विवक्षितं, तेन जपमनु प्रावर्षदित्यत्र हेतुभूतलक्षणे पुनर्विधानात्परायापि हेतुतृतीयाया अनेन बाधः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कालाध्वनोरत्यन्तसंयोगे (२-३-५) अत्यन्तसंयोगो व्याप्तिः। अस्मिन्नर्थे कालाध्ववाचकाद् द्वितीया स्यात्। मासं (मासमभिव्याप्य) कल्याणी। मासं गुडधानाः क्रोशं कुटिला नदी (क्रोशपर्यन्त) मधीते। योजनं (योजनमभिव्याप्य) गिरिः। अत्यन्तसंयोगाभावे तु षष्ठ्येव। क्रोशस्यैकदेशे पर्वतः।

वि. अत्यन्तं (निर्विरामं) संयोगो निरन्तरसंनिकर्षः सर्वावयवव्याप्तिरिति यावत्। यादृशानामवयवानां संयोगः स पदार्थस्तदीययावदवयवसम्बन्धो व्याप्तिः। त्रिंशद्दिनात्मको मासस्तत्र प्रतिदिनमध्ययने मासमधीते। तेनाह्नामविच्छेदेनानध्ययनेपि न व्याप्तिहानिः, ततश्च मासमित्यस्य प्रतिदिनमित्यर्थः। एकस्मिन्नपि दिने तद्विच्छेदे न प्रयोगः। एवं क्रोशावयवेष्वविच्छेदेन कौटिल्ये क्रोशं कुटिला नदी। द्रव्यगुणयोरिव क्रियया अत्यन्तसंयोगे द्वितीया, तत्र क्रियान्वयेपि न कारकत्वं कारके इत्यधिकारोक्तानामेव तथात्वात्। क्रियानिर्वर्तकत्वमेव कारकत्वं तु क्रियान्वयित्वमात्रं, तेन तादर्थ्यचतुर्थ्यादौ क्रियान्वयेपि तन्निर्वर्तकत्वाभावान्न कारकता। शिवरात्रौ जागरणादित्यत्र अत्यन्तसंयोगमविवक्षित्वाधिकरणत्वमात्रविवक्षणेन सप्तमी, अत्यन्तसंयोगे कर्मवद्भवतीति वार्तिकात्कर्मवद्भावेन मासमास्ते इत्यादेः कर्मणि वाच्ये आस्यते मासः, शय्याते क्रोश इति तदभिधानम्। वत्करणादतथात्वस्यापि भावेन मासमास्यते क्रोशं शय्यत इति भावे प्रयोगोपीति भाष्ये दर्शितम्। तेनेदृश स्थलेषु क्रियाभिव्याप्तौ कर्तरि कर्मणि भावे च प्रयोगाः।

प्रयोगाः—पयोधिमाबद्धजलज्जलाविलं विलङ्घ्य लङ्कां निकषाहनिष्यति। अन्तरेण पुरुषकारं न सुखम्। ग्रामं वनं चान्तरा मार्गः। त्वामन्तरा तामरसायताक्षि। न ववर्ष वर्षाणि द्वादश, ... ताक्षः। नवानधोधोबृहतः पयोधरान्। परिजनोराजानमभितः स्थितः। क्रमेण सुप्ता मनु ... वेश। शतं जीव शरदः।

कारकतृतीया— स्वतन्त्रः कर्ता (१-४-५४) क्रियायां स्वातन्त्र्येण विवक्षितोर्थः कर्ता स्यात्। उक्ते कर्तरि प्रथमा। चैत्रः पचति। मैत्रः पश्यति। अहं शृणोमि। **तत्प्रयोजको हेतुश्च (१-४-५५)** कर्तुः प्रयोजकः (प्रेरकः) हेतुसंज्ञः स्यात्कर्तृसंज्ञश्च। तत्राप्युक्ते प्रथमा। चैत्रः पाचयति। स्वामी दर्शयति। अहं श्रावयामि। हेतुसंज्ञया हेतुमति चेति णिच्। **साधकतमं करणम् (१-४-४२)** साधकमुपकारकम्। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। **कर्तृकरणयोस्तृतीया (२-३-१८)** अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण (कर्ता) बाणेन (करणं) हतो वाली (कर्म) कर्तरि-चैत्रेण पच्यते। मया कथ्यते। चैत्रो मैत्रेण पाचयति। ... पाच्यते। करणे- चक्षुषा पश्यति। हस्तेन ताडयति। शस्त्रेण छिनत्ति। पद्भ्यां गच्छति। ... विचारयति। कर्णेन श्रुतम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. १ कर्तुमकर्तुमन्यथा कर्तुं वा प्रभुत्वं स्वातन्त्र्यम् । यथा च पक्तुः पाके स्वातन्त्र्यं न तथा करणादीनां, तेषां कर्तृपरतन्त्रत्वात् । परप्रेरितस्यापि क्रियायां स्वातन्त्र्यमेव । नहि प्रेरितोपि करोत्येव, स करोति न करोति च । तेन प्रेरणे प्रेरकस्येव प्रेरितस्यापि स्व व्यापारे स्वातन्त्र्यान्न कर्तृत्व हानिः । एवमेव भाष्ये प्रतिपादितम् । उक्तं च हरिणा—प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि । तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात् ॥ अदृष्टत्वात्प्रतिनिधेः प्रविवेकेपि दर्शनात् । आरा दप्युप कारित्वात्स्वातन्त्र्यं कर्तुरिष्यते ॥" ईदृशं स्वातन्त्र्यं (प्राधान्यं) चेतनेषु, अचेतनेषु तु अगुणाभावः प्राधान्यम् । प्रधानीभूतधात्वर्थव्यापाराश्रयः कर्ता । सर्वेषां कारकाणां स्वस्व व्यापार द्वारा क्रियानिष्पादकता, । यथा पाके अधिश्रयणाद्यधिश्रयणान्तो व्यापारः कर्तुः पाचकस्य क्लेदनव्यापारः कर्मण स्तण्डुलस्य, ज्वलनव्यापारः करणस्य दारुणः पात्रधारण व्यापारोधिकरणस्य चुल्ल्यादेः एवं न्यायेन सर्वेषां कारकाणां व्यापाराः सम्भूय पाकादिक्रियां निष्पादयन्ति । तेषु प्रधान व्यापाराश्रयस्य प्राधान्यात्कर्तृत्वम् । स्वातन्त्र्यं प्राधान्यमिति भाष्यकारः । अपर प्रेरितस्येव परप्रेरितस्यापि कर्तृत्वं भवत्येव । प्रेरकस्तु प्रेरक (हेतु) कर्तृत्वम् । यथा चैत्रः पचति, मैत्रश्चैत्रेण पाचयति । क्वचन कारकान्तर व्यापारस्य प्राधान्येन विवक्षायां तदाश्रयस्यापि स्वातन्त्र्येण कर्तृत्वं व्यवह्रियते । यथा स्थाली पचति । काष्ठं पचति । उक्तं च भाष्यकृता "विवक्षातः कारकाणि भवन्ती" ति । अत एव स्वातन्त्रेण विवक्षित इत्युक्तम् , "आरोपित मनारोपितं च कर्तृत्वमारोपितं स्थाल्यादौ अनारोपितं पुरुषादौ" इत्युद्योतकारः । अचेतनेषु कर्तृत्वप्यारोपितं कर्तृत्वम् ।

वि. २. क्रियाजनने सहायरूपेण कर्तुः प्रकृष्टोपकारकं साधकतमं, तदेव करणं भवति । उक्तं च हरिणा—"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्, विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्" इति । यथा पाके चैत्रव्यापारितस्य दारुणो ज्वलनव्यापारोत्तरं नियमेन पाकनिष्पत्तिरिति दारु करणम् । एवं दर्शने चक्षुः श्रवणे कर्णश्चलने पाद श्चिन्तने मनः । चक्षुरादि वाह्यं मन आभ्यन्तरं करणम् । कर्माधिकरणादयोप्युपकारकाः, प्रकृष्टोपकारकं तु करणमेवेति साधकतम-मित्युक्तम् । कारकाधिकारादुपकारकत्वे लभ्यमाने साधकत्वमात्रोक्ता वपि साधकतमत्वलाभसम्भवे तमब्ग्रहणेन कारक प्रकरणे गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्याय एतत्सूत्रादन्यत्र न प्रवर्तत इति ज्ञाप्यते । अन्यथा आधारोधिकरण-मित्यत्र अधिकरण मित्यन्वर्थमहासंज्ञाबलेनैवाधारत्वलाभे सत्यपि आधोरोक्त्या सर्वावयव व्याप्तिविशिष्टस्य मुख्याधारस्यैव ग्रहणेन तिलेषु तैलं दध्नि सर्पिरित्या दावेवाधिकरणत्वं स्यान्नतु गङ्गायां घोषः कूपे गर्गकुलमित्यादौ गौणाधारे । तेनात्र तमब्ग्रहणादन्यत्र कारक प्रकरणे गौणमुख्य न्याया नवतारस्य ज्ञापनेन सामीपिकाधिकरणेपि सप्तम्युपपद्यते ।

दिवः कर्म च (१-४-४३) दिवः साधकतमं कारकं कर्मसंज्ञंस्याच्चात्करणसंज्ञं च । तेन कर्मत्वे द्वितीया, करणत्वे तृतीया । अक्षैः अक्षान्वा दीव्यति । वाच्यान्तरे कर्मत्वे अक्षा दीव्यन्ते, करणत्वे भावे अक्षैर्दीव्यते । गम्यमानापि क्रियाकारकविभक्तीनां प्रयोजिका । अलं श्रमेण, श्रमेण साध्यं नास्तीत्यर्थः । गम्यां साधनक्रियां प्रति श्रमः कारणम् । शतेन शतेन (परिच्छिद्य) वत्सान्पाययति पयः । परिच्छेदे शतं करणम् ।

वि. अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया (वा) वैदिकमार्गानुयायिनः शिष्टास्तद्विपरीता अशिष्टाः । दास्या (दास्यै) मालां संयच्छते (ददाति) कामुकः । दाणश्च सा चेच्चतुर्थ्यर्थे इति चतुर्थ्यर्थे तृतीयास्थले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दाण् धातोरात्मनेपदविधानेनेदं ज्ञाप्यते। शिष्टव्यवहारेतु तृतीयात्मनेपदं च न। भार्यायै संयच्छति। संज्ञोऽन्यतरस्यां कर्मणि (२-३-२२) संपूर्वस्य जानाते कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा सञ्जानीते।

प्रयोगाः—किं त या क्रियते धेन्वा या न सूते न दुग्धदा। अलं महीपाल तव श्रमेण। दूरं खलु गुणैरुद्यानलता वनलताभिः। मदनमपि गुणैर्विशेषयन्ती। आत्मानुरूपां विधिनो... सञ्चरन्ति रथेन धनिनः। पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम्। परित्यक्तोस्मि तेन।

सम्बन्धोपपदतृतीया—प्रकृत्यादिभ्य उपसंख्यानम् (वा) यथायथं विभक्त्यपवादः। ... चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति... सुखेन याति। दुःखेन याति। आकृतिगणोयम्। नाम्ना सुतीक्ष्णश्चरितेन दान्तः। धान्येन ... वन्हित्वेन वन्हिं जानामि। अपवर्गे तृतीया (२-३-६) अपवर्गः फलप्राप्तिस्तस्यां द्यो... कालाध्वनोरत्यन्तसंयोगे (व्याप्तौ) तृतीया स्यात्। कालाध्वनोरिति द्वितीयापवादः। ... क्रोशेन वाऽनुवाकोऽधीतः। अह्नः क्रोशं वाभिव्याप्यानुवाकोध्ययनेन गृहीत इत्यर्थः। अ... बोधनेतु कालाध्वनोरिति द्वितीयैव, मासमधीतो नायातः। सहयुक्तेऽप्रधाने (२-३-१९) स... युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहायातः पिता। दण्डेन साकं पपात। छात्रैः सार्धं ... गतः। त्वया सह गमिष्यामि। सहार्थकयोगं विनापि तदर्थबोधे तृतीया, वृद्धोयूनेति निर्दे... येनाङ्गविकारः (२-३-२०) अङ्गं शरीरम्। येनाङ्गेन (अवयवेन) विकृतेनाङ्गिनो विकारो ... ततस्तृतीया स्यात्। अक्ष्णा काणः (अक्षिसम्बन्धिकाणत्वविशिष्टः)। कर्णेन बधिरः। ... खञ्जः। पाणिना कुणिः। हानिवदाधिक्यमपि विकारः। मुखेन त्रिलोचनः। हस्ते न पङ्... अङ्गिनो विकारा बोधने तु न-अक्षि काणमस्य। इत्थंभूतलक्षणे (२-३-२१) कश्चित्प्रकारं ... लक्षणे (ज्ञापके) तृतीया स्यात्। जटाभिस्तापसः (जटाज्ञानज्ञाप्यतापसत्वविशिष्टः) एवं पु... छात्रः। कमण्डलुना व्रती। वास्या तक्षा। हेतौ (२-३-२३) हेत्वर्थे तृतीया स्यात्। ... साधारणं निर्व्यापारसाधारणं च हेतुत्वं, करणत्वं तु क्रियामात्रविषयम्। दण्डेन घटः। ... (हेतुना) दृष्टः। फलमपीह हेतुः। अध्ययनेन (अध्ययनार्थं) वसति।

वि. १ प्रकृत्यादौ सम्बन्धस्तृतीयार्थः। प्रकृत्या चारुः (प्रकृतिसम्बन्धिचारुत्ववान्। सम्बन्धषष्ठ्या अ... प्रायेण याज्ञिकः (बहुलाकारसम्बन्धियाज्ञिकत्ववान्। गोत्रेण गार्ग्यः (गार्ग्यगोत्रम्)। प्रथमापवादः। समेनैति ... णैति (समं विषमं च गमनं करोति)। क्रियाविशेषणद्वितीयापवादः। द्विद्रोणेन धान्यं क्रीणाति (द्विद्रोण...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मूल्यं क्रीणाति)। षष्ठ्यपवादः। एषु चार्वभिन्नप्रकृतिकः, गार्ग्यभिन्नगोत्रकः, इत्याद्यर्थान्निरूप्य अभेदे: तृतीयेयमिपि वदन्ति। अत्र प्रकृत्या कृतश्चारुः, प्राचुर्येण ज्ञातो याज्ञिक इत्यादिरीत्या गम्यमानक्रियामादाय समेन विषमेण वा या याति, द्विद्रोणमूल्येन क्रीणातीति प्रत्यक्षक्रिया मादाय वा करणे तृतीयैव निर्वाह इत्यपि वदन्ति।

वि. २ पृथग्विनानानाभिरित्यत्रैव सहेनेत्येव सिद्धौ युक्तग्रहणं सहार्थशब्दानामपि ग्रहणार्थम्। पुत्रेण सहेत्यत्र पितुरागमनक्रियासम्बन्धः शाब्दतया मुख्यः, पुत्रस्य तु साहित्यगम्यतयाऽऽर्थोऽप्रधानीभूतः। अत्रागमनक्रियाकर्तृत्वेनापि तृतीया सिद्ध्यति, परं पुत्रेणसह स्थूलइत्यादौ तृतीयासिद्ध्यर्थं सहार्थयोगे तद्विधानमावश्यकम्।

वि. ३ येनाङ्गविकार इत्यत्राङ्गपदं शरीरपरं, यत्पदं विकृतावयवपरम्। एकेन विकलः काणो द्वाभ्यामन्धःप्रकीर्तितः। इत्थंभूतलक्षण इत्यत्र लक्षणपदं ज्ञापकपरम्। ज्ञानेकरणत्वेन तृतीयोपपत्तावपि करणत्वाविवक्षया लक्ष्यलक्षणभावमात्रेपि तृतीयासिद्ध्यर्थमेतद्विधानम्। इयमुपलक्षणतृतीयेत्यप्युच्यते। हेतावित्यत्र हेतुर्लौकिकं कारणं: न तु तत्प्रयोजकोहेतुश्चेति परिभाषितः।

प्रयोगाः—तैलविन्दुना सह दीपार्चिरुपैति मेदिनीम्। स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः। सा प्रकृत्यैव तन्वङ्गी। प्रायेण मूर्खोयम्। अनेन सार्द्धं विहर। निसर्गेण रम्यमिदम्। शस्त्रेण वीरः। क्षमया पृथिवी समः। अलमुपालम्भेन। भाग्येन धनी। अयमेकपदे तया वियोगः।

कारक चतुर्थी—कर्मणा यमभिप्रैति स सम्प्रदानम् (१-४-३२) दानस्य कर्मणा (सह सम्बुद्धं) यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्। चतुर्थी सम्प्रदाने (२-३-१३) सम्प्रदान कारके चतुर्थी स्यात्। विप्राय गां ददाति। विष्णवे पुष्पमर्पयति। राज्ञे उपायनमुपहरति। अनभिहित इत्येव। नेह दीयतेस्मै दानीयो विप्रः। क्रियया यमभिप्रैति सोपि सम्प्रदानम् (वा) पत्ये (पतिमुद्दिश्य) शेते। युद्धाय संनह्यते। श्राद्धाय विगर्हति (निन्दति)। कार्यायोत्सहते। अकर्मकक्रियोद्देश्यमपि सम्प्रदानम्। कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा (वा) कर्मसम्प्रदानयोरेकवाच्ये॰समवाये यजधातुविषय एवायं विधिः। पशुना रुद्रं यजते (पशुं रुद्राय ददाति)। छन्दोविषय एवायमिति कैयटः।

वि. १ किमप्युद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागः, स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनं वा दानम्। अपुनर्ग्रहणो- नेह-रजकस्य वस्त्रं ददाति। प्लुतःपृष्ठं ददाति। शेषेषष्ठी। दानक्रियाकर्मणा (देयद्रव्येण) सह यस्य सम्बन्धमभि- कर्त्ता दीयते तत्सम्प्रदानम्। दानोद्देश्यं सम्प्रदानमिति यावत्। तेन दानार्थक्रियास्थल एवेदम्। दानं च विधिना- विधिनापि, तेनेहापि गायकाय पारितोषिकं ददाति। सम्यक्प्रदीयतेस्मै तत्सम्प्रदानमित्यन्वर्थतया पुनर्ग्रहणे, स्वस्वत्वम- र्थदाने, स्वस्वत्वनिवर्तनेपि उत्सर्गमात्रेण परस्वत्वानुत्पादने च न सम्प्रदानम्। भाष्यमते तु नान्वर्थतायामाग्रहः, किञ्चिदुद्दिश्य त्याग एव दानम्, तेन शिष्याय चपेटिकां ददाति, वृद्धाय जलं ददाति, न शूद्राय मतिंदद्यात् इत्याद्यपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्ध्यतीति कैयटे स्पष्टम्। रजकस्य वस्त्रं ददातीति तु शेषषष्ठ्योपपादनीयम्। सम्प्रदानं प्रेरकमनुमन्तृ अनिराकर्तृ चेति त्रिधा। प्रेरके-याचकाय भिक्षां ददाति। अनुमन्तरि-उपाध्यायाय गां ददाति। अनिराकर्तरि-देवेभ्यः पुष्पाण्यर्पयति। उक्तं च हरिणा-"अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्। प्रेरणानुमतिभ्यां वा लभते सम्प्रदानताम्" इति।

वि. २ कर्मणः सम्बन्धाभावेपि क्रियाया उद्देश्ये सम्प्रदानत्वसिद्धये क्रियया यमभिप्रैतीति वार्तिकम्। तेन पत्ये शेते इत्याद्यकर्मकस्थलेष्वपि सम्प्रदानचतुर्थी, सकर्मकेष्वपि वनाय गां मुमोचेत्यादौ। कटं करोतीत्यादावप्युद्देश्यत्वेन सम्प्रदानत्वापत्तिस्तु कर्मसंज्ञया बाधान्न। अत्र क्रियाया अपि लोके कर्मत्वोपचारेण पत्ये शेते इत्यादावपि क्रियायाः कर्मणा सम्बन्धुमिष्यमाणतया सूत्रेणैव गतार्थत्वाद्वार्तिकं नावश्यकमिति भाष्यकृतो दृष्टिः।

रुच्यर्थानां प्रीयमाणः (१-४-३३) रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणः। (प्रीत्याश्रयः) सम्प्रदानं स्यात्। अन्यकर्तृकोऽभिलाषोरुचिः। हरये रोचते भक्तिः (भक्तिकर्तृकप्रीत्याश्रयो हरिः)। चैत्राय मोदकः स्वदते। मैत्राय स्वदते सूपः। अप्रीयमाणे तु न, देवदत्ताय रोचते मोदकः पथिः। अत्र प्रीयमाणतया देवदत्तः सम्प्रदानं, न तु पन्थाः। **श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (१-४-३४)** एषां प्रयोगे बोधयितुमिष्टोर्थः सम्प्रदानं स्यात्। देवदत्ताय श्लाघते। (देवदत्तं श्लाघमानस्तां श्लाघां तमेव बोधयितुमिच्छति) चैत्राय ह्नुते (अन्यापनयनेन चैत्रं स्वाशयं बोधयति)। गोपी कृष्णाय तिष्ठते (स्थित्या स्वाशयं बोधयति)। गोपी कृष्णाय शपते (उपालम्भेन स्वाशयं बोधयति) **धारेरुत्तमर्णः (१-४-३५)** धारयतेः प्रयोगे उत्तमर्णः (ऋणदाता) सम्प्रदानं स्यात्। भक्ताय धारयति मोक्षं हरिः (भक्तसम्बन्धिनं मोक्षं हरिरवस्थापयति)। **स्पृहेरीप्सितः (१-४-३६)** स्पृहयतेः प्रयोगे ईप्सितोर्थः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति (इच्छति)। फलेभ्यः स्पृहयति। ईप्सितमात्रे सम्प्रदानता, ईप्सिततमत्वे तु परत्वात्कर्मसंज्ञा, पुष्पाणि स्पृहयति (अतिशयेनेच्छति) **क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः (१-४-३७)** क्रोधोऽमर्षः, द्रोहोऽपकारः, ईर्ष्याऽक्षमा, असूया गुणेषु दोषाविष्करणमित्येषां विशेषः। क्रोधः कोप एव, द्रोहादयोपि कोपप्रभवा एव गृह्यन्ते इत्यत उक्तं यं प्रति कोप इति। क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स सम्प्रदानं स्यात्। चैत्राय क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा। यं प्रतिकोप इत्युक्त्या नेह भार्यामीर्ष्यति (मैनामन्योद्राक्षीदित्यन्यस्मिन्द्रुह्यति। **क्रुधद्रुहोरुपसृष्टयोः कर्म (१-४-३८)** सोपसर्गयोरनयोः प्रयोगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात्। सम्प्रदानसंज्ञापवादः। क्रूरमभिक्रुद्ध्यति, अभिद्रुह्यति। अनयोः सोपसर्गत्वे द्वितीया, केवलत्वे चतुर्थी।

वि. **राधीक्ष्योर्यस्य विप्रश्नः (१-४-३९)** अनयोः प्रयोगे यस्य विषये विविधः (शुभाशुभादेः) प्रश्नः स सम्प्रदानं स्यात्। अनयोरकर्मकतया शेषषष्ठ्या अपवादः। कृष्णाय राध्यति ईक्षते वा (कृष्णविषये पृष्टो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाशुभं पर्यालोचयति)। **प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता** (१-४-४०) आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनाव्यापारस्य कर्त्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिशृणोति आशृणोति वा (विप्रेण मह्यं देहीतिप्रवर्तितस्तं प्रतिजानीते)। **परिक्रयणे सम्प्रदानमन्यतरस्याम्** (१-४-४४) नियतकालं भृत्या स्वीकरणं परिक्रयणम्। तत्र साधकतमं कारकं सम्प्रदानसंज्ञं स्यात्। पक्षे करणे तृतीया। शतेन (द्रव्यशतेन) शताय वा परिक्रीतः।

क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२-३-१४) क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनः (अप्रयुज्यमानस्य) तुमुनः कर्मणि चतुर्थीस्यात्। फलेभ्यः (फलान्याहर्तुं) याति। समिद्भ्यः (समिध आनेतुं) व्रजति। द्रव्याय (द्रव्यमर्जयितुं) प्रवसति। पुष्पेभ्यः (पुष्पाण्यवचेतुं) यतते। नमस्कुर्मो नृसिंहाय (नृसिंह मनुकूलयितुं) स्वयम्भुवे (स्वयम्भुवमनु कूलयितुं) नमस्कृत्य। **मन्यकर्मण्य नादरे विभाषाऽप्राणिषु** (२-३-१७) प्राणिभिन्ने मन्यतेः कर्मणि चतुर्थी वास्या त्तिरस्कारे। पक्षे द्वितीया। न त्वां तृणं मन्ये तृणाय वा (तृणादपि न्यूनं मन्ये)। न तं बुसं मन्ये बुसाय वा। अप्राणिष्वित्यपनीय नौकाकान्न शुकशृगाल वर्जेष्विति वाच्यम् (वा) नत्वां नावं (जीर्णां नावं), काकम्, अन्नं। (कुत्सितान्नं) शुकं, शृगालं वा मन्ये। निषेधान्न चतुर्थी। न त्वां शुनं शुने वा मन्ये इत्यत्र प्राणित्वेपि चतुर्थी। अनादर इत्युक्तेर्नेह-अश्मानं दृषदं मन्ये मन्ये काष्ठ मुलूखलम्, वन्ध्यायास्तं सुतं मन्ये यस्य माता न पश्यति। **गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि** (२-३-१२) अध्वभिन्ने गत्यर्थानां कर्मणि द्वितीया चतुर्थ्यौ स्तश्चेष्टायाम्। ग्रामं ग्रामाय वा गच्छति। वनं वनाय वा प्रयाति। नगरं नगराय वा व्रजति। चेष्टायामित्युक्तेर्नेह-मनसा पाटलिपुत्रं गच्छति। अनध्वनीत्युक्तेर्नेह-अध्वानं याति। पन्थानं गच्छति।

वि. १. मुख्यक्रियाफलभूतायास्तुमुन्नन्तक्रियाया गोपने तत्कर्मणि चतुर्थी क्रियार्थेति विधीयते। फलेभ्यो यातीत्यादौ मुख्या यान क्रिया न फलार्था किन्तु फलाहरणार्थेति तादर्थ्ये चतुर्थ्या अगतार्थतयाऽयं विधिः स्वयम्भुवे नमस्कृत्येत्यादौ उपपदविभक्तेः कारकविभक्तिर्बलीयसीति नमः शब्दयोगजन्यां चतुर्थीं बाधित्वा नमस्कार कर्मतया द्वितीया प्राप्तौ अन्तर्गता अनुकूली करण कर्मतामादाय चतुर्थी। तेन नमः शब्दमात्रयोगेन तदर्थान्वये चतुर्थी, तद्विशिष्ट करणादि क्रियायोगे द्वितीया, तत्रापि गुप्ततुमुन्नन्तार्थविवक्षायां चतुर्थीति हरयेनमः, हरिं नमस्कृत्येत्यादयः प्रयोगा उपपाद्याः।

वि. २. मन्यकर्मणीति श्यनानिर्देशा द्दैवादिकस्यैवेह ग्रहो न तु तानादिकस्य। मन्यकर्मणि प्रकृष्टकुत्सित ग्रहणमिति वार्तिकम्। नञः प्रयोगे कुत्सा प्रकर्ष बोधान्नञायुक्त मुदाहरणम्। अश्मानं दृशदं मन्ये इत्यादौतु तत्त्वाख्याने न निन्दाबोध इति न चतुर्थी।

वि. ३. गत्यर्थकर्मणीति प्रापणार्थकनीवहाद्यर्थेषु गतिगर्भत्वेपि न तद्ग्रहः। तेनाजां नयति वहतीत्यादौ न चतुर्थी। अत्र सिद्धंत्वप्राप्तवचनादिति वार्तिकोक्त्या अप्राप्तप्राप्तिरूपगत्यर्थकर्मण एव ग्रहेण स्त्रियं गच्छतीत्यादौ तदभावान्न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थी। अनध्वनीत्यध्वपर्यायाणामपि व्यावृत्तिः। आस्थितप्रतिषेधो वक्तव्य इति वार्तिकादृगन्त्राधिष्ठिते निषेधः। यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव। उत्पथेन (गन्तुमशक्तः) पथे गच्छति।

प्रयोगा :—अपूपो रोचते मह्यम्। कुप्यन्ति हितवादिने। युद्धाय प्रवर्तते। तृणाय रघुनन्दनोपि। शिष्याय पाठं देहि। न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति। समिधे वयम्। दुदोह गां स यज्ञाय सस्याय मघवा दिवम्। स्पृहयामि दुर्ललितायास्मै। मूर्खे विद्वांसो न रोचन्ते। शाकाय लवणाय वा।

सम्बन्धोपपदचतुर्थी–तादर्थ्ये चतुर्थी वाच्या (वा) मुक्तये (मुक्त्यर्थं) हरिं भजति। यूपाय दारु कुण्डलाय हिरण्यम्। पाकाय स्थाली। अवहननायोलूखलम्। क्लृपिसम्पद्यमाने च (वा) भक्तिर्ज्ञानाय कल्पते। क्लृपीत्यर्थग्रहणम्। भक्तिर्ज्ञानाय सम्पद्यते जायते वा। मूत्राय कल्पते जायते सम्पद्यते वा यवागूः। उत्पातेन ज्ञापिते च (वा) वाताय कपिला विद्युदातपाय अतिलोहिनी; पीता वर्षाय विज्ञेया, दुर्भिक्षाय सिता भवेत्। हितयोगे च (वा) गोभ्यो हितं प्रजाभ्यो हितम्। अरोचकिने हितम्। तुमर्थाच्च भाववचनात् (२-३-१५) भाववचनाद् विहिततुमर्थभावप्रत्ययान्ताच्चतुर्थी स्यात्। यागाय (यष्टुं) याति। पाकाय (पक्तुं) प्रव्रजति त्यागाय (त्यक्तुं) गच्छति। भूतये (भवितुं) व्रजति। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च (२-३-१६) एभिर्योगे चतुर्थी स्यात्। हरये नमः। नमस्ते। नमो वः। नमो देवेभ्यः। कर्मत्वेतु उपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीयैव। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। स्वस्ति राज्ञे। इन्द्राय स्वाहा। अग्नये स्वाहा। पितृभ्यः स्वधा। मात्रे स्वधा। अलं (समर्थः) मल्लो मल्लाय। अलमिति पर्याप्त्यार्थग्रहणम्। प्रभुर्मल्लो मल्लाय। दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्तो वा। वषडिन्द्राय। चकारेण पुनर्विधानादाशीर्विवक्षायां चतुर्थीचाशिषीति षष्ठीं परामपि बाधित्वा स्वस्तियोगे चतुर्थ्येव-स्वस्ति गोभ्यो भूयात्।

वि. १. तादर्थ्यमुपकार्योपकारकभावः, तत्रोपकार्यादेव चतुर्थी। उपकार्यत्वं जन्यत्वं प्राप्यत्वं वा। जन्यत्वे हरिं भजति, प्राप्यत्वे ब्राह्मणेभ्यो दधि। विप्राय गां ददाति, हरये रोचते भक्तिरित्यादौ तादर्थ्याभावेन सम्प्रदाने चतुर्थी। सम्पद्यमान इत्यत्र सम्पत्तिरभूतप्रादुर्भावः तत्र विकारवाचकाच्चतुर्थी। तेन भक्तिर्ज्ञानाय कल्पते इत्यादौ ज्ञानात्मना परिणमतीत्यर्थः। अत्र तादर्थ्यचतुर्थ्या सिद्धावपि परिणामविशेषबोधार्थमिदं वचनम्। प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः, उत्पातज्ञाप्यशुभाशुभवाचकाच्चतुर्थी।

वि. २. भाववचनतुमर्थप्रत्ययान्ते तुमुनैव तादर्थ्यस्य द्योतितत्वेन प्रातिपदिकार्थे प्रथमाप्राप्तौ तुमर्थादिति चतुर्थी तेन तादर्थ्यचतुर्थ्या नास्य गतार्थता। पदान्तरयोगनिमित्तोपपदविभक्तिः कारकविभक्तेर्दुर्बलेति कारकविभक्तेरप्राप्ते उपपदविभक्तिः कार्या। क्रियाकारकयोः सम्बन्धो मुख्योन्तरङ्गः, उपपदार्थेन सह तु यत्किञ्चित्क्रियाकारकभावमूलकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तन्निमित्ता विभक्तिर्बहिरङ्गेति कैयटोक्ते बहिरङ्गादन्तरङ्गस्य बलीयस्त्वं न्याय्यमेव। क्रियाकारकसम्बन्धो विशेषरूपः, उपपदसम्बन्धः सामान्यरूपः, सामान्यस्य प्रकरणादिपर्यालोचनया विशेषे पर्यवसानं, विशेषस्य तु स्वत एव तथात्वमिति सामान्यापेक्षया विशेषस्य प्राबल्यं युक्तमेवेत्यन्ये। नमस्कारः पूज्यत्वबुद्धिः। स्वाहास्वधावषट्शब्दार्थस्त्यागः, तत्राग्न्यधिकरणकस्त्यागः स्वाहाशब्देन, पित्रुद्देश्यकस्त्यागः स्वधाशब्देन, देवोद्देश्यकस्त्यागो वषट्शब्देन बोध्यत इति विशेषः। प्रभुर्बभूषुर्भुवनत्रयस्येत्यत्र तु शेषे षष्ठी। निषेधार्थकालंशब्दयोगे तृतीयोक्ता, पर्याप्त्यर्थकालंशब्दयोगे इयं चतुर्थी।

प्रयोगा :—आदानं हि विसर्गाय। प्रणिपत्य सुरास्तस्मै। नमस्तस्यै नमो नमः। हरये नम इत्युच्चैर्मुच्यते सर्वपातकात्। तस्यालमेषा क्षुधितस्य तृप्त्यै। उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये। मुनित्रयं नमस्कृत्य। स्वस्त्यस्तु ते। प्रति शुश्राव काकुत्स्थस्तस्मै विघ्नप्रतिक्रियाम्।

कारकपञ्चमी–ध्रुवमपायेऽपादानम् (१-४-२४) अपायो विश्लेषः, तस्मिन्साध्ये ध्रुवं (अवधिभूतं) कारकमपादानसंज्ञं स्यात्। अपादानेपञ्चमी (२-३-२८) अपादानकारके पञ्चमी स्यात्। ग्रामादागच्छति। अश्वात्पतति। सोपानाद्भ्रस्यति। पर्वतादवरोहति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् (वा) विरामो निवृत्तिः। पापाज्जुगुप्सते। कार्याद्विरमति। कर्मणो निवर्तते। धर्मात्प्रमाद्यति। मार्गात्स्खलति।

वि. अपायो विश्लेषो विभागस्तद्धेतुभूतो गतिविशेषश्चावधिसापेक्षः। प्रकृतविभागोत्पादकव्यापारानाश्रयत्वे सति विभागाश्रयोऽवधिर्ध्रुवं, तदपादानं भवति। प्रश्लेषपूर्वक एव विश्लेषो विभागः, तेन हिमवद्विन्ध्ययोर्न विभाग इति नापादानत्वं तयोः। ध्रुवं क्वचित्स्थिरं क्वचिच्चलमिति द्विधा। आद्यं यथा—वृक्षात्पत्रं पतति पर्वतात्पाषाणं भ्रस्यति। द्वितीयं यथा–धावतोऽश्वात्पतति, भ्रमतश्चक्राद् भ्रस्यति। चलं स्वीयविभागान्तरोत्पादकव्यापारान्तराश्रयत्त्वेपि प्रकृतधात्वर्थविभागोत्पादकव्यापारानाश्रयत्वेन तादृशा ध्रुवमुच्यते। यथा उपरितलात्पततः सोपानाच्चैत्रः पततीत्यादौ सोपानपतने उपरितलं, चैत्रपतने सोपानं ध्रुवमपादानम्, विभागभेदेन तदवध्योर्भेदः। मेषयोः परस्परविभागे परस्परमवधिः, विभागभेदेनावधिभेदः। यथा मेषौ परस्परस्मादपसरतः। मेषो मेषान्तरादपसरति। यदा तूभयोर्विभागे वृक्षादि ध्रुवं तदा तदेवापादानम्। मेषो मेषान्तरादपसरति। पुरुषोऽश्वेन सह भृगोः पतति। क्वचिदमूर्तमपि कल्पनया विभागावधिरपादानं भवति। स कार्यादपसरति। धैर्याद्भ्रस्यति। क्वचित्क्रियापि कल्पितविभागरूपा भवति। कनिष्ठो ज्येष्ठभ्रातुर्विभज्यते। तदपादानं क्वचित्स्फुटमवधिभूतं निर्दिष्टविषयम्—ग्रामादागच्छति, पर्वतादवरोहति, गुहाया निःसरति। क्वचिद्गर्भीकृतक्रियान्तरावधिभूतं सदुपात्तविषयम्—वलाहकात् (निःसृत्य) विद्योतते विद्युत्, कुसूलात् (निष्कास्य) पचति। क्वचिद्गुप्तक्रियाध्याहारादपेक्षितक्रियाम्—कुतो भवान् (आगतः), पाटलिपुत्रात् (आगतः)। उक्तं च हरिणा—निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियं चेति त्रिधापादानमुच्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भीत्रार्थानां भयहेतुः (१-४-२५) भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्। चौरा
द्बिभेति। व्याघ्राद्भीतः। दुःखात्त्रायते। आपदो रक्षति। चोराद्विजते। पराजेरसोढः (१-४-
पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात् पराजयते (ग्लायति)। असोढ इत्युक्ते
शत्रून्पराजयते (अभिभवति)। वारणार्थानामीप्सितः (१-४-२७) प्रवृत्तिविघातो वार
वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। माषेभ्यो
निवर्तयति। ईप्सित इत्युक्तेनेह-यवेभ्यो गां वारयति क्षेत्रे। अत्र क्षेत्रं नेप्सितमपि तु यवा
क्षेत्रस्येप्सितत्वे तु भवति-क्षेत्राद्गां वारयति। अन्तर्धौ येनादर्शनमिच्छति (१-४-२८) व्यव
मन्तर्धिः। व्यवधाने सति येनादर्शनमात्मन इच्छति तदपादानं स्यात्। मातुर्निलीयते कृ
गुरोरन्तर्धत्ते बालः। अनन्तर्धाने तु न-चौरान् न दिदृक्षते। अदर्शनेच्छायां सत्यां सत्यपि
स्यादित्यर्थमिच्छतीत्युक्तम्। आख्यातोपयोगे (१-४-२९) आख्याता प्रतिपादयिता, उप
नियमपूर्वकं विद्याग्रहणम्। उपयोगे वाच्ये वक्ताऽपादानसंज्ञः स्यात्। उपाध्यायाद्वेदम
गुरोरागमयति विद्याम्। गुरोः पठति। उपयोग इत्युक्तेनेह नटस्य शृणोति शेषे षष्ठी। जनि
प्रकृतिः (१-४-३०) जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते। गोमयाद्वृश्चि
जायते। भुवः प्रभवः (१-४-३१) भवनं भूः, प्रभवत्यस्मादिति प्रभवः। भूकर्तुः प्रभवोऽ
स्यात्। हिमवतो गङ्गा प्रभवति (प्रकाशते)। कश्मीरेभ्यो वितस्ता प्रभवति (प्रथमत उपल
ल्यब्लोपे कर्मण्यधिकरणे च (वा) प्रासादात् (प्रासादमारुह्य) प्रेक्षते। आसनात् (आसनेउप
पश्यति। श्वशुरात् (श्वशुरंवीक्ष्य) जिह्रेति। गम्यमानापि क्रिया कारकविभक्तीनां नि
(वा) कस्मात्त्वं नद्याः (आगतः) कुतो भवान् नगरात् (आगतः)। करणे च स्तोकाल्पकृच्छ्
पयस्यासत्त्ववचनस्य (२-३-३३) एभ्योऽद्रव्यवाचिभ्यः करणे तृतीयापञ्चम्यौ स्तः। स्तोकेन
काद्वा मुक्तः। अल्पेन अल्पाद्वातिक्रान्तः। कृच्छ्रेण कृच्छ्राद्वा दृष्टः। कतिपयेन कतिपयाद्वा
अद्रव्यवाचिभ्य इत्युक्तेनेह स्तोकेन विषेण हतः। करण इत्युक्ते: क्रियाविशेषणत्वे द्वि
स्तोकं मुञ्चति।

वि॰ जुगुप्सा-विराम-प्रमाद-भय-त्राण-पराजय-वारणान्तर्धानो-पयोग-जनन-प्रभवेषु मुख्यविश्लेषाप्रतीतेर्जु
निवृत्तिनिःसरणादि पर्यवसायितया गौणविश्लेषप्रतीतावपि गौणमुख्यन्यायेनाग्राह्यत्वाद्ध्रुवमपाय इत्यप्राप्तौ तेषु
वचनानि, परं साधकतममित्यत्र तमब्ग्रहणेन कारकप्रकरणे गौणमुख्यन्यायानवतारस्य ज्ञापिततया जुगुप्सादिषु
त्तिपर्यवसानेन उपयोगजनप्रभवेषु क्रमणार्थतया निःसरणपर्यवसानेन च बुद्धिकृतगौणविश्लेषावधित्वाद्ध्रुवमपाय इ
सिद्धे रेतानि विध्यन्तराणि भाष्यकृता प्रत्याख्यातानि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगा :—धर्मान्न प्रमदितव्यम् । सत्यान्न प्रमदितव्यम् । न भीतो मरणादस्मि । विभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति । आतः पान्थ कुतो भवान्नगरतः । त्रायते महतो भयात् । युद्धाद्भीरुः पलायते । रक्षैनं भीमाद्दुःशासनम् । प्राणाद्वायुरजायत । सङ्गात्सञ्जायते कामः । वनादुपस्थितोऽस्मि । विरम्यतामतिप्रसङ्गात् । लोभात् क्रोधः प्रभवति । अशिक्षितास्त्रं पितुरेव मन्त्रवित् । आपणादागतोऽस्मि ।

सम्बन्धोपपदपञ्चमी—यतश्चाध्वकालनिर्माणं ततः पञ्चमी तद्युक्तादध्वनः प्रथमासप्तम्यौ, कालात्सप्तमी च वक्तव्या (वा) वनाद्ग्रामो योजनं योजने वा । कार्तिक्या आग्रहायणी मासे । नगराद्वनं क्रोशः क्रोशे वा । अमायाः पूर्णिमा पक्षे, अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते (२-३-२९) दिग्वाचकत्वेन दृष्टः शब्दो दिक्छब्दः । आजाहि प्रत्ययान्तौ । अन्यादिभिर्योगे पञ्चमी स्यात् । अन्येत्यर्थग्रहणम्, इतरग्रहणं प्रपञ्चार्थम् । अन्यो भिन्न इतरो वा ग्रामात् । चैत्रादन्यः । तस्मान्नार्थान्तरम् । अस्माद्विलक्षणः । निपातानां द्योतकतया नञोऽन्यवाचकत्वाभावान्नेह ग्रहणम्, तेन नेह-घटो न पटः । आरात् (दूरेऽन्तिके वा) वनात् । देवदत्तादृते (वर्जयित्वा) । पूर्वो ग्रामात् । गृहादुत्तरतः । पूर्वो ग्रीष्माद्वसन्तः । उत्तरो ग्रीष्मो वसन्तात् । प्राग्ग्रामात् । प्रत्यग्गृहात् । उदङ् नगरात् । अवाक्कूपात् । दक्षिणा उत्तरा वा वनात् । दक्षिणाहि उत्तराहि वा ग्रामात् । कार्तिक्याः प्रभृतीति भाष्यप्रयोगात्प्रभृत्यर्थयोगेपि पञ्चमी । भवात्प्रभृति आरभ्य वा सेव्यो हरिः । नगरात्प्रभृति । प्रथमपाठादारभ्य । अपपरिबहिरञ्चवः पञ्चम्येति समासविधानाज्ज्ञापकाद्बहिर्योगेपि पञ्चमी । ग्रामाद्बहिः । गृहाद्बहिः । तस्माद्बहिर्भूतः ।

वि. इदानीं कालवाचकत्वेपि अन्यत्र दिग्वाचकत्वेन दृष्टस्य पूर्वादिशब्दस्यापि ग्रहणार्थं दिशि दृष्टः शब्दो दिक्छब्दः इति व्याख्यातम् । तेन पूर्वो ग्रीष्माद्वसन्त इत्यादेरपि सिद्धिः । दिशि दृष्टत्वं च रूढ्या दिग्विशेषवाचिनः पूर्वादिशब्दस्यैवेह ग्राह्यं, तेन ऐन्द्र्यादीनां यौगिकानां दिक्सामान्यवाचिनां ककुबादीनां चात्राग्रहणान्न तद्योगे पञ्चमी । अन्यादीनामवधिमत्त्वेपि संयोगविश्लेषाभावेनापादानत्वाभावादप्राप्तौ पञ्चमीविधानम् । फलति पुरुषाराधनमृते इति ऋतेशब्दयोगे द्वितीयाप्रयोगस्तु प्रामादिक इति हरदत्तः । ततोन्यत्रापि दृश्यते इत्युक्तेश्चैत्रं यावच्छीतमित्यादौ यावच्छब्दयोग इव ऋतेशब्दयोगेपि क्वचिद्द्वितीया साध्वीत्यन्ये । ऋते द्वितीया चेति चान्द्रसूत्रमप्यत्रानुकूलम् । कार्तिक्या आग्रहायणी मासे इत्यत्रान्तर्गतप्रभृत्यर्थमादाय पञ्चम्युपपत्तेर्यतश्चाध्वकालनिर्माणमिति वार्तिकं भाष्यकृता प्रत्याख्यातम् । आरभ्येत्यस्य योगे आरम्भक्रियायाः कर्मत्वविवक्षायां तु कारकविभक्तेर्बलीयस्त्वाद्द्वितीयैव । तेन सूर्योदयमारभ्य आऽस्तमयाज्जपतीत्यादेः सिद्धिः । एवं च आरभ्येत्यस्य प्रभृतिशब्दस्येव अवधिं परिगृह्येत्यर्थकत्वे तद्योगजा पञ्चमी, आरम्भक्रियाबोधकत्वे कर्मत्वे द्वितीयेति विवेकः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपपरी वर्जने (१-४-८८) एतौ वर्जने कर्मप्रवचनीयौ स्तः। आङ् मर्यादावचने (१-४-८९) मर्यादायामाङ् कर्मप्रवचनीयसंज्ञः स्यात्। वचनग्रहणादभिविधावपि। प्रतिः प्रतिनिधिप्रतिदानयोः (१-४-९२) एतयोरर्थयोः प्रतिः कर्मप्रवचनीयसंज्ञः स्यात्। इति कर्मप्रवचनीयत्वे, पञ्चम्यपाङ्परिभिः (२-३-१०) एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। द्वितीयापवादः। अप हरेः परि हरेः (हरिं वर्जयित्वा) संसारः। लक्षणादौ तु द्वितीयोक्ता। आ मुक्तेः (मुक्तिं मर्यादीकृत्य) संसारः। आ सकलात् (सकलमभिव्याप्य) ब्रह्म। आ गृहात्। आवनात्। प्रतिनिधिप्रतिदाने च यस्मात् (२-३-११) मुख्यसदृशः प्रतिनिधिः, दत्तस्य प्रतिनिर्यातनं प्रतिदानम्। प्रतिनिधिः प्रतिदानं च यस्मात्तत्र कर्मप्रवचनीययुक्ते पञ्चमी स्यात्। प्रद्युम्नः कृष्णात्प्रति (कृष्णस्य प्रतिनिधिः)। तिलेभ्यः प्रतियच्छति (प्रतिददाति) माषान्।

वि. तेन विनेतिमर्यादा, तेनसहेत्यभिविधिः। यस्मादिति षष्ठ्यर्थे पञ्चमी। अस्मादेव निर्देशाल्लिङ्गादाभ्यां पञ्चमी। ज्ञापकसिद्धं न सर्वत्रेति कृष्णस्य प्रतिनिधिरित्यप्युपपद्यते, करस्य करभो बहिरप्युपपद्यते।

अकर्तर्यृणे पञ्चमी (२-३-२४) हेतावित्यनुवर्तते। कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात्। हेतौ तृतीयाया अपवादः। शताद्बद्धः सहस्राद्बद्धः। (शतेन सहस्रेण ऋणेन हेतुना बद्धः)। अकर्तरीत्युक्तेर्नेह-शतेन बन्धितः। (शतऋणेन प्रयोजककर्त्रा उत्तमर्णेन प्रयोज्येन बन्धनं कारितोऽधमर्णः)। विभाषा गुणेऽस्त्रियाम् (२-३-२५) गुणे हेतावस्त्रीलिङ्गे पञ्चमी स्यात्। पक्षे तृतीया। जाड्याज्जाड्येन वा बद्धः। पाण्डित्यात्पाण्डित्येन वा मुक्तः। गुण इति किम्? नेह-धनेन कुलम्। अस्त्रियामित्युक्तेर्नेह-बुद्ध्या मुक्तः। भीत्या पलायितः। विभाषेति योगविभागादगुणे स्त्रियां च क्वचित्पञ्चमी। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः। पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् (२-३-३२) एभिर्योगे तृतीया स्यात्पञ्चमीद्वितीये च। अन्यतरस्यांग्रहणं समुच्चयार्थं, पञ्चमीद्वितीये चानुवर्तेते। पृथग्रामेण रामाद्रामं वा। विना धनेन धनाद्धनं वा। नाना (विना) तेन तस्मात्तं वा। दूरान्तिकार्थेभ्यो द्वितीया च (२-३-३५) एभ्यस्तृतीया पञ्चमीद्वितीये च। प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरात् दूरं दूरेण वा। अन्तिकादन्तिकमन्तिकेन वा। असत्त्ववचनस्येत्यनुवृत्तेर्नेह-दूरः पन्थाः।

प्रयोगाः—परैस्त्वदन्यः क इवापहारयेत्। येन विना यदनुपपन्नं तत्तेनाक्षिप्यते। खलैर्विभात्येषा। आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्। दारिद्र्याद्ध्रियमेति। विद्याति पात्रताम्। गृहाद्दूरेऽस्ति विपणिः। त्वत्तः पृथङ् नास्ति मे बन्धुः। ग्रामादुदक्... शैशवात्प्रभृति पोषितां प्रियाम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारकषष्ठी—कर्तृकर्मणोः कृति (२-३-६५) कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कर्तरि कृष्णस्य कृतिः। बालकस्य शयनम्। भवतः शायिका। राज्ञस्त्यागः। मम लेखः। कर्मणि-जगतः कर्ता। तण्डुलानां पाकः। काव्यस्याध्ययनम्। पुत्रस्य स्नेहः। गुणकर्मणि वेष्यते (वा) नेताश्वस्य स्रुघ्नस्य स्रुघ्नं वा। गोः पयसो दोहः गां वा। उभयप्राप्तौ कर्मणि (२-३-६६) उभयोः (कर्तरिकर्मणि च) प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। कर्तर्यनुक्ते तृतीया। रोचते मे मोदकस्य भक्षणं मित्रेण। साधु पयसः पानं त्वया। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः (वा) स्त्रियां क्तिन्नित्यधिकारविहितयोरकाकारप्रत्यययोः प्रयोगे कर्मण्येव षष्ठीति नियमो न, तेन कर्तर्यपि षष्ठीत्यर्थः। भेदिका बिभित्सा वा रुद्रस्य जगतः। हरेर्जिहीर्षा दुःखस्य। चिकीर्षा चैत्रस्य कटस्य। शेषे विभाषा (वा) स्त्रीप्रत्यय इत्येके। अकाकाराभ्यामन्यत्र स्त्रियां क्तिन्नादौ कर्तरि षष्ठी नेति नियमो विकल्पेनेत्यर्थः। तेन कर्तर्येव षष्ठीविकल्पः, कर्मणि तु नित्यमेव। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। तेनाऽस्त्रियामपि कर्तरि षष्ठीविकल्पः। शब्दानामनुशासनमाचार्येण आचार्यस्य वा। क्तस्य च वर्तमाने (२-३-६७) वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। नलोकेतिनिषेधस्यापवादः। राज्ञां मतो बुद्धः पूजितो वा। सतां मतः। अधिकरणवाचिनश्च (२-३-६८) अधिकरणवाचिनः क्तस्य योगे षष्ठी स्यात्। नलोकेति निषेधापवादः। इदमेषामासितम्। इदमेषां शयितम्। कृत्यानां कर्तरि वा (२-३-७१) कृत्यानां कर्तरि षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। भवता भवतो वा कटः करणीयः।

वि. १ कर्तृकर्मणोः कृतीत्यत्र कृतीत्यनुक्तावपि आख्यातस्थले लादेशत्वेन नलोकेति निषेधेन तिङ्व्यावृत्तेः, शतेन क्रीतः शत्य इत्यादितद्धितस्थले तद्धितोक्तत्वादेव षष्ठ्यप्राप्त्या तद्धितव्यावृत्तेश्च परिशेषात्कृतावेव पर्यवसानं सम्भवति, परं कटः पूर्वं कृतोनेन ओदनः पूर्वं भुक्तोनेनेत्यर्थे पूर्वादिनिः सपूर्वाच्चेति इनिप्रत्यये तद्धिते सति कृतपूर्वी कटं भुक्तपूर्वी ओदनमित्यादौ कटस्य करणक्रियायामोदनस्य भोजनक्रियायामनुक्तकर्मतया तद्धिताधिक्येपि षष्ठ्यापत्तेर्वारणाय कृतीत्यावश्यकम्, तदुक्तौ कृद्ग्रहणसामर्थ्येन वृत्त्यनन्तर्गतकृद्योगस्यात्र विवक्षणान्नेह षष्ठीप्रसङ्गः।

वि. २ उभयोः प्राप्तिरिति तत्पुरुषं परित्यज्य उभयोः प्राप्तिर्यस्मिन्कृतीति बहुव्रीह्याश्रयेण कर्तृकर्मणोर्द्वयोरेककृत्सम्बन्धित्व एवायं कर्मण्येव षष्ठीति नियमो नतु कृद्भेदे। तेन आश्चर्यमिदमोदनस्य पाको ब्राह्मणानां च प्रादुर्भाव इत्यादौ विभिन्नकृत्कर्तृकर्मणोरुभयोरपि षष्ठी। उभयप्राप्तौ कर्मणि षष्ठ्यां कर्मणि चेति षष्ठीसमासो निषिद्ध्यते। तेन अगोपेन गवां दोहः, आचार्येण शब्दानामनुशासनमित्यादौ गोदोहः शब्दानुशासनमिति षष्ठीसमासो न भवति। कर्तुः कर्मणो वा एकस्यैव प्रयोगे तु उभयप्राप्त्यभावेन कर्मणीति नियमाप्रवृत्तेः षष्ठी तत्समासोपि भवति। गोपस्य दोहो गोपदोहः, गवां दोहो गोदोहः, आचार्यस्यानुशासनमाचार्यानुशासनं, शब्दानामनुशासनं शब्दानुशासनमित्यादि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ३ क्तस्य च वर्तमान इति मतिबुद्धीति विहिते वर्तमानक्त एव षष्ठ्याः प्रतिप्रसवेन पूजितो यः सुरासुरैः, ज्ञातो घट इत्यादौ भूते क्ते नलोकेति निषेधात्तृतीया। अत्र नपुंसके भावे क्तस्योपसंख्यानमिति वार्ति… तेन छात्रस्य हसितं, बालस्य रुदितं, कोकिलानां व्याहृतमित्यादि। परं शेषविज्ञानात्सिद्धमिति कर्माद्यविवक्षायां षष्ठ्या गतार्थत्वाद्वार्तिकं नावश्यकमिति भाष्ये प्रत्याख्यातम्।

वि. ४ कृत्यानां कर्तरिवेत्यत्र कृत्यानामिति योगविभागेन तत्र उभयप्राप्ताविति नेति चानुवर्त्य कृत्यानामुभ… कर्तरि न षष्ठीति निषेधः, शेषभागेन कृत्यानां कर्तरि वेति षष्ठीविकल्पो विधीयते, ततश्चानुभयप्राप्तिस्थले नि… पर्यवस्यति, नतूभयप्राप्तौ। तेनोभयप्राप्तौ नेतव्या व्रजं गावः कृष्णेन, अनुभयप्राप्तौ मया मम वा सेव्यो हरिः।

न लोकाव्ययनिष्ठाखलर्थतृनाम् (२-३-६९) एषां प्रयोगे षष्ठी न स्यात्। ल इति तदादे… शतृशानच्कानच्क्वस्वादीनां ग्रहः। कर्तृकर्मणोरिति षष्ठीप्राप्तौ निषेधः। ल-ओदनं पचन् पच… वा। कुर्वन् कुर्वाणो वा सृष्टिं हरिः। ओदनं पेचिवान्। उ-कटं चिकीर्षुः। धनं लिप्सुः। ओ… बुभुक्षुः। उ-इत्युकारान्त इष्णुच्प्रत्ययोऽपि गृह्यते। कन्यामलङ्करिष्णुः। दिवमुत्पति… उक—दैत्यान्घातुको हरिः। कमेरनिषेधः (वा) लक्ष्म्याः कामुको हरिः। अव्ययं-जगत्… कार्यं कृत्वा। दण्डमादाय। कार्यं कर्तुम्। धनं दातुम्। नामं नामं घनश्यामम्। गुरुं ध्यायं ध्या… निष्ठा—(क्तक्तवतू)- विष्णुना हता दैत्याः। तेन कृतम्। कार्यं कृतवान्। दैत्यान्हतवान्। ख… ईषत्करः प्रपञ्चो हरिणा, दुष्करमिदमनेन। तृन्निति शतृशानचाविति तृशब्दादारभ्य तृनो न… पर्यन्तं प्रत्ययानां प्रत्याहारः। शानन्—सोमं पवमानः। चानश्—आत्मानं मण्डयमानः। शतृ-वेद… यन्। तृन्—कर्ता (करणशीलः) लोकान्। धनं दाता। द्विषः शतुर्वा (वा) मुरस्य मुरं वा द्वि… सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जि…

अकेनोर्भविष्यदाधमर्ण्ययोः (२-३-७०) भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी… स्यात्। सतः पालकोऽवतरति। व्रजं गामी। शतं दायी।

वि. करणादिकारकान्तरेषु आख्यातक्रियायाः कृदन्तक्रियायाश्च न विशेषः। यथा शस्त्रेण छिनत्ति, छेदनं, … छिन्नो वा। दीनाय ददाति, दानं, दत्वा, दाता, दातुं वा। वृक्षात्पतति, पतनं, पतितः, पतित्वा वा। … शेते शयनं शयितः शयित्वा वा। कर्तृकर्मणोस्तु कृदन्तक्रियायां लोकाव्ययादिवर्जं षष्ठी, उभयोः प्राप्तौ कर्मणे… कृत्यानां कर्तरि वा षष्ठीति विधिनिषेधप्रतिप्रसवा अनुसन्धेयाः।

दिवस्तदर्थस्य (२-३-५८) द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्… शतस्य (शतं) दीव्यति, सहस्रस्य दीव्यति। **विभाषोपसर्गे (२-३-५९)** द्यूतक्रयविक्रयव्यव… र्थस्य सोपसर्गस्य दिवः कर्मणि षष्ठी वा स्यात्। शतस्य शतं वा प्रतिदीव्यति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—रामस्य दर्शनं पुण्यम्। संमानयिता बुधान्। आहर्ता क्रतूनाम्। न वञ्चनीयाः प्रभवोऽनुजीविभिः। क्रियाभिमां कालिदासस्य। शास्त्राणामभ्यासः। वेदमधीत्य स्नायात्। जिगमिषुस्तपनो दिशमुत्तराम्। बालानां रोदनं श्रुत्वा। यियक्ष्यमाणेनाहूतः पार्थेनाथ मुरं द्विषन्। कार्यं विधित्सुः सहसा।

कारकेषु शेषषष्ठी—ज्ञोऽविदर्थस्य करणे (२-३-५१) जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानम् (सर्पिषः करणस्य सम्बन्धि ज्ञानम्) मधुनो जानीते। अधीगर्थदयेशां कर्मणि (२-३-५२) एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणम्। मातुः स्मरति। पितुर्दयते। जगत ईष्टे। कृञः प्रतियत्ने (२-३-५३) प्रतियत्नो गुणाधानम्। कृञः कर्मणि शेषे षष्ठी स्याद्गुणाधाने। एधो दकस्योपस्कुरुते (गुणमाधत्ते)। कृत्वोर्थप्रयोगे कालेधिकरणे (२-३-६४) कृत्वोर्थानां प्रयोगे कालेऽधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोऽह्नो भोजनम्। मासस्य द्विरध्ययनम्। पक्षस्य त्रिरधीते। कर्मादीनामपि सम्बन्धमात्रविवक्षायां शेषे षष्ठी। मातुः स्मरति। सतां गतम्। फलानां तृप्तः। भजे शम्भोश्चरणयोः।

वि. १ रुजार्थानां भाववचनानामज्वरेः (२-३-५४) भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चौरस्य रोगस्य रुजा (रोगकर्तृका कर्मभूता चौरसम्बन्धिनी तापादिपीडा)। अज्वरिसन्ताप्योरिति [illegible]न्यम् (वा) तेनेह न-रोगस्य चौरज्वरः, चौरसन्तापो वा। आशिषि नाथः (२-३-५५) आशीरर्थस्य नाथतेः कर्मणि शेषे षष्ठी स्यात्। सर्पिषो नाथनम् (आशीः)। जासिनिप्रहणनाटक्राथपिषां हिंसायाम् (२-३-५६) हिंसार्थानामेषां कर्मणि शेषे षष्ठी स्यात्। चौरस्योज्जासनम् (हिंसनम्)। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य [illegible]हननं प्रहननं, निप्रहननं, प्रणिहननं वा। चौरस्योन्नाटनं, क्राथनं, पेषणं वा। व्यवहृपणोः समर्थयोः (२-३-५७) [illegible]मानार्थयोरेतयोः शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयरूपव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणं पणनं वा।

वि. २. वस्तुतः कर्मकरणादिरूपाणामपि कारकाणां कर्मत्वादिविशेषस्याविवक्षया क्रियायां सम्बन्धसामान्यरूपस्य [illegible]पलस्य विवक्षायामिमानि षष्ठीविधानानि, एष्वपि षष्ठीशेष इत्यनेनैव सिद्धौ ज्ञोविदर्थस्येत्यादिना पुनर्विधानं तु प्रतिपद[illegible]विधाना षष्ठी न समस्यत इत्यसमासार्थम्। तेन धात्वादिशब्दविशेषोल्लेखेन विहितायाः षष्ठ्याः पदान्तरेण सह न समासः [illegible]षष्ठीति विहितायास्तु समासो भवत्येव। उक्तं च हरिणा—"कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः। प्रोक्ता प्रतिपदं [illegible]ष्ठी समासस्य निबन्धनम्"।

प्रयोगाः—निजौजसोज्जासयितुं जगद्द्रुहाम्। अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा। शम्भुस्त्रयाणां लोकानामीष्टे। अनुकरोति भगवतो नारायणस्य। अर्थानामीशिषे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वं वयमपि च गिरामीश्महे यावदर्थम्। स्मरसि वा तस्य प्रदेशस्य। अस्मार्षीज्जलनिधिमन्थनस्य शौरिः। मातुः स्मरति बालकः।

सम्बन्धोपपदषष्ठी—षष्ठी शेषे (२-३-५०) कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादि सम्बन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः। गोर्दुग्धम्। वृक्षस्य पत्राणि। चैत्रस्य पुत्रः। पञ्चालानां राजा। मित्रस्य पत्नी। गुरोर्गृहम्।

वि. उक्तादन्यः शेषः। कर्मत्वादयः सम्बन्धविशेषाः प्रातिपदिकार्थश्चोक्ताः, तेभ्योन्यः स्वस्वामिभावादिः सम्बन्धः शेषः। स च सामान्यरूपोपि न निर्विशेषं सामान्यमिति न्यायेन स्वस्वामिभावादिसम्बन्धविशेषे पर्यवस्यति। मातुः स्मरतीत्यादौ सम्बन्धस्य कर्मत्वादिविशेषरूपत्वे द्वितीयादिप्रसङ्गात्षष्ठ्या सामान्यात्मना सम्बन्धः प्रत्याय्यते। स च सामान्यसम्बन्धो राज्ञः पुरुष इत्यादौ स्वस्वामिभावरूपः, वृक्षस्य पत्रमित्यादौ अवयवावयविभावरूपः, चैत्रस्य पुत्र इत्यादौ जन्यजनकभावरूपः, सुवर्णस्य कुण्डलमित्यादौ प्रकृतिविकृतिभावरूपः। एवंरीत्या यथास्थलं विशेषात्मकः पर्यवस्यति। आश्रयत्वादिकं संसर्गमर्यादया भासते। राज्ञः पुरुष इत्यत्र राज्ञ आश्रयत्वेन षष्ठ्यर्थे सम्बन्धे, तस्याश्रयः पुरुषेऽन्वयाद्राजवृत्तिस्वामित्वनिरूपितस्वत्वाश्रयः पुरुष इति बोधः। विशेषणीभूतादप्रधानादेव षष्ठी न तु विशेष्यभूतात्प्रधानात्। पुरुषस्य राजनि विशेषणत्वे तु पुरुषाणां राजा पुरुषवृत्तिस्वत्वनिरूपितस्वामित्वाश्रयो राजेति बोधः। स्वस्वामिभावादयस्तु नाखण्डाः सम्बन्धाः किन्तु स्वत्वं स्वामित्वं च मिलितं स्वस्वामिभावः, स्वत्वस्वामित्वयोः परस्परं निरूप्यनिरूपकभावः। तेन राज्ञःपुरुष इत्यत्र स्वामित्वनिरूपितस्वत्वं, पुरुषस्य राजेत्यत्र स्वत्वनिरूपितस्वामित्वं षष्ठ्यर्थः। एवं चैत्रस्य पुत्र इत्यत्र चैत्रवृत्तिजनकत्वनिरूपितजन्यत्वाश्रयः पुत्र इति, मैत्रस्य पितेत्यत्र मैत्रवृत्तिजन्यत्वनिरूपितजनकत्वाश्रयः पितेति, वृक्षस्य पत्रमित्यत्र वृक्षवृत्त्यवयवित्वनिरूपितावयवत्वाश्रयः पत्रमिति, पुष्पस्य वृक्ष इत्यत्र पुष्पवृत्त्यवयवत्वनिरूपितावयवित्वाश्रयो वृक्ष इत्यर्थः। एवमन्यत्राप्यूह्यम्। एवं विष्णोः कथेत्यत्र प्रतिपाद्यप्रतिपादकभावः, घटस्य ज्ञानमित्यत्र विषयविषयिभावः, घृतस्य पात्रमित्यादौ आधाराधेयभाव इत्यादयः सम्बन्धविशेषा ऊह्याः। कर्मादीनामपि विवक्षापि शेषः, सतोप्यविवक्षा भवतीति भाष्योक्तेः, तेन तेष्वपि सम्बन्धसामान्ये षष्ठी। अतश्च मातरं स्मरतीत्यत्र मातृकर्मकस्मरणस्य, मातुः स्मरतीत्यत्र मातृसम्बन्धिस्मरणस्य बोधः। एवमन्यत्र। सन्तो गच्छन्ति सन्तो दृश्यन्त इत्यत्र व्याख्यातेन कर्तृत्वकर्मत्वयोः सम्बन्धविशेषयोरुक्तत्वेन सम्बन्धसामान्यविवक्षायाः कर्तुमशक्यतया न षष्ठी, किन्तु प्रातिपदिकार्थे प्रथमैवेत्यलम्।

षष्ठी हेतुप्रयोगे (२-३-२६) हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति। धनस्य हेतोः प्रोषितः। सर्वनाम्नस्तृतीया च (२-३-२७) सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात्षष्ठी च। केन हेतुना कस्य हेतोर्वा वसति। अस्य हेतोः अनेन हेतुना वा गच्छति। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् (वा) किं निमित्तं, केन निमित्तेन, कस्मै निमित्ताय, कस्मान्निमित्तात्, कस्य निमित्तस्य, कस्मिन्निमित्ते वा गतः। एवं किं कारणं, केन कारणेन,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हेतुः, केन हेतुना, किं प्रयोजनं; केन प्रयोजनेनेत्यादि । प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः ज्ञानेन निमित्तेन ज्ञानाय निमित्ताय वा हरिः सेव्यः ।

वि. निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनमिति वार्तिकस्यावश्यकतयाऽनेनैव षष्ठीहेतुप्रयोगे सर्वनाम्नस्तृतीयाचेति द्वयं गतार्थम् । प्रायग्रहणेन विवक्षितविभक्तिसिद्धेः ।

षष्ठ्यतसर्थप्रत्ययेन (२-३-३०) अतसुजर्थप्रत्ययान्तेन योगे षष्ठी स्यात् । दिक्छब्देतिपञ्चम्या अपवादः । ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात् । एनपा द्वितीया (२-३-३१) एनबन्तेन योगे द्वितीया स्यात् । एनपेति योगविभागात्षष्ठ्यपि । दक्षिणेन ग्रामं ग्रामस्य वा । अधरेण नगरं नगरस्य वा । उत्तरेण वनं वनस्य वा । दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (२-३-३४) एतैर्योगे षष्ठी स्यात्पञ्चमी च । दूरं विप्रकृष्टं वा ग्रामाद् ग्रामस्य वा । अन्तिकं समीपं सन्निकृष्टम् अभ्यासं वा नगरान्नगरस्य वा । तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् (२-३-७२) तुलोपमावर्जं तुल्यार्थैर्योगे तृतीया वा स्यात् । पक्षे षष्ठी । तुल्यः समः सदृशो वा कृष्णस्य कृष्णेन वा । पृथिव्याः पृथिव्या वा समः । तुलोपमयोर्योगे तु षष्ठ्येव । तुला उपमा वा कृष्णस्य नास्ति । चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः (२-३-७३) एतदर्थैर्योगे चतुर्थी वा स्यात्पक्षे षष्ठी आशिषि । आयुष्यं चिरजीवितं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा कृष्णाय कृष्णस्य वा भूयात् । व्याख्यानात्सर्वत्रार्थग्रहणम् ।

वि. ततः पश्चात्स्रंसते इति भाष्यप्रयोगात्पश्चाच्छब्दप्रयोगे षष्ठीवत्पञ्चम्यपि साधुः । एनबन्तेन योगे द्वितीयाषष्ठ्योर्विधानेन तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमित्यत्र उत्तरेण तोरणेनेति समानाधिकरणतृतीयान्तं नत्वेनबन्तकम्, उत्तरेणेति दिक्छब्दयोगे गृहादिति पञ्चम्युपपादनीयेत्याहुः । धनपतिगृहादुत्तरेणेति पाठे त्वेनबन्तमनुसन्धेयम् । ...वचननिर्देशादेव पर्यायग्रहणे सिद्धे तुल्यार्थैरित्यर्थग्रहणं पदान्तरनैरपेक्ष्येण ये तुल्यार्थास्तेषां ग्रहणार्थम्, तेन गौरिव ... इत्यादौ नेत्याहुः । अतुलोपमाभ्यामित्युक्तेः तुलां यदारोहति दन्तवाससा इति कालिदासस्य, स्फुटोपमं भूतिसितेन शम्भुनेति माघस्य प्रयोगश्च सहयुक्तेऽप्रधाने विनापि तद्योगं तृतीयेति सहार्थतृतीययोपपादनीयः । हितयोगे, ...योगे चेति चतुर्थ्या अनाशिषि चरितार्थतया आशिष्ययं षष्ठीचतुर्थीविकल्पविधिः । आयुष्यादिपदानां तदर्थपरत्वं तथैव व्याख्यानात्, न तु स्वंरूपमिति न्यायेन तच्छब्दस्वरूपमात्रपरत्वम् । उक्तं च—व्याख्यानतो विशेषप्रतिपत्तिरिति ।

प्रयोगाः—दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते । अर्थस्य पुरुषो दासः, । सदृशमेवैतत्स्नेहस्यानवलेपस्य । अल्पस्य हेतोर्बहु हातुमिच्छन् । विस्मृतं कस्य हेतोः । मनुष्याणामयं धर्मः । मासस्य हिरण्यपने को लाभः । धनदेन समस्त्यागे । केनार्थेनेदमुक्तम् । अयुतं शरदां ययौ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारकसप्तमी—आधारोऽधिकरणम् (१-४-४५) कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारोऽधिकरण संज्ञः स्यात्। **सप्तम्यधिकरणे च (२-३-३६)** अधिकरणकारके सप्तमी स्यात्, चकाराद्दूरान्ति कार्थेभ्यः। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्माऽस्ति। एवं-वने शय्यायां शेते। ग्रामे वर्तते। लतासु पुष्पाणि विकसितानि। देवेषु भक्तिः। रात्रि प्रेम। स्नेहः। दूरान्तिकार्थेभ्यस्तु द्वितीयाचेति द्वितीया तृतीया-पञ्चमीनामपि विधानाद सप्त सह चतस्रो विभक्तयः। वनस्य दूरं दूरेण दूराद् दूरे वा। नगरस्यान्तिकमन्तिकेन अन्तिकादन्ति वा। एवं विप्रकृष्टसमीपासन्नादिषु। **क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् (वा)** अधीतमनेने इष्टादिभ्यश्चेति कर्तरीनौ अधीती व्याकरणे। परिगणिती याज्ञिके। आम्नाती छन्द **नक्षत्रे च लुपि (२-३-४५)** नक्षत्रे प्रकृत्यर्थे लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थे वर्तमानात्सप्त चकारात्तृतीयापि स्यादधिकरणे। मूलेन मूले वा (मूलनक्षत्रयुक्ते काले) देवीमावाहयेत्। श्र श्रवणे वा (श्रवणयुक्तकाले) देवीं विसर्जयेत्। नक्षत्रेण युक्तः काल इत्यणि लुबविशेषे लुप्। लुपीत्युक्तेर्नेह-पुष्ये शनिः। अधिकरण इत्युक्तेर्नेह-मूलं प्रतीक्षते, मूलाय स्पृह **सप्तमीपञ्चम्यौ कारकमध्ये (२-३-७)** शक्ति (कारक) द्वयमध्ये यौ कालाध्वानौ ताभ्यां सप्त पञ्चम्यौ स्तः। सामीपिकाधिकरणे सप्तम्यामेव प्राप्तायां विभक्तिद्वयार्थं वचनम्। अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येयं कालः। इहस्थोयं क्रोशे क्रोशाद्वा लक्ष्यं विध्ये कर्तृकर्मशक्त्योर्मध्येयं देशः।

वि. १ आध्रियतेऽस्मिन्क्रियेत्याधारः क्रियाधारः क्रिया तु फलव्यापारोभयरूपा। कर्तृकर्मणोः साक्षात्क्रियाधार कर्तृकर्मसंज्ञयैव बाधान्नाधिकरणत्वमिति कर्तृद्वारा कटादेः कर्मद्वारा स्थाल्यादेः क्रियाधारत्वं न साक्षादतः क्रिया धारत्वेन परम्परया क्रियाधारत्वमधिकरणस्येत्यत उक्तं कर्तृकर्मद्वारेति। क्वचित्कर्त्राधारत्वेन क्वचित्कर्माधार क्रियाधारत्वमधिकरणस्य। अधिकरणं त्रिविधम्। एकदेशमात्रस्याधारत्वे औपश्लेषिकम्, यथा कटे आस्ते, मुपविशति, भाण्डे स्थापय। सर्वांशव्याप्याधारत्वे औपश्लेषिकम्, यथा दध्नि घृतं वर्तते, तिलेषु तैलमस्ति, सर्वस्मि विद्यते। ज्ञानेच्छाकृतिरूपसविषयकक्रियाया विषयत्वेनाधारत्वे वैषयिकम्, यथा मोक्षे इच्छास्ति, विद्यायां यतते, प्रवर्तते। उपश्लेषः संयोगादिः, वस्तुतः सामीप्यम्, तेन गङ्गायां (गङ्गासमीपे) घोषः, कूपे (कूपसमीपे) कुलमित्यादेः सङ्ग्रहः,। शब्दस्य शब्दान्तरेण सह सम्बन्धोप्युपश्लेषः, तेन इकोयणचीत्यत्र अजुपश्लिष्टस्येक इ कालस्याप्यौपश्लैषिकमधिकरणत्वम्। अभिव्यापकमधिकरणं मुख्यमौपश्लेषिकं वैषयिकं च गौणमिति भाष्यकृतो क्वचित्क्रियाया अदर्शनेप्यन्तर्गतक्रियामादायाधिकरणे सप्तमी, यथा विपदि (कर्तव्यं) धैर्यमथाभ्युदये (धार्या) क्षमा।

वि. २ अद्य भुक्त्वेत्यादौ अद्यतनभोजनकर्तृत्वस्य द्व्यहोत्तरभोजनकर्तृत्वस्य च मध्येयं कालः, क्त्वा कर्त्रैक्ये विधानात्। इहस्थोयमित्यादौ स्थितिक्रियाकर्तृत्वस्य लक्ष्यवेधनकर्मत्वस्य च मध्ये देशः क्रोशः।

Jayatu Sanskritam, Kathmandu, Nepal

प्रयोगा :—वाञ्छा सज्जनसङ्गमे गुणिगणे प्रीतिर्गुरौ नम्रता। विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च। राजद्वारे दन्तिनः सञ्चरन्ति। मासे मासे नवश्चन्द्रः, अधीती चतुर्ष्वाम्नायेषु। नैतन्मनसि वर्तते। जले विष्णुः स्थले विष्णुः। युद्धे प्रवर्तते शूरः। निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः। क्रीडन्ति प्राङ्गणे बालाः।

सम्बन्धोपपदसप्तमी–साध्वसाधुप्रयोगे च (वा) साधुः कृष्णो मातरि असाधुर्मातुले। निमित्तात्कर्मयोगे (वा) निमित्तमिह फलं, योगः संयोगसमवायरूपः। चर्मणि (चर्मार्थं) द्वीपिनं हन्ति, दन्तयो (दन्तार्थं) र्हन्ति कुञ्जरम्।, केशेषु (केशार्थं) चमरीं हन्ति, सीम्नि (मुष्कार्थं) पुष्कलको (गन्धमृगः) हतः। हेतुतृतीयापवादः। यस्य च भावेन भावलक्षणम् (२-३-३७) यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। शेषषष्ठ्यपवादः। गोषु दुह्यमानासु गतः। गोदोहनक्रियाकालेन गमनक्रियाकालो लक्ष्यते। अग्निषु हूयमानेष्वागतः। सूर्ये उदिते निरगात्। अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च (वा) सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति। षष्ठी चानादरे (२-३-३८) अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः। रुदति परिजने रुदतो वा परिजनस्य प्राव्राजीत्। (रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवान्)। मयि पश्यति मम पश्यतो वा सोऽपाहरत् (पश्यन्तं मामनादृत्यापाहरत्)।

वि. १ भावलक्षणं नाम निर्ज्ञातकाला क्रिया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणम्। यथाहि ज्ञातकाला गोदोहनक्रिया अज्ञातकालाया गमनक्रियायाः कालपरिच्छेदकतया लक्षणमिति लक्षणक्रियाबोधके गोशब्दे दोहनार्थे क्रियाशब्देपि भावलक्षणसप्तमी। इयमेव लक्षणे सप्तमी। दुह्यमानासु सतीष्विति बोधनात्सति सप्तमी-त्युच्यते। लक्षणाक्रियाया वर्तमानत्वातीतत्वभविष्यत्त्वानुसारेण दुह्यमानासु दुग्धासु धोक्ष्यमाणासु गोष्विति प्रयोगः सम्भवति। अत्र क्रियायाः साक्षात्तदाश्रयद्रव्यस्य तु तद्द्वारैव लक्षणतया क्रियाबोधकविशेषणस्य विधेयविशेषणतया विशेष्यात्पश्चात्प्रयोग औत्सर्गिकः। प्रयोगवैपरीत्यदर्शनेपि विशेषणं पश्चाद्योजनीयम्। उद्देश्यविशेषणत्वे तु न सति-सप्तमी; किन्त्वधिकरणसप्तमी, तथात्वे पूर्वं प्रयुज्यते। यथा-सूर्ये उदिते (सति) गगने रक्तिमा जायते। उदिते सूर्ये रक्तिमा दृश्यते। उदिते सूर्ये युगमात्रमारूढे, वसन्तसमये प्राप्ते, ओदने पच्यमाने, पत्रे लिख्यमाने, तस्मिन्निवेदयति, नट्यां नर्तिष्यन्त्या मित्यादयः सतिसप्तमीप्रयोगाः। असत्सु तरत्सु इत्यादिष्वपि लक्ष्यलक्षणभावेन यस्यचभावेनेत्येव सिद्धौ लक्ष्यलक्षणभावा-भावेऽपीतरेषां सप्तम्यर्थं वार्तिकारम्भ इति कैयटः। लक्ष्यलक्षणभावे सत्यपि अनादराधिक्यबोधने षष्ठीसप्तम्योर्विधानेन अनादरे भावलक्षणे सप्तम्येव, अनादराधिक्ये तु षष्ठ्यपि भवति।

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च (२-३-३९) एभिः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। शेषषष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्। गवां गोषु वा स्वामी। प्रजानां प्रजासु वा ईश्वरः। जनानां जनेषु वाऽधिपतिः। तस्य तस्मिन्वा साक्षी, प्रतिभूः, दायादो वा। धनिनां धनिषु वा प्रसूतः। **आयुक्तकुशलाभ्यां चासेवायाम् (२-३-४०)** आभ्यां योगे षष्ठीसप्तम्यौ स्त आसेवायाम्। आसेवा तत्परता। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा (तत्परः) हरिपूजने हरिपूजनस्य वा। आसेवायामित्युक्तेर्नेह–आयुक्तः (ईषद्युक्तः) गौः शकटे। **यतश्च निर्धारणम् (२-३-४१)** जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्, निर्धारणं यतः क्रियते ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। मनुष्याणां मनुष्येषु वा क्षत्रियः शूरः। श्वापदानां श्वापदेषु वा व्याघ्रः क्रूरः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः। **पञ्चमी विभक्ते (२-३-४२)** विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रेभ्य आढ्यतराः। क्षत्रिया वैश्येभ्यः श्रेष्ठाः। चैत्रो मैत्राच्चतुरः। तस्मादिदमुत्तमम्।

वि. १ यस्मात्समुदायात्तदन्तर्गतैकदेशस्य जात्या गुणेन क्रियया संज्ञया वा पृथक्करणं स्वेतरव्यावृत्तविशेषधर्मबोधनं निर्धारणं क्रियते तस्मात्समुदायबोधकात्षष्ठीसप्तम्यौ स्तः। स्वशब्द एकदेशपरः। यथा नृसमुदायाद्ब्राह्मणस्य जात्या, मनुष्यसमुदायात्क्षत्रियस्य जात्या, गोसमुदायात्कृष्णाया गुणेन, गच्छत्समुदायात् धावतः क्रियया, छात्रसमुदायान्मैत्रस्य संज्ञया विशेषबोधनात्समुदायवाचकेभ्यः षष्ठी सप्तमी वा। समुदायवाचकः उद्भूतावयवभेदविवक्षया बहुवचने प्रयुज्यते।

वि. २. पञ्चमी विभक्त इत्यत्र यतश्च निर्धारणमित्यनुवर्तते। पूर्वसूत्रोदाहरणेषु निर्धारणावधिभूतानां, निर्धार्यमाणानां ब्राह्मणादीनां च सामान्यात्मना अभेदो विशेषात्मना भेदश्च, समुदायैकदेशयोः सामान्यविशेषस्वरूपयोर्भेदस्याभेदस्य च सत्त्वात्। यत्र निर्धारणावधेर्निर्धार्यमाणस्य च भेदः (विभागः) एव नतु सामान्यविशेषरूपतया भेदाभेदौ तत्रावधि-बोधकादुत्तरसूत्रेण पञ्चम्येव, यथा-निर्धारणावधीनां पाटलिपुत्रकादीनां निर्धार्यमाणानां माथुरादीनां च मिथो भेद एव नत्वेकस्यान्यान्तःपातित्वमिति तत्रावधिबोधकेषु पञ्चमी। एतदपेक्षयायं विशिष्ट इति बोधनादियमपेक्षायां पञ्चमीति वक्तुं शक्यते। अत्र बुद्धिपरिकल्पितापायस्य बोधेन तदवधावपादानत्वेन पञ्चमीसिद्धेरिदं सूत्रं भाष्यकृताऽपादानप्रकरणे प्रत्याख्यातम्। तथात्वेऽपेक्षितापादानत्वेनेयं कारकपञ्चमी भवति।

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः (२-३-४३) आभ्यां योगे सप्तमी स्यादर्चायां नतु प्रतेर्योगे। मातरि साधुर्निपुणो वा। अर्चायामित्युक्तेस्तत्त्वकथने नेह—निपुणो राज्ञो भृत्यः। साधुशब्दप्रयोगे तत्त्वकथने विनापि साध्वसाधुप्रयोगेचेति सप्तमी भवत्येव। इह साधुग्रहणं त्वर्चायां प्रतियोगे सप्तमीनिवृत्त्यर्थम्। **अप्रत्यादिभिरिति वक्तव्यम् (वा)** साधुर्निपुणो वा मातरं प्रति परि अनु वा।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रसितोत्सुकाभ्यां तृतीया च (२-३-४४) आभ्यां योगे तृतीया स्याच्चात्पञ्चमी च। प्रसितः (तत्परः) उत्सुको वा हरिणा हरौ वा। तदस्मिन्नधिकमिति यस्मादधिकमिति च सूत्रनिर्देशादधिकशब्दयोगे सप्तमीपञ्चम्याविष्येते। लोके लोकाद्वाऽधिको हरिः।

वि. अधिरीश्वरे (१·४-६७) स्वस्वामिसम्बन्धेऽधिः कर्मप्रवचनीयसंज्ञः स्यात्। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी (२-३-६) अस्मादधिकः अस्येश्वर इत्यर्थे कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परार्धे (परार्धादधिकाः) संख्याः। उपोधिकेचेति कर्मप्रवचनीयत्वम्। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधि भुवि रामः, अधि रामे भूः (भुव ईश्वरः·स्वामी रामः)।

प्रयोगा :—भूतानां प्राणिनः श्रेष्ठाः। बुद्धिमत्सु नराः श्रेष्ठाः। त्वयस्मिन्मम साक्षी। नन्दाः पशव इव हताः पश्यतो राक्षसस्य। तमस्तपति घर्मांशौ कथमाविर्भविष्यति। पत्तने विद्यमाने ग्रामे रत्नपरीक्षा। श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। रोदनाद्गानं वरम्। कस्तस्य प्रतिभूर्मतः। सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।

विभक्त्यर्थ सङ्ग्रह :—

सम्बोधने तथाख्यातवाच्ये कर्तरि कर्मणि।
इत्याद्यैर्ग्राहकैर्ग्राह्ये, निर्देशे प्रथमा मता ॥१
ईप्सितेऽनीप्सिते गौणे द्वितीयाऽनुक्त कर्मणि।
आधारेऽप्यधिशीङ्स्थासां वसोऽभिनिविशः क्वचित् ॥२
गतिबुध्युक्तिभक्षार्थशब्दकर्मस्वकर्मके।
णयन्ते प्रायः पूर्वकर्तुः कर्मत्वे तत्र सा मता ॥३
भावाध्वदेशकालानां कर्मत्वे ऽकर्मकेषु सा।
क्रियाविशेषणे, कालाध्वनोर्व्याप्तौ फलेऽसति ॥४
द्विरुक्तोपर्यधोधीनामन्तरेणान्तराऽनयोः।
तसन्तोभाभिसर्वादेः प्रत्यादेर्योजनेपि सा ॥५
तृतीया करणेऽनुक्तकर्तर्याख्यातगोपने।
प्रकृत्यादौ, सहार्थेऽङ्गविकारे, लक्ष्यलक्षणे ॥६
क्रियोद्देश्ये, सम्प्रदाने, यस्मै दानं रुचिः क्लृपिः।
शपिधारिस्पृहिश्लाघा-कोपास्तत्र चतुर्थिका ॥७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमःस्वस्तिस्वधास्वाहापर्याप्तव्यर्थादियोजने ।
तुमन्तगुप्तौ, तादर्थ्ये, तुमर्थे च चतुर्थिका ॥८
यस्माद्विभागो भी रक्षा घृणान्तर्द्धिश्च्युतिर्जनिः ।
प्राप्त्यधीती निवृत्तिर्वाऽपादाने तत्र पञ्चमी ॥६
ल्यबन्तलोपेऽपेक्षायामवधावध्वकालयोः ।
सा युक्तेऽन्यप्रभृत्यर्थदिक्छब्दाङ्बहिरादिके ॥१०
षष्ठी शत्राद्यन्तभिन्नकृदन्तकर्तृकर्मणोः ।
कर्मण्येवोभयप्राप्तौ, क्तान्तकर्तर्यपि क्वचित् ॥११
षष्ठी सामान्यसम्बन्धे, कारकेपि तथा क्वचित् ।
षष्ठीयुक्तेऽतसर्थान्ते, द्वितीयाप्येनबन्तके ॥१२
आधारे सप्तमी, युक्ते साध्वादौ, भावलक्षणे ।
निर्धारणेऽनादरेथ स्वाम्यादियुजि षष्ठ्यपि ॥१३
गतिकर्मणि चेष्टायां, मन्यकर्मण्यनादरे ।
चतुर्थ्यपि क्वचित्, पक्षे कर्मापि करणं दिवः ॥ १४
हेतौ तृतीयापञ्चम्यौ, स्तोकादौ करणेपि ते ।
पृथग्विनादियोगे तु द्वितीयासहिते इमे ॥ १५
षष्ठीतृतीये तुल्यार्थयोगेऽथो कृत्यकर्तरि ।
कारणार्थे सत्यदादौ प्रायः सर्वा विभक्तयः ॥ १६
दूरान्तिकार्थेषु षष्ठीं चतुर्थीं पञ्चमीं विना ।
तद्युक्ते पञ्चमी षष्ठी, विभक्तीनामियं स्थितिः ॥ १७

परिशेषः—

कृदन्ताख्यातयोर्वाच्यविभेदात्कर्तृकर्मणोः ।
उक्त्यनुक्तिविपर्यासे विभक्तिः परिवर्तते ॥३९॥

अकर्मकाद्भावे कर्तरि वा, सकर्मकात्कर्तरि कर्मणि वाऽऽख्यातलकाराः केचन कृत्प्रत्ययाश्च भवन्तीति वाच्ये कर्तरि कर्मणि वा प्रथमा, अवाच्ये कर्तरि तृतीया कर्मणि द्वितीया। द्विकर्तृकत्वे कर्तरि प्रयोगे प्रयोजक एव कर्ता वाच्यः, द्विकर्मकत्वे तु बुद्धिभक्षार्थयोः शब्दकर्म च निजेच्छया, प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः इति व्यवस्थया कर्मणि प्रयोगे व्यवस्थित मेकमेव कर्म वाच्यं, दुहादिद्विकर्मकस्थले कर्मणिप्रयोगे गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहामि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवस्थया व्यवस्थितमेकमेव कर्म वाच्यं भवति। सर्वत्र वाच्यानुरूपमाख्यातं प्रयोज्यम्। आख्यातस्य कृदन्तस्य च वाच्यपरिवर्तने कर्तृकर्मणोर्विभक्तयः परिवर्तन्ते। करणादिषु सम्ब-न्ध्युपपदयोगिषु च परिवर्तनं न भवति। यथा आख्यातप्रयोगे अहमासने उपविशामि–मयाऽऽसने-उपविश्यते, त्वं मित्राय प्रेम्णा पत्रं प्रेषयसि–त्वया मित्राय प्रेम्णा पत्रं प्रेष्यते। गोपालो गां पयो दोग्धि–गोपालेन गावः पयो दुह्यन्ते। वयं मित्रेण द्रव्यं तस्मै दापयामः–अस्माभिर्मित्रेण तस्मै द्रव्यं दाप्यते। स्वामी सेवकं ग्रामं गमयति–स्वामिना सेवको ग्रामं गम्यते। कृदन्तप्रयोगे–बालं स्तन्यं पाययन्ती माता—मात्रा स्तन्यं पाय्यमानो बालः, सुखेन कार्यं कृतवान्पुरुषः—पुरुषेण सुखेन कृतं कार्यम्, शिष्यान् प्रेम्णा पाठं पाठयन्गुरुः—गुरुणा प्रेम्णा पाठं पाठ्यमानाः शिष्याः। एवमन्यत्रापि।

ऐक्यात्साम्याद्यथारोपात्सामानाधिकरण्यतः।

शब्दे विशेषणीभूते विभक्तिस्तु विशेष्यवत् ॥४०॥

(क) अभिन्नवस्तुबोधकतया, (ख) उपमानतया (सदृशभावेन) (ग) आरोपेण (अभेदाध्यवसानेन वा एकार्थपर्यवसायितया विशेषणीभूते शब्दे यथास्वं नियमान्तरैर्लिङ्गवचनभेदेऽपि विभक्तिर्विशेष्यवदेव भवति। यथा (क) शुक्लं वस्त्रं परिदधानाः साधवो जना दृश्यन्ते। मधुराणामाम्रफलानामधिक आदरो भवति। कासे निदानं कफः। सीता रामस्य दाराः। (ख) आदर्शे इव निर्मले हृदये पदार्थाः प्रतिबिम्बानीव स्फुटं भासन्ते। कामेनेव सुन्दरेण यूना रतिरिव सुरूपा कुमारी ऊढा। चन्द्र इव मुखं शोभते। अप्सरस इवेयं नारी विभाति। (ग) महयां महेन्द्रो नृपः। विद्यायाः सागरे जने। गुणानां भाजनं जनः। नारीणां भूषणं शीलम्। नराणां विद्याऽलङ्कारः।

वि. १. भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति प्रदीपोक्त्या यथास्वं प्रवृत्तिनिमित्तभेदेऽपि साक्षात्परम्परया वा एकार्थपर्यवसायित्वं सामानाधिकरण्यम्। तच्च क्वचित्पदद्वयेन एकस्यैव वस्तुनः स्वतो बोधने, यथा-नीलं वस्त्रं, चतुरा बालकाः, मिष्टानि फलानि, शतं जनाः। क्वचिद्वस्तुनो विभेदेऽपि सादृश्यबोधकनिपातादिकं [illegible] कृत्वा उपमानविधया उपमेयपर्यवसाने, यथा-कृष्णसर्प इव क्रूरः पुरुषः। नवनीतमिव मधुरं वचनम्। पाषाणस्येव [illegible] हृदयस्य। क्षुरस्य धारा इव वाचः। क्वचित्पदार्थयोर्विभेदेऽपि सादृश्यं गर्भीकृत्य एकस्यापरस्मिन्नभेदारोपे, यथा—[illegible] पुरुषः। गुणानां सिन्धुनाऽनेन। रसस्य मरुभूमिरसौ। नारी गृहस्य भूषणम्। ऐकार्थ्ये अजहल्लिङ्गवचनवर्जं [illegible] विशेषणम्, औपम्ये आरोपे चोभयोः पृथक्पदार्थयोः साम्यारोपबलेनैव काल्पनिकं सामानाधिकरण्यमिति [illegible] विभक्तिमात्रं विशेष्यवत्, लिङ्गवचने तु यथास्वमेव। उक्तं च चाङ्गुसूत्रे–"लिङ्गसंख्याविभेदेऽपि उपमानोपमेययोः, [illegible] पुनरैक्यं"। औपम्ये सादृश्यं स्फुटमारोपे त्वन्तर्गतमित्युभयत्राप्युपमानोपमेयभावः एकत्र शाब्दोऽपरत्राऽऽर्थ [illegible] विशेषः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २. शारीरकभाष्ये उद्गीथाधिकरणे (अ० ३ पा० ३) चतुर्धा सामानाधिकरण्यमुपवर्णितं तच्च, मय्या कृताप्युल्लिखितम्। यथा—क्वचिद्भेदग्रहे सत्यप्यभेदाध्यासेन, इयं प्रतिमा विष्णुरिति, तस्य बाधग्रहेण निवृत्ति क्वचिद्भेदाग्रहेणाध्यासे, शुक्ताविदं रजतमिति, स चायमपवादरूपः, अस्यनेदं रजतमिति बाधग्रहे निवृत्तिः। क्वचिद्गुणयो भेदेन, द्विजोत्तमो भूमिदेवो ब्राह्मणइति। क्वचित्परिच्छेदकत्वेन, नीलं वसनं महाँस्तरुरिति। अध्यासापवादौ आरोपविशेषौ।

साम्ये विभक्तिसाम्येप्याख्यातं वाच्योपमेयवत्।
विशेषणे स्वानुरूपे उपमानोपमेययोः ॥ ४१ ॥

उपमानस्य (येनोपमीयते तस्य), उपमेयस्य (यदुपमीयते तस्य) विभक्तिसाम्येनोभयोः प्रथमान्तत्वे उपमेयस्य मुख्यतया तदनुरूपमेवाख्यातं नतूपमानानुरूपं भवति। उपमानस्य उपमेयस्य स्वं विशेषणं तु स्वविशेष्यानुरूपमेव भवति। किञ्चिद्विशेषणं द्वयोः साधारणमपि भवति यथा चन्द्र इव निर्मलो दर्पणो दृश्यते। अहं त्वमिव विद्वानस्मि। स नारीव लज्जते। रामलक्ष्मणा विव इमे भ्रातरः सन्ति। पुरुष इव स्वतन्त्राः स्त्रियो न शोभन्ते। पूर्णश्चन्द्र इव सु मुखं दृश्यते।

वि. उपमानोपमेययोर्येन धर्मेण सादृश्यं स धर्म आख्यातेन प्रदर्श्यमानः स्वत एवोभयत्रान्वेति, यथा मुखं इवाभाति। क्वचिन्नामपदेन प्रदर्श्यमान उपमानोपमेययोः समत्वे स्वत एवोभयत्रान्वेति, यथा बृहस्पतिरिव विद्वा दृश्यते। क्वचित्तयोर्विषमत्वे उपमेयानुरूपोपि लिङ्गवचनविपरिणामेनोपमानेन्वेति, यथा सुधेव विमलश्चन्द्रः, ज्यो इव सिता कीर्तिः। क्वचनोपमानस्योपमेयस्य वाऽसाधारणधर्मबोधकं विशेषणं त्वेकत्रैवान्वेति, यथा अस्या गौरं मुखं पा श्चन्द्र इव शोभते।

आरोपे वाच्यविषयानुसारि स्यात्क्रियापदम्।
विशेषणे तु विषयारोप्ययोः स्वविशेष्यवत् ॥ ४२ ॥

आरोपस्थले आरोप्यस्य (यदारोप्यते तस्य), आरोपविषयस्य (यस्मिन्नारोप्यते तस्य) च वि क्तिसाम्येन उभयोः प्रथमान्तत्वेपि विषयस्य मुख्यतया तदनुरूपमेवाख्यातं, नत्वारोप्या भवति। तयोः स्वं विशेषणं तु स्वविशेष्यानुसारि भवति। यथा- इमे गुणानां सागराः प्र भान्ति। अहं त्वमेवास्मि। गावो मे धनं भवन्ति। गुणाः पुरुषस्य सर्वस्वं भवन्ति। अस समुज्ज्वलं मुखं पार्वणश्चन्द्र उच्यते। सुधाधाराधारश्चिरपरिणतं विम्बमधरः।

वि. १. आरोपस्थले औपम्य इवोभयान्वयि विशेषणं न भवति। आरोप्यस्य आरोपविषयस्य वा यस्य यद्विशे तत्तदनुरूपं भवति। यथा–इदं वक्त्रं साक्षाद्विगलितकलङ्कः शशधरः, सुधाधाराधारश्चिरपरिणतंविम्बमधरः। इमे रात्रिन्दिवमधिकशोभे कुवलये तनुर्लावण्यानां जलधिरवगाहे सुखतरः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि २. क्वचिदनारोपेपि एकस्यान्यथासम्भावनज्ञानादौ बोध्ये सम्भावनाविषयस्य ज्ञानविषयस्य च मुख्यतया तदनुसार्येव तदनुसार्याख्यातं भवति, संभाव्यज्ञेययोस्तु विधेयविशेषणतया क्रियान्वयेन तदनुसार्याख्यातं न भवति। ज्ञेयस्य सम्भाव्यस्य सम्भावितस्य वा यथास्वं विशेषणं तु स्वविशेष्यानुसार्येव भवति, यथा रज्जो रजतं मन्यते, केशाः पापं सम्भाव्यन्ते। अपत्यानि बन्धनं मन्यन्ते। परिवारो बन्धनानि ज्ञायते। अमानि तत्तेन निजायशोयुगं (दानेन सुमेरोरक्षपणमुत्सर्गजलव्ययेन विश्वोपोषणं च) द्विफालबद्धाश्चिकुराः शिरःस्थितम्। अत्रायशोयुगे केशभावनेनायशोयुगस्य मुख्यतया तदनुसार्याख्यातं युक्तमिति व्युत्पत्तिवादे निरूपितम्।

वाचके प्रकृतेः संख्या, विकृतेर्नोभयोः स्थितौ।
समा विभक्तिरुभयोस्तयो स्तद्वद्विशेषणम् ॥४३॥

प्रकृतिविकृत्योर्द्वयोरुपादाने कर्तरि वाच्ये कर्तृभूतयोः कर्मणि वाच्ये कर्मभूतयोस्तयोरभिधाना-त्प्रथमा विभक्तिः समा, परं वाचके आख्याते स्ववाच्यप्रकृत्यनुसार्येव वचनं, नतु विकृत्यनुसारि भवति। एकतरस्योपादाने तूल्लिख्यमानानुसारि वचनम्। प्रकृतेर्विकृतेर्वा विशेषणं तु स्वस्वविशेष्यानिघ्नं भवति। यथा—महानयं वृक्षः पञ्च दीर्घा नौकाः भवति। एतानि बहूनि काष्ठानि श्वेतं भस्म विधीयन्ते। इमे तन्तवः कृष्णा शाटी भवति। किशोरः पुरुषः सुन्दरी स्त्री जातः। प्रौढा नारी सुवेषः पुरुषो जाता।

वि. प्रकृतिविकृत्योरुपादाने विकृतेर्विधेयविशेषणभावेन क्रियान्वयात्प्रकृतेरेव मुख्यत्वेन क्रियासम्बन्धितया तदाख्यातयोः समानवचनत्वम्। एकमात्रोपादाने तु तस्यैव मुख्यतयाऽऽख्यातस्य तदानुरूप्यं, विशेषणस्य स्वविशेष्यानुरूप्यं च न्याय्यमेव। प्रथमान्हिकभाष्ये "पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः" इति प्रयोगदर्शनेनाऽऽच्यन्ते क्वचिदयं नियमो नेत्यपि केचित्।

विभक्तयो निषेधेषु प्रतियोगिदृशा मताः।
धात्वर्थो वा फलाभावो, नञो द्योतकता मता ॥४४॥

निषेधार्थकवाक्येषु कर्त्रादीनामकर्तृत्वादिप्रतीतावपि प्रथमतः प्रतियोगिक्रियानुसारेण कारकादिषु विभक्तीरुपपाद्य पश्चान्नञादिर्योजनीयः, किंवा तादृशस्थले फलाभावो धात्वर्थः, नञादिस्तद्द्योतक इत्युपपादनीयम्। यथा-स न गच्छति। पाठं न पठति। परशुना न छिनत्ति। तस्मै न दीयताम्। वने न लभ्यते।

वि. १. विशेषणे यद्विशेषणं तस्याप्यन्यद्विशेषणमिति न्यायेन खण्डान्वयरीत्या क्रमिकपदयोगात्खण्डवाक्यार्थबोधोत्तरं वाक्यार्थबोध इति मते पाठं पठति शस्त्रेण छिनत्तीत्यादिरीत्या क्रियाकारकयोगोत्तरं पश्चान्नञादियोगेन तन्निषेधप्रतीतिरिति कर्त्रादिविभक्तय उपपद्यन्ते। खलेकपोतन्यायेन वाक्यान्तर्गतानां सर्वेषां पदानां युगपदेव मिथोन्वयाद्वाक्यार्थबोध इति मते तु विधौ फलानुकूलव्यापार इव निषेधे फलाभावमेव फलं प्रकल्प्य फलाभावानुकूलव्यापारो धात्वर्थः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकार्यस्तदनुसारेण कर्त्रादिविभक्तयः, नञादि तु धात्वर्थविशेषद्योतकमात्रमित्युपपादनीयम्। तेन निषेधार्थकवाक्ये विभक्त्युपपत्तये द्वयी गतिः।

समुच्चयविकल्पाभ्यां कारकाद्येकजातिकम्।
क्वचिन्नानापि भवति, समानास्तद्विभक्तयः ॥४५॥

एकस्यामपि क्रियायां भिन्नजातीयानीव एकजातीयान्यपि कारकादीनि अनेकान्यपि भवन्ति। तानि क्वचित्समुच्चितानि क्वचिद्विकल्पितानि भवन्ति। तेष्वेकजातीयेषु समाना विभक्तयो भवन्ति। यथा–एको देवः केशवो वा शिवो वा। कामात्क्रोधाच्च लोभाच्च मोहाच्च नरो व्रजेत्। आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा। कायेन वाचा मनसा च यत्कृतम्। वने वा नगरे स्थितिः। विपदि धैर्यमथाभ्युदये क्षमा। काव्यं शास्त्रं च पठामि।

वि. समुच्चयस्थले अनेकस्य समुच्चयेन युगपदन्वयादेकवाक्यता भवति, विकल्पस्थले तु पाक्षिकतया विकल्पितगर्भं वाक्यं भिद्यते, संक्षिप्तोक्त्या एकवाक्यतेव प्रतिभातीत्यनुसन्धेयम्।

साधारणं कारकं यत्क्रिययोर्गौणमुख्ययोः।
तत्र मुख्यानुसारेणोक्तानुक्तत्वे विभक्तयः ॥४६॥

गौणमुख्यभूतयोः (क) कृदन्ताख्यातक्रिययोः, (ख) कृदन्तक्रिययोर्वा एकजातीयं भिन्नजातीयमपि साधारणं कारकं भवति, तत्र गौणक्रियानुसारेणान्यथात्वेपि मुख्यक्रियानुसारेणैव उक्तत्वमनुक्तत्वं कारकत्वं चाश्रित्य विभक्तिर्भवति। यथा (क) गोधूमः पिष्ट्वा पच्यते। स भुक्त्वा निर्जगाम। तण्डुलाः पक्त्वा भुक्ताः स्वदन्ते। गृहस्थेन सत्कृता अतिथय आशिषं ददुः। पुराणं श्रावयता व्याख्यायते। कार्यं साधु कृतवता भृत्येन स्वामी प्रमोद्यते। (ख) राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ। भवद्भि रुपदिष्टमाकर्ण्य वयं प्रसीदामः। भुक्तवन्तं निर्गतं कोऽर्थो लभ्यते। तेनासनं ग्राहितैर्मुनिभिः कुशलमपृच्छ्यत।

वि. यत्कारकमेकस्याः क्रियायास्तत्र तदनुसारेणोक्तानुक्तत्वे विभक्तिश्च समुचितैव, यत्तु कृदन्ताख्यातयोः कृदन्तयोर्वा गौणमुख्यक्रिययोः साजात्येन वैजात्येन वा साधारणं भवति तत्रैकतो दृशाऽन्यतो दृशा च वैषम्ये उपस्थिते आख्यातक्रिया कृदन्तक्रिया वा या मुख्या तदनुसारेणैव विभक्तिर्नतु गौणक्रियानुसारेण, गौणमुख्ययोर्मुख्यस्य प्रावल्यात्। यथा गोधूमः पिष्ट्वा पच्यते इत्यत्रोभयतः कर्मभूते गोधूमे पेषणस्यानुक्तकर्मत्वेपि मुख्यपाकक्रियाया उक्तकर्मत्वेन प्रथमा। तथा दत्तं राज्यं प्रतिपद्येत्यत्र दानप्रतिपत्त्योः कर्मभूते राज्ये दानस्योक्तकर्मत्वेपि तदपेक्षया मुख्यायाः प्रतिपत्तेरनुक्तकर्मत्वेन द्वितीया। सत्कृतैरतिथिभिरपृच्छ्यतेत्यत्र सत्कारकर्मसु प्रश्नकर्तृषु चातिथिषु सत्कारोक्तकर्मत्वेपि तदपेक्षया मुख्यस्य प्रश्नस्यानुक्तकर्तृत्वेन तृतीया। एवमन्यत्रापि साजात्ये वैजात्येपि मुख्यानुसारेण विभक्तय ऊह्याः। एष दिक्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शाकः पचता भुज्यते इत्यादौ शाके गौणपाकक्रियाया अनुक्तकर्मत्वेपि प्रधानभोजनक्रियाया उक्तकर्मत्वेन प्रथमैव, प्रधानतदभिधाने गुणशक्तिरभिहितवत्प्रकाशते इति शाब्दिकोक्ति" रिति शब्दशक्तिप्रकाशिकायाम्। तदुक्तं हरिणा—"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यदा गुणे तदा तद्वदनुक्तापि प्रतीयते" इति। "ग्रामो गन्तुमिष्यते इत्यत्र गतिक्रियापेक्षे द्वितीयाचतुर्थ्यौ न भवतः तदपेक्षया कर्मत्वमभिहितवत्प्रकाशते इति कैयटोक्तेरभिधाना" दित्यादि च मञ्जूषायाम्।

एकक्रियायां तस्यैवानेकशक्तित्वसम्भवे।
अपादानादिक्रमतो बलीयः स्यात्परं परम् ॥४७॥

क्वचन एकस्यामपि क्रियायां तस्यैव नानाकारकत्वं सम्भवति, तत्र अपादान-सम्प्रदान-करणाधिकरण-कर्म-कर्तृत्वेषूत्तरोत्तरस्य बलीयस्त्वाद्बलवत्कारकानुसारेणैव विभक्तिर्भवति। यथा-गेहं (अधिकरणं कर्म च) प्रविशति। तण्डुलान् (करणं कर्म च) पचति। धनुषा (अपादानं करणं च) शरान्क्षिपति। वृक्षं (अपादानं कर्म च) त्यजति। पात्र्यां (करणमधिकरणं च) भुङ्क्ते।

वि. सामान्यविधिरुत्सर्गः सचापवादं विशेषविधिं विना न प्रवर्तते इति नियमेन अष्टाध्याय्यामपादानादिक्रमेण निर्दिष्टानां कारकविधीनामुत्तरोत्तरस्य प्राबल्यम्। उक्तं च हरिणा—"अपादानसम्प्रदानकरणाधारकर्मणाम्। कर्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्तते" इति। ततश्चैकस्यामपि क्रियायां क्वचित्तस्यैवानेककारकत्वसम्भवे बलीयसः कारकस्य विभक्तिः। यथा-शत्रवे कुप्यतीत्यत्र शत्रोः प्रयोजकत्वेनापादानत्वाद्विषयत्वेन सम्प्रदानत्वस्य प्राबल्याच्चतुर्थी। पात्र्यां भुङ्क्ते इत्यत्र भोजने पात्र्याः करणत्वादधिकरणत्वस्य प्राबल्यात्सप्तमी। चैत्रो गच्छतीत्यत्र गतौ चैत्रस्य संयोगाश्रयत्वेन कर्मत्वाद्व्यापाराश्रयत्वेन कर्तृत्वस्य, असिश्छिनत्तीत्यत्र छेदने असेः करणत्वात्कर्तृत्वस्य प्राबल्यात्प्रथमा। एवमन्यत्राप्यनुसन्धेयम्। यत्र तूभयथापि विभक्त्योर्विशेषविधिस्तत्रोभयथापि। ग्रामं गच्छति ग्रामाय गच्छतीत्युभयथापि कर्मत्वगत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ। दीनं दयते ईष्टे स्मरतीत्यादित इव दीनस्य दयते ईष्टे स्मरतीत्यादितोपि कर्मत्वशेषाद्द्वितीयावत्षष्ठ्यपीति शब्दशक्तौ।

प्रयोगाः—पुत्रमाहूय वक्ति सः। क्षुरस्य धारा भान्ति दुष्टाः। गुणानां सागरस्यास्य वाग्धाराः प्रसरन्त्यलम्। अहौ वा हारे वा कुसुमशयने वा दृषदि वा। पापानि भस्म भवन्ति। सत्ये धर्मे इवापरः। अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम्। उपाध्यायेन त्वमासनं ग्राहितोसि।

प्रश्नाः—कर्तरि कर्मणि च कीदृशे का विभक्तिः। उपपदविभक्तिः सम्बन्धविभक्तिः कारकविभक्तिश्च कीदृशी, का प्रबला, का दुर्बला। संप्रदानमपादानं च कीदृशम्। अणौकर्तुर्णौ कर्मत्वं कुत्र भवति। हेतुकरणयोः को विशेषः। कर्मणि चतुर्थी क्व। निर्धारणे अनादरे तदभावे च को विशेषः। साधारणकारके का विभक्तिः। कथितं कर्म कीदृशम्। औपम्ये आरोपे च को विशेषः। द्विकर्मके कर्मणि वाच्ये कतरद्वाच्यं भवति। कृदन्ताख्यातयोः कर्तृषु क्व विशेषः। प्रति आ उपरि अलं नमः शब्दयोगे का विभक्तयः।

इति विभक्तिप्रकरणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समास प्रकरणम्

समासः—

समास एकीकरणं पदयोर्मिलितार्थयोः ।
क्वचिन्नानापदानां च, नित्योऽनित्यश्च स द्विधा ।।४८।।

मिथो मिलित्वा पिण्डीभूतार्थयोः पदयोः क्वचित्तथाभूतानां बहूनामपि पदानां योगेनैकपदीकर समासः । यथा-परमः ईश्वरः-परमेश्वरः । राज्ञः पुरुषः-राजपुरुषः । रामश्च लक्ष्मणश्च-रामलक्ष्मणौ कृतं कृत्यं येन स-कृतकृत्यः । क्रममनतिक्रम्य-यथाक्रमम् । रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च रा लक्ष्मणभरतशत्रुघ्नाः । समासः क्वचिन्नियतः । स तु नित्यः यथा-यथाक्रमम् । क्वचित्तु ऐच्छिकत पाक्षिकः, सोऽनित्यः यथा-राज्ञः पुरुषः राजपुरुषः ।

वि. समसनं संक्षेपकरणं समासः । अनेकपदयोरन्तर्गतविभक्त्यादिलोपेन क्वचिद्विकारादिविशेषेण चैकीकर त्संक्षेपो भवति । असमासे व्यस्तानि पदानि, समासे समस्तं पदम् । समासः सर्वेषां पदानां भवतीति न नियमः, कि यथानियमं केषाञ्चित्क्वचिद्भवति । यस्य येन सह भवति तयोरवश्यकर्तव्यो नित्यः इच्छयाकर्तुमकर्तुमपिशक्योऽनित्य परं ययोःपदयोः समासः क्रियते तयोः परस्परमपेक्षया एकस्यापरत्रान्वयात्पिण्डीभूतार्थकत्वरूपे सामर्थ्ये सत्येव समा सामर्थ्ये समासो यथा-राज्ञः पुरुषः-राजपुरुषः, धृतमस्त्रं येन स-धृतास्त्रः, श्वेतश्चासौ अश्वः श्वेताश्व स्तेन श्वेताश्वेन, सेना निवेश स्तं-सेनानिवेशं गच्छति । असामर्थ्ये न समासो यथा-इदं गृहं राज्ञः; पुरुष स्तत्र गच्छति । वस्त्रमस्ति श्वेत अश्वमारोहति सः । गच्छति रामः, लक्ष्मणस्तु न गच्छति । छत्रं सुन्दरं, वस्त्रं तु मलिनमस्ति ।

व्यस्तं वाक्यं समस्तार्थबोधि विग्रह उच्यते ।
नित्ये समासे ऽन्यपदैरनित्ये स्वपदैश्च सः ।।४९।।

समस्तपदबोध्यमर्थं बोधयितुं प्रयुक्तं व्यस्तवाक्यं विग्रह इत्युच्यते । नित्यसमासस्थले तस्य वश्यकतया बाह्यपदमन्तर्भाव्य विग्रहः क्रियते, सचा ऽस्वपदविग्रहः; अनित्यसमासस्थले त पाक्षिकतया तैरेव पदैर्विग्रहः क्रियते, स च स्वपदविग्रहः । यथा नित्ये-क्रममनतिक्रम्य-यथाक्रम गृहे इति—अधिगृहम्, गृहे तिष्ठति-गृहस्थः । अनित्ये-राज्ञः पुरुषः-राजपुरुषः । श्वेतश्चासौ अश्व श्वेताश्वः । रामः कृष्णश्च रामकृष्णौ ।

वि. अव्ययीभावोपपदतत्पुरुषादौ नित्यसमासे यादृशपदान्तरविन्यासे समासार्थो बुध्यते तथा बाह्यपदान्यपि विन् अस्वपदविग्रहः क्रियते, अन्यत्रानित्यसमासे तु समस्यमानपदान्येव समुचितविभक्तिवचनानि विन्यस्य स्वपदवि क्रियते । तत्र तत्तत्समासपरिचयाय द्वन्द्वे इतरेतरयोगे रामश्च लक्ष्मणश्चेति चकार मन्तरा निवेश्य, कर्मधारये समाना करणविशेष्यविशेषणयोर्मध्ये समुचितलिङ्गवचनानि चासौ चतत् चते चता चतौ चतानी त्यादि पदानि विन्यस्य, बहु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[illegible]दार्थबोधायान्ते समुचितलिङ्गवचनविभक्तीनि येन सः, यया सा यस्य, सः, यस्याः सा येषान्ते यासां ताः, येषां तानि [illegible]त्यादिपदानि निवेश्य, तत्पुरुषे पूर्वोत्तरपदे यथास्वं समुचितलिङ्गवचनविभक्तिके विन्यस्य विग्रहः क्रियते। उक्तंच शब्द-[illegible]दौ—विभक्तिमात्रप्रक्षेपान्निजान्तर्गतनामसु। स्वार्थस्याबोधबोधाभ्यां नित्यानित्यौ समासकौ॥ इतिजयादित्यवचनम्। [illegible]ग्रहो न समास एव किन्तु कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु सर्वासु वृत्तिषु। एवं च कृत्तद्धितादिष्वपि तदर्थ-[illegible]कं मनो हरतीति मनोहारी, उपगोरपत्य मौपगवः, रामश्च रामश्च रामौ, गन्तुमिच्छति जिगमिषतीत्यादिरूपेण [illegible]ग्रहं प्रदर्श्य वृत्तयः प्रदर्श्यन्ते।

समासेऽन्तर्विभक्तीनां प्रायो लोपः क्वचित्तु न।
समस्तात्प्रातिपदिकाद्यथायोग्यं पुनः सुपः॥५०॥

समासे सति तदन्तर्गतविभक्तीनां सुपोधातुप्रतिपदिकयोरिति लोपेन प्रकृतिभागमात्रावशेषे सन्धिविकारादिविशेषैः सह पूर्वोत्तरशब्दयोर्योगेन संयुक्तशब्दान्तरं निष्पद्यते ईदृशो लुक्समासः। यथा-राज्ञः पुरुषः-राजपुरुषः। महाँश्चासौ अश्वः महाश्वः। मम गृहं-मद्गृहम्। क्वचित्तु विशेषनियमैः पूर्वविभक्त्यलोपेन पूर्वपदविभक्तिं गर्भीकृत्यैव एकपदीभूतं संयुक्तशब्दान्तरं निष्पद्यते, ईदृशस्त्व-लुक्समासः। ईदृशेषु व्यस्तसमस्तयोः सारूप्येपि व्यस्तत्वे पदद्वयं, समस्तत्वे पदैक्यं, क्वचिदर्थ-विशेषाद्यपि भवति। यथा-दास्याः पुत्रः-दास्याःपुत्र-(निन्द्यः)। युधि स्थिरः युधिष्ठिरः। कण्ठे कालो यस्य सः कण्ठेकालः (शिवः)। गेहे शूरः.गेहेशूरः (वृथाभिमानी)। लुकि अलुकि वा समासोत्तरं संयुक्त-शब्दान्तरात् कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञितायथौचित्यं पुनः सुबाद्युत्पत्तिः।

बहुव्रीह्यव्ययीभावौ द्वन्द्वस्तत्पुरुषश्च सः।
भेदस्तत्पुरुषस्यैव सद्विगुः कर्मधारयः॥५१॥

स समासः यथाक्रमं प्रतिगृहमित्यादावव्ययीभावः, कृतकृत्यः पतितपत्र इत्यादौ बहुव्रीहिः, रामकृष्णौ गवाश्वमित्यादौ द्वन्द्वः, राजपुरुषः कूपपतित इत्यादौ तत्पुरुषः इति सामान्यतश्चतुर्धा। नीलोत्पलं शीतोष्णमित्यादौ समानाधिकरणयोस्तत्पुरुषविशेषः कर्मधारयः। पञ्चामृतं त्रिलोकीत्यादौ संख्यापूर्वक कर्मधारयविशेषो द्विगुः। आभ्यां सह षोढा समासाः। सहसुपेति विहितस्तु विशेषसंज्ञावर्जितः सामान्यसमासः।

वि. अव्ययीभावस्याव्ययीभवनेन, द्वन्द्वस्थोभयमेलन रूपतया इमावन्वर्थौ। तस्य पुरुष स्तत्पुरुषः द्वयो र्गवोः समाहारो [illegible] (द्विगु) बह्वो व्रीहयो यस्मिन् स बहुव्रीहिः—इति तत्तत्पदगत समास समानानामन्येषामपि तत्पुरुषो द्विगुर्बहुव्रीहि [illegible]रिति नद्यादिवत्साम्यमूलकं संज्ञात्रयम्। कर्मधारयशब्दे कर्मधारयतीत्युपपदतत्पुरुषगर्भतयाऽन्वर्थतायाः साम्यस्य चा-[illegible] समानाधिकरणतत्पुरुषे पूर्वाचार्याणां तथा व्यवहारस्य बीजमनुसन्धेयम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वन्द्वे सर्वोऽव्ययीभावे पूर्वस्तत्पुरुषे परः ।
बहुव्रीहौ पदार्थो ऽन्यः प्राधान्यं याति भूयसा ।।५२।।

प्रायशो द्वन्द्वे सर्वेषां पदार्थानां समप्राधान्येन, अव्ययीभावे उत्तरपदार्थस्य पूर्वपदार्थेऽन्वयात्पूर्व-प्राधान्येन, तत्पुरुषे पूर्वपदार्थस्योत्तरपदार्थेऽन्वयादुत्तरप्राधान्येन, तद्विशेषे कर्मधारयेऽपि तथा-भावेन, बहुव्रीहौ मिथोमिलितपूर्वोत्तरपदार्थयोर्बाह्यपदार्थेऽन्वयादन्यप्राधान्येन प्रायः सर्वपदार्थ-प्रधानो द्वन्द्वः, पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिर्भवति ।

वि. प्रायिकोऽयं प्राधान्यवादः। समाहारद्वन्द्वे गवाश्वमित्यादौ, समाहारद्विगौ त्रिभुवनमित्यादौ च समाहारस्य (समूहस्य) प्राधान्यम्, अव्ययीभावे अक्षपरीत्यादावुत्तरपदार्थस्य, उन्मत्तगङ्ग मित्यादौ देशादेरन्यपदार्थस्य प्राधान्यं, तत्पुरुषे अर्धपिप्पलीत्यादौ पूर्वपदार्थस्य, अतिमाल इत्यादावन्यपदार्थस्य, कर्मधारये पुरुषसिंह इत्यादौ पूर्वपदार्थस्य प्राधान्यं, बहुव्रीहौ द्वित्रा इत्यादौ सर्वपदार्थस्य प्राधान्यं च दृश्यते। क्वचन घटस्य न अधिकरणं घटानधिकरणं (घटाधि-करणभिन्नं), प्रतियोगिताया न अवच्छेदकं प्रतियोगितानवच्छेदकं (प्रतियोगितावच्छेदकभिन्नं) इति मध्यमपदार्थ-प्राधान्यमपि दृश्यते। उक्तं च शब्दशक्तौ-पूर्वमध्यान्त्यसर्वान्यपदप्राधान्यतः पुनः। प्राच्यैः पञ्चविधः प्रोक्तः समासो वाग्भटादिभिः इति ।।

समस्तलिङ्गवचने प्रायोऽन्यत्र प्रधानवत् ।
अव्ययं त्वव्ययीभावो द्वन्द्वादौ नियमोक्तवत् ।।५३।।

समासोत्तरं समस्तपदे लिङ्गं वचनं च तत्पुरुष कर्मधारययोरुत्तरपदार्थप्राधान्यात्तदनुसारि बहुव्रीहावन्यपदार्थप्राधान्यात्तदनुसारि भवति। अव्ययीभावस्त्वव्ययं भवति। द्वन्द्वे इतरेतरे उत्तरपदानुसारि लिङ्गं, वचनं तु समष्टिसंख्यानुसारि, समाहारद्वन्द्वे नपुंसकलिङ्गमेकवचनं च समाहारद्विगौ क्लीबलिङ्गं स्त्रीलिङ्गं वा एकवचनं च भवति। क्वचिद्विशेषोपि वक्ष्यते। यथा—

(क) तत्पुरुषे-राज्ञः पुरुषः राजपुरुषः। राज्ञः पुत्रा राजपुत्राः। तेषां गृहं—तद्गृहम्। राज्ञः कुमार्यः राजकुमार्यः, अर्धं पिप्पल्याः अर्धपिप्पली।

(ख) कर्मधारये-नीलं च तद्वस्त्रं नीलवस्त्रम्। हरिताश्च ता लताः हरितलताः। पुरुषः सिंह इव पुरुषसिंहः। रक्तानि च तानि पुष्पाणि रक्तपुष्पाणि।

(ग) अव्ययीभावे-यथाक्रमम्, उपगृहम्, सखेदम्, सविनयम्।

(घ) इतरेतरद्वन्द्वे-सीता च रामश्च सीतारामौ। मित्राणि शत्रवश्च मित्रशत्रवः। पुस्तकं च लेखनी च पुस्तकलेखन्यः। दण्डश्च उपानच्च आतपत्रं च दण्डोपानदातपत्राणि।

(ङ) समाहारद्वन्द्वे-गवाश्वम्, व्रीहियवम्। द्विगौ-त्रिभुवनं, चतुर्युगं, त्रिलोकी।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समासान्तैर्विकाराद्यैः पुंवद्भावेन च स्त्रियाः ।
समस्तशब्दाकृतयो भवन्ति क्वचिदन्यथा ॥५४॥

समासोत्तरं (क) क्वचन टजादि-समासान्तप्रत्ययविशेषेण, (ख) क्वचिद्विकारादि-विशेषेण, (ग) क्वचित्स्त्रीलिङ्गशब्दस्य पुंवद्भावेन च केषाञ्चित्समस्तशब्दानामाकृतयोऽन्यथापि भवन्ति । यथा—

(क) राज्ञः पन्थाः राजपथः । महान्राजा-महाराजः । प्रियः सखा-प्रियसखः । कालमयः कालायसम् । शार्ङ्गं धनुर्यस्या शार्ङ्गधन्वा ।

(ख) हृदयस्य रोगः-हृद्रोगः । महान् पण्डितः-महापण्डितः । कुत्सितमन्नं-कदन्नम्, न धर्मः अधर्मः । तृणेन सह-सतृणम् ।

(ग) रक्ता लता-रक्तलता । दक्षिणा पूर्वा-दक्षिणपूर्वा । मृग्याः पदं-मृगपदम् ।

प्रवेशिकेयं वक्ष्यमाणविषयापि पूर्वमवगता गहनायां समासप्रक्रियायां सुखं प्रवेशयति ।

समासान्यप्रक्रिया—

समर्थः पदविधिः (२-१-१) पदयोः पदानां वा विधिः पदविधिः । पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः । सामर्थ्यं पदयोः पदानां वा मिथोऽर्थमेलनेन विशिष्टैकार्थीभावः । पदविधयो वृत्तयः । कृत्तद्धितैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिः । वृत्यर्थावबोधकं वाक्यं विग्रहः । स द्विविधः, लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात् (व्याकरण संस्कृतत्वात्) प्रयोगार्हःसाधु लौकिकः । तदभावात्प्रयोगानर्होऽसाधुरलौकिकः । यथा राजपुरुष इति समासे राज्ञः पुरुष इति लौकिकः, राजन् ङस् पुरुष सु इत्यलौकिको विग्रहः । एकार्थीभावरूपे सामर्थ्ये सत्येव समासः, नत्वन्यथा । यथा—राजपुरुष आगच्छति । नेह-इदं गृहं राज्ञः पुरुषस्तत्र प्रविशति । समासस्य नित्यत्वेन लौकिकविग्रहवाक्याभावेनाऽविग्रहोऽस्वपदविग्रहोवा नित्यसमासः । शक्ति-मनतिक्रम्य-यथाशक्ति, गृहे इति-अधिगृहम् ।

टि. १ समर्थःपदविधिरिति परिभाषा नाधिकारः । अधिकारः प्रतियोगं तस्य निर्देशार्थ इति योगे योगे उपतिष्ठति । परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत् । यथा प्रदीपः सुप्रज्वलित एकदेशस्थः सर्वं वेश्म अभिज्वलयति, इति भाष्यकारः । उक्तं च—
एकदेशस्थिता शास्त्रं भवने याति दीपताम् । परितो व्याप्ृतां भाषां परिभाषां प्रचक्षते ॥ इति
परितः पूर्वत्र परत्र व्यवहिते चाऽनन्तरे च भाष्यते कार्यमनयेति परिभाषा इति पदमञ्जरीकारः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २ पदसम्बन्धं निमित्तीकृत्योपदिष्टो विधिः समासादिः समर्थो विग्रहवाक्यार्थाभिधाने शक्त्याः किंवा समर्थानां संसृष्टार्थानां पदानामाश्रयी बोध्य इति । पदस्य पदयोः पदानां वा यद्विधीयते तत्सर्वं समर्थपदाश्रितं भवतीत्यर्थः। सामर्थ्यं द्विधा व्यपेक्षा एकार्थीभावश्चेति । स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशात्परस्परसम्बन्धो व्यपेक्षा सा तु राज्ञःपुरुष आगच्छति इत्यादिवाक्येष्वेव । प्रक्रियादशायां पृथगर्थत्वेन गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थबोधकत्वमेकार्थीभावः । स तु राजपुरुष इत्यादिवृत्तावेव । ब्राह्मणस्य कम्बल इति वाक्ये ब्राह्मण-कम्बलार्थयोः पृथक्प्रतीतयोः परस्परान्वयेन व्यपेक्षैव नैकार्थीभावः । ब्राह्मणकम्बल इति समासे तु नावान्तरपदाभ्यां पृथग्बोधः, किन्तु समुदितस्यैव पदस्य ब्राह्मणसम्बन्धिकम्बलरूपैकार्थबोधकत्वादेकार्थीभावः । एकार्थीभावे सत्येव कृत्तद्धितसमासादयः पदविधयो भवन्ति । यथा-कुम्भं करोतीति कुम्भकारः, उपगोरपत्यमौपगवः, गुरोः कुलं गुरुकुलम्, माता पिता च-पितरौ, गन्तुमिच्छति-जिगमिषति इत्याद्या वृत्तयः । एकार्थीभावाभावे तु नेह-पश्य कुम्भम्, करोति भृत्यः कार्यं वस्त्रमुपगोः-अपत्यं चैत्रस्य । इदं गृहं गुरोः, कुलमुज्ज्वलमस्ति । पचति माता, पिता च भक्षयति । प्रवर्तस्व गन्तुम्, इच्छति त्वां द्रष्टुम् । ततश्च ययोः पदयोः समासस्तयोरेकार्थीभावोऽपेक्ष्यते, तदभावे न समासः । यथा-अनुभवति कष्टम्, श्रितो देवम् । गच्छ यूपाय, दारु चानय । महिषी राज्ञः, अश्वं सेनापतेः पश्यति । निपुणस्त्वमक्षेषु,-शौण्डः पिबति । इति कष्टश्रितः, यूपदारु, राजाश्वः, अक्षशौण्डः, इत्यादयः समासा न । एवं च ऋद्धस्य राज्ञः पुरुष इत्यत्र ऋद्धस्य राजपुरुष इति न भवति । पुरुषेण सहैकार्थीभावापन्ने राज्ञि एकदेश ऋद्धस्यान्वयाभावात् । पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इत्युक्तेः । उक्तं च-सविशेषणानां वृत्तिर्न वृत्तस्य च पुनर्विशेषणयोगो नेति । ऋद्धस्य राजन्यन्वये ऋद्धश्चासौ राजा-ऋद्धराजः, ऋद्धराजस्य कुलम्-ऋद्धराजकुलमित्येव भवति । चैत्रस्य गुरुकुलमित्यत्र गुरोः गुरुकुलमिति समासैकदेशे गुरौ चैत्रस्यान्वयस्तु सम्बन्धिशब्दस्य नित्यसापेक्षतया स्वीक्रियते । कारकस्येव सम्बन्धिभेदकस्यापि क्वचिदेकदेशान्वयस्वीकारात् । किंवा चैत्रस्य न गुरावन्वयः, किन्तु गुरुकुलरूपसमुदाय एव, कुले सम्बन्धो गुरुद्वारक एवेति नकुलान्तरप्रतीतिः । उक्तं च हरिणा—संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते । वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते । समुदायेन सम्बन्धो येषां गुरुकुलादिना । संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह । इति

वि ३. विगृह्यते समासार्थोऽवबोध्यतेऽनेनेति विग्रहः । वस्तुतोऽलौकिकविग्रह एव समासार्थविबोधकः, स न प्रयोगयोग्यः, लौकिकविग्रहस्तु एकार्थीभावाबोधकतया न समस्तपदसमानार्थः, केवलं तत्समानार्थकल्प इति समासार्थबोधकं वाक्यं विग्रह इत्युच्यते । उक्तं च हरिणा-अबुधान्प्रत्युपायाश्च विहिताः प्रतिपत्तये । शब्दान्तरत्वादत्यन्तं भेदो वाक्यसमासयोः । ततश्च समस्तशब्दानामर्थविशेषेषु रूढतया समासेऽपि शक्तिरिति वैयाकरणमतम् । पदशक्त्यैव निर्वाहान्न समासे शक्त्यन्तरं कल्प्यं, विशेषार्थबोधे तु अवयवपदे लक्षणया निर्वाह इति नैयायिकमतम् ।

प्राक्कडारात्समासः (२.१.३) कडाराःकर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते । अव्ययीभावस्तत्पुरुषो बहुव्रीहिर्द्वन्द्व इति समासश्चतुर्विध इति प्रायोवादः । तद्बहिर्भूतानामपि सह सुपा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामान्यसमासविधानात्। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्व इत्यपि प्राचां वादः प्रायोभिप्रायः। उत्तरप्रधाने सूपप्रति इत्यादौ अन्यप्रधाने उन्मत्तगङ्ग मित्यादावव्ययीभावे, अन्यप्रधाने अतिमालादौ तत्पुरुषे, उभयप्रधाने द्वित्रा इत्यादिबहुव्रीहौ, समाहारप्रधाने दन्तोष्ठमित्यादिद्वन्द्वे च तदभावात्। तत्पुरुषविशेषः कर्मधारयः तद्विशेषो द्विगुः। अनेक (बहु) पदत्वं द्वन्द्वबहुव्रीह्योरेव तत्पुरुषे तु द्वन्द्वजातइत्यादौ क्वचिदेव।

किञ्च-सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ सुपां-सुपा राजपुरुषः, तिङा पर्यभूषयत्, नाम्ना कुम्भकारः, धातुना कटप्रूः। तिङां-तिङा पिबत खादता, सुपा कृन्तविचक्षणा।

वि. १ समसनं समास इति भावे घञि अनेकपदस्यैकपदीभवनमिति, समस्यतेऽनेकं पदमिति अकर्तरिच कारके संज्ञामिति कर्मणि घञि एकीकृतं पदमित्यर्थः, तेनान्वर्थेयं संज्ञा। प्राग्ग्रहणादव्ययीभावादिसंज्ञान्तराणामपि समावेशः।

वि. २ राजपुरुष इत्यत्र राज्ञः पुरुष इत्यर्थे राजन् अस् पुरुष सु इत्यनयोः सुबन्तयोः, पर्यभूषयदित्यत्र परितोऽभूषयदित्युक्तोपसर्गस्याख्यातेन सह सुपेति योगविभागात्, कुम्भकार इत्यत्र कुम्भं करोतीत्यर्थे कुम्भ अम् इत्यस्य गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति कारेति नाममात्रेण सह, कटप्रूरित्यत्र कटं प्रुवते, इत्यर्थे कट अम् इत्यस्य क्विब्वचीत्यादिना प्रुधातुना सह, पिबतखादतेत्यत्र पिबत खादतेत्येवं यस्यां क्रियायां प्रवृत्तमित्यर्थे मयूरव्यंसकादित्वात्तिङन्तयोः, कृन्तविचक्षणेत्यत्र कृन्त (छिन्धि) विचक्षणेति यस्यां क्रियायां प्रवृत्तमित्यर्थे मयूरव्यंसकादित्वात्तिङ् सुपोः समासः। तिङां सुपा सुपां तिङेत्यनयोरैक्यात्पञ्चविधत्वमेवेति केचित्। पूर्वोत्तरपदयोर्जातिभेदाद्भेदेन षड्विधत्वं समासस्य युक्तमेवेत्यन्ये।

सामान्यसमास :—

सह सुपा (२.१.४) सुबिति पूर्वतोनुवर्तते। अधिकारोऽयम्। तेन द्वितीयाश्रितेत्यादौ द्वितीयान्तं समर्थसुबन्तं श्रितादिना समर्थसुबन्तेन सह समस्यते इत्याद्यर्थः। विधिरप्यसौ। सह-सुपेत्यनयो र्योगविभागः। सहेत्यस्य सुबन्तं समर्थेन सह समस्यते इत्यर्थः। तेन पर्यभूषयत् अनुव्यचलत् इत्यादौ उपसर्गाख्यातयोः समासः। स च छन्दस्येव न लोके। सुपेत्यस्य समर्थसुबन्तं सुबन्तेन सह समस्यते इत्यर्थः। यथा-पूर्वं भूत इत्यर्थे पूर्व अम् भूत सु इत्यनयोः समासे समासत्वेन कृत्तद्धितेति समुदायस्य प्रातिपदिकसञ्ज्ञायां, सुपो धातुप्रातिपदिकयोः (२.४.७१) एतयोरवयवस्य सुपो लुक् स्यात्। इत्यन्तर्गतविभक्त्योर्लुकि, प्रथमानिर्दिष्टं समास उपसर्जनम् (१.२.४२) समासे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्। उपसर्जनं पूर्वम् (२.२.३०) समासे उपसर्जनं प्राक्प्रयो-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्यम्। इति द्वयोः सुबन्तत्वेनात्र पूर्वनिपाते विनिगमनाविरहेऽपि भूतपूर्वे चरडिति निर्देशा-द्भूतशब्दस्य पूर्वनिपाते, नाममात्रशेषेणास्य एकदेशविकृतन्यायेन भूतपूर्वेतिसमस्तसमुदायस्य प्रातिपदिकत्वात्सुबाद्युत्पत्तिः। विशेषणत्वाद्विशेष्यस्यानुसारेण लिङ्गवचनादयः। भूतपूर्वः भूतपूर्वौ भूतपूर्वाः भूतपूर्वा भूतपूर्वे भूतपूर्वाः भूतपूर्वं भूतपूर्वे भूतपूर्वाणि इत्यादि। एवमन्यत्र। इवेन समासो विभक्त्यलोपश्च (वा) जीमूतस्येव। राजानमिव।

वि. १ सहसुपेत्यधिकारविधिः, स्वदेशे स्वतन्त्रविधिरपि। अधिकारेण समासविधायकशास्त्रेष्वेकवाक्यता। स्वतन्त्रविधौ सुपेतितृतीयैयैव सहार्थलाभे सहग्रहणं योगविभागार्थम्। तेन सुबन्तस्य सुबन्तेन सह, अन्येन सह समासोऽनेन विधीयते। अतश्चोपसर्गाख्यातयोरपि समासः। सोऽयं स्वरविशेषार्थमवग्रहार्थं च छन्दस्येव क्रियते, लोके तु न। अन्यथा प्रकुरुते इत्यादौ समासे ततः सुबाद्युत्पत्तिरापद्येत। क्लीबत्वमभिप्रेत्य सुपो लुकि कृतेऽपि ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्व आपद्येत। सुपेति योगविभागाद्विध्यन्तरैः समासाप्राप्तौ नैकधेत्यादौ समाससिद्धिः। उक्तं च भाष्यकृता-'सुपा अधिकारश्च लक्षणं च, यस्य समासस्यान्यलक्षणं नास्ति इदं तस्य लक्षणं भविष्यति, पुनरुत्स्यूतं वासो देयं पुनर्निष्कृतो रथ' इति।

वि. इवेन सह समासे विभक्त्यलोपे समासासमासयोर्वैरूप्याभावेऽपि समासप्रयुक्तान्तःस्वरविशेषार्थं समास उपयुज्यते; एकपदरूपेण लेख एव लोके विशेषः। इवेन सह समासस्य सहसुपेति सिद्धावपि इवशब्दस्य पूर्वनिपातनिवृत्त्यर्थं विशेषविधानम्। क्वाचित्कश्चायं समासः। अतएव बह्वृचाः पदपाठेऽवग्रहं समस्तविभागं कुर्वन्ति, याजुषास्तु भिन्ने एव पदे पठन्ति। लोके उद्बाहुरिव वामन इति व्यस्तप्रयोगोऽप्युपपद्यते।

अव्ययीभावसमासः—

अव्ययीभावः (२.१.५) अधिकारोऽयम्। अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावात्यय-सम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु (२.१.६) विभक्त्यर्थादिषु वर्तमानमव्ययं समर्थेन सुबन्तेन सह समस्यते, स च समासो ऽव्ययीभावः। विभक्तौ- हरौ इत्यर्थे हरि-ङि अधि-इत्यनयोः समासे समासस्य प्रातिपदिकसंज्ञायां सुपोधातुप्रातिपदिकयो-रिति ङिलोपे अधेरव्ययस्य अव्ययमिति समासविधायकशास्त्रे प्रथमानिर्दिष्टत्वेनोपसर्जनसंज्ञायां पूर्वं प्रयोगे अधिहरिशब्दात्स्वाद्युत्पत्तौ अव्ययीभावश्चेत्यव्ययसंज्ञायामव्ययादाप्सुप इति सुपो लुकि अधिहरि। गृहे इत्यर्थे समासे सुपो लुकि अधेरुपसर्जनत्वेन पूर्वप्रयोगे अधिगृह इति सुबुत्पत्तौ अव्ययत्वेन सुब्लुकि प्राप्ते, नाव्ययीभावादतोऽम्त्वपञ्चम्याः (२.४.८३) अदन्तादव्ययी-भावात्सुपो न लुक्, तस्य पञ्चमीं विना अमादेशश्च स्यात्। इति सुपो अमादेशे पूर्वरूपे अधि-गृहम्। तृतीयासप्तम्योस्तु-तृतीयासप्तम्योर्बहुलम् (२.४.८४) अदन्तादव्ययीभावात्तृतीयासप्तम्योः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुलमम्भावः स्यात्। इत्यमादेशे-अधिगृहम्। तदभावे तु सुपो लुगभावेन अधिगृहेण-अधिगृहे। पञ्चम्यां तु सुपो लुगभावेऽपि अमोऽभावेन अधिगृहात्। गोपायति गाः पातीति वा गोपाः, तस्मिन्नित्यर्थे समासे सुपो लुकि अधेः पूर्वप्रयोगे अधिगोपा, इतिजाते-अव्ययीभावश्च (२.४.१८) अयं नपुसकं स्यात्। इति नपुंसकत्वे, ह्रस्वोनपुंसकेप्रातिपदिकेस्येति आकारस्य ह्रस्वे सुबुत्पत्तौ नाव्ययीभावादित्यमादेशे अधिगोपम्। कुमार्या मित्यर्थे समासे सुपो लुकि अधेः पूर्वप्रयोगे अधि-कुमारी, इतिजाते एकविभक्ति चा पूर्वनिपाते (१.२.४४) विग्रहे यन्नियत विभक्तिकं तदुपसर्जनसंज्ञं स्यात् नतु पूर्वनिपातः। इति कुमारीशब्दस्योपसर्जनत्वे गोस्त्रियोरुपसर्जनस्य (१.२.४८) उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। इति ईकारस्य ह्रस्वे सुबुत्पत्तौ अव्ययत्वेन लोपे अधिकुमारि। एवम्, अधिवनम्, अधि-वनात्। अधिस्त्रि। अधिनगरम्, अधिनगरे। एव मुत्तरत्रापि उत्तरपदस्य दीर्घान्तत्वे स्त्रीप्रत्ययान्तत्वे च ह्रस्वत्व, मदन्तत्वे सुपो लुगभावोऽ मादेशोऽन्यत्र सुपो लुक् चेत्यनु सन्धेयम्। सामीप्ये-कृष्णस्य समीप मुपकृष्णम्, नगरस्य समीप मुपनगरम्; स्त्रियाः समीप मुपस्त्रि, ग्रीवायाः समीप मुपग्रीवम्। समृद्धौ-मद्राणां समृद्धि सुमद्रम्, मगधानां समृद्धिः सुमगधम्, काश्याः समृद्धिः सुकाशि। विगता ऋद्धिर्व्यृद्धिस्तत्र-यवनानां वृद्धि दुर्यवनम्। अर्थाभावो वस्त्वभावस्तत्र-मक्षिकाणा मभावो निर्मक्षि-कम्, मशकनाममभावो निर्मशकम्, जनानाममभावो निर्जनम्। अत्ययो भूतत्वं ध्वंसस्तत्र-हिमस्या-त्ययो निर्हिमम्, शीतस्यात्ययो निःशीतम्। असंप्रति सम्प्रत्ययोग्यता तत्र-निद्रा संप्रति नयुज्यते इति अतिनिद्रम्, शब्दस्य प्रादुर्भावः प्रकाशस्तत्र-हरिशब्दस्य प्रकाशः इतिहरि। पश्चादर्थे-रथानां पश्चादनुरथम्, विष्णोः पश्चादनुविष्णु। योग्यता वीप्सा पदार्था नतिवृत्ति (अनतिक्रमः) सादृश्यानि यथार्थाः। योग्यतायां-रूपस्य योग्य मनुरूपम्। वीप्सायाम्-अर्थं अर्थं प्रति-प्रत्यर्थम्, गृहं गृहं प्रति-प्रतिगृहम्, स्त्रियं स्त्रियं प्रति-प्रतिस्त्रि। अनतिवृत्तौ-शक्तिमनतिक्रम्य-यथाशक्ति, क्रम मनतिक्रम्य-यथाक्रमम्, विधि मनतिक्रम्य-यथाविधि। सादृश्ये-हरेः सादृश्य मित्यर्थे समासे अव्ययीभावे चा काले (६.३.८१) सहस्य सः स्यादव्ययीभावे नतुकाले। इति सहशब्दस्य सादेशे सहरि। आनुपूर्व्या मनुक्रम स्तत्र-जेष्ठस्यानुपूर्व्येण अनुजेष्ठम्, वृद्धस्यानुपूर्वेण अनुवृद्धम्। यौगपद्य मेककालता तत्र-चक्रेण युगपत्-सचक्रम्; सहशब्दस्य सादेशः, तृणेन युगपत्-सतृणम्। सादृश्ये गुणभूतेऽपि-सदृशः सख्या-ससखि। सम्पत्तौ-क्षत्राणां सम्पत्तिः-सक्षत्रम् (क्षत्रियाणामनुरूपं कर्म) सहस्य सः। साकल्यं निःशेषता तत्र-तृणमप्यपरित्यज्य सतृणम्, लोष्टमप्यपरित्यज्य सलोष्टम्। अन्तः समाप्ति स्तत्र-अग्निग्रन्थ पर्यन्तं साग्नि। अत्राव्ययमिति योगविभागेन क्वचिद्धि अव्ययार्थाभावेप्यव्ययस्य सुबन्तेन … समासः। यथा दिशयो र्मध्ये इत्यर्थे अपदिशम्, अपदिशेन, अपदिशे, अपदिशात्।

Jayatu Sanskritam, Kathmandu, Nepal

वि. १ विभक्तिर्नाम विभज्यतेनया प्रातिपदिकार्थ इति व्युत्पत्तेः कारकशक्तिः। वचनग्रहणं विभक्त्यादिषु सम्बध्यते। उच्यन्ते इति वचनाः। तेन विभक्त्यर्थादिषु वर्तमानमव्यय मित्यर्थः। एतत्सूत्रविहितसमासस्य नि सर्वत्रास्वपदविग्रहः। किन्तु प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्तद्योगे अर्थमर्थं प्रति-प्रत्यं द्वितीयागर्भं वाक्यमपि।

त्रि. २ प्रथमानिर्दिष्टमित्युपसर्जनसंज्ञा पूर्व प्रयोगार्था। एकविभक्तीति सा तु ह्रस्वाद्यर्था। गोस्त्रियो पसर्जनपदेन शास्त्रीयमेवोपसर्जनं गृह्यते नत्वप्रधानमात्रं। तेन कुमारी वाचरन ब्राह्मणः कुमारी इत्यादौ न अदन्तादव्ययीभावात्परस्य सुपो लुगभावः सर्वत्र, अपञ्चम्या अम् इति तु वाक्यान्तरम्। तेन पञ्चम्याममेव न लुगभावस्तु भवत्येव। तृतीयासप्तम्योरिति बहुलग्रहणात् सुमद्र मुन्मत्तगङ्ग मित्यादौ सप्तम्यां नित्यमम्भावः।

वि. ३ अधिहरीत्यादावधिः सप्तम्यर्थस्यैव द्योतकः। हरि ङि अधीत्यादिरलौकिकविग्रहः। निपातेनाभि करणस्योक्तत्वेपि अत्र सुपेत्यनुवर्त्य सुबन्तेन सह समासविधानसामर्थ्यात् सप्तमी। वस्तुतोऽनभिहत सूत्रभाष्ये कृत्तद्धितसमासै रेवाभिधानस्योक्ते र्निपातेनाभिधानेप्यनभिधानमेव। विषवृक्षोऽपीत्यत्र तु एष्टव्य इत्यध्याहारे वाभिधानं नत्वसाम्प्रतमिति निपातेनेति बोध्यम्।

वि ४. सामीप्ये-समया ग्रामम्, निकषा लङ्काम्, आराद्वनादित्यत्राव्ययीभावसमासस्तु-अभितः परितः अन्यारादिति च द्वितीयापञ्चम्यो र्विधानसामर्थ्या न्नभवति। समासे सतितु अव्ययस्य पूर्वप्रयोगाद् ग्रामं समयेत्यादि न स्युः। अर्थाभावशब्देनात्यन्ताभावस्यैव ग्रहणा द्घटः पटो नेत्यादा वन्योन्याभावे न समासः। अत्यय इत्यभावेना ग्रहान्न पौनरुक्त्यम्। पश्चादर्थे पश्चाच्छब्दस्य तु न समासः। ततः पश्चात्स्रंस्यते ध्वंस्यते इति प्रयोगात्। वीप्सायां वाच्याया मेव द्विर्वचनं, समासे तु प्रतिनैव वीप्साया द्योतना न्नद्विर्वचनमिति कैयटः। भक्षयतीत्यत्र तृणस्यापि भक्षणतात्पर्ये यौगपद्ये, तत्तात्पर्याभावेन पात्रपरिनिष्टसकलभक्षणस्यैवं तात्पर्ये तु समासः। तेन केवलसाहित्ये बोध्ये यौगपद्यार्थे अन्तसाहित्ये बोध्येतु अन्तवचनार्थे सहशब्दस्य समासः।

यथाऽसादृश्ये (२-१-७) असादृश्य एव यथाशब्दः समस्यते। तेनेह न-यथा हरिस्तथा हरेरुपमानत्वं यथाशब्दो द्योतयति। तेन सादृश्ये यथार्थे वा प्राप्तं समासो तेन निषिध्यते। वधारणे (२-१-८) अवधारण मियत्तापरिच्छेदः। तत्र यावच्छब्दः समस्यते। यावन्तश्लोका स्ता ऽच्युतप्रणामाः-यावच्छ्लोकम्। अनवधारणे तु न, यावद्दत्तं तावद्भुक्तम्। सुप्प्रतिना मात्रार्थे मात्रा लेशस्तत्र वर्तमानेन प्रतिना सुबन्तं समस्यते। शाकस्य लेशः-शाकप्रति। सूपस्य लेशः-सू सुबन्तस्य प्रथमा निर्दिष्टतया पूर्वप्रयोगेना व्ययोत्तरपदोऽयं समासः। अक्षशलाकासंख्याः (२-१-१०) अक्षशब्दः शलाकाशब्द संख्याशब्दश्च परिणा सह समस्यन्ते। द्यूतव्यवहारे एवायं समासः। अक्षेण विपरीतं वृत्तं-अक्षपरि। शलाकया विपरीतं वृत्तं-शलाकापरि। विपरीतं वृत्तं-एकपरि। अक्षादीनां पूर्वप्रयोगा दयमप्यव्ययोत्तरपदः।

वि. पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभि र्वा भवति। तत्र यदा सर्वे उत्ताना अवाञ्चो वा पतन्ति। तत्र ...विता जयति,। तस्यैवास्य विघातो ऽन्यथा पाते जायते, अक्षेणेदं न तथावृत्तं यथा पूर्वजये इति अक्षपरि, शलाका- ..., एकपरि, द्विपरि, त्रिपरि, चतुष्परि। पञ्चसु, एकरूपासु तु जय एव भविष्यति। इति काशिकाकारः।

विभाषा (२-१-११) अधिकारोऽयम्। एतत्सामर्थ्या देव प्रागुक्त समासानां नित्य समासत्वम्। सुप्सुपेति तु न नित्यसमासः। अव्ययंविभक्तीत्यादिसमासविधानाज्ज्ञापकात्। अप-परि-बहिर-ञ्चवः पञ्चम्या (२.१.१२) अपादयः पञ्चम्यन्तेन सह विभाषा समस्यन्ते। इत उत्तरं समासस्य वैकल्पिकत्वा त्स्वपदविग्रहः। विष्णोः-अप-अपविष्णु (विष्णुं वर्जयित्वा) संसारः। एवं परि-विष्णोः-परिविष्णु। बहिर्वनात्-बहिर्वनम्। प्राग्वनात्-प्राग्वनम्। आङ् मर्यादाभिविध्योः (२.१.१३) एतयोराङ् पञ्चम्यन्तेन वा समस्यते। आ मुक्तेः आमुक्ति (मुक्ति मर्यादीकृत्य) संसारः। आ बालेभ्यः आबालं (बालानप्यभिव्याप्य) हरिभक्तिः। आ पाटलिपुत्रात् आपाटलिपुत्रं वृष्टो देवः। आ कुमारेभ्यः आकुमारं यशः पाणिनेः। लक्षणेनाभिप्रती आभिमुख्ये (२.१.१४) लक्षणं चिह्नम्। आभिमुख्यद्योतकौ अभिप्रती चिह्नवाचिना सह वा समस्येते। अग्निमभि अभ्यग्नि; अग्नि प्रति प्रत्यग्नि शलभाः पतन्ति। (अग्निव्याप्यं तदभिमुखं च पतनम्। अग्नि लक्ष्यीकृत्य तदभिमुखं पतन्तीत्यर्थः) अनुर्यत्समया (२.१.१५) समया समीपम्। अनु र्यस्य समीपवाची तेन लक्षणभूतेन सह अनुर्वा समस्यते। गङ्गाया अनु-अनुगङ्गम् (गङ्गासदृशदैर्घ्योपलक्षिता) वाराणसी। यमुनाया अनु-अनुयमुनम् मथुरा।

वि. सुप्सुपेत्येव सिद्धौ अव्ययं विभक्तीत्यादि समासविधि सामार्थ्यादव्ययं विभक्तीत्यतः प्राग्विहितः समासो ऽनित्यः। ... विभाषाधिकारात्पूर्वं विहितो ऽव्ययीभावसमासो नित्यः। विभाषाधिकारपाती अव्ययीभावादिः सर्वःसमासो ..., इत्यनुसन्धेयम्। अपपर्यादीना मव्ययंविभक्तीत्यादिनैवसमासप्राप्तावपि वैकल्पिकत्वार्थं विभाषाधिकारे पुनः ...विधिः। बहिःशब्दयोगे पञ्चम्यप्राप्तवपि समासविधाना देवज्ञापका त्पञ्चमी।

वि २. अवधिभूतस्याग्रहणे मर्यादा,ग्रहणे त्वभिविधिः, तेन आमुक्तीत्यत्र मर्यादया मुक्तिकाले न संसारः। आबाल ...मभिविधिना बालेऽपि भक्तिः प्रतीयते।

वि ३. अभिप्रती आभिमुख्यम्, अनुवनमित्यादावनुः सामीप्यम्, अनुगङ्गमित्यादा वनुरायामं लक्ष्यलक्षण भावं च ...ति। वृक्षं प्रति, वृक्ष मनु, विद्योतते विद्युदित्यादौ प्रति रनुश्च लक्ष्यलक्षणभावमेव बोधयति नत्वाभिमुख्यं ...आयामं वेति न समासः।

तिष्ठद्गुप्रभृतीनि च (२.१.१७) एतानि निपात्यन्ते। तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु दोहनकालः। शत्रादेश समास-पुंवद्भाव-ह्रस्वाः। खले यवा यस्मिन्काले स खलेयवं कालः।

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं खलेबुसम्। लूनयवम्। लूयमानयवम्। पूतयवम्। पूयमानयवम्। संहृतयवम्। संह्रियमा-यवम्। एते कालविशेषबोधकाः शब्दाः। प्रगतो दक्षिणं-प्रदक्षिणम्।

वि. गणे तथा पाठ एवैषां शब्दानां निपातनम्। यावद्भिः कार्यै स्तथा शब्दस्वरूपं निष्पद्यते तावन्ति सूत्रा- प्राप्तान्यपि कार्याणि निपातने विधीयन्ते। तिष्ठद्गुशब्दे प्रथमासामानाधिकरण्येन शत्रादेशाप्राप्तेस्तस्यापि विधि- मन्यस्यापि। खले यवादीनि प्रथमान्तानि विभक्त्यन्तरेण नैव सम्बध्यन्ते, अन्यपदार्थे च काले वर्तन्ते। सूत्रे च- ऽवधारणार्थः। तेन समासादि वृत्यन्तरं न भवति। येन परमतिष्ठद्गु इत्यादि नैव भवति। सम्प्रति असम्प्रति- शब्दविशेषाअप्यस्मिन्गणे पठ्यन्ते।

पारे मध्ये षष्ठ्या वा (२.१.१८) पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते। षष्ठी सम- पवादः। पारमध्यशब्दयो रेकारान्तत्वं चानेन निपात्यते। गङ्गायाः पारं-पारेगङ्गम्। गङ्गा- मध्यं-मध्येगङ्गम्। वा कारेणाव्ययीभावविकल्पा त्पक्षे षष्ठीतत्पुरुषः। गङ्गापारम्। गङ्गाम- विभाषाधिकारात्तस्याप्यभावपक्षे वाक्यम्। गङ्गायाः पारम्। गङ्गायाः मध्यम्। एवं पारेस- पारेसमुद्रात्। मध्येसमुद्रं, मध्येसमुद्रात्।

वि. विभाषाधिकारे सत्येव पुनर्वाकारेण महाविभाषया एकार्थीभावस्य पाक्षिकत्वात्, तदभावे वाक्यमेव, तत्प- अव्ययीभाव विकल्पात्पक्षे अव्ययीभाव स्तदभावे षष्ठीतत्पुरुषः। अपवादाप्रवृत्तावुत्सर्गप्रवृत्तेः। तेन त्रैरूप्यम्। उ- त्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते इति चात्र वा कारेण ज्ञाप्यते। अ- पूर्वकाय इत्यत्र षष्ठीतत्पुरुषं बाधित्वा प्रथमातत्पुरुषान्महाविभाषया तदभावपक्षे पूर्वं कायस्येति वाक्यमेव। पुनः षष्ठीतत्पुरुष प्रवृत्तिः।

संख्या वंश्येन (२.१.१९) वंशो द्विधा विद्यया जन्मना च। आद्यो गुरुशिष्यपरम्परा। द्विती- कुलपरम्परा। वंशे भवो वंश्यः। तद्वाचिना सह संख्या वा समस्यते। द्वौ मुनी वं- (पाणिनिकात्यायनौ विद्याप्रवर्तकौ) इत्यर्थे विशेष्यविशेषणकर्मधारयं बाधित्वानेनाव्यय- द्विमुनि व्याकरणस्य। एवं त्रिमुनि व्याकरणस्य। विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकर- एकविंशति भारद्वाजाः (भरद्वाजकुलोद्भवाः) इत्यर्थे कर्मधारयं बाधित्वाऽव्ययीभावे एकविं- भारद्वाजम्। नदीभिश्च (२.१.२०) नदीभिः सह संख्या वा समस्यते। समाहारेचायमि- (वा) सप्तानां गङ्गानां समाहार इत्यर्थे द्विगुं बाधित्वाऽनेनाव्ययीभावे सप्तगङ्गम्। द्वयोर्यमु- समाहारः-द्वियमुनम्। सप्तानां गोदावरीणां समाहारः-सप्तगोदावरम्। संख्याया नदीगोदा- भ्यांचेति समासान्तोऽच्। पञ्चानां नदीनां समाहारः पञ्चनदम्। अन्यपदार्थे च संज्ञा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(२.१.२१) अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायाम्। उन्मत्ता गङ्गा यस्मिन् स इत्यर्थे उन्मत्तगङ्गं नाम देशः। एवं लोहितगङ्गम्। कृष्णगङ्गम्।

वि. नदीभिश्चेति नदीशब्देन नदीवाचकानां तद्विशेषवाचकानां च ग्रहणमिति संख्या संज्ञा सूत्रभाष्ये। अन्यपदार्थे चेत्यत्र विभाषाधिकारेपि वाक्येन संज्ञानवगमा देतद्विहितो नित्यसमासः। संज्ञायामित्युक्तेर्नेह-शीघ्रगङ्गो देशः। अव्ययीभावे तस्यैवं, समासान्तरेषु वहूनि रूपाणीत्यन्यपदार्थ प्राधान्ये समाहारप्राधान्ये उत्तरपदार्थ प्राधान्ये प्यव्ययीभावविधानानि, पारेमध्य इत्यादि विहितेऽव्यय शब्दाभावेपि समासोत्तर मव्ययीभवनेनान्वर्थतैव।

समासान्तादयः—

समासान्ताः (५.४.६८) आपादसमाप्ते रधिकारोऽयम्। अव्ययीभावे शरत्प्रभृतिभ्यः (५.४.१०७) शरदादिभ्य ष्टच्स्यात्समासान्तोऽव्ययीभावे। शरदः समीप मुपशरदम्। अव्ययंविभक्तीतिसमासे टचि समासान्तावयवे अदन्तत्वादम्। एवं प्रतिशरदम्। प्रतिदिशम्। यथामनसम्। शरदादयस्तु—शरद् विपाश् अनस् मनस् उपानह दिव् हिमवत् अनडुह दिश् दृश् चेतस् चतुर् यद् तद् कियत् इति। जराया जरस् च (ग) उपजरसम्। प्रतिपरसमनुभ्योऽक्ष्णः (ग) अक्षाणि प्रतीत्यर्थे समासे टचि यस्येतिचेति इकारलोपे प्रत्यक्षम्। अक्ष्णः परमित्यर्थे समासान्त विधानसामर्थ्यादव्ययीभावे टचि परोक्षे लिडिति निर्देशसामर्थ्या त्परस्यौकारादेशे अमि परोक्षम्। परोक्षा क्रिया परोक्षाणि वस्तूनि इत्यादि तु अर्शाद्यचि। अक्ष्णोर्योग्य मित्यर्थे समक्षम्। अक्ष्णोः पश्चादित्यर्थे अन्वक्षम्। अनश्च (५-४-१०८) अन्नन्तादव्ययीभावाट्टच् स्यात्। न स्तद्धिते (६.४·१४४) नान्तस्य भस्य टे र्लोपः स्यात्ताद्धिते। राज्ञः समीप मित्यर्थे समासे टचि टच स्तद्धितत्वेन पूर्वस्य भ संज्ञाया टेः अतो लोपे उपराज शब्दात्सुपि अमि उपराजम्। आत्मनि इत्यर्थे समासे टचि टिलोपे सुपि अमि अध्यात्मम्। नपुंसकादन्यतरस्याम् (५-४-१०९) अन्नन्तं यत्क्लीबं तदन्ताव्ययीभावाट्टज्वा स्यात्। चर्मणः समीप मित्यर्थे समासे अन्नन्त क्लीबत्वेन पक्षे टचि टिलोपे सुप्यमि उपचर्मम्, टजभावे टिलोपाम्भावयो रभावेन उपचर्म। एवं यथाकर्मम्, यथाकर्म अधिकर्मम्, अधिकर्म। नदीपौर्णमास्याग्रहायणीभ्यः (५.४.११०) एतदन्तादव्ययीभावाट्टज्वा स्यात्। नद्या समीप मित्यर्थे समासे टचि यस्येतिचेतोकार लोपे अमि उपनदम्, टजभावे उपनदि। नपुंसकत्वात् ह्रस्वः। उपपौर्णमासम्, उपपौर्णमासि। उपाग्रहायणम्, उपाग्रहायणि। झयः (४.४.१११) झयन्ता दव्ययीभावाट्टज्वा स्यात्। समिधः समीप मित्यर्थे समासे टचि अमि उपसमिधम्, टजभावे उपसमित्। उपदृषदम्-उपदृषत्। गिरेश्च सेनकस्य (५.४.११२) गिर्यन्तादव्ययीभावाट्टज्वा स्यात्। अन्यतरस्यामित्यनुवृत्तेः, सेनक

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रहणं पूजार्थम्। गिरेः समीपमित्यर्थे समासे टचि यस्येतिचेतीकारलोपे अमि उपगिरम्, टजभावे उपगिरि। अन्तर्गिरम्। अन्तर्गिरि।

वि. समासस्यान्तश्चरमावयवः समासान्तः। तेन उपशरद मित्यादौ टजन्तस्याव्ययीभावसमासत्वेना दन्तत्वा द... टचः समासानवयवत्वे तु तत पूर्वस्यैत्र समासत्वेनादन्तत्वाभावा दम् न स्यात्, अव्ययानां भ मात्रे टिलोपः, इतिटि... प्यापद्येत। समासान्त प्रत्ययाश्चालौकिकविग्रहवाक्ये उत्तरसुपः परस्तादेव भवन्ति; अत्र समासपदस्यालौकिक वि... वाक्यपरत्वात्। अतश्च बहुकुमारीक इत्यादौ गोस्त्रियोरिति ह्रस्वो न। अलौकिकविग्रहवाक्ये समाससंज्ञा समन... मेव समासान्ताः।

वि. अव्ययीभाव समासस्तु अव्यय पूर्वपदे अधिहरीत्यादिः, अव्ययोत्तरपदः शाकप्रतीत्यादिः, निरव्ययः पारे... मित्यादिश्चेति त्रिविधः।

प्रयोगा :—यथाक्रमं पुंसवनादिकाः क्रियाः। अध्यात्म मधिभूतंच। मध्ये समुद्रं ककुभः पि... र्या कुर्वती काञ्चनवप्रभासा। सविनयं निवेदयति। क्लीबाव्ययं त्वपदिशम्। निर्मक्षिकं जाय... पारेगङ्गं सैकतम्। प्रत्यक्षं भान्ति वस्तूनि।

प्रश्ना :—

अव्ययीभावसमासः, कीदृशः। विग्रहः कीदृशः। नित्यानित्यसमासयोः को विशेषः। समासपदार्थः कः समासे ... वैशिष्ट्यम्, समासविशेषाः के। अव्ययीभावे कस्य प्राधान्यम्। सामर्थ्यं कीदृक् समासे पूर्वप्रयोग नियमः कः। सामान्यसमा... कीदृशः। अधस्तन वाक्ये ष्वव्ययीभाव समासान्वर्णय—

यथाविधि कृतो यज्ञः। उपगिरं गहनं वनमीक्ष्यते। प्रतिदिनमुदये नवं नवम्। निर्मक्षिकं आशैशवं ते... मिदानीं संवृत्तम्। परोक्षमेतदज्ञानाम्। अध्यात्मं प्रेरय धियम्। प्रदक्षिणं वर्जस्व।

तत्पुरुषसमासः—

तत्पुरुषः (२-१-२२) अधिकारोयं प्राग्बहुव्रीहे। द्विगुश्च (२-१-२३) द्विगुरपि तत्पुरुष संज्ञः स्या... संख्यापूर्वो द्विगुश्चेति पठित्वा चकारवलेन संज्ञाद्वयसमावेशस्य सुवचत्वादिदं सूत्रं त्य... शक्यम्। स तत्पुरुषः प्रथमातत्पुरुषादिभेदाद् बहुविधः, पूर्वपदानुसारेण तन्नामानि।

वि. बहुव्रीहेः पूर्वमित उत्तरं विहितः समासस्तत्पुरुषसंज्ञः। तत्रापि समानाधिकरणसमासः कर्मधारयसंज्ञ स्तत्रा... संख्यापूर्वो द्विगु संज्ञः इतिद्विगौ द्विगुसंज्ञा तत्पुरुषसंज्ञा चोभयं नतु पर्यायोपवादो वा। तेन द्विगोरपि तत्पुरुषत्वेन पञ्चरा... मित्यादौ द्विगौ तत्पुरुषत्वप्रयुक्तष्टच्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकदेशिसमासतत्पुरुषः—

पूर्वापराधरोत्तर मेकदेशिनैकाधिकरणे (२-१-१) एकदेशी अवयवी। अवयवि वाचिना समर्थ सुवन्तेन सह अवयववाचिनः पूर्वादयः प्रथमान्ता समस्यन्ते, एकत्वसंख्याविशिष्टश्चेदवयवी सच समास स्तत्पुरुषः। षष्ठीतत्पुरुषापवादः। विशेषोक्तिवर्जमेतदादयः समासा विभाषाधिकाराद्वैकल्पिका स्तेन स्वपद विग्रह एव। पूर्वं कायस्येति लौकिक विग्रहे पूर्व सु काय ङस् अनयोः समासे समासत्वा-त्प्रातिपदिकसंज्ञायां सुपोधातुप्रातिपदिकयोः समासान्तः सुपो लुकि अवयव वाचिनः पूर्वादेः प्रथमा निर्दिष्टतयोपसर्जनसंज्ञायां पूर्वप्रयोगे समुदायात्प्रातिपदिका त्सुबुत्पत्तौ पूर्वकायः। परवल्लिङ्गंद्वन्द्व तत्पुरुषयोः (२-४-२६) एतयोः परपदस्येव लिङ्गं स्यात्। इति समस्तस्य उत्तरपदसमालिङ्गता। एवं अपरः कायस्य-अपरकायः। अधरमङ्गस्य-अधराङ्गम्। उत्तर मङ्गस्य-उत्तराङ्गम्। पूर्वं शरीरस्य-पूर्वशरीरम्। अवयविनो बहुत्वान्नेह-पूर्वश्छात्राणाम्, सर्वोप्येकदेशो ऽन्हा समस्यते संख्याविसायेति समासेऽन्हादेशविधानाज्ज्ञापकात्। मध्य मन्हः-मध्यान्हः। एकदेशोत्तराहन्शब्दस्य अन्होन्ह एतेभ्य इत्यन्हादेशः। रात्रान्हाहाः पुंसोति पुंलिङ्गता च। एवं सायमन्हः-सायान्हः। अपर मन्हः-अपरान्हः। पूर्व अन्हः- पूर्वान्हः। केचित्तु ज्ञापकस्य सामान्या पेक्षत्वात्सर्व एकदेशः कालेन समस्यते न त्वन्हैव इति वदन्ति। तेन मध्यं रात्रेः-मध्यरात्रः। अहः सर्वैकदेशसंख्यातपुण्या च्च रात्रे रिति समासान्तोऽच रात्रान्हाहाः पुंसोति पुलिङ्गता च। एवमुत्तरं रात्रेः उत्तररात्रः। पश्चिमं रात्रेः-पश्चिमरात्रः। अर्धं नपुंसकम् (२-२-२) समांशवाच्यर्धशब्दो नित्यं क्लीबे, स अवयवि वाचिना एकाधिकरणेन (एक-बोधकेन) सुवन्तेन सह समस्यते। अर्धं पिप्पल्या इति विग्रहे समासे सुब्लोपे अर्धशब्दस्य पूर्वप्रयोगे सुबुत्पत्तौ परवल्लिङ्गत्वे अर्धपिप्पली। (पिप्पल्याः समार्धभागः) एकविभक्तावषष्ठ्यन्तवचनम्। (वा) इति एकविभक्तिचापूर्वनिपात इतिसूत्रे एकदेशि समास विषये षष्ठ्यन्तस्य उपसर्जन संज्ञा निषेधान्नियत विभक्तित्वेपि पिप्पलीशब्दस्यो पसर्जनसंज्ञाया अभावेन गोस्त्रियोरिति ह्रस्वं न। एव मर्धं कोशातक्याः-अर्धकोशातकी। अर्धं हरीतक्याः-अर्धहरीतकी। अर्धं शरीरस्य-अर्धशरीरम्। बहुत्वेतु न-अर्धं पिप्पलीनाम्। अंशवाचिनोर्धशब्दस्य तु पुंलिङ्गतया षष्ठीतत्पुरुष एव। षष्ठ्यन्तस्य पूर्वप्रयोगः-ग्रामस्य-अर्ध-ग्रामार्धः। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् (२-२-३) एतान्येकदेश-वाचिना सुवन्तेन सह प्राग्वद्वा। द्वितीयं भिक्षाया इत्यर्थे समासे द्वितीयस्य पूर्वप्रयोगे परवल्लिङ्गतायां द्वितीयभिक्षा (भिक्षाया द्वितीयांशः)। अन्यतरस्या मित्युक्तिसामर्थ्या त्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीतत्पुरुषे भिक्षाद्वितीयम्। विभाषाधिकारात्पक्षे वाक्यमपि। एवं तृतीयं भिक्षाया-स्तृतीय भिक्षा, चतुर्थभिक्षा, तुर्यभिक्षा। प्राप्तापन्ने च द्वितीयया (२-२-४) प्राप्तापन्नशब्दौ द्वितीयान्तेन सह समस्येते। प्राप्तो जीविकां-प्राप्तजीविकः। नियतविभक्तित्वेन जीविकाशब्दस्योपसर्जनत्वाद् गोस्त्रियो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रितिह्रस्वः, द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गता निषेधश्च। आपन्नो जीविकामापन्नजीविकः। प्राप्तापन्नयो द्वितीयाश्रितेति द्वितीयातत्पुरुषविधानसामर्थ्यात्पक्षे सोपि समासः। तत्र तु द्वितीयान्तस्य प्रथमानिर्दिष्टत्वेन पूर्वप्रयोगः। जीविकाप्राप्तः। जीविकापन्नः। इह सूत्रे द्वितीयया अ इति छेदेन अकारोपि विधीयते। तेन प्राप्ता जीविकामित्यर्थे पूर्वपदे अकारस्यापि विधानात् प्राप्तजीविका स्त्री। आपन्नजीविका नारी। कालाः परिमाणिना (२-२-५) परिच्छेद्यं परिमाणि। परिच्छेद्यवाचिना सुबन्तेन सह विशेषवाचिनः कालाः समस्यन्ते। मासो जातस्य-मासजातः। (जातः परिच्छेदको मासः अर्थात् मासपरिच्छिन्नोजातः) द्वयो रन्होः समाहारो द्व्यहः, द्व्यहो जातस्य विग्रहे द्व्यहजातः। उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम् (वा)द्वे अहनी जातस्य यस्य सः इत्यर्थे त्रयाणां समासे सुब्लुकि द्व्यहन् जात इति जातशब्दे उत्तरपदे परे द्व्यहन् शब्दयो स्तद्धितार्थोत्तरपदसमाहारेचेति द्विगौ राजाहःसखिभ्यष्टजिति टचि अन्होऽह एतेभ्य इत्यन्हादेशे द्व्यन्हजातः। द्व्यह इत्यत्र तु नसंख्यादेः समाहार इत्यन्हादेशनिषेधः।

वि॰ प्रथमान्त पूर्वपदः प्रथमा तत्पुरुषः। पूर्वापरादिकृतोऽशांशिवाचिनोः समास एकदेशि समास इत्युच्यते। अर्थभेदादत्र षष्ठीतत्पुरुषे प्रथमातत्पुरुषे च पूर्वप्रयोगविशेषः। अर्धशब्दस्य समांशवाचिनः क्लीबत्वाद्भागमात्रवाचिनः पुंस्त्वात्पूर्वत्र प्रथमातत्पुरुष उत्तरत्र षष्ठीतत्पुरुषः। पूर्वप्रयोगे विशेषः समस्तस्य लिङ्गविशेषो पि। एकदेशि समासे उत्तरपदस्यैक वचनान्तत्वं सर्वत्रापेक्ष्यते तेन द्वितीयं भिक्षाणामित्यादौ न समासः। द्व्यन्हजात इत्यत्र त्रयाणां तत्पुरुषं विना उत्तरपदे परे पूर्वयो द्विगुर्न तं विना अन्ह टच् अन्हादेशश्च न सिद्ध्यतीति त्रयाणां तत्पुरुषस्तदन्तर्द्वयो द्विगुरिति समासद्वयं युगपत्।

प्रयोगा :—द्व्यन्हजाते शिशौ मृते। अर्धाङ्गं वातदूषितम्। उपारता पश्चिम रात्रगोचराद्। अर्धशरीरं स्त्री। पूर्वान्हे गायत्रीं मध्यान्हे सावित्रीं सायान्हे सरस्वतीं ध्यायेत्। अर्धरात्रा दिनम्। चूड़ा त्रिवर्षजातस्य। प्राप्तापदः का धृतिः। अपराह्णः पितृणां स्यात्। समांशोऽर्ध मतम्। अर्धमास महं स्थितः। चिराय प्राप्तजीविकः।

द्वितीयातत्पुरुषः—

द्वितीया-श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नैः (२-१-२४) द्वितीयान्तं समर्थसुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स तत्पुरुषः। कृष्णं श्रितः इत्यर्थे समासे सुपो लुकि प्रथमानिर्दिष्टस्य पूर्वप्रयोगे समस्तात् सुबुत्पत्तौ परवल्लिङ्गतायां कृष्णश्रितः। दुःख मतीतः (अतिक्रान्तः)—दुःखातीतः। नरकं पतितः (गतः)—नरकपतितः। ग्रामं गतः-ग्रामगतः। ग्राम मत्यस्तः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(अतिक्रान्तः)-ग्रामात्यस्तः। सुखं प्राप्तः सुखप्राप्तः। दुःखमापन्नः (प्राप्तः)-दुःखापन्नः। गम्यादीनामुपसंख्यानम् (वा) ग्रामं गमी (गमिष्यन्)-ग्रामगमी। अन्नं बुभुक्षुः (भक्षणेच्छुः)-अन्नबुभुक्षुः। स्वयं क्तेन (२-१-२५) स्वयमिति सुबन्तमव्ययं क्तान्तेन सुबन्तेन सह वा समस्यते। स्वयं धौतौ-स्वयंधौतौ पादौ। स्वयं विलीनं-स्वयंविलीनमाज्यम्। ऐकपद्यं स्वरभेदश्च समासे विशेषः। तेन स्वयङ्कृतस्यापत्यं स्वायङ्कृति। स्वयमित्यात्मने इत्यर्थकतया अयोग्यत्वाद्द्वितीयेति नेह सम्बध्यते। खट्वा क्षेपे (२-१-२६) द्वितीयान्तः खट्वाशब्दः क्तान्तेन सुबन्तेन सह समस्यते निन्दायाम्। समास एव निन्दावगमान्नित्यसमासः। खट्वामारूढ इतिविग्रहे खट्वा अम् आरूढ सु इत्यलौकिकविग्रहे समासे खट्वारूढः (जाल्मः) असमीक्ष्यकारीजाल्मः। खट्वामारूढ इत्यत्रवाक्ये तु न निन्दागम्यते। सामि (२-१-२७) सामीत्यव्ययमर्धवाचि। सामीत्यव्ययं क्तान्तेन सह वा समस्यते। सामिकृतम् (अर्धकृतम्) सामिपीतम्। सामिभुक्तम्। सामीत्यव्ययवाचिनो द्वितीयान्तत्वाभावेनायोग्यत्वाद्द्वितीयेति नेह सम्बध्यते। ऐकपद्यं स्वरभेदश्च समासे विशेषः। कालाः (२-१-२८) कालविशेषवाचिनो द्वितीयान्ताः क्तान्तसुबन्तेन सह वा समस्यन्ते। अत्यन्तसंयोगे (व्याप्तौ) उत्तरसूत्रेणसिद्धेः अनत्यन्तसंयोगार्थमिदं वचनम्। मासं प्रमितः (मासं परिच्छेत्तु मारब्धवान्) मासप्रमितः प्रतिपच्चन्द्रः। अहः संक्रान्ताः अहःसंक्रान्ताः। अत्यन्तसंयोगे च (२-१-२९) अत्यन्तसंयोगो व्याप्तिः। अत्यन्तसंयोगे गम्यमाने कालविशेषवाचिनो द्वितीयान्ताः सुबन्तेन सह वा समस्यन्ते। मुहूर्तं (मुहूर्तमभिव्याप्य) सुखं-मुहूर्तसुखम्। सर्वरात्रं कल्याणी-सर्वरात्रकल्याणी। वर्षं भोग्यः वर्षभोग्यः। दिनं विकासि दिनविकासि पुष्पम्।

वि. पतित इति पत्लृगता वित्यस्यैव नतु पत्लृ पतने इत्यस्य, तस्याकर्मकत्वात्। खट्वारूढ इति समास एवनिन्दावगमान्नित्यसमासः। अधीत्य स्नात्वा गुरुभि रनुज्ञातेन खट्वारोढव्या य इदनी मतोन्यथाकरोति स उच्यते खट्वारूढोऽयं जाल्म इतिभाष्यकारः। असमीक्ष्यकारिणि रूढश्चायं, तेन खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः सर्वोपिस्वर्थोच्यते। कालविशेषवाचिनां व्याप्ते रबोधने क्तान्तेन सह, तद्बोधनेतु सर्वैः सुबन्तैः सह समास इति सूत्रद्वयार्थः।

प्रयोगाः—शापेनास्तं गमित महिमा वर्षभोग्येन भर्तुः। मुहूर्तसुखमिच्छति। स्वयंदत्तं नापहरेत्। खट्वारूढो नाद्रियते। दुःखातीतः सुखीमतः। चिरेणाहं ग्रामगमी। उद्धरे त्कूपपतितम्।

तृतीयातत्पुरुषः—

तृतीया तत्कृतार्थेन गुणवचनेन (२-१-३०) तत्कृत इति लुप्ततृतीयाकम्। तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह वा समस्यते, स तत्पुरुषः। शङ्कुलया (छुरिकया) खण्डः-शङ्कुला-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डः (शष्कुलया खण्डीकृतः पदार्थः) विद्यया चतुरः-विद्याचतुरः विवेकेन धीरः-विवेकधीरः। धान्येनार्थः-धान्यार्थः (धान्यहेतुकं धनम्) तत्कृतेत्युक्तेर्नेह-अक्ष्णा काणः। गुणवचनेत्युक्तेर्नेह धान्येन धनवान्। पूर्व-सदृश-समोनार्थ-कलह-निपुण-मिश्रश्लक्ष्णैः (२-१-३१) तृतीयान्तं पूर्वादिभिः सुबन्तैः सह वा समस्यते। मासेन पूर्वः-मासपूर्वः। संवत्सरेण पूर्वः-संवत्सरपूर्वः। मात्रा सदृशः-मातृसदृशः। पित्रा समः-पितृसमः। माषेणोनं-माषोनं कार्षापणम्। पादेन विकलः-पादविकलः सेटकः। वाचा कलहः-वाक्कलहः। शस्त्रेण कलहः-शस्त्रकलहः। आचारेण निपुणः-आचारनिपुणः। वाचा निपुणः-वाङ्निपुणः। गुडेन मिश्रः-गुडमिश्रः। तिलेन मिश्रं-तिलमिश्रमोदनम्। मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम्; मिश्रं चानुपसर्गमसन्धावित्यत्रानुपसर्गग्रहणात्। गुडेन संमिश्राः-गुडसंमिश्रा धानाः। आचरेण श्लक्ष्णः (कुशलः)-आचारश्लक्ष्णः। वाचा श्लक्ष्णः-वाक्श्लक्ष्णः। अवरस्योपसंख्यानम् (वा) मासेनावरः (पूर्वः)-मासावरः। अवरस्योनार्थकत्वे तू नार्थेत्यनेनैवग्रहः। कर्तृकरणे कृताबहुलम् (२-१-३२) कर्तरिकरणे च तृतीया कृदन्तेन सह बहुलं वा समस्यते। हरिणा त्रातः-हरित्रातः। सर्पेण हतः-सर्पहतः। नखैर्भिन्नः-नखभिन्नः। परशुना छिन्नः-परशुछिन्नः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् (प) नखैर्निर्भिन्नः-नखनिर्भिन्नः। बहुलग्रहणम् सर्वोपाधिव्यभिचारार्थम्। तेन क्वचित्कर्तृकरणतृतीयान्तमपि न समस्यते, क्वचिद्विभक्त्यन्तरमपि समस्यते। यथानेह-दात्रेण लूनवान्, परशुना छिन्नवान्। इहापि भवति पादाभ्यां (पञ्चम्यन्तं) हारकः-पादहारकः। कृत्यै रधिकार्थवचने (२-१-३३) स्तुतिनिन्दा प्रयुक्त मारोपितार्थवचनमधिकार्थवचनम्। तत्र कर्तरि करणे च तृतीया कृत्यान्तैः सह वा समस्यते। वातेन छेद्यं-वातछेद्यं तृणम् (कोमलत्वेन स्तुतिः) काकैः पेया-काकपेया नदी (निन्दा)। श्वभि र्लेह्यः-श्वलेह्यः (कूपः)। अन्नेन व्यञ्जनम् (२-१-३४) संस्कार्यमन्नं, संस्कारकं व्यञ्जनम्। व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह वा समस्यते। दध्ना ओदनः-दध्योदनः। (दध्युपसिक्त ओदनः) क्षीरेणौदनः-क्षीरौदनः। भक्ष्येण मिश्रीकरणम् (२-१-३५) खरविशद (कठिनंविभक्तावयवं) मभ्यवहार्यं भक्ष्यम्। मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन सह वा समस्यते। गुडेन धानाः-गुडधानाः (गुडमिश्रिता धानाः-भृष्टयवाः)

वि. पूर्वसदृशेति पूर्वादियोगे समासविधानाज्ज्ञापका त्तृतीया, हेतौ वा तृतीया, समार्थे योगे तु तुल्यार्थैरतुलोपमाभ्याम् इति तृतीया सिद्धा। सदृशसमयो पृथगुक्ते रर्थशब्दः ऊनेनैव सह सम्बध्यते। "कृत्यैरधिकार्थवचने इति कर्तृकरणे कृतेत्यस्यैव प्रपञ्चः। कृत्यग्रहणे ण्यण्ण्यतोर्ग्रहणम् इह माभूत- काकैः पातव्या" इति काशिकाकारः। दध्योदन इत्यादा वन्तर्भूतोपसेचन क्रियाद्वारा, गुडधाना इत्यादावन्तर्भूत् मिश्रणक्रियाद्वारा सामर्थ्यम् दध्युपसिक्तौदनः, गुडमिश्रधाना इत्यर्थः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—शस्त्रकलहाद्वाक्कलहोवरम्। वातच्छेद्यानि तृणानि गोभ्यःप्रियाणि। काकपेयायां नद्यां स्नानं गर्ह्यम्। क्षीरौदनेन पुष्टोसौ। काकेभ्यो दध्योदनं दीयताम्। हरित्रातो गजो ग्राहविमुक्तः। सर्पदष्टस्य संमोहः।

चतुर्थीतत्पुरुषः—

चतुर्थी तदर्थार्थ-बलि-हित-सुख-रक्षितैः (२-१-३६) तस्मै इदं तदर्थम्। चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थादिभिश्च सुबन्तैः सह चतुर्थ्यन्तं वा समस्यते स तत्पुरुषः। तादर्थ्ये प्रकृतिविकृतिभाव एव। बलिरक्षितयोः पृथग्ग्रहणात्। यूपाय (यज्ञियस्तम्भ विशेषार्थ) दारु-यूपदारु। कुण्डलाय हिरण्यं-कुण्डलहिरण्यम्। तादर्थ्ये पि प्रकृतिविकृतिभावाभावान्नेह-पाकायस्थाली, अवहननायोलूखलम्। अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् (वा) तेनास्वपदविग्रहः। द्विजायायं—द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। गृहार्थानि काष्ठानि। भूतेभ्यो बलिः-भूतबलिः। देवेभ्यो बलिः-देवबलिः। गवे हितम्-गोहितम्। लोकेभ्यो हितं-लोकहितम्। गोभ्यः सुखं-गोसुखम्। पित्रे सुखं-पितृसुखम्। गवे रक्षितं-गोरक्षितम्।

वि. सामान्यतादर्थ्ये विवक्षिते भूतवलि गौरक्षितमित्यादावपि समाससिद्धौ पुनस्तद्ग्रहणेन तादर्थ्येपि प्रकृति विकृति भाव एवायं समासो ज्ञाप्यते। हितसुखयो स्त्वतादर्थ्येपि चतुर्थीचाशिषीति चतुर्थी भवतीति तद्ग्रहणं तु ज्ञापकम्। यूपदार्वित्यादौ यूपादिर्विकृतिर्दार्वादिः प्रकृतिरिति तादर्थ्ये समासः। अश्वघास इत्यादौ तु प्रकृतिभावाभावेन न चतुर्थीसमासः किन्तु अश्वस्य घास इति षष्ठीतत्पुरुष एव। चतुर्थ्या तादर्थ्यं, षष्ठ्या सम्बन्धमात्रं कथ्यते इति दाशरथये मैथिली, न माषाणमश्नीथादित्यादयः प्रयोगा विवक्षातो निर्वहन्ति।

प्रयोगाः—सर्वथा स्वहितमाचरणीयम्। महात्मनां लोकहिते प्रवृत्तिः। पुण्यार्था माषाः। गृहेष्टकानां निचयः प्रधूप्यते। यूपकाष्ठानि तक्षानि। भवदर्थमिह निरुद्धं नास्त्यं सीतास्वयंवरणम्।

पञ्चमीतत्पुरुषः—

पञ्चमी भयेन (२-१-३७) पञ्चम्यन्तं भयशब्देन सुबन्तेन सह वा समस्यते स तत्पुरुषः। चोराद्भयं-चोरभयम्। व्याघ्राद्भयं-व्याघ्रभयं। भयभीतभीतिभिरिति वाच्यम् (वा) वृकाद्भीतः-वृकभीतः, वृकभीतिः, वृकभीः। एवं राजभयम्। अग्निभीतिः। दुर्भिक्षभीः। अजभयम्। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः (२-१-३८) अपेतादिभिः सुबन्तैः अल्पं (कतिपयं) पञ्चम्यन्तं वा समस्यते। सुखा दपेतः-सुखापेतः। धर्मा दपेतः-धर्मापेतः। कल्पनाया-अपोढः (अपगतः)—कल्पनापोढः। दुःखान्मुक्तः—दुःखमुक्तः। बन्धनान्मुक्तः—बन्धनमुक्तः। स्वर्गा त्पतितः—स्वर्ग-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पतितः। जातेःपतितः—जातिपतितः। तरङ्गा दपत्रस्तः—तरङ्गापत्रस्तः। अल्पश इत्युक्ते नेह, प्रासादा त्पतितः। भोजना दपत्रस्तः। **स्तोकान्तिक-दूरार्थ-कृच्छ्राणि क्तेन** (२-१-३९) स्तोकान्तिक-दूरार्थकाः कृच्छ्रशब्दश्च पञ्चम्यन्ताः क्तान्तेन सुबन्तेन सह वा समस्यन्ते। स्तोकात् मुक्तः-स्तोकान्मुक्तः। पञ्चम्याः स्तोकादिभ्य इत्यलुक्। एवं अल्पान्मुक्तः। अन्तिकादागतः। समीपा-दागतः। दूरादागतः। विप्रकृष्टादागतः। कृच्छ्रान्मुक्तः। कृच्छ्राल्लब्धः।

वि. भीतभीतिभीरिति कर्तृकरणेक्तताबहुलमिति बहुलग्रहणस्यैव प्रपञ्चः। क्वचिदप्राप्तावपि प्रवृत्तिः क्वचिदप्राप्तावप्य प्रवृत्ति श्च बहुलग्रहणेन भवति। तेन ग्रामा न्निर्गतः–ग्रामनिर्गतः। अधर्मा ज्जुगुप्सुः–अधर्मजुगुप्सुः। मार्गाद्भ्रष्टः-मार्गभ्रष्टः। भोगादुपरतः–भोगोपरतः। इत्याद्यपि सिध्यति। सुप्सुपेति वा समासः। दूरागतेन पृष्टा सा मयाकिञ्चित् कृच्छ्रलब्धे शिशौमृते इति तु दूरमागतः कृच्छ्रेण लब्धे इत्यर्थे विभक्त्यन्तरसमास ऊहनीयः। "शत सहस्रे परेणेति वक्तव्यम्। शतात्परे-परःशता। सहस्रात्परे-परःसहस्राः। राजदन्तादित्वात्परनिपातः, निपातनात्सुडागमश्चेति काशिकायाम्।

प्रयोगा :—नाग्निचौरभयं तत्र। नच मारीभयं तस्य। धर्मापेतं वचस्त्याज्यम्। मार्गभ्रष्टं विनङ्क्षति। प्रत्यक्षं-कल्पनापोढम्। पञ्जरमुक्तः कीरः। अन्तिकादागतो विद्वान्। गुणापेतं न वक्तव्यम्।

षष्ठीतत्पुरुषः—

षष्ठी (२-२-८) षष्ठ्यन्तं समर्थसुबन्तेन सह वा समस्यते स तत्पुरुषः। राज्ञः पुरुष-राजपुरुषः। समासे सुब्लुकि प्रत्ययलक्षणेन लुप्तान्तर्विभक्तिमाश्रित्य पदत्वेन नलोपःप्रतिपदिकान्तस्येति नलोपः। राज्ञोऽश्वः-राजाश्वः। नलोपस्य नलोपःसुप्स्वरेत्यसिद्धत्वाभावा त्सवर्णदीर्घः। तव वस्त्रं-त्वद्वस्त्रं। मम गृहं-मद्गृहम्। त्वमावेकवचन इत्येकवचने मपर्यन्तस्य त्वमादेशौ। युष्माकं गृहं–युष्मद्गृहम्। अस्माकं पिता–अस्मत्पिता। मृगाः पदं–मृगपदम्। काक्याः शावः काकशावः। कुक्कुटादीनामण्डादिष्विति पुंवद्भावः। एवं तत्पुत्रः, वृक्षशाखा, राजसदनम्, आम्रफलम्। **याजकादिभिश्च** (२-२-९) याजकादिसुबन्तैः सह षष्ठ्यन्तं वा समस्यते। तृजकाभ्यामिति निषेधस्य प्रतिप्रसवः। याजक-पूजक-परिचारक-परिवेषक-स्नातकाध्यापको-त्पादको–द्वर्तक–होतृ–पोतृ–भर्तृ प्रभृतयो याजकादयः। ग्रामस्य याजकः—ग्रामयाजकः। देवानां पूजकः- देवपूजकः। राज्ञः परिचारकः- राजपरिचारकः। एवं व्रतस्नातकः, अन्तपरि-वेषकः। वेदाध्यापकः। दुःखोत्पादकः। अङ्गोद्वर्तकः। आज्यहोता। भूभर्ता। कृद्योगा च षष्ठी समस्यते इति वाच्यम् (वा) कर्तृकर्मणोः कृतीति षष्ठी कृद्योगा। प्रतिपद विधानेति निषेधस्य प्रतिप्रसवः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इध्मस्य प्रव्रश्चनः (छेदकः) इध्मप्रवश्चनः कुठारः। पलाशानां शातनः (घातकः)-पलाशशातनः। नित्यं क्रीड़ा जीविकयोः (२०-२१-७) एतयो रर्थयोरकेन सह षष्ठी नित्यं समस्यते। क्रीड़ायां विकल्पे जीविकायां तृजकाभ्यामिति निषेधे प्राप्ते वचनम्। उद्दालकः, श्लेष्मातकस्तस्य: 'पुष्पाणि भज्यन्ते यस्यां क्रीड़ायां सा—उद्दालकपुष्पभञ्जिका। संज्ञायामितिभावे ण्वुल्। समासार्थः क्रीड़ा जीविका च, तत्स्थैश्च गुणैः षष्ठी समस्यत इति वाच्यम् (वा) द्रव्यवाचकं षष्ठ्यन्तं तत्स्थ-गुणवाचिना सुबन्तेन सह समस्यते इत्यर्थः। पूरणगुणेति निषेधस्य प्रतिप्रसवः। ब्राह्मणस्य वर्णः-ब्राह्मणवर्णः। चन्दनस्य गन्धः-चन्दनगन्धः। एवं नदीघोषः। पादशब्दः। आम्ररसः। गुणात्तरेण तरलोपश्चेति वक्तव्यम् (वा) तरबन्तेन गुणवाचिना सह षष्ठ्यन्तः सर्वशब्दः समस्यते तरलोपश्चेत्यर्थः। ननिर्धारण इति पूरणगुणेति च निषेधस्य प्रतिप्रसवः। सर्वेषां श्वेततरः-सर्वश्वेतः। सर्वेषां महत्तरः-सर्वमहान्। एवं सर्वशुक्ला गौः। सर्वकृष्णोऽङ्गारः।

वि.१ निषेधे प्राप्ते तदपवादकं पुनर्विधानं प्रतिप्रसवः। अभ्येन निवर्तितस्य पुनः प्रवृत्त्यभ्यनुज्ञानमिति यावत्।

वि.२ तत्स्थैश्च गुणै नंतु तद्विशेषणै रितिवार्तिकं षष्ठी सूत्रभाष्ये। अत्र तच्छब्देन गुणपरामर्शाद् द्रव्यात्पृथ-गात्मनि स्थितै रित्यर्थः। गन्धादि पदार्थाः चन्दनं गन्ध इति द्रव्यसामानाधिकरण्याभावेन केवलगुणमात्र-व्यवस्थिताः क्वचित् वहति जलमियं पिनष्टि गन्धानित्यत्रापि गन्धशब्दो नगुणिपरोऽपितु पुष्पादि लक्षक इति तत्स्थतया ग्रहाच्चन्दनगन्ध इत्यादिः समासः। शुक्लादयस्तु पटस्य शुक्ल इत्यत्र गुणार्थत्वेपि शुक्लः पट इति द्रव्यसामा-नाधिकरण्येनापि व्यवह्रियमाणतया न स्वात्मन्यवस्थिता इति नेह गृह्यन्ते अतो वस्त्रस्य शुक्ल इत्यादौ न समासः। वलाकायाः शुक्ल मित्यादौ शौक्ल्यस्य द्रव्यात्पृथग्भावेपि तस्यैव शौक्ल्यस्य शुक्लः इति द्रव्यसामानाधिकरण्येनापि प्रतीतेस्तत्स्थ-त्वाभावान्न समासः। रूपस्य तु रूपवान् पटइति मत्वर्थमादायैव द्रव्यसामानाधिकरण्यं स्वतस्तु द्रव्यात्पृथग्भाव एवेति तत्स्थत्वेन ग्रहात्पटरूपमिति समासः। तथाच प्राधान्येनाऽप्राधान्येन वा द्रव्याप्रतिपादकत्वे सति गुणप्रतिपादकत्वं तत्स्थगुणवाचित्वमिति पर्यवस्यति। तादृशस्थले समासः। नतु तद्विशेषणै रित्युक्त्या घृतस्य तीव्रो गन्धः चन्दनस्य मृदुर्गन्ध इत्यादौ तीव्रमृद्वादिपदैःसह नसमासः, तीव्रोघृतगन्धः मृदुश्चन्दनगन्धः इतिभवत्येव। एष भाष्यवार्तिकाशयः पद-मञ्जर्यां स्फुटं कृता विवृतः। गुणात्तरेणेतिवार्तिकं तु सर्वं गुणकार्त्स्न्ये इति सूत्रभाष्योक्ततया सर्वशब्देन सह समासविषयकम्। पूरणगुणेति गुणवाचकेन सह समासनिषेधस्तु परिशेषा-दतत्स्थद्रव्यपृथग्भूत गुणविषयकः पर्यवस्यति।

न निर्धारणे (२-२-१०) निर्धारणे (जातिगुण क्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणे) षष्ठी न समस्यते। नृणां द्विजः श्रेष्ठः। मनुष्याणां क्षत्रियः शूरतमः। गवां कृष्णा पयस्विनी। अश्वानां धावन् शीघ्रः। छात्राणां मैत्रः पटुः। प्रतिपदविधाना षष्ठी न समस्यते इति वाच्यम्। (वा) षष्ठी शेषे इति वर्जं धातुकारकादिविशेषमादाय ज्ञोविदर्थस्येत्यादिना पदं पदं प्रतिविहिता षष्ठी न समस्यत इत्यर्थः। सर्पिषो ज्ञानम्। मधुनो ज्ञानम्। पूरणगुण-सुहितार्थ-सदव्यय-तव्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समानाधिकरणेन (२-१-११) पूरणाद्यर्थैः सदादिभिश्च सह षष्ठी न समस्यते। पूरणे-सतां
छात्राणां पञ्चमः। गुणे-काकस्य कार्ष्ण्यम्। वलाकायाः शौक्ल्यम्। ब्राह्मणस्य शुक्लाः (दन्ताः
सुहितार्थास्तृप्त्यर्थास्तत्र-फलानां सुहितः। फलानां तृप्तः। सत् शतृशानचौ तत्र-द्विजस्य
कुर्वाणो वा। किङ्करः, ओदनस्य पचमानः। अव्यये ब्राह्मणस्य कृत्वा। ग्रामस्य गत्वा। पूर्वो
साहचर्यात्कृदव्ययमेवेहगृह्यते, तेन तस्योपरि-तदुपरि इत्यादि सिध्यति। तव्ये-ब्राह्मणस्य कर्तव्यं
तस्य द्रष्टव्यम्। तव्यति तु न निषेध, स्वस्य कर्तव्यं-स्वकर्तव्यमित्यादि। समानाधिकरणे-तक्षक
सर्पस्य, पाणिनेः सूत्रकारस्य, गोर्धेनोः, इत्यादिषु पोटायुवतीत्यादीनां विभक्त्यन्तरे चरिता
बाधकः षष्ठीसमासोऽप्यनेन बाध्यते। तेन पूर्वापरयोर्वैयधिकरण्य एवायं षष्ठीसमा
क्तेन च पूजायाम् (२-२-१२) पूजाग्रहणं मतिबुद्धीतिसूत्रोपलक्षणम्। मतिबुद्धीति विहितक्त
षष्ठी न समस्यते। सतां मतः। राज्ञां पूजितः। राज्ञां बुद्धः। अन्यत्र तु भवति-छात्रस्य हसि
छात्रहसितम्। राजपूजित इत्यादौ तु भूतक्तान्तेन सह तृतीयासमासः। अधिकरणवाचि
(२-२-१३) अधिकरणार्थक्तान्तेन सह षष्ठी न समस्यते। इदमेषा मासितं गतं भुक्तं वा (आसन
स्थानम्)। कर्मणि च (२-२-१४) उभयप्राप्तौकर्मणीति विहिता षष्ठी न समस्यते। आश्चर्यो
दोहोऽगोपेन। रोचते ओदनं भोजनस्य मित्रेण। साधु पयसः पानं बालेन। विचित्रा
सूत्रस्य पाणिनिना। तृजकाभ्यां कर्तरि (२-२-१५) कर्त्रर्थ तृजकाभ्यां सह षष्ठी न समस्यते।
स्रष्टा, वेदस्याध्येता। वज्रस्य भर्ता। काव्यस्य पाठकः। ओदनस्य पाचकः। कर्तरीत्युक्तं
भवति-इक्षूणां भक्षणं इक्षुभक्षिका। कर्तरि च (२-२-१६) कर्तरिषष्ठ्या अकेन न समासः।
शायिका। भवतोऽग्रगामिका।

वि. १. निर्धारणे 'अथ कथं पुरुषोत्तम इति, यस्मान्निर्धार्यते; यश्चैकदेशो निधार्यते, यश्च निर्धारण हेतु स्तेषां
सन्निधाने सत्येवायं निषेध इति द्विवचनविभज्येति सूत्रे कैयटः। अन्येतु पुरुषेषूत्तम इति निर्धारणसप्तम्याः संज्ञा
समासमाहु स्तन्न युक्तम्। संज्ञायां समासस्य नित्यत्वेनास्वपदविग्रहापत्तेः। किं वा पुरुषाणामुत्तम इति शेषे
निर्धारण इति न समास निषेधः। केचित्तु उत्तमःपुरुषस्त्वन्य इति गीतोक्तार्थे कर्मधारये राजदन्तादि
रनिपात इत्यप्याहुः।

वि. २. पूरणे उञ्छषष्ठाङ्कित सैकतानीत्यत्रतु न षष्ठीसमासोऽपितु उञ्छः षष्ठ इति कर्मधारयः। उञ्छेषु षष्ठ इ
समासउपपादनीयः। प्रमाद एवायमित्येके।

वि. ३. अनित्योयं गुणे षष्ठी समास निषेधः, तदशिष्यं संज्ञाप्रमाणत्वादित्यादि निर्देशात्। तेन अर्थगौरवं बुद्धि
न्द्यमित्याद्यपि सिद्ध्यति। वस्तु, तस्तु गुणे समासनिषेधस्यानित्यत्वं भाष्येनोक्तम्। नच कृष्णैकत्वमित्यादौ समास
पत्तिः। पङ्क्तिविंशतीत्यादिसूत्रे विंशत्यादिशब्दाभाववचना भवन्तीत्युक्त्या गोविंशति गोसहस्र मिति प्रयोगात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...र्वं बुद्धिमान्द्यमित्यादौ तु अर्थगतं गौरवं बुद्धिगतं मान्द्यमिति मध्यपदलोपीसमास इति शब्देन्दु शेखरे। पूरणगुणेत्यत्र ...व्याख्यानात्केवलगुणवाची सन्यो गुणि बोधक स्तत्प्रकृतिक भावप्रत्ययान्त प्रतिपाद्यानां गुणपदेन ग्रहणमर्थपदान्वयाश्च ...बोधक शब्दमात्रग्रहणम्। एवं च प्राधान्य गौरवादौ निषेधप्रसक्ति रेव नेति" उद्योतकारः।

वि. ४. कर्तृकर्मणो रुभयोः प्रयोगस्थलएव उभयप्राप्तौ कर्मणीत्यस्य प्रवृत्या तत्रैव षष्ठीसमास निषेधः, अन्यतरप्रयोगेतु ...ति। गोदोहः, गोपदोहः, सूत्रकृतिः पाणिनिकृति, रित्यादि। शब्दानुशासनमित्यत्रापि वस्तुतः कर्तुरप्याचार्यस्या नुल्ले-...निषेधाप्रवृत्तेः समास उपपद्यत एव।

वि. ५. तृजन्तेन भर्तृशब्देन धारक पोषकार्थकेनैव सह समास निषेधः। पत्यर्थक भर्तृशब्दस्य तु याजकादिषु पाठेन ...सह न निषेधः। तेन भुवो भर्ता (पतिः) भूभर्ता इत्युपपद्यते। घटानां निर्मातुः त्रिभुवनविधातुश्चकलह इत्यत्र तु ...षष्ठ्या समास इतिकैय्यटः। तेन कारकषष्ठ्या एवायं समास निषेधो नतु शेषषष्ठ्याः। केचित्तु जनिकर्तुः तत्प्रयोजको ...इति निर्देशादनित्योयं समासनिषेध इत्याहु स्तन्न युक्तम् उक्तोपपत्यैव निर्वाहेणानित्यत्व कल्पनानौचित्यात्।

प्रयोगा :—बभौ च सा तेन सतां मतेन। कलहं स रामसहितः कृतवान्। अयाज्य याजक ...स्तैव, स्वकर्तव्यं समाचर। यतः सभर्ता जगतां जगाम धर्त्रा धरित्र्याः फणिना ततोऽधः। भूर्भर्तु ...र्भर्तमनु रञ्जनं जनानाम्। राजा प्रकृतिरञ्जनात्। भारवे रर्थगौरवम्। दमनं कालियस्याहं मेहाहे ...नन्दमोक्षणम्।

...मीतत्पुरुष :—

सप्तमी शौण्डैः (२-१-४०) शौण्डाः शौण्डादयः। सप्तम्यन्तं शौण्डादिभिः, सुबन्तैः सह वा समस्यते, ...स तत्पुरुषः। शौण्ड-धूर्त-कितव-प्रवीण-पण्डित-पटु-कुशल-चपल-निपुणे त्यादयः, अधि अन्तः एते च शौण्डादयः। अक्षेषु शौण्डः (मत्त)-अक्षशौण्डः। प्रसक्त्यादिक्रियान्तर्भावादक्षादिषु अधिकरणे सप्तमी। एव मक्षधूर्तः, रणकुशलः, कविता प्रवीणः, कार्ये कुशलः, व्याख्यान पण्डितः, आचार-निपुणः। अधि इत्याधेयप्रधानः। ईश्वरे अधि (वर्तमानः) इत्यत्र समासे सुब्लुकि अध्युत्तरपदाददिति ख प्रत्यये ईनादेशे ईश्वराधीनः। अन्तरितिमध्ये इत्यर्थके वने अन्तः-वनान्तः। (वनमध्ये) वसति। गृहे अन्तः-गृहान्तः। अधिकरणत्वप्राधान्ये त्वव्ययीभाव एव। अधिहरिः, अन्तर्वनम्। सिद्धशुष्कपक्वबन्धैश्च (२-१-४१) एतैः सह सप्तम्यन्तं वा समस्यते। सांकाश्ये (नगरविशेषे) सिद्धः (उत्पन्नो ज्ञातो वा)-साङ्काश्यसिद्धः। काम्पिल्ये (नगरविशेषे) सिद्धः-काम्पिल्यसिद्धः। आतपे शुष्कः-आतपशुष्कः। स्थाल्यां पक्वः-स्थालीपक्वः। चक्रे बन्धः-चक्रबन्धः। एवं तपः सिद्धः। छायाशुष्कः। वृक्षपक्वः। तत्पुरुषे कृतीतिबहुलग्रहणस्यै वायं प्रपञ्चः। ध्वाङ्क्षेण क्षेपे (२-१-४२) ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायाम्। वाक्येन निन्दानवगमा न्नित्यसमासः। तीर्थे ध्वाङ्क्ष इव-तीर्थध्वाङ्क्षः। तीर्थे काक इव-तीर्थकाकः। तीर्थवायसः। कृत्यैर्ऋणे (२-१-४३) ऋण-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रहणं नियोगो (आवश्यको) पलक्षणार्थम्। मासे देयं (ऋणम्)-मासदेयम्। संवत्सरे देयं-संवत्सरदेयम्। पूर्वाह्णे गेयम् (अवश्यगेयं) पूर्वाह्णेगेयं, साम:। तत्पुरुषे कृतिबहुलमिति सप्तम्या अलुक्। एवं प्रातरध्येयोऽनुवाकः। संज्ञायाम् (२-१-४४) सप्तम्यन्तं सुपा सह समस्यते संज्ञायाम्। नि... वाक्येन संज्ञानवगमान्नित्यसमासोऽयम्। अरण्येतिलकाः। अरण्येमाषाः। वने किंशुकाः। ... पिशाचकाः। संज्ञाविशेषा इमे) हलदन्तादिति सप्तम्या अलुक्। क्तेनाहोरात्रावयवाः (२-१-४५) अन्हो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह वा समस्यन्ते। पूर्वाह्णे कृतं-पूर्वाह्णकृतम्। अपर... कृतं-अपररात्रकृतम्। अवयवग्रहणा न्नेह-अन्हि दृष्टम्। रात्रौ भुक्तम्। तत्पुरुषेकृतीति ब... ग्रहणात्-रात्रिवृत्तं सन्ध्यागर्जित मित्यादयोपि। तत्र (२-१-४६) तत्रेति सप्तम्यन्तं क्तान्तेन समस्यते। तत्रभुक्तम्। तत्रकृतम्। समासे स्वरविशेषः प्रयोजनम्। क्षेपे (२-१-४७) सप्तम्यन्तं क्तान्तेन सह समस्यते निन्दायाम्। वाक्येन निन्दानवगमान्नित्यसमासः। अवतप्ते नकुलस्थितं त एतत्। कृद्ग्रहणे गतिकारक पूर्वस्यापिग्रहणमिति नकुल स्थितस्यापि क्तान्तेन ग्रहः। त... कृतीति सप्तम्या अलुक्। एवम्-उदकेविशीर्णम्। प्रवाहेमूत्रितम्। भस्मनिहुतम्। (... कर्मेतियावत्) पात्रे समितादयश्च (२-१-४८) कृतसमासादिकार्या एते निपात्यन्ते। पात्रेस... (भोजनसमय एव सङ्गता न तु कार्ये) गेहेशूरः। गेहेनर्दी। मातरिपुरुषः। गोष्ठेपटुः। गोष्ठेप्र... गर्भेतृप्तः। गोष्ठेपण्डितः। गेहेधृष्टः। गेहेतृप्तः। (सप्तम्या अलुगपि) कूपमण्डूकः। कुम्भमण्डूकः... कूपकच्छपः। नगरकाकः। आकृतिगणोऽयम्) चकारोऽवधारणार्थः। तेन समासान्तरं न ... परमः पात्रे समित इति।

वि. निन्दाक्षेप बोधने समासे प्रायो लक्षणाया ऽकुत्सितार्थान्तर प्रतीतिर्भवति। तदुक्तं भाष्यकृता-यथा तीर्थे ... न चिरं स्थातारो भवन्ति एवं यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते, तीर्थकाक इति। यथा अवतप्ते ... न चिरं स्थातारो भवन्ति, एवं कार्याण्यारभ्य यो न चिरं तिष्ठति स उच्यते, अवतप्ते नकुलस्थितं-ते एतदिति। ... उदके विशीर्णं भस्मनि हुतमित्यत्र निष्फलत्वं गेहेशूर इत्यादौ सदस्ययोग्यत्वं, कूपममण्डूक इत्यादौ अल्पज्ञत्व... कुत्सितत्वं यथायथं ज्ञेयम्।

प्रयोगाः—अरण्यरुदितं कृतम्। कूपमण्डूकस्य बुद्धिर्नप्रसरति। गेहेशूरो गृहेनर्दी स... पलायते। घृतपक्वं पर्युषितं न भवति। रणकुशलोभटः कविता प्रवीणो विद्वांश्च सर्वः प्र... ऊषरे वर्षितमिदम् व्याख्यानपण्डिताः सर्वे।

नञादितत्पुरुषः—

नञ् (२-१-६) नञ् सुपा सह समस्यते सच तत्पुरुषः। नलोपो नञः (६-३-७३) नञो नस्य ... स्यादुत्तरपदे। न ब्राह्मण इत्यर्थे नञः सुपा सह समासे नकारलोपे अब्राह्मणः। न अश्व ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समासे नलोपे दीर्घे प्राप्ते तस्मान्नुडचि (६-३-७४) लुप्तनकारा न्नञ उत्तरपदस्याजादे र्नुडागमः स्यात्। इति उत्तराकारस्य नुडागमे अनश्वः। एव मनीलः, अदृष्टम्, अकृतज्ञः, अपूर्वः, अनचितः। अत्रत्नुः। नभ्राण्ण-पान्न-वेदा-नासत्या-नमुचि-नकुल-नख नपुंसक-नक्षत्र-नक्र -नाकेषु - प्रकृत्या (६-३-७५) एषु नञ् प्रकृत्या स्यात्। नभ्रा जने-नभ्राट्। नपाति नपात् (शत्रन्तः)। नवेत्ति-नवेदाः (असुन्नन्तः) न सत्या असत्याः, न असत्याः-नासत्याः। नमुञ्चति नमुचिः (दानवविशेषः) न कुलमस्य नकुलम्। नखमस्य-नखम्। न स्त्री न पुमान्-नपुंसकम्। (स्त्रीपुंसयोः पुंसक भावो निपात्यते) नक्षरति क्षीयते वा-नक्षत्रम्। (निपात्यते) न क्रामति-नक्रः (ग्राहः) क्रमेर्डः) न अक (दुःखं) मस्ति-नाकः (स्वर्गः)। नगोऽप्राणिष्वन्यतरस्याम् (६-२-७७) नगे न प्रकृत्या वा स्या दप्राणिषु। न गच्छन्ति-नगाः अगाः वा (पर्वताः) गमेर्डः) प्राणिषु तु-अगो वृषलः शीतेन।

वि. तत्पुरुषस्याव्ययीभावा त्परत्वेनापवादकत्वेपि "रक्षोहागमलघ्वसन्देहाः प्रयोजनम् अनुदात्ताना मसंहितम्" इति भाष्यवार्तिकयोः प्रयोगेन द्वयो र्वैकल्पिकत्वबोधा न्नञोऽर्थाभावे ऽव्ययीभावस्तत्पुरुषोपि, अव्ययीभावे क्लीबत्वं, तत्पुरुषे परवल्लिङ्गता। तेन क्वचिदव्ययीभावे ऽविघ्नमित्यादि, क्वचित्तत्पुरुषे अनुपलब्धिः अविवाद इत्यादि च सिध्यति अविद्यमान इत्यादा वन्यपदार्थप्रधानो बहुव्रीहि रिति नञस्त्रिधा समासः।

वि २. नञो नलोपस्तिङि क्षेपे (वा) अपचसि त्वं जाल्म, नैकधेत्यादौ तु नशब्देन सह सुपेति समासे नञो ऽभावेन न नलोपः। नञ एव न लोपो नतु नशब्दस्य। नञासह समासे तु अनेकधा।

वि ३. अब्राह्मण इत्यत्र उत्तरपदार्थप्राधान्ये अब्राह्मणमानयेत्युक्तो ब्राह्मणमात्रानयनप्रसङ्गः, अन्यपदार्थप्राधान्ये अवर्षो हेमन्त इतिवद्विशेष्यनिघ्नता प्रसङ्गः, पूर्वपदार्थप्राधान्येऽव्ययत्वापत्तिरिति वितर्के प्युत्तरपदार्थप्राधान्यमेव। राजपुरुषमानयेत्यत्र राजसम्बन्ध विशेषितपुरुषानयनमिव अब्राह्मणमानयेत्यत्रापि नञर्थविशेषितस्यैव ब्राह्मणस्यानय नमिति। नञर्थस्त्वभावः। षड्व्याधयो यं पुरुषं तपन्ति जैह्वो हार्द औदरो रैतसश्च। ततश्च घर्मः शिशिरश्च शीतो ब्राह्मण स्तं स्मरार्थं गरुत्मन्। तपः श्रुतं च यो निश्चे त्येतद्ब्राह्मण्यकारणम्। तपः श्रुताभ्यां यो हीनो जाति ब्राह्मण एव सः॥ अष्टवर्षा च यादत्ता श्रुतशीलसमान्विते। सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तितः॥ गौरो गौर शुच्याचारः कपिलपिङ्गल केशः। इत्यादि श्रुति स्मृत्युक्त गुणजातिसमुदायात्मको ब्राह्मणशब्दार्थः। तत्र जातिगुणादि कतिपयधर्माभावो बोध्यते। समुदायेषु वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते इति न्यायाजातिहीने ऽपि वा यदा ब्राह्मणशब्द स्तदा जातिगुणनिवृत्ति र्नञा द्योत्यतेऽ वशिष्टांश सद्भावप्रतिपादनाय ब्राह्मणशब्द प्रयोगः। तेन गुणजात्यादि किञ्चित् हीनत्वरूपमारोपितत्वं नञर्थः। आरोपितब्राह्मणो ऽब्राह्मणशब्दार्थः, नतु ब्राह्मणभिन्नत्वम्। अर्थस्तु ब्राह्मण्य पूर्णब्राह्मणभिन्ने तत्सदृशे पर्यवस्यति। ब्राह्मण भिन्नत्वस्य शब्दार्थत्वे पूर्वपदार्थ प्राधान्यभावेन तत्पुरुषत्वं व्याहन्येत, तन्यायेन अतस्मै इत्यादावुत्तरपदस्यो पसर्जनत्वेन सर्वनामकार्यं च नस्यात्। अब्राह्मणस्य एकभिन्नत्वार्थे सति तस्यद्विबहुत्वेन एकवचनानुपपत्तिश्च। उत्तरपदार्थप्राधान्ये तु निवृत्ते (आरो-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पितै) कत्व वोधादनेकमन्यपदार्थं इति प्रयोग उपपद्यते। एकभिन्नत्वं त्वर्थात्पर्यवस्यति। इत्यादिर्विशेषो भाष्यपदमञ्जर्यु- लेखात्प्रतीयते।

ईषदकृता (२-२-७) ईषच्छब्दो ऽकृदन्तेन सुबन्तेन सह समस्यते। ईषद्गुणवचनेनेति वाच्यम् (वा) ईषद्र कम्—ईषद्रक्तम्। एकपदत्वं समासे विशेषः। एवं ईषत्पिङ्गलः। ईषद्रक्तः। अकृदन्तेनेत्युक्त्या ईषदुन्नतः। इत्यादि भवति, नतु ईषद्गार्ग्य इति। कुगतिप्रादयः (३-२-१८) एते समर्थेन सह नित्यं समस्यन्ते। कुशब्दो गत्यादिसाहचर्याद् दव्ययं पापार्थं गृह्यते। समासस्य नित्यत्वा दस्वपदविग्रहः। कुत्सितः (पापः) पुरुषः—कुपुरुषः। गतिसंज्ञकास्तु- ऊर्यादिच्विडाचश्च (१-४-६१) एते क्रियायोगे गतिसंज्ञाःस्युः। ऊर्यादयः- ऊरीकृत्य (स्वीकृत्य)। गतिसंज्ञायां कुगतीति समासे समासेनञ्पूर्वे इति क्त्वो ल्यप्। उररीकृत्य, फलीकृत्य (निष्पूय), ... कृतम्, स्वाहाकारः, स्वधाकारः, प्रादुष्कृत्य, आविष्कृत्य। च्व्यन्ताः- अशुक्लं शुक्लं यथा सम्पद्यते तथा कृत्वा-शुक्लीकृत्य। एवं स्वीकृत्य। अङ्गीकृत्य। रक्ती कृत्य। डाजन्ताः-पटपटाकृत्य। पटपटाकृ... अनुकरणं चानिति परम् (१-४-६२) अनिति परमनुकरणं गतिसंज्ञं स्यात्। खाट्कृत्य। धूत्... फूत्कारः। रणत्कारः। इतिशब्दपरत्वे तु न। खाडितिकृत्वा निरष्ठीवत्। आदरानादरयोः सदसती (१-४-६३) एतयोरर्थयोरेते गतिसंज्ञे स्तः। सत्कृत्य। असत्कृत्य। समासे ल्यप्। भूषणे ऽलम् (१.४.६४) भूषणे ऽलं शब्दो गतिसंज्ञः स्यात्। अलङ्कृत्य। अभूषणेतु अलं (पर्याप्तं) कृत्वौदनं गतः। ... करणमित्यादि त्रिसूत्री स्वभावात्कृञ्विषया। पुरो ऽव्ययम् (१.४.६७) गतिसंज्ञं स्यात्। पुरस्कृत्य। पुरोभूय। पुरस्कारः। अस्तं च (१.४.६८) अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य (तिरोधानं प्राप्य)। अदो ऽनुपदेशे (१.४-७०) अदः कृत्यः। अदः कृतम्। परंप्रत्युपदेशे तु अदःकृत्वा-अदः कुरु। तिरो ऽन्तर्धौ (१.४.७१) गतिसंज्ञं स्यात्। तिरोभूय (अन्तर्धाय)। विभाषा कृञि (१.४.७२) कृञि वा गतिसंज्ञं स्यात्। तिरस्कृत्य, तिरःकृत्य। तिरसोऽन्यतरस्यामिति सत्वविकल्पः। गतित्वाभावपक्षे ल्यप् सत्वमपि न। तिरःकृत्वा। साक्षात्प्रभृतीनि च (१.४.७४) साक्षात्प्रभृतीति कृञि वा गतिसंज्ञानि स्युः। साक्षात्कृत्य, साक्षात्कृत्वा। साक्षात्, मिथ्या, चिन्ता, भद्रा, लवणम्, उष्णम्, शीतम्, उदकम्, आर्द्रम्, (लवणादीनां पञ्चानां मान्तत्वं निपातनात्) अग्नौ, वशे, प्रादुस्, नमस्, आविस्, एवमादयः साक्षात्प्रभृतयः। एवं मिथ्याकृत्य-मिथ्याकृत्वा। भद्राकृत्य-भद्राकृत्वा लवणङ्कृत्य-लवणंकृत्वा। अग्नौ करणम्। वशेकृत्य-वशेकृत्वा। प्रादुष्कृत्य... नमस्कृत्य-नमस्कृत्वा। आविष्कृतिः।

वि, अन्तरपरिग्रहे (१.४.६५) गतिसंज्ञं स्यात्। अन्तर्हत्य (मध्येहत्वा)। परिग्रहेतु-अन्तर्हत्वा-(हत्वा...)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतः। कणे मनसी श्रद्धाप्रतिघाते (१.४.६६) गतिसंज्ञे स्तः। कणेहत्य-मनोहत्य (अभिलाषातिशयंनिवर्त्य) पयः पिबति। अच्छ गत्यर्थवदेषु (१.४.६९) अच्छेत्यव्ययं गतिसंज्ञं स्यात्। अच्छगत्य (अभिमुखंगत्वा) अच्छोद्य (अभिमुखमुक्त्वा), उपाजे ऽन्वाजे (१.४.७३) एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य-उपाजेकृत्वा। अन्वाजेकृत्य-अन्वाजेकृत्वा (दुर्बलस्यबलमाधाय)। अनत्याधान उरसिमनसी (१.४.७५) अत्याधान मुपश्लेषः। तदभावे एते कृञि वा गतिसंज्ञे स्तः। उरसिकृत्य-उरसिकृत्वा (अभ्युपगम्य), मनसिकृत्य-मनसिकृत्वा। (निश्चित्य)। उपश्लेषेतु न-उरसि-कृत्वा पाणिं शेते। मध्ये पदे निवचने च (१.४.७६) एते कृञि वा गतिसंज्ञाः स्युः। मध्येकृत्य-मध्येकृत्वा (मध्यंकृत्य) पदेकृत्य-पदेकृत्वा (पदंकृत्वा) निवचनेकृत्य-निवचनेकृत्वा। (वाचंनियम्य) एदन्तत्वं निपातनात्। नित्यं हस्ते पाणावुपयमने-(१.४.७७) उपयमनं विवाहः। स्वीकारमात्रमित्यन्ये। एतौ कृञि नित्यं गतिसंज्ञौ स्त उपयमने। हस्तेकृत्य पाणौकृत्य (कन्यां स्वीकर्तुं पाणिं गृहीत्वा)। एदौदन्तत्वं निपातनात्। प्राध्वं बन्धने-(१.४.७८) प्राध्वमित्यव्यय मानुकूल्यार्थम्। कृञि नित्यं गतिसंज्ञं स्या द्बन्धने गम्ये। प्राध्वंकृत्य (बन्धनेनानुकूल्यंकृत्वा)। जीविकोपनिषदावौपम्ये (१.४.७९) एतावौपम्ये विषये कृञि नित्यं गतिसंज्ञौ स्तः। जीविकामिव कृत्वा-जीविकाकृत्य उपनिषदमिवकृत्वा-उपनिषत्कृत्य। अनौपम्येतु जीविकां कृत्वा। उपनिषदं कृत्वा।

प्रादयः—अगतित्वेपि ग्रहणार्थं पृथगुक्ताः। दुर्निन्दायाम्-निन्दितः-पुरुषः-दुष्पुरुषः। कुगतीति समासे षत्वम्। स्वतीपूजायाम् शोभनः पुरुषः-सुपुरुषः। पूज्यःपुरुष-अतिपुरुषः। आङीषदर्थे-ईषत् पिङ्गलः—आपिङ्गलः। प्रायिकं चैतदुपाधिवचनं। अन्यत्रापि दृश्यते। ईष दुष्णम्-कोष्णं कवोष्णम् कदुष्णम् (मन्दोष्णम्) कुशब्दस्य क कव् कदा देशाः। दुष्कृतम्, आबद्धम्। प्रादयः क्रान्ताद्यर्थे प्रथमया (वा) प्रगत आचार्यः-प्राचार्यः। प्रादीनां तत्तत्क्रिया मन्तर्भाव्य तत्तद्विभक्त्यन्तैः सह नित्यसमासः। एवं प्रपितामहः, प्रमातामहः। प्रशिष्यः, प्रश्वश्रूः। अत्यादयः क्रान्ताद्यर्थे द्वितीयया (वा) अतिक्रान्तो माला मतिमालः। उपसर्जनत्वा द्गोस्त्रियो रिति ह्रस्वः। अतिक्रान्तः खट्वाम्-अतिखट्वः। उद्गतो वेला-मुद्वेलः। अभिगतो मुख-मभिमुखः। प्रतिगतोक्षं-प्रत्यक्षः। अवादयः क्रुष्टाद्यर्थे तृतीयया (वा) अवक्रुष्टः कोकिलया-अवकोकिलः। संनद्धो वर्मणा-संवर्मा। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या (वा) परिग्लानो ऽध्ययनाय-पर्यध्ययनः। अलं कुमार्यै-अलङ्कुमारिः। गोस्त्रियोरिति ह्रस्वः। उद्युक्तः संग्रामाय-उत्संग्रामः। निरादयः क्रान्ताद्यर्थे पञ्चम्या (वा) निष्क्रान्तः कौशाम्ब्याः-निष्कौशाम्बिः। गोस्त्रियोरिति ह्रस्वः। उत्क्रान्तः कूलात्-उत्कूलः। निर्गतो ऽङ्गुलिभ्यः-निरङ्गुलः। तत्पुरुषस्याङ्गुलेरिति अच्। कर्मप्रवचनीयानांप्रतिषेधः (वा) वृक्षं प्रति। सुराजा-अतिसखेत्यादि भाष्यादिप्रयोगा स्त्वातिभिन्नानामेव कर्मप्रवचनीयाना मयं निषेधः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. प्रादयः क्रान्ताद्यर्थे इत्यादिष्वादिशब्दौ प्रकारार्थे, तेन दुराचारः पुरुषः-दुष्पुरुषः इत्याद्यपि। प्रादीना म... वस्थया समासप्रसङ्गे व्यवस्थापकानि प्रादय इत्यादीनि वार्तिकानि। प्रादीनां गतित्वेन ग्रहणेपि क्रियायोगाभावेन गति... भावेपि समासार्थं सूत्रे पृथगुल्लेखः। प्रादिसमासे प्रादिभिरेव क्रान्ताद्यर्थप्रत्यायनात्प्रादीनां विवरणं प्रगत इत्यादि। ... प्रगत आचार्य इत्याद्येवास्वपद विग्रहः नित्यःसमासः। प्रादयः क्तार्थे इतिकात्यायनवार्तिकार्थः। सौ नागैः पूर्ववैयाक... स्वतोपूजायां दुर्निन्दाया माङीषदर्थे कुः पापार्थे इतिप्रादयः क्रान्ताद्यर्थे प्रथमयेत्यादिच विभज्य दर्शितः। भाष्ये कु... प्रादय इतिसूत्रस्थाने सिद्धं तु आङ् स्वति दुर्गतिवचनादित्युक्तम्।

प्रयोगा :—अयं कुपुरुषो नष्टः। अतीत नक्षत्र पथानि यत्र। अपात क्षीवकादस्वम्। वि... मलङ्कारो विनयः। अपशवो वाऽन्येगोऽश्वेभ्यः। प्रपितामह पूवकम्। उद्वेलः सा... ऽभवत्। येन शुक्लीकृता हंसाः। लज्जां तनूकृत्य नरेन्द्रकन्या। भूषणानां रुणत्कारः। सा... त्कृतो भुभूजा।

उपपदतत्पुरुषः—

तत्रोपपदं सप्तमीस्थम् (३-१-९२) तृतीये धात्वधिकारे (कृत्प्रकरणे) कर्मणीत्यादि सप्तमी नि... मुपपदसंज्ञं स्यात्। उपपदमतिङ् (२-२-१९) उपपदं सुबन्तं समर्थेन तिङन्तभिन्नेन सह नि... समस्यते स तत्पुरुषः। कुम्भं करोतीत्यर्थे कर्मणि द्वितीयान्त कुम्भशब्दे उपपदे कृधातोः कर्म... इत्यणि वृद्धौ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः, इति कुम्भ अम् ... इत्यवस्थाया मुपपदमतिङिति समासे प्रातिपदिकत्वेन सुब्लुकि कुम्भकार शब्दात् सुबादौ कु... कारः। एवं चर्म करोति-चर्मकारः, स्तम्बे रमते-स्तम्बेरमः (हस्ती) पुरं दारयति-पुरन्दरः (इ... गृहे तिष्ठति-गृहस्थः, ब्रह्मणो हननं-ब्रह्महत्या, मनो हरति-मनोहारी, स्तनं धयति-स्तनन्धयः (बा... पारं दृष्टवान्-पारदृश्वा। अमैवाव्ययेन (२-२-२०) पूर्वेण सिद्धे नियमार्थं वचनम्। अव्ययेन स... पपदस्य समासोऽमैव (णमुलन्तेनैव) सह भवति नान्येन। स्वादुं कृत्वा-स्वादुङ्कारं भुङ्... लवणं कृत्वा-लवणङ्कारम्। (स्वादुमिणमुल्)। एतन्नियमेन नेह-कालो भोक्तुम्, समयो ग... वेलाऽध्येतुम्। (कालसमयवेलासुतुमुन्) अत्रसूत्रे अमैवेत्येवकारेण अमैवसह तुल्यविधान... पपदसमासःस्यात्, अमाचान्येन च तुल्यविधानस्य माभूदिति नियमान्तरं च। तेन अग्रे भो... अग्रेभुक्त्वा इत्यत्र-विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलो विधानेन अग्र इत्यत्र अमैव तुल्यविधा... भावेना ग्रहणा न्न समासः। तृतीयाप्रभृतीन्यन्यतरस्याम् (२-२-२१) उपदंश स्तृतीय... मित्यादीन्युपपदानि अमन्ताव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं मूलकोपदंशं वा भुङ्... (मूलकमुपदंशं व्यञ्जनं कृत्वा भक्षयति)। उच्चैःकारम्, उच्चैःकारं वा पठति। अव्यये यथाभिप्रेता...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्रःक्त्वाणमुलौ। क्त्वाच (२-२-२२) तृतीया प्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैः कृत्य-उच्चैः कृत्वा पठति।

वि. कृत्प्रकरणे विशेषप्रत्ययार्थं सूत्रे सप्तम्यन्तपदेन यस्य पदस्य सामीप्य मपेक्षणीयतया निर्दिश्यते तदेवोपपदसंज्ञं भवति, तदुपपदमादाय धातोः प्रत्यये सति सुबुत्पत्तेः पूर्व मेवोत्तरभागेन सह उपपदतत्पुरुषसमासे जाते स्वाद्युत्पत्ति र्भवति। अतश्च समासं विना प्रयोगानर्हतया नित्यसमासोयम्। तत्र तिङन्तेन सह समासव्यावृत्तये अतिङ् ग्रहणम्। कर्तव्या कारको व्रजतीत्यत्र तुमुण्ण्वुलौ क्रियायां क्रियार्थाया मिति व्रजतौ उपपदे कृञो ण्वुलि अकादेशे व्रजतीत्यनेन कारकशब्दस्य, माभूदित्यादौ माङिलुङिति माङ्युपपदे भूधातो र्लुङि माङ स्तिङन्तेन सह, समास आपद्येत। अतिङ् ग्रहणेन सुपेत्यननुवृत्ते र्ज्ञापना दुप पदं समर्थेन सहेति सामान्येनोक्तम्। समर्थेनेत्युक्त्या महान्तं कुम्भं करोती त्यत्र न समासः नवा अण्। एतदतिङ् ग्रहणस्य कुगतिप्रादय इत्यत्रापि उत्कर्षेण तस्य गतिनैव सहान्वयात्-कुप्रादयः नित्याः सुबन्तेन सह, गतिसंज्ञकास्तु अतिङन्तेन, समर्थमात्रेण सह समस्यन्ते इत्यर्थः। तेन गतावपि सुबुत्पत्तेः पूर्वमेव तस्माद्गतिकारकोपपदानां कृद्भिःसह समासवचनं प्राक्सुबुत्पत्ते रितिपरिभाषासिद्धिः। अतश्च व्याघ्री-कच्छपी-अश्वक्रीती-त्यादौ पूर्वंसमासे सति स्त्रीप्रत्ययः। समासात्पूर्वं स्त्रीप्रत्ययेतु ङीषोऽप्राप्त्या टाप् प्रसज्येत।

प्रयोगाः—वनेचराणां वनितासखानाम्। गुर्वर्थ मर्थी श्रुतपारदृश्वा। स्तम्बेरमा मुखरशृङ्खल कर्षिणस्ते। अरुन्तुदस्तु मर्मस्पृक्। ललाटन्तप तापितः। भयङ्करं वनं प्राप्तः। गृहस्थस्योदिताः क्रियाः। रजकश्चर्मकारश्च नटो वुरूड एवच। कैवर्त मल्लभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः।

कर्मधारयः—

तत्पुरुषः समानाधिकरणः कर्मधारयः (१-२-४२) समानाभिधेयः समानाधिकरणः। समानाधिकरणस्तत्पुरुषः कर्मधारयसंज्ञः स्यात्। सच कर्मधारयो विशेषणपूर्वपद-विशेषणोत्तरपद-विशेषणोभयपदो-पमानपूर्वपदो-पमानोत्तरपदादिभेदा द्बहुविधः। कर्मधारयस्यापि तत्पुरुषविशेषतया तद्वत्परवल्लिङ्गता। तत्पुरुषे पूर्वोत्तरपदयोरभिधेयभेदाद्वैयधिकरण्येन यथास्वं विभक्तिभेदेन विग्रहः। कर्मधारये तु तयो रभिधेयाभेदा त्सामानाधिकरण्येन समानविभक्ति र्विग्रह इति विशेषः।

वि. द्वयोः प्रकृतिनिमित्तभेदेपि एकार्थवृत्तित्वं सामानाधिकरण्यम्। आकडारादिति नियमबहिर्भूततया समानाधिकरणसमासे तत्पुरुषं संज्ञायां सत्यां कर्मधारयसंज्ञापि भवति-नतु कर्मधारयसंज्ञया तत्पुरुषसंज्ञा वाध्यते। तेन तत्पुरुष त्वमपि।

विशेषणपूर्वपदः—

विशेषणं विशेष्येण बहुलम् (२-१-५७) विशेषणं व्यावर्तकं, विशेष्यं व्यावर्त्यम्। विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिकरणेन सुबन्तेन सह वा समस्यते स तत्पुरुषः कर्मधारयः। नीलं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च तद्वस्त्रं–नीलवस्त्रम्। समासे सुब्लुकि समुदायात्सुबुत्पत्तिः। तत्पुरुषतया परवल्लिङ्गता। उन्न श्चासौ वृक्षः-उन्नतवृक्षः। मधुराणि च तानि फलानि-मधुरफलानि। पूज्या श्चते जनाः-पूज्यज बहुलग्रहणात् क्वचिन्नित्यम्-कृष्णसर्पः (सर्पजातिविशेषः)। लोहितशालिः (व्रीहिविशे क्वचिन्न-रामो जामदग्न्यः। अर्जुनः कार्तवीर्यः। रक्ता चासौ शाटीत्यर्थे समासे सुब्लु स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु (६-३.३४) प्रवृत्तिनिमित्ते यद्भाषितपुंस्क मूङभाववच्च तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव स्यात् समानाधिकरणे स्त्रीलिङ्ग उत्तरपदे परे, नतु पूरणप्रत्ययान्ते प्रियादौ च परतः। रक्ताशब्दस्य पुंद्भावे समुदाया त्सुबुत्पत्तौ रक्तशाटी। रम्याश्चताः कन्यकाः-रम्यकन्य दीर्घाचासौ लेखनीः-दीर्घलेखनी। प्रियादयस्तु-प्रिया मनोज्ञा कल्याणी सुभागा दुर्भागा भ कान्ता चपला दुहिता वामा इत्यादयः। पुंव त्कर्मधारयजातीयदेशीयेषु (६ ३-४२) कर्मधा जातीयदेशीययोः प्रत्यययोश्च परत भाषितपुंस्क मूङ्रहितं पूर्वं पुंवत्स्यात्। नकोपधाया इत निषेधे प्राप्ते प्रतिप्रसवार्थः, पूरणी प्रियादिके परेऽ प्राप्तश्च पुंवद्भावः कर्मधारयादावनेन विधी नर्तिका चासौ स्त्री-नतर्कस्त्री। दर्शिकाश्चता कन्याः-दर्शककन्याः। पूरणेपरे-कृष्णा चासौ चतुर्द कृष्णचतुर्दशी, शुक्ला चासौ पञ्चमीः-शुक्लपञ्चमी। प्रियादौपरे, अतिशयिता चासौ प्रि अतिशयितप्रिया। जेष्ठा चासौ दुहिता–जेष्ठदुहिता। स्निग्धा चासौ कान्ता–स्निग्धका आ न्महतः समानाधिकरणजातीययोः (६-३-४६) महच्छब्दस्याऽऽकारोन्तादेशः स्या त्समाना करणे उत्तरपदे जातीये च परे। महाँश्चासौ देवः इत्यत्र समासे सुब्लुकि तकारस्या कार सुबुत्पत्तौ महादेवः। महती चासौ नवमीत्यत्र समासे सुब्लुकि पुंवद्भावे आकारादेशे सुबु महानवमी। एवं महापुरुषः, महागुरुः, महादेवी, महासेना, महाम्बा, महेश्वरः,। असमानाधि तु पुंवद्भाव आत्वंच न—महतां सेवा-महत्सेवा, महत्या दृष्टं-महतीदृष्टम्। वक्ष्यमाणे बहुव्रीह सामानाधिकरण्ये स्त्रियाः पुंवद्भावो महत आत्वमपि। महती दृष्टि र्यस्य सः—महादृष्टिः। म आत्मा यस्य सः—महात्मा।

वि. नीलवस्त्रमित्यादौ नीलशब्देन अनीलवस्त्र व्यावृत्तिव द्वस्त्रशब्देन अवस्त्रनीलव्यावृत्त्या उभयो र्विशेषणवि भाव व्यत्यासस्सम्भवेपि जाति-व्यक्ति-गुण-क्रियाशब्दसमभिव्याहारे जातिव्यक्तिवाचकशब्दो विशेष्यबोधकः, गु क्रियावाचकशब्दो विशेषणबोधको भवतीति स्वभावः, तेन नीलं विशेषणं वस्त्रं विशेष्यमिति नीलशब्दस्य पूर्व गुणक्रियाशब्दयो रेव समभिव्याहारे तु विशेष्यविशेषणभावस्य विवक्षाधीनतया वैपरीत्यमपि भवति। तेन वि तया विवक्षितस्य पूर्वप्रयोगः। यथा-दृष्टश्रुता, श्रुतदृष्टा कथा। कुब्जः, खञ्जः खञ्जकुब्जो वा जनः। व्यक्ति वाचकयोः समभिव्याहारे व्यक्तिवाचकः संज्ञाशब्दो विशेषणं जातिवाचकं विशेष्यं भवति, यथा-कैलाश देवदत्तब्राह्मणः, अयोध्यापुरी, सामान्यजातिविशेषजातिवाचकयोः समभिव्यवहारे विशेष्यजातिवाचकं वि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

…नान्यजातिवाचकं विशेष्यं भवति । यथा-शिंशपावृक्षः । ब्राह्मणजनः, सिंहपशुः । यथायथं सर्वत्र विशेषणस्य …संयोगः । विशेषणस्याप्रधानस्य विशेष्ये प्रधानेऽन्वयः । एष विषयः "यत्रान्यतरद्द्रव्यमन्यतरो गुण स्तत्र यद्द्रव्यं …प्रधानमिति भाष्यकृता सूचितः । "द्रव्यं प्रधान मप्रधानं गुणः । जातिशब्दो द्रव्यत्वेन व्यवस्थाप्यते । गुणशब्दयोः …शब्दयो र्गुण क्रियाशब्दयो र्वा सन्निपाते अनियम एव भवति । द्रव्यशब्दयो रेवो पनिपाते वृक्षत्वादेर्व्यापकत्वान्महा …विषयत्वाद् दूरोन्नेय भावाश्च प्राधान्यं, शिंशपात्वादे स्तु विपर्ययादप्राधान्यमिति नानियम" इति पदमञ्जरीकृता विवृत्तश्च ।

वि. २. स्त्रियां पुंसि च प्रवृत्तिनिमित्तभेदे, भाषितपुंस्कत्वाभावे, ऊङन्तत्वे, उत्तरपदस्य सामानाधिकरण्यत्वाभावे, …लिङ्गत्वाभावे पूरणप्रत्ययान्तत्वे, प्रियादित्वे, च पूर्वस्य स्त्रीलिङ्गशब्दस्य नपुंवद्भावः । यथा-स्त्रीपुंल्लिङ्गयोः प्रवृत्ति-निमित्तभेदात् द्रोणीभार्य इत्यादौ, भाषितपुंस्कत्वाभावात्-खट्वाभार्यइत्यादौ, ऊङन्तत्वात्-ब्रह्मबन्धूभार्यइत्यादौ उत्तरपदे सामानाधिकरण्याभावात् कल्याण्यामाता-कल्याणीमातेत्यादौ, स्त्रीत्वाभावाद्-ग्रामणिकुलं तत्र दृष्टिरस्य-ग्रामणिदृष्टिरित्यादौ, पूरणप्रत्ययान्तत्वात्-कल्याणीपञ्चमारात्रयइत्यादौ, प्रियादित्वात्-कल्याणीप्रियइत्यादौ च न पुंवद्भावः । एष्वविषयो बहु-व्रीहावविज्ञेयः । कर्मधारये पूरणार्थत्वं प्रियादित्वं च न व्याघातकं भवति ।

वि. ३ समानाधिकरण जातीययोरेव महत आत्वविधानादसामानाधिकरण्ये न, यथा-महतःसेवा-महत्सेवा । षष्ठीसमा-सलाक्षणिकत्वेन तं विहाय प्रतिपदोक्तः सन्महदितिविहित एव गृह्यते । समानाधिकरणग्रहणं व्यर्थमिति तु न, …महान्तौ बाहू यस्य स-महाबाहुरिति अनेकमन्यपदार्थे इति प्रतिपदोक्तत्वाभावेनाग्रहे आत्वाभावप्रसङ्गात् । तेनात्र …नाधिकरणग्रहणम्" "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषाया अप्रवृत्तेर्बहुव्रीहावप्यात्वं भवति । …करणतत्पुरुष एव न भवति । अमहान् महान्भूत-महद्भूत इत्यत्र तु च्व्यर्थे अमहतः प्रकृतित्वेन महतो विकृतित्वेन …रमहत एव भूतसामानाधिकरण्यं, नतु महत इतिनात्वम् । अमहती महती संपन्ना-महद्भूता ब्राह्मणीत्यत्र पुंवद्भावस्तु …त्यर्थे महच्छब्दस्य वृत्तत्वेन भूतसामानाधिकरण्याद्भवति, आत्वं नभवतीत्यादिर्भाष्ये विस्तरः । परममहत्परिमाण-…त्र परममहतो द्रव्यस्य परिमाणमिति व्यधिकरण षष्ठीसमासेन नात्वम् ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन (२-१-४६) एते सुबन्ताः समानाधिकरणेन सुबन्तेन सह वा समस्यन्ते । पूर्वकाल इत्यर्थग्रहणम् । पूर्वं स्नातः पश्चादनुलिप्तः-स्नातानुलिप्तः । पूर्वं बद्धः पश्चान्मुक्तः-बद्धमुक्तः । पूर्वं शृतं (पक्वं) पश्चात् शीतं-शृतशीत जलम् । एकश्चासौ पुत्रः-एकपुत्रः । एवं सर्वदेवाः, जरन्नैयायिकाः, पुराणकविः, नवान्नम्, पुराणग्रन्थः, नववैद्यः, केवल-वैयाकरणः, केवलगणकः । दिक्संख्ये संज्ञायाम् (२-१-५०) दिक्शब्दा संख्याशब्दाश्च समानाधिक-रणेन सुबन्तेन सह समस्यन्ते । वाक्येन संज्ञानवगमान्नित्यसमासोयम् । पूर्वश्चासौ इषुकामशमी-पूर्वेषुकामशमी (देशविषयः) सप्त च ते ऋषय-सप्तऋषयः (मरीच्यादयः) । एवं पूर्ववङ्गः, उत्तरभारतम् पञ्चदेवाः, त्रिशक्तयः । असंज्ञायां तु न-उत्तरा वृक्षाः, पञ्च ब्राह्मणाः । पापाणके कुत्सितैः (२-१-५४) पापाणकौ कुत्सितवाचिभिः समानाधिकरणसुबन्तैः सह वा समस्येते । पापश्चासौ नापितः-पापनापितः । आणकः (निन्द्यः) श्चासौ नापितः आणकनापितः । एवं पापपुरुषः, पापरोगः, आणकपुरुषः । पूर्वा-पर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीराश्च (२-१-५८) पूर्वादयः सुबन्ताः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समानाधिकरणेन सुबन्तेन सह वा समस्यन्ते । पूर्वे च ते पुरुषाः–पूर्वपुरुषाः । अपरश्चासौ पुरु
अपरपुरुषः । एवं प्रथमशिष्यः, चरमपत्रम्, जघन्यसेवकः, समानजनः, मध्यजनः, मध्यमपुरु
वीरभटः । अपरस्यार्द्धे पश्चभावो वक्तव्यः (वा) अपरश्चासौ अर्धः-पश्चार्धः । सन्महत्परमो
त्कृष्टाः पूज्यमानैः (२-१-६१) सदादयः सुबन्ताः पूज्यमानवाचिभिः समानाधिकरणसुबन्तै सह
समस्यन्ते । सँश्चासौ पुरुषः-सत्पुरुषः । आन्महत इत्यात्वम् । महती चासौ देवी-महादेवी । पुंवद्
आत्वं च । एवं सद्वैद्यः, सज्जनः, महादेवः, महापुरुषः, परमपुरुषः, परमार्थः, उत्तमपुरुषः, उत्
पुरुषः । पूज्यमानैरिति वचनान्नेह-उत्कृष्टः (उत्थापितः) गौः कर्दमात् । कतरकतमौ जातिप
(२-१-६३) जाति परिप्रश्ने वर्तमानौ कतरकतम शब्दौ समानाधिकरणसुबन्तेन सह वा समस्
कतरः कठः (कठशाखाजातिः) कतरकठः । कतमः कलापः (कलाप शाखाजातिः)- कतमक
कठकलापादयो गोत्रं च चरणैःसहेति जातिवाचिनः । कतरमनुष्यः । जातिपरिप्रश्नाभावान्नेह-भव
कतरश्चैत्रः, भवतां कतमो मैत्रः । किं क्षेपे (२-१-६४) किमित शब्दः समानाधिकरणेन सुब
सह समस्यते निन्दायाम् । कुत्सितः सखा-किंसखा, एवं किं राजा, किंप्रभुः । अनिन्दायां तु नेह
राजा पाटलिपुत्रे । शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् (वा) शाकप्रियः पार्थि
शाकपार्थिवः । देवपूजको ब्राह्मणः-देवब्राह्मणः । एवं काव्यपाठकच्छात्रः-काव्यछात्रः ।

वि. पूर्वकालैक इत्यादि विहितेषु विशेषणंविशेष्येणेवेत्यनेनैव समाससिद्धेस्तत्प्रपञ्चरूपाणीमानि सूत्राणि, प्रथ
निर्दिष्टानां पूर्वप्रयोगनियमार्थानिव च । दिक्संख्येसंज्ञायामिति दिक्संख्ययोः संज्ञायामेवेति नियमार्थं च । एक
संख्यावाचकतया संज्ञायामेवेति नियमबाधनार्थं, पूर्वकालैकेत्यत्र एकशब्दग्रहणम् ।

वि. पूर्वकालवर्जमन्ये विशेषणपूर्वपदाः, पूर्वकालार्थकस्तु विशेषणोभयपदः । पूर्वकाले समासे द्वयोर्विशेषणयो
पद्यमपि तु पौर्वापर्यं प्रतीयते, पूर्वं शीतं पश्चादुष्णमित्यर्थे शीतोष्णं जलमिति पूर्वकालेति समासः । किञ्चिच्छीतं किञ्
मिति यौगपद्यार्थे तु विशेषणं विष्येणेति समासः । एवमन्यत्र पृथक्पृथक् शीतोस्योष्णस्य च समुदाये तु शीतो
द्वन्द्वः ।

वि. क्वचित्सामर्थ्याभावेपि समासदर्शने मध्ये पूरकपदं लुप्तं कल्पयित्वा शाकपार्थिवादिसमासे नोपपादनीयं भव
पश्चाद्दृश्यते ।

प्रयोगाः—स्थाने भवानेकनराधिपः सन् । महाजनो येन गतः स पन्थाः । वनाय पीत
बद्धवत्सां यशोधनो धेनुमृषेर्मुमोच । पूर्वपुरुषान्स्मर । अस्ति महारण्ये पर्कटीवृक्षः । काव्य
महारात्रिः । प्रफुल्ललताभिः परितमुपवनम् । नातिशीतोष्णो वायुः । स किंसखासाधु न
योधिपम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषणोभयपदः—

श्रेण्यादयः कृतादिभिः (२-१-५९) श्रेण्यादयः सुबन्ताः कृतादिभिः समानाधिकरणैः सह समस्यन्ते। श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम् (वा) (अश्रेणयः) श्रेणयः कृताः-श्रेणीकृताः। शिल्पजीविनां समूहाः श्रेणय उच्यन्ते। यदा तु सिद्धा एव श्रेणयः क्रियन्ते तदा न समासः। च्व्यन्तानां तु कुगतिप्रादय इति नित्यसमासः श्रेणीकृताः। श्रेण्यादयः—श्रेणि, एक, प्रग, राशि, निधान, वदान्य, अध्यापक, पण्डित, कुशल, चपल, निपुण, कृपण, इत्यादयः। कृतादयः—कृत, मित, मत, भूत, उक्त, समाख्यात, सम्भावित, अवधारित, इत्यादयः। एवं पूगकृतः, राशिकृतः अध्यापकभूतः, वदान्यसम्भावितः, कृपणावधारितः। क्तेन नञ्विशिष्टेनानञ् (२-१-६०) नञ्विशिष्टेन क्तान्तेन अनञ् समानाधिकरणं क्तान्तं वा समस्यते। कृतं च तदकृतंच—कृताकृतम् (अर्द्धकृतम्) कार्यम्। एवं दृष्टादृष्टा ग्रन्थाः। मुक्तामुक्तोजनः। पीतापीतं पयः। उदितानुदितः सूर्यः। कृतापकृतादीनामुपसंख्यानम् (वा) कृतापकृतम्। मुक्तविमुक्तः। गतप्रत्यागतः। युवा खलतिपलितवलिनजरतीभिः (२-१-६७) खलत्यादिभिः समानाधिकरणैः सह युवशब्दः वा समस्यते। युवा खलतिः (खल्वाटः)—युवखलतिः। अन्तर्विभक्त्या पदत्वान्नलोपः। जरतीभिरितिनिर्देशात्प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणेन युवतिशब्दोपि समस्यते। युवतिर्जरती-युवजरती। पूर्वपदे पुंवद्भावो नकारलोपश्च। युवत्यां जरतीधर्मारोपात्सामानाधिकरण्यम्। एवं युवपलितः (शुक्लकेशः)। युववलिभः (वलियुक्तः)। कृत्यतुल्याख्या अजात्या (२-१-६८) कृत्यप्रत्ययान्ता स्तुल्यपर्यायाश्च अजातिवाचिना समानाधिकरणेन सह वा समस्यन्ते। भोज्यं च तदुष्णं-भोज्योष्णम्। तुल्यं च तत् श्वेतं-तुल्यश्वेतम्। एवं भोज्यलवणम्, तुल्यमहान्, सदृशश्वेतः। अजात्येति निषेधसामर्थ्याज्जातिवाचिना सह विशेषणंविशेष्येणेत्यादिसमासो न। यथा-भोज्यओदनः। वर्णो वर्णेन (२-१-६९) वर्णविशेषवाची तादृशेन समानाधिकरणेन सह वा समस्यते। कृष्णश्चासौ पिङ्गलः—कृष्णपिङ्गलः। एवं नीललोहितः, लोहितशवलः, कृष्णसारङ्गः। कुमार श्रमणादिभिः (२-१-७०) कुमारशब्दः श्रमणादिभिः समानाधिकरणैः सह वा समस्यते। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्। कुमारी श्रमणा (भिक्षुः)—कुमारश्रमणा (पूर्वस्य-पुंवद्भावः)। श्रमणादयस्तु-श्रमणा-प्रव्रजिता-कुलटा-गर्भिणी-तापसी-दासी-बन्धकी (कुलटा)-अध्यापकः-अभिरूपक-पण्डित-पटु-मृदु-कुशल-चपल-निपुणादयः एवं कुमाराध्यापकः। कुमारपण्डितः। कुमारगर्भिणी। कुमारदासी।

वि. १ विशेषणविशेष्यभावस्य विवक्षाधीनत्वाद्द्वयोर्विशेषणत्वेपि विशेषणं विशेष्येणेत्यनेनैव समाससिद्धौ प्रथमानिर्दिष्टानां पूर्वप्रयोगार्थानि तस्यैव प्रपञ्चरूपाणीमान्यपि सूत्राणि। द्वयोर्वर्णत्वे यस्य कस्याप्येकतरस्य प्रथमान्तग्राह्यत्वसंभवेन पूर्वनिपातेन ऐच्छिकः। यथा-कृष्णसारङ्गः। सारङ्गःकृष्णः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २ गणे श्रमणादय, कतिपये स्त्रीलिङ्गा एव पठ्यन्ते तैः सह स्त्रीलिङ्ग एव कुमारशब्दः समस्यते, अध्याप-दयस्तु पुंलिङ्गा स्त्रीलिङ्गाश्च गृह्यन्ते, तैः सह यथौचित्यं पुंलिङ्ग स्त्रीलिङ्गश्च कुमारशब्दः समस्यते। यथा-कुमारः पण्डितः कुमारपण्डितः। कुमारी पण्डिता—कुमारपण्डिता (पुंवद्भावः)।

प्रयोगा :—वणिक्पथे पूगकृतानि यत्र। नीललोहितमुपास्महे वयम्। कृताकृतास्तण्डु . नीलपीता शाटी। कुमारतापसी महमपश्यम्। बद्धाबद्धेन केशपाशेन पलायिता सा। कुमा गर्भिणी परिरक्षणीया। वृद्धकुमारीवरन्यायः। उदितानुदिते सूर्ये स गृहान्निर्ययौ।

विशेष्यपूर्वपदः—

कुत्सितानि कुत्सनैः (२-१-५३) कुत्सितवाचीनि सुबन्तानि कुत्सनवाचिभिः समानाधिक सह वा समस्यन्ते। शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते। विशेष्यस्य पूर्वनिपातार्थमार खसूचिश्चासौ वैयाकरणः—वैयाकरणखसूचिः। (आकाशदर्शी-निष्प्रतिभः)। कितवश्च याज्ञिकः—याज्ञिककितवः। एवं मीमांसकदुर्दुरूढः (नास्तिकः)। कुत्सितानीत्युक्तेर्नेह—वैया श्चौरः (नह्यत्र वैयाकरणत्वं कुत्स्यते) पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-बष्क प्रवक्तृ-श्रोत्रिया-ध्यापक-धूर्तैजातिः (२-१-६४) पोटादिभिः सुबन्तैः सह जातिवाचिसमान करणं समस्यते। विशेष्यस्यपूर्वप्रयोगः परवल्लिङ्गता। पोटा इभः—इभपोटा, पोटा स्त्री लक्षणा। स्तोको बालः। गृष्टि, सकृत्प्रसूता, धेनुः अचिरप्रसूता, वशा वन्ध्या, वेहद्गर्भोपघा बष्कयणी चिरप्रसूता। एवं-गोयुवतिः। गोवशा, गोगृष्टिः। गोधेनुः। गोवेहत्। गोबष्क कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्तः। जातिरित्युक्त्या नेह-वैश्यो धूर्तः। धूर्त मकुत्सार्थम्। कुत्सायां तु-धूर्तकठः। प्रशंसावचनैश्च (२-१-६१) जातिवाचि सुबन्तं प्रशंसाव समानाधिकरणैः सह समस्यते। अत्र प्रशंसावचना मतल्लिकादयो नियतलिङ्गा रूढि गृह्यन्ते। गोमतल्लिका (प्रशंसागौः) गोप्रकाण्डम्, हस्तिप्रकाण्डम्, जात्युक्तेर्नेह—कुमा मतल्लिका। चतुष्पादो गर्भिण्या (२-१-७१) चतुष्पाद्वाचि सुबन्तं समानाधिकरणेन गर्भि शब्देन सह समस्यते। पूर्वप्रयोगार्थं वचनम्। गर्भिणी गौः-गोगर्भिणी। अजागर्भि चतुष्पाज्जातिरिति वक्तव्यम् (वा) नेह कालाक्षी गर्भिणी, चतुष्पादित्युक्तेर्नेह-ब्राह्मणी गर्भि

वि. विशेष्यपूर्वपदेषु पूर्वपदार्थे उत्तरपदार्थान्वयात्प्राधान्यम्। विशेषणं विशेष्येणेति बाधकानीमानि पूर्वप्रयोग वैपरीत्यम्।

प्रयोगाः—गोगर्भिणी पोषणीया। वह्नीमतल्लीषु वनान्तरेषु। पण्डितप्रकाण्डमेषः। गोप्रकाण्डया दुग्धं घनं स्वादु च। याज्ञिककितवास्तीर्थेषु दृश्यन्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपमानपूर्वपद :—

उपमानानि सामान्यवचनैः (२.१.५५) उपमानवाचीनि सुबन्तानि सामान्यधर्मवद्वाचिभिः सुबन्तैः सह वा समस्यते। मेघ इव श्यामः–मेघश्यामः। दण्ड इव दीर्घः–दण्डदीर्घः। शस्त्रीव श्यामा-शस्त्रीश्यामा। विद्युदिव चपला-विद्युच्चपला। एवं काककृष्णः। समुद्रगम्भीरः। नवनीतकोमलम्। किसलयमृदूनि। सामान्यवचनैरित्युक्त्या नेह-पर्वता इव मेघाः।

वि. येनोपमीयते तदुपमानं, यदुपमीयते तदुपमेयं, येन धर्मेणोपमीयते तत्सामान्यं (साधारणधर्मो गुणक्रियादिः) भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम्। मेघ इव श्यामो विष्णु रित्यत्र मेघस्योपमानस्य श्यामत्वेन धर्मेण सादृश्य ...न्वे विष्णौ प्रतीयते। सामान्यधर्मविशिष्टवाचिनैव सहोपमानं समस्यते, नतु धर्ममात्रवाचिना सह, तथात्वे समस्त...मेयविशेषणत्वं न स्यात्। अतश्च सामान्यधर्ममुक्त्वा तद्वति द्रव्यादौ ये पर्यवस्यन्ति त एव शब्दाः सामान्यवचनाः। ...न पूर्वपदं तत्सदृशे लाक्षणिकं तेनोत्तरपदेन सह सामानाधिकरण्यं भवति सदृश लाक्षणिकत्वं सूचयितुमेव पूर्वपदे इव ...दो लौकिकविग्रहे प्रयुज्यते। पूर्वपदस्योत्तरपदेन सह सामानाधिकरण्यादेव-मृगीव चपला-मृगचपलेत्यादौ पुंवद्भावोपि। ...श्याम इत्यादौ मेघगतश्यामत्वसदृशश्यामत्ववान्विष्णुरित्यादिर्बोधः। विशेषणं विशेष्येणेति समाससिद्धावप्युपमानपूर्व...र्थं वचनम्। सामान्यधर्ममात्रवाचकेन सह तु बहुव्रीहिर्विंद्यते।

प्रयोगा :—मेघश्यामं पीतकौशेयवासं। नवनीतकोमलं सतो हृदयम्। नलिनसुन्दरं नाथ ते मुखम्। चन्द्रिकाविशदं यशः। हस्तिहस्तायतौ बाहू। दर्पणनिर्मला भित्तिः। दुष्टो राक्षसकर्कशः। काशश्वेतः केशपाशः। हृदयं वज्रनिष्ठुरम्।

उपमानोत्तरपद :—

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (२.१.५६) उपमितमुपमेयम्। उपमेयवाचि सुबन्तं व्याघ्रादिभि रुपमानवाचकैः सह समस्यते, सामान्यधर्मस्याऽप्रयोगे सति। पुरुषो व्याघ्र इव-पुरुषव्याघ्रः। नरः सिंह इव-नरसिंहः। व्याघ्रादयस्तु-व्याघ्र-सिंह-ऋक्ष-भल्लूक ऋषभ-(वृष) चन्दन-वृष-वृक्ष-वराह-हस्तिन्-कुञ्जर-पुण्डरीकादयः। एवं राजकुञ्जरः, पुरुषर्षभः, (आकृतिगणोयम्) मुखपद्मम्। मुखचन्द्रः। करकिसलयम्। सामान्याप्रयोग इत्युक्तेनेह-पुरुषो व्याघ्र इव शूरः।

वि. अत्रोत्तरपदं तत्सदृशे लाक्षणिकमिति सूचयितुमुत्तरत्र इव शब्दप्रयोगो लौकिकविग्रहे। विशेषणं विशेष्ये...सिद्धावुपमेयपूर्वप्रयोगार्थंसामान्याप्रयोगार्थं च वचनम्। अत्रोत्तरपदस्य पूर्वपदेऽन्वयात्पूर्वपदार्थप्राधान्यं ...रि तत्पुरुषत्वेन परवल्लिङ्गता। सा ...र्मस्त्वर्थतः प्रतीयते तत्प्रयोगे तु न समासः। भाष्याब्धिः क्वाति...र इति कैयटोक्तिस्तु भाष्यमेवाब्धिरिति मयूरव्यंसकादिरूपकसमासेनोपपादनीया।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृन्दारकनागकुञ्जरैः पूज्यमानम् (२-१-६२) एभिः सह पूज्यमानवाचि सुबन्तं समस्यते। पूज्यमानमित्युक्त्या वृन्दारकादयः पूजावचना गृह्यन्ते। गौर्वृन्दारक इव (देव इव)-गोवृन्दारकः। पुमान् नाग इव (हस्तीव) पुन्नागः। राजा कुञ्जर इव (हस्तीव)-राजकुञ्जरः। पूर्वपदेनार्थ लोपः। एवं नरकुञ्जरः, राजवृन्दारकः।

वि. पूज्यमानस्य पूर्वप्रयोगार्थं वचनम्। व्याघ्रादेराकृतिगणत्वादेव सिद्धावपि पुनर्वचनं सामान्यधर्मप्रयोगे समासार्थम्। तेन राजकुञ्जरः श्रेष्ठ इत्याद्यपि। एष्वपि उत्तरपदं सदृशे लाक्षणिकम्।

प्रयोगाः—राजते राजकुञ्जरः। अहो महीभृद्भटकुञ्जरोयम्। मुखचन्द्रः प्रकाशते। पा... मुपाश्रितः। नमामि गौर्याश्चरणारविन्दम्।

मयूरव्यंसकादि :—

मयूरव्यंसकादयश्च (२-१-७२) मयूरव्यंसकादयः समस्ताः समुदाया निपात्यन्ते। एषु ... कार्यं निपातनाद्, चकारस्यावधारणार्थत्वात् परमो मयूरव्यंसक इत्यादौ न समासान्त... व्यंसक,(धूर्तः) श्चासौ मयूरः—मयूरव्यंसकः। अविहितलक्षणस्तत्पुरुषो मयूरव्यंसका... द्रष्टव्यः। मुखमेव चन्द्रः-मुखचन्द्रः। गुण इति बुद्धिः-गुणबुद्धिः। उदक् च अवाक् च-उ... वचम्। निश्चितं च प्रचितं च- निश्चप्रचम् (निश्चितप्रचितयोर्निश्चप्रचादेशौ)। नास्ति कि... यस्य सः-अकिञ्चनः। (बहुव्रीह्यपवादस्त्रिपदतत्पुरुषः) नास्ति कुतो भयं यस्य सः- अकुतो... अन्यो राजा- राजान्तरम् (नित्यसमासतयाऽस्वपदविग्रहः)। चिदेव- चिन्मात्रम् (अस्वपदवि... नित्यसमासः)। आख्यातमाख्यातेनक्रियासातत्ये (ग) अश्नीत पिबतेत्येवं सततं यत्राभिधीयते क्रिया- अश्नीतपिबता (अन्यपदार्थक्रियाप्राधान्येन स्त्रीत्वाट्टाप्)। पचतभृज्जतेत्येवं यत्र ... सा-पचतभृज्जता। एवं खादतमोदता।

वि. मुखं चन्द्र इवेत्युपमितसमासे चन्द्रस्वरूपं मुखमितिपूर्वपदार्थप्राधान्य मुखमेव चन्द्र इतिमयूरव्यंसकादि... त्तरपदार्थप्राधान्यत्वं भवतीति बोधभेदः। ईदृशोरूपकसमास इत्यप्युच्यते। विधानान्तरैरसिद्धः सर्वस्तत्पुरुषो मयू... कादिपाठेनोपपादनीयः पचतभृज्जतेत्यादिः आख्यातयोः समासोप्यत्रपठितः।

प्रयोगाः—राजान्तरं राजसुतां निनाय। अमरीकवरीभारभ्रमरीमुखरीकृते करोतु दुरितं ... चरणपङ्कजम्। पचतभृज्जता खादतमोदता च समदृश्यत। अकिञ्चनोप्यकुतोभयः। उच्चाव... प्रलोभनैः स्वार्थं साधयन्ति धूर्ताः। मनोमृगो धावति कृत्यकानने। निश्चप्रचमिदं विपश्चि...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विगुः—

तद्धितार्थोत्तरपदसमाहारे च (२·१·५१) तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिग्वाचिनः संख्यावाचिनश्च शब्दाः समानाधिकरणेन सुबन्तेन सह समस्यन्ते स तत्पुरुषः। तद्धितार्थे-पूर्वस्यां शालायां भव इत्यर्थे तद्धिते भाविनि समानाधिकरणशालाशब्देन सह दिग्वाचि पूर्वाशब्दस्य समासे सुब्लुकि समुदायात् दिक्पूर्वपदादसंज्ञायां ञः इति ञप्रत्यये यस्येतिचेत्याकार लोपे आदिवृद्धौ, सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः (वा) इति पूर्वपदस्य पुंवद्भावे तद्धितान्तत्वेन प्रातिपदिकत्वात्सुबुत्पत्तौ पौर्वशालः। एवं अपरस्यां शालायां भवः-आपरशालः। उत्तरपदे-पूर्वा शाला प्रिया यस्येति त्रिपदबहुव्रीहौ तदन्तः प्रियाशब्दे परे पूर्वाशालाशब्दयोः तद्धितार्थेतिसमासे पूर्वपदस्य पुंवद्भावे प्रियाशब्दस्य गोस्त्रियोरिति ह्रस्वे पूर्वशालाप्रियः। एवम् अपरा शाला प्रिया यस्य-अपरशालाप्रियः। दिक्षु समाहारो नास्ति, अनभिधानात्। संख्यायां तद्धितार्थे-षण्णां मातॄणामपत्यमित्यर्थे षट्मातृशब्दयोरनेन समासे सुपो लुकि समस्तात् मातुरुत्संख्यासंभद्रपूर्वायाः इत्यणि उत्वेच आदिवृद्धौ समुदायात्सुबुत्पत्तौ षाण्मातुरः (स्कन्दः), एवं पाञ्चकपालः। उत्तरपदे-पञ्च गावो धनं यस्येति त्रिपदबहुव्रीहौ तदन्तर्धन शब्दे परे पूर्वपदयोस्तद्धितार्थेति विभाषाधिकारा-द्विकल्पेन समासे प्राप्ते, द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्य समासवचनम् (वा) इति नित्यसमासे सुब्लुकि गोरतद्धितलुकि (५-४-८२) गोन्तात्तत्पुरुषात्समासान्तष्टच् स्यात् नतुतद्धितलुकि। इति टच्प्रत्यये अवादेशे अन्तर्विभक्त्या पदत्वेन नकारलोपे समुदायात्सुबुत्पत्तौ पञ्चगवधनः। एवं दशगवधनः। अतद्धितलुकीत्युक्तेः पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यत्र क्रीतार्थतद्धितलुकि न टच्। समाहारे— पञ्चानां गवां समाहार इत्यर्थेऽनेन समासे सुब्लुकि टच्प्रत्यये अवादेशे नलोपे संख्यापूर्वो द्विगुः (२-१-५२) तद्धितार्थेत्यत्रोक्तास्त्रिविधः संख्यापूर्वः समासो द्विगुसंज्ञः स्यात्। इति द्विगुसंज्ञायाम्। द्विगुरेकवचनम् (२-४-१) द्विग्वर्थः समाहार एकवत्स्यात्। इत्येकवद्भावे सनपुंसकम् (२-४-१७) समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात्। इति परवल्लिङ्गापवादेन नपुंसकत्वे पञ्चगवम्। पञ्चानां मूलानां समाहार इत्यर्थे द्विगुसमासे एकवद्भावे नपुंसकत्वप्राप्तौ अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः (वा) इति स्त्रीत्वे द्विगोरिति ङीपि पञ्चमूली। एवं दशमूली, दशगणी, पञ्चफली, पञ्चवटी, त्रिलोकी, त्रिफली त्र्यनीकेत्यत्र तु अजादित्वाट्टाप्। पञ्चानां पात्राणां समाहार इत्यर्थे द्विगौ एकवद्भावे अका-रान्तोत्तरपदेन स्त्रीत्वप्राप्तौ पात्राद्यन्तस्यन (वा) इति निषेधेन नपुंसकत्वे पञ्चपात्रम्। एवं त्रिभुवनम्। चतुर्युगम्। पात्रादिराकृतिगणः। पञ्चानां खट्वानां समाहार इत्यर्थे द्विगुसमासे एकवद्भावे नपुंसकत्वं बाधित्वा नित्यं स्त्रीत्वे प्राप्ते, आबन्तोवा (वा) इति स्त्रीत्वपक्षे उपसर्जनत्वेनाकारह्रस्वे अदन्तत्वेन द्विगोरितिङीपि यस्येतिचेत्यकारलोपे पञ्चखट्वी, पक्षे नपुंसकत्वे ह्रस्वोनपुंसके-इति ह्रस्वे पञ्चखट्वम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं त्रिशालम्, पञ्चशालम्, चतुःशालम्। पञ्चानां कुमारीणां समाहार इत्यर्थे द्विगौ एकवद्भावे नपुंसकत्वे ह्रस्वोनपुंसक इति ह्रस्वे पञ्चकुमारि। एवं दशकुमारी, पञ्चानां तक्ष्णां समाहार इत्यर्थे द्विगौ, अनो नलोपश्च वा च द्विगुः स्त्रियाम् (वा) इति नलोपे स्त्रीत्वपक्षे ङीपि पञ्चतक्षी, पक्षे नपुंसकत्वे पञ्चतक्षम्

वि. संख्यापूर्वः समानधिकरणतत्पुरुषो द्विगुरुच्यते। स च त्रिधा तद्धितप्रत्यये कर्त्तव्ये तत्पूर्वप्रकृतिमाग... त्रिपदबहुव्रीहौ तदन्तः प्रथमद्वितीयपदयो रवान्तरसमासरूपः, संख्याविशेषणविशेष्ययोः समाहारार्थकश्चेति। प्रथमे द्वि... निमित्तकस्तद्धितप्रत्ययः, द्वितीये अवान्तरसमासेन स्वरविशेषः, तृतीये लिङ्गवचनविशेषः, सर्वत्र टजादि प्राप्ति... सोपि विशेषः समासफलम्। समाहारद्विगोः प्रयोगप्राचुर्यम्, सोयं द्विगुरेकवद्भावी, यः कश्चनसंख्यापूर्वः समानाधिकरण... तत्पुरुषः स द्विगुरित्युक्तेः दिक्संख्ये संज्ञायामिति विहितःसंख्यापूर्वोपि द्विगुः। स च संज्ञारूपोऽनेकवद्भावी परवल्लिङ्ग... समाहारद्विगोरेव एकवद्भावाल्लिङ्गविशेषनियमनाच्च।

वि. त्रिलोकनाथेनेत्यत्र तु द्विगौ ङीवापत्तेस्त्र्यवयवोलोकः (लोकसमुदायः) त्रिलोक इति मध्यपदलोपिसमासे... पपादनीयम्। पञ्चतक्षेत्यत्र उत्तरपदेचापदादिविधौप्रतिषेध इति प्रत्ययलक्षणनिषेधेनान्तर्विभक्तिमादाय पदत्वाभावे... लोपः प्रातिपदिकान्तस्येत्यप्रवृत्या अनानलोपश्चेति वार्तिकम्।

प्रयोगा :—क्लिष्टा पञ्चनली सूक्तिः। दशमूली कषायेण। द्वैमातुरो गणपतिः। पञ्चाङ्गं स... पचेत्। त्रिलोकनाथेन विहिंसिता द्विषः। पञ्चपात्रमानय। त्रिफलारसपानेन। पञ्चकाव्यं प... दशरूप्यकधनः। द्वैमातुरो गणपतिः षाण्मातुरः स्कन्दः।

समासान्तादिः—

तत्पुरुषस्याङ्गुलेःसंख्याव्ययादेः (५-४-८६) संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तो ऽच्प्रत्ययः स्यात्। द्वे अङ्गुली प्रमाणमस्य-द्व्यङ्गुलं दारु। तद्धितार्थद्विगौ मात्रचो लोपे य... यस्येतिचेतीकारलोपः। निर्गतमङ्गुलिभ्यो-निरङ्गुलम्। प्रादिसमासः। एवं त्र्यङ्गुलम्। षडङ्गुलम्... अत्यङ्गुलम्। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः (५-४-८७) अहरादिपूर्वकस्य चात्संख्याव्ययादेः... रात्रिशब्दान्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। अहर्ग्रहणम् द्वन्द्वार्थम्। अहश्च रात्रिश्च... अहोरात्रः। सर्वा रात्रिः-सर्वरात्रः। कर्मधारयः अचि इकारलोपः। पुण्या रात्रिः-पुण्यरात्रः... संख्याता रात्रिः-सर्वरात्रः। अतिक्रान्तो रात्रि-मतिरात्रः। द्वयो रात्र्योः समाहारः-द्विरात्रम्... (द्विगुः)। त्रिरात्रम्। राजाहःसखिभ्यष्टच् (५-४-९१) एतदन्तात्तत्पुरुषाट्टच्स्यात्। महांश्चासौ राजा... महाराजः। कर्मधारये टचि नस्तद्धित इति टेरनोलोपे महत आत्वं च। मृगाणां राजा-मृगराजः... अधि राजा-आधिराजः। राज्ञां राजा-राजराजः। पूर्वपदे नकारलोपोपि। प्रियश्चासौ सखा...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सखाः। कृष्णस्य सखा-कृष्णसखः। उत्तमं च अह इत्यत्र समासे टचि, अह्नष्टखोरेव (६-४-१३५)
पतयोः परयोरेव अह्नष्टिलोपो नान्यत्र। इति टेरनो लोपे रात्राह्नाहाःपुंसीति पुंस्त्वे उत्तमाहः।
पुण्यमह इत्यत्र समासे टचि टिलोपे पुण्यसुदिनाभ्यामिति क्लीबत्वे पुण्याहम्। टखोरेवेति निय-
मान्नेह टिलोपः-आह्निकम्। सर्वमह इत्यत्र समासे टचि टिलोपे प्राप्ते, अह्नोऽह्न एतेभ्यः (५-४ ८८)
सर्वादेः संख्याव्ययाभ्यां च परस्य अहन्शब्दस्याह्नादेशः स्यात्समासान्ते परे। इत्यह्नादेशे,
अह्नोऽदन्तात् (८-४-७) अदन्त पूर्वपदस्थाद्रेफात्परस्याह्नादेशस्य नस्य णः स्यात्। इति णत्वे
सर्वाह्णः। एवं पूर्वमहः-पूर्वाह्णः। अपरमहः-अपराह्णः। मध्यमहः-मध्याह्नः। सायमहः-सायाह्णः।
द्वयोरह्नोर्भवः-द्व्यह्नः। तद्धितार्थद्विगौ ठञो लुक्। क्षुभ्नादिषु च (८-४-३९) एषु णत्वं न स्यात्।
दीर्घाह्नी प्रावृट्। न संख्यादेः समाहारे (५-४-८९) समाहारे वर्तमानस्य संख्यादेरहन्शब्दस्य
अह्नादेशो न स्यात्। द्वयोरह्नोः समाहारः-द्व्यहः। द्विगौ टचि टिलोपे रात्राह्नाहापुंसीति
पुंस्त्वम्। एवं त्र्यहः। उत्तमैकाभ्यां च (५-४-९०) आभ्यां परस्याहन्शब्दस्य अह्नादेशो न स्यात्।
उत्तमशब्दोऽहःसर्वेतिसूत्रोक्तान्त्यार्थः पुण्यशब्दबोधकः। पुण्यमहः-पुण्याहम्। पुण्यसुदिनाभ्यामिति
क्लीबत्वम्। एकमहः-एकाहः। पूर्वकालैकेति समासे टचि टिलोपे रात्राह्नाहापुंसीति पुंस्त्वम्।

वि. १. अजादेः प्रत्ययस्य समासात्परत्वमनुक्त्वा समासान्तत्त्वकथनेन समासान्तर्गतत्वं, तेन टचि टित्वात् स्त्रियां ङीप् सिद्धिः। द्विगुकर्मधारययोरपि तत्पुरुषत्वेन ग्रहः।

वि. २. समासान्तप्रकरणे लिङ्गविशिष्टपरिभाषा न प्रवर्तते, ङ्याप्प्रातिपदिकादितिभाष्योक्तेः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषाया अनित्यत्वाद्राजन्शब्देन राज्ञीशब्दस्याऽग्रहणेन स्त्रियां टज्न। महती चासौ राज्ञी-महाराज्ञी, मद्राणां राज्ञी-मद्रराज्ञी।

वि. ३. अग्राख्यायामुरसः (५-४-९३) अग्रं प्रधानम्। तद्बोधने उरस्शब्दान्तात्तत्पुरुषाट्टच् स्यात्। अश्वानामुरस-अश्वोरसम् मुख्याश्वः) अनोऽश्मायःसरसां जातिसंज्ञयोः (५-४-९४) अनश्माद्यन्तात्तत्पुरुषाट्टच् स्याज्जाति-संज्ञयोः। उपगतमनः-उपानसम्। एवम् अमृताश्मः। कालायसम्। इति जातिः। महानसम्, पिण्डाश्मः, लोहितायसम्, ...सरसम् इति संज्ञा। ग्रामकौटाभ्यां च तक्ष्णः (५-४-९५) टच् स्यात्। ग्रामस्य तक्षा-ग्रामतक्षः।
कौटः (कुट्यांभवः) चासौ तक्षा-कौटतक्षः। अतेः शुनः (५-४-९६) टच्स्यात्। श्वानमतिक्रान्तः-अतिश्वः (वराहः)। उपमानादप्राणिषु (५-४-९७) अप्राणिविषयकोपमानवाचिनः शुनष्टच्स्यात्। आकर्षः (धान्याकर्षकदारु) श्वा इव ...र्षश्वः। प्राणिनि तु वानरश्वा। उत्तरमृगपूर्वाच्च सक्थ्नः (५-४-९८) चादुपमानादपि टच्स्यात्। उत्तरं सक्थि-उत्तरसक्थम्। मृगस्य सक्थि-मृगसक्थम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वं सक्थि-पूर्वसक्थम्। फलकमिव सक्थि-फलकसक्थम्। नावो द्विगोः (५-४-९९) नौशब्दान्
द्विगोष्टच्स्यान्नतु तद्धितलुकि। द्वाभ्यां नौभ्यामागतः-द्विनावरूप्यः। द्वयोर्नावोः समाहारः-द्विनाव
अर्धाच्च (५-४-१००) अर्धान्नावष्टच्स्यात्। नावोर्धम्-अर्धनावम्। क्लीबत्वं लोकात्। खार्याः प्रा
(५-४-१०१) द्विगोरर्धाच्च खार्याष्टज्वा स्यात्। द्वयोः खार्योः समाहारः द्विखारम्; द्विखारि। ख
अर्धम्-अर्धखारम्, अर्धखारि। द्वित्रिभ्यामञ्जलेः (५-४-१०२) द्विगौ टज्वा स्यादतद्धितलु
द्वयोरञ्जल्योः समाहारः-द्व्यञ्जलम्, द्व्यञ्जलि। तद्धितलुकि तु द्वाभ्यामञ्जलिभ्यां क्रीतः-द्व्यञ्जलि
ब्रह्मणो जानपदाख्यायाम् (५-४-१०४) ब्रह्मान्तात् तत्पुरुषाट्टच्स्यात् समासेन जानपदत्वमाख्यायते
सुराष्ट्रे ब्रह्मा (विप्रः)-सुराष्ट्रब्रह्मः। कुमहद्भ्यामन्यतरस्याम् (५-४-१०५) आभ्यां ब्रह्मणष्टज्वा स्
तत्पुरुषे। कुत्सितो ब्रह्मा (ब्राह्मणः)-कुब्रह्मः, कुब्रह्मा। महांश्चासौ ब्रह्मा-महाब्रह्मः, महाब्र
अष्टनः कपाले हविषि (वा) कपालशब्दे परे हविषि वाच्ये अष्टन आत्वं स्यात्। अष्टसु कपा
संस्कृतः-अष्टाकपालः पुरोडाशः। तद्धितार्थे द्विगौ संस्कृतंभक्षा इत्यण्, द्विगोर्लुगनपत्ये इति लु
नकारस्यात्वे सवर्णदीर्घः। गवि च युक्ते (वा) गोशब्दे परे युक्त इत्यर्थे गम्ये अष्टन आत्वं स्
अष्टौ गावो यस्येत्यर्थे बहुव्रीहौ-अष्टागवं (अष्टगोयुक्तम्) शकटम्। अच्प्रत्ययेत्यत्र अजिति
विभागाद्बहुव्रीहावप्यच्। अष्टानां गवां समाहारः-अष्टगवम्-तद्युक्ते लक्षणया, शकटमष्टागवमिति
द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः (६-३-४७) द्व्यष्टन्शब्दयो रात्वं स्यात्संख्यायामुत्तरप
अबहुव्रीह्यशीत्योः। द्व्यधिका दश (तत्पुरुषे), द्वौ च दश च (समाहारद्वन्द्वे) इति वा-द्वादश
द्वात्रिंशत्। अष्टादश। अष्टाविंशति। अष्टात्रिंशत्। संख्यायामित्युक्तेनेह-द्वैमातुरः। अबहु
शीत्योरित्युक्तेनेह-द्वौ वा त्रयो वा द्वित्राः। द्व्यधिका अशीति, द्वे च अशीतिश्चेति वा-द्व्यशी
प्राक् शतादिति वक्तव्यम् (वा) तेनेह न-द्व्यधिकं शतं, द्वे च शतं चेति वा-द्विशतम्। द्व्य
सहस्रम्, द्वे च सहस्रं चेति वा-द्विसहस्रम्। त्रेस्त्रयः (६-३-४८) त्रिशब्दस्य त्रयः स्यात्संख्यायामु
पदे अबहुव्रीह्यशीत्योः। त्रयश्च दश च त्र्यधिका दश इति वा-त्रयोदश। सकारस्य रु
गुणश्च। एवं त्रयोविंशतिः। त्रयस्त्रिंशत्। बहुव्रीह्यशीत्योस्तु न-त्रिर्दशेतिसुजर्थबहु
त्रिदशाः। बहुव्रीहौसंख्येये इति डच्। त्र्यधिका अशीतिः, त्रयश्चाशीतिश्चेति वा-त्र्य
प्राक्शतादितीहापि। तेन त्र्यधिकं शतं त्रयश्च शतंचेति वा-त्रिशतम्। त्र्यधिकं
त्रयश्च सहस्रं चेति वा-त्रिसहस्रम्। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्। (६.३..४९) द्व्य
त्रेश्च चत्वारिंशत्प्रभृतौ संख्यायामुत्तरपदे अबहुव्रीह्यशीत्योरात्वं त्रय आदेशश्च वा स्
द्व्यधिका चत्वारिंशत् द्वे च चत्वारिंशच्च इति वा-द्वाचत्वारिंशत् एवं द्वापञ्चाशत्, द्विपञ्चा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वाषष्टिः, द्विषष्टिः। द्वासप्ततिः, द्विसप्ततिः। द्वानवतिः, द्विनवतिः। अष्टाचत्वारिंशत्, अष्टचत्वारिंशत्। अष्टापञ्चाशत्, अष्टपञ्चाशत्। अष्टाषष्टिः अष्टषष्टिः। अष्टासप्ततिः, अष्टसप्ततिः। अष्टानवतिः, अष्टनवतिः। त्रयःपञ्चाशत्, त्रिपञ्चाशत्, त्रयःषष्टिः, त्रिषष्टिः। त्रयःसप्ततिः, त्रिसप्ततिः। त्रयोनवतिः, त्रिनवतिः। एकादिश्चैकस्य चादुक् (६.३.७६) एकादिर्नञ्प्रकृत्या स्यात्, एकस्य अदुगागमश्च। नञो विंशत्या सह समासे कृते एकशब्देन सह तृतीयेति योगविभागात् एकेन न विंशतिरित्यर्थे समासे सुब्लुकि नलोपोनञ इति प्राप्तस्य नकारलोपस्य प्रकृतिभावेन निवृत्तौ एकशब्दस्यान्तावयवे अदुक् (अद्) इत्यागमे सवर्णदीर्घे दकारस्य यरोऽनुनासिक इति पक्षे नकारे, एकान्नविंशतिः, एकादूनविंशतिः (एकोनविंशतिः)। एवं एकान्नत्रिंशत्, एकान्नचत्वारिंशत् इत्यादि। एकेन ऊना एकोना, एकोना चासौ विंशतिः-एकोनविंशतिः इति तु तृतीया तत्पुरुषगर्भः कर्मधारयः। एवं एकोनत्रिंशत्, एकोनचत्वारिंशत् इत्यादि। षष उत्वं दतृदशधासूत्तरपदादेःष्टुत्वं च धासु वेति वाच्यम् (वा) दत् दशन्शब्दयोरुत्तरपदयोः धाप्रत्यये च परे षष्शब्दस्योत्वम् उत्तरपदादेर्दकारस्य धकारस्य च ष्टुत्वं दत्दशयोर्नित्यं, धाप्रत्यये परे वा स्यादित्यर्थः। षडधिका दश, षट् च दश चेति वा इत्यर्थे-षोडशः। षट् दन्ता यस्य-षोडन्, षड्धा षोढा।

वि. द्वादशेत्यादिषु द्वौ च दश चेत्यर्थे समाहारद्वन्द्व एव नत्वितरेतरद्वन्द्वः, अनभिधानात्। द्व्यधिका दशेत्याद्यर्थे मध्यमपदलोपी शाकपार्थिवादित्तत्पुरुषः; द्विविधेप्यर्थे रूपैक्यं समानसंख्यार्थश्च। द्वौ एकश्च द्व्येकाः, द्व्यधिक एकः द्व्येकः इत्यादि तु नभवति; एकादिनवान्तानां परस्परं द्वन्द्वतत्पुरुषौ नस्त इति चार्थसूत्रे भाष्ये ध्वनितत्वादिति शेखरोक्तिः, तेन दशनपर्यन्तशब्दान्निहाय दशविंशत्याद्युत्तरपदान्येवोदाहरणनिदर्शितानि। बहुव्रीहिस्तु सर्वेषाम्; तेन द्वित्रा इत्यादि। द्व्येकयोरिति तु शब्दपरत्वेन संख्यार्थाभावात् द्वन्द्व उपपद्यते एव। एकश्च दश च एकाधिका दश इति वा एकादशेत्यत्रात्वं तु आन्महत इति सूत्रे आदितियोगविभागेन प्रागेकादशभ्य इति भाष्यनिर्देशेन वोपपादनीयम्।

परवल्लिङ्गंद्वन्द्वंतत्पुरुषयोरित्यत्र द्वन्द्व इतरेतरद्वन्द्व एव समाहारे नपुंसकत्वविधानात्। अर्धपिप्पली। (प्र० तत्०) राजपुरुषः (ष० तत्) तद्दष्टा (तृ० तत्) मद्गृहम् (ष० तत्) कुक्कुटमयूर्यौ, मयूरीकुक्कुटौ (द्वन्द्वः) पुष्पपत्राणि (द्वन्द्वः)। द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु प्रतिषेधो वाच्यः (वा) गतिग्रहणं प्रादिसमासोपलक्षणम्। पञ्चसु कपालेषु संस्कृतः पुरोडाशः-पञ्चकपालः। (तद्धि० द्विगु०), त्रिभुवनम्, त्रिलोकी (समा० द्विगु०), प्राप्तो जीविकां प्राप्तजीविकः, आपन्नो जीविकाम्-आपन्नजीविकः (द्वि० तत्०)। अलङ्कुमार्यै-अलङ्कुमारिः। अत एव ज्ञापकात्समासः। कौशाम्ब्या निष्क्रान्तः-निष्कौशाम्बिः (प्रादि० तत्०) पूर्ववदश्ववडवौ (२-४-२७) अत्र पूर्ववल्लिङ्गं स्यात्। अश्वश्च वडवा च-अश्ववडवौ। द्विवचनमविवक्षितम्। अश्ववडवान्। अश्ववडवैः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रात्रान्हाहाःपुंसि (२.४.२९) एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । अनन्तरत्वात्परवल्लिङ्गताप... दोऽप्ययं परत्वात्समाहारनपुंसकत्वमपि बाधते । रात्रेः पूर्वभागः-पूर्वरात्रः । पूर्वमहः, अन्हः पूर्वा... वा पूर्वाह्णः । अहश्च रात्रिश्च अहोरात्रः (समाहारद्वन्द्वः) । द्वयोरन्होः समाहारः द्व्यहः (द्विगु) संख्यापूर्वं रात्रं क्लीबम् (लि०) द्वयोरात्र्योः समाहारः-द्विरात्रम् (द्विगुः)-एवं त्रिरात्रम् । चतूरा... गणरात्रम् । बहुरात्रम् । बहुगणवत्विति संख्यात्वम् । अपथं नपुंसकम् (२.४.३०) अपथ... नपुंसकं स्यात् । न पन्थाः-अपथम् । कृतसमासान्तनिर्देशान्नेह-अपन्थाः । पथोविभाषेतिसमास... विकल्पः । तत्पुरुष इत्येव तेन नविद्यते पन्था यस्मिन्नित्यर्थे बहुव्रीहौ तु-अपथो दे... पथः संख्याव्ययादेः (वा) संख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः । त्र... पन्था इत्यर्थे समासे ऋक्पूरब्धूरिति समासान्तेऽचि टिलोपे क्लीबत्वे त्रिपथम् । विरूपः प... विपथम् । कृतसमासान्तनिर्देशान्नेह-शोभनः पन्थाः-सुपन्थाः,अतिपन्थाः । नपूजनादिति समा... निषेधः । अर्धर्चाः पुंसि च (२.४.३१) अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः । ऋचोर्धम्-अ... अर्धर्चम् । अर्धनपुंसकमिति समासे ऋक्पूरब्धूरिति अप्समासान्तः । गोमयादयोन्येऽप्य... शब्दविशेषा द्विलिङ्गेऽस्मिन्गणे पठ्यन्ते । सामान्ये नपुंसकम् (वा) मृदु पचति । प्रातः कमनी...

वि. १ शब्दस्वरूपाश्रया चेयमर्धर्चादिषु द्विलिङ्गता क्वचिदर्थभेदेनापि व्यवतिष्ठते । यथा पद्मशङ्खौ निधिविशेषे... जलजे द्वयोः । भूतः पिशाचे द्वयोः, क्रियावाचित्वेऽन्यलिङ्गः, सैन्धवो लवणे द्वयोः । सिन्धूद्भवे वाच्यलिङ्गः सा... पुंसि, न्यायादनपेते क्लीबे । धर्मोऽपूर्वे पुंसि, तत्साधने क्लीबे । अर्धर्चादिगताः शब्दविशेषास्तु-गोमय-कषाय-... कपाट-ध्वज-गृह-यूपान्धकार-दण्ड द्वीप-मोदक-नख-चरण पुच्छ घृत-चषक-विमान-तडाग-तीर्थ-शरीर-... पीयूष देहाङ्कुश कलशौ दन प्रवाल-शकलप्रभृतयो द्विलिङ्गकाः कोशव्यवहारादितोपि ज्ञेयाः ।

वि. २. सामान्ये नपुंसकमित्यनियतलिङ्गविषयम् । न्यायसिद्धं चैतत् विशेष्यविशेषणासन्निधाने स्त्रीलिङ्ग... रनभिव्यक्तौ उभयोरन्तरं यच्च तदभावे नपुंसकम् इति तदौचित्यात् । मृदुपचतीति मृदु पाकं करोतीत्यर्थतः क्रिया... द्वितीयान्तम्, पचधातूपाचव्यापारं प्रति साध्यतया कर्मीभूते विक्लितिरूपफले सामानाधिकरण्येनान्वयान्मृद्वादेः ... द्वितीयौचित्यात् । यजेत स्वर्गकाम इत्यादौ तु यागेन स्वर्गं कुर्यादित्यर्थेतो धात्वर्थस्य भावनायां करणत्वेनान्वयात्त... धिकरण्येन 'ज्योतिष्टोमेन यजेत स्वर्गकाम' इत्यादौ ज्योतिष्टोमेनेतिक्रियाविशेषणस्य तृतीयान्तत्वम् । एतच्च करो... सूत्रवृत्तिपदमञ्जर्योः स्पष्टम् । अतश्च धात्वर्थक्रियाविशेषणस्य सामानाधिकरण्येन फलांशेऽन्वयस्थले द्विती... व्यापारांशेऽन्वयस्थले तृतीयान्तत्वम्, क्रियाविशेषणस्य प्रायः लोके फलान्वयेन द्वितीयान्तत्वं वेदे विधौ प्रायो ... न्वयेन तृतीयान्तत्वं व्यवहृतमनुसन्धेयम् । अग्निहोत्रं जुहोतीत्यत्रतु तृतीयार्थे द्वितीयेत्युच्यते । क्रियावि... कर्मत्वं क्लीबत्वमेकत्वंचेतिलौकिको न्याय एतन्मूलक एव । फलस्यामूर्ततया लिङ्गसंख्याविशेषयोरभावात्सामान्ये न... साधुत्वमात्रार्थं प्रथमोपस्थितमेकत्वं चोपपद्यते एव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्पुरुषोऽनञ्कर्मधारयः (२-४-१९) अधिकारोऽयं परवल्लिङ्गमित्यतः प्रागुत्तरसूत्रेषूपतिष्ठते। नञ्समासं कर्मधारयं च वर्जयित्वान्यस्तत्पुरुषो नपुंसकलिङ्गो भवति, इत्यधिक्रियते। संज्ञायां कन्थोशीनरेषु (२-४-२०) कन्थान्तस्तत्पुरुषः क्लीबं स्यात्, सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा। शौशमिनां कन्थाः-शौशमिकन्थम्। परवल्लिङ्गतापवादप्रकरणमिदम्। उपज्ञोपक्रमं तदाद्याचिख्यासायाम् (२-४-२१) उपज्ञायत इति उपज्ञा, उपक्रम्यत इति उपक्रमः। उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात्, तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः (प्राथम्यं) आख्यातुमिष्यते चेत्। पाणिनेः उपज्ञा-पाणिन्युपज्ञम् अकालापकं व्याकरणम्। (पाणिनेरुपज्ञानेन प्रथमतः प्रणीतं कालापकान्तं व्याकरणम्)। नन्दस्य उपक्रमः-नन्दोपक्रमं द्रोणः (नन्देनारभ्यमाणं द्रोणमानम्)। एवं व्याड्युपज्ञं दुष्करणम् (दुरितिसङ्केतविशेषणम्)। आढ्योपक्रमं प्रासादः। नन्दोपक्रमाणि मानानि (प्रस्थादीनि)। दर्शनीयोपक्रमं सुकुमारम्। छायाबाहुल्ये (२-४-२२) छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये। इक्षुणां छाया-इक्षुच्छायम्। शलभानां छाया-शलभच्छायम्। वृक्षाणां छाया-वृक्षच्छायम्। विभाषासेनेतिविकल्पापवादः। सभाराजाऽमनुष्यपूर्वा (२-४-२३) राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात्। इनस्य (राज्ञः) सभा-इनसभम्। ईश्वरस्य सभा-ईश्वरसभम्। पर्यायस्यैवेष्यते (वा) नेह-राजसभा, चन्द्रगुप्तसभा। अमनुष्यशब्दो रूढ्या रक्षपिशाचादीनाह। रक्षसः सभा-रक्षःसभम्। पिशाचानां सभा-पिशाचसभम्। नेह-काष्ठसभा, देवदत्तसभा। अशाला च (२-४-२४) सङ्घातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात्। स्त्रीणां सभा (सङ्घातः)-स्त्रीसभम्। दासीनां सभा (सङ्घातः)-दासीसभम्। शालायां तु न-धर्मस्य सभा (शाला) धर्मसभा। अनाथसभा (अनाथकुटी)। विभाषा सेना-सुरा-च्छाया-शाला-निशानाम् (२-४-२५) सेनाद्यन्तस्तत्पुरुषः क्लीबं वा स्यात्। ब्राह्मणानां सेना-ब्राह्मणसेनम्, ब्राह्मणसेना। यवस्य सुरा-यवसुरम्, यवसुरा। कुड्यस्य छाया कुड्यच्छायम्, कुड्यच्छाया। गवां शाला-गोशालम्, गोशाला। शुनां निशा-श्वनिशम्, श्वनिशा।

वि. अस्मिन्प्रकरणे तत्पुरुषोऽनञ्कर्मधारय इत्यधिकारान्नेह-दृढासेना यस्य-दृढसेनो राजा। नसेना-असेना। परमा सेना-परमसेना। छायाशब्दे पूर्वपदार्थबाहुल्ये क्लीबत्वमेव, तदभावे तु क्लीबत्वं परवल्लिङ्गता च। तेन-कुड्यानां कुड्यच्छायम्; कुड्यस्य छाया-कुड्यच्छायम्,-कुड्यच्छाया वा। अतो रघुवंशे-इक्षुच्छायनिषादिन्य इत्येव पाठो न्याय्यः। इक्षुच्छायानिषादिन्य इति पाठान्तरं तु आसमन्तान्निषादिन्य इत्याङ्प्रश्लेषेणोपपाद्यम्। उपज्ञोपक्रमस्थले आदिविवक्षायां नन्ददर्शनीयादयस्तत्र प्रवर्तकाः प्रथमाचार्याः। "पूर्वाणि व्याकरणानि अद्यतनादिपरिभाषायुक्तानि, अकालकं तु व्याकरणं पाणिनिप्रभृतिप्रवृत्तमिति" पदमञ्जरी। एवमन्यत्रापि उपज्ञोपक्रमयोरादिबोधकेन सह समासे क्लीबता,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपन्या तु न, देवदत्तोपज्ञो रथः। आदिबोधनेपि उपज्ञोपक्रमशब्दाभावे न क्लीबत्वम् यथा-वाल्मीकिश्लोकाः (श्लोक प्रथमप्रवर्तको वाल्मीकिः)।

प्रयोगाः—स्वोपज्ञं व्याख्या। तदुपक्रमं सौजन्यम्। लोके भूषदुपज्ञमेव विदुषां सौजन्य यशः। कुड्यच्छायावृता भूमिः। पुण्याहं वाचयेत्। त्रिरात्रमक्षारलवणाशी स्यात्। राजाधि प्रभो। अष्टाकपालेन पुरोडाशेन यजेत्। एकद्वाः द्वित्राः पञ्चषा वा पुरुषाः। अष्टाशीतिः सहस्र शौनकाद्या महर्षयः। अहोरात्रमुपवसेत्।

बहुव्रीहिसमास :—

शेषोबहुव्रीहिः (२-२-२३) अधिकारोयम्। यस्य त्रिकस्य (विभक्तेः) विशिष्य समासो नोक्त शेषः, प्रथमान्तः, बहुव्रीहिरिति चाधिक्रियते। अनेकमन्यपदार्थे (२-२-२४) अनेकं प्रथम मन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। अन्यपदार्थे शेषोऽनेकः इति चोक्ततया प्रथमा वर्जं विभक्त्यर्थेषु समानाधिकरणानेकप्रथमान्तानां समासो भवतीति फलितम्। प्राप्तमुदकं स-प्राप्तोदको ग्रामः। बहुव्रीहावन्यपदार्थप्राधान्यात्तदनुसारेण लिङ्गवचनानि। ऊढो रथो स-ऊढरथोऽनड्वान्। दत्तानि द्रव्याणि यस्मै स—दत्तद्रव्यो जनः। उद्धृतमोदनं यस्याः सा उद्धृतौदना स्थाली। पीतमम्बरं यस्य स-पीताम्बरो हरिः। समृद्धाः पुरुषा येषु तानि-सम् पुरुषाणि नगराणि। चित्रा गावो यस्य सः-चित्रगुः चैत्रः। गोस्त्रियोरिति ह्रस्वः। पूर्वं भाषितपुंस्कस्त्रीत्वे स्त्रियाःपुंवदिति पुंवद्भावः। पूर्वपदार्थस्योत्तरपदार्थे विशेषणतया पूर्वप्रयो अनेकोक्त्या समासान्तरमिव न द्वयोरेव अपितु बहूनामपि बहुव्रीहिः। सु सूक्ष्म जटाः केशा सः-सुसूक्ष्मजटकेशः। सुलभमजिनं वासो यस्य सः-सुलभाजिनवासाः। एवं लब्धकीर्ति अधीतविद्य आचार्यः। शान्तिप्रिया जनाः। महात्मा पुरुषः। सामानाधिकरण्यान्महत आत्व प्रफुल्लपुष्पा लताः, कृतसंस्काराणि पुराणि। कृतकृत्यो जनः। महाबाहुर्युवा। अव्ययाना (वा) उच्चैर्मुखंयस्य सः-उच्चैर्मुखः। नीचैर्मुखं येषान्ते-नीचैर्मुखाः। अस्तिक्षीरादयश्च (वा) अ क्षीरं यस्याः सा-अस्तिक्षीरा गौः। सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च (वा) सप्तम्यन्तमु च पूर्वपदं यस्य तस्य पदान्तरेण सह बहुव्रीहिः पूर्वभागगतोत्तरपदलोपश्च भवति। कण्ठे कालो यस्य सः-कण्ठेकालः। एवम् उरसिलोमा। अमूर्धमस्तकेति सप्तम्या अलुक् स्थपदेन उष्ट्रस्य मुख मुष्ट्रमुखम्, उष्ट्रमुखमिव मुखं यस्य सः-उष्ट्रमुखः पुरुषः। पूर्वमुखशब्दस्य लोपः काकपादः। हंसगतिःस्त्री। मयूरस्वरो गायकः। उष्ट्रग्रीवो जनः। सङ्घातविकारषष्ठ्याश्चोत्त लोपश्च (वा) षष्ठ्यन्तात्परयोः सङ्घातविकारशब्दयोरुत्तरपदेन सह बहुव्रीहिः सङ्घातविकारश लोपश्च। केशानां सङ्घातश्चूडा यस्य सः-केशचूडः। सुवर्णस्य विकारोऽलङ्कारो यस्य सः-सुव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लङ्कारः। प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः (वा) प्रादिभ्यः परस्य धातुजप्रकृतिक प्रथमान्तस्यान्येन प्रथमान्तेन सह बहुव्रीहिः धातुजप्रकृतिकप्रथमान्तस्य वा लोपश्च। प्रपतितं पर्णं यस्य सः-प्रपर्णः प्रपतितपर्णो वा वृक्षः। प्रभूता कीर्तिर्यस्य सः प्रकीर्तिः प्रभूतकीर्तिर्वा नृपः। नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः (वा) नञः परस्याऽस्त्यर्थप्रथमान्तस्यान्येन प्रथमान्तेन सह बहुव्रीहिः अस्त्यर्थोत्तरपदलोपश्च वा। न विद्यमान :—अविद्यमानः (नञ्समासे नकारलोपः), अविद्यमानः पुत्रो यस्य सः-अपुत्रः, अविद्यमानपुत्रो वा। अविद्यमानं बलं यस्या सा-अबला अविद्यमानबला वा। एवम् अधनः, अविद्यः, अविद्यमानधनः, अविद्यमानविद्यः।

वि. १, उपयुक्तादन्यः शेषः, द्वितीयाश्रितेत्यादिभिर्द्वितीयादिविभक्तीर्निर्दिश्य समास उक्तः। विशेषणं विशेष्येणेति प्रथमान्तसमासे विहितेपि न प्रथमान्तत्वेन निर्देशः, प्रादयोगताद्यर्थे प्रथमयेति प्रथमोल्लेखेपि प्रथमान्तमनेन सह समस्यते इति नोक्तम्, सूत्रकृता वा न क्वापि प्रथमोल्लेखः कृतः, तेन प्रथमान्तः शेषः, तेनोत्तरसूत्रेषु प्रथमान्तः बहुव्रीहिरिति समधिक्रियते। अन्येत्युक्त्या उपस्थितप्रथमान्तातिरिक्तार्थे वर्तमान इति लभ्यते इति भाष्योक्त्या तथाभूतस्यानेक-त्वोक्त्या समानाधिकरणानेकप्रथमान्तेति। अन्यपदार्थ इत्युक्त्या प्रथमान्तातिरिक्तार्थे वर्तमानमित्यस्य च स्वतो लाभात्, पञ्चभिर्भुक्तमन्नं यस्य सः-पञ्चभुक्त इति बहुव्रीहिनिवृत्यर्थं बहुव्रीहिः समानाधिकरणानामिति, वृष्टे देवे यो गतः सः वृष्टदेव इति बहुव्रीहेर्निवृत्यर्थम्। अप्रथमाविभक्त्यर्थेबहुव्रीहिर्वक्तव्य इति च वार्तिकद्वयं नावश्यकम्।

वि. २. बहुव्रीहौ पूर्वपदार्थस्य उत्तरपदार्थे विशेषणत्वे नान्वये सति समस्तात्तत्संबन्धिनोऽन्यपदार्थस्य लक्षणया बोधः। विग्रहेऽन्यपदार्थबोधाय तदनुसारिलिङ्गवचनेषु यत्तच्छब्दयोरुल्लेखः, अन्यपदार्थस्य क्वचित्पूर्वपदार्थे क्रियाबोधके कारकभावेन, क्वचिदुत्तरपदार्थे सम्बन्धिभावेन सम्बन्धात् तदनुसारेण विग्रहे यच्छब्दे विभक्तयः, यथा—येन दत्तं द्रव्यं यस्मै दत्तं द्रव्यं वा स-दत्तद्रव्यः। येन अधीता विद्या, यस्मादधीता विद्या वा, स-अधीतविद्यः। वस्त्रं पीतं यस्य सः-पीतवस्त्रः। येन दृष्टं नृत्यं, यस्य नृत्यं दृष्टं वा स-दृष्टनृत्यः। यस्मात्पतितानि पत्राणि, यस्य पत्राणि पतितानि वा स-पतितपत्रः। इत्थं पूर्वापरपदार्थान्वयानुसारेण यच्छब्दे विभक्तिमन्यपदार्थानुसारेण लिङ्गवचने च कृत्वातद्वल्लिङ्गवचने तच्छब्दं प्रथमान्तं च कृत्वा बहुव्रीहौ लौकिकविग्रहः क्रियते।

वि. ३. उच्चैर्नीचैरादीनामव्ययानामधिकरणशक्तिप्रधानतया सप्तम्यन्तानां प्रथमान्तत्वाभावादप्राप्तौ अव्ययानां चेतिवचनम्। अस्तीत्यस्य तिङन्तत्वादप्राप्तौ अस्तिक्षीरादयश्चेतिवचनम्। अस्तीति विभक्तिप्रतिरूपकमव्ययंवा, तथात्वे प्रथमान्तत्वादेव प्राप्ते नावश्यकमिति अस्तिक्षीरादिवचनं नवाव्ययत्वादित्यनेनभाष्येदर्शितम्।

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। (पूर्वमुक्तम्) रूपवती भार्या यस्य सः-रूपवद्भार्यः। महती दृष्टिर्यस्य सः-महादृष्टिः। भाषितपुंस्कत्वाभावान्नेह-गङ्गा भार्या यस्य सः गङ्गाभार्यः। ऊङन्तत्वान्नेह-वामोरूः भार्या यस्य सः-वामोरूभार्यः। स्त्रीपरत्वा-भावान्नेह-कल्याणी प्रधानं यस्य सः-कल्याणीप्रधानः। प्रियादिपरत्वान्नेह-कल्याणी प्रिया यस्य सः-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कल्याणीप्रियः। पूरणप्रत्ययान्ते परे कल्याणी पञ्चमी यासां रात्रीणामित्यर्थे बहुव्रीहौ पुंवद्भावेऽसति अप्पूरणीप्रमाण्योः (५-४-११६) पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्। इत्यप्प्रत्यये यस्येतिचेतीकारलोपे कल्याणीपञ्चमारात्रयः। स्त्री प्रमाणी यस्य सः-स्त्रीप्रमाणः। तसिलादिष्वाकृत्वसुचः (६-३-३५) तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रियां पुंवत्स्यात्। तसिलादिष्वपि परिगणनं कर्तव्यम्। त्रतसौ, तरप्तमपौ, चरट्जातीयरौ, कल्पब्देशीयरौ, रूपप्पाशपौ, थाल्, तिलथ्यनौ, इति। बह्वीषु इति बहुत्र, बह्वीभ्य इति बहुतः। अतिशयेन दर्शनीया-दर्शनीयतरा, दर्शनीयतमा, भूतपूर्वापट्वी-पटुचरी, ईषदसमाप्ता पट्वी-पटुजातीया, पटुकल्पा, पटुदेशीया, एवं रम्यतरा, मृदुतमा, प्रभातकल्पा। शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः (वा) बह्वीभ्यः-बहुशो देहि। अल्पाभ्यः-अल्पशो देहि। त्वतलोर्गुणवचनस्य (वा) शुक्लाया भावः-शुक्लत्वम्, शुक्लता। मृद्व्या भावः-मृदुत्वं, मृदुता। मधुराया भावः-मधुरत्वं, मधुरता। गुणवचनस्येत्युक्तेर्नेह-कर्त्र्या भावः कर्त्रीत्वम्। भस्याऽढे तद्धिते (वा) हस्तिनीनां समूहः हास्तिकम्। ठक्छसोश्च (वा) भवत्याः छात्राः-भावत्काः, भवदीयाः। सर्वनाम्नोवृत्तिमात्रेपुंवद्भावः (इष्टिः) सर्वासु-सर्वतः। तस्या भावः तत्त्वं, तत्ता, तस्या इमे-तदीयाः। कुक्कुट्यादीनामण्डादिषु (वा) कुक्कुट्या अण्डं-कुक्कुटाण्डम्। मृग्याः पदं-मृगपदम्। मृग्याः क्षीरं-मृगक्षीरम्। काक्याः शावः-काकशावः। क्यङ्मानिनोश्च (६-३-३६) एतयोः परतः पुंवत्। एनीवाचरति-एनायते। श्येनीवाचरति-श्येनायते। दर्शनीयां मन्यते-दर्शनीयमानी चैत्रः।

वि. अनेकप्रथमान्तानां बहुव्रीहिविधानात् चित्रा जरती गौर्यस्येति त्रिपदबहुव्रीहौ समासचरमावयवे रूढस्योत्तरपदस्य मध्यमेन व्यवहिततया परत्वाभावात्प्रथमं नपुंवत्, तेन-चित्राजरतीगुः, जरतीचित्रागुर्वा, एवं तन्वीदीर्घजङ्घः, दीर्घतन्वीजङ्घो वा इति केचित्। वस्तुतस्तु आनङ् त इत्यत्रेवात्रापि पूर्वपदस्यानाक्षेपादुपान्त्यस्य पुंवद्भावे न व्याघातः। चित्राजरद्गुः, जरतीचित्रागुर्वा, तन्वीदीर्घजङ्घः, दीर्घतनुजङ्घो वा भवति। चित्रा जरती च चित्राजरत्यौ, चित्राजरत्यौ गावो यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुरिति साधिकापट्वीमृदुभार्यइति भाष्योक्तिः पूर्वपदानाक्षेपेलिङ्गम्। जरती चित्रा जरच्चित्रा, जरच्चित्रा गौर्यस्येति कर्मधारयपूर्वपदे तु बहुव्रीहौ द्वयोरपि पुंवत्वेन जरच्चित्रगुः। चित्राचासौ चित्रगवी-जरती चित्रगवी यस्येत्यत्रापि द्वयोरपि पुंवत्वेन टचि कपि च चित्रजरद्गवीकः। सामान्येनपुंवत्त्वे क्लीबत्वविवक्षायां दृढं भक्ति र्यस्य सः-दृढभक्तिः। स्त्रीत्वविवक्षायां तु दृढाभक्तिर्यस्येत्यर्थे प्रियादिपरत्वान्नपुंवत्, दृढादयः प्रियादयः पूर्वं निर्दिष्टा एव।

वि. २. पुंवद्भावप्रतिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव (वा) तेन कल्याणी पञ्चमी यासां रात्रीणां रात्रिः पूरणी मुख्येति पुंवत्वाभावेन कल्याणीपञ्चमारात्रय इति। तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थत्वेन रात्रेरन्येद्व नद्यृतश्चेति कपि केण इतिह्रस्वस्य न कपीति निषेधे कल्याणपञ्चमीकः पक्षः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ३. तसिलादिष्वाकृत्वसुचंइत्यादि तद्धितेषु पुंवद्भावविधानं प्रसक्त्यनुप्रसक्त्या समासप्रकरणे निर्दिष्टमनुसन्धेयम्। ...शब्दस्त्रिधा, शत्रु पर्यायात्सपत्नशब्दात्शार्ङ्गरवादित्वात् ङीत्येकः, समानः पतिर्यस्या इति विग्रहे विवाहनिबन्धनं पति-...दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः, स्वामिपर्यायपतिशब्देन भाषितपुंस्कस्तृतीयः। आद्ययोः शिवाद्यणि प्रथमे भाषित-...त्वेन पुंवत्त्वे ङीपो निवृत्तौ, द्वितीये भाषितपुंस्कत्वाभावेन पुंवत्वाभावे यस्येतिचेतीकारलोपे सापत्नः। तृतीये तु लिङ्ग-...निमित्तपरिभाषया दित्यदित्यादित्यपत्युत्तरपदाण्ण्य इति ण्ये भाषितपुंस्कत्वेन पुंवत्वे ङीप्प्रत्यययोर्निवृत्तौ यस्येतिचेति ...कारलोपे सापत्यः। ठक्छसोश्चेति वार्तिकमेकतद्धिते चेति सूत्रमपि "सर्वनाम्नोवृत्तिमात्रे पुंवद्भाव" इति भाष्यकृदिष्ट्या ...र्थत्वान्न कर्तव्यम्।

न कोपधायाः (६-३-३७) कोपधायाः स्त्रिया न पुंवत्। रसिका भार्या यस्य सः—रसिकाभार्यः। पाचिका भार्यः यस्य सः- पाचिकाभार्यः। संज्ञापूरण्योश्च (६-३-३८) अनयोर्न पुंवत्। दत्ता भार्या यस्य सः—दत्ताभार्यः। पञ्चमी भार्या यस्य सः—पञ्चमीभार्यः। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे (६-३-३९) वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत्। स्रौघ्नी भार्या यस्य सः—स्रौघ्नीभार्यः। रक्तार्थे तु काषायी कन्था यस्य सः—काषायकन्थः। विकारे-हैमी मुद्रिका यस्य सः-हैममुद्रिकः। स्वाङ्गाच्चेतः (६-३-४०) स्वाङ्गाद्य इकारस्तदन्ता स्त्री न पुंवत्। सुकेशी भार्या यस्य सः-सुकेशीभार्यः। अमानिनीति वक्तव्यम् (वा) आत्मानं सुकेशीं मन्यते—सुकेशमानिनी। जातेश्च (६-३-४१) जातेः परो यः स्त्रीप्रत्ययस्तदन्तं न पुंवत्। शूद्रा भार्या यस्य सः—शूद्राभार्यः। ब्राह्मणी भार्या यस्य सः—ब्राह्मणीभार्यः।

वि. वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावान्नेह निषेधः-वैयाकरणी भार्या यस्य सः-वैयाकरणभार्यः। जातेश्चेति ...षेधः सूत्रविहितस्यैव, तेन हस्तिनीनां समूहः-हास्तिकम्। भस्याढे इति वार्तिकेन पुंवद्भावः।

प्रयोगाः—मेघश्यामः पीतकौशेयवासाः श्रीवत्साङ्कः कौस्तुभोद्भासिताङ्गः। पद्मनेत्रो महाबाहुः। ...वाचो मृदुत्वं मधुरता च गौरवम्। मृगपदमनुसरन्दूरं प्राप। शूद्राभार्यातिनिन्दितः। रसिकाभार्यः सुखमास्ते। अपुत्रा वा सपुत्रा वा प्रशस्या हि प्रतिव्रता।

...संख्याबहुव्रीहिः :—

संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये (२-२-२५) संख्येयार्थया संख्यया सह अव्ययादयो वा समस्यन्ते स बहुव्रीहिः। सामानाधिकरण्यस्यान्यपदार्थवृत्तेश्चाभावात्पूर्वेणाप्राप्तौ वचनम्। दशानां समीपे ये सन्ति ते इत्यर्थे उपशब्देन सह संख्येयवाचिनो दशन्शब्दस्य समासे, बहुव्रीहौ संख्येये डजबहुगणात् (५-४-७३) संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात्। इति समासान्ते डचि नस्तद्धित इति टेरनो लोपे उपदशाः (नव एकादश वा)। विंशतेः समीपे ये सन्ति ते इत्यर्थे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समासे डचि टेः इति इकारमात्रलोपे प्राप्ते ति विंशतेर्डिति (६-४-१४२) विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति। इति तिलोपे अतोगुणे इति पररूपे उपविंशाः (एकोनविंशतिरेकविंशतिर्वा)। त्रिंशतः समीपे ये सन्तीत्यर्थे समासे डचि टेरिति टिलोपे उपत्रिंशाः। विंशतेरासन्नाः-आसन्नविंशाः। त्रिंशतः अदूराः-अदूरत्रिंशाः। चत्वारिंशतः अधिकाः-अधिकचत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। समासे डचि टिलोपे द्वित्राः। एको द्वौ वा-एकद्वाः। त्रयश्चत्वारो वा-त्रिचतुराः। त्र्युपाभ्यां चतुरोऽजिष्यते इत्यच्। द्विरावृत्ता दश-द्विदशाः (विंशतिः)। एवमुपशतानि पुस्तकानि। उपसहस्राणि द्रव्याणि। पञ्चषा जनाः (आसन्नदशाः) अधिकविंशा गृहाः। त्रिदशाः। अधिकविंशाः। आसन्नपञ्चाशाः।

वि. उपशब्दः समीपे समीपिनि च वर्तते; आद्ये अव्ययीभावः, द्वितीये तु बहुव्रीहिः। द्वित्रा इति वार्थे बहुव्रीहिः। स च वार्थो न विकल्पः, पक्षे द्विवचनस्याप्यापत्तेः; किन्तु संशयः, स चानियतसंख्यावमर्शी तत्र च त्रयोपि सर्वदाभासन्ते। तदपेक्षं बहुवचनम्। द्वित्रा आनीयन्तामित्यत्र कदाचिद्द्वयोरप्यानयने कथं बहुवचनमिति तु न, अनिश्चये बहुवचनं प्रयोक्तव्यं यथा-कति भवत पुत्राः। कति भवतो भार्या इति भाष्योक्तेः। कार्यान्वयेविकल्पः, शब्दात्तु नियमेन बोधि... उपस्थित्या पञ्चानामुपस्थितौ बहुवचनं, तदुपस्थित्यनन्तरमन्यतरानयनमिच्छयेति वा समाधेयम्। द्विरावृत्ता दश द्विदशा इति सुजर्थे बहुव्रीहिः। शब्दशक्तिस्वाभाव्यात्सुजर्थान्तर्भावेण पूर्वपदस्य वृत्याश्रयणात्सुचो न श्रवणमिति भाष्ये। संख्येयवाचित्वेन अन्यपदार्थेऽवर्तमानतया पूर्वेणाप्राप्तौ वचनम्।

प्रयोगाः—एकद्वाः क्षितिपतिषु द्वित्रा देवेषु पञ्चषा द्रुहिणे। आसन्नविंशाः पुरुषाः। द्वि... पवित्राः परम्। दशैकादशकोटयः। दशद्वादशदिनानि व्यतीतानि। उपत्रिंशानि पुस्तकान्यवशिष्टानि। त्रिचतुरा अर्थिनः उपस्थिताः।

दिगन्तरालबहुव्रीहि :—

दिङ्नामान्यन्तराले (२-२-२६) दिशो नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते, स च बहुव्रीहिः। नामानीति बहुत्वमविवक्षितम्। दक्षिणस्याः पूर्वस्याश्च दिशोन्तरालं या दिक् सा। समासे सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति भाष्योक्तेः पुंवद्भावे दक्षिणपूर्वा (आग्नेयी)। एवमुत्तरपूर्वा। पश्चिमोत्तरा। पूर्वोत्तरा। उत्तरपश्चिमा। पश्चिमदक्षिणा।

वि. नामग्रहणाद्दिक्षु रूढानामेव शब्दानां समासो न यौगिकानाम्; तेनेह न-ऐन्द्र्याः कौवेर्याश्चान्तरालं दिक्। दक्षिणपूर्वेत्यादौ उपसर्जनत्वेनासर्वनामत्वेपि भूतपूर्वगत्या सर्वनामत्वमादाय पुंवद्भावः। अन्यपदार्थप्राधान्येपि सामानाधिकरण्याभावात्पूर्वेणाप्राप्तौ वचनं, कबभावार्थं च वचनम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यतिहारबहुव्रीहिः—

तत्र तेनेदमिति सरूपे (२-२-२७) ग्रहणविषये सप्तम्यन्ते सरूपे पदे, प्रहरणविषये तृतीयान्ते सरूपे पदे च इदं युद्धं प्रवृत्तमित्यर्थे कर्मव्यतिहारे (परस्परकरणे) द्योत्ये समस्येते, स बहुव्रीहिः। (मिथः) केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तमित्यर्थे सप्तम्यन्तयोः बहुव्रीहिसमासे सुब्लुकि, इच्कर्मव्यतिहारे (५-४-१२७) कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच्समासान्तः। इति इच्प्रत्यये यस्येतिचेत्यकारलोपे अन्येषामपिदृश्यते इति पूर्वपदान्तस्य दीर्घे, तिष्ठद्गुप्रभृतिषु इच्प्रत्ययस्य पाठादव्ययीभावत्वे नाव्ययत्वे, केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे समासे इचि अकारलोपे पूर्वपदान्तस्य दीर्घेऽव्ययत्वे दण्डादण्डि। एवं मुष्टीमुष्टि, हस्ताहस्ति, यष्टीयष्टि।

वि. सूत्रे इतिशब्दोपादानाद्ग्रहणविषये सप्तम्यन्ते प्रहरणविषये तृतीयान्ते सरूपपदे समस्येते इति विषयविशेषो लभ्यते। परस्परग्रहणं परस्परप्रहरणं च कर्मव्यतिहारः। बाहौ बाहौ परस्परं गृहीत्वा इदं युद्धं प्रवृत्तमित्यर्थे समासे इचि पूर्वपददीर्घे यस्येतिचेत्युकारस्यलोपे प्राप्ते ओर्गुणः (६.४.१४६) उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते। इति गुणे अवादेशे बाहूबाहवि। अत्र ओरोदित्यनुक्त्वा गुणोक्त्या संज्ञापूर्वकोविधिरनित्य इति ज्ञाप्यते। तेन गुणाभावादुवङि स्वायम्भुव इति सिद्ध्यति।

तुल्ययोगबहुव्रीहिः—

तेनसहेति तुल्ययोगे (२-२-२८) तुल्ययोगे (समानसम्बन्धे) वर्तमानं सह इत्येतत् तृतीयान्तेन सह समस्यते, स बहुव्रीहिः। पुत्रेण सह इत्यर्थे समासे सुब्लुकि, वोपसर्जनस्य (६-३-८२) बहुव्रीहेरवयवस्य सहस्य सः स्याद्वा। इति पक्षे सादेशे सपुत्रः सहपुत्रो वाऽऽगतः। एवं सच्छात्रः, सभृत्यः।

वि. विद्यमानार्थकत्वेन तुल्ययोगाभावान्नेहसमासः-सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। (विद्यमानैरेव दशभिः पुत्रैः भारं वहतीत्यर्थः)। इति शब्दोपादानात्तुल्ययोगवचनं प्रायिकं गम्यते। तेन सकर्मकः (विद्यमानकर्मकः), सघन इत्याद्यपि सिद्ध्यति। प्रकृत्याशिषि (६-३-८३) सहशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपुत्राय सहामात्याय। अगोवत्सहलेष्विति वाच्यम् (वा) सगवे सवत्साय सहलाय।

समासान्तादिः—

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् (५-४-११३) स्वाङ्गवाचिसक्थ्यक्षिशब्दान्ताद्बहुव्रीहेः षच्स्यात्। दीर्घे सक्थिनी (ऊरू) यस्य सः—दीर्घसक्थः। यस्येतिचेतीकारलोपः। विशाले अक्षिणी यस्य सः—विशालाक्षः। पुण्डरीके इव अक्षिणी यस्य सः—पुण्डरीकाक्षः। एवं स्थूलसक्थः। दीर्घाक्षः।

३०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोहिताक्षः। वर्तुलाक्षः। स्त्रियां षित्वात् ङीप्'—दीर्घसक्थी, दीर्घाक्षी। स्वाङ्गादित्युक्तेर्नेह-दीर्घ सक्थि शकटम्। स्थूलाक्षा वेणुयष्टिः। अक्ष्णोऽदर्शनादित्यच्। अङ्गुलेर्दारुणि (५-४-११४) अङ्गु ल्यन्ताद्बहुव्रीहेः षच्स्याद्दारुण्यर्थे। पञ्च अङ्गुलयो यस्य तत्पञ्चाङ्गुलं दारु। (अङ्गुलिसदृशावयव धान्यादिविक्षेपणकाष्ठम्)। दारुणीत्युक्तेर्नेह--पञ्चाङ्गुलिर्हस्तः। द्वित्रिभ्यां ष मूर्ध्नः (५-४-११५) आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ। द्वौ मूर्धानौ यस्य सः—द्विमूर्धः। त्रयो मूर्धानो यस्य सः—त्रिमूर्धः। षचि षे च स्वरे विशेषः। अन्तर्बहिर्भ्यां च लोम्नः (५-४-११७) आभ्यां लोम्नोऽप्स्याद्बहुव्रीहौ। अन्तर्लोमानि यस्य सः—अन्तर्लोमः। अपि नस्तद्धित इति टेरनो लोपः। बहिर्लोमानि यस्य सः— बहिर्लोमः। नित्यमसिच् प्रजामेधयोः (५-४-१२२) नञ्सुदुःपरप्रजामेधान्ताद्बहुव्रीहेर्नित्यमसिच्स्यात्। अविद्यमाना प्रजा यस्य सः—अप्रजाः। नञोऽस्त्यर्थानामिति समासे नञो नकारलोपः। दुर्गता प्रजा यस्य सः—दुष्प्रजाः, प्रादिभ्यो धातुजस्येति समासः। उदुदुपधस्येति षत्वम्। शोभना प्रजा यस्य सः—सुप्रजाः। एवम्-अमेधाः। दुर्मेधाः। सुमेधाः। नित्यग्रहणादन्यत्रापि, तेन अल्पमेधास् सिध्यति। धर्मादनिच्केवलात् (५-४-१२४) केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात्। कल्याणो धर्मो यस्य सः—कल्याणधर्मा। यस्येतिचेत्यकारलोपः। एवं प्रियधर्मा, सध... केवलोक्त्या नेह-परमस्वधर्मः। उधसोऽनङ् (५-४-१३१) उधःशब्दान्तस्य बहुव्रीहेरनङादेशः स... सान्तः स्यात्। कुण्डमिव ऊधो यस्या सा—कुण्डोध्नी। अनङि स्त्रियां ङीपि टिलोपः। घटोध्नी। उधसोऽनङि स्त्रीग्रहणं कर्तव्यम्। तेनेहन—महोधाः पर्जन्यः, घटोधो धैनुकम्। धनुष... (५-४-१३२) धनुरन्तस्य बहुव्रीहेः समासान्तोऽनङादेशः स्यात्। शार्ङ्ग (शृङ्गस्येदम्) धनुर्यस्य स... शार्ङ्गधन्वा। उकारस्य यणि वकारः। एवं पुष्पधन्वा, अधिज्यधन्वा, गाण्डीवधन्वा। वा संज्ञा... (५-४-१३३) धनुरन्तस्य बहुव्रीहेरनङ् वा संज्ञायाम्। शतधन्वा, शतधनुः। (राजविशेषः)। दृढ धन्वा, दृढधनुः। जायाया निङ् (५-४-१३४) जायाशब्दान्तस्य बहुव्रीहेः समासान्तो निङादे... स्यात्। युवतिर्जाया यस्येत्यर्थे समासे युवतिशब्दस्य पुंवद्भावेन तिप्रत्ययनिवृत्तौ नलोपःप्राति... कान्तस्येति नलोपे जायाशब्दाकारस्य न्यादेशे' लोपो व्योर्वलि (६-१-६६) वकारयकारयो... स्याद्वलि। इति यलोपे युवजानिः। जानकी जाया यस्य सः—जानकीजानिः। अभाषिततुल्यप्रवृ... निमित्ते पुंस्कत्वान्न पुंवद्भावः। वृद्धजानिः। गन्धस्येदुत्पूतिसुसुरभिभ्यः (५-४-१३५) एभ्यः पर... गन्धशब्दस्य इकारादेशः समासान्तः स्याद्बहुव्रीहौ। उद्गतो गन्धो यस्य सः—उद्गन्धिः। पू... (असुरभिः(गन्धो यस्य सः—पूतिगन्धिः। एवं सुगन्धिः। सुरभिगन्धिः। अन्यत्र न-तीव्रग... वायुः। गन्धस्येत्वे तदेकान्तग्रहणम् (वा) एकान्त इति एकदेशवदविभक्तस्य बोधकः। शोभ... गन्धो यस्य तत्—सुगन्धि पुष्पं सलिलं च। नेह-शोभना गन्धाः (गन्धवद्द्रव्याणि) यस्मि...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुगन्धः आपणः। अल्पाख्यायाम् (५-४-१३६) अल्पबोधकत्वे गन्धशब्दस्य इकारादेशः समासान्तः स्याद्बहुव्रीहौ। सूपस्य गन्धः (लेश.) यस्मिंस्तत्–सूपगन्धि भोजनम्। एवं घृतगन्धि, क्षीरगन्धि। अत्र अल्पपर्यायो गन्धशब्दः। उपमानाच्च (५-४-१३७) उपमानात्परस्य गन्धशब्दस्य समासान्त इकारादेशः स्याद्बहुव्रीहौ। पद्मस्येव गन्धो यस्य सः–पद्मगन्धिः। सप्तम्युपमानपूर्वपदस्येति समासः। एवं उत्पलगन्धिः, करीषगन्धिः। पादस्य लोपोऽहस्त्यादिभ्यः (५-४-१३८) हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः समासान्तः स्याद्बहुव्रीहौ। स्थानिद्वारेण लोपोऽपि समासान्तः। व्याघ्रस्येव पादौ यस्य सः–व्याघ्रपात्। सप्तम्युपमानेति समासे अन्त्याकारलोपः। एवं सिंहपात्। हस्त्यादयस्तु-हस्ति-महिला-दासी-गणिका-कुसूलादयः। नेह-हस्तिपादः। कुसूलपादः। संख्यासुपूर्वस्य (५-४-१४०) संख्यासुपूर्वस्य पादस्य लोपः समासान्तः स्याद्बहुव्रीहौ। द्वौ पादौ यस्य सः–द्विपात्। शोभनौ पादौ यस्य सः–सुपात्। एवं त्रिपात्, चतुष्पात्। वयसि दन्तस्य दतृ (५-४-१४१) संख्यासुपूर्वस्य दन्तशब्दस्य दतृ इत्यादेशः समासान्तः स्याद्बहुव्रीहौ वयसि। द्वौ दन्तौ यस्य सः–द्विदन्। दन्तस्य दत्रादेशे ऋकारस्येत्वेन लोपे सौ उगित्वान्नुमि सुलोपे संयोगान्तलोपे तस्यासिद्धत्वादुपधादीर्घो न। एवं चतुर्दन्, षोडन्, षषउत्वमिति ष्टुत्वोत्वे। सुदन्। वयोविशेषबोधका इमे। स्त्रियामुगित्वात् ङीप्- सुदती। वयसीत्युक्तेर्नेह–द्विदन्तः करी, सुदन्तो नटः। विभाषा श्यावारोकाभ्याम् (५-४-१४४) आभ्यां परस्य दन्तशब्दस्य दतृ स्याद्बहुव्रीहौ। श्यावाः (धूम्रा) दन्ता यस्य सः-श्यावदन्। अरोकाः (अच्छिद्राः) दन्ता यस्य सः–अरोकदन्। अग्रान्तःशुद्ध-शुभ्र-वृष-वराहेभ्यश्च (५-४-१४५) एभ्यः परस्य दन्तशब्दस्य समासान्तो दत्रादेशः स्याद्बहुव्रीहौ। कुड्मलानामग्राणि—कुड्मलाग्राणि, कुड्मलाग्राणीव दन्ता यस्य सः--कुड्मलाग्रदन्, कुड्मलाग्रदन्तः। एवं शुद्धदन्, शुद्धदन्तः। शुभ्रदन्, शुभ्रदन्तः। वृषदन्, वृषदन्तः। वराहदन्, वराहदन्तः। ककुदस्यावस्थायां लोपः (५-४-१४६) ककुच्छब्दान्तबहुव्रीहे लोपः समासान्तः स्यादवस्थायां गम्यमानायाम्। कालादिकृतो वयआदिर्वस्तुधर्मोऽवस्था। अजातं ककुदं यस्य सः-अजातककुत् (बालः)। पूर्णं ककुदं यस्य सः–पूर्णककुत् (युवा)। एवं स्थूलककुत् (ब.ऽवान्) उन्नतककुत् (वृद्धः)। उद्विभ्यां काकुदस्य (५-४-१४८) आभ्यां परस्य काकुदशब्दस्यलोपः समासान्तो बहुव्रीहौ। उद्गतं काकुदं (तालु) यस्य सः–उत्काकुत्। एवं विकाकुत्। पूर्णाद्विभाषा (५-४-१४९) पूर्णात्परस्य काकुदशब्दस्य लोपः समासान्तो वा स्याद्बहुव्रीहौ। पूर्णं काकुदं यस्य सः-पूर्णकाकुत्, पूर्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्रयोः (५-४-१५०) सुदुःशब्दाभ्यां परस्य हृदयशब्दस्य हृद्भावो निपात्यते मित्रामित्रयोर्वाच्ययोर्बहुव्रीहौ। शोभनं हृदयं यस्य सः-सुहृत् (मित्रम्), दुष्टं हृदयं यस्य सः-दुर्हृत् (अमित्रः), अन्यत्रतु सुहृदयः। दुर्हृदयः। उरःप्रभृतिभ्यःकप् (५-४-१५१) उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् स्यात्। व्यूढं (विशालं) उरो यस्य सः-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यूढोरस्कः। प्रियं सर्पिर्यस्य सः–प्रियसर्पिष्कः। इणः ष इति षत्वम्। एवं प्रियदधिकः। प्रियमधु... उर आदिषु पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीः, इत्येकवचनान्तानि पठ्यन्ते। प्रियः पुमान् यस्य सः–प्रियपुंस्कः। एवं महानडुत्कः। बहुपयस्कः। दृढनौकः। महालक्ष्मीकः। द्विबहुवचनान्तेभ्यस्तु शेषाद्विभाषेति विकल्पेन कप्। द्वौ पुमांसौ यस्य सः द्विपुंस्कः द्विपुमान्। एवमन्येषु। अर्थान्नञः (वा) नास्ति अर्थो यस्य तत्–अनर्थकम्। नञ इत्युक्तेरन्यत्र विकल्पः, अपार्थकम्, अपार्थम्। इनः स्त्रियाम् (५-४-१५२) इनन्ताद्बहुव्रीहेः कप्प्रत्ययस्यात् स्त्रियाम्। बहवोऽर्थिनो यस्यां सा बह्वर्थिका शाला। प्रभूता धनिनो यस्यां सा-प्रभूतधनिका। एवं बहुच्छात्रिका। बहुदण्डिका नगरी। अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेन च तदन्तविधिं प्रयोजयन्तीति परिभाषया विग्वादीनां ग्रहात्-असंख्ययशस्विका। बहुवाग्मिका, अनेकमेधाविका। नद्यृतश्च (५-४-१५३) नद्यन्ताद् ऋकारान्ताच्च बहुव्रीहेः कप्स्यात्। बह्व्यः कुमार्यो यस्मिन्सः-बहुकुमारीकः। महत्यो नद्यो यस्मिन्सः–महानदीकः। गतः भर्ता यस्या सा–गतभर्तृका। बहवः कर्तारो यस्य सः–बहुकर्तृकः। एवं जीवत्पितृकः। मृतमातृकः। अनेकश्रोतृकः। शेषाद्विभाषा (५-४-१५४) अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुव्रीहेः कप् वा स्यात्। तन्त्रेण शेषशब्दोऽर्थद्वयवाची। महत् यशो यस्य सः महायशस्कः, महायशाः। एवं बहुनेत्रकः, बहुनेत्रः। बहुधनकः, बहुधनः। अनुक्तसमासान्तादित्युक्तेर्नेह–व्याघ्रपात्, सुगन्धिः। शेषाधिकारस्थादित्युक्तेर्नेह-उत्तरपूर्वा, सपुत्रः। कल्याणी पञ्चमी यस्मिन्नित्यर्थे समासे नद्यृतश्चेति कपि पूर्वपदस्य पुंवद्भावे, केऽणः (७-४-१३) के परेऽणो ह्रस्वः स्यात्। इति प्राप्ते, न कपि (७-४-१४) कपि परेऽणो ह्रस्वो न स्यात्। इतिनिषेधे कल्याणपञ्चमीकः पक्षः। एवं बहुनदीकः, प्रियस्त्रीकः, सुश्रीकः। आपोऽन्यतरस्याम् (७-४-१५) कपि आबन्तस्य ह्रस्वो वा स्यात्। बह्यो मालाः यस्मिन् सः–कपि ह्रस्वे बहुमालकः, तदभावे बहुमालाकः, कबभावे बहुमालः। गोस्त्रियोरित्यत्र ह्रस्वः। न संज्ञायाम् (५-४-१५५) शेषाद्विभाषेति प्राप्तः कप् न स्यात् संज्ञायाम्। विश्वे देवा अस्य सः–विश्वेदेवः। ईयसश्च (५-४-१५६) ईयसन्तोत्तरपदाद्बहुव्रीहेर्न कप्। बहवःश्रेयांसो यस्य सः–बहुश्रेयान्। बह्व्यः श्रेयस्यो यस्य स इत्यर्थे समासे नद्यृतश्चेति प्राप्तस्य कपो निषेधे गोस्त्रियोरितिह्रस्वे प्राप्ते, इयसो बहुव्रीहेर्नेति वाच्यम् (वा) इति ह्रस्वनिषेधे बहुश्रेयसी। वन्दिते भ्रातुः (५-४-१५७) पूजितेर्थे यो भ्रातृशब्दस्तदन्ताद्बहुव्रीहेर्न कप्। प्रशस्तो भ्राता यस्य सः प्रशस्तभ्राता। सुभ्राता। अपूजिते तु नद्यृतश्चेति कप्। मूर्खभ्रातृकः। दुष्टभ्रातृकः। नाडीतन्त्र्योः स्वाङ्गे (५-४-१५९) स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्ताद्बहुव्रीहेर्न कप्। बह्व्यो नाड्यो यस्य सः-बहुनाडिः कायः। गोस्त्रियोरिति ह्रस्वः। बह्व्यस्तन्त्र्यो यस्याः सा--बहुतन्त्रीः (ग्रीवा)। स्वाङ्गइत्युक्तेः तु कप्—बहुनाडीकः स्तम्भः। बहुतन्त्रीका वीणा। निष्प्रवाणिश्च (५-४-१६०) नदीलक्षणकबभावोऽत्र निपात्यते। निर्गता प्रवाणी (तन्तुवायशलाका) यस्य सः-निष्प्रवाणिः पटः (समाप्तवानः...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. १. धर्मादनिजित्यत्र परमः स्वो धर्मो यस्येति त्रिपदबहुव्रीहौ माभूदित्यर्थं केवलग्रहणम्। सन्दिग्धसाध्यधर्मा ...रौ तु सन्दिग्धं यत्साध्यं सन्दिग्धसाध्यं धर्मो यस्येति कर्मधारयपूर्वपदो बहुव्रीहिरिति भवत्येव। तथैव निरुक्तौ तु ...विधर्मा अनुच्छिन्नविधर्मेत्यादिवत्परमस्वधर्मेत्यपि भवति। दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनमित्यत्र तु न ...हिरिति तु समानोधर्मः सधर्म इति तत्पुरुषोत्तरं मत्वर्थीयोच्प्रत्ययेन वस्तुविशेषणत्वमिति बहुव्रीह्यभावेनाऽनिजभाव ...दनीयः।

वि. २. नद्युतश्चेति सिद्धे उरःप्रभृतिषु लक्ष्मीशब्दपाठस्तु एकवचनान्तलक्ष्मीशब्दबहुव्रीहावनेन नित्यं कप्, बहु-...वचनान्तत्वे तु शेषाद्विभाषेति विकल्प एवेति निमार्थः, तेन—अकृशमकृशलक्ष्मीश्चेतसा शासितं सः इति भारविप्रयोगोपि ...स्य लक्ष्म्यो यस्येति विग्रहे सिध्यति।

वि. ३. तदेकान्तग्रहणमिति गन्धमात्रबोधकत्वं न तु तद्द्रव्यबोधकत्वमिति बोध्यते, गन्धशब्दस्य वहति जलमियं ...ति गन्धान्नित्यादौ गन्धवद्द्रव्यबोधकत्वमप्यस्ति, तेन गन्धशब्दस्य केवलगुणवाचकत्वेन सुगन्धि पुष्पं सलिलं ...न्धिर्वायुरित्यादावित्वं, नतु शोभनाः गन्धाः (गन्धवद्द्रव्याणि) यस्मिन्नित्यर्थे सुगन्ध आपण इत्यादौ। केचित्तु ...न्तेति स्वाभाविकस्य विवक्षणादागन्तुकत्वे नेत्याहुः। तेन आघ्रायिवान्गन्धवहः सुगन्ध इति भट्टिप्रयोग उपपद्यते। ...एव भ्रमवालसहकारसुगन्धावित्यस्य प्रामादिकत्वं दुर्घटवृत्तिकृतोक्तम्।

वि. ४. अन्नासिकायाः संज्ञायां नसं चास्थूलात् (५-४-११८) नासिकान्ताद्बहुव्रीहेरच्स्यान्नासिकाशब्दश्च ...प्नोति न तु स्थूलपूर्वात्। पूर्वपदात्संज्ञायामगः (८-४-३) पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां ...तु गकारव्यवधाने। द्रुरिव नासिका यस्य सः–द्रुणसः। अस्थूलादित्युक्तेर्नेह–स्थूलनासिकः। उपसर्गाच्च ...(५-४-११९) प्रादेर्योनासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासिकाया नसादेश्च। असंज्ञार्थं वचनम्। उन्नता नासिका ...सः–उन्नसः। वेर्ग्रोवक्तव्यः (वा) विगता नासिका यस्य सः–विग्रः। ख्यश्च (वा) विख्यः। सुप्रात-सुश्व-...सुदिव-शारिकुक्ष-चतुरश्रैणी-पदा-जपद-प्रोष्ठपदाः (५-४-१२०) एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते। शोभनं ...प्रातर्यस्य सः–सुप्रातः। शोभनं दिवा यस्य सः–सुदिवः। शारेः (पक्षिविशेषस्य) इव कुक्षिर्यस्य सः–शारिकुक्षः। ...चत्वारोऽश्रयो (कोणाः) यस्य सः–चतुरस्रः। एण्या इव पादौ यस्य सः–एणीपदः। अजस्येव पादौ यस्य सः–अजपदः। ...प्रोष्ठस्य (गोः) इव पादौ यस्य सः–प्रोष्ठपदः। नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् (५-४-१२१) अज्वा ...स्यात्। महद्धलं हलिः। नास्तिहलिर्यस्य सः–अहलः, अहलिः। असक्थः, असक्थिः। द्विदण्ड्यादिभ्यश्च ...(५-४-१२८) तादर्थ्ये चतुर्थ्येषा। एषां सिध्यर्थमिच्प्रत्ययः स्यात्। द्वौ दण्डौ यस्मिन्प्रहरणे तत् द्विदण्डि प्रहरणम्। ...सम्प्रोभ्यां जानुनोर्ज्ञुः (५-४-१२९) आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ। प्रगते जानुनी यस्य सः–...प्रज्ञुः। संगते जानुनी यस्य सः–संज्ञुः। ऊर्ध्वाद्विभाषा (५-४-१३०) ऊर्ध्वे जानुनी यस्य सः–ऊर्ध्वज्ञुः; ऊर्ध्वजानुः। ...कुम्भपदीषु च (५-४-१३९) कुम्भपद्यादिषु पादस्य लोपोङीप् च निपात्यते स्त्रियाम्। कुम्भस्येव पादौ यस्याः सा-...कुम्भपदी। पादःपत् इति पदादेशः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तमीविशेषणे बहुव्रीहौ (२-२-३५) सप्तम्यन्तविशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यं स्यात्। अ... एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। कण्ठे कालो यस्य सः-कण्ठेकालः। अमूर्धमस्तका... सप्तम्या अलुक्। चित्रा गावो यस्य सः–चित्रगुः। सर्वनामसंख्ययोरुपसंख्यानम् (वा) सर्वः श्वे... यस्य सः–सर्वश्वेतः। त्रयः शुक्ला यस्य सः–त्रिशुक्लः। मिथोऽनयोः समासे संख्यापूर्वं शब्द... विप्रतिषेधात् (वा) द्वौ अन्यौ यस्य सः–द्व्यन्यः। संख्याया अल्पीयस्याः (वा) द्वौ त्रयो वा द्वित्राः... द्वन्द्वेपि (वा) द्वादश। वाप्रियस्य (वा) प्रियः गुडो यस्य सः-प्रियगुडः,-गुडप्रियः। गड्वादेः परा स... (वा) गडु कण्ठे यस्य सः-गडुकण्ठः। क्वचिन्न व्याख्यानात्। वहे (स्कन्धे) गडुर्यस्य सः-वहेगडुः... निष्ठा (२-२-३६) निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्। कृतं कृत्यं येन सः-कृतकृत्यः... जातिकालसुखादिभ्यः परा निष्ठा वाच्या (वा) जग्धः (भक्षितः) सारङ्गः (मृगः) यस्याः सा... सारङ्गजग्धी। जातो मासो यस्याः सा-मासजाता। जातं सुखं यस्याः सा–सुखजाता। प्रायि... चेदम्। कृतकटः। पीतोदकः। वाहिताग्न्यादिषु (२-२-३७) एषु निष्ठायाः पूर्वप्रयोगो वा स्यात्... आहितोग्नि र्येन सः-आहिताग्निः, अग्न्याहितः। आकृतिगणोऽयम्। प्रहरणार्थेभ्यः परे निष्ठासप्त... (वा) उद्यतोऽसिर्येन सः–अस्युद्यतः। दण्डः पाणौ यस्य सः-दण्डपाणिः। खड्गपाणिः। क्वचि... विवृत्तोऽसिर्येन सः–विवृतासिः।

वि. यत्र पूर्वप्रयोगवैपरीत्यं दृश्यते तत्राहिताग्न्यादित्वं कल्पनीयम्, प्रहरणार्थेभ्य इति सप्तमीवि... इत्यस्यापवादः।

प्रयोगा :—ग्रन्थानधीत्यव्याकर्तुमिति दुर्मेधसोप्यलम्। गाः कोटिशः स्पर्शयता घटो... शार्ङ्गधन्वा गदाधरः। कण्ठेकालं नमाम्यहम्। नदीमातृको देवमातृको वा देशः। अविद्योवासवि... वा। व्यूढोरस्को महाबाहुः कम्बुग्रीवो महाहनुः। नियतात्मा महावीर्यः। बहुविद्यार्थिका पाठशा... कपाटवक्षाः परिणद्धकन्धरः।

द्वन्द्वसमासः—

चार्थे द्वन्द्वः (२-२-२९) अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः। चार्थे द्व... तरयोगे समाहारे च समासः। धवश्च खदिरश्चेति विग्रहे इतरेतरयोगे समासे सुब्लुकि समस्त... द्वयोर्बोधाद् द्विवचनं परवल्लिङ्गंद्वन्द्वतत्पुरुषयोरिति परवल्लिङ्गता च। अनेकोक्तेर्बहूनामपि द्वन्द्वे... बहुत्वे बहुवचनम्। होता च पोता च नेष्टा च उद्गाता च इति विग्रहे इतरेतरयोगद्वन्द्वे होतृपो... नेष्टोद्गातारः (ऋत्विग्विशेषाः)। आनङृत्तोद्वन्द्वे, इति उत्तरपदे परे नेष्टृशब्दे आनङ्। द्व... द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होता च पोता चेति समासे होतृशब्दे, नेष्टा चोद्गाता चेति समासे नेष्...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शब्दे, होतापोतारौच नेष्टोद्गातारौचेतिसमासेहोतापोतृशब्दे पूर्वपदे आनङ्-होतापोतानेष्टोद्गातारः। पदद्वयेपि एकानेकवचनत्वे समष्टेर्बहुत्वेन बहुवचनम्। धवश्च खदिरौच, धवौच खदिरश्च, धवौ च खदिरौ चेति वा-धवखदिराः। एवं कृष्णार्जुनौ, मसीलेखन्यौ, पत्रमसीलेखन्यः। पत्रफलपुष्पाणि। पाणी च पादौ चेत्येषां समाहार इति विग्रहे समाहारे समासे समाहारस्यैकत्वात्सर्वत्रैकवचनं सनपुंसकमिति क्लीबलिङ्गता च-पाणिपादम्। एवं गवाश्वम्। छत्रोपानहम्।

वि. समुच्चयान्वाचयेतरेतरयोगसमाहारश्चार्थाः। परस्पर निरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्वेति समुच्चये, भिक्षामट गांचानयेत्यन्वाचये च न समासोऽसामर्थ्यात्। तेनेतरेतरयोगसमाहारयोरेव द्वन्द्वः। (समाहारविहितवर्जमितरेतरयोगे समासः)। इतरेतरयोगे सर्वपदार्थप्राधान्यं, समाहारे तु समूहार्थप्राधान्यम्। द्वन्द्वे पूर्वोत्तरप्रयोगे वक्ष्यमाणा नियमविशेषा अनुसन्धेयाः।

राजदन्तादिषु परम् (२-२-३१) एषु पूर्वप्रयोगार्हं परं स्यात्। एषु कतिपये तत्पुरुषकर्मधारयसमासाः, परे द्वन्द्वसमासाः। दन्तानां राजा-राजदन्तः। वनस्याग्रे अग्रेवणम्। निपातनात्सप्तम्या अलुक्। तत्पुरुषाविमौ। नग्नं च तत् मुषितं-नग्नमुषितम्। सिक्तसंमृष्टम्। मृष्टलुञ्चितम्। कर्मधारया इमे। पूर्वकालस्य परनिपातः। अथ समाहारेतरेतरयोगःद्वन्द्वाः-उलूखलमुसलम्। तण्डुलकिण्वम्। दृषदुपलम्। शूद्रार्यम् स्नातकराजानौ। विष्वक्सेनार्जुनौ। भार्यापती, जायापती, दम्पती, जम्पती। जायाशब्दस्य दम्भावो जम्भावश्च निपात्यते। पुत्रपती। धर्मादिष्वनियमः (वा) धर्मार्थौ, अर्थधर्मौ, कामार्थौ, अर्थकामौ। शब्दार्थौ, अर्थशब्दौ। केशश्मश्रुणी, श्मश्रुकेशौ। सर्पिर्मधुनी, मधुसर्पिषी। आद्यन्तौ, अन्तादी। गुणवृद्धी, वृद्धीगुणौ। आकृतिगणोयम्। द्वन्द्वे घि (२-२-३२) द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च-हरिहरौ। गुरुशुक्रौ। अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे (वा) हरिगुरुहराः, हरिहरगुरवः। पटुमृदुशुक्लाः। पटुशुक्लमृदवः। अजाद्यदन्तम् (२-२-३३) इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ, उष्ट्रखरम्। बहुष्वनियमः (वा) अश्वरथेन्द्राः, इन्द्राश्वरथाः। घ्यन्तादजाद्यदन्तं विप्रतिषेधेन (वा) इन्द्राग्नी। इन्द्रवायू। अल्पाच्तरम् (२-२-३४) इदं पूर्वं स्यात्। शिवकेशवौ। धवखदिरौ। प्लक्षन्यग्रोधौ। बहुष्वनियमः (वा) शङ्खवीणादुन्दुभयः। ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण (वा) हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। असमाक्षरत्वेतु-ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वम् (वा) कुशकाशम्; फलपुष्पाणि। अभ्यर्हितंच (वा) तापसपर्वतौ। मातापितरौ, दीक्षातपसी,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुरुशिष्यौ। वर्णानामानुपूर्व्येण (वा) ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः (वा) युधि-
ष्ठिरार्जुनौ। संख्याया अल्पीयस्याः (वा) द्वित्राः, त्रिचतुराः, नवतिशतम्। (इमे बहुव्रीहयः)

वि. एषु द्वन्द्वेऽपि अजाद्यदन्तमिति विधिद्वयम्, अल्पाच्तरं, लघ्वक्षरंपूर्वं मृतुनक्षत्राणा मभ्यर्हितं च भ्रातु-
इति विधिभिः परत्वाद्बाध्यते। भाष्ये तु सर्वत एवाभ्यर्हितंपूर्वमिति विशेषः। गर्भधारणपोषाभ्यां पितुर्माता गरीयसीति
मातुरभ्यर्हिततया मातापितरौ। समुद्राभ्राद्घः, लक्षणहेत्वोः क्रियाया इत्यादिनिर्देशादनित्यमिदं प्रकरणं, तेन, ससौ-
विशेषशालिनीमिति भारविप्रयोगः सङ्गच्छते इति तत्वबोधिनीकारः।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (२-४-२) एषां द्वन्द्व एकवत्स्यात्। एकवद्भावे समाहारद्वन्द्वः न-
पुंसकमिति क्लीबत्वम्। समाहारस्यैकत्वादेकत्वे सिद्धे प्राण्यङ्गादीनां समाहारद्वन्द्व एव स्या-
नियमार्थं प्रकरणमिदम्। पाणी च पादौ च एषां समाहारः-पाणिपादम्। मार्दङ्गिकाश्च पा-
काश्चैषां समाहारः—मार्दङ्गिकपाणविकम्। रथिकाश्चाश्वारोहाश्चैषां समाहारः—रथिका-
रोहम्। एवं शिरोग्रीवम्। वीणावादकपरिवादकम्। रथिकपादातम्। जातिरप्राणिनाम् (२-
प्राणिभिन्नजातिवाचिनां द्वन्द्व एकवत्स्यात्। धानाशष्कुलि (भृष्टयवाधानाः) षण्णां रसानां
षट्कुली गौरादित्वात् ङीष् इति पदमञ्जरी। प्राणिनां तु विट्शूद्राः। द्रव्यजातीयानामेवेदम्
रूपरसौ, गमनाकुञ्चने, जातिप्राधान्य एवेदम्—बदरामलकम्। द्रव्यविशेषविवक्षायां तु बद-
लकानि। विशिष्टलिङ्गो नदी देशोऽग्रामाः (२-४-७) ग्रामवर्ज्यनदीदेशवाचिनां भिन्नलिङ्गानां स-
द्वन्द्व एकवत्स्यात्। उध्यश्च (नदविशेषः) इरावती च-उध्येरावति, नपुंसकत्वाद्ध्रस्वः।
शोणश्च-गङ्गाशोणम्। कुरवश्च कुरुक्षेत्रं च-कुरुकुरुक्षेत्रम्। भिन्नलिङ्गोक्तेर्नेह-गङ्गायमुने, मद्रके-
अग्रामेति ग्रामावयवकप्रतिषेधान्नेह—जाम्बवं नगरं, शालूकिनी ग्रामः। जाम्बवशालूकि-
शौर्यं नगरं कैतवतं ग्रामः-शौर्यकैतवते, अग्रामेति नगरयोरप्रतिषेधादिह भवति—मथुरा च पा-
पुत्रं च-मथुरापाटलिपुत्रम्। क्षुद्रजन्तवः (२-४-८) एषां समहारे द्वन्द्व एकवत्स्यात्। यूकालि-
दंशमशकम्। आनकुलात् क्षुद्रजन्तवः। येषां च विरोधः शाश्वतिकः (२-४-९) एषां द्वन्द्व
वत्स्यात्। अहिनकुलम्, गोव्याघ्रम्, काकोलूकम्, अश्वमहिषम्, मार्जारमूषकम्। श्वश्-
विभाषावृक्षमृगेत्यस्याप्यपवादोयम्। शूद्राणामनिरवसितानाम् (२-४-१०) अबहिष्कृतानां
द्वन्द्व एकवत्स्यात्। तक्षायस्कारम्, रजकतन्तुवायम्। पात्राद्बहिष्कृतानां तु इतरेतरयो-
चाण्डालमृतपाः। गवाश्वप्रभृतीनि च (२-४-११) गवाश्वप्रभृतीनि यथोच्चारितानि
वद्भावानि द्वन्द्वरूपाणि साधूनि स्युः। गवाश्वम्, गवाविकम्, अजाविकम्, अजैडकम्,
वायनम्, पुत्रपौत्रम्, श्वचाण्डालम्, स्त्रीकुमारम्, दासीमाणवकम्, उष्ट्रखरम्, उष्ट्र-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मूत्रशकृत्, मूत्रपुरीषम्। यकृन्मेदः; मांसशोणितम्। दर्भशरम्, तृणोपलम्, दासीदासम्, इत्यादिः। विभाषा वृक्ष-मृग-तृण-धान्य-व्यञ्जन-पशु-शकुन्य श्ववडव-पूर्वापरा-धरोत्तराणाम् (२-४-१२) वृक्षादीनां सप्तानां द्वन्द्वः, अश्ववडवेत्यादिद्वन्द्वत्रयं च एकवद्वा स्यात्। वृक्षादौ विशेषाणामेव ग्रहणम् (वा) प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधा। रुरुपृषतम्, रुरुपृषता। कुशकाशम्, कुशकाशा। व्रीहियवम्, व्रीहियवाः। दधिघृतं, दधिघृते। (प्रत्येकमेकत्वाद्द्विवचनम्) गोमहिषम्, गोमहिषा। शुकबकम्, शुकबकाः। अश्ववडवम्, अश्ववडवौ। पूर्वापरम्, पूर्वापरे। अधरोत्तरम्, अधरोत्तरे। फलसेना-वनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम् (वा) बदराणि च आमलकानि च-बदरामलकम्। जातिरप्राणिनामित्येकवद्भावः। नेह–बदरं चामलकं च-बदरामलके। एवं रथिकाश्वारोहौ। प्लक्षन्यग्रोधौ। रुरुपृषतौ। हंसचक्रवाकौ। यूकालिक्षे। व्रीहियवौ। कुशकाशौ। विप्रतिषिद्धं चानधिकरणवाचि (२-४-१३) विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात्। शीतं चोष्णं च-शीतोष्णम्, शीतोष्णे। सुखदुःखम्, सुखदुःखे। जीवितमरणम्, जीवितमरणे। चार्थे इति सूत्रेण प्राप्तो वैकल्पिकः समाहारद्वन्द्वो विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम्। तेन द्रव्यवाचिनामपि इतरेतरयोग एव—शीतोष्णे उदके स्तः। न दधिपय आदीनि (२-४-१४) एतानि नैकवत्स्युः। दधिपयसी, सर्पिर्मधुनी। मधुसर्पिषी। शिववैश्रवणौ। स्कन्दविशाखौ। शुक्लकृष्णौ। इध्माबर्हिषी। निपातनाद्दीर्घः। दीक्षातपसी। श्रद्धातपसी। मेधातपसी। अध्ययनतपसी। उलूखलमुसले। आद्यवसाने। श्रद्धामेधे। ऋक्सामे। वाङ्मनसे। अधिकरणैतावत्त्वे च (२-४-१५) द्रव्यसंख्यावगमे एकवदेवेति नियमो न स्यात्। दश दन्तोष्ठाः। दश मार्दङ्गिकपाणविकाः। विभाषा समीपे (२-४-१६) अधिकरणैतावत्वस्य सामीप्येन परिच्छेदे एकवदेवेति नियमो वा स्यात्। उपदशं दन्तोष्ठम्। उपदशा दन्तोष्ठाः।

वि. १ द्वन्द्वश्चप्राणीतूर्येति प्रकरणे विहितैकवद्भावानां एषां समाहार एव भवतीति नियमार्थतया समाहार एव न त्वितरेतरयोगे, तत्रापि एकवद्भावविकल्पविधिस्थले उभयथाः "द्वन्द्वः एतद्वर्जमन्यत्र इतरेतरयोगे समाहारेऽपि द्वन्द्वः सर्वो द्वन्द्वो विभाषैकवद्भवतीत्युक्तम्। द्वन्द्वश्चप्राणितूर्येति प्रकरणे नत्वेषामेव समाहारद्वन्द्व इति विपरीतनियमः, पुनर्वस्वोरितिसूत्रे बहुवचनग्रहणात्; अन्यथा तिष्यपुनर्वस्वादीनामपरिगणितानां समाहारद्वन्द्वे एकवचनस्थाने नामावशोधनाय बहुवचनस्येति ग्रहणं समाहारद्वन्द्वाप्रसक्तौ अनर्थकमापद्येत अतश्चान्येषां समाहारद्वन्द्वस्यापिभावेन पुनर्वस्येति एकवचनान्तत्वमप्युपपद्येत।

वि. २ क्षोत्तव्या जन्तवः, ये क्षुद्यमाना अपि न म्रियन्ते जलौकप्रभृतयः, ये तु म्रियन्ते ते पापनिमित्तत्वादच्चोदनार्हाः। एवमुक्तौ दंशमशकादेरग्रहः। एवं तत्र नहियकाः क्षुदजन्तवः, अथवा येषां शोणितं नास्ति ते क्षुद्रजन्तवः;

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथवा येषामासहस्रादञ्जलिर्न पूर्यते ते क्षुद्रजन्तवः, अथवा येषां गोचर्ममात्रं राशिं हत्वा नपतति ते क्षुद्रजन्तवः; अथवा नकुलपर्यन्ता क्षुद्रजन्तवः, क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः । शतं वा प्रसृतौ येषां केचिदानकुलादपि इति मार्कण्डे स्मार्तमतविशेषा निर्दिष्टाः । आनकुलत्वपक्षो व्यापित्वाद्ग्राह्य इति पश्चादुपन्यस्त (इति कैयटः) ।

वि. ३ निरसनं बहिष्कारः, स च कुत इति जिज्ञासायां, प्रागादर्शात् प्रत्यक्कालकवनाद्दाक्षिणेन हिमवन्तमुत्तरेण पारियात्रमार्यावर्तः ततोऽनिरवसितोक्तौ किष्किन्धादीनां तद्बाह्यत्वात् किष्किन्धगन्धिकं शकयवनं शौर्यक्रौञ्चमित्यसिद्धिः, आर्यनिवासेभ्यो ग्राम-घोष (गोमहिष्यादिनिवास) नगर-संवाहे (वणिक्प्रधान) भ्योऽनिरवसितोक्तौ तद्वासिनां चाण्डाल-मृतपादीमामपि ग्रहाच्चाण्डालमृतपा इत्यसिद्धिः, यज्ञकर्मणोऽनिरवसितोक्तौ तक्षादीनां यज्ञानाधिकाराक्षतक्षायस्कारं रजकतन्तुवायमित्यसिद्धिः, इति पात्रादनिरवसितत्वं विवक्षणीयम् । यैर्भुक्ते पात्रं द्रव्यशुद्ध्युक्तसंस्कारेणापि न शुद्ध्यति ते निरवसितास्तद्भिन्ना इति भाष्यकारः । शूद्रशब्दश्चात्र त्रैवर्णिकव्यतिरिक्तजातिमात्रवचनो न वृषलपर्यायः, निरवसित-प्रतिषेधादिति पदमञ्जरीकारोक्त्या चाण्डालमृतपादयोप्यत्र पारिभाषिका एव शूद्राः, नतु ते शूद्रजातयः, तेनाक्षरत्वे शूद्रजातौ न ग्रहस्तेभ्यःपृथगेव ते, अन्यथा सूत्र भाष्यकारोक्त्यापातदृष्ट्या अस्पृश्यानामपि शूद्रान्तर्भावापत्तिरित्यनुसन्धेयम् ।

वि. ४ विभाषावृक्षेतिसूत्रे वृक्षादीनामप्राणिनां ग्रहणं जातिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थम् । पशु-हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते विकल्पार्थम् । मृगाणां मृगैरेव शकुनीनां शकुनिभिरेवोभयत्र (इतरेतरयोगे समाहारे) द्वन्द्वः, अन्यैस्तु सहेतरेतरयोग एवेति नियमार्थं मृगशकुनिग्रहणम् । पूर्वापरमधरोत्तरमित्यपि पूर्वस्यापरेणैव अधरस्य उत्तरेणैवोभयत्र, अन्यैस्तु सह पूर्वोत्तराविति इतरेतरयोगे एवेति नियमार्थम् । अश्ववडवग्रहणं पक्षे नपुंसकत्वार्थम्, अन्यथा परत्वात् पूर्ववदश्ववडवौ इति सूत्रेण पुंस्त्वमेव स्यात् ।

वि. ५ **अनुवादे चरणानाम्** (२-४-३) चरणानां (शाखाध्येतृविशेषाणां) द्वन्द्वे एकवत्स्यात् सिद्धस्योपन्यासे **स्थेणोर्लुङीति वक्तव्यम्** (वा) उदगात्कठकालापम् । प्रत्यष्ठात्कठकौथुमम् । **अध्वर्युक्रतुरनपुंसकम्** (२-४-४) यजुर्वेदीयक्रतुवाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात् । अर्कश्च (महाक्रतुः) अश्वमेधश्च-अर्काश्वमेधम् । नपुंस-कत्वे तु न राजसूय वाजपेये । **अध्ययनतोऽविप्रकृष्टाख्यानाम्** (२-४-५) अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्व एकवत्स्यात् । पदकानां क्रमकाणां समाहारः–पदकक्रमकम् ।

आनङ् ऋतो द्वन्द्वे (६-३-२५) विद्यायोनिसम्बन्धवाचिनामृदन्तसर्वावयवानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे । विद्यासम्बन्धे-होता च पोता चेत्यर्थे समासे पूर्वऋकारस्य आनङादेशे नलोपः प्रातिपदिकान्तस्येति नलोपे होतापोतारौ । होतृपोतृनेष्टोद्गातारः । चरमावयवे उद्गातृशब्दे, नेष्टृशब्दऋकारस्यानङ् । योनिसम्बन्धे–माता च पिता च-मातापितरौ । याताननान्दरौ । पुत्रेऽन्य-तरस्यामित्यतो मण्डूकप्लुत्या पुत्रे इत्यनुवृत्तेः-पितापुत्रौ । **देवताद्वन्द्वे च** (६-३-२६) देवतावाचिनां द्वन्द्वे उत्तरपदे परे आनङ् स्यात् । मित्रश्च वरुणश्च-मित्रावरुणौ । वायुशब्दप्रयोगे प्रतिषेधः । अग्निवायू वाय्वग्नी । द्वन्द्व इत्यनुवृत्तौ पुनर्द्वन्द्वग्रहणेन प्रसिद्धसाहचर्यस्य परिग्रहात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मप्रजापती। दिवोद्यावा (६-३-२९) देवताद्वन्द्वे उत्तरपदे परे दिवो द्यावादेशः स्यात्। द्यौश्च भूमिश्च-द्यावाभूमी। दिवसश्च पृथिव्याम् (६-३-३०) दिवोदिवस् द्यावा इति चादेशः स्या- पृथिवीशब्दे उत्तरपदे परे देवताद्वन्द्वे। द्यौश्च पृथिवी च-दिवस्पृथिव्यौ, द्यावापृथिव्यौ। दिवस त्यकारोच्चारणं सस्य रुत्वं माभूदित्यर्थम्। मातरपितरावुदीचाम् (६-३-३२) उदीचां मते मातरपितरा- विति स्यात्। माता च पिता च-मातरपितरौ। अन्येषां मते तु-मातापितरौ। द्वन्द्वाच्चुदषहान्तात्स- माहारे (५-४-१०६) चवर्गान्ताद्दषहान्ताच्च द्वन्द्वाट्टच्स्यात्समासान्तः समाहारे। वाक्च त्वक्च- वाक्त्वचम्। त्वक्च स्रक्च-त्वक्स्रजम्। शमी च दृषच्च-शमीदृषदम्। वाक्च त्विट् च-वाक्त्विषम्। छत्रं चोपानहौ च-छत्रोपानहम्।

वि. ईदग्नेः सोमवरुणयोः (६-३-२७) सोमवरुणयोः परयोरग्नेरीकारादेशः स्याद्देवता द्वन्द्वे। अग्नेस्तुत् स्तोमसोमाः (८-३-८२) अग्नेः परेषामेषां सस्य षः स्यात्समासे। अग्निश्च सोमश्च-अग्नीषोमौ। अग्नीवरुणौ। अग्नेः स्तोमः- अग्निष्टोमः।

प्रयोगाः—सूर्याचन्द्रमसौ यस्य मातामहपितामहौ। मांसशोणितकर्दमः। इत्थं रथाश्वेभ निषादिनां रणे। रामरावणयोर्युद्धं। मातापितरौ मानय। धर्माथौ यत्र न स्याताम्। शृगाल- मजाविकम्। अधरोत्तरं सञ्जातम्। पितापुत्रौ न गच्छेताम्। बाधते दंशमशकम्। धर्मार्थकाम- मोक्षाः पुरुषार्थाः।

एकशेषः—

द्वन्द्वापवाद एकशेषः। सरूपाणामेकशेष एकविभक्तौ (१-२-६४) पूर्वमुक्तम्। रामश्च रामश्च- रामौ। रामश्च रामश्च रामश्च, रामश्च रामौ च इति वा-रामाः। विरूपाणामपि समानार्थानाम् (वा) वक्रदण्डश्च कुटिलदण्डश्च-वक्रदण्डौ, कुटिलदण्डौ वा। घटश्च कुम्भश्च कलशश्च-घटाः, कुम्भाः, कलशाः वा। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः (१-२-६५) यूना (युवप्रत्ययान्तेन) सहोक्तौ वृद्धं (गोत्रम् अन्तरितमपत्यं) गोत्रप्रत्यान्तं शिष्यते, गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यम्। गार्ग्यश्च (गोत्रापत्यं) गार्ग्यायणश्च (युवापत्यं)-गार्ग्यौ। वात्स्यश्च वात्स्यायनश्च- वात्स्यौ। वृद्धेत्युक्त्या नेह-गर्गश्च गार्ग्यायणश्च-गर्गगार्ग्यायणौ। (एकशेषाभावेद्वन्द्वः) यूनेत्यु- क्त्या नेह-गार्ग्यश्च गर्गश्च-गार्ग्यगर्गौ। तल्लक्षणेत्युक्त्या नेह-गार्ग्यश्च वात्स्यायनश्च-गार्ग्यवात्स्या- यनौ। स्त्री पुंवच्च (१-२-६६) यूनासहोक्तौ वृद्धा स्त्री शिष्यते स्त्र्यर्थश्च पुंवद्भवति। गार्गी च गार्ग्या- यणश्च-गार्ग्यौ। वात्सी च वात्स्यायनश्च-वात्स्यौ। पुमान् स्त्रिया (१-२-६७) स्त्रिया सहोक्तौ पुमान्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिष्यते स्त्रीपुंलक्षण एव विशेषश्चेत्। हंसी च हंसश्च-हंसौ। ब्राह्मणश्च ब्राह्मणी च-ब्राह्मणौ। कुक्कुटौ च कुक्कुटी च-कुक्कुटाः। तल्लक्षणेत्युक्त्या नेह-कुक्कुटश्च मयूरी च-कुक्कुटमयूर्यौ। एवकारेण पुंयोगरूपविशेषान्तरसत्वान्नेह-इन्द्रेन्द्राण्यौ। भ्रातृपुत्रौ स्वसृदुहितृभ्याम् (१-२-६८) स्वस्रा सहोक्तौ भ्रातृशब्दः, दुहित्रा सहोक्तौ पुत्रशब्दः शिष्यते। भ्राता च स्वसा च-भ्रातरौ। पुत्रश्च दुहिता च-पुत्रौ। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् (१-२-६९) नपुंसकानपुंसकमात्रकृते विशेषे अनपुंसकेन सहोक्तौ नपुंसकं शिष्यते, तच्च वा एकवत्स्यात्। शुक्लः पटः शुक्ला शाटी, शुक्लं वस्त्रम् -तदिदं शुक्लम्, तानीमानि शुक्लानि वा। पिता मात्रा (१-२-७०) मात्रा सहोक्तौ पितृशब्दो वा शिष्यते। माता च पिता च-पितरौ, मातापितरौ वा। श्वशुरः श्वश्र्वा (१-२-७१) श्वश्र्वा सहोक्तौ श्वशुरशब्दो वा शिष्यते। श्वशुरश्च श्वश्रू च-श्वशुरौ, श्वश्रूश्वशुरौ वा। त्यदादीनि सर्वैर्नित्यम् (१-२-७२) सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्तश्च-तौ। यश्च चैत्रश्च मैत्रश्च-ये। अहं च सखायौ च-वयम्। त्वं च पत्नी च-युवाम्। त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते (वा) पूर्वपरत्वे त्यदादिनिर्देशपाठक्रमात्। स च यश्च-यौ। स च या च-ये। यश्च कश्च-कौ। त्वं चाहं च-आवाम्। त्वं चाहं च एष च-वयम्। पूर्वशेषोपि दृश्यते इति भाष्यम्। स च यश्च-तौ। अहं च भवाँश्च-आवाम्। त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि (वा) सा च देवदत्तश्च-तौ। तच्च चैत्रश्च पुत्री च-तानि। पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तच्च चैत्रश्च-ते। स च ते च-तानि। अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम्(वा) द्वन्द्वतत्पुरुषविशेषणभिन्नानां त्यदादीनां पुंनपुंसकतो लिङ्गवचनानि भवन्तीत्यर्थः। तेनेह न-कुक्कुटमयूर्याविमे (अयं च इयं च)। मयूरीकुक्कुटाविमौ (इयं च अयं च)। अर्धपिप्पली च पिप्पल्यर्धं च अर्ध-पिप्पलौ ते (सा च तच्च)। ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री (१-२-७३) अतरुणग्राम्यपशूनां सङ्घेषु सहविवक्षायां स्त्री शिष्यते। पुमान्स्त्रियेत्यस्यापवादः। गौश्च (पुं) गौश्च (पुं) गौश्च (स्त्री)-गावः इमाः। अजा च अजा च अजश्च-अजाः इमाः। ग्राम्येत्युक्त्या-रुरव इमे, पृषत इमे। पशुग्रहणात्-ब्राह्मणाः। सङ्घेत्युक्त्या-एतौ गावौ, अतरुणेत्युक्त्या वत्सा इत्यादौ स्त्रीपुंसयोर्योगे न स्त्रीशेषः। अनेकशफेष्विति वाच्यम् (वा) अश्वा इमे।

वि. अर्थभेदाच्छब्दभेद इति नियमेन एकस्माच्छब्दादनेकार्थबोधाभावेन शब्दभेदस्य कल्पनीयतया शब्द[illegible] प्रयोगाय एकशेषो विधेयः। द्वन्द्वप्राप्तिस्थले द्वन्द्वं बाधित्वा एक शेषाप्रवृत्तिः। परिशेषेणैकशेषाप्राप्तावेव द्वन्द्वो [illegible] द्वन्द्वं बाधित्वैकशेषात्पूर्वमपि न द्वन्द्वः। एकशेषेकृतेऽनेकसुबन्ताभावात्परमपि न द्वन्द्वः। तेन शिरसी शिरांसि [illegible] वेकशेषस्यत्ते द्वन्द्वाभावेन समासान्तोदात्तस्वरः प्राण्यङ्गत्वादेकवद्भावः, ;पन्थानौ पन्थान इत्यादौ समासान्तश्च न भवति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः— ननन्दतु रतत्सदृशेन तत्समौ। तौ दम्पती स्वां प्रति राजधानीम्। एकोदरभ्रातृविवाहकृत्यम्। पित्रोः सेवां समाचर। चरन्त्यरण्ये करिणः। गावो गोष्ठं भूषयन्ति। परस्परविरोधे तु यूयं यूयं वयं वयम्। अन्यैः सह विरोधे तु वयं पञ्चोत्तरं शतम्।

समासान्ताः—

ऋक्पूरब्धूःपथामानक्षे (५-४-७४) ऋक्पूरब्धूःपथिन्नन्तस्य समासस्य अप्रत्ययोऽन्तावयवः स्यात् अक्षे या धूस्तदन्तस्य तु न। ऋचोऽर्धम्-अर्धर्चम्। अर्धं नपुंसकमिति समासः। अविद्यमाना ऋचो यस्य सः-अनृचः (केवल यजुरध्येता)। बहवः ऋचो यस्य सः-बह्वृचः (ऋक्शाखी)। अनृचबह्वृचावध्येतर्येव, तेनेहन-अप्रत्ययः, अनृक्साम, बह्वृक्सूक्तम्। विष्णोः पूः-विष्णुपुरम्। क्लीबत्वं लोकात्। रामपुरम्। विमलाः आपो यस्मिंस्तत्-विमलापं सरः। मलिनापम्। राज्ञः धूः-राजधुरा। अप्रत्यये परवल्लिङ्गत्वे स्त्रीत्वाट्टाप्। महती चासौ धूः-महाधुरा। राज्ञः पन्थाः-राजपथः अप्रत्यये नस्तद्धिते इति टेरनो लोपः। सख्युः पन्थाः—सखिपथः। महांश्चासौ पन्थाः–महापथः। एवं शिवपुरम्, बह्वापम्, कार्यधुरा, सत्पथः। अक्षे इत्यक्षसम्बन्धिनी या धूरित्यर्थादक्षपूर्वपदे अक्षे समासार्थेऽपि सति नाप्रत्ययः-अक्षस्य धूः-अक्षधूः। दृढा धूर्यस्य सः-दृढधूः अक्षः। द्व्यन्तरुपसर्गेभ्योऽप ईत् (६-३-९७) एभ्यः परस्य (कृतसमान्तापशब्दस्य) ईत्स्यात्। द्वयोः (पार्श्वयोः) गता आपो यस्मिंस्तदित्यर्थे व्यधिकरणबहुव्रीहिसमासे समासान्ते अप्रत्यये अनेन अप्शब्दस्य आदेः परस्येत्यकारस्य ईकारे द्वीपम्। अन्तर्गता आपो यस्मिन्—अन्तरीपम्। प्रतिकूला आपो यस्मिन्—प्रतीपम्। संगता आपो यस्मिन्—समीपम्। अवर्णान्ताद्वा (वा) प्रगता आपो यस्मिन्-प्रेपम् 'प्रापम्। परागता आपो यस्मिन्-परेपम्, परापम्। ऊदनोर्देशे (६-३-९८) अनो परस्याप ईत्स्यादेशे। अनुगता आपो यस्मिन्-अनूपः (जलप्रायः) देशः। अप्रत्यये ऊत्वे सवर्णदीर्घः। अच्प्रत्यन्ववपूर्वात्सामलोम्नः (५-४-७५) एतत्पूर्वात्सामलोमान्तसमासादच्स्यात्। प्रतिगतं साम-प्रतिसामम्। अच्प्रत्यये नस्तद्धितइति टिलोपः। अनुगतं साम—अनुसामम्। प्रतिगतं लोम-प्रतिलोमम्। अनुगतं लोम—अनुलोमम्। कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते (वा) कृष्णा भूमिर्यस्य सः-कृष्णभूमः। अचि यस्येतिचेतीकारलोपः। उदीची भूमिर्यस्य स-उदग्भूमः। पाण्डु भूमिर्यस्य सः-पाण्डुभूमः। द्वे भूमी यस्य सः—द्विभूमः प्रासादः। तिस्रो भूमयो यस्य सः-त्रिभूमः। संख्याया नदीगोदावरीभ्यां च (वा) पञ्चानां नदीनां समाहारः-पञ्चनदम्। सप्तानां गोदावरीणां समाहारः—सप्तगोदावरम्। नदीभिश्चेत्यव्ययीभावेऽचि यस्येतिचेतीकारलोपः। अत्र सूत्रेऽजितियोगविभागाद्वा-विकल्पमिदं गतार्थम्। अन्यत्रापि च दृश्यते। पद्मं नाभौ यस्य सः—पद्मनाभः। ऊर्णं नाभौ यस्य सः-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उर्णनाभः। दीर्घा रात्रिर्यस्य सः-दीर्घरात्रः। समा रात्रिर्यस्य सः-समरात्रः। अक्ष्णोऽदर्शनात् (५-४-७६)
अचक्षुःपर्यायादक्ष्णः समासान्तोऽच्स्यात्। गवामक्षीव-गवाक्षः। अक्षिसदृशे लाक्षणिकतयाऽक्षिशब्दः
न मुख्यतया चक्षुर्वाचकः। समासेऽचिइकारलोपः, गोशब्दे अवङादेशश्च। एवं कचराक्षम्। (अरुणां
नांमुखप्रच्छादनार्थंबहुच्छिद्रंजालकम्) अचतुर-विचतुर-सुचतुर-स्त्रीपुंस-धेन्वनडुह-र्क्साम-वाङ्म
सात्ति-भ्रुव-दारगवो- र्वष्ठीव-पदष्ठीव-नक्तन्दिव-रात्रिन्दिवा-हर्दिव-सरजस-निःश्रेयस-पुरुषायुष-द्व्या
त्र्यायुष-र्ग्यजुष-जातोक्ष-महोक्ष-वृद्धोक्ष-पशुन-गोष्ठश्वाः (५-४-७७) एते पञ्चविंशतिरजन्ता निपात्यन्ते
समासे व्यवस्थापि निपातनात्। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वारि यस्य सः-अचतुरः
विगतानि चत्वारि यस्यसः-विचतुरः। शोभनानि चत्वारि यस्य सः-सुचतुरः। त्र्युपाभ्यां चतुरोऽजिष्यते
(वा) त्रयो वा चतुरो वा-त्रिचतुराः। संख्यायाव्ययेति समासे डचं बाधित्वाऽच्। चतुर्णां समीपे-
उपचतुराः (त्रयःपञ्चवा)। तत एकादश द्वन्द्वाः। स्त्रीच पुमांश्च-स्त्रीपुंसौ। धेनुश्चानडुहश्च-धेन्वन
डुहौ। ऋक्च साम च-ऋक्सामे। वाक्च मनश्च-वाङ्मनसे। अक्षिणी च भ्रुवौ च-अक्षिभ्रुवम्।
प्राण्यङ्गत्वादेकत्वम्, अचिश्नुधात्वित्युवङ् दाराश्च गावश्च-दारगवम्। ऊरूच अष्ठीवन्तौ (जानुनी)
च-ऊर्वष्ठीवम्। निपातनाट्टिलोपः। पादौ च अष्ठीवन्तौ च-पदष्ठीवम्। पादस्य पद्भावष्टिलोपश्च
निपात्यते। नक्तं च दिवा च-नक्तन्दिवम्, अचि यस्येतिचेत्याकारलोपे अव्ययीभावश्चेत्यव्ययत्वा
नपुंसकत्वे अम्भावश्च। रात्रौ च दिवा च-रात्रिन्दिवम्। रात्रेर्मान्तत्वं निपात्यते। अहनि च दिवा
च-अहर्दिवम्। वीप्सायां द्विर्वचने एकशेषं बाधित्वा द्वन्द्वो निपात्यते। तत एकोऽव्ययीभावः
साकल्ये। रजोऽप्यपरित्यज्य-सरजसम्। रजसा सहित इति बहुव्रीहौ तु नाच-सरजः पङ्कजम्।
ततस्तत्पुरुषौ। निश्चितं श्रेयः-निश्रेयसम्। निश्चितं श्रेयो यस्येति बहुव्रीहौ तु नाच्-निश्रेयस्कः
न्पुरुषः। पुरुषस्याऽऽयुः-पुरुषायुषम्। द्वन्द्वे तु नाच्-पुरुषश्चायुश्च-पुरुषायुषी। ततोद्विगू। द्वे
आयुषी समाहृते-द्व्यायुषम्। त्रीण्यायूंषि समाहृतानि-त्र्यायुषम्। इह तु न-द्वयोरायुः-त्रयाणामायुः
द्व्यायुः-स्त्र्यायुः। ततोद्वन्द्वः। ऋक्च-यजुश्च-ऋग्यजुषम्। ततस्त्रयः कर्मधारयाः। जातश्चासौ
उक्षाः-जातोक्षः। महाँश्चासौ उक्षा-महोक्षः। वृद्धश्चासौ उक्षा-वृद्धोक्षः। अचि नस्तद्धित इति
टिलोपः। ततोऽव्ययीभावः। शुनः समीपम्-उपशुनम्। शुनष्टिलोपाभावः संप्रसारणं च निपात्यते।
ततः सप्तमीतत्पुरुषः। गोष्ठेश्वा-गोष्ठश्वः। षष्ठीतत्पुरुषेतु नाच्-गोष्ठश्वा। ब्रह्महस्तिभ्यां वर्चसः
(५-४-७८) आभ्यां वर्चसोऽच्स्यात्। ब्रह्मणो वर्चः-ब्रह्मवर्चसम् (ब्रह्मवत्वम्)। हस्तिनो वर्चः-हस्ति
वर्चसम्। पल्यराजाभ्यां चेति वक्तव्यम् (वा) पलयस्य (मांसभोजिनः) वर्चः-पल्यवर्चसम्। राज्ञो
वर्चः-राजवर्चसम्। अवसमन्धेभ्यस्तमसः (५-४-७६) एभ्यस्तमसोऽच्स्यात्। अवहीनं तमः-अवत
मसम्। सन्ततं तमः-सन्तमसम्। अन्धयतीत्यन्धम् पचाद्यच्। अन्धं तमः-अन्धतमसम्। (गाढं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारः)। श्वसो वसीयःश्रेयसः (५-४-८०) श्वसः परयोर्वसीयःश्रेयसोरच्स्यात्। प्रशस्तवाचिनो वसु-शब्दादीयसुनि वसीयः। श्वस्शब्द उत्तरपदार्थस्य प्रशंसामाशीर्विषयमाचष्टे। मयूरव्यंसकादित्वा-त्समासः। अतिशयेन प्रशस्तं-श्वोवसीयसम्, श्वःश्रेयसं ते भूयात्। श्वःश्रेयसं शिवं भद्रमित्यमरः।

वि. १ समासविशेषानुल्लिख्य समासान्तास्तत्र तत्र निर्दिष्टाः। सम्प्रति सर्वविधसमासानुपादाय-जायमानाः समासान्ता निर्दिश्यन्ते।

वि. २ अन्ववतप्ताद्रहसः (५-४-८१) अच्स्यात्। अनुगतं रहः-अनुरहसम्। अवहीनं रहः-अवरहसम्। तप्तं रहः-तप्तरहसम्। प्रतेरुरसः सप्तमीस्थात् (५-४-८२) सप्तम्यर्थद्योतकात्प्रतेः परस्मादुरसोऽच्स्यात् उरसि इति-प्रत्युरसम्। विभक्त्यर्थेऽव्ययीभावः। अनुगवमायामे (५-४-८३) अनुगवमिति निपात्यते आयामे द्योत्ये। अनुगवम् (गोदैर्घ्यसदृशं दैर्घ्यं) यस्य ... यस्यचायाम इतिसमासः। द्विस्तावा त्रिस्तावा वेदिः (५-४-८४) एतौ निपात्येते वेदिश्चेद्वाच्या ... प्रकृतौ वेदि स्ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ विकृतौ वेदिस्तत्रेदं निपातनम्। वेदिरित्युक्त्या नेह-द्विस्तावती ... त्रिस्तावती रज्जुः। उपसर्गादध्वनः (५-४-८५) उपसर्गादध्वनोऽच्स्यात्। प्रगतोऽध्वानं-प्राध्वो रथः। निर्गतमध्वनः-... निरध्वं शकटम्। न पूजनात् (५-४-६९) पूजनार्थात्परेभ्यःसमासान्ता नस्युः। शोभनो राजा-सुराजा, प्रादिसमासः। ... राजा-अतिराजा। राजाहसखिभ्य इति न-टच्। स्वतिभ्यामेव (वा) इह तु भवति परमश्चासौ राजा-परमराजः। ... राजा-अधिराजः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः, नेह-सुसक्थः। स्वक्षः। किमः क्षेपे (५-४-७०) ... किंशब्दस्ततः परस्मात्समासान्ता न स्युः। कुत्सितो राजा-किंराजा। कुत्सितः सखा-किंसखा। कुत्सिता गौः-... नञस्तत्पुरुषात् (५-४-७१) नञ्पूर्वपदात्तत्पुरुषात्समासान्तो न स्यात्। न राजा-अराजा। न सखा-असखा। ... पुरुषादित्युक्ते रिह भवति। अविद्यमानाधूर्यस्य तत्-अधुरं शकटम्। पथो विभाषा (५-४-७२) नञ्पूर्वात्पथः समासान्तो ... स्यात्। न पन्थाः-अपथम्। (ऋक्पूरित्यप्रत्ययेटिलोपः) अपन्थाः वा। तत्पुरुषादित्येव, तेनेहभवति, अविद्यमानः ... पन्था यस्य सः-अपथो देशः। पथोऽभावः-अपथम्। अव्ययीभावे अपथं-नपुंसकमिति क्लीबत्वम्।

प्रयोगाः—अवाङ्मनसगोचरः। स्त्रीपुंसयोर्विवादेतु। सकिंसखा साधु न शास्ति योधिपम्। अपथे वर्तमानस्य विनिपातः पदे पदे। अपन्थानं तु गच्छन्तं सोदरोपि विमुञ्चति। नकन्दिवं बाधते। अन्धतमसाच्छन्नोयं प्रदेशः। घनाम्बुना राजपथे हि पिच्छिले। क्वचिद्बुधैरप्यपथेन गम्यते। लीला-खेलमनुप्रापुर्महोक्षास्तस्य विक्रमम्।

... अलुक्समासः—

अलुगुत्तरपदे (६-३-१) अलुगधिकारः प्रागानङः। उत्तरपदाधिकारस्तु आपादसमाप्तेः। पञ्चम्याः स्तोकादिभ्यः (६-३-२)। एभ्यः पञ्चम्या अलुक्स्यादुत्तरपदे। स्तोकान्मुक्तः। अल्पान्मुक्तः। दूरादागतः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्तरपदे इत्युक्तेनेह-निष्क्रान्तःस्तोकात्-निस्तोकः। ओजःसहोम्भस्तमसस्तृतीयायाः (६-३-३) एभ्यस्तृ-
तीयाया अलुक्स्यादुत्तरपदे। ओजसाकृतम्। सहसाकृतम्। अम्भसाकृतम्। (बलेन कृतम्)। त-
सावृत्तम्। कर्तृकरणेकृतेति समासः। अञ्जसःउपसंख्यानम् (वा) अञ्जसाकृतम्। (आर्जवेनकृतम्)
पुंसानुजो जनुषान्ध इति च (वा) पुंसानुजः (यस्याग्रजः पुमान्सः)। जनुषान्धः। (जात्यन्धः) आत्मन-
(६-३-६) आत्मनस्तृतीयाया अलुक्स्यात्। पूरण इति वक्तव्यम् (वा) पूरणप्रत्यान्ते उ-
पदे इत्यर्थः। आत्मनापञ्चमः। तृतीयेति योगविभागात्समासः। परस्य च (६-३-
परशब्दस्य चतुर्थ्या अलुक्स्याद्वैयाकरणसंज्ञायाम्। परस्मैपदम्, परस्मैभाषा। पूर्ववच्चतुर्थीसमा-
हलदन्तात्सप्तम्याः संज्ञायाम् (६-३-९) हलन्ताददन्ताच्च सप्तम्या अलुक्स्यात्संज्ञायाम्। त्वचि स-
यस्य सः-त्वचिसारः (वंशः)। अरण्येतिलकाः (आरण्यतिलानि)। अरण्येमाषकाः। वनेकि-
कूपेपिशाचकाः। संज्ञायामिति समासः। संज्ञायामित्युक्तेनेह-अक्षशौण्डः। गवियुधिभ्यां स्थि-
(८-३-९५) आभ्यां स्थिरस्य सस्य षः स्यात्। गवि स्थिरः-गविष्ठिरः। युधि स्थिरः-युधिष्ठि-
संज्ञायामलुक् षत्वं च। मध्याद्गुरौ (६-३-११) सप्तम्या अलुक् स्यात्। मध्येगुरुः। असंज्ञार्थमि-
सप्तमीति योगविभागात्समासः। अन्ताच्च (वा) अन्तेगुरुः। अमूर्धमस्तकात्स्वाङ्गादकामे (६-३-
मूर्धमस्तकवर्जितात्स्वाङ्गवाचिन उत्तरस्याः सप्तम्या अलुक्स्यात्कामवर्जिते उत्तरपदे परे।
कालो यस्य स-कण्ठेकालः। (शिवः) उरसि लोमानि यस्य सः-उरसिलोमा। उदरेमणिः।
एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। अमूर्धमस्तकेत्युक्तेनेह-मूर्धशिखः, मस्तकोष्णीषः। अ-
इत्युक्तेनेह-मुखे कामो यस्य सः-मुखकामः। तत्पुरुषे कृति बहुलम् (६-३-१४) कृदन्ते उत्त-
परे सप्तम्या बहुलमलुक्स्यात् तत्पुरुषे। स्तम्बे रमते इति-स्तम्बेरमः (हस्ती)। कर्णेजपः
कर्णेजपः (पिशुनः)। स्तम्बकर्णयोरमिजपोरित्यचि उपपदसमासः। एवं वनेचरः, खेचरः, सरसि-
बहुलग्रहणात्क्वचिन्न-कुरुचरः, मद्रचरः। प्रावृट्शरत्कालदिवां जे (६-३-१५) एषां सप्तम्या अलु-
ज्जेपरे। प्रावृषि जायते इति-प्रावृषिजः। एवं शरदिजः। कालेजः। पूर्वस्यैवायं प्रपञ्चः। शयवास-
ष्वकालात् (६-३-१८) एषूत्तरपदेषु अकालवाचिन उत्तरस्याः सप्तम्या वा अलुक्स्यात्। खे शेते
खेशयः, खशयः। ग्रामेवासः-ग्रामवासः, ग्रामे वसतीति-ग्रामेवासी, ग्रामवासी। अन्ते-
(शिष्यः)। हलदन्तादित्येव नेह-भूमिशयः। नेन्सिद्धबध्नातिषु च (६-३-१९) इन्नन्तादिषु परेषु स-
अलुङ्न स्यात्। स्थण्डिलशायी। काम्पिलसिद्धः। चक्रबन्धः। स्थे च भाषायाम् (६-३-२०)
परे सप्तम्या अलुङ्न स्यात्। समे तिष्ठतीति-समस्थः। विषमस्थः। शिरस्थः। पर्वत-
कूटस्थः। षष्ठ्या आक्रोशे (६-३-२१) उत्तरपदे परे षष्ठ्या अलुक्स्यादाक्रोशे गम्यमाने। चौर-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुलम् । वृषलस्यकुलम् । आक्रोशाभावान्नेह-ब्राह्मणकुलम् । राजकुलम् । वाक्दिक्पश्यद्भ्यो: युक्तिदण्डहरेषु (वा) वाचोयुक्तिः । (पटुः) दिशोदण्डः । पश्यतोहरः (चौरः) । षष्ठीचानादरे इति षष्ठी । देनानां प्रिय इति च मूर्खे (वा) देनानांप्रियः (मूर्खः) । अन्यत्र देवप्रियः । शेपपुच्छलाङ्गूलेषु शुनः (वा) शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गूलः । (ऋषिविशेषा इमे) । दिवश्च दासे (वा) दिवोदासः । (काशीराजः) । पुत्रेऽन्यतरस्याम् (६-३-२२) षष्ठ्याः पुत्रशब्दे परेऽलुग्वा स्यान्निन्दायाम् । दास्याः पुत्रः, दासीपुत्रः । निन्दाया अभावान्नेह–ब्राह्मणीपुत्रः । ऋतो विद्यायोनिसम्बन्धेभ्यः (६-३-२३) विद्यासम्बन्ध-योनिसम्बन्धवाचिनऋदन्तात्षष्ठ्या अलुक्स्यात् । होतुरन्तेवासी, होतुःपुत्रः । पितुःरन्तेवासी, पितुःपुत्रः । विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरग्रहणम् (वा) पूर्वोत्तरयोरुभयोर्विद्यायोनिसम्बन्धवाचिन एवालुगित्यर्थः । तेनेहन-होतृधनम् । पितृधनम् । पितृगृहम् । विभाषा स्वसृपत्योः (६-३-२४) ऋदन्तात्षष्ठ्या अलुग्वास्यात् स्वसृपत्योःपरयोः । मातुःपितुर्भ्यामन्यतरस्याम् (८-३-८५) आभ्यां स्वसुः सस्य षो वास्यात्समासे । मातुःष्वसा-मातुःस्वसा । पितुःष्वसा-पितुःस्वसा । लुक्पक्षेतु-मातृपितृभ्यां स्वसा (८-३-८४) आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे । मातृष्वसा । पितृष्वसा । असमासे तु षत्वं न-मातुः स्वसा । पितुः स्वसा ।

वि. १ अलुक्समासे समस्तासमस्तयोः प्रायः साम्येपि समासेऽलुकि एकपदत्वं समासस्वरे विशेषश्च ।

वि. २ ओजःसहोम्भस्तमस इति अलुकं विना सततनैशतमोवृतमन्यत इति भारविप्रयोगस्तु वृतुवर्तने इत्यतो घञर्थे ...जातेन वृतशब्देन सह षष्ठीसमासेनोपपादनीय इत्याहुः । केवलपदाधिकार एव तदन्तविधिर्नतूत्तरपदाधिकार इति ...नोवृतमित्यत्र नालुगिति दुर्घटवृत्तिकृदुक्तं, न युक्तं, पदाङ्गाधिकारे तस्य तदन्तस्य च ग्रहणमित्यत्र इष्टचितं पक्वेष्टक...मिति भाष्योदाहरणादुत्तरपदाधिकारेपि तदन्तविधिप्रवृत्तेः । जनार्दनस्त्वात्मचतुर्थएवेति आत्मा चतुर्थो यस्येति ...र्नात्मनाचतुर्थ इति तत्पुरुषस्तेन आत्मनश्चेति नालुगित्युपपादनीयम् ।

वि. ३ देवानां प्रिय इति मूर्खे इत्यत्र मूर्खा हि देवानां प्रीतिं जनयन्ति, देवपशुत्वादिति मनोरमाकारः । ब्रह्मज्ञानही...नशीरिणो मूर्खास्ते च याज्ञिकाः सन्तः पुरोडाशादिभिर्देवान्प्रीणयन्तीति देवानां प्रियाभवन्ति, ब्रह्मज्ञानिनस्तु त्यक्त...गो न तथा मूर्खा देवानां प्रियाश्चेति भावः । वस्तुतस्तु तस्यैव पदस्यापि समयवशेन व्यवहारभेदात्प्रशस्ता-प्रशस्ता...र्हवित्त्वति, यथा साहित्यदर्पणे-प्रशस्तपदवीरूपेण व्यवहृतस्यापि महापात्रशब्दस्य सम्प्रति एकादशाह ब्राह्मणरूप...ब्राह्मणपरत्वमवगम्यते । महाब्राह्मणशब्दोप्येवम् । तथैवाऽशोकशिलालेखे-देवानां प्रियेण प्रियदर्शिना राज्ञा (देवानां ...न प्रियदर्शिना राज्ञा) इति प्रशस्तिदर्शनात्तदात्वे यौगिकार्थमादाय प्रशस्तार्थस्याप्यस्य शब्दस्य वार्तिककृत्समयेऽप्रशस्ता...मूर्खबोधकत्वेन प्रसिद्धिरासीदित्यवगम्यते ।

वि. ४ ब्राह्मणाच्छंसिन उपसंख्यानम् (वा) द्वितीयार्थपञ्चम्या अलुक् । ब्राह्मणाच्छंसी । ब्राह्मणविहितशास्त्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(अप्रगीतगुणाभिधायिमन्त्रविशेष) शंसी ऋत्विग्विशेषः । **मनसः संज्ञायाम्** (६-३-४) तृतीयाया अलुक्स्यात् । मनसागुप्ता । **आज्ञायिनि च** (६-३-५) मनसस्तृतीयाया अलुक्स्यात्-आज्ञायिनि । मनसा ज्ञातुं शीलं यस्य सः-मनसाज्ञायी । **बन्धे च विभाषा** (६-३-१३) हलदन्तात्सप्तम्या अलुक्वा स्याद्बन्धे । हस्तेबन्धः, हस्तबन्धः । **विभाषा वर्षक्षरशरवरात्** (६-३-१६) एभ्यः सप्तम्या अलुक्स्याज्जे । वर्षेजः, वर्षजः । शरेजः, शरजः । **घकालतनेषु कालनाम्नः** (६-३-१७) घसंज्ञकप्रत्यय-कालशब्द-तनप्रत्ययेषु परेषु कालनाम्न उत्तरस्याः सप्तम्या वा अलुक्स्यात् । (तरप्तमपौ घः) पूर्वाह्णेतरे, पूर्वाह्णतरे । पूर्वाह्णेतमे, पूर्वाह्णतमे । पूर्वाह्णेकाले, पूर्वाह्णकाले । पूर्वाह्णेतने, पूर्वाह्णतने । **आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति च** (वा) एते निपात्यन्ते । आमुष्यापत्यम्-आमुष्यायणः । द्वयोरमुष्यापत्यम्-द्व्यामुष्यायणः । नडादित्वात् फक् । अमुष्य पुत्रस्य भावः-आमुष्यपुत्रिका । मनोज्ञादित्वाद्वुञ् । अमुष्य कुलस्य भावः-आमुष्यकुलिका । समासोत्तरमलुक् ...

प्रयोगाः—शेषाः—शरदिज इव घर्मः केतकीपत्रगर्भम् । स्तम्बेरमा मुखरशृङ्खलकर्षिणः ... सवर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः । वनेचराणां वनितासखानाम् । ... कालं नमाम्यहम् । पितुःष्वसुः पुत्रो बान्धवः । सहसाकृतमेव तेन तत् ।

समासाश्रयविधयः

ह्रस्वदीर्घौ—

घरूप-कल्प-चेलड्-ब्रुव-गोत्र-मत-हतेषु ङ्योऽनेकाचो ह्रस्वः (६-३-४३) भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचोऽङ्गस्य ह्रस्वः स्यात् घरूपकल्पप्रत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु । अतिशयिता ब्राह्मणी-ब्राह्मणितरा, ब्राह्मणितमा । प्रशस्ता ब्राह्मणी-ब्राह्मणिरूपा । ब्राह्मणीशदृशी-ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा । ब्राह्मणिमता । ब्राह्मणिहता । चेलडादीनि वृत्तिविषये कुत्सनवाचीनि तैः सह कुत्सितानिकुत्सनैरिति समासे पूर्वपदे ह्रस्वः । **नद्याः शेषस्यान्यतरस्याम्** (६-३-४४) अङ्यन्तनद्याः ङ्यन्तस्यैकाचश्च नद्यादिषु ह्रस्वो वा स्यात् । अतिशयेन ब्रह्मबन्धुः-ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा । अतिशयिता स्त्री-स्त्रितरा, स्त्रीतरा । स्त्रितमा, स्त्रीतमा । कृन्नद्यान ... लक्ष्मीतरा । **उगितश्च** (६-३-४५) उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात् । अतिशयिता विदुषी-विदुषितरा, ह्रस्वाभावपक्षे तसिलादिष्विति पुंवद्भावेन ङीपो निवृत्तौ विद्वत्तरा । ब्रुवादौ ह्रस्वाभावे न पुंवत्त्वम् । विदुषिब्रुवा विदुषीब्रुवा वा । विदुषिहता, विदुषीहता । श्रेयसितरा, श्रेयस्तरा । **इको ह्रस्वोऽङ्यो गालवस्य** (६-३-६१) इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे । ग्रामणीश्चासौ पुत्रः, ग्रामण्याः पुत्र इति वा-ग्रामणिपुत्रः । सेनानीश्चासौ वीरः-सेनानिवीरः ... अङ्यन्तेत्युक्तेर्नेह-गौरीपतिः । अन्यतरस्यामित्यनुवृत्तेर्गालवग्रहणं पूजार्थम् । इयङुवङ्भाविनाम् ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्यानां च नेति वाच्यम् (वा) श्रियो मदः-श्रीमदः। भ्रुवो भङ्गः-भ्रूभङ्गः। शुक्लीभावः। वृषलीभूतः। भ्रू कुंसादीनामिति वक्तव्यम् (वा) एषां ह्रस्वनिषेधो नेत्यर्थः। अकारोऽनेन विधीयते इति व्याख्यान्तरम्। भ्रुवां कुंसः (भाषणं शोभा वा) यस्य सः-भ्रकुंसः, भ्रुकुंसः, भ्रूकुंसः। (स्त्रीवेषधारी नर्तकः) भ्रुवः कुटिः (कौटिल्यं) भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिः। एकतद्धिते च (६-३-६२) एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च। एकस्याभावः-एकत्वम्, एकता। एकस्याः क्षीरम्-एकक्षीरम्। एवम्-एकदुग्धम्। एकगृहम्। एकशाटी। ङ्यापोः संज्ञाछन्दसोर्बहुलम् (६-३-६३) ङ्यन्तस्याऽऽबन्तस्य च संज्ञाछन्दसोर्बहुलं ह्रस्वः स्यात्। संज्ञायां-रेवत्याः पुत्रः-रेवतिपुत्रः। एवं-रोहिणिपुत्रः, कालिदासः, गङ्गदत्तः। (छन्दसि-अजायाः क्षीरम्-अजक्षीरम्)। बहुलग्रहणात्क्वचिन्न नान्दीकरः, नान्दीघोषः। त्वे च (६-३-६४) त्वप्रत्यये ङ्यापोर्वा ह्रस्वः। अजत्वम्, अजात्वम्। रोहिणित्वम्, रोहिणीत्वम्। इष्टकेषीकामालानां चिततूलभारिषु (६-३-६५) इष्टकादीनां तदन्तानां च पूर्वपदानां क्रमाच्चितादिषूत्तरपदेषु ह्रस्वः स्यात्। इष्टकाभिश्चितम्-इष्टकचितम्। पक्वेष्टकचितम्। इषीकायाः (गर्भतृणस्य) तूलम् (अग्रम्)-इषीकतूलम्। मुञ्जेषीकतूलम्। मालां बिभर्तीति-मालभारी। उत्पलमालभारी। संहितायाम् (६-३-११४) अधिकारोयम्। कर्णे लक्षणस्याऽविष्टाष्ट-पञ्च-मणि-भिन्न-छिन्न-च्छिद्र-स्रुव-स्वस्तिकस्य (६-३-११५) कर्णशब्दे लक्षणवाचकस्य दीर्घः स्याद्विष्टादीन्वर्जयित्वा। द्विगुणौ (द्विगुणरेखौ) कर्णौ यस्य सः-द्विगुणाकर्णः। दात्रौ (दात्ररेखौ) कर्णौ यस्य सः-दात्राकर्णः। एवं त्रिगुणाकर्णः। ध्वजाकर्णः। पशूनां स्वामिविशेषसम्बन्धज्ञापनार्थं दात्रशूलचक्राद्याकार चिन्हं यत्क्रियते तदिह लक्षणशब्देन विवक्ष्यते। तेनेहन-लम्बकर्णः, शोभनकर्णः। विष्टादीनां तु लक्षणत्वेपि न-विष्टौ कर्णौ यस्य सः—विष्टकर्णः। अष्टौ (अष्टसंख्यारेखाचिन्हौ) कर्णौ यस्य सः-अष्टकर्णः। एवं पञ्चकर्णः, मणिकर्णः, भिन्नकर्णः, छिन्नकर्णः, छिद्रकर्णः स्रुवकर्णः, स्वस्तिकर्णः। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ (६-३-११६) क्विबन्तेषु नह्यादिषु परेषु पूर्वपदस्य दीर्घः स्यात्। उपनह्यते (बध्यते) इत्यर्थे उपपूर्वकनह्यतेः सम्पदादित्वात्कर्मणि क्विपि पूर्वपददीर्घे-उपानत्। निवर्तते इति-नीवृत् (जनपदः)। प्रवर्षतीति-प्रावृट्। मर्म विध्यतीति-मर्माविध्। नीरोचते इति-नीरुक्। एवं श्वावित्, परीतत्। वनगिर्योः, संज्ञायां कोटरकिंशुलकादीनाम् (६-३-११७) कोटरादीनां वनशब्दे परे किंशुलकादीनां गिरिशब्दे परे दीर्घः स्यात् संज्ञायाम्। कोटरावणम्। वनंपुरगेति णत्वम्। अञ्जनागिरिः। वले (६-३-११८) वलप्रत्यये परे पूर्वस्य दीर्घः स्यात्संज्ञायाम्। कृषिरस्यास्तीत्यर्थे रजःकृष्यासुतीति वलचि दीर्घे-कृषीवलः। दन्तोस्यातीति-दन्तावलः। (हस्ती)। मतौ-बह्वचोऽनजिरादीनां (६-३-११९) मतौ परेऽजिरादिवर्जितस्य बह्वचो दीर्घः स्यात्संज्ञायाम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमरा अस्यां सन्तीति-अमरावती। एवं मशकावती। पुष्करावती। अजिरादीनां न-अजिरवती। खदिरवती। पुलिनवती। शरादीनां च (६-३-१२०) शरादीनां मतौ दीर्घः स्यात्संज्ञायाम्। शरावती, वंशावती (नदीविशेषौ)। धूमावती (देवीविशेषः)। उपसर्गस्य घञ्यमनुष्ये बहुलम् (६-३-१२२) उपसर्गस्य बहुलं दीर्घः स्यात्-घञन्ते उत्तरपदे परे, न तु मनुष्ये वाच्ये। बहुलग्रहणात्क्वचिन्नित्यम् अपामार्गः। प्रतिवेशादिषु विकल्पेन-प्रतिवेशः, प्रतीवेशः। परिपाकः, परीपाकः। परिणामः, परीणामः। प्रतिकारः, प्रतीकारः। परिहारः, परीहारः। प्रतिरोधः, प्रतीरोधः। सादकारयोः कृत्रिमे वाच्ये दीर्घः-प्रासादः; प्राकारः। अन्यत्र तु-प्रसादः, प्रकारः। क्वचिन्न-निषेधः-प्रसारः, प्रहारः। मनुष्ये तु न-निषादः। (आरण्यकजातिविशेषः) इकः काशे (६-३-१२३) इगन्तस्योपसर्गस्य काशे परे दीर्घः स्यात्। नीकाशः। पचाद्यजन्तत्वात्पूर्वेणाप्राप्तौ वचनम्। अष्टनः संज्ञायाम् (६-३-१२५) उत्तरपदे परे अष्टनो दीर्घः स्यात् संज्ञायाम्। अष्टसु धातुषु स्थानं यस्य तत्-अष्टापदं (सुवर्णम्)। अष्टापदः (शरभः)। अष्टावक्रः (ऋषिः)। नलोपः। असंज्ञायां तु-अष्टपुत्रः। विश्वस्य वसुराटोः (६-३-१२८) एतयोः परयोर्विश्व शब्दस्य दीर्घः स्यात्। विश्वं वसु यस्य सः-विश्वावसुः। विश्वस्मिन् राजते इति-विश्वाराट्। राडिति विकारनिर्देशान्नेह-विश्वराजौ, विश्वराजः। नरे संज्ञायाम् (६-३-१२९) नरे परे विश्वशब्दस्य दीर्घः स्यात्संज्ञायाम्। विश्वानरः। विश्वनर एव वैश्वानरः। (अग्निः)। मित्रे चर्षौ (६-३-१३०) विश्वशब्दस्य दीर्घः स्यान्मित्रे परे ऋषौ वाच्ये। विश्वस्य मित्रं-विश्वामित्रः। अन्यत्र तु-विश्वमित्रम्। विश्वमित्रो माणवकः। शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः (वा) शुनोदन्तः-श्वादन्तः। श्वापदः। अन्येषामपि दृश्यते (६-३-१३७) अन्येषामपि शिष्टप्रयोगाद्दीर्घोदृश्यते। केशाकेशि। तुराषाट्।

वि. १ समासाश्रयविधिप्रकरणे क्वचन तद्धितप्रत्यये परे समासाभावेपि तद्विधानं प्रासङ्गिकम्, कृदन्तोत्तरपदे तु उपपदसमासादिकं यथार्हमूहनीयम्।

वि. २ नद्याःशेषस्येत्यत्र कृन्नद्याःप्रतिषेध इति सौनागाःपठन्तीति भाष्योक्त्या सौनागाः पूर्वाचार्याज्ञापत्ते। उगितश्चेति वृत्तौ विद्वच्छ्रेयसोः पुंवत्वनवक्तव्यमितिह्रस्वाभावपक्षे विदुषीतरेत्युदाहृतं, तत्तु भाष्यादृष्टत्वादुपेक्ष्यम्। एकशाटीत्यत्र षष्ठीतत्पुरुष इव कर्मधारयेपि नकोपधाया इति पुंवत्वनिषेधेन एकतद्धिते चेति ह्रस्वे तद्रूपम्।

वि. ३ अष्टकर्णः पञ्चकर्ण इत्यादौ पूर्वपदेन तत्संख्यारेखाचिह्नरूपलक्षणस्याप्रतीतेर्नदीर्घः। गवादीनांपरिच्छेदाय संख्याविशेषाङ्कनव्यवहारावगमात्पाणिनेः प्रागपि संख्याङ्कलेखनमासीदिति निश्चीयते; तेनाङ्कलेखव्यवहारोऽर्वाचीन इति केषाञ्चिदुक्तिर्न युक्तिसहा।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ४ उपसर्गदीर्घे अमनुष्योक्तेदौवारिके वाच्ये प्रतीहारशब्दे दीर्घोऽप्रामाणिक इति केचित्। परे तु प्रतीहारो द्वारं, ...स्थत्वाद्दौवारिकेगौणस्तत्प्रयोग इत्याहुः। शुनोदन्तादिषु परेषु दीर्घं विधानात्। श्वपुच्छमवनापितमिति प्रयोगो ...साधुरित्याहुः।

...शेषादेशाः—

हृदयस्य हृल्लेखयदण्लासेषु (६-३-५०) लेखादिषु परेषु हृदयस्य हृदादेशः स्यात्। हृदयं लिखतीति-हृल्लेखः। उपपदसमासः। यत्-हृदयस्य प्रियं-हृद्यम्। अण्-हृदयस्येदं-हार्दम्। आदिवृद्धिः। हृदयस्य लासः(विकासः)-हृल्लासः। लेख इत्यणन्तस्यैव ग्रहणम्। घञि तु हृदयलेख इत्येव। अणन्तत्वेनैव ग्रहे लेखग्रहणमुत्तरपदाधिकारे तदन्तविधिर्नेति ज्ञापयति। वा शोकष्यञ्रोगेषु (६-३-५१) एषु परेषु हृदयस्य हृद्वा स्यात्। हृदयस्य शोकः-हृच्छोकः, हृदयशोकः। ष्यञि-सुहृदयस्य भावः-सौहार्द्यम्, सौहृदय्यम्। हृदयस्य रोगः-हृद्रोगः, हृदयरोगः। हृदयपर्यायस्य हृच्छब्दस्यापि सत्त्वात्तेनैव सिद्धे प्रपञ्चार्थमिदम्। पादस्य पदाज्यातिगोपहतेषु (६-३-५२) आज्यादिषूत्तरपदेषु पादस्य पद् इत्यन्तादेशः स्यात्। पादाभ्यामजतीति-पदाजिः। पादाभ्यामततीति-पदातिः। अज्यतिभ्यांपादेचेतीणप्रत्ययः। अजेर्व्यघञपोरित्यजेर्वीभावाभावो निपातनात्। पादाभ्यां गच्छतीति-पदगः। गमश्चेति डः। पादाभ्यामुपहतः-पदोपहतः। पद्यत्यतदर्थे (६-३-५३) पादस्य पत्स्यात् अतदर्थे यति परे। पादौ विध्यन्तीति पद्याः-शर्कराः। तदर्थे तु न-पादार्थमुदकं-पाद्यम्। पादार्घाभ्यां चेति यत्। इके चरतावुपसंख्यानम् (वा) पदाभ्यां चरतीति-पदिकः पर्पादित्वात्ष्ठन्। हिमकाषिहतिषु च (६-३-५४) एषु पादस्य पदित्यादेशः स्यात्। पादस्य हिमं-पद्धिमम्। पादौ कषतीति-पत्काषी। सुप्यजाताविति णिनिः। हन्यते इति हतिः, कर्मणि क्तिन् पादाभ्यां हतिः-पद्धतिः (मार्गः) कर्तृकरण इति समासः। ऋचः शे (६-३-५५) ऋचः पादस्य पत्स्यात् शे परे। गायत्रीं पच्छः (पाद पादं) शंसति। अनृचि तु न-पादशः कार्षापणं ददाति। वा घोषमिश्रशब्देषु (६-३-५६) घोषादिषु परेषु पादस्य पद्वा स्यात्। पादस्य घोषः-पद्घोषः, पादघोषः। पादेन मिश्रः-पन्मिश्रः, पादमिश्रः। पादस्य शब्दः-पच्छब्दः, पादशब्दः। निष्केचेति वाच्यम् (वा) पादरूपो निष्कः-पन्निष्कः, पादनिष्कः। उदकस्योदः संज्ञायाम् (६-३-५७) उदकस्योदादेशः स्यादुत्तरपदे संज्ञायाम्। उदमेघः। उदवाहः (संज्ञाविशेषौ)। उत्तरपदस्य चेति वक्तव्यम् (वा) क्षीरमुदकं यस्य सः-क्षीरोदः। लोहितोदः। क्षारोदः। घृतोदः (समुद्रविशेषाणां संज्ञा)। क्षीरोदं सर इत्यसंज्ञात्वादसाध्वेव। पेषंवासवाहनधिषु च (६-३-५८) एषूत्तरपदेषु उदकस्य उद इत्यादेशः स्यात्। असंज्ञार्थं वचनम्। उदपेषं पिनष्टि (उदकेन पिनष्टि)। स्नेहनेपिष इति णमुलि कषादिष्विति अनुप्रयोगः। उदकस्य वासः-उदवासः। उदकस्य (वाहनः) वाहकः, उदवाहनः। उदकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धीयतेऽस्मिन्निति-उदधिः घटः। समुद्रे तु पूर्वेण सिद्धिः। एकहलादौ पूरयितव्येऽन्यतरस्याम् (६-३-५९) एक (असंयुक्तम्) हलादौ पूरयितव्यवाचिन्युत्तरपदे उदकस्य उद आदेशो वा स्यात्। उदकस्य कुम्भः-उदकुम्भः, उदककुम्भः। उदपात्रम्, उदकपात्रम्, एकहलोऽभावान्नेह-उदकस्था... पूरयितव्याभावान्नेह-उदकराशिः। मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहेषु च (६-३-६०) एषूत्तरपदेषु उदकस्य उदादेशो वा स्यात्। उदकमिश्रो मन्थः (द्रवद्रव्य संपृक्त सक्तुः)-उदमन्थः, उदकमन्थः। उदकमिश्र ओदनः-उदौदनः उदकौदनः। उदकस्य बिन्दुः-उदबिन्दुः, उदकबिन्दुः। उद... बिभर्तीति-उदभारः, उदकभारः। उदकस्य वीवधः (उभयतः शिक्यं स्कन्धवाह्यं काष्ठम्) उदवीवधः, उदकवीवधः। उदकं गाहते (प्रविशति) इति-उदगाहः, उदकगाहः। एवं उदसक्तुः, उदकसक्तुः। उदवज्रः, उदकवज्रः। उदहारः, उदकहारः। सहस्य सः संज्ञायाम् (६-३-...) सहस्य सः स्यादुत्तरपदे परे संज्ञायाम्। सपलासम्। तेनसहेति बहुव्रीहौ, वोपसर्जनस्येतिवा... ऽनेन सादेशः। संज्ञाभावात्सहयुध्वेत्यादौ नास्य प्रवृत्तिः। ग्रन्थान्ताधिके च (६-३-७९) ग्रन्था... ऽधिके चार्थे वर्तमानस्य सहस्य सः स्यादुत्तरपदे। मुहूर्तग्रन्थपर्यन्तं—समुहूर्तं ज्योतिषम्... अन्तवचनेऽव्ययीभावः। द्रोणादधिका—सद्रोणा खारी। मयूरव्यंसकादित्वादधिकार्थसह... समासः। समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु (६-३-८४) अत्र समानस्येति योगविभागाल्... क्वचित्समानस्य सादेशः। समानः-पक्षो यस्य सः-सपक्षः। समानो धर्मो यस्य सः-सधर्मा। ... दनिजित्यनिच्। समाना जातिर्यस्य सः-सजातिः। एवं सपिण्डः। ज्योतिर्जनपद-रात्रि-नाभि-नाम... रूप-स्थान-वर्ण-वयोवचन-बन्धुषु (६-३८५) एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्। समानं ज्योति... र्यस्य सः—सज्योतिः। एवं सजनपदः। सरात्रिः। सनाभिः (सपिण्डः)। सनामा। सगोत्रः। स... सस्थानः। सवर्णः। सवयाः। सवचनः। सबन्धुः। चरणे ब्रह्मचारिणि (६-३-८६) ब्रह्मचारिण्यु... समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने। चरणः शाखा। ब्रह्म वेदस्तदध्ययनार्थं व्रतमपि... तच्चरतीति—ब्रह्मचारी। समानो ब्रह्मचारी-सब्रह्मचारी। तीर्थे ये (६-३-८७) तीर्थे उत्तरपदे... प्रत्यये विवक्षिते समानस्य सः स्यात्। समाने तीर्थे (गुरौ) वासीत्यर्थे समानतीर्थशब्दयोः स... समानस्य सादेशे सतीर्थशब्दात्समानतीर्थेवासीति 'यत्प्रत्यये यस्येतिचेत्यकारलोपे-सती... (एकगुरुकः)। विभाषोदरे (६-३-८८) उदरशब्दे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य स... स्यात्। समाने उदरे शयित इत्यर्थे समानोदरयोः समासे विकल्पेन सादेशे सोदराद्य इति य... अकारलोपे-सोदर्यः। सादेशाभावे समानोदरे शयित इति यत्प्रत्यये—समानोदर्यः। दृग्दृश... (६-३-८९) समानस्य सः स्यात् दृग्दृशवतुषु। समानो दृश्यत इत्यर्थे समानान्ययोश्चेति क्विपि क... समानस्य सादेशे-सदृक्, सदृशः। दृक्षे चेति वक्तव्यम् (वा) क्सोपिवाच्य इति दृशेः क्से ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदृक्षः। इदंकिमोरीश्की (६-३-९०) इदम्किम्शब्दयोः क्रमादीश्की एतावादेशौ स्तः दृग्दृशवतुषु। दृक्षे चेति वक्तव्यम् (वा) इदमिव दृश्यते ईदृक्, ईदृशः, इयान्, ईदृक्षः। किमिव दृश्यते-कीदृक्, कीदृशः, कियान्, कीदृक्षः। आ सर्वनाम्न (६-३-९१) सर्वनाम्न आकारोन्ता देशः स्यात् दृग्दृशवतुषु। दृक्षे चेति वक्तव्यम् (वा) तदिव दृश्यते-तादृक्, तादृशः, तावान्, तादृक्षः। एवं यद्-यादृक्, यादृशः। यावान्, यादृक्षः। एवं यादृक् एतादृक्, एतादृशः, एतावान्, एतादृक्षः। युष्मद्-युष्मादृक्, युष्मादृशः, युष्मादृक्षः; त्वादृक्, त्वादृशः, त्वादृक्षः। अस्मद्-अस्मादृक्, अस्मादृशः; अस्मादृक्षः। अदस्-दीर्घे उत्वे मत्वे च-अमूदृक्, अमूदृशः, अमूदृक्षः। भवत्-भवादृक्, भावादृशः, भवादृक्षः। कोः कत्तत्पुरुषे च (६-३-१०१) कुशब्दस्य कदादेशः स्यात्तत्पुरुषे अजादावुत्तरपदे। कुत्सितोऽश्वः-कदश्वः। कुत्सितमन्नं-कदन्नम्। एवं कदुष्ट्रः, कदजः। अचीत्युक्तेर्नेह-कुपुरुषः। त्रौ च (वा) कुत्सितास्त्रयः-कत्त्रयः। रथवदयोश्च (६-३-१०२) एतयोरुत्तरपदयोः परयोः कोः कदादेशः स्यात्। कुत्सितो रथः-कद्रथः। कुत्सितो वदः-(वक्ता) कद्वदः। तृणे च जातौ (६-३-१०३) तृणे उत्तरपदे कोः कदादेशः स्याज्जातौ वाच्यायाम्। कुत्सितं तृणं-कत्तृणम् (तृणजातिविशेषः)। कापथ्यक्षयोः (६-३-१०४) अनयोरुत्तरपदयोः कोः का-इत्यादेशः स्यात्। कुत्सितः पन्था:-कापथम्। ऋक्पूरब्धू रित्यप्, पथःसंख्याव्ययादेरिति क्लीबत्वम्। कुत्सितमक्षः, कुत्सितमक्षि यस्येति वा-काक्षः। अक्षशब्देन सह कर्मधारयः, अक्षिशब्देन सह बहुव्रीहौसक्थ्यक्ष्णोरिति षच्। इषदर्थे (६-३-१०४) ईषदर्थे वर्तमानस्य को का इत्यादेशः स्यात्। ईषज्जलं-काजलम्। ईषदम्लं-काम्लम्। विभाषा पुरुषे (६-३-१०६) पुरुषशब्दे परे कोः कादेशो वा स्यात्। कुत्सितः पुरुषः-कापुरुषः, कुपुरुषः। अप्राप्तविभाषेयम्। ईषदर्थे तु पूर्वविप्रतिषेधान्नित्यमेव। ईषत्पुरुषः-कापुरुषः। कवं चोष्णे (६-३-१०७); उष्णशब्दे परे कोः कवादेशः का च वा स्यात्। पक्षे कदादेशोपि। ईषदुष्णम्-कवोष्णं, कोष्णं, कदुष्णम्। पृषोदरादीनि यथोपदिष्टम् (६-३-१०८) पृषोदरादीनि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः। पृषदुदरं-पृषोदरम्। (तलोपः)। वारि वाहको-वलाहकः (पूर्वपदस्य वः उत्तरपदादेश्च लः)। जीवनस्य मूतः-जीमूतः। (वनशब्दलोपः)। शवानां शयनं-श्मशानम् (शवस्य श्मादेशः शयनस्य-शानादेशः)। ऊर्ध्वं ख मस्य-उलूखलम् (ऊर्ध्वखशब्दयोरुलूखलादेशौ)। दिक्छब्देभ्यस्तीरस्य तारभावो वा (वा) दक्षिणतारं, दक्षिणतीरम्। ब्रुवन्तोऽस्यां सीदन्तीति-वृसी। ब्रुवच्छब्दस्य वृ आदेशः सदे रधिकरणे डट्। एवमन्येपि मयूराश्वत्थकपित्थप्रभृतयः। आकृतिगणोऽयम्।

वि. येषु शब्दविषयेषु लोपागमवर्णविकारा विध्यन्तरविहिता न दृश्यन्ते तथाविधाः शिष्टव्यवहृताः पृषोदरादिषु पठिता साधनीया भवन्ति। उक्तंच-भवेद्वर्णागमाद्धंसः सिंहोवर्णविपर्ययात्। गूढोत्मावर्णविकृतेर्वर्णनाशात्पृषोदरम्॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्णागमो वर्णविपर्ययश्च द्वौचापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योग स्तदुच्यते पञ्चविधं निरुक्तम् तेनेदृशेषु यथार्हं वर्णागमादयः स्वयं कल्पनीया भवन्ति। शिष्टानां व्यवहारोत्र प्रमाणम्। शिष्टास्तु निवासतश्चाचा सचाचार आर्यावर्त एव, कः पुनरार्यावर्तः। "प्रागादर्शात्प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम्, एत न्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण (दृष्टकारणंविनैव) कस्य द्विद्यायाः पारङ्गतास्तत्र भवन्तः शिष्टाः, इति-भाष्यकृता निरूपिताः। आदर्शः कुरुक्षेत्रे पर्वतः, कालकवनं कालका शि इति ख्यातम्। पारियात्रं दक्षिणहैदराबादप्रदेशो विन्ध्यसमीपस्थः पर्वतः, आदर्शादयः पर्वतविशेषाः" इति कैय आदर्शः कुरुक्षेत्रे पर्वतः। कालकवनं प्रयागः। पारियात्रो विन्धस्येति मनूक्तमध्यदेश एवात्र भगवतोऽभिप्रेत इत्य इत्युद्योतकारः।

मुमाद्यागमाः—

अरुर्द्विषदजन्तस्य मुम् (६-३-६७) अरुर्द्विषतोरजन्तस्य च खिदन्त उत्तरपदे मुमागमः स्याद यस्य। अरुन्तुदतीति अरुन्तुदः(मर्मपीडकः) द्विषतस्तपतीति-द्विषन्तपः। आत्मानं कालीं मन्यते कालिमन्या। ई च एकाचोऽम्प्रत्ययवच्च (६-३-६८) इगन्तस्यैकाचः खिदन्त उत्तरपदे अमागमः स म्प्रत्यय (द्वितीयैकवचन) वच्च भवति। गां मन्यते इति-गांमन्यः। एवं स्त्रियंमन्यः, श्रियं भुवंमन्यः। अम्प्रत्ययवदित्यतिदेशादात्वपूर्वसवर्णगुणेयङुवङादेशाः। वाचंयमपुरन्दरौ च (६-३ एतौ निपात्येते। वाचं यच्छति इति-वाचंयमः (मौनी)। पुरं दारयतीति–पुरन्दरः (इन्द्रः)। सत्यागदस्य (६-३-७०) कारशब्दे उत्तरपदे सत्यागदयोर्मुमागमःस्यात्। सत्यस्य कारः (क सत्यं करोतीति वा–सत्यङ्कारः। मुमोऽनुस्वारपरसवर्णौ। अगदस्य (रोगाभावस्य) कारः, करोतीति वा-अगदङ्कारः। अस्तोश्चेति वक्तव्यम् (वा) अस्तु इति कारः-अस्तुङ्कारः। धेनोर्भव्या (वा) धेनुंभव्या (भविष्यन्तीधेनुः)। मयूरव्यंसकादित्वाद्भव्याशब्दस्य परनिपातः। लोकस्य (वा) लोकं पृणातीति-लोकम्पृणः (लोकप्रीणकः) पृण इति मूलविभुजादित्वात्कः गिलेऽगिलस्य तिमिं (मत्स्यविशेषं) गिलतीति-तिमिङ्गिलः (मत्स्यविशेषः) गिलगिलेच (वा) तिमिङ्गिलं गिलत तिमिङ्गिलगिलः। (मत्यविशेषः)। उष्णाभद्रयो करणे (वा) उष्णस्य करणम्-उष्णङ्करणम्। भ करणंभद्रङ्करणम्। श्येनतिलस्य पाते ञे (६-३-७१) श्येनतिलयोः पातशब्दे उत्तरपदे ञप्रत्यये मुम स्यात्। श्येनस्य पातोऽस्यामिति–श्यैनम्पाता (क्रीडा)। तैलस्य पातोऽस्यामिति-तैल (क्रीडा) ञोऽभावेतु न-श्येनपातः, तैलपातः। रात्रेः कृति विभाषा (६-३-७२) कृदन्त उत रात्रेर्मुम् वा स्यात्। रात्रौ चरतीति-रात्रिञ्चरः रात्रिचरः। सुप्युपपदे चरेष्टः उपपदसम अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशाऽऽस्थाऽऽस्थितोत्सुकोतिकारकरागच्छेषु (६-३-६६) अ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयास्थस्य अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु। अन्या आशी-अन्यदाशीः, अन्या आशा-अन्यदाशा। एवम्-अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यत्कारकः। अन्यद्रागः। अन्यदीयः। अषष्ठीतृतीयास्थस्येत्युक्तेर्नेह-अन्येन आशीः-अन्याशीः। अन्यस्य आशा-अन्याशा। कारके छे च नायं निषेधः (वा) अन्यस्य कारकम्-अन्यत्कारकम्। अन्यस्यायमन्यदीयः। अर्थे विभाषा (६-३-१००) अर्थशब्दे उत्तरपदे अन्यशब्दस्य दुगागमो वा स्यात्। अन्यदर्थः, अन्यार्थः। गोष्पदं सेवितासेवितप्रमाणेषु (६-१-१४५) गोष्पदमिति सुट् षत्वं च निपात्यते-सेविते ऽसेविते ऽ प्रमाणे च विषये। गावः पद्यन्ते यस्मिन्स गोभिः सेवितो देशः-गोष्पदः। असेविते-अगोष्पदानि अरण्यानि। प्रमाणे-गोष्पदमात्रं क्षेत्रम्। गोष्पदपूरं वृष्टो देवः। अन्यत्र तु-गोःपदं-गोपदम्। आस्पदं प्रतिष्ठायाम् (६-१-१४६) आत्मयापनाय (शरीरसंरक्षणाय) स्थानं प्रतिष्ठा। अत्र आस्पदमिति सुट् निपात्यते। आस्पदम्। आश्चर्यमनित्ये (६-१-१४७) अनित्यत्वमद्भुतत्वम्। तत्र आश्चर्यमिति सुट् निपात्यते। आश्चर्यं यदि स भुञ्जीत। विष्किरः शकुनौ वा (६-१-१५०) शकुनौ वाच्ये विष्कर इति सुड्वा निपात्यते। विकिरतीति-विष्किरः, विकिरः (पक्षी) मस्करमस्करिणौ वेणुपरिव्राजकयोः (६-१-१५४) अनयोः सुट् निपात्यते। क्रमाद्वेणुपरिव्राजकयोरभिधेययोः। मस्करः (वेणुः), मस्करी (परिव्राजकः)। अन्यत्र तु-मकरः (ग्राहः), मकरी (समुद्रः)। पारस्करप्रभृतीनि च संज्ञायाम् (६-१-१५७) पारस्करादीनि ससुट्कानि निपात्यन्ते संज्ञायाम्। पारस्करः (देशविशेषः)। किष्कुः (परिमाणविशेषः)। किष्किन्धा (गुहाविशेषः)। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च (ग) करपत्योः परयोस्तद्बृहतोः सुट् तलोपश्च चोरदेवतयोरभिधेययोः। तत् (चौर्यं करोतीति तस्करः (चौरः)। बृहत्या (वाचः) पतिः बृहस्पतिः। कुक्कुट्यादीनामिति पुंवद्भावोपि। प्रायस्य चित्तिचित्तयोः (ग) प्रायश्चित्तिः, प्रायश्चित्तम्। पारस्करादिराकृतिगणः। वनस्पतिः। परश्शतानि कार्याणि। परःसहस्रम्।

टि. १ वर्चस्केऽवस्करः (६-१-१४८) वर्चस्कमन्नमलं तत्र वाच्ये अवस्कर इति सुट् निपात्यते। अवस्करः। अपस्करो रथाङ्गम् (६-१-१४९) रथाङ्गे वाच्ये अपस्कर इति सुट् निपात्यते। अपस्करः (रथचक्रम्)। प्रतिष्कशश्च कशेः (६-१-१५२) सुट् निपात्यते। सहायः पुरोयायी वा प्रतिष्कशः। ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः। प्रस्कण्वहरिश्चन्द्रावृषी (६-१-१५३) अनयोः सुट् निपात्यते ऋषौ वाच्ये। प्रस्कण्वः हरिश्चन्द्रः। अन्यत्र हरिचन्द्रः।

टि. २ विष्किर इति सूत्रे विष्किरः शकुनिर्विकिरो वेति पाठमादाय वा ग्रहणेनैव सुड्विकल्पे सिद्धे विकिरग्रहणमनयोः शकुनेरन्यत्र प्रयोगोमाभूदित्यर्थमिति वृत्तिकृतोक्तं न युक्तम्, भाष्ये तथापाठस्य परिहारात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्वणत्वे—

अपदान्तस्य मूर्धन्यः (८-३-५५) इण्कोः (८-३-५७) नुम्विसर्जनीयशर्व्यवायेऽपि (८-३-५८) आदे
प्रत्यययोः (८-३-५९) इमानि पूर्वमुक्तानि। समासेऽङ्गुलेः सङ्गः (८-३-८०) अङ्गुलिशब्दात्परस्य सङ्ग
सस्य मूर्धन्यः (षत्वं) स्यात्समासे। अङ्गुलेः सङ्गः—अङ्गुलिषङ्गः। भीरोः स्थानम् (८-३-८१) भी
शब्दादुत्तरस्य स्थानस्य सस्य षत्वं स्यात्समासे। भीरोः स्थानं–भीरुष्ठानम्। अग्नेः स्तुत्स्तो
सोमाः (८-३-८२) अग्नेः परस्यैषां सस्य षत्वं स्यात्। अग्निष्टोमः (यागः)। अग्निषोमः। ज्योतिरायु
स्तोमः (८-३-८३) आभ्यां परस्य सस्य षत्वं स्यात्समासे। ज्योतिष्टोमः (सोमयागः) आयुष्टोमः (याग)।
मातृपितृभ्यां स्वसा (८-३-८४) आभ्यां परस्य स्वसृसकारस्य षत्वं स्यात्। मातृष्वसा, पितृष्व
मातुःपितुर्भ्यामन्यतरस्याम् (८-३-८५) आभ्यां परस्य स्वसृसकारस्य षत्वं वा स्यात्समासे। मा
ष्वसा, मातुःस्वसा। पितुःष्वसा, पितुःस्वसा। असमासे तु–मातुः स्वसा, पितुः स्व
रषाभ्यां नो णः समानपदे (८-४-१) अट्कुप्वाङ्नुम्व्यवायेऽपि (८-४-२) पूर्वमुक्तम्। पूर्वपदात्संज्ञा
मगः (८-४-३) गकारवर्जितपूर्वपदस्थान्निमित्तात्परस्य नस्य णत्वं स्यात्संज्ञायाम्। खरणसः
णखा। वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः (८-४-४) पूर्वेण सिद्धे नियमार्थमिदम्। ए
एव पूर्वपदेभ्य उत्तरस्य वननकारस्य णत्वं स्यात्संज्ञायाम्। पुरगावणम्। मिश्रकावणम्। सिध्र
वणम्। शारिकावणम्। कोटरावणम्। अग्रेवणम्। राजदन्तादिषु निपातनात्पौर्वापर्यं सप्त
अलुक्। प्राचीनवनविशेषाणां संज्ञाः। एभ्य एवेति नियमान्नेह–असिपत्रवनम् (नरकविशे
वृन्दावनम्। प्र-निर-न्तः-शरे-क्षु-प्लक्षा-म्र-कार्ष्य-खदिर-पीयूक्षाभ्योऽसंज्ञायामपि (८-४-५) एभ्य
रस्य वननकारस्य णत्वं स्यादसंज्ञायामपि। प्रवणम्, (वनम्)। निर्वणम् (वनरहितम्) अन्तर्व
(वनमध्ये) शरवणम्, इक्षुवणम्, प्लक्षवणम्, आम्रवणम्, कार्ष्यवणम्, खदिरव
पीयूक्षावणम्। विभाषौषधिवनस्पतिभ्यः (८-४-६) एभ्यो वनस्य णत्वं वा स्यात्। दूर्वाव
दूर्वावनम्। शिरीषवणम्, शिरीषवनम्। बदरीवणम्, बदरीवनम्। द्व्यच्त्र्यज्भ्यामेव (वा) दे
देवदारुवनम्, भद्रदारुवनम्। अह्नोदन्तात् (८-४-७) अदन्तपूर्वपदस्थान्निमित्तात्परस्याह्नो न
णत्वं स्यात्। पूर्वाह्णः। अपराह्णः। प्रातिपदिकान्तनुम्विभक्तिषु च (८-४-११) पूर्वपदस्थ निमि
त्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णत्वं वा स्यात्। प्रातिपदिकान्ते-माषवापि
माषवापिनौ, नुमि-माषवापाणि, माषवापानि। विभक्तौ-माषवापेण, माषवापेन। उत्तरपदं यत्प्रा
दिकं तदन्तस्यैव (नस्य) णत्वम् (वा) नेह–गर्गाणां भगिनी–गर्गभगिनी। युवादेर्न (वा) आर्यू

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षत्रिययूना। परिपक्वानि। दीर्घाह्नी शरत्। एकाजुत्तरपदे णः (८-४-१२) पूर्वमुक्तम्। वृत्रहणौ, क्षीरपाणि, क्षीरपेण। कुमति च (८-४-१३) कवर्गवत्युत्तरपदे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णत्वं स्यात्। स्वर्गकामिणौ। वस्त्रयुगाणि। स्वरयुगेण। सर्वाङ्गीणः। सर्वाङ्गाणि। पदव्यवायेपि (८-४-३८) पदेन व्यवधाने णत्वं न स्यात्। चतुरङ्गयोगेन। माषकुम्भवापेन। अतद्धित इति वाच्यम् (वा)। आर्द्रगोमयेण। शुष्कगोमयेण।

वि. १ वाहनमाहितात् (८-४-८) आहितवाचि पूर्वपदस्थान्निमित्तादुत्तरस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणम्। दर्भवाहणम्। आरोप्य यदुह्यते तदाहितम्। इक्ष्वादीनि वाहनाय परैरारोप्यन्ते न तु स्वयमेवारोढुं शक्नुवन्तित्याहितानि। तेन नेह-इन्द्रवाहनम्। पानं देशे (८-४-९) पूर्वपदस्थान्निमित्तादुत्तरस्य नस्य णत्वं स्याद्देशे गम्ये। क्षीरं पानं येषान्ते—क्षीरपाणाः उशीनराः। सुरापाणाः प्राच्याः। वा भावकरणयोः (८-४-१०) भावकरणार्थकपानशब्दस्य पूर्वपदस्थनिमित्तादुत्तरस्य नस्य णत्वं वा स्यात्। क्षीरस्य पानं—क्षीरपाणम्, क्षीरपानम्। सुरायाः पानं—सुरापाणम्, सुरापानम्। करणे-क्षीरपाणः कंसः (पानपात्रम्), क्षीरपानः। गिरिनद्यादीनां वा (वा) गिरेर्नदी—गिरिणदी, गिरिनदी। चक्रणदी, चक्रनदी।

वि. २ षत्वणत्वविषयः प्रकरणान्तरेष्वपि तत्र तत्रोक्ताः, समासोपयोगिन इहोक्ताः अनुसन्धेयाः।

प्रयोगाः—प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते। आसीत्परीवादनवावतारः। यमस्वसुश्चित्र इवोदभारः। न गङ्गदत्तः पुनरेति कूपम्। पत्तिः पदाति रथिनं रथीशः। श्वापदानां निवासः। कदन्नं कोद्रवो मतः। पक्वेष्टकचितं गृहम्। नगरी पुष्करावती। उदपेषं पिनष्टि। उदसङ्क्षारो जपेत्। सर्वे शकुनयो भक्ष्या विष्किराः कुक्कुटादृते। विदुषिब्रुवा कथम्। परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः। अचेष्टताष्टापदभूमिरेणुः। श्वावित्तु शल्यः श्यैनम्पाते क्रीडिते मोदमानाः। अये पादशब्द इव श्रूयते। पूर्वाह्णो वै देवानामपराह्णः पितृणाम्। सपिण्डास्तु सनाभयः। दन्तावलानां बलम्। कवोष्णमुपभुञ्जते। आम्रवणे कोकिलवासः।

कारिका—

समासभेदादर्थस्य विशेषोपि क्वचिन्मतः।
समस्तयोः समासेन पददैर्घ्यं च जायते ॥५५॥

(क) तयोरेव पदयोः समासभेदेनार्थभेदः समासभेदाल्लिङ्गवचनविकारादिविशेषा अपि क्वचिद्भवन्ति। यथा-नीलं च तदुत्पलं-नीलोत्पलं (कर्म) नीलमुत्पल येषु ते नीलोत्पलास्तडागाः (बहु)। महच्च तत्कृत्यं महाकृत्यम् (कर्म), महतां कृत्यं महत्कृत्यम् (तत्पु), महत्कृत्यं येषान्ते-महाकृत्याः (बहु)। जनस्याभावो निर्जनम् (अव्य), निर्गता जना यस्मात्सः-निर्जनोदेशः (बहु)। धर्मस्याभावः-अधर्मम् (अव्य), नधर्मः अधर्मः (तत्), नविद्यते धर्मो यस्यसः-अधर्माः (बहु)। एवमन्यत्रापि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ख) समासयोग्यानां बहुपदानां युगपत्समासो द्वन्द्वबहुव्रीह्योरेव अन्यत्र तु प्रायः पदद्वयस्यैव परस्परैकार्थीभावेन द्वयोर्द्वयोः पदयोः समासेनैकपदीभावे सति तथाविधेनसामान्येन वा पदान्तरेण सह पुनः समासे समस्तसमासेन पदस्य-दीर्घ-दीर्घतर-दीर्घतम -त्वमपि निष्पद्यते, यथा-विक्रमेणोपार्जिता-विक्रमोपार्जिता, प्रभूता चासौ सम्पत्-प्रभूतसम्पत्, विक्रमोपार्जिता प्रभूतसम्पद्येन सः–विक्रमोपार्जितप्रभूतसम्पत् पुरुषः। कर्पूरस्य परागः–कर्पूरपरागः, समूढश्चासौ कर्पूरपरागः-समूढकर्पूरपरागः, समूढकर्पूरपराग इव पाण्डुरः–समूढकर्पूरपरागपाण्डुरः। महांश्चासौ यज्ञः-महायज्ञः, महायज्ञस्य समारम्भः–महायज्ञसमारम्भः, कृतः, महायज्ञसमारम्भो येन सः-कृतमहायज्ञसमारम्भः। एवं निज-भुज-बल-विदलित-वीर-वैरि-वर्गः। अपराय-पराय्यपूर्णा-पण्य-शोभिता नगरी। शाल-ताल-तमाल-तरुमाला-सङ्कुलं वनम्। हरि हर-प्रमुख-वृन्दारक वृन्द-वन्दित-पादारविन्दो महादेवः। सतत-धृत-शर-चाप-भीषण-भुज -युगलः।

समासान्तः प्रधानांश एवान्यस्य मतोऽन्वयः।
कारकादेस्त्वेकदेशेप्यन्वयः क्वचिदिष्यते ॥५६॥

(क) समासे पदान्तरस्य समस्तशब्दप्रधानांश एवान्वयो नत्वेकदेशे गुणभूतांशे। यथा-श्वेतो ब्राह्मणकम्बल इत्यत्र तत्पुरुषस्य प्रधानांशे उत्तरपदार्थे कम्बल एव श्वेतपदार्थस्यान्वयो नतु गुणे ब्राह्मणे। एवं महान्तौ धवखदिरावित्यत्रेतरेतरद्वन्द्वे प्रधानयोर्द्वयोर्धवखदिरयोर्महत्वस्य, दग्धा अर्धपिप्पलीत्यत्र प्रधाने पूर्वपदार्थेऽर्धे दग्धत्वस्य, दयालुः पीताम्बर इत्यत्र प्रधानेऽन्यपदार्थे हरौ दयालुत्वस्य सम्बन्धः। एवं पदान्तरस्य समासेन योगेपि येन सह यस्य योगस्तेनैव सह तस्य समासो भवति। यथा श्वेतब्राह्मणकम्बल इत्यत्र श्वेतश्चासौ ब्राह्मणःश्वेतब्राह्मण, श्वेतब्राह्मणस्य कम्बलः-श्वेतब्राह्मणकम्बल इति समासे ब्राह्मणे श्वेतत्वस्यान्वयः प्रतीयते। एवं च ऋद्धस्य राज्ञो मातङ्ग इत्यर्थे ऋद्धस्य राजमातङ्ग इति न प्रयोगः, तत्पुरुषैकदेशे राज्ञि ऋद्धस्यान्वयाभावात्। तथा विवक्षायां ऋद्धश्चासौ राजा-ऋद्धराजः, ऋद्धराजस्य मातङ्गः-ऋद्धराजमातङ्ग इति समस्तः, ऋद्धराजस्य मातङ्ग इति व्यस्तो वा प्रयोगः। एवमन्यत्राप्यूह्यम्।

(ख) कारकाणां तु व्यस्तानां समस्तानां वा गुणभूतायामपि क्रियायामन्वयो भवति। यथा-शातितानि पत्राणि यस्य सः–शातितपत्रक, शरैः शातितपत्रकः, इति व्यस्ते, शरशातितपत्रक इति समस्ते प्रयोगे विशेषणीभूतायामपि शातनक्रियायां करणस्यशरस्यान्वयो भवति। एवं दरिद्रेभ्यो दत्तधनः, हस्तात्पतितपुस्तकश्छात्रः। समये कृतकार्यो जनः, वस्त्रेणावृताङ्गः, गुरुणा दत्तपाठः शिष्य इति व्यस्ताः। दरिद्रदत्तधनः। हस्तपतितपुस्तकः, समयकृतकार्यः, वस्त्रावृताङ्गः, गुरुदत्तपाठ इतिसमस्ताश्चप्रयोगास्त्वेष्वेवार्थेषु भवन्ति। एवं क्वचित्सम्बन्धिसापेक्षशब्दस्थले भेदकस्य षष्ठ्यन्तस्य अपि समानैकदेशेऽन्वयो भवति। यथाचैत्रस्यगुरुकुलमित्यत्र चैत्रस्य यो गुरुस्तस्य कुलम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बोधः, न तु चैत्रस्य कुलमितिबोधः। चैत्रस्य दौहित्रः इत्यादावपि चैत्रस्य या दुहिता तस्याः पुत्र इत्यर्थे चैत्रदौहित्र इति समासः। एवं चैत्रस्य-नप्ता (पुत्रपुत्रः) पितृस्वसा, मातृस्वसा, पैतृस्वस्रेय इत्यादावपि पुत्रपितृमात्रादावेकदेशे चैत्रस्यसम्बन्धिशब्दार्थस्यान्वयः। एष विषयस्तथाप्रयोगदर्शने ऊह्यो नतु स्तथा प्रयोगःकल्पनीयः। उक्तञ्च–प्रतियोगीपदादन्यद्यदन्यत्कारकादपि। वृत्तिशब्दैकदेशार्थे न तस्यान्वय इष्यते॥ इतिशब्दशक्तौ।

सापेक्षत्वेप्येकदेशान्वयेनार्थावबोधने।
समास इष्यते क्वापि शिवभागवतादिवत् ॥५७॥

शिवभागवतमित्यत्र शिवश्चासौ भगवान् शिवभगवान्, शिवभगवत इदमिति विग्रहे एकदेशान्वयाभावेपि समुदायादिदमर्थेऽणि शैवभागवतमित्यापत्तेः,भगवत इदं-भागवतं, शिवस्य भागवतं-शिवभागवतमिति विग्रहे एकदेशे भगवतिशिवस्याभेदेनान्वयावबोधात्समास इष्यते। एवं देव्या भगवत्या इदं, विष्णोर्भगवत इदमित्यर्थे देव्या भागवतं-देवीभागवतं, विष्णो र्भागवतं–विष्णुभागवतम्। एवमन्यत्रापि क्वचिदेकार्थीभावस्यासौकर्येपि समासदर्शने-शिवभागवत्समासः। सापेक्षत्वेपि गमकत्वात्समासः, इति च व्याख्याकृद्भिरुपपाद्यते। शिष्टप्रयोगदर्शने साधुत्वार्थमेषोपपत्तिः कल्प्या।

क्वचिल्लक्ष्यार्थमादाय सामर्थ्येपि समस्तता।
तथा विधेषुसंक्षेपादन्यथावापि विग्रहः ॥५८॥

क्वचिल्लक्षणालभ्यार्थमादाय सामर्थ्यं विवक्षित्वापि समासो भवति, तथाविधस्थले वास्तविकविग्रहं संक्षिप्यान्यथापि विग्रहः क्रियते। यथा मृगस्य लोचने इव लोचने यस्या सा मृगलोचना नारी इत्यत्र मृगपदं मृगलोचने लाक्षणिकम्, तत्र संक्षिप्य मृगस्येव लोचने यस्या सेत्यपि विग्रहः क्रियते। अत्रालौकिकविग्रहस्तु मृग-औ-लोचन-औ इति, एवं गजेन्द्रगतिः, गजाननः, भल्लूकाक्षः, गृद्ध्रदृष्टिः, व्याघ्रपाद्, विडालव्रतः, इत्यादि।

पृषोदरादिकल्पेन विकृतानां परिग्रहः।
शाकपार्थिवकल्पेन पूरणीयार्थसंग्रहः ॥५६॥

क्वचिन्निर्दिष्टनियमैरसङ्गृहीतानां विकृतसमस्तशब्दानां दर्शने पृषोदरादिगणेनुप्रवेशेन यथार्हं विकारं कल्पयित्वा साधुत्वमुपपादनीयं भवति। यथा मह्यां रौतीति मयूरः। नश्वस्तिष्ठतीति-अश्वत्थः। ईदृशेषुपृषोदरादित्वात्साधुरित्युच्यते विवृतिकृद्भिः। क्वचित्परस्परमनन्वितयोरपि समासदर्शने मध्यपूरणीयार्थकशब्दलोपं मत्वा शाकपार्थिवादित्वात्समास उपपाद्यो भवति। यथा-शान्तिकारकं युद्धं—शान्तियुद्धम्। कपोलोत्पादिता कल्पना-कपोलकल्पना। ग्रन्थिभेदकश्चौरः-ग्रन्थिचौरः। धर्मादनपेतं युद्धं—धर्मयुद्धम्। न्यायपालक आलयः-न्यायालयः। पाठदायिनी शाला-पाठशाला। बकसदृशो वैष्णवः। बकवैष्णवः(एषुउपमितसमासेपूर्वोत्तरवैपरीत्यापत्तिः)।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रश्नाः—

समासः कतिविधः। समासानामवान्तरभेदाः के। विग्रहः कः कतिविधश्च। समस्तशब्देषु लिङ्गवचनव्य... कीदृशी। कः समासः किम्प्रधानः। समासे पूर्वप्रयोगनियमः कीदृशः। आहिताग्न्यादौ, राजदन्तादौ च को वि... प्रकृतौ सकारादेशः कः।

अधस्तनपदान्युपादाय समस्तशब्दान्निष्पादय—

महत्, एक, सह, समान, नञ्, भुक्त, दृष्ट, धृत, रीति, देव, वनस्पति, ज्योतिस्, धर्म, विद्या, ... दण्ड, जन, यथा, दया, कृत, निर्, चतुर, शत, उप, अति, स्थूल।

अधस्तनवाक्यगतान्समासाँस्तद्गतविशेषांश्च निरूपय—

पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः॥
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥
गाः कोटिशःस्पर्शयता घटोध्नीः।

ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः॥

इति समासप्रकरणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तद्धितप्रकरणम्

अधिकारः—

तद्धिताः (४-१-७६) पञ्चमाध्यायसमाप्तिपर्यन्तमधिकारोयम्। इत उत्तरं तावत्पर्यन्तं वक्ष्यमाणाः प्रत्ययास्तद्धितसंज्ञा वेदितव्याः। समर्थानां प्रथमाद्वा (४-१-८२) प्राग्दिशोविभक्तिरिति यावदिदं पदत्रयमधिक्रियते। ततः परं स्वार्थिकेषूपयोगाभावात्समर्थानांप्रथमादिति पदद्वयं निवर्तते, वेतितु ततः परमप्यनुवर्तत एव। तदप्यनवस्थितमेव, तेन क्वचिन्नित्यमेव। समर्थपदविधिरित्यत एव तद्धितविधावप्यैकार्थीभावसामर्थ्यत्वाभावात्पुनरुक्तमिदं सामर्थ्यं कृतसन्धिकार्यत्वरूपे परिनिष्ठितत्वे पर्यवस्यति। प्रथमत्वं विधिशास्त्रेषु प्रथमशब्दनिर्दिष्टत्वम्। तेन तादृशे सामर्थ्ये प्रथमशब्दनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदितव्यम्।

वि. प्राचीनवैयाकरणप्रक्रियायां तस्मैहितमित्यर्थस्य प्राथम्येन किल तद्धितोपक्रमं प्रत्ययानां सर्वेषां तद्धितसंज्ञया व्यवहारः स्यात्, पाणिनीये इदम्प्राथम्याभावेपि तस्मैहितमित्यतः प्राक्तनानामपि पूर्वाचार्यसंज्ञयैव व्यवहारः प्रतिभाति।

वि. २ तद्धितविधेः पदविधित्वेन समर्थःपदविधिरिति परिभाषायाः प्रवृत्तेः समासवद्वृत्तिघटकपूर्वापरैकार्थीभावरूपे सामर्थ्ये सत्येव तद्धितप्रत्ययाः, तेन वस्त्रमुपगोः—अपत्यं चैत्रस्य, तत्तस्य-इदन्त्वस्य, अलं कषायेण—रक्तमेवास्ति वस्त्रमित्यादावेकार्थीभावाभावेन उपगोरपत्यं, तस्येदं कषायेण रक्तमित्याद्यर्थमादाय तस्यापत्यं तस्येदं तेनरक्तमिति औपगवः काषायमित्यादयो न भवन्ति। समर्थानामिति निर्दिष्टं सामर्थ्यं तु ततो विभिन्नमर्थबोधसमर्थत्वं, तच्च सन्धिकार्येण संश्लेषादेवेति कृतसन्धिकार्यत्वे पर्यवस्यति। ततश्च सु-उत्थित इति प्रादिसमासे सन्धौ सूत्थितः, तस्यापत्यमित्यर्थे अतइञितीञि समष्टेः प्रातिपदिकत्वे सुब्लुक्यादि वृद्धौ अकारलोपे सौत्थितिरिति भवति। कृतसन्धेरित्यनुक्तौ तु अन्तरङ्गपरिभाषया सन्धेः प्राक् सु-उत्थित इत्यवस्थायामेव इञि, सवर्णदीर्घात्परत्वेनादिवृद्धावावादेशे सावुत्थितिरित्यनिष्टं प्रसज्येत। समर्थानां मध्ये तस्यापत्यं तेनरक्तं तस्येदमित्यादिविधिषु तस्य तेनेतिप्रथमपदनिर्दिष्टेभ्य एव तद्धिताः, नत्वपत्यादिभ्य इत्यनेन प्रतिपाद्यते। वाकारेण पक्षे वाक्यमपि। अन्यतरस्यां ग्रहणानुवृत्तेः समासोपीति वक्ष्यमाणत्वात्तु तद्धितानां समासापवादेन तद्धिताभावे औत्सर्गिकः समासोपीति औपगवः, उपगोरपत्यम्, उपग्वपत्यम् इति त्रयः प्रयोगाः सम्भवन्ति।

कारणविषयः—

तद्धितेष्वचामादेः (७-२-११७) ञिति णिति च तद्धिते परे अचामादेरचो वृद्धिः स्यात्। किति च (७-२-११८) किति च तद्धिते परे अचामादेरचो वृद्धिः स्यात्। इयमादिवृद्धिः अचोञ्णिति अत-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपधाया इत्यन्तोपधावृद्धी बाधते। न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् (७-३-३) पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः, किन्तु ताभ्यां पूर्वौक्रमादैचावागमौ स्तः। यकारात् पूर्वमैकारः, वकारात्पूर्वमौकार आगमः। द्वारादीनां च (७-३-४) द्वारादीनां च न वृद्धिरैजागमः स्यात्। द्वार-स्वर-स्वाध्याय-स्वस्ति-स्वर-स्वादु-मृदु-श्वस्-श्वस्तन एते द्वारादयः। अन्ये विशेषास्तत्र तत्र वक्ष्यन्ते। तद्धिते सति यचिभमिति भसंज्ञा। अल्लोपो नः (६-४-१३४)। (६-४-१४३) डिति परे भस्य टेर्लोपः स्यात्। यस्येति च (६-४-१४८) इश्च अश्च यं तस्य-यस्य, इवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे। नस्तद्धिते (६-४-१५४) नान्तस्य भस्य टेर्लोपः स्यात्तद्धिते। युवोरनाकौ (७-१-१) यु वु एतयोः प्रत्यययोर्यथासंख्यम्, अन् अक एतावादेशौ स्तः। आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (७-१-२) प्रत्ययादिभूतानां फढखछघानां क्रमात् आयन्-एय-इन् ईय-इय-इत्यादेशाः स्युः। ठस्येकः (७-३-५०) अङ्गात्परस्य ठस्य इकः स्यात्। इसुसुक्तान्तात्कः (७-३-५१) इस्-उस् उक्-त एतदन्तात्परस्य ठस्य कः स्यात्। अपवादः। तद्धिते स्यु-क्तिन-युच्-एयुट्-ख्युन् ल्यु-अनः,-तद्धिते-वुञ्-वुन्-ण्वुन्,-क्रति-ण्वुन् वुन्-अक। तद्धिते-फक् फिञ् फिन् स्फ आयन्, ढ-ढक् ढञ्-एय, खञ् खन् ख-ईन्, छण्-ईय, घ-इय, ठक् ठञ् ठन्-इक।

अपत्यादिविकारान्तार्थसाधारणप्रत्ययाः—

प्राग्दीव्यतोऽण् (४-७ ८३) तेनदीव्यतीत्यतः प्राक् अण् अधिक्रियते। ततश्च तेनदीव्यतीत्यतः प्राक्प्रत्ययविशेषोल्लेखरहितेषु केवलमर्थनिर्देशपरेषु तस्यापत्यं तेनरक्तं तस्येदं तस्यसमूह इत्यादिसूत्रेषु अपवादविषयं परिहृत्य समर्थानां प्रथमात् अण् स्यादित्युपतिष्ठते। यत्र तु विशेषविशेषश्रुतिस्तत्रेञादिनाऽपवादौत्सर्गिकोऽण् नोपतिष्ठते। अश्वपत्यादिभ्यश्च (४-१-८४) ऽण् स्यात्प्राग्दीव्यतीयेष्वर्थेषु। औत्सर्गिकस्याणो विशेषविहितेन वक्ष्यमाणेन पत्युत्तरपदेऽपवादात्तद्बाधनार्थमिदम्। अश्वपतेरपत्यं समूह इदं विकारो वा इत्याद्यर्थे अश्वपतिशब्दाद् वादे अणि तद्धितेष्वचामादेरित्यादिस्वरवृद्धौ यस्येतिचेति प्रकृत्यन्तेकारलोपे प्रातिपदिके सुबुत्पत्तौ आश्वपतम्। एवं गणपति-गाणपतम् पशुपति-पाशुपतम्, शतपति, धनपति, पति, कुलपति, गृहपति, धर्मपति, सभापति, प्राणपति, क्षेत्रपति एतेऽप्यश्वपत्यादयः। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः (४-१-८५) दित्यादिभ्यः पत्युत्तरपदाश्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात्। औत्सर्गिकस्याणोऽपवादः। दितेरपत्यादि इत्यर्थे ण्यप्रत्यये णित्वादादिवृद्धौ यस्येतिचेति इकारलोपे दैत्यः। अदितेः आदित्यस्य वा आदित्यः। बृहस्पतेः-बार्हस्पत्यम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजापति-प्राजापत्यम्। सेनापति-सैनापत्यम्। वनस्पति-वानस्पत्यः। यमाच्चेति काशिकायाम् यास्यः। पृथिव्या ञाञौ (वा) पृथिव्या अपत्याद्यर्थे ञे अञि च पार्थिवः। स्त्रियां ञे टापि पार्थिवा, अञि ङीपि पार्थिवी। देवाद्यञञौ (वा) यञि दैव्यं, अञि दैवं। स्त्रियां यञि दैव्या, अञि दैवी। बहिषष्टिलोपो यञ् च (वा) बहिर्भव इत्याद्यर्थे यञि टिलोपे आदिवृद्धौ बाह्यः। ईकक् च (वा) बहिर्भव इत्यर्थे ईककि टिलोपे वृद्धौ बाहीकः। स्थाम्नोऽकारः (वा) अश्वस्येव स्थामा (स्थितिः) यस्य स अश्वत्थामा। पृषोदरादित्वात्सस्य तः। अश्वत्थाम्नोऽपत्यादि अश्वत्थामः। गोरजादिप्रसङ्गे यत् (वा) गवि भवं गौर्देवता अस्य गोरिदमित्याद्यर्थेषु यति वान्तोयीत्यवादेशे-गव्यम्। अजादिप्रसङ्ग इत्युक्तेर्नेह-गोभ्यो हेतुभ्य आगतं-गोरूप्यं, गोः पुरीषं-गोमयम्। उत्सादिभ्योऽञ् (४-१-८६) उत्सादिभ्यः प्राग्दीव्यतीयेष्वर्थेषु अञ्स्यात्। अणस्तदपवादानामिञादीनां चापवादः। उत्सस्यापत्यादि:-औत्सः। एवम्-इदंभवादिषु यथार्हमर्थेषु उदपान-औदपानः। धेनु-धैनवः। पृथिवी पार्थिवः। जगती-जागतः। त्रिष्टुप्-त्रैष्टुभः। अनुष्टुप्-आनुष्टुभः। जनपद-जानपदः। भरत-भारतः। ग्रीष्म-ग्रैष्मः। कुल-कौलः। मध्यन्दिन-माध्यन्दिनः इत्यादि। स्त्रिया-मन्नन्तत्वान्ङीप्। अग्निकलिभ्यां ढग्वक्तव्यः (वा) अग्नेरपत्यादि-आग्नेयम्। कलेरपत्यादि-कालेयम्।

वि. प्राग्दीव्यतीयेष्वर्थेषु प्रत्ययविधानेपि यथोचितमर्थेष्वणादयः। पत्युत्तरपदेषु अश्वपत्यादिषु यथापवादोऽण्, अन्यत्र। गार्हपत्योग्निरिति गृहपतिना संयुक्ते ञ्यो वक्ष्यते। गाणपत्यो मन्त्र इत्यस्य साधुत्वे पृषोदरादित्वमणन्तात्स्वार्थे ष्यञन्तं वा कल्प्यम्। दैतेय इति तु दितिशब्दात्सर्वतोऽक्तिन्नर्थादित्येके। इति ङीबन्ताल्लिङ्गविशिष्टपरिभाषाया अनित्यत्वेन स्त्रीभ्योढगिति ढकि उपपाद्यम्।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् (४-१-८७) धान्यानां भवन इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ-स्नञौ स्तः। स्त्रिया अपत्यं, स्त्रीभ्यो हितं; स्त्रीणां समूह-स्त्रीषु भव इत्यादि-स्त्रैणः। नञि अट्कुप्वाङ्नुम्व्यवायेऽपीति वृद्धौ णत्वम्। पुंसोपत्यादि-पौंस्नः। स्नञि-स्वादिष्विति पदत्वेन संयोगान्तसलोपे आदिवृद्धिः। वत्यर्थे तु न, स्त्रीपुंवच्चेति ज्ञापकात्। स्त्रीवत् पुंवत्।

वि. पौंस्न इत्यत्र पुंसः सस्य संयोगान्तस्येति लोपेपि प्रत्ययसकारः श्रूयत एव, अत एव स्नञो विधानम्। आचत्वादि-सूत्रे नञ्स्नञ्भ्यां त्वतलोः समावेशार्थं इति वक्ष्यति तेन स्त्रीत्वं स्त्रीता, पुंस्त्वं पुंस्तेत्यपि सिध्यति।

अपत्याधिकारः—

तस्यापत्यम् (४-१-९२) षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। उपगोरपत्यम्-औपगवः। अणि आदिवृद्धौ ओर्गुण इति गुणे अवादेशः। एवम् आश्वपतः दैत्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

औत्सः स्त्रैणः-पौंस्नः। अत इञ् (४-१-९५) अदन्तप्रातिपदिकात् षष्ठ्यन्तादिञ्स्यादपत्ये। अणोपवादः। दक्षस्यापत्यं-दाक्षिः। इञि आदिवृद्धौ यस्येतिचेत्यकारलोपः। दशरथस्य-अ दाशरथिः। एवं दुर्गादत्त-दौर्गादत्तिः। सत्यक-सात्यकिः। बाह्वादिभ्यश्च (४-१-९६) बाह्वा इञ्स्यादपत्ये। बाहोः (ऋषिविशेषस्य) अपत्यं-बाहविः। इञि ओर्गुण इति गुणे अवादेशः। काया-वालाकिः। सुमित्राया-सौमित्रिः। एवं-कृष्ण-कार्ष्णिः। ऋकारस्यवृद्धिः आर्। प्राद्युम्निः। पुष्करसद्-पौष्करसादिः। अर्जुन-आर्जुनिः। आकृतिगणोयम्। सुधातुरकङ् च (४-१- सुधातुशब्दादपत्ये इञ्स्यादन्त्यस्याकङादेशश्च। सुधातोरपत्यं-सौधातकिः। इञि अकारस्य देश आदिवृद्धिः। व्यासवरुडनिषादचाण्डालबिम्बानां चेति वक्तव्यम् (वा) व्यासस्यापत्यं सकिः। इञि अकारस्याकङादेशे आदिवृद्धौ प्राप्तायां नय्वाभ्यामिति यकारात्पूर्वमैकार वरुडस्य (अन्त्यजविशेषस्य) वारुडकिः। एवं निषाद नैषादकिः। चण्डाल-चाण्डालकिः।

वि. १ तस्येदमिति सामान्येन तस्य अपत्यं समूहो विकारो निवासो भाव इत्यादिविशेषाणामपि ग्रहात् सिद्धावपि तस्यापत्यमिति पृथक्सूत्रपाठस्तु तस्येदमित्येतद्बाधकस्य वृद्धाच्छ इत्यस्यापि बाधनाय। अपत्यादिचतुर्थ्य ऽन्यस्यैव शेषत्वेन तदधिकारस्थस्य वृद्धाच्छ इत्यस्यापत्यार्थेऽप्रसङ्गात्कथं तस्येदमित्येतद्बाधकतेति न शङ्क्यम्, बाह्वादिभ्यश्चेति प्रकृतिविशेषसंयुक्तापत्यार्थाद्विनियुक्तादन्यस्यासामान्यापत्यार्थस्यौत्सर्गिकस्यापि शेषत्वेन उपगोरपत्यमित्यादौ अवृद्धत्वेन वृद्धाच्छस्याप्राप्तावपि भानोरपत्यं भानवः इत्यादौ भान्वादीनां वृद्धत्वेन छप्राप्तेस्तद् तस्यापत्यमिति पृथक्सूत्रपाठस्यावश्यकता। तदुक्तं वार्तिककृता—"तस्येदमित्यपत्येपि बाधनार्थं कृतं भवेत्। शेष एवासौ वृद्धान्यस्य प्रयोजनम्"॥

वि. २ सूत्रे तस्येति पुंलिङ्गैकवचनान्तनिर्देशेपि लिङ्गवचनयोरविवक्षया तयोः,तेषां तस्याः तासामपत्यमित्य ग्रहः। तस्येति सर्वनाम्ना निर्देशेपि उपग्वादीनां विशेषाणां ग्रहः। अपत्यमिति नपुंसकत्व निर्देशेपि सामान्येन सन्तति पुमपत्यस्त्र्यपत्ययोः द्विबहुसंख्ययोरपि ग्रहः। उक्तं च वार्तिके—"तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षि सामान्यचोदनास्तु विशेषेषु, सिद्धं तु प्रजनस्य विवक्षितत्वात्" इति।

वि. ३ प्रदीयतां दाशरथाय मैथिलीति अण्णन्तप्रयोगस्तु आर्षः। एवमन्यत्रापि क्वचन प्रत्ययविपर्यासे हेत्वन्तरं

अपत्यविशेषाः—

अपत्यमित्यनन्तरं व्यवहितं च सन्ततिसामान्यम्। तद्विशेषास्तु—अपत्यं पौत्रप्रभृति (४-१-१६२) अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। जीवति तु वंश्येयुवा (४-१-१६३) पित्रादौ जीवति सति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यान्नतु गोत्रम्। भ्रातरि च ज्या (४-१-१६४) जेष्ठे भ्रातरि जीवति सति कनीयान्भ्राता चतुर्थादि पौत्रापत्यं युवसंज्ञं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रात्यस्मिन्सपिण्डे स्थविरतरे जीवति (४-१-१६५) सप्तमपुरुषावधयः सपिण्डाः। भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति सति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा स्यात्। एकं जीवति-ग्रहणं सपिण्डस्य, द्वितीयमपत्यस्य विशेषणम्। तरवोनिर्देश उभयोरुत्कर्षार्थः। स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति यथा स्यात्। वृद्धस्य च पूजायामिति वाच्यम् (वा) गोत्रस्यैव वृद्धसंज्ञा प्राचाम्। गोत्रस्यैव युवसंज्ञा स्यात्पूजायां गम्यमानायामित्यर्थः। तत्रभवान्-गार्ग्यायणः। यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम् (वा) गार्ग्यो जाल्मः।

वि. गोत्रं द्विधा लौकिकं पारिभाषिकं च, कश्यपादीनामगस्त्याष्टमानां वंशपरम्परा लौकिकं गोत्रम्, एत एव पूर्वे गोत्रप्रवर्तकाः, तत्परम्परागता अन्येपि केचनर्षयोवान्तरगोत्रप्रवर्तका बभूवुः। एतद्वंश्योहमिति स्मर्यमाणलक्षणमेव लौकिकं गोत्रमुच्यते। पारिभाषिकं तु-अस्मिन्नपत्याधिकारेपि क्वचन सूत्रविशेषेषु लौकिकं गोत्रमिति तत्र तत्र वक्ष्यते। पारिभाषिके पुत्ररूपमनन्तरापत्यं केवलमपत्यं, तेन तत्परम्परया वान्तरितं पौत्रप्रपौत्रादिगोत्रापत्यं, तत्रापि वंश्ये पित्रादौ जीवति ज्येष्ठे भ्रातरि जीवति चतुर्थादि युवापत्यं, स्थविरतरे सपिण्डे जीवति जीवच्चतुर्थादि विकल्पेन युवापत्यमुच्यते। गोत्रायुवापत्ययोर्विशेषेण विधीयमानाः प्रत्ययास्तयोरेव, सामान्यापत्यार्थे विधीयमानास्तु स्मर्यमाणलक्षणगोत्रापत्येषु सर्वेषु भवन्ति। यथा-गर्गाद्यनन्तरापत्ये सामान्यापत्ये वा इञि गार्गिः, गोत्रापत्ये यञि गार्ग्यः, युवापत्ये गार्ग्यायणः। यञञोश्चेत्यादौ गृह्यमाणं गोत्रं तु लौकिकमित्यादयो विशेषा अनुसन्धेयाः। प्रत्ययलुगलुग्विषयौ च यथानियममनुसन्धेयौ। वृद्धस्य च पूजायां यूनश्च कुत्सायामिति वार्तिकद्वयम्। तत्र-भवदादिशब्दसाहित्येन पूजाबोधने गोत्रेपि युववत्प्रत्ययः, निन्दाबोधकशब्दसाहित्ये युवापत्येपि गोत्रवत्प्रत्ययः, यथा तत्रभवान् गार्ग्यायणः। गार्ग्योजाल्मः।

वि. २ सपिण्डसोदकसगोत्रशब्दानामर्थानुसन्धाने आपस्तम्बगृह्यसूत्रे सूचितस्य विवेचनेपि पुराकाले सप्तमपुरुषपर्यन्तानामेकस्मिन्नेवगृहेऽविभक्ततया निवासो बभूव, तेन च तेषामेकपाकान्नभोजितया सपिण्डत्वं, ततः परेषां सप्तपुरुषपर्यन्तानां स्थानाभावेन पृथङ् निवासेपि एककूपस्रोतोनद्यादिजलपायितया समानोदकत्वं, ततः परेषां पाकस्यैवोदपानस्यापि भेदेन एकगोत्र-गोत्रा (पर्वतादि-भूप्रदेश) वासमात्रं बभूव, तेन सगोत्रत्वमिति वंशविकासवशेन शब्दविशेषव्यवहारः स्यात्। पश्चात्समयवशेन सपिण्डशब्दस्य कुलान्तरेपि व्यवहारेण श्राद्धीयपिण्डदानोद्देश्यत्व-शारीरपिण्डजन्यजनकभावापर्यन्तरं सप्तमपुरुषसन्तत्यवधि नियमितं शास्त्रकृद्भिस्तदनुसारिभिर्लौकिकैरपि व्यवस्थापितं क्विलेति प्रतिभाति। ऐतिहासिकमपीदं विचाराय सूच्यते।

एको गोत्रे (४-१-९३) अपत्यं पौत्रप्रभृति गोत्रम्, तस्मिन्विवक्षिते प्रत्ययान्तात्प्रत्ययोत्पत्तिप्रसङ्गेऽयं नियमः। गोत्रे एक एव प्रत्ययः स्यात्। अपतनादपत्यम्, व्यवधायकेन (मध्यगेन) जनितोपि प्रथमस्यापत्यं भवत्येव। गर्गस्यापत्यं (अनन्तरं) गार्गिः। अत इञ्। गार्गेरपत्यं गार्ग्यः। तस्यापि पुत्रो गार्ग्यः, तत्पुत्रोपि गार्ग्यः। युवापत्यं चेद् गार्ग्यायणः। युवापत्ये बोध्ये तु-गोत्राद्यन्यस्त्रियाम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(४-१-६४) यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो भवति अस्त्रियाम्, न प्रकृत्यनन्तर-युवभ्य गार्ग्यस्य युवापत्यं-गार्ग्यायणः। वात्स्यस्य युवापत्यं-वात्स्यायनः। स्त्री युवापत्ये तु युवसंज्ञा अभावात्-गार्ग्यस्य युवापत्यं स्त्री गार्गी। गार्ग्यशब्दान्ङीपि यलोपः। वात्स्यस्य युवापत्यं स्त्री वात्सी। तेन स्त्रियां युवापत्यत्वप्रयुक्तो विशेषो न। गोत्रापत्यप्रत्ययान्तादेव ङीबादि।

वि. एकशब्दः–इत्येके मन्यन्ते इत्यादावन्यार्थः, एकः पार्थोधनुष्मतामित्यादौ प्रधानार्थः, एक एव गत इत्यादावन्य यार्थः, एकः पुरुष इत्यादौ संख्यार्थः, भ्रातरावेकधनावित्यादौ साधारणार्थः, छात्राणामेकोयमित्यादौ प्रधानार्थः, तैरेके गित्यादौसमानार्थः। एकोगोत्र इत्यत्र संख्यावचनः साधारणवचनो वा। गोत्रं चेदं पारिभाषिकम्। पौत्रादावपत्ये वि क्षिते उपग्वादेरेव गोत्रप्रत्ययः स्यादौपगवादेर्गोत्रप्रत्ययान्तान्माभूदित्येवमर्थमेतत्सूत्रम्। तेन अनन्तरापत्य तदपत्य-तदप दीनां सर्वेषामेकेनैव गोत्रापत्यप्रत्ययेन बोधः। गोत्रापत्याद्युवापत्येऽर्थान्तरे बोध्ये तु प्रत्यान्तरमपीति गार्ग्यायण इति भव अपत्यशब्दः पुत्रपर्यायः। पितामहः स्वोत्सङ्गेवर्तमानं निर्दिश्य कस्येदमपत्यमिति पृष्टश्चैत्रस्य (स्वपुत्रस्य) अपत्यत्वं प्रति न स्वस्येति, तेनोत्पादयितुरेवापत्यमिति केचिन्मन्यन्ते। अन्येतु नपतत्यनेनेत्यपत्यपतनक्रियाहेतुकमपत्यत्वम्। पुं लोकाञ्जयति पौत्रेणानन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्या (ब्रह्मणः) प्नोति विष्टपमिति स्मृतेर्जरत्कार्वादीनि व्यवहितजनितस्याप्युपकारकत्वोपलम्भाच्च पितामहादेरप्यपत्यं नोत्पादयितुरेवेति मन्यन्ते। आद्ये पक्षे-उत्पादयितुरेव प्रत्ययेन औपगवः औपगविः औपगवायन इत्यादिरीत्या शततमेऽपत्ये विवक्षिते एकोनशतप्रत्ययमालाप्रसङ्गान्नि एक एवेति नियमार्थं सूत्रम्। एकशब्दः प्रथमर्यायः तेन गोत्रे प्रथम एव प्रत्ययोत्पादक इति तदर्थः। द्वितीये पक्षे तु-त पञ्चमस्य पूर्वेषां चतुर्णामप्यपत्यतया पुत्रस्येव पौत्रप्रपौत्रादेरपि औपगवत्वेन बोधादिष्टसिद्धावपि उपगोस्तृतीये औपगवा नन्तरापत्ये औपगविरिति, चतुर्थे औपगव्यपत्ये औपगवायन इति रीत्या द्व्यूनसंख्यप्रकृतिभ्यस्तावतामनिष्टप्रत्ययानां प्रसक्तेर्वारणार्थं गोत्रे एक एव प्रत्यय इति नियमार्थं सूत्रम्। तत्र प्रथमातिक्रमे मानाभावान्मूलप्रकृतेरेवोचितः प्रत्यय स्यादिति फलति। उभयथापीष्टसिद्धिरनिष्टपरिहारश्चेति भाष्यपदमञ्जरीलेखार्थः। एवमुत्तरसूत्रेप्यूह्यम्। एवदेकं गोत्रेष्वेकोनसंख्यानां प्रत्ययानां परम्परा। यद्वा स्वद्व्यूनसंख्येभ्यो ऽनिष्टोत्पत्तिः प्रसज्यते। अपत्यं पितुरेव स्या प्राचामपीति च। मतभेदेन तद्धान्यैसूत्रमेतत्तथोत्तरम् इति।

अपत्यविशेषे प्रत्ययाः—

गोत्रे कुञ्जादिभ्य श्चफञ् (४-१-६८) गोत्रापत्येर्थे कुञ्जादिभ्य श्चफञ् स्यात्। इञोपवादः। चकारो विशेषार्थः। स च विशेषः—व्रातच्फञोरस्त्रियाम् (५-३-११३) व्रातवाचिभ्य श्चफञन्तेभ्यश्च स्वार्थे ञ्यःस्यान्नतु स्त्रियाम्। कुञ्जस्य गोत्रापत्यं-कौञ्जायन्यः। च्फञि फस्यायन् आदिवृद्धौ प्रत्ययान्तावयवस्य यस्येतिचेत्यकारलोपः। बहुत्वे तद्राजत्वात् ञ्यस्य लुकि-कौञ्जायनाः। स्त्रियां तु ञ्यस्याभावेऽपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मिण्येङीपि-कौञ्जायनी। अनन्तरापत्ये तु अत इञ्-कौञ्जिः। एवं शङ्ख-शाङ्खायन्यः। ब्रध्न-ब्राध्नायन्यः। नडादिभ्यः फक् (४-१-६६) एभ्यो गोत्रापत्ये फक्स्यात्। नडस्य गोत्रापत्यं नाडायनः। फस्यायन्, कित्वादादिवृद्धिः। एवं-चर -चारायणः। शलङ्क-शालङ्कायनः। द्वीप-द्वैपायनः। मित्र-मैत्रायणः। णत्वं। कण्व-काण्वायनः। शकट-शाकटायनः। दाण्डिन्-दाण्डिनायनः। बदर-बादरायणः। युगन्धर-यौगन्धरायणः। उदुम्बर-औदुम्बरायणः। अमुष्य-आमुष्यायणः। अश्वल-आश्वलायनः। द्रोणपर्वतजीवन्तादन्यतरस्याम् (४-१-१०३) द्रोणादिभ्यो गोत्रापत्ये फक् वा स्यात्। इञोपवादः। द्रोणस्य गोत्रापत्यं-द्रौणायनः। पक्षे इञ्-द्रौणिः। एवं पर्वत-पार्वतायनः। पार्वतिः। जीवन्त-जैवन्तायनः जैवन्तिः। अनृष्यानन्तर्ये बिदादिभ्योऽञ् (४-१-१०४) बिदादिभ्यो गोत्रापत्ये, अनृषिशब्देभ्यः पुत्रादिभ्यस्तु अनन्तरापत्ये अञ् स्यात्। बिदस्य गोत्रापत्यं-बैदः। अनन्तरापत्ये तु-बाह्वादित्वादिञ्, बैदिः। एवं ऊर्व-और्वः। कश्यप-काश्यपः। कुशिक-कौशिकः। भरद्वाज-भारद्वाजः। उपमन्यु-औपमन्यवः। ओर्गुणोवादेशः। विश्वानर-वैश्वानरः। शरद्वत्-शारद्वतः। (कृपाचार्यः) शुनक-शौनकः। हरित-हारितः। अनृषेस्तु-पुत्रस्यानन्तरापत्यं-पौत्रः। दुहितुरनन्तरापत्यं-दौहित्रः। पुनर्भू-पौनर्भवः। ननान्द्-नानन्द्रः गर्गादिभ्यो यञ् (४-१-१०५) गर्गादिभ्यो गोत्रापत्ये यञ् स्यात्। गर्गस्य गोत्रापत्यं-गार्ग्यः। अनन्तरापत्ये तु इञि-गार्गिः। एवं वत्सः-वात्स्यः। अगस्ति-आगस्त्यः। यस्येतिचेतीकारलोपः। पुलस्ति-पौलस्त्यः। धूम-धौम्यः। कपि-काप्यः। कत-कात्यः। अग्निवेश-आग्निवेश्यः। लोहित-लौहितः। मण्डु-माण्डव्यः। शकल-शाकल्यः। यज्ञवल्क्य-याज्ञवल्क्यः। कुण्डिन-कौण्डिन्यः। शण्डिल-शाण्डिल्यः। मुद्गल-मौद्गल्यः। उलूक-औलूक्यः। जमदग्नि-जामदग्न्यः। पराशर-पाराशर्यः। जतूकर्ण-जातूकर्ण्यः। स्त्रियां तु-प्राचां ष्फ तद्धितः इति यञन्तात्ष्फे गार्ग्यायणी वात्स्यायनी। इति प्राचां मते, मतान्तरेतु-यञश्च इति ङीपि गार्गी वात्सी। हरितादिभ्यो ऽञः (४-१-१००) हरितादिभ्योऽञन्तेभ्यो युवापत्ये फक्स्यात्। विदाद्यन्तर्गणो हरितादिः। इह गोत्राधिकारेपि सामर्थ्याद्यून्ययम्। नहि गोत्रादपरो-गोत्रप्रत्ययः। हरितस्यापत्यं-हारितः। बिदादित्वादञ्। हारितस्य युवापत्यं-हारितायनः। यञिञोश्च (४-१-१०१) गोत्रे यौ यञिञौ तदन्ताद्युवापत्येथ फक्स्यात्। इहापि सामर्थ्याद्यून्ययम्। गर्गस्यापत्यं-गार्ग्यः। गर्गादित्वाद्यञ्। गार्ग्यस्य युवापत्यं-गार्ग्यायणः। फस्यायन् णत्वं च। एवं वत्स-वात्स्य-वात्स्यायनः। पुलस्ति-पौलस्त्य-पौलस्त्यायनः। मण्डु-माण्डव्य-माण्डव्यायनः। कपि-काप्य-काप्यायनः। कत-कात्य-कात्यायनः। शकल-शाकल्य-शाकल्यायनः। कण्व-काण्व-काण्वायनः। यज्ञवल्क्य-याज्ञवल्क्य-याज्ञवल्क्यायनः। पराशर-पाराशर-पाराशरायणः। इञन्तात्-दक्षस्य गोत्रापत्यं-दाक्षिः। अतइञ्। दाक्षेर्युवापत्यं-दाक्षायणः। ऋष्यन्धकवृष्णिकुरुभ्यश्च (४-१-११४) एभ्योऽण्स्यादपत्येर्थे।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. शरद्वच्छुनकदर्भात् भृगुवत्साग्रायणेषु (४-१-१०२) शरद्वदादिभ्यःक्रमाद्भृगुवत्साग्रायणेष्वभिधेयेषु गोत्रा-पत्ये फक्स्यात्। अञिञोरपवादः। शरद्वतो गोत्रापत्यं–शारद्वतायनः। (भार्गवः) अन्यः–शारद्वतः। एवं शुनक-शौनकायनः (वात्स्यः), अन्यः–शौनकः। एतौ बिदादी। दर्भ-दार्भायणः। (आग्रायणः) अन्यो दार्भिः। अतइञ्। मधुबभ्र्वोर्ब्राह्मणकौशिकयोः (४-१-१०३) आभ्यां गोत्रापत्ये यञ्स्यात्क्रमाद्ब्राह्मणे कौशिके च वाच्ये। मधोर्गोत्रा-पत्यं–माधव्यः (ब्राह्मणः) माधवोऽन्यः अण्। बभ्रो–बाभ्रव्यः (कौशिकः) बाभ्रवोऽन्यः। अश्वादिभ्यः फञ् (४-१-११०) एभ्योगोत्रापत्ये फञ्स्यात्। अश्वस्य गोत्रापत्यं-आश्वायनः। एवं-नड-नाडायनः। चर-चारायणः। शङ्ख–शाङ्खायनः।

वि. २ द्रोणपर्वतेत्यत्र गृहीतो द्रोणोऽनादिर्नतु महाभारतीयः द्रोणस्यानन्तरोऽश्वत्थामातूपचाराद्द्रोणायन इत्युच्यते

प्रत्ययलोपः—

द्विगोर्लुगनपत्ये (४-१-८८) द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयप्रत्ययस्तस्य लुक्स्यात्। पञ्चसु कपालेषु संस्कृतः–पञ्चकपालः पुरोडाशः। संस्कृतंभक्षा इत्यणि विवक्षिते तद्धितार्थद्विगौ अणि लुकि नलुमतेतिनिषेधेन प्रत्ययलक्षणाभावान्नादिवृद्धिः। द्विगोर्निमित्तमित्युक्ते-र्नेह–पञ्चकपालस्येदं-पाञ्चकपालं खण्डम्। अजाद्युक्त्या नेह-पञ्चगर्गरूप्यम्। अनपत्येत्युक्तेः द्वयोर्मित्रयोरपत्यं–द्वैमित्रिः। गोत्रेऽलुगचि (४-१-८९) अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्य-स्यालुक्स्यात्। अत्र गोत्रं पारिभाषिकमुत्तरत्र यूना सहोक्तेः। गर्गस्य गोत्रापत्यमित्यर्थे यञि गार्ग्यः। तस्य बहुत्वे यञञोश्चेति लुकि-गर्गाः। तेषां गर्गाणां छात्रा इत्यर्थे वृद्धाच्छ इति ईय-शिनि छे विवक्षिते यञो लुङ्निषेधे छे ईयादेशे अकारलोपे गार्ग्य-ईय इतिस्थिते–आपत्यस्य च तद्धिते-ऽनाति (६-४-१५१) हलः परस्यापत्ययकारस्य लोपः स्यात्तद्धिते परे, नत्वाकारे। इति पूर्वयकारलोपे गार्गीयाः। यलोपे वृद्धेरनिवृत्तिः प्रत्ययलोपाद्विशेषः। अल्लोपस्याभीयत्वेप्यारम्भसामर्थ्यान्नासिद्धत्वम्। एवं वात्सीयाः आत्रेयीयाः। प्राग्दीव्यतीये विवक्षित इत्युक्तेरप्राग्दीव्यतीये तस्मैहितमिति छे विवक्षिते तु लुकि गर्गीयाः। यूनि लुक् (४-१-९०) अजादौ प्राग्दीव्यतीये विवक्षिते युवप्रत्ययस्य लुक्स्यात्। ग्लुचुकस्य गोत्रापत्यं-ग्लुचुकायनिः। प्राचामवृद्धादिति फिन्। ग्लुचुकायनेर्युवापत्यं ग्लौचुकायनः। तस्यापत्यमित्यणि आदिवृद्धौ इकारलोप.। ग्लौचुकायनस्य छात्र इत्यर्थे तस्येदमित्यणि विवक्षिते युवार्थकाणो लोपे वृद्धेर्निवृत्तौ वृद्धत्वाभावेन वृद्धाच्छस्याप्राप्तौ इदमर्थेऽणि आदिवृद्धौ-ग्लौचुकायनः। फक्फिञोरन्यतरस्याम् (४-१-९१) पूर्वेण नित्ये प्राप्ते विकल्पोयम्। युवप्रत्य-ययोः फक्फिञोः प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते वा लुक्स्यात्। कतस्य गोत्रापत्यं-कात्यः गर्गादित्वाद्यञ्। कात्यस्य युवापत्यं-कात्यायनः। यञिञोश्चेति फक्। कात्यायनस्य छात्रा इ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छे भाविनि युवार्थकफको लुकि छे यलोपे-कातीयाः। अलुक्पक्षे कात्यायनीयाः। एवं गर्ग-गार्ग्यायण-गार्गीयाः-गार्ग्यायणीयाः। वत्स-वात्स्य-वात्स्यायन-वात्सीयाः वात्स्यायनीयाः। यस्कस्यापत्यं-यास्कः। शिवादित्वादण्। यास्कस्य युवापत्यं-यास्कायनिः। अणोद्व्यचच इति फिञ्। यास्कायने-छात्राः, यास्कीयाः, यास्कायनीयाः। ण्यक्षत्रियार्षञितो यूनि लुगणिञोः (२-४-५८) ण्यादयो गोत्रप्रत्ययाः। ण्यान्तात्क्षत्रियगोत्रात् आर्षात् ञितश्च परयोर्युवार्थकयो रणिञोर्लुक्स्यात्। ण्यन्तात्-कुरो र्ब्राह्मणविशेषस्य गोत्रापत्यं-कौरव्यः। अतइञिति इञो लुक्। क्षत्रियात्-श्वफल्कस्य गोत्रापत्यं-श्वाफल्कः ऋष्यन्धकेत्यण्। श्वाफल्कस्य युवापत्यं-श्वाफल्कः इञोलुक्। आर्षात्-वसिष्ठस्य गोत्रापत्यं-वासिष्ठः ऋष्यन्धकेत्यण्। वसिष्ठस्य युवापत्यं-वासिष्ठः इञोलुक् ञितः-विदस्य गोत्रापत्यं-बैदः विदादित्वादञ्। बैदस्य युवापत्यं-बैदः इञोलुक्। पैलादिभ्यश्च (२-४-५९) एभ्यो युवप्रत्ययस्य लुक्स्यात्। पीलाया गोत्रापत्यं-पैलः। पीलायावेत्यण्। पैलस्य युवापत्यं-पैलः। अणोद्व्यचच इति फिञो लुक्। तद्राजश्चाणः (गणः) अङ्गानां राजा आङ्गः। आङ्गस्य गोत्रापत्यं-आङ्गः। आङ्गस्य युवापत्यमाङ्गः अणोद्व्यचच इति फिञो लुक्। एवं वाङ्गः मागधः-राजा, पिता, पुत्रश्च।

वि इञः प्राचाम् (२-४-६०) गोत्रे इञन्ताद्युवप्रत्ययस्य लुक्स्यात् तच्चेद्गोत्रं प्राचाम्। पन्नागारस्य गोत्रापत्यं-पान्नागारिः अतइञ्। पान्नागारेर्युवापत्यं-पान्नागारिः। यञिञोश्चेति फिञो लुक्। प्राचामित्युक्तेर्नेह-दत्तस्य गोत्रापत्यं-दात्तिः। दात्तेर्युवापत्यं-दात्तायनः। न तौल्वलिभ्यः (२-४-६१) तौल्वलादिभ्यो युवप्रत्ययस्य न लुक्। तौल्वलेर्युवापत्यं-तौल्वलायनः। यञिञोश्चेति फक्।

गोत्रलुक्—

यस्कादिभ्यो गोत्रे (२-४-६३) अत्र गोत्रं लौकिकं, तेनापत्यमात्रमर्थः। एभ्योऽपत्यप्रत्ययस्य लुक्स्यात्तत्कृते बहुत्वे, नतु स्त्रियाम्। यस्कस्यापत्यं-यास्कः, यस्कस्यापत्यानि यस्काः। द्रुह्यस्यापत्यानि-द्रुह्याः। स्त्रियां तु-यास्का। यञञोश्च (२-४-६४) गोत्रे विहितयोर्यञञोर्लुक्स्यात्तत्कृते बहुत्वे, नतु स्त्रियाम्। गर्गस्य गोत्रापत्यानि-गर्गाः। एवं वत्स वत्साः। बिद-बिदाः। स्त्रियां न-गार्ग्यः स्त्रियः वात्स्यः, बैदाः। अबहुत्वे न-गार्ग्यः गार्ग्यौ, वात्स्यः वात्स्यौ, बैदः बैदौ। अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च (२-४-६५) एभ्यो गोत्रप्रत्ययस्य लुक्स्यात्तत्कृते बहुत्वे नतु स्त्रियाम्। अत्रेरपत्यानि-अत्रयः। एवं भृगु-भृगवः। कुत्स-कुत्साः। वसिष्ठ-वसिष्ठाः। गोतम-गोतमाः। अङ्गिरस्-अङ्गिरसः। स्त्रियां तु-आत्रेय्यः, भार्गव्यः, कौत्स्यः, गौतम्यः, आङ्गिरस्यः। अबहुत्वे न-आत्रेयः। इतश्चानिञ इति ढक्। भार्गवः। कौत्सः, गौतमः, आङ्गिरसः। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् (२-४-७०) एतयोरवयवस्य गोत्रप्रत्ययस्य अणो यञश्च बहुत्वे लुक्स्यात्, अवशिष्टप्रकृतिभागयोरगस्तिकुण्डि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नादेशौ स्तः । अगस्त्यस्यापत्यानि अगस्तयः । ऋष्यणो लुगगस्त्यादेशश्च । कौण्डिन्यस्यापत्यानि कुण्डिनाः । कुण्डिनीशब्दादुगर्गादियञो लुक् कुण्डिनादेशश्च ।

वि. बह्वच इञः प्राच्यभरतेषु (२-४-६६) बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक्स्यात् । पन्नागारस्यापत्यानि-पन्नागाराः इञो लुक् । युधिष्ठिरस्यापत्यानि-युधिष्ठिराः । न गोपवनादिभ्यः (२-४-६७) एभ्यो गोत्रप्रत्ययस्य न लुक् । गौपवनाः शैग्रवाः बिदाद्यन्तर्गतः यञञोश्चेति लुकोपवादः । तद्राजप्रत्ययानां बहुत्वे लुग्वक्ष्यते ।

अपत्यसामान्यप्रत्ययाः—

शिवादिभ्योऽण् (४-१-११२) गोत्र इति निवृत्तम् । सामान्येनापत्ये प्रत्ययाः । शिवादिभ्योऽपत्ये ऽण् स्यात् । यथायथमिञादीनामपवादः । शिवस्यापत्यं-शैवः । एवं-ककुत्स्थ—काकुत्स्थः । हेहय-हैहयः । यस्क-यास्कः । भूमि-भौमः । इला-ऐलः सपत्नी-सापत्नः । गङ्गा-गाङ्गः । पक्षे तिकादित्वात्फिञ्-गाङ्गायनिः, शुभ्रादित्वाड्ढक्-गाङ्गेयः । अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः (४-१-११३) वृद्धिर्यस्याचामादिस्तद्वृद्धम् । अवृद्धेभ्यो नदीमानुषीनामभ्योपत्येऽण् स्यात् । ढकोपवादः । यमुनाया अपत्यं-यामुनः । एवम्-इरावती-ऐरावतः । वितस्ता वैतस्तः नर्मदा-नार्मदः । मानुषीनामभ्य-शिक्षिताया अपत्यं-शैक्षितः । वृद्धाभ्यतु न-चान्द्रभागायाः अपत्यं-चान्द्रभागेयः, वासवदत्तायाः-वासवदत्तेयः । नदीमानुषीत्युक्ते नेह-सुपर्णा-सौपर्णेयः, विनता-वैनतेयः । नामोक्ते नेह—शोभनायाः शोभनेयः । ऋष्यन्धकवृष्णिकुरुभ्यश्च (४-१-११४) ऋषन्ति लीनान्वेदाँस्तपोबलात्प्राप्नुवन्तीति ऋषयो मन्त्रद्रष्टारः । अन्धकादयो वंशविशेषाः । एभ्योऽपत्येऽण् स्यात् । ऋषिभ्यः—वसिष्ठस्यापत्यं-वासिष्ठः । एवं-विश्वामित्र-वैश्वामित्रः । कुशिक-कौशिकः । अन्धकेभ्यः—श्वफल्क-श्वाफल्कः । वृष्णिभ्यः-वसुदेव-वासुदेवः । अनिरुद्ध-आनिरुद्धः । शौरिरिति तु बाह्वादित्वादिञ् । कुरुभ्यः—नकुल-नाकुलः । सहदेव-साहदेवः । मध्येपवादन्यायादिञ् एवापवादोयम् । तेनात्रिशब्दात्परत्वाड्ढगेव आत्रेयः । मातुरुत्संख्यासंभद्रपूर्वायाः (४-१-११५) संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण् च । द्वयोर्मात्रोरपत्यं-द्वैमातुरः । तद्धितार्थद्विगोरणि ऋकारस्योत्वे रपरत्वमादिवृद्धिश्च । षण्णां मातृणामपत्यं-षाण्मातुरः । शुभ्रादित्वाड्ढकि-वैमात्रेयः । कन्यायाः कनीन च (४-१-११६) कन्याया अपत्येऽण् स्यात्कन्यायाः कनीनादेशश्च । कन्याया अपत्यं-कानीनः (व्यासः कर्णश्च) । स्त्रीभ्यो ढक् (४-१-१२०) स्त्रीप्रत्ययान्तेभ्यो ढक्स्यादपत्ये । ढस्य एयः—विनताया अपत्यं-वैनतेयः । एवं-सुपर्णा-सौपर्णेयः । गङ्गा-गाङ्गेयः । बाह्वादित्वादिञि-सौमित्रिः । शिवादित्वादणि-सापत्नः । द्व्यचः (४-१-१२१) द्व्यचः स्त्रीप्रत्ययान्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दपत्ये ढक्स्यात्। तन्नामिकाणोपवादः। दत्ताया अपत्यं-दात्तेयः। एवं-गोपा-गौपेयः। राधा-राधेयः। पार्थ इत्यत्र तु तस्येदमित्यण्। इतश्चानिञः (४-१-१२२) इकारान्ताद्व्यचोऽपत्ये ढक्स्यात् नत्विञ-न्तात्। अत्रेरपत्यं-आत्रेयः। एवं-दुलि-दौलेयः। निधि-नैधेयः। अनिञ इत्युक्तेनेह-दाक्षायणः। द्व्यच इत्युक्तेनेह-मारीचः। शुभ्रादिभ्यश्च (४-१-१२३) एभ्यो ढक्स्यादपत्ये। शुभ्रस्यापत्यं-शौभ्रेयः। एवं-विमातृ-वैमात्रेयः। विधवा-वैधवेयः। रोहिणी-रौहिणेयः। रुक्मिणी-रौक्मिणेयः। मृकण्डु-मार्कण्डेयः। कद्रु-काद्रवेयः। इतरा-ऐतरेयः। आकृतिगणोयम्। तेन गाङ्गेयः, पाण्डवेयः। कल्याण्या-दीनामिनङ् (४-१-१२६) एषामिनङादेशः स्यात् ढक्च अपत्ये। कल्याण्या अपत्यं-काल्याणिनेयः। बन्धक्याः (कुलटायाः) अपत्यं-बान्धकिनेयः। सुभगाया अपत्यमित्यर्थे ढकि इनङि च। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च (७-३-१९) हृदाद्यन्ते पूर्वोत्तरपदयोरादेरचो वृद्धिर्ञिति णिति किति च। इत्युभयतो वृद्धौ सौभागिनेयः। एवं दुर्भगा-दौर्भागिनेयः। कुलटाया वा (४-१-१२७) कुलटाया अपत्ये ढक्स्यादिनङादेशश्च वा। पूर्वेणैव सिद्धे ढक् नित्यं, इनङ् पाक्षिकः। कुलटायाः (सत्या भिक्षुक्याः) अपत्यं-कौलटिनेयः कौलटेयः। व्यभिचारिणीवाचिन्यास्तु क्षुद्राभ्योवेति ढ्रकि-कौलटेरः। चटकाया ऐरक् (४-१-१२८) चटकाया अपत्ये ऐरक्स्यात्। चटकादिति वाच्यम् (वा) लिङ्गविशिष्टपरिभा-षया स्त्रियां अपि। चटकस्य चटकाया वा अपत्यं-चाटकैरः। कित्वादादिवृद्धिः। स्त्रियामपत्ये लुग्वक्तव्यः (वा) चटस्य चटकाया वा अपत्यं स्त्री-चटका। क्षुद्राभ्यो वा (४-१-१३१) अङ्गहीनाः शीलहीनाश्च क्षुद्राः, ताभ्योऽपत्ये ढक् वा स्यात्। पक्षे स्त्रीभ्योढक्। काणाया अपत्यं-काणेरः, काणेयः दास्या अपत्यं-दासेरः, दासेयः। पितृष्वसुश्छण् (४-१-१३२) अस्मादपत्ये छण् स्यात्। अणोपवादः। छस्य इयः। पितृष्वसुर-पत्यं-पैतृष्वस्रीयः। आदिवृद्धौ ऋकारस्य यण्। ढकि लोपः (४-१-१३३) पितृष्वसृशब्दस्य लोपः स्याद्-ढकि। अतएव ज्ञापकाद्ढक्। अन्त्यऋकारस्य लोपः। पितृष्वसुरपत्यं-पैतृस्वसेयः। मातृष्वसुश्च (४-१-१३४) पितृष्वसुरुक्तं मातृष्वसुरपि स्यात्। मातृष्वसुरपत्यं-मातृष्वस्रेयः। मातृष्वसेयः।

वि. पीलाया वा (४-१-११८) पीलाया अपत्ये अण् वा स्यात्। पक्षे ढक्। पीलाया अपत्यं पैलः, पैलेयः। ढक् च मण्डूकात् (४-१-११९) अस्मादपत्ये ढक् चादण् वा स्यात्। पक्षे इञ्। मण्डूकस्य (ऋषिविशेषस्य) अपत्यं-माण्डूकेयः, माण्डूकः, माण्डूकिः। गोधाया ढ्रक् (४-१-१२९) अस्माद्ढ्रक्स्यादपत्ये। गोधाया अपत्यं-गौधेरः। शुभ्रादिपाठात्पक्षे ढक्–गौधेयः। आरगुदीचाम् (४-१-१३०) गोधाया आरक्स्यात् उदीचां मते। गोधाया अपत्यं-गौधारः। केकयमित्रयुप्रलयानां यादेरियः (७-३-२) एषां यकारादेरियादेशः स्यात् ञिति णिति किति

१५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च प्रत्यये परे। केकयस्यापत्यं स्त्रीत्यर्थे जनपदशब्दादित्यञि आदिवृद्धौ यस्य इयादेशे गुणे ङीपि-कैकेयी। प्रलयादागत-प्रालेयम्। तत आगत इत्यणि आदिवृद्धौ यस्येयादेशे गुणः। मित्रयोरपत्यमित्यर्थे ऋष्यणं बाधित्वा गृष्ट्यादिभ्यश्चेति ढञि आदिवृद्धौ युस्थाने इयादेशे प्राप्ते, दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि (६-४-१७४) एतानि निपात्यन्ते। इति निपातनाद्युलोपे मैत्रेयः। स्त्रियां मैत्रेयी। दण्डिनोऽपत्यं-दाण्डिनायनः। हस्तिनोऽपत्यं-हास्तिनायनः। नडादित्वात्फकि निपातनाट्टिलोपाभावः। अथर्वाणमधीते-आथर्वणिकः। तदधीते इति ढकि आदिवृद्धौ टिलोपाभावो निपातनात्। सरय्वां भवं-सारवम्। तत्र भव इत्यणि आदिवृद्धौ योर्वादेशो निपातनात्। इक्ष्वाकोरपत्यं-ऐक्ष्वाकः जनपदशब्दादित्यणि निपातनादुकारलोपः। हिरण्यस्य विकारः-हिरण्मयम्। विकारे मयटि निपातनात् य इत्यस्य लोपः।

राजश्वशुराद्यत् (४-१-१३७) राजन्श्वशुरशब्दाभ्यामपत्ये यत्स्यात्। क्रमाद्यञिञोरपवादः। राज्ञो जातावेवेति वाच्यम् (वा) राज्ञोपत्यमित्यर्थे यति टिलोपे प्राप्ते–ये चाभावकर्मणोः (६-४-१६८) यादौ तद्धिते परे अन्प्रकृत्या स्यान्नतु भावकर्मणोः। इति निषेधे राजन्यः (क्षत्रियः) अजातौ अणि टिलोपे प्राप्ते–अन् (६-४- १६७) अणि अन्प्रकृत्या स्यात्। इत्यलोपे-राजनः (शूद्रादावुत्पन्नः) भावकर्मणोस्तु-राज्ञो भावः कर्म वा-राज्यम् ष्यञि नलोपः। ब्राह्मो जातौ (६-४-१७१) ब्राह्म इति निपात्यते अनपत्येऽणि। ब्रह्मण इदं-ब्राह्मं हविः। ब्राह्मो मुहूर्तः। तस्येदम् टिलोपः। जातौ किम्? योगविभागेन अपत्ये जातावणि ब्रह्मणष्टिलोपोन स्यात्। ब्रह्मणोपत्यं-ब्राह्मणः। अपत्य इत्युक्तेः ब्राह्मी ओषधिः। क्षत्राद्घः (४-१-१३८) क्षत्रादपत्ये घःस्यात्। घस्य इयः। क्षत्रस्यापत्यं-क्षत्रियः। जातावित्येव, नेह-क्षात्रिः इञ् (क्षत्राच्छूद्रायामुत्पन्नः)। कुलात्खः (४-१-१३९) अपूर्वपदात्तदन्ताच्च अपत्ये खः स्यात्। खस्य ईनः खे नादिवृद्धिः। कुलस्यापत्यं-कुलीनः। एवं सुकुलीनः दुष्कुलीनः। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ (४-१-१४०) अपूर्वपदात्कुलात् यड्ढकञौ वा स्तोऽपत्ये। कुलस्यापत्यं-कुल्यः, कौलेयकः। पक्षे खः कुलीनः। अपूर्वपदेत्युक्तेर्बहुच्प्रत्ययपूर्वादपि। बहुकुल्यः, बाहुकौलेयकः। बहुकुलीनः। महाकुलादञ्खञौ (४-१-१४१) अस्मादञ्खञौ वा स्तोऽपत्ये। पक्षे खः। महाकुलस्यापत्यं-माहाकुलः, माहाकुलीनः महाकुलीनः। दुष्कुलाड्ढक् (४-१-१४२) अस्मादपत्ये ढक् स्यात्। पक्षे खः। दुष्कुलस्यापत्यं-दौष्कुलेयः दुष्कुलीनः। स्वसुश्छः (४-१-१४३) अस्माच्छःस्यादपत्ये। स्वसुरपत्यं-स्वस्रीयः। ईयादेशे यण्। भ्रातुर्व्यच्च (४-१-१४४) भ्रातुर्व्यत्स्यात् चात् छ स्यादपत्ये। अणोपवादः। भ्रातुरपत्यं–भ्रातृव्यः भ्रात्रीयः। व्यन्सपत्ने (४-१-१४५) भ्रातुर्व्यन्स्यादपत्ये शत्रौ वाच्ये। भ्रातुरपत्यं–भ्रातृव्यः (शत्रुः) कुर्वादिभ्यो ण्यः (४-१-१५१) एभ्यो ण्यः स्यादपत्ये। कुरोः (ब्राह्मणविशेषस्य) अपत्यं–कौरव्यः। वावदूकस्य

CC-0. Digitized by eGangotri and MIDF- Delhi

(वावदूकस्य) अपत्यं-वावदूक्यः। एवं कवि-काव्यः। शलाका-शालाक्यः। शाक-शाक्यः। सेनान्तलक्षणकारिभ्यश्च (४-१-१५२) एभ्यो ण्यः स्यादपत्ये। हरिषेणस्यापत्यं-हारिषेण्यः। लक्ष्मणस्य (लक्षणतः) अपत्यं-लाक्षण्यः। कारिः शिल्पी। तन्तुवायस्यापत्यं-तान्तुवाय्यः। कुम्भकारस्यापत्यं-कौम्भकार्यः। नापितस्यापत्यं-नापित्यः। उदीचामिञ् (४-१-१५३) सेनान्तलक्षणकारिभ्यो-ऽपत्ये इञ्स्यादुदीच्यानां मते। हारिषेणिः। लाक्षणिः। तान्तुवायिः। कौम्भकारिः। नापितिः। मनोर्जातावञ्यतौ षुक् च (४-१-१६१) मनोरञ्यतौ स्तः षुगागमश्च जातिबोधने। मानुषः मनुष्यः।

वि. औक्षमनपत्ये (६-४-१७३) औक्षमित्यणि टिलोपो निपात्यते अनपत्येऽर्थे। उक्ष्ण इदम्-औक्षं पदम्। ...हन्-षपूर्वहन्धृतराज्ञामणि (६-४-१३५) षपूर्वोयोऽन् तस्य हनादेश्च भस्यातो लोपःस्यादणि। उक्ष्णोपत्यम्-... तक्ष्णोपत्यं-ताक्ष्णः। भ्रूणघ्नोपत्यं-भ्रौणघ्नः। रेवत्यादिभ्यष्ठक् (४-१-१४६) रेवत्यादिभ्यष्ठक् स्यादपत्ये। ...त्या अपत्यं-रैवतिकः। अश्वपाल्याः-आश्वपालिकः। द्वारपाल्याः-द्वारपालिकः।

...त्यया:—

जनपदशब्दात्क्षत्रियादञ् (४-१-१६८) जनपदवाची सन्यः क्षत्रियवाची तस्मादञ् स्यादपत्ये। इक्ष्वाकुविदेहपञ्चालादयः शब्दा देशवाचिनः क्षत्रियवाचिनोपि। देशे बहुवचनान्ताः, क्षत्रिये तु सर्ववचनाः। इक्ष्वाकोः (राज्ञः) अपत्यम्-ऐक्ष्वाकः। ऐक्ष्वाकौ दाण्डिनायनेति सूत्रे निपातनाट्टिलोपः। बहुत्वे लुग्वक्ष्यते-इक्ष्वाकवः। एवं विदेह-वैदेहः विदेहाः। पञ्चाल-पाञ्चालः पञ्चालाः। जनपदावाचिनः क्षत्रियमात्रवाचकात्तु न-पुरु-पौरवः द्रुह्यु-द्रौह्यवः। अण्। क्षत्रियोक्तेर्नेह-ब्राह्मणस्य पञ्चालस्य, विदेहस्यापत्यं-पाञ्चालिः, वैदेहिः। बाह्वादित्वादिञ्। क्षत्रियसमानशब्दात्तस्य राजन्यवत् (वा) तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञा सामर्थ्यादेतल्लभ्यते। पञ्चालानां (देशविशेषस्य) राजा पाञ्चालः, पाञ्चालौ। बहुत्वे लुग्वक्ष्यते-पञ्चालाः। एवं विदेह-वैदेहः-वैदेहौ विदेहाः। मगध-मागधः मागधौ मगधाः। अवृद्धादपीति प्राप्तस्य वुञोऽपवादः। पूरोरण् वक्तव्यः (वा) पूरुशब्दस्य जनपदवाचित्वाभावात्प्राग्दीव्यतीयेऽणि सिद्धेपि तद्राजसंज्ञार्थं वचनम्। तेन बहुत्वे लुकि पूरवः। पाण्डोर्ड्यण् (वा) पाण्डोरपत्यं-देशविशेष राजा वा-पाण्ड्यः। डित्वाट्टिलोपः। बहुत्वे पाण्डवः। साल्वेयगान्धारिभ्यां च (४-१-१६९) आभ्यामपत्येऽञ् स्यात्। वृद्धेदिति ञ्यङोपवादः। साल्वेय-स्यापत्यं-साल्वेयः। गान्धारेरपत्यं-गान्धारः। राजन्यप्येवम्। द्व्यञ्मगधकलिङ्गसूरमसादण् (४-१-१७०) जनपदशब्दात्क्षत्रियवाचिनो द्व्यचो मगधादिभ्यश्चापत्येऽण् स्यात्। अञोपवादः। राजन्यप्येवम्। अङ्गस्यापत्यमङ्गानां राजा वा-आङ्गः। बहुत्वे लुकि अङ्गाः। एवं वङ्ग-वाङ्गः, वङ्गाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुह्म-सौह्मः, सुह्माः। पुण्ड्र-पौण्ड्रः, पुण्ड्राः। मगध-मागधः, मगधाः। कलिङ्ग-कालिङ्गः, कलिङ्गाः। शूरमस-शौरमसः शूरमसाः। वृद्धेत्कोसलाजादाञ्ञ्यङ् (४-१-१७१) जनपदशब्दात्क्षत्रियाभिधायिनो वृद्धादिकारान्तात्कोसलाजादाभ्यां चापत्ये ञ्यङ् स्यात्। अञोपवादः। वृद्धात्-आम्बष्ठस्यापत्यम् आम्बष्ठ्यः बहुत्वे लुकि आम्बष्ठाः। एवं सौवीर-सौवीर्यः, सौवीराः। इतः-अवन्ति-आवन्त्यः, अवन्तयः। कुन्ति-कौन्त्यः, कुन्तयः। कोसल-कौसल्यः, कोसलाः। अजाद-आजाद्यः, अजादाः। राजन्यप्येवम्। कुरुनादिभ्यो ण्यः (४-१-१७२) जनपदशब्दात्क्षत्रियवाचिनः कुरुशब्दान्नादिश्चापत्ये ण्यः स्यात्। राजन्यप्येवम्। बहुत्वे लुक् च। कुरोरपत्यं-कुरूणां राजा वा कौरव्यः, कुरवः। निषध-नैषध्यः, निषधाः। ते तद्राजाः (४-१-१७४) जनपदशब्दात्क्षत्रियादञित्येवमादयः प्रत्ययास्तद्राजसंज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियाम् (२-४-६२) बहुष्वर्थेषु तद्राजस्य लुक्स्यात्तदर्थकृते बहुत्वे नतु स्त्रियाम्। इक्ष्वाकोरपत्यानि-इक्ष्वाकवः। पञ्चालस्यापत्यानि-पञ्चालानां राजानो वा पञ्चालाः। एवं मगधाः विदेहाः अङ्गाः वङ्गाः सुह्माः कलिङ्गाः सौवीराः अवन्तयः कुन्तयः कोसलाः कुरवः निषधाः। स्त्रियां तु न लुक्-पाञ्चाल्यः मागध्यः वैदेह्यः आङ्ग्यः इत्यादि। कम्बोजाल्लुक् (४-१-१७५) अस्मात्तद्राजस्य लुक्स्यात्। अतः परं बहुत्व इवैकत्वादावपि लुक्। कम्बोजस्यापत्यं कम्बोजः कम्बोजौ-कम्बोजाः। कम्बोजानां राजानः-कम्बोजाः। राजार्थे प्रकृतिबहुत्वेन लुपियुक्तवदिति बहुत्वमेव। कम्बोजादिभ्य इति वक्तव्यम् (वा) चोलः केरलः यवनः शकः, चोलाः केरलाः यवनाः शकाः। स्त्रियामवन्तिकुन्तिकुरुभ्यश्च (४-१-१७६) एभ्यस्तद्राजस्य लुक्स्यात् स्त्रियाम्। अवन्तेः कुन्तेः कुरोश्चापत्यं स्त्री-अवन्ती कुन्ती कुरूः (उङ्ङुत इति ऊः)। अतश्च (४-१-१७७) तद्राजस्याकारस्य स्त्रियां लुक्स्यात्। शूरसेनस्यापत्यं स्त्री-शूरसेनी। अञो लुकि अपत्यप्रत्ययान्तत्वेन जातिलक्षणे ङीषि अकारलोपः। एवं मद्र-मद्री। न प्राच्यभर्गादियौधेयादिभ्यः (४-१-१७८) एभ्यस्तद्राजस्य स्त्रियां लुक् न स्यात्। प्राच्येभ्यः-पाञ्चाली वैदेही आङ्गी वाङ्गी मागधी। भर्गादिभ्यः-भार्गी कारूषी कैकेयी। यौधेयादिभ्यः-यौधेयी भारती औशीनरी।

वि. कौरव्याः पशवः तस्यामेव रघोः पाण्ड्याः इति कौरव्ये पाण्डे च साधव इत्यर्थे यति, रघूणामन्वयं वक्ष्ये, निरुक्तं यदुभिः कथञ्चिदिति तदपत्ये लक्षणयोपपादनीयमित्युक्तं प्राक्। स नैषधस्यार्थपतेरिति तु तस्येदमित्यणि। कम्बोजाः समरे सोढुमित्यादि पाठान्तरं तु अभिजनार्थे सिन्धुतक्षशिलादीत्यणि। केकयीत्यत्र तु जन्यजनकभावलक्षणे पुंयोगे ङीष्। कैकेयीति तु भर्गादित्वेन तद्राजप्रत्ययस्य लुगभावे ज्ञेयम्।

प्रयोगाः—आश्वालायनसूत्रोक्तम्। कात्यायनानां मते। स्पृहावती वस्तुषु केषु मागधी। वङ्गानुत्खाय तरसा। आत्मा संरक्षितः सुह्मैः। प्रतिजग्राह कालिङ्गः। उत्कलादर्शितपथः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

…भिमुखो ययौ। राधेयमाराधितजामदग्न्यम्। कौत्सः प्रपेदे वरतन्तुशिष्यः। कैकेयि कामाः फलितास्तवैव। प्राक्केकयीतो भरतस्ततोभूत्। कातीयानां मतमिदम्।

प्रश्नाः—अपत्यभेदाः के। गोत्रापत्ययुवापत्ययोः को विशेषः। तद्राजसंज्ञकाः के, तेषु को विशेषः। बहुत्वे …लुक्। तद्धितोक्तं सामर्थ्यं कीदृक्। प्राग्दीव्यतीयार्थप्रत्ययाः के। अपत्यसामान्यप्रत्ययाः के। अधस्तनवाक्य-…संदिष्टप्रत्ययानुपपादयत। ऐक्ष्वाको रामभद्रः। जनकानां रघूणां च सम्बन्धः कस्य न प्रियः। स पाञ्चालीमुदवहत्। …रावायणी देवी। अत्रयः कश्यपास्तथा। द्वैपायनवचोऽमृतम्। कातीयानां मतमिदम्। नैरुक्तानां यास्कः प्रधानम्। …वङ्गाः कलिङ्गाश्च मागधेन पराजिताः। सौतिः पौराणिकोमतः। दाशरथिः क्षान्ते वासुदेवोविभूतेर्निधी। …पाण्डवेयानां पक्षे। माण्डव्यशापाद्यमः शूद्रयोनौ विदुरो बभूव। सङ्गरे वैनतेयेन काद्रवेयाः निषूदिताः। राघवो …वं बभ्रे।

इत्यपत्याधिकारः।

…र्थाः—

तेन रक्तं रागात् (४-२-१) रज्यतेऽनेनेति रागो रञ्जनद्रव्यम्। तृतीयान्ताद्रागचकाद्रक्तमित्यर्थे अण् स्यात्। अर्थमात्रनिर्देशात्प्राग्दीव्यतोऽणित्युपतिष्ठते। एवमुत्तरत्राप्यनुसन्धेयम्। कषायेण रक्तं-काषायं वस्त्रम्। अणि आदिवृद्धिरकारलोपश्च। एवं मञ्जिष्ठया रक्तं माञ्जिष्ठम्। कुसुम्भेन-कौसुम्भम्। रागादित्युक्तेनेह-देवदत्तेन रक्तम्, कोपेन रक्तं मुखम्। लाक्षारोचनाट्ठक् (४-२-२) आभ्यां रक्तार्थे ठक् स्यात्। अणोपवादः। ठस्येकः। लाक्षया रक्तं-लाक्षिकं, रोचनया रक्तं-रौचनिकं वस्त्रम्। शकलकर्दमाभ्यामुपसंख्यानम् (वा) शकलेन (रागद्रव्यविशेषेण) रक्तः- शाकलिकः। कर्दमेन रक्तः-कार्दमिकः पटः। आभ्यामणपीति वृत्तिकारः। शाकलः कार्दमः। नील्या अन् (वा) नील्या रक्तं-नीलम्। पीतात्कन् (वा) पीतेन रक्तं-पीतकम्। हरिद्रामहारजनाभ्यामञ् (वा) हरिद्रया रक्तं-हारिद्रम्। महारजनेन रक्तं-माहारजनम्।

वि. समर्थानामिति सर्वत्रोपतिष्ठते तेनेति तृतीयान्तोपलक्षणम्। शुक्लस्यवर्णान्तरापादनं रञ्जनम्। तृतीयान्ता-…देते प्रातिपदिकसंज्ञयान्तर्गतविभक्तिलोपादौ सति समुदायात्सुबुत्पत्तिः। समास इव तद्धितेपि वृत्यन्तर्गतविभक्तिलोपः …नुसन्धेयः। काषायौ गर्दभस्यकर्णौ, हारिद्रौ कुक्कुटस्यपादाविति रञ्जनाभावात्काषायाविव काषायौ हरिद्राविव-…रागाविति सदृशलक्षणयोपपादनीयम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युक्तार्थाः—

नक्षत्रेण युक्तः कालः (४-२-३) नक्षत्रविशेषवाचकात्तृतीयान्ताद्युक्त इत्यर्थेऽण् स्यात् कालेमिधेये पुष्येण युक्तं—पौषम् अहः। अणि आदिवृद्धौ तिष्यपुष्ययोर्नक्षत्राणियलोप इति वाच्यमिति यलोपः। पौषी रात्रिः। एवं मघा-माघमहः माघी रात्रिः। कृत्तिका-कार्तिकी रजनी। आदिवृद्धि-आर्। लुबवि (४-२-४) पूर्वेण विहितस्य प्रत्ययस्य लुप् स्यान्नक्षत्रयुक्तकालस्याहोरात्रस्य अवान्तरविशेषे अगम्ये। अद्य पुष्यः, श्वो मघा। चित्रायुक्ता पौर्णमासीत्याद्यर्थे पौर्णमास्या अवान्तरकालविशेषस्याबोधे विभाषाफाल्गुनीत्यादि सूत्रनिर्देशेन पौर्णमास्यां लुब्नेति ज्ञाप्यते, तेन चैत्री वैशाखी, ज्यैष्ठी पौर्णमासी त्यादि। श्रवणशब्दात्तु श्रवणेतिनिर्देशेन लुप् युक्तवद्भावाभावश्च-श्रवणा पौर्णमासी। अवाधकान्य निपातानीति श्रावणी पौर्णमासीत्यपि भवति। सास्मिन्पौर्णमासीति (४-२-२१) इतिशब्दात्संज्ञायामिति लभ्यते। सा पौर्णमासी अस्मिन्नित्यर्थे अण् स्यात्संज्ञायाम्। चैत्री (चित्रायुक्ता) पौर्णमासी अस्मिन् चैत्रो मासः। यस्येतिचेतीकारलोपः। एवं विशाखा वैशाखी। कृत्तिका-कार्त्तिकी-कार्त्तिकः। फल्गु फाल्गुनी-फाल्गुनः-मासः। मासार्धमाससंवत्सराणामेषां संज्ञेति भाष्योक्तेः। पौषोऽर्धमासः, पौ संवत्सर इत्यपि। नतु पौषो दशरात्र इत्यादि। भृतकमासे (सावने) बोध्येऽपि न। आग्रहाय श्वत्थाठ्ठक् (४-२-२२) आभ्यां ठक् स्यात् पूर्वविषये। अणोपादः। अग्रे हायन (वर्षः) म इत्यर्थे प्रज्ञादेराकृतिगणत्वादणि आग्रहायणी (मार्गी पौर्णमासी) आग्रहायणी पौर्णमा अस्मिन्स-आग्रहायणिको मासः (मार्गशीर्षोमासः)। अश्वत्थेन (अश्विन्या) युक्ता पौर्णमा अश्वत्थः। निपातनाल्लुप्-सोस्मिन्निति आश्वत्थिको मासः। विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्री (४-२-२३) एभ्यष्ठग्वा स्यात् पूर्वविषये। पक्षेऽण्। फाल्गुनी पौर्णमासी अस्मिन्सः—फाल्गुनि फाल्गुनो वा मासः। एवं श्रावणिकः, श्रावणः, कार्तिकिकः कार्तिकः, चैत्रिकः, चैत्रो वा मासः।

वि. काले साक्षान्नक्षत्रयोगाभावेपि नक्षत्रसमीपस्थस्य चन्द्रमसो योगात्पारम्परिको योगः। तेन नक्षत्र स्तत्सन्निकृष्टे चद्रमसि लाक्षणिकः। "षष्टिघटिकात्मकोहोरात्र स्तावन्तं कालमेकस्य नक्षत्रस्य समीपे चन्द्रमा तदेतदेवं यावान्कालो नक्षत्रेण युज्यते, तस्य सर्वस्य प्रत्ययान्तेनाभिधानमविशेषः, तदेकदेशस्याभिधानं विशेषः।" पदमञ्जर्युक्तरीत्या अवान्तरविशेषाविवक्षायामणो लुपि अद्य पुष्यः, ह्यः कृत्तिका, श्वश्चित्रेत्यादि। अहोरात्राद्य विशेषविवक्षायां तु न लुक्। पौषी रात्रिरित्यादाविव पौषोहोरात्र इत्यादावपि न लुप्। पौर्णमास्यां वाच्या अपि अविशेषेपि विभाषा फाल्गुनीत्यादिनिर्देशादलुपि पौषी चैत्री वैशाखीत्यादि। मासे वाच्ये तु नक्षत्रयु रात्ररूपकालाभावन्न तेनाण्, किन्तु पौर्णमास्यर्थे सिद्धात्पौष्यादिशब्दात्पौषी पौर्णमास्यस्मिन्नित्यर्थे सास्मिन्नित्यणि पौषः इत्यादि प्रक्रियान्तरम्। पूर्णिमावर्जे तिथ्यन्तरादौ वाच्ये तु पुष्ययुक्ता पौर्णमासीत्याद्यर्थेऽणि निष्पन्नात्पौषादिशब्दात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्गशीत्यपि निष्पन्नात् मासबोधकात्पौषादिशब्दात्तस्येदमित्यर्थे पुनरणि पौषी द्वितीया, ज्यैष्ठी दशमी फाल्गुनी पौर्णमासीत्यादि सिद्धिरिति प्रक्रियाविशेषः।

टि. २ मार्गपूर्णिमायामाग्रहायणीति मार्गमासस्य आग्रहायणिक इति व्यवहारस्य प्राक्कालादर्शनेन पुरा मृगशीर्षादि-नक्षत्रेण मार्गशीर्षादारभ्य नववर्षारम्भ आसीदित्यनेन बोध्यते। अतो हिमशिशिरवसन्तेति हेमन्तर्तोः प्रथमोल्लेखः, मासानां मार्गशीर्षोऽहमिति प्राथमिकत्वेन प्राधान्यनिर्देशोपि युज्यते। कालक्रमेण पुनर्मकरादित्वमद्यत्वे चैत्रादित्वं वसन्ता-दित्वमिति गणितप्रक्रिया वेदिभिः वैदिकविधावाग्रहायणेष्टेर्दर्शनेन शब्दार्थपर्यालोचनया वेदकालस्यातिप्राचीनत्वं निरूप्यते। वसन्तर्तौ नक्षत्रमन्त्रेषु अग्नि र्नःपातुकृत्तिकेति कृत्तिकामारभ्य निर्देशोप्येतदेवोपोद्बलयति। क्रान्तिसाम्यकालस्यैव सम्भवत्वात्।

यथा:—

दृष्टं साम (४-२-७) तेन दृष्टमित्यर्थे साम्नि वाच्येऽण् स्यात्। वसिष्ठेन दृष्टं-वासिष्ठं साम (ऋचो गीतिविशेषः)। एवं विश्वामित्र-वैश्वामित्रम्। विश्वानर-वैश्वानरम्। अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः (वा) डित्वाट्टिलोपः। उशनसा दृष्टम्-औशनम् औशनसं वा साम। कलेर्ढक् (४-२-८) अस्मात्-ढक् स्याद्दृष्टं सामेत्यर्थे। अणोपवादः। सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः (वा) अग्निना दृष्टं-आग्नेयम्। कलिना (ऋषिविशेषेण) दृष्टं-कालेयं साम। वामदेवाड्ड्यड्ड्यौ (४-२-९) अस्मात् ड्यत्ड्यौ स्तो दृष्टं सामेत्यर्थे। वामदेवेन दृष्टं-वामदेव्यं साम। परिवृतो रथः (४-२-१०) तेन परिवृत इत्यर्थेऽण् स्याद्रथे वाच्ये। वस्त्रैः परिवृतः-वास्त्रो रथः। एवं कम्बल-काम्बलः। चर्मन्-चार्मणो रथः। समन्ता-त्परिवेष्टितः परिवृत उच्यते। तेनेह न-छात्रैः परिवृतो रथः। रथ इत्युक्तेर्नेह-वस्त्रेण परिवृतं शरीरम्। पाण्डुकम्बलादिनिः (४-२-११) अस्मादिनिः स्यात्परिवृतो रथ इत्यर्थे। अणोपवादः। पाण्डुकम्बलेन (राजास्तरणवर्णकम्बलेन) परिवृतः-पाण्डुकम्बली रथः। द्वैपवैयाघ्रादञ् (४-२-१२) आभ्यामञ्-स्यात्तेन परिवृतो रथ इत्यर्थे। अणोपवादः। द्वीपिनो (व्याघ्रस्य) विकारो द्वैपं चर्म। प्राणिरज-तादिभ्य इत्यञि टिलोपः। द्वैपेन परिवृतः-द्वैपो रथः। व्याघ्रस्य विकारः-वैयाघ्रं चर्म। अत्र नव्वाभ्या-मित्यैच्। वैयाघ्रेण परिवृतः-वैयाघ्रो रथः। कौमारापूर्ववचने (४-२-१३) कौमार इत्यणन्तं निपात्यते तदस्यार्थे स्त्रिया अपूर्वपतित्वे बोध्ये। अपूर्वपतिं कुमारीमुपपन्नः पतिः-कौमारः पतिः। अपूर्वपतिः कुमारी पतिमुपपन्ना-कौमारी भार्या। तत्रोद्धृतममत्रेभ्यः (४-२-१४) अमत्र (पात्र) वाचकात्सप्तम्यन्ता-दुद्धृतमित्यर्थेऽण् स्यात्। उद्धरणं उद्धरणपूर्वकं निधानं तेन सप्तमी। शरावे उद्धृतः (उद्धृत्य निहितः) शाराव-ओदनः। कर्परे उद्धृतः-कार्परः। अमत्रोक्तेर्नेह-पाणावुद्धृत ओदनः। स्थण्डिलाच्छयितरि व्रते (४-२-१५) सप्तम्यन्तात्स्थण्डिलात् शयितरि अर्थेऽण् स्यात् व्रते बोध्ये। स्थण्डिले (केवल भूमौ)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शेते-स्थाण्डिलो भिक्षुः। व्रतमिति शास्त्रीयो नियमः। तेनेह न-स्थण्डिले शेते ब्रह्मदत्तः। संस्कृतं भ (४-२-१६) सप्तम्यन्तात्संस्कृतमित्यर्थेऽण् स्याद्यत् संस्कृतं भक्षं चेत्। खरविशद-मभ्यवह भक्षम्। पाकादिना गुणविशेषाधानं संस्कारः। भ्राष्ट्रे संस्कृता-भ्राष्ट्रा यवाः। अष्टसु कपा संस्कृतः-अष्टाकपालः पुरोडाशः। तद्धितार्थद्विगुसमासे अणि द्विगोर्लुगनपत्ये इत्यणो लुकि अ कपालेहविषीत्यात्वम्। एवं द्वादशकपालः शतकपालः। शूलोखाद्यत् (४-२-१७) आभ्यां यत्स्या स्कृतभक्षार्थे। अणोपवादः। शूले संस्कृतं-शूल्यं मांसम्। उखायां (पात्रविशेषे) संस्कृतम्-उख दध्नष्ठक् (४-२-१८) अस्माठ्ठक् स्यात्संस्कृतार्थे। अणोपवादः। दध्नि संस्कृतं-दाधिकम्। कि दादिवृद्धिः।

वि. दध्ना संस्कृतमित्यर्थे प्राग्वहतेष्ठगिति वक्ष्यमाणेन ठकि दाधिकमित्येव। इह तु दधि केवलमाधारभूतं तत्र ह दिना द्रव्यान्तरेण संस्कृतो भक्षः प्रतीयते।

वि. २ उदश्वितोऽन्यतरस्याम् (४-२-१६) अस्माठ्ठग्वा स्यात् संस्कृते भक्षार्थे। पक्षेऽण्। इसुसुक्ता (७-३-५१) इस् उस् उक् त् एतदन्तात्परस्य ठस्य कः स्यात्। इति ठस्य कः। उदकेन श्वयति (वर्धते) इ श्वित (पादजलमिश्रं तक्रम्) उदश्विति संस्कृतः-औदश्वित्कः औदश्वितः। क्षीराड्ढञ् (४-२-२०) अस्माड्ढ संस्कृतमात्रेर्थे। अणोपवादः। ढस्य एयः। क्षीरे संस्कृता-क्षैरेयी यवागूः।

देवतार्थाः—

सास्य देवता (४-२-२४) प्रथमान्तादस्यदेवतेत्यर्थे ऽण् स्यात्। इन्द्रो देवता अस्य-ऐन्द्रं ह विष्णुर्देवता अस्य-वैष्णवः चरुः। आदित्यो देवता अस्य-आदित्यम्, बृहस्पतिर्देवतास्य स्पत्यम्, प्रजापतिर्देवतास्य-प्राजापत्यं हविः। एषु औत्सर्गिकस्याणो दित्यदित्यादित्यप पदादिति बाधाण्ण्यः। पशुपतिर्देवतास्य-पाशुपतम्। अश्वपत्यादिभ्यश्चेति ण्यस्यापवाद यमो देवतास्य याम्यम्। यमाच्चेति ण्यः। महेन्द्राद्घाणौ च (४-२-२६) अस्माद्घाणौ स्तो तार्थे चाच्छः। महेन्द्रो देवतास्य-माहेन्द्रियं, माहेन्द्रं, महेन्द्रीयम्। घस्य इयः, छस्य ईयः। छे वृद्धिः। सोमाट्ट्यण् (४-२-३०) अस्माट्ट्यण् स्याद्देवतार्थे। अणोपवादः। सोमो देवतास्य-सौ श्चरुः। टित्वात्स्त्रियां ङीपि हलस्तद्धितस्येति यलोपे सौमी स्रक्। वाय्वृतुपित्रुषसो यत् (४- एभ्योयत्स्याद्देवतार्थे। अणोपवादः। वायुर्देवतास्य-वायव्यम्। यति ओर्गुण इति गुणे वा यीत्यवादेशः। ऋतुर्देवतास्य-ऋतव्यम्। पितरो देवतास्येत्यर्थे यति-रीङृतः (७-४-२७) अ कारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात्। इति ङित्वेन अ

Jayatu Sanskritam, Kathmandu, Nepal

रीङादेशे यस्येतिचेतीकारलोपे पित्र्यम्। कव्यम् (पितृदेयम्)। उषो देवतास्य उषस्यम्। द्यावापृथिवीशुनासीरमरुत्वदग्निषोमवास्तोष्पतिगृहमेधाच्छ च (४-२-३२) एभ्यश्छः स्या च्चाद्यद्देवतार्थे। द्यौश्च पृथिवी च-द्यावापृथिव्यौ। देवताद्वन्द्वे दिवोद्यावेति द्यावादेशः। द्यावापृथिव्यौ देवते अस्य-द्यावापृथिवीयं, द्यावापृथिव्यम्। छे यति च यस्येतिचेतीकारलोपः। शुनासीरः (इन्द्रः) देवतास्य-शुनासीरीयं, शुनासीर्यम्। मरुत्वान्देवतास्य-मरुत्वतीयं, मरुत्वत्यम्। अग्निश्च सोमश्च अग्नीषोमौ। देवताद्वन्द्वे ईदग्नेःसोमवरुणयोरिति इकारस्य ईत्वे अग्नेः स्तुत्स्तोमसोमा इति षत्वम्। अग्नीषोमौ देवतेऽस्य-अग्नीषोमीयम्, अग्नीषोम्यम्। वास्तुनः (वासभूमेः) पतिः-वास्तोष्पतिः (रुद्रः) निपातनादलुक् षत्वे। वास्तोष्पतिर्देवतास्य-वास्तोष्पतीयं, वास्तोष्पत्यम्। गृहमेधो देवतास्य-गृहमेधीयं, गृहमेध्यम्। अग्नेर्ढक् (४-२-३३) अस्माड्ढक्स्याद्देवतार्थे। अणोपवादः। अग्निर्देवतास्य-आग्नेयं हविः। अग्निश्च मरुच्च अग्नामरुतौ। देवताद्वन्द्वेचेत्यानङ्। अग्नामरुतौ देवते अस्येत्यर्थे अलौकिकविग्रहवाक्ये-आनङं बाधित्वा ईद्वृद्धाविति ईत्वे अणि-देवताद्वन्द्वे च (७-३-२१) अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् ञिति णिति किति च परे। इत्युभयतो वृद्धौ आग्निमारुतम्।

टि. देवतात्र न प्रसिद्धदेवजातिः, किन्तु यागसम्प्रदानः, त्यज्यमाने द्रव्ये उद्देश्यविशेषः। विशेषोक्त्या ऋत्विग्भ्योददाति, [illegible] गां ददातीत्यादौ ऋत्विग्विप्रादे र्न देवतात्वम्। त्यागोद्देश्यविशेषत्वात्पित्रादेरपि देवतात्वम्। मन्त्रेणस्तवनीयोपि-[illegible]। तेन ऐन्द्रोमन्त्र इत्याद्यपि। आग्नेयो वैब्राह्मणोदेवतयेति तु शौषिकेर्थे सर्वत्राग्निकलिभ्यांढग्वक्तव्य इति ढकि ज्ञेयम्।

टि. २ कस्येत् (४-२-२५) कशब्दस्येकारादेशःस्यात्प्रत्यययोगे। कः (ब्रह्मा) देवतास्य कायं हविः। अणि अकारस्येत्वे [illegible]ति लोपात्परत्वादादिवृद्धौ आयादेशः। एवं न्यायेन ईकारलोपं बाधित्वादिवृद्धौ श्रीर्देवतास्य-श्रायंहविः। शुक्राद्घन् (४-२-२६) अस्माद्घन्स्याद्देवतार्थे। अणोपवादः। घस्येयः। शुक्रो देवतास्य-शुक्रियं सूक्तम् (ऋचंवाचमित्यादि)। [illegible]द्घश्च(वा) चाच्छः। शतं (बहवो) रुद्रा देवता अस्य-शतरुद्रियं, शतरुद्रीयम्। नेन्द्रस्य परस्य (७-३-२२) देवता-[illegible]स्येन्द्रस्य वृद्धिर्न स्यात् ञिति णिति, किति च प्रत्यये परे। सोमेन्द्रौ देवते अस्य-सौमेन्द्रं हविः। पूर्वस्य तु भवत्येव-[illegible]। दीर्घाच्च वरुणस्य (७-३-२३) दीर्घात्परस्य वरुणस्य न वृद्धिःपूर्वविषये। इन्द्रावरुणौ देवते अस्य-ऐन्द्रा-[illegible] ह्रस्वात्परत्वेतु भवति आग्निवारुणम्।

[illegible]र्थाः—

तदस्मिन्वर्तत इति नवयज्ञादिभ्य उपसंख्यानम् (वा) ठञ्। नवयज्ञो वर्ततेऽस्मिन्-नावयाज्ञिकः [illegible]लः। पाकयज्ञो वर्ततेऽस्मिन्। पाकयाज्ञिकः। पूर्णमासदण् वक्तव्यः (वा) पूर्णमासोऽस्यां वर्तते-पौर्णमासी तिथिः। पितृव्यमातुलमातामहपितामहाः (४-२-३६) एते निपात्यन्ते। पितुर्भ्रातरि व्यत् (वा)

CC-0. Digitized by eGangotri and MIDF- Delhi

पितुर्भ्राता-पितृव्यः। मातुर्डुलच् (वा) मातुर्भ्राता-मातुलः। मातृपितृभ्यां पितरि डामहच्(वा) मातुः पिता-मातामहः। पितुः पिता-पितामहः। मातरि षिच्च (वा) षित्वात् ङीष्। मातुर्माता-मातामही। पितुर्माता-पितामही।

वि. सास्यदेवतेतिप्रकरणे अर्थान्तरे प्रत्ययान्तराणि सस्यातापातानीमानि। डुलच् डामहच प्रत्यययोर्डित्वाट्टिलोपः। डामहच्प्रत्यययोर्वृत्त्यनुरोधात्। भाष्ये तु आनङादेशोमहच्प्रत्ययोपि निपात्यते।

समूहार्थाः—

तस्य समूहः (४-२-३७) षष्ठ्यन्तात्समूहार्थेऽण् स्यात्। काकानां समूहः काकम्। बकानां समूहः बाकम्। वृकाणां समूहः-वार्कम्। समूहार्थप्रत्ययान्तानां क्लीबत्वं लोकात्। भिक्षादिभ्योऽण् (४-२-३८) एभ्योऽण् स्यात्समूहार्थे। ठगादीनां वक्ष्यमाणबाधकानां बाधनार्थमणग्रहणम्। भिक्षाणां समूह भैक्षम् यस्येतिचेत्याकारलोपः। एवं करीष-कारीषम्। सहस्र-साहस्रम्। अथर्वन्-आथर्वणम्। पदाति-पादातम्। गर्भिणीनां समूहः इत्यर्थे अणि भस्याढेतद्धित इति पुंवद्भावे गर्भिन्शब्दस्य नस्तद्धित इति टिलोपे प्राप्ते-इनण्यनपत्ये (६-४-१६४) अनपत्यार्थेऽणिपरे इन् प्रकृत्या स्यात्। इति गार्भिणम्। कनिन्प्रत्ययान्तात्स्त्रियां तिप्रत्ययान्तयुवतीशब्दात् युवतीनां समूह इत्यर्थेऽणि भस्य इति पुंवद्भावेन तिप्रत्ययनिवृत्तौ अन् इति प्रकृतिभावेन टिलोपाभावे यौवनम्। गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् (४-२-३९) एभ्यः समूहे वुञ् स्यात्। अणोपवादः। एवमुत्तरसूत्रे। गोत्रं लौकिकमपत्यमात्रम्। वुञोऽकादेशः। औपगवानां समूहः-औपगवकम्। एवम्-उक्ष्णाम्-औक्षकम्। टिलोपे आदिवृद्धिः। उष्ट्राणाम्-औष्ट्रकम्। उरभ्राणाम्-उरभ्रकम्। राज्ञां-राजकम्। राजपुत्राणां-राजपुत्रकम्। वत्सानां-वात्सकम्। अजानाम्-आजकम्। राजन्यानां समूहः-मनुष्याणां समूह इति वुञि आपत्यस्यचेति यलोपे प्राप्ते-प्रकृत्याऽके राजन्यमनुष्ययुवानः (वा) इति लोपाभावे राजन्यकम्, मानुष्यकम्। वृद्धाचेति वक्तव्यम् (वा) वृद्धानां समूहः-वार्धकम्। केदाराद्यञ् च (४-२-४०) अस्मात्समूहे यञ्स्यात् चाद्वुञ्। केदाराणां (क्षेत्राणां) समूहः—कैदार्यम्, कैदारकम्। गणिकाया यञिति वक्तव्यम् (वा) गणिकानां समूहः-गाणिक्यम्। ठञ्कवचिनश्च (४-२-४१) अस्मात्समूहे ठञ् चात्केदारादपि। कवचिनां समूहः-कावचिकम्। केदाराणां—कैदारिकम्। ग्रामजनबन्धुभ्यस्तल् (४-२-४३) एभ्यः समूहे तल्स्यात्। तलन्तं स्त्रियाम्। ग्रामाणां समूहः-ग्रामता। एवं जन-जनता। बन्धु-बन्धुता। गजसहायाभ्यां चेति वक्तव्यम् (वा) गजानां समूहः-गजता। सहायानां समूहः-सहायता। अनुदात्तादेरञ् (४-२-४४) अनुदात्तादेः शब्दादञ्स्यात्समूहे। कपोतानां समूहः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कापोतम्। एवं मयूर-मायूरम्। तित्तिरि-तैत्तिरम् अचित्तहस्तिधेनोष्ठक् (४-२-४७) अप्राणिवाचिभ्यो हस्तिधेनुभ्यां च ठक्स्यात्समूहे। अणञोरपवादः। सक्तूनां समूहः-साक्तुकम्। एवं अपूप-अपूपिकम्। हस्ति-हास्तिकम्। धेनु-धैनुकम्। केशाश्वाभ्यां यञ्छावन्यतरस्याम् (४-२-४८) आभ्यां क्रमात् यञ्छौ वा समूहे। पक्षे ठगणौ। केशानां समूहः—कैश्यं, कैशिकम्। अश्वानां समूहः-अश्वीयम्, आश्वम्। पाशादिभ्यो यः (४-२-४९) एभ्यो यः स्यात्समूहे—पाश्या। स्त्रीत्वं लोकात्। एवं तृण-तृण्या, धूम-धूम्या। वन वन्या, वात-वात्या।

वि. १ ब्राह्मणमाणववाडवाद्यन् (४-२-४२) एभ्यो यत्स्यात्समूहे। ब्राह्मणानां समूहः-ब्राह्मण्यम्। माणव-माणव्यम्। वाडव-वाडव्यम्। अन्हः खः क्रतौ (वा) अन्हां (अहःसाध्यसौत्यानां) समूहः-अहीनः यज्ञः। पर्श्वा णस् वक्तव्यः सिति च (१-४-१६) सिति परे पूर्वं पदसंज्ञं स्यात्। तेन अभत्वादोर्गुणो न। पर्शूनां (वङ्त्रिकाणां) समूहः-पार्श्वम्। चरणेभ्यो धर्मवत् (४-२-४६) चरणशब्दाः कठकलापादयः, तेभ्यः समूहे धर्मवत्प्रत्ययाः स्युः। धर्मे-चरणाद्विञित्यादयो वक्ष्यन्ते, तथैव समूहेपि भवन्ति। कठानां धर्मः समूहो वा-काठकम्। एवं कलाप-कालापकम्। छन्दोग-छान्दोग्यम्। ञ्यः। अथर्वन् आथर्वणम्। अञ्। खलगोरथात् (४-२-५०) एभ्यो यः स्यात्समूहे। खलानां समूहः-खल्या। एवं गवां-गव्या। रथानां-रथ्या। इनित्रकट्यचश्च (४-२-५१) खलगोरथेभ्यः क्रमात् इनित्रकट्यचश्च प्रत्ययाः स्युः समूहे। खलानां समूहः-खलिनी। प्रत्ययस्य नान्तत्वान्ङीप्। एवं गवां-गोत्रा। रथानां-रथकट्या। अन्येभ्य इनित्रक्तव्यः (वा) डाक-डाकिनी। कुण्डल-कुण्डलिनी। कुटुम्ब-कुटुम्बिनी। एषु समूहार्थो न दृश्यते। वृत्तौ विशेषाः-गुणादिभ्यो ग्रामज्वक्तव्यः। (वा) गुणाना-समूहः-गुणग्रामः। एवं करण-करणग्रामः। तत्त्व-तत्त्वग्रामः। शब्द-शब्दग्रामः। इन्द्रिय-इन्द्रियग्रामः। आकृतिगणोयम्। कमलादिभ्यो खण्डच् (व) कमलानां समूहः-कमलखण्डम्। एवं कुमुद-कुमुदखण्डम्। पद्म-पद्मखण्डम्। अम्भोज-अम्भोजखण्डम् अयमप्याकृतिगणः। नरकरितुरङ्गेभ्यः स्कन्धच्। नराणां समूहः—नरस्कन्धः। एवं करि-करिस्कन्धः। तुरङ्ग-तुरङ्गस्कन्धः। पुंस्त्वं लोकात्। पूर्वादिभ्यः काण्डः (वा) पूर्वेषां समूह-पूर्वकाण्डम्। एवं तृण-तृणकाण्डम्। कर्मन्-कर्मकाण्डम्। वस्तुतः ग्रामखण्डादिशब्दानां समूहवाचित्वाभ्युपगमे तैः समासेनाप्येते प्रयोगा उपपद्यन्ते।

वि. २ विषयो देशे (४ २-५२) षष्ठ्यन्तादणादयः स्युरत्यन्तपरिशीलितेर्थे देशेभिधेये। शिवीनां विषयः (अत्यन्तपरिशीलितः) शैवो देशः। राजन्यादिभ्यो वुञ् (४-२-५३) एभ्यो वुञ्स्याद्विषये देशे। राजन्यानां विषयो देशः-राजन्यकः। एवं मालव-मालवकः। शैलूष-शैलूषकः। संग्रामे प्रयोजनयोद्धृभ्यः (४-२-५६) प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च प्रथमान्तेभ्योऽस्येति षष्ठ्यन्तार्थेऽण् स्यात्संग्रामेऽभिधेये। सुभद्रा प्रयोजनमस्य-सौभद्रः संग्रामः। भरता योद्धारोऽस्य-भारतः संग्रामः। तदस्यां प्रहरणमिति क्रीडायां णः (४-२-५७) तदस्यां प्रहरणमित्यर्थे प्रथमान्तादायुधवाचकाण्णः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यात्क्रीडायामभिधेयायाम् । दण्डः प्रहरणमस्यां-दाण्डा क्रीडा । एवं मुष्टि-मौष्टा । घञः सास्यां क्रियेति ञः (४-२-५८) घञन्तात्क्रियावाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे ञः स्यात् । घञ इति कृद्ग्रहणाद्गतिकारकपूर्वस्य ग्रहणम् । श्येनतिलस्य पाते ञे (६-३-७१) अनयोर्मुमागमः स्यात् ञप्रत्ययान्ते पातशब्दे परे । श्येनस्य पातः श्येनपातः, श्येनपातोऽस्यां-श्यैनम्पाता मृगया । तिलस्य पातः-तिलपातः, तिलपातोऽस्यां तैलम्पाता स्वधा (पित्र्याक्रिया) अन्यत्र तु न मुम् । दण्डपातोऽस्यां-दाण्डपाता तिथिः ।

अध्येतृवेदित्र्यर्थाः—

तदधीते तद्वेद (४-२-५९) द्वितीयान्तादधीतेवेदेत्यर्थयोरण् स्यात् । व्याकरणमधीते वेद वा वैयाकरणः । अणि नय्वाभ्यामित्यैजागमः । एवं छन्दः–छान्दसः । निरुक्त-नैरुक्तः । मुहूर्त-मौहूर्तः । क्रतूक्थादिसूत्रान्ताट्ठक् (४-२-६०) क्रतुविशेषवाचिभ्य उक्थादिभ्यः सूत्रान्ताच्च ठक्स्यात् अधीते वेदेत्यर्थयोः । अणोपवादः । अग्निष्टोममधीते वेद वा-आग्निष्टोमिकः । एवं वाजपेय-वाजपेयिकः । उक्थं (सामविशेषग्रन्थः) अधीते वेद वा-औक्थिकः । न्यायमधीते वेद वा-नैयायिकः । नय्वाभ्यामित्यैच् । एवं-वृत्ति-वार्त्तिकः । लोकायत-लौकायतिकः । यज्ञ-याज्ञिकः । धर्म-धार्मिकः । संग्रह (ग्रन्थविशेषः) सांग्रहिकः । मुहूर्त-मौहूर्तिकः । आयुर्वेद-आयुर्वेदिकः (ईदृशाउक्थादयः) । संग्रहसूत्रमधीते वेद वा सांग्रहसूत्रिकः । एवं वार्तिकसूत्र-वार्तिकसूत्रिकः । सूत्रान्तात्त्वकल्पादेरेवेष्यते । कल्पसूत्रमधीते-काल्पसूत्रः । अणेत्र न ठक् । विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् (वा) वायसविद्या-वायसविद्यिकः । सर्पविद्या सार्पविद्यिकः । गोलक्षण-गौलक्षणिकः । अश्वलक्षण-आश्वलक्षणिकः । पराशरकल्प पाराशरकल्पिकः । पितृकल्प-पैतृकल्पिकः । अङ्गक्षत्रधर्म त्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम् (वा) ठको निषेधादण् । अङ्गविद्यामधीते वेद वा-आङ्गविद्यः । एवं क्षत्रविद्या-क्षात्रविद्यः । धर्मविद्या-धार्मविद्यः । त्रिविधा विद्या-त्रिविद्या-त्रैविद्यः । आख्यानाख्यायिकेतिहासपुराणेभ्यश्च (वा) यवक्रीतम् (यवक्रीताख्यानम्) मधीते वेद वा यावक्रीतिकः । वासवदत्ता (वासवदत्ताख्यायिका) मधीते वेद वा-वासवदत्तिकः । इतिहासमधीते वेद वा-ऐतिहासिकः । पुराणमधीते वेद वा-पौराणिकः । सर्वादेः सादेश्च लुग्वक्तव्यः (वा) सर्ववेदानधीते वेद वा–सर्ववेदः । अणोलुक् आदिवृद्धयभावः । एवं सर्वतन्त्र-सर्वतन्त्रः । सवार्तिक-सवार्तिकः । इकन्पदोत्तरपदाच्छतषष्टेःषिकन्पथः (वा) पदशब्दोत्तरपदादिकन् शतषष्ठिशब्दपूर्वपदात्पथःषिकन्स्यात् । पूर्वपदमधीते-वेद वा-पूर्वपदिकः । एवं उत्तरपद–उत्तरपदिकः । शतपथ (वाजसनेय ब्राह्मणः) शतपथिकः । षष्टिपथ-षष्टिपथिकः । षित्वान् ङीष्–शतपथिकी षष्टीपथिकी । क्रमादिभ्यो वुन् (४-२-६१) एभ्यो वुन्स्यादध्येतृवेदित्रोः । अणोपवादः । क्रमं (मन्त्रपदप्रस्तारविशेष) मधीते वेद वा–क्रमकः । एवं पद-पदकः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षा-शिक्षकः। मीमांसा-मीमांसकः। वसन्तादिभ्यष्ठक् (४-२-६३) वसन्तादिभ्यष्ठक्स्या-
दृध्येतृवेदित्रोः। अणोपवादः। वसन्तं (वसन्तवर्णनग्रन्थ) मधीते वेद वा-वासन्तिकः।
एवं शरद्-शारदिकः। हेमन्त-हैमन्तिकः। अथर्वाणमधीते-आथर्वणिकः। दाण्डिनायनसूत्रे
निपातनाट्टिलोपो न। प्रोक्ताल्लुक् (४-२-६४) प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य
लुक्स्यात्। पणनं पणः (स्तुतिः) 'घञर्थे कविधानम्' इति कः, सोस्यास्तीति पणी, तस्यगोत्रा-
पत्यं-पाणिनः (अण्)। गाथिविदथिकेशिगणिपणिनश्च (६-४-१६५) एतेऽणि प्रकृत्या स्युः।
इति टिलोपो न। पाणिनस्य युवापत्यं-पाणिनिः। इञ्। ण्यक्षत्रियार्षेत्यत्रार्षेति प्रतिपदोक्तस्यैव-
र्ष्यण एव ग्रहणादिह युवप्रत्ययस्य न लुक्। पाणिनिना प्रोक्तं-पाणिनीयम्। वृद्धाच्छ इति छः।
इञश्चेत्यण् तु न। गोत्रे य इञ् तदन्तादित्युक्तेः। पाणिनीयमधीते वेद वा-पाणिनीयः। अध्येतृ-
वेदित्रर्थस्याणः प्रोक्तादिति लुक्। अणो लुप्तत्वात्स्त्रियां पाणिनीया। आपिशलिना प्रोक्तम्-आपि-
शलम्। इञश्चेत्यण्। आपिशलमधीते वेद वा-आपिशलः। कलापिना प्रोक्तं-कालापकम्।
गोत्रचरणाद्वुञिति वुञ्। कालापकमधीते वेद वा-कालापकः। सूत्राच्च कोपधात् (४-२-६५) सूत्र-
वाचिनः ककारोपधादध्येतृवेदितृप्रत्ययस्य लुक्स्यात्। अष्टावध्यायाः परिमाणमस्य-अष्टकं (पाणिनि-
सूत्रम्) संख्याया अतिशदन्ताया इति कन्। अष्टकमधीयते विदन्ति वा-अष्टकाः पाणिनीयाः।
दशकं (व्याघ्रपदसूत्रं) अधीयते विदन्ति वा-दशकाः-वैयाघ्रपदीयाः। त्रिकं (काशकृत्स्नसूत्रं)
अधीयते विदन्ति वा-त्रिकाः काशकृत्स्नाः। संख्याप्रकृतिकादिति वाच्यम् (वा) नेह लुक्। महा-
वार्तिकसूत्रमधीते वेदवा-माहावार्तिकः, कालापकः। छन्दोब्राह्मणानि च तद्विषयाणि (४-२-६६)
छन्दांसि ब्राह्मणानि प्रोक्तप्रत्ययान्तानि तद्विषयाणि (तदविनाभावीनि) स्युः। अध्येतृवेदितृप्रत्ययं
विना न प्रयोज्यानीत्यर्थः। छन्दांसि-कठेन प्रोक्तमधीयते कठाः। वैशम्पायनान्तेवासिभ्यश्चेति
प्रोक्तार्थणिनेः-कठचरकाल्लुगिति लुकि अध्येतृवेदित्रर्थकाणः प्रोक्ताल्लुगिति लुक्। एवं पिप्पलाद-
पैप्पलादाः (पिप्पलादप्रोक्ताध्येतारः)। एवं भल्लु-भाल्लविनः। शाट्यायन-शाट्यायनिनः। इतरा-
ऐतरेयिणः। पुराणप्रोक्तेष्विति णिनिः प्रोक्ताल्लुगित्यध्येतृवेदित्रणो लुक्। चकारोऽनुक्तसमुच्च-
यार्थः। कल्पे-कश्यपेन प्रोक्तं कल्पमधीयते-काश्यपिनः। कौशिकेन प्रोक्तं कल्पमधीयते-कौशि-
किनः। सूत्रे-पराशरेण प्रोक्तं सूत्रमधीयते-पाराशरिणः भिक्षवः। शिलालिना प्रोक्तं सूत्रमधी-
यते-शैलालिनः नटाः। कल्पेषु प्रोक्तार्थप्रत्ययोत्तरमध्येतृवेदितृप्रत्ययनियमो न।

वि. १ तदधीते तद्वेदेति तच्छन्दपौनरुक्त्येन अधीते वेदेत्यर्थद्वयम्। अध्ययनं शब्दपाठमात्रम्, वेदनमर्थावबोधः।
"सन्ति हि कश्चित्सम्यक्पाठं पठति न च वेत्ति, कश्चिच्च वेत्ति न च स पाठं पठती" ति भाष्यकारः। क्रतूक्थादिसूत्रे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रतुशब्देन तद्विशेषवाचिनामेव ग्रहः। तेभ्यो मुख्यार्थेभ्यो वेदितरि, तत्प्रतिपादकग्रन्थपरेभ्यस्तु अध्येतरि प्रत्यय... उक्थं सामविशेषः तल्लक्षणपरग्रन्थविशेषो लक्षणयोक्थम्। लाक्षणिकादेवास्मात्प्रत्ययः, मुख्यार्थात्तु ठगणौ नेष्येते।

वि. २ व्याकरणत्रिमुनीनां पाणिनीकात्यायनपतञ्जलीनां नामनिष्पत्तौ प्रक्रिया परम्परिता निगूढा च कौ... जनयति।

वि. ३ छन्दोब्राह्मणसूत्रे ब्राह्मणानामपि छन्दस्त्वेन ग्रहेपि पुनर्गृह्यमाणं ब्राह्मणपदं प्राचीनब्राह्मणविशेषानेवाव... घयति। तेन पुराणप्रोक्तेषु ब्राह्मणकल्पेष्वित्यत्र याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वादिति भाष्यकृता प्रतिषि... याज्ञवल्क्यादिब्राह्मणानामत्रापि ग्रहः। तेन याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि-याज्ञवल्क्यानि, सुलभेन प्रोक्तानि ब्राह्मणा... सौलभानि इत्येव, नतु ततोऽध्येतृप्रत्ययस्तस्य प्रोक्ताल्लुगिति लुक् च इति भाष्यवृत्यादिलेखादवगम्यते।

वि. ४ तदधीते तद्वेदेत्यस्य वक्ष्यमाणयोः अधिकृत्य कृते ग्रन्थे तेन प्रोक्तमित्यनयोश्च प्रकरणे सूत्रभाष्यवार्तिकवृत्ति... निर्दिष्टोदाहरणानामनुसन्धाने क्रोड-कङ्कत मुद-पिप्पलाद-कलाप-हरिद्रु छगल तुम्बुरु-लप-लम्बि-पालङ्कि-कामला... प्रभृतीनां संहिताः, सौलभ-भाल्लव-शाट्यायनादि ब्राह्मणानि, अनुब्राह्मणऽनुसूत्र-तित्तिरिश्लोक जालूकश्लोक शिशु... वारतन्तवीय-खाण्डिकीयौ खीय वाररुचकाय-माथुरवृत्त्यादयः, पराशर-मातृ पैङ्गि-काश्यपा-श्मरथ कल्पग्रन्थाः। वार्तिक... संग्रहसूत्र-महावार्तिक-चान्दनगाधिक-कालापक पराशर भिक्षुसूत्र-कर्मन्दि भिक्षुसूत्र-शैलालिनटसूत्र-कृशाश्वनटसू... सूत्रग्रन्थाः। वैयाघ्रपद-दशक (दशाध्यायी) व्याकरणसूत्र-काशकृत्स्नत्रिक (त्र्यध्यायी) व्याकरणसूत्रग्रन्थौ, यावक्रीत-प्रै... यायाताख्यातग्रन्थाः। वासवदत्ता-सुमनोत्तराद्याख्यायिका ग्रन्थाः, गोलक्षणा-श्वलक्षण-वायसविद्या सर्पविद्या ... धर्मविद्या-सांसर्गविद्याग्रन्थाश्च तदात्वे तैर्विज्ञायमानास्तथा पाणिनिसूत्रे तत्र तत्र निर्दिष्टानां व्याकरणाचार्याणां ... चाक्रवर्म-काश्यप-शाकल्य-स्फोटायन-शाकटायनादीनां ग्रन्थाश्चाद्यत्वे नाम्नाप्यनवगम्यमानाः प्राचीनार्यज्ञानविज्ञानस्य बहोः कालाद्बहूच्छेदं सूचयन्तः कल्पेनाप्यनिवर्तनीयाय महते विषादाय जायन्ते।

प्रयोगाः—काषायवासाः। हारिद्रप्रतिमद्युतिः। प्राजापत्येन हविषा चरुणा वैष्णवेन च। पै... गार्हपत्यमुपतिष्ठते। जनतापूजितो जनः। वात्या ववौ भूयशः। कार्तिक्या आग्रहायणी मा... गार्भिणं यौवतं समम्। वार्धकेनोज्ज्वला सभा। पाणिनीया जयन्ति।

प्रश्नाः—रक्ताद्यर्थाः के। अध्येतृवेदित्रर्थकप्रत्ययस्य कुत्र लोपः समूहार्थे कीदृशा प्रत्यया भवन्ति। पाणिनिका... पतञ्जलिशब्दसिद्धिः कथम्। सास्यदेवतेत्यस्य कोर्थः। अधस्तन वाक्यगतांस्तद्धितप्रयोगानुपपादय—

आषाढे श्रावणे भाद्रे कार्तिके च विशेषतः। नैयायिकानां वैयाकरणानां च मीमांसकैःसह विवादोऽभूत्। ... पकाः पाणिनीयाश्च वैयाकरणाः। ऐतिहासिकानां पौराणिकानाञ्च दृष्टिः परितः प्रसरति। काषायावाससा ... शैवाः शाक्ता वैष्णवाश्च।

। इति रक्ताद्यर्थप्रकरणम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चातुरर्थिकाः—

तदस्मिन्नस्तीति देशे तन्नाम्नि (४-२-६७) प्रथमान्तात्तदस्मिन्नस्तीत्यर्थेऽण् स्यात् तन्नाम्ना प्रसिद्धे देशेऽभिधेये। मत्वर्थीयापवादः। उदुम्बराः सन्त्यस्मिन्—औदुम्बरः देशः। एवं- पर्वत- पार्वतः। बल्वज-बाल्वजः। तेन निर्वृत्तम् (४-२-६८) तृतीयान्तात्तेननिर्वृत्तमित्यर्थेऽण् स्यात् तन्नाम्नि देशेऽभिधेये। कुशाम्बेन (कर्त्रा) निर्वृत्ता—कौशाम्बी नगरी। अणन्तत्वात्स्त्रियां ङीप्। सहस्रेण हेतुना निर्वृत्ता-साहस्री परिखा। तस्य निवासः (४-२-६९) षष्ठ्यन्तात्तस्य निवास इत्यर्थे ऽण् स्यात्तन्नाम्नि देशेऽभिधेये। शिवीनां निवासः—शैवो देशः। एवम्-उद्दिष्ट-औद्दिष्टः। अदूरभवश्च (४-२-७०) षष्ठ्यन्तात्तस्यादूरभव इत्यर्थेऽण् स्यात्तन्नाम्नि देशेऽभिधेये। विदिशाया अदूरभवं-वैदिशं नगरम्। हिमवतोऽदूरभवं- हैमवतं नगरम्। चकारः पूर्वेषां त्रयाणामप्यर्थानां सन्निधानार्थस्तेनोत्तरसूत्रेषु चत्वारोऽर्थाः सम्बद्ध्यन्ते।

वि. चतुर्णामर्थानां समाहारश्चतुरर्थी, चतुरर्थ्यां भवाश्चातुरर्थिकाः। यथार्हमेष्वर्थेषु प्रत्ययाः नतु सर्वेभ्यः सर्वे ...। तदस्मिन्नस्तीति इतिकरणो विवक्षार्थः। द्विविधं नाम कदाचित्केनचित्सङ्केतितं नित्यं व्यवहारानुपाति च। ...द्वितीयस्य परिग्रहार्थमितिकरणं भूमादिविशेषपरिग्रहार्थं च। तन्नाम्नीति तु नामधेयताविरोधिनो बलीयसोपि प्रत्यया-...मिति पदमञ्जर्याम्।

वि.२ वुञ्छण्-कठ-जिल-सेनिर-ढञ्-ण्यय-फक्फिञिञ्-ञ्यकक्ठकोऽरीहण-कृशाश्वर्श्य-कुमुद-काश-तृण-...श्म-सखि-सङ्काश-बल-पक्ष-कर्ण-सुतङ्गम-प्रगदिन्-वराह-कुमुदादिभ्यः (४-२-८०) अरीहणादिसप्तदशगणेभ्यो ...षं वुञादयः स्युर्यथार्हं चतुष्वर्थेषु। अणोपवादः। अरीहणादिभ्यो वुञ्- अरीहणेन निर्वृत्तं-आरीहणकम्। ...-रैवतकम्। कृशाश्वादिभ्यश्छण्-कृशाश्वेन निर्वृत्तं--कार्शाश्वीयम्। बर्बराः सन्त्यस्मिन्-बर्बरीयः। ऋष्या-...कः-ऋष्याःसन्त्यस्मिन्-आर्ष्यकः। न्यग्रोध—न्यग्रोधकः। वीरण-वीरणकः। कुमुदादिभ्यष्ठच्-कुमुदानि सन्त्यस्मिन्-...दिकम्। शर्करा-शार्करिकम्। काशादिभ्य इलः—काशाः सन्त्यस्मिन्-काशिलः। कर्दम-कर्दमिलः। तृणादिभ्यः ...र्निर्वृत्तं-तृणशः। प्रेक्षादिभ्यः इनिः-प्रेक्षया निर्वृत्तः प्रेक्षी। न्यग्रोधाः सन्त्यस्मिन्-न्यग्रोधी। अश्मादिभ्यः ...नः सन्त्यस्मिन् अश्मरः। ऊष-ऊषरः। सख्यादिभ्यो ढञ्-सख्या निर्वृत्तं-साखेयम्। छगल-छागलेयम्। ...दिभ्यो ण्यः-संकाशेन निर्वृत्तं-साङ्काश्यम्। कम्पिल-काम्पिल्यम्। बलादिभ्यो यः-बलेन निर्वृत्तं बल्यम्। कुल-...। पक्षादिभ्यः फक्-पक्षेण निर्वृत्तः-पाक्षायणः। पथः पन्थ च (गण) पथोऽदूरभवः-पान्थायनः। कर्णादिभ्यः ...-कर्णेन निर्वृत्तः-कार्णायनिः। वसिष्ठानां निवासः-वासिष्ठायनिः। सुतङ्गमादिभ्य इञ्-सुतङ्गमेन निर्वृत्तः-...निः। श्वेतः-श्वेतिः। प्रगद्यादिभ्यो ञ्यः-प्रगदिनां निवासः-प्रागद्यः। कोविदाराः सन्त्यस्मिन्- कौविदार्यः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वराहादिभ्यः कक्-वराहाः सन्त्यस्मिन्-वाराहकम्। शर्करा-शार्करकम्। कुमुदादिभ्यष्ठक्-कुमुदानि सन्त्यस्मिन् कौमुदिकम्। शाल्मली-शाल्मलिकम्। शिरीषकुमुदादयो द्वित्रेषु गणेष्वपि पठ्यन्ते, तेन विभिन्नाः प्रत्ययाः।

जनपदे लुप् (४-२-८१) ग्रामसमुदायो जनपदः। जनपदे देशविशेषे तन्नाम्नि अभिधेये चातुरर्थिकप्रत्ययस्य लुप्स्यात्। पञ्चालानां (क्षत्रियविशेषाणां) निवासो जनपदः-पञ्चालाः अणो लुपि वृद्धेर्निवृत्तिः लुपियुक्तवदिति वक्ष्यमाणेन प्रकृतिवल्लिङ्गवचनतया बहुत्वम्। कुरु-कुरवः। मत्स्य-मत्स्याः। अङ्ग-अङ्गाः। वङ्ग-वङ्गाः। मगध-मगधाः। सुह्म-सुह्माः। पुण्ड्र-पुण्ड्राः। वरणादिभ्यश्च (४-२-८२) वरणादिभ्यः परस्य चातुरार्थिकप्रत्ययस्य लुप्स्यात्। अजनपदार्थ आरम्भः। वरणाया (नदीविशेषस्य) अदूरभवं नगरं-वरणाः। कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी। एवं काञ्ची मथुरा उज्जयिनी गया तक्षशिला (आकृतिगणोऽयम्) गोदौ कूपविशेषौ तयोरदूरभवः—गोदौ ग्रामः। खलतिकस्य पर्वतस्यादूरभवानि—खलतिकं वनानि। शर्कराया वा (४-२-८३) अस्मात्परस्य चातुरार्थिकस्य लुप् वा स्यात्। ठक्छौ च (४-२-८४) शर्कराया-श्चातुरार्थिकौ ठक्छौ च स्तः। कुमुदादौ वराहादौ च पाठसामर्थ्यात्पक्षे ठक्ककौ, वाग्रहणसामर्थ्यात्पक्षे औत्सर्गिकोऽण्, तस्य लुब्विकल्पः। तेन षड् रूपाणि। शर्कराः सन्त्यस्मिन् शर्कराया निकटे वा अणि शार्करम्, लुपि शर्करा, ठकि शार्करिकम्, छे शर्करीयम् ठचि-शर्करिकम् ककि शार्करकम्।

वि. जनपदेलुबिति ग्रामसमूहरूपे जनपदेभिधेय एव प्रवर्तते, तेनातथाभूते ग्रामनगरादावभिधेयेपि लुबर्थं वरणादिभ्यश्चेति विशेषोपदेशः। यत्र लुपि सति तन्नामधेयं भवति तत्रैव लुप् तेन उदुम्बराः सन्त्यस्मिन्नौदुम्बरो जनपदः विदिशाया अदूरभवो जनपदो वैदिशः इत्यादावणो लुपि नामत्वाभावान्न लुप्।

लुपि युक्तवद्व्यक्तिवचने (१-२-५१) लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। पञ्चालानां निवासो जनपदः—पञ्चालाः। एवं वङ्गाः अङ्गाः मगधाः। गोदौ ग्रामः। खलतिकं वनानि। कटुकबदरी ग्रामः। विशेषणानां चाजातेः (१-२-५२) लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तः जातिवाचकं वर्जयित्वा। पञ्चालाः सुभिक्षाः। गोदौ रमणीयौ। कटुकबदरी प्राचीना। जातिवाचकविशेषणानां तु न–पञ्चाला जनपदः। गोदौ ग्रामः, कटुकबदरी ग्रामः। पञ्चाला जनपदः सुभिक्षः सम्पन्नपानीय इत्यत्र तु सुभिक्षादि जनपदविशेषणं, पञ्चालविशेषणत्वे तु सुभिक्षाः सम्पन्नपानीया इत्येव। एवं गोदौ ग्रामो रमणीयः, रम्यौ गोदौ ग्रामः। हरीतक्यादिषु व्यक्तिः (वा) हरीतक्यादिषु व्यक्तिर्लिङ्गमेव प्रकृतिवत्। हरीतक्याः फलानि–हरीतक्यः। फलप्रत्ययस्याणो हरीतक्यादिभ्यश्चेति लुप्। एवं बदराणि आम्राणि आमलक्यः। खलतिकादिषु वचनम् (वा) एषु वचनमेव प्रकृतिवत्। खलतिकस्य पर्वतस्यादूरभवानि–खलतिकं वनानि। वरणादिभ्यश्चेति लुप्। मनुष्यलुपि प्रति-

Jayatu Sanskritam, Kathmandu, Nepal

(वा) मनुष्यरूपे लुबन्तार्थे विशेषणीभूतानां प्रकृतिवल्लिङ्गवचने न, लुबन्तस्य तु भवतः। चञ्चा अभिरूपः। चञ्चा (तृणमूर्तिः) इव चञ्चा, प्रतिकृत्यर्थे सञ्ज्ञायामिति कनो लुम्मनुष्य इति लुपि सञ्ज्ञाशब्दस्यैव प्रकृतिवल्लिङ्गं नतु तद्विशेषणस्य। वध्रिका (चर्मप्रतिकृतिः) रमणीयः। तदशिष्यं संज्ञाप्रमाणत्वात् (१-२-५३) युक्तवद्वचनं न कर्तव्यं संज्ञाप्रमाणत्वात्। संज्ञाशब्दा नानालिङ्गसंख्याः, बहुवचनान्तानामेव जनपदसंज्ञास्वीकारे प्रकृतिवद्भावातिदेशो न कार्य इत्यर्थः। लुब्योगाप्रख्यानात् (१-२-५४) लुबपि न कर्तव्यो वयवार्थस्येहाप्रतीतेः। योगप्रमाणे च तदभावेऽदर्शनं स्यात् (१-२-५५) योगस्याववार्थस्य यदि बोधकं स्यात्तर्हि योगस्याभावेऽप्रयोगः स्यात्। प्रधान प्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् (१-२-५६) प्रत्ययार्थः प्रधानं प्रकृत्यर्थ उपसर्जनमिति वचनमप्यशिष्यमर्थस्य लोकत एव सिद्धेः। कालोपसर्जने च तुल्यम् (१-२-५७) अतीताया रात्रेः पश्चार्द्धेनागामिन्या रात्रेः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः, विशेषणमुपसर्जनमिति पूर्वाचार्यपरिभाषितमप्यशिष्यत्वेन समानं, लोकत एव सिद्धेः।

वि. पूर्वाचार्योक्त्यनुसारेण प्रत्ययलुपि प्रकृतिवल्लिङ्गवचनातिदेशं सूत्रद्वयेन पूर्वं निर्दिश्य सूत्रकार एव तदतिदेशादिप्रत्याख्यानरूपं स्वमतं तदशिष्यमिति पञ्चसूत्र्या निर्दिशति। यथाहि—दाराः कलत्रं स्त्री गृहाः गृहं वर्षा इत्यादिषु स्वभावतो लिङ्गवचने लोकव्यवहारादेव ज्ञायेते तथैव पञ्चालादीनामपि जनपदादौ नियतलिङ्गवचनयोरपि लोकत एव ज्ञाततया तदुपदेशो न कार्य इति, पञ्चाला इत्यादौ पाञ्चालादिसम्बन्धपुरस्कारेण जनपदबोधकता न, अपि तु स्वत एव संज्ञाविधेयेति प्रत्ययस्तल्लोपश्च नोपदेश्य इति। यदि पाञ्चालादिक्षत्रियसम्बन्धपुरस्कारेण जनपदबोधोऽभ्युपगम्यते तर्हि शूद्रादिराजके जनपदे पञ्चाला इत्यादिप्रयोगो नोपपद्येत इति, एवं प्रकृत्यर्थं प्रति प्रत्ययार्थः प्रधानं (विशेष्यं) उपसर्जनं विशेषणमिति पूर्वाचार्यवचनं नावश्यकमर्थप्राधान्याप्राधान्ययोर्लोकत एव सिद्धेरिति, एवं तेषामद्यतनादिकालोपसर्जनादिपरिभाषाया अपि नावश्यकता लोकत एव प्रसिद्धेरिति पञ्चसूत्रीप्रघट्टकार्थः।

नद्यां मतुप् (४-२-८५) नद्यामभिधेयायां चातुरर्थिको मतुप्स्यात्। अणोपवादः। इक्षवः सन्त्यस्याम् - इक्षुमती। उदुम्बराः सन्त्यस्याम् -उदुम्बरावती। बह्वच्कत्वेन मतौबह्वचोऽनजिरादीनामिति दीर्घः। एवं वारणावती पुष्करावती मशकावती। भागीरथी भैमरथी इति तु तेननिर्वृत्तमित्यणि मतुबन्तस्या नामत्वान्न मतुप्। मध्वादिभ्यश्च (४-२-८६) एभ्यश्चातुरार्थिको मतुप्स्यात्। अनद्यर्थ आरम्भः। मधूनां निवास—मधुमान्। एवं वेणुमान् इक्षुमान् हिमवान् ऋक्षवान्। कुमुदनडवेतसेभ्यो ड्मतुप् (४-२-८७) एभ्यश्चातुरार्थिको ड्मतुप्स्यात्। कुमुदानि सन्त्यस्मिन्देशे-कुमुद्वान्। डित्वाट्टिलोपः। झय इति मस्य वः। एवं नड-नड्वान्। वेतस-वेतस्वान्। मादुपधाया इति मस्य वः। कुमुदादीनां प्राचुर्यमप्येषु प्रतीयते। महिषाच्चेति वक्तव्यम् (वा) महिषाः सन्त्य-

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मिन् महिष्मान् देशः। नडशादाड्ड्वलच् (४-२-८८) नडाः सन्त्यस्मिन्—नड्वलः। शादाः (तृणानि) सन्त्यस्मिन्-शाद्वलो देशः।

वि. १ नदीति देशस्य विशेषणं, तेन नदीरूपे देशे तन्नाम्न्यभिधेये इत्यर्थः। नदीदेशयोः सम्बन्धात्पर्वतादेरपि स्थानस्य देशत्वेन ग्रहात् हिमवान् ऋक्षवान् इत्यादिरपि।

वि. २ शिखाया वलच् (४-२-८९) अस्माच्चातुरर्थिको वलच्स्यात्। शिखावलं नाम नगरम्। उत्करादिभ्यः (४-२-९०) एभ्यश्चातुरर्थिकश्छः स्यात्। उत्करीयः। पिप्पलीयम्। भस्त्रीयम्। कितवीयम्। नडादीनां कुक् (४-२-९१) एषां कुगागमः स्याच्चातुरर्थिकश्छोपि। नड–नडकीयम्। प्लक्ष-प्लक्षकीयम्। बिल्वकादिभ्यश्छस्य (६-४-१५३) नडाद्यन्तर्गतो बिल्वकादिः। तेभ्यः परस्य छस्य लुक् स्यात्तद्धिते परे। बिल्वाः सन्त्यस्यां-बिल्वकीया, तत्र वैल्वकाः। भवार्थेऽणि कृते छस्य लोपः। वेत्राणि सन्त्यस्यां-वेत्रकीया, तस्यां भवाः-वैत्रकाः।

वि. ३ चातुरर्थिकप्रत्ययनिष्पन्नाः शब्दाः पूर्वकाले ख्यातानां जनपददेशनगरग्रामपर्वतनद्यादीनां विशेषाणां संज्ञारूपाः तेषु बहुशः प्रचीनतया केषां नामानीति नानुसन्धीयते। गवेषकाणां विमर्शदृष्टिमपेक्षन्ते।

प्रयोगाः—शार्करिकेन पथा व्यथितः पान्थः। अङ्गान्वङ्गान्कलिङ्गांश्च गत्वा तीर्थान्युपासि ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्। माल्यवान्नाम पर्वतः। माहिष्मतीपतिः। भागीरथी भैमरथी पुण्यासौ वारणावती। कुमुद्वान्कुमुदप्राये वेतस्वान् तसे। कौशाम्ब्यां बुद्धनिर्वाणम्।

प्रश्नाः–चातुरर्थिकपदस्य कोऽर्थः। के च चत्वारोऽर्थाः। जनपददेशग्रामनगरादीनां को विशेषः। को विशेषः प्रत्ययलोपे लिङ्गवचनव्यवस्था कीदृशी। नद्यां मतुपश्चातुरर्थिकत्वं भवति न वा। वल्लिङ्गवचनोपदेशस्य प्रत्याख्यानं कुतः कृतम्। अधनस्तनवाक्यगतांस्तद्धितान्तशब्दानुपपादय—

आत्रेयादयः पञ्चालसभायां समवेता बभूवुः। वारणावती पुष्करावती च प्रतीच्यां दिशि पुरा प्रसिद्धे आस्तां। शाद्वलेषु चत्वरेषु युवानो व्यायामानभ्यस्यन्ति। इक्षुमत्यास्तटे नड्वला शर्करिला च भूमिरस्ति।

इति चातुरर्थिकप्रकरणम्

शैषिकाः—

शेषे (४-२-९२) अपत्यादिचतुरर्थ्यन्तादुक्तादन्योऽर्थः शेषः। तत्राणादयो वक्ष्यमाणप्रत्ययाः स्युः। चक्षुषा गृह्यते–चाक्षुषं रूपम्। श्रवणेन गृह्यते–श्रावणः शब्दः। उपनिषदा गृह्यते–औपनिषदः पुरुषः। दृषदि पिष्टाः–दार्षदाः सक्तवः। उलूखले क्षुण्णः–औलूखलो यावकः। अश्वैरुह्यते–आश्वो

Jayatu Sanskritam, Kathmandu, Nepal

चतुर्भिरुह्यते-चातुरं शकटम्। चतुर्दश्यां दृश्यते-चातुर्दशं रक्षः। यथार्हं ग्रहणाद्यर्थेषु उत्तरसूत्रानुपातेष्वनेनाण् विधीयते। तस्यविकार इत्यतः प्राक् शेष इत्यधिकारोपि।

वि. शेष इति लक्षणं (विधिः) चाधिकारश्च। लक्षणेन उत्तरसूत्रानिर्दिष्टेषु ग्रहणक्षुण्णाद्यर्थेषु यथानुरूपं सामान्योऽणो विधानाच्चाक्षुषादिरूपसिद्धिः। तस्येदं विशेषा ह्यपत्यसमूहाद्यर्थास्तेषु वक्ष्यमाणा घादयो माभूवन्निति प्रकरणभेदाय विकारात्प्राक् शेषाधिकारोपि क्रियते। तेन शैशिकात्सरूपः शैषिको नेति नियमस्य विषयलाभोपि।

राष्ट्रावारापाराद्घखौ (४-२-९३) आभ्यां क्रमाद् घखौ स्तः शेषे। तत्रजातः तत्रभव इत्यादिर्वक्ष्यमाणोऽर्थः शेषः, यथार्हं शेषेर्थे प्रत्ययाः। एवमुत्तरत्रापि। अणोपवादः। राष्ट्रे भवो जातो वा-राष्ट्रियः। घस्येयः। अवारपारे भवः-अवारपारीणः। खस्येनः णत्वं च। अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् (वा) अवार-अवारीणः। पार-पारीणः। पारावार-पारावारीणः (पारंगतः)।

वि. राष्ट्रावारेत्यादितो विभाषापूर्वाह्णे त्यन्तं प्रकृतिप्रत्ययमात्रनिर्देशेनार्थविभक्तिविशेषयोः, तत्रजातइत्यादिवक्ष्यमाणेषु विभक्तिमात्रनिर्देशेन प्रकृतिप्रत्ययविशेषयोराकाङ्क्षया मिथोऽन्वयेनैकवाक्यतया तत्रजातः तत्रभव इत्याद्यर्थेषु प्रथमोविभक्त्यन्तेभ्यो राष्ट्रादिप्रकृतिभ्यो घादयष्ट्युट्युलन्ताः प्रत्ययाः स्युरिति लभ्यते। राष्ट्रादिनिर्दिष्टभिन्नप्रकृतिभ्यस्तु तदर्थेषु अणादयः साधारणाः प्रत्यया भवन्त्येव।

ग्रामाद्यखञौ (४-२-९४) अस्माद्यखञौ स्तः शेषे। ग्रामे जातो भवो वा-ग्राम्यः, ग्रामीणः। खस्येनः णत्वं च। कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु (४-२-९६) एभ्यो यथासंख्यं श्वादिष्वभिधेयेषु ढकञ्स्यात् जाताद्यर्थे। कुले जातः-कौलेयकः श्वा। कुक्षौ भवः-कौक्षेयकः असिः। ग्रीवायां भवः-ग्रैवेयकः अलङ्कारः। अन्यत्र तु अणि-कौलः, कौक्षः, ग्रैवः। नद्यादिभ्यो ढक् (४-२-९७) एभ्यो ढक्स्यात् शेषे। नद्यां भवं-नादेयम्। एवं मही-माहेयम्। वाराणसी-वाराणसेयम्। श्रावस्ती-श्रावस्तेयः। कौशाम्बी-कौशाम्बेयः। साल्वा-साल्वेयः। दक्षिणापश्चात्पुरसस्त्यक् (४-२-९८) एभ्यस्त्यक्स्यात् शेषे। दक्षिणा (दक्षिणतः-आजन्तमव्ययं) भवः-दाक्षिणात्यः। एवं पाश्चात्यः। पुरस्-पौरस्त्यः। कित्वादादिवृद्धिः। द्युप्रागपागुदक्प्रतीचो यत् (४-२-१०१) एभ्यः शैषिको यत्स्यात्। दिवि भवं-दिव्यम्। एवं प्राच्-प्राच्यः। अपाच्-अपाच्यः। उदच्-उदीच्यः। प्रत्यच्-प्रतीच्यः। प्राञ्च इत्यादिभ्यो यति सुब्लोपे अनिदितामिति नलोपे अच इत्यकारलोपे चौ इतिदीर्घः, उदञ्चस्तु उद ईदिति ईत्वं विशेषः। अव्ययात्त्यप् (४-२-१०४) अव्ययात्त्यप् स्याच्छैषिकः। अमेहक्वतसित्रेभ्य एव (वा) अमा (सह अन्तिके वा) भवः-अमात्यः। एवं इह-इहत्यः। क्व-क्वत्यः। ततः-ततस्त्यः। कुतः-कुतस्त्यः। यत्र-यत्रत्यः। कुत्र-कुत्रत्यः। तत्र-तत्रत्यः। परिगणनान्नेह त्यप्-उपरिष्टाद्भवः-औपरिष्टः।

CC-0. Digitized by eGangotri and MIDF- Delhi

अणि अव्ययानां भमात्रे टिलोपोऽनित्यः, तेन शाश्वत् भवः-शाश्वतीयः, आराद्भवः—आरात्
इत्यत्र न टिलोपः। त्यब्नेर्ध्रुव इति वक्तव्यम् (वा) नित्यः। निसो गते (वा) ह्रस्वात्तादौ तद्धि
(८-३-१०१) ह्रस्वादिणः परस्य षः स्यात्तादौ तद्धिते। इति षत्वे च। निर्गतो वर्णाश्रमेभ्य
निष्ठ्यः। (चाण्डालादिः)। अरण्याण्णः (वा) अरण्ये जाता-आरण्याः सुमनसः। दूरादेत्यः
दूरे भवः-दूरेत्यः। उत्तरादाहञ् (वा) उत्तरस्मिन्भवः-औत्तराहः। ऐषमोह्यःश्वसोऽन्यतरस्
(४-२-१५) एभ्यस्त्यब्वा स्यात् शेषे। पक्षे वक्ष्यमाणौ ट्युट्युलौ। ऐषमः (अस्मिन्वर्षे) भ
ऐषमस्तनः। ह्यो (गतदिने) भवः—ह्यस्त्यः,ह्यस्तनः। श्वो (आगामिदिने) भवः-श्वस्त्यः, श्वस्त
पक्षे श्वसस्तुट् च इति ठञि तुडागमे द्वारादीनांचेत्यैजागमे च-शौवस्तिकः। दिक्पूर्वपदादसंज्ञायां
(४-२-१०७) असंज्ञाविषयाद्दिक्पूर्वपदात् ञः स्याच्छैषिकः। अणोपवादः। पूर्वस्यां शालायां भ
पौर्वशालः। तद्धितार्थ इति समासे ञे आदिवृद्धिः। एवं दक्षिणशाला-दाक्षिणशालः। अपर
आपरशालः। मद्रेभ्योऽञ् (४-२-१०८) दिक्पूर्वपदान्मद्रशब्दादञ्स्यात् शैषिकः। पूर्वस्मिन्मद्रे भ
पौर्वमद्रः। मद्रैकदेशेवर्तमानस्य मद्रशब्दस्य पूर्वशब्देन सह सामानाधिकरण्यात्तद्धितार्थे
समासेऽञि—दिशोऽमद्राणाम् (७-३-१३) दिग्वाचकाज्जनपदवाचिनो वृद्धिः स्यान्मद्रवर्जम्।
मद्रपर्युदासेनोत्तरपदवृद्ध्यभावादादिवृद्धिरेव। एवं आपरमद्रः। कण्वादिभ्यो गोत्रे (४-२-
एभ्यो गोत्रप्रत्ययान्तेभ्योऽण् स्याच्छैषिकः। कण्वो गर्गादिः। कण्वस्य गोत्रापत्यं-काण्
गर्गादित्वाद्यञ्। काण्वस्य छात्रा इत्यर्थे वृद्धाच्छं बाधित्वा ऽणि यस्येतिचेत्यकारलोपे आ
स्यचेति यकारलोपे-काण्वाः। एवं मुद्गल-मौद्गल्य-मौद्गलाः। पाराशर-पाराशर्य-पाराश
शकल-शाकल्य-शाकलाः। इञश्च (४-२-११२) गोत्रे इञन्तादण् स्याच्छैषिकः। छस्यापवादः। द
गोत्रापत्यं-दाक्षिः। अतइञ्। दाक्षेश्छात्रा.-दाक्षाः। यस्येतिचेतीकारलोपः। एवं प्लक्ष-प्ला
प्लाक्षाः। गोत्रमिह शास्त्रीयं न लौकिकं, तेनेह न पाणिनेरिदं-पाणिनीयम्।

वि. कत्र्यादिभ्यो ढकञ् (४-२-९५) एभ्यो ढकञ्स्याच्छेषे। नगरे जातादिः—नागरेयकः। एवं पुष्कर पौष्कर
माहिष्मती-माहिष्मतेयकः। ग्रामादित्यनुवृत्तेः ग्राम—ग्रामेयकः। कापिश्याः ष्फक् (४-२-९९) कापिशीशब्दात् ष्फक्
च्छेषे। कापिश्यां जातादि—कापिशायनं मधुः। स्त्रियां षित्वान् ङीषि—कापिशायनी द्राक्षा। रङ्कोरमनुष्येऽण्
(४-२-१००) अस्मादण् स्यात् चात्फक् शेषेऽमनुष्येऽभिधेये। रङ्कुषु जनपदेषु जातादि—राङ्कवं राङ्कवायणं कम्बल
प्राग्दीव्यतोऽण्, अवृद्धादपीति वुञ्, 'ओर्देश इति ठञ्, कोपधादण्, कच्छ्राद्यण्, एषामुत्तरोत्तरापवादेनानेन
मनुष्ये तु मनुष्यतत्स्थयोरिति वुञि राङ्कवकः। कन्थायाष्ठक् (४-२-१०२) अस्माट्ठक्स्याच्छेषे। तिर्यक्स्यूतबहुवस्त्र
कन्था। देशविशेष इत्येके। तत्र जातादिः—कान्थिकः। वर्णौ वुक् (४-२-१०३) वर्णर्नाम सिन्धुनदः तस्माद्वुक्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...त्वादित्वादणि जनपदे लुपि वर्णुसन्निकृष्टो देशो वर्णुः (वन्नु इतिख्यातः)। तद्गतार्थवाचकात्कन्थाशब्दाद्वुक् स्यात्। ...ि जातं हिमवत्सु कान्थकम्। तीररूप्योत्तरपदादञ्ञ्यौ (४-२-१०६) तीररूप्योत्तरपदाभ्यां यथासंख्यमञ्ञ्यौ स्तः ...। पल्वलतीरे भवं-पाल्वलतीरम्। शिवरूप्ये भवं-शैवरूप्यम्। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् (४-२-१०६) ...ग्रामवाचिनो बह्वचोऽन्तोदात्तशब्दादञ्स्यात् शेषे। शिवपुरे भवं-शैवपुरम्। एवं माण्डनपुरम्। प्रस्थोत्तरपद...ल्यादिकोपधादण् (४-२-११०) प्रस्थोत्तरपदात्पलद्यादिभ्यः कोपधाच्चाणस्याच्छेषे। माद्रीप्रस्थे भवः-माद्रीप्रस्थः। ...षदि भवः-पारिषदः। शूरसेने भवः-शौरसेनः। निलीनके (ग्रामविशेषे) भव-नैलीनकः।

...संज्ञा—

वृद्धिर्यस्याचामादिस्तद्वृद्धम् (१-१-७३) यस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्। त्यदादीनि च (१-१-७४) त्यदादीन्यपि वृद्धसंज्ञानि स्युः। एङ् प्राचां देशे (१-१-७५) एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने। वा नामधेयस्य वृद्धसंज्ञा वक्तव्या (वा)

वि. अचामिति जातौ बहुवचनं, तेन द्व्यचः शालादेरपि ग्रहः। व्यपदेशिवद्भावेन ज्ञाशब्दस्यापि वृद्धत्वम्। ...दीनां सर्वेषां वृद्धत्वम् प्राग्देशविशेषवाचकानामेङादीनामेव वृद्धत्वम्। रूढशब्दत्वमेव नामधेयत्वम्; नत्वाधुनिकसङ्के-...तत्वेन, तेन घटीयमित्यादेरपि उपपत्तिरिति व्याख्याकारः। देवदत्त इति प्राच्यग्रामविशेषसंज्ञेति वृत्तिः। प्रागुदगादि-...विभागस्तु पूर्वकाले शरावतीं केन्द्रीकृत्य कृतः। उक्तं च वृत्तौ-प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा। विदुषां ...शब्दसिद्धयर्थं सा नः पातु शरावती इति। उक्तं चामरेण-शरावत्यास्तु योऽवधेः। देशः प्राग्दक्षिणः प्राच्य उदीच्यः ...पश्चिमोत्तरः।

वृद्धाच्छः (४-२-११४) वृद्धसंज्ञकाच्छैषिकाच्छः स्यात्। अणोपवादः। शालायां भवः-शालीयः। एवं-माला-मालीयः। गार्ग्य-गार्गीयः। वात्स्य-वात्सीयः। आपत्यस्यचेति यलोपः। ...अयतीररूप्योत्तरपदोदीच्यग्रामकोपधविधीनप्यसौ परत्वाद्बाधते। त्यदादेः-तदीयः, यदीयः, एतदीयः, मम-मदीयः, अस्माकं अस्मदीयः, तव-त्वदीयः, युष्माकं-युष्मदीयः। प्राग्देशे-गोनर्दे (गोण्डा इति ख्याते) भवः-गोनर्दीयः (पतञ्जलिः)। एवं-भोजकटीयः। पक्षेऽणि-गौनर्दः-भौजकटः। नामधेये-दैवदत्तीयः, दैवदत्तः। एङादित्वाभावान्नेह-अहिच्छत्रे भवः-आहिच्छत्रः। कन्याकुब्जे भवः-कान्यकुब्जः अण्। भवतष्ठक्छसौ (४-२-११५) वृद्धाद्भवच्छब्दा...ठक्छसौ स्तः शेषे। छापवादः। भवतोयं-भवदीयः, भावत्कः। इसुसुक्तान्तादिति ठस्य कः अवृद्धा-...द्भवन्तात्तु अणेव-भावतः। काश्यादिभ्यष्ठञ्ञिठौ (४-२-११६) काश्यादिभ्यः शैषिकौ ठञ्-ञिठ एतौ स्तः। ञिठे इकार उच्चारणार्थः। ञकारो द्वयोरित्। काश्यां भवः-काशिकः। स्त्रियां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ठञि ङीपि काशिकी। ञिठे टापि काशिका। यस्येतिचेतीकारलोपः। एवं वेदि-वैदिक, वैदिकी, वैदिका। आपदादिपूर्वपदात्कालान्तात् (गण) आपत्काल-आपत्कालिकी, आपत्कालिका। उर्ध्वकाल-और्ध्वकालिकी, और्ध्वकालिका। तत्काल-तत्कालिकी, तत्कालिका। रोपधेतोः प्राचाम् (४-२-१२३) रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् स्यात् शेषे। पाटलिपुत्रे जातादिः-पाटलिपुत्रकः। एवम्-एकचक्रे-ऐकचक्रकः। काकन्दी-काकन्दकः। माकन्दी-माकन्दकः। जनपदतदवध्योश्च (४-२-१२४) जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाच्छैषिको वुञ् स्यात् छस्यापवादः। अभिसारे जातादिः-अभिसारकः। एवं-आदर्श-आदर्शकः। त्रिगर्त-त्रैगर्तकः। अवृद्धादपि बहुवचनविषयात् (४-२-१२५) अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ् स्याच्छैषिकः। अवृद्धादणः, वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्-अङ्गेषु भवः-आङ्गकः। वङ्गेषु भवः-वाङ्गकः। कलिङ्गेषु-कालिङ्गकः। अवृद्धाज्जनपदावधेः-अजमीढेषु भवः-आजमीढकः। अजकन्देषु-आजकन्दः। वृद्धाज्जनपदात्-दार्वेषु-दार्वकः। जाम्वेषु-जाम्वकः। वृद्धाज्जनपदावधेः-कालञ्जरेषु-कालञ्जरकः। वैकुलिशेषु-वैकुलिशकः। धूमादिभ्यश्च (४-२-१२७) धूमादिभ्यो देशवाचिभ्यः शैषिको वुञ् स्यात्। अणादेरपवादः। धूमे भवः-धौमकः। एवं-खाण्ड-खाण्डकः। माढर-माढरकः। अन्तरीप-अन्तरीपकः। द्वीप-द्वीपकः। दक्षिणापथ-दाक्षिणापथकः। साकेत-साकेतकः। वर्वर-वर्वरकः। समुद्रान्नावि मनुष्ये च (गण) समुद्रे भवा-सामुद्रिका नौः। स्त्रियां टापि प्रत्ययस्थादितीत्वम्। समुद्रे भवः-सामुद्रकः मनुष्यः। अन्यत्र तु अणेव-सामुद्रं जलम्। नगरात्कुत्सनप्रावीण्ययो (४-२-१२८) नगरशब्दाच्छैषिको वुञ्स्यात् कुत्सने प्रावीण्ये च गम्ये। नगरे भव-नागरकः चौरः शिल्पी वा। अन्यत्र तु नगरे भवः-नागरः ब्राह्मणः। अरण्यान्मनुष्ये (४-२-१२९) अरण्याण्ण इत्यस्यापवादः। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् (वा)। अरण्ये भवः-आरण्यकः पन्थाः, अध्यायः, न्यायः, विहारः, मनुष्यः, हस्ती वा। वा गोमयेषु (वा)। आरण्यका, आरण्या, वा गोमयाः, अन्यत्र तु आरण्या, पशवः। विभाषा कुरुयुगन्धराभ्याम् (४-२-१३०) आभ्यां वुञ्वा स्याच्छैषिकः। कुरुषु भवः-कौरवकः। ओर्गुणे ... अकादेशः। पक्षेऽण् कौरवः। युगन्धरे भवः- यौगन्धरकः यौगन्धरः। मद्रवृज्योः कन् (४-२-१३१) आभ्यां शैषिकः कन्स्यात्। मद्रेषु भव- मद्रकः। वृजिषु भवः- वृजिकः। कोपधादण् (४-२-१३२) कोपधाद्देशवाचकाच्छैषिकोऽण् स्यात्। जनपदवुञोपवादः। ऋषिकेषु जातः- आर्षिकः। एवं- महिषिक-माहिषिकः। इक्ष्वाकु-ऐक्ष्वाकः। कच्छादिभ्यश्च (४-२-१३३) देशवाचिभ्यः कच्छादिभ्यः शैषिकोऽण् स्यात्। कच्छे जातादिः- काच्छः। एवं-सिन्धु-सैन्धवः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्णु-वार्णवः। कम्बोज-काम्बोजः। कश्मीर-काश्मीरः। अनूप- आनूपः। कुलूत-कौलूतः। मनुष्यतत्स्थयोर्वुञ् (४-२-१३४) मनुष्ये तत्स्थे चाभिधेये कच्छादेः शैषिको वुञ् स्यात्। अणोऽपवादः। कच्छे जातादिः- काच्छको मनुष्यः। काच्छकं हसितम्। सैन्धवको मनुष्यः। सैन्धविका चूडा। अन्यत्र त्वणेव- सैन्धवं लवणम्, काच्छो गौः। गहादिभ्यश्च (४-२-१३८) एभ्यः शैषिकश्छः स्यात्। अणञोरपवादः। देशाधिकारेपि संभवापेक्षं देशार्थकत्वं गहादिषु। गहे (देशविशेषे) भवः- गहीयः। अन्तःस्थः- अन्तस्थीयम्। सम-समीयम्। विषम-विषमीयम्। अङ्ग-अङ्गीयम्। वङ्ग-वङ्गीयम्। मगध-मगधीयम्। पूर्वपक्ष-पूर्वपक्षीयम्। अपरपक्ष-अपरपक्षीयम्। एकग्राम-एकग्रामीयः। एकवृक्ष-एकवृक्षीयः। उत्तर-उत्तरीयम्। अन्तर-अन्तरीयम्। मुखपार्श्वतसोर्लोपश्च (गण) मुखे पार्श्वयोर्वा जातमित्यर्थे आद्यादित्वात्तसन्ताभ्यां छे तसः सकारस्य लोपे यस्येतिचेत्यकारस्यापि लोपे मुखतीयम्। पार्श्वतीयम्। अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम्। कुग्जनस्य परस्य च (गण) जनस्येदं-जनकीयम्। परस्येदं-परकीयम्। स्वार्थिककन्नन्तात्स्वशब्दाच्छ स्वकीयम्। देवस्य च (गण) देवे भवं-देवकीयम्। वेणुकादिभ्यश्छण् वाच्यः (गण) कुक् च। वेणौ भवं-वैणुकीयम्। वेत्रे भवं-वैत्रकीयम्। उत्तरपदे भवं-औत्तरपदकीयम्। राज्ञः क च (४-२-१४०) राज्ञः ककारोन्तादेशः स्याच्छश्च शैषिकः। पर्वते भवः- पर्वतीयः, मनुष्यः। विभाषाऽमनुष्ये (४-२-१४४) मनुष्यभिन्नेऽभिधेये पर्वताच्छो वा स्यात् शैषिकः। पक्षेऽण्। पर्वते भवानि- पर्वतीयानि-पार्वतानि वा फलानि। पर्वतीयं-पार्वतं वा जलम्।

वि. १ धन्वयोपधाद्वुञ् (४-२-१२१) धन्व (मरुभूमि) वाचिनो यकारोपधाच्च देशवाचिनः शैषिको वुञ्स्यात्। ऐरावते (धन्वनि) भवः- ऐरावतकः। योपधात्—साङ्काश्ये भवः-साङ्काश्यकः। काम्पिल्ये भवः-काम्पिल्यकः। प्रस्थपुरवहान्ताच्च (४-२-१२२) प्रस्थपुरवहान्ताद्देशवाचिनो वुञ्स्याच्छैषिकः। मालाप्रस्थे भव–मालाप्रस्थकः। एवं नान्दीपुर-नान्दीपुरकः। पैलुवह–पैलुवहकः। कच्छाग्निवक्त्रवर्तोत्तरपदात् (४-२-१२६) कच्छाद्युत्तरपदाद्देशवाचिनो वुञ्स्याच्छैषिकः। छाणोरपवादः। दारुकच्छे भवः- दारुकच्छकः। एवं काण्डाग्निः-काण्डाग्नकः। सिन्धुवक्त्र-सैन्धुवक्त्रकः। बाहुगर्त–बाहुगर्तकः।

वि २ अस्मिन्प्रकरणे प्राग्देशोदग्देश बाहीक (बाह्य) ग्रामजनपदादिदेशवाचिभ्यो बहुशब्देभ्यो ऽन्येभ्योपि प्रत्ययविधयो विहिताः सन्ति, परं समयवशेन तेषां व्यवहारस्य विलुप्ततया व्यवहारोपयोगिनामेव केषाञ्चिन्निर्देशः कृतः। निर्दिष्टानामपि देशवाचकानां पश्चिमभारतगतानि बाह्यस्थलानि लोकतः परिचेतव्यानि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युष्मदस्मदोरन्यतरस्यां खञ्च (४-३-१) देशाधिकारो निवृत्तः। युष्मदस्मद्भ्यां शेषे वा खञ् चाच्छः। अन्यतरस्यामिति पक्षे ऽण्। युवयोर्युष्माकं वाऽयं-युष्मदीयः। अनयोरस्माकं वाऽयं-अस्मदीयः। तस्मिन्नणि च युष्माकास्माकौ (४-३-२) एतयोरेतावादेशौ स्तः खञि अणि च। युवयोर्युष्माकं वा-यौष्माकीणः, यौष्माकः। आवयोरस्माकं वा-आस्माकीनः, आस्माकः। खञि-अणि चादिवृद्धिः। तवकममकावेकवचने (४-३-३) एकार्थवाचिनोर्युष्मदस्मदोः तवकममकौ आदेशौ स्तः खञि अणि च। तवायं-तावकीनः, तावकः। ममायं-मामकीनः, मामकः। छे तु- प्रत्ययोत्तरपदयोश्च (७-२-९८) एकार्थवाचिनोर्युष्मदस्मदोर्मपर्यन्तयोस्त्वमावादेशौ स्तः प्रत्यये उत्तरपदे च परे। तवायं-त्वदीयः। मामायं-मदीयः। उत्तरपदे तु तव पुत्रः-त्वत्पुत्रः। मम पुत्रः-मत्पुत्रः। अर्धाद्यत् (४-३-४) अस्माद्यत् स्याच्छेषे। अर्धे भवः-अर्ध्यः। परावराधमोत्तमपूर्वाच्च (४-३-५) परादिपूर्वादर्धाद्यत् स्याच्छेषे। परार्धे भवं-परार्ध्यम्। एवं अवरार्ध्यम्। अधमार्ध्यम्। उत्तमार्ध्यम्। दिक्पूर्वपदाट्ठञ्च (४-३-६) दिक्पूर्वपदादर्धाट्ठञ् स्याच्छेषे, चाद्यत्। पूर्वार्धे भवं-पौर्वार्धिकम्, पूर्वार्ध्यम्। एवं दाक्षिणार्धिकम्, दक्षिणार्ध्यम्। ग्रामजनपदैकदेशादञ्ठञौ (४-३-७) ग्रामैकदेशजनपदैकदेशवाचिनो दिक्पूर्वपदादर्धान्तादञ् ठञौ स्तः शेषे। इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धा, पौर्वार्धिकाः। पूर्वस्मिन्नर्धे भवा इत्यर्थे तद्धितार्थ समासे अञ्ठञौ। मध्यान्मः (४-३-८) अस्मान्मः स्याच्छेषे। मध्ये भवः-मध्यमः। अ साम्प्रतिके (४-३-९) मध्यशब्दादप्रत्ययः स्यात्सांप्रतिकेऽर्थे। सांप्रतिकं न्याय्यं युक्तम् उचितं सममुच्यते। मध्यो (उत्कर्षापकर्षहीनो) वैयाकरणः। मध्यं (नातिह्रस्वं नातिदीर्घं) दारु। मध्या वधूः। द्वीपादनुसमुद्रं यञ् (४-३-१०) समुद्रसमीपस्थद्वीपवाचकाद्द्वीपशब्दाद्यञ् स्याच्छेषे। कच्छाद्यणो मनुष्यवुञश्चापवादः। द्वीपे भवं द्वैप्यम्। अनुसमुद्रत्वभावे तु द्वैपकं द्वैपम्। स्त्रियां द्वैप्या। यञश्चेति ङीप् तु न अपत्याधिकारस्थ यञ एव तत्र ग्रहणात्।

वि. युष्मदस्मदोरित्यत्र युष्मदस्मदोरितियोगविभागेन छविधानम्, खञ्चेतियोगान्तरेण खञो विधानम्, अन्यतरस्यामिति योगान्तरेण छखञोर्विकल्पविधानात्पक्षे णिति न यथासंख्यमिति भाष्योक्त्या इष्टसिद्धिः।

कालाट्ठञ् (४-३-११) कालवाचिभ्यष्ठञ् स्याच्छेषे। काले भवं-कालिकम् एवं सामयिकम्, धार्मिकम्, साम्वत्सरिकं, मासिकम्: सायम्प्रातिकः, पौनःपुनिकः। अव्ययानां भमात्रे टिलोपः षाण्मासिकः, अर्धमासिकः। तत्रजात इति यावत् कालाधिकारः। श्राद्धे शरदः(४-३-१२)अस्माट्ठञ् स्याद् श्राद्धे। ऋत्वणोऽपवादः। शरदि भवं-शारदिकं श्राद्धम्। विभाषा रोगातपयोः(४-३-१३)रोगे आतपे चार्थे शरदष्ठञ्वा स्यात्। पक्षेऽण्। शरदि भवः-शारदिकः, शारदो वा रोग आतपो वा।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वण्-शारदं दधि। निशाप्रदोषाभ्यां च (४-३-१४) आभ्यां ठञ्वा स्याच्छेषे। पक्षेऽण्। निशायां भवं—नैशिकं, नैशम्। प्रदोषे भवं—प्रादोषिकम्, प्रादोषम्। श्वसस्तुट् च (४-३-१५) अस्माट्ठञ्वा स्यात्तस्य तुडागमश्च। श्वो भवं-शौवस्तिकम्। ठञि इकादेशे तुडागमे द्वारादीनांचेति वकरात्पूर्वमैजागमेन औकारः। पक्षे ऐषमोह्यश्वस इति त्यपि श्वस्त्यः। तदभावे सायंचिरमित्यादिना ट्युट्युलोः तुटि च श्वस्तनः। सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् (४-३-१६) सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् स्यात्। सन्धिवेलादिभ्यः-सन्धिवेलायां भवं-सान्धिवेलम्। एवं-सन्ध्या-सान्ध्यम्। अमावाश्या-आमावाश्यम्। त्रयोदशी-त्रायोदशम्। चतुर्दशी-चातुर्दशम्। पौर्णमासी-पौर्णमासम्। प्रतिपद्-प्रातिपदम्। संवत्सरात्फलपर्वणोः (गण) सांवत्सरं फलं पर्व वा। सांवत्सरिकमन्यत्। ऋतुभ्यः-ग्रीष्म-ग्रैष्मम्। शिशिर-शैशिरम्। नक्षत्रेभ्यः-अश्विनी-आश्विनम्। तिष्य-तैषम्। तिष्यपुष्ययोर्नक्षत्राणीति यलोपः। प्रावृष एण्यः (४-३-१७) अस्मादेण्यः स्याच्छेषे। प्रावृट्सु-भवः-प्रावृषेण्यः। वर्षाभ्यष्ठक् (४-३-१८) अस्माट्ठक्स्याच्छेषे। वर्षासु साधु-वार्षिक वासः। कालात्साधुपुष्यत्पच्यमानेष्विति साध्वर्थे। सर्वत्राण् च तलोपश्च (४-३-२२) हेमन्तशब्दादण् स्यात्तलोपश्च लोकवेदयोः। चात्पक्षे ऋत्वण्। हेमन्ते भवं-हैमनम्। अणि हैमन्तम्। वृत्तिकृता तु हेमन्ताच्चेति पूर्वसूत्रे सर्वत्रेत्यपकृष्य ठञि हैमन्तिकमित्यपि स्वीकृतम्। सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च (४-३-२३) सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यः ट्युट्युलौ स्तः तयोस्तुडागमश्च। तुटः प्रागङ्गत्वेनाऽनादेशः, अनद्यतन इत्यादिनिर्देशात्। सायं भवं-सायंतनम्। एवं चिरं-चिरन्तनम्। प्राह्णप्रगयोः पूर्वाह्णवाचिनोरेदन्तत्वं निपात्यते। प्राह्णेतनम्, प्रगेतनम्। अव्ययेभ्यः-दोषातनम्, दिवातनम्, अद्यतनम्, श्वस्तनम्, ह्यस्तनम्। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः (वा) चिरत्नम्। परुत्नम्। परारित्नम्। अग्रादिपश्चाड्डिमच् (वा) अग्रे भवं-अग्रिमम्। आदौ भवं-आदिमम्। पश्चाद्भवं-पश्चिमम्। अव्ययानामिति टिलोपः। अन्ताच्च (वा) अन्ते भवं-अन्तिमम्। विभाषा पूर्वाह्णापराह्णाभ्याम् (४-३-२४) आभ्यां ट्युट्युलौ वा स्तस्तुट् च। पक्षे ठञ्। पूर्वाह्णे भवं-पूर्वाह्णेतनम्। अपराह्णे भवं-अपराह्णेतनम्। घकालतनेष्विति सप्तम्या अलुक्। ठञि पौर्वाह्णिकम्। आपराह्णिकम्। निवृत्तः कालाधिकारः।

वि. कालाट्ठञित्यत्र स्वरूपस्य पर्यायाणां च न ग्रहणमिति पदमञ्जर्युक्तं न युक्तम्, कालिकः सम्बन्धः सामयिकं इत्यादिप्रयोगात्। ठञि कर्तव्ये शार्वरस्य तमसो निषिद्धये इति कालिदासस्य, अनुदितौषसरागा इति भारवेः, समानकालीनमिति तार्किकाणां प्रयोगास्त्वपभ्रंशा इति प्रामाणिकाः। केचित्तु साधुत्वाय पृषोदरादित्वं कल्पयन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्र जातः (४-३-२५) सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः। स्रुघ्ने जातः-स्रौघ्नः। मथुरायां जातः-माथुरः। अण्। राष्ट्रे जातः-राष्ट्रियः। अवारपारे जातः-अवारपारीणः। राष्ट्राावारपाराद्घखौ। ग्रामे जातः-ग्राम्यः, ग्रामीणः। ग्रामाद्यखञौ। प्रावृषष्ठप् (४-३-२६) प्रावृषष्ठप् स्याज्जातार्थे। प्रावृषएण्य इत्यस्यापवादः। प्रावृषि जातः-प्रावृषिकः।

वि. तत्रजातः इत्यर्थमात्रनिर्देशात् अपत्यादिविकारान्तार्थसाधारणा अणादयः राष्ट्रावारपारेत्यादिविशेषविहिता घादयश्च प्रत्यया जातार्थेऽनेन विधीयन्ते।

उत्तरपदस्य (७-३-१०) अधिकारोऽयं हनस्त इत्यतः प्राक्। अवयवादृतोः (७-३-११) अवयववाचिनः पूर्वपदात्परस्य ऋतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते। वर्षाणां पूर्व-पूर्ववर्षाः, पूर्ववर्षासु जातः-पूर्ववार्षिकः। ऋतोर्वृद्धिमद्विधावयवानाम् (वा) इति तदन्तविधिना वर्षाभ्यष्ठगिति ठकि ऋतुवाचकस्यादिवृद्धिः। हेमन्तस्यापरः-अपरहेमन्तः अपरहेमन्ते जातः-अपरहैमनः। सर्वत्राण् च तलोपश्चेत्यणि तलोपे च उत्तरपदादिवृद्धिः। अवयववाचिपूर्वपदाभावान्नेहोत्तरपदवृद्धिः, किन्त्वादिवृद्धिरेव। पूर्वासु वर्षासु भवः-पौर्ववार्षिकः। सुसर्वार्धाज्जनपदस्य (७-३-१२) स्वादिपूर्वकस्य जनपदवाचिन उत्तरपदस्य वृद्धिः स्यात्। सुपञ्चालेषु जातः-सुपाञ्चालकः। सुसर्वार्धदिक्छब्देभ्यो जनपदस्य (वा) इति तदन्तविधिना जनपदतदवध्योश्च अवृद्धादपीति वुञि उत्तरपदस्यादिवृद्धिः। एवं सर्वपञ्चाल-सर्वपाञ्चालकः। अर्धपञ्चाल-अर्धपाञ्चालकः। दिशोऽमद्राणाम् (७-३-१३) दिग्वाचकात्परस्य मद्रभिन्नजनपदवाचिनो वृद्धिः स्यात्। पूर्वपञ्चालेषु जातः-पूर्वपाञ्चालकः। अमद्रेत्युक्तेरिह पूर्वपदस्यैवादिवृद्धिः-पौर्वमद्रः। प्राचां ग्रामनगराणाम् (७-३-१४) दिग्वाचकात्परेषां प्राच्यग्रामनगरवाचिनामवयवस्यादेर्वृद्धिः स्यात्। पूर्वेषु कामशम्यां भवः-पूर्वैषुकामशमः। अण्। पूर्वपाटलिपुत्रे भवः-पूर्वपाटलिपुत्रकः। अवृद्धादपीति वुञ्।

वि. पूर्वैषुकामशम इत्यत्र संज्ञात्वाद्दिग्पूर्वपदादिति ञोभावेनाणेव। समुदायस्य ग्रामनामत्वेपि उत्तरपदस्यापि नामत्वमस्त्येवेत्युत्तरपदादिवृद्धिः। उत्तरपदादिवृद्धिविधाने पूर्वपदादिवृद्धिनिवृत्तेः फलत्वेन पाटलिपुत्रशब्दे आदिवृद्धिसत्त्वेऽपि तद्विधानं सफलम्।

पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् (४-३-२८) एभ्यो जातार्थे वुन्स्यात्। पूर्वाह्णे जातः-पूर्वाह्णकः। एवं-अपराह्ण-अपराह्णकः। विभाषापूर्वाह्णेत्यस्यापवादः। आर्द्रा-आर्द्रकः, मूल-मूलकः। श्रविष्ठादिलुकोऽत्वणोपवादः। प्रदोष-प्रदोषकः। निशाप्रदोषाभ्यामित्यस्यापवादः। अवस्कर-अवस्करकः। औत्सर्गिकाणोपवादः। पथः पन्थ च (४-३-२९) पथो वुन्स्यात्प्रकृतेः पन्थादेशश्च। पथि जातः-पन्थकः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमावास्याया वा (४-३-३०) अस्माद्वुन्वा स्यात्। पक्षे सन्धिवेलेत्यण्। अमावास्यायां जातः-अमावास्यकः, आमावास्यः। अ च (४-३-३१) अमावास्याशब्दादप्रत्ययः स्यात्। अमावास्यायां जातः-अमावास्यः। सिन्ध्वपकराभ्यां कन् (४-३-३२) आभ्यां कन्स्याज्जातार्थे। सिन्धौ जातः-सिन्धुकः। कच्छाद्यणो मनुष्यवुञश्चापवादः। अपकरे जातः-अपकरकः। औत्सर्गिकाणोपवादः। अणञौ च (४-३-३३) सिन्ध्वपकराभ्यां क्रमादणञौ च स्तः। सिन्धौ जातः-सैन्धवः अपकरे-आपकरः।

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् (४-३-३४) नक्षत्रवाचिभ्य एभ्यः परस्य जातार्थप्रत्ययस्य लुक्स्यात्। लुक् तद्धितलुकि (१-२-४६) तद्धितलुकि उपसर्जनस्त्रीप्रत्ययस्य लुक्स्यात्। श्रविष्ठासु (धनिष्ठासु) जातः—श्रविष्ठः। एवं फल्गुनः, अनुराधः, इत्यादि। चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् (वा) चित्रायां जाता–चित्रा। रेवती, रोहिणी आभ्यां लुक्तद्धितलुकीति लुकि गौरादेराकृतिगणत्वात्पुनर्ङीष्। स्थानान्तगोशालखरशालाच्च (४-३-३५) एभ्यो जातार्थप्रत्ययस्य लुक्स्यात्। गोस्थाने जातः–गोस्थानः। एवं गोशालः, खरशालः, विभाषासेनेति नपुंसकत्वे गोशालखरशालशब्दयोर्ह्रस्वान्तत्वम्। नक्षत्रेभ्यो बहुलम् (४-३-३७) एभ्यो जातार्थप्रत्ययस्य बहुलं लुक्स्यात्। रोहिणः रौहिणः।

कृतलब्धक्रीतकुशलाः (४-३-३८) सप्तमीसमर्थात्कृतादिष्वर्थेषु अणादयो घादयश्च स्युः। स्रुघ्ने कृतः, लब्ध क्रीतः कुशलो वा-स्रौघ्नः। एवं मथुरायां-माथुरः। राष्ट्रे-राष्ट्रियः। प्रायभवः (४-३-३९) सप्तमीसमर्थात्प्रायभव इत्यर्थे आणदयो घादयश्च स्युः। स्रुघ्ने प्रायेण (बाहुल्येन) भवः—स्रौघ्नः। मथुरा-माथुर.। राष्ट्र-राष्ट्रियः। संभूते (४-३-४१) सप्तमीसमर्थात्संभूतार्थेऽणादयो घादयश्च स्युः। स्रुघ्ने संभूत-स्रौघ्नः। एवं मथुरा-माथुरः। राष्ट्र-राष्ट्रियः। कोशाड्ढञ् (४-३-४२) अस्माड्ढञ् स्यात् संभूतार्थे। अणोपवादः। कोशे सभूतं-कौशेयं, वस्त्रम्। कालात्साधुपुष्यत्पच्यमानेषु (४-३-४३) सप्तम्यन्तेभ्यः कालवाचिभ्यः साधुपुष्यत्पच्यमानइत्यर्थेषु यथाविहितं प्रत्ययाः स्युः। हेमन्ते साधुः-हैमनः, हैमन्तः प्रावारः। सर्वत्राण् च तलोपश्चेत्यण्तलोपौ, पक्षे ऋत्वण्। शिशिर-शैशिरम् अनुलेपनम्। वसन्ते पुष्यन्ति वासन्त्यः कुन्दलताः। ग्रीष्म-ग्रैष्माः, पाटलाः। शरदि पच्यन्ते-शारदाः, शालयः। ग्रीष्म-ग्रैष्मा यवाः। ऋत्वण्। तत्रभव इति यावत्कालादित्यनुवर्तते। उप्ते च (४-३-४४) कालवाचिनः सप्तम्यन्तादुप्तेर्थे यथाविहितं प्रत्ययाः स्युः। हेमन्ते उप्यन्ते-हैमन्ता यवाः। ग्रीष्म-ग्रैष्मा व्रीहयः। आश्वयुज्या वुञ् (४-३-४५) अस्माद्वुञ् स्यादुप्तेर्थे। आश्वयुज्याम् उप्ताः—आश्वयुजकाः माषा। कालाट्ठञोपवादः। ग्रीष्मवसन्तादन्यतरस्याम् (४-३-४६) आभ्यां वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुञ्स्यादुप्तेर्थे । पक्षे ऋत्वण् । ग्रीष्मे उप्तं-ग्रैष्मकं ग्रैष्मम् । वसन्ते उप्तं-वासन्तकं वासन्तम् । देयमृणे (४-३-४७) सप्तम्यन्तात्कालवाचकाद्देयमित्यर्थे यथाविहितं प्रत्ययः स्यादृणेभिधेये । मासे देयं-मासिकम् ऋणम् । कालाट्ठञ् । एवम्-अर्धमास-आर्धमासिकम् । संवत्सर-सांवत्सरिकम् । वर्ष-वार्षिकम् । ऋण इत्युक्तेर्नेह-मासे देया भिक्षा । ग्रीष्मावरसमाद्वुञ् (४-३-४९) आभ्यां वुञ्स्याद्दे ऋणेभिधेये । ग्रीष्मे देयं ग्रैष्मकम् ऋणम् । अवरसमासु देयम्-आवरसमम् ऋणम् । संवत्सराग्रहा-यणीभ्यां ठञ्च (४-३-५०) आभ्यां ठञ् स्याद्वाद्वुञ् देयार्थे ऋणेभिधेये । संवत्सरे देयं-सांवत्सरिकं सांवत्सरकम् ऋणम् । आग्रहायण्यां देयं-आग्रहायणिकम् आग्रहायणकम् ऋणम् ।

वि. व्याहरति मृगः (४-३-५१) कालवाचिनः सप्तम्यन्तात् व्याहरतीत्यर्थेऽणादयः स्युर्मृगेभिधेये । निशायां व्याहरति-नैशिकः, नैशः मृगः । निशाप्रदोषाभ्यां चेति वा ठञ् । एवं प्रदोष-प्रादोषिकः प्रादोषः मृगः । मृगोऽत्र निशायां व्याहरत्युलूकः । तदस्य सोढम् (४-३-५२) प्रथमान्तात्कालवचकादस्य सोढमित्यर्थे । निशासहचरितम् निशा, तत् सोढं (जितमभ्यस्तं) अस्य छात्रस्य—नैशिकः नैशश्छात्रः । प्रदोष सहचरिताध्ययनं प्रदोषः तत्सोढम् प्रादोषिकः, प्रादोषः । निशाप्रदोषेति वा ठञ् ।

तत्र भवः (४-३-५३) कालादिति निवृत्तम् । सप्तम्यन्ताद्भवार्थे यथाविहितं प्रत्ययाः स्युः । भवनं स नतु जन्म तस्य जात इति गतार्थत्वात् । स्रुघ्ने भवः—स्रौघ्नः । मथुरायां भवः-माथुरः । राष्ट्रे भवः-राष्ट्रियः । दिगादिभ्यो यत् (४-३-५४) एभ्यो यत्स्याद्भवार्थे । अणश्छस्य चापवादः । दिशि भवः-दिश्यः । वर्गे भवः-वर्ग्यः । एवं गण-गण्यम् पक्ष-पक्ष्यम् । मेधा-मेध्यम् । पथिन्-पथ्यम् । एवम् रहस्यम् । आदि-आद्यम् । अन्त्य-अन्त्यम् । मुख-मुख्यम् । जघन-जघन्यम् । यूथ-यूथ्यम् । न्याय-न्याय्यम् । वंश-वंश्यः । शरीरावयवाच्च (४-३-५५) शरीरावयववाचिनः सप्तम्यन्ताद्भवार्थे यत् स्यात् अणोपवादः । दन्त्येषु भवं-दन्त्यम् । एवं कण्ठ-कण्ठ्यम् । ओष्ठ-ओष्ठ्यम् । तालु-ताल्व्यम् ओर्गुणे वान्तोयीत्यव् । मूर्धन्-मूर्धन्यम् । उदर-उदर्यम् । शिरस-शिरस्यम् । ग्रीवाभ्योऽण् च (४-३-५७) अस्मादण्स्याच्चाड्ढञ् भवार्थे । यतोपवादः । ग्रीवासु भवं-ग्रैवं, ग्रैवेयम् । ग्रीवाशब्दार्थोधमन्यस्त बहुत्वाद्बहुवचनम् । अध्यात्मादेष्ठञिष्यते (वा) आत्मनीति अध्यात्मम्, अध्यात्मं भवं-आध्यात्मिकम् देवेष्विति अधिदेवम्, अधिदेवं-भवं-आधिदैविकम् । ठञि पूर्वपद एव वृद्धौ प्राप्तायाम् अनुशतिकादीनां च (७-३-२०) एषामुभयपदवृद्धिः स्यात् ञिति णिति किति च परे । इत्युभय वृद्धिः । भूतेषु इत्यधिभूतम्, अधिभूतं भवं-आधिभौतिकम् । उभयतो वृद्धिः । एवम् इहलोक-ऐहलौकिकम् । परलोक-पारलौकिकम् । सर्वलोक-सार्वलौकिकम् । जिह्वामूलाङ्गुलेश्छः (४-३-६२)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आभ्यां छः स्याद्भवार्थे। यतोपवादः। जिह्वामूले भवं-जिह्वामूलीयम्। अङ्गुलीयम्। वर्गान्ताच्च (४-३-६३) अस्माच्छः स्याद्भवार्थे। अणोपवादः। कवर्गे भवं-कवर्गीयम्। पवर्ग-पवर्गीयम्। अशब्दे यत्खावन्यतरस्याम् (४-३-६४) शब्दभिन्नेऽभिधेये वर्गान्ताद्यत्खौ वा स्तो भवार्थे। पक्षे छः। मद्वर्गे भवः-मद्वर्ग्यः, मद्वर्गीणः मद्वर्गीयः जनः। एवं प्रथमवर्ग-प्रथमवर्ग्यः, प्रथमवर्गीणः, प्रथमवर्गीयः। त्वद्वर्ग-त्वद्वर्ग्यः, त्वद्वर्गीणः, त्वद्वर्गीयः।

टि. दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् (४-३-५६) दृत्यादिभ्यो भवार्थे ढञ् स्यात्। दृतौ-(चर्मपात्रे) भवं-दार्तेयम्। आदिवृद्धिरार्। एवं कुक्षि-कौक्षेयम्। कलशि-कालशेयम्। अहि-आहेयम्। पञ्चजनादुपसंख्यानम् (वा) पञ्चजने भवं-पाञ्चजन्यम् (शङ्खविशेषः)। अन्तःपूर्वपदाट्ठञ् (४-३-६०) अन्तःपूर्वपदादव्ययीभावाद्भवार्थे स्यात्। वेश्मनि इति अन्तर्वेश्मम्, अन्तर्वेश्मं भवं-आन्तर्वेश्मिकम्। एवं-अन्तर्गण-आन्तर्गणिकम्। अन्तर्वेदि-आन्तर्वेदिकम्। ऊर्ध्वदेहाच्च (वा) ऊर्ध्वदेहं भवं-और्ध्वदेहिकम्। कर्णललाटात्कनलङ्कारे (४-३-६५) आभ्यां भवार्थे कन्स्यादलङ्कारेऽभिधेये। यतोपवादः। कर्णे भवा-कर्णिका (कर्णभूषणम्)। ललाटे भवा-ललाटिका (ललाटाभूषणम्)। स्त्रीत्वाट्टापि प्रत्ययस्थादितीत्वम्।

तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः (४-३-६६) चकारस्तत्रभवार्थमपि समुच्चिनोति। सप्तम्यन्ताद्भवार्थे, व्याख्यानार्थे व्याख्यातव्यग्रन्थबोधकाद्यथाविहितं प्रत्ययाः स्युः। सुपां व्याख्यानो ग्रन्थः-सौपः। सुप्सु भवं-सौपम्। अण्। एवं तिङ्-तैङः। कृत्-कार्त्तः। क्रतुयज्ञेभ्यश्च (४-३-६८) सोमसाध्याः क्रतवः, अन्ये यज्ञाः। एभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानार्थयोष्ठञ् स्यात्। अणोपवादः। अग्निष्टोमस्य (अग्निष्टोमग्रन्थस्यः) व्याख्यानः तत्र भवो वा-आग्निष्टोमिकः। एवं वाजपेय-वाजपेयिकः। राजसूय-राजसूयिकः। पाकयज्ञ-पाकयज्ञिकः। नवयज्ञ-नावयज्ञिकः। पौरोडाशपुरोडाशात्ष्ठन् (४-३-७०) आभ्यां ष्ठन् स्याद्भवव्याख्यानयोः। पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः। प्रज्ञादित्वात्स्वार्थेऽण्। तस्य व्याख्यानस्तत्र भवो वा-पुरोडाशिकः, पौरोडाशिकः। छन्दसो यदणौ (४-३-७१) अस्माद्भवव्याख्यानयोर्यदणौ स्तः। छन्दसो व्याख्यानस्तत्र भवो वा-छन्दस्यः, छान्दसः। ऋगयनादिभ्यः (४-३-७३) ऋगयनादिभ्यो भवव्याख्यानयोरण् स्यात्। ठञादेरपवादः। ऋगयनमृक्संहिता तस्य व्याख्यानं तत्र भवो वा-आर्गयनः। एवम्-उपनिषद्-औपनिषदः। व्याकरण-वैयाकरणः। निगम-नैगमः। निरुक्त-नैरुक्तः। शिक्षा-शैक्षः।

टि. बह्वचोऽन्तोदात्ताट्ठञ् (४-३-६७) बह्वचोऽन्तोदात्ताद्व्याख्यातव्यनाम्नः भवव्याख्यानयोः ठञ्स्यात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अणोपवादः। षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वम्, तस्य व्याख्यानस्तत्रभवो वा षात्वणत्विकः। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् (४-३-७२) द्व्यजादिभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानयोष्ठक्स्यात्। अणादेरपवादः। इष्टेः (इष्टिग्रन्थस्य) व्याख्यानस्तत्रभवो वा-ऐष्टिकः। एवं शेष-शैषिकः। पशु-पाशुकः। ... परत्वाट्ठस्यकः। चतुर्होतृ-चातुर्होतृकः। ब्राह्मण-ब्राह्मणिकः। ऋक्-आर्चिकः। प्रथम-प्राथमिकः। अध्वर-आध्वरिकः। पुरश्चरण-पौरश्चरणिकः। नाम-नामिकः। आख्यात-आख्यातिकः।

तत आगतः (४-३-७४) पञ्चमीसमर्थादागत इत्यर्थे यथाविहितं प्रत्ययाः स्युः। स्रुघ्नादागतः स्रौघ्नः। मथुराया आगतः-माथुरः। औत्सागकोण्। ठगायस्थानेभ्यः (४-३-७५)- ह्हारि... स्वामिग्राह्यो भाग आयः। आयस्थानवाचिभ्यष्ठक्स्यात्तत आगत इत्यर्थे। शुल्कशालाया आगतः- शौल्कशालिकः। विद्यायोनिसम्बन्धेभ्यो वुञ् (४-३-७७) विद्यासम्बन्धवाचिभ्यो यौनसम्बन्धवाचिभ्यश्च तत आगत इत्यर्थे वुञ्स्यात्। अणोपवादः। विद्यासंबन्धिभ्यः— उपाध्यायादागतम्- औपाध्यायकम्। शिष्येभ्य आगतं-शैष्यकम्। आचार्यादागतम्-आचार्यकम्। यौनसम्बन्धिभ्यः- पितामहादागतम्—पैतामहकम्। एवम्-मातामह-मातामहकम्। मातुल-मातुलकम्। ऋतष्ठञ् (४-३-७८) विद्यायोनिसम्बन्धेभ्य ऋकारान्तात् आगत इत्यर्थे ठञ्स्यात्। होतुरागतं-हौतृकम्। उकः परत्वाट्ठस्यकः। भ्रातुरागतं-भ्रातृकम्। एवं मातृ-मातृकम्। स्वसृ-स्वसृकम्। पितुर्यच्च (४-३-७९) अस्मादागत इत्यर्थे यत्स्याच्चाट्ठञ्। पितुरागतं-पित्र्यं। रीङ् ऋत इति रीङादेशे यस्येतिचेतीलोपः। पैतृकम्। उकः परत्वाट्ठस्य कः। प्रभवति (४-३-८३) पञ्चमीसमर्थात्प्रभवतीत्यर्थे यथाविहितं प्रत्ययः स्यात्। प्रभवति प्रकाशने प्रथमत उपलभ्यत इत्यर्थः। हिमवतः प्रभवति-हैमवती गङ्गा। औत्सर्गिकोण्। स्त्रियां ङीप्। एवं दरद्-दारदी सिन्धुः। विदूराञ्ञ्यः (४-३-८४) अस्मात्प्रभवतीत्यर्थे ञ्यः स्यात्। विदूरात्प्रभवति-वैदूर्यः मणिः।

वि. "नह्यसौ विदूरात् प्रभवति किन्तर्हि वालवायात् प्रभवति विदूरे तु संस्क्रियते एवं तर्हि वालवायो विदूरं च..." भाष्योक्त्या वालवायशब्दात् ञ्यः वालवायस्थाने विदूरादेशेन वैदूर्य इति सिध्यतीत्यवबोधेपि एतत्प्रसङ्गनिदर्शनं ... "वणिजो वाराणसीं जित्वरीत्युपाचरन्ति, एवं वैयाकरणा वालवायं विदूर इत्युपाचरन्तीति" भाष्यलेखेन विदूरशब्दस्य लक्षणया वालवायबोधेन वालवायस्थाने विदूरादेशं विनैव निर्वाह इति सिद्धान्तं प्रतीयते।

तद्गच्छति पथिदूतयोः (४-३-८५) द्वितीयासमर्थाद्गच्छतीत्यर्थे प्रत्ययः स्यात्पथि दूते वाभिधेये। स्रुघ्नं गच्छति-स्रौघ्नः पन्था दूतो वा। एवं मथुरा-माथुरः। अभिनिष्क्रामति द्वारम् (४-३-८६) द्वितीयासमर्थादभिनिष्क्रामतीत्यर्थे प्रत्ययः स्याद्द्वारेऽभिधेये। आभिमुख्येन निष्क्रमणं-अभिनिष्क्रमणम्। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जजनपदद्वारम्। एवं मथुरा—माथुरं द्वारम्। अधिकृत्य कृते ग्रन्थे...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(४-३-८७) द्वितीयासमर्थात् अधिकृत्य कृत इत्यर्थे प्रत्ययः स्यात् ग्रन्थेऽभिधेये। कुत्सितं शरीरं शरीरकं, शरीरकस्यासौ-शारीरको जीवात्मा, तमधिकृत्य कृतो ग्रन्थः-शारीरकीयः। वृद्धाच्छः। शारीरकं भाष्यमिति तु अभेदोपचारात्। सुभद्रामधिकृत्य कृतो ग्रन्थः-सौभद्रः। भरतानधिकृत्य कृतो ग्रन्थः-भारतम्। औत्सर्गिकोऽण्। शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः (४-३-८८) प्रत्ययश्छः स्यादधिकृत्य कृते ग्रन्थे। शिशूनां क्रन्दनं-शिशुक्रन्दः, तमधिकृत्य कृतो ग्रन्थः-शिशुक्रन्दीयः। एवं यमसभा यमसभीयः। द्वन्द्वे-श्येनकपोतौ अधिकृत्य कृतो ग्रन्थः-श्येनकपोतीयः। किरातार्जु-नीयम्, शब्दार्थसम्बन्धीयम् प्रकरणम्, वाक्यपदीयम्। इन्द्रजनन-इन्द्रजननीयम्। इन्द्रजननादिरा-कृतिगणः। द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः (वा) दैवासुरम्। गौणमुख्यम्।

वि. वृत्तौ वासवदत्तां सुमनोत्तरां वाधिकृत्य कृतो ग्रन्थ (आख्यायिका) वासवदत्ता सुमनोत्तरा इति सिद्धये लुवा-ख्यायिकार्थस्य प्रत्ययस्य बहुलम्। इति प्रत्ययलोपो विहितः। परं वासवदत्तादेस्तदाख्यायिकायामभेदोपचारेणैव गतार्थतया प्रत्ययलोपयोर्विधानं नावश्यकमित्यन्यैरुपेक्षितम्।

सोऽस्य निवासः (४-३-८९) प्रथमासमर्थादस्य निवास इत्यर्थे प्रत्ययः स्यात्। स्रुघ्नो निवासोऽस्य-स्रौघ्नः। एवं-माथुरः। राष्ट्रियः। अभिजनश्च (४-३-९०) प्रथमासमर्थादस्याभिजन इत्यर्थे प्रत्ययः स्यात्। स्रुघ्नोभिजनोस्य-स्रौघ्नः। एवं माथुरः। राष्ट्रियः। यत्र स्वयं वसति स निवासः, यत्र पूर्वैरुषितं सोभिजनः इति बिभेदः। सिन्धुतक्षशिलादिभ्योऽणञौ (४-३-९३) सिन्ध्वादिभ्यस्तक्षशिला-दिभ्यश्च यथासंख्यमणञौ स्तोऽभिजनार्थे। सिन्धुरभिजनोस्य-सैन्धवः। एवं वर्णु-वार्णवः। गन्धार-गान्धारः। कम्बोज-काम्बोजः। कश्मीर-काश्मीरः। किष्किन्धा-कैष्किन्धः। तक्षशिला-भिजनोस्य-ताक्षशिलः। एवं किन्नरः-कैन्नरः। वर्वर-वार्वरः। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः (४-३-९४) तूद्यादिशब्देभ्यः ढक् छण् ढञ् यक् एते यथासंख्यं स्युरभिजनेऽर्थे। तूदी-तौदेयः। शलातुर-शालातुरीयः (पाणिनिः)। वर्मती-वार्मतेयः। कूचवार-कौचवार्यः।

वि. भक्तिः (४-३-९५) भज्यते सेव्यते इति भक्तिः। अस्य भक्तिरित्यर्थे प्रथमान्तादणादयः स्युः। स्रुघ्नो भक्ति-रस्य-स्रौघ्नः। मथुरा-माथुरः। अचित्ताददेशकालाट्ठक् (४-३-९६) देशकालभिन्नादचित्तवाचिनष्ठक्स्यादस्यभक्ति-रित्यर्थे। अपूपा भक्तिरस्य-आपूपिकः। शष्कुली-शाष्कुलिकः। पायस-पायसिकः। वासुदेवार्जुनाभ्यां वुन् (४-३-९८) वुन्स्यादभक्त्यर्थे। वासुदेवकः। अर्जुनकः। (वासुदेवभक्तः, अर्जुनभक्तः) जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने (४-३-१००) बहुवचने जनपदसमानशब्दानां जनपदस्वामि (क्षत्रिय) वाच-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कानामस्यभक्तिरित्यर्थे प्रकृतिप्रत्ययश्च सर्वं जनपदवत्स्यात्। जनपदतदवध्योश्चेतिप्रकरणोक्तप्रत्यया अत्रातिदिश्यन्ते। अङ्गा जनपदो भक्तिरस्य—आङ्गकः। अङ्गाः क्षत्रिया भक्तिरस्य—आङ्गकः। एवं-वङ्ग-वाङ्गकः। सुह्म-सौह्मकः।

तेन प्रोक्तम् (४-३-१०१) तृतीयासमर्थात्प्रोक्तमित्यर्थे यथाविहितं प्रत्ययाः स्युः। प्रकर्षेण प्रोक्तं व्याख्यानेनाध्ययनेन वा, प्रथमप्रकाशितं, नतु कृतं, तस्य कृते ग्रन्थे इत्यनेन गतार्थत्वात्। पाणिनिना प्रोक्तं-पाणिनीयम्। वृद्धाच्छः। एवम्-आपिशलि-आपिशलम्। काशकृत्स्न-काशकृत्स्नम्। अन्येन कृता माथुरेण प्रोक्ता (प्रथमप्रकाशिता)-माथुरी वृत्तिः। **तित्तिरिवरतन्तुखण्डिकोखाच्छण्** (४-३-१०२) तित्तिर्यादिभ्यः प्रोक्तमित्यर्थे छण् स्यात्। अणोऽपवादः। शौनकादिभ्यश्छन्दसीति छन्दो-ग्रहणस्य ततः पूर्वमुत्तरं चापकर्षानुवृत्त्योरभ्युपगमादित आरभ्य तेनैकदिगिति पर्यन्तं प्रोक्ते भवन्ति। अत्र छणादिप्रत्ययान्तानामेषां केवलानां न प्रयोगः किन्त्वध्येतृवेदितृप्रत्ययान्तानामेव छन्दोब्राह्मणानि च तद्विषयाणीति पूर्वमुक्तत्वात्। अध्येतृवेदितृप्रत्ययस्य तु प्रोक्ताल्लुगिति लुक्। तित्तिरिणा प्रोक्तमधीयते—तैत्तिरीयाः। एवं वरतन्तु-वारतन्तवीयाः। ओर्गुणे अवादेशः। खण्डिकेन खण्डिकीयाः। उख-औखीयाः। छन्दसीत्युक्तेर्नेह-तित्तिरिणा प्रोक्ताः श्लोकाः। **काश्यपकौशिकाभ्यामृषिभ्यां णिनिः** (४-३-१०३) आभ्यामृषिवाचिभ्यां प्रोक्तार्थे णिनिः स्यात्। काश्यपेन प्रोक्तमधीयते-काश्यपिनः। कौशिकेन प्रोक्तमधीयते-कौशिकिनः। **कलापिवैशम्पायनान्तेवासिभ्यश्च** (४-३-१०४) कलाप्यन्तेवासिभ्यो वैशम्पायनान्तेवासिभ्यश्च प्रोक्तार्थे णिनिः स्यात्। हरिद्रु-छगलि-तुम्बुरु-उलपिनश्चत्वारः कलाप्यन्तेवासिनः, आलम्बि-पलङ्ग-कमल-ऋचाभा-रुणि-ताण्डव-श्यामायन ... कलापिनो नव वैशम्पायनान्तेवासिनः। हरिद्रुणा प्रोक्तमधीयते-हारिद्रविणः। आलम्बिना प्रोक्तमधीयते—आलम्बिनः। **पुराणप्रोक्तेषु ब्राह्मणकल्पेषु** (४-३-१०५) तृतीयासमर्थात्प्रोक्तार्थे णिनिः स्यात् यत्प्रोक्तं पुराणेन मुनिना प्रोक्तं ब्राह्मणकल्पाश्चेत्ते भवन्ति। भल्लुना प्रोक्तमधीयते-भाल्लविनः। एवं शाट्यायन-शाट्यायनिनः। इतरा-ऐतरेयिणः ब्राह्मणाः। पिङ्ग-पैङ्गी कल्पः। पुराणेष्विति किम्? याज्ञवल्क्येन प्रोक्तानि-याज्ञवल्कानि ब्राह्मणानि। आश्मरथ्येन प्रोक्तः—आश्मरथः कल्पः। अत्र कण्वादित्वेन यञन्ताभ्यामणि आपत्यस्येति यलोपः।

वि. १ तेनप्रोक्तमित्यत्र प्रशब्दयोगेन न सामान्यकथनमात्रमपितु प्रथमप्रकाशनं विवक्षितं, तेनदेवदत्तादिभिः ग्रामे छन्दसां कथनेपि प्रथमप्रकाशनाभावान्नदेवदत्तादिभ्यः प्रत्ययोत्पत्तिः। ऋषयो हि शाखाप्रवर्तकाः वेदस्य प्रथम... एव न कर्त्तार इति कृते ग्रन्थे इत्यनेनानिर्वाहात्तेनप्रोक्तमिति अर्थान्तरं प्रदर्शितमिति सूत्रदृष्ट्या प्रतीयते। परं भाष्य... णत्वत्र नहि छन्दांसि क्रियन्ते नित्यानि छन्दांसीत्युपन्यस्य यद्यप्यर्थो नित्यः, यात्वसौ वर्णानुपूर्वी सात्वनित्या तद्भेदा... तद्भवति काठकं कालापकमिति कथयित्वा वेदानुपूर्वीविशेषाणां कठकलापादिनिर्मितत्वेन कृतेग्रन्थ इत्यनेन निर्वाह... यत्तेन प्रोक्तमेव नतु तेन कृतं तादृशस्य माथुरीवृत्तिरित्यादेर्निश्चये तेनप्रोक्तमित्यस्यावश्यकता प्रदर्शिता। एव...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

…शादिषु वर्णानुपूर्वीविनाशे पुनरुत्पन्ना ऋषयः संस्कारातिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधति आनुपूर्वीभेदात्क-
…वेदानुपूर्व्याः कर्तार एव नतु स्थिताया एव सुशर्मादिवत्प्रवक्तारः ततश्च छन्दस्यपि कृते ग्रन्थे इत्येव सिद्धः प्रत्यय
…कैयटेन व्याख्यातम्। उद्योतकृतापि अंशेन (अर्थरूपेण) वेदस्य नित्यत्वं स्वीकृत्यांशेन (शब्दरूपेण) अनित्यत्व-
…, धाता यथापूर्वमकल्पयदित्यादिश्रुतिबलेनानुपूर्व्यपि सैवेति नव्यपूर्वमीमांसासिद्धान्तात्साऽनित्येत्ययुक्तमिति न,
…विच्छेदेन नित्यत्वं तूभयोरपि तस्मात्मन्वन्तरभेदेनानुपूर्वीभिन्नैव, प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते
…इति तदेव समर्थितम्। तेन वेदविषये कल्पभेदेनानुपूर्वीभेदात्तदंशे अनित्यत्वं प्रतिपाद्यार्थस्याभेदात्तदंशे नित्यत्व-
…व्याकरणाचार्याणां सिद्धान्तोवगम्यते। अत्र सूत्रभाष्यकृतोर्दृष्टिभेदः किमु।

…वि. २ ब्राह्मणेषु पुरातनप्रोक्तेष्वेव णिनिविधानेन वृत्तौ "याज्ञवल्क्यादयोऽचिरकाला इत्याख्यानेषु वार्ता तया
…ति सूत्रकार" इत्युक्त्या याज्ञवल्क्यप्रोक्तब्राह्मणस्य (शतपथस्य) अर्वाचीनत्वमिवप्रतीयते तदनुसारेण पुराणोक्ते
…उदाहरणं च दत्तम्। परं भाष्यवार्तिकयोः "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्"
…याज्ञवल्क्यब्राह्मणानामपि ब्राह्मणान्तरसमकालत्वं पुराणप्रोक्तत्वं चानुमान्य रूपविशेषसिद्धये इतिविधौ वर्जनं
…, तत्र तुल्यकालत्वादित्यस्य "शाट्यायनादिप्रोक्तैर्ब्राह्मणैरेककालत्वादिति" कैयट व्याख्यानेन, "येषु ब्राह्मणेषु णिनि-
…तैतानि तुल्यकालानि इत्येतान्यपि पुराणप्रोक्तानि एतेन शाट्यायनाद्यपेक्षयैतान्याधुनिकानीति वृत्त्याद्युक्त-
…मिति" उद्योतव्याख्यानेन च पुराणत्वमेवास्य दृढीकृतं च। संहिताविभाजकस्य वेदव्यासस्य समकालिकं कृष्ण-
…रूपेण निर्दिश्य' तदेतद्देवकीपुत्राय कृष्णाय याज्ञवल्क्यः प्रोवाच' इत्युपसंहृतस्य शतपथब्राह्मणस्य तदुपदेष्टुं
…स्य चार्वाचीनत्वं कथं वा वक्तुं शक्येत।

शौनकादिभ्यश्छन्दसि (४-३-१०६) एभ्यः प्रोक्तार्थे णिनिः स्यात् छन्दस्यभिधेये। छन्दस्यभिधेये
…ब्राह्मणानीति प्रोक्तप्रत्ययोत्तरमध्येतृप्रत्ययनियमस्तल्लोपोपि भवति। शौनकेन प्रोक्तमधीयते
शौनकिनः। एवं वाजसनेय-वाजसनेयिनः। कठचरकाल्लुक् (४-३-१०७) आभ्यां परस्य प्रोक्तप्रत्ययस्य
लुक्स्यात्। कठेन प्रोक्तमधीयते कठाः। चरकेण प्रोक्तमधीयते-चरकाः। कलापिनोऽण् (४-३-१०८) अस्मा-
त्प्रोक्तार्थेऽण् स्यात्। वैशम्पायनशिष्यत्वात्प्राप्तस्य णिनेरपवादः। कलापिना प्रोक्तमधीयते-कालापाः।
…स्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिखालिशिखण्डिसूकर-
…सुपर्वणामुपसंख्यानम् (वा) इत्युपसंख्यानाट्टिलोपः। छगलिनो ढिनुक् (४-३-१०९) अस्मा-
त्प्रोक्तार्थे ढिनुक् स्यात्। कलाप्यन्तेवासित्वाण्णिनेरपवादः। छगलिना प्रोक्तमधीयते-
छागलेयिनः। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (४-३-११०) आभ्यां प्रोक्तार्थे णिनिः स्यात्
यथासंख्यं भिक्षुनटसूत्रयोरभिधेययोः। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते—पाराशरिणो भिक्षवः।
शिलालिना प्रोक्तं नटसूत्रमधीयते-शैलालिनो नटाः। कर्मन्दकृशाश्वादिनिः (४-३-१११) आभ्यां
प्रोक्तार्थे इनिः स्याद्भिक्षुनटसूत्रयोरभिधेययोः। कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते-कर्मन्दिनो
भिक्षवः। कृशाश्वेन प्रोक्तं नटसूत्रमधीयते-कृशाश्विनो नटाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि॰ पाराशर्येत्यादिसूत्रद्वयदर्शनेन पाराशर्य एव व्यासस्यैव कर्मन्दस्यापि भिक्षु (वेदान्त) सूत्रग्रन्थः, शिलालिकृ-योर्नाट्यसूत्रग्रन्थद्वयं च पाणिनिसमये उपलभ्यमाने तदध्ययनप्रचारश्चासीदिति प्रतीयते। भाष्यकृता स्वैरं मौनमेवावलम्बितम्।

तेनैकदिक् (४-३-११२) तृतीयासमर्थात् एकदिक् इत्यर्थे यथाविहितं प्रत्ययः स्यात्। सुदाम्ना (पर्वतविशेषेण) एकदिक् (एकादिशिविद्यमाना)—सौदामनी (विद्युत्)। एवं हिमवत्-हैमवती। त्रिककुद्-त्रैककुदी। उपज्ञाते (४-३-११५) तृतीयासमर्थादुपज्ञात इत्यर्थे यथाविहितं प्रत्ययः स्यात्। विनोपदेशं ज्ञातमुपज्ञातम्। पाणिनिना उपज्ञातं-पाणिनीयम् अकालकं व्याकरणम्। काशकृत्स्नेन उपज्ञातं-काशकृत्स्नं गुरुलाघवम्। आपिशलिनोपज्ञातं-आपिशलं दुष्करणम्। औत्सर्गिको... कृते ग्रन्थे (४-३-११६) तृतीयासमर्थात्कृत इत्यर्थे यथाविहितं प्रत्ययः स्यात् ग्रन्थेऽभिधेये। वररुचिना कृतः—वाररुचो ग्रन्थः। जलूकेन कृताः—जालूकाः श्लोकाः। संज्ञायाम् (४-३-११७) तृतीयासमर्थात्कृतमित्यर्थे यथाविहितं प्रत्ययः स्यात् संज्ञायाम्। अग्रन्थार्थमिदम्। मक्षिकाभिः कृतं-माक्षिकम्। सरघाभिः कृतं-सारघम्। पुत्तिकाभिः कृतं-पौत्तिकम् मधु। मधुनः संज्ञा एताः। कुलालादिभ्यो वुञ् (४-३-११८) एभ्यस्तृतीयान्तेभ्यः कृतार्थे वुञ् स्यात्संज्ञायाम्। अणोपवादः। कुलालेन कृतं-कौलालकम्। एवं-वरुड-वारुडकम्। चण्डाल-चाण्डालकम्। निषाद-नैषादकम्। कुम्भकार-कौम्भकारकम्। क्षुद्राभ्रमरवटरपादपादञ् (४-३-११९) एभ्यस्तृतीयान्तेभ्यः कृतार्थे अञ् स्यात्संज्ञायाम्। अणोपवादः। क्षुद्राभिः कृतं- क्षौद्रं मधुः। एवं भ्रमर-भ्रामरम्। वटर-वाटरम्। पादप-पादपम्।

वि॰ १ आकालादुत्थानादित्यादिकालपरिभाषारहितमकालकं व्याकरणम्। गुरुलाघवं नामार्थशास्त्रं यत्रोक्तं गौरवं लाघवं चिन्त्यते। दुष् इत्ययं सङ्केतशब्दोयत्र क्रियते यथा पाणिनीये वृदिति तद्दुष्करणम् व्याकरणं शास्त्रमित्यन्ये इति पदमञ्जरी।

वि॰ २ माक्षिक सारघ पौत्तिक क्षौद्र भ्रामर वाटर पादपादयो मधुविशेषाणां संज्ञाः।

तस्येदम् (४-३-१२०) षष्ठीसमर्थादिदमर्थेऽणादयो घादयश्च यथाविहितं प्रत्ययाः स्युः। उपगोरिदम्-औपगवम्। राष्ट्रस्येदं-राष्ट्रियम्। अवारपारस्येदं-अवारपारीणम्। रथाद्यत् (४-३-१२१) रथशब्दादिदमर्थे यत्स्यात्। अणोपवादः। रथस्येदं-रथ्यं चक्रं युगं वा। रथाङ्ग एवायमिष्यते नान्यत्राऽनभिधानात्। पत्रपूर्वादञ् (४-३-१२२) पत्रं वाहनम्। वाहनवाचिपूर्वाद्रथान्तादिदमर्थेऽञ्स्यात्। यतोपवादः। अश्वरथस्येदं-आश्वरथं चक्रम्। एवं गर्दभरथं ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रथम्। उष्ट्ररथ-औष्ट्ररथम्। पत्राध्वर्युपरिषदश्च (४-३-१२३) वाहनवाचकादध्वर्युपरिषद्भ्यां चेदमर्थे अञ् स्यात्। अणोपवादः। पत्राद्वाह्ये (वा) अश्वस्येदं वहनीयम्—आश्वम्। एवं उष्ट्र-औष्ट्रम्। गर्दभ-गार्दभम्। अध्वर्योरिदम्-आध्वर्यवम्। परिषद इदं-पारिषदम्। हलसीराट्ठक् (४-३-१२४) आभ्यामिदमर्थे ठक्स्यात्। हलस्येदं-हालिकम्। सीरस्येदं-सैरिकम्। द्वन्द्वाद्वुन् वैर-मैथुनिकयोः (४-३-१२५) द्वन्द्वादिदमर्थे वुन्स्याद्वैरमैथुनिकयोरभिधेययोः। अणोपवादः। काकोलू-कयोरिदं वैरं-काकोलूकिका। स्त्रीत्वं लोकात्। कुत्सकुशिकयोरिदं मिथुनकर्म-कुत्सकुशिकिका। वैरे देवासुरादिभ्यः प्रतिषेधः (वा) देवासुरयोरिदं-दैवासुरं वैरम्। अणेव। गोत्रचरणाद्वुञ् (४-३-१२६) गोत्रप्रत्ययान्तेभ्यश्चरणा (शाखा) ध्येतृवाचिभ्यश्चेदमर्थे वुञ्स्यात्। अणोपवादः। औपगवस्येदं-औपगवकम्। चरणाद्धर्माम्नाययोरिति वक्तव्यम् (वा) कठानामयं धर्म आम्नायो (वेदाभ्यासः) वा काठकम् एवं-कलाप-कालापकम्।० पैप्पलाद-पैप्पलादकम्। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः (४-३-१२९) छन्दोगादिभ्य इदमर्थे ञ्यः धर्माम्नाययोरभिधेययोः। छन्दोगाना (सामवेदिनां) मयं-धर्म आम्नायो वा-छान्दोग्यम्। एवं-औक्थिक-औक्थिक्यम्। याज्ञिक-याज्ञिक्यम्। बह्वृच-बाह्वृच्यम्। नट-नाट्यम्। चरणसाहचर्यान्नटशब्दादपि तयोरेव। आथर्वणिकस्येकलोपश्च (४-३-१३३) अस्मा-दिदमर्थेऽण् स्यादिकलोपश्च धर्माम्नाययोः। आथर्वणिकस्यायं धर्म आम्नायो वा-आथर्वणः। वुञोपवादः।

टि. १ तस्यापत्यमित्यत्रेव तस्येदमित्यत्रापि लिङ्गवचनादिकं तदिदंबोध्यपरोक्षत्वप्रत्यक्षत्वादिकं च सर्वमवि-वक्षितम्। तेन षष्ठ्यन्तात्सम्बन्धार्थे प्रत्ययः स्यादित्यर्थः। अनेन सम्बन्धार्थे प्राग्दीव्यतोऽण्, अश्वपत्यादिभ्यश्च, दित्यदित्या-दित्युत्तरपदाण्ण्यः, उत्सादिभ्योऽञ्, स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्, इति सर्वसाधारणार्थविहिता अणादयो महोत्स-र्गाश्च राष्ट्रावारपारादित्यादिभिविशेषार्थविहिता घादयश्च प्रत्यया विधीयन्ते।

टि. २ अग्नीधः शरणे रण् भत्वं च (वा) शरणं स्थानम्। अग्निमीन्धे—अग्नीत्। इन्धेःक्विप्। अग्नीध इदं स्थानम्-आग्नीध्रम्। भत्वान्न जश्त्वम्। तात्स्थ्याहत्विग्विशेषोपि आग्नीध्रः। समिधामाधाने षेन्यण् वक्तव्यः (वा) आधानो मन्त्रः। समिधामयमाधानः-सामिधेन्यो मन्त्रः। स्त्रियां षित्वान्ङीषि सामिधेनी ऋक्।

प्रयोगाः—त्वदीयं तुभ्यमर्प्यते। तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव। सैन्धवं लवणं मेध्यम्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। हैमवत्यामुपस्पृश्य। राजश्यालस्तु राष्ट्रियः। कण्ठ्या स्तालव्या मूर्धन्या दन्त्या औष्ठ्याश्च हलः स्पर्शाः। वासन्त्यः कुन्दलताः। युष्मदीयं वचः श्रुतम्। राजकीयो जनो गतः। आरण्यको पात्तफलप्रसूतिः। भवदीया लेखनीयम्। ग्रामीणानां समूहः। नादेयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सारसं जलम्। कुत्रत्याः पुरुषा इमे। कपिरपि च कापिशायनमदमत्तः। काशिकी पाठशाला। जन्यं रघोर्घोरं पर्वतीयैर्गणै रभूत्। सायन्तने कर्मणि संप्रवृत्ते।

प्रश्नाः—शैषिक इत्यस्य कोर्थः। शेषार्थाः के वृद्धसंज्ञकाः कीदृशा भवन्ति। तत्रजातः तत्रभवः इत्यनयोः निवासः सोऽस्याभिजन इत्यनयोश्च को विशेषः। पुराणप्रोक्त ब्राह्मणकल्पेषु के प्रत्ययाः। अधस्तन वाक्यगतांस् विशेषानुपपादय—देवासुरमभूद्युद्धम्। त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्प्यते। पाणिनीया विदन्ति। तेन शि पिभ्यं समाक्रान्तं क्रमागतम्। सायन्तनं विधिमनुतिष्ठति। हौत्रमौद्गात्रमाध्वर्यवञ्च वैदिकानां कर्माणि। तेन पि गृहीतम्। माथुराश्चतुरा जनाः।

इति शैषिकप्रकरणम्

विकारार्थाः प्राग्दीव्यतीयाः—

तस्य विकारः (४-३-१३४) षष्ठीसमर्थाद्विकार इत्यर्थे अणादयः साधारणाः वक्ष्यमाणा वैशेषि यथाविहितं प्रत्ययाः स्युः। प्रकृतेरवस्थान्तरं विकारः। अश्मनो विकारः–आश्मः। अश्मनो वि टिलोपो वक्तव्यः (वा) इति टिलोपः। वृत्तौ तु टिलोपस्य वैकल्पिकत्वेन आश्मन इत्यपि। च विकारः–चार्मः कोशः। चर्मणः कोशे इति टिलोपः। अन्यत्र तु न चार्मणं स्यूतम्। भस्मनो वि भास्मनः। मृत्तिकाया विकारः–मार्तिको घटः। अवयवे च प्राण्योषधिवृक्षेभ्यः (४-३-१ प्राण्योषधिवृक्षवाचिभ्यश्च षष्ठ्यन्तेभ्यः अवयवे विकारे चार्थे यथाविहितं साधारणा अ वक्ष्यमाणा विशेषाश्च प्रत्ययाः स्युः। प्राणिभ्यः–मयूरस्य विकारो वयवो वा–मायूरः। एवं क कापोतः। तित्तिरि-तैत्तिरः। प्राणिरजतादिभ्य इत्यञ्। ओषधिभ्यः–मूर्वाया विकारो वयवो मौर्वं काण्डं भस्म वा। औत्सर्गिकोण्। वृक्षेभ्यः—पिप्पलस्य विकारो वयवो वा-पैप्पलम् भस्म वा। एवं करीर-कारीरम्। पलाश-पालाशम्। औत्सर्गिकोण्। तस्यविकार यवेचप्राणीत्यनयोर्द्वयोरधिकारादित उत्तरं प्रत्ययाः प्राण्योषधिवृक्षेभ्यो विकारावय रन्येभ्यस्तु विकारमात्रे भवन्ति। बिल्वादिभ्योऽण् (४-३-१३६) एभ्यो यथायथं वि वयववोरण् स्यात्। यथायोगमञ्मयटोरपवादः। बिल्वस्यावयवो विकारो वा–बैल्वः। एवं व्रैहः। मुद्ग-मौद्गः मसूर-मासूरः। गोधूम-गौधूमः। इक्षु-ऐक्षवः। ओर्गुणः। वेणु-वै कोपधाच्च (४-३-१३७) कोपधाद्यथायोगं विकारावयवयोरण् स्यात्। अञोपवादः। तर्कोः (वृ शेषस्य) विकारो वयवो वा तार्कवम्। एवं–तित्तिडीक-तैत्तिडीकम्। मण्डूक-माण्डूकम्। म माधूकम्। त्रपुजतुनोः षुक् (४-३-१३८) आभ्यामणस्याद्विकारे, एतयोः षुगागमश्च। ओरञोप

Jayatu Sanskritam, Kathmandu, Nepal

त्रपुणो विकारः-त्रापुषम्। जतुनो विकारः-जातुषम्। ओरञ् (४-३-१३९) उवर्णान्तादञ्स्याद्विकारावयवयोः। अणोपवादः। देवदारोर्विकारो वयवो वा-दैवदारवम्। एवं भद्रदारु-भाद्रदारवम्। अनुदात्तादेश्च (४-३-१४०) अस्मादञ्स्याद्विकारावयवयोः। अणोपवादः। कपित्थस्य विकारो वयवो वा-कापित्थम्। एवं दधित्थ-दाधित्थम्। पलाशादिभ्यो वा (४-३-१४१) एभ्योऽञ्वा स्याद्विकारावयवयोः। पलाशस्य विकारो वयवो वा-पालाशम्। एवं-खदिर-खादिरम्। शिंशपा-शैंशपम्। करीर-कारीरम्। शिरीष-शैरीषम्। यवास-यावासम्। विकङ्कत-वैकङ्कतम्। शम्याः ष्लञ् (४-३-१४२) शमीशब्दात् ष्लञ् स्याद्विकारावयवयोः। अञोपवादः। शम्या विकारो वयवो वा-शामीलं भस्म। स्त्रियां षित्वान्ङीषि शामीली स्रुक्। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः (४-३-१४३) प्रकृतिमात्रात् मयट् वा स्याद्भक्ष्याच्छादनवर्जितयोर्विकारावयवयोः भाषायाम्। पक्षे यथाप्राप्तमणादयः। अश्मन्-अश्ममयम्, आश्मनम्। मूर्वा-मूर्वामयं, मौर्वम्। बिल्व-बिल्वमयम्, बैल्वम्। कपोत-कपोतमयं, कापोतम्। रजत-रजतमयं, राजतम्। लोह-लोहमयं, लौहम्। भक्ष्याच्छादनयोस्तु न-मुद्गस्य विकारो मौद्गः सूपः। कार्पासस्य विकारः-कार्पासमाच्छादनम्। नित्यं वृद्धशरादिभ्यः (४-३-१४४) वृद्धेभ्यः शरादिभ्यश्च अभक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां नित्यं मयट् स्यात्। वृद्धेभ्यः-आम्रस्य विकारो वयवो वा-आम्रमयम्। एवं शाल-शालमयम्। शाक-शाकमयम्। शरादिभ्यः-शर-शरमयम्। दर्भ-दर्भमयम्। मृत्-मृण्मयम्। तृण-तृणमयम्। सोम-सोममयम्। बल्वज-बल्वजमयम्। नित्यमिति योगविभागात् एकाचो नित्यं मयट्। त्वचो विकारः-त्वङ्मयम्। वाच्-वाङ्मयम्। स्रज्-स्रङ्मयम्। अप्-अम्मयम्। आप्यमिति तु अपामिदं तस्येदमित्यणि आपम्, ततश्चतुर्वर्णादित्वात्स्वार्थे ष्यञि बोध्यम्। गोश्च पुरीषे (४-३-१४५) गोशब्दात्पुरीषेऽभिधेये मयट् स्यात्। गोः पुरीषं गोमयम्। विकारावयवयोस्तु वक्ष्यमाणे यति गव्यम्। पिष्टाच्च (४-३-१४६) अस्माद्विकारे मयट् स्यात्। अणोपवादः। पिष्टस्य विकारः-पिष्टमयम् भस्म। पैष्टी सुरा इति तु तस्येदमित्यणि। संज्ञायां कन् (४-३-१४७) पिष्टशब्दात्कन् स्याद्विकारे संज्ञायाम्। मयटोपवादः। पिष्टस्य विकारविशेषः-पिष्टकः (अपूपः)। व्रीहेः पुरोडाशे (४-३-१४८) अस्माद्विकारे मयट् स्यात्पुरोडाशेऽभिधेये। बिल्वाद्यणोपवादः। व्रीहेर्विकारः-व्रीहिमयः पुरोडाशः। व्रैहमन्यत्। असंज्ञायां तिलयवाभ्याम् (४-३-१४९) आभ्यां विकारावयवयोर्मयट् स्यादसंज्ञायाम्। तिलस्य विकारो वयवो वा-तिलमयम्। एवं यव-यवमयम्। संज्ञायां तु तैलम् (अण्), यावकः (अणि यावादिभ्य इति स्वार्थे कन्)। योगार्थमादाय सर्वत्र प्रवृत्तौ असंज्ञा, क्वचिदेव रूढत्वे संज्ञेति विवेकः। एवमन्यत्रापि। प्राणिरजतादिभ्योऽञ् (४-३-१५४) प्राणिवाचिभ्यो रजतादिभ्यश्चाञ्स्याद्विकारावयवयोः। प्राणिभ्यः-कपोत-कापोतम्। मयूर-मायूरम्। तित्तिरि-तैत्तिरम्। बक-बाकम्। शुक-शौकम्। रजतादिभ्यः-

CC-0. Digitized by eGangotri and MIDF- Delhi

रजत-राजतम् । शीस-शैसम् । लोह-लौहम् । उदुम्बर-औदुम्बरम् । दारु-दारवम् । उष्ट्राद्वुञ् (४-३-१५७) अस्माद्वुञ्स्याद्विकारावयवयोः । प्राण्यञोऽपवादः । उष्ट्रस्य विकारो वयवो वा औष्ट्रकः । उमोर्णयोर्वा (४-३-१५८) आभ्यां विकारावयवयोर्वुञ्वा स्यात् । उमायाः (अतस्याः) विकारो वयवो वा औमकम् , औमम् । पक्षे औत्सर्गिकोऽण् । एवं उर्णा-और्णकम् , और्णम् । पक्षे अनुदात्तादित्वादञ् । एण्या ढञ् (४-३-१५९) एणीशब्दाड्ढञ्स्याद्विकारावयवयोः । एण्या विकारो वयवो वा-ऐणेयम् । पयादेशे यस्येतिचेतीकारलोपः । स्त्रीनिर्देशादेणस्य तु ऐणम् । गोपयसोर्यत् (४-३-१६०) आभ्यां यत्स्याद्विकारावयवयोः । गोर्विकारो वयवो वा-गव्यम् । एवं पयः–पयस्यम् । गोरजादिप्रसङ्ग इति सिद्धे मयड्वैतयोरिति पाक्षिकमयड्बाधनार्थं पुनर्यद्विधानम् ।

वि. १ तस्य विकार इत्यत्र घादिसम्बद्धस्य तस्येतयस्य सम्बन्धनिवृत्तये पुनस्तस्येत्युक्तम् । अणादयस्तु न निवर्तन्ते प्राग्दीव्यतः प्राग्भवनादिति विशिष्टावधिपरिच्छेदेनाधिकृतत्वात् । प्राग्दीव्यतीयप्रकरणनिर्देश एतदेव सूचयति ।

वि. २ आनन्दमयाधिकरणे आनन्दमय इति प्राचुर्ये मयटि कर्तव्ये विकारे मयडिति शङ्कराचार्योक्तिस्तु प्राचुर्ये मयट्यपि प्रकृत्यर्थविरोधिनो दुःखस्य लेशतोऽनुवृत्तिसंभवात्प्रकृते विकारार्थः पर्यवस्यतीत्याशयेन नित्यं वृद्धशरादिभ्य इत्यत्र भाषाग्रहणस्याननुवृत्तौ अनुवृत्तावपि भाषायां नित्यमन्यत्र क्वाचित्कोमयडित्यर्थेन, मयट्चेत्यागतार्थे मयटि, 'विकार' इत्यार्थिकार्थकथनपरतया वोपपाद्या ।

फले लुक् (४-३-१६३) विकारावयवप्रत्ययस्य लुक्स्यात्फलेभिधेये । फलितस्य वृक्षस्य फलं विकारोऽवयवश्च । आमलक्याः फलम्--आमलकम् । मयटो लुकि लुक्तद्धितलुकीति ङीषोपि लुक् । एवं बदर-बदरम् । आम्र-आम्रम् । प्लक्षादिभ्योऽण् (४-३-१६४) प्लक्षादिभ्यो विकारावयवयोः फलेऽण् स्यात् । अञोपवादः । विधानसामर्थ्यादणो न लुक् । प्लक्षस्य फलं-प्लाक्षम् । एवं न्यग्रोध-नैयग्रोधम् । न्यग्रोधस्य च केवलस्य (७-३-५) अस्य न वृद्धिरैजागमश्च । इत्यैच् । अश्वत्थ-आश्वत्थम् । इङ्गुदी-ऐङ्गुदम् । शिग्रु-शैग्रवम् । कर्कन्धु-कार्कन्धवम् । ओर्गुणः । बृहती-बार्हतम् । यस्येतिचेतीकारलोपः । जम्ब्वा वा (४-३-१६५) जम्बूशब्दात्फलेऽणवा स्यात् । जम्ब्वाः फलं-जाम्बवम् । अणोविधानसामर्थ्यान्न लुक् । पक्षे ओरञित्यञि । लुप् च (४-३-१६६) जम्ब्वाः फलप्रत्ययस्य वा लुप् स्यात् । इति लुप् पक्षे लुपियुक्तवदिति युक्तवद्भावेन स्त्रीत्वैकत्वे जम्बूः । लुपभावपक्षे फलेलुगिति लुकि युक्तवद्भावाभावे नपुंसकत्वेन ह्रस्वे जम्बु । फलानां बहुत्वे अणि जाम्बवानि, अञि लुक्पक्षे जम्बूनि, लुप्पक्षे तु युक्तवद्भावेनैकत्वे जम्बूः । फलपाकशुषामुपसंख्यानम् (वा) फलपाकेन शुष्यमाणानामोषधीनां फलप्रत्ययस्य लुप्स्यादित्यर्थः । व्रीहीणां फलानि-व्रीहयः । एवं यव-यवाः । माष-माषाः । मुद्ग-मुद्गाः । तिल-तिलाः । पुष्पमूलेषु बहुलम् (वा) पुष्पं विकारो वयवो वा, मूलमवयव एव । पुष्पमूलेष्वभिधेयेषु विकारावयवप्रत्ययस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुल्यर्थः। मल्लिकायाः पुष्पं-मल्लिका। अनुदात्तादित्वादञो लुकि युक्तवत्वात्स्त्रीत्वम्। जात्याः पुष्पं-जाती। विदार्याः मूलं-विदारी। बृहत्या मूलं-बृहती। बहुलग्रहणात्क्वचिन्नलुप्। पाटलानि पुष्पाणि शालवानि मूलानि। बिल्वादित्वादण्। बहुलग्रहणात्क्वचिन्न लुगपि। अशोकस्य पुष्पम्-अशोकम्। एवं कदम्बम्, करवीरम्, बैल्वानि फलानि। हरीतक्यादिभ्यश्च (४-३-१६७) एभ्यः फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादिषु व्यक्तिरित्येषां लिङ्गमेव प्रकृतिवन्नतु वचनमपि। हरीतक्याः फलानि-हरीतक्यः। अञो लुप्। एवं कोशातकी-कोशातक्यः। द्राक्षा-द्राक्षाः। मयटो लुप्। शेफालिकाः-शेफालिकाः। कंसीयपरशव्ययोर्यञञौ लुक् च (४-३-१६८) कंसीयपरशव्यशब्दाभ्यां विकारे यथासंख्यं यञञौ स्तः छयतोर्लुक् च। कंसाय (धातुविशेषाय) हितं-कंसीयम्, तस्मैहितमिति छः। कंसीयस्य विकारः-कांस्यम् यञि छस्य लुक्। परशवे हितं परशव्यम् (दारु) उगवादित्वाद्यत्। परशव्यस्य विकारः-पारशवः। अञि यतो लुकि ओर्गुणः।

वि. फले पुष्पमूलेष्वभिधेयेषु प्रत्ययस्य लुप्स्थले युक्तवद्भावः, लुक्स्थले तु न। फले युक्तवद्भावेपि हरीतक्यादौ [illegible] वचनमपि प्रकृतिवद्भवतीत्यनुसन्धेयम्।

[illegible]—भास्मनैरङ्गरागैः। राजतं पात्रमानय। गव्यं दधिपये प्रियम्। आश्वत्थवैणवप्लाक्ष-[illegible]धैङ्गुदं फले। फले जम्ब्याः जम्बूः स्त्री जम्बु जाम्बवम्। न स्याज्जाती वसन्ते। यस्य माता गृहे नास्ति तस्य माता हरीतकी।

प्रश्नाः—विकारार्थे प्रत्ययविशेषाः के। पुष्पमूलफलेष्वभिधेयेषु कोविशेषः फले वाच्ये एकत्वेऽनेकत्वे च [illegible]। अधस्तनवाक्यगतान्प्रयोगविशेषानुपपादयत—

[illegible] सुवः। राजतानि लौहानि च पात्राणि पृथक्स्थापयत। मौद्गः सूपो हितमामयाविनाम्। यवमयश्चरुर्भवति। [illegible] व्रीहयो मार्गे। यवा माषाश्च मुद्गाश्च।

इति प्राग्दीव्यतीयप्रकरणम्।

[illegible]कारः प्राग्वहतीयाः—

प्राग्वहतेष्ठक् (४-४-१) तद्वहतीत्यतः प्राक् ठगधिक्रियते। तेन दीव्यती खनति जयति जितम् (४-४-२) तृतीयासमर्थाद्दीव्यति खनति जयति जितमित्यर्थेषु ठक्स्यात्। अक्षैर्दीव्यति-आक्षिकः। एवं शलाका-शालाकिकः। कन्दुक-कान्दुकिकः। कुद्दालेन खनति-कौद्दालिकः। एवम्—अभ्रया (काष्ठकुद्दालेन) आभ्रिकः अक्षैर्जयति-आक्षिकः। एवं शलाका-शालाकिकः। अक्षैर्जितम्-आक्षिकम्। एवं शलाका-शालाकिकम्।

वि. १ प्राग्दीव्यतोऽणित्यस्य तेनदीव्यतीत्यतः प्राक्पर्यन्तं प्रवृत्तेरितः पूर्वं विशेषविध्याभावे औत्सर्गिकोऽण्। इतः परं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ठगादीनामौत्सर्गिकत्वेन विधानाद्विशेषविधान एवाण्, तत्र तद्वहतीत्यतः प्राक्ठञोधिकारेणास्मिन्प्रकरणे विशेषविधिं मौत्सर्गिकष्ठगेव ।

वि. २ तदाहेति माशब्दादिभ्य उपसंख्यानम् (वा) माशब्दं कार्षीरिति य आह स-माशब्दिकः। स्वागतमित्याह-स्वागतिकः। स्वागतादीनांचेत्यैच्निषेधः। आहौ प्रभूतादिभ्यः (वा) प्रभूतमाह-प्राभूतिकः। पर्याप्तम् पार्याप्तिकः। क्रियाविशेषणाट्ठक्। पृच्छतौ सुस्नातादिभ्यः (वा) सुस्नातं पृच्छति-सौस्नातिकः। सुखशयनं पृच्छति सौखशायनिकः। अनुशतिकादित्वादुभयतो वृद्धिः। गच्छतौ परदारादिभ्यः (वा) परदारान्गच्छति-पारदारिकः गुरुतल्पं (गुरुस्त्रियमगम्यां) गच्छति-गौरुतल्पिकः। पृच्छतौ गच्छतौ च द्वितीयान्तात्कर्मणष्ठक्। अत्र भाष्ये श्लोकवार्तिकम्—माशब्दादेस्तदाहेति प्रभूतादेश्च ठक्स्मृतः। गच्छतौ परदारादेः सुस्नातादेश्च पृच्छतौ ॥

वि. ३ तेन दीव्यतीत्यादौ करणे तृतीयैव समर्थविभक्तिः। तेन देवदत्तेन जितमित्यादौ न प्रत्ययः। अङ्गुल्या खनतीत्यत्र करणत्वेप्यनभिधानान्नप्रत्ययः। दीव्यतीत्यादौ कालपुरुषसंख्या न विवक्षिताः। तेन अक्षैरदेवीत् देविष्यति देविष्यामि वा आक्षिकः। अक्षैर्दीव्यन्ति दीव्यथ दीव्यामो वा आक्षिकाः। वाच्यं कारकं तु विवक्षितमेव, जयतिजितमिति वाच्ययोः कर्तृकर्मणोः पृथङ्निर्देशात्। तेन अक्षैर्द्यूतः अक्षैः खात इति कर्मार्थे आक्षिक इति न भवति।

संस्कृतम् (४-४-३) तृतीयासमर्थात्संस्कृतमित्यर्थे ठक् स्यात्। दध्ना संस्कृतं-दाधिकम्। मरीच-मारीचिकम्। लवण-लावणिकम्। संस्कृतं भक्षा इति सप्तम्यन्तादत्र तृतीयान्तादिति विशेषः। कुलत्थकोपधादण् (४-४-४) कुलत्थात्कोपधाच्च तृतीयान्तात्संस्कृतार्थेऽण् स्यात्। ठकोऽपवादः। कुलत्थैः संस्कृतं-कौलत्थम्। एवं तिन्तिणीक-तैन्तिणीकम्। तरति (४-४-५) तृतीयान्तात्तरतीत्यर्थे ठक्स्यात्। उडुपेन तरति-औडुपिकः। एवं-काण्डप्लव-काण्डप्लविकः। गोपुच्छाट्ठञ् (४-४-६) अस्माट्ठञ्स्यात्तरत्यर्थे। गोपुच्छेन तरति-गौपुच्छिकः। नौद्व्यचष्ठन् (४-४-७) नौशब्दाद् द्व्यचश्च ठन्स्यात्तरत्यर्थे। ठकोपवादः। नावा तरति-नाविकः। घटेन तरति-घटिकः। बाहु-बाहुका स्त्री। उकः परत्वाट्ठस्य कः स्त्रियां टाप्। चरति (४-४-८) तृतीयान्ताच्चरत्यर्थे (गच्छति भक्षयति इत्यर्थयोः) ठक्स्यात्। हस्तिना चरति (गच्छति) हास्तिकः। एवं-शकट-शाकटिकः। दध्ना चरति (भक्षयति) दाधिकः। आकर्षात् ष्ठल् (४-४-९) अस्मात्ष्ठल् स्याच्चरत्यर्थे। सुवर्णपरीक्षार्थो निकषोपल आकर्षः। आकर्षिकः। षित्वात्स्त्रियामाकर्षिकी। पर्पादिभ्यः ष्ठन् (४-४-१०) पर्पादिभ्यः ष्ठन् स्याच्चरत्यर्थे। येन पीठेन पङ्गवश्चरन्ति स पर्पः। पर्पेण चरति-पर्पिकः। स्त्रियां ङीप् पर्पिकी। एवं रथ-रथिकः। अश्व-अश्विकः। जाल-जालिकः। व्याल-व्यालिकः। पादः पच्च (गण) पादाभ्यां चरति-पदिकः। श्वगणाट्ठञ् च (४-४-११) अस्माच्चरत्यर्थे ठञ्स्यात् चात्ष्ठन्। श्वादेरिञि (७-३-८) श्वशब्दपूर्वस्याङ्गस्य इञि परे ऐज्न स्यात्। इकारादाविति वाच्यम् (वा) श्वगणेन चरति-श्वागणिकः, श्वागणिकी। ठञि आदिवृद्धिः। श्वगणिकः, श्वगणिकी। ष्ठनि नादिवृद्धिः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उभयत्रापि स्त्रियां ङीप्। वेतनादिभ्यो जीवति (४-४-१२) एभ्यो जीवत्यर्थे ठक्स्यात्। वेतनेन जीवति-वैतनिकः। एवं-धनुष्-धानुष्कः। दण्ड-दाण्डिकः। धनुर्दण्ड-धानुर्दण्डिकः। वाह-वाहिकः। जाल-जालिकः। शक्ति-शाक्तिकः। पाद-पादिकः। उपस्थान-औपस्थानिकः। वस्नक्रयविक्रयाट्ठन् (४-४-१३) आभ्यां ठन्स्याजीवत्यर्थे। क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम्। वस्नेन (मूल्येन) जीवति-वस्निकः। एवं क्रय-क्रयिकः। विक्रय-विक्रयिकः। क्रयविक्रय-क्रयविक्रयिकः। आयुधाच्छ च (४-४-१४) अस्माज्जीवत्यर्थे छः स्यात् चाट्ठन्। आयुधेन जीवति-आयुधीयः, आयुधिकः।

वि. हरत्युत्सङ्गादिभ्यः (४-४-१५) एभ्यो हरत्यर्थे ठक्स्यात्। हरणं देशान्तरप्रापणम्। उत्सङ्गेन हरति-औत्सङ्गिकः। उडुपेन-औडुपिकः। भस्त्रादिभ्यः ष्ठन् (४-४-१६) एभ्यो हरत्यर्थे ष्ठन् स्यात्। भस्त्रया हरति-भस्त्रिकः। शीर्षभार-शीर्षभारिकः। अंसभार-अंसभारिकः। विभाषा विवधात् (४-४ १७) अस्मात्ष्ठन्वा स्यात् पक्षे। एकदेशविकृतस्यानन्यत्वाद्वीवधादपि। विवधवीवधौ उभयतोबद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तेते। विवधेन हरति-विवधिकः ठन्। वैवधिकः ठक्। एवं वीवधिकः, वैवधिकः। स्त्रियां द्वयोः विवधिकी, वीवधिकी वैवधिकी। अण् कुटिलिकायाः (४-४-१८) अस्माद्धरत्यर्थेऽण् स्यात्। कुटिलिका व्याधानां गतिविशेषः, कर्माराणां लोहसन्दंशश्च। कुटिलिकया मृगान्हरति-कौटिलिको व्याधः। कुटिलिकयाऽङ्गारान्हरति कौटिलिकः कर्मारः।

निर्वृत्तेऽक्षद्यूतादिभ्यः (४-४-१९) एभ्यो निर्वृत्तइत्यर्थे ठक्स्यात्। अक्षद्यूतेन निर्वृत्तम्-आक्षद्यूतिकं वैरम्। एवं-जानुप्रहृति-जानुप्रहृतिकम्। गतागत-गतागतिकम्। त्रेर्मम्नित्यम् (४-४-२०) त्रिप्रत्ययान्तान्निर्वृत्तेर्थे नित्यं मप्स्यात्। नित्यग्रहणेन त्र्यन्तं मप्प्रत्ययान्तमेव भवति। तेनास्वपदविग्रहः। कृत्या निर्वृत्तं-कृत्रिमम्। पाकेन निर्वृत्तं-पक्त्रिमम्। ड्वितः क्त्रिः इति क्त्रिप्रत्ययान्तात्मप्। भावप्रत्ययान्तादिमब्वक्तव्यः (वा) पाकेन निर्वृत्तं-पाकिमम्। त्यागेन निर्वृत्तं-त्यागिमम्। कुट्टनं कुट्टः, कुट्टेन निर्वृत्तं-कुट्टिमम्। अपमित्ययाचिताभ्यां कक्कनौ (४-४-२१) आभ्यां यथासंख्यं कक्कनौ स्तो निर्वृत्तेर्थे। अपमित्येति ल्यबन्तं विनिमयं कृत्वेत्यर्थकम्। अपमित्य निर्वृत्तम्-आपमित्यकम्। याचितेन निर्वृत्तम्-याचितकम्। संसृष्टे (४-४-२२ तृतीयान्तात्संसृष्टमित्यर्थे ठक्स्यात्। दध्ना संसृष्ट (मेकीभूतं)-दाधिकम्। एवं-मरीच-मारीचिकम्। पिप्पल-पैप्पलिकम्। चूर्णादिनिः (४-४-२३) अस्मादिनिः स्यात्संसृष्टे। ठकोपवादः। चूर्णैः संसृष्टाः-चूर्णिनोऽपूपाः। लवणाल्लुक् (४-४-२४) अस्मात्संसृष्टार्थे ठको लुक् स्यात्। लवणेन संसृष्टः-लवणः सूपः। लवणं शाकम्। लवणा यवागूः। द्रव्यवाच्येव लवणशब्दो लुकं प्रयोजयति नतु गुणवाची। मुद्गादण् (४-४-२५) अस्मात्संसृष्टेऽण् स्यात्। ठकोपवादः। मुद्गैः संसृष्टः-मौद्गः ओदनः। व्यञ्जनैरुपसिक्ते (४-४-२६)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यञ्जनवाचिभ्यस्तृतीयान्तेभ्य उपसिक्तेऽर्थे ठक्स्यात्। सेचनेन मृदूकरणमुपसेचनम्। दध्ना उप सिक्तः-दाधिकः ओदनः। ओजःसहोम्भसा वर्तते (४-४-२७) एभ्यस्तृतीयान्ते वर्तत इत्यर्थे ठक्स्यात्। ओजसा वर्तते-औजसिकः शूरः। एवं सहसा-साहसिक श्चौरः। अम्भसा-आम्भ सिको मत्स्यः। तत्प्रत्यनुपूर्वमीपलोमकूलम् (४-४-२८) प्रत्यनुपूर्वेभ्य ईपलोमकुलशब्देभ्यो द्वितीया न्तेभ्यो वर्तत इत्यर्थे ठक्स्यात्। क्रियाविशेषणत्वाद्द्वितीया। प्रतीपं (वैपरीत्येन) वर्तते-प्राती पिकः। अन्वीपं (आनुकूल्येन) वर्तते-आन्वीपिकः। एवं प्रतिलोमं-प्रातिलोमिकः। अनुलोमं आनुलोमिकः। प्रतिकूलं-प्रातिकूलिकः। अनुकूलं-आनुकूलिकः। परिमुखं च (४-४-२९) अस्मा द्वर्तत इत्यर्थे ठक्स्यात्। परिमुखं वर्तते-पारिमुखिकः। चात् परिपार्श्वं वर्तते-पारिपार्श्विकः। प्रयच्छति गर्ह्यम् (४-४-३०) गर्ह्यबोधकात् द्वितीयान्तात्प्रयच्छतीत्यर्थे ठक्स्यात्। द्विगुणा द्रव्यं द्विगुणं, द्विगुणं प्रयच्छति-द्वैगुणिकः। एवं त्रिगुण-त्रैगुणिकः। चतुर्गुण-चातुर्गुणिकः। वृद्धेर्वृधुषिभावो वक्तव्यः (वा) वृद्ध्यर्थं द्रव्यं वृद्धिः, वृद्धिं प्रयच्छति-वार्धुषिकः। ठकि वृद्धेर्वृधु षिभावे आदिवृद्धिः। कुशीददशैकादशात्ष्ठन्ष्ठचौ (४-४-३१) गर्ह्यबोधकाभ्यां कुशीददशैकादशा प्रयच्छतीत्यर्थे क्रमात्ष्ठन्ष्ठचौ स्तः। कुशीदार्थं द्रव्यं कुशीदं, कुशीदं प्रयच्छति कुशीदिकः। स्त्रियां कुशीदिकी। एकादशार्थाः एकादश, एकादश च ते दश दशैकादशाः, कर्मधारये संख्याया अल्पीयस्या इति दशन्शब्दस्यपूर्वनिपाते अत्रैव निपातनात्समासान्ते अकारे टिलोपः। दशैकादशान्प्रयच्छति दशैकादशिकः उत्तमर्णः। स्त्रियां दशैकादशिकी।

वि. द्विगुणत्रिगुणचतुर्गुणवृद्धिकुशीदादिशब्दाः लक्षणया तदर्थदेयद्रव्यपराः। अशीतिभागो वृद्धिः स्यान् मासि सबन्धकः इति धर्मशास्त्रविरुद्धत्वात् द्विगुणत्रिगुणादि ग्रहीतुमधिकां वृद्धिं कुशीदं च ग्रहीतुमृणत्वेन दत्तं द्रव्यं गर्ह्यं, तत्प्रयच्छतीत्यर्थे ठक्। द्वैगुणिक इत्यादेः द्विगुणीभवितुं स्वद्रव्यमृणं प्रयच्छतीत्यादिरर्थः। अधिकांश ग्रहीतुं दीयमाना दश दशैकादशाः, ते अपि अन्याय्यत्वाद्गर्ह्या एव-तथाभूतदशदाता—दशैकादशिकः। ईदृशा उत्त एव तेषां गर्ह्यदातृत्वात्। अधमर्णेन तथा प्रत्यर्पणं तु न गर्ह्यं तेनाधमर्णबोधने न ठक्। द्विगुणं प्रयच्छति गर्ह्यम्, द्वि इत्यादि। एष एवार्थोभाष्ये "यदसावल्पं दत्वा बहु गृह्णाति तद्गर्ह्यं, तादर्थ्यात्ताच्छब्द्यं भविष्यति गर्ह्यार्थं गर्ह्यम्, द्वि मे स्यादिति प्रयच्छति द्वैगुणिक" इति दर्शितः। वार्धुषिकः कुसीदिक इत्यपि निन्दितबहुवृद्ध्यर्थर्णदायिबोधकः। जीवो वार्धुषिकः इत्यर्थप्रदर्शनं तु प्रामादिकम्। वार्धुषिरित्यपि प्रामादिकं ठक्योगेनैव तदादेशात्।

उञ्छति (४-४-३२) द्वितीयान्तादुञ्छतीत्यर्थे ठक्स्यात्। भूमौ पतितस्य कणश आदानमुञ्छः। बदराण्युञ्छति-बादरिकः। एवं श्यामाक-श्यामाकिकः। नीवार-नैवारिकः। रक्षति (४-४-३३) द्विती यान्ताद्रक्षतीत्यर्थे ठक्स्यात्। समाजं रक्षति-सामाजिकः। एवं-सन्निवेश-सांन्निवेशिकः। शब्द

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

करोति (४-४-३४) द्वितीयान्ताभ्यामाभ्यां करोतीत्यर्थे ठक्स्यात्। शब्दं करोति (प्रकृतिप्रत्यय-विभागेन जानाति) शाब्दिकः वैयाकरणः। दर्दुरं (वाद्यभाण्डविशेषं) करोति-(रचयति) दार्दुरिकः कुम्भकारः। पक्षिमत्स्यमृगान्हन्ति (४-४-३५) एभ्यो द्वितीयान्तेभ्यो हन्तीत्यर्थे ठक्स्यात्। पक्षिणो हन्ति-पाक्षिकः। स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम् (वा) एवं शकुनि-शाकुनिकः। मयूर-मायूरिकः। मत्स्यपर्यायेषु मीनस्यैव ग्रहणम्। मत्स्य-मात्स्यिकः। मत्स्यस्य ङ्यामितिपरिगण-नात्सूर्यतिष्येति यलोपो न। मीन-मैनिकः। मृग-मार्गिकः। हरिण-हारिणिकः।

परिपन्थं च तिष्ठति (४-४-३६) चकाराद्धन्तीत्यपि। परिपन्थशब्दात्तिष्ठतीत्यर्थे हन्तीत्यर्थे च ठक्स्यात्। (परि) वर्जयित्वा व्याप्य वा तिष्ठति-पारिपन्थिक श्चौरः। निपातनात्पथः पन्थादेशः। परिपन्थं हन्ति-पारिपन्थिकः। माथोत्तरपदपदव्यनुपदं धावति (४-४-३७) माथोत्तरपदात्पदव्यनुपदाभ्यां च धावत्यर्थे ठक्स्यात्। मथ्यते गन्तृभिरिति-माथः, दण्डाकारोमाथः-दण्डमाथः, तं धावति-दाण्डमाथिकः। एवं पदवीं धावति-पादविकः। अनुपदं-आनुपदिकः। आक्रन्दाट्ठञ्च (४-४-३८) अस्माट्ठञ्स्याच्चाट्ठक् धावतीत्यर्थे। आक्रन्दं (दुःखिनां रोदनस्थानं) धावति-आक्रन्दिकः। पदोत्तरपदं गृह्णाति (४-४-३९) पदशब्दोत्तरपदात्गृह्णात्यर्थे ठक्स्यात्। पूर्वपदं गृह्णाति-पौर्वपदिकः उत्तरपदं गृह्णाति-औत्तरपदिकः। प्रतिकण्ठार्थ ललामं च (४-४-४०) एभ्यो गृह्णात्यर्थे ठक्स्यात्। प्रतिकण्ठं गृह्णाति-प्रातिकण्ठिकः। एवं आर्थिकः। ललाम (चिह्नं) लालामिकः। प्रतिपथमेति ठंश्च (४-४-४२) अस्मादेत्यर्थे ठक्ठनौ स्तः। प्रतिपथमेति-प्रातिपथिकः, प्रतिपथिकः। संज्ञायां ललाटकुक्कुट्यौ पश्यति (४-४-४६) आभ्यां पश्यत्यर्थे ठक्स्यात् संज्ञायाम्। ललाटं पश्यति-लालाटिकः सेवकः। कुक्कुटीं (कुक्कुटीपाताहस्वल्पदेशं) पश्यति-कौक्कुटिको भिक्षुः।

धर्मं चरति (४-४-४१) धर्मशब्दाच्चरत्यर्थे ठक्स्यात्। धर्मं चरति-धार्मिकः। अधर्माच्चेति वक्तव्यम् (वा) अधर्मं चरति-आधार्मिकः। समवायान्समवैति (४-४-४३) समवायवाचिभ्यः समवैत्यर्थे ठक्स्यात्। समवायान्समवैति-सामवायिकः। समूहं समवैति-सामूहिकः। परिषदो ण्यः (४-४-४४) अस्मात्समवैत्यर्थे ण्यः स्यात्। ठकोपवादः। परिषदं-समवैति-पारिषद्यः। सेनाया वा (४-४-४५) अस्मात्समवैत्यर्थे ण्यो वा स्यात्। पक्षे ठक्। सेनां समवयन्ति-सैन्याः, सैनिकाः। तस्य धर्म्यम् (४-४-४७) षष्ठ्यन्ताद्धर्म्यमित्यर्थे ठक्स्यात्। आपणस्य धर्म्यं(आचरितुं योग्यं)आपणिकम्। एवं गुल्म-गौल्मिकम्। आकर-आकरिकम्। अवक्रयः (४-४-५०) षष्ठ्यन्तादवक्रयेऽर्थे ठक्स्यात्। राजग्राह्यं द्रव्यमवक्रयः। आपणस्यावक्रयः-आपणिकः। एवं गुल्म-गौल्मिकः। आकर-आकरिकः। शुल्कशाला-शौल्कशालिकः। तदस्य पण्यम् (४-४-५१) प्रथमान्तादस्यपण्यमित्यर्थे ठक्स्यात्। अपूपाः पण्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(विक्रेतव्यं) मस्य-आपूपिकः । एवं शष्कुली-शाष्कुलिकः । मोदक-मौदकिकः । लवणाट्ठञ् (४-४-५२) अस्माट्ठञ्स्यादस्य पण्यमित्यर्थे । ठकोपवादः । लवणं पण्यमस्य-लावणिकः । शिल्पम् (४-४-५५) प्रथमान्तादस्य शिल्पमित्यर्थे ठक् स्यात् । मृदङ्गं (मृदङ्गवादनं) शिल्पमस्य-मार्दङ्गिकः । एवं पणव-पाणविकः । वेणु-वैणविकः । मड्डुकझर्झरादणन्यतरस्याम् (४-४-५६) आभ्यामण् वा स्यादस्य शिल्पमित्यर्थे । मड्डुकवादनं शिल्पमस्य-माड्डुकः । पक्षे ठक् माड्डुकिकः । एवं झर्झर-झार्झरः झार्झरिकः । प्रहरणम् (४-४-५७) प्रथमान्तादस्यप्रहरणमित्यर्थे ठक्स्यात् । असिः प्रहरणमस्य-आसिकः । एवं धनुः–धानुष्कः । चक्र-चाक्रिकः । परश्वधाट्ठञ्च (४-४-५८) अस्मादस्यप्रहरणमित्यर्थे ठञ्स्यात् चाट्ठक् । परश्वधं प्रहरणमस्य-पारश्वधिकः । शक्तियष्ट्योरीकक् (४-४-५९) आभ्यामस्यप्रहरणमित्मर्थे ईकक्स्यात् । ठकोपवादः । शक्तिः प्रहरणमस्य-शाक्तीकः । यष्टिः प्रहरणमस्य-याष्टिकः । अस्ति नास्ति दिष्टं मतिः (४-४-६०) अस्तिनास्तिदिष्टशब्देभ्यः प्रथमान्तेभ्योऽस्यमतिरित्यर्थे ठक्स्यात् । अस्ति (परलोक) इत्येवं मतिर्यस्य स–आस्तिकः । नास्तीति मतिर्यस्य स-नास्तिकः । अस्तिनास्तिशब्दौ तिङन्तप्रतिरूपकाव्यये । दिष्ट (भाग्यं) मिति मतिर्यस्य स-दैष्टिकः । शीलम् (४-४-६१) प्रथमान्तादस्य शीलमित्यर्थे ठक्स्यात् । अपूपं (अपूपभक्षणं) शीलमस्य-आपूपिकः । एवं शष्कुलि-शाष्कुलिकः । मोदक-मौदिककः । छत्रादिभ्यो णः (४-४-६२) एभ्यो णः स्यादस्य शीलमित्यर्थे । ठकोपवादः । गुरुदोषावरणं छत्रम् , छत्रं शीलमस्य-छात्रः । एवं शिक्षा-शैक्षः । चुरा (चोरणं) चौरः । तपस्-तापसः । कार्मस्ताच्छील्ये (६-४-१७२) ताच्छील्ये णे कार्मन्-टिलोपो निपात्यते । कर्म शीलमस्य–कार्मः । णे टिलोपः । नस्तद्धित इत्येव टिलोपे सिद्धे तद्विधानमणकार्यं ताच्छीलिकेणेपीति ज्ञापनार्थम् , तेन णेपि अणन्तकार्ये ङीपि चौरी तापसीत्यादि सिद्धिः । ताच्छील्याभावे तु तस्येदमित्यणि कार्मणः ।

वि. कर्माध्ययने वृत्तम् (४-४-६३) अस्याध्ययने विषये तत्कर्मवृत्तमित्यर्थे प्रथमान्ताट्ठक्स्यात् । अस्याध्ययने एकमन्यद्वृत्तम् ऐकान्यिकः । यस्याध्ययने प्रवृत्तस्य परीक्षाकाले एकं स्खलितं विपरीतोच्चारणरूपं जातं स उच्यते ऐकान्यिकः । एवं द्व्यन्य-द्वैयन्यिकः । त्र्यन्य-त्रैयन्यिकः । ऐजागमः । बह्वच्पूर्वपदाट्ठच् (४-४-६४) बह्वच्पूर्वपदात्प्रथमान्तादस्य कर्माध्ययने वृत्तमित्यर्थे ठच्स्यात् । ठकोपवादः । द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य-द्वादशान्यिकः । द्वादशस्खलनानि जाता अस्येत्यर्थः ।

हितं भक्षाः (४-४-६५) प्रथमान्तात्तदस्मै हितमित्यर्थे ठक्स्याद्धितं भक्षं चेत् । अपूपं (अपूपभक्षणं) हितमस्मै-आपूपिकः । एवं शष्कुली-शाष्कुलिकः । ओदन-औदनिकः । तदस्मै दीयते नियतम् (४-४-६६) तदस्मै नियतं दीयत इत्यर्थे प्रथमान्ताट्ठक्स्यात् । अग्रभोजनं नियतं दीयतेस्मै-आग्रभोजनिकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...पूपा नित्यमस्मै दीयन्ते-आपूपिकः। श्राणामांसौदनाट्टिठन् (४-४-६७) आभ्यां नियतमस्मै दीयत इत्यर्थे टिठन्स्यात्। श्राणा (यवागूः) नियतमस्मै दीयते-श्राणिकः। टित्वात्स्त्रियां ङीप् श्राणिकी। मांसौदनग्रहणं सङ्घातविगृहीतार्थम्। मांसौदन-मांसौदनिकः। मांस-मांसिकः। ओदन-ओदनिकः। आदिवृद्ध्यभावोस्मिन्प्रत्यये विशेषः। भक्तादणन्यतरस्याम् (४-४-६८) अस्मान्नियतं दीयत इत्यर्थे ...णा स्यात्। पक्षे ठक्। भक्तमस्मै नियतं दीयते—भाक्तः, भाक्तिकः। तत्र नियुक्तः (४-४-६९) सप्त-...न्तान्नियुक्त इत्यर्थे ठक्स्यात्। आकरे नियुक्तः-आकारिकः। एवं गुल्म-गौल्मिकः। द्वार-दौवारिकः। ...द्वारादीनांचेत्यैजागमः। आपण-आपणिकः। शुल्कशाला-शौल्कशालिकः। पाठशाला-पाठशालिकः। अगारान्ताट्ठन् (४-४-७०) अगारान्तान्नियुक्त इत्यर्थे ठन्स्यात्। ठकोपवादः। देवागारे नियुक्तः देवागारिकः। एवं भाण्डागार-भाण्डागारिकः। कोष्ठागार-कोष्ठागारिकः।

टि.१ अध्यायिन्यदेशकालात् (४-४-७१) निषिद्धदेशकालवाचकाट्ठक्स्यादध्येत्रर्थे। श्मशाने-अधीते-श्माशा-... चतुर्दश्यामधीते-चातुर्दशिकः। एवं चतुष्पथ-चातुष्पथिकः। प्रतिपद्-प्रातिपदिकः। कठिनान्तप्रस्तारसंस्थानेषु ...ति (४-४-७२) कठिनशब्दान्तात्प्रस्तारसंस्थानाभ्यां च व्यवहरतीत्यर्थे ठक्स्यात्। वंशकठिने (कठिनवंशवति देशे) ...वांशकठिनिकः। एवं प्रस्तार-प्रास्तारिकः। संस्थान-सांस्थानिकः। प्रस्तारसंस्थानशब्दौ अवयवसन्निवेश-... निकटे वसति (४-४-७३) सप्तम्यन्तान्निकटशब्दाद्वसत्यर्थे ठक् स्यात्। शास्त्रोक्तान्निकटवास एवायं विधिः। ... भिक्षुणा ग्रामात्क्रोशे वस्तव्यमिति शास्त्रम्। तदुल्लङ्घ्य निकटे वसति-नैकटिको भिक्षुः। आवसथात्ष्ठल् (...) अस्माद्वसत्यर्थे ष्ठल्स्यात्। आवसथे वसति-आवसथिकः। स्त्रियामावसथिकी।

टि.२ अस्मिंष्ठगधिकारे एते प्रत्ययाः षितइत्यर्थे श्लोकवार्तिकम्-आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुशीदसूत्राच्च। आवसथा-...रेः षितः षडेते ठगधिकारे॥

प्रयोगाः—ततः प्रविशति पारिपार्श्विकः। सामाजिकानां मधुरा प्रवृत्तिः। शाब्दिकानामयं क्रमः। ...केन गृहीतो सौ। मार्दङ्गिका वैणविका वितेनुर्मधुरस्वरम्। आस्तिको नास्तिकाज्जिग्ये। ...का आपणिका धार्मिकाश्च जनप्रियाः। ऐकान्यिकोपि न बभूव।

प्रश्नाः—ठक्प्रत्ययः केष्वर्थेषु भवति। ठक् ठन् ष्ठन् ठञ् टिठन् प्रत्ययेषु के विशेषाः। आपूपिकः आपणिकः ...षु कत्यर्थाः सम्भवन्ति। अधस्तनवाक्यगतांस्तद्धितप्रत्ययानुपपादय—

...द्वादशान्यिकतयापि नपारयन्ति। भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः। एकोपि धार्मिको ज्यायानधार्मिक-... याष्टिकाः स्युर्नागरिकाः। आपूपिको भाक्तिकः। शौल्कशालिकः शुल्कं गृह्णाति। धार्मिकाणां समागमः।

इति ठगधिकारप्रकरणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राग्घितीयाः—

प्राग्घिताद्यत् (४-४-७५) तस्मै हितमित्यतः प्राक् यत् अधिक्रियते। तद्वहति रथयुगप्रासङ्गम् (४-४-७६) द्वितीयासमर्थेभ्यो रथयुगप्रासङ्गेभ्यो वहतीत्यर्थे यत्स्यात्। रथं वहति-रथ्यः। युगं वहति-युग्यः। वत्सानां दमनकाले स्कन्धे यत्काष्ठमासज्यते स प्रासङ्गः, प्रासङ्गं वहति-प्रासङ्ग्यः। धुरो यड्ढकौ (४-४-७७) धुर्-शब्दाद्वहत्यर्थे यड्ढकौ स्तः। धुरं वहति इत्यर्थे यति हलि चेति दीर्घे प्राप्ते-न भकुर्छुराम् (८-२-७९) भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्। इति निषेधे धुर्यः। ढकि धौरेयः। खः सर्वधुरात् (४-४-७८) अस्माद्वहत्यर्थे खः स्यात्। सर्वा चासौ धूः सर्वधुरा सर्वधुरां वहति-सर्वधुरीणः। एकधुराल्लुक्च (४-४-७९) अस्माद्वहत्यर्थे खः स्यात्पक्षे लुक् च एकधुरां वहति-एकधुरीणः। एकधुरः। शकटादण् (४-४-८०) अस्माद्वहत्यर्थेऽण् स्यात् शकटं वहति-शाकटो गौः। हलसीराट्ठक् (४-४-८१) आभ्यां वहत्यर्थे ठक् स्यात्। हलं वहति हालिकः। सीरं वहति-सैरिकः। संज्ञायां जन्याः (४-४-८२) जनीशब्दाद्वहत्यर्थे यत्स्यात् संज्ञायाम्। जनी वधूः तां वहन्ति। (प्रापयन्ति) जन्याः जामातुर्वयस्याः। कालिदासेन तु वधूवाहकेष्वपि प्रयुक्तं, याहीति जन्यामवदत्कुमारीति। विध्यत्यधनुषा (४-४-८३) द्वितीयान्ताद्विध्यतीत्यर्थे यत्साद्धनुः करणं न चेत्। पादौ विध्यन्ति-पद्याः शर्कराः। धनुषः करणत्वसंभावना तु न शत्रुं विध्यति। धनगणं लब्धा (४-४-८४) आभ्यां लब्धेत्यर्थे यत् स्यात्। धनं लब्धा धन्यः। गणं लब्धा-गण्यः। अन्नाण्णः (४-४-८५) अस्माल्लब्धेत्यर्थे णः स्यात्। अन्नं लब्धा आन्नः। वशं गतः (४-४-८६) द्वितीयान्ताद्वशशब्दाद्गत इत्यर्थे यत्स्यात्। वशं गतः वश्यः (परेच्छानुसारी)। गृहपतिना संयुक्ते ञ्यः (४-४-९०) तृतीयान्ताद्गृहपतिशब्दात्संयुक्ते ञ्यः स्यात्। गृहपतिना (यजमानेन) संयुक्तः-गार्हपत्यः अग्निः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु (४-४-९१) नावादिभ्योष्टभ्यस्तृतीयान्तेभ्यो यथासंख्यं तार्यादिष्वर्थेषु यत्स्यात्। नावा तार्या नाव्या नदी। वयसा तुल्यः-वयस्यः सखा। धर्मेण प्राप्यं-धर्म्यम्। विषेण वध्यः विष्य। मूलेनानाम्यं (अभिभवनीयं)-मूल्यम्। मूलेन समः-मूल्यः। सीतया (हलाग्रेण) समितं सङ्गतं-सीत्यं क्षेत्रम्। तुलया संमितं-तुल्यम्। धर्मपथ्यर्थन्यायादनपेते (४-४-९२) एभ्यः पञ्चम्यन्तेभ्योऽनपेत इत्यर्थे यत्स्यात्। धर्मादनपेतं-धर्म्यम्। एवं पथः-पथ्यम्। अर्थात्-अर्थ्यम्। न्यायात् न्याय्यम्। छन्दसो निर्मिते (४-४-९३) तृतीयान्तादस्मान्निर्मित इत्यर्थे यत्स्यात्। छन्दसा (इच्छया) निर्मितं-छन्दस्यम्। उरसोऽण् च (४-४-९४) तृतीयान्तादुरःशब्दान्निर्मितेऽर्थेऽण् स्यात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...चाचत्। उरसा निर्मितः—औरसः, उरस्यः पुत्रः। हृदयस्य प्रियः (४-४-९५) षष्ठ्यन्ताद्धृदयशब्दा-
त्प्रिय इत्यर्थे यत्स्यात्। हृदयस्य प्रिय—हृद्यः देशः। हृदयस्य हृल्लेखेत्यादिना हृदादेशः। तत्र साधुः
(४-४-९८) सप्तमीसमर्थात्साधुरित्यर्थे यत्स्यात्। अग्रे साधुः—अग्र्यः। सामसु साधु-सामन्यः।
...वेवाभावकर्मणोरिति नलोपाभावः। एवं कर्मन्—कर्मण्यः। शरण—शरण्यः। प्रतिजनादिभ्यः खञ्
(४-४-९९) एभ्यः साध्वर्थे खञ्स्यात्। प्रतिजने साधुः—प्रातिजनीनः। एवं संयुग—सांयुगीनः। इदं
युग—ऐदंयुगीनः। परकुल—पारकुलीनः सर्वजन—सार्वजनीनः। विश्वजन—वैश्वजनीनः। पञ्चजन—
पाञ्चजनीनः। महाजन—माहाजनीनः। परिषदो ण्यः (४-४-१०१) अस्माण्ण्यः स्यात्साध्वर्थे। परिषदि
साधुः—पारिषद्यः। कथादिभ्यष्ठक् (४-४-१०२) एभ्यष्ठक्स्यात्साध्वर्थे। यतोपवादः। कथायां साधुः—
काथिकः। एवं विकथा—वैकथिकः। वितण्डा—वैतण्डिकः। संग्रह-सांग्रहिकः। आयुर्वेद—आयु-
र्वेदिकः। पथ्यतिथिवसतिस्वपतेर्ढञ् (४-४-१०४) पथ्यादिभ्यो ढञ्स्यात्साध्वर्थे। यतोपवादः। पथि
साधु-पाथेयम्। अतिथि—आतिथेयः। वसति—वासतेयी रात्रिः। स्वपति—स्वापतेयं धनम्।
सभाया यः (४-४-१०५) अस्मात्साध्वर्थे यः स्यात्। सभायां साधुः-सभ्यः। समानतीर्थे वासी (४-४-
१०७) सप्तम्यन्तात्समानतीर्थशब्दाद्वासीत्यर्थे यत्स्यात्। समाने तीर्थे (गुरौ) वसतीति-
सतीर्थ्यः। तीर्थे ये इति समानस्य सभावः। समानोदरे शयित ओचोदात्तः (४-४-१०८) सप्तम्यन्ता-
त्समानोदरशब्दात् शयित इत्यर्थे यत्स्यादोकारश्चोदात्तः। समानोदरे शयितः—समानोदर्यः भ्राता।
सोदराद्यः (४-४-१०९) अस्माच्छयित इत्यर्थे यः स्यात्। विभाषोदर इति यकारादिप्रत्यये विवक्षिते
यागेव समानस्य सभावः पाक्षिकः। समानोदरे शयितः—सोदर्यः भ्राता।

टि. १ पदमस्मिन्दृश्यम् (४-४-८७) पदशब्दादस्मिन्दृश्यमित्यर्थे यत्स्यात्। पदं दृश्यमस्मिन् पद्यः कर्दमः। पद्या
...। मूलमस्या बर्हि (४-४-८८) मूलशब्दादस्याबर्हि इत्यर्थे यत्स्यात्। आबर्हं उत्पादनं तद्योगि आबर्हि। मूलमा-
...र्यां मूल्या मुद्गाः। संज्ञायां धेनुष्या (४-४-८९) धेनुशब्दस्य षुगागमो यत्प्रत्ययश्च निपात्यते संज्ञायां स्वार्थे।
... ऋणप्रदानादुत्तमर्णाय दोहनाय देया धेनुः। बन्धने चर्षौ (४-४-९६) षष्ठ्यन्तहृदयशब्दाद्बन्धनेर्थे यत्स्या-
...र्षै। हृदयस्य बन्धनं-हृद्यो वशीकरण मन्त्रः। मतजनहलात्करणजल्पकर्षेषु (४-४-९७) मतादिभ्यो यथासंख्यं कर-
...कर्षेषु यत्स्यात्। मतस्य (ज्ञानस्य) करणं मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षः हल्यः। द्विहल्यः त्रिहल्यः।
...दिभ्यष्ठञ् (४-४-१०३) एभ्यः साध्वर्थे ठञ्स्यात्। गुडे साधुः-गौडिकः इक्षुः। एवं सक्तु-साक्तुको यवः। संग्राम-
...कः। संघात-साङ्घातिकः।

टि. अस्मिन्प्रकरणे यत्प्रत्यय औत्सर्गिकः अन्ये विशेषाः। एतावता चतुर्थाध्यायपूर्तिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—असौ शरण्यः शरणोन्मुखानाम्। वैतण्डिकोयं पुरुषः। धावन्त्यमी मृगवधान्नमये रथ्याः। हालिकैर्द्विहल्या भूमिः कृष्टा। सांग्रामिकाः सैनिकाः। सतीर्थ्याः सोदरा इमे। हृद्यानीमा वस्तूनि। नाव्याः सुप्रतरा नदीः। आतिथेयो गृहस्थः। गार्हपत्ये जुहाव।

प्रश्नाः—प्राग्घितीयमित्यस्य कोर्थः अस्मिन्प्रकरणे क औत्सर्गिकप्रत्ययः। अत्र सर्वसाधारणार्थाः के।

अधस्तनवाक्यगतांस्तद्धितप्रयोगानुपपादय—

धर्म्यं विधिमुपास्महे। धन्या गण्याश्च सज्जनाः। अर्थ्यां वाचमुपाददे। वैतण्डिकानां वचो न ग्राह्यम्। द्वि भूमिं कर्षति जनः। सांयुगीना भटा इमे। सतीर्थ्याः सोदर्याश्च सम्मिलन्ति रथ्यायाम्। धर्म्यं न्याय्यं च पथ्यं च।

इति प्राग्घितीयप्रकरणम्

छयदधिकारः—

प्राक्क्रीताच्छः (५-१-१) तेन क्रीतमित्यतः प्राक्छोऽधिक्रियते। इत ऊर्ध्वं तेन क्रीतमित्यतः प्राक्... विशेषविधिं विना केवलमर्थनिर्देशपरेषु तस्मैहितं, तदर्थविकृतेः प्रकृतादित्यादिषु सूत्रेष्वपवादवि... परिहृत्य छ इत्यधिक्रियते। **उगवादिभ्यो यत्** (५-१-२) उवर्णान्ताद्गवादिभ्यश्च यत्स्यात्प्राक्क्री... येष्वर्थेषु। छस्यापवादः। उ-शङ्कवे हितम्, इदं वा-शङ्कव्यं दारु, ओर्गुण ऽवादेशः। एवं पि... पिचव्यः कार्पासः। कमण्डलु-कमण्डलव्या मृत्तिका। गवादिभ्यः—गवेहित मिदं वा-गव्यं ... वान्तोयीत्यवादेशः। एवं हविष्-हविष्यम्, चरु चरव्यास्तण्डुलाः। सक्तु-सक्तव्या धानाः (भृष्टयव... युग-युग्यम्, मेधा-मेध्यम्। नाभि नभंच (गण) नाभये (रथचक्रमध्यछिद्राय) हितः नभ्योऽ... नभ्यमञ्जनम् (तैलसेकः)। रथनाभावेवेदम्। शरीरावयववाचकात्तुवक्ष्यमाणो यदेव नाभ्यं तैल... शुनः सम्प्रसारणं वा चदीर्घत्वम् (गण) शुने हितमिदं वा शून्यं, शुन्यम्। ऊधसोऽनङ् च (... ऊधसे हितमिदं वा ऊधन्यम्। उदराय हितमिदं वा उदर्यम्। **कम्बलाच्च संज्ञायाम्** (५-... अस्मात्प्राक्क्रीतीयेष्वर्थेषु यत्स्यात्संज्ञायाम्। कम्बलाय हितमिदं वा-कम्बल्यम् ऊर्णापल... असंज्ञायां तु छः- कम्बलीया ऊर्णा। **विभाषा हविरपूपादिभ्यः** (५-१-४) हविर्विशेषवा... भ्योऽपूपादिभ्यश्च प्राक्क्रीतीयेष्वर्थेषु विभाषा यत्स्यात्। पक्षे छः। आमिक्षायै (घनीभूतप... हितमिदं वा-आमिक्ष्यम्, आमिक्षीयं दधि। एवं पुरोडाश-पुरोडाश्याः, पुरोडाशीयाः तण्डु... अपूप-अपूप्यम् अपूपीयं पिष्टम्। तण्डुल-तण्डुल्यं तण्डुलीयम्। सूप-सूप्यं सूपीयम्।

वि. तस्मैहितमित्यादविशेषार्थं निर्दिश्य विधीयमानः प्रत्ययस्तत्रैवार्थे, तत्राप्यर्थमात्रनिर्देशे औत्सर्गिकश्छः ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषोल्लेखेऽपवादरूपेण विधीयमानः प्रत्ययो भवति। तस्मैहितमित्यादिविशेषार्थनिर्देशतः पूर्वंतनौ छयतौ तु ...र्थेषु साधारण्येन भवतः। चर्वादिहविर्वाचकेषु गवादिपाठबलेन पूर्वविप्रतिषेधाद्यदेव, नतु विभाषाहविरिति ...तिः।

तस्मै हितम् (५-१-४) चतुर्थीसमर्थाद्धितमित्यर्थे यथाविहितं प्रत्ययः स्यात्। शङ्कवे हितं शङ्कव्यम्। ...गो-गव्यम्। हविष्-हविष्यम्। वत्स्य-वत्सीयो दोग्धा। शरीरावयवाद्यत् (५-१-६) शरीरावयवा-...तस्मैहितमित्यर्थे यत्स्यात्। औत्सर्गिकस्य छस्यापवादः। कण्ठाय हितं-कण्ठ्यम् एवं दन्त-...न्त्यम्। ओष्ठ-ओष्ठ्यम्। चक्षुष्-चक्षुष्यम्। नाभि-नाभ्यम्। नस् नासिकायाः (वा) (यत्तस्क्षुद्रे षु) ...नासिकायै हितं-नस्यम्। ये च तद्धिते (६-१-३१) यादौ तद्धिते परे शिरः शब्दस्य शीर्षन्नादेशः स्यात्। ...रसे हितं-शीर्षण्यम्। शीर्षन्नादेशे येचाभावकर्मणोरिति प्रकृतिभावेन टिलोपाभावः णत्वं च। ...केशेषु (वा) शीर्षण्याः शिरस्या वा केशाः। खलयवमाषतिलवृषब्रह्मणश्च (५-१-७) एभ्यो हितार्थे ...स्यात्। छापवादः। खलाय-हितं खल्यम्। एवं यव-यव्यम्, तिल-तिल्यम्। वृष-वृष्यम्। ब्रह्मन्-...ण्यम्। चात् रथाय हिता-रथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः (५-१-९) आत्मन्विश्व-...जनाभ्यां भोगोत्तरपदाच्च हितार्थे खः स्यात्। छापवादः। आत्मने हितम्-आत्मनीनम्। ...जनेभ्यः-विश्वजनीनम्। कर्मधारयादेवेष्यते षष्ठीतत्पुरुष बहुव्रीह्योस्तु छ एव विश्वजनीयम्। ...जनादुपसंख्यानम् (वा) पञ्चजनेभ्यः (रथकारपञ्चम चतुर्वर्णेभ्यः) पञ्चजनीनम्। सर्वजनाट्ठञ्खश्च ... सर्वजनेभ्यो हित-ःसार्वजनिकः, सर्वजनीनः। महाजनाट्ठञ् (वा) महाजनाय हितः- माहा-...कः। भोगोत्तरपदेभ्यः- राज्ञोभोगः शरीरम् राजभोगाय हितः- राजभोगीनः। एवं पितृभोग-पितृ...णः। मातृभोग-मातृभोगीणः। आचार्यादणत्वं च (वा) आचार्यभोग-आचार्यभोगीनः। ...पुरुषाभ्यां णढञौ (५-१-१०) आभ्यां यथासंख्यं णढञौ स्तो हितार्थे। छस्यापवादः। ...णो वेति वक्तव्यम् (वा) पक्षे छः। सर्वस्मै हितं-सार्वम्, सर्वीयम्। पुरुषाद्वधविकारसमूह ...कृतेषु (वा) पुरुषस्य वधः- पौरुषेयः। तस्येदमित्यणोपवादः। पुरुषस्य विकारः- पौरुषेयः। ...विकारजताद्यञोपवादः। पुरुषाणां समूहः- पौरुषेयम्। समूहाणोपवादः। पुरुषेण कृतः- पौरुषेयः ...। ग्रन्थेऽणोऽपवादः।

---

१. अजाविभ्यां थ्यन् (५-१-८) आभ्यां थ्यन्स्याद्धितार्थे। अजेभ्यो हिता-अजथ्या। अविभ्यो हिता—अविथ्या
...। माणवचरकाभ्यां खञ् (५-१-११) अभ्यां खञ्स्याद्धितार्थे। माणवाय (मनोः कुत्सितापत्याय) हितं-...नम्। चरक-चारकीणम्। उक्तं च वार्तिके-अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः, नकारस्य च मूर्धन्यस्तेन ...माणवः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदर्थं विकृतेः प्रकृतौ (५-१-१२) प्रकृतिरुपादानकारणं, तस्यैवोत्तरमवस्थान्तरं विकृतिः विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां यथाविहितं प्रत्ययः स्यात्। अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि। एवं प्राकार प्राकारीया इष्टकाः। शङ्कु-शङ्कव्यं दारु। छदिरुपधि... ढञ् (५-१-१३) छदिरादिभ्यो ढञ्स्यात्प्रकृतिविकृतिभावे। छापवादः। छदिषे इमानि-छादिषेयाणि तृणानि। एवम् - वलि-वालेयास्तण्डुलाः। उपधिशब्दात्स्वार्थे इष्यते (वा) उपधीयत इत्युपधिः रथाङ्गम्, तदेव औपधयेम्। ऋषभोपानहोर्ञ्यः (५-१-१४) आभ्यां ञ्यः स्यात्प्रकृतिविकृतिभावे। छापवादः। ऋषभाय अयं (ऋषभभावाय पोषितः) आर्षभ्यो वत्सः। उपानह्यार्थम् औपानह्यो मुञ्जः। चर्मण्यप्ययमेव पूर्वविप्रतिषेधेन। औपानह्यं चर्म। चर्मणोऽञ् (५-१-१५) चर्मविकृतिवाचकादञ्स्यात्प्रकृतौ वाच्यायाम्। वर्ध्र्यै (चर्मरज्जवे) इदं-वार्ध्रं चर्म। वरत्रायै (चर्मरज्जवे) इदं-वारत्रं चर्म।

वि तदर्थंविकृतेः प्रकृताविति विकृत्यर्थकप्रकृतौ वाच्यायां प्रकृतिवाचकात्प्रत्ययः। तादर्थ्योक्त्या यवानां धानानां सक्तव इत्यादौ यवानां धानार्थत्वस्य धानानां सक्तुत्वर्थत्वस्याविवक्षितत्वान्न प्रत्ययः। विकृतेरित्युक्त्या उदकाय कूप इत्यादौ तादर्थ्ये उदकस्य कूपविकृतित्वाभावान्न प्रत्ययः। प्रकृतावित्युक्त्या असयेऽयं कोश इत्यादौ कोशस्य प्रकृतित्वाभावान्न प्रत्ययः।

तदस्य तदस्मिन्स्यादिति (५-१-१६) प्रथमान्तसमर्थादस्य स्यादस्मिन्स्यादित्यर्थयोर्यथाविहितं प्रत्ययः स्यात्। प्राकार आसामिष्टकानां स्यात् -प्राकारीया इष्टकाः। प्राकारोऽस्मिन्स्यात् -प्राकारीयो देशः। परिखाया ढञ् (५-१-१७) अस्माड्ढञ्स्यादस्यास्मिन्वास्यादित्यर्थे। परिखा अस्या, अस्यां वा स्यात् -पारिखेयी भूमिः। छस्यापवादः।

वि. तदस्यतदस्मिन्स्यादिति इतिशब्दो लौकिकीं विवक्षामनुसारयति। ततश्चशिष्टानां तथाव्यवहाराभावात् ... प्रासादोदेवदत्तस्य स्यादिति। प्रकृतिविकृतिभावस्तादर्थ्यं चेह न विवक्षितं किंतर्हि योग्यतामात्रं, तेनपूर्वसूत्रस्यायमविषयः।

प्रयोगाः—एकाकिनोपि परितः पौरुषेयवृता इव। चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम्। त्वचं स मेध्यां परिधाय रौरवीम्। चक्षुष्यं पुनर्नवाञ्जनम्। वेदः पौरुषेयो न वा। राजभोग्याः प्रासादाः। रथ्या पथ्या सर्वेषाम्। सार्वजनिकानि कार्याणि।

प्रश्नाः—प्राक्क्रीतीयार्थाः के औत्सर्गिकश्छः केष्वर्थेषु। प्रकृतिविकृती के, जनोत्तरपदेभ्यो हितार्थे के प्रत्ययाः, शरीरावयववाचकेभ्यो हितार्थकप्रत्ययाः के भवन्तिः। अधस्तनवाक्यगतांस्तद्धितप्रत्ययानुपपादय—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नैतानीनमथवा क्रियते मदान्धैः । वारत्रं चर्म दृश्यते । नस्येन नासिका शुद्ध्यति । अब्रह्मण्योयं प्रदेशः । वेदोऽ- त्रेदः उच्यते । शङ्कव्यं दारु दर्शय । प्रणम्य सार्वं सर्वज्ञम् ।

इति छयदधिकारः

आर्हीयाः—

प्राग्वतेष्ठञ् (५-१-१८) तेनतुल्यमिति वतेः प्राक् ठञधिक्रियते । इत उत्तरं वतेः प्रागपवादविषयं विहायार्थमात्रनिर्देशपरेषु पारायणतुरायणचान्द्रायणं वर्तयतीत्यादिषु ठञेव भवति । आर्हादगोपुच्छ संख्यापरिमाणाट्ठक् (५-१-१९) इत ऊर्ध्वं तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये तदपवादष्ठगधि क्रियते गोपुच्छसंख्यापरिमाणान्वर्जयित्वा । अयं ठगपि प्रत्ययविशेषाश्रवणे उपतिष्ठते ।

टि. प्राग्वतेरित्युत्तरं तेनतुल्यमितिवतेः प्राक्ठञो महाधिकारः, तदन्तः आर्हादित्युत्तरं तदर्हतीतिपर्यन्तं ठञोपवाद- ठगधिकारः, अस्मिँष्ठगधिकारे सर्वत्र अगोपुच्छपरिमाणादिति निषेधोप्युपतिष्ठते। तेन गोपुच्छादिषु औत्सर्गिकष्ठञेव । अत्रापि तदपवादविशेषा छन्यत्कन्नादय एकादशप्रत्ययाः । तदर्हतीत्युत्तरं पारायणतुरायणेत्यादौ वतिपर्यन्तमपवाद- विषयपरिहारेण औत्सर्गिकस्य ठञः प्रवृत्तिः । तत्रापि कालादित्यतः प्रभृति व्युष्टादिभ्योण् इत्यतः प्राक्कालादिति विशेषाधिकार इति प्राग्वतीयेवान्तरप्रकरणविभागोनुसन्धेयः ।

टि. ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्संख्याबाह्या तु सर्वतः । इति श्लोकवार्तिकात् तुलामारोप्य पाषाणादिना सुवर्णादेर्गुरुत्वं यदुन्मीयते तद्गुरुत्वमापमुन्मानम्, आयतविस्तृतोच्छ्रितेन काष्ठादिपात्रेण यदि सर्वतः परिच्छिद्यते तत्परिमाणं प्रस्थादि, आयामो दैर्घ्यमरत्निप्रादेशादिना परिच्छिद्यते तत्प्रमाणम्, तच्च क्वचित्तिर्यगव- स्थितस्य वस्त्रादेर्हस्तादि, क्वचिदूर्ध्वाधोवस्थितस्य जलादेर्हस्त्यूर्वादिः, यथा हास्तिनमुदकमूरुद्वयसमुदकमिति । एभ्य उन्मान परिमाणप्रमाणेभ्यो बहिर्भूता एकत्वद्वित्वादिका वस्तुपरिच्छेदिका संख्या, इत्येतादृशः संख्यापरिमाणयोर्विशेषो बोध्यः ।

असमासे निष्कादिभ्यः (५-१-२०) आर्हादित्येतत्तेनक्रीतमिति यावदनुवर्तते । निष्कादिभ्योऽ- समासे ठक्स्यादार्हीयेष्वर्थेषु । ठञोपवादः । निष्केण क्रीतं-नैष्किकम् । निष्कं सुवर्णाश्चत्वारः । पणं पण-पाणिकम् । पाद-पादिकम् । माष-माषिकम् । षष्टि-षाष्टिकम् । समासे तु ठञ् एव-परमनैष्कि- कम् । परिमाणान्तस्यासंज्ञाशाणयोः (७-३-१७) परिमाणान्तस्य उत्तरपदस्यादेरचो वृद्धिः स्यात् ञिति णिति किति च असंज्ञाशाणयोः । इत्युत्तरपदस्यादिवृद्धिः । अर्धात्परिमाणस्य पूर्वस्य तु वा (७-३-२६) अर्धात्परस्य परिमाणवाचकोत्तरपदस्यादेरचो वृद्धिः स्यात्पूर्वपदस्य तु वा ञिति णिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किति च परे। अर्धद्रोणेन क्रीतम्-आर्धद्रौणिकम्, अर्धद्रौणिकम्। नातः परस्य (७-३-२७) अर्धा- त्परस्य परिमाणाकारस्य वृद्धिर्न स्यात्पूर्वपदस्य तु वा ञिति णिति किति च परे। अर्धप्र- क्रीतम्-आर्धप्रस्थिकम्, अर्धप्रस्थिकम्। अत इत्युक्त्या इह तु वृद्धिः, अर्धकुडवेन क्रीतम्-आर्धकौ- विकम्। एषु समासेषु तेनक्रीतमिति ठञेव। शताच्च ठन्यतावशते (५-१-२१) शतशब्दाट्ठन्य- स्तः आर्हीयेष्वर्थेषु अशतेऽभिधेये। वक्ष्यमाणकनोपवादः। शतेन क्रीतं-शतिकं, शत्यम्। शतेमि- तु-शतं परिमाणमस्य-शतकः सङ्घः। अत्रसङ्घोपि शतान्न भिद्यते, तेन वक्ष्यमाणः कन्। अत्राप्यश- इत्येव, तेन द्विशतेन क्रीतं-द्विशतिकं त्रिशतकमित्यादावपि कन्नेव। संख्याया अतिशदन्ताया: (५-१-२२) संख्यावाचकात्कन्स्यादार्हीयेष्वर्थेषु न तु तिशब्दान्तात्। ठञोपवादः। पञ्चभिः क्री- पञ्चकः। एवं-षट्-षट्कः। सप्त-सप्तकः। बहु-बहुकः। गण-गणकः। बहुगणवत्विति संख्यासंज्ञा। तु सप्तत्या क्रीतः-साप्ततिकः। ठञि यस्येतिचेतीकारलोपः। शदन्तेपि चत्वारिंशता क्रीतः-चात्वा- शत्कः। ठञि इसुसुक्तेति ठस्य कः। वतोरिड्वा (५-१-२३) वत्वन्तात्परस्य कन इडागमो- स्यादार्हीयेष्वर्थेषु। तावता क्रीतः-तावतिकः तावत्कः। वत्वन्तत्वेन संख्यात्वात्पूर्वेण कनि इड्- कल्पः। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् (५-१-२४) आभ्यां ड्वुन्स्यादसंज्ञायामार्हीयेष्व- विंशतित्रिंशद्भ्यामिति योगविभागेन कन्नपि विधीयते, स च परिशेषात्संज्ञायामेव। विंशत्या क्री- विंशकः। ड्वुनि अकादेशे तिविंशतेर्डिति इति तिलोपः। त्रिंशता क्रीतः-त्रिंशकः। टेरिति टिलो- संज्ञायां कनि-विंशतिकः, त्रिंशत्कः।

वि· कंसाट्टिठन् (५-१-२५) अस्माट्टिठन्स्यादार्हीयेषु। टो ङीबर्थ इकार उच्चारणार्थः। कंसेन (पानभाजनेन) क्री- कंसिकः, कंसिकी। अर्धाच्चेति वक्तव्यम् (वा) अर्धेन क्रीतः-अर्धिकः, आर्धिकी। कार्षापणाट्टिठन्वक्तव्यः प्रति- देशश्च वा (वा) कार्षापणेन क्रीतः-कार्षापणिकः, कार्षापणिकी। प्रतिकः, प्रतिकी। शूर्पादञन्यतरस्याम् (५-१- अस्मादञ्वा स्यादार्हीयेषु। पक्षे ठञ्, शूर्पेण क्रीतं-शौर्पं, शौर्पिकम्। शतमानविंशतिकसहस्रवसनादण् (५-१- एभ्योऽण्स्यादार्हीयेषु। ठञ्कन्नामपवादः। शतमानेन (परिमाणविशेषेण) क्रीतं-शातमानम्, एवं विंशतिक वैंशति- सहस्र-साहस्रम्, वसन-वासनम्, अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम् (५-१ २८) अध्यर्धपूर्वाद्द्विगोश्च परस्यार्ह- लुक्स्यादसंज्ञायाम्। अध्यर्धेन (सार्द्धेन) कंसेन क्रीतम्-अध्यर्धकंसम्, तद्धितार्थद्विगौ संख्याया अतिशदन्ताया- कनि लुक्। द्वाभ्यां कंसाभ्यां क्रीतं-द्विकंसम्। ठको लुक्। अध्यर्धपूर्वेपि द्विगुत्वात्सिद्धे पुनर्विधानं कृत्वसुजादिकमध्यर्ध- नेति ज्ञापनार्थम्। विभाषा कार्षापणसहस्राभ्याम् (५-१-२९) आभ्यां परस्यार्हीयस्य लुग्वा स्यात्पूर्वविषये। अ- कार्षापणम्, अध्यर्धकार्षापणिकम्, द्विकार्षापणम्, द्विकार्षापणिकम्। अध्यर्धसहस्रम्, अध्यर्धसाहस्रम्, द्विस-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...सम्। द्वित्रिपूर्वान्निष्कात् (५-१-३०) अस्मात्परस्यार्हीयस्य लुग्वास्यात्। द्विनिष्कं, द्विनैष्किकम्। ठञो लुक्। ...ते ठगभावात्। त्रिनिष्कं, त्रिनैष्किकम्। बहुपूर्वाच्चेति वक्तव्यम् (वा) बहुनिष्कम्, बहुनैष्किकम्। परिमाणान्तस्ये- ...वृद्धिः। बिस्ताच्च (५-१-३१) द्वित्रिबहुपूर्वाद्बिस्तादुत्तरस्यार्हीयस्य लुग्वा स्यात्। द्विबिस्तम्, द्विबैस्तिकम्, ...स्तं, त्रिबैस्तिकम्। बहुबिस्तं, बहुबैस्तिकम्। ठञः पाक्षिको लुक्। विंशतिकात्खः (५-१-३२) अध्यर्धपूर्वाद्द्विगोश्च- ...विंशतिकान्तादार्हीयेषु खः स्यात्। अध्यर्धविंशतिकीनम्। द्विविंशतिकीनम्। खार्या ईकन् (५-१-३३) अध्यर्धपूर्वाद् ...श्च खार्यन्तादार्हीयेषु ईकन्स्यात्। अध्यर्धखारीकम्, द्विखारिकम्। केवलायाश्चेति वक्तव्यम् (वा) खार्या ...खारीकम्। पणपादमाषशताद्यत् (५-१-३४) अध्यर्धपूर्वाद्द्विगोश्च पणाद्यन्तादार्हीयेषु यत्स्यात्। अध्यर्धपण्यम्। ...ण्यम्। अध्यर्धपाद्यम्। द्विपाद्यम्। यस्येतिचेति लोपस्य स्थानिवद्भावान्न पादःपदिति पदादेशः, पद्यत्यतदर्थे इत्यपि ...तदर्थस्यैव तत्र ग्रहणात् शाणाद्वा (५-१-३५) अध्यर्धपूर्वाद्द्विगोश्च शाणान्ताद्यद्वा स्यात्। पक्षे ठञि ...। अध्यर्धशाण्यम्, अध्यर्धशाणम्। द्वित्रिपूर्वादण्च (५-१-३६) अस्मादण्स्यात्पूर्वविषये, चाद्यत्। अणि ...न्तस्यासंज्ञाशाणयोरिति पर्युदासादादिवृद्धिरेव-द्वैशाणम्, यति द्विशाण्यम्। पक्षे ठञि लुक्-द्विशाणम्।

...ह ठञादयस्त्रयोदशप्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयः, अर्थाश्चाकांक्षितास्त इदानीमुच्यन्ते। ...न क्रीतम् (५-१-३७) तृतीयासमर्थात्क्रीतमित्यर्थे यथाविहितं ठञादयः स्युः। गोपुच्छेन क्रीतं-गौपु- ...च्छिकम्। एवं सप्तति-साप्ततिकम्। प्रस्थ-प्रास्थिकम्। अगोपुच्छसंख्यापरिमाणादितिपर्युदासेन ...ठकोऽप्राप्त्या औत्सर्गिकष्ठञ्। निष्क-नैष्किकम्। पण-पाणिकम्। पाद-पादिकम्। माष-माषिकम्। ...निष्कादित्वाट्ठक्। इद्गोण्याः (१-२-५०) गोण्या इत्स्यात्तद्धितलुकि। पञ्चभिर्गोणीभिः क्रीतः-पञ्च- ...गोणिः पटः। आर्हीयस्य ठको लुकि लुक्तद्धितलुकीति ङीषो लुगपवादेन इत्वम्।

...त्रि. तेनेति मूल्यात्करणे तृतीयायामेव प्रत्ययः, अन्यत्रानभिधानान्नेह-देवदत्तेन क्रीतं, पाणिना क्रीतम्। द्विबहुवचना- ...न्तेभ्यो न प्रत्ययोऽनभिधानात्। प्रस्थाभ्यां क्रीतं, प्रस्थैः क्रीतमित्यादि। प्रकृत्यर्थस्य संख्याभेदावगमे प्रमाणसत्त्वे तु द्विबहु- ...वचनादपि भवति, द्वाभ्यां क्रीतं-द्विकम्। त्रिभिः क्रीतं-त्रिकम्। तथा मुद्गैः क्रीतं-मौद्गिकम्। माषैः क्रीतं-माषिकम्। ...न मुद्गमाषादिना क्रयः सम्भवति।

...स्य निमित्तं संयोगोत्पातौ (५-१-३८) संयोगः सम्बन्धः, उत्पातः शुभाशुभसूचकः। षष्ठ्यन्तान्निमित्त- ...मित्यर्थे यथाविहितं प्रत्ययः स्यात्तच्च निमित्तं संयोग उत्पातो वा चेत्। शतस्य निमित्तं-शतिकः ...शत्यो वा धनपतिसंयोगः; शतिकं शत्यं वा-दक्षिणाक्षिस्पन्दनम्। शताच्चेति ठन्यतौ। एवं सहस्र- ...साहस्रम्। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् (वा) वातस्य शमनं कोपनं (वर्धनं) वा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वातिकम् । एवं पित्त-पैत्तिकम् । श्लेष्म-श्लैष्मिकम् । आर्हीयष्ठक् । सन्निपाताच्चेति वक्तव्यम् (वा) वातपित्तश्लेष्मणां साङ्कर्यं सन्निपातः; तस्य निमित्तं सान्निपातिकम् अपथ्यसंयोगः, तत्सूचकं जिह्वाकार्ण्यादि च । गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् (५-१-३९) गोशब्दाद्द्व्यचश्च संख्यापरिमाणाश्वादिवर्जिताद्यत्स्यात्तस्य निमित्तं संयोगोत्पाताविवत्यर्थे । ठञाद्यपवादः । गोर्निमित्तं संयोग उत्पातो वा गव्यः । एवं यशसो निमित्तं-यशस्यम् । स्वर्ग–स्वर्ग्यम् । धन-धन्यम् । आयुष-आयुष्यम् । ब्रह्मवर्चसादुपसंख्यानम् (वा) ब्रह्मवर्चसस्य निमित्तं ब्रह्मवर्चस्यम् । पुत्राच्छ च (५-१-४०) पुत्राच्छः स्यात्पूर्वविषये; चाद्यत् । पुत्रस्य निमित्तं-पुत्रीयं, पुत्र्यम् । संयुज्यतेऽनेनेति यष्टुः फलेन सह संयोजकस्य यागादेरपि संयोगरूपत्वात्-पुत्रीया इष्टिः इत्यपि सिद्ध्यति । सर्वभूमिपृथिवीभ्यामणञौ (५-१-४१) आभ्यां यथासंख्यमणञौ स्तः पूर्वविषये । ठकोपादः । सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः । अनुशतिकादित्वादुभयतो वृद्धिः । पृथिव्या निमित्तं संयोग उत्पातो वा-पार्थिवः । तस्येश्वरः (५-१-४२) सर्वभूमिपृथिवीशब्दाभ्यामणञौ स्तः ईश्वर इत्यर्थे । सर्वभूमेरीश्वरः-सार्वभौमः । पृथिव्या ईश्वरः–पार्थिवः । तत्र विदित इति च (५-१-४३) सप्तम्यन्ताभ्यामाभ्यामणञौ स्तः विदित इत्यर्थे । सर्वभूमौ विदितः–सार्वभौमः । पृथिव्यां विदितः–पार्थिवः । लोकसर्वलोकाट्ठञ् (५-१-४४) आभ्यां विदित इत्यर्थे ठञ्स्यात् । लोकेषु विदितः-लौकिकः । सर्वलोकेषु विदितः-सार्वलौकिकः । अनुशतिकादित्वादुभयतोवृद्धिः ।

वि॰ तस्य वापः (५-१-४५) उप्यतेस्मिन्निति वापः क्षेत्रम् । षष्ठ्यन्ताद्वाप इत्यर्थे यथाविहितं प्रत्ययः स्यात् । प्रस्थस्य वापः-प्रास्थिकम् । एवं द्रोण-द्रौणिकम् । निष्कादित्वाट्ठक् । खारी-खारीकम् । खार्यादीकन् । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते (५-१-४७) प्रथमान्ताद्वृद्धिरायो लाभः शुल्कमुपदा वास्मिन्दीयत इत्यर्थे यथाविहितं प्रत्ययः स्यात् । पञ्च अस्मिन् वृद्धिः- आयः, लाभः, शुल्कम्, उपदा वा दीयते पञ्चकः । एवं सप्त-सप्तकः । संख्यायाः इति कन् । शत-शत्यः, शतिकः । शताच्चेतिठन्यतौ । सहस्र–साहस्रः । शतमानेत्यण् । उत्तमर्णेनाधमर्णान्मूलाधिकं ग्राह्यं वृद्धिः, ग्रामादिषु स्वामिग्राह्यो भाग आयः, विक्रेत्रा मूल्यादधिकं ग्राह्यं लाभः, रक्षानिर्वेशो राजभागः शुल्कः, उत्कोच उपदा । सप्तम्यर्थोन्यपदार्थो व्यवहारादिः । चतुर्थ्यर्थे उपसंख्यानम् (वा) पञ्चास्मै वृद्ध्यादिर्दीयते-पञ्चको देवदत्तः । सममब्राह्मणेदानमितिवदधिकरणत्वस्य विवक्षयाप्येतदुपपद्यते । पूरणार्धाट्ठन् (५-१-४८) पूरणवाचिनोऽर्धशब्दाच्च ठन्स्यात्पूर्वविषये । द्वितीयो वृद्ध्यादिरस्मिन्दीयते–द्वितीयिकः । अर्धं (रूप्यकार्धं) वृद्ध्यादिरस्मिन्दीयते-अर्धिकः । भागाद्यच्च (५-१-४९) अस्माद्यत्स्यात्पूर्वविषये । चाट्ठञ् । (भागोरूप्यकार्धं) वृद्ध्यादिर्दीयतेऽस्मिन् भाग्यं, भागिकं शतम् । भाग्या, भागिका विंशतिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तद्धरति वहत्यावहति भाराद्वंशादिभ्यः (५-१-५०) वंशादिभ्यः परो यो भारशब्दस्तदन्ताद्द्वितीया समर्थाद् हरति वहति, आवहतीत्यर्थेषु यथाविहितं प्रत्ययाः स्युः। वंशभारं हरति (प्रापयति चोरयति वा), वहति (उत्क्षिप्य धारयति), आवहति (उत्पादयति) वा वांशभारिकः। आर्हादिति ठक्। वंश-कुटज-वल्वज-मूला क्ष स्थूणा श्मा-श्वे-क्षु खट्वाः वंशादयः। एवम् ऐक्षुभारिकः, मौलभारिकः। वस्नद्रव्याभ्यां ठन्कनौ (५-१-५१) आभ्यां यथासंख्यं ठन्कनौ स्तः पूर्वविषये। वस्नं (मूल्यं) हरति वहत्यावहति वा-वस्निकः। द्रव्यं हरति वहत्यावहति वा-द्रव्यकः। सम्भवत्यवहरति पचति (५-१-५२) द्वितीयान्तात्संभवतीत्याद्यर्थेषु यथाविहितं प्रत्ययाः स्युः। आधेयस्य प्रमाणानतिरेकः सम्भवः, उपसंहरणमवहारः विक्लेदनं पाकः। प्रस्थं सम्भवति (स्वस्मिन्समावेशयति), अवहरति (उपसंहरति), पचति (विक्लेदयति) वा-प्रास्थिकः कटाहः। एवं कुडव-कौडविकः। परिमाणवाचित्वाट्ठकोऽप्राप्त्या औत्सर्गिकष्ठञ्। तत्पचतीति द्रोणादण्च (वा) चाट्ठञ्। द्रोणं पचति-द्रौणी, द्रौणकी वा। आढकाचितपात्रात्खोऽन्यतरस्याम् (५-१-५३) एभ्यः संभवतीत्याद्यर्थेषु खो वा स्यात्। पक्षे ठञ्। आढकं (द्रोणचतुर्थांशः) सम्भवति अवहरति पचति वा- आढकीना, आढकिकी। एवम् आचितं-आचितीना, आचितिकी, पात्रं-पात्रीणा, पात्रिकी। आचितपात्रे परिमाणविशेषौ। द्विगोष्ठंश्च (५-१-५४) आढकाचितपात्रान्ताद्द्विगोः संभवतीत्याद्यर्थेषु ठन्खौ वा स्तः। पक्षे ठञि अध्यर्धेति लुक्। द्व्याढकिकी, द्व्याढकीना, द्व्याढकी। द्विगोरिति ङीप्। द्व्याचितिकी, द्व्याचितीना द्व्याचिता। लुकि अपरिमाणविस्ताचितेति ङीब्निषेधः।

वि. सोस्यांशवस्नभृतयः (५-१-५६) प्रथमान्तादस्यांशो वस्नं भृतिरित्यर्थेषु यथाविहितं प्रत्ययाः स्युः। अंशो-भागः, वस्नं मूल्यं, भृतिर्वेतनम्। पञ्च अंशो वस्नं भृतिर्वा-पञ्चकः। एवं सप्त-सप्तकः। शत-शत्यः शतिकः। सहस्र-साहस्रः। तदस्य परिमाणम् (५-१-५७) प्रथमान्तादस्य परिमाणमित्यर्थे यथाविहितं प्रत्ययाः स्युः। प्रस्थः परिमाणमस्य-प्रास्थिको राशिः। एवं-कुडव-कौडविकः। खारी-खारीकः। शत-शत्यः, शतिकः। वर्ष-शत-वार्षशतिकः। षष्ठि-जीवितपरिमाणमस्य-षाष्ठिकः। अत्र परिच्छेदहेतुमात्रं परिमाणम्। उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणाल्लिङ्गात्, तेन संख्यापि परिमाणम्। द्विषष्ठ्यादिभ्यस्त्वनभिधानान्नेति भाष्ये। संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु (५-१-५८) संख्यावाचिभ्यस्तदस्यपरिमाणमित्यर्थे यथाविहितं प्रत्ययाः स्युः संज्ञासङ्घसूत्राध्ययनेष्वभिधेयेषु। तत्र-संज्ञायां स्वार्थे प्रत्ययो वाच्यः (वा) यद्वा पञ्चेयोरितिवत्संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः। पञ्चैव-पञ्चकाः शकुनयः। पञ्च परिमाणमेषामिति वा पञ्चकाः। पञ्च परिमाणमस्य पञ्चकः सङ्घः। अष्ट (अष्टौ अध्यायाः) परिमाणमस्य-अष्टकं सूत्रं पाणिनीयम्। एवं दशकं वैयाघ्रपदीयम्। त्रिकं काशकृत्स्नम्। अध्ययने पञ्चकमध्ययनम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सङ्घस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तम्। स्तोमेडविधिः (वा) पञ्चदश मन्त्राः परिमाणमस्य-पञ्चदशः स्तोमः (सामाधारमन्त्रसमूहः) डित्वाट्टिलोपः। एवं सप्तदशः एकविंशः स्तोमः। पङ्क्तिविंशति-त्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टि-सप्तत्यशीति-नवतिशतम् (५-१-५९) तदस्यपरिमाणमित्यर्थे पङ्क्त्यादयो रूढिशब्दा निपात्यन्ते। पञ्च पदानि (पादाः) परिमाणमस्य-पंक्तिः छन्दः। पङ्क्तिरन्ये नानार्थः-ब्राह्मणपङ्क्तिः (क्रमसन्निवेशः), पङ्क्तिरथः (दशरथः)। द्वौ दशतौ दशवर्गौ, परिमाणमस्य-विंशतिः। त्रयोदशतः-त्रिंशत्। चत्वारो दशतः-चत्वारिंशत्। पञ्चदशतः-पञ्चाशत्। षड् दशतः-षष्टिः। सप्तदशतः सप्ततिः। अष्ट दशतः-अशीतिः। नव दशतः-नवतिः। दश दशतः-शतम्। निपातने पूर्वपरयोर्विकारविशेषाः। पञ्चद्दशतौ वर्गे वा (५-१-६०) तदस्यपरिमाणमित्यर्थे पतौ निपात्येते वर्गे भिधेये। पञ्च परिमाणमस्य-पञ्चत् वर्गः। दश परिमाणमस्य-दशत् वर्गः। पक्षे पञ्चकः, दशकः।

वि. पङ्क्त्यादयो गुणशब्दास्ते यथाकथञ्चिद्व्युत्पाद्याः नात्रावयवार्थेष्वाग्रहः। एतान्यव्युत्पन्नप्रातिपदिकानि इति निष्कर्षः। सहस्रायुतादयोऽप्येवम्। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् (५-१-६२) आभ्यां डण् स्यात् ब्राह्मणेऽभिधेये। त्रिंशत्, चत्वारिंशदध्यायाः परिमाणमेषां-त्रैंशानि, चात्वारिंशानि ब्राह्मणानि। ब्राह्मणं वेदे मन्त्र-व्यतिरिक्तो भागः।

तदर्हति (५-१-६३) द्वितीयान्तादर्हतीत्यर्थे यथाविहितं प्रत्ययाः स्युः। श्वेतच्छत्रमर्हति (तद्-योग्यो भवति)-श्वेतच्छत्रिकः। आर्हीयष्ठक्। एवं वस्त्रयुग्म-वास्त्रयुग्मिकः। शत-शत्यः, शतिकः। सहस्र-साहस्रः। छेदादिभ्यो नित्यम् (५-१-६४) द्वितीयान्तेभ्यश्छेदादिभ्यो नित्यमर्हतीत्यर्थे यथाविहितं प्रत्ययाः स्युः। छेदं नित्यमर्हति-छैदिकः वेतसः। छिन्नप्ररूढत्वात्। एवं भैदिकः। कर्ष-कार्षिकः। सम्प्रयोग-साम्प्रयोगिकः। प्रेषण-प्रैषणिकः। संप्रश्न-सांप्रश्निकः। विप्रयोग-वैप्रयोगिकः। आर्हीयष्ठक्। शीर्षच्छेदाद्यच्च (५-१-६५) अस्मान्नित्यमर्हतीत्यर्थे यत्स्यात्, चकाराद्यथाविहितश्च। शीर्षच्छेदं नित्यमर्हति-शीर्षच्छेद्यः शैर्षच्छेदिकः। यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते। दण्डादिभ्यो यः (५-१-६६) नित्यमिति निवृत्तम्। द्वितीयान्तेभ्यो दण्डादिभ्योऽर्हतीत्यर्थे यः स्यात्। ठकोपवादः। दण्डमर्हति-दण्ड्यः। एवं-मुशल-मुशल्यः। मधुपर्क-मधुपर्क्यः। कशाः-कश्यः। अर्घ-अर्घ्यः। मेधा-मेध्यः। मेघ-मेघ्यः। युग-युग्यः। उदक-उदक्या स्त्री। वध-वध्यः। गुहा-गुह्यः। भाग-भाग्यः। इभ-इभ्यः।

वि. पात्राद्घंश्च (५-१-६८) अस्मादर्हतीत्यर्थे घन्स्यात् चाद्यश्च। पात्र (परिमाणं) महति-पात्रियः, पात्र्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...दक्षिणाच्छ च (५-१-६६) आभ्यामर्हतीत्यर्थे छः स्यात् चाद्यच्च। कडङ्कर (माषमुद्गादिकाष्ठं) मर्हति-कडङ्करीयः ...र्गौः। दक्षिणामर्हति-दक्षिणीयः, दक्षिण्यः। यज्ञर्त्विग्भ्यां घखञौ (५-१-७१) आभ्यामर्हतीत्यर्थे यथासंख्यं ...तः। यज्ञमर्हति-यज्ञियो ब्राह्मणः। ऋत्विजमर्हति-आर्त्विजीनः यजमानः। यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् ...कर्मार्हति-यज्ञियो देशः। ऋत्विक्कर्मार्हति आर्त्विजीनः ऋत्विक्। आर्हीयानां ठगादीनां द्वादशानां पूर्णोऽवधिः। ...रं प्राग्वतीयष्ठञेव भवति।

प्रयोगाः—शीर्षच्छेद्यः स ते राम। सन्निपातिकपीडितः। षडर्घ्या भवन्ति। धन्यं यशस्यमायुष्यं ...देवानां पर्युपासनम्। चक्रवर्ती सार्वभौमः। प्रास्थिकं पात्रमानय। अदण्ड्यान्दण्डयन्राजा दण्ड्याँ-स्चैवाप्यदण्डयन्। अयशो महदाप्नोति। शीर्षच्छेद्योऽयं दुष्टः।

प्रश्नाः—आर्हीयप्रकरणे कियन्तः प्रत्ययाः विहिताः। मानविशेषाः के। तस्य निमित्तं संयोगोत्पातावित्यस्य कोऽर्थः। ...र्थे के प्रत्ययाः। अर्हति नित्यमर्हतीत्यर्थयोः को विशेषः। अधस्तनवाक्यगतांस्तद्धितान्तानुपपादय—

...गिरे यतात्मानः पुत्रीयामिष्टिमृत्विजः। निवारपाकादि कडङ्करीयैरामृश्यते जानपदैर्न कच्चित्। भारतं यज्ञियो ...। अयशस्यमनायुष्यमुदक्या दृष्ट भक्षणम्। वातिकं पैत्तिकं चेदम्। चक्रवर्ती सार्वभौमः। नीवारपाकादि ...रीयैरामृश्यते जानपदैर्न कच्चित्।

इत्यार्हीयप्रकरणम्

...ये कालाधिकारः—

अतः परमार्हीयठगादिनिवृत्त्या प्राग्वतीयष्ठञ्। पारायणतुरायणचान्द्रायणं वर्तयति (५-१-७२) द्वितीयासमर्थेभ्यः पारायणादिभ्यो वर्तयतीत्यर्थे ठञ्स्यात्। पारायणं वेदाध्ययनं, तुरायणं यज्ञविशेषः चान्द्रायणं कृच्छ्रविशेषः। पारायणं वर्तयति-पारायणिकश्छात्रः। एवं तुरायण-तौरायणिको यजमानः। चान्द्रायण-चान्द्रायणिकस्तपस्वी। गुरावध्येतरि पारायणिक इति, ऋत्विजि यज्ञनिर्वर्तके तौरायणिक इति न भवति अनभिधानात्। संशयमापन्नः (५-१-७३) द्वितीयान्तात्संशयशब्दा-दापन्न इत्यर्थे ठञ्स्यात्। संशयमापन्नः-सांशयिकः। योजनं गच्छति (५-१-७४) द्वितीयान्तयोजन-शब्दाद्गच्छतीत्यर्थे ठञ्स्यात्। योजनं गच्छति-यौजनिकः। क्रोशशत-योजनशतयोरुपसंख्यानम् (वा) क्रोशशतं गच्छति-क्रौशशतिकः। योजनशतं गच्छति-यौजनशतिकः। ततोऽभिगमनमर्हतीति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च वक्तव्यम् (वा) क्रोशशतादभिगमनमर्हति-क्रौशशतिको भिक्षुः। एवं योजनशत-यौजनशति आचार्यः। पथः ष्कन् (५-१-७५) पथिन्शब्दाद्गच्छतीत्यर्थे ष्कन्स्यात्। पन्थानं गच्छति-पथि पथिकी। पन्थो ण नित्यम् (५-१-७६) पथिन्शब्दान्नित्यं गच्छतीत्यर्थे णः स्यात्। पन्थानं नि गच्छति-पान्थः, पान्था। उत्तरपथेनाहृतं च (५-१-७७) तृतीयान्तोत्तरपथशब्दादाहृतमि गच्छतीत्यर्थेपि ठञ् स्यात्। उत्तरपथेनाहृतम्-औत्तरपथिकम्। उत्तरपथेन गच्छति-औ पथिकः। आहृतप्रकरणे वारि-जङ्गल-स्थल-कान्तारपूर्वादुपसंख्यानम् (वा) वारिपथेनाहृतं वारि गच्छति वा-वारिपथिकः। एवं जाङ्गलपथिकः। स्थालपथिकः। कान्तारपथिकः।

वि. अस्मिन्प्रकरणे ठगादीनामनुवृत्त्यभावादौत्सर्गिकः प्राग्वतीयष्ठञेवानुवर्तते अपवादविषयं परिहृत्य। पथिन त्सामान्यगत्यर्थे ष्कनि पथिक इति नित्यगत्यर्थे णे पान्थ इति व्यवस्थायामपि नित्यमित्यस्य भाष्ये प्रत्याख्यानात्कदाचि मत्यपि पान्थ इति प्रयुज्यते।

कालात् (५-१-७८) व्युष्टादिभ्योण् इत्यतः प्रागधिकारोयम्। प्रकृतिविशेषणत्वेनेदमन्वेति। निर्वृत्तम् (५-१-७९) तृतीयासमर्थात्कालवाचिनो निर्वृत्तमित्यर्थे ठञ्स्यात्। अन्हा निर्वृ आन्हिकम्। अन्हष्टखोरेवेतिनियमान्नस्तद्धितइति टिलोपाभावे अल्लोपोन इत्यकारमात्रलो एवं मास-मासिकम्। संवत्सर-सांवत्सरिकम्। वर्ष-वार्षिकम्। पक्ष-पाक्षिकम्। दिन-दैनिक तमधीष्टो भृतो भूतो भावी (५-१-८०) समर्थद्वितीयान्तात्कालवाचकात् अधीष्टः, भृतः, भूतः, भ इत्यर्थेषु यथाविहितं प्रत्ययः स्यात्। अधीष्टः सत्कृत्य व्यापारितः, भृतो वेतनेन क्रीतः, भूतः स्वस व्याप्तकालः, भावी तादृश एवानागतकालः। कालाध्वनोरिति द्वितीया। मासमधीष्टः-मासि ध्यापकः। मासं भृतः-मासिकः कर्मकरः। मासं भूतः-मासिक व्याधिः। मासं भावी-मा उत्सवः। एवं सांवत्सरिकः, वार्षिकः, दैनिकः। मासाद्वयसि यत्खञौ (५-१-८१) मासशब्द इत्यर्थे यत्खञौ स्तः वयस्यभिधेये। ठञोपवादः। अधीष्टादीनां चतुर्णामधिकारेप्यत्र भूत ए गृह्यते व्याख्यानात्। मासं भूतः-मास्यः मासीनः (मासवयस्कः) बालकः। द्विगोर्यप् (५-१ मासान्ताद्द्विगोःभूतार्थे यप्स्याद्वयस्यभिधेये। द्वौ मासौ भूतः-द्विमास्यः बालकः। त्रिमास्यः, चतुर्मास्यः। षण्मासाण्ण्यच्च (५-१-८३) अस्माद्भूतार्थे वयस्यभिधेये ण्यत्स्या औत्सर्गिकष्ठञपि। षण्मासं भूतः-षाण्मास्यः, षण्मास्यः, षाण्मासिकः बालः। अवयसि (५-१-८४) षण्मासशब्दाद्भूतार्थे ठन्स्याच्चाण्ण्यत् अवयस्यभिधेये। षण्मासं भूतः-षण्मा षाण्मास्यः रोगः। रात्र्यहःसंवत्सराच्च (५-१-८७) परिजय्येत्यतः प्राङ्निर्वृत्तादिषु पञ्चस्वर्थेषु प्रत्य रात्र्यहःसंवत्सरान्ताद्द्विगोर्निर्वृत्तादिष्वर्थेषु खो वा स्यात्। द्वाभ्यां रात्रिभ्यां निर्वृत्तः, द्वि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधीष्टो भृतो भूतो भावी वा–द्विरात्रीणः। पक्षे ठञ्–द्वैरात्रिकः। द्वाभ्यामहोभ्यां निर्वृत्तः, द्वे अहनी अधीष्टो भृतो भूतो भावी वा–द्व्यहीनः। तद्धितार्थद्विगोः खे, अन्हष्टखोरेवेति टिलोपः। द्वैयन्हिकः। टखोरेवेति नियमाट्टिलोपाभावेन अल्लोपे अन्हादेशे वा नय्वाभ्यामित्यैच्। समासान्तविधेरनित्यत्वाद्राजाहःसखिभ्य इति टज्न। एवं त्र्यहन्–त्र्यहीणः, त्रैयन्हिकः। द्विसंवत्सर–द्विसंवत्सरीणः, द्विसांवत्सरिकः। संख्यायाः संवत्सरसङ्ख्यस्य च (७-३-१५) सङ्ख्यायाः परस्य संवत्सरस्य वृद्धिः स्यात् ञिदादौ इत्युत्तरपदवृद्धिः। वर्षाल्लुक्च (५-१-८८) वर्षान्ताद्विगोर्निर्वृत्ताद्यर्थेषु खो वा स्यात् पक्षे ठञ् तयोर्वा लुक्च। द्विवर्षाभ्यां निर्वृत्तः द्वौ वर्षौ अधीष्टो भृतो भूतो वा–द्विवर्षीणः, द्विवार्षिकः, लुकि–द्विवर्षः व्याधिः। एवं त्रिवर्षीणं, त्रिवार्षिकं, त्रिवर्षं वा दुर्भिक्षम्। वर्षस्याभविष्यति (७-३-१६) भविष्यद्भिन्नार्थके ञिदादौ परे उत्तरपदस्य वर्षशब्दस्य वृद्धिः स्यात्। इति वृद्धौ द्विवार्षिकः, त्रिवार्षिकः, भाविनि तु पूर्वपदस्यैव वृद्धिः–द्वैवर्षिकः, त्रैवर्षिकः, चित्तवति नित्यम् (५-१-८९) वर्षशब्दान्ताद्द्विगोः प्रत्ययस्य नित्यं लुक्स्याच्चेतने प्रत्ययार्थे। पूर्वेण विकल्पे प्राप्ते नित्यवचनम्। द्विवर्षो दारकः। त्रिवर्षा वत्सा। अचेतने तु–द्विवर्षीणो, द्विवार्षिको व्याधिः। षष्टिकाः षष्टिरात्रेण पच्यन्ते (५-१-९०) पच्यन्त इत्यर्थे षष्टिरात्रशब्दात्कनि रात्रिशब्दलोपे च षष्टिक इति निपात्यते। षष्टिरात्रेण पच्यन्ते–षष्टिकाः। बहुवचनमविवक्षितम्। षष्टिको धान्यविशेष एव, तेन मुद्गादिष्वतिप्रसङ्गो न। तेन परिजय्यलभ्यकार्यसुकरम् (५-१-९३) तृतीयान्तात्कालवाचिनः परिजय्य–लभ्य–कार्य–सुकरेष्वर्थेषु ठञ्स्यात्। मासेन परिजय्यः (जेतुं शक्यः), मासिकः व्याधिः। मासेन लभ्यं, कार्यं, सुकरं वा–मासिकम्। मासिकं (कार्यं) चान्द्रायणम्। मासिकः (सुकरः) प्रासादः। मासिकं (लभ्यं) वेतनम्। एवं दैनिकः, वार्षिकः, सांवत्सरिकः। तदस्य ब्रह्मचर्यम् (५-१-९४) द्वितीयान्तात्कालवाचिनोस्यब्रह्मचर्यमित्यर्थे ठञ्स्यात्। अत्यन्तसंयोगे द्वितीया। मासं ब्रह्मचर्यमस्य–मासिकः ब्रह्मचारी। एवम्–आर्धमासिकः, वार्षिकः, सांवत्सरिकः, अष्टाचत्वारिंशद्वार्षिकः ब्रह्मचारी।

वि. समायाः खः (५-१-८५) समाशब्दादधीष्टादिचतुरर्थेषु खः स्यात्। ठञोपवादः। समा (वर्ष) मधीष्टो भृतो भूतो भावी वा–समीनः। द्विगोर्वा (५-१-८६) समान्ताद्द्विगोः खो वा स्यात्पूर्वं विषये। द्वे समे अधीष्टो भृतो भूतो भावी वा–द्विसमीनः, द्वैसमिकः। त्रिसमीनः, त्रैसमिकः। महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्यः उपसंख्यानम्। (वा) ब्रह्मचर्यमित्यर्थे ठञ्। विदामघवन्नित्याद्या ऋचो महानाम्न्यः, तासां ब्रह्मचर्यमस्य–माहानाम्निकः चातुर्मास्याण्यो यज्ञे तत्र भव इत्यर्थे (वा) चतुर्षु मासेषु भवन्ति–चातुर्मास्यानि यज्ञकर्माणि। संज्ञायामण्वक्तव्यः (वा) चतुर्षु मासेषु (अतीतेषु) भवा–चातुर्मासी पौर्णमासी (आषाढी, कार्तिकी, फाल्गुनी च) तस्य च दक्षिणा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यज्ञाख्येभ्यः (५-१-९५) षष्ठ्यन्तेभ्यो यज्ञवाचिभ्यो दक्षिणेत्यर्थे ठञ्स्यात्। आख्याग्रहणादकालादपि अग्निष्टोमस्य दक्षिणा–आग्निष्टोमिकी। एवं वाजपेय-वाजपेयिकी। राजसूय-राजसूयिकी। तत्र च दीयते कार्यं भववत् (५-१-९६) सप्तम्यन्तात् कालवाचिनः दीयते, कार्यमित्यर्थयोर्भववत्प्रत्ययः स्यात्। प्रावृषि दीयते, प्रावृषि कार्यं वा प्रावृषेण्यम्। शरदि दीयते कार्यं वा–शारदम्। एवं वसन्त-वासन्तिकं, वासन्तम्। हेमन्त-हैमन, हैमन्तं, हैमन्तिकम्। कालाधिकारः पूर्णः।

प्रयोगाः–पान्थः पश्यति पृच्छति। शूद्राणां मासिकाशौचम्। सांशयिकस्य कार्यं नश्यति। ... मासिकं शतम्। आन्हिकं कर्म सम्पूर्णम्। षाण्मास्येन व्याधिना पीडितः। सांवत्सरिको नि... षष्टिका व्रीहयो ग्राह्याः। त्रैवार्षिकं कृच्छ्रमस्य प्रायश्चित्तम्। मासिकाध्यापकस्य मासिकं ... पथिकस्य वचः श्रुत्वा।

प्रश्नाः–कालाधिकारे प्राग्वतीयप्रत्ययाः के, के च तेषामर्थाः मास-द्विमास-त्रिमास-चतुर्मास-षण्मासशब्देभ्यः ... षु के प्रत्ययाः। मासिक-वार्षिक-दैनिका-न्हिक-शब्दानां कत्यर्थाः। पान्थपथिकयोर्विशेषो न वा। अधस्तनवाक्यगतां... न्तानुपपादय—

यौजनशतिकं यानमारुह्य प्रस्थितः सः। सांशयिकेन चेतसा वार्षिकं नियमं कथं पालयसि। षण्मास्यो बालः ... रुच्यते। चातुर्मास्यः पौर्णमास्यस्तिस्रः। त्रैवार्षिकाधिकान्तो यः स हि सोमं पिबेद्द्विजः। प्रावृषेण्याः पयोवाहाः।

इति प्राग्वतीये कालाधिकारः

प्राग्वतीये ठञ्विधिः—

व्युष्टादिभ्योऽण् (५-१-९७) सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो दीयते कार्यमित्यर्थयोरण् स्यात्। ... (प्रभाते) दीयते कार्यं वा-वैयुष्टम्। नय्वाभ्यामित्यैच्। एवं नित्य-नैत्यम्। निष्क्रमण-नैष्क्रमणम्। ...शन-प्रावेशनम्। तीर्थ-तैर्थम्। सम्भ्रम-साम्भ्रमम्। संग्राम-साङ्ग्रामम्। सङ्घात-साङ्घातम्। अग्नि... दादिभ्य उपसंख्यानम् (वा) अग्निपदे दीयते कार्यं वा-आग्निपदम्। एवं-प्रवास-प्रावासम्। तेन य... थाचहस्ताभ्यां णयतौ (५-१-९८) तृतीयासमर्थाभ्यां यथाकथाच-हस्तशब्दाभ्यां दीयते कार्यमित्... र्यथासंख्ये णयतौ स्तः। प्रकृतिप्रत्यययोरेवेह यथासंख्यं, नत्वर्थयोः। यथाकथाचेत्यव्ययसमुदायो... दरो, यथाकथाच (अनादरेण) दीयते कार्यं वा–याथाकथाचम्। हस्तेन दीयते कार्यं वा-हस्त्यम्। सम्पादिनि (५-१-९९) तृतीयान्तात्सम्पादि (अवश्यशोभि) इत्यर्थे ठञ् स्यात्। कर्णवेष्ट...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादि-कार्णवेष्टकिकं मुखम्। वस्त्रयुगेन सम्पादि-वास्त्रयुगिकं शरीरम्। कर्मवेषाद्यत् (५-१-१००) तृतीयान्ताभ्यामाभ्यां यत्स्यात्सम्पादिनि। कर्मणा सम्पादि-कर्मण्यं शरीरं शौर्यादि च। वेषेण सम्पादी-वेष्यः नटः। वेषः कृत्रिम आकारः। तस्मै प्रभवति सन्तापादिभ्यः (५-१-१०१) चतुर्थी समर्थेभ्यः सन्तापदिभ्यः प्रभवतीत्यर्थे ठञ् स्यात्। सन्तापाय प्रभवति (समर्थोभवति) -सान्तापिकः। एवं-सङ्ग्राम-साङ्ग्रामिकः। संनाह-सान्नाहिकः। संयोग-सांयोगिकः। सम्पराय-साम्परायिकः। निसर्ग-नैसर्गिकः। उपसर्ग-औपसर्गिकः। उपवास-औपवासिकः। प्रवास-प्रावासिकः। सङ्घात-साङ्घातिकः। मांसौदनाद्विगृहीतादपि (गण) मांसिकः, औदनिकः, मांसौदनिकः। योगाद्यच्च (५-१-१०२) अस्माद्यत्स्यात् चाट्ठञ् प्रभवतीत्यर्थे। योगाय प्रभवति-योग्यः, यौगिकः। कर्मण उकञ् (५-१-१०३) अस्मादुकञ्स्यात्प्रभवत्यर्थे। कर्मणे प्रभवति-कार्मुकम् (धनुः)। टिलोपः। धनुषोऽन्यत्र न भवत्यनभिधानात्। समयस्तदस्य प्राप्तम् (५-१-१०४) समयशब्दादस्य प्राप्त इत्यर्थे ठञ्। समयः प्राप्तो स्य-सामयिकं कार्यम्। ऋतोरण् (५-१-१०५) ऋतुशब्दादण्स्यात्पूर्वविषये। ऋतुः प्राप्तोस्य-आर्तवं पुष्पम्। ओर्गुणे आदिवृद्धौ-रपरत्वम्। कालाद्यत् (५-१-१०७) कालशब्दाद्यत्स्यात्पूर्वविषये। कालः प्राप्तोस्य-काल्यः तापः। काल्यं शीतम्। प्रकृष्टे ठञ् (५-१-१०८) प्राप्तमितिनिवृत्तम्, अस्येति वर्तते। प्रकर्षे वर्तमानात्कालशब्दादस्येत्यर्थे ठञ् स्यात्। प्रकृष्टः(दीर्घः)कालोस्य-कालिकं वैरम्। ठञिति स्पष्टार्थम्। प्रयोजनम् (५-१-१०९) प्रथमान्तादस्य प्रयोजनमित्यर्थेठञ्स्यात्। प्रयोजनं फलं कारणं च। इन्द्रमहःप्रयोजनमस्य-ऐन्द्रमहिकम्। विशाखाषाढादण्मन्थदण्डयोः (५-१-११०) विशाखाषाढाभ्यामण्स्यात् मन्थदण्डयोरभिधेययोः। प्रयोजनार्थे प्रत्ययेऽन्यत्र नयोगार्थग्रहः किन्तु रूढि-विशाखा-वैशाखः मन्थः (मन्थनरज्ज्वाधारःस्थूणा)। आषाढा-आषाढः दण्डः(दण्डः)। चूडादिभ्य उपसंख्यानम् (वा) चूडा प्रयोजनमस्य चौडं कर्म। श्रद्धा प्रयोजनमस्य-श्राद्धं कर्म। अनुप्रवचनादिभ्यश्छः (५-१-१११) एभ्यः प्रयोजनार्थे छः स्यात्। औपवादः। अनुप्रवचनं जनमस्य-अनुप्रवचनीयः। एवम्-उत्थापन-उत्थापनीयम्। आरम्भण-आरम्भणीयम्। (गृह्यकर्मविशेषः) अनुवादन-अनुवादनीयम्। आरोहण-आरोहणीयम्। प्रवेशन-प्रवेशनीयम्। विशिपूरियतिरुहिप्रकृतेरनात्मपूर्वपदादुपसंख्यानम् (गण) गृहप्रवेशनं प्रयोजनमस्य-गृहप्रवेशनीयम्। एवं-प्रपापूरण-प्रपापूरणीयम्। प्रासादारोहण-प्रासादारोहणीयम्। अश्वप्रयतन-अश्वप्रयतनीयम्। स्वर्गादिभ्यो यद्वक्तव्यः (वा) स्वर्गः प्रयोजनमस्य-स्वर्ग्यम्। एवं यशस्-यशस्यम्। आयुष-आयुष्यम्। काम-काम्यम्। धन-धन्यम्। पुण्याहवाचनादिभ्यो लुग्वक्तव्यः (वा) पुण्याहवाचनं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोजनमस्य-पुण्याहवाचनम्। एवं स्वस्तिवाचनम्। शान्तिवाचनम्। समापनात्सपूर्वपदा (५-१-११२) विद्यमानपूर्वपदात्समापनशब्दाच्छः स्यात्प्रयोजनार्थे। ठञोपवादः। व्याकरणसमापनं प्रयोजनमस्य-व्याकरणसमापनीयम्। एवं छन्दःसमापनीयम्। ऐकागारिकट् चौरे (५-१-११३) ऐकागारिकडिति निपात्यते प्रयोजनार्थे चौरेऽभिधेये। एक (असहायं) मागारं प्रयोजनमस्य ऐकागारिकः चौरः। टित्वात्स्त्रियां ङीप् ऐकागारिकी। तदस्यप्रयोजनमिति सिद्धे चौरे नियमार्थं वचनम्। तेनेह न—एकागारं प्रयोजनमस्य भिक्षोः। आकालिकडाद्यन्तवचने (५-१-११४) आकालिकडितिनिपात्यते आद्यन्तवचने। समानकालशब्दस्य आकालशब्दादेशः ईकट्प्रत्ययश्च निपात्येते। समानकालावाद्यन्तावस्य-आकालिकः स्तनयित्नुः। आशुविनाशीत्यर्थः। पूर्वदिने मध्यान्हादुत्पद्य दिनान्तरे तथैव नश्वर इति वार्थः। आकालाट्ठंश्च (वा) चाद्गुन् आकाल-आकालिकः स्त्रियां ठनि टाप् आकालिका, ठञि ङीप्-आकालिकी, विद्युत्। ... पूर्णोवधिः प्राग्वतीयस्य च।

प्रयोगाः—सान्तापिकज्वरनिपीडितगात्रयष्टिः। नैत्ये कर्मणि तत्परः। साङ्ग्रामिकः साहस आकालिकी विद्युदिव प्रणष्टा। गृहप्रवेशनीये कर्मणि व्यापृतः। आदौ पुण्याहवाचनम्। चौले सहोपनयनम्। धन्यं यशस्यमायुष्यं स्वर्ग्यं पुण्याहवाचनम्। अमायां पार्वणं श्राद्धम्।

प्रश्नाः—ठञ्विधौ कत्यर्थाः। प्रयोजनार्थे के प्रत्ययाः। प्रयोजने प्रत्ययलुक् क्व। समयप्राप्त्यर्थे कः प्रत्ययः। तस्मै प्रभवतीत्यर्थे क्व कः प्रत्ययः। अधस्तनवाक्यगतांस्तद्धितान्तानुपपादय—

नैत्यं कृत्यमिदं ममः। काल्यस्नापोनुभूयते। आरम्भणीयमिदं कर्म। ऐकागारिकतो भीतः। कालिकं वैरमेतद् श्राद्धे कर्मणि तत्परः। अस्मिन्कर्मणि योग्योसौ। न स्पृश्या सार्तवा नारी। सामयिको सौ विषयः। प्रासादारोहणीयो यत्नः।

इति प्राग्वतीये ठञ्विधिः

तुल्यार्हभावकर्मार्थाः—

तेन तुल्यं क्रिया चेद्वतिः (५-१-११५) तृतीयासमर्थात्तुल्यमित्यर्थे वतिः स्यात् यत्तुल्यं सा क्रिया चेत्। ब्राह्मणेन तुल्यं-ब्राह्मणवत् अधीते। राज्ञा तुल्यं राजवत् वर्तते। एवं शूद्रवदाचरति धनिवद्व्यवहरति। क्रिया चेदित्युक्त्या गुणद्रव्यतुल्यत्वेतु न-पुत्रेण तुल्यः स्थूलः। अत्र तुल्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धनी। तत्र तस्येव (५-१-१६) सप्तमीसमर्थात्षष्ठीसमर्थाच्च वतिः स्यात्। मथुरायामिव मथुरावत्स्रुघ्ने प्राकारः। एवं पाटलिपुत्रवत्साकेते परिखा। गृहवदरण्ये चरति। चैत्रस्येव-चैत्रवन्मैत्रस्य गावः। एवं बृहस्पतिवदस्य पाण्डित्यम्। यज्ञदत्तवद्देवदत्तस्य दन्ताः। तदर्हम् (५-१-१७) द्वितीयासमर्थादर्हमित्यर्थे वतिः स्यात्। विधिमर्हति (विधिं लब्धुं योग्यो भवति)-विधिवत्पूज्यते। राजानमर्हति-राजवत्पालनम्। मण्डूकप्लुत्यात्र क्रियाग्रहणस्यानुवृत्त्या नेह-राजानमर्हति-छत्रम्।

वि. ब्राह्मणवदधीते इत्यादौ ब्राह्मणादिशब्दस्य ब्राह्मणकर्तृध्ययनादौ लक्षणया ब्राह्मणकर्तृकाध्ययनसदृशं ...देरध्ययनमित्यादिर्बोधः। तेनतुल्यमिति क्रिययैव तौल्ये वतिविधानात् अयं तद्वदित्यादौ अस्तीत्यध्याहारेण, ...वद्धिमान्महानयवदित्यादौ भवितुमर्हतीत्यध्याहारेण वतिमुपपादयन्ति वृद्धास्तेन ब्राह्मणवत्क्षत्रिय इत्यादिमात्रप्रयोग...युक्ते। तृतीयान्तात्प्रथमसूत्रेण, षष्ठीसप्तम्यन्ताद्द्वितीयसूत्रेण वतिः। द्वितीये क्रियातौल्यं नापेक्ष्यते गुणद्रव्य...भवति। मथुरायामिवेति नाधिकरणसप्तमी, तथात्वे विद्यमानेति पदसपेक्षतयाऽसामर्थ्यापत्तेः, किन्तु तत्रतस्ये...निर्देशेन इवशब्दयोगे षष्ठ्यर्थे सप्तमीति भाष्यकारः। मथुरासम्बधिप्राकारसदृशः स्रुघ्नप्राकारः इति बोधः। ...नित्यत्र तु क्रियापदानुवृत्त्या क्रियायोग एवानेन वतिः,तदिति कर्मणि द्वितीयया द्वितीयान्तादेवार्हत्यर्थे वतिः। ततोयथा...राणरायेत्यत्र यथाशब्दस्य वृत्तिनिष्ठत्वेन सत्वार्थकतया द्वितीयान्तत्वमभ्युपेयम्। यथात्वं तथात्वमित्यादावपि ...निष्ठतयैव षष्ठ्यन्ततया त्वतलादेः सिद्धिः, तेन तत्र योग्यतार्हार्थ्वरविधानपरत्वेन वतिरुपद्यते। राजवद्वर्तते इत्यत्र ...वर्तनमर्थः। राजवद्वर्तते राजेत्यत्र प्रतियोग्यनुयोगिनोराज्ञोर्भेदाभावेन भेदघटितसादृश्याभावात्पूर्वसूत्रेणाप्रात्या ...न वतिविधानमावश्यकम्। विनीतवदुपस्थितं, चिच्छेद कृतहस्तवदित्यादौ विनीतानां योग्यमुपस्थानं, कृतहस्तानां ...छेदनं प्रतीयते, न सादृश्यं, तेनेदृशप्रयोगोपपत्तयेपि तदर्हसूत्रमावश्यकम्। यदि राजेवायं राजा, रामरावण...इदं रामरावणयोरिवेतिप्रयोगादवस्थाभेदकल्पितभेदेन सादृश्यं विवक्ष्यते तदात्वनेन विनापि वतिः पूर्वसूत्रेण सिद्ध्यति। ...न्युक्तमौपयिकं राज्ञ इत्यर्थस्य निदर्शनम्, उपमानाविवक्षायां तदर्हमिति पठ्यते। तदर्हमिति नारब्धं सूत्रं व्याकरणान्तरे, ...उरमात्रापि भेदस्य परिकल्पनात् इति पदमञ्जरीप्रदीपोद्योताद्युक्तमप्यत्रानुसन्धेयम्।

तस्य भावस्त्वतलौ (५-१-११९) षष्ठीसमर्थाद्भाव इत्यर्थे त्वतलौ स्तः। शब्दस्य प्रवृत्तिनिमित्तं भावः। अश्वस्य भावः अश्वत्वम्, अश्वता। एवं-गो-गोत्वं गोता। मधुर-मधुरत्वं मधुरता। गुरु-गुरुत्वं गुरुता। भूत-भूतत्वं भूतता। आ च त्वात् (५-१-२०) ब्रह्मणस्त्व इत्यतःप्राक् त्वतलावधिक्रियेते। तेन इमनिजादिस्थलेष्वपि त्वतलोः समावेशः। न नञ्पूर्वात्तत्पुरुषादचतुर-सङ्गत-लवण-वट-युध-कत-रसलसेभ्यः (५-१-१२१) इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्नस्युश्चतुरादीन्वर्जयित्वा। तेन चतु...वर्जं नञ्तत्पुरुषसमासोत्तरमितःपरे इमनिजादयो न भवन्ति। अपतेर्भावः-अपतित्वम्, अपतिता। ...पत्यन्त पुरोहितादिभ्य इति यक् न। अपटोर्भावः अपटुत्वम्, अपटुता। इगन्ताच्चलघुपूर्वादित्यण् न।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अमधुरस्य भावः-अमधुरत्वम्, अमधुरता। गुणवचनेति ष्यञ्न। नञ्पूर्वादित्युक्त्या बृहस्पतेर्भा वार्हस्पत्यम् यक्। तत्पुरुषादित्युक्त्या नविद्यन्ते पटवो यस्येत्यपटुः, अपटोर्भावः-आपटवम् अ चतुरादिवर्जमित्युक्त्या अचतुरस्य भाव-आचतुर्यम्, असङ्गतस्य भावः-आसङ्गत्यम्, अरस भावः-आरस्यम्, अलसस्य भावः-आलस्यम् ष्यञ्।

वि १. प्रकृतिजन्यबोधे प्रकार इति प्रकृतिभूतशब्दाद्व्यक्तिबोधे जायमाने योर्थोः विशेषणतया भासते स प्रवृत्तिनि त्तभूतो धर्मो भाव उच्यते। यथाऽश्वमधुरगतडित्थादिशब्दा अश्वत्वादिजातिं माधुर्यादिगुणं, गमनादिक्रियां डित्थादि वा धर्मं निमित्तीकृत्य तद्धर्मवतोश्वादीन्बोधयन्तीति प्रवृत्तिनिमित्ततया धर्मिबोधे प्रकारीभूतास्ते धर्मा भावाः, तेभ्यि त्वतलादयो भवन्ति। उक्तं च वार्तिककृता "यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ" "इति गुणशब्देन यावान्कश्चित्पराश्रयो भेदको जात्यादिः सर्व इह गृह्यते, द्रव्यशब्देन विशेष्यभूतः सत्वभावापन्नोर्थ उच्यते" व्याख्यातं च कैयटेन।

वि २. आचत्वादिति त्वतलोरधिकारः इमनिजादिरपवादैः सहाप्यन्यत्र सावकाशत्वेपि समावेशार्थः, गुणव दिभ्यः कर्मण्यपि विधानार्थश्च। तेन मार्दवं, म्रदिमा, मृदुत्वं, मृदुता, चातुर्यं, चातुरी, चतुरत्वं, चतुरतेत्यादि। न नञ्स्नञ्भ्यां सहापि तयोः समावेशार्थः। तेन स्त्रिया भावः-स्त्रैणं स्त्रीत्वं स्त्रीता, पुंसो भावः-पौंस्नं पुंस्त्वं पुंस्ता।

वि. ३. चतुरादिशब्देषु नञ्तत्पुरुषेपि ष्यञादीनि प्रत्ययान्तराण्यपि भावे यथाप्राप्ति भवन्ति, अन्यत्र तु नञ् सति त्वतलावेव भवतः नत्विमनिजादीनि प्रत्ययान्तराणि भावे इति निष्कर्षः।

पृथ्वादिभ्य इमनिज्वा (५-१-१२२) पृथ्वादिभ्यस्तस्यभाव इत्यर्थे इमनिज्वा स्यात्। वा व मणादिसमावेशार्थम्। **र ऋतो हलादेर्लघोः** (६-४-१६१) हलादेर्लघोः ऋकारस्य रः स्यात् इष्टेमेय **टेः** (६-४-१४५) भस्य टेर्लोपः स्यादिष्टेमेयःसु। पृथोर्भावः-प्रथिमा। इमन्प्रत्यये ऋकारस्य रादेशे ओ बाधित्वा टेर्लोपः। पक्ष इगन्ताच्चेत्यणि पार्थवम्। इमन्नन्तं पुंसि, अणन्तं क्लीबे। एवं मृदु-म्र मार्दवम्, पटु-पटिमा पाटवम्। तनु-तनिमा तानवम्। लघु-लघिमा लाघवम्। गुरु-गरिमा। प्रियं रेति गुरोर्गरादेशः। महत्-महिमा। टिलोपः। **वर्णदृढादिभ्यः ष्यञ्च** (५-१-१२३) वर्णविशेषवाचि दृढादिभ्यश्च भावार्थे ष्यञ्स्यात्। चादिमनिच्। ष्यञि आदिवृद्धिः-शुक्लस्य भावः-शौक्ल्य शुक्लिमा। एवं नील-नैल्यं नीलिमा। पीत-पैत्यं पीतिमा। दृढस्य भावः-दार्ढ्यम् द्रढि पृथुमृदुभृश-कृशदृढपरिवृढानामेव रत्वम् (वा) र ऋत इतिरत्वे नियमः। एवं कृश का क्रशिमा। लवण-लावण्यं लवणिमा। शीत-शैत्यं शीतिमा। उष्ण औष्ण्यम् उष्णिमा। जड-ज जडिमा। बधिर-बाधिर्यं बधिरिमा। मधुर-माधुर्यं मधुरिमा। मूर्ख-मौर्ख्यं मूर्खिमा। ष्यञि स्त्रियां पाण्डित्यं पाण्डिती, माधुर्यं माधुरी। भावे औत्सर्गिकौ त्वतलौ सर्वत्र। **गुणवचनब्राह्मणादि कर्मणि च** (५-१-१२४) गुणवाचिभ्यो ब्राह्मणादिभ्यश्च कर्मणि चाद्भावेपि ष्यञ्स्यात्। जडस्य

Jayatu Sanskritam, Kathmandu, Nepal

कर्म वा-जाड्यम् । मूढस्य भावः कर्म वा-मौढ्यम् । ब्राह्मणस्य भावः कर्म वा-ब्राह्मण्यम् । एवं-चोर चौर्यम् । मूक-मौक्यम् । एकभाव-ऐकभाव्यम् । कुशल-कौशल्यम् । चपल-चापल्यम् । निपुण-नैपुण्यम् । अर्हतोनुम्च (वा) अर्हतो भावः आर्हन्ती । बालिश-बालिश्यम् । पिशुन-पैशुन्यम् । ब्राह्मणादिराकृतिगणः तेन औचित्यम् । स्त्रियां ङीष् चौरी, नैपुणी, औचिती केषाञ्चिद्दृढादौ ब्राह्मणादौ च पाठे दृढादित्वेन इमनिजपि, ब्राह्मणादित्वेन कर्मण्यपि ष्यञ् । यथातथायथापुरयोः पर्यायेण (७-३-३१) नञः परयोरे-तयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिः स्यात् ञिदादौ । इमौ ब्राह्मणादी । अयथातथाभावः-आयथातथ्यम्, अयाथातथ्यम् । अयथापुराभावः-आयथापुर्यम् अयाथापूर्यम् । आपादसमाप्ते-र्भावकर्माधिकारः । चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् (वा) चत्वारो वर्णाः चातुर्वर्ण्यम् । चत्वार आश्रमाः-चातुराश्रम्यम् । त्रयः स्वराः-त्रैस्वर्यम्' षड्गुणाः । षाड्गुण्यम् । सेना-सैन्यम् । सन्निधिः-सान्निध्यम् । समीपः-सामीप्यम् । उपमा-औपम्यम् । त्रयो लोकाः-त्रैलोक्यम् । सर्वे वेदाः-सर्ववेदाः तानधीते सर्ववेदः सर्वादेरिति लुक्, स एव-सार्ववैद्यः । चतुर्वेदस्योभयपदवृद्धिश्च (वा) चतुरोवेदानधीते-चतुर्वेदः विद्यालक्षणेति ढकि द्विगोर्लुगिति लुक् । स एव चातुर्वैद्यः । चतुर्विद्यस्येति पाठान्तरेण चतुर्विद्य एव चातुर्वैद्यम् । स्तेनाद्यन्नलोपश्च (५-१-१२५) अस्माद्भाव-कर्मणोर्यत्स्यात् नलोपश्च । स्तेनस्य (चोरस्य) भावः कर्म वा स्तेयम् । स्तेनादिति योगं विभज्य ष्यञि स्तैन्यम् इत्यपि केचिदिच्छन्ति । सख्युर्यः (५-१-१२६) अस्माद्भावकर्मणोर्यः स्यात् । सख्युर्भावः कर्म वा-सख्यम् । दूतवणिग्भ्यां च (वा) दूतस्य भावः कर्म वा-दूत्यम् । एवं वणिज्-वणिज्यम् ।

टि. वणिज्यमिति काशिका । माधवस्तु वणिज्याशब्दः स्वभावात्स्त्रीलिङ्गस्तस्माद्भाव एव प्रत्ययो न कर्मणीत्याह । दूतवणिग्भ्यां चेति नास्त्येव । ब्राह्मणादित्वात् ष्यञि दौत्यं वाणिज्यम् ।

कपिज्ञात्योर्ढक् (५-१-१२७) आभ्यां भावकर्मणो ढक्स्यात् । कपेर्भावः कर्म वा-कापेयम् । एवं ज्ञाति-ज्ञातेयम् । पत्यन्तपुरोहितादिभ्यो यक् (५-१-१२८) एभ्यो भावकर्मणोर्यक्स्यात् । सेनापतेर्भावः कर्म वा-सैनापत्यम् । एवं प्रजापति-प्राजापत्यम् । गृहपति-गार्हपत्यम् । पुरोहितस्य भावः कर्म वा-पौरोहित्यम् । एवं-राजन्-राज्यम् । नस्तद्धित इति टिलोपः । मन्द-मान्द्यम् । राजाऽसे (गण) राजन्-शब्दोऽसमासे यकं लभत इत्यर्थः । समासे तु ब्राह्मणादित्वात्ष्यञ्, अधिराजस्य भावः कर्म वा आधिराज्यम् । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् (५-१-१२९) प्राणिजातिवाचिभ्यो वयोवा-चिभ्यः उद्गात्रादिभ्यश्चाञ्स्याद्भावकर्मणोः । अश्वस्य भावः कर्म वा-आश्वम् । उष्ट्रस्य-औष्ट्रम् । कुमारस्य भावः कर्म वा-कौमारम् । एवं किशोर-कैशोरम् । उद्गातुर्भावः कर्म वा-औद्गात्रम् । एवं-सुष्ठु-

CC-0. Digitized by eGangotri and MIDF- Delhi

सौष्ठवम्। दुष्ठु-दौष्ठवम्। अध्वर्यु-आध्वर्यवम्। हायनान्तयुवादिभ्योऽण् (५-१-१३०) हायनान्तेभ्यो युवादिभ्यश्चाणस्याद्भावकर्मणोः। द्विहायनस्य (द्विवर्षस्य) भाव कर्म वा-द्वैहायनम्। यूनो भावः कर्म वा-यौवनम्। एवं-स्थविर-स्थाविरम्। अत्रोपवादः। श्रोत्रियस्य यलोपश्च(वा) श्रोत्रियस्य भावः कर्म वा-श्रौत्रम्। कुशल-चपल निपुण-पिशुन-कुतूहल-क्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु पठ्यन्ते, तेनात्र ष्यञपि। कौशलं, कौशल्यम्। चापलं, चापल्यम्। नैपुणं, नैपुण्यम्। पैशुनं; पैशुन्यम्। कौतूहलं, कौतूहल्यम्। इगन्ताच्च लघुपूर्वात् (५-१-१३१) लघुपूर्वादिगन्तादण्स्याद्भावकर्मणोः। शुचेर्भावः कर्म वा शौचम्। एवं मुनि-मौनम्। पटु-पाटवम्। लघु-लाघवम्। गुरु-गौरवम्। काव्यमिति तु ब्राह्मणादित्वात् ष्यञि। योपधाद्गुरूपोत्तमाद्वुञ् (५-१-१३२) अन्त्यसमीपमुपोत्तमम्। यकारोपधाद्गुरूपोत्तमाद्वुञ्स्याद्भावकर्मणोः। रमणीयस्य भावः कर्म वा-रामणीयकम्। एवं कमनीय-कामनीयकम्। सहायाद्वा (वा) सहायस्य भावः कर्म वा-साहायकम्। पक्षे ब्राह्मणादित्वात्ष्यञि साहाय्यम्।

वि. द्वन्द्वमनोज्ञादिभ्यश्च (५-१-१३३) द्वन्द्वेभ्यो मनोज्ञादिभ्यश्च वुञ्स्याद्भावकर्मणोः। गोपालपशुपालयोः भावः कर्म वा-गौपालपशुपालिका। शिष्योपाध्याययोर्भावः कर्म वा-शैष्योपाध्यायिका। मनोज्ञस्य भावः कर्म वा-मानोज्ञकम्। एवं प्रियरूप–प्रैयरूपकम्। छात्र-छात्रकम्। छान्दस-छान्दसकम्। होत्राभ्यश्छः (५-१-१३५) होत्राशब्द ऋत्विग्विशेषवाची स्त्रीलिङ्गः। ऋत्विग्विशेषवाचिभ्यश्छः स्याद्भावकर्मणोः। अच्छावाकस्य भावः कर्म वा-अच्छावाकीयम्। एवं ब्राह्मणाच्छंसीयम्। योत्रीयम्। मैत्रावरुणीयम्। ब्रह्मणस्त्वः (५-१-१३६) होत्रावाचिनो ब्रह्मन्शब्दात्त्वः स्याद्भावकर्मणोः। छस्यापवादः। ब्रह्मणो (ऋत्विग्विशेषस्य) भावः कर्म वा-ब्रह्मत्वम्। त्वविधानं तलो बाधनार्थम्। ब्राह्मणपर्यायस्तु त्वतलौ-ब्रह्मत्वं ब्रह्मता।

प्रयोगाः—माधुर्यमाम्रस्य फलेषु हृद्यम्। अणिमा महिमा चैव गरिमा लघिमा तथा। कपेश्चापलम्। निम्बस्य कटुताधिका। पौरोहित्ये वृतः काव्यः। जाड्यं धियो हरति सिञ्चति सत्यम्। याथातथ्येन वर्णय। यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता। शिशुत्वं स्त्रैणं वा ननु वन्द्यासि जगतः। तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः।

प्रश्नाः—भावे भावकर्मणोर्वा के प्रत्ययाः। वतिप्रत्ययः कतिधा भवति। भावकर्मणोः को भेदः। स्वार्थे कुत्र। ष्यञि मनिचोरर्थभेदो न वा। त्वतलिमनिच्ष्यञादिषु कानि लिङ्गानि। अर्हार्थे वतौ को विशेषः। नवाक्यगतांस्तद्धितान्तानुपपादय—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामनीयकतिरस्कृतकामम्। अच्छावाकीयं सूक्तम्। ब्रह्मत्वदक्षिणा पूर्णपात्रम्। प्रैयरूपकमवेद्य तदीयम्।
...त्वाविरोधः। त्रैलोक्याधिपतिः प्रभुः। औचिती वचसः प्रिया। वक्तुः परं कौशलम्।

इति भावकर्मार्थप्रकरणम्

...:—

धान्यानां भवने क्षेत्रे खञ् (५-२-१) भवन्ति जायन्तेऽस्मिन्निति भवनम्। धान्यविशेषवाचिभ्यः ...भ्यो भवने क्षेत्रेऽर्थे खञ् स्यात्। मुद्गानां भवनं क्षेत्रं-मौद्गीनम्। एवं कोद्रव-कौद्रवीणम्। ...-कौलत्थीनम्। व्रीहिशाल्योर्ढक् (५-२-२) आभ्यां ढक्स्याद्भवने क्षेत्रेऽर्थे। खञोपवादः। ...णां भवनं क्षेत्रं-व्रैहेयम्। एवं शालि-शालेयम्। यवयवकषष्टिकाद्यत् (५-२-३) एभ्यो ...स्याद्भवने क्षेत्रे। यवानां भवनं क्षेत्रं-यव्यम्। एवं यवक-यवक्यम्। षष्टिक-षष्टिक्यम्। ...भाषा तिलमाषोमाभङ्गाणुभ्यः (५-२-४) एभ्यो यद्वास्याद्भवने क्षेत्रे। पक्षे खञ्। तिलानां भवनं ...-तिल्यं, तैलीनम्। एवं-माष-माष्यं, माषीणम्। उमा-(अतसी)-औम्यम्, औमीनम्। भङ्गा-भङ्ग्यम्, ...ङ्गीनम्। अणु-अणव्यम् आणवीनम्। ओर्गुणः।

...१ भवनमुत्पत्त्यधिकरणं क्षेत्रसामानाधिकरण्यात्। क्षेत्रोक्तेर्नेह—मुद्गानां भवनं कुशूलम्। शणसप्तदश-धान्या-...णाढुमामङ्गाणवादीन्यपि धान्यानि।

...२ सर्वचर्मणः कृतः खखञौ (५-२-५) तृतीयान्तात्सर्वचर्मन्शब्दात्कृत इत्यर्थे खखञौ स्तः। सर्वश्चर्मणा ...चर्मीणः, सार्वचर्मीणः। सर्वशब्दस्य कृतेन सम्बन्धादसामर्थ्येऽपि निपातनात्समासः। यथामुखसंमुखस्य दर्शनः खः ...दृश्यतेऽस्मिन्निति आदर्शादिः। षष्ठ्यन्ताभ्यामाभ्यां दर्शन इत्यर्थे खः स्यात्। मुखस्य सदृशं यथामुखं प्रतिबिम्बम्। ...सादृश्येऽव्ययीभावः। समं (सर्वं) मुखं संमुखम्। समस्यान्तलोपो निपातनात्। यथामुखं दर्शनः—यथामुखीनः। ...स्य दर्शनः-संमुखीनः। तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति (५-२-७) सर्वादेः पथ्याद्यन्ताद्द्वितीयान्ता-...र्थे खः स्यात्। सर्वपथान्व्याप्नोति-सर्वपथीनः रथः। एवं सर्वाङ्ग-सर्वाङ्गीणः तापः। सर्वकर्म-सर्वकर्मीणः पुरुषः। ...(वाहन) सर्वपत्रीणः सारथिः। सर्वपात्र-सर्वपात्रीणःओदनः। आप्रपदं प्राप्नोति (५-२-८) प्रपदं पादाग्रम्। आङ्-...। आप्रपदं प्राप्नोति आप्रपदीनः पटः। अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु (५-२-९) द्वितीयान्ते-...भ्यो यथाक्रमं बद्धाभक्षयति नेय इत्यर्थेषु खः स्यात्। अनुपदं बद्धा-अनुपदीना उपानत्। सर्वान्नानि भक्षयति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वान्नीनः भिक्षुः। अयानयं (स्थलविशेषं) नेयः–अयानयीनः शारः। ससहायस्य शारस्य परैर्नाक्रम्यते पदम्। असहाय शारेण परकीयेण बाध्यते। इतिद्यूतव्यवहारादयानयं फलकशिरो नेयः शारः। एतद्द्यूतप्रक्रिया पदमञ्जर्यां स्पष्टा। परोवर परम्परपुत्रपौत्रमनुभवति (५-२-१०) एभ्यो द्वितीयान्तेभ्योनुभवतीत्यर्थे खः स्यात्। परांश्चावरांश्चानुभवति-परोवरी अवरस्योत्वं निपातनात्। परांश्च परतरांश्चानुभवति-परम्परीणः, परम्परभावो निपातनात्। पुत्रपौत्राननुभवति पुत्रपौत्री परम्पराशब्दस्त्वव्युत्पन्न स्तस्मात्स्वार्थे ष्यञि पारम्पर्यम्। समांसमां विजायते (५-२-१२) समां समामिति वी सुबन्तसमुदायः। अस्माद्विजायत इत्यर्थे खः स्यात्। समांसमां (प्रतिवर्षं) विजायते (प्रसूयते) समांसमीना अद्यश्वीनाऽवष्टब्धे (५-२-१३) अवष्टब्धः आसन्नः। आसन्नप्रसवार्थे अद्यश्वीनेति निपात्यते। अद्यश्वो वा विजा अद्यश्वीना वडवा (आसन्नप्रसवा)। विजायत इत्यननुवृत्तौ आसन्नमात्रार्थे प्रत्ययः अद्यश्वीनं मरणम्। आगवीन (५-२-१४) कर्मकरार्थे आङ्पूर्वगोशब्दात् खञि आगवीन इति निपात्यते। गोः प्रत्यर्पणपर्यन्तं कर्मकरः-आगवीनः

अध्वनो यत्खौ (५-२-१६) अध्वशब्दादलं गच्छतीत्यर्थे यत्खौ स्तः। अध्वानमलं गच्छ अध्वन्यः, अध्वनीनः। येचाभावकर्मणोः, आत्माध्वानौ खे इति नलोपाभावः। अभ्यमित्रा (५-२-१७) अस्मादलं गच्छतीत्यर्थे छः स्याच्चाद्यत्खौ। अभ्यमित्रमलं गच्छति (अमित्राभिमुखं सु याति)–अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः। गोष्ठात्खञ्भूतपूर्वे (५-२-१८) अस्मात्खञ्स्या पूर्वार्थे। गोष्ठो भूतपूर्वः–गौष्ठीनः देशः। अश्वस्यैकाहगमः (५-२-१९) अश्वशब्दादेकाहगम खञ्स्यात्। अश्वस्यैकाहगमः (एकाहगमनीय) आश्वीनः अध्वा। शालीनकौपीने अधृष्टा (५-२-२०) एतौ निपात्येते अधृष्टाकार्ययोरभिधेयोः। शालाप्रवेशमर्हति–शालीनः (अधृष्टः) कूपपतनमर्हति–कौपीनम् पापं भवति, तत्साधनत्वात्तद्वद्गोप्यत्वाद्वा पुरुषलिङ्गं, तत्सम्बन्धा च्छादनं वासोपि कौपीनम्। साप्तपदीनं सख्यम् (५-२-२२) साप्तपदीनमिति निपात्यते सख्ये धेये। सप्तभिः पदैः पदविक्षेपैः अवाप्यते–साप्तपदीनम् (सख्यम्)। साप्तपदीनः सखा, साप्त मित्रमिति तु लक्षणया। हैयङ्गवीनं संज्ञायाम् (५-२-२३) हैयङ्गवीनं निपात्यते संज्ञायाम्। ह्योगोदो (ह्योदुग्धगोपयसः) विकारः-हैयङ्गवीनम् (घृतम्) ह्योगोदोहस्य हियङ्ग्वादेशे खञ्। घृतस्य संज्ञ इत्यादौ नैवम्। पक्षात्तिः (५-२-२५) मूलमित्यर्थे पक्षशब्दात्तिः स्यात्। पक्षस्य मूल-पक्षतिः पत्, पक्षिणां पक्षमूलं च। तेन वित्तश्चुञ्चुप्चणपौ (५-२-२६) तृतीयान्ताद्वित्तइत्यर्थे चुञ्चु णपौ स्तः। विद्यया वित्तः (ज्ञातः) विद्याचुञ्चुः, विद्याचणः। धनचुञ्चुः धनच विनञ्भ्यां नानाञौ न सह (५-२-२७) असहार्थे (पृथग्भावे) वर्तमानाभ्यां विनञ्भ्यां ना स्तः स्वार्थे। विना। नाना। वेः शालच्छङ्कटचौ (५-२-२८) क्रियाविशिष्टसाधन (कारक) वाच

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शालच्छङ्कटचौ स्तः स्वार्थे। विशालम्, विशङ्कटम् (विस्तृतम्)। संप्रोदश्च कटच् (५-२-२९)
एभ्यः कटच्स्यात् चाद्वेश्च स्वार्थे। सङ्कटम्। प्रकटम्। उत्कटम्। विकटम्।

वि. १ गोष्ठजादयः स्थानादिषु पशुनामभ्यः (वा) गवां स्थानं-गोगोष्ठम्। महिषी-महिषीगोष्ठम्। कटच् (वा) अवीनां सङ्घातः-अविकटः। द्वित्वे गोयुगच् (वा) द्वौ वृषौ-वृषगोयुगम्। द्वावुष्ट्रौ-उष्ट्रगोयुगम्। अश्वगोयुगम्। षट्त्वे षड्गवच् (वा) षट् अश्वाः-अश्वषड्गवम्। षट् हस्तिनः हस्तिषड्गवम्। स्नेहे तैलच् (वा) तिलानां तैलं-तिलतैलम्। सर्षपस्य-सर्षपतैलम्। इङ्गुदी-इङ्गुदीतैलम्। एषु गोष्ठादीनां नामत्वे गोगोष्ठं गोगोष्ठात् पौनरुक्त्येन महिषीगोष्ठम् अश्वगोयुगमित्यादावसामर्थ्येन च गोष्ठजादयो विलक्षणाः प्रत्ययाः कल्पिताः तत्र लक्षणाद्वा सिद्धमेतत् गवां स्थानं गोष्ठं यथा गवां तथोष्ट्राणाम् तैलशब्दश्च प्रत्ययो न वक्तव्यः प्रकृत्यन्तरं तैलशब्दो वर्तते एवञ्च तिलतैलमित्यपि सिद्धम्" इति प्रत्ययविधानानि विनैव नामभिर्निर्वाहोपि भाष्ये दर्शितः।

वि. २ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः (५-२-३१) अवात् नासिकाया नते (अवनमने) ऽर्थे एते प्रत्ययाः स्युः संज्ञायाम्। नासिकाया नतं (नमनं)-अवटीटम्, अवनाटम्, अवभ्रटम्। तद्योगान्नासिका अवटीटा अवनाटा अवभ्रटा। तद्योगात्पुरुषोपि अवटीटः अवनाटः अवभ्रटः (नतनासिकः)। नेर्बिडज्बिरीसचौ (५-२-३२) नेः स्तो नासिकाया नते संज्ञायाम्। निबिडम् निबिरीसम्। निबिडाः केशा इत्यादि प्रयोगान्नते नासिकायाः संज्ञाया-श्चात्र न सम्बन्ध इति शेखरकारः। इनच्पिटच्चिकचि च। (५-२-३३) नेः इनच्पिटचौ स्तः नासिकाया नते चिक चि इत्यादेशौ च। चिपिटम्। चिक्कम्। उपमानादन्यत्रापि चिपिटं मुखम्। क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी (वा) क्लिन्ने चक्षुषी अस्य-चिल्लः पिल्लः। चुल्च (वा) चुल्लः। उपाधिभ्यां त्यकन्नासन्नारूढयोः (५-२-३४) आभ्यां यथासंख्यमासन्नारूढयोर्वर्तमानाभ्यां त्यकन्स्यात्संज्ञायाम्। पर्वतस्यासन्नं स्थलम्-उपत्यका। पर्वतस्यारूढं स्थलम्-अधित्यका। कर्मणि घटोऽठच् (५-२-३५) घटते इति घटः। सप्तम्यन्तकर्मशब्दाद्घट इत्यर्थेऽठच्स्यात्। कर्मणि घटते-कर्मठः पुरुषः। अठचि ठस्य अङ्गात्परत्वाभावादिकादेशो न। नस्तद्धिते इति टिलोपः।

तदस्य सञ्जातं तारकादिभ्य इतच् (५-२-३६) प्रथमान्तेभ्यस्तारकादिभ्यस्तदस्य सञ्जातमित्यर्थे-इतच्स्यात्। तारकाः सञ्जाता अस्य तारकितं नभः। एवं पुष्प-पुष्पितः। मुकुल-मुकुलितः। कण्टक-कण्टकितः। पिपासा-पिपासितः। सुख-सुखितः। दुःख-दुःखितः। कुड्मल-कुड्मलितः। व्याधि-व्याधितः। कुसुम कुसुमितः। तन्द्रा-तन्द्रितः। उत्कण्ठा-उत्कण्ठितः। गर्भादप्राणिनि (गण) गर्भितः अर्थः। अकृतिगणोयम्। प्रमाणे द्वयसज्दघ्नञ् मात्रचः (५-२-३७) प्रमाणे वर्तमानात्प्रथमान्तादस्येत्यर्थे द्वयसच् दघ्नच् मात्रच्प्रत्ययाः स्युः। ऊरु प्रमाणमस्य-ऊरुद्वयसम्, ऊरुदघ्नम्-ऊरुमात्रम्। एवं जानु-जानुद्वयसम्, जानुदघ्नम्, जानुमात्रम्। एषु द्वयसज्दघ्नचौ ऊर्ध्वमान एव मात्रच् तु प्रमाणे, प्रमाणं तु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिच्छेदकमात्रम् । प्रमाणे लः (वा) प्रमाणत्वेन ये प्रसिद्धास्ततो विहितस्य मात्रचोयं लुक् । शम: प्रमाणमस्य शमः ।दिष्टिः प्रमाणस्य-दिष्टिः । वितस्तिः प्रमाणमस्य-वितस्तिः शमादयोऽनूर्ध्वमान-विशेषाः। ततोमात्रचो लुक्। द्विगोर्नित्यम् (वा) द्विगोः प्रमाणवृत्तित्वाल्लुग्विधानम्। द्वौ शमौ प्रमाण-मस्य-द्विशमम् । एवं त्रिशमः ।द्विवितस्तिः । प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्य (वा) शमः स्यान्नवा-शममात्रम् । एवं-प्रस्थमात्रम् । पञ्चमात्रम्। वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुल (वा) तावदेव-तावद्द्वयसम्, तावन्मात्रम् । एवं यावद्द्वयसम्, यावन्मात्रम् । एतावद्द्वयसम्, एता-वन्मात्रम् । पुरुषहस्तिभ्यामण् च (५-२-३८) प्रमाणे वर्तमानाभ्यामस्येत्यर्थे,ऽण्स्यात् चाद्द्वय-सजादयश्च । पुरुषः प्रमाणमस्य-पौरुषं,पुरुषद्वयसं,पुरुषदघ्नं, पुरुषमात्रम् ।हस्ती प्रमाणमस्य हास्तिनं हस्तिद्वयसं, हस्तिदघ्नं, हस्तिमात्रम् । यत्तदेतेभ्यः परिमाणे वतुप् (५-२-३९) परिमाणे वर्तमानेभ्य एभ्योस्येत्यर्थे वतुप्स्यात् । यत्परिमाणमस्य-यावान् । एवं-तद्-तावान् । एतद्-एतावान् । स्त्रियां ङीप् यावती, तावती, एतावती । किमिदम्भ्यां वो घः (५-२-४०) परिमाणे वर्तमानाभ्यामाभ्यामस्येत्यर्थे वतुप्स्यात् वस्य च घः । किं परिमाणमस्य-कियान् । इदं परिमाणमस्य-इयान् । वत्प्रत्यये वस्य घ इयादेशो इदङ्किमोरीश्की इति कीईभावयोः यस्येतिचेति ईकारलोपः । किमः संख्यापरिमाणे डति च (५-२-४१) किमः संख्यायाः प्रमाणे (परिच्छेदे) वर्तमानादस्येत्यर्थे डतिः स्यात् चाद्वतुप् वस्य च घः का संख्या एषां ते-कति कियन्तः डतौ डित्वाट्टिलोपः वतौ तु पूर्ववत् नित्यं बहुवचनं चाभिधेयस्य बहु-त्वात् । संख्याया अवयवे तयप् (५-२-४२) अवयवे वर्तमानायाः संख्याया वाचकादस्येत्यर्थे तयप्स्यात् । पञ्च अवयवा अस्य-पञ्चतयं दारु । सामर्थ्यादवयवी प्रत्ययार्थः । एवं दशतयं, चतुष्ट-यम् । स्त्रियां पञ्चतयी, चतुष्टयी । द्वित्रिभ्यां तयस्यायज्वा (५-२-४३) द्वित्रिभ्यां परस्य तयस्य अयजादेशो वा स्यात । द्वाववयवावस्य-द्वयं, द्वितयम् । त्रि-त्रयं, त्रितयम् । उभादुदात्तो नित्यम् (५-२-४४) उभशब्दात्तयप् आदेशोयच् नित्यं स्यात् सचोदात्तः । उभावयवावस्य-उभयम् ।

वि. १ प्रमाणेद्वयसज्जित्यादौ श्लोकवार्तिकम्–प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम । तृतीयस्याविशेषेण प्रथमाद्य-मपीष्यते । प्रमाणे लो द्विगोर्नित्यं डट्स्तोमे शन्शतोर्डिनिः । प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये । तेन स्तोमे वाच्ये डट् पञ्चदशः स्तोमः । शन्शतोर्डिनि:-विंशतेश्च-पञ्चदशिनः (पञ्चदशपरिमाणाः) अर्धमासाः । त्रिंशिनः (त्रिंशत्परि-माणाः मासाः । विंशिनः (विंशतिपरिमाणाः) अङ्गिरसः ।

वि. २ द्विगौ पुरुषहस्तिभ्यां परस्य प्रत्ययस्य नित्यं लुक्—द्विपुरुषं, त्रिपुरुषं, द्विहस्ति, त्रिहस्ति, जलम् । द्विपुरुषी, त्रिपुरुषी, द्विहस्तिनी, त्रिहस्तिनी परिखा ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. ३ प्रमाण इति वर्तमाने यत्तदेतेभ्य इत्यत्र परिमाणग्रहणं ज्ञापयत्यन्यत्प्रमाणमन्यत्परिमाणमिति । तथाच श्लोक-
वार्तिकम् यावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते । मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोः ।
वि. ४ संख्यापरिमाणप्रश्ने वर्तमानात्किमः का संख्या स्य का संख्यानयोरिति ज्ञातद्वित्वैकत्वयोः प्रश्नासंभवात्
एतावान्तरसंख्याप्रश्नौचित्येन का संख्या एषामित्येव विग्रहः, अतएव संख्येयस्य बहुत्वनियमेन कति कियन्तः इति-
प्रयोगानेव । उक्तंच भाष्ये-नद्येकयोः प्रश्नोस्तीति । किमः क्षेपार्थत्वे डतिर्न-का (कुत्सिता) संख्या एषां दशानाम् ।

प्रयोगाः—द्वैहेयं क्षेत्रमुत्तमम् । सतां सख्यं साप्तपदीनं भवति । हैयङ्गवीनपिण्डं सङ्गृह्य पलाययौ
कृष्णः । कुड्मलिनं च पल्लवितम् । द्विपुरुषपरिखावृता पुरीयम् । एतावतापि सन्तुष्टः । कियन्तः
सन्ति भूतले । अदेयमासीत्त्रयमेव भूपतेः । द्वयं गतं सम्प्रति शोचनीयताम् । इयतापि न पूर्यते
घटः । जानुमात्रमुदकम् ।

प्रश्नाः—प्रमाणपरिमाणयोः को विशेषः । तिलभङ्गादीनां धान्येषु गणना न वा । इतच्मात्रच्तयप्प्रत्ययार्थाः
प्रयोगतवाक्यगतांस्तद्धितान्तानुपपादय—अद्यश्वीना दुर्घटा लोकयात्रा । पुत्रपौत्रीणानां गृहिणां पुष्पितं फलितं
...म्, एतावदुक्त्वोपरराम देवः । कुसुमित वनराजिदत्तदृष्टिः । कति लोकाः । समां समीना न सुखाय नारी । भाति स्म
...दीनमस्य । कौपीनवन्तः खलु भाग्यवन्तः । अधित्यकायामिव धातुमय्याम् । चतुष्टयी शब्दानां प्रवृत्तिः ।
...प्राकारमुल्लङ्घ्य निर्गतश्चौरः । अद्यश्वीना कुटुम्बिनी ।

इति पाञ्चमिकाः

मत्वर्थीयाः—

तदस्मिन्नधिकमिति दशान्ताड्डः (५-२-४५) तदधिकमस्मिन्नित्यर्थे दशान्तात्समासाड्डः स्यात् ।
एकादश अधिका अस्मिन्–एकादशं शतं सहस्रं च । द्वादश अधिका अस्मिन्–द्वादशं शतं सहस्रं
च । शतसहस्रयोरेवेष्यते (वा) नेह-एकादश अधिका अस्यां विंशतौ । प्रकृतिप्रत्यार्थयोः समान-
जातीयत्व एवेष्यते (वा) नेह–एकादश माषा अधिका अस्मिन्सुवर्णशते । सुवर्णमशीतिगुञ्जात्मकम् ।
शदन्तविंशतेश्च (५-२-४६) शदन्ताद्विंशतेश्च डः स्यात्तदस्मिन्नधिकमित्येतद्विषये । त्रिंशदधिका
अस्मिन्–त्रिंशं शतं सहस्रं च । डित्वाट्टिलोपः । पञ्चाशदधिका अस्मिन्-पञ्चाशं शतं सहस्रं
च । विंशतिरधिका अस्मिन्-विंशं शतं सहस्रं च । दशान्तत्वाभावात्पूर्वेणाप्राप्तौ वचनम् । तिविंश-
तेर्डितीति तिलोपः । एवम्-एकविंशं द्वात्रिंशं त्रिपञ्चाशं शतं सहस्रं च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. संख्याया गुणस्य निमाने मयट् (५-२-७४) गुणो भागः, निमानं मूल्यद्रव्यम्। भागस्य मूल्ये वर्तमा-त्संख्यावाचकात्प्रथमान्तादस्येत्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमान (मूल्य) मस्य (उदश्विद्भागस्य)-द्विम-उदश्वित् यवानाम्। एवं त्रिमयं चतुर्मयम्। द्विगुणयवात्मना मूल्येन लभ्यमेकगुणमुदश्वित् इत्यादिरर्थः। द्विगु-लवणेन एकगुणतण्डुले लभ्ये-द्विमयं तण्डुलं लवणानाम्। भूयोवाचकात्संख्याशब्दादेवायं मयट् नत्वल्पीयसो वाच-अन्यतरस्यैकत्वे एव च भवति। नेह-द्वो यवानां त्रय उदश्वितः। गुणशब्दः समानावयववचनः, तेनेह न-द्वौ-यवानामध्यर्धमुदश्वितः। निमेये चाप्ययं दृश्यते इति भाष्ये तेन उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य-द्वि-यवा उदश्वितः। एकगुणतण्डुलेन द्विगुणलवणे लभ्ये–द्विमया लवणास्तण्डुलस्य। एवं च द्विगुणत्रिगुणा-वस्त्वन्तरेण मूल्यरूपेण एकगुणवस्त्वन्तरस्य, एकगुणवस्त्वन्तरेण मूल्यरूपेण द्वित्रिगुणादिवस्त्वन्तराणां वा विनिम-क्रयविक्रयव्यवहारे इदृशाः प्रयोगाः।

तस्य पूरणे डट् (५-४-४८) षष्ठ्यन्तात्संख्यावाचकात्पूरण (पूरकः) इत्यर्थे डट् स्यात्। ए-दशानां पूरणः-एकादशः (एकादशसंख्यापूरकोवयवः) यस्मिन्नुपसञ्जातेऽन्या संख्या सम्-सोवयवः प्रत्ययार्थः। डित्वाट्टेरिति टिलोपः। एवं द्वादशः त्रयोदशः चतुर्दशः अष्टद-**नान्तादसंख्यादेर्मट्** (५-२-४६) असंख्यादेर्नकारान्तात्संख्यावाचकात् परस्य डटो मडागमः स्या-पञ्चानां पूरणः-पञ्चमः। डटि तस्य मडागमे पूर्वस्य पदत्वेन नलोपप्रातिपदिकेति नलोपः। एवं सप्-अष्टमः,नवमः,दशमः। नान्तादित्युक्त्या नेह-त्रिंशः त्रिंशः। असंख्यादेरित्युक्त्या नेह-एकादशः द्वाद-**षट्कतिकतिपयचतुरां थुक्** (५-२-५१) एषां थुगागमः स्याड्डटि। षण्णां पूरणः षष्ठः। डटि थुगा-अपदान्तत्वात्थस्य जश्त्वाभावे ष्टुत्वम्। एवं कति-कतिथः। कतिपय-कतिपयथः। कतिपयशब्द-संख्यात्वेऽप्यत एव ज्ञापकाड्डट्। चतुर्-चतुर्थः। अपदान्तत्वान्नरेफस्य विसर्गः। चतुरश्छयतावाद्य-लोपश्च (वा) तुरीयः तुर्यः। **बहुपूगगणसङ्घस्य तिथुक्** (५-२-५२) एषां तिथुगागमः स्याड्-बहूनां पूरणः-बहुतिथः। एवं पूग-पूगतिथः। गण-गणतिथः। सङ्घ-सङ्घतिथः। पूगसङ्घ-संख्यात्वेऽप्यत एव ज्ञापकाड्डट्। **वतोरिथुक्** (५-२-५३) वतुवन्तस्य इथुगागमः स्याड्डटि। याव-पूरणः-यावतिथः। एवं-तावत्-तावतिथः। एतावत्-एतावतिथः। **द्वेस्तीयः** (५-२-५४) द्वि-त्तीयः स्यात्पूरणे। डटोपवादः। द्वयोः पूरणः-द्वितीयः। **त्रेः सम्प्रसारणं च** (५-२-५४) त्रि-त्तीयः स्यात्पूरणे, त्रेः सम्प्रसारणं च। त्रयाणां पूरणः-तृतीयः। रेफस्य सम्प्रसारणमृकारः, तस्य-इति दीर्घस्तु न, तत्र ढ्रलोप इत्यतो ण इत्यनुवृत्तेः। **विंशत्यादिभ्यस्तमडन्यतरस्याम्** (५-२-५६) ए-परस्य डटस्तमडागमो वा स्यात्। विंशतेः पूरणः-विंशतितमः विंशः। तमडोऽभावे डटि परे वि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवम् एकविंशति-एकविंशतितमः, एकविंशः। त्रिंशत्-त्रिंशत्तमः त्रिंशः टेरिति
तेरिति तिलोपः। एकत्रिंशत्-एकत्रिंशत्तमः एकत्रिंशः। चत्वारिंशत्तमः चत्वारिंशः। पञ्चाशत्तमः पञ्चाशः।
तिलोपः। शतादिमासार्धमाससंवत्सराच्च (५-२-५७) शतादिसंख्याशब्देभ्यो मासादिभ्यश्च परस्य डटो
नित्यं तमडागमः स्यात्। शतस्य पूरणः-शततमः। एवम्-एकशततमः। सहस्रतमः। एकसहस्रतमः।
लक्षतमः। कोटितमः। मासस्य पूरणः-मासतमः दिवसः। एवम् अर्धमासतमः। संवत्सरतमः।
मासादिभ्योऽसंख्यावाचकेभ्योऽप्यत एव ज्ञापकाड्डट्। षष्ठ्यादेश्चासंख्यादेः (५-२-५८) षष्ठ्यादेः
संख्याशब्दादसंख्यादेः परस्य डटो नित्यं तमडागमः स्यात्। विंशत्यादिभ्य इति विकल्पप्राप्तौ नित्या-
र्थमिदम्। षष्ठेः पूरणः-षष्ठितमः। एवं सप्ततितमः। अशीतितमः। नवतितमः। संख्यादेस्तु विंशत्या-
दिभ्य इति विकल्प एव। एकषष्ठितमः एकषष्ठः। एकसप्ततितमः, एकसप्ततः। यस्येतिचेतीकारलोपः।
एकाशीतितमः एकाशीतः। एकनवतितमः एकनवतः।

टि. अयमत्र संग्रहः-आद्ये पूरकत्वाभावादेकस्य प्रथमः। ततः परं पूरणे–द्वितीयः तृतीयः चतुर्थः तुरीयः तुर्यः, पञ्चमः
सप्तमः अष्टमः नवमः दशमः, एकादशः एवं द्वादश इत्यादिः अष्टादशान्तम् एकोनविंशतितमः एकोनविंशः विंशति-
तमः विंशः एकविंशतितम एकविंश इत्यादि। एकोनषष्ठितमः एकोनषष्ठः, षष्ठितमः, एकषष्ठितमः एकषष्ठः एवं सप्तत्य-
शीत्यादिषु। शतादिषु शततमः एकशततमः सहस्रतम इत्यादि।

उदराट्ठगाद्यूने (५-२-६७) सप्तम्यन्तादुदरशब्दात्प्रसित इत्यर्थे ठक्स्यात् आद्यूनेऽभिधेये। बुभुक्षया
अत्यन्तपीडित आद्यूनः। उदरे प्रसितः (उदरपरिमार्जने तत्परः) औदरिकः। अनाद्यूने तु कन्-
उदरकः। विजिगीषुः (उदरपरिमार्जको मल्लः)। अधिकम् (५-२-७३) अध्यारूढशब्दस्योत्तरपदलोपे
कन्प्रत्यये च अधिकमिति निपात्यते। खार्यामध्यारूढो द्रोणः–अधिकः। द्रोणेन अध्यारूढा खारी
अधिका। कर्तरि कर्मणि वाऽध्यारूढशब्दः। अनुकाभिकाभीकः कमिता (५-२-७४) अनुकाभिकाभीक-
शब्दा निपात्यन्ते कमितेत्यर्थे। अनुकः अभिकः अभीकः (कामुकः) अन्वभिभ्यां कन् अभेः पक्षे दीर्घत्वं
च। उत्क उन्मनाः (५-२-८०) उन्मनस्यभिधेये उत्क इति निपात्यते। उदः कन्। उत्कः (उन्मनाः-
उत्कण्ठितः) जनः। कालप्रयोजनाद्रोगे (५-२-८१) कालवाचिनः प्रयोजनवाचिनश्च कन् स्याद्रो-
गेऽभिधेये। कालशब्देनात्र पूरणप्रत्ययान्तो द्वितीयादिरेव गृह्यते न मासादिः, व्याख्यानात्। द्वितीये-
ऽहनि भवः-द्वितीयकः, ज्वरः। एवं-तृतीयकः चतुर्थकः। प्रयोजनं रोगस्यकारणं फलं वा। विषपुष्पै-
र्जनितः-विषपुष्पकः ज्वरः। उष्णं कार्यमस्य–उष्णकः ज्वरः। एवं काशपुष्पकः शीतकः ज्वरः।
रोगेऽनभिधेये तु न-द्वितीयोदिवसोस्य। श्रोत्रियंश्छन्दोधीते (५-२-८४) छन्दोधीते इत्यर्थे श्रोत्रिय-
न्निति निपात्यते। नकारः स्वरार्थः। श्रोत्रियो ब्राह्मणः। छन्दःशब्दस्य श्रोत्रभावः घश्चप्रत्ययः।
वा इत्यनुवृत्तेरध्येत्रर्थेणि छान्दसः। श्राद्धमनेन भुक्तमिनिठनौ (५-२-८५) अनेन भुक्तमित्यर्थे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्राद्धशब्दादिनिठनौ स्तः। श्राद्धमनेन भुक्तं सः–श्राद्धी, श्राद्धिकः। इष्टादिभ्यश्च (५-२-८८) इष्टादिभ्योनेनेत्यर्थे इनिः स्यात्। इष्टमनेन–इष्टी। एवम् अधीतम्–अधीती। पूर्तं–पूर्ती। सङ्कलितं–सङ्कलिती। अवकीर्णं–अवकीर्णी क्षतब्रह्मचर्यः। रक्षितं–रक्षिती। श्रुतं–श्रुती। पठितं–पठिती। अनुपद्यन्वेष्टा (५-२ ९०) अनुपदीति निपात्यते अन्वेष्टा इत्यर्थे। अनुपद (पदस्य पश्चात्) मन्वेष्टा अनुपदी गवाम्। अनुपदशब्दादिनिः। साक्षाद्द्रष्टरि संज्ञायाम् (५-२-९१) साक्षाच्छब्दादिनिः स्यात् द्रष्टरि अभिधेये संज्ञायाम्। साक्षाद् द्रष्टा–साक्षी। अव्ययानां भमात्रे टिलोप इति टिलोपः। संज्ञाग्रहणादुपद्रष्टैवोच्यते न दाता ग्रहीता वा। क्षेत्रियच्परक्षेत्रे चिकित्स्यः (५-२-९२) परक्षेत्रे चिकित्स्य इत्यर्थे क्षेत्रिय इति निपात्यते। परक्षेत्रं शरीरान्तरं जन्मान्तरीयादिकमिति यावत्। परक्षेत्रे चिकित्स्यः–क्षेत्रियः–व्याधिः (शरीरे अचिकित्स्यत्वादप्रतीकार्यः इत्यर्थः) अथवा परशरीरे संक्रम्य चिकित्सनीयं–क्षेत्रियं विषम्। इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा (५-२-९३) इन्द्रलिङ्गमित्याद्यर्थेषु इन्द्रियमिति निपात्यते। इन्द्रस्य (आत्मनः) लिङ्गं (ज्ञापकं)–इन्द्रियम्। एवम् इन्द्रेण (आत्मना) दृष्टं, सृष्टं, जुष्टं, दत्तमित्यप्यर्थान्तरम्। इन्द्रशब्दात् घच्प्रत्ययः।

वि. मतौ छः सूक्तसाम्नोः (५-२-५९) सूक्ते साम्नि चाभिधेये मत्वर्थे छः स्यात्। अच्छावाकशब्दोस्मिन्–अच्छावाकीयं सूक्तम्। वारवन्तशब्दोस्मिन्–वारवन्तीयं साम। तत्र कुशलः पथः (५-२-६३) सप्तम्यन्तात् पथिन्शब्दात् कुशल इत्यर्थे वुन्स्यात्। पथि कुशलः पथकः। नस्तद्धितइति टिलोपः। स्वाङ्गेभ्यः प्रसिते (५-२-६६) स्वाङ्गवाचिभ्यः प्रसित इत्यर्थे कन्स्यात्। केशेषु प्रसितः (केशरचनायां तत्परः) केशकः। अंशं हारी (५-२-६९) द्वितीयान्तादंशशब्दात् हारीत्यर्थे कन्स्यात्। अंशं हारी-अंशकः दायादः पुत्रश्च। तन्त्रादचिरापहृते (५-२-७०) पञ्चम्यन्तात्तन्त्रशब्दात् अचिरापहृत इत्यर्थे कन्स्यात्। तन्त्रात् (तन्तुवायशलाकायाः) अचिरापहृतः–तन्त्रकः (नवोत्पादितः) पटः। ब्राह्मणकोष्णिके संज्ञायाम् (५-२-७१) एतौ निपात्येते संज्ञायाम्। आयुधजीविनो ब्राह्मणा यस्मिन्देशे सः-ब्राह्मणको देशः। अल्पमन्नं यस्यां सा-उष्णिका यवागूः। अल्पान्नशब्दस्योष्णादेशो निपात्यते। शीतोष्णाभ्यां कारिणि (५-२-७२) आभ्यां कन्स्यात्कारिण्यर्थे। शीतं करोति-शीतकः (अलसः)। उष्णं करोति-उष्णकः (शीघ्रकारी)। पार्श्वेनान्विच्छति (५-२-७५) तृतीयान्तपार्श्वशब्दादन्विच्छतीत्यर्थे कः स्यात्। अनृजुरुपायः पार्श्वम्। पार्श्वेनान्विच्छति-पार्श्वकः। ऋजूपायेनान्वेष्टव्यानर्थाननृजुनोपायेन योन्विच्छति स पार्श्वक इति भाष्यम्। अयःशूलदण्डाजिनाभ्यां ठक्ठञौ (४-२-७६) आभ्यामन्विच्छतीत्यर्थे ठक्ठञौ स्तः। तीक्ष्ण उपायोऽयःशूलम्, तेनान्विच्छति-आयःशूलिकः (साहसिकः)। मृदुनोपायेनान्वेष्टव्यानर्थान् रभसेन योन्विच्छति स आयःशूलिक इति भाष्यम्। दम्भोदण्डाजिनं, तेनान्विच्छति दाण्डाजिनिकः (दाम्भिकः)। शृङ्खलमस्य बन्धनं करभे (४-२-७९) अस्यबन्धनमित्यर्थे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...उष्ट्रबालकस्यात्करभेऽभिधेये । शृङ्खलं बन्धनमस्य–शृङ्खलकः करभः (उष्ट्रबालकः) । तदस्मिन्नन्नं प्राये संज्ञायाम् (५-२-८२) प्रथमान्तादन्नवाचका त्प्रायेणास्मिन्नित्यर्थे कन्स्यात् । गुडापूपाः प्रायेणान्नमस्यां सा-गुडापूपिका पौर्णमासी । एवं ...पूपिका पौर्णमासी । । वटकेभ्य इनिर्वक्तव्यः (वा) वटकाः प्रायेणान्नमस्यां-वटकिनी पौर्णमासी । कुल्माषादञ् (५-२-८३) अस्मादञ्स्यात्पूर्वविषये । कुल्माषाः (चणकाः) प्रायेणान्नमस्यां-कौल्माषी पौर्णमासी ।

तदस्यास्त्यस्मिन्निति मतुप् (४-२-९२) प्रथमान्तादस्यास्ति अस्मिन्नस्ति इति वार्थे मतुप्स्यात् । गावोऽस्य सन्ति, अस्मिन्वा सन्ति-गोमान् जनो देशो वा । वृक्षाः सन्ति अस्मिन्–वृक्षवान्पर्वतः । मादुपधायाश्च मतोर्वोऽयवादिभ्यः (८-२-९) मवर्णावर्णान्तात् मवर्णा-वर्णोपधाच्च यवादिवर्जि-तात्परस्य मतोर्मस्य वः स्यात् । इति वत्वम् । एवं लक्ष्मी-लक्ष्मीवान् । वृक्ष-वृक्षवान् । माला-मालावान् । विद्या-विद्यावान् । पयस्-पयस्वान् । यशस्-यशस्वान् । भास्-भास्वान् (सूर्यः) । यवादिभ्यस्तु न-यव-यवमान् । उर्मि-ऊर्मिमान् । भूमि-भूमिमान् । गरुत्-गरुत्मान् (गरुडः) । मधु-मधुमान् । इक्षु-इक्षुमान् । ककुद्-ककुद्मान् (वृषः) । झयः (८-२-१०) झयन्तादुत्तरस्य मतो र्मस्य वः स्यात् । विद्युत्-विद्युत्वान् (मेघः) । दृषद्-दृषद्वान् देशः । तसौ मत्वर्थे (१-४-१९) तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे परे । विद्वांसोस्मिन्सन्ति इत्यर्थे विद्वस्शब्दान्मतौ भसंज्ञया वसोः सम्प्रसारणमिति संप्रसारणे षत्वे विदुष्मान् । वत्वनिमित्ताभावे निमित्तसत्वेपि यवादौ मकार एव । श्री-श्रीमान् । गुरु-गुरुमान् । धी-धीमान् । स्त्रियामुगित्वान्ङीप्-गोमती श्रीमती लक्ष्मीवती इक्षुमती धीमती । रसादिभ्यश्च (५-२-९५) एभ्यो मतुप्स्यात् अस्यास्ति अस्मिन्नस्ति इत्यर्थे । पूर्वेणैवसिद्धावन्यमत्वर्थीयनिवृत्त्यर्थं वचनम् । रसोऽस्य अस्मिन्वास्ति-रसवान् । एवं-रूप-रूपवान् । गन्ध-गन्धवान् । स्पर्श-स्पर्शवान् । शब्द-शब्दवान् । स्नेह-स्नेहवान् । गुणात् (गण), रसादेर्विशेषणं, तेन द्रव्यवाचकेभ्यो रसगन्धादिभ्यो न । एकाचः (गण) स्व-स्ववान् । गुणवचनेभ्यो मतुपो लुगिष्ट (वा) गुणे गुणवति च प्रसिद्धेभ्यः शुक्लादि-शब्देभ्यः परस्य मतुपो लुगित्यर्थः । शुक्लो गुणोस्यास्तीति-शुक्लः पटः । एवं कृष्णः । पीतः ।

वि१. विग्रहे अस्य अस्मिन्निति मत्वन्ताभिधेयानुसारिलिङ्गवचनयोः प्रयोज्यं तेन अनयोः एषाम्, ...अनयोः आसाम्, अनयोः एषु अस्याम् आसु इत्यादि रूपेषु, अस्तीत्यपि प्रकृतिसंख्यानुसारेण स्तः सन्ती-...रपि यथास्थलं परिवर्तनीयम् । गौरनयोरस्ति–गोमन्तौ, गौरस्या अस्यां वास्ति–गोमती । गावः सन्त्येषां-...; गावौ स्त आसु –गोमत्यौ इत्यादि । एवमन्यत्र–गोमानासीत् गोमान्नवितेत्यदिष्वपि अस्तीत्येव विग्रहः भूत-...कालौ गोमत एव नतु प्रकृत्यर्थस्य गवादेरितीहानुसान्धेयम् ।

वि. २ मत्वर्थीयस्थले भूमादयोर्थविशेषा अपि विवक्ष्यन्ते, उक्तं च भाष्ये-भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । ...संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः । भूम्नि (बाहुल्ये) गोमान् (बहुगोमान्) निन्दायां–कुष्ठी प्रशंसायां–रूपवतीकन्या,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नित्ययोगे (अतिशयसंसर्गे) क्षीरिणो वृक्षाः। अतिशयेन—उदरिणी कन्या। संसर्गे (वर्तमानसम्बन्धे) —दण्डी, छत्री ईदृशेष्वर्थविशेषेषु अस्तित्वविवक्षायां मतुवादयो भवन्तीत्यर्थः। शौषिकान्मतुवर्थीयाच्छैषिको मतुवर्थीकः। प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते। इति मत्वर्थीय प्रत्ययान्तान्न पुनः सरूपो मत्वर्थीय इत्युक्तम्। तेन गोमत्वान् रूपवद्वान् जातिमत्वान् इत्यादि न प्रयोज्यम् तार्किकैरेतन्नियममुलङ्घ्य जातिमत्वान् घटत्वादित्याद्यनुमितिः प्रदर्शि विरूपप्रत्ययस्तु भवत्येव क्षीरिमद्वनम्, दण्डिमान्देशः। शृङ्गिमद्गोष्ठमित्यादि।

वि. ३. **संज्ञायाम्** (८-२-११) संज्ञायां मतोर्मस्य वः स्यात्। अहीवती मुनीवती। शरादीनामितिदी **आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती** (८-२-१२) एते संज्ञायां निपात्यन्ते। वत्वे पूर्वेणैव प्रकृतिभागेष्वादेशविशेषार्थं निपातनम्। आसन—आसन्दीवान् ग्रामः विशेषः। अन्यत्रासनवान्। अस्थि अष्ठीवान् (शरीरावयवविशेषः)। अन्यत्र अस्थिमान्। चक्र—चक्रीवान् (राजविशेषः), अन्यत्र चक्रवान्। कक्ष्या—कक्षी (ऋषिविशेषः) कक्षायाः संप्रसारणम्। अन्यत्र कक्ष्यावान् रथः। द्रुमण्वान् (पर्वतविशेषः), अन्यत्र लवणवान्। चर्मण्वती (नदीविशेषः), अन्यत्र चर्मवती। **उदन्वानुदधौ च** (८-२-१३) उदन्वानिति उदकस्य मतौ उदन् निपात्यते उदधावर्थे संज्ञायाम्। उदक-उदन्वान् उदधिः। अन्यत्र तु उदकवान्घटः। **राजन्वान्सौराज्ये** (८-२-१४) राजन्वानिति नलोपाभावो निपात्यते सौराज्ये गम्ये। शोभनो राजा यस्मिन् सः—राजन्वान् देशः। राजन्वती भूः अन्यत्र तु राजवान्। राजयुक्त इत्यर्थः।

प्राणिस्थादातो लजन्यतरस्याम् (५-२-९६) आकारान्तात्प्राणिस्थवाचकान्मत्वर्थे लच्वा स्यात् पक्षे मतुप्। चूडास्यास्ति—चूडालः चूडावान्। प्राणिस्थोक्त्या नेह-शिखावान्दीपः। प्राण्यङ्गा (वा) नेह-मेधावान्। **सिध्मादिभ्यश्च** (५-२-९७) एभ्यो लच्वास्यान्मत्वर्थे। सिध्ममस्यास्ति-सिध्मलः सिध्मवान्। एवं-गडु-गडुलः गडुवान्। पांसु—पांसुलः पांसुमान्। मांस-मांसलः मांसवान् ग्रन्थि-ग्रन्थिलः ग्रन्थिमान्। **वातदन्तबललाटानामूङ् च** (गण) वात-वातूलः। जटा-जटालः शीत-शीतलः। श्याम-श्यामलः। पिङ्ग-पिङ्गलः। पित्त-पित्तलः। पृथु-पृथुल। मृदु-मृदुलः। मञ्जु मञ्जुलः। अन्यतरस्यामिति मतुप्समुच्चयार्थं नतु विकल्पार्थम् तेनाकारान्तेभ्यो न इनिठनौ **वत्सांसाभ्यां कामबले** (५-२-९८) आभ्यां लच्वस्याद्यथासंख्यं कामवति बलवतिचार्थे। वत्सलः (स्नेहवान्), अंसलः(बलवान्)। **फेनादिलच** (५-२-९९) अस्मान्मत्वर्थे इलच्स्यात् चाल्लच्। मतुप् मुच्चयार्थमन्यतरस्यामित्यप्यनुवर्तते। फेनोऽस्मिन्नस्ति-फेनिलः, फेनलः, फेनवान्। **लोमादिपामादि पिच्छादिभ्यः शनेलचः** (५-२-१००)लोमादिभ्यः शः, पामादिभ्यो नः,पिच्छादिभ्यः इलच्स्यान्मत्वर्थे। लोमानि सन्ति-लोमशः लोमवान्। एवं-रोमशः रोमवान्। पामा (रोगविशेषः) अस्यास्ति-पामनः पामवान् अङ्गात्कल्याणे (गण) अङ्गना। लक्ष्म्या अच्च (गण) लक्ष्मणः। पिच्छमस्यास्ति-पिच्छिलः पिच्छवान्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवम्-उरस्-उरसिलः उरस्वान्। पङ्कः-पङ्किलः पङ्कवान्। प्रज्ञाश्रद्धार्चाभ्यो णः (५-२-१०१) एभ्यो णः स्यान्मत्वर्थे। प्रज्ञा विद्यतेस्य-प्राज्ञः प्रज्ञावान्। एवं श्राद्धः श्रद्धावान्। आर्चः अर्चावान्। वार्त-वृत्तिमान्। तपःसहस्राभ्यां विनीनी (५-२-१०२) आभ्यां यथासंख्यं विनि-इनिप्रत्ययौ स्तो मत्वर्थे। तपोस्यास्ति तपस्वी। सहस्रमस्यास्ति-सहस्री। अण् च (५-२-१०३) तपः सहस्राभ्यामण् च स्यान्मत्वर्थे। तापसः, साहस्रः। ज्योत्स्नादिभ्य उपसंख्यानम् (वा) ज्योत्स्ना विद्यतेस्यां-ज्यौत्स्नी रात्रिः। ज्यौत्स्नः पक्षः। तमिस्रा विद्यतेस्मिन् तामिस्रः पक्षः। सिकताशर्कराभ्यां च (५-२-१०४) आभ्यामण्स्यान्मत्वर्थे। सिकता विद्यते अस्मिन्-सैकतो घटः। शर्करा विद्यतेस्मिन्-शार्करं मधु। अदेश इहोदाहरणम्, देशेतु-देशे लुबिलचौ च (५-२-१०५) सिकताशर्कराभ्यां देशेभिधेये लुबिलचौ स्तः, चादण् मतुप्च। सिकताः सन्त्यस्मिन्देशे-सिकताः, सिकतिलः, सैकतः, सिकतावान्। एवं शर्कराः, शर्करिलः, शार्करः, शर्करावान् देशः। लुपियुक्तवद्भावेन बहुत्वम्। दन्त उन्नत उरच् (५-२-१०६) उन्नतो पाधिकाद्दन्तशब्दादुरच्स्यान्मत्वर्थे। दन्ता उन्नताः सन्त्यस्य-दन्तुरः। ऊषसुषिमुष्कमधो रः (५-२-१०७) एभ्यो रः स्यान्मत्वर्थे। ऊषोस्मिन्नस्ति-ऊषरं क्षेत्रम्। एवं-सुषिरम् (सच्छिद्रं) काष्ठम्। मुष्करः (साण्डः) मधुरः (माधुर्ययुक्तः) रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् (वा) खरः (गर्दभः) मुखरः (अप्रशस्तमुखवान्वाचाटः), कुञ्जरः (हस्ती) कुञ्जोहस्तिहनुः। नगपांसुपाण्डुभ्यश्च (वा) नगरम्। पांसुरः। पाण्डुरः। पाण्डरशब्दस्त्वव्युतपन्न एव। कच्छ्वा ह्रस्वत्वं च (वा) कच्छुरः श्वा। कच्छूः शुनां रोगविशेषः। द्युद्रुभ्यां मः(५-२-१०८) आभ्यां मः स्यान्मत्वर्थे। द्युमः द्रुमः (वृक्षः) रूढशब्दावेतौ। केशाद्वोन्यतरस्याम् (५-२-१०९) अस्माद्वो वा स्यान्मत्वर्थे। प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थम्। केशाः सन्त्यस्य-केशवः केशी केशिकः केशवान्। अन्येभ्योपि दृश्यते (वा) मणिवः नागविशेषः। अर्णसो लोपश्च (वा) अर्णोविद्यतेस्मिन् अर्णवः समुद्रः। सकारलोपः। गाण्ड्यजगात्संज्ञायाम् (५-२-११०) आभ्यां वः स्यान्मत्वर्थे संज्ञायाम्। गाण्डि गाण्डी इति ह्रस्वदीर्घयोर्यणा तन्त्रनिर्देशः। गाण्डिवं गाण्डीवं (अर्जुनधनुः) अजगवं (शिवधनुः)। रजःकृष्यासुतिपरिषदो वलच् (४-२-११२) एभ्यो वलच् स्यान्मत्वर्थे। रजः विद्यते यस्याः-रजस्वला स्त्री। एवं कृषि-कृषीवलः। वले इति दीर्घः। आसुति (अभिषवः) आसुतीवलः (शौण्डिकः)। परिषद् (सभा)-परिषद्वलः (राजा)। पर्षदितिपाठान्तरे पर्षद्वलः। अन्येभ्योपि दृश्यते (वा) भ्रातृवलः, पुत्रवलः, शत्रुवलः। वले इत्यत्रसंज्ञायामित्यनुवृत्तेर्नेह दीर्घः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दन्तशिखात्संज्ञायाम् (४-२-११३) आभ्यां मत्वर्थे वलच्स्यात्संज्ञायाम्। दन्तोऽस्यास्ति-दन्तावलः (हस्ती)। वले इति दीर्घः। शिखा-शिखावलः (मयूरः)। **ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः** (५-२-११४) मत्वर्थे एते निपात्यन्ते। ज्योतिर्विद्यतेऽस्मिन्-ज्योत्स्ना (चन्द्रिका) ज्योतिष उपधालोपो नश्च प्रत्ययः। तमो विद्यतेऽस्यां-तमिस्रा (तामसी रात्रिः) तमस उपधाया इत्वं रश्च। स्त्रीत्वमतन्त्रम् तमिस्रम् (नभः) शृङ्गमस्यास्ति-शृङ्गिणः शृङ्गादिनच्। ऊर्जोऽस्यास्ति-ऊर्जस्वी ऊर्जस्वलः (बलवान्)। ऊर्जसोविनिर्वलच्च। गौरस्यास्ति-गोमी। गोशब्दान्मिनिः। मलमस्यास्ति-मलिनः, मलीमसः। मलशब्दादिनच् ईमसच्च। **अत इनिठनौ** (५-२-११५) अदन्तात् इनिठनौ स्तः। धनमस्यास्ति-धनी धनिकः स्त्रियां धनिनी धनिका। एवं दण्ड-दण्डी दण्डिकः। छत्री छत्रिकः। गृह-गृही गृहिकः। तपरकरणान्नेह-खट्वावान्। अन्यतरस्यामित्यधिकारान्मतुप्-धनवान् दण्डवान् छत्रवान्। एकाक्षरात्कृतो जातेः सप्तम्यां च नतौ स्मृतौ इति भाष्योक्तेर्नेह स्वकारकवान् व्याघ्रवान् दण्डा अस्यां सा दण्डवती शाला। इदं प्रायिकं, तेन कार्यी कार्यिकः तण्डुली तण्डुलिक इत्यादि। **व्रीह्यादिभ्यश्च** (५-२-११६) एभ्यो मत्वर्थे इनिठनौ स्तः। मतुबपि भवति। व्रीहिरस्यास्ति-व्रीही व्रीहिकः। यस्येतिचेतीकारलोपः। व्रीहिमान्। नच सर्वेभ्योव्रीह्यादिभ्यो द्वावेव किन्तर्हि न शिखामालासंज्ञादिभ्य इनिः, यवखलादिभ्य इकः, अन्येभ्य उभयम्। शिखा-शिखी माला-माली संज्ञा-संज्ञी संज्ञावान्। कर्मन् कर्मी। चर्मन्-चर्मी। मेखला-मेखली। पताका-पताकी वर्मन् वर्मी॥ यवखल-यवखलिकः। नौ-नाविकः॥ शालि-शाली शालिकः। माया मायी मायिकः **तुन्दादिभ्य इलच्च** (५-२-११७) एभ्यो मत्वर्थे इलच्स्यात् चादिनिठनौ मतुप्च। तुन्दमस्यास्ति-तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान्। एवम्-उदर-उदरिलः, उदरी, उदरिकः, उदरवान्। पिचण्ड (उदर)-पिचण्डिलः, पिचण्डी, पिचण्डिकः, पिचण्डवान्। **स्वाङ्गाद्विवृद्धौ** (वा) विवृद्धयुपाधिकात्स्वाङ्गवाचिनो मत्वर्थे इलजादयः स्यु। विवृद्धौ कर्णौ यस्य-कर्णिलः, कर्णी, कर्णिकः, कर्णवान्। **एकगोपूर्वाट्ठञ् नित्यम्** (५-२-११८) एकपूर्वाद्गोपूर्वाच्च नित्यं ठञ्स्यान्मत्वर्थे, एकशतमस्यास्ति-ऐकशतिकः। गोशतमस्यास्ति-गौशतिकः। एवम् ऐकसहस्रिकः। गौसहस्रिकः। नित्यग्रहणान्न मतुप्। **शतसहस्रान्ताच्च निष्कात्** (५-२-११९) निष्कशब्दात्परौ यौ शतसहस्रशब्दौ तदन्तात् ठञ् स्यान्मत्वर्थे। निष्कशतमस्यास्ति-नैष्कशतिकः। निष्कसहस्रमस्यास्ति नैष्कसहस्रिकः।

वि.१ एकगोपूर्वादित्यत्र अत इत्येव तेन नेह एक विंशतिरस्यास्ति। ऐकगविक इति तु समासान्तेन अदन्तात् गौशकटिक इति तु न शकटीशब्दादपि तु शकटशब्दात्। एकद्रव्यवत्त्वादिति प्रयोगस्तु असाधुः, एकेन द्रव्यवत्त्वादिति वा समर्थनीयम्। सुवर्णनिष्कशतमस्यास्तीत्यत्र तु अनभिधानान्न।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २ काण्डाण्डादीरन्नीरचौ (५-२-१११) आभ्यां यथासंख्यमीरन्नीरचौ स्तो मत्वर्थे । काण्डमस्यास्ति-काण्डीरः । एवम्-आण्ड-आण्डीरः । रूपादाहतप्रशंसयोर्यप् (५-२-१२०) आहतोपाधिकात्प्रशंसोपाधिकाच्च रूपशब्दान्मत्वर्थे यप्स्यात् । आहतं (ताडितं मुद्रितमिति यावत्) रूपमस्य रूप्यः दीनारः । प्रशस्तं रूपमस्यास्ति रूप्यः । आहताद्यभावे तु रूपवान् । अन्येभ्योपि दृश्यते (वा) हिमं बाहुल्येनास्ति एषु–हिम्याः पर्वताः । प्रशस्ता गुणा सन्ति-गुण्या ब्राह्मणाः ।

अस्मायामेधास्रजो विनिः (५-२-१२१) असन्तान्मायादिभ्यश्च मत्वर्थे विनिः स्यात् । यशोस्यास्ति-यशस्वी । एवं पयस्-पयस्विनी । नान्तत्वेन स्त्रियां ङीप् । वर्चस्-वर्चस्वी । ओजस्-ओजस्वी । मनस्-मनस्वी । माया-मायावी । व्रीह्यादिपाठादिनिठनावपि मायी–मायिकः । मेधा-मेधावी । स्रज्-स्रग्वी । मतुप्सर्वत्र समुच्चीयत । एवं यशस्वान्, मायावान् मेधावान् । आमयस्योपसंख्यानं दीर्घश्च (वा) आमयोऽस्यास्ति-आमयावी (रोगी) । शृङ्गवृन्दाभ्यामारकन् (वा) शृङ्गारकः वृन्दारकः (श्रेष्ठः) । फलबर्हाभ्यामिनच् (वा) फलमस्यास्ति-फलिनः । बर्ह-बर्हिणः (मयूरः) । हृदयाच्चालुरन्यतरस्याम् (वा) पक्षे इनिठनौ मतुप्च । हृदय (प्रशस्तहृदयं) मस्यास्ति-हृदयालुः हृदयी, हृदयिकः हृदयवान् । शीतोष्णतृप्रेभ्यस्तत्सहने (वा) शीतं न सहते-शीतालुः । उष्णं न सहते-उष्णालुः । तृप्रः पुरोडाशः-दुःखं वा तृप्रालुः । हिमाच्चेलुः (वा) हिमं न सहते-हिमेलुः । बलादूलः (वा) बलं न सहते-बलूलः । वातात्समूहे च (वा) वातं न सहते, वातस्यसमूहो वा–वातूलः । तप्पर्वमरुद्भ्याम् (वा) पर्वतः मरुत्तः । ऊर्णाया युस् (५-२-१२३) अस्मान्मत्वर्थे युस् स्यात् । ऊर्णास्यास्ति-ऊर्णायुः । सित्वेन सितिचेति पदत्वाद्भत्वाभावे यस्येतिचेति नाकारलोपः । छान्दसोयमिति केचित् । वाचो ग्मिनिः (५-२-१२४) अस्मान्मत्वर्थे ग्मिनिः स्यात् । वाचोस्य सन्ति-वाग्मी । आलजाटचौ बहुभाषिणि (५-२-१२५) अस्मादालजाटचौ स्तो बहुभाषिण्यभिधेये । कुत्सित इति वक्तव्यम् (वा) कुत्सितं बहु भाषते-वाचालः वाचाटः । सम्यग्बहुभाषी तु वाग्मीत्येव । स्वामिन्नैश्वर्ये (५-२-१२६) ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच् स्यात् । स्वमस्यास्ति-स्वामी (प्रभुः) । अर्शादिभ्योऽच् (५-२-१२७) एभ्योऽचस्यान्मत्वर्थे । अर्शांसि (गुदकीलानि) अस्य सन्ति-अर्शशः । एवं तुन्दं-तुन्दः । पलितं-पलितः । लवणं-लवणः । शुल्क-शुल्कः । आकृतिगणोयम् । सुखादिभ्यश्च (५-२-१३१) एभ्यो मत्वर्थे इनिः स्यात् । अतइनिठनावित्येवसिद्धे पुनर्विधानं ठनो बाधनार्थम् । सुखमस्यास्ति सुखी । एवं-दुःख-दुखी । कृच्छ्र–कृच्छ्री । हल–हली । प्रणय–प्रणयी । हस्ताज्जातौ (५-२-१३३) अस्मान्मत्वर्थे इनिः स्याज्जातौ वाच्यायाम् । हस्तः (शुण्डा) स्यास्ति-हस्ती (गजः) । अजातौ तु ह-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तत्रान्पुरुषः । वर्णाद् ब्रह्मचारिणि (५-२-१३४) अस्मान्मत्वर्थे इनिः स्याद्ब्रह्मचारिण्यभिधेये । वर्णी (वर्णधर्मविशेषः) अस्यास्ति-वर्णी (ब्रह्मचारी) । पुष्करादिभ्यो देशे (५-२-१३५) एभ्यो मत्वर्थे इनिः स्यात् देशे भिधेये । पुष्करं (पद्म) मस्यामस्ति-पुष्करिणी । एवं पद्म-पद्मिनी । अदेशे तु पुष्करवान् हस्ती । बाहूरुपूर्वपदाद्बलात् (वा) बाहुबलमस्यास्ति-बाहुबली । ऊरुबली । सर्वादेश्च (वा) सर्वधनमस्यास्ति-सर्वधनी । सर्वबीजी । अर्थाच्चासन्निहिते (वा) अर्थोऽसन्निहितोस्य (नास्तीति वत् ।) अर्थी, सन्निहिते तु अर्थवान् । तदन्ताच्च (वा) धान्यार्थी । हिरण्यार्थी । भद्रार्थी । बलादिभ्यो मतुबन्यतरस्याम् (५-२-१३६) एभ्यो मतुब्वा स्यात् । पक्षे इनि । बलमस्यास्ति-बलवान् बली । एवम्-उत्साहवान् उत्साही । व्यायामवान् व्यायामी । आरोहवान् आरोही । अवरोहवान् अवरोही । परिणाहवान् परिणाही । दंशवान्–दंशी । आयामवान्–आयामी ।

वि. द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः (५-२-१२८) एभ्यः प्राणिस्थवाचिभ्यो मत्वर्थे इनिः स्यात् । ठनादेः द्वन्द्वात्–कटकवलयिनी । स्त्रियां ङीप् । शङ्खनूपुरिणी । उपतापोरोगस्तस्मात्–कुष्ठी । किलासी । गर्ह्यं निन्द्यं तस्मात् ककुदावर्ती (ग्रीवाधःपृष्ठेआवर्तवान्) । काकतालुकी (काकस्येवतालुकवान्) । प्राण्यङ्गान्न (वा) पाणिपादवान् । वातातीसाराभ्यां कुक्च: (५-२-१२९) आभ्यामिनिः स्यात्कुकूच मत्वर्थे । रोगे चायमिष्यते । वातः(वातरोगः) अस्यास्ति-वातकी । एवम् अतिसारकी । अरोगे तु वातवती गुहा । पिशाचाच्च (वा) पिशाचोस्मिन्नस्ति-पिशाचकी । धर्मशीलवर्णान्ताच्च (५-२-१३२) धर्माद्यन्तादिनिः स्यान्मत्वर्थे । ब्राह्मणधर्मोस्यास्ति ब्राह्मणधर्मी । एवं ब्राह्मणशीली । ब्राह्मणवर्णी ।तुन्दिवलिवटेर्भः (५-२-१३९) एभ्यो मत्वर्थे भः स्यात् । वृद्धा नाभिस्तुन्दिः सोस्यास्ति तुन्दिभः । एवं वलि–वलिभः । वटि–वटिभः । पामादित्वाद्वलिनोपि । अहंशुभमोर्युस् (५-२-१४०) आभ्यां मत्वर्थे युस् स्यात् । अहंशुभमितिमान्ताव्यये अहंयुः (अहङ्कारवान्) । शुभंयुः (शुभान्वितः) ।

प्रयोगाः—एकादश्यां न भुञ्जीत । विंशोध्यायः । तृतीयायां शिवापूजा । असौ शततमश्चतुर्थकेन ज्वरेणाक्रान्तः । धनिकः श्रोत्रियो राजा । एकोपि साक्षी धर्मात्मा । इन्द्रियवशङ्गतः । त्वमत्र साक्षी । इन्द्रियेभ्यः परं मनः । मुखरस्तत्र हन्यते । मेधावी छात्र उत्तमः ।

प्रश्नाः—मत्वर्थः कः । मतुवो मस्य वत्वं कुत्र भवति कुत्र न । संख्याशब्देषु पूरणप्रत्ययाः के । उष्णकशीतकयोः के र्थाः इन्द्रियमिति केष्वर्थेषु । ग्मिनिविनिप्रत्ययौ क्व । वाचालवाग्मिनोः को विशेषः । अद्यस्तनवाऽस्त्याद्दितान्तानुपपादय—जाग्रत्स्वप्नसुषुप्तितुरीया अवस्थाः । कतिथोयं छात्रः । आद्यूनः स्यादौदरिकः । शीतकश्चोष्णको वाधीती व्याकरणे । औदरिकाणां मद्येष्वेवदृष्टिः । रजस्वला दृष्टिरतीव दुष्टा । हृदयालुः सहृदयः । गुर्वी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...रसवा। फेनिलमुदकं न मेध्यम्। हितमामयाविनो यावतिथश्छात्रस्तावतिथं पारितोषिकं लब्धम्। भारतीयाः ...। गाण्डीवमुक्ताः शराः।

इतिमत्वर्थीयप्रकरणम्

...दिशीयाः—

प्राग्दिशो विभक्तिः (५-३-१) दिक्छब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः। विभक्तिसंज्ञायाः प्रयोजनं नविभक्तौतुस्माइतीत्वनिषेधस्त्यदाद्यत्वादि च। अथ स्वार्थिकाः प्रत्ययाः। समर्थानांप्रथमादिति निवृत्तं, वा इति त्वनुवर्तत एव। किंसर्वनामबहुभ्योद्व्यादिभ्यः (५-३-२) किमः सर्वनाम्नोऽद्व्यादिभ्यो बहुशब्दाच्चेति प्राग्दिशोधिक्रियते। इदम इश् (५-३-३) इदम इश् इत्यादेशः स्यात्प्राग्दिशीये प्रत्यये परे। एतेतौ रथोः (५-३-४) इदम् शब्दस्य एत इत् इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोऽपवादः। एतदोऽन् (५-३-५) योगविभागः कर्तव्यः। एतदः—एतच्छब्दस्य रथोः परयोः एत इत् इत्यादेशौ स्तः। अन्—एतदोऽन्स्यात्प्राग्दिशीये परे। सर्वस्य सोऽन्यतरस्यां दि (४-३-६) सर्वस्य सादेशो वा स्याद्दकारादौ प्राग्दिशीये परे।

वि० अतः परं विहिताः प्रत्ययाः स्वर्थिकाः प्रकृत्यर्थभवा इत्यर्थः। तसिलादिष्वर्थनिर्देशाभावात्, अतिशायन...नां प्रकृत्यर्थविशेषणत्वेन प्रकृत्यर्थत्वात् प्रत्कृत्यर्थ एव प्रत्ययार्थः न स्वतन्त्रस्तदर्थः। एतत्प्रकरणप्रत्यया ...भिन्नसर्वनामभ्यः किम्शब्दाद्बहुशब्दाच्च भवन्ति, किमोद्व्याद्यन्तर्गततया निषेधे प्राप्ते प्रतिप्रसवार्थंपृथग्ग्रहः ...इत्यादिना तसिलादौ परे प्रकृतौ विकारविशेषा विधीयन्ते।

पञ्चम्यास्तसिल् (५-३-७) पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिलवा स्यात्। कु तिहोः (७-२-१०४) किमः कुः स्यात्तकारादौ हकारादौ च विभक्तौ परतः। कस्मात्-कुतः। तद्धितान्तर्गतसुपो लोपः। यस्मात्-यतः। विभक्तित्वेन त्यदादीनाम इत्यत्वम्। तस्मात्-ततः। अस्मात्-इतः। इदम इशादेशः। एतस्मात्-अतः। एतदोऽनादेशः। अमुष्मात्-अमुतः। अदसोसेरिति मुत्वम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुभ्यः-बहुतः । एवं सर्वतः विश्वतः उभयतः । द्व्यादेस्तु द्व्याभ्याम् । तसेश्च (५-३-८) किमादिभ्यः परस्य तसेस्तसिलादेशः स्यात् । प्रतियोगे पञ्चम्यास्तसिः, अपादानेचाहीयरुहोः इति विहितस्य तसेः स्थानेऽनेन तसिलादेशस्तेन प्राग्दिशीयस्यास्य विभक्तितया त्यदाद्यत्वादिकार्यम्, तदर्थं स्वरार्थं च तसेस्तसिलिविधिः । पर्यभिभ्यां च (५-३-९) आभ्यां तसिल्स्यात् सर्वोभयार्थाभ्यामेव (वा) परितः (सर्वतः), अभितः (उभयतः) । सप्तम्यास्त्रल् (५-३-१०) सप्तम्यन्तेभ्यः किमादिभ्यस्त्रल्वा स्यात् । कस्मिन्-कुत्र । यस्मिन्-यत्र । तस्मिन्-तत्र । बहुषु-बहुत्र । इदमो हः (५-३-११) सप्तम्यन्तादिदमो हः स्यात् । त्रलोऽपवादः । अस्मिन्-इह । किमोऽत् (५-३-१२) सप्तम्यन्तात्किमो वा अत्स्यात् । कस्मिन्-क्व । पक्षे कुत्र । एतस्मिन्-अत्र । अन्वादेशे तु-एतदस्त्रतसोस्त्रतसौ चानुदात्तौ (२-४-३३) अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तः त्रतसोः परतः, त्रतसौ चानुदात्तौ । एतदोनित्येव सिद्धेन्वादेशेनुदात्तार्थमशिविधानम् । एतस्मिन्ग्रामे सुखं वसामः-अतोत्राधीमहे, अतो न गन्तास्मः । इतराभ्योपि दृश्यन्ते (५-३-१४) पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणाद्भवदादियोग एव (वा) । स भवान्दीर्घायुरायुष्मान्देवानां प्रिय इति । सभवान्-ततोभवान्, तत्रभवान् । तं भवन्तं-ततोभवन्तं तत्रभवन्तम् । तस्यभवतः-ततोभवतः तत्रभवतः । तेषुभवत्सु-ततोभवत्सु तत्रभवत्सु । एवम् तत्रदीर्घायुः । तेनायुष्मता । तत्रदेवानां प्रियस्य । तत आयुष्मान् । तत्र दीर्घायुः ।

वि. ततस्तत्रेतिशब्दार्थो भवदाद्यर्थे विशेषणत्वेनान्वेति । ततस्तत्रेतियोगे संमानविशेषः प्रतीयते लोकव्यवहारः । यथा तत्रभवता काश्यपेन । तत्रभवतः कण्वस्य कुलपतेः । एवमत्रेत्यादियोगेपि-अत्रभवान् किमुपदिष्टम् ।

सर्वैकान्यकिंयत्तदः काले दा (५-३-१५) सप्तम्यन्तेभ्यः कालार्थेभ्यः सर्वादिभ्यः स्वार्थे दा स्यात् । त्रलोपवादः । सर्वस्मिन्काले-सदा, सर्वदा । सर्वस्य वा सः । एकस्मिन्काले-एकदा । अन्यस्मिन्काले अन्यदा । कस्मिन्काले-कदा । त्यदादीनाम इत्यकारः । यस्मिन्काले-यदा । तस्मिन्काले-तदा । काल इत्युक्तेनेह-सर्वस्मिन्देशे । इदमोर्हिल् (५-३-१६) सप्तम्यन्तात्काले वर्तमानादिदमो हिल्स्यात् । हस्यापवादः । एतेतौरथारित्येतादेशे-एतर्हि । देशे तु-इह देशे । अधुना (५-३-१७) इदम सप्तम्यन्तात्कालवाचिनः स्वार्थं अधुना प्रत्ययः स्यात् । इदम इशादेशे इकारस्य यस्येति चेति लोपे-अधुना । दानीं च (५-३-१८) काले इदमो दानीं च स्यात् । अस्मिन् काले-इदानीं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदम इश्। तदो दा च (५-३-१९) सप्तम्यन्तात्काले वर्तमानात्तदो दा स्याच्चकाराद्दानीं च। तस्मिन्काले-तदा, तदानीम्। तदो दावचनमनर्थकं, सर्वैकान्येति विहितत्वात्। अनद्यतने र्हिल-न्यतरस्याम् (५-३-२१) अनद्यतने काले वर्तमानेभ्य. सप्तम्यन्तेभ्यः किमादिभ्यः र्हिल्वा स्यात्। कर्हि, कदा। यर्हि, यदा। तर्हि, तदा। एतर्हि। सद्यः-परुत्परार्यैषमः-परेद्यव्यद्य-पूर्वेद्यु रन्येद्यु-रन्यतरेद्यु रितरेद्यु रपरेद्यु रधरेद्यु रुभये द्यु रुत्तरेद्युः (५-३-२२) एते निपात्यन्ते। समानस्य सभावो द्यस् चाहनि (वा) समानेऽहनि-सद्यः। पूर्वपूर्वतरयोः परादेशः, उदारी च प्रत्ययौ संवत्सरे (वा) पूर्वस्मिन्वत्सरे-परुत्। पूर्वतरे वत्सरे-परारि। इदम इश् समसण् (वा) अस्मिन्वत्सरे-ऐषमः। परस्मादेद्यव्यहनि (वा) परस्मिन्नहनि-परेद्यवि। इदमोऽशभावो द्यश्च (वा) अस्मिन्नहनि-अद्य। पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् च (वा) पूर्वस्मिन्नहनि-पूर्वेद्युः। अन्यस्मिन्नहनि-अन्येद्युः। अन्यतरस्मिन्नहनि-अन्यतरेद्युः। इतरस्मिन्नहनि इतरेद्युः। अपरस्मिन्नहनि-अपरेद्युः। अधरस्मिन्नहनि-अधरेद्युः। उभयोरन्होः-उभयेद्युः। द्युश्चोभयाद्वक्तव्यः (वा) उभयद्युः। उत्तरस्मिन्नहनि-उत्तरेद्युः। प्रकारवचने थाल् (५-३-२३) सप्तम्याः काले इति च निवृत्तम्। प्रकारवृत्तिभ्यः किमादिभ्यः स्वार्थे थालस्यात्। तेन प्रकारेण-तथा। येन प्रकारेण-यथा। सर्वेण प्रकारेण-सर्वथा। इदमस्थमुः (५-४-२४) प्रकारवृत्तेरिदंशब्दात् थमुः स्यात्। थालोपवादः। अनेन प्रकारेण-इत्थम्। एतेतौरथोरिति इदम इदादेशः। एतदो वाच्यः (वा) एतेन प्रकारेण-इत्थम्। एतद इति योगविभागादिदादेशः। किमश्च (५-३-२५) प्रकारवृत्तेः किमस्थमुः स्यात्। केन प्रकारेण-कथम्।

वि. सामान्यस्य भेदको विशेषः प्रकारः। प्रकृत्यर्थविशेषणं चैतत्। प्रकारेगुणवचनस्येत्यत्र सादृश्यस्य प्रकारत्वेपि सादृश्यं न गृह्यते, अनभिधानात्। प्रकारमात्रे थालः प्रकारवति जातीयरो विहिततयार्थभेदात् थाल्प्रत्ययान्ताज्जातीयरे यथाजातीयस्तथाजातीय इत्याद्यपि प्रयुज्यते।

प्रयोगाः—न वाच्यमित्थं पुरुषोत्तम त्वया। इतस्ततः प्रवर्तते। अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः। सद्यः समुत्थाय कथं प्रयासि। समर्घमैषमो धान्यम्। यथा कथञ्चित्स्वजनोऽनुनीतः। पदं हि सर्वत्र गुणैर्निधीयते। परिजनो राजानमभितः स्थितः। अलमस्मान्यथा सम्भाव्य। अत्रभवतां किं नामधेयम्।

प्रश्नाः—त्रतसिल्प्रत्ययौ कुत्र भवतः। तसेस्तसिलादेशे किं प्रयोजनम्। सद्यःपरुत्परार्यैषमः शब्दाः कथं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केष्वर्थेषु निष्पद्यन्ते। इदंशब्दस्य देशे काले च को विशेषः देशकालप्रकाराः प्रकृतेः प्रत्ययस्य वार्थाः। एतत्प्रकरणनिष्पन्न शब्दाः किंजातीयकाः। अधस्तनवाक्यगतांस्तद्धितान्तानुपपादय–

परुत्परारिवैषमः समर्घं नास्ति। उभयतो वद्धशिक्यो वाह्यो वीवधः। इतस्ततो विहृत्येहाद्यमुपस्थितः। अ... कथमिहाधुना गतिः। यत्रतत्र गत्वेदं कार्यं साधनीयम्। अधुना मधुना मनोहरः समयः सर्वत ईक्ष्यते जनैः।

इतिप्राग्दिशीयप्रकरणम्।

प्रागिवीयाः—

दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः (५-३-२७) सप्तम्याद्यन्तेभ्यो दि... रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थे अस्तातिः स्यात्। पूर्वाधरावराणामसि पुरधवश्चैषाम् (५-३-... पूर्वादिभ्योऽस्तात्यर्थे असिः स्यात्, तद्योगे चैषां क्रमात् पुर् अध् अव् इत्यादेशाः स्युः। अस्ताति च (५-३-४०) अस्तातौ च परे पूर्वादीनां पुराद्यादेशाः स्युः। पूर्वस्याम्, पूर्वस्याः, पूर्वा वा दिक्–पुरः, पुरस्तात्। अधरस्याम्, अधरस्याः, अधरा वा दिक्-अधः अधस्तात्। अवरस्याम्, अवरस्याः, अवरा वा दिक्-अवः। विभाषाऽवरस्य(५-३-४१) अवरस्यास्तातौ परे अव्वा स्यात्। अव... स्तात्, अवरस्तात्। एवं देशे कालेपि।

वि१ दिशां शब्दाः दिक्छब्दाः दिग्रूढाइत्यर्थः। दिशि रूढेभ्य इत्युक्त्या यौगिकेषु न-ऐन्द्र्यां वसति। विभक्ति... निर्देशान्नेह-पूर्वं ग्रामं वसति। दिगादिवृत्तिभ्य इत्युक्त्या नेह-पूर्वस्मिन्गुरौ वसति। पूर्वस्मिन्देशे वसतीति। नै... देशविशेषणमेतदिति नेह।

वि. २ पूर्वापराधराणां दिग्देशकालेष्वित्यत्र यथासंख्यं नेष्यतेऽस्वरितत्वात्। तेन पुरस्ताद्वसति पुरस्तादागतः पुर... मणीयमित्यादि सिध्यति। दिक्शब्देभ्य इति सामान्येन विहितस्य परादिषु सावकाशस्यास्तातेः पूर्वापराधरेषु विशे... तेनासिना बाधस्तु न, अस्तातिचेति ज्ञापकात्। पश्यामि तापित इतः पुरतश्च पश्चात् (भवभूतिः), स्यात्पुरः पुर... ग्रतः (अमरः), पुरतः प्रथमेचाग्रे (विश्वः) इत्यादिषु पुरत इति पुरादेशेन तसौ प्रयोगस्तु समानकालीनमित्यादि... मादिक इति बहवः, दक्षिणोत्तराभ्यामतसुजित्यत्र तसुज्विधानेनैवेष्टिसिद्धौ अकारोच्चारणमन्यतोपि विधानार्थं... अग्रगमनार्थात्पुरधातोः तिपि पुर् इत्यतः अतसुचि पुरत इति सिद्ध्यतीति केचित्।

दक्षिणोत्तराभ्यामतसुच् (५-३-२८) आभ्यां दिग्देशकालवृत्तिभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां स्वार्थे अतसुच्स्यात्। अस्तातेरपवादः। दक्षिणतो वसति (सप्तमी), दक्षिणत आगतः (पञ्चमी), ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(प्रथमा) । एवम्-उत्तरतो वसति, उत्तरत आगतः, उत्तरतो रमणीयम् । दक्षिणा-
तो रमणीयम् (प्रथमा) । एवम्-उत्तरतो वसति, उत्तरत आगतः, उत्तरतो रमणीयम् । दक्षिणा-
त्तरः काले न सम्भवतीति दिग्देशवृत्तिः । विभाषा परावराभ्याम् (५-३-२९) आभ्यामतसुज्वा स्याद-
स्तात्यर्थे । पक्षेऽस्तातिः । परतः-परस्तात् । अवरतः-अवस्तात् । अञ्चेर्लुक् (५-३-३०) अञ्चत्यन्ता-
द्दिक्शब्दात्परस्यास्तातेर्लुक् स्यात् । प्राच्यां प्राच्याः प्राची वा दिक्-प्राक् । लुक्तद्धितलुकीति स्त्रीप्रत्य-
यस्यापि लुक् । एवम्-उदक्-अवाक्-प्रत्यक् । उपर्युपरिष्टात् (५-३ ३१) अस्तातेर्विषये ऊर्ध्वशब्द-
स्योपादेशः स्यात् रिल्रिष्टातिलौ प्रत्ययौ च स्तः । ऊर्ध्वायामूर्ध्वाया ऊर्ध्वा वा दिक्-उपरि, उपरि-
ष्टात् । पश्चात् (५-३-३२) अपरस्य पश्चभाव आतिश्च प्रत्ययः स्यादस्तातेर्विषये । अपरस्यां
दिशि पश्चाद्वसति । अपरस्या दिशः-पश्चादागतः । अपरा दिक्-पश्चाद्रमणीयम् । उत्तराधर-
दक्षिणादातिः (५-३-३४) एभ्य आतिः स्यादस्तातेर्विषये । उत्तरात्, अधरात्, दक्षिणात्
एनबन्यतरस्यामदूरेऽपञ्चम्याः (५-३-३५) उत्तरादिभ्य एनब्वास्यादवध्यवधिमतोः सामीप्ये पञ्चमीं
विना । उत्तरेण अधरेण दक्षिणेन । पक्षे यथास्वं प्रत्ययाः । अपञ्चम्या इति प्रागसेः, असिस्तु पञ्चम्य-
न्तादपि भवति । इह केचिदुत्तरादीननुवर्त्य दिक्छब्दमात्रादेनपमाहुः, तेन-पूर्वेण ग्रामम् । अपरेण
नगरम् । दक्षिणादाच् (५-३-३६) दक्षिणशब्दादाच्स्यादस्तात्यर्थे अदूरे । दक्षिणा वसति । अप-
ञ्चम्या इत्येव, नेह-दक्षिणादागतः । आहि च दूरे (५-३-३७) दक्षिणशब्दादाहि स्यादस्तात्यर्थे
चादाच् अवधिमतोऽवधेर्दूरत्वे । दक्षिणाहि, दक्षिणा वसति । अपञ्चम्या इत्येव; नेह-दक्षिणादागतः ।
उत्तराच्च (५-३-३८) उत्तरादाजाही स्तोऽस्तात्यर्थे । उत्तराहि, उत्तरा वसति । दूर इत्येव, नेह-
उत्तरेण प्रयाति । अपञ्चम्या इत्यपि, नेह-उत्तरादागतः ।

वि. पूर्वादिदिक्छब्देभ्यस्तत्र तत्र विशेषतो निष्पन्नानां शब्दानामत्रायं संग्रहः-पूर्व-पुरः पुरस्तात् पूर्वेण । दक्षिण-
दक्षिणतः दक्षिणा दक्षिणात् दक्षिणाहि दक्षिणेन । उत्तर-उत्तरतः उत्तरा उत्तरात् उत्तराहि उत्तरेण । अधर-अधः
अधस्तात् अधरात् अधरेण । अवर-अवः अवस्तात् अवरस्तात् अवरतः । ऊर्ध्व-उपरि उपरिष्टात् । अपर-पश्चात् ।
प्राची-प्राक् । अवाची-अवाक् । प्रतीची-प्रत्यक् । उदीची-उदक् ।

संख्याया विधार्थे धा (५-३-४२) प्रकारार्थे वर्तमानात्संख्याशब्दात्स्वार्थे धा स्यात् । विधार्थः
प्रकारः, स च क्रियाविषयक एव गृह्यते । चतुर्धा विभजति । पञ्चधा दर्शयति । एवं षोढा षड्धा षषउत्वंधः
पुत्वं च वा । सप्तधा, अष्टधा, दशधा, शतधा, सहस्रधा । अधिकरणविचाले च (५-३-४३) अधि-
करणं द्रव्यं, तस्य विचालः संख्यान्तरापादनम् । तत्र गम्ये संख्यायाः स्वार्थे धा स्यात् । एकं राशिं पञ्चधा
कुरु । अष्टधा विधेहि । अनेकमेकधा कुरु । एकमनेकधा कुरु । अत्र क्रियाविषयकप्रकारो न गम्यत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति सूत्रारम्भः। एकाद्धो ध्यमुञन्यतरस्याम् (४-३-४४) एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशो वा स्यात्। ऐकध्यम् एकधा वा भुङ्क्ते। राशिमैकध्यमेकधा वा कुरु। प्रकरणादेव सिद्धे पुनर्धाग्रहणं प्रकारार्थेऽपि यथा स्यादिति। द्वित्र्योश्च धमुञ् (५-३-४५) आभ्यां परस्य धाप्रत्ययस्य धमुञादेशो वा स्यात्। द्वैधम्, द्विधा। त्रैधम्, त्रिधा। धमुञन्तात्स्वार्थे डदर्शनम् (वा) दृशिग्रहणात्क्वचिदेवायम्। द्वैधानि त्रैधानि च तृणानि। एधाच्च (५-३-४६) द्वेधा। त्रेधा। याप्ये पाशप् (५-३-४७) याप्यः कुत्सितः कुत्सिते वर्तमानात्स्वार्थे पाशप् स्यात्। कुत्सितो भिषक्-भिषक्पाशः। कुत्सितो भृत्यः-भृत्यपाशः। पूरणाद्भागे तीयादन् (५-३-४८) पूरणार्थकतीयप्रत्ययान्ताद्भागे विद्यमानात्स्वार्थे अन् स्यात्। स्वार्थ वचनम्। द्वितीयः तृतीयः भागः। तीयादीकक्स्वार्थे वा वाच्यः (वा) द्वैतीयीकः, द्वितीयः। विद्यायाः (वा) द्वितीया तृतीया विद्या इत्येव। प्रागेकादशभ्योऽच्छन्दसि (५-३-४९) प्रागेकादशभ्यः पूरणप्रत्ययान्तसंख्यावाचिभ्यो भागे वर्तमानेभ्यः स्वार्थेऽन्स्यात् अच्छन्दसि विषये। चतुर्थः, षष्ठः सप्तमः अष्टमः नवमः दशमः। एकादशादिषु नाऽन् एकादशः द्वादशः। षष्ठाष्टमाभ्यां ञ च (५-३-५०) आभ्यां भागे वर्तमानाभ्यां ञो वा स्यात् चादँश्च। षष्ठो भागः-षाष्ठः षष्ठः। अष्टमो भागः आष्टमः अष्टमः। मानपश्वङ्गयोः कन्लुकौ च (५-३-५१) षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तः माने पश्वङ्गे चाभिधेये। षष्ठको भागः मानं चेत्। अस्यानो वा लुक्। चकाराद्यथाप्राप्तम्। षाष्ठः। अष्टमः आष्टमः। महाविभाषयासिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञापयति। एका- किनिच्चासहाये (५-३-५२) असहायवाचिन एकशब्दात्स्वार्थे आकिनिच्स्यात् चात्कन्लुकौ। एकाकी, एककः, एकः (असहायः)।

वि. भूतपूर्वे चरट् (५-३-५३) भूतपूर्वेर्थे विद्यमानात्स्वार्थे चरट् स्यात्। आढ्यो भूतपूर्वः (पूर्वंभूतः)-आढ्यचरः। टित्वं ङीबर्थम् आढ्यचरी। दातृचरः। दृष्टचरः। श्रुतचरः। षष्ठ्या रूप्य च (५-३-५४) षष्ठ्यन्ताद् भूतपूर्वेर्थे रूप्यः स्याच्चरट् च। अत्र प्रत्ययार्थो भूतपूर्वत्वम्। कृष्णस्य भूतपूर्वो गौः—कृष्णरूप्यः कृष्णचरः। तद्धित- रूप्यस्यागणनान्न पुंवत्, शुभ्राया भूतपूर्वः—शुभ्रारूप्यः।

अतिशायने तमबिष्ठनौ (५-३-५५) अतिशायनं प्रकर्षः सचाधिक्यफलको न्यक्कारः, न तु ... मात्रम्, अकर्मकत्वापातात्। अतिशयविशिष्टार्थवृत्तेः स्वार्थे तमबिष्ठनौ स्तः। द्वयोः ... निर्धारणे तरबीयसुनावयवादौ वक्ष्येते। अतः परिशेषाद्बहूनामेकस्य निर्धारणेऽनयोः प्रवृत्तिः। अ... षामतिशयेनाढ्यः-आढ्यतमः। अजादीगुणवचनादेवेति वक्ष्यमाणत्वान्नेष्ठन्। अयमेषामति... लघुः—लघुतमः-लघिष्ठः, इष्ठनि ओर्गुणे प्राप्ते इष्ठेमेयःसु इत्यनुवृत्तौ टेरिति टिलोपः। एवं ...

Jayatu Sanskritam, Kathmandu, Nepal

तमः। सुकुमारतमः। पटुतमः पटिष्ठः। गुरुतमः गरिष्ठः। गुरोर्गरादेशः। तिङश्च (५-३-५६) तिङन्तादतिशये द्योत्ये तमप्स्यात्। ङ्याप्प्रातिपदिकादित्यधिकारात्तिङोऽप्राप्तौ वचनम्। अजादीगुणवचनादेवेति नियमादत्र नेष्ठन्। तरप्तमपौ घः (१-१-२२) एतौ घसंज्ञौ स्तः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे (५-४-११) किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे। अयमेषामतिशयेन पचति-पचतितमाम्। एवं विजयतेतमाम्। जल्पतितमाम्। किन्तमाम्। स्वार्थिकोयं तमप्, किमर्थेतिशयायोगात्। प्राह्णेतमाम् (अतिशयितपूर्वाह्णे)। उच्चैस्तमाम् (अत्युच्चैः)। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः। द्विवचनविभज्योपपदे तरबीयसुनौ (५-३-५७) द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सति सुबन्तात्तिङन्ताच्च तरबीयसुनौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेनाढ्यः-आढ्यतरः। अजादीगुणवचनादेवेति नेयसुन्। एवं सुकुमारतरः रमणीयतरः। अयमनयोरतिशयेन पचतितराम्-तरबन्तादामुः। एवं जयतितराम् जल्पतितराम्। अयमनयोरतिशयेन लघुः-लघुतरः, लघीयान्। टेरिति टिलोपः। एवं पटुतरः, पटीयान्। महत्तरः, महीयान्। विभज्योपपदे-उदीच्याःप्राच्येभ्यः-पटुतराः,पटीयांसः। माथुराःपाटलिपुत्रकेभ्य आढ्यतराः, मृदुतराः म्रदीयांसः। महत्तराः महीयांसः। अजादी गुणवचनादेव (५-३-५८) इष्ठन्नीयसुनौ गुणवचनादेव स्तः। पृथु-प्रथिष्ठः प्रथीयान्। पटु-पटिष्ठः पटीयान्। नेह-पाचकतरः पाचकतमः। प्रशस्यस्य श्रः (५-३-६०) अस्य श्रादेशः स्यादजाद्योः परतः। इष्टादिषु एकाच्प्रकृत्या स्यात्। प्रकृत्यैकाच् (६-४-१६३) अनयोरतिशयेन प्रशस्यः-श्रेयान्। एषामतिशयेन प्रशस्यः-श्रेष्ठः। आदेशे टिलोपे प्राप्ते प्रकृतिभावः। ज्य च (५-३-६१) प्रशस्यस्य ज्यादेश स्यादजाद्योः परतः। ज्येष्ठः। ज्यादादीयसः (६-४-१६०) ज्यात्परस्य ईयस आकारः स्यात्। आदेःपरस्येति ईकारस्याऽऽकारः। ज्यायान्। वृद्धस्य च (५-३-६२) वृद्धशब्दस्य च ज्यादेशः स्यादजाद्योः परतः। एषामतिशयेन वृद्धः-ज्येष्ठः। अनयोरतिशयेन वृद्धः-ज्यायान्। ज्यादेशे ईकारस्यात्वम्। प्रियस्थिरेत्यादिना वृद्धस्यवर्षादेशविधानसामर्थ्यात्पक्षे सोपि वर्षिष्ठः वर्षीयान्। विभज्योपपदे-अयमस्मात्-श्रेष्ठः श्रेयान्, ज्येष्ठः ज्यायान्, वर्षिष्ठः वर्षीयान्। तरप्तमपावपि प्रशस्यतरः प्रशस्यतमः, वृद्धतरः वृद्धतमः। अन्तिकबाढयोर्नेदसाधौ (५-३-६३) अनयोर्यथासंख्यं नेदसाधावादेशौ स्तः अजाद्योःपरतः। इदमेषामतिशयेनान्तिकं-नेदिष्ठम् अन्तिकतमम्। इदमनयोरतिशयेनान्तिकं-नेदीयः अन्तिकतरम्। अयमेषामतिशयेन वाढः (भृशः)-साधिष्ठः वाढतमः। अयमनयोरतिशयेन वाढः-साधीयान्, वाढतरः। विभज्योपदे-इदमस्मान्नेदीयः अन्तिकतरम् साधीयः वाढतरम्। स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः (६-४-१५६) एषां यणादि परं लुप्येते पूर्वस्य च गुणः स्यादिष्ठेमेयःसु।

CC-0. Digitized by eGangotri and MIDF- Delhi

एषामतिशयेन स्थूलः—स्थविष्ठः अनयोरतिशयेन स्थूलः–स्थवीयान्। यणादेः परस्य लस्य ... पूर्वस्योकारस्य गुणे अवादेशः। एवं-दूर-दविष्ठः, दवीयान्। युवन्-यविष्ठः, यवीयान्। ह... ह्रसिष्ठः ह्रसीयान्। क्षिप्र–क्षेपिष्ठः, क्षेपीयान्। क्षुद्र–क्षोदिष्ठः, क्षोदीयान्। ह्रस्वक्षिप्रक्षुद्रा... पृथ्वादित्वाद्भावे इमनिचि स्थूलदूरेति यणादिपरलोपे पूर्वगुणे-ह्रसिमा, क्षेपिमा, क्षोदि... प्रिय-स्थिर-स्फिरोरुगुरु-बहुल-वृद्ध-तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ-स्फ- वर्बंहि - गर्वर्षि - त्रब्द्राघिवृ... (६-४-१५७) प्रियादीनां क्रमात् प्र-स्थ-स्फ-वर्-बंहि-गर्-वर्षि-त्रप्-द्राघि-वृन्द इत्यादेशाःस्युः इष्ठेमेय... एषामतिशयेन प्रियः-प्रेष्ठः। अनयोरतिशयेन प्रियः-प्रेयान्। एवं स्थिर-स्थेष्ठः, स्थेयान्। स्फि... स्फेष्ठः, स्फेयान्। उरु-वरिष्ठः, वरीयान्। बहुल-वंहिष्ठः, वंहीयान्। गुरु-गरिष्ठः, गरी... वृद्ध-वर्षिष्ठः, वर्षीयान्। तृप्र-त्रपिष्ठः, त्रपीयान्। दीर्घ-द्राघिष्ठः, द्राघीयान्। प्रियोरुबहुल... दीर्घाणां पृथ्वादित्वाद्भावे इमनिचि च प्राद्यादेशाः—प्रेमा, वरिमा, वंहिमा, गरिमा, द्राघि... बहोर्लोपो भू च बहोः(६-४-१५८) बहोः परयो,रिमेयसोर्लोपो बहोर्भूरादेशश्च स्यात्। इष्ठस्य यि... (६-४-१५८) बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च। बहोर्भा... भूमा। एषामतिशयेन बहुः-भूयिष्ठ। आदेःपरस्येति इकारमात्रलोपः सर्वत्र। युवाल्प... कनन्यतरस्याम् (५-३-६४) एतयोः कनादेशो वास्यादिष्ठेयसोः परतः। एषामतिशयेन युवा, अ... वा-कनिष्ठः, पक्षे यविष्ठः। अल्पिष्ठः। अनयोरतिशयेन युवा अल्पो वा-कनीयान्, अल्पी... विन्मतोर्लुक् (५-३-६५) विनो मतुपश्च लुक्स्यादिष्ठेयसोः। अतिशयेन स्रग्वी-स्रजिष्ठः, स्रजी... अतिशयेन त्वग्वान्-त्वचिष्ठः, त्वचीयान्।

वि. १ द्रव्यस्य जातेर्वा स्वतः प्रकर्षयोगो नास्ति, अन्यथा घटतरः घटतम इत्यादिप्रयोगापत्तेः; किन्तु गुण... द्रव्यजात्योः प्रकर्षयोगः। आढ्यतरः आढ्यतम इत्यादौ प्रकर्षविशिष्ट आख्यादिःप्रकृत्यर्थस्तरतमादिस्तद्द्योतकः। ... नेष्वति असुब्निर्देशेन सुबन्तादेव तद्धितोत्पत्तेरुक्ततया अन्तर्गतसुपः सुपोधातुप्रातिपदिकयोरिति लुक्। आति... निकप्रत्ययान्तादातिशायनिकप्रत्ययो न भवति अनभिधानात्, श्रेष्ठतमायकर्मणे इति तु छान्दसमिति भाष्ये। प्र... मपि पुनः प्रकर्षविवक्षायामपरः प्रत्ययो भवति यथाहुः युधिष्ठिरः श्रेष्ठतमः कुरूणामिति काशिकाकारः। विमल... आपेक्षिकातिशयबोधनेन तरवीयसुनावेव नतु तमविष्ठनौ इति नविस्मरणीम्।

वि २. केवलेभ्यो विशेषणशब्देभ्यः साधारणः, सगुणः, तरवीयसुनोस्ततो गुणातिशयः, तमविष्ठनोस्ततो ... तिशयो विशेष्यगतोर्थतः प्रतीयते इति तरवादियोगे तास्तम्यबोधकानि विशेषणानि भवन्ति। तत्र तरपमौ सर्वेषु वि... शब्देषु। इष्ठेयसौ तु गुणवाचिष्वेव, तत्रापि स्थूलदूरप्रियस्थिरादिषु प्रकृतिभागेषु विकृतिविशेषा अपि भवन्ति। ... आढ्यः आढ्यतरः आढ्यतमः। विद्वान् विद्वत्तरः विद्वत्तमः। दरिद्रः दरिद्रतरः दरिद्रतमः। सुन्दरः सुन्दरतरः ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...। दृष्टः दृष्टतरः दृष्टतमः । श्रुतः श्रुततरः श्रुततमः । पापः पापतरः पापीयान्, पापतमः पापिष्ठः । पटुः पटुतरः ... पटुतमः पटिष्ठ । मृदुः मृदुतर म्रदीयान् मृदुतमः म्रदिष्ठः । पृथुः पृथुतरः प्रथीयान्, पृथुतमः प्रथिष्ठ । प्रश- ... प्रशस्यतरः श्रेयान् ज्यायान् प्रशस्यतमः श्रेष्ठः ज्येष्ठः । वृद्धः वृद्धतरः ज्यायान्, वर्षीयान् वृद्धतमः ज्येष्ठ. वर्षिष्ठः । ...-अन्तिकतरः नेदीयान्, अन्तिकतमः नेदिष्ठ. । बहुः बहुतरः भूयान्, बहुतमः भूयिष्ठ । प्रियः प्रियतरः ..., प्रियतमः प्रेष्ठः । स्थिरः स्थिरतरः स्थेयान्, स्थिरतमः स्थेष्ठः । गुरुः गुरुतरः गरीयान्, गुरुतमः गरिष्ठः । दीर्घः ...: द्राघीयान् दीर्घतमः द्राघिष्ठः । बहुलतरः बंहीयान्, बहुलतमः बंहिष्ठः । युवा–युवतरः यवीयान् कनीयान्, ... यविष्ठ कनिष्ठः । अल्पः अल्पतरः अल्पीयान् कनीयान् । अल्पतमः अल्पिष्ठः कनिष्ठः इत्यादि । स्त्रियां तरतमे-...प्ययवन्ताः इयसुन्नन्ता ङीबन्ताः । प्रिया प्रियतरा प्रियतमा प्रेष्ठा, प्रेयसी । गुर्वी गुरुतरा गुरुतमा गरिष्ठा ...सी ।

प्रशंसायां रूपप् (५-३-६६) प्रशंसाविशिष्टस्वार्थे वर्तमानात्सुबन्तात्तिङन्ताच्च स्वार्थे रूप-... स्यात् । प्रशस्तः पटुः-पटुरूपः । प्रशस्तं पचति पचतिरूपम् । एवं वैयाकरणरूपः । याज्ञिकरूपः । चोररूपः । गच्छतिरूपम् । क्लीबत्वं लोकात् । ईषदसमाप्तौ कल्पब्देश्यदेशीयरः (५-३-६७ ...षदेनाऽसम्पूर्णता ईषदसमाप्तिः । ईषदसमाप्तिविशिष्टार्थे वर्तमानत्सुबन्तात्तिङन्ताच्च स्वार्थे कल्पप्-देश्य-देशीयर् -प्रत्ययाः स्युः । ईषदूनो विद्वान्–विद्वत्कल्पः विद्वद्देशीयः । एवं मृदुकल्पः मृदुदेश्यः मृदुदेशीयः । यशस्कल्पम् यशोदेश्यं यशोदेशीयम्, (असम्पूर्णं यशः) । पचतिकल्पं पचतिदेश्यं पचतिदेशीयम् । (असम्पूर्णा पाकक्रिया) । विभाषा सुपो बहुच्पुरस्तात्तु (५-३-६८) ईषदसमाप्तिविशिष्टेर्थे वर्तमानात्सुबन्तात्स्वार्थे बहुच् वा स्यात्स च प्रागेव न तु परतः । ईष-दूनः पटुः-बहुपटुः (पटुकल्पः) । एवं बहुमृदुः । बहुगुडा द्राक्षा । विभाषावचनात्पक्षे कल्पबादयः । सुपग्रहणात्तिङन्तान्नायम् । प्रकारवचने जातीयर् (५-३-६९) प्रकारविशिष्टेर्थे वर्तमानात्सुबन्तात्स्वार्थे जातीयर् स्यात् । प्रकारवति चायम्, थाल्तु प्रकारमात्रे । पटुप्रकारः-पटुजातीयः (पटुविशेषः) । एवं मृदुजातीयः । दर्शनीयजातीयः । विद्वज्जातीयः ।

वि. १ प्रशंसा स्तुतिः, प्रकृत्यर्थस्य विशेषणं चैतत्; प्रकृत्यर्थस्यवैशिष्ट्ये पूर्णतायां प्रशंसा भवति, वृषलरूपोयं ...दुना सुरां पिबति । चोररूपोयं योऽक्ष्णोरप्यञ्जनं हरति, इति वृत्तिकारः । तत्त्वबोधिनीकारस्तु प्रकृत्यर्थस्य परिपूर्ण-...शंसा नस्तुतिरित्याह । तिङन्तादपि रूपब्विधानेन पचतिरूपं पचतोरूपं पचन्तिरूपमित्याद्यपि । क्रियाप्रधानमाख्यातं ...वृषलरूपेति सर्वत्रौत्सर्गिकमेकवचनं, विभक्त्यन्तराप्राप्तेः प्रथमा, क्लीबत्वं लोकात् । नाम्नो रूपपि तु नाम्नां सत्व-...भिधेयानुसारेण लिङ्गवचनविभक्तयः–चौररूपाः । पटुरूपानारीत्यादि । एवं-कल्पबादिष्वपि । स्वार्थिकाः प्रकृतितो ...वचनान्यनुवर्तन्त इति वचनात् यशःकल्पं विद्वत्कल्पः इति । प्रभातकल्पा शर्वरी, गुडकल्पाद्राक्षेत्यादौ तु तदतिक्रमे-...लिङ्गादि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. २ प्रत्ययान्तराणां वैधर्म्येण बहुच्प्रकृतितः पूर्वं वचनात्। प्रातिपदिकादित्यनुवर्तनेपि परतोप्यनुवर्तमान तिङो विच्छेदाय सुप इति पुनर्निर्देशः। महाविभाषाधिकारेपि पुनर्विभाषाग्रहणात्कल्पवादयोपि भवन्ति। तु नित्यपूर्वार्थं तेन प्रागुत्पत्तेर्वल्लिङ्गवचनं च तदुत्तरत्तेरपि यथा स्यात्; बहुगुडो द्राक्षा, बहुतैलं प्रसन्ना, बहुपयो यवागू बहुतृणं नरः। नैतत्प्रयोजनं स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्त एव, एवं सिद्धेपि तुग्रहणं स्वार्थिका अतिवर्तन्तेपि लिङ्गवचनानीति ज्ञापयति, तेन गुडकल्पा द्राक्षा, तैलकल्पा प्रसन्ना पयस्कल्पा यवागूरित्येतत् सि इतिभाष्यकारः।

वि. ३ सामान्यस्य भेदको विशेषः प्रकारः प्रकृत्यर्थविशेषणं प्रकारवचनमिति। प्रकारवति जातीयर् प्रकार थालित्यनयोर्भेदः, तेन यथाजातीय इत्याद्यपि। विषयभेदाद्विशेषविहितेनापि थाला जातीयरो न बाधः। वा सादृश्यं भेदश्चोभयमपि प्रकार इत्याह। तेन पटुजातीय इत्यादितः पटुसदृश इत्यादेरपिबोधः। आलङ्कारिकैः कल्पदे देशीयबहुजातीयर्प्रत्ययाः आर्थिके औपम्यार्थे बहुशः प्रयुज्यन्ते लक्षणया तद्बोधोनुसन्धेयः।

प्रागिवात्कः (५-३-७०) इवेप्रतिकृताविस्यतः प्राक्काधिकारः। अकजादयोविशेषास्तु अपवाद अव्ययसर्वनाम्नामकच्प्राक्टेः (५-३-७१) तिङश्चेत्यनुवर्तते। अव्ययानां सर्वनाम्नां तिङन्तानां च प्रागकच्स्यात्। प्रागिवीयेष्वर्थेषु। उच्चैः-उच्चकैः। नीचैः-नीचकैः। सर्वे-सर्वके। उभये-उभयके पचति-पचतकि। पचन्ति-पचन्तकि। प्रतिपदिकात्सुपइतिद्वयमिहानुवर्तते तत्राभिधानतोव्यवस्था ओकारसकारभकारादौसुपिसर्वनाम्नष्टेःप्रागकच्, अन्यत्र तु सुबन्तस्य टेः प्रागकच् (वा) युवको आवकयोः, युष्मकासु अस्मकासु,युष्मकाभिः अस्मकाभिः। अन्यत्र तु त्वयका मयका, त्वयकि मयकि अकच्प्रकरणे तूष्णीमः कांवक्तव्यः (वा) मित्वादन्त्यादचः। तूष्णीकामास्ते, तूष्णीकां तिष्ठति शीलेकोमलोपश्च (वा) तूष्णींशीलः-तूष्णीकः। कस्य च दः(५-३-७२) कान्ताव्ययस्य दकारोन्तादेशः स्यादकच्च। धिक्-धकित्। हिरुक्-हिरकुत्। पृथक्-पृथकत्। अज्ञाते (५-३-७३) अज्ञाते विद्यमानात्सुबन्तात्स्वार्थे कः स्यात्। अज्ञातोश्वः-अश्वकः (कस्यायमश्वः)। एवं गर्दभकः उष्ट्रकः। कुत्सिते (५-३-७४) कुत्सितेर्थे वर्तमानात्सुबन्तात्स्वार्थे कः स्यात्। कुत्सितोश्वः-अश्वकः एवं गर्दभकः उष्ट्रकः। संज्ञायां कन् (५-३-७५) कुत्सितेर्थे वर्तमानात्सुबन्तात्कन्स्यात्संज्ञायाम् शूद्रकः (राजविशेषः)। एवं राधकः। चूर्णकः। स्त्रियां चूर्णिका। कनि स्वरे विशेषः। अनुकम्पायाम् (५-३-७६) अनुकम्पायुक्तार्थे वर्तमानात्सुबन्तात्स्वार्थे कः स्यात्। अनुकम्पितः पुत्रः-पुत्रकः। बालकः वत्सकः। दुर्बलकः। बुभुक्षितकः। नीतौ च तद्युक्तात् (५-३-७७) सामदानादिरूपा नीतिः। नीतौ गम्यमानायामनुकम्पायुक्तात्कः स्यात्। हन्त ते धानकाः, गुडकाः दास्यन्ते। पूर्वं अनु कम्पमानात्प्रत्ययः, अनेन तु परम्परासम्बन्धेपीतिविशेषः। अल्पे (५-३-८५) अल्पत्वविशिष्टे वर्तमानात्प्रातिपदिकात्कः स्यात्। अल्पं तैलं-तैलकम्। एवं घृतकम्। ह्रस्वे (५-३-८६) ह्रस्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशिष्टार्थे वर्तमानात्प्रतिपदिकात्कः स्यात्। महत्वप्रतिद्वन्द्वि अल्पत्वम्, दीर्घत्वप्रतिद्वन्द्वि ह्रस्वत्वमिति विशेषः। ह्रस्वो वृक्षः-वृक्षकः। एवं स्तम्भकः वृक्षकः। संज्ञायां कन् (५-३-८७) ह्रस्वहेतुकायां संज्ञायां गम्यमानायां कन्स्यात्। पूर्वस्यापवादः स्वरे विशेषः। वंशकः (वंशजातिविशेषः) वेणुकः दण्डकः। कुटीशमीशुण्डाभ्यो रः (५-३-८८) एभ्यो ह्रस्वार्थे द्योत्ये रः स्यात्। कस्यापवादः। ह्रस्वा कुटी-कुटीरः। एवं शमीरः। शुण्डारः। स्वार्थिकत्वेपि पुंस्त्वं लोकात्। कुत्वा डुपच् (५-३-८९) कुतूशब्दाद्ध्रस्वत्वे द्योत्ये डुपच्स्यात्। कापवादः। ह्रस्वा कुतूः (चर्ममयं स्नेहपात्रम्)–कुतुपः। डित्वाट्टिलोपः। पुंस्त्वं लोकात्। कासूगोणीभ्यां ष्टरच् (५-३-९०) आभ्यां ह्रस्वत्वे द्योत्ये ष्टरच्स्यात्। कापवादः। षित्वं ङीषर्थम्। ह्रस्वा कासूः (अस्त्रविशेषः) कासूतरी। ह्रस्वा गोणी (काष्ठाम्बुवाहिनी)-गोणीतरी। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे (५-३-९१) एभ्यस्तनुत्वे द्योत्येष्टरच्स्यात्। यस्यगुणस्यभावाद्द्रव्ये शब्दनिवेशस्तस्यतनुत्वे प्रत्ययः। प्रथमवयावत्सस्तस्य तनुत्वेन द्वितीयं वयःप्राप्तः-वत्सतरः। तरुण उक्षा-तस्यतनुत्वेन तृतीयं वयः प्राप्तः-उक्षतरः। अश्वेनाश्वायामुत्पन्नोश्वस्तस्य तनुत्वेनान्यपितृकः-अश्वतरः (गर्दभवीजजः) अनड्वानृषभस्तस्य तनुत्वेन भारवहने मन्दशक्तिः-ऋषभतरः। किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् (५-३-९२) द्वयोरेकस्य (जातिगुणक्रियासंज्ञाभिः) निर्धारणे गम्ये किमादिभ्यः स्वार्थे डतरच्स्यात्। कतरो भवतोः कठः। कतरो युवयोः पटुः। यतरोस्तयोश्चैत्रः ततर आगच्छतु। कतरस्तयोः कारकः। महाविभाषया प्रत्ययाभावे यः कः सः। वा बहूनां जातिपरिप्रश्ने डतमच् (५-३-९३) बहूनामेकस्यनिर्धारणे गम्ये जातिपरिप्रश्नविषयेभ्यः किमादिभ्यो डतमच् वा स्यात्। जातिपरिप्रश्नइति प्रत्याख्यातमाकरे। कतमो भवतां कठः। यतम एषां पाचकस्ततम आगच्छतु। वाग्रहणादकजपि। यकः सकः। महाविभाषया कः यः सः। किमोस्मिन्विषये डतरजपि। एषां कतरो देवदत्तः। कतरो भवतां कठः। एकाच्च प्राचाम् (५-३-९४) एकशब्दात् डतरच् डतमच् प्रत्ययौः स्तः स्वविषये। एकतरो भवतोर्देवदत्तः। एकतमो भवतां देवदत्तः। विकल्पानुवृत्तेः प्राचां ग्रहणं पूजार्थम्। अवक्षेपणे कन् (५-३-९५) अवक्षिप्यते येन तदवक्षेपणम्। तत्र वर्तमानात्प्रतिपदिकात्कन्स्यात्। व्याकरणकेन नाम त्वं गर्वितः। याज्ञिक्यकेन नाम त्वं गर्वितः। येनेतरः क्षिप्यते तदिहोदाहरणम्, स्वतः कुत्सितं तु कुत्सिते इत्यस्य। तेनात्र पुरुषस्यैव कुत्सा न व्याकरणस्य।

वि. बह्वचो मनुष्यनाम्नष्ठज्वा (५-३-७८) अनुकम्पायां नीतौचतद्युक्ताद्बह्वचो मनुष्यनामधेयाद्वा ठच् स्यात्। घनिलचौ च (५-३-७९) पूर्वविषये घनिलचौ च स्तः। ठाजादावूर्ध्वं द्वितीयादचः (५-३-८३) अस्मिन्प्रकरणे यष्ठोऽ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जादिप्रत्ययस्तस्मिन्परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तः–देविकः, देवियः, देविलः, देवदत्तः। **चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः** (वा) अनुकम्पितो बृहस्पतिदत्तो-बृहस्पतिकः। **अनजादौ च विभाषा लोपो वक्तव्यः** (वा) देवदत्तकः देवकः। **लोपः पूर्वपदस्य च** (वा) दत्तिकः दत्तियः दत्तिलः दत्तकः। **विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्यः** (वा) देवदत्तः, दत्तः, देवः। सत्यभामा, भामा, सत्या। **जातिनाम्नः कन्** (५-३-८१) जातिशब्दो यो मनुष्यनामधेयभूतस्तस्मात्कन्स्यादनुकम्पायां नीतौ च। सिंहकः, शरभकः। रासभकः। **अजिनान्तस्योत्तरपदलोपश्च** (५-३-८२) अजिनान्मनुष्यनामधेयादनुकम्पायां कन्स्यादुत्तरपदलोपश्च। अनुकम्पितो व्याघ्राजिनो नाम व्याघ्रकः। अनुकम्पितः सिंहाजिनो नाम-सिंहकः।

प्रयोगविशेषाः—प्रेयसीविप्रयोगः। उत्तरेण प्रयाहि। जननीजन्मभूमिश्च स्वर्गादपि गरीयसी। अयमास्ते त्रिनाशम्भुस्तार्तीयीकंविलोचनम्। वलीयसी केवलमीश्वरेच्छा। प्रभातकल्पा शर्वरी। भूयसी दक्षिणेयम्। दक्षिणेन वृक्षवाटिकामालापइव श्रूयते।

प्रश्नाः—रूपप्-पाशप्-कल्पप्प्रत्ययाः केष्वर्थेषु, तरतमेष्ठन्नीयसुन्प्रत्ययाः केष्वर्थेषु इष्ठन्नीयसुनोः प्रकृतिषु विकाराः, क, कप्रत्ययः। केष्वर्थेषु पूरणार्थप्रत्ययेषु के विशेषाः संख्यावाचकेषु के प्रत्ययाः। उपरि उपरिष्टत् पश्चात् अधःपुर इति सिद्ध्यन्ति। अधस्तनवाक्यगतांस्तद्धितान्तानुपपादय-तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम्। वरीयानेष ते प्रश्नः लोकहितं नृप। तथापि शुश्रूषुरहंगरीयसीर्गिरोथवाश्रेयसि केन तृप्यते। एकं राशिंद्विधाकृत्वा चतुर्द्धोर्द्ध्वंपुनः कुरु। दृगन्छमर्त्यलोकम्। भूयिष्ठमासीदुपमेयकान्तिः। वंहीयसा दीप्तिवितानकेन। यवीयसीमुद्वहेत्। उपर्युपरिपश्यन्तः दरिद्रति। गरिष्ठं भोज्यमेतत्तु। महोच्चतां वत्सतरःस्पृशन्निव। तान्युञ्छषष्ठाङ्कितसैकतानि। वसाम्यहं कुटीरेस्मिन्।

इतिप्रागिवीयप्रकरणम्

तद्धितेषु स्वार्थिकप्रकरणम्—

इवे प्रतिकृतौ (५-३-९६) इवार्थे (सादृश्ये) वर्तमानात्प्रातिपदिकात्कन् स्यात् प्रतिकृतिरूपे उपमेये। अश्व इव प्रतिकृतिः-अश्वकः। एवं गर्दभकः, उष्ट्रकः। प्रतिकृतावित्युक्तेनेह गौरिव गवयः। **संज्ञायां च** (५-३-९७) इवार्थे गम्ये कन्स्यात्संज्ञायाम्। अप्रतिकृत्यर्थ आरम्भः। अश्वकः उष्ट्रकः करभकः (अश्वादिसदृशतया तन्नामकंकिञ्चित्)। **लुम्मनुष्ये** (५-३-९८) संज्ञायां विहितस्य कनो मनुष्येऽभिधेये लुप् स्यात्। चञ्चा (तृणमयःपुमान्) इव मनुष्यः चञ्चा। वर्ध्रिका (चर्ममयप्रतिकृतिः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इव मनुष्यः-वध्रिका। जीविकार्थे चापण्ये (५-३-९९) जीविकार्थं यदविक्रीयमाणं तस्मिन्वाच्ये कनो-
लुप्स्यात्। वासुदेवः शिवः स्कन्दः (वासुदेवादितुल्याजीविकार्था अविक्रेयाः प्रतिकृतयः)।
या: प्रतिमाः प्रतिगृह्य गृहाद्गृहंगत्वादेवलका भिक्षन्ते ताएता जीविकार्था अविक्रेयाः प्रतिकृतयः।
पण्येतु हस्तिकान् अश्वकान्विक्रीणीते। देवपथादिभ्यश्च (५-३-१००) इवेप्रतिकृतौ संज्ञायां च
विहितस्य देवपथादिभ्य उत्तरस्य कनो लुप्स्यात्। देवानां पन्था देवपथः, तस्य प्रतिकृतिः-देवपथः।
एवं हंसपथः। आकृतिगणोयम्।

टि. १ वृत्तौ विशेषः-अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिषु। अर्चासु शिवः
..., चित्रकर्मणि-अर्जुनः दुर्योधनः, ध्वजेषु-कपिः गरुडः सिंहः, इत्यादिषु देवपथादित्वात्कनो लोपः।

टि. २ प्रतिकृतिकन्विधिसूत्रभाष्यतदुदाहरणादिदर्शनेन देवमनुष्यपश्वादीनां तृणचर्मकाष्ठचित्रादिप्रतिकृति निर्माण
...काला दासीत्, तत्र हस्त्यादिप्रतिकृतयो विक्रेया अपि बभूवुः, तेषु कनाऽव्यवहारः। देवप्रतिमास्तु अपण्ये प्रत्ययलोप-
...केवलं या देवलकानामर्चन भ्रामण दर्शनादिना जीविकार्था आसन् नतु विक्रेया आसन्। तेषु कनोलोपेन-
...; यास्तु आयतनेषु अभ्युदय निःश्रेयसार्थं प्रतिष्ठाप्यन्ते च तासु चित्रकर्मध्वजगतासु प्रतिकृतिष्वपि देवपथादित्वेन
...न व्यवहार आसीत्, देवप्रतिमाविक्रयो निन्द्यआसीत्। उक्तं च रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो
...न धिक् धिक्। अस्मिन्पद्ये योऽप शब्दान्न वेत्ति व्यर्थप्रज्ञं पण्डितं तञ्च धिक्-धिक्॥ हस्तिकानित्यादिवद्रामकमित्यादे
...त्यत्वात्। अत्र भाष्यकृता "मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः इति तास्वभिधेयासु शिवःस्कन्दः विशाख
...किन्तु यास्त्वेताः सम्प्रति पूजार्थास्तासु भविष्यती"त्युक्ततया तदात्वे मौर्याः (पाटलिपुत्रीयाः अद्यत्वे जयपुरीयाइव)
...शिल्पवन्तोविक्रयिणोप्यासन्नित्यवगम्यते। अत्र "यास्तुविक्रीयन्ते तासु न (लोपः) शिवकान्विक्रीणीते" इति कैयटः,
...गृहे पूज्यन्ते शिष्टैस्तासु शिवाभेदबुद्धेः सत्वेन सादृश्यबुद्ध्यभावेन प्रत्ययस्यैवाभावः, एवं चित्रेष्वपि द्रष्टव्य-
...द्योतकारः।

शिलाया ढः (५-३-१०२) प्रतिकृताविति निवृत्तम्। अस्मादिवार्थे ढः स्यात्। योगविभागाढ्ढञ-
पीत्येके। शिलेव-शिलेयं शैलेयं दधि। शाखादिभ्यो यः (५-३-१०३) एभ्योयत्स्यादिवार्थे।
शाखेव-शाख्यः। मुखमिव-मुख्यः। एवं जघन-जघन्यः। शिरस्-शिरस्यः। अग्र-अग्र्यः। शरण-
शरण्यः। द्रव्यं च भव्ये (५-३-१०४) द्रुशब्दादिवार्थे यत् निपात्यते भव्येभिधेये। भव्य आत्मवान्
अभिप्रेतानामर्थानां पात्रभूत इतियावत्। द्रव्यमयं ब्राह्मणः। द्रव्यमसौ राजपुत्रः। कुशाग्राच्छः
(५-३-१०५) अस्मादिवार्थे छः स्यात्। कुशाग्रमिव-(सूक्ष्मा) कुशाग्रीया बुद्धिः कुशाग्रीयं (सूक्ष्मं)
शस्त्रम्। समासाच्च तद्विषयात् (५-३-१०६) इवार्थविषयात्समासादपरस्मिन्निवार्थे छः स्यात्।
काकागमनं तालपतनमिव काकतालम्। अतएव ज्ञापकादिवार्थे समासः। काकतालीयमिव काक-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तालीयम् । काकतालसमागमसदृशः धनिचोरादिसमागमः, नायकनायिकादिसमागमो वा समासार्थः । तत्प्रयुक्तः तालपतनजनितकाकमरणसदृशः चोर जनितधनिकादि मरणं काकहृततालफलोपभोगसदृशं नायककृतनायिकोपभोगादि वा प्रत्ययार्थः । अतार्कितोपनत इतिफलितोऽर्थः। एवम्-अजाकृपाणीयः । अन्धकवर्तकीयम् ।

वि. **शर्करादिभ्योऽण्** (५-३-१०७) एभ्य इवार्थेऽण् स्यात् । शर्करेव-शार्करम् । कपालिकेव-कापालिकम् । पिष्टिकेव-पैष्टिकम् । सिकतेव-सैकतम् । **अंगुल्यादिभ्यष्ठक्** (५-३-१०८) एभ्य इवार्थे ठक्स्यात् । अङ्गुलीव-आङ्गुलिकः । मण्डलमिव–माण्डलिकः । शष्कुलमिव-शाष्कुलिकः । **पूगाञ्ञ्योऽग्रामणीपूर्वात्** (५-३-११२) इवार्थोनिवृत्तः । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः । पूगवाचकात्स्वार्थे ञ्यः स्यात् । लोहितध्वजः पूगः-लौहित्ध्वज्यः। शिविपूगः–शैव्यः । **आयुधजीविसङ्घाञ्ञ्यड् वाहीकेष्वब्राह्मणराजन्यात्** (५-३-११४) वाहीकेषु य आयुधजीविसङ्घस्तद्वाचकाद्ब्राह्मणराजन्यवर्जितात्स्वार्थे ञ्यट् स्यात् । क्षुद्रक सङ्घ -क्षौद्रक्यः । मालवसङ्घः-मालव्यः । **पर्श्वादियौधेयादिभ्योऽणञौ** (५-३-११७) पर्श्वादिभ्यो यौधेयादिभ्यश्च आयुधजीविसङ्घवाचिभ्यः स्वार्थेऽणञौ स्तः । पर्शु–पार्शवः । असुर–आसुरः । यौधेय-यौधेयः । उशीनर–औशीनरः । **ञ्यादयस्तद्राजाः** (५-३-११६) पूगाञ्ञ्य इत्यारभ्योक्तास्तद्राजसंज्ञाः स्युः । तेनास्त्रियां बहुषु लुक् । लोहितध्वजाः। शिवयः । क्षुद्रकाः । मालवाः । पर्शवः । असुराः । यौधेयाः । उशीनराः । **पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च** (५-४-१) पादकशतान्तस्य संख्यादेर्वीप्सायां द्योत्यायां वुन्स्यादन्तस्य लोपश्च । तद्धितार्थेति समासे कृते प्रत्ययः । वुन्नन्तं स्त्रियाम् । द्वौ द्वौ पादौ ददाति-द्विपदिकाम् । पत् । द्वे द्वे शते ददाति-द्विशतिकाम् । **पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्** (वा) द्विमोदकिकाम् । **दण्डव्यवसर्गयोश्च** (५-४-२) अनयोरप्यभिधेययोर्वुन्स्यात् । अवीप्सार्थमिदम् । द्वौपादौ-द्विपदिकां दण्डितः । द्वे शते द्विशतिकां व्यवसृजति (ददाति)। **स्थूलादिभ्यः प्रकारवचने कन्** (५-४-३) एभ्यः प्रकारार्थे द्योत्ये कन्स्यात् । जातीयरोपवादः । स्थूलप्रकारः स्थूलकः । एवम्-अणु-अणुकः । माष-माषकः । मणि-मणिकः । **बृहत्या आच्छादने** (५-४-६) आच्छादने वर्तमानादस्मात्स्वार्थे कन्स्यात् । बृहतिका (प्रावरणम्) अन्यत्र तु बृहती छन्दः । **अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः** (५-४-७) एभ्यः स्वार्थे खः स्यात् । अविद्यमानानि षट् अक्षीणि यस्य-अषडक्षः, बहुव्रीहौसक्थ्यक्ष्णोरितिषच् । स एव अषडक्षीणः मन्त्रः (विचारः) द्वाभ्यामेवकृतः । आशिता गावो यस्मिन्–आशितङ्गवीनम् अरण्यम् । निपातनान्मुम् । अलङ्कर्मणे–अलङ्कर्मीणः । अलंपुरुषाय-अलम्पुरुषीणः । राजाधीनः राजाधीनः ईश्वराधीनः शौण्डादित्वादधिशब्दस्य समासः । नित्योयं खः । **विभाषाञ्चेरदिक्स्त्रियाम्** (५-४-८) अदिक्स्त्रियां वर्तमानादञ्चत्यन्तात्स्वार्थे खो वा स्यात् । प्राक्-प्राचीनम्। अवाक्-अवाचीनम् । **जात्यन्ताच्छ बन्धुनि** (५-४-९) बन्धुनिवर्तमानाज्जात्यन्तात्स्वार्थे छः स्यात् । ब्राह्मणजातीयः क्षत्रियजातीयः वैश्यजातीयः । जातेर्व्यञ्जकं द्रव्यं बन्धुः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[स्था]नान्ताद्विभाषा सस्थानेनेति चेत् (५-४-१०) स्थानान्ताद्वा छः स्यात् सस्थानेन (तुल्येन) स्थानान्तमर्थवत्
[चे]त्। पितातुल्यः-पितृस्थानीयः पितृस्थानः। एवं मातृस्थानीयः मातृस्थानः।
संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् (५-४-१७) अभ्यावृत्तिर्जन्म। क्रियाजन्मगणने वर्तमा-
[न]भ्यः संख्याशब्देभ्यः स्वार्थे कृत्वसुच्स्यात्। पञ्चवारान्-पञ्चकृत्वः भुङ्क्ते। एवं सप्तकृत्वो ददाति। दश-
[कृ]त्वः पश्यति। संख्याया इत्युक्तेर्नेह-भूरिवारान्भुङ्क्ते। अभ्यावृत्तिग्रहणान्नेह-पञ्चपाकाः,दशपाकाः।
द्वित्रिचतुर्भ्यः सुच् (५-४-१८) एभ्यः सुच्स्यात्पूर्वविषये। कृत्वसुचोऽपवादः। द्विः भुङ्क्ते। त्रिः
[प]श्यति। चतुः पश्यति। रात्सस्येति सलोपः। एकस्य सकृच्च (५-४-१९) एकशब्दस्य सकृदा-
[दे]शः स्यात्सुच्प्रत्ययश्च क्रियागणने। सकृत् भुङ्क्ते। संयोगान्तस्येति सुचः सस्यलोपः, नतु
हल्ङ्याब्भ्य इति। अभैत्सीदित्यत्र सिचइव सुचोपि तेनाग्रहणात्। विभाषा बहोर्धाऽविप्रकृष्टकाले
(५-४-२०) क्रियाभ्यावृत्तिगणने वर्तमानद्बहोर्धा वा स्यात् क्रियाभ्यावृत्तय आसन्नकालाश्चेत्। पक्षे
[कृ]त्वसुच्। बहुधा दिवसस्य भुङ्क्ते। बहुकृत्वो वा। विप्रकृष्टकालत्वे तु कृत्वसुजेव,बहुकृत्वोमासस्य
भुङ्क्ते। मासस्येत्यादौ शेषे षष्ठी। कृत्वोर्थप्रयोग इति अधिकरणे वा षष्ठीतिहरदत्तोक्तिस्तु नयुक्ता-
[क]र्तृकर्मणोः समासनिवृत्तिफलकतया तिङन्तेनोदाहरणमिति प्रोक्तनिष्कर्षविरोधात्। तत्प्रकृतवचने
मयट्(५-४-२१)प्राचुर्येण प्रस्तुतं प्रकृतं,तस्यवचनं प्रतिपादनम्। भावेऽधिकरणे वा ल्युट्। तत्र वर्तमानात्
[प्रथ]मान्तात्स्वार्थे मयट् स्यात्। भावार्थपक्षे—प्रकृत (प्रचुर) मन्नम्-अन्नमयम्। प्रचुरोपूपः-अपूप
[मयः]। प्रचुरा यवागूः-यवागूमयी। अधिकरणार्थपक्षे-अन्नं प्रचुरमस्मिन्-अन्नमयः यज्ञः। अपूपं
[प्र]चुरोस्मिन्-अपूपमयं पर्व। यवागूः प्रचुरास्मिन्-यवागूमयं पथ्यम्। आद्ये प्रकृतिवल्लिङ्गं, द्वितीये-
[वि]शेष्यनिघ्नता। स्त्रियां टित्वात् ङीप्। समूहवच्च बहुषु (५-३-२२) बहुषु प्रकृतेषूच्यमानेषु समूहव-
[त्प्र]त्ययाः स्युश्चान्मयट्। आद्येर्थे मोदकाः प्रचुराः- मौदकिकम् अचित्तहस्तिधेनोरिति सामूहिक-
[ष्ठ]क्। शाष्कुलयः प्रचुराः- शाष्कुलिकम्। शष्कुलीमयम्। क्लीबत्वं लोकात्। द्वितीयेर्थे मौदकिकः
[मो]दकमयः, शाष्कुलिकः शष्कुलीमयः यज्ञः। अनन्तावसथेतिहभेषजाञ्ञ्यः (५-४-२३) एभ्यः स्वार्थे
[ञ्य]ः स्यात्। अन्तस्याभावः अनन्तः, अनन्त एव-आनन्त्यम्। आवसथ (गृहं) एव-आवसथ्यम्।
[इ]तिहेतिनिपातसमुदाय उपदेशपारम्पर्ये। इतिह एव-ऐतिह्यम्। भेषज (औषधं) मेव-भैषज्यम्।
[दे]वतान्तात्तादर्थ्ये यत् (५-४-२४) चतुर्थ्यन्तात्तादर्थ्ये यत्स्यात्। अग्निदेवतायै इदम्-आग्निदेवत्यम्।
[ए]वं वायुदेवत्यम्। इन्द्रदेवत्यम्। पितृदेवत्यम्। पादार्घाभ्यां च (५-४-२५) आभ्यां तादर्थ्ये
[य]त्स्यात्। पादार्थमुदकं-पाद्यम्। अर्घार्थमुदकम्-अर्घ्यम्। अर्घः पूजा। नवस्य नू आदेशः त्नप्तनप्
[ख]श्चप्रत्ययाः वक्तव्याः (वा) नवमेव--नूत्नम्, नूतनम् नवीनम्। खस्येनादेशे आद्गुणेऽवादेशः।
[प्र]स्य पुराणे भात् (वा) पुरार्थे वर्तमानात्प्रशब्दान्नो वक्तव्यः, चात्पूर्वोक्ताः। प्रणम्, प्रत्नम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतनम्, प्रीणम्। **भागरूपनामभ्यो धेयः** (वा) भागधेयम्। रूपधेयम्। नामधेयम्। आग्नीध्र धारणादुञ् (वा) अग्नीधः शरणमाग्नीध्रम्, तदेव आग्नीध्रम्। समानं धारणमस्य-साधारणमनेकं प्रत्यविशिष्टसम्बन्धम्, पृषोदरादित्वात्समासस्य सः। निपातनादादिवृद्धिः तदेव साधारणम्, स्त्रियामञन्तत्वान्ङीप् आग्नीध्री। साधारणी। वा प्रकरणादञोऽभावे टापि आग्नी शाला। साधारणा भूः। **अतिथेर्ञ्यः** (५-४ २६) अस्मात्तादर्थ्ये ञ्यः स्यात्। अतिथये इदम्-आतिथ्यम्। **देवात्तल्** (५-४-२७) तादर्थ्ये इतिनिवृत्तम्। अस्मात्स्वार्थे तल्स्यात्। देव एव-देवता। **अवेः कः** (५-४-२८) अवेः स्वार्थे कः स्यात्। अविरवे-अविकः। (मेषः)। **यावादिभ्यः कन्** (५-४- एभ्यः स्वार्थे कन्स्यात्। याव एव-यावकः (अलक्तकः)। एवं–मणिकः। अस्थिकः। ऋतावुष्ण (गण) उष्णकः शीतकः ऋतुः। **पुत्र कृत्रिमे** (गण) पुत्रकः कृत्रिमपुत्रः। कुमारि क्रीडनकम्।

वि. लोहितान्मणौ(५-४-३०)लोहितात्कन्स्यान्मणौ वाच्ये। लोहितोमणिः-लोहितकः। वर्णे चानित्ये(५-४ अनित्यवर्णबोधकाल्लोहितात्कन्स्यात्। लोहितकः कोपेन। **रक्ते** (५-४-३२)। लाक्षादिरक्तवाचिनो लोहिता न्स्यात्। लोहितकः कम्बलः। लोहितकः पटः। **कालाच्च** (५-४-३३) अनित्ये रक्ते च वर्तमानात्कालशब्दा न्स्यात्। अनित्ये-कालकं मुखं लज्जया। रक्ते-कालकः पटः। कालिका शाटी। **विनयादिभ्यष्ठक्** (५-४ एभ्यः स्वार्थे ठक्स्यात्। विनय एव-वैनयिकः। समय एव-सामायिकः। उपाय एव-औपयिकः। वाचो व्याहृतार्था (५-४-३५) सन्दिष्टार्थाया वाचि विद्यमानाद्वाक्छब्दात्स्वार्थे ठक्स्यात्। सन्देशवाक्–वाचिकम्। तद्युक्तात्कर्मणो (५-४-३६) सन्दिष्टार्थवाचा प्रयुक्तं यत्कर्मतदभिधायिनः कर्मशब्दात्स्वार्थेऽण् स्यात्। कर्मैव–कार्मणम् वाचिकं क्रियमाणं कर्मेत्यर्थः।

ओषधेरजातौ (५-४ ३७) जातौ अवर्तमानादोषधिशब्दात्स्वार्थे अण् स्यात्। ओषधिरेव-औषधं पिबति। औषधं ददाति। जातौ तु न-ओषधयः (शाल्यादयः) क्षेत्रेरूढाः। प्रज्ञादिभ्य (५-४-३८) एभ्यः स्वार्थेऽण्स्यात्। प्रज्ञ एव-प्राज्ञः। प्राज्ञी स्त्री। यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा प्रज्ञाश्रद्धार्चेति णे टाप्। एवं-देवता-दैवतम्। बन्धु बान्धवः। चोर-चौरः। रक्षस्-राक्षसः। वयस्-वायसः। मरुत्-मारुतः। वणिज्-वाणिजः। मनस्-मानसम्। **मृदस्तिकन्** (५-४-३९) मृच्छ ब्दात्स्वार्थे तिकन्स्यात्। मृदेव मृत्तिका। **सस्नौ प्रशंसायाम्** (५-४-४०)प्रशस्तार्थे वर्तमानान्मृदः सस्नौ स्तः। प्रशस्ता मृद्-मृत्सा, मृत्स्ना, नित्यश्चायं प्रत्ययः उक्तसूत्रेऽन्यतरस्यां ग्रहण

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् (५-४-४२) बह्वर्थादल्पार्थात्कारकाभिधायिनः शस्वा स्यात्। बहूनि ददाति बहुशो ददाति। अल्पं ददाति अल्पशो ददाति। एवं भूरिशो ददाति। स्तोकशो ददाति। कारकान्तरेष्वपि-बहुभ्यः–बहुश आगच्छति। अल्पेषु-अल्पशोनिधेहि। संख्यैकवचनाच्च वीप्सायाम् (५-४-४३) संख्यावाचकादेकत्वविशिष्टार्थवाचकाच्च कारकाभिधायिनो वीप्सायां शस् वा स्यात् नित्यवीप्सयोरितिद्वित्वे प्राप्ते तदपवादः शस्विधिः। द्वौ द्वौ-द्विशो ददाति। त्रीणि त्रीणि-त्रिशो ददाति। एकवचनात्-माषं माषं-माषशो ददाति। एवं–प्रस्थं प्रस्थं-प्रस्थशः। कार्षापणं कार्षापणं-कार्षापणशः। अवीप्सायां न द्वौ ददाति। कारकादित्येव नेह-द्वयोर्द्वयोः स्वामी।

वि. १ प्रथमे शस्विधाने–बह्वल्पार्थान्मङ्गलामङ्गलवचनम् इतिवार्तिकम्। आभ्युदयिकेषु कर्मसु बहुदानमनिष्टेषु-अल्पदानं मङ्गलं, तद्विपरीतममङ्गलम्। यत्र मङ्गलंगम्यते तत्रायंप्रत्यय इष्यते। बहुशोददात्याभ्युदयिकेषु, अल्पशोद-दात्यनिष्टेषु। वैपरीत्यान्नेह-बहूनिददात्यनिष्टेषु अल्पंददात्याभ्युदयिकेषु। तत्रामङ्गलेप्रत्ययाभावाद्वार्तिकेऽमङ्गलग्रहणंवृथे-ति। प्रायिकंचैतन्मङ्गलवचनमन्यत्रापि दृश्यते, अपेतापोढमुक्तपतितापत्रस्तैरल्पशइति, कारकत्वंत्वत्र समसनक्रियांप्रति-कर्मत्वात्तदभिधायकत्वाच्चाल्पशब्दस्य तथाच व्याख्या अल्पा च पञ्चमी समस्यते आचार्येणेति।

वि. २ द्वितीये शस्विधाने एकवचनमिति एकत्वविशिष्टस्यैवार्थस्य वाचकमित्यर्थः नत्वेकवचनान्तमिति अन्यथा घटं ददातीत्यादावपि शस्प्रसङ्गात्। तेनसमासादिवृत्तावेकत्वविशिष्टस्यैववाचकाशब्दा एकवचनशब्देन विवक्षिताः तादृशा-स्तिङाशब्दा एव, तेहि वृत्तावेकार्थाएव घटादयस्तु नतथा, घटदानेत्यादौ घटानां दानेत्यर्थस्यापिप्रत्येतुंशक्यत्वात्। घटशब्दस्य एकानेकसाधारणत्वात्। एतच्च जयादित्यमतेन। वामनमतेतु शश्शसोः शिरितिसूत्रे जससहचरितस्य शसो ग्रहणादिह नभवति कुण्डशोददाति वनशोददातीतिनिर्देशाज्जातिशब्दोपि यदा प्रकरणादिनावृत्तावेकार्थो भवति तदाभवत्येव शस्त्रियमितिविशेष.। शसो द्विर्वचनापवादत्वेन सुपः इति सूत्रव्याख्यायां एकैकश इति द्विर्वचनशसोः सह प्रयोगस्तु आर्षः एकैकशस्तदपथः कुर्वन्नीतिहरदत्तः प्रामादिक इतिमनोरमायाम्। वस्तुतस्तु एकैकमेवेति स्वार्थे शस् नतुवीप्सायाम्। एकां गा-मेकशः सहस्रकृत्वोदत्वा इतिप्रत्याहाराह्निकभाष्योक्तेः। अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। सहस्रशः समेतानां परिषत्वं नविद्यते इत्यत्रतु सहस्रं सहस्रं ये समवेतास्तेषामपि परिषत्त्वं नेत्यर्थेन समवायक्रियांप्रति कर्तृत्वस्य सत्वाच्च सत्वेन शसउपपत्तिः। एवमन्यत्रापि इतिविशेषोनुसन्धेयः।

प्रतियोगे पञ्चम्यास्तसिः (५-४-४४) कर्मप्रवचनीयेन प्रतिनायोगे या पञ्चमी तदन्तात्तसिः स्यात्। प्रद्युम्नः कृष्णतः प्रति (कृष्णस्यप्रतिनिधिः)। एवम् अभिमन्युरर्जुनतः प्रति। वाकारानुवृत्तेः पक्षे कृष्णात्, अर्जुनात् प्रति। आद्यादिभ्य उपसंख्यानम् (वा) सार्वविभक्तिकोयं तसिः। आदौ-आदेः-आदितः। एवं मध्यतः अन्ततः पार्श्वतः पृष्ठतः। आकृतिगणोयम्। मन्त्रोहीनः स्वरतो-वर्णतो वा (स्वरेण; वर्णेन)। अपादाने चाहीयरुहोः (५-४-४५) अपादाने पञ्चम्यास्तसिर्वा स्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दहीयरुहोः। ग्रामात्, ग्रामत आगच्छति। चोरात्, चोरतो बिभेति। अध्ययनात्, अध्ययनतः पराजयते। अहीयरुहोरित्युक्तयानेह-सार्थाद्धीयते। पर्वतादवरोहति।

वि. अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः (५-४-४६) अतिक्रम्यग्रहोतिग्रहः, अव्यथनमचलनम्, क्षेपो निन्दा। अतिग्रहादेरकर्तरि तृतीयान्तात्तसिः स्यात्। चारित्रेण-चरित्रतोऽतिगृह्यते (चारित्रेणान्यानतिक्रम्य वर्तते) वृत्तेन-वृत्ततो न व्यथते (वृत्तेन न चलति)। वृत्तेन-वृत्ततःक्षिप्तः (वृत्तेन निन्दितः)। हीयमानपापयोगाच्च (५-४-४७) हीयमान-पापयुक्तादकर्तरितृतीयान्ताद्वा तसिः स्यात्। वृत्तेन-वृत्ततो हीयते। वृत्तेन-वृत्ततः पापः। क्षेपस्याविवक्षायामिदम्। षष्ठ्या व्याश्रये (५-४-४८) षष्ठ्यन्ताद्वा तसिःस्यान्नानापक्षसमाश्रये। देवा अर्जुनतोभवन्। आदित्याः कर्णतोभवन् (अर्जुनस्य कर्णस्य पक्षे)। रोगाच्चापनयने (५-४-४९) रोगवाचिनः षष्ठ्यन्ताद्वा तसिः स्याच्चिकित्सायाम्। प्रवाहिकातः (प्रवाहिकायाः प्रतीकारं) कुरु। कासतः (कासस्य प्रतीकारं) कुरु। एवं प्रच्छर्दिकातः कुरु।

कृभ्वस्तियोगे संपद्यकर्तरि च्विः (५-४-५०) अभूततद्भाव इति वक्तव्यम् (वा) कारणस्य विकाररूपेणाभूतस्यतदात्मनाभावोऽभूततद्भावः, संपद्यतेः कर्ता संपद्यकर्ता। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्संपद्यकर्तुःस्वार्थे च्विः स्यात्कृभ्वस्तिभिर्योगे। अस्य च्वौ (७-४-३२) अवर्णस्य ईत्स्यात् च्वौ। वेरपृक्तस्येति वेर्लोपः च्व्यन्तादव्ययत्वम्। अकृष्णः कृष्णः सम्पद्यते तं करोति कृष्णीकरोति। अब्रह्म ब्रह्म यथा सम्पद्यते तथाभवति-ब्रह्मीभवति। अगङ्गा गङ्गा यथा सम्पद्यते तथा स्यात्-गङ्गीस्यात्। एवं मृदं घटीकरोति। मृद्घटी भवति, घटी स्यात्। श्वेतं नीली करोति। मृदु कठिनीकरोति। अव्ययस्य च्वावीत्वं नेति वाच्यम् (वा) अदोषा दोषा सम्पद्यते-तथाभूतं-दोषाभूतमहः। अदिवा दिवा सम्पद्यते तथाभूता-दिवाभूता रात्रिः। क्यच्व्योश्च (६-४-१५२) हलः परस्यापत्ययकारस्य लोपः स्यात्क्ये च्वौ च परतः। अगार्ग्यः गार्ग्यः सम्पद्यते तथा भवति-गार्गीभवति। यञन्ताच्च्वौ यकारलोपे ईत्वे वेर्लोपः। ईकारेण व्यवधानादापत्यस्यचेति, तस्येत्यर्थवत्वेविधानात् हलस्तद्धितस्येति च यस्य लोपासम्भवादेतल्लोपविधानम्। च्वौ च (७-४-२६) च्वौ परे पूर्वस्य दीर्घः स्यात्। अशुचिः शुचिः संपद्यते तथा भवति—शुचीभवति। एवं मृदु-मृदूकरोति। लघु-लघूकरोति। अमाता माता सम्पद्यते तथा भवति-मात्रीभवति। रीङृतः इति रीङादेशः। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च (५-४-५१) एषामन्तलोपः स्याच्च्विश्च। अनररुः सम्पद्यते तं करोति-अरूकरोति। अन्तसकारलोपे च्वावित्युकारस्य दीर्घः। अनुन्मनाः सम्पद्यते तथाभूतः-उन्मनीभूतः। एवम् उच्चक्षुस्-उच्चक्षूकरोति। उच्चेतस्-उच्चेती करोति। विरहस्-विरही करोति (विजनी करोति) विरजस्-विरजीकरोति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि. अभूततद्भावइति प्रकृतेविकाररूपेण सम्पत्तिरिति लभ्यते, तत्रविकारवाचकादेवप्रत्ययो नतुप्रकृतिवाचकात् [illegible]स्थानात्। प्रकृतेरवस्थान्तरसम्पत्तिरेवाविकारस्तेनप्रकृतेर्विकारात्मनासम्पत्तिः। कृष्णीकरोतीत्यत्र अकृष्णो नटःप्रकृति [illegible]रूपविकारात्मना सम्पद्यते प्रकृतेरभेदारोपेण विकारः सम्पद्यकर्ता भवतीति तस्माच्च्विः। कृभ्वस्तियोगएव च्विः [illegible] शुक्लो जायते। समीपीभवति अभ्याशीभवति अन्तिकीभवतीत्यत्र न ह्यसमीपंसमीपं भवति किंतर्हि असमीपस्थं [illegible]स्थं भवतीतिच्वेरुपपत्तये समीपादिभ्यउपसंख्यानमिति पठित्वा तात्स्थ्यात्ताच्छब्द्यं भविष्यतीति वार्तिकंविनापि [illegible]सिद्धिर्दर्शिता।

विभाषा साति कार्त्स्न्ये (५-४-५२) च्विविषये सातिर्वा स्यात्साकल्ये गम्ये। यदि प्रकृतिः कृत्स्नां विकारात्मतामापद्यते तदा सातिर्विकल्पेन भवति, पक्षे च्विः, महाविभाषया वाक्यमपि। सात्पदाद्योः (८-३-१११) सातेरवयवस्य पदादेश्च सस्य षत्वं न स्यात्। इण्कुभ्यांपरस्य सातेः सस्य आदेश-प्रत्यययोरिति षत्वे प्राप्ते निषेधः। कृत्स्नं शस्त्रमनग्निरग्निः सम्पद्यते–अग्निसात् भवति अग्नी-भवति। कृत्स्नं लवणमनुदकमुदकं सम्पद्यते–उदकसात् भवति, उदकीभवति। एवं भस्मसा-द्भवति, भस्मीभवति काष्ठम्। धूलिसाद्भवति धूलीभवति गृहम्। भस्मसात्करोति भस्मीकरोति काष्ठम्। कार्त्स्न्येन विकृत्यभावेतु च्विरेव। एकदेशेन पटः शुक्लीभवति। अभिविधौ सम्पदा च (५-४-५३) अभिविधिर्व्याप्तिः। सम्पदा कृभ्वस्तिभिश्च योगे च्विविषये सातिर्वास्यादभिविधौ-गम्यमाने। पक्षे कृभ्वस्तियोगे च्विः, सम्पदायोगेतु वाक्यमेव। अग्निसात्सम्पद्यते, अग्निसा-द्भवति, अग्नीभवति शस्त्रम्। उदकसात्सम्पद्यते लवणम् (प्रथमा) उदकसात्करोति, उदकीकरोति लवणम् (द्वितीया)। एकस्या व्यक्तेः सर्वावयवावच्छेदेनान्यथा भावः कार्त्स्न्यम्, बहूनां व्यक्तीनां किञ्चिदवयवावच्छेदेनान्यथाभावोऽभिविधिरित्यनयोर्विशेषः। यथा वर्षासु सर्वं लवणमुदक-सात्सम्पद्यते, दावाग्निना सर्वं वनं भस्मसात्सम्पद्यत इत्यभिविधिः, करीषं भस्मसाद्भवति, लोह-मग्निसात्करोतीति कार्त्स्न्यम्। तदधीनवचने (५-४-५४) अभूततद्भाव इतिनिवृत्तम्। तदधीने (तत्स्वामिके)ऽभिधेये स्वामिविशेषवाचकात्सातिः स्यात्कृभ्वस्तिभिः सम्पदा च योगे। विप्राधीनं करोति-विप्रसात्करोति। राजाधीनं सम्पद्यते राजसात्सम्पद्यते। ब्राह्मणसाद्भवति। देये त्रा च (५-४-५५) तदधीने देयेऽभिधेये त्रा स्यात्सातिश्च कृभ्वादियोगे। ब्राह्मणादिभ्यो देयं यदा समर्प्य तदधीनं क्रियते तदायं त्रा प्रत्ययः सातिश्च। ब्राह्मणाधीनं देयं करोति-ब्राह्मणत्रा करोति ब्राह्मण-सात्करोति। विप्रत्रा सम्पद्यते विप्रसात्क्रियते। देवत्रा करोति, देवसात्करोति हविः। देय इत्यु-क्तत्वानेह—त्रा किन्तुसातिरेव-राजसाद्भवति राष्ट्रम्। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यो-र्बहुलम् (५-४-५६) सातिर्निवृत्तस्त्रानुवर्तते, कृभ्वस्तिभिरिति नसम्बद्ध्यते-स्वार्थे सामान्यविधिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयासप्तम्यन्तेभ्यो देवादिभ्यस्त्रा बहुलं स्यात्। देवान्-देवत्रा वन्दे। देवेषु-देवत्रा रमे। मनुष्यत्रा पुरुषत्रा, पुरु (वहु) त्रा, मर्त्यत्रा। बहुलोक्तेरन्यत्रापि बहुत्रा जीवतोमनः (जीवतो जन... मनो बहुषु विषयेषु गच्छति)। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् (५-४-५७) यत्र ध्वनौ वर्णा विस्पष्टं न व्यज्यन्ते सोऽव्यक्तस्तस्यानुकरणम्। द्व्यच्-अवरं न्यूनं न तु ततोन्यूनम् अनेकाजिति यावत् तादृशमर्धं यस्य तस्मादनितिपरात् डाच्स्यात्कृभ्वस्तिभिर्योगे। डाचि विवक्षिते द्वे बहुलम् नित्यमाम्रेडिते डाचीति वक्तव्यम् (वा) डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पर... स्यादित्यर्थः। डाचिविवक्षिते अव्यक्तानुकरणस्य पटत् शब्दस्य द्विर्वचने डाचि पटत् पटत् आ कृ... तिस्थितौ पूर्वपरयोस्तकारपकारयोः पकारे डित्वाट्टिलोपे पटपटा करोति। एवं चटत्-चट... भवति। झणत्-झणझणा करोति। घरटत्-घरटघरटा करोति। अव्यक्तेत्युक्त्या नेह-ईषत्करोति... द्व्यजवरार्धेत्युक्तेर्नेह श्रत्करोति। इतिशब्दपरत्वान्नेह पटिति-करोति। अव्यक्तानुकरणस्य इतावितिपररूपम्। सुखप्रियादानुलोम्ये (५-४-६३) आभ्यां कृञो योगे डाच्स्यादानुलोम्ये गम्ये आनुलोम्यमनुकूलता, आराध्य चित्तानुवर्तनम्। सुखाकरोति प्रियाकरोति गुरुम् (अनुकू... चरणेनानन्दयति)। दुःखात्प्रातिलोम्ये (५-४-६४) अस्मात्कृञो योगे डाच्स्यात्प्रातिलोम्ये गम्ये। दु... करोति स्वामिनम् (स्वामिनश्चित्तं पीडयति)। शूलात्पाके (५-४-६५) अस्मात्पाकेविषये कृञो यो... डाच्स्यात्। शूलाकरोति मांसम् (शूलेन पचति)। करोतिःपाकार्थे। अन्यत्र तु शूलं करो... कदन्नम्। सत्यादशपथे (५-४-६६) अस्मादशपथे कृञो योगे डाच्स्यात्। सत्या करोति भा... वणिक् (क्रेतव्यमिति तथ्यं करोति)। शपथेतु न सत्यं करोति विप्रः (शपथं करोति)। मद्रात्परिवा... (५-४-६७) मद्रशब्दो मङ्गलार्थः परिवापणं मुण्डनम्। अस्मात्परिवापणे कृञो योगे डाच्स्यात्। म... करोति (माङ्गल्यमुण्डनेन संस्करोति)। भद्राच्चेति वक्तव्यम् (वा) भद्रा करोति (अर्थः प्राग्व... परिवापणइत्युक्त्या नेह-मद्रं करोति भद्रं करोति।

वि. कृञो द्वितीयतृतीयशम्बबीजात्कृषौ (५-४-५८) द्वितीयादिभ्यो डाच्स्यात् कृञो योगे कर्षणे। बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम्। द्वितीयं तृतीयं कर्षणं करोति द्वितीया करोति, तृतीया करोति। शम्ब... प्रतिलोमे। अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति-शम्बा करोति। बीजेन सह कर्षति-बीजा करोति। संख्यायाश्च गुणान्तायाः (५-४-५९) गुणान्तसंख्यायाः कृञो योगे कृषौ डाच्स्यात्। द्विगुणा करोति त्रिगुणा करोति क्षेत्रम् (... कर्मकं द्विगुणं त्रिगुणं कर्षणं करोति)। समयाच्च यापनायाम् (५-४-६०) कृषाविति निवृत्तम्। समयात्... कृञोयोगे डाच्स्यात्। समया करोति (कालं यापयति) सपत्रनिष्पत्रादतिव्यथने (५-४-६१) आभ्यामतिव्य...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...गे डाच्स्यात्। सपत्रा करोति मृगम् (सपुङ्खशरप्रवेशेन सपत्रं करोति)। निष्पत्रा करोति। (सपुङ्खशरस्यापरपार्श्व-...निष्पत्रं करोति)। **निष्कुलान्निष्कोषणे** (५-४-६२) अस्मान्निष्कोषणे कृञो योगे डाच्स्यात्। निष्कोषणमन्त-...नां बहिःकरणम्। निष्कुला करोति दाडिमम् (निर्गतमन्तरवयवानां कुलं समूहोयस्मात्तथाकरोति)।

इतिस्वार्थिकप्रकरणम्।

...प्रकरणम्

सर्वस्य द्वे (८-१-१) अधिकारोयं पदस्येत्यतः प्राक् नित्यवीप्सयोरित्यादिषु-सर्वस्य स्थाने द्वे भव-त इत्युपतिष्ठते। शब्दतश्चार्थतश्चान्तरतमे द्वे। एकस्य पचत्यादिशब्दस्य द्वौपचत्यादिशब्दौ भवतः। **तस्य परमाम्रेडितम्** (८-१-२) द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात्। **नित्यवीप्सयोः** (८-१-४) आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्। नित्यवीप्से प्रकृतिगम्ये द्विर्वचनं तु द्योतकम्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषुच। पचतिपचति (पुनः पुनः पचति)। भुक्त्वाभुक्त्वा (पुनः पुनर्भुक्त्वा)। वीप्सा सुप्सु। वृक्षंवृक्षं (कृत्स्नं वृक्षं) सिञ्चति। ग्रामोग्रामो (कृत्स्नोग्रामः) रमणीयः। जातोजातो निधनमुपैति। रक्तंरक्तं सुन्दरम्।

नि. नित्यमाभीक्ष्ण्यं पौनःपुन्यमितियावत्, तच्च क्रियानिष्ठोधर्मः तेन तद्योतकं द्विर्वचनं क्रियाप्रधानस्यैव न्याय्यम्, ...क्ष्णोभावे इति वक्ष्यमाणत्वादव्ययकृदन्तमपि,तेन नित्ये द्विरुक्तिस्तेष्वेव। व्याप्तुमिच्छावीप्सा, सा च प्रयोक्तुर्धर्मः। ...नानाभूतार्थ (सिद्धपदार्थ) वाचिनां शब्दानां यानि वाच्यरूपाण्यधिकरणानि तेषां क्रियागुणाभ्यां युगपत्प्रयोक्तु-...च्छा वीप्सा। सा च कात्स्न्र्ये पर्यवसन्नाजगद्गतयावद्वृक्षसेचनस्वेरशक्यतया विवक्षितोपवनगतवृक्षादिकात्स्न्र्ये ...ते, तदेवकात्स्न्र्यं द्विरुक्त्या द्योत्यते, तेन वीप्सा द्विरुक्तिः सुबन्तेषु सिद्धार्थेषु।

परेर्वर्जने (८-१-५) परीत्यस्य वर्जनार्थे द्वे भवतः। परिपरि वङ्गेभ्यः (वङ्गवर्जं) वृष्टोदेवः। परेर्वर्जने वा वचनम् (वा) परिवङ्गेभ्यः। **उपर्यध्यधसः सामीप्ये** (८-१-७) एषां द्वे भवतः सामीप्ये विवक्षिते। सामीप्यं प्रत्यासत्तिः, कालकृता देशकृता च। उपर्युपरिग्रामम्। ग्रामस्यो-परिष्टात्समीपे देशे इत्यर्थः। अध्यधि सुखं दुःखम्। सुखस्योपरिष्टात्समीपकाले-दुःखमित्यर्थः। अधोधो लोकं विपत्। लोकस्याधस्तात्समीपे विपदित्यर्थः। एवम् उपर्युपरि दिवम्। अध्यधि ग्रामम्। अधोधो नगरम्। सामीप्याविवक्षायां तु न-उपरि चन्द्रः। उपरि शिरसो घटं धार-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यति। द्विरुक्तोपर्यादियोग एव द्वितीयेत्युक्तम्। वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सन-भर्त्सनेषु (८-१-८) परस्परान्वितैकार्थःपदसमूहो वाक्यम्। सामन्त्रितमिति सम्बोधने प्रथमाऽऽमन्त्रितम्। वाक्यादेरामन्त्रितस्य द्वे स्तः असूया-संमति-कोप-कुत्सन-भर्त्सनेषु वाक्यगम्येषु। असूया परगुणासहनम् तत्र-सुन्दर सुन्दर ? वृथा ते सौन्दर्यम्। माणवक माणवक रिक्तं ते आभिरूप्यम् (रूपवत्ता)। संमतिः पूजा, तत्र-देव देव ? वन्द्योसि। चैत्र चैत्र ? शोभनः खल्वसि। कोपः क्रोधः, तत्र-दुर्विनीत दुर्विनीत ? इदानीं ज्ञास्यसि। दुष्ट दुष्ट ? ... फलम्। कुत्सनं निन्दा तत्र-धानुष्क धानुष्क ? वृथा ते धनुः। शक्तिक शक्तिक ? रिक्ता ते शक्तिः। भर्त्सनमपकारशब्दैर्भयोत्पादनं, तत्र-चौर चौर ? वन्धयिष्यामि त्वाम्। बालक बालक ताडयिष्यामि त्वाम्।

वि. कोपाद्भर्त्सने, असूयया कुत्सने भवत्यपि विनापि कोपासूये भर्त्सनकुत्सनयोः शिष्यादौ संभवात् ... नयोर्ग्रहणमिति भाष्यकारः। उक्तं च तत्रैव-एवं तर्ह्याह-सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः। लालनाश्रयिणो दोषास्ताडनाश्रयिणोगुणाः। प्रदीपकृताप्युक्तम् गुरवोहि हितैषित्वादकुप्यन्तोपि भर्त्सनम्। कुर्वते भर्त्स्यमाना ... कुपितान्प्रतियान्ति तान्। विनाप्यसूयया कुत्सां कुर्वन्तीतिपृथक्तयोः। निर्देशः सूत्रकारेण विहितः सूक्ष्मबुद्धिना।

एकं बहुव्रीहिवत् (८-१-९) द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्। तेन सुब्लोपपुंवद्भावौ। द्वयोरपिसुपोर्लुकि बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप्। एकैकम् अक्षरम्। एकैकया आहुत्या। एकैकस्मै देहि। एकैकस्मिन् गृहे। विभाषा दिक्समास इत्यत एवानुवृत्तिसम्भवे न बहुव्रीहौ इति पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थमिति अतिदिष्टबहुव्रीहावसर्वनामसंज्ञानिषेध इति प्राञ्चः। वस्तुतो भाष्यमते इदं निषेधसूत्रं प्रत्याख्यातमेव। सूत्रमते बहुव्रीह्यर्थेऽलौकिकविग्रह एव संज्ञानिषेधकं तत्सूत्रमित्युक्तम्। अतः स्मै स्मिन्नादिसर्वनामकार्याणि निराबाधानि। आबाधे च (८-१-१०) पीडायां द्योत्यायां द्वेस्तो बहुव्रीहिवच्च। गतगता, बहुव्रीहिवद्भावात्सुब्लुक्। गतगता, इह पुंवद्भावोपि। विरहात्पीड्यमानस्यैवमुक्तिः। कर्मधारयवदुत्तरेषु (८-१-११) इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं स्यात्। प्रयोजनं सुब्लोप-पुंवद्भावान्तोदात्तत्वानि (वा)। प्रकारे गुणवचनस्य (८-१-१२) इह प्रकारः सादृश्यम्, सादृश्ये द्योत्ये गुण-वाचकस्य द्वे स्तः। कर्मधारयवदुत्तरेष्वित्यधिकाराच्च कर्मधारयवत्। तेन पूर्वभागस्य पुंवद्भावः। पटुपट्वी। पटुपटुः (पटुसदृशः-ईषत्पटुरितियावत्)। एवं रक्तरक्ता। मृदुमृद्वी। पण्डितपण्डितः। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते। शुक्लशुक्लः पटः। शुक्लशुक्लं रूपम्। आनुपूर्व्ये द्वे वाच्ये (वा) आनुपूर्व्यमनुक्रमः। वीप्साभावादयमारम्भः। अत्रकर्मधारयवदित्यसम्बन्धेनसुब्लोपो ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावः। मूले मूले (मूलानुपूर्व्या) स्थूलः। अग्रे अग्रे सूक्ष्मः। ज्येष्ठं ज्येष्ठं प्रवेशय (ज्येष्ठक्रमेण प्रवेशय)। सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः (वा) सर्पः सर्पः बुध्यस्व बुध्यस्व। सर्पः सर्पः सर्पः, बुध्यस्व बुध्यस्व बुध्यस्व। क्रियासमभिहारे च (वा) क्रियायाः पौनः पुन्यं भृशत्वं च क्रियासमभिहारः। लुनीहिलुनीहीत्येवं लुनाति। नित्यवीप्सयोरित्येवसिद्धे भृशार्थे द्वित्वार्थे, पौनः पुन्येपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वेदं वचनम्। कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये, समासवच्च बहुलम् (वा) क्रियाविनिमयः (परस्परकरणं) कर्म व्यतिहारः, बहुलग्रहणादन्यपरयोर्न समासवत्, इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः (वा अन्योन्यं विप्रा नमन्ति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतम्। अन्योन्यस्मै देहि। अन्यम् अन्यौ अन्यान् इत्यादीनां द्वित्वे पूर्वसुपः सुः रुत्वोत्वे। एवं परस्परम्, परस्परौ, परस्परान्, परस्परेण, परस्परस्मिन्, परस्परेषाम्। अत्रकस्कादित्वात्पूर्वसुपः सोरुत्वे विसर्गस्य सः। इतरेतरम्, इतरेतरौ इतरेतरान् इतरेतरेण, इतरेतरस्मै, इतरेतरेषाम्, इतरेतरस्मिन्। अत्र द्वित्वे समासवद्भावात्पूर्वापरसुपोर्लुकि सत्यौ समुदायात्सुबुत्पत्तिः।

वि. अन्योन्यमित्यादौ द्वित्वादिविधानं प्रथमैकवचनमात्रविषयमिति केचित् तत्तु भाष्ये द्वितीयादिविभक्तेरुदाहृतत्वादिदमिति सर्वविभक्तिषूदाहरणानि। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वक्तव्यः (वा) अन्योन्याम् अन्योन्यम्। परस्पराम् परस्परम्। इतरेतराम् इतरेतरम् वा इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित् आमादेशोस्त्र्या एव, भाष्यादौ तथैवोदाहृतत्वात्, तेन स्त्रीनपुंसकयोरपि पुंवदेवरूपमित्याहुः। अन्येतूदाहरणस्य दिङ्मात्रत्वात्क्लीनामामादेशमाहुः। दलद्वये टाबभावः, क्लीबेचादड्विरहः स्वमोः, समासे सोरलुक्चेति सिद्धं बाहुलकात्त्रयम्। ...नां श्लोकः। अन्योन्यं परस्परमित्यत्र दलद्वयेपि टाप्प्राप्तः अन्यपरयोरसमासवद्भावेन सर्वनाम्नो वृत्तिमात्रे पुंवद्भावन प्रवृत्तिः, द्विर्वचनंतु नवृत्तिः, 'यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमुखी बभूवे' त्यत्रापिपुंवद्भावापत्तेः। ...तरेतरमित्यत्र क्लीवे अदड्डतरादिभ्य इत्यदड्प्राप्तः। 'अन्योन्यसंसक्तमहस्त्रियामम्, अन्योन्याश्रयः, परस्पराद्विसादृश्यम्, ...' इत्यादौ कृतद्वित्वेषु समासावयवेषु पूर्वदलस्थसुवादेशस्य सोर्लुक् च प्राप्तः। तदेतत्सर्वं बाहुलकेन समाधेयमिति ...। स्त्रीनपुंसकयोरितिप्रकृतवार्तिके अन्योन्यमिमे ब्राह्मण्यौ, इतरेतरमिमे कुले, भाष्योदाहरणात् दलद्वये टाबभावः ...ड्विरहः स्वमोरिति, त्रियांसूत्रभाष्ये अन्योन्यसंश्रयं त्वेतदितिप्रयोगात् समासे सोरलुक्चेति विज्ञायमानतयास्मिन् ...प्रमाणबलमुपष्टम्भकम्।

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् (८-१-१३) अनयोर्द्वे वा भवतः अकृच्छ्रे द्योत्ये। प्रियप्रियेण ददाति, प्रियेण वा। सुखसुखेन ददाति, सुखेन वा। द्विर्वचने कर्मधारयवद्भावात्सुपो लुकि समुदायात्पुनस्तृतीयैकवचनम्। अतिप्रियमपि अनायासेन ददातीत्यर्थः। यथास्वे यथायथम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(८-१-१४) योयऽआत्मा यद्यदात्मीयं च तत्तद्यथास्वम्। वीप्सायामव्ययीभावः। तस्मिन्योऽर्थे यथ यथमिति यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते। ज्ञाताः सर्वेपदार्थाः यथायथम् (यथास्वमात्म) सर्वेषां तु यथायथम् (यथात्मीयम)।

वि. द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु (८-१-१५) द्वन्द्वमिति द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वं च, उत्तरपदस्य नपुसंकत्वं च निपात्यते रहस्याद्यर्थेषु। तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् इतरे विषयभूताः। द्वन्द्वं (रहस्यं) मन्त्रयते। मर्यादा स्थित्यनतिक्रमः। आचतुरं होमे पशवो द्वन्द्वं मिथुनीभवन्ति माता पुत्रेण पौत्रेण प्रपौत्रेणापि मिथुनीभवन्तीति मर्यादार्थः। व्युत्क्रमणं पृथगवस्थानम्। द्वन्द्वं व्युत्क्रान्ताः। द्वि सम्बन्धेन पृथगवस्थिता इत्यर्थः यज्ञपात्राणां प्रयोगोविनियोगः द्वन्द्वं यज्ञपत्राणि प्रयुनक्ति द्वे द्वे यज्ञपात्राणयासादयतीत्यर्थः। अभिव्यक्तिरत्यन्तसहचरितत्वेन लोकविज्ञानम्। द्वन्द्वं नारदपर्वतौ। द्वन्द्वं सङ्कर्षणवासुदेवौ। द्वावपि साहचर्येण लोकि तावित्यर्थः। योगविभागादन्यत्रापि द्वन्द्वमितीष्यते। द्वन्द्वं (द्वयोर्द्वयोः) युद्धं प्रवर्तते वीप्सायां द्विर्वचनम्। द्वन्द्वानि (द्विकानि) सहते धीरः शीतमुष्णं चैकं द्वन्द्वम्, सुखं दुःखं चापरम्, क्षुत्तृष्णाचान्यत् तानीमानिसहते इत्यर्थः। एवं द्विर्वचनमम्भावादि च बहुत्वं त्वेकशेषात्, चार्थे द्वन्द्व इति च पुंस्त्वमभिधानात्।

प्रयोगविशेषाः—अर्ध्यमर्घ्यमिति वादिनं नृपम्। कान्तायाः करतलरागरक्तरक्तः। अन्यो न्येषां पुस्करैरामृशन्तः। परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्। द्वन्द्व नृत्यमामोदते सः। शाखाः शाखाः सञ्चरन्तः कपीशाः। नवानधोधो बृहतः पयोधरान्। पर्व त्तरं पुंसां महापातकनाशनम्।

प्रश्नाः—द्विर्वचनं किम् द्विर्वचनं केष्वर्थेषु। उपर्यध्यधसां द्विर्वचने कोर्थविशेषः। नित्यवीप्से के। द्वि बहुव्रीहिवद्भावः कर्मधारयवद्भावश्च क्व, तेन च कोविशेषः, गुणवाचकद्विर्वचने कोर्थविशेषः। क्रियासमभिहार तिहारौ कीदृशौ तयोः को विशेषः यथायथमिति कथम्। अधस्तनवाक्येषु द्विर्वचनान्युपपादय—उपर्युपरि सर्वएवदरिद्रति। अधोधः पश्यतः कस्यमहिमा नोपचीयते। तयोरन्योन्यसम्बन्धः।

इतिद्विरुक्तप्रकरणम्

पूर्वार्द्धं सम्पूर्णम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिङन्तप्रकरणम्

दशगण्यां विकरणैर्विभक्ता मूलधातवः ।
साधिताश्चेतरे, तेषां तिङ्कृद्रूपाण्यनेकशः ॥६०॥

भूवादयो धातवः (१-३-१) भू प्रभृतयो वा सदृशाः (क्रियावाचिनः) धातुसंज्ञाः स्युः। तेषु शप् (अ) विकरणा भ्वादयः, लुग्विकरणा अदादयः, श्लु विकरणा जुहोत्यादयः, श्यन् (य) विकरणा दिवादयः, श्नु (नु) विकरणाः स्वादयः, श (अ) विकरणास्तुदादयः, श्नम् (न) विकरणा रुधादयः, उ विकरणास्तनादयः, श्ना (ना) विकरणाः क्र्यादयः, णिच् (इ) विकरणाश्चुरादय, इति विकरणभेदेन दशगण्यां विभक्ता मूलधातवः। **सनाद्यन्ता धातवः** (३-१-३२) सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः। ते च प्रत्ययाः—सन्क्यच्काम्य-क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः॥ मूलधातुभ्यः प्रेरणेच्छातिशयाद्यर्थेषु णिच्सन्यङादिप्रत्ययेषु निष्पन्नाः भावि-बुभूष-बोभूया द्या विकृतिधातवः, पुत्रादिनामभ्य इच्छाद्यर्थेषु क्यजादिप्रत्ययेषु निष्पन्नाः पुत्रीय-पुत्रकाम्यादयो नामधातवश्च साधिता इति त्रिविधा धातवः। एभ्यस्तिङ्प्रत्ययेष्वाख्यातानि, कृत्प्रत्ययेषु कृदन्तशब्दाश्च बहुशो भवन्ति।

टि. १. भगवता पाणिनिना मूलधातवो विकरणाद्यनुसारेण वर्गशो विभज्य धातुपाठे उपदिष्टाः। तेषु केषांश्चिदेव [...]र्दं क्रीडायामेवेत्यर्थविशेषा अपि निर्दिष्टाः। अन्ये तु केवलं धातव उपदिष्टाः, अर्थविशेषास्तु व्याख्यातृभिः [...]र्दिष्टा इति साम्प्रदायिकाः। पूर्वेषां मैत्रेयकाश्यपशाकटायनादीनामपि धातु पाठा आसन्, धात्वर्थाः [...]भीमदेव-चन्द्र-वर्धमान-दुर्ग-वोपदेव-स्वामि-हलायुधादिभिर्व्याख्यातृभिरर्वाचीनैरपि निर्दिष्टाः, तेषां अर्थनिर्देशे क्वचन [...]सीति माधवादिलेखादवगम्यते। धातुषु केचन स्वरा अनुनासिका उपदिष्टास्ते तु उपदेशेजनुनासिक इदितीत्संज्ञया [...] अननुनासिकास्तु शिष्यन्ते। इतोऽनितश्च स्वराः केचनोदात्ताः केचनानुदात्ताः केचन स्वरिताः पठिताः। [...] आत्मनेपदिनः, उदात्तेतः परस्मैपदिनः, स्वरितेत उभयपदिनः। अनि टनुदात्तवन्तः एकाच उपदेशेनुदात्तादित्यनिटः, [...]वन्तस्तु सेटो भवन्ति, उदात्तादयः पुराकाले उच्चारणविशेषेण स्पष्टीभूता अपीदानीमुच्चारणसाङ्कर्येण फलेन ज्ञेयाः।

टि. २. पचतीत्यादौ पचादिभिरधिश्रयणोदकासेचनतण्डुला द्यावपनै धोपकर्षणाद्यधःश्रयणान्ता व्यापार [...]भिधीयते। तेषां व्यापाराणामनेकत्वेपि बुद्धिकल्पितैकैकव्यूह एकक्रियात्वेन व्यपदिश्यते। एकैकक्षणक्रियामादाया-[...]दावपि पचतीत्यादि प्रयोगस्तु तत्तदवयवमात्रे समुदायारोपादुपपद्यते। अतः प्रस्थानकालादारभ्य [...]प्राप्तिपर्यन्तं काशीं गच्छतीति, अधिश्रयणादारभ्याधःश्रयणपर्यन्तं पचतीति, प्रथमरेखाङ्कनादारभ्यान्तिम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रेखाङ्कनपर्यन्तं ग्रन्थं लिखतीति बहुकालव्यापिनः प्रयोगाः। आरम्भक्रियातः पूर्वं भविष्यत्वं, फलनिष्पत्तिक्रियो भूतत्वं चादाय व्यवहारः। उक्तं च हरिणा—"यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधयिते। बुद्धया प्रकल्पिताभेदः क्रि व्यपदिश्यते॥ एकदेशे समूहे वा व्यापाराणां पचादयः। स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः॥ समूहः स तथा प्रतिभेदं समूहिषु। समाप्यते ततो भेदे कालभेदस्य सम्भवः" इति। क्रियाविभेदास्तु "जायतेऽस्ति विपरिणमते वर्धतेऽप नश्यतीति षड्भावविकाराः" इति नैरुक्तैः षट् प्रदर्शिताः। सर्वे क्रियाविशेषाः षट्स्वन्तर्भवन्ति।

आदावन्ते च सम्बद्धा वर्णा धातुषु केषुचित्।
इणनुमादि विशेषार्था अनुबन्धा अपायिनः॥६१॥

धातवः स्वरान्ता हलन्ताश्च। हलन्ता अप्युच्चारणसौकर्याय अकारान्ता निर्दिष्टाः। चुरा केचनाऽदन्ता अपि। केषुचिद्धातुषु इणनुमादिकार्यविशेषोपयोगितयाऽऽदावन्ते वा योजिता धातुस्व बहिर्भूता वर्णा अनुबन्धा उच्यन्ते, ते इत्त्वेनापगच्छन्ति। अन्त्यहलां हलन्त्यमिति, अनुनासिकाचा देशेऽजनुनासिक इदिति, इरस्तु-इर् इत्संज्ञा वाच्या (वा) इति, आदिगतानां ञिटुडूनाम्-आदिर्ञिटु (१-३-५) उपदेशे धातोराद्या एते इतः स्युः। इति इत्वेन तस्य लोप इति लोपः।

वि. निष्कृष्टा धातवः कथ-दा-चि नी-दु-भू इत्यादयः स्वरान्ताः, केचन स्वरान्ताः पठिता अपि एध स्विदा यती भ्रमु भुजो इत्यादयोन्तस्वरलोपेन एध् स्विद् यत् भ्रम् मृज भुज-इति हलन्ताः, स्मिङ् दाण् धाञ् पूञ् इत्यादयो हलन्ताः अप्यन्त्यहलां लोपेन स्मि दा धा पू इति स्वरान्ताः पर्यवस्यन्ति। निष्कृष्टधातुस्वरूपबहिर्भूताः कार्यविशेषा वा योजिताः स्वरा हलो वा अनुबन्धाः। अनुपश्चा त्सह वा प्रक्रियार्थं बध्यन्ते सम्बद्धयन्ते इत्यन्वर्था अनुबन्धाः। प्रयोजनानि यथा—अन्त्य अकारोऽदन्तचुरादिषु कथादिषु लुप्यमानोऽल्लोपस्य स्थानिवद्भावेन गुण वृद्धयभावार्थः धादिष्वनुदात्तो लुप्यमानोनुदात्तङित इत्यात्मनेपदार्थः, पचादिषु स्वरितत्वेन लुप्यमानः स्वरितेत इत्युभयपदार्थः, प्राय उच्चारणार्थः। **आ**-आदितश्चेतिनिष्ठायामनिडर्थं, विभाषाभावादिकर्मणोरितीड्विकल्पार्थम्, ञिफला-फुल्ल, ञि स्वेदितः स्विन्नः। **इ**-इदितोनुम्धातोरिति नुमर्थम्, नदि-नन्दति। **ई**-श्वीदितो निष्ठायामिति निष्ठायामनिड त्रसी-त्रस्तः। **इर्**-इरितोवेति लुङि अङर्थम्, रुदिर्-अरुदन् अरोदीत्। **उ**-उदितोवेति क्त्वायां वेडर्थम्, भ्रमु-भ्रमि भ्रान्त्वा **ऊ**-स्वरतिसूतिसूयतिधूञूदितोवेति वेडर्थम्, मृजू-मार्जिता मार्ष्टा। **ऋ**-नाग्लोपिशास्वृदितामिति णौ चङ ह्रस्वनिषेधार्थम्, लोकृ-अलुलोकत्। **ऌ**-पुषादिद्युताद्यॢदितःपरस्मैपदेष्विति लुङ्यङर्थम्, गम्लृ-अगमत्। **ए**-ह्म श्वसजागृणिश्वेदितामिति लुङि वृद्धिनिषेधार्थम्, **कटे**-अकटीत्। **ओ**-ओदितश्चेति निष्ठानत्वार्थम्, भुजो-भुग्नः। अनुदात्तङित इत्यात्मनेपदार्थम्, स्मिङ्-स्मयते। **ञ्**-स्वरितञित इत्युभयपदार्थम्, कृञ्-करोति कुरुते। **ञि**- इति वर्तमाने क्तार्थम् ञिष्वप्-सुप्तः, **टु**-ट्वितोऽथुजित्यथुजर्थम्, टुवम्-वमथुः, **डु**-ड्वितः क्त्रिरिति क्त्र्यर्थम्, डु पक्त्रिमम्, **ष्**-षिद्भिदादिभ्य इत्यङर्थम्, क्षमूष-क्षमा। एवमन्यत्रापि ज्ञेयम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विज्ञेया धातवः केचिद्भवाद्याः शषसादिकाः।
णनादयश्च, तेष्वादेः षः सो, णो 'नश्च जायते ॥ ६२ ॥

धातुपाठे बुधबन्धादयो बकाराद्याः, वदवचादयो वकाराद्याः, शक शमादयः शकाराद्याः, षण् षिवादयः षकाराद्याः, सृ सृजादयः सकाराद्याः, णट णामादयो णकाराद्याः, नदि नाथादयो नकाराद्याः उपदिष्टाः। तेषामन्येषाञ्च वर्णविशेषा अनुसन्धेयाः। **धात्वादेः षः सः** (६-१-६४) धातोरादेः षस्य सः स्यात्। षह-सहते। षिच-सिञ्चति। **णो नः** (६-१-६५) धातोरादेर्णस्य नः स्यात्। णद-नदति। णिदिनिन्दति। **षोपदेशास्तु सेक्सृप्सृस्तृ सृजस्तृस्त्यान्ये दन्त्याजन्तसादयः। एकाचः षोपदेशाः स्युः** ष्वष्क् स्विद् स्वञ्ज स्वप् स्मिङः। **सेक्सृपादिभिन्ना, दन्त्यपरकोऽचपरकश्च यः षकार स्तदादय एकाचः,** ष्वकादयश्च, षोपदेशा इत्यर्थः। **दन्त्यः केवलदन्त्यो नतु दन्तोष्ठजोपि, ष्वष्कादीनां पृथग्ग्रहणात्।** णोपदेशास्तु-**अनर्दनाटि नाथ् नाद् नन्द नक्क नॄ नृतः। नर्दादिवर्जं णोपदेशा इत्यर्थः।**

वि० णोपदेशेषु उपसर्गादसमासेपि णोपदेशस्येति तत्र तत्र पुनर्णत्वं, षोपदेशेषु षादेशस्य सस्य स्थले विशेषे पुनः षत्वं ...। बध बन्ध बर्ह बल बाधं बिट बिल बुक्क बुध बुस बृहि ब्रूञ्प्रभृतय ओष्ठयाद्याः, वच वश वस वट वदि वन वञ्च वप ... वर्च वर्ण वर्धं वर्ष वल्गु वा वाञ्छि विज विश विद विष वीर वृज वृत्र वृत वृध वेञ वेप वेल्ल वेष्ट व्यथ व्यध व्रण व्रश्च- ... दन्त्यौष्ठ्याद्याः, शक शकि शद्लृ शप शम शसि शंस शास शिक्ष शिल शिष शीङ शुच शुन्ध शुभ शुष शो च्युतिर् ... श्रथ श्लथ श्रम श्रिञ् श्रु श्लिष श्लोकृ श्विता श्विद प्रभृतय तालव्याद्याः, षच षिच षण षद्लृ षञ्ज षह षान्त्व षिध षु षूङ ... ष्ठा ष्ठिवु ष्णा ष्णिह ष्टन ष्वप ष्विदा ष्टयै प्रभृतयो मूर्धन्याद्याः, साध साम सुख सूच सूत्र सृ सृज सेकृ स्कन्द स्खल ... स्वदि स्पर्ध स्पश स्पृह स्फायी स्फुट स्फुर स्तृ स्तु प्रभृतयो दन्त्याद्या उपदिष्टाः। णोपदेशेषु नत्वेन षोपदेशेषु सत्वेन ...वर्जं नोपदेशेभ्यः सोपदेशेभ्यश्च न विशेषः, धातुगत वर्णविशेषाणामनुसन्धानेन तद्भवादिषु बुधः बुद्धः बोधः ... बाधा वचनं वरनं वमनं वरः वर्णः व्यथितः व्रतं, शक्तिः शोभा शमः श्रवणं श्लोकः ष्ठीवनं प्रतिष्ठा अभिषेकः ..., सुखं सूत्रं सूची स्कन्दः सान्त्वनं सिद्धिः इत्यादिषु वर्णभ्रमो निवर्त्यते।

फलव्यापारयो र्धातुराश्रये तु तिङः स्मृताः।
तौ जन्य जनकौ कर्मकर्तारौ तु तदाश्रयौ ॥६३॥

फलं व्यापारश्च धात्वर्थः तदाश्रयस्तिङर्थः, फलं जन्यं व्यापारो जनकः, फलाश्रयः कर्म, व्यापाराश्रयः कर्ता। कर्तरि वाच्ये किञ्चित्फलानुकूलव्यापारो धात्वर्थस्तदाश्रयः कर्ता, कर्मणि वाच्ये व्यापारजन्यं किञ्चित्फलं धात्वर्थस्तदाश्रयः कर्म। कर्ता व्यापारे कर्म फलेऽन्वेति। यथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामवृत्तिसंयोगानुकूलश्चैत्रवृत्तिव्यापार इति, चैत्रेण ग्रामो गम्यते इत्यत्र चैत्रवृत्ति-व्यापारजन्यो ग्रामवृत्तिसंयोग इति प्रतीयते। भावे वाच्ये व्यापार एव प्रधानम्। व्यापारानाश्रयः सन्फलाश्रयः कर्मेत्युच्यते। सकर्मकेषु व्यापाराश्रयात्कर्तुर्भिन्नः फलाश्रयः कर्म भवति, अकर्मकेषु तु व्यापाराश्रयः कर्तैव फलाश्रयोपीति न पृथक्कर्म। तेन करण दर्शन श्रवण पठनादयः सकर्मकाः, भवन गमन जनन मरण वर्धनादयोऽकर्मकाः भवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० १. वैयाकरणानां मते भावप्रधानमाख्यातं, सत्वप्रधानानि नामानि, भावो भावना उत्पादना क्रियेति यावत्, लिङ्गसंख्यान्वययोग्यं द्रव्यमिति सिद्धान्तात् तत्तत्फलोत्पादकव्यापारपरम्परात्मिका क्रियैव धात्वर्थः। सर्वोपि धात्वर्थः सामान्यस्पन्दादिरूपतया निर्विशेषोपि संयोगादीनां फलानां विभेदेन फलविशेषोत्पादकव्यापाररूपेण विभिन्नो भवति। प्राचीनवैयाकरणमते कर्तरि लकारे कर्ता कर्मणि लकारे कर्मतिङर्थस्तस्य धात्वर्थेऽन्वयः, भावे लकारे तु तिङापि धात्वर्थ एवानूद्यते इति चैत्रो ग्रामं गच्छति, चैत्रेण ग्रामोगम्यते इत्युभयत्र चैत्रकर्तृकं ग्रामकर्मकं गमनमिति, चैत्रेण शय्यते इत्यत्र चैत्र कर्तृकं शयनमिति बोधः। नव्यवैयाकरणास्तु धात्वर्थयोः फलव्यापारयोर्मध्ये कर्तरिवाच्ये व्यापारांशः प्रधानं तत्रानुकूलत्व (जनकत्व) संसर्गेण फलम्, कर्मणि वाच्ये फलांशः प्रधानं तत्र प्रयोज्यत्व (जन्यत्व) संसर्गेण व्यापारोऽन्वेति, व्यापारांशे कर्तुः फलांशे कर्मणो वृत्तितयाऽन्वयः, तेन कर्तरि वाच्ये ग्रामवृत्तिसंयोगानुकूलश्चैत्रवृत्तिव्यापार इति, कर्मणि वाच्ये चैत्रवृत्तिव्यापारप्रयोज्योग्रामवृत्तिसंयोग इति बोधः। कालान्वयः सर्वत्र व्यापारे, संख्या तु वाच्यभूतकर्तृकर्मगताधात्वर्थे व्यापारे आरोप्यते इति वदन्ति। उक्तं भूषणे—"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्" इति। हरिणाप्युक्तम् "एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया। भिद्यते न तु लिङ्गाख्ये भेदस्तत्र तदाश्रयः" इति। पुञ्जराजेन व्याख्यातम् "एकपदोपात्त कर्मकर्तृलक्षणसाधनाधारकैकत्वद्वित्वबहुत्वैः पचति पचतः पचन्ति, पच्यते पच्येते पच्यन्ते इत्येक द्विबहुत्वसाध्वत्वं क्रियायाः प्रतीयते। यत्र तु भावे लकारेपि संख्यावगमस्तत्र बहुत्वेन बहुवचनम्, यथा हतशायिकाः शय्यन्ते इति। कालान्वयस्तु धात्वर्थव्यापारे नतु फले नापि कारके" इति। नैयायिकमते तु प्रथमान्तार्थमुख्यविशेष्यकवाक्यार्थबोधनियमात् कर्तरिवाच्ये फलानुकूलो व्यापारोधात्वर्थः, फले कर्मणि वृत्तित्वेन, व्यापारस्याश्रयत्वेन कर्तर्यन्वयाद्ग्रामवृत्तिसंयोगानुकूलव्यापाराश्रयश्चैत्र इति, कर्मणि वाच्ये व्यापारजन्यं फलं धात्वर्थः, व्यापारांशे कर्तुर्वृत्तित्वेन, फलस्याश्रयत्वेन कर्मण्यन्वयाच्चैत्रवृत्तिव्यापारजन्यसंयोगाश्रयो ग्राम इति, भावे वाच्ये तु धात्वर्थप्राधान्येन चैत्रवृत्तिशयनव्यापार इति बोधः। मीमांसकास्तु फलं धात्वर्थः व्यापारः प्रत्ययार्थ इति वदन्ति, तत्तु लः कर्मणीतिसूत्रविरुद्धम्। एषविषयो भूषणमञ्जूषादिषु प्रपञ्चितः।

वि० २. शयने शरीरप्रसारणं, जनने उत्पत्तिः, मरणे प्राणवियोगः फलं तदनुकूलव्यापारश्चैकस्मिन्नेव कर्तरीतीदृशः क्रिया अकर्मिकास्तद्धातवोऽकर्मकाः, दर्शने फलं दृक्संयोगे दृश्ये कर्मणि तदनुकूलव्यापारो द्रष्टरि कर्तरि, लेखने रेखाङ्कितिः फलं पत्रादौ कर्मणि, तद्व्यापारो लेखके कर्तरि, छेदने द्विधाभावः फलं काष्ठादौ कर्मणि, तद्व्यापारश्छेदके कर्तरीतीदृशः क्रियाः सकर्मिकास्तद्धातवः सकर्मकाः। उक्तं च लज्जा सत्ता स्थिति जागरणं वृद्धि क्षय भय जीवन मरणम्। शयन क्रीडा रुचि दीप्त्यर्थं धातुगणं तमकर्मकमाहुः इत्यादि। उपसर्गयोगादिनान्यथावाऽर्थभेदे अकर्मका अपि सकर्माकाः, सकर्मका अप्यर्थान्तरे कर्मणः प्रसिद्धविवक्षादिना, प्रयोगे अकर्मका भवन्ति। उक्तं च–धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया इति।

लकारैः पदवाच्याभ्यां पुरुषैर्वचनैस्तिङः।
कृतश्च धातुरूपाणि भेदयन्ति यथोचितम् ॥६४॥

धातूनां तिङन्तरूपाण्याख्यातानि, तेषां लकारवाच्यपुरुषवचनै र्भेदः; कृदन्तश्च रूपाणि विशेषणाव्ययात्मकानि, तेषां तत्तदर्थेषु प्रत्ययविशेषादिभिर्भेदः। आख्यातेषु दशलकाराः लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङः। तत्र लिङर्थे लेडिति विहितो विध्यर्थको लेट् अग्निहोत्रं जुहोति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेद एव, अन्ये लोके वेदेपि। लिङ् विध्यादौ आशिषिचेति द्विधारूपे विशेषात्, लिङ् द्वैविध्येन लोकेपि दशलकाराः। ते कालविशेषं विध्याद्यर्थविशेषं वा बोधयन्ति। कालस्त्रिधा वर्तमानो भूतो भविष्यँश्च, तद्योगात्क्रियापि त्रिविधा वर्तमाना भूता भविष्यन्ती च। लङादिष्वडादीनामित्वेनाऽगमे लमात्रशेषादेते लकारा उच्यन्ते। तत्र लट् लिट् लुट् लृट् लोट् एते टितः, लङ् लिङ् लुङ् लृङ् एते ङितश्च वर्णक्रमेणो-द्दिष्टाः। तेषु सर्वधात्वनुगतैर्विकरणविशेषैः समाना लट् लोट् लङ् विधिलिङः सार्वधातुकाः, अन्ये प्रायो विसदृशा लिट् लुट् लृङशीर्लिङ् लुङ् लृङ आर्धधातुकाः।

लि० क्रियाफलं कर्तुरात्मने परस्मै वेतिबोधकं पदम्, आख्यातादिना कर्ताकर्मभावो वा प्राधान्येन बोध्यं वाच्यं, अस्मद्युष्मदर्थोन्यो वा पुरुषः, वाच्यस्य संख्यावचनम्, एतैर्विशेषैर्लकारेष्वाख्यातरूपाणि भिद्यन्ते।

वर्तमाने लट् (३-१-१२३) प्रारब्धोऽसमाप्तो वर्तमानः। वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्। **लुङ्** (३-२-११०) भूत इत्यनुवर्तते। परिसमाप्तो भूतः। भूतार्थवृत्तेर्धातोर्लुङ् स्यात्। **अनद्यतने लङ्** (३-२-१११) अद्यतनविहीनोऽनद्यतनः। अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्। लुङोऽपवादः। **परोक्षे लिट्** (३-२-११५) इन्द्रियाविषयसाधनः परोक्षः। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लुङ्लङोरपवादः। **लृट् शेषे च** (३-३-१३) अक्रियार्थत्वं शेषः, चकारात्तदभावेपि। अनारब्धो भविष्यन्। भविष्यदर्थवृत्तेर्धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां च। **अनद्यतने लुट्** (३-३-१५) अनद्यतनभविष्यदर्थवृत्तेर्धातोर्लुट् स्यात्। लृटोऽपवादः। **लिङ्निमित्ते लृङ् क्रियातिपत्तौ** (३-३-१३९) क्रियाया असिद्धिरतिपत्तिः। हेतुहेतुमद्भावादौ लिङ्निमित्ते भविष्यदर्थवृत्तेर्धातोर्लृङ् स्यात् क्रियाया असिद्धौ गम्यमानायाम्। लुट्लृटोरपवादः। **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्** (३-३-१६१) विधिः प्रेरणम्, निमन्त्रणं नियोगकरणम्, आमन्त्रणं कामचारानुज्ञा, अधीष्टः सत्कारपूर्वकोव्यापारः, संप्रश्नः सम्प्रधारणम्, प्रार्थनं याञ्चा, प्रवर्तनाविशेषा इमे। विध्याद्यर्थेषु धातोर्लिङ् स्यात्। सर्वलकारापवादः। **लोट् च** (३-३-१६२) विध्याद्यर्थेषु धातोर्लोट् स्यात्। **आशिषि लिङ्लोटौ** (३-३-१७३) आशीराशंसनम्-अप्राप्तस्येष्टार्थस्य प्राप्तीच्छा। आशीर्विशिष्टार्थवृत्तेर्धातोर्लिङ्लोटौ स्तः।

वि० १. क्रियायाः प्रारम्भोत्तरं समाप्तिपर्यन्तं वर्तमानत्वे लट्। "मध्येक्रियान्तरेण व्यवधाने प्याफलनिष्पत्ति-र्वर्तमानत्वमनुवर्तत एव, अन्तरालवर्तिभोजनादिकं नान्तरीयकं, तस्यैवावयवोवे" तिमाधवः। प्रवृत्तस्याविरामे इहाधीमहे इत्यादि। नित्यप्रवृत्ते तिष्ठन्ति पर्वताः स्रवन्ति नद्यः। न्याय्यात्वारम्भानपवर्गात्" इति भाष्यकारः। "अधिश्रयणादिरधः-श्रयणान्त ओदनफलावच्छिन्नविततरूपो व्यापारनिचयः पचेरर्थः, एवं सर्वत्र, स यावता कालेन निर्वर्तते स कालो वर्तमान-स्तद्वर्तमानो धात्वर्थः" इतिहरदत्तः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० २. पुरा व्यवहारे ऽर्धरात्राद्दिनपरिवर्तनेन गतार्धरात्रादुत्तरमेतदर्धरात्रावधिः कालोऽद्यकालः । कैयटेन तु दृष्ट एकस्या रात्रेश्चतुर्थोयामोदिवसश्च सर्वो द्वितीयाया रात्रे र्यामत्रयपर्यन्तं प्रवृत्तोद्यतन इत्याहुः इत्युक्तम् । अद्यकाल समाप्तोऽ नद्यतनभूतः, अस्मादुत्तरमारभ्योऽनद्यतनभविष्यन् । अद्यकालाभ्यन्तरे परिसमाप्तोऽद्यतनभूतः, तदभ्यन्तरे अद्यतनभविष्यन् । अत्रभूते बाधकानाक्रान्ते सामान्ये (निर्विशेषे), अद्यतने, व्यामिश्रे (अद्यतनानद्यतनयुक्ते) अनद्यतने तु तद्बाधको लङ्, तत्रापि परोक्षे तद्बाधको लिट् । भविष्यति बाधकानाक्रान्ते सामान्ये (निर्विशेषे), अ व्यामिश्रे (अद्यतनानद्यतनयुक्ते) च लृट्, अनद्यतने तु तद्बाधको लुट्, हेतुहेतुमद्भावे क्रियातिपत्तौ च सत्यां भाष्यकृता नविद्यतेऽद्यतनं यत्रेति बहुव्रीहिनिर्देशेनाद्यतनत्वात्यन्ताभावबोधा द्व्यामिश्रयोर्भूतभविष्यतो र्बाधका सामान्याद्यतनयोरिवौत्सर्गिकौ लुङ् लृटौ, अद्यह्यो वाऽभूत्, अद्य श्वो वा भविष्यति । भविष्यति दक्षिणेन चेदयास्यत भविष्यदित्यादौ लिङ्गलिङ्गिनौ बुध्वातदतिपत्तिं च प्रमाणान्तरादवगत्य लृङ् प्रयुज्यते । क्वचिद्भूतेपि तथात्वे लृङ् यदि स तेन दृष्टोऽभविष्यत्तदा सोऽभोक्ष्यत, नतुभुक्तवानन्येन पथा गतः सः ।

वि० ३. क्रियानामेयमत्यन्तापरदृष्टाऽनुमानगम्या नशक्यापिण्डीभूतानिदर्शयितु "मिति भाष्योक्त्या सर्वस्याः क्रि परोक्षत्वेन साधनपरोक्षता लिडर्थे विवक्षिता । तदेतद्विवृतं पदमञ्जर्याम्–"परोक्षशब्दोयमतीन्द्रियवाची प्रसिद्धः, (एकफलोद्देशेन प्रवृत्तत्वादैक्यमिवापन्नो विततरूपः क्षणप्रवाहो धात्वर्थः स कात्स्न्येंनैकस्मिन्क्षणे नसम्भवतीति सद्वस्तुविषये र्नगृह्यते, ततश्चैकैकस्य क्रियाक्षणस्य प्रत्यक्षत्वेपि समूहरूपो धात्वर्थः सर्वः परोक्षएव, (तथापि) यत्र साधनशक्त्या फूत्कार सीत्कारदिविशिष्टं संरब्धरूपं द्रव्यं यत्र प्रत्यक्षं तत्र धात्वर्थ एव प्रत्यक्षाभिमानो लौकिकानां, तद्व्यावृत्तये परोक्ष यत्र साधनशक्त्याश्रयं द्रव्यं परोक्षं तत्र लिट्" इति । उत्तमपुरुषे आत्मनः कर्तुः प्रत्यक्षत्वेपि चित्तव्याक्षेपादिना परो सम्भवति, यथा सुप्तोहंकिलविललापेति । अत्रभाष्यकृता वर्षशतवृत्तं वर्षसहस्रवृत्तं कुड्यकटान्तरितं, द्व्यहवृत्तं परोक्ष केषाञ्चित्पक्षान्तराण्यपि उपन्यस्तानि । "परोक्षे लोकविज्ञाते प्रयोक्तुर्दर्शनविषये (शक्यदर्शने) लङ् वक्तव्यः अरु साकेतम्" इत्यपि भाष्ये विशेषः ।

वि० ४. वर्तमानसामीप्ये वर्तमान वद्वेत्यतिदिष्टो भूतभविष्यद्रूपो गौणवर्तमानः, आशंसायां भूतवच्चेत्यति भविष्यन्गौणभूतः । एवं च सामान्यो गौणश्चेति वर्तमानो द्विधा, अद्यतनोऽनद्यतनो व्यामिश्रः सामान्यो गौणश्चेति पञ्चविधः । अनद्यतनविशेषः परोक्षानद्यतनभूतः तस्यापि सङ्कलने षोढा । अद्यतनोऽनद्यतनो व्यामिश्रः सामान्य भविष्यँश्चतुर्विधः । एषां सर्वेषां सङ्कलने एकादशधा द्वादशधा वा कालः । उक्तं च "क्रियोपाधिश्च सन्भूतभविष्यद्वर्तमान एकादशभिराकारै र्विभक्ता प्रतिपद्यते ॥ भूतः पञ्चविध स्तत्र भविष्यँश्च चतुर्विधः । वर्तमानो द्विधाख्यात इत्ये कल्पनाः ॥ अद्यतनानद्यतनसामान्यरूपाश्चत्वारो मुख्यभूतभेदाः सामान्यमपि विशेषेभ्यो व्यावृत्तेर्भेदः, परोक्षस्त भूतभेदः, आशंसायामित्यतिदिष्ट भूतकार्यो भविष्यन्गौणभूतः भविष्यँस्तु गौणाभावादद्यतनादिभेदाच्चतुर्विधः । सामीप्य इत्यतिदिष्ट वर्तमानकार्यौ भूतभविष्यन्तौ गौणवर्तमानौ । इत्येकादशभेदाः कालस्य" इतिमाधवीयधातु केचित्तु प्रवृत्तोपरतश्चैव वृत्ताविरत एव च । नित्यप्रवृत्तः सामीप्यो वर्तमान श्चतुर्विधः इति वदन्ति । आधुनिके व्याकरणे आसन्नभूतः (गतोस्ति) पूर्णभूतः (गतवानासीत्), अपूर्णभूतः (गच्छन्नासीत्) आसन्नभविष्यन् (गमिष्यन् पूर्णभविष्यन् (गतोभविष्यति) अपूर्णभविष्यन् (गच्छन्भविष्यति) अपूर्णवर्तमानः (गच्छन्नस्ति) पूर्णवर्तमानः (गत इत्यादयो विशेषास्तु कृदन्तसंयोगविशेषतः प्रत्याम्याः, नत्वाख्यातबोध्या मौलिकाः कालविभेदाः इत्यवधेयम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० ५. "यन्नियोगतः कर्तव्यं तन्निमन्त्रणं, ब्राह्मणेन सिद्धं भुज्यतामित्युक्तेऽधर्मःप्रत्याख्यातुः, आमन्त्रणं कामचारः "इति-
...त्तरः। विधिः प्रवर्तनं भृत्यादे र्निकृष्टस्य क्वचित्प्रवर्तनमाज्ञापनमित्यर्थः, नियोगतोऽवश्यंभावेन यत्करणं तन्निमत्रणस्य
... अवश्यकर्तव्ये श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनेति यावत्। श्राद्धे हि निमन्त्रितो दौहित्रादिरभुञ्जानः प्रत्यवैति।
...र इच्छाप्रवृत्तिः, यत्राननुष्ठानेपि न प्रत्यवाय स्तत्र प्रवर्तनेतियावत्। कल्याणादौ त्वामन्त्रितोऽभुञ्जानोपि नप्रत्यवैति।
... सत्कारपूर्वको व्यापारः, गुर्वादेराराध्यस्य प्रवर्तनेति यावत्। सम्प्रश्नः सम्प्रधारणम् इदं वा कर्तव्यमिदं वाऽकर्तव्य·
...र्थं भूतविचारणा। प्रार्थना याञ्चाप्रसिद्धा। प्रवर्तनासामान्यस्यैते विशेषाः। प्रवर्तनायां लिङितिसुवचम्। उक्तं च पद-
...—"न्यायव्युत्वादनार्थं च प्रपञ्चार्थ मथापि वा। विध्यादीनामुपादानं चतुर्णामादितः कृतम्" अस्ति प्रवर्तनारूप
...तं चतुर्ष्वपि। तत्रैव लिङ् विधातव्यः किंभेदस्य विवक्षया" ॥

लः कर्मणि च भावे चाकर्मकेभ्यः (३-४-६५) लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्यु
...कर्मकेभ्यो भावे कर्तरि च। कर्ता कर्म भावो वा यास्मिन्नर्थे लकार स्तदाख्यातवाच्यं भवति। **लस्य**
(३-४-७७) अधिकारोयम्। **तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (३-४-७८)**
...ऽष्टादश लादेशाः स्युः। तिङिति तिप्प्रभृतिमहिङन्तानां, तङिति तप्रभृतिमहिङन्तानां प्रत्याहारौ।
...ः परस्मैपदम् (१-४-९९) लादेशाः परस्मैपदसंज्ञाः स्युः। **तङानावात्मनेपदम् (१-४-१००)**
...ङ् प्रत्याहारः (तादिनवकं) शानच्कानचौ च आत्मनेपदसंज्ञाः स्युः। पूर्वसंज्ञापवादः। ताता-
...मित्यादयो नवशानच्कानचौ चात्मनेपदानि, परिशेषादन्ये लादेशास्तिवादयो नवशतृ प्रत्ययश्च
...रस्मैपदानि भवन्ति भावे। कर्मणि वा वाच्ये सर्वत्रैवात्मनेपदम्, धातोः कर्तरि वाच्ये तु पदं पाठाद्व्यव-
...स्थितम्। **भावकर्मणोः (१-३-१३)** भावकर्मणो रात्मनेपदं स्यात्। कर्तरि वाच्ये तु-**अनुदात्तङित**
आत्मनेपदम् (१-३-१२) उपदेशेऽनुदात्तेतो ङितश्च धातो रात्मनेपदं स्यात्। **स्वरितञितः कर्त्रभि-**
प्राये क्रियाफले (१-३-७२) स्वरितेतो ञितश्च धातो रात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। वक्ष्य-
...माणेन परस्मैपदम्। **शेषात्कर्तरि परस्मैपदम् (१-३-७८)** आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि
परस्मैपदं स्यात्। अतः परस्मैपदिभ्यो लस्य तिबादयः, आत्मनेपदिभ्यो लस्य तादय आदेशा
भवन्ति।

वि० १. लः कर्मणि चेतिनियमेन सकर्मकेभ्यो भावे, अकर्मकेभ्यः कर्मणि न लकारः कर्तरितूभयेभ्यो भवति। "फलव्यापारयो
...श्रयामकर्मकः। धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः" इतिभूषणोक्तेः फलसमानाधिकरणव्यापारवाचका अकर्मकाः,
...करणव्यापारवाचकाः सकर्मकाः। अत्राकर्मकपदेना,ऽविवक्षितकर्मकाणा मपिग्रहात् चैत्रेण भुज्यते इत्यादौ सतोप्यो-
...ः कर्मणोऽविक्षया भावे लः केचित्तु वास्तविका कर्मका एवगृह्यन्ते, तेनाविवक्षितकर्मकेभ्यः कर्मण्येव लः, अविवक्षया
...प्रयोगमात्र मित्यपि वदन्ति।

वि० २. पदं नाम बोधकम्। उभयपदिधातुषु क्रियाफलमात्मने कर्त्रे विवक्ष्यते चेदात्मनेपदं, परस्मै कर्तृभिन्नाय विवक्ष्यते
...स्मैपदमित्यर्थं नामनी। याजका यजन्तीत्यादौ यागफलं न याजकानां किन्तुयाजकस्येति, ब्राह्मणा यजन्ते इत्यादौ यागफलं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्राह्मणानामेवेति प्रतीयते। एवं न्यायेन कर्तुः क्रियाफलविवक्षायां पचते इत्यात्मनेपदमन्यस्य क्रियाफलविवक्षायां पचती परस्मैपदं प्रयोज्यं भवति। परमृत्विजो यतन्ते इत्यादौ यागफलं दक्षिणादिकं कर्तृगतमभिप्रेत्यात्मनेपदं, यजन्ते त्यादौ परगतमभिप्रेत्य परस्मैपदं प्रयुक्तमिति तत्र तत्र पदविशेषः फलविशेषमादायोपपादनीयः। एकपदिधातुषु तु कर्तृगामित्वे तदभावेपि यथास्वं परस्मैपदमात्मनेपदं वा, तत्रोभयपदि धातुरूपसादृश्येनौपचारिकमेव तत्तन्नाम पदमित्यनुसन्धेयम्।

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः (१-४-१०१) तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमा त्प्रथममध्यमोत्तमपुरुषसंज्ञाः स्युः। उत्तमशब्दोऽन्त्यार्थोनतुप्रधानवाची, त्रिरुत्तमामन्वाहेतिवत्। **तान्येकवचनद्विवचनबहुवचनान्येकशः** (१-४-१०२) लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्ये मेकवचनद्विवचनबहुवचनसंज्ञानि स्युः। **युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः** (१-४-१०५) तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च धातोर्मध्यमः स्यात्। **अस्मद्युत्तमः** (१-४-१०७) तिङ्वाच्यकारकवाचिन्यस्मदि प्रयुज्यमानेऽप्रयुज्यमाने च धातो रुत्तमः स्यात्। **शेषे प्रथमः** (१-४-१०८) मध्यमोत्तमयोरविषये प्रथमः स्यात्। **द्व्येकयोर्द्विवचनैकवचने** (१-४-२२) **बहुषु बहुवचनम्** (१-४-२१) तेन तिङ्वाच्ये एकत्वविशिष्टे एकवचनं द्वित्वविशिष्टे द्विवचनं बहुत्वविशिष्टे बहुवचनं भवति। **तिङ्शित्सार्वधातुकम्** (३-४-११३) तिङः शितश्च धात्वधिकारोक्ताः सार्वधातुकसंज्ञाः स्युः। **आर्धधातुकं शेषः** (३-४-११४) तिङ्शिद्भ्योऽन्यो धात्वधिकारोक्त आर्ध धातुकसंज्ञः स्यात्। **लिट् च** (३-४-११५) लिडादेशस्तिङ् चार्धधातुकसंज्ञः स्यात्।

वि० सर्वधातुभ्यो भाविनां लङादितिङां सार्वधातुकत्वमन्वर्थमेव, एवं न्यायेन कतिपयधातुभ्य एव भाविनामार्धधातु न्याय्येपि सार्वधातुकत्वनिमित्तककार्याभाववतां तत्प्रतिपक्षतया लिडाशीर्लिङादेशतिङां विशेषवचनेन, लुट् लृट् भाविनोः स्यतासोर्लृङि भाविन श्च्लेरपि तिङ्शिद्भिन्नतया शेषत्वेनार्धधातुकत्वं परिभाषितम्। अतश्च लट् लोट् विधिलिङ् तिङां सार्वधातुकत्वं, लिट् लुट् लृडाशीर्लिङ् लुङ् लृङ् तिङामार्धधातुकत्वं पर्यवस्यति।

भ्वादिषु-परस्मैपदिभूधातुरूपाणि--

सार्वधातुकेषु--

भूसत्तायाम् (आत्मधारणानुकूलव्यापारे) अकर्मकः सेट् परस्मैपदी भूधातोः कर्तरि वर्तमाने लटि–युष्मदस्मद्भिन्ने कर्तरि प्रथमपुरुषैकवचने लस्य तिबादेशे तिपः सार्वधातुकसंज्ञा **कर्तरि शप्** (३-४-६८) कर्त्रर्थे सार्वधातुके परे धातोः शप्स्यात्। इति शपि, शपोऽकारस्यापि सार्वधातुकत्वे पूर्वस्याङ्गसंज्ञायां, **सार्वधातुकार्धधातुकयोः** (७-३-८४) अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात्। इत्यूकारस्यगुणेऽवादेशे भवति। तसि भवतः। **झो झोन्तः** (७-१-२) प्रत्ययावयव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्याऽन्तादेशः स्यात्। इत्यन्तादेशे शब्गुणावादेशेषु अतोगुणे इतिपररूपे भवन्ति। युष्मदि कर्तरि मध्यमपुरुषे सिवादौ शब्गुणावादेशेषु भवसि भवथः भवथ। अस्मदि कर्तरि उत्तमपुरुषे मिबादौ शब्गुणावादेशेषु भव इत्यस्याङ्गत्वे **अतो दीर्घो यञि** (७-३-१०१) अदन्ताङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे। इति दीर्घे भवामि भवावः भवामः। कर्तरि वाच्ये प्रथमान्तस्य कर्तुरनुसारेणाख्याते पुरुषवचने। एवमुत्तरत्रापि।

प्रयोगाः—पुत्रोभवति धार्मिकः। त्वं धनी भवसि ध्रुवम्। ते भवन्ति निरामयाः। यूयं भवथ सज्जनाः। भवान्भवति धार्मिकः। धनिनौ भवथो युवाम्। अहं भवामि निपुणः। आवां भवावः सुखिनौ। एते भवन्ति सुखिनः। वयं भवामः कुशलाः स्व कर्मसु। पुत्रौ सुशीलौ भवतः।

वि० १. "भूधात्वर्थः सत्ता आत्मधारणम्। उक्तं च—आत्मान मात्मनाविभ्रदस्तीति व्यपदिश्यते इति। धातुष्वर्थनिर्देश ...म्। हिमवतो गङ्गा प्रभवति, मल्लो मल्लाय प्रभवति, ग्रामस्य प्रभवति, परान् परा भवति, इदं सम्भवति, स्थाली ...भवति, सुखमनुभवतीत्यादौ निःसरणपर्याप्त्यैश्वर्याभिभवोत्प्रेक्षान्तर्भावसंवेदनादीनामवगमात्। नैते प्रभ्वादीना-..., तर्हि भूमात्रस्य क्रियावाचित्वाभावात्प्रभ्वादिसमुदायस्य भ्वाद्यपाठेन धातुत्वाभावात्प्रभवतीत्यादिरूपासिद्धेः, ...नुपसर्गो भूतिकामः पुत्रोभवतीत्यादावैश्वर्योत्पत्त्यादिप्रतीतेश्च। नचोत्पत्तिः सत्ता, उत्पन्नस्यात्मधारणमित्युक्तेः। ...च नैरुक्ताः जायतेस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति' क्रमेण षड्भावविकारानाहुः, तत्र जातस्तत्र भव इति ...र्देशाच्च। तस्माद्धातुरेवानेकार्थाभिधायी, प्रादयस्तु तदर्थद्योतका एव। क्वचिदेव च द्योतकापेक्षा। उत्तरत्राप्यर्थ-...निर्देशानवम्। बीजसन्ताने पठितोवपिः केशान्वपतीत्यत्रच्छेदनार्थः; प्रादुर्भावे पठितः करोति रभितः पादौ कुरु, ...रमाक्रोशतीत्यादौ स्थापनोच्चारणाद्यर्थः, तत एव च कुर्द खुर्द क्रीडायामेवेत्येवकारः क्वचिदनेकार्थप्रदर्शनं तु ...नार्थम् इति माधवीयधातुवृत्तौ। सत्स्वपि बह्वर्थेषु माङ्गलिकत्वात्सुप्रसिद्धत्वात्सर्वपदार्थव्यापित्वा च्चादौ सत्तानिर्देशः। ...नं चभाष्ये "न सत्तां पदार्थोव्यभिचरती" ति। आदौ भुवोनिर्देशोव्याहृतिस्मरणेन माङ्गलिकत्वात्सर्वधात्वर्थव्याप्यर्थाभि-...लाष। कृभ्वस्तयोहि क्रियासामान्यवचनाः।

वि० २. **प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च** (१-४-१०६) मन्यधातुरुपपदं यस्य धातोस्तस्मि-...भूते सति मध्यमः स्यात्प्रहासे गम्यमाने, मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः स्यात्। एहिमन्ये ओदनं ...क्ष्ये इति भुक्तः सोतिथिभिः, एतमेत वा मन्ये ओदनं भोक्ष्येथे भोक्ष्यध्वे इत्यादि। भोक्ष्ये भोक्ष्यावहे, भोक्ष्यामहे, मन्यसे ...मन्यध्वे इत्यादिरर्थः। युष्मद्युपपदे इत्याद्यनुवर्तते, तेनेह न, एतु भवान्मन्यते ओदनं भोक्ष्ये इति भुक्तः सोति-...थिभिः। प्रहासइत्युक्त्या यथार्थकथने न, एहिमन्यसे ओदनं भोक्ष्ये इति भुक्तः सोऽतिथिभिः।

विध्याद्यर्थेषु लोटि-तिपि शब्गुणावादेशेषु—**एरुः** (३-४-८६) लोट इकारस्योकारः स्यात्। इत्युकारे भवतु। तसि शब्गुणावादेशेषु **तस्थस्थमिपां तान्तन्तामः** (३-४-१०१) ङितश्चतुर्णां तसादीनां तामादय आदेशाः स्युः। **लोटो लङ्वत्** (३-३-८५) लोटो लङ्वत् कार्यं स्यात्। इतिलङ्वत्वेन तसस्ता-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मादेशे भवताम्। झावन्तादेशे शब्गुणावादेशपररूपेषु एरुरित्युत्वे भवन्तु। सिपि शवादौ-सेर्ह्यपिच्च (३-४-८७) लोटः सेर्हिः स्यात्सोऽपिच्च। इति सेर्ह्यादेशे अतो हेः (६-४-१०५) अतः परस्य हेर्लुक् स्यात्। इति लुकि भव। थस्थयोः शब्गुणावादेशेषु लङ्वत्त्वेन तंतादेशयोः भवतम् भवत। मिपि शब्वादिषु तस्तस्थेत्यमादेशे प्राप्ते मेर्निः (३-४-८९) लोटो मेर्निः स्यात्। इतिन्यादेशे आडुत्तमस्य पिच्च (३-४-९२) लोडुत्तमस्याऽऽदेशः स्यात्सोऽपिच्च। इति नेराडागमे सवर्णदीर्घे भवानि। हिन्योरुत्वं तु न, इकारोच्चारणसामर्थ्यात्। वस्मसोः शबादौ आडागमे दीर्घैकादेशे लङ्वत्त्वे नित्यं ङितः (३-४-९९) सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात्। इत्यन्त्यसलोपे भवाव भवाम। आशीरर्थे आशिषि लिङ्लोटाविति लोटि तिप्सिपोः भवतु भवहि इति स्थिते तुह्योस्तातङाशिष्यन्यतरस्याम् (७-१-३५) आशिषि तुह्योस्तातङ् वा स्यात्। इति तुह्योः स्थाने पक्षेऽनेकाल्त्वात्सर्वादेशे तातङि भवतात्। रूपान्तराणि पूर्ववत्।

वि० ङिच्चेत्यस्य सर्वापवादतयाऽनङ्वतातङो ङित्वेनान्त्यादेशस्तु न, तस्यानन्यार्थङित्वेष्वनङादिषु चरितार्थतया गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थत्वेन सम्भवत्प्रयोजनान्तरे तातङि मन्थरं प्रवृत्त्या उत्सर्गापवादयोः स्थले परत्वात्सर्वादेशेन बाधात्।

प्रयोगाः–सुखी भवतु लोकोयम्। यूयं भवत धार्मिकाः। सर्वे भवन्तु सुखिनः। वयं भवाम त्वद्भक्ताः। त्वं सुखी भव सर्वदा। युवां भवतमज्वरौ। अहं भवानि दीर्घायुः। आवां भवाव मुदितौ। भवतां तौ निरामयौ। धर्मे भवतु ते श्रद्धा। तव पुत्रो भवतात्। भवतात्त्वं सदा सुखी।

परोक्षभिन्नानद्यतनभूते लङि–अन्तरङ्गत्वान्नित्यत्वाच्च पूर्वं तिपि शब्गुणावादेशेषु लुङ्लङ्लृङ्क्ष्वडुदात्तः (६-४-७१) एषु परेष्वङ्गस्याऽडागमः स्यात्सचोदात्तः। इति विकरणविशिष्टाङ्गस्याडागमे, इतश्च (३-४-१००) ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्त्यस्य लोपः स्यात्। इति इकारलोपे अभवत्। लावस्थायामेवाडागम इति पक्षान्तरं भाष्ये। तसि शबादौ अडागमे तस्थस्थेतितामादेशे अभवताम्। झावन्तादेशे शबादौ अडागमे पररूपे अभवन्तीत्यत्र इकारलोपे संयोगान्तलोपे अभवन्। सिपि शबादावटि इकारलोपे सस्य रुत्वविसर्गयोः अभवः। तस्थस्थयोस्तन्तादेशयोः अभवतम् अभवत। मिपोऽमादेशे पूर्वरूपे। अभवम्। वस्मसोः शबादौ अटि अतो दीर्घो इतिदीर्घे नित्यंङित इति सलोपे अभवाव अभवाम।

प्रयोगाः–ह्योऽभवाम वयं प्रीताः। तेऽभवन्दुःखिता भृशम्। अभवः शरणं मम। साऽभवद्धसा प्रीता। यूयं समीपेऽभवत। अहं ह्योमुदितोभवम्। युवामभवतं तत्र। महार्घमभवत्तत्। प्रीतावभवतां पुत्रौ। अभवाव मनस्यावाम्। परार्थं भवदात्मजः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विध्याद्यर्थे लिङि–तिपि शब्गुणावादेशेषु इतश्चेतीकारलोपे यासुट् परस्मैपदेषूदात्तो ङिच्च (३-४-१०३) ङितः परस्मैपदानां यासुडागमः स्यात्सचोदात्तोङिच्च। सीयुटोपवादः। इति तिपा-वयवे यास् इत्यागमे भवयास्त् इति जाते सुट् तिथोः (३-४-१०७)। लिङस्तकारथकारयोः सुट् स्यात्। लिङोयासुट् तकारथकारयोः सुडिति विषयभेदेन सुटा यासुटो न बाधः। इति सुटिच कृते-लिङः सलोपोनन्त्यस्य (७-२-७९) सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात्। इति सकारद्वयलोपे अतो येयः (७-२-८०) अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इयः स्यात्। इति इयादेशे गुणे लोपोव्योरिति यलोपे भवेत्। यलोपात्प्राग्हल्ङ्याादिलोपः संयोगान्तलोपश्च न, अन्तरङ्गतया यलोपस्य पूर्वं प्रवृत्तेः, संयोगान्तलोपस्यासिद्धत्वाच्च। तसस्तामादेशे शबादौ यासुट् सुटोः सकारद्वयलोपे इयादेशे गुणे यलोपे भवेताम्। झेरन्तादेशे प्राप्ते झेर्जुस् (३-४-१०८) लिङो जुस्स्यात्। इति सर्वादेशे उसि शबादौ यासुटि तथयोरभावेन सुडभावे सलोपे भवया उस् इत्यत्र उस्यपदान्तात् (६-१-९६) अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात्। इति प्राप्ते अन्तरङ्गत्वान्नित्यत्वाच्च अतोयेय इतीयादेशे गुणे रुत्वविसर्गयोः भवेयुः। सिपि शबादौ इकारलोपे यासुट् सलोपेयादेशगुणयलोपरुत्वविसर्गेषु भवेः। थस्थयोस्तान्तमादेशयोः शबादौ यासुट्सुटोः सद्वय-लोपेयादेशगुणेषु भवेतम्। भवेत। मिप्यमादेशे शबादौ यासुट्सलोपेयादेशगुणेषु निमित्ताभावाद्य-लोपाभावे भवेयम्। वसमसोः शबादौ नित्यं ङित इत्यन्त्यसलोपे यासुट्सलोपेयादेशगुणयलोपेषु भवेव भवेम्।

१. लक्ष्ये लक्षणं सकृदेव प्रवर्तते इतिनियमस्य पर्यायेण पुनः प्रवृत्तिपरत्वाद्भवेदित्यादौ सकारद्वयस्य युगपल्लोपः। तच्छ्रवणं त्वाशीर्लिङि, स्फुटतरं तु तत्राप्यात्मनेपदे। भवेयुरित्यत्र अतोयेय इत्यस्य परत्वे नित्यत्वेपि उस्य-पदान्तस्यान्तरङ्गत्वेन बलवत्वात्पररूपापत्तिस्तु न, अतोयेय इत्यत्रार्षसन्धिना यास् इय इतिछेदेन सलोपात्पूर्वमेव कृते इयादेशे अवर्णान्तत्वाभावेन पररूपाप्राप्तेः, एवमुक्तौ तु सुट एव सस्य लोपः।

२. यासुटो ङित्वविधानेन स्तुयादित्यादौ न गुणः। लाश्रितङित्वस्याल्विधित्वेन स्थानिवद्भावाभावे घुमास्थेति ईत्वस्येत्वस्याप्राप्तावपि न ल्यपीतिनिषेधेन अनुबन्धकार्येऽनल्विधाविति निषेधाभावस्य ज्ञापनात्तन्निषेधा-भावस्य तदादेशे तिपि स्थानिवत्वेन तदागमे यासुटि यदागमन्यायेन सिद्धावपि यासुटो ङित्वविधानं अनुबन्धकार्येष्वनल्विधाविति निषेधप्रवृत्तिं ज्ञापयति। हलः श्नइत्यत्र भाष्ये ङिच्चपिन्न पिच्चङिन्नेत्युक्त्या तिप्सिप्मिपा-मादेशेनातिदेशिकङित्यस्याप्रवृत्तेर्यासुटोङित्वविधानस्य सार्थक्याभ्युपगमेपि तत्र श्नः शित्वस्य स्थानिव-त्वाभावेनापि तदादेशस्य शानचः शित्वोपदेशस्तथा ज्ञापयति। अतश्च वक्ष्यमाणेत्यत्र लृडादेशस्य शानचः शित्वेन ङित्वाभावान्नङीप्प्रसङ्ग इतिस्त्रीप्रत्ययप्रकरणे उक्तम्।

प्रयोगाः–भवेतामद्य मे तुष्टौ। तथाकृते नैव भवेदनर्थः। भवेयुस्ते नराधीशाः। भवेत यूयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुखिनः सदैव। वयं श्रिया पूर्णतमा भवेम। त्वं भवेः श्रुतिसम्पन्नः। युवां भवेतं सुखिनौ सदैव। आवां भवेव सुखिनौ। इदं सत्यं भवेन्नवा। भूयो भवेम विद्वांसः।

आर्धधातुकेषु—

परोक्षानद्यतनभूते लिटि—तिपि लिट्चेत्यार्धधातुकत्वेन शबाद्यभावे **परस्मैपदानां णलतुसुस्थलथुसणल्वमाः** (३-४-८२) लिटस्तिबादीनां नवानां णलादयो नव स्युः। इतिणलादेशे भू अ इत्यसार्वधातुकेतिगुणे प्राप्ते **भुवो वुग्लुङ्लिटोः** (६-४-८८) भुवो वुगागमः स्यात् लुङ्लिटोरचि इति वुगागमेन भूव् अ इतिजाते **एकाचो द्वे प्रथमस्य** (६-१-१) **अजादेर्द्वितीयस्य** (६-१-२) इत्यधिकृत्य **लिटि धातो रनभ्यासस्य** (६-१-३) लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य। इति भूव् इत्यस्य द्वित्वे, **पूर्वोऽभ्यासः** (६-१-४) अत्र ये द्वे विहिते तयोः पूर्वोऽभ्यास संज्ञः स्यात्। इतिपूर्वस्याभ्यासत्वे **हलादिः शेषः** (७-४-६०) अभ्यासस्यादिर्हल् शिष्यते ऽन्येहलो लुप्यन्ते। इति पूर्ववलोपे **ह्रस्वः** (७-४-५९) अभ्यासस्याचो ह्रस्वः स्यात्। इति पूर्वोकार ह्रस्वे **भवतेरः** (७-४-७३) भवतेरभ्यासोकारस्य अः स्याल्लिटि इत्यकारे **अभ्यासे चर्च** (८-४-५४) अभ्यासे झलां चरः स्युर्जशश्च। झशां जशः खयां चर्, तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचर इतिविवेक आन्तरतम्यात्। इतिपूर्वभस्य बत्वे **असिद्धवदत्राभात्** (६-४-२२) इत ऊर्ध्वमापादपरिसमाप्तेराभीयम्, समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्। इति वुकोऽसिद्धत्वादचिश्नुधातुभ्रुवां य्वोरियङुवङौ इति उवङि प्राप्ते वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ (वा) इत्यसिद्धत्वाभावे बभूव। तसोऽतुसादेशे वुकि द्वित्वहलादिशेषाभ्यासह्रस्वत्वजश्त्वेषु उवङभावे सस्य रुत्वविसर्गयोः बभूवतुः। झौ उसादेशे पूर्ववत् बभूवुः। सिपि थलादेशे **आर्धधातुकस्येड्वलादेः** (७-२-३५) वलादेरार्धधातुकस्येडागमः स्यात्। इति थलि इडागमे वुकि द्वित्वहलादिशेषह्रस्वात्वजश्त्वेषु बभूविथ। थसोऽथुसादेशे पूर्ववत् बभूवथुः। थस्य अः इति मिपो णल् (अ) इत्यादेशे वुगादौ पूर्ववत् बभूव, बभूव। वस्मसोर्वमादेशयोर्वलादित्वादिडागमे वुकि द्वित्वादौ बभूविव बभूविम।

प्रयोगाः—बभूविथ त्वं विभवेषु निस्पृहः। पराङ्मुखास्ते समरे बभूवुः। अहं बभूव ज्वरेण विह्वलः। बभूव सर्वं शुभ शंसि तत्क्षणम्। बभूविम वयं हृष्टाः। बभूवतुस्तौ किल विग्रयोज्ज्वलौ युवां धीरौ बभूवथुः। बभूव यूयं कुपिताः। मूढा आवां बभूविव।

अनद्यतनभविष्यति लुटि तिपि शपि प्राप्ते, **स्यतासी लृलुटोः** (३-१-३३) लृ इति लृङ् लृटोः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रहः। धातोः स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परयोः। इतितास्प्रत्यये तासआर्धधातुकत्वेन वलादित्वेनवेडागमे उकारस्यगुणेऽवादेशे भवितास् ति इत्यत्र लुटः प्रथमस्य डारौरसः (२-४-८५) लुटः प्रथमपुरुषस्य डारौरस् एते क्रमात्स्युः। इति तिपो डादेशे डित्वसामर्थ्यादभस्यापिटेर्लोपे भवित् आ इत्यत्र पुगन्तलघूपधस्य च (७-३-८६) पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः। इतिमध्ये नकारेण व्यवधानेपि येननाव्यवधानं तेनव्यवहितेपि वचनप्रामाण्याद्गुणे प्राप्ते दीधीवेवीटाम् (१-१-६) दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। इतिनिषेधे भविता। तसि तास्प्रत्यये इटि गुणेवादेशे तसो रौ इत्यादेशे तासस्त्योर्लोपः (७-४-५०) तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे। रि च (७-४-५१) रादौ प्रत्यये प्राग्वत्। इति अन्त्यसलोपे भवितारौ। एवं झौ रसादेशे भवितारः। सिपि तासादौ तासस्त्योरिति सलोपे भवितासि। थस्थयोस्तासीड्गुणावादेशेषु भवितास्थः भवितास्थ। मिवादौ तासीड्गुणावादेशेषु भवितास्मि भवितास्वः भवितास्मः।

प्रयोगाः–भविता न विचार चारुचेत्। भवितारः श्व इमे गृहोन्मुखाः। भवितासि परश्व ईदृशः। ...तिनो भवितास्थ यूयम्। भवितारौ ननु तौ भवादृशौ। भवितास्मो वयमीदृशाः पुनः। भविता ...महो परेद्यपि। भवितास्थः कथमन्यथा युवाम्। श्वोनैवं भवितासि।

अनद्यतनभिन्नभविष्यति लृटि तिपि शपं बाधित्वा स्य प्रत्यये तस्यार्धधातुकत्वेन वलादित्वेन इडागमे गुणावादेशयोः प्रत्ययावयवस्य सस्य षत्वे भविष्यति। तसि स्ये इड्गुणावादेशषत्वेषु भविष्यतः। ...अन्तादेशे स्ये इड्गुणावादेशषत्वेषु अतोगुणइतिपररूपे भविष्यन्ति। सिवादिषु स्ये इड्गुणावादेशषत्वेषु भविष्यसि भविष्यथः भविष्यथ। मिवादिषु स्येड्गुणावादेशषत्वेषु अतोदीर्घोयञीति दीर्घे च भविष्यामि भविष्यावः भविष्यामः।

प्रयोगाः–तद्भविष्यति नान्यथा। त्वं भविष्यसि मादृशः। नचैवं न भविष्यामः सर्वे वयमतः परम्। अहमद्य भविष्यामि। तौ कृतार्थौ भविष्यतः। अद्य श्व श्च भविष्यन्ति। भविष्यावो हितायावाम्। भविष्यामो धुना वयम्। युवां प्रीतौ भविष्यथः।

आशीर्विवक्षायां लिङि तिपि लिङाशिषीत्यार्धधातुकत्वेन शबाद्यभावे इतश्चेतीकारलोपे यासुडागमे तस्य सुटि च अतः परत्वस्य सार्वधातुकत्वस्य च भावेनेयादेशाभावे भूयास् स्त् इत्यत्र स्कोः संयोगाद्योरन्ते च (८-२-२९) पदान्ते झलि च परे यः संयोगस्तदाद्यो सकारककारयोर्लोपः स्यात्। इति पूर्वं पदान्तसंयोगादेः सुटः सस्य ततो यासुडवयवस्यापि लोपे सार्वधातुकेत्युकारस्य गुणे प्राप्ते किदाशिषि (३-४-१०४) आशिषि लिङो यासुट् कित्स्यात्। इतिकित्वेन, क्ङिति च (१-१-५) गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। इतिनिषेधे भूयात्। तसि तस्थस्थेति

Jayatu Sanskritam, Kathmandu,.Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तामादेशे यासुटि सुटि च झलपरसंयोगादित्वेन यासुटः सस्य लोपे कित्वेन गुणनिषेधे भूयास्ताम्। झेर्जुसि यासुटि गुणाभावे भूयासुः। सिपि इकारलोपे यासुटि संयोगादिसलोपे गुणाभावे भूयाः। थस्थयोर्तन्तमादेशयोर्यासुटि सुटि च पूर्वसलोपे गुणाभावे भूयास्तम् भूयास्त। मिपोमादेशे यासुटि भूयासम्। वस्मसोर्नित्यंङित इतिसलोपे यासुटि गुणाभावे भूयास्व भूयास्म।

प्रयोगाः—मानभूवं हि भूयासमिति प्रेमात्मनीक्ष्यते। भूयाच्चिरायुर्भवान्। वयं भूयास्म सर्वदा। भूयासुस्ते चिरायुषः। युवां हिताय भूयास्तम्। दीर्घायुर्भूयाः। भूयास्त यूयं सुखिनः सदैव। आवां भूयास्व सुखिनौ। तौ भूयास्तां चिरायुषौ।

अनद्यतनभिन्ने भूते लुङि तिप्यडागमे इकारलोपे शपोपवादेन च्लि लुङि (३-१-४३) धातोः च्लिप्रत्ययः स्याल्लुङि। इति, च्लौ च्लेः सिच् (३-१-४४) च्लेः सिजादेशः स्यात्। इतिसिचि अभू स् त् इत्यत्र गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (२-४-७७) एभ्यः सिचो लुक्स्यात्परस्मैपदेषु। गापाविहेणादेशपिवतीगृह्येते। इति लुकि सार्वधातुकेति गुणेप्राप्ते भूसुवोस्तिङि (७-३-८८) भूसुएतयोः सार्वधातुके तिङि परे गुणो न स्यात्। इतिनिषेधे। अस्तिसिचोऽपृक्ते (७-३-९६) विद्यमानात्सिचोऽस्तेश्चपरस्यापृक्तस्य इडागमः स्यात्। इति ईट्तु न, सिचोलुकालुप्तत्वेन विद्यमानत्वाभावात्। अभूत्। तसस्तामादेशेऽडागमे च्लेः सिचोलुकि गुणनिषेधे अभूताम्। झौ अटि च्लेः सिचोलुकि सिजभ्यस्तविदिभ्यश्च (३-४-१०९) सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्सम्बन्धिनो झेर्जुस् स्यात्। इतिप्राप्ते आतः (३-४-११०) सिज्लुकि आदन्तादेव झेर्जुस्स्यात्। इतिनियमेनाभावे झेरन्तादेशे इतश्चेतीकारलोपे संयोगान्ततकारलोपे भुवोवुगितिवुगागमे अभूवन्। सिपि च्लेः सिचोलुक्यडागमे इकारलोपे रुत्वविसर्गयोः अभूः। थस्थयोः स्तान्तमादेशयोश्च्लेः सिचोलुक्यटि गुणनिषेधे अभूतम् अभूत। मिपोमादेशे च्लेः सिचोलुक्यटि वुगागमे अभूवम्। वस्मसोश्च्लेः सिचोलुक्यटि नित्यंङितइतिसकारलोपे गुणनिषेधे अभूव अभूम।

माङि लुङ् (३-३-१७५) माङि प्रयुज्यमाने धातोर्लुङ् स्यात्। सर्वलकारापवादः। स्मोत्तरे लङ् च (३-३-१७६) स्मोत्तरे माङि प्रयुज्यमाने धातोर्लङ् स्याल्लुङ् च। सर्वलकारापवादः। न माङ्योगे (६-४-७४) माङ्योगे अडाटौ न स्तः। लुङ्लङ्लृङ्क्ष्विति आडजादीनामिति च प्राप्तयोर्निषेधः। मा भवान् भूत्। मास्म भवत् भूद्वा। मास्म भवन् भूवन्वा। मा भूः। मास्म भूः भवो वा।

प्रयोगाः—सततमहमभूवं पात्रमालोकितानाम्। अभून्नृपो विबुधसखः परन्तपः। वयमभूम तदा सहसाकुला। तेऽभूवन्दुःखिताभृशम्। उभावभूतामभिनन्दनीयौ। त्वमभूः सुखितस्तदा। मा भूत्परीवादनवावतारः। मास्मभूः क्रोधदुष्टः।

Jayatu Sanskritam, Kathmandu, Nepal

क्रियातिपत्तौ भविष्यति लृङि इतश्चेतीकारलोपे स्यतासीतिशबपवादे स्येऽडागमे इडागमे गुणादेशषत्वेषु अभविष्यत्। तसि तामादेशे स्याटौ अभविष्यताम्। झौ स्याटौ झस्यान्तादेशे इकारस्य संयोगान्ततकारस्य च लोपे अभविष्यन्। सिपि स्याटौ इकारलोपे रुत्वविसर्गयोः अभविष्यः। थस्थयोस्तत्तमादेशयोः स्याटौ अभविष्यतम् अभविष्यत। मिप्यमादेशे स्येऽडिड्गुणावादेशपूर्वरूपषत्वेषु अभविष्यम्। वस्मसोः स्याटौ नित्यंङितइतिसलोपे अतोदीर्घइतिदीर्घे षत्वे अभविष्याव अभविष्याम।

प्रयोगाः—त्वमनिशमभविष्यस्तत्तथा नाभविष्यत्। उत्तीर्णा अभविष्यामाभविष्यश्चेत्त्वमग्रणीः। नाभविष्यन्हि कार्याणि नाभविष्यमहं यदि। किं वाऽभविष्यदरुणस्तमसां निषेद्धा तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्।

वि० "वर्तमाने परोक्षे.श्वोभाविन्यथ भविष्यति, विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः। ह्योभूते प्रेरणादौ च ...ते लङादयः। सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः" । इतिभूषणौक्तदिशां टितां ङितां च लकाराणां ...कालार्थेषु प्रयोगः, वाक्येषु विषयवशेन पदान्तरसहकारेण च भूतभवद्भविष्यत्वानि परोक्षत्वाद्यतनत्वानद्यतनत्वानि च ...न्तराणि यथा प्रतीयन्ते तदनुसारिलकाराण्याख्यातानि प्रयोज्यानि, यथाहि स प्रातरागमत्। स तत्र बभूव किल, ...पश्यम्, परश्वो द्रष्टास्मि, किं भविष्यति, परारि सुभिक्षमासीत्, अन्येद्युस्त्वं गन्तासि, कदा गमिष्यसि, अद्यैव ...नः, कृष्णः प्रादुर्बभूव इत्यादि। अस्मिन्विषये मञ्जूषायां"—अनद्यतने भूतेपि यदाभूतत्वविवक्षा तदालुङाद्येव, तेन ...र्षीदित्यादौ भूतत्वमात्रविवक्षया लुङि पश्चात् ह्यः पदेनानद्यतनत्वप्रतीतिरिति न दोषः, एवमनद्यतनभविष्यति- ...त्वमात्रविवक्षया लृडाद्यपि श्वः पक्ष्याम इति (परं पदसंस्कारपक्षमादायैवं, वाक्यसंस्कारपक्षे तु नैवमुक्तिः सम्भवति) ...नं कदा गन्ता या एवं पादौ निदधातीत्यादौ अद्यतनेप्यनद्यतनत्वारोपेण लुट्। आरोपफलं तु अतिविलम्बागमनप्रत्या- ...। तथाग्रामान्तरं जिगमिषवः स्थानविशेषे कूपसत्तानिश्चयवन्तो भाविनि तल्लाभे कूपोभविष्यति, अतीते कूपोऽभूदिति ...मे। तत्र तल्लाभगतमतीतत्वादि कूपसत्तायामारोप्य तत्तत्कालप्रत्ययः। बुद्धिविषयत्वमात्रविवक्षया कूपोस्तीति ...प्रत्यय इति वर्तमानेलडित्यादौ भाष्ये स्पष्टम्। एवं च व्यातेने किरणावलीमुदयन इत्यादि भूतत्वानद्यतनत्वपरोक्षत्वा- ...नोपपन्नम्, आरोपफलं त्वतिसुकरत्वशीघ्रनिष्पाद्यत्वादिप्रत्यायनम्" इतिविशेषः। एवंन्यायेन कविप्रयोगेषु क्वचन ...नोविसंवादो विवक्षाभेदेनोपपादनीयः। एकस्मिन्नेव प्रकरणे एकस्मिन्नेव विषये क्वचनपरोक्षत्वदृष्ट्या लिटः, ...नत्वदृष्ट्या लङः, सामान्यभूतत्वदृष्ट्या लुङः प्रयोगः पूर्वापरविसदृशो दृश्यमानोपि तत्र तत्र विवक्षाभेदेन समर्थनीयः, ...श्चेनैतत्समर्थनमिति न्यायेन महाकविप्रयोगामुपपादनेपि पूर्वापरपदप्रकरणाद्यनुसारेण यथोचितं तत्र तत्र प्रयोक्तव्यं ...। पूर्वापरादितो विशेषान्तराप्रतीतौ तु विवक्षाविशेषेण प्रयोगविशेषा उपपाद्याः। पदान्तरेभ्यः प्रत्यक्षत्वे लभ्यमानेपि ...अद्यतनत्वे लभ्यमानेपि लङादेः प्रयोगस्य पदसंस्कारपक्षमादाय समर्थनं नातिरुचिरमिति वाक्यसंस्कारपक्षमेवादाय ...अनुसन्धाय यथोचितप्रयोगे यतनीयमिति दिक्।

प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि सु उद् अभि प्रति परि उप एते प्रादयो धातुयोगिनउपसर्गाः। ते प्राग्धातोः (१-४-८०) गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोज्याः। प्रभवति, समभवन्, पर्यभूत्, अभिबभूवुः। एवमन्येपि क्वाचित्काधातुयोगिनः प्रादुर्भवति,

CC-0. Digitized by eGangotri and MIDF- Delhi

तिरोभवति, अन्तर्भवति। उपसर्गाणामसमस्तत्वेपि संहिता नित्या, नित्या धातूपसर्गयोरित्युक्तेः। भ्वादिधातूनां सत्ताद्यर्थनिर्देश उपलक्षणं, यागात्स्वर्गो भवतीत्यादौ उत्पद्यते इत्याद्यर्थात्। उपसर्गास्त्वर्थविशेषस्य द्योतकाः। उक्तञ्च–"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते, प्रहाराहारसंहारविहारपरिहारवत्" इति। यथाव्यवहारं धातुषूपसर्गयोगः, क्वचिद्द्वित्राद्युपसर्गयोगोपि। उपसर्गयोगेन विशेषः सकर्मकत्वाकर्मकत्वव्यत्ययः, क्वचित्पदव्यत्ययोपि भवति। यथा–प्रभू-प्रकाशे सामर्थ्ये च, हिमवतो गङ्गा प्रभवति। (प्रकाशते), राष्ट्रस्य प्रभवति (ईष्टे), मल्लो मल्लाय प्रभवति (कल्पते); सम्भू-सम्भवे, इदमेवं सम्भवति; उद्भू-उद्भवे, अङ्कुर उद्भवति; प्रतिभू-प्रातिभाव्ये, तस्य प्रतिभवति; विभू-ऐश्वर्ये, स विभवति; एतेऽकर्मकाः। अनुभू-अनुभवे, स सुखमनुभवति; अभि-परि-पराभू-तिरस्कारे, वीरः शत्रूनभि-परि-पराभवति; एते सकर्मकाः। व्यतिभू-परस्परभावे, आत्मनेपदी, व्यतिभवते, इति उपसर्गयोगेन नानार्थाः। एवं वक्ष्यमाणेषु धात्वन्तरेष्वपि यथायथं भवति।

वि० उपसर्गद्योत्या धात्वर्थविशेषकाः सामान्यार्थाः प्राय एवमवगम्यन्ते। प्र-प्रकर्षे प्रयाति प्रकरोति; परा-निरा, अनादरे, पराकरोति निराकरोति; अप-दूरत्वे, अपगच्छति अपसरति; निस्-निर्-दार्ढ्ये, निश्चिनोति निर्धारयति; आ-समन्ताद्भावे, आसेवते आशङ्कते; वि-विशेषे, विलिखति विजयते; अधि-विषयत्वे, अधिकरोति; उद्-ऊर्ध्वत्वे, उद्गच्छति उद्गतिः; अनु-पश्चाद्भावे, अनुगच्छति अनुसरति; अभिपरि-सर्वतोभावे, अभिपश्यति परिलिखति; प्रति-वैपरीत्ये, प्रतिगच्छति; उप-सामीप्ये, उपगच्छति इत्यादि। दिग्दर्शनमेवेदम्। यथाव्यवहारं तत्रतत्रोपसर्गयोगेऽर्थविशेषाः शिष्टप्रयोगतो ज्ञेयाः। उक्तञ्च–"धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते। कञ्चिद्विशेषयत्यर्थं कश्चिदन्यथयत्यपि। यथा प्रस्मरति विस्मरती-त्यादौ धात्वर्थबाधः, विलिखति निदर्शयति प्रकिरतीत्यादौ धात्वर्थानुसरणम्, सन्दर्शयति निश्वसिति प्रश्वसितीत्यादौ धात्वर्थ-वैशेष्यम्, अनुभवति प्रहरति विहरति अवगच्छतीत्यादौ अर्थान्तराणि। द्वित्राद्युपसर्गयोगे व्युत्क्रमेण योगेप्यर्थभेदः। क्वचिण्णिजाद्यन्ते उपसर्गयोगेर्थान्तरमपि यथा ख्याति आख्याति व्याख्याति प्रत्याख्याति; दधाति अभिदधाति अन्वादधाति प्रत्यादधाति समभ्यादधाति; कारयति आकारयति, भावयति संभावयति। इत्येवंदिशा धातूनामुपसर्गयोगवशेन जायमाना अर्थविशेषाः शिष्टव्यवहारतोनुसन्धेयाः।

वाच्यान्तरे-अकर्मकाद्भावे तेन भूयते सम्भूयते, सकर्मकात्कर्मणि तेन सुखमनुभूयते, तेन शत्रुरभिभूयते। प्रेरणायां णिचि कर्तरि भावयति-ते, कर्मणि भाव्यते सम्भाव्यते, इच्छायां सनि कर्तरि बुभूषति, भावे बुभूष्यते, क्रियासमभिहारे यङि बोभूयते यङ् लुकि बोभवीति, तिङन्तात्तरसमपोः भवतितराम् भवतितमाम् इति बहुन्याख्यातानि जायन्ते। वक्ष्यमाणकृत्प्रत्ययेषु घञि-भावः प्रभावः, भवनं णिचि-सम्भावनं (आदरः), क्तिनि-भूतिः उद्भूतिः, अपि-भवः अनुभवः घञि-भावः अनुभावः, णिचि युचि-भावना इत्यादीनि नामानि, शतरि-भवन् भविष्यन्, कर्मणि शानचि-अनुभूयमानः, तृन्तृचोः-भविता, ण्वुलि भावकः, क्ते-भूतः उद्भूतः णौ-भावितः, क्तवतौ-भूतवान् णौ-भावितवान्, णिनौ-भावी, सनि उौ-बुभूषुः, इष्णुचि-भूष्णुः भविष्णुः इत्यादीनि विशेषणानि; क्त्वायां-भूत्वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३

भावयित्वा, ल्यपि-अनुभूय सम्भूय णौ-सम्भाव्य, तुमुनि-भवितुं णौ-सम्भावयितुम् इत्यादीन्यव्ययानि जायन्ते। इत्येवमेकस्यापि भूधातोः शतशः शब्दानिष्पद्यन्ते। एवं धात्वन्तरेष्वप्यूह्यम्।

वि० कर्तरि वाच्येऽभिहितः कर्ता प्रथमान्तस्तदनुसारिपुरुषवचनमाख्यातं प्रयोज्यम्, एकैनैव पदेन कर्तुः प्रदर्शने एवम्, अनेकदेन प्रदर्शने त्वनेककर्तृणां समुच्चये समानपुरुषवचनत्वे समष्टिसंख्यया, प्रत्येकान्वयतात्पर्येण व्यष्टिसंख्यया वाऽऽख्याते ... भिन्नपुरुषत्वे उत्तमानुत्तमसमवाये उत्तमः, प्रथममध्यमसमवाये मध्यमः, शेषे प्रथमः पुरुषः, विभिन्नवचनत्वे ... साम्ये वैषम्ये वा समष्टिसंख्यया वचनमाख्याते भवति, अनेककर्तृणां विकल्पे तु सन्निहितस्यैकस्यानुसार्याख्यातं ...। यथा—चैत्रो मैत्रश्च भवतः भवति वा, चैत्रो मैत्रो देवश्च भवन्ति भवति वा, पितरौ श्वशुरौ च पूजनीया ..., पूजनीयौ भवतः वा, त्वमहं च भवावः, स त्वमहं च भवामः, युवामहं च भवामः, स युवां च चतुरा भवथः, ... वा गच्छामि, अहं त्वं तौ वा गच्छतः, सः त्वं वा पश्यसि इत्यादि। एवं कर्मणिवाच्ये कर्मानुसार्याख्यातम्। एष ... माधवीयवृत्तौ भूषणादौ च प्रपञ्चितः।

प्रयोगाः—वयं स्वकर्मसु प्रभवामः। नानुभूयते मया दुःखम्। प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे। प्रभुर्बुभूषुर्भुवनत्रयस्य यः। तत्र मा संशयो-भूत्। यदभावि तद्भावि। भूयिष्ठं भव दक्षिणा परिजने। तेनाभूयत धृष्टेन। भावयन्ति विपश्चितः। प्रभावमनुभूय नम्रेण भूयते।

आत्मनेपदिन एधधातो रूपाणि—

सार्वधातुकेषु—

एध वृद्धौ (उपचये) अकर्मकः सेट् अन्त्याकारस्यानुदात्तस्येत्वादात्मनेपदी। एध्धातोः कर्तरि लटि प्रथमपुरुषैकवचने ते शपि **टित आत्मनेपदानां टेरे** (३-४-७९) टितो लस्यात्मनेपदानां टेरेत्वं स्यात्। इति ताकारस्य व्यपदेशिभावेनान्तादित्वेन टित्वादेत्वे एधते। आतामि शपि टेराम एत्वे, **सार्वधातुकमपित्** (१-२-४) अपित्सार्वधातुकं ङिद्वत्स्यात्। इति आते इत्यस्य ङित्त्वे **आतो ङितः** (७-२-८१) अतः परस्य ङितामाकारस्य इय् स्यात्। इत्याकारस्येयादेशो गुणैकादेशो लोपोव्योर्वलीति यलोपे एधेते। झे शपि झस्यान्तादेशो पररूपे टेरेत्वे एधन्ते। मध्यमपुरुषे थासि शपि **थासः से** (३-४-८०) टितो लस्य थासः से स्यात्। इति से आदेशे एधसे। आथामि शपि आम एत्वे आकार-स्येयादेशे गुणे यलोपे एधेथे। ध्वमि शपि टेरम एत्वे एधध्वे उत्तमपुरुषे इटि इकारस्यैत्वे शपि एधए इत्यत्र वृद्धिं बाधित्वा अतोगुणे इति पररूपे एधे। वहिमह्योष्टेरेत्वे शपि अतोदीर्घोयञीति दीर्घे एधावहे एधामहे।

लोटि–ते एत्वे **आमेतः** (३-४-९०) लोट एकारस्याऽऽम्स्यात्। इत्येकारस्यामि शपि एधताम्। आतामि टेरेत्वे शपि ङित्त्वेनाकारस्येयादेशे गुणे यलोपे एकारस्याऽऽमि एधेताम्। झस्यान्तादेशे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

टेरेत्वे शपि एकारस्यामि एधन्ताम्। थासः से भावे शपि सवाभ्यां वामौ (३-४-९१) सकारवकारा[illegible] परस्य लोडेतः क्रमाद्व अम् एतौ स्तः। इत्येकारस्य वादेशे एधस्व। आथामि पूर्ववत् एधेथाम्। [illegible] टेरेत्वे शपि वकारात्परस्यैकारस्याऽमादेशे एधध्वम्। इटि एत्वे शपि एकारस्याऽऽमादेशे प्राप्ते एत [illegible] (३-४-९३) लोडुत्तमस्य एत ऐ स्यात्। इत्यैकारे आडुत्तमस्येत्याडागमे एध-आ-एइत्यत्र आ[illegible] वृद्धिरेचीति वृद्धिद्वये एधै। वहिमह्योष्टेरेत्वे शपि एकारस्यैत्वे आडागमे सवर्णदीर्घे एधा[illegible] एधामहै।

लङि–ते शपि अडागमे प्राप्ते आडजादीनाम् (६-४-७२) अजादीनामाट् स्याल्लुङादिषु। [illegible] टागमे आटश्चेति वृद्धौ लङष्टित्वाभावेन एत्वाप्रवृत्तेः ऐधत। आतामि शप्याडागमवृद्ध्योः आ[illegible] यादेशे गुणे यलोपे ऐधेताम्। झस्यान्तादेशे शबाडागमवृद्धिषु पररूपे ऐधन्त। थासि शबाड्वृ[illegible] रुत्वविसर्गेषु ऐधथाः। आथामि पूर्ववत् ऐधेथाम्। ध्वमि शबाड्वृद्धिषु ऐधध्वम्। इटि श[illegible] ड्वृद्धिषु ऐधे। वहिमह्योः शबाड्वृद्धिषु अतो दीर्घे ऐधावहि ऐधामहि।

विधिलिङि–ते शपि लिङः सीयुट् (३-४-१०२) लिङात्मनेपदस्य सीयुडागमः स्यात्। [illegible] सीयागमे लिङःसलोपोनन्त्यस्येति सलोपे गुणैकादेशे लोपोव्योरिति यलोपे एधेत। आतामि [illegible] सीयुटि सलोपे वलोभावेन यलोपाभावे एधेयाताम्। झेऽन्तादेशे प्राप्ते झस्य रन् (३-४-१०४) लि[illegible] झस्य रन्स्यात्। इति रन्नादेशे शप्-सीयुट्-सलोप-गुण-यलोपेषु एधेरन्। थासि शप्सीयुट्-स[illegible] गुण-यलोपेषु एधेथाः। आथामि पूर्ववत् एधेयाथाम्। ध्वमि शप्सीयुट्-सलोप-गुण-यलोपेषु एधे[illegible] इटि इटोऽत् (३-४-१०६) लिङादेशस्य इटोऽत्स्यात्। इत्यकारादेशे शप्सीयुट्सलोपगुणेषु एधे[illegible] वहिमह्योः शप्सीयुट्-सलोप-गुण-यलोपेषु एधेवहि एधेमहि।

आर्धधातुकेषु—

लिटि–इजादेश्च गुरुमतोऽनृच्छः (३-१-३६) इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्ततः आम्[illegible] ल्लिटि। इत्यामि आमः (२-४-८१) आमः परस्य लेर्लुक्स्यात्। इति लकारलोपे कृञ्चानुप्रयु[illegible] लिटि (३-१-४०) आमन्ताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते। इत्यामन्तात्परं कृभ्वस्तीनां लिट्[illegible] णामनुप्रयोगः। तत्र कृञोनुप्रयोगे एधां-कृ-ल-इति जाते कृञोञित्वेनोभयपदे प्राप्ते आम्प्रत्ययवत्कृ[illegible] प्रयोगस्य (१-३-६३) आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या तुल्[illegible] प्रयुज्यमानात्कृञोप्यात्मनेपदं स्यात्। अत्र पूर्ववदित्यनुवर्त्य आम्प्रत्ययवत्कृञोनुप्रयोगस्य[illegible] वत्कृञोनुप्रयोगस्येति वाक्यभेदेन आम्प्रकृतेरात्मनेपदित्व एव कृञ आत्मनेपदं परस्मैपदि[illegible] कर्तृगेपि फले परस्मैपदमिति विधानादेधतेरिव कृञोप्यात्मनेपदे ते लिटस्तझयोरेशिरेच् (३-४[illegible]

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिङादेशयोस्तझयोः एश् इरेच् एतौ स्तः। अत्र एकारोच्चारणं ज्ञापकं तङादेशानां टेरेत्वं नेति, तेन-झारौरसां न। इति ए इत्यादेशे सार्वधातुकार्धधातुकयोरिति गुणे प्राप्ते **असंयोगाल्लिट् कित्** (१-२-५) असंयोगात्परोऽपिल्लिट् कित्स्यात्। इति कित्वेन क्ङिति चेति निषेधे द्वित्वात्परत्वाद्यणि प्राप्ते द्विर्वचनेऽचि (१-१-५९) द्वित्वनिमित्तेऽचि परे अच आदेशो न स्यात् द्वित्वे कर्तव्ये। इति निषेधे लिटिधातोरिति कृ इत्यस्य द्वित्वे **उरत्** (७-४-६६) अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे। इत्यत्वे रपरत्वे हलादिशेषेण रेफापहारे **कुहोश्चुः** (७-४-६२) अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात्। इति कस्य चत्वे ऋकारस्य यणि रेफे आमो मस्यानुस्वारे पदत्वेन पक्षे परसवर्णे च एधाञ्चक्रे, एधांचक्रे। आमन्तोत्तरं कृञ आतामि टेरेत्वे यणो निषेधेन द्वित्वे ऋकारस्य अर्भावे हलादिशेषे चत्वे यणि एधाञ्चक्राते। झस्य इरे इत्यादेशे द्वित्वादौ यणि एधाञ्चक्रिरे। थासः सेभावे द्वित्वादौ चकृ-से इत्यत्र आर्धधातुकस्येड्वलादेरितीडागमे प्राप्ते **एकाच उपदेशेनुदात्तात्** (७-२-१०) उपदेश इत्युभयान्वयि। उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्य इण्न स्यात्। इति निषेधे सस्य षत्वे एधाञ्चकृषे। आथामि पूर्ववत् एधाञ्चक्राथे। ध्वमि टेरेत्वे द्वित्वादौ इण्निषेधे **इणः षीध्वंलुङ्लिटां धोऽङ्गात्** (८-३-७८) इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यादेशः स्यात्। इति धस्य ढत्वे एधाञ्चकृढ्वे। इटि एत्वे द्वित्वादौ यणि एधाञ्चक्रे। वहिमह्योष्टेरेत्वे द्वित्वादौ इण्निषेधे एधाञ्चकृवहे एधाञ्चकृमहे। भुवोनुप्रयोगे एधांबभूव-बभूवतुः बभूवुरित्यादि। अस्तेरनुप्रयोगे अस्-ल इत्यत्र परस्मैपदे तिपां णलाद्यादेशेषु असो द्वित्वे हलादिशेषे अ-अस्-अ इत्यत्र सवर्णदीर्घापवादेन अतोगुणे इति प्राप्ते **अत आदेः** (७-४-७०) अभ्यासस्यादेरतो दीर्घः स्यात्। इति दीर्घे सवर्णदीर्घे च एधामास एधामासतुः एधामासुः, सिपि थलि द्वित्वादौ थल इडागमे एधामासिथ एधामासथुः एधामास, एधामास एधामासिव एधामासिम। वमयोरिट् आम्प्रत्ययस्थलेष्वन्यत्रापि कृभ्वस्तीनामनुप्रयोग एवमेव, मूलधातोः परस्मैपदित्वे तु कृञोपि परस्मैपदं चकारेत्यादि।

टि० १. आमो मस्येत्वं तु न, तथात्वे कास्प्रत्ययादाममन्त्रे लिटि दयायासश्चेति आस्कास्भ्यां विहितस्यामो मित्वा-भावेऽपि परत्वेन सवर्णदीर्घेणैव सिद्धेराम्विधानवैयर्थ्यप्रसङ्गेनामो मस्येत्वं नेति ज्ञापनात्।

टि० २. कृञ्चानुप्रयुज्यते लिटीति कृञ एवानुप्रयोगे आम्प्रत्ययवत्कृञोनुप्रयोगस्येत्यत्र कृञ उल्लेखवैयर्थ्यापत्त्याऽनु-प्रयोगस्यापीति ज्ञापनेन कृभ्वस्तियोग इत्यारभ्य कृञो द्वितीयेति ञकारेण प्रत्याहाराश्रयणात्कृञिति कृभ्वस्तीनां ग्रहः। अन्येषु प्रत्याहारान्तर्गतोप्यनन्वितार्थत्वान्नानुप्रयुज्यते। कृभ्वस्तीनां क्रियासामान्यमाम्प्रकृतीनां विशेषक्रियाऽर्थस्तयोर-न्वयः। विपर्यासनिवृत्यर्थं व्यवहितनिवृत्यर्थञ्चेति भाष्यवार्तिकोक्तेरव्यवहितः पश्चात्प्रयोग एवानुप्रयोगः। ततश्च तं पातयां प्रथममास पपात पश्चात्, प्रभ्रंशयां यो नहुषं चकारेति महाकविप्रयोगोदुरुपपाद एव, व्याकरणान्तरदृशा एवं साधुत्वं स्यात्। (वेदेतु नायमनुप्रयोगनियमः।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० ३. अस्तेरनुप्रयोगे अस्तेर्भूरिति भूभावस्तु न, तथात्वे एकेनैव गतार्थतया कृभ्वित्ति कृञ्चेति वाऽनुक्त्वा कृ... प्रत्याहारक्लेशवैयर्थ्यापत्तेः, उक्तं च अत उत्सार्वधातुक इति सूत्रभाष्ये "अनुप्रयोगे भूभावेनास्तेरबाधन" मिति।

वि० ४. एकाचउपदेश इति सूत्रे अच इत्येकत्वविवक्षयैव तद्वतो ग्रहणे सिद्धे एकग्रहणसामर्थ्यादनेकाच्कोपदेशव्यावृ... तेन हन एकाच्त्वेन तदादेशस्य वधस्थानेकाच्त्वेपि वधादेशस्थले इण्निषेधाभावेन अवधीदित्यादिसिद्धिः। उपदेशेऽनुदात्त... शक्लृपच्मुचित्यादिना संगृहीताः।

लुटि—ते शबपवादेन तास्प्रत्यये इडागमे लुटःप्रथमस्येति डाभावे टिलोपे दीधीवेवीटा... लघूपधगुणनिषेधे एधिता। आतांझयोस्तासि इडागमे रौरसादेशयो रिचेति सलोपे एधि... एधितारः। थासः सेभावे तासीडागमे तासस्त्योरिति सलोपे एधितासे। आथामि टेरेत्वे तासि... एधितासाथे, ध्वमि टेरेत्वे तासीटि धि च (८-२-२५) धादौ प्रत्यये परे तासस्त्योर्लोपः स्यात्।... सलोपे एधिताध्वे। इटि एत्वे तासीटि ह एति (७-४-५२) तासस्त्योः सस्य हः स्यादेति ... इति हत्वे एधिताहे। वहिमह्योष्टेरेत्वे तासीटि एधितास्वहे एधितास्महे।

लृटि—ते एत्वे शबपवादेन स्ये इडागमे सस्य षत्वे एधिष्यते। आतामि टेरेत्वे स्ये इटि आ... स्येयादेशे यलोपे गुणैकादेशे षत्वे एधिष्येते। झस्यान्तादेशे एत्वे स्ये इटि पररूपे षत्वे एधिष्य... थासः सेभावे स्येट्षत्वेषु एधिष्यसे, आथामि पूर्ववत् एधिष्येथे, ध्वमि एत्वस्येट्षत्वेषु एधि... ष्यध्वे। इटि एत्वस्येट्पररूपषत्वेषु एधिष्ये। वहिमह्योरेत्वे स्ये इटि अतो दीर्घे षत्वे एधिष्या... एधिष्यामहे।

आशिषि लिङि—ते लिङाशिषीत्यार्धधातुकत्वेन शबभावे सीयुटि तकारस्य सुडागमे आर्धधा... कत्वेन सलोपाभावे सीयुटः पूर्वमिडागमे यलोपे सकारयोः षत्वे एधिषीष्ट। आतामि सीयुटि त... रात्पूर्वं सुटि सीयुटः पूर्वमिटि पूर्वसस्य षत्वे एधिषीयास्ताम्। झस्य रन्नादेशे सीयुट्-यलोपेट्षत्वे... एधिषीरन्। थासि सीयुटि थस्य सुटि यलोपेट्षत्वेषु थस्य ष्टुत्वे एधिषीष्ठाः। आथामि पूर्व... एधिषीयास्थाम्। ध्वमि सीयुड्-यलोपे-ट्-षत्वेषु इणः परत्वेपि इटः प्रत्ययभक्तत्वेन इणन्ताङ्गात्पर... भावेन ढत्वाभावे एधिषीढ्वम्। इटोऽत्वे सीयुडिट्षत्वेषु एधिषीय, वहिमह्योः सीयुड्यलोपष... एधिषीवहि एधिषीमहि।

लुङि—ते च्लेः सिचि इडागमे आडजादीनामित्याडागमे आटश्चेति वृद्धौ षत्वे ष्टुत्वे ऐधिष्ट... आतामि च्ले सिचि इड्याटि वृद्धौ षत्वे ऐधिषाताम्। झेन्तादेशे प्राप्ते आत्मनेपदेष्वनतः (७-१-... अनकारात्परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात्। इत्यदादेशे च्लिसिचि इडाड्वृद्धिष... ऐधिषत। थासि च्लि-सिजिडाड्-वृद्धि-षत्व-ष्टुत्वेषु ऐधिष्ठाः। आथामि पूर्ववत् ऐधिषाथाम्। ... च्लिसिजिडाड्वृद्धिषु धिचेति सलोपे धस्य ढत्वे ऐधिढ्वम्। इड्भिन्न एवेह इण्गृह्यत इति म...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऐधिध्वम्। अत्रानचि च यणोमयोद्वे वाच्ये इति ढधयोर्वमयोश्च द्वित्वविकल्पे प्रस्तारभेदेन षोडश रूपाणि। इटि श्लि-सिजिडाड्-वृद्धि-षत्वेषु ऐधिषि। वहिमह्योः श्लिसिजिडाड्वृद्धिषत्वेषु ऐधिषहि ऐधिष्महि।

लृङि-ते स्ये इटि आटि वृद्धौ षत्वे ऐधिष्यत। आतामि स्ये इटि आदिवृद्धौ ङित्वेनाकारस्येयादेशे गुणे यलोपे ऐधिष्येताम्। झस्यान्तादेशे स्येडाड्-वृद्धि-पररूप-षत्वेषु ऐधिष्यन्त। थासि स्ये इडाड्वृद्धिषत्वेषु ऐधिष्यथाः। आथामि पूर्ववत् ऐधिष्येथाम्। ध्वमि स्येडाड्वृद्धिषत्वेषु ऐधिष्यध्वम्। इटि स्येडाड्वृद्धिगुणषत्वेषु ऐधिष्ये। वहिमह्योः स्येडाड्वृद्धिषत्वेषु अतो दीर्घे ऐधिष्यावहि ऐधिष्यामहि।

वि० एधधातोरन्त्याकारस्यानुदात्तस्येत्वेन परिशिष्टस्य उपदेशे हलन्तस्य धातोरनुदात्तत्वाभावेन वलादौ एकाच-उपदेशेऽनुदात्तादितीण्निषेधस्य न प्रवृत्तिः, वर्तमानस्यैवौपदेशिकानुदात्तस्य तन्निमित्तत्वात्।

उपसर्गयोगे समेधते, भावे एध्यते, समेध्यते, णिचि एधयते, सनि एदिधिषते, कृत्सु तव्ये एधितव्यम्, अनीयरि एधनीयम्, ल्युटि समेधनं, क्ते समेधितः, शानचि एधमानः समेधमानः, अ एधा (दारु), असुनि एधाः (दारु) त्वायामेधित्वा, ल्यपि समेध्य, तुमुनि समेधितुम्।

प्रयोगाः—समेधमानो विभवैः। विद्ययासौ समेधते। समेधिष्ट निरन्तरम्। समैधत स मेधया। यथा उदकस्योपस्कुरुते। यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। समेधितः प्रभावोऽस्य।

वि० १. परस्मैपदिषु भूधातुः आत्मनेपदिषु एधधातुः प्रकृतित्वेन पूर्वं निर्दिष्टौ, अत उत्तरेषां धातूनां विशेषोपदिष्टकार्यैः सहैवं प्रक्रियया रूपाणि निष्पादनीयानि। धातुपाठे उदात्त इति सेटः, अनुदात्त इत्यनिटः, उदात्तेदिति परस्मैपदिनः, अनुदात्तेदित्यात्मनेपदिनः संज्ञा, उदात्तेतोपि ङितआत्मनेपदं ञितः स्वरितेतश्चोभयपदम् इडागमस्य भावाभावौ चेत्यनुसन्धेयम्।

वि० २. तिङां पर्यवसितसामान्यस्वरूपाणीमानि—परस्मैपदेषु—लटि-ति तः अन्ति, सि थः थ, मि वः मः; लोटि—तु तात् अन्तु, हि तम् त, आनि आव आम; लङि-त् ताम् अन्, स् तम् त, अम् व म; विधिलिङि—यात् याताम् युः, याः यातम् यात, याम् याव याम; लिटि-अ अतुः उः, थ अथुः अ, अ व म; लुटि-ता तारौ तारः, तासि तास्थः तास्थ, तास्मि तास्वः तास्मः; लृटि-स्यति स्यतः स्यन्ति, स्यसि स्यथः स्यथ, स्यामि स्यावः स्यामः; आशिषि-यात् यास्ताम्, यासुः, याः यास्तम् यास्त, यासम् यास्व यास्म; लुङि-त् ताम् अन्, अः तम् त, अम् व म; लृङि—स्यत् स्यताम् स्यन्, स्यः स्यतम् स्यत, स्यम् स्याव स्याम। आत्मनेपदेषु—लटि—ते आते अन्ते, से आथे ध्वे, ए वहे महे; लोटि—ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ए आवहै आमहै; लङि—त आताम् अन्त, थाः आथाम् ध्वम्, इ वहि महि; विधिलिङि—ईत ईयाताम् ईरन्, ईथा ईयाथाम् ईध्वम्, ईय ईवहि ईमहि; लिटि—ए आते इरे, से आथे ध्वे, ए वहे महे; लुटि—ता तारौ तारः, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे; लृटि—स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यामहे; आशिषि-सीष्ट सीयास्ताम् सीरन्, सीष्ठाः सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि। लुङि–त आताम् अत, थाः आथाम् ध्वम्, इ वहि महि। लृङि–स्यत स्येताम् स्यन्त, स्यथा स्येथाम् स्यध्वम्, स्ये स्यावहि स्यामहि।

इड्भावाभावविशेषः–

आर्धधातुकस्येड्वलादेः (७-२-३५) वलादेरार्धधातुकस्येट् स्यात्। **एकाच उपदेशेऽनुदात्तात्** (७-२-१०) उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येण्न स्यात्। अनुदात्ताः अजन्तेषु ऊकारान्तेभ्यो भूलूसूप्रभृतिभ्यः ऋकारान्तेभ्यः कॄ-तॄ-हॄ-प्रभृतिभ्यः यु-रु-क्ष्णु-शीङ्-स्नु-क्षु-श्वि-डीङ्-श्रि-वृङ् वृञ्भ्यश्चभिन्ना एकाज्धातवः, तेन दाता धाता चेता स्तोता इत्यादिषु नेट्, भविता लविता सविता तरिता वरिता यविता इत्यादाविट्। हलन्तेषु कान्तः शक्लृ एकः, चान्ताः पच्-मुच्-रिच्-वच्-विच्-सिच्-एते षट्, छान्तेषु प्रच्छ् एकः, जान्तेषु त्यज्-निज्-भज्-भञ्ज-भुज्-भ्रस्ज-मस्ज-यज्-युज्-रुज्-रञ्ज-विजिर्-स्वञ्ज-सञ्ज्-सृज्-एते पञ्चदश, दान्तेषु अद्-क्षुद्-खिद्-छिद्-तुद्-नुद्-पद्य-भिद्-विद्य-विनद्-शद्-सद्-स्विद्य-स्कन्द्-हद्-एते पञ्चदश, धान्तेषु क्रुध्-क्षुध्-बुध्य-बन्ध-युध्-रुध्-राध्-व्यध्-शुध्-साध्-सिध्य-एते एकादश, नान्तेषु मन्य-हन्-द्वौ, पान्तेषु आप्-छिप्-छुप्-तप्-तिप्-तृप्य-दृप्य-लिप्-लुप्-वप्-शप्-स्वप्-सृप्-एते त्रयोदश, भान्तेषु यभ् रभ्-लभ्-एते त्रयः, मान्तेषु गम्-नम्-यम्-रम्-एते चत्वारः, शान्तेषु क्रुश्-दंश्-दिश्-दृश्-मृश्-रुश्-रिश्-लिश्-विश्-स्पृश्-एते दश, षान्तेषु कृष्-त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-शिष्-शुष्-शुष्य-श्लिष्य-एते एकादश, सान्तेषु घस्-वस्-द्वौ, हान्तेषु दह्-दिह्-दुह्-नह्-मिह्-रुह्-लिह्-वह्-एतेऽष्टौ चेति द्व्यधिकं शतं धात्तवोऽनुदात्ताः। तेन पक्ता मोक्ता भक्ता क्रोद्धा लब्धा गन्ता द्रेष्टा दग्धा इत्यादौ नेट्, अन्यत्र एधिता बाधिता वर्धिता यायिता इत्यादाविट्। तृप्य-दृप्य-स्विद्य-पद्य-सिध्य-युध्य-मन्य-पुष्य-श्लिष्य इति श्यना निर्देशाद्दैवादिकानामेव, वसेर्भौवादिकस्यैव, यौतेरादादिकस्यैव ग्रहाद्गणान्तरपठितानां नेह ग्रहः; णिजिर्-विजिर्-शक्लृ इति सानुबन्धानामेवेह ग्रहः। विद इति विद्लृ लाभे इति तौदादिक एव भाष्यादौ गृहीतः, व्याघ्रभूत्यादिमते तु न। रञ्ज-मस्ज-अद-पद-नुद-क्षुध-शुष-पुष-शिष-एते भाष्यानुक्ता अपि व्याघ्रभूत्यादिसंमताः।

वि० एताः संग्रहकारिकाः–ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुक्षुश्विडीङ्श्रिभिः। वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः। शक्लृपच्मुचिरिच्विच्सिच्प्रच्छत्यज्निजिर्भजः। भञ्जभुज्भ्रस्जमस्जियज्युजरुजरञ्ज्विजिर्स्वञ्जिसञ्जसृजः॥ अद्-क्षुद्खिद्छिद्तुदनुदः पद्यभिद्विद्यतिर्विनद्। शद्सदिस्विद्यतिस्कन्दि हदिक्रुध्क्षुधिबुध्यती॥ बन्धिर्युधिरुधी राधिव्यध्शुधः साधि-सिध्यती, मन्यहन्नाप्क्षिप्छुपितप्तिपस्तृप्यतिदृप्यती॥ लिप्लुप्वप्शप्स्वप्सृपियभ्रभ्लभ्गम्नम्यमो रमिः, क्रुशिर्दंशिदिशिदृशमृशि-रुश्लिश्विशस्पृशः कृषिः॥ त्विष्तुष्द्विष्दुष्पुष्यपिष्विष्शिष्शुष्श्लिष्यतयो घसिः। वसतिर्दहदिहिदुहो नह्मिह्रुह्लिह्वहिस्तथा। अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम्। तुदादौ मतभेदेन स्थितौ यौ च चुरादिषु॥ तृप्दृपी तौ वारयितुं श्यना निर्देश आदृतः। स्विद्यपद्यौ सिध्यबुध्यौ मन्यपुष्यश्लिषः श्यना॥ वसिः शपा लुका यौतिर्निर्दिष्टोऽन्यनिवृत्तये। निर्विजिर्-...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

…दनुबन्धा अमी तथा ॥ विन्दतिश्चान्द्रदौर्गादेरिष्टो भाष्येपि दृश्यते । व्याघ्रभूत्यादयस्त्वेनं नेहपेठुरिति स्थितम् ॥
…ह्सी अदिपदी नुद्क्षुधशुषिपुषी शिषिः । भाष्यानुक्ता नवेहोक्ता व्याघ्रभूत्यादिसंमतेः ॥

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि (७-२-१२) एभ्यो लिट इण्न स्यात् । एकाचउपदेशेऽनुदात्तात् श्र्युकः क्तितीत्येव निषेधे सिद्धेऽयमारम्भो लिटि क्रादय एवानिटस्ततोऽन्ये सेट इति नियमार्थः । तेन विभिदिव लुलुविथेत्यादावपिट् । अनुदात्तोपदेशानां कृ-सृ-भृ-एषां त्रयाणामेकाचउपदेशे इति प्रकृत्याश्रयो निषेधः, वृङ्वृञोः श्र्युकः क्तितीति प्रत्ययाश्रयो निषेधस्तदुभयस्याप्ययं नियमः, स्तु-द्रु-स्रु-श्रुवां तु ऋतो भारद्वाजस्येति ऋदन्तादेव थलो नेट् अन्यस्य तु स्यादेवेति नियमेन भारद्वाजमतेप्राप्तोप्यनेन निवर्त्यते । चकर्थ चकृव-म सस्रुव-म वभृव म तुष्टोथ तुष्टुव-म शुश्रोथ शुश्रुव-म । **अचस्तास्वत्थल्यनिटो नित्यम्** (७-२-६१) उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण्न स्यात् । उपदेशेऽजन्तस्यैकाचोनुदात्तस्य निड्धातोस्तासाविव थल्यपि नेडित्यर्थः । बिभेथ जुहोथ भेत्ता होता । तासि वेट्कानां धूञादीनां तु थलि नेण्निषेध इत्यर्थं तासौ नित्यानिट इति । यस्य तासि सत्त्वं तस्यैवात्र निषेधः, तेन अदादेशघसेस्तासेरभावात् जघसिथेत्यत्र न निषेधः । **उपदेशेऽत्वतः** (७-२-६२) उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इण्न स्यात् । पक्ता पपक्थ, यष्टा इयष्ठ । उपदेशेऽत्वत इत्युक्तेरिह भवति कर्ष्टा चकर्षिथ । नित्यानिट इत्युक्तेरूदित्वेन वेटोऽञ्चुप्रभृतेर्न निषेधः आनञ्जिथ, चकमिथ । **ऋतो भारद्वाजस्य** (७-२-६३) तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजमते, तेनान्यमते स्यादेव । चकर्थ, पेचिथ पपक्थ । अचस्तास्वत् उपदेशेऽत्वत इति योगद्वयप्रापितस्यैवायं भारद्वाजनियमो निवर्तको, नतु कृसृभृवृइत्यादिनियमप्रापितस्यापि, अनन्तरस्य विधिर्वाप्रतिषेधोवेति न्यायात्

वि० अयमत्रसंग्रहः—अजन्तोऽकारवान्वा यस्तास्य निट् थलि वेडयम् । ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेट् ॥ कृसृभृवृ—अचस्तास्वत्—उपदेशेऽत्वतः-ऋतोभारद्वाजस्येति सूत्रचतुष्टयस्यायं निष्कर्षः—यो धातुः ऋदन्तभिन्नोऽजन्तो …वा तासौ नित्यानिट् तस्य थलि भारद्वाजमते इट् अन्यमते नेतिवेट्, य ऋदन्तस्तासौ नित्यानिट् तस्य सर्वमते थलि …ऽपि नित्यानिटो विकल्पितेटश्च लिटि वस्मसोः क्रादिनियमान्नित्यमिट्, क्रादीनां तु सर्वत्र नेट्, स्तुद्रुस्रुश्रुवामऋदन्तत्वेपि …स्तास्वदुपदेशेऽत्वत इति सूत्रद्वयप्राप्तस्यैव निषेधस्य भारद्वाजनियमेन निवर्तनात्क्रादिनियमप्राप्तस्यानिवर्तनात्थल्यपि नेट् ।

लिङ्सिचोरात्मनेपदेषु (७-२-४२) वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड् वा स्यात्तङि । वरिषीष्ट वृषीष्ट, आस्तरिष्ट आस्तीर्ष्ट । **ऋतश्च संयोगादेः** (७-२-४३) ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड् वा स्यात्तङि । स्मरिषीष्ट स्मृषीष्ट । **स्वरतिसूतिसूयतिधूञूदितो वा** (७-२-४४) स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड् वा स्यात् । सोता सविता, गोपिता गोप्ता । **रधादिभ्यश्च** (७-२-४५) रधादिभ्यः परस्य वलादेरार्धधातुकस्येड् वा स्यात् । रधिता रद्धा, नंशिता नंष्टा ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तीषसहलुभरुषरिषः (७-२-४८) इच्छत्यादेः परस्य तादेरार्धधातुकस्येड् वा स्यात्। एषिता एष्टा। सहिता सोढा। **सेऽसिचि कृतचृतच्छृदतृदनृतः** (७-२-५७) एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्येड् वा स्यात्। कर्तिष्यति कर्त्स्यति, नर्तिष्यति नर्त्स्यति। **इडत्यर्तिव्ययतीनाम्** (७-२-...) अदृक्रव्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आदिथ आरिथ। **ऋद्धनोः स्ये** (७-२-७०) ऋदन्तात् हन्तेश्च स्यस्य इट् स्यात्। करिष्यति हनिष्यति। **स्तुसुधूञ्भ्यः परस्मैपदेषु** (७-२-७२) एभ्यः सिच इट् स्यात्परस्मैपदेषु। अस्तावीत् अधावीत्। **यमरमनमातां सक् च** (७-२-७३) एषां सक् स्यादेभ्यः परस्य सिच इट् च परस्मैपदेषु। व्यरंसीत् अयासीत्। **रुदादिभ्यः सार्वधातुके** (७-२-७६) एभ्यः परस्य वलादेः सार्वधातुकस्येट् स्यात्। रोदिति अरोदीत्, स्वपिति अस्वपीत्। **श्र्युकः किति** (७-२-...) श्रिञ एकाच उगन्ताच्च परयोर्गित्कितोरिण्न स्यात्। श्रित्वा श्रितः, लूनः। **कृत्सु-नेड्वशि कृति** (...) वशादौ कृति परे इण्न स्यात्। व-र-म-नादौ प्रयोजनम्। ईश्वरः दीप्तः भस्म याच्ञा। **तितुत्रतथसिसुसरकसेषु च** (७-२-९) एषु कृत्सु परेष्विण्न स्यात्। दीप्तिः सक्तुः तन्त्रम् हस्तः काष्ठम् कुक्षिः इक्षुः अक्षरम् कल्कः वत्सः। **श्वीदितो निष्ठायाम्** (७-२-१४) श्वयतेरीदितश्च निष्ठायामिण्न स्यात्। शूनः लग्नः। ... **विभाषा** (७-२-१५) यस्य धातोर्विभाषयेट् क्वचिदुक्तस्तस्य निष्ठायामिण्न स्यात्। विधूतः ... **आदितश्च** (७-२-१६) आदितो धातोर्निष्ठायामिण्न स्यात्। स्विण्णः स्विन्नः। **विभाषा भावादिकर्मणोः** (७-२-१) भावे आदि कर्मणि च आकारेतो निष्ठायामिड् वा स्यात्। भिन्नं भेदितम् ... प्रस्विन्नः प्रस्वेदितः। **उदितो वा** (७-२-५६) उदितो धातोः क्त्वायामिड् वा स्यात्। शमित्वा शान्त्वा। एवमन्यत्रापि तत्र तत्र विशेषो वक्ष्यते।

णत्वव्यवस्था–

रषाभ्यां नो णः समानपदे (८-४-१) रेफषकाराभ्यां परस्य नस्य णः स्यात्, निमित्त (र ष) निमित्ति (न) नौ समानपदस्थौ चेत्। पुष्णाति, मुष्णाति, आस्तीर्णः, विस्तीर्णः। **अट्कुप्वाङ्नुम्व्यवायेपि** (८-४-२) अट्कवर्गपवर्गाङ्नुम्भिर्व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्। ... पर्याणद्ध, बृंहणम्। **उपसर्गादसमासेपि णोपदेशस्य** (८-४-१४) उपसर्गस्थान्निमित्तात् ... णोपदेशस्य धातोर्नस्य णः स्यात्। प्रणमति, परिणमति, परिणयः। **हिनुमीना** (८-४-१५) ... उपसर्गस्थान्निमित्तात्परस्य णः स्यात्। प्रहिणोति, प्रमीणाति। **आनि लोट्** (८-४-१६) लोडादेशस्य आनीत्यस्य उपसर्गस्थान्निमित्तात्परस्य नस्य णः स्यात्। प्रभवाणि, प्रवपाणि। दुरः षत्वणत्वयोः ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४ उपसर्गत्वप्रतिषेधो वक्तव्यः (वा) दुःस्थितिः, दुर्भवानि। अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् (वा) अन्तर्धा, अन्तर्धिः, अन्तर्भवानि। नेर्गद-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिषु च (८-४-१७) उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णः स्याद्गदादिषु परेषु। प्रणिगदति प्रणिनदति, प्रणिपतति, प्रणिददाति, प्रणिहन्ति। अड्व्यवायेपि नेर्गदादिषु णत्वमिष्यते। प्रण्यगदत्। शेषे विभाषाऽकखादावषान्त उपदेशे (८-४-१८) उपदेशेऽकखादिखान्तश्च यो धातुः शेषस्तस्मिन्परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णो वा स्यात्। प्रणि-नि पचति, प्रणि-नि भिनत्ति। अनितेः (८-४-१९) उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति, प्राणः। उभौ साभ्यासस्य (८-४-२१) उपसर्गस्थान्निमित्तात्परस्य साभ्यासस्यानितेर्नस्योभयस्य णः स्यात्। प्राणिणिषति, प्राणिणत्।

षत्वव्यवस्था—

इणकोः (८-३-५७) इत्यधिकृत्य। नुम्विसर्जनीयशर्व्यवायेपि (८-३-५८) एभिर्व्यवायेपि इणकोरुत्तरस्यादेशप्रत्यययोः सस्य षः स्यात्। आदेशप्रत्यययोः (८-३-५९) इणकुभ्यामुत्तरस्यादेशप्रत्ययावयवस्य सस्य षः स्यात्। सिषेवे, सुष्वाप। शासिवसिघसीनां च (८-३-६०) इणकोः परस्यैषां सस्य षः स्यात्। अन्वशिषत्, उषितः, जक्षतुः। स्तौतिण्योरेव षण्यभ्यासात् (८-३-६१) स्तौतेर्ण्यन्तानामेव षभूते सनि परे अभ्यासादिण उत्तरस्यादेशसस्य षत्वं स्यात्। तुष्टूषति, सिषेवयिषति, सुष्वापयिषति। सः स्विदिस्वदिसहीनां च (८-३-६२) एषां ण्यन्तानां षभूते सनि परेऽभ्यासादुत्तरस्य सस्य स एव स्यात्। सिस्वेदयिषति, सिस्वादयिषति, सिसादयिषति। प्राक्सितादड्व्यवायेपि (८-३-६३) सेवसितेति-सितशब्दात्प्राक्सुनोत्यादीनामड्व्यवायेपि षत्वं स्यात्। न्यषेधत्, न्यषेधीत्। स्थादिष्वभ्यासेन चाभ्यासस्य (८-३-६४) प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात्, एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम्। निषिषेध, निषिषिधतुः, अभिषिषिक्षति। उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् (८-३-६५) उपसर्गस्थान्निमित्तात्परस्य सुनोत्यादीनां सस्य षः स्यात्। अभिषुणोति, अभिष्टौति, अभिषेणयति, परिषिञ्चति, परिष्वजते। सदिरप्रतेः (८-३-६६) उपसर्गस्थान्निमित्तादप्रतेरुत्तरस्य सदेः सस्य षः स्यात्। निषीदति, विषीदति, न्यषीदत्, विषसाद। स्तन्भेः (८-३-६७) उपसर्गस्थान्निमित्तादुत्तरस्य स्तन्भेः सस्य षः स्यात्। परिष्टभ्नाति। अवाच्चालम्बनाविदूर्ययोः (८-३-६८) अवादुपसर्गादुत्तरस्य स्तन्भेः सस्य षः स्यात् आलम्बने आविदूर्ये चार्थे। आलम्बने-अवष्टभ्याऽऽस्ते। आविदूर्ये-अवष्टब्धा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सेना। **परिनिविभ्यःसेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्** (८-३-७०) परिनिविभ्यः परेषामेषां सस्य षः स्यात्। निषेवते, विषहते, परिष्वजते। **सिवादीनां वाऽड्व्यवायेपि** (८-३-७१) सिवादीनामड्व्यवायेपि परिनिविभ्यः परस्य सस्य षो वा स्यात्। पर्यषी-सीव्यत् पर्यष्व-स्वजत, पर्यषे-सेवत। **अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु** (८-३-७२) एभ्यः परस्य स्यन्दतेः सस्य षो वा स्यादप्राणिषु। अनुष्य-स्यन्दते, निष्य-स्यन्दते तैलम्। **स्फुरतिस्फुलत्योर्निर्निविभ्यः** (८-३-७६) एभ्यः परस्य स्फुरतिस्फुलत्योः सस्य षो वा स्यात्। विष्फु-स्फुरति, निष्फु-स्फुरति। **वेः स्कभ्नातेर्नित्यम्** (८-३-७७) वेः परस्य स्कभ्नातेः सस्य नित्यं षः स्यात्। विष्कभ्नाति, विष्कम्भः (अर्गला)। **सात्पदाद्योः** (८-३-१११) सातेरवयवस्य पदादेश्च सस्य षत्वं न स्यात्। आदेशप्रत्ययेतिप्राप्ते निषेधः। दधि सिञ्चति, अनु स्वदते। **सदेः परस्य लिटि** (८-३-११८) सदेरभ्यासात्परस्य सस्य षत्वं न स्याल्लिटि। निषसाद।

गुणवृद्धिभावाभावौ–

सार्वधातुकार्धधातुकयोः (७-३-८४) अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात्। भवति, नयति, हरति। **पुगन्तलघूपधस्य च** (७-३-८६) पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः। ह्लेपयति, भेत्ता, छेत्ता। **ऋतश्च संयोगादेर्गुणः** (७-४-१०) ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्यात् लिटि। किदर्थमपीदं परत्वाण्णल्यपि भवति। सस्मार, तस्तरुः। **ऋच्छत्यॄताम्** (७-४-११) तौदादिक-ऋच्छे-ऋधातो ॠतां च गुणः स्याल्लिटि। आनर्च्छ, आर, ततार। **ऋदृशोऽङि गुणः** (७-४-१६) ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। असरत्, अदर्शत्। **गुणोर्तिसंयोगाद्योः** (७-४-२९) अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। स्मर्यते, स्मर्यात्। **सिचि वृद्धिः परस्मैपदेषु** (७-२-१) इगन्ताङ्गस्य वृद्धिः स्यात्परस्मैपदे परे सिचि। अजैषीत्, अलावीत्, अकार्षीत्। **अतो ल्रान्तस्य** (७-२-२) अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्य वृद्धिः स्यात्परस्मैपदे परे सिचि। अतोहलादेरिति विकल्पापवादः। अक्षारीत्, अज्वालीत्। **वदव्रजहलन्तस्याचः** (७-२-३) वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचो वृद्धिः परस्मैपदे परे सिचि। अवादीत् अपाक्षीत्। **नेटि** (७-२-४) इडादौ सिचि हलन्तलक्षणा वृद्धिर्न स्यात्। अदेवीत्, असेवीत्। **ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्** (७-२-५) हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि। अग्रहीत्, अवमीत्, अव्ययीत्, अकटीत्। **अतो हलादेर्लघोः** (७-२-७) हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात्। अगादीत् अगदीत् अरा-रणीत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अचो ञ्णिति (७-२-११५) अजन्ताङ्गस्य वृद्धिः स्यात् ञिति णिति च परे। कारः न्यायः चकार। अत उपधायाः (७-२-११६) उपधाया अतो वृद्धिः स्यात् ञिति णिति च परे। पाकः त्यागः पाचयति। क्ङिति च (१-१-५) गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। चिनुतः मृजन्ति मिन्नः। दीधीवेवीटाम् (१-१-६) दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। भविता जनिता।

लुङि च्लिस्तदादेशाश्च–

च्लि लुङि (३-१-४३) धातोश्च्लिप्रत्ययः स्याल्लुङि। इकार उच्चारणार्थः स्वरार्थश्च। च्लेः सिच् (३-१-४४) च्लेः सिजादेशः स्यात्। अकार्षीत् अहार्षीत्। स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः (वा) अस्पार्क्षीत् अस्पृक्षत्। शल इगुपधादनिटः क्सः (३-१-४५) इगुपधो यः शलन्तो धातुस्ततः परस्यानिटश्च्लेः क्सादेशः स्यात्। अधुक्षत् अलिक्षत्। श्लिष आलिङ्गने (३-१-४६) आलिङ्गनार्थात् श्लिषश्च्लेः क्सः स्यात्। आश्लिक्षद्धधूम्। न दृशः (३-१-४७) दृशश्च्लेः क्सो न स्यात्। अदर्शत् अद्राक्षीत्। णिश्रिद्रुस्रुभ्यः कर्तरि चङ् (३-१-४८) ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङादेशः स्यात्कर्त्रर्थे लुङि। अचूचुरत्, अशिश्रियत्, असुस्रुवत्। विभाषा धेट्श्व्योः (३-१-४९) आभ्यां च्लेश्चङ् वा स्यात्। अदधत् अधासीत्। अश्वत् अश्वयीत्। अस्यतिवक्तिख्यातिभ्योऽङ् (३-१-५२) एभ्यश्च्लेरङ् स्यात्कर्त्रर्थे लुङि। अवोचत् आख्यत्। लिपिसिचिह्वश्च (३-१-५३) एभ्यश्च्लेरङ् स्यात्। अलिपत्, असिचत्। आत्मनेपदेष्वन्यतरस्याम् (३-१-५४) लिप्यादिभ्यश्च्लेरङ् वा स्यादात्मनेपदे। अलिपत अलिप्त, असिचत असिक्त। पुषादिद्युताद्यॢदितः परस्मैपदेषु (३-१-५५) पुषादेर्द्युतादेर्ॢदितश्च च्लेरङ्स्यात्परस्मैपदेषु। अपुषत् अद्युतत्, अशकत्। सर्त्तिशास्त्यर्तिभ्यश्च (३-१-५६) एभ्यश्च्लेरङ् स्यात्। असरत् अशिषत्। इरितो वा (३-१-५७) इरितो धातोश्च्लेरङ् वा स्यात्। अभिदत् अभैत्सीत्, अच्छिदत् अच्छैत्सीत्। जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च (३-१-५८) एभ्यश्च्लेरङ् वा स्यात्। अश्वत् अश्वयीत्।

आम्प्रत्ययः–

कास्प्रत्ययादाममन्त्रे लिटि (३-१-३५) कास्धातोः प्रत्ययान्तेभ्यो धातुभ्यश्च आम्प्रत्ययः स्याल्लिटि अमन्त्रविषये। आमि कृभ्वस्तीनामनुप्रयोगः। कासाञ्चक्रे चोरयाञ्चक्रे। कास्यनेकाच इति वक्तव्यम् (वा) चुलुम्पाञ्चकार। दरिद्राञ्चकार, इजादेश्च गुरुमतोऽनृच्छः (३-१-३६) इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्ततः आम् स्याल्लिटि। ईहाञ्चक्रे, ऊहाञ्चक्रे। दयायासश्च (३-१-३७) एभ्यो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिट्यास्स्यात्। दयाञ्चक्रे, पलायाञ्चक्रे, आसाञ्चक्रे। **उषविदजागृभ्योऽन्यतरस्याम्** (३-१-३८) एभ्यो लिट्याम्वा स्यात्। ओषाञ्चकार उवोष, विदाञ्चकार विवेद, जागराञ्चकार जजागार। **भीह्रीभृहुवां श्लुवच्च** (३-१-३९) एभ्यो लिट्याम्वा स्यात् श्लाविव कार्यं (द्वित्वेत्वादि) च स्यात्। बिभयाञ्चकार बिभाय, जिह्रयाञ्चकार जिह्राय, बिभराञ्चकार बभार, जुहवाञ्चकार जुहाव।

लिट्येत्वाभ्यासलोपौ–

अत एकहल्मध्येऽनादेशादेर्लिटि (६-४-१२०) लिण्निमित्तादेशादिकं न भवति यदङ्गं तदव-यवस्यासंयुक्तहल्मध्यस्थस्याकारस्य एकारः स्यादभ्यासलोपश्च किति लिटि। **थलि च सेटि** (६-४-१२१) सेटि थलि च प्रागुक्तं स्यात्। आदेशश्चात्र वैरूप्यसम्पादक एवाश्रीयते, शसिदद्योः प्रतिषेधस्य ज्ञापकात्। तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव। देधे देधाते देधिरे। पपाच पेचतुः पेचुः पेचिथ व-म। पपात पेततुः पेतुः पेतिथ-व-म। **तॄफलभजत्रपश्च** (६-४-१२२) एषाम् एत्वमभ्यासलोपश्च किति लिटि सेटि थलि च। तेरतुः तेरुः तेरिथ-व-म। भेजतुः भेजुः भेजिथ। त्रेपाते त्रेपिरे। **राधो हिंसायाम्** (६-४-१२३) हिंसार्थस्य राधेरेत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। अपरेधतुः। **वा जॄभ्रमुत्रसाम्** (६-४-१२४) एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च। भ्रेमतुः बभ्रमतुः–मुः, भ्रेमिथ बभ्रमिथ-व-म। **फणां च सप्तानाम्** (६-४-१२५) फणादीनां सप्तानामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च। रेजतुः रराजतुः-जुः रेजिथ रराजिथ-व-म। **न शसददवादिगुणानाम्** (६-४-१२६) शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च एत्वाभ्यासलोपौ न स्तः। दददे, ववमतुः।

ऋकारविकारः—

ॠत इद्धातोः (७-१-१००) ॠदन्तस्य धातोरङ्गस्येकारः स्यात्। रपरत्वम्। किरति गिरति। इत्वोत्वाभ्यां गुणवृद्धी पूर्वविप्रतिषेधेन (वा) तरति ततार। **उपधायाश्च** (७-१-१०१) धातोरुपधाभूतस्य ॠत इत्स्यात्। कीर्तयति। **उदोष्ठ्यपूर्वस्य** (७-१-१०२) अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उत्स्यात्। पूरयति मुमूर्षति। **ऋतश्च संयोगादेर्गुणः** (७-४-१०) ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि। जह्वार। **ऋच्छत्यॄताम्** (७-४-११) तौदादिकऋच्छते ऋधातोः ॠदन्तानां च गुणः स्याल्लिटि। आर। **रिङ् शयग्लिङ्क्षु** (७-४-२८) शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात्। रीङ्प्रकृतेरिङ्विधिसामर्थ्यान्न दीर्घः। स्त्रियात् क्रियात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...र्घे-

अतो दीर्घो यञि (७-३-१०१) अदन्ताङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे। भवामि-...धावहे-महे। अकृत्सार्वधातुकयोर्दीर्घः (७-४-२५) अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु ...कृत्सार्वधातुकयोः। चीयात्, स्तूयात्, भृशायते। हलि च (८-२-७७) रेफवकारान्तस्य धातोरुप-...धाया इको दीर्घः स्यात् हलि। विस्तीर्णम्, दीव्यति, सीव्यति। उपधायां च (८-२-७८) धातो-...रुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात्। कूर्दते। न भकुर्छुराम् (८-२-७९) ...भस्य कुर्छुरो रुपधाया दीर्घो न स्यात्। कुर्वन्तु।

...कार्यान्तराणि-

इदितो नुम्धातोः (७-१-५८) इदितो धातोर्नुम्स्यात्। विन्दति, वन्दते, क्रन्दति। शे मुचादी-नाम् (७-१-५९) शप्रत्यये (तौदादिके) परे मुचादीनां नुम्स्यात्। मुञ्चति सिञ्चति लिम्पति। ...णलुत्तमो वा (७-१-९१) उत्तमो णल् वा णित्स्यात्। जगाद जगद। सार्वधातुकमपित् (१-२-४) ...अपित्सार्वधातुकं ङिद्वत्स्यात्। असंयोगाल्लिट् कित् (१-२-५) असंयोगात्परोऽपित् लिट् कित्स्यात्। ...किदाशिषि (३-१-१०४) आशिषि लिङो यासुट् कित्स्यात्। शर्पूर्वाः खयः (७-४-६१) अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते। हलादिशेषापवादः। पस्पर्द्धे। तस्मान्नुड् द्विहलः (७-४-७१) द्विहलो धातो ...दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनर्च। झलो झलि (८-२-२६) झलः परस्य सस्य लोपः स्याज्झलि। असिद्ध। इट ईटि (८-२-२८) इटः परस्य सस्य लोपः स्यादीटि परे। अगदीत्। ...झषस्तथोर्धोऽधः (८-२-४०) झषः परयोस्तथयोर्धः स्यान्नतु दधातेः। सेद्धा। षढोः कः सि (८-२-४१) ...षस्य ढस्य च कः स्यात्सकारे परे। सस्यार्धधातुके (७-४-४९) सस्य तः स्यात्सादावार्धधातुके। ढो ढे लोपः (८-३-१३) ढस्य लोपः स्याद् ढे परे।

वि० १. उपर्युल्लिखितानां प्रायिकविधीनां यथास्थलं निर्देशौचित्येपि एकस्मिन्विषये जायमानानां विशेषाणां सहानु-...ने यथास्वं स्थलेष्वुपस्थित्या बोधदार्ढ्यं सम्पद्यतेति विशेषतोनुसन्धेया विषयः पूर्वमेवात्र निर्दिष्टाः, तेषां यथोपयोगं ...त्र स्मारणं च विधास्यत एव। केषाञ्चित्पौनरुक्त्येन निर्देशोपि दृढीकारायोपयुज्यते।

वि० २. इदशान्साधारणविधीन्वक्ष्यमाणानुक्तांश्च विशेषविधीन्सार्वधातुकेषु विकरणविशेषाँश्चानुसन्धाय परस्मैपदिनां ...तत्र आत्मनेपदिनामेधधातुवत्प्रक्रियया रूपाणि निरूपणीयानि।

वि० ३. अतः परं हलन्तानजन्तांश्च धातूनुदात्तान् (सेटः) अनुदात्तान् (अनिटः) बोधसौकर्याय धातुपाठ-...क्रमेणापि सजातीयान्यथाक्रमं वर्गशो विभज्य तेषां रूपाणि निरूप्यन्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

टि० ४. आख्यातप्रकरणे कृदन्तशब्दानां प्रकरणान्तरे निर्देक्ष्यमाणानामपि निर्देशो व्युत्पत्तिदार्ढ्योपयुज्येतेति वीयधातुवृत्त्यादि निर्देशदृष्ट्या व्यावहारिकाणां तेषामिहापि निर्देशः, साधनिकाप्रक्रिया तु तेषां कृदन्तप्रकरणे, णिजन्तादि तत्तत्प्रकरणे च विशेष दृष्ट्या वक्ष्यत एव ।

भ्वादिषु हलन्ता उदात्ताः (सेटः)–

कवर्गान्ताः–

अनुदात्तेतः (आत्मनेपदिनः) **अकि** लक्षणे (चिन्हकरणे) अकर्मकः । इदित्वान्नुम् । अङ्कताम्, आङ्कत अजादित्वादाट्, अङ्केत; आनङ्के-ङ्काते-ङ्किरे तस्मान्नुड्द्विहल इति नुट्, अङ्किष्यते, अङ्किषीष्ट, आङ्किष्ट-ङ्किषाताम्-षत, आङ्किष्यत ; कर्मादौ-अङ्क्यते अङ्कयति –ते । कृत्सु-अङ्कितव्यम्, अङ्कनीयम्, ण्यति अङ्क्यम्, घञि-अङ्कः, अङ्कितः, अङ्कमानः, अङ्कित्वा, उरचि-अङ्कुरः । **अङ्क** लक्षणे चुरादावपि । **लोकृ** दर्शने सकर्मकः । लोकते, लोकताम्, लोकेत; लुलोके-काते-किरे, लोकिता, लोकिष्यते; लोकिषीष्ट, अलोकिष्ट किषाताम्-षत, अलोकिष्यत उपसर्गयोगे-वि-अव-आलोकते । कर्मादौ-लोक्यते लोकयति-ते अलुलोकत लुलोकिषते । कृत्सु-विलोकनीयम्, विलोकितः विलोकमानः लोकित्वा आ-विलोक्य, विलोकितुम् घञि-आलोकः लोकः । लोकयतीति चुरादौ । **शकि** शङ्कायाम् । भयत्रासयोः अक, संशब्दे सक० । इदित्वान्नुम् । शङ्कताम् अशङ्कत शङ्केत, शशङ्के शङ्किता शङ्किष्यते शङ्किषीष्ट अशङ्किष्ट अशङ्किष्यत । उप-आ-वि-परिशङ्कते, भावादौ शङ्क्यते शङ्कयति-ते अशशङ्कत् शिशङ्किषते । कृत्सु-शङ्कनं शङ्कितव्यं शङ्क्यं शङ्कितः शङ्कमानः शङ्कित्वा आशङ्क्य शङ्कितुम् । अङि-शङ्का, उ-शङ्कुः । **लघि** गतौ (अतिक्रमे) सक० । इदित्वान्नुम् । लङ्घते लङ्घताम् अलङ्घत लङ्घेत; ललङ्घे लङ्घिता लङ्घिष्यते लङ्घिषीष्ट अलङ्घिष्ट अलङ्घिष्यत । उप-विलङ्घते उल्लङ्घते । कर्मादौ लङ्घ्यते अलङ्घि, लङ्घयति-ते अललङ्घत्, लिलङ्घिषते कृत्-लङ्घनं लङ्घनीयं लङ्घितः लङ्घमानः लङ्घित्वा विलङ्घ्य लङ्घितुम्, उ-नलोपः–लघु । **श्लाघृ** (प्रशंसायाम्) सक० । श्लाघते-ताम् अश्लाघत श्लाघेत; शश्लाघे श्लाघिता-ष्यते-षीष्ट अश्लाघिष्ट अश्लाघिष्यत । कर्मादौ-श्लाघ्यते अश्लाघि, श्लाघयति-ते शिश्लाघिषते । कृत् -श्लाघनं श्लाघनीयः श्लाघितः श्लाघमानः श्लाघित्वा संश्लाघ्य श्लाघितुम् अङ्-श्लाघा ।

वि० कक लौल्ये अक० ककते, कर्तरि घञि काकः । **कुक वृक** आदाने सक० । कोकते, अचि कोकः (चक्रवाकः) इलचि कोकिलः । वर्कते, क-वृकः अरच्-वर्करः (अजः) । **चक** तृप्तौ सक० । चकते ओरच्-चकोरः । **ककि ढौकृ** गत्यर्थाः सक० । कङ्कते अच् कङ्कः, अतच्-कङ्कतम् कनि टापि कङ्कतिका (प्रसाधनी) । ढौकते ढौकनम् । टीकृ टीका, **वकि** कौटिल्ये अक० । वङ्कते क्रिन्-वङ्क्रिः (हृत्पञ्जरास्थि) । **शीकृ** सेचने सक० । शीकते अर०

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...)। **श्लोकृ** सङ्घाते (ग्रन्थे) सचेह ग्रथ्यमानस्य ग्रन्थितुर्वा व्यापारः, आद्ये अक०, द्वितीये सक०। श्लोकते ...श्लोकः; उपश्लोकनम् (स्तवः)। **द्राघृ** आयामे अक। द्राघते। द्राघतेवपुरत्यर्थमिति भट्टिः। **लाघृ** सामर्थ्ये ...। लाघते क्त-उल्लाघः (रोगमुक्तः) निपातनादिडभावस्तलोपश्च।

प्रयोगाः—व्यलोकि लोकैर्नगरालयैर्नलः। आशङ्कसे यमग्निं तदिदं स्पर्शक्षमं रत्नम्। विलङ्घ्य ...तङ्गं निकषा हनिष्यति। **या श्लाघा पाण्डुपुत्राणाम्। चक्राङ्कितशिला पूज्या। अङ्कगणिते प्रवीणः।** ...भृशं कविः श्लाघते। **आलोको नास्ति।**

...उदात्तेतः (परस्मैपदिनः)—**शाखृ** व्याप्तौ सक०। शाखति, अङ्-शाखा। **उख मख णख वल्ग रगि लगि मगि तगि इगि रिगि लिगि** गत्यर्थाः सक०। ओखति अङ्-उखा (पिठरः)। मखति अच्-मखः (...)। नखति अच्-नखः। वल्गति उ-वल्गु (सुन्दरम्)। रङ्गति, रङ्गन्त्यस्मिन्प्रेक्षकाणां मनांसीति रङ्गः अधिकरणे घञ् ...अङ्गन्त्यत्रावयवीति अङ्गं (शरीरम्) अधिकरणे घञ्। अङ्गः (जनपदविशेषः)। निनलोपः अग्निः, आरन्-..., उलि-अङ्गुलिः, रक् नलोपः—अग्रम्। वङ्गति घञ्-वङ्गः। मङ्गति अलच्-मङ्गलम्। तङ्गति तङ्गणम् (देशविशेषः)। ...क्त-इङ्गितम् (सङ्केतः) युच्-ज्योतिरिङ्गणः (खद्योतः)। रिङ्गति रिङ्गणम् (भ्रमणम्)। लिङ्गति अच्-लिङ्गम् (...म्)। **शिघि** आघ्राणे सक०। शिङ्घति आनक्-शिङ्घाणम् (नासामलम्)।

...न्त्वाः-

अनुदात्तेत (आत्मनेपदिनः)—**लोचृ** दर्शने सक०। प्रायेणायमाङ्पूर्वो विचारेऽर्थे। आलोचते-...म् आलोचत आलोचेत; आलुलोचे-चाते-चिरे अभ्यासहृस्व उकारः, आलोचिता-ष्यते-षीष्ट, आलो-चिष्ट-षाताम्-षत, आलोचिष्यत। उप-समालोचते। कर्मादौ-आलोच्यते आलोचि, आलोचयति-ते ...लुलोचिषते। कृत्सु-आलोचनं समालोचनम् आलोचनीयम् आलोचकः समालोचितः आलोचमानः, कर्मणि-आलोच्यमानः, आलोच्य आलोचितुम्। लोचयतीति चुरादौ। **अर्ज** गतिस्थानार्जनोपार्जनेषु सक०। लघूपधगुणः अर्जते-ताम् आर्जत अर्जेत। लिटि असंयोगाल्लिटः कित्वेन गुणाभावे द्वित्वे ...त्वे हलादिशेषे आदेरतो दीर्घे नुड्विधौ ऋकारैकदेशस्य रेफस्य हल्त्वेन द्विहल्त्वान्नुटि आनृजे-...जाते-जिरे अर्जिता-ष्यते-षीष्ट, आर्जिष्ट-र्जिषाताम्-षत आर्जिष्यत। उप-प्रार्जते उपार्जते। कर्मादौ-अर्ज्यते आर्जि, अर्जयति-ते अर्जिजिषते। कृत्सु-अर्जनम् अर्जितव्यम् अर्जनीयम् अर्जिता अर्जकः अर्ज-मानः कर्मणि-अर्ज्यमानः, अर्जित्वा न क्त्वासेडित्यकित्वाद्गुणः, उपार्ज्य अर्जितुम्। अर्जयतीति चुरादौ। **भृजी** भर्जने सक० ईदित्। लघूपधगुणः भर्जते-ताम् अभर्जत भर्जेत, लिटः कित्त्वादगुणे बभृजे-जाते-जिरे, भर्जिता-ष्यते-षीष्ट, अभर्जिष्ट अभर्जिष्यत। कर्मादौ-भृज्यते अभर्जि, भर्जयति-ते अबीभृजत् अबभ्राजत् उर्ऋद्वा, बिभर्जिषते। कृत्सु-भर्जनं भर्जितव्यं भर्जनीयं भर्जिता भर्जमानः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईदित्वान्निष्ठायामनिट् भृष्टः भृष्टवान्, भर्जित्वा संभर्ज्य भर्जितुम् घञि-भर्गः (तेजः)। भ्राजृ दीप्तौ अक०। भ्राजते-ताम् अभ्राजत भ्राजेत; बभ्राजे भ्राजिता-ष्यते-षीष्ट अभ्राजिष्ट अभ्राजिष्यत। विभ्राजते। भावादौ-भ्राज्यते अभ्राजि, भ्राजयति ते अबिभ्रजत् अबभ्राजत् भ्राजभासेति वोपधाया ह्रस्वः। कृत्सु-भ्राजनं भ्राजमानः भ्राजित्वा भ्राजितुम् इष्णुच्-भ्राजिष्णुः, ताच्छील्ये क्विपि-विभ्राट्, व्रश्चादौ फणादेरेव ग्रहान्नात्र षः।

वि० कच बन्धने सक०कचते, अचि-कचः (केशः), संज्ञायां घञि काचः। कचि काचि दीप्तिबन्धनयोः सक० इदित्वान्नुम् कञ्चते, उक-कञ्चुकः (कवचः)। काञ्चते, युचि काञ्चनम् (सुवर्णम्), इ-कृदिकाराद्वा ङीपि काञ्ची (मेखला देशविशेषश्च)। पचि व्यक्तीकरणे सक०। पञ्चते प्रपञ्चते, कर्मादौ-प्रपञ्च्यते, प्रपञ्च्... घञि-प्रपञ्चः, क्ते-प्रपञ्चितः, कनिनि-पञ्च, घञि-पङ्कः चजोरिति कुत्वम्, तिपि-पङ्क्तिः, डतौ-पञ्चत्। मचि ... च्छ्रायपूजनेषु सक०। मञ्चते, अचि मञ्चः। वर्च दीप्तौ अक०। वर्चते, असुनि-वर्चः (दीप्तिः) के-वर्चस्कः (पुं...) शच व्यक्तायां वाचि सक०। शचते, इ०कृदिकारान्ङीपि शची (इन्द्राणी) षच सेवने सक०। सचते, तुनि ... तितुत्रेति नेट्, बाहुलकाद्वः सचि वः। ष्टुच प्रसादे सक०। स्तोचते, घञि-स्तोकः (अल्पः)।

प्रयोगाः—भृष्टा यवा भक्षिताः। भ्राष्ट्रेषु भर्जितुं नीताः। विभ्राजते यद्यतयो विशन्ति। अव... लोच्य कोपोयम्। अर्थानामर्जने दुःखमर्जितानां च रक्षणे। भ्राजमानो यथा रविः। धीरो जनः ... मवालुलोचे। भ्राजिष्णु रविमण्डलम्।

उदात्तेतः (परस्मैपदिनः)-अञ्चु गतिपूजनयोः सक० उदित्। अञ्चति अञ्चतु आञ्चत्-अ... ञ्चत्, अञ्चेत्; लिटि अञ्चेर्द्वित्वे हलादि शेषे आदेरतो दीर्घे द्विहल्त्वान्नुटि आनञ्च-ञ्चतुः-ञ्चुः ... ञ्चिथ-च-म, अञ्चिता अञ्चिष्यति, आशिषि गतावनिदितामिति नलोपे अच्यात्-च्यास्ताम्-च्या... पूजायां तु नाञ्चेःपूजायामिति न लोपाभावे अञ्च्यात् अञ्च्यास्ताम् अञ्च्यासुः, लुङि तिपि च्लेः सि... इटि अपृक्तस्य ईडागमे इटईटीति सलोपे आञ्चीत् आञ्चिष्टाम् आञ्चिषुः आञ्चीः आञ्चिष्ट... आञ्चिषम्-ष्व-ष्म, आञ्चिष्यत्। उप-प्र-प्रति-उद्-अवाञ्चति। कर्मादौ-अञ्च्यते अञ्चयति-ते आञ्चिचत्... कृत्सु-अञ्चनम् अञ्चितव्यम् अञ्चिता उदित्वात्क्त्वायां वेट् अञ्चित्वा अङ्क्त्वा, निष्ठायां गतौ अ... पादानइति नत्वं वेट्कत्वान्नेट् अक्नः अक्नवान्, पूजायां तु अञ्चेः पूजायामिति नित्यमिटि अञ्चि... तवान्, अञ्चितुम्, क्विनि-प्राङ् प्रत्यङ् उदङ् अवाङ् तिर्यङ् सम्यङ्। अर्च पूजा... सक०। अर्चति-तु आर्चत् अर्चेत्, लिटि द्वित्वे आदेरतो दीर्घे द्विहल्त्वान्नुटि आनर्च-र्चतुः-र्चुः आनर्चि... व-म, अर्चिता-ष्यति अर्च्यात्-र्च्यास्ताम्-र्च्यासुः, आर्चीत्-र्चिष्टाम् र्चिषुः, आर्चिष्यत्। उप-प्र... अभ्यर्चति। कर्मादौः-अर्च्यते आर्चि, अर्चयति-ते आर्चिचत् अर्चिचिषति। कृत्सु-अर्चनम् अर्चि...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५

अर्चनीयं, ण्यत्-अर्च्यः अर्चिता अर्चकः अर्चन्-न्ती कर्मणि-अर्च्यमानः अर्चित्वा अभ्यर्च्य अर्चितुम् अ-अर्चा। अर्चयतीति चुरादौ। लुञ्च अपनयने (छेदने) सक०। लुञ्चति-तु अलुञ्चत् लुञ्चेत्, लुलुञ्च-ञ्चतुः-ञ्चुः लुञ्चिता-ष्यति लुच्यात् अनिदितामिति नलोपः, अलुञ्चीत्-ञ्चिष्टाम्-ञ्चिषुः अलुञ्चिष्यत्। उप प्र-आलुञ्चति उल्लुञ्चति। कर्मादौ-लुञ्च्यते अलुञ्चि लुञ्चयति-ते अलुलुञ्चत्। कृत्सु-लुञ्चनं लुञ्चितव्यं लुञ्चकः लुञ्चन् लुञ्चित्वा लुचित्वा। वञ्चि लुञ्चीति वा कित्वात्पक्षे नलोपः, प्रलुञ्च्य लुञ्चितुम्। शुच शोके (स्मृत्वा क्लेशे) अक०। शोचति-तु अशोचत् शोचेत्, शुशोच शुशुचतुः-चुः, शोचिता-ष्यति शुच्यात् अशोचीत् अशोचिष्यत्। उप-अनुशोचति। भावादौ-शुच्यते अशोचि शोचयति-ते अशूशुचत्, शुशुचिषति शुशोचिषति रलोव्युपधेति वा कित्वम्। कृत्सु-शोचनं शोचितव्यं शोचनीयं शोचन्-न्ती शोच्यः शुचित्वा शोचित्वा वा कित्वम्, अनुशोच्य शोचितुम् घञि-शोकः क्विपि शुक्, रक् दत्वं दीर्घश्च-शूद्रः। मूर्छा मोहसमुच्छ्राययोः सक० आदित्। मूर्छति-तु अमूर्छत् मूर्छेत्, मूर्छिता-ष्यति मूर्छ्यात् अमूर्छीत् अमूर्छिष्यत्। उप-संमूर्छति (प्रसरति)। भावादौ-मूर्छ्यते अमूर्छि, मूर्छयति-ते अमुमूर्छत् मुमूर्छिषति। कृत्सु-मूर्छनं मूर्छितव्यं मूर्छन्-न्ती आदित्वान्निष्ठायां नेट् मूर्तः-र्तवान् मूर्छित्वा संमूर्छ्य मूर्छितुम्, अङि-मूर्छा, इतचि मूर्छितः, क्तिन्-मूर्तिः, णियु-मूर्छना। वाछि इच्छायाम् सक०। इदित्वान्नुम् वाञ्छति-तु अवाञ्छत् वाञ्छेत् ववाञ्छ वाञ्छिता-ष्यति वाञ्छ्यात् अवाञ्छीत् अवाञ्छिष्यत् उप-अभिवाञ्छति। कर्मादौ-वाञ्छयति-ते। कृत्सु-वाञ्छनं वाञ्छनीयः वाञ्छन्-न्ती वाञ्छितः वाञ्छित्वा अभिवाञ्छ्य वाञ्छितुम् अ-वाञ्छा। अर्ज अर्जने सक०। अर्जति-तु आर्जत् अर्जेत्-आनर्जतुः-र्जुः अर्जिता-ष्यति अर्ज्यात् आर्जीत् आर्जिष्यत्। उप-प्र-उपार्जति। कर्मादौ-अर्ज्यते आर्जि, अर्जयति-ते अर्जिजिषति। कृत्सु-अर्जनम् अर्जनीयः अर्जन्-न्ती अर्जित्वा समार्ज्य अर्जितुम्, सु-अर्ज-कर्मणि घञ् स्वर्गः न्यङ्क्वादित्वात्कुत्वम्, कु-ऋजादेशः-ऋजुः अर्जयतीति चुरादौ। कूज अव्यक्ते शब्दे (पक्षिशब्दे) अक०। कूजति-तु अकूजत् कूजेत् चुकूज कूजिता-ष्यति कूजयति-ते कृत्सु-कूजनं कूजितव्यं क्त-कूजितं कूजन्-न्ती कूजित्वा विकूज्य कूजितम्। गर्ज शब्दे (गर्जने) अक०। गर्जति-तु अगर्जत् गर्जेत् जगर्ज गर्जिता-ष्यति गर्ज्यात् अगर्जीत् अगर्जिष्यत्। उप-प्र-अनु-परि-उद् गर्जति। भावादौ-गर्ज्यते अगर्जि गर्जयति ते जिगर्जिषति। कृत्सु-गर्जनं गर्जितव्यं गर्जितं गर्जन्-न्ती गर्जित्वा प्रगर्ज्य गर्जितुम्। गुजि अव्यक्ते शब्दे (गुञ्जते) सक०। इदित्वान्नुम्। गुञ्जति-तु अगुञ्जत् गुञ्जेत् जुगुञ्ज गुञ्जिता-ष्यति गुञ्ज्यात् इदित्वान्नलोपो न, अगुञ्जीत् अगुञ्जिष्यत्। कर्मादौ-गुञ्ज्यते अगुञ्जि गुञ्जयति-ते जुगुञ्जिषति। कृत्सु-गुञ्जनं गुञ्जितव्यं गुञ्जितं गुञ्जन्-न्ती गुञ्जित्वा परिगुञ्ज्य गुञ्जितम् अ-गुञ्जा। तर्ज भर्त्सने सक०। तर्जति-तु अतर्जत् तर्जेत् ततर्ज तर्जिता-ष्यति तर्ज्यात् अतर्जीत् अतर्जिष्यत्। उप-संपरि-तर्जति। कर्मादौ-तर्ज्यते अतर्जि तर्जयति-ते अततर्जत् तितर्जिषति। कृत्सु तर्जनं तर्जितव्यं तर्जकः तर्जितः तर्जन् तर्जित्वा सन्तर्ज्य तर्जितुम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

करणे ल्युटि ङीपि-तर्जनी । चुरादौ तर्जयतीति । **व्रज** गतौ सक० । व्रजति-तु अव्रजत् व्रजेत् लिटि नशसददेत्येत्वाभ्यासलोपनिषेधः वव्राज वव्रजिथ-व-म, व्रजिता-ष्यति व्रज्यात्, लुङि हलन्त्वादेवसिद्धौ व्रजेः पृथगुपादानादतोहलादेरिति विकल्पापवादेन वदव्रजेति नित्यं वृद्धिः अव्राजिष्टाम्-जिषुः, अव्रजिष्यत् । उप-प्र-परि व्रजति (संन्यस्यति), अनुव्रजति (अनुसरति) । कर्मणि व्रज्यते अव्राजि व्राजयति-ते विव्रजिषति । कृत्सु-परिव्रजनं परिव्राजकः क्यपि-व्रज्या परिव्रज्या व्रजि परिव्रज्य प्रव्रजितुम् अधिकरणे घञि-व्रजः (गोष्ठं) । क्विपि-परिव्राट् सनउ-परिविव्रजिषुः । गतौ सक० । सस्य श्चुत्वेन शस्तस्य जश्त्वेन जः । सज्जति-तु असज्जत् सज्जेत् ससज्ज सज्जि ष्यति सज्ज्यात् असज्जीत् असज्जिष्यत् । उप-प्र-सस्ज्यति विषज्जति । कृत्सु-सज्जनं सज्जितः सज्जि सज्जः । सज्जते इतिभाष्यप्रयोगादयमात्मनेपद्यपि सज्जते । **टुओस्फूर्जा** वज्रनिर्घोषे अ ओ-आ-इतः । स्फूर्जति-तु अस्फूर्जत् स्फूर्जेत् । लिटि द्वित्वे हलादिशेषापवादेन शर्पूर्वा इति पकार पुस्फूर्ज स्फूर्जिता-ष्यति स्फूर्ज्यात् अस्फूर्जीत् अस्फूर्जिष्यत् । उप-वि-परिस्फूर्जति । भावादौ स्फू स्फूर्जयति-ते । कृत्सु-स्फूर्जनं स्फूर्जितव्यं स्फूर्जित्वा विस्फूर्ज्य स्फूर्जितं स्फूर्जितुम्, आदित्वान्नि नेट् ओदित्वान्नत्वं च स्फूर्णः टित्वादथुच्-स्फूर्जथुः ।

वि० **कुच** शब्दे तारे (उच्चे) अक० । कोचति, क-कुचः । **कुञ्च क्रुञ्च** कौटिल्याल्पीभावयोः अक० । कुञ्चितः कुञ्चित्वा आकुञ्च्य । क्रुञ्चति क्विन् क्रुङ् अजादित्वाट्टापि क्रुञ्चा स्वार्थेणि क्रौञ्चः (पक्षिविशे **चर्च झर्झ** हिंसापरिभाषणतर्जनेषु सक० । चर्चति अङ्-चर्चा । झर्झति अर-झर्झरः अ-निर्झरः । **वञ्चु चञ्चु तञ्चु** सक० । वञ्चति णौ-वञ्चयते गृधिवञ्च्योरिति तङेव, रक्-वक्रम् । चञ्चति शतरि-चञ्चन् निपातनात् चञ्चा (तृण तञ्चति रक्-तक्रम् । **उछि** उञ्छे (कणशआदाने) सक० । उञ्छति-तु-औञ्छत् उञ्छेत्-उञ्छाञ्चकार । उञ्छ उञ्छः (कणशआदानम्) उञ्छित्वा उञ्छितुम् । **उञ्छी** विवासे (समाप्तौ) प्रायेणायं विपूर्वः अक० । क्त-व्युष्टं (प्रभातम्) ईदित्वान्निष्ठायां नेट् । **म्लेच्छ** अव्यक्ते शब्दे (अस्फुटे अपशब्दे च) अक० । म्ले नम्लेच्छितव्यम् अच्-म्लेच्छः क्त-म्लिष्टं (अविस्पष्टम्) क्षुब्धेत्यादिना निपातितः, अपशब्दे तु म्लेच्छितः । लाछि सक० । नुम्-लाञ्छति, लाञ्छनं लाञ्छितः । **अज** गतिक्षेपणयोः सक० । सार्वधातुकेषु अजतीत्यादि । आर्धधातुके **अजेर्व्यघञपोः** (२-४-५६) अजेर्वी इत्यादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा । **वलादावार्ध** **वेष्यते** । विवाय विव्यतुः विव्युः एरनेकाच इति यण् । अत्र वकारस्य हल्परत्वादुपधायां चेति दीर्घस्तु न, अच यणः स्थानिवत्त्वेनाच्परत्वात्, स्वरदीर्घयलोपेषु लोपाजादेश एव नस्थानिवदित्युक्त्या नपदान्तेति निषे थलि भारद्वाजनियमाद्वेट् विवयिथ विवेथ, पक्षे व्यादेशाभावे आजिथ, विव्यथुः विव्य विवाय विवय क्रादिनियमादिट् । व्यादेशे एकाच्त्वान्नेट् वेता अजिता, वेष्यति अजिष्यति, वीयात्-यास्ताम्-यासुः । लुङि व्यादे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृद्धिविरिवृद्धौ अवैषीत् अवैष्टाम् अवैषुः, आजीत्-जिष्टाम्-जिषुः, अवेष्यत् आजिष्यत् । कृत्सु-प्रवयनं-णं प्राजनम्, ... (पशुसङ्घः) उदजः (पशुप्रेरणम्), अपशुविषये तु घञि समाजः उदाजः, स्त्रियां भावे क्यपि समज्या (गोष्ठी) ... इर-अजिरम् (प्राङ्गणम्), णु-वेणुः, इण्-आजिः (युद्धं) अच्-अजः; क्तिन्-संवीतिः, घञि-व्याजः, तृच्-प्राजिता ...) अजित्वा वीत्वा वीतः (गतः) । **एजृ** कम्पने अक० । एजति प्रेजति, खश् जनमेजयः (अङ्गमेजयः सर्वाङ्गकम्पः) । ... मन्ये सक० । खजति, आक-खजाकः । **खजि** गतिवैकल्ये अक० । खञ्जति, ल्युः-खञ्जनः अच्-खञ्जः ... खञ्जितुम् । **खर्ज** व्यथने पूजने च अक० । खर्जति, ऊर-खर्जूरः । **गज गजि गृजि मुजि** शब्दार्थाः अक० । ... अच्-गजः । गञ्जति, अ-गञ्जा (मदिरागृहम्) गृञ्जति, ल्यु-गृञ्जनम् । मुञ्जति, अच्-मुञ्जः । **तुजि** पालने ... । तुञ्जति, घञ्-तुङ्गः उत्तुङ्गः न्यङ्क्वादित्वात्कुत्वम् । **तेज** पालने सक० । तेजति, असुन्-तेजः । **ध्वज** गतौ सक० । ... अच्-ध्वजः । **लाज** भर्त्सने भर्जने च सक० । लाजति, कर्मणि घञि-लाजाः ।

प्रयोगाः-अथैनमद्रेस्तनया शुशोच । न च शोचति सर्वदा । जटिली मुण्डी लुञ्चितकेशः । ... विलोचने । कर्मणि सज्जा यथम् । अर्चिष्यन्ति मनुष्यास्त्वाम् । चुकूज कूले कलहंसमण्डली । ... र्थानामर्जने दुःखम् । रणे गर्जन्ति शत्रवः । वनं व्रजति धार्मिकः । छायामानर्च पादयोः ।

...न्ताः-

अनुदात्तेतः (आत्मनेपदिनः) **घट्ट** चलने अक० । घट्टते-ताम् अघट्टत घट्टेत जघट्टे घट्टिता-ष्यते-षीष्ट अघट्टिष्ट अघट्टिष्यत । उप-संघट्टते (संयुज्यते) विघट्टते (वियुज्यते) भावादौ-घट्ट्यते घट्टयति-ते । कृत्सु-घट्टनं विघट्टनं घट्टितव्यं घञ्-घट्टः संघट्टः घट्टितः विघट्टितः घट्टित्वा विघट्ट्य संघट्य घट्टितुम् । **चेष्ट** चेष्टायाम् अक० । चेष्टते-ताम् अचेष्टत चेष्टेत चिचेष्टे चेष्टिता-ष्यते-षीष्ट अचेष्टिष्ट-ष्यत । उप-प्रवि-संचेष्टते । भावादौ-चेष्ट्यते अचेष्टि चेष्टयति-ते चिचेष्टिषते । कृत्सु-चेष्टनं चेष्टितव्यं चेष्टमानः चेष्टितं चेष्टित्वा संचेष्ट्य चेष्टितुम् अङ्-चेष्टा । **वेष्ट** वेष्टने सक० । वेष्टते-ताम् अवेष्टत वेष्टेत वेष्टिता-ष्यते-षीष्ट अवेष्टिष्ट-ष्यत । उप-सं-परि-आ-उद्वेष्टते । कर्मादौ-वेष्ट्यते वेष्टयति कृत्सु-वेष्टनं वेष्टितव्यं वेष्टितः वेष्टमानः वेष्टित्वा संवेष्ट्य वेष्टितुम् ।

वि० **अट्ट** अतिक्रमहिंसयोः सक० । अट्टते, घञ्-अट्टः अ-अट्टा । **स्फुट** विकसने अक० । स्फोटते, स्फोटनं स्फुटित्वा ...त्वा रलोव्युपधादिति वा कित्वम् आस्फोटनम् । **कठि** शोके (आध्याने) सक० । कण्ठते उत्कण्ठते घञ्-कण्ठः ...कण्ठा इतच्-उत्कण्ठितः । **गोष्ठ-लोष्ठ**-संघाते अक० । गोष्ठते अच्-गोष्ठः ङीपि-गोष्ठी । लोष्ठते, घञ्-लोष्ठः । **कुडि** दाहे ... कुण्डते, अच्-कुण्डः-ण्ड-ण्डी । **चडि** लोपे अक० । चण्डते, घञ्-चण्डः प्रचण्डः, इन्-चण्डिः ङीप्-चण्डी ...चण्डालः स्वार्थेऽण्-चाण्डालः । **तडि** ताडने सक० । तण्डते, अङ्-वितण्डा (स्थापनाहीनवादः) उलच्-तण्डुलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुडि तोडने सक० । तुण्डते अच्-तुण्डः इन्-तुण्डि । नाभिवृद्धिः । इलच्-तुण्डिल । **पडि** गतौ सक० । पण्डते, अच्-पण्ड (सदसद्विवेकबुद्धिः) इतच्-पण्डितः अच्-पण्डः (वातरोगी) । **पिडि** संघाते अक० । पिण्डते, अच्-पिण्ड इलच्-पिण्डिलः । **भडि** परिभाषणे (सनिन्दोपालम्भे) सक० । भण्डते, अच्-भण्डः इलच्-भण्डिलः । **मुडि** मार्जने सक० मुण्डते, मुण्डनं मुण्डितः घञ्-मुण्डः । **वडि** विभाजने **मडि** च सक० । वण्डते, वण्डनं वण्डितः वण्डित्वा । मण्डू ऊक-मण्डूकः । **शडि** रुजायां संघाते च सक० । शण्डते, अच्-शण्डः (असुरपुरोहितः) इल-शण्डिलः । (ऋषिविशेषः) **शाडृ** श्लाघायाम् सक० । शाडते डलयोरैक्यात् शालते, अ-शाला, खच्-शालीनः (अधृष्टः), इन्-शालिः (व्रीहिविशेषः) **हिडि** गत्यनादरयोः सक० । हिण्डते हिण्डमानः ईर हिण्डीरः ।

प्रयोगाः--शुभकर्मणि चेष्टते । सङ्घट्टनविघट्टने । वस्त्रेण वेष्टते । आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च, नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः । संघट्टन्ते विघट्टन्ते । चेष्टमानः सुकर्मसु । प... वानरचेष्टितम् ।

उदात्तेतः (परस्मैपदिनः)-अट गतौ सक० । अटति-तु आटत् अटेत् आट आटतुः आटुः आटिथ-व-म अटिता-ष्यति अट्यात् आटीत्-टिष्टाम्-टिषुः आटिष्यत्, उप-पर्यटति (परिभ्रमति) कर्मादौ-पर्यट्यते आटयति । कृत्सु-पर्यटनं पर्यटितव्यं अटि टापि अटा कुलस्य कुलटा, शयक्-अटाट्या (गतिः) अटित्वा पर्यट्य, अनि-अटनिः (धनुष्कोटिः) । **णट** नृत्तौ अक० । णो नः । नटति-तु अनटत् नटेत् ननाट नेटतुः नेटुः नेटिथ नेटथुः नेट ननाट ननट नेटिव-म, एत्वाभ्यासलोपौ । नटिता-ष्यति नट्यात् अनाटीत्-नाटिष्टाम्-नाटिषुः अनटीत्-नटिष्टाम्-नटिषुः, अतोहलादेरिति वृद्धिविकल्पः अनटिष्यत् । भावादौ-नट्यते अनाटि, नटयति घटादित्वाद्ध्रस्वः अनीनटत् निनटिषति कृत्सु-नटनं नटितव्यं ण्यत्-नाट्यम् अच्-नटः नाटकम् नटन्-न्ती नटित्वा प्रणट्य नटितुम् । **रट** परिभाषणे सक० । नटिवत् रटति-तु अरटत् रटेत् रराट रेटतुः-टुः-टिथ-व-म रटिता-ष्यति रट्यात् अरा-रटीत् वा वृद्धिः अरटिष्यत् । कर्मादौ रट्यते अराटि रटयति । कृत्सु-रटनं रटित्वा । घिनुण्-परिराटी रटन् रटितुम् । **पठ** व्यक्तायां वाचि सक० । पठति-तु अपठत् पठेत् पपाठ पेठतुः-ठुः-ठिथ-व-म पठिता-ष्यति पठ्यात् अपाठीत् अपठीत् वा वृद्धिः अपठिष्यत् । कर्मादौ पठ्यते अपाठि, पाठयति-ते अपीपठत् कर्मणि-पाठ्यते, पिपठिषति । कृत्सु-पठनं पठितव्यं पठनीयं पाठ्यं पाठः पठिता पाठकः पठन् पठितुं णि-पाठयन् कर्मणि-पठ्यमानः णौ पाठ्यमानः पठितः पठितवान् णि-पाठितः पठित्वा प्रपठ्य पठितुम् अ-पिपठिषा सन उ-पिपठिषुः । **लुठि** स्तेये सक० । इदित्वान्नुम्यनुस्वारपरसवर्णौ । लुण्ठति-तु अलुण्ठत् लुण्ठेत् लुलुण्ठ-ण्ठतुः-ण्ठुः लुण्ठिता-ष्यति लुण्ठ्यात् अलुण्ठीत् अलुण्ठिष्यत् । उप-वि-परिलुण्ठति । कर्मणि लुण्ठ्यते अलुण्ठि लुण्ठयति-ते लुलुण्ठिषति । कृत्सु-लुण्ठनं लुण्ठितव्यं लुण्ठनीयं लुण्ठकः लुण्ठितः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्मणि-लुण्ठ्यमानः लुण्ठित्वा विलुण्ठ्य लुण्ठितुम् षाकन्-लुण्ठाकः (तस्करः)। **क्रीडृ** विहारे अक०। क्रीडति-तु अक्रीडत् क्रीडेत् चिक्रीड-डतुः-डुः क्रीडिता-ष्यति क्रीड्यात् अक्रीडीत् अक्रीडिष्यत्। उप-संपरि-अनुक्रीडते क्रीडोनुसंपरिभ्यश्चेति तङ् भावादौ-क्रीड्यते अक्रीडि क्रीडयति-ते अचिक्रीडत् चिक्रीडिषति। कृत्सु-क्रीडनं क्रीडितव्यं क्रीडिता क्रीडन् संक्रीडमानः क्रीडित्वा परिक्रीड्य क्रीडितुम् सन् अ-चिक्रीडिषा सन् उ-चिक्रीडिषुः अङ्-क्रीडा, अधिकरणे घञ्-आक्रीडः (उद्यानम्)।

वि० **कटे** वर्षावरणयोः सक०। कटति एदित्वात्सिचि ह्मयन्तेति वृद्धिनिषेधे अकटीत्, अच्-कटः ङीपि-कटी निकटः ...म्, इत्र-कटित्रं (चर्म) उ-कट्वः। **खट** काङ्क्षायाम् सक०। खटति, क्वन्-खट्वा, कन् टाप्-खटिका। **खिट** त्रासे ...०। खेटति, घञ्-खेटः (ग्रहः) आखेटः (मृगया), खेटकः (आयुधविशेषः)। **चटे** इत्येके सक०। चटति, उण् चाटु ...टु (प्रियोक्तिः) उलट्-चटुलः कन्-चटकः। **चिट** परप्रैष्ये अक०। चेटति अच्-चेटः चेटी कन्-चेटकः। ...ट संघाते अक०। जटति, अच् टापि-जटा। **तट** उच्छ्राये अक०। तटति, अच्-तटः-टी-टम्। **पट** गतौ सक०। पटति, ...टः, उ-पटुः (चतुरः) कल-पटलं (छदिः) कन्-पटलिका, ईरन्-पटीरः (चन्दनम्), णि कल-पाटलः। **पिट** ...संघातयोः अक०। पेटति, क्वन्-पिटकः, आक-पिटाकः। **भट** भृतौ सक०। भटति, अच्-भटः, इत्र-भटित्रं (शूल-...तमांसम्)। **मुट** प्रमर्दने सक०। मोटति, मोटनं मोटितः मोटकः। **लट** बाल्ये अक०। लटति, णि अच्-लटिः ...विशेषः) **लुट** विलोडने सक०। लोटति लुलोट लुटित्वा लोटित्वा। **वट** वेष्टने सक०। वटति, इन्-वटिः ङी-वटी, भ-...ः कन्-वटकः। **विट** शब्दे अक०। वेटति, क-विटः, निपातनात् विटपः इनि-विटपी। **शट** रुजाविशरण-...वसादनेषु अक०। शटति, घञि कन्-शाटकम् घञि ङीप्-शाटी (वस्त्रम्)। **शौटृ** गतौ अक०। शौटति, ईरन्-शौटीरः ...शौटीयम्। **स्फुटिर** विशरणे अक०। स्फोटति आस्फोटयति घञ्-स्फोटः। **हट** दीप्तौ अक०। ...ते, संज्ञायां ण्वुल्-हाटकम् (सुवर्णम्)। **कठ** कृच्छ्रजीवने अक०। कठति, अच्-कठः (शाखाविशेषी), इन-कठिनः, ...कठोरः। **कुठि** गतिप्रतिघाते अक०। कुण्ठति, अच्-कुण्ठः इतच्-कुण्ठितः। **पिठ** हिंसासंक्लेशनयोः सक०। पेठति, ...पीठं (आसनम्) अन्येषामपीति दीर्घः। क-पीठिका। **मठ** भद्रनिवासयोः सक०। मठति, घञ्-मठः (देवगृहं छात्रा-...लयः)। **गडि** वदनैकदेशे (तत्क्रियायाम्) अक०। गण्डति, अच्-गण्डः, क-गण्डकः (खड्गी)। **तुड** तोडने ...०। तोडति, तोडनं तोडितः। **मडि** भूषायाम् सक०। मण्डति, मण्डयते मण्डनं ल्यु-मण्डनः, करणे ल्युट्-मण्डनं ...नं) मण्डयतीति चुरादौ। **मुडि** खण्डने सक०। मुण्डति, घञ्-मुण्डः, मुण्डनं मुण्डितः। मुण्डयतीति चुरादौ। **म्रेडृ** ...दे अक०। म्रेडति, आम्रेडनं (द्विस्त्रिः कथनं) आम्रेडितः (पुनरुक्तः)।

प्रयोगाः—करट त्वं रट कस्तवापराधः। पर्यटन्वीथिकायाम्। लुण्ठकैर्हृतसर्वस्वः। प्रातः पर्यटनं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हितम् । नटिष्यन्ति नटा रङ्गे । पाठयन्ति पठन्ति च । क्रीडन्ति प्राङ्गणे बालाः । आक्रीडे पर्यटामि । काको रटति भूयशः । चौरो धनं लुण्ठति । न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः ।

तवर्गान्ताः—

अनुदात्तेतः (आत्मनेपदिनः)—**यती** प्रयत्ने अक० । ईदित् । यतते-ताम् अयतत यतेत, लिट्येत्वाभ्यासलोपौ येते येताते येतिरे-तिषे-ताथे-तिध्वे-ते-तिवहे-महे' यतिता-ष्यते-षीष्ट अयतिष्ट-तिषाताम्-षत, अयतिष्यत । उप-प्र-आ-संयतते, उद्यतते (उद्युङ्क्ते) । भावादौ-यत्यते प्रयत्यते अयति यातयति-ते निर्यातयति-ते (वैरमृणं वा शोधयति), अपयातयति (निरस्यति), यियतिषते, कृत्सु यतनं प्रयतनं यतितव्यं यतनीयं यतमानः यतित्वा प्रयत्य यतितुम् , ईदित्वान्निष्ठायां नेट् आयत्त (अधीनः) भावे नङ् यत्नः प्रयत्नः, णियुच्-यातना णिल्युट्-निर्यातनम् । **कत्थ** श्लाघायाम् अक० । कत्थते-ताम् अकत्थत कत्थेत चकत्थे-त्थाते-त्थिरे, कत्थिता-ष्यते-षीष्ट अकत्थिष्ट-त्थिषाताम्-षत अकत्थिष्यत । उप-विकत्थते (निन्दति) । कर्मादौ-कत्थ्यते अकत्थि, कत्थयति ते । कृत्सु-कत्थनं विकत्थनं कत्थकः, कत्थमानः कत्थित्वा विकथ्य, घिनुण्-विकत्थी, युच्-विकत्थनः । **कुर्द** क्रीडायां अक० । उपधायांचेति दीर्घः कूर्दते-ताम् अकूर्दत कूर्देत चुकूर्दे कूर्दिता-ष्यते-षीष्ट अकूर्दिष्ट-ष्यत भावादौ-कूर्द्यते अकूर्दि कूर्दयति-ते चुकूर्दिषते । कृत्सु-कूर्दनं कूर्दिता कूर्दमानः कूर्दितुम् । **मुद** हर्षे अक० । शपि लघूपधगुणः । मोदते-ताम् अमोदत मोदेत, लिट्यसंयोगादिति कित्वान्नगुणः मुमुदे-दाते दिरे । स्यतासोः सीयुटि सिचि चार्धधातुकत्वाद्गुणः मोदिता-ष्यते षीष्ट अमोदिष्ट षाताम्-षत अमोदिष्यत । उप-आ-प्र-संमोदते अनुमोदते (अनुमन्यते) । भावादौ-मुद्यते अमोदि, मोदयति-ते अमूमुदत्-त, मुमुदिषते मुमोदिषते रलोव्युपधादिति वा कित्वम् । कृत्सु-मोदनं मोदितव्यं घञ्-मोदः प्रमोदः आमोदः (प्रहर्षःसुगन्धविशेषश्च) मोदिता मोदकः मोदमानः, णौ-प्रमोदयन् कर्मणि-प्रमोद्यमानः निष्ठायामुदुपधादिति भावादिकर्मणोः पक्षेऽकित्वाद्वा गुणः मुदितं मोदितमनेन, प्रमुदितः प्रमोदितश्चैत्रः; अन्यत्र मुदितः-तवान् मुदित्वा मोदित्वा रलइति वा कित्वं, प्रमोदितुम् , युच्-मोदना क्विप्-मुत् किरच्-मुदिरः (मेघः), गक्-मुद्गः, रक्-मुद्रा । **वदि** अभिवादनस्तुत्योः प्रणतिपूर्वकमाशीर्वाचनमभिवादनं, नमस्कारः स्तुतिर्गुणकथनमित्यन्ये । सक० इदित्वान्नुम् । वन्दते-न्ते अवन्दत वन्देत ववन्दे-न्दाते वन्दिरे-वन्दिता-ष्यते-षीष्ट । अवन्दिष्ट-न्दिषाताम्-षत अवन्दिष्यत उप-अभिवन्दते । कर्मादौ-वन्द्यते अवन्दि वन्दयति-ते अववन्दत्-त विवन्दिषते । कृत्सु-वन्दनं वन्दितव्यं वन्दनीयः वन्द्यः वन्दमानः कर्मणि-वन्द्यमानः वन्दितः-तवान् वन्दित्वा अभिवन्द्य वन्दितुं युच्-वन्दना, णिनि-वन्दी (स्तुतिपाठकः) ङीपि-वन्दी (हठहृतनारी) इन्-वन्दिः । **ष्वद** आस्वादने (अनुभवे) सक० । प्रायेणाङ्पूर्वकोनुभवे, आस्वदते रसम् , रुच्यावकर्मकः मह्यं मोदते स्वदते । षः सः । स्वदते-ताम् अस्वदत स्वदेत सस्वदे स्वदिता-ष्यते-षीष्ट अस्वदिष्ट-ष्यत ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आस्वदते अनुस्वदते सात्पदाद्योरिति षत्वनिषेधः। कर्मादौ-स्वद्यते अस्वदि आस्वादयति-ते असिस्वदत्-त। कृत्सु-स्वदनं स्वदनीयं घञ्-स्वादः स्वदमानः णौकर्मणि-आस्वाद्यमानः स्वदित्वा आस्वद्य स्वदितुम्। **स्वाद** आस्वादने सक०। पूर्वस्मादाकारो विशेषः स्वादते-ताम् सस्वादे, अस्वादिष्ट, आस्वादनम् आस्वादकः आस्वाद्य इत्यादि, दुक्-स्वादः। आस्वादयतीति चुरादौ। ह्लादी सुखे च चादव्यक्ते शब्दे अक० ईदित्। ह्लादते-ताम् अह्लादत ह्लादेत, जह्लादे-दाते-दिरे ह्लादिता-ष्यते-षीष्ट अह्लादिष्ट-ष्यत। उप-आ-प्रह्लादते। भावादौ ह्लाद्यते-अह्लादि आल्हादयति-ते कृत्सु-आह्लादनम् घञ्-आह्लादः प्रह्लादः ईदित्वान्निष्ठायामिडभावे ह्लादोनिष्ठायामित्युपधाह्रस्वः आह्लान्नः-न्नवान् ह्लादित्वा आल्हादितुम्। **बाधृ** लोडने (पीडने) सक०। बाधते-ताम् अबाधत बाधेत बबाधे-धाते-धिरे बाधिता-ष्यते-षीष्ट अबाधिष्ट-ष्यत। कर्मादौ-बाध्यते बाधयति-ते विबाधिषते कृत्सु-बाधनं बाधमानः बाधितः बाधित्वा बाधितुम् अङ्-बाधा। **स्पर्द्ध** सङ्घर्षे (पराभिभवेच्छायाम्) पराभिभवस्य धात्वर्थेनोप-संग्रहादकर्मकः। स्पर्द्धते-ताम् अस्पर्द्धत स्पर्द्धेत, लिटि द्वित्वे हलादिशेषापवादेन शर्पूर्वाःखय इति पकारशेषः पस्पर्द्धे-र्द्धाते-र्द्धिरे, स्पर्द्धिता-ष्यते-षीष्ट अस्पर्द्धिष्ट-ष्यत। उप-प्रतिस्पर्द्धते। भावादौ स्पर्द्ध्यते अस्पर्द्धि, स्पर्द्धयति-ते अपस्पर्द्धत्-त पिस्पर्द्धिषते। कृत्सु-स्पर्द्धितव्यं स्पर्द्धमानः स्पर्द्धित्वा प्रतिस्पर्द्ध्य स्पर्द्धितुम् अङ्-स्पर्द्धा।

वि० **ग्रथि** कौटिल्ये अक०। ग्रन्थते ग्रन्थितः, इ-ग्रन्थिः। **नाथृ** याञ्चोपतापैश्वर्याशीःषु सक०। **आशिषि नाथ इति वाच्यम्** (वा) अस्याशिष्येवात्मनेपदं स्यात्। नाथते (आशास्ते), अन्यत्र परस्मैपदम् नाथति (याचते), उपनाथते नाथितः कर्मणि घञ्-नाथः (स्वामी)। **श्रथि** शैथिल्ये अक०। श्रन्थते, अ-श्रन्था, घञि नलोपवृद्ध्यभावौ निपातनात् श्रथः, हिमश्रथः (हिमशैथिल्यम्)। **गुद** क्रीडायाम् अक०। गोदते गुदित्वा गोदित्वा रलोव्युपधादिति कित्त्वम्, क-गुदम् (पायुः)। **दद** दाने सक०। ददते ददे नशसददेत्येत्वाभ्यासलोपनिषेधः, शान-ददानः, अच्-ददः (दाता)। **पर्द** कुत्सिते शब्दे (गुदरवे)। पर्दते, पर्दनम्, काकु-पृदाकुः (सर्पः)। **भदि** कल्याणे सुखे च अक०। भन्दते, रकि नलोपः भद्रम्। **मदि** स्तुतिमोदमदस्वप्नकान्तिगतिषु अक० स्तुतिगतिभ्यामन्यत्र। मन्दते, उरच्-मन्दुरा (अश्वशाला), आरन्-मन्दारः (देवतरुः), अर मन्दरः (गिरिविशेषः), रकि नलोपः मद्रम् (भद्रम्)। **षूद** क्षरणे (स्रवणे) सक०। षः सः सूदते, क-सूदः (पाचकः), हिंसायामप्ययं तत्र सकर्मकः ण्यन्ताल्ल्युः मधुं सूदयतीति मधुसूदनः, निषूदनः। सूदयतीति चुरादौ। **ह्राद** अव्यक्ते शब्दे अक०। ह्रादते, अचि पृषोदरादित्वाद्ध्रस्वः ह्रदः, घञ्-ह्रादः निर्ह्रादः, इनौ-ह्रदिनी ह्रादिनी (नदी)। **गाधृ** प्रतिष्ठालिप्सयोर्ग्रन्थे च सक०। गाधते जगाधे, अ-गाधा अगाधः। **दध** धारणे सक०। दधते देधे-देधिरे, शान-दधानः, अच्-दधः (धारयिता)।

प्रयोगाः—स्वादुः सुगन्धिः स्वदते तुषारा। कूर्दन्ति प्राङ्गणे बालाः। ऊनं न सत्त्वेष्वधिको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बबाधे। स्पर्द्धमानः सुरैरपि। न स्पन्दते भीतितः। कर्मसु प्रयतामहे। नहि शूरा विकत्थन्ते। आमोद्यमानः सुजनैः। वन्दितो यः सुरासुरैः। हरिं वन्दे दिवानिशम्। मया सहासौ स्पर्द्धते। यतनीयं शुभे पथि।

उदात्तेतः (परस्मैपदिनः)–अत सातत्यगमने सक०। अतति-तु आतत्-तताम्-तन् आडागमे वृद्धिः, अतेत्; लिटि द्वित्वे हलादिशेषे आदेरतोदीर्घे सवर्णदीर्घे च आत आततु-तुः-तिथ-थ-म, अतिता-ष्यति, अत्यात्-त्यास्ताम्-त्यासुः लुङि आटि वृद्धौ सिच इडागमे अपृक्तस्येडागमे सलोपे च आतीत-तिष्टाम् तिषुः नेटीतिनिषेधेन वदव्रजेति नवृद्धिः, आतीः-तिष्टम्-ष्ट आतिषम्-ष्व-ष्म, आतिष्यत्। कर्मादौ-अत्यते आतयति-ते। कृत्सु-अतितः अतित्वा आतितुम्, इण्-आतिः (गन्ता) पादाभ्यामततीति पदातिः, शोभनमततीति स्वातिः स्वाती कृदिकारादिति पक्षे ईकारः, इथिन्-अतिथिः, अतस् अतसः-सी। चिती संज्ञाने (चैतन्ये) अक०। लघूपधगुणे चेतति-तु अचेतत् चेतेत्, चिचेत चिचिततुः चिचितुः, चेतिता-ष्यति, चित्यात् अचेतीत्-तिष्यत्। भावादौ-चेत्यते अचेति, चेतयति अणावकर्मकादिति परस्मैपदमेव, चिचेतिषति चिचितिषति रलोव्युपधादिति वा कित्वम्। कृत्सु-चेतः चेतितव्यं चेतनीयं, बाहुलकात् ल्युः चेतनः, युच्-चेतना क्विप्-चित्, असुन्-चेतः, ईदित्वान्निष्ठायामनिट् चित्तम्, चितित्वा चेतित्वा रलोव्युपधादिति कित्वं वा। च्युतिर् आसेचने (आर्द्रीकरणे) सक०। उपधागुणः च्योतति-तु अच्योतत् च्योतेत्; चुच्योत चुच्युततुः चुच्युतु चुच्योतिथ चुच्युतिव-म, च्योतिता-ष्यति च्युत्यात् कित्वान्नगुणः लुङि सिचोपवादेन इरितोवेति पक्षेऽङि ङित्वात् गुणः अच्युतत्-तताम्-तन्-तः-ततं-त-तम् ताव-म; पक्षे सिचि इटि अपृक्तस्येटि सलोपे अच्योतीत्-तिष्टाम्-तिषुः-अच्योतीः-तिष्टम्-ष्ट-तिषम्-तिष्व-ष्म; अच्योतिष्यत्। कर्मादौ-च्युत्यते अच्योति, च्योतयति अचुच्युतत् चुच्योतिषति। कृत्सु-च्योतनं च्योतितः कित्वविकल्पे च्युतित्वा च्योतित्वा च्योतितुं च्योतन्-न्ती, कर्मणि शान च्योत्यमानः। श्च्युतिर् क्षरणे इति शकारपूर्वोपि। श्चोतति-तु चुश्च्योत शर्पूर्वत्वादभ्यासे चकारशेषः। श्च्योत्यते श्च्योतयति आश्च्योतयति (ईषत्क्षारयति) श्च्योतितुम् इत्यादि पूर्ववत्। मन्थ विलोडने (क्षोभणे) सक०। मन्थति-तु अमन्थत् मन्थेत् ममन्थ-न्थतुः-न्थुः मन्थिता-ष्यति मथ्यात्-थ्यास्ताम्-थ्यासुः यासः कित्वात् अनिदितामिति नलोपः, अमन्थीत्-न्थिष्टाम्-न्थिषुः, अमन्थिष्यत्। कर्मादौ-मथ्यते अमन्थि, मन्थयति-ते अममन्थत् मिमन्थिषति। कृत्सु-मन्थनं मन्थनीयं मथितव्यं मन्थन्-न्ती, नोपधादिति क्त्वो वा कित्वेन पक्षे नलोपे मथित्वा मन्थित्वा प्रमथ्य मन्थितुं, करणे घञि-मन्थः, अधिकरणे ल्युटि ङीपि-मन्थनी, बाहुलकादानः मन्थानः (मन्थनदण्डः) इदित्वान्नुम्। मथ्नातीति क्र्यादौ। क्रदि आह्वाने रोदने च। आह्वाने सक० रोदने अक०। इदित्वान्नुम्। क्रन्दति-तु अक्रन्दत् क्रन्देत्, चक्रन्द चक्रन्दतुः-दुः, क्रन्दिता-ष्यति क्रन्द्यात् अक्रन्दीत् अक्रन्दिष्यत्। उपसर्ग आक्रन्दति समाक्रन्दति। भावादौ–क्रन्द्यते अक्रन्दि, क्रन्दयति-ते चिक्रन्दिषति। कृत्सु-क्रन्दनम् आक्रन्दः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रन्दितव्यं क्रन्दिता क्रन्दन्-न्ती क्रन्दित्वा आक्रन्द्य क्रन्दितुं भावे क्त-क्रन्दितं, घञ्-आक्रन्दः (पृष्ठशत्रुः)। खादृ भक्षणे सक० ऋदित्। खादति-तु अखादत् खादेत्; चखाद-दतुः-दुः कुहोश्चु-रित्यभ्यासस्य चुत्वम्, खादिता-ष्यति खाद्यात्-द्यास्ताम्-द्यासुः, अखादीत्-दिष्यत्। कर्मादौ-खाद्यते अखादि खादयति अचखादत्, णौ-निगरणेति परस्मैपदमेव। कृत्सु-खादनं खादितव्यं खादनीयं ण्यत्-खाद्यं खादिता खादकः खादन्-न्ती कर्मणि-खाद्यमानः खादितः-तवान् खादित्वा खादितुं सन्उ-चिखादिषुः, अ-चिखादिषा। गद व्यक्तायां वाचि सक०। गदति-तु अगदत् गदेत् जगाद जगदतुः-दुः जगदिथ-दथुः-द, जगाद जगद उत्तमणलोणित्वविकल्पेन वृद्धिविकल्पः, जगदिव-म, गदिता-ष्यति गद्यात्, लुङि अतोहलादेरिति वृद्धिविकल्पे अगादीत्-दिष्टाम्-दिषुः, अगदीत्-दिष्टाम्-दिषुः, अगदिष्यत्। उप-प्रणिगदति नेर्गदेति णत्वम्। कर्मादौ-गद्यते निगद्यते अगादि, गादयति-ते जिगदिषति, कृत्सु-गदनं गदितव्यं यत्-गद्यं सोपसर्गे तु ण्यति निगाद्यं, अप्-निगदः (मूलपाठः), घञ्-निगादः गदन्-न्ती गदित्वा निगद्य गदितः सन अ-जिगदिषा सन् उ-जिगदिषुः। टुनदि समृद्धौ अक०। ट्वित् इदिच्च। नन्दति-तु अनन्दत् नन्देत्, ननन्द-दतुः-न्दुः, नन्दिता-ष्यति नन्द्यात् अनन्दीत् अनदिष्यत्। उप-अभिनन्दति (प्रशस्यते)। भावादौ-नन्द्यते नन्दयति अभिनन्दयति (संवर्धयति) आनन्दयति (सुखयति) कर्मणि अभिनन्द्यते निनन्दिषति। कृत्सु-णौ-अभिनन्दनम् अभिनन्दनीयः अभिनन्दितः अभिनन्द्य अभिनन्दयितुम्, णिजभावे अभिनन्दितुम्। नर्द शब्दे अक०। नर्दति-तु अनर्दत् नर्देत् ननर्द-र्दतुः-र्दुः, नर्दिता-ष्यति नर्द्यात् अनर्दीत्-र्दिष्यत्। भावादौ-नर्द्यते अनर्दि नर्दयति-ते निनर्दिषति। कृत्सु-नर्दनं नर्दितव्यं नर्दिता भावे-क्त-नर्दितं नर्दन् नर्दित्वा प्रणर्द्य नर्दितुं णिनि-गेहेनर्दी घञ्-गोनर्दः (देशविशेषः) छ-गोनर्दीयः (पतञ्जलिः)। णिदि कुत्सायाम् सक०। इदित् णो नः। निन्दति-तु अनिन्दत् निन्देत् निनिन्द-दन्तुः-न्दुः निन्दिता-ष्यति निन्द्यात् अनिन्दीत्-दिष्टाम्-दिषुः अनिन्दिष्यत्। उप-प्रणिन्दति उपसर्गादसमासेपीति णत्वम्, विनिन्दति। कर्मादौ-निन्द्यते अनिन्दि निन्दयति-ते निनिन्दिषति। कृत्सु-निन्दनं निन्दनीयं निन्दितव्यं ण्यति-निन्द्यः निन्दकः निन्दन्-न्ती निन्दितः कर्मणि शान-निन्द्यमानः निन्दित्वा विनिन्द्य निन्दितुम्, अङ्-निन्दा। षिधू शास्त्रे (शास्त्रशासने) माङ्गल्ये च सक०। ऊदित्वाद्वेट्। षः सः लघूपधगुणः। सेधति-तु असेधत् सेधेत् सिषेध सिषिधतुः-धुः स्वरतिसूतीतिवेट् सिषेधिथ, इडभावे झषस्तथोरिति थस्य धत्वे धातोर्धस्य जश्त्वे सस्य षत्वे सिषेद्ध सिषिधथुः-ध सिषेध सिषिधिव-म सिषिध्व-ध्म, सेधिता सेद्धा रौ-रः सेधिष्यति सेत्स्यति धस्य जश्त्वचर्त्वे, सिध्यात्-ध्यास्ताम्-ध्यासुः, लुङि इटि असेधीत्-धिष्टाम्-धिषुः, इडभावे अपृक्तस्य ईटि वदव्रजेति वृद्धौ धस्य चर्त्वे असैत्सीत्, तामि सिचि वृद्धौ झलोझलीति सलोपे तस्य धत्वे पूर्वधस्य जश्त्वे असैद्धाम्, अजादौ सिचो लोपाभावे धस्य जश्त्वचर्त्वयोः असैत्सुः असैत्सीः असैद्धम्-द्ध असैत्स्व-त्स्म, असेधिष्यत् असेत्स्यत्। उप-निषेधति प्रतिषेधति (निवारयति) स्थादिष्विति षत्वम्। अपसेधति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(खण्डयति), आसेधति (अवरुणद्धि) उत्सेधति (उद्गमयति)। सोपसर्गोऽस्य प्राथिकः प्रयोगः कर्मादौ-निषिध्यते न्यषेधि, निषेधयति-ते न्यषीषिधत्-त निषिषिधिषति निषिषित्सति हलन्ताच्च कित्वान्न गुणः। कृत्सु निषेधनं निषेधितव्यं निषेद्धव्यं ण्यति-प्रतिषेध्यं, घञि-निषेधः प्रति... आसेधः (निरोधः) उत्सेधः (उच्चता) सिध्वा सिधित्वा सेधित्वा रलइति वा कित्वं, निषिध्य प्रति... वेट्कत्वान्निष्ठायां नेट् सिद्धः निषिद्धः क्तिन् सिद्धिः निषेधितुं निषेद्धुम् सिध्यन्-न्ती णिल्यप् नि... णि सन् उ-सिषाधयिषुः।

वि० **अति अदि** बन्धने सक०। अन्तति, घञ्-अन्तः। अन्दति, ऊ-अन्दूः (शृङ्खला) क्वचिद्ध्रस्वोऽपि... (गजनिगडः)। **इदि** परमैश्वर्ये अक०। इन्दति-तु ऐन्दत् इन्देत् इन्दाञ्चकार ऐन्दीत्। रक्-इन्द्रः किरच्... उ-इन्दुः। **अर्द** गतौ याचने च सक०। अर्दति-तु आर्दत् अर्देत् आनर्द-र्दतुः-र्दुः अर्दिता आर्दीत्। अर्दते... अर्दनम् अर्दितः अर्दः संनिविभ्य इति समादिपूर्वस्य निष्ठायां नेट् समर्णः न्यर्णः व्यर्णः सामीप्ये अभ्यर्णः अन्यत्र अ... जनमर्दयतीति जनार्दनः। **कदि** आह्वाने रोदने च अक०। कन्दति, अर-कन्दरः-रा (गुहा), ल-कन्दलः-ली।... कुत्सितेशब्दे (कौक्षशब्दे) अक०। कर्दति, बाहुल्कादमच्-कर्दमः। **खद** स्थैर्ये हिंसायां च स्थैर्ये अक० हिंसायां... खदति, किरच्-खदिरः। **चदि** आह्लादे दीप्तौ च आह्लादे सक० दीप्तौ अक०। चन्दति, ल्यु-चन्दनः, रक्-चन्द्रः... कन्-चन्द्रकः (मयूरपिच्छचित्रम् स्त्री) चन्द्रिका (ज्योत्स्ना), किरच्-चन्दिरः (आनन्दकः दीप्रश्च)। **बद** स्थैर्ये अ... बदति, बाहुल्कादरन्-बदरम्-री। **बिदि** अवयवे अक०। बिन्दति, उ-बिन्दुः। **रद** विलेखने सक०। रदति रराद रेद... करणे ल्युट-रदनः (दन्तः)। **शुन्ध** शुद्धौ सक०। शुन्धति-तु अशुन्धीत् शुन्धयति क्त-शुधितः। **सिध** गत्याम् ... सेधति-तु सिषेध सिसिधतुः-धुः सिषेधिथ सिषिधिव-म, सेधिता असेधीत्। **सेधतेर्गतौ** (८-३-११३) गत्यर्थस्य से... षत्वं न स्यात्। गङ्गां विसेधति (गच्छति), घञ्-उत्सेधः (उच्चता) आसेधः (निरोधः) क्त आसिद्धः (प्रति... क-सिध्रकः, मन्-सिध्म (वृक्षविशेषौ)।

प्रयोगाः—**ननन्दतुस्तत्सदृशेन तत्समौ। अनुमन्ता विशसिता निहन्ता क्रयविक्रयी संस्कर्ता चो... च खादकश्चेति घातकाः। विप्रतिषेधे परं कार्यम्। चेतनश्चेतनाम्। सिंहनादं चकारोच्चैः। ... विनिन्द्यते। आक्रन्दनं पततु कारुणिकस्य कर्णे। भूतगणान्न्यषेधीत्। आश्च्योतनं प... मन्थानं मन्दरं कृत्वा।**

पवर्गान्ताः—

अनुदात्तेतः (आत्मनेपदिनः)—कपि चलने अक०। कम्पते-ताम् अकम्पत कम्पेत चकम्पे... म्पिरे कम्पिता-ष्यते-पीष्ट अकम्पिष्ट-म्पिष्यत। उप-प्रकम्पते, अनुकम्पते सक० (दयते), ... (ईषत्कम्पते)। भावादौ-कम्प्यते अनुकम्प्यते कम्पयति अचकम्पत् चिकम्पिषते। ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कम्पनीयम् अनुकम्पितव्यं, ण्यत्-अनुकम्प्यः अनुकम्पितः कम्पमानः कम्पित्वा अनुकम्प्य कम्पितुम्, घञ्-कम्पः, अङ्-अनुकम्पा र-कम्प्रः ल्यु-कम्पनः प्रकम्पनः (महावातः) इन् नलोपः-कपिः इलच् नलोपः-कपिलः, बाहुलकात्कलः पस्य बत्वं पक्षे नलोपः कबलः (ग्रासः) कम्बलः। त्रपूष् लज्जायाम् अक०। ऊदित्वाद्वेट्। त्रपते-ताम् अत्रपत त्रपेत लिटि तृफलभजत्रपश्चेत्येत्वाभ्यासलोपौ त्रेपे-पाते-पिरे-पिषे-पिवहे-महे; स्वरतिसूतीतिवेट् त्रपिता-पिष्यति-पिषीष्ट त्रप्ता-प्स्यति-प्सीष्ट, लुङि इटि अत्रपिष्ट-पिषाताम्-षत, इडभावे तथास्ध्वम्सु झलोझलीति सलोपे अत्रप्सातात्म्-सत अत्रप्स्थाः-प्साथाम्-प्ध्वम् अत्रप्सि-प्स्वहि-प्स्महि, अत्रपिष्यत अत्रप्स्यत। उप-अपत्रपते (परस्माल्लज्जते) भावादौ-त्रप्यते अत्रपि त्रपयति-ते अतित्रपत्-त तित्रपिसते तित्रप्सते। कृत्सु-त्रपितव्यं त्रप्तव्यं त्रपिता त्रप्ता त्रपित्वा त्रप्त्वा अपत्रप्य त्रप्तः त्रप्तवान् वेट्कत्वान्नेट्, अङ्-त्रपा, इष्णुच्-अपत्रपिष्णुः, उ-त्रपु। टुवेपृ कम्पने अक० टु ऋत् इतौ। वेपते-ताम् अवेपत वेपेत, विवेपे-पाते-पिरे, वेपिता-ष्यते-षीष्ट अवेपिष्ट-पिषाताम्-षत अवेपिष्यत। भावादौ-वेप्यते अवेपि, वेपयति। कृत्सु-वेपनं वेपितव्यं वेपिता वेपमानः वेपित्वा प्रवेप्य वेपितुं ट्वित्वादथुच्-वेपथुः इनच् ह्रस्वः-विपिनम् (वनम्)। लबि अवस्रंसने अक०। इदित्। लम्बते-ताम्। अलम्बत लम्बेत, ललम्बे-म्बाते-म्बिरे लम्बिता ष्यते-षीष्ट अलम्बिष्ट-ष्यत। उप-प्रलम्बते, आ-अवलम्बते सक० (आश्रयति) विलम्बते (चिरायति)। भावादौ-लम्ब्यते अलम्बि लम्बयति-ते अललम्बत्-त लिलम्बिषते। कृत्सु-अवलम्बनं लम्बनीयं घञ्-लम्बः अवलम्बः विलम्बः प्रालम्बः (उत्तरीयं) अवलम्बितः लम्बमानः लम्बित्वा अवलम्ब्य लम्बितुं, नञि डः नलोपवृद्धी अलाबुः (तुम्बी)। जृभि गात्रविनामे (जृम्भणे) अक०। जृम्भते-ताम् अजृम्भत जृम्भेत, जजृम्भे जृम्भिता-ष्यते-षीष्ट अजृम्भिष्ट-ष्यत। उप० विजृम्भते (वर्द्धते) उज्जृम्भते (उद्रिच्यते)। भावादौ-जृम्भ्यते जृम्भयति जिजृम्भिषते। कृत्सु-जृम्भणं जृम्भितव्यं जृम्भितः जृम्भित्वा विजृम्भ्य जृम्भमाणः जृम्भितुम्, अङ्-जृम्भा। ष्टभि प्रतिबन्धे अक०। स्तम्भते-ताम् अस्तम्भत स्तम्भेत, तस्तम्भे शर्पूर्वाः इति तकारशेषः, स्तम्भिता-ष्यते-षीष्ट अस्तम्भिष्ट-ष्यत। उप-उत्तम्भते (उत्थापयति) उदःस्थेति पूर्वसवर्णः, अवस्तम्भते स्तम्भेरिति षत्वविधावुदित एव ग्रहान्नेह षः। भावादौ-स्तभ्यते स्तम्भयति। कृत्सु-स्तम्भनम् उत्तम्भनम् घञ्-स्तम्भः स्तम्भितः स्तम्भित्वा अवस्तभ्य स्तम्भितुम्।

वि० अबि रबि शब्दे सक०। अम्बते, संज्ञायां कन् अम्बकं नेत्रं त्र्यम्बकः (शिवः) अ-अम्बा (माता), निपातनात् अम्बरीषम् (भ्राष्ट्रम्)। रम्बते, हेइति रम्बते अच्-हेरम्बः (गणेशः)। कबृ वर्णे अक०। कबते, अर-कबरः (चित्रः) कबरी (केशपाशः), उर बाहुलकाद्रेफः-कर्बुरः (चित्रः)। क्लीबृ धाष्टर्ये अक०। क्लीबते, अच्-क्लीबः। क्षीबृ अक०। क्षीवते, क्त-क्षीवः अनुपसर्गात्फुल्लेतिनिपातनात्तलोप इडभावश्च। गल्भ धाष्ट्र्यें अक०। गल्भते प्रगल्भते, अच्-प्रगल्भः (धृष्टः)। जभी गात्रविनामे अक०। रधिजभोरचि (७-१-६१) एतयोर्नुम्स्यादचि। जम्भते,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घञ्-जम्भः (दन्तविशेषोऽभ्यवहार्यश्च)। **श्रम्भु** प्रमादे अक०। श्रम्भते विश्रम्भते (विश्वसिति), घञ्-विश्रम्भः क्त-विश्रब्धः। **ष्टुभु** स्तम्भे अक०। स्तोभते, घञ्-स्तोभः (अनर्थकशब्दः), क्विप्-अनुष्टुप् त्रिष्टुप् (छन्दोविशेषौ) सुषामादित्वात्षत्वम्।

प्रयोगाः—तलेष्ववेपन्त महीरुहाणाम्। श्वशुरात्त्रपते वधूः। चकम्पे तस्य हृदयम्। जृम्भस्व दन्ताँस्ते गणयिष्यामि। उत्तम्भिता लतावंशैः। वेपथुश्च शरीरे मे। अवलम्बनमस्माकम्। भज प्रकम्पमरिवर्गः। विजृम्भितो रोगः।

उदात्तेतः (परस्मैपदिनः)—गुपू रक्षणे सक० ऊदित्वाद्वेट्। **गुपूधूपविच्छिपणिपनिभ्य आयः** (३-१-२८) एभ्य आयप्रत्ययः स्यात्स्वार्थे। इत्यायप्रत्यये लघूपधगुणे गोपायेत्यस्य सनाद्यन्ता इति धातुसंज्ञायां लट्तिप्शबादयः गोपायति गोपायतु अगोपायत् गोपायेत्। आर्धधातुकेषु आयादयः **आर्धधातुके वा** (३-१-३१) आर्धधातुकविवक्षायामायादयो वा स्युः। इत्यायपक्षे लिटि कास्प्रत्ययादित्यत्र कास्यनेकाज्ग्रहणमित्युक्तया आमि **आर्धधातुके** (६-४-४६) इत्यधिकृत्य **अतो लोपः** (६-४-४८) आर्धधातुकोपदेशकाले यदकारान्तं तस्याऽकारस्य लोपः स्यादार्धधातुके परे। इति यस्याकारलोपे गोपायामित्यतो लिटि कृभ्वस्तीनामनुप्रयोगः गोपायाञ्चकार-बभूव-आस। आयाभावपक्षे जुगोप जुगुपतुः-पुः ऊदित्वाद्वेट् जुगोपिथ जुगोप्थ जुगुपथुः-प जुगोप जुगुपिव-म, आयादेशे गोपायिता-रौ-रः, आयाभावे इटि गोपिता-रौ-रः, इडभावे गोप्ता-रौ-रः, एवं गोपायिष्यति गोपिष्यति गोप्स्यति, गोपाय्यात् आये सत्यतो लोपः आयाभावे कित्वान्न गुणः गुप्यात्, लुङि आये सिच इटि अपृक्तस्य इटि सलोपे अगोपायीत्-यिष्टाम्-यिषुः, आयाभावे इटि अगोपीत्-पिष्टां-पिषुः, इडभावे सलोपाभावेन वदव्रजेति वृद्धौ अगौप्सीत् अगौप्ताम् झलोझलीतिसलोपः अगौप्सुः अगौप्सीः अगौप्तम्-प्त अगौप्सम्-स्व-स्म, अगोपायिष्यत् अगोपिष्यत् अगोप्स्यत्। कर्मादौ-गोप्यते अगोपि गोपयति-ते अजूगुपत्-त, सनि जुगोपायिषति जुगोपिषति जुगुपिषति रलोव्युपधादिति वा कित्वम्, इडभावे हलन्ताच्चेतिकित्वे जुगुप्सति। कृत्सु-गोपनं गोपायि-गोपि-गोप्-तव्यं ण्यत्-गोप्यम् अचोयत्-गोपाय्यम् गोपकः गोपायितः यस्यविभाषेतीण्निषेधे गुप्तः गोपायित्वा गोपित्वा गुपित्वा गुप्त्वा इट्पक्षे वा कित्वम्, क्ति-गुप्तिः तितुत्रेतिनेट्, गोपायि-गोपि-गोप्तुम्, क्यपि निपातनाद्रस्य कत्वे कुप्यं (सुवर्ण-रजतभिन्नं द्रव्यम्)। धूप सन्तापे सक०। गुपूधूपेत्यायः लघूपधत्वाभावान्न गुणः धूपायति अधूपायत् धूपायेत्, धूपायाञ्चकार दुधूप-पतुः पुः, धूपायिता धूपिता धूपायिष्यति धूपिष्यति, धूपाय्यात् धूप्यात्, अधूपायीत् अधूपीत् अधूपायिष्यत् अधूपिष्यत्। कर्मादौ-धूप्यते अधूपि धूपयति-ते। कृत्सु-धूपनं धूपायितव्यं धूपितव्यं धूपायितः धूपितः। जप मानसे सक०। जपति-तु अजपत् जपेत् जजाप जेपतुः-पुः-पिथ-व-म एत्वाभ्यासलोपौ, जपिता-ष्यति जप्यात् अजापीत् अजपीत् अतोहलादेर्लघोः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वा वृद्धिः, अजपिष्यत्। उप-प्रजपति उपजपति (भिनत्ति) अभिजपति (मन्त्रयति) कर्मादौ-जप्यते जपयति अजीजपत् जिजपिषति। कृत्सु-जपनं जपितव्यं जपनीयं, ण्यत्-जाप्यं, यत्-जप्यं, अप्-जपः उपसृष्टे घञ्-उपजापः, अच्-कर्णेजपः (सूचकः) जपित्वा प्रजप्य जपितः, जपितुं जपन्-न्ती जापकः, यङन्ताद्ऊकः जञ्जपूकः (अतिजपशीलः) जप्त्वा जप्तः जप्तुमित्येके। **जल्प** व्यक्तायां वाचि सक०। जल्पति-तु अजल्पत् जल्पेत् जजल्प जजल्पतुः-पुः जल्पिता-ष्यति जल्प्यात् अजल्पीत् अजल्पिष्यत्। उप-प्र-अनुजल्पति। कर्मादौ-जल्प्यते जल्पयति। कृत्सु-जल्पनं जल्पितव्यं जल्पः जल्पकः जल्पन् जल्पित्वा प्रजल्प्य जल्पितुं, षाकन्-जल्पाकः (बहुभाषी)। **लप** व्यक्तायां वाचि अक०। लपति-तु अलपत् लपेत् ललाप लेपतुः-पुः, लपिता ष्यति लप्यात् अलापीत्-लपीत् अतोहलादेरिति वा वृद्धिः, अलपिष्यत्। उप-प्रलप्-प्रलापे, विलप्-विलापे, अनुलप-मुहुर्भाषणे, आलप्-आलापे, संलप्-मिथोभाषणे, अपलप्-अपन्हवे, विप्रलप्-विरुद्धोक्तौ, प्रलपतीत्यादि। भावादौ-लप्यते विलप्यते अलापि संलापयति। कृत्सु-विलपनं संलपितव्यं विलपनीयं, घञ्-संलापः प्रलापः अभिलापः (शब्दप्रयोगः) अपलापः विलपन्-न्ती लपित्वा विलप्य संलपितुम्, करणेल्युट्-लपनं (मुखं) उ रत्वंच-रिपुः। **चुबि** वक्त्रसंयोगे सक०। चुम्बति-तु अचुम्बत् चुम्बेत् चुचुम्ब-म्बतुः-म्बुः चुम्बिता-ष्यति चुम्ब्यात् अचुम्बीत्-म्बिष्यत्। आ-अनु-प्र-सं-परि-चिचुम्बति। कर्मादौ-चुम्ब्यते अचुम्बि, चुम्बयति-ते अचुचुम्बत्-त चुचुम्बिषति। कृत्सु-चुम्बनं चुम्बितव्यं चुम्बनीयं चुम्बकः चुम्बितः चुम्बन्-न्ती चुम्बित्वा परिचुम्ब्य चुम्बितुम्।

वि० तुबि अर्दने सक०। तुम्बति, अच् ङी-तुम्बी। **पर्प** गतौ सक०। पर्पति। पर्पत्यनेनेति पर्पः (पङ्गुपीठः), पर्पति पर्पिकः। **सप** समवाये सक०। सपति, क्तिन्-सतिः (अञ्चः) कनिन् तुट् च शत। **शुभ** भाषणे सक०। ..., क-शुभम्, रक्-शुभ्रः।

प्रयोगाः–जुगोप गोरूपधरामिवोर्वीम्। जननि जपनीयं जपविधौ। प्रजल्पन्मत्पदे लग्नः। रक्तश्चुम्बति चन्द्रमाः। विललाप सवाष्पगद्गदम्। प्रलापोनर्थकं वचः। उपजापेन भिनत्ति शात्रवान्। अप्रकाश्यमिदं गोप्यम्। मानसो जप उत्तमः। जल्पाको विप्रलपति। अपलपत्यसौ।

...स्पान्ताः–

अनुदात्तेतः (आत्मनेपदिनः)–**घूर्ण** भ्रमणे सक०। घूर्णते-ताम् अघूर्णत घूर्णेत जुघूर्णे-र्णाते-र्णिरे, घूर्णिता-ष्यते-षीष्ट अघूर्णिष्ट-ष्यत। उप-प्र-वि-उद्घूर्णते। भावादौ-घूर्ण्यते अघूर्णि घूर्णयति जुघूर्णिषते। कृत्सु-घूर्णनं घूर्णितव्यं घूर्णमानः घूर्णित्वा प्रघूर्ण्य घूर्णितुम्। **पण** व्यवहारे (क्रयविक्रयरूपे) स्तुतौ च सक०। गुपूधूपेत्यायः स्तुत्यर्थकस्यैव नतु व्यवहारार्थकस्य। पणते-ताम् अपणत पणेत पेणे णाते-णिरे, पणिता-ष्यते-षीष्ट अपणिष्ट ष्यत। कर्मादौ-पण्यते स्तुतौ णिचि पणायति पिपणिषते। कृत्सु-पणनं पणितव्यं पणनीयं पणमानः पणितः अधिकरणे घञ्-आपणः पणित्वा विपण्य पणितुम् अप्-पणः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इजिः पस्य घः-वणिक्, इन्, विपणिः (पण्य वीथि)। स्तुतौ तु अनुबन्धस्य केवले चरितार्थत्वात् परस्मैपदमेव पणायति, पणायितः पणयित्वा इत्यादि। कमु कान्तौ (इच्छायाम्) सक०। कमेर्णिङ् (३-१-३०) कमेर्णिङ् स्यात्स्वार्थे। इति णिङि अतउपधाया इति वृद्धौ कामि इत्यस्य धातुसंज्ञया सनाद्यन्ता धातवः इति ... दयः ङित्वात्तङ् कामयते-ताम् अकामयत कामयेत। लिटि णिङन्तात्कास्यनेकाच इत्याम्... लिटो लो... णेरनिटि (६-४-५१) अनिडादावार्धधातुके परे णेर्लोपः स्यात्। इति लोपापवादेन अयामन्ताल्वाय्येत्न्विष्णुषु (६-४-५५) आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात्। इत्ययादेशे कामयामित्यतः कृभ्वस्तीनामनुप्रयोगः कामयाञ्चक्रे-बभूव-आस। आयादय इत्यार्धधातुके... भावपक्षे चकमे-माते-मिरे, कामयिता कमिता, कामयिष्यते कमिष्यते, कामयिषीष्ट कमिषीष्ट, लुङि णिङि ते च्लेः सिजपवादेन णिश्रिद्रुस्रुभ्य इति चङि अडागमे णेरनिटीति णिलोपात्पर... नेकाच इति यणि प्राप्ते णयल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन (वा) ... णिलोपे णौ चङ्युपधाया ह्रस्वः (७-४-१) चङ् परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात्। इति ह्रस्वे, चङि (६-१-११) चङि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य। इति कमित्यस्य द्वित्वे हलादिःशेषे कस्य चत्वे सन्वल्लघुनि चङ्परेऽनग्लोपे (७-४-९३) चङ्परे इति बहुव्रीहिरन्यपदार्थो णिः स चाङ्गस्येति च द्वयमावर्तते अङ्गसंज्ञानिमित्तं यच्चङ्परं णि तत्परं यल्लघुस्तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यात् ग्लोपेऽसति। इति सन्वत्त्वे सन्यतः (७-४-७९) अभ्यासस्यात इकारः स्यात्सनि। इतीत्वे दीर्घो लघोः (७-४-९४) अभ्यासस्य लघोर्दीर्घः स्यात्सन्वद्भावविषये। इति दीर्घे अचीकमत। णिङभावे कमेश्च्लेश्चङ् वक्तव्यः (वा) इति कमेः च्लेश्चङि द्वित्वहलादिःशेषचत्वेषु णेरभावेन सन्वद्भावादित्वदीर्घाभावेन अचकमत। एवं तामादौ। अची-चकमताम्-कमन्त-कमथाः-कमथाम्-कमध्वम् कमि-कमावहि-महि। अकामयिष्यत अकमिष्यत। भावे-काम्यते कम्यते अकामि अकमि, णिङन्ता... पूर्वणिलोपे कामयति-ते नकम्यमीति मित्वनिषेधाद्वृद्धिः। कृत्सु-कमनीयं कमितव्यं काम्यं कामयितव्यं... कामयित्वा कमित्वा कान्त्वा उदित्वाद्वेट् इडभावे अनुनासिकस्येति दीर्घः, कान्तः वेट्कत्वात्... दीर्घः, उकञ्-कामुकः, र-कम्रः, युच्-कामना, ल्यु-कमनः, स-कंसः (पानपात्रं) घञ्-कामः, ण... कामः, क्तिन्-कान्तिः दीर्घः, णमुल्-कामं कामम्। क्षमूष् सहने सक० ऊदित्वाद्वेट्। क्षमते ... अक्षमत क्षमेत, चक्षमे-माते-मिरे चक्षमिषे चक्षंसे चक्षमाथे चक्षमिध्वे चक्षंध्वे चक्षमे चक्षमिवहे ... इडभावे म्वोश्च (८-२-६५) मान्तस्य धातोर्मस्य नः स्यान्मवयोः परयोः। इति नत्वे ... चक्षण्वहे-महे। क्षमिता क्षन्ता, क्षमिष्यते क्षंस्यते, क्षमिषीष्ट क्षंसीष्ट, अक्षमिष्ट-मिषाताम्-षत, इडभावे अक्षंस्त-साताम्-सत० अक्षंस्थाः-क्षंसाथाम्-क्षन्ध्वम् अक्षंसि-स्वहि-स्महि। अक्षमिष्यत अक्षंस्यत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्मादौ-क्षम्यते अक्षमि क्षमयति-ते मित्वाद्ध्रस्वः अचिक्षमत्-त चिक्षमिषते चिक्षंसते। कृत्सु-क्षमितव्यं क्षन्तव्यं क्षमिता क्षन्ता क्षमित्वा क्षान्त्वा विक्षम्य क्षमितुं क्षन्तुं क्षान्तः-न्तवान् वेट्क्त्वान्नेट् दीर्घः, क्तिन्-क्षान्तिः, अङ्-क्षमा, अच्-क्षमः, ण-कार्यक्षमः णमुल्-क्षमं क्षमं क्षामं क्षामम्।

वि० १. कार्यकालं संज्ञापरिभाषमिति पक्षे तत्तत्कार्यविधिप्रदेशेषु संज्ञापरिभाषशास्त्रयोरुपस्थितिः, यथोद्देशं संज्ञापरि-भाषमिति पक्षे संज्ञाशास्त्रं परिभाषाशास्त्रं च स्वप्रदेशे स्थितमेव तत्तद्विध्यपेक्षितं स्वमर्थं बोधयति नतु तच्छास्त्रयोस्तत्तद्वि-धौ उपस्थितिः, इतिमतद्वयमादाय सन्वद्भावदीर्घविध्योर्मतद्वयमित्थं सङ्गृह्यते-संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते, तत्रैव सन्वच्च नानेकाक्ष्विति माधवः ॥ चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते। किन्त्वस्यावयवः कश्चित्तस्मादेकाक्ष्विदं न ॥ वस्तुतोऽङ्गस्यावयवो योऽभ्यास इतिवर्णनात्। ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥ चकास्तौतूभयमिदं व्याख्यानात्च्च व्यवस्थया। णेर्विशेष्यं सन्निहितं लघुनीत्यङ्गमेव वा ॥ इतिव्याख्याविकल्पस्य कैयटेनैव वर्णनात्। णेरग्लोपेपि सन्वत्त्वगितामपि सिद्धये ॥

वि० २. घुण भ्रमणे अक०। घोणते निपातनादचि टाप् घोणा (नासा) **पन** स्तुतौ सक०। पनायति, असच्-पनसः (वृक्षविशेषः)। **भाम** क्रोधे अक०। भामते, घञ्-भामः, इनि—भामिनी (कोपना स्त्री)।

प्रयोगाः—घूर्णते शात्रवस्यापि यद्गुणश्रवणाच्छिरः। पणिता न जनारवैरवैत्। क्षन्तव्यो मेपरा-धोयम्। न वयं कामयामहे। कामना पूर्यतां मम। क्षन्तुमर्हस्यतिक्रमम्। दण्डः पणानां शतम्। अमुकस्याकुला दृष्टिः। क्षमस्व प्रभो।

उदात्तेतः (परस्मैपदिनः) **रण भण क्वण** शब्दार्थाः भणः सक० रणः क्वणः अक०। रणति-तु अरणत् रणेत्, रराण रेणतुः-णुः, रणिता-ष्यति रण्यात् अराणीत् अरणीत् अरणिष्यत्। उप-अनु-रणति। भावादौ-रण्यते रणयति-ते अरीरणत्-त। कृत्सु-रणनम् अनुरणनम् रणितं रणित्वा अनुरण्य रणन्-न्ती रणितुम् अप्-रणः, ड-रण्डा घञर्थे कः द्विर्भावः-रणरणकः (औत्सुक्यम्)। भणति-तु अभणत् भणेत् बभाण बभणतुः-णुः, भणिता ष्यति भण्यात् अभाणीत् अभणीत् अभणिष्यत्। कर्मादौ-भण्यते अभाणि भणयति-ते। कृत्सु-भणनं भणितव्यं भणनीयं भणितः भणित्वा भणितुं भणितिः तितुत्रेष्वग्रहादीनामितीट्, डः-भण्डः, पुच्छभाण्डेति निर्देशात् भाण्डः। क्वणति-तु अक्वणत् क्वणेत् चक्वाण चक्वणतुः-णुः क्वणिता ष्यति क्वण्यात् अक्वाणीत् अक्वणीत् अक्वणिष्यत्। भावादौ-क्वण्यते अक्वाणि क्वाणयति। कृत्सु-क्वणनं घञ्-निक्वाणः अप्-निक्वणः क्वणितं क्वणित्वा क्वणितुम्। **ष्टन** शब्दे सक०। षस्य सत्वे ष्टुत्वस्यापि निवृत्तिः। स्तनति-तु अस्तनत् स्तनेत्, तस्तान तस्तनतुः-नुः स्तनिता-ष्यति स्तन्यात् अस्ता-स्तनीत् अस्तनिष्यत्। उप-प्रतिस्तनति (प्रति-ध्वनति) निष्टनति (पीडया शब्दायते)। भावादौ-स्तन्यते स्तनयति कृत्सु-स्तननं स्तनितं (गर्जितं), घञ्-अभिनिष्टानः (विसर्गः) वा संज्ञायामिति षत्वं अच्-स्तनः स्तनित्वा स्तनितुम्। **क्रमु** पाद-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विक्षेपे सक० । सार्वधातुकेषु वा **भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः** (३-१-७०) एभ्यः श्यन् स्यात्कर्त्रर्थे सार्वधातुके परे। इति पक्षे श्यनि पक्षे शपि च **क्रमः परस्मैपदेषु** (७-३-७६) क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति। इति दीर्घे क्राम्यति-तु क्रामति-तु, अक्राम्य-मत् क्राम्ये-मेत्। आर्धधातुके चक्राम चक्रमतुः-मुः-मिथ-थ-म, क्रमिता-ष्यति क्रम्यात्। **स्नुक्रमोरनात्मनेपदनिमित्ते** (७-२-३६) अनयोरनात्मनेपदनिमित्त एवेट् स्यात्। सेट्कत्वादेव सिद्धे नियमार्थमिदं, तेन भावकर्मलकारेषु नेट्। अक्रमीत् ह्म्यन्तेति वृद्धिनिषेधः, अक्रमिष्यत्। अनुपसर्गाद्वेत्युपसर्गायोगे पक्षे आत्मनेपदमपि, पूर्वोक्तनियमान्नेट् दीर्घोऽपि न श्यन् शब्वा। क्रमते-ताम् अक्रमत क्रमेत चक्रमे क्रन्ता क्रंस्यते अक्रंस्त अक्रंस्यत, क्रम्यते इत्याद्यपि। उप-वृत्तिसर्गेति अप्रतिबन्धोत्साहवृद्धिषु, उप-पराभ्यां वृत्त्यादौ, वियोजने पादविहारे आङ्योगे ज्योति रुद्गमने, प्रोपयोगे प्रारम्भेऽर्थे च आत्मनेपदम् बुद्धिः क्रमते (न प्रतिहन्यते), अध्ययनाय क्रमते (उत्सहते), शास्त्राणि क्रमन्ते (वर्धन्ते) प्र-उपक्रमते (आरभते) साधु विक्रमते (पादौ न्यसति), सूर्य आक्रामते (उद्गच्छति)। अन्यत्र परस्मैपदमेव अपक्रामति (अपसरति), संक्रामति (स्थानान्तरं याति), अनुक्रामति (अनुगच्छति) आक्रामति (उपरि गच्छति) प्रक्रामति (गच्छति), आक्रामति (आगच्छति) अति-व्यतिक्रामति (लङ्घयति), व्युत्क्रामति (व्युत्क्रम्य याति)। कर्मादौ-क्रम्यते उपक्रम्यते क्रमयति चिक्रमिषति चिक्रंसति। कृत्सु-आक्रमणं संक्रमितव्यं प्रक्रमणीयं घञ्-विक्रमः संक्रमः उपक्रमः पराक्रमः नोदात्तोपदेशेति वृद्धिनिषेधः, क्रमित्वा क्रान्त्वा क्रन्त्वा उदित्वाद्वेट् इडभावे क्रमश्चक्त्वि इति वा दीर्घः विक्रम्य आक्रम्य क्रान्तः विक्रान्तः वेटकत्वान्नेट् क्राम्यन् क्रामन् क्रममाणः, सन् अ-चिक्रमिषा उ चिक्रमिषुः, आत्मनेपदिषु तु चिक्रंसा चिक्रंसुः, क्रमितुं प्र-विक्रान्तुं क्ति-सं-विक्रान्तिः तितुत्रेति ड-नक्रामति नक्रः, इन् रत्वं च-क्रिमिः। **चमु** अदने-सक०। प्रायेणायमाङ्पूर्वः। **ष्ठिवुक्लमुचमां शिति** (७-३-७५) एषामचो दीर्घः स्यात् शिति। **आङि चम इति वक्तव्यम्** (वा) इति दीर्घः आचामति-तु आचामत् आचामेत् आचचाम आचेमतुः-मुः-मिथ-थ-म आचमिता-ष्यति आचम्यात् आचा-चमीत् अतोहलादेरिति वा दीर्घः, आचमिष्यत। कर्मादौ-आचम्यते आचामि आचामयति। इत्यादि आचमनम् आचमनीयम् करणेऽनीयर्, चमित्वा चान्त्वा उदित्वाद्वेट्, आचम्य, आचान्तः वेट्कत्वान्नेट् आचमितुम् असन्-चमसः (पानपात्रं) ऊ-चमूः।

वि० अण वण मण कण शब्दे सक० अक०। अणति, उ-अणुः प्रकारे कनि अणुकः, ड-अण्डः वणति, घञ्-वाणः ङी वाणी, ड-वण्डः। (अल्पतनुः पशुः)। मणति, इन्-मणिः इनार्थे कनि-मणिकः ड-मण्डः। कणति, घ-कणः, कनि टापि कणिका, ठ-कण्ठः। **शोणृ** वर्णगत्योः अक०। शोणति, क्त-शोणितं (रुधिरं), घञ्-शोणः (रक्तः)। **श्रोणृ** संघाते अक०। श्रोणति, इन्-श्रोणिः ङी-श्रोणी (कटिः), अच् टाप् श्रोणा (नक्षत्रविशेषः)। **पण** संभक्तौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुद्-सानुः (प्रस्थः), **कनी** दीप्ति-कान्ति-गतिषु अक०। कनति, क्त-कान्तः य-कन्या क्वन्-कनकम्। **वन** अक०। वनति, अच्-वनम्, समूहे यः-वन्या, इन्-वनिः ङी-वनी, नवनिः अवनिः अवनी। **अम** गत्यादिषु सक०। अमति, अत्रन्-अमत्रं (पात्रं) इत्र अमित्रः (शत्रुः), र दीर्घः-आम्रम्, त्रन्-अन्त्रम्।

प्रयोगाः–कार्यमुपक्रमामहे। अनणु रणन्मणिमेखलम्। मन्जीरादिषु रणितम्। स्तनितं मेघगर्जितम्। बालः पीडया निष्टनति। आचान्तः पुनराचामेत्। कालोह्ययं सङ्क्रमितुं तदङ्गे। साधु विक्रमते वाजी। घण्टा क्वणति मन्दिरे। इति भणितेन प्रससाद। अनुरणति तन्त्री वीणायाः। अतिक्रामति कालः। स पराक्रमते।

यान्ताः–

अनुदात्तेतः (आत्मनेपदिनः)–**अय** गतौ सक०। अयते-ताम् आयत अयेत लिटि दयायास-प्रेत्यामि कृञाद्यनुप्रयोगे अयाञ्चक्रे-बभूव-आस, अयिता-ष्यते-षीष्ट,-षीयास्ताम्-षीरन्-षीष्ठाः-षीयास्ताम्, ध्वमि **विभाषेटः** (८-२-७६) इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वम्-ध्वम् अयिषीय-षीवहि-महि। आयिष्ट-यिषाताम्-षत-यिष्ठाः-यिषाथाम्-यिढ्वम्-ध्वम् यिषि-ष्वहि-ष्महि, आयिष्यत। **उपसर्गस्यायतौ** (८-२-१६) अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात्। प्लायते पलायते (विद्रवति), निस्दुसो रुत्वस्यासिद्धत्वान्न लत्वम् निरयते दुरयते; निर्दुरोस्तु निलयते दुलयते, भावादौ-पलाय्यते पलाययति पलायियिषते। कृत्सु-उदयनं पलायनं पलायितव्यं पलायकः पलायमानः अयित्वा पलाय्य पलायितः पलायितुम्, घञ्-आयः अच्-अयः (शुभदैवम्)। प्रत्यय इति तु इणः, उदयतीतिपरस्मैपदं तु कटीत्यत्र प्रश्लिष्टस्य ईधातोः, अस्यैव चानुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्यत्वात्। **दय** दानगतिरक्षणहिंसादानेषु सक०। दयते-ताम् अदयत दयेत लिट्यामि दयाञ्चक्रे-बभूव-आस दयिता-ष्यते-षीष्ट अदयिष्ट-ष्यत। कर्मादौ-दय्यते दाययति-ते। कृत्सु-दयनं दयितव्यं दयनीयः दयितः-ता दयमानः दयित्वा दयितुम्, अङ्-दया, आलुच्-दयालुः। **षेवृ** सेवने सक०। सेवते-ताम् असेवत सेवेत, सिषेवे सेविता-ष्यते-षीष्ट असेविष्ट-ष्यत। उप-प्र-अनु-उप-आसेवते, नि-वि-परिषेवते परिनिविभ्य इति षत्वम्। कर्मादौ-सेव्यते असेवि सेवयति-ते सिषेविषते। कृत्सु-सेवनं सेवितव्यं सेवनीयः ण्यत्-सेव्यः सेवकः सेवमानः सेवितः सेवित्वा निषेव्य सेवितुम्, अङ्-सेवा, सन् अ-सिसेविषा, सन् उ-सिषेविषुः।

टि० ऊयी तन्तुसन्ताने सक०। ऊयते, क्त-ऊतः आ ऊतः ओतः प्र-प्रोतः, क्तिन्-ऊतिः। **स्फायी ओप्यायी** वृद्धौ अक० ईदितौ। स्फायते, क्त-स्फीतः-तवान् श्वीदित इति नेट् स्फायःस्फीभावश्च, क्तिन्-स्फीतिः। प्यायते आप्यायते-ताम् अप्यायत प्यायेत। **लिड्यङोश्च** (६-१-२९) लिटि यङि च प्यायः पीभावः स्यात्। पिप्ये पिप्याते पिप्यिरे प्यायिता-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्यते षीष्ट, लुङि **दीपजनबुधपूरितायिप्यायिभ्यो ऽन्यतरस्याम्** (३-१-६१) एभ्यश्च्लेश्चिण् वा स्यात्कर्तृशब्दे परे। **चिणो लुक्** (६-४-१०४) चिणः परस्य तशब्दस्य लुक्स्यात्। इति चिणि अप्यायि तदभावे अप्यायिषाताम्-षत-ष्यत। कर्मादौ-आप्याय्यते आप्याययति-ते, आप्यायनम् आप्यायितव्यम् आप्यायितः आप्यायितुम् णौ अप्याययितुम् कर्मणि शान-आप्याय्यमानः, कर्तरि क्त-पीनः स्वाङ्गे निष्ठायां पीभावः आप्यानः आङि-अन्धूधसोः आपीनः (अन्धुः-कूपः) आपीनम् (ऊधः)। **कल** शब्द संख्यानयोः कलते घञ्-कालः, स्वार्थे कनि-कालकम्, इलच्-कलिलम्, अभच्-कलभः (करिशावः), इन्-कलिः, क्वन्-कल्क **कल्ल** अव्यक्ते शब्दे अक०। कल्लते, ओल-कल्लोलः। **भल भल्ल** परिभाषणहिंसादानेषु सक०। भलते, घञ् भल्लते, ऊक-भल्लूकः। **मल मल्ल** धारणे सक०। मलते, कर्मणि घञ्-माला ण्यत्- माल्यं, कयन्-मलयः, इनच्-मलिनः, ईमस्-मलीमसः, केन (जलेन) मल्यते क-कमलम्, क्वन् ङीष्-आमलकी। मल्लते, अच्-मल्लः संज्ञायां ण्वुल्-मल्लिका, क्वन्-मल्लकः (पानपात्रम्), मलं मल्लते इति मलमल्लम् (कौपीनम्)। संवरणे अक०। वलते, घञ् वालः (केशः), पक्षे रः-वारः (पर्यायः) इन्-वलिः ङीष् वली, अभच्-वलभी, उक् गुगागमश्च वल्गुः (सुन्दरः) आकन्-वलाकः। वल्लते, अभच्-वल्लभः (प्रियः), अर ङीष्-वल्लरी ङीष्-वल्ली, ऊर-वल्लूरम् (शुष्कमांसम्)। **शल** चलनसंवरणयोः सक०। शलते, अभच्-शलभः, कन्-शल्कः, ऊकन्-शालूकः (कन्दः), कल-शल्लं शल्ली (शल्लकण्टकः), आलुच्-शलालु (गन्धद्रव्यम्)। **देवृ** देवने सक०। बुन्-आदेवकः (क्रीडयिता), अर-देवरः, लत्वे के देवलकः (देवपूजावृत्तिकः)। **रेवृ** प्लवगतौ सक०। रेवते, रेवा (नदीविशेषः), युच्-रेवणः।

प्रयोगाः–दयालुरदयिष्ट सः। पलायिष्ट बलाच्चौरः। आचारपूतं पवनः सिषेवे। निषेव्य विबुधैः। उदयते दयते च दिवाकरः। पर्यसेवन्त सेवकाः। सेवया दीयते कलौ। दयनीयदरोऽकिञ्चनं दयाञ्चक्रे। अदयिष्ट नरेश्वरः।

उदात्तेतः (परस्मैपदिनः)–चर गतौ भक्षणे च सक०। चरति-तु अचरत् चरेत्, चेरतुः-रुः चरिता-ष्यति चर्यात्, लुङि नेटीतिनिषेधमतोहलादेरिति विकल्पं च बाधित्वा अतो ल्रान्तस्येति वृद्धिः अचारीत् अचरिष्यत्। उप-प्रचर-प्रचरणे, उपचर-उपचारे अपचर्-अपचारे, विचरणे, आचर-आचरणे, अतिचर-अतिचारे प्रचरतीत्यादि, उच्चरसकर्मके उदश्चर इति तङ्-गुरुमुच्चरते (उत्क्रम्यगच्छति), सञ्चर-तृतीयायोगे तङ्-रथेन सञ्चरते। कर्मादौ-चर्यते प्रचार्यते उच्चारयति विचारयति अचीचरत्, कृत्सु-आचरणं णि-विचारणम् आचरितव्यं णि-विचार विचारकः चरन्-णि विचारयन् कर्मणि-विचार्यमाणः घञ्-विचारः प्रचारः, ट-सेनाचरः, इष्णुच् चरित्वा प्रचर्य णि-विचार्य चरितुं णि-विचारयितुम्, इत्र-चरित्रं स्वार्थेणि चारित्रं, गोचरः, मन्-चर्म, ञुण्-चारुः, वुक्-चरकः। **दल** विशरणे अक०। दलति-तु अदलत् दलेत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देलतुः-लुः दलिता-ष्यति दल्यात् अदालीत् अतोल्रान्तस्येति वृद्धिः अदलिष्यत्। उप-वि-निर्दलति। भावादौ-दल्यते अदालि अदलि, दलयति-ते मित्वाद् ह्रस्वः अदीदलत्-त। कृत्सु-निर्दलनं दलितः दलित्वा दलितुं, घञ्-दालः, इमचि डलयोरभेदात् दाडिमम्, कुं दलतीति कुद्दालः पृषोदरादिः। ञिफला विशरणे अक०। फलति-तः अफलत् फलेत्, पफाल फेलतुः-लुः तॄफलेत्येत्वाभ्यासलोपौ, फलिता-ष्यति फल्यात् अफालीत् अतोल्रान्तस्येति वृद्धिः, अफलिष्यत्। भावादौ-फल्यते अफालि फलयति-ते अपीफलत्-त। कृत्सु-फलनं फलितव्यं, अच्-फलं फलन्-न्ती फलित्वा फलितुम् निपातनान्निष्ठायां फुल्लः फुल्लवान्, आदितश्चेत्यादिकर्मणोरिड् वा फलितं फुल्लम्, निपातनाल्लत्वे उत्फुल्लः संफुल्लः अन्यत्र प्रफुल्तः उगुगा-दयश्च फल्गुः (तुच्छः)। फल निष्पत्तौ सक०। फलतीत्यादि पूर्ववत् सकर्मकत्वं विशेषः। निष्ठाया-मिडेव फलितः, अच्-फलं, टापि-त्रिफला, इनच्-फलिनः, संज्ञायां कन्-फलकम्, करणे घञ्-फालः। मील निमेषणे अक०। मीलति-तु अमीलत् मीलेत् मिमील मिमीलतुः-लुः मीलिता-ष्यति मील्यात् अमीलीत्-मीलिष्यत्। उप-निमील-निमीलते, उन्मील-उन्मीलते, प्रमील-तन्द्रायाम्, संमील-संमीलने। भावादौ मील्यते अमीलि, मीलयति-ते अमीमिलत्-त अमिमीलत्-त। कृत्सु-संमीलनम् उन्मीलनम् मीलन् मीलित्वा संमील्य मीलितुम्, अङ्-प्रमीला (तन्द्री)। निमील्य नेत्रे सहसा व्यबुध्यतेत्यादौ क्वचित्सकर्मकप्रयोगोपि। स्खल चलने (स्खलद्गतौ) अक०। स्खलति-तु अस्खलत् स्खलेत् चस्खाल चस्खलतुः-लुः स्खलिता-ष्यति स्खल्यात् अस्खालीत् अतोल्रान्तस्य, अस्खलिष्यत्। उप-प्रस्खलति। भावादौ-स्खल्यते अस्ख-स्खालि स्खलयति घटादित्वाद्ह्रस्वः अचिस्खलत्। कृत्सु-स्खलनं स्खलितव्यं स्खलितः स्खलित्वा प्रस्खल्य स्खलन्। अव रक्षण गति कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-सामर्थ्य-याचन-क्रियेच्छा-दीप्त्यावाप्त्यालिङ्गन-हिंसा-दानवृद्धिषु सक०। अवति-तु आवत् अवेत् आव आवतुः-वुः अविता-ष्यति अव्यात् आवीत्-विष्टाम्-विषुः आविष्यत्। अव्यते अवयति कृत्सु-अवनम् अविता अवन्-न्ती अवित्वा अवितुम्, निपातनात् ऊतिः नक्-ऊनः अवतेष्टिलोपश्चेतिमनि ओम्, तुन्-ओतुः (विडालः) इन्-अविः (मेषः) स्वार्थे के अविकः, अनि-अवनिः ङीपि-अवनी। कृञि हिंसाकरणयोश्च सक०। इदित्वान्नुम्, शपि प्राप्ते धिन्विकृण्व्योर च (३-१-८०) अनयोरकारोन्तादेशः स्यादुप्रत्ययश्च शब्विषये। इत्युप्रत्यये वस्याऽत्वे अतोलोप इत्यल्लोपे तस्य स्थानिवत्त्वेन लघूपधगुणाभावे पित्सु प्रत्ययोकारस्य गुणे कृणोति कृणुतः कृण्वन्ति, कृणोषि-णुथः-थ, कृणोमि, वस्मसोः लोपश्चास्यान्यतरस्यां म्वोः (६-४-१०७) असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यान्म्वोः परयो। इति पक्षे उकारलोपे कृण्वः-मः कृणुवः-मः, मिपि तु परत्वाद्गुणे नोकारः। कृणोतु णुताम् ण्वन्तु, हौ उप्रत्यये उतश्च प्रत्ययादसंयोगपूर्वात् (६-४-१०६) असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात्परस्य हेर्लुक् स्यात्। इति हेर्लुकि कृणु कृणुतं-त मिवादावुप्रत्यये वस्यात्वे अतो लोपे नित्यत्वादुकारलोपात्पूर्वमाटि मेन्यदिरो कृणवानि-वाव-म, अकृणोत् अकृणुताम्-ण्वन् अकृणोः-णुतं-त अकृणवम् अकृण्व-म अकृणुव-म, कृणुयात्-याताम्-युः, आर्धधातुके नोकारः। लिटि द्वित्वादौ चिकृण्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णवतुः-णवुः, कृणिवता-ष्यति कृणव्यात्-णव्यास्ताम्-णव्यासुः अकृणवीत्-णिवष्टाम्-णिवषुः, अकृणिवष्यत्
कृणव्यते कृणवयति, कृणवन्-न्ती। एवं धिवि प्रीणने सक०। धिनोति नुतः-न्वन्ति धिन्वः-न्मः धिनु
मः, धिनोतु अधिनोत् धिनुयात्, दिधिन्व धिन्विता-ष्यति धिन्व्यात् अधिन्वीत् अधिन्विष्यत्। धिन्व्य
धिन्वयति, धिन्वन्-न्ती। चर्व अदने सक०। चर्वति-तु अचर्वत् चर्वेत् चचर्व र्वतुः-र्वुः चर्विता-ष्य
चर्व्यात् अचर्वीत्-र्विष्यत्। कर्मादौ-चर्व्यते अचर्वि चर्वयति निगरणार्थत्वात्परस्मैपदमेव चिचर्विष
कृत्सु-चर्वणं चर्वितव्यं चर्वणीयं यत्-चर्व्यं चर्विता चर्वकः चर्वन् चर्वितः चर्वित्वा चर्वितुम् युच्-चर्व
जीव प्राणधारणे अक०। जीवति-तु अजीवत-जीवेत् जिजीव-वतुः-वुः जीविता-ष्यति जीव्यात् अजीवी
विष्यत्। उप-संजीवति उप-अनु-जीवति सक०। भावादौ-जीव्यते अजीवि जीवयति-ते अजिजीव
जिजीविषति। कृत्सु-जीवनं संजोवितव्यं जीवनीयं उपजीव्यम् उपजीवकः जीविता जीवन् जी
जीवित्वा उपजीव्य जीवितुं, ण्वुल्-जीविका अच्-जीव आतु-जीवातुः (जीवनौषधम्। ऊच्-जीवन्त
जीवन्ती णिनि-अनुजीवी उपजीवी। ष्ठिवु निरसने सक०। सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रति
(वा) इति सत्वनिषेधः। सार्वधातुकेषु ष्ठिवुक्लमुचमामिति दीर्घः। ष्ठीवति-तु अष्ठीवत् ष्ठीवेत्,
द्वित्वे शपूर्वाइति षवयोष्टुत्वस्य च निवृत्तौ थस्य चर्त्वे तिष्ठेव तिष्ठिवतुः-वुः तिष्ठेविथ तिष्ठि
ष्ठेविता-ष्यति ष्ठीव्यात् हलिचेति दीर्घः अष्ठेवीत्-विष्यत्। उप-निष्ठीवति, कर्मादौ-ष्ठीव्यते अ
ष्ठीवयति-ते। कृत्सु-ष्ठीवनं ष्ठेवनं पृषोदरादित्वात्पक्षे दीर्घः ष्ठेवित्वा ष्ठ्यूत्वा उदित्वाद्वेट् इटि क्त्वि
धाद्गुणः इडभावे कित्वाच्छ्वोशूडनुनासिकेचेत्यूठि यण् निष्ठीव्य निष्ठ्यूतः वेट्क्त्वान्नेट् उ
ष्ठीवन् ष्ठीवितुं क्ति-निष्ठ्यूतिः तितुत्रे ति नेट्।

वि० **ईर्ष्य** ईर्ष्यायाम् सक०। ईर्ष्यति ऐर्ष्यत् ईर्ष्याञ्चकार ऐर्ष्यात्, अ-ईर्ष्या। **शुच्य** अभिषवे अक०। शुच्
क्तिन्-शुक्तिः। **हय** गतौ सक०। हयति, अच्-हयः ङीषि-हयी। **अभ्र** गतौ सक०। अभ्रति, अच्-अभ्रम् (मेघः)
कनि-अभ्रकम् (धातुविशेषः) इन् ई-अभ्री (काष्ठकुद्दालः)। **त्सर** छद्मगतौ अक०। त्सरति, उ-त्सरुः (खड्गादिमुष्टि
धोर्ऋ गतिचातुर्ये अक०। ऋदित्। धोरति, निष्ठान्तात्संज्ञायां कनि धोरितकम् (अश्वगतिविशेषः)। **अल** भूषण
वारणेषु सक०। अलति, क्वुन्-अलकम्, टापि-अलका, इन्-अलि (भ्रमरः) इन्-आलिः ङी-आली (सखी), ईकन्-अ
(मिथ्या)। **कील** बन्धने सक०। कीलति, उत्कीलति (उन्मोचयति) कीलयति उत्कीलयति, कीलनं उत्कीलनं
उत्कील्य क-कील, कनि-कीलकम्। **कूल** आवरणे सक०। कूलति, क-कूलम् (तीरम्)। **खल** संचये सक०। खलति
नीति खलः खल्यते धान्यग्रस्मिन्निति खलम् अति-खलति। **खोलृ** गतिप्रतिघाते अक०। खोलति, डल्योरभेदे अ
(खञ्जः)। **चिल्ल** शैथिल्ये अक०। चिल्लति, क-चिल्लः (क्लिन्नाक्षः)। **चुल्ल** भावकरणे अक०। उ
इन्-ङी-चुल्लिः चुल्ली। **णील** वर्णे अक०। नीलति, क-नीलः, ङीष्-नीली। **तूल** निष्कर्षे सक०। तूलति,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

…)। **पील** प्रतिष्ठाने अक०। पीलति, क-टाप्-पीला उ-पीलुः (वृक्षविशेषः) **पूल** संघाते अक०। पूलति, क-पूलम्, …। **फुल्ल** विकसने अक०। फुल्लति, अच्-फुल्लः प्रफुल्ल फुल्लितः। **मूल** प्रतिष्ठायाम् सक०। मूलति, क-मूलम्, मूले … **वेलृ चेलृ केलृ खेलृ** चलने सक०। वेलति, अ-वेला। चलति, अच्-चेलः चेलं चैलं (वस्त्रम्)। केलति … ङीप् केली (क्रीडा)। खेलति, अच्-खेला (क्रीडा)। **शील** समाधौ अक० शीलति, क-शीलम्, शीले भवा शैली। … सङ्घाते च अक०। शूलति, क-शूलम्, शूलेषु संस्कृतं शूल्यम्। **षल** गतौ सक०। सलति, घञ्-सालः …), इलच्-सलिलम्। **अर्व शर्व षर्व** हिंसायाम् सक०। अर्वति अन्-अर्वा। शर्वति अच्-शर्वः (शिवः) सर्वति अच् … **खर्व गर्व** दर्पे अक०। खर्वति, अच्-खर्वः (ह्रस्वः) गर्वति अच्-गर्वः। **गुर्वी** उद्यमने, सक०। गूर्वति क्त-उद्गूर्णः। … हिंसायाम् सक०। धूर्वति, क्विप्-धूः धुरौ धुरः, तन्-धूर्तः। **पूर्व पर्व** पूरणे सक०। पूर्वति- क्विप्--पूः-पुरौ-रः अच्- … पर्वति, अतच्-पर्वतः, कनिन्-पर्व पर्वणि भवं पार्वणम्। **पीव णीव** स्थौल्ये सक०। पीवति, वरच्-पीवरः, अन्- … नीवति वरच्-नीवरः (वणिक्)। **मुर्वी** बन्धने सक०। मूर्वति, अ-मूर्वा, मूर्वाया विकारः मौर्वी।

प्रयोगाः—दलति हृदयम्। तपः फलति सर्वदा। संमीलने नयनयोर्नहि किञ्चिदस्ति। …च्छतः स्खलनं क्वचित्। आचारो धर्मरक्षणम्। सङ्कटादव सर्वदा। निष्ठीवति पुरः खलः। विद्वा-…सदा जीवतु। जीव्याः सहस्रं समाः।

…लाः—

अनुदात्तेतः (आत्मनेपदिनः) काशृ दीप्तौ अक०। प्रायेणायं प्रपूर्वः। प्रकाशते-ताम् प्राका-…त प्रकाशेत प्रचकाशे प्रकाशिता-ष्यते-षीष्ट प्राकाशिष्ट-ष्यत। भावादौ-प्रकाश्यते प्राकाशि, प्रकाशयति-… प्राचीकशत्-त। कृत्सु-प्रकाशनं प्रकाशनीयं प्रकाश्यः प्रकाशमानः प्रकाश्य प्रकाशितुम्, घञ्-…काशः प्रकाशः सङ्काशः, इन्-काशिः ङीष्-काशी क्थन्-काष्ठम्। **भाष** व्यक्तायां वाचि सक०। भाषते-ताम् अभाषत भाषेत बभाषे भाषिता-ष्यते-षीष्ट अभाषिष्ट-ष्यत। उप-सम्भाष आभाष-संभाषणे, परि-भाष-सङ्केते, अपभाष-निन्दने, विभाष-विकल्पने, अभिभाष-कथने। कर्मादौ भाष्यते अभाषि सम्भाष-यति-ते। कृत्सु-भाषणं भाषमाणः भाषित्वा सम्भाष्य, आभाषितुम् अ-परिभाषा विभाषा। **ईक्ष** दर्शने सक०। ईक्षते-ताम् ऐक्षत ईक्षेत ईक्षाञ्चक्रे-बभूव-आस इजादेश्चेत्याम्, ईक्षिता-ष्यते-षीष्ट ऐक्षिष्ट-षाताम्-षत ऐक्षिष्यत। उप-प्रेक्ष-प्रेक्षणे, अवेक्ष पर्यवेक्ष समीक्ष अन्वीक्ष स विचारे, दर्शने अपेक्ष-अपेक्षणे, उपेक्ष-उपेक्षणे, प्रतीक्ष-प्रतीक्षणे, परीक्ष-परीक्षणे, उत्प्रेक्ष-तर्कने। कर्मादौ-ईक्ष्यते ऐक्षि ईक्ष-यति-ते परीक्षयति-ते। कृत्सु-समीक्षणं परीक्षणं समीक्षितव्यं प्रेक्षकः प्रेक्षितः प्रतीक्षमाणः परीक्षितः ईक्षित्वा समीक्ष्य अवेक्षितुम् अङ्-परीक्षा प्रतीक्षा उपेक्षा। **दीक्ष** मौण्ड्येज्योपनयन-नियम-व्रतादेशेषु सक०। दीक्षते-ताम् अदीक्षत दीक्षेत दिदीक्षे दीक्षिता-ष्यते-षीष्ट अदीक्षिष्ट-ष्यत। कर्मादौ-दीक्ष्यते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दीक्षयति-ते दिदीक्षिषते। कृत्सु-दीक्षणीयं दीक्षितव्यं दीक्षितः दीक्षमाणः दीक्षित्वा दीक्षितुम् अङ्-दीक्षा। भिक्ष भिक्षायामलाभे लाभे च सक०। भिक्षते-ताम् अभिक्षत भिक्षेत बिभिक्षे भिक्षिता-ष्यते-षीष्ट अभिक्षिष्ट-ष्यत। कर्मादौ-भिक्ष्यते भिक्षयति-ते। कृत्सु-भिक्षणं भिक्षितव्यं भिक्षमाणः भिक्षितः भिक्षित्वा भिक्षितुम् अङ्-भिक्षा, उ-भिक्षुः क-भिक्षुकः, षाकन्-भिक्षाकः। शिक्ष विद्योपादाने सक०। शिक्षते-ताम् अशिक्षत शिक्षेत शिशिक्षे शिक्षिता-ष्यते-षीष्ट अशिक्षिष्ट-ष्यत। उप-सु अनुशिक्षते। कर्मादौ-शिक्ष्यते अशिक्षि शिक्षयति-ते कृत्सु- शिक्षणं शिक्षणीयः शिक्षकः शिक्षितः शिक्षमाणः कर्मणि-शिक्ष्यमाणः शिक्षित्वा शिक्षितुम्, अङ्-शिक्षा। ग्रसु अदने सक०। ग्रसते-ताम् अग्रसत ग्रसेत ... ग्रसिता-ष्यते-षीष्ट अग्रसिष्ट-ष्यत। कर्मादौ-ग्रस्यते ग्रासयति निगरणार्थत्वात्परस्मैपदमेव, अजिग्रसत् जिग्रसिषते। कृत्सु-ग्रसितव्यं ग्रासः ग्रसमानः ग्रसित्वा ग्रस्त्वा उदित्वाद्वेट्, ग्रस्तः वेट्कत्वान्नेट्, ग्रसितुम्, इष्णु-ग्रसिष्णुः। भासृ-दीप्तौ अक०। भासते-ताम् अभासत भासेत बभासे भासिता-ष्यते षीष्ट अभासिष्ट-ष्यत। उप-प्र-प्रति-उद्भासते। भावादौ-भास्यते भासयति-ते कृत्सु-भासनं भासमानः भासित्वा प्रोद्भास्य भासितुं, क्विप्-भाः, वरच्-भास्वरः, उर-भासुरः। आङ् शसि इच्छायाम् सक०। आङ्पूर्व एवायम् इदित्वान्नुम्। आशंसते-ताम् आशंसत आशंसेत आशशंसे आशंसिता-ष्यते-षीष्ट आशंसिष्ट-ष्यत। समाशंसते प्रत्याशंसते। कर्मादौ-आशंस्यते आशंसयति-ते। कृत्सु आशंसनम् आशंसनीयः आशंसमानः आशंसितुम् अ-आशंसा प्रत्याशंसा, उ-आशंसुः, यत् आशंस्यम्। ऊह वितर्के सक०। ऊहते-ताम् औहत ऊहेत ऊहाञ्चक्रे इजादेश्चेत्याम्, ऊहिता-ष्यते-षीष्ट औहिष्ट-षाताम्-षत औहिष्यत। उप-समूहति-ते (संमार्जयति), अभ्यूहति-ते (तर्कयति) उपसर्गादस्यत्यूह्योरिति वा तङ्। **उपसर्गाद्ध्रस्व ऊहतेः** (७-४-२३) सोपसर्गस्योहतेर्ह्रस्वः स्याद्यादौ क्ङिति। इति यादौ क्ङिति ऊकारस्य ह्रस्वः समुह्यात् अभ्युह्यात्। कर्मादौ-ऊह्यते समुह्यते ह्रस्वः ऊहयति-ते। कृत्सु-ऊहनम् ऊहितव्यम् ऊहनीयः ऊहितः ऊहित्वा समुह्य ह्रस्वः, ऊहमानः कर्मणि ऊह्यमानः ऊहितुम् घञ्-ऊहः। अनुक्तमप्यूहति पण्डितो जन इति परस्मैपदप्रयोगश्चिन्त्यः। गर्ह कुत्सायाम् सक०। गर्हते-ताम् अगर्हत गर्हेत जगर्हे गर्हिता-ष्यते-षीष्ट अगर्हिष्ट-ष्यत। उप-विगर्हते। कर्मादौ-गर्ह्यते गर्हयति-ते। कृत्सु-गर्हणं गर्हणीयः गर्हितः गर्हमाणः कर्मणि-गर्ह्यमाणः गर्हित्वा विगर्ह्य गर्हितुम्, अङ्-गर्हा ण्यत्-गर्ह्यः। **गाहू** विलोडने सक० ऊदित्वाद्वेट्। गाहते-ताम् अगाहत गाहेत जगाहे-हाते-हिरे, जगाहिषे इडभावे गस्य भष्भावे हस्य ढत्वकत्वयोः सस्य षत्वे जघाक्षे जगाहाथे जगाहिढ्वे-ध्वे जगाढ्वे जगाहे जगाहिवहे-महे जगाह्वहे-ह्महे, गाहिता-ष्यते-षीष्ट इडभावे, तासि हस्य ढत्वे तस्य धत्वे ष्टुत्वेन ढत्वे ढोढेलोपे गाढा-रौ रः स्ये हस्य ढत्वे गस्य भष्भावे ढस्य कत्वे सस्य षत्वे घाक्ष्यते-क्ष्येते-क्ष्यन्ते, सीयुटि तद्वत् गाहिषीष्ट, घाक्षीष्ट, अगाहिष्ट-षाताम्-षत, इडभावे झलो झलीति सिचो लोपे हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे अगाढ, तान्तमोः ढत्व-घत्व-कत्व-षत्वेषु अघाक्षाताम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षत अगाढाः अघाक्षाथाम् अघाढ्वम् अघाक्षि अघाक्ष्वहि-क्ष्महि। अगाहिष्यत अघाक्ष्यत। उप-वि-अवगाहते। कर्मादौ-गाह्यते अगाहि गाहयति-ते जिगाहिषते जिघाक्षते। कृत्सु-गाहनं गाहमानः घञ्-अवगाहः भागुरिमतेनाकारलोपे वगाहः, गाहितुं गाढुं गाहित्वा गाढ्वा अवगाह्य गाढः वेट्कत्वान्नेट्।

ङि० एषृ प्रयत्ने अक०। एषते अन्वेषते अभ्येषते प्रेषते। रेषृ हेषृ अव्यक्ते शब्दे अक०। रेषृ वृकशब्दे रेषते रेषणम्, अश्वशब्दे हेषते हेषणम् अङ्-हेषा। ह्रेषृ इत्यपि, ह्रेषते ह्रेषा। दक्ष वृद्धौ शीघ्रार्थे च अक०। दक्षते, अच्-दक्षः, इनन्-दक्षिणः टापि-दक्षिणा। धुक्ष दीपने सक०। सन्धुक्षते सन्धुक्षणं सन्धुक्षितः। कासृ शब्दकुत्सायाम् अक०। कासते, …, आर-कासारः (तडागः)। णासृ रासृ शब्दे अक०। नासते, अ-नासा कनि-नासिका; रासते, अ-रासः, न-…ः (गुग्गुलः), अभस्-रासभः (गर्दभः)। अहि गतौ अक०। अंहते, असुन्-अंहः (पापम्)। गृहू ग्रहणे …। गर्हते क-गृहम्। प्लिहृ गतौ सक०। प्लेहते, कनिन्-प्लीहा। बर्ह प्राधान्ये अक०। बर्हते, अच्-बर्हम्, इन-… इनि-बर्ही (मयूरः)। वेहृ प्रयत्ने अक०। वेहते, अत्-वेहत् (गर्भोपघातिनी गौः)।

प्रयोगाः—स्वात्माप्येनं विगर्हते। तस्मिन्वनं गोप्तरि गाहमाने। ऊहते साधु भाषिता। आभाषते परिजनम्। स दीक्षितमयाजयत्। बभाषे गद्गदाक्षरम्। अशिक्षतास्त्रं पितुरेव मन्त्रवित्। गाहन्तां महिषा निपानसलिलम्। ऊहापोहौ करोति सः। दिवि सूर्यः प्रकाशते। तामीक्षमाणः स पुरं पुरस्तात्। अपेक्षे तदुदीरितम्।

उदात्तेतः (परस्मैपदिनः)-घृषु सङ्घर्षे अक०। घर्षति-तु अघर्षत् घर्षेत् जघर्ष घर्षिता-ष्यति घृष्यात् अघर्षीत् अघर्षिष्यत्। उप-प्र-संघर्षति। भावादौ-घृष्यते घर्षयति-ते। कृत्सु-घर्षणं घर्षणीयः घृष्ट्वा उदित्वाद्वेट्। घृष्टः वेट्कत्वान्नेट्, घर्षितुम्, ल्यु-दुर्घर्षणः घञ्-सङ्घर्षः। चूष पाने सक०। चूषति-तु अचूषत् चूषेत् चुचूष चूषिता-ष्यति चूष्यात् अचूषीत् अचूषिष्यत्। कर्मादौ-चूष्यते चूषयति-ते। कृत्सु-चूषणं चूषणीयं चूषितः चूषित्वा संचूष्य चूषितुं ण्यत्-चोष्यम्। भष भर्त्सने (श्वरवे) अक०। भषति-तु अभषत् भषेत् बभाष बभषतुः-षुः भषिता-ष्यति भष्यात् अभा-भषीत् अतोहलादेरिति वा वृद्धिः; अभषिष्यत्। भावादौ-भष्यते भाषयति। कृत्सु-भषणं भषकः भषन् भषित्वा भषितुम्। वृषु सेचने सक०। लघूपधगुणः वर्षति-तु अवर्षत् वर्षेत्, ववर्ष ववृषतुः-षुः; वर्षिता-ष्यति वृष्यात् कित्वान्न गुणः अवर्षीत् अवर्षिष्यत्। कर्मादौ-वृष्यते अवर्षि वर्षयति-ते। कृत्सु-वर्षणं वर्षणीयः ल्यु-प्रवर्षणः वर्षन् वर्षित्वा वृष्ट्वा उदित्वाद्वेट् वृष्टः वेट्कत्वान्नेट् प्रवृष्य वर्षितुम्, अच-वर्षः, क्तिन्-वृष्टिः, क-वृषः, अभच्-वृषभः, क्युन्-वृषणः, नि-वृष्णिः। उक्ष सेचने सक०। उक्षति-तु औक्षत् उक्षेत् उक्षाञ्चकार इजादेश्चेत्याम्, उक्षिता-ष्यति उक्ष्यात् औक्षीत् औक्षिष्यत्, उप-प्रोक्षति अभ्युक्षति। कर्मादौ-उक्ष्यते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

औक्षि उक्षयति-ते। कृत्सु-पर्युक्षणं पर्युक्षणीयः प्रोक्षिता प्रोक्षकः प्रोक्षितः ऊक्षित्वा पर्युक्ष्य प्रोक्षि... करणे ल्युट्-प्रोक्षणी। काक्षि काङ्क्षायां सक०। इदित्वान्नुम्। काङ्क्षति-तु अकाङ्क्षत् काङ्क्षेत् चकाङ्क्ष काङ्क्षिता-ष्यति काङ्क्ष्यात् अकाङ्क्षीत् अकाङ्क्षिष्यत्। उप-आकाङ्क्षति। कर्मादौ काङ्क्ष्यते काङ्क्षयति-ते, कृत्सु-आकाङ्क्षणीयः काङ्क्षितः, आकाङ्क्षन् काङ्क्षित्वा आकाङ्क्ष्य काङ्क्षितुम् अ-आकाङ्क्षा। तक्ष त्वचने (त्वचो निष्कासने) सक०। तक्षति-तु अतक्षत् तक्षेत् ... तक्षिता-ष्यति तक्ष्यात् अतक्षीत्। अतक्षिष्यत् उप-सं-परितक्षति, कर्मादौ तक्ष्यते तक्षयति-ते। ... तक्षणं तक्षकः तक्षन् तक्षितः तक्षित्वा संतक्ष्य तक्षितुम्-कनिन् तक्षा। तक्षू तनूकरणे सक० ऊदित्वाद्...

सार्वधातुकेषु तनूकरणे तक्षः (३-१-७६) तनूकरणार्थात्तक्षः श्नुर्वा स्यात् शब्विषये। इति पक्षे श्नु... उकारस्य पित्सु गुणः णत्वम् तक्ष्णोति तक्ष्णुतः तक्ष्णुवन्ति गुणाभावे उवङ्, तक्ष्णोतु क्ष्णुतात्... तक्ष्णुवन्तु, हेरपित्वादगुणे संयोगपूर्वत्वादुतश्चेति हेर्नलुक् तक्ष्णुहि-तात् तम्-त, आटः पित्वेन गु... वादेशौ तक्ष्णवानि-व-म यासुटो ङित्वान्नगुणः तक्ष्णुयात्, पक्षे शपि तक्षतीत्यादि पूर्ववत्। ततक्ष-क्षतुः... ततक्षिथ-व-म, इडभावे थलि स्कोरिति कलोपे थस्य ष्टुत्वे ततष्ठ-क्ष्व-क्ष्म, लुङादाविटि पूर्ववत्, इड... तासि स्कोरिति कलोपे ष्टुत्वे तष्टा-रौ-रः, स्ये कलोपे षस्य कत्वे सस्य षत्वे तक्ष्यति-त्यतः-क्ष्यन्ति, त... अतक्षीत्-क्षिष्टाम्-क्षिषुः, इडभावे कलोपे षस्य कत्वे सिचः षत्वे हलन्तलक्षणवृद्धौ अताक्षीत् अता... अताक्षुः अताक्षीः-ष्टम्-ष्ट अताक्षम्-क्ष्व-क्ष्म, अतक्षिष्यत् अतक्ष्यत्। उप प्र-वि-संतक्ष्णोति-तक्षति ... पूर्ववत् तक्षित्वा तष्ट्वा तष्टः वेट्कत्वान्नेट् सन्तक्ष्य तक्षितुं तष्टुं कनिन्-तक्षा। रक्ष पालने सक... रक्षति-तु अरक्षत् ररक्ष ररक्षतुः-क्षुः रक्षिता-ष्यति रक्ष्यात् अरक्षीत् अरक्षिष्यत्। उप-प्र-सं परि-अभि... कर्मादौ-रक्ष्यते अरक्षि रक्षयति-ते अररक्षत्-त रिरक्षिषति, कृत्सु-रक्षणं रक्षितव्यं रक्षणीयः रक्ष्यः र... रक्षकः रक्षन् कर्मणि-रक्ष्यमाणः रक्षित्वा संरक्ष्य रक्षितुम् अ-रक्षा, सन् उ-रिरक्षिषुः असुन्-रक्षः अणि रा... लस श्लेषणक्रीडनयोः अक०। लसति-तु अलसत् लसेत् ललास लेसतुः सुः-सिथ-व-म लसिता-... लस्यात् अलासीत् अलसीत्-सिष्यत्। उप-वि-सं-अभि-उल्लसति। भावादौ-लस्यते अलासि लास... कृत्सु-विलसनं विलासः उल्लासः प्रोल्लासः विलसन्-न्ती लसित्वा विलस्य घिनुण्-विलासी, न-अ... सः। शंसु स्तुतौ सक०। शंसति-तु अशंसत् शंसेत् शशंस शशंसतुः-सुः, शंसिता-ष्यति, शस्यात् अनि... तामिति नलोपः, अशंसीत् सिष्यत्-उप-प्रशंसति, अभिशंसति (निन्दति)। कर्मादौ-प्रशस्यते प्रशं... प्रशिशंसिषति। कृत्सु-प्रशंसनं प्रशंसनीयः प्रशंसकः ण्यति-प्रशंस्यः क्यपि-प्रशस्यः शंसित्वा शस्त्वा ... त्वाद्वेट्, प्रशंस्य, प्रशस्तः वेट्कत्वान्नेट्, अङ्-प्रशंसा इतचि-प्रशंसितः। हसे हसने अक०। ... तु अहसत् हसेत् जहास जहसतुः-सुः, हसिता-ष्यति हस्यात् अहसीत् एदित्वान्नवृद्धिः अहसि... उप-प्र-विहसति, परि-उपहसति सक०। भावादौ-हस्यते अहासि हासयति-ते जिहसिषति। कृत्सु... हासः परिहासः उपहासः उपहसितः हसन् हसितुं हसित्वा विहस्य, करणे ल्युटि-प्रहसनम्, ...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावे- हसितम्। अर्ह पूजायाम् सक०। अर्हति-तु आर्हत् अर्हत आनर्ह-र्हतुः र्हुः अर्हिता- ष्यति आर्हात् आर्हीत् आर्हिष्यत्। कर्मादौ- अर्ह्यते अर्हयति। कृत्सु-अर्हणं समर्हणीयः अर्हितः अर्हन्- न्ती अर्हित्वा समर्ह्य घञ्-अर्घः न्यङ्क्वादित्वात्कुत्वम्।

णिश समाधौ अक०-। नेशति क्विप्-निट् टापि निशा। मश शब्दे अक०। मशति वुन्-मशकः। शश प्लुतगतौ ०। शशति, अच्-शशः कनि शशकः। शसु हिंसायाम् सक०। शसति विशसति, करणे ष्ट्रन्-शस्त्रं ङी-शस्त्री, यत्-०, विशसिता (घातकः)। उष दाहे सक०। ओषति लिटि उषविदेत्याम्वा ओषाञ्चकार उवोष, मनिन्-उष्मा नक्-उष्णः ०, ष्ट्रन्-उष्ट्रः क्त-उषितः प्रत्युष्टम् व्युष्टम् (प्रभातम्) आश्वस्तादिवदनिट्। ऊष रुजायाम् अक०। ऊषति, ०ः ऊषरः। कष रुष हिंसायाम् सक०। कषति अक-काषीत्, खश्-कूलङ्कषः सर्वङ्कषः, अधिकरणे घ-निकषः ०) क्त-कष्टं कृच्छ्रगहनयोरित्यनिट् अन्यत्र कषितः, स-कक्षः। रोषति ल्यु-रोषणः तीषसहेति वलाद्यार्धधातुके वेट् ०रोष्टा, रुषित्वा रोषित्वा रुष्ट्वा इटि रलोव्युपधादिति वा कित्वम्, रुष्टः रुषितः रोषितुं रोष्टुम्। घुषिर् शब्दे ०। घोषति जुघोष घोषिता अघुषत् अघोषीत् इरित्वादङ् वा, उद्घोषणम् उद्घोषयति, निष्ठायां नेट् घुष्टः संपूर्वत्वे वेट् ०ः संघुष्टः, घुषित्वा घोषित्वा रलइति वा कित्वम्। पुष पुष्टौ सक०। पोषति अपोषीत् अङ्विधौ दैवादिकस्यैव ग्रहः, ०ः घोषितः। पूष वृद्धौ अक०। पूषति कनिन्-पूषा (सूर्यः) अच् ङीप्-पूषी (दीपस्थापनार्थं कुड्यवद्धं विलम्)। ०ने सक०। पर्षति, अत्-पृषत् इञि-पार्ष्णि। मूष स्तेये सक०। मूषति अच् कन्-मूषकः मूषिका, अ-मूषा (धातु ०ली)। यूष हिंसायाम् सक०। यूषति, घञ्-यूषः (मांसरसः)। मृषु सहने सक०। मर्षति, मृषित्वा मर्षित्वा मृष्ट्वा ०वेट् इटि वा कित्वम्। श्लिषु प्लुषु दाहे सक०। श्लेषति, मन्-श्लेष्मा क्न अत्वं च-श्लक्ष्णः (मसृणः)। प्लोषति प्लोषित्वा ०उदित्वाद्वेट्, प्लुष्टः वेट्कत्वान्नेट्। हृषु अलीके अक०। हर्षति हृष्टानि हर्षितानि लोमानि उलच्-हर्षुलः। अक्षू व्याप्तौ ०। अक्षोऽन्यतरस्याम् (३-१-७५) अक्षो वा श्नुः स्यात् श्विषये। इति पक्षे श्नौ तक्षुवत्। अक्ष्णोति अक्षति, इन् ०(नेत्रम्)। णक्ष गतौ सक०। नक्षति, अत्र-नक्षम्। द्राक्षि काङ्क्षायाम् सक०। द्राङ्क्षति अ-नलोपः-द्राक्षा। ०क्षि घोरवासिते अक०। ध्वाङ्क्षति, अच्-ध्वाङ्क्षः (काकः)। वक्ष रोषे अक०। वक्षति, असुन्-वक्षः। दृह वृह वृहि ०अक०। दृहति, क्त-दृढः। वृहति क्त-परिवृढः (प्रभुः)। बृंहति बृंहणं बृंहितः। बृहि शब्दने अक०। बृंहति ०तम् (गजगर्जितम्)। मह पूजायाम् सक०। महति अच्-ङीप्-मही, टिषच्-महिषः-षी, अत्-महान्। रह त्यागे सक०। ०, असुन्-रहः, उण्-राहुः, घञ्-विरहः। रहि गतौ सक०। रंहति असुन्-रंहः (वेगः)।

प्रयोगाः—रक्षिता स्वस्य धर्मस्य। तष्टा काष्ठं तक्ष्णोति। प्रशंसां काङ्क्षति जनः। कामं वर्षं पर्जन्यः। अमृतेनोक्षित इव। चोष्यं लेह्यं चर्वणीयम्। वैजयन्ती प्रोल्लसति। सङ्घर्षो नैव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रोचते। तमर्हणीयं जानामि। मधुव्रतो नीरसं नैव काङ्क्षति। त्वष्ट्रा ततक्ष भास्वन्तम्। आ संरक्षितः सुह्मैः। भृशं भषति कुक्कुरः।

स्वरितेतः (उभयपदिनः)-टुयाचृ याञ्चायाम् सक०। याचति याचते, याचतु ताम्, अयाचत् अयाचत, याचेत् याचेत, ययाच-चतुः-चुः ययाचे-चाते चिरे, याचिता याचिष्यति-ते, याच्यात् याचिषीष्ट, अयाचीत्-चिष्टाम्-चिषुः, अयाचिष्ट-चिषाताम्-षत, अयाचि त। कर्मादौ-याच्यते अयाचि याचयति-ते यियाचिषति-ते। कृत्सु-याचनं याचितव्यं याचनीयं याचिता याचकः याचन् याचमानः कर्मणि-याच्यमानः, याचितः याचित्वा उपयाच्य याचि नङ्-याञ्चा, क्त- कन्-याचितकम् उपयाचितकम्, ट्वित्वादथुच्-याचथुः। बुधिर् बोधने स बोधति-ते, बोधतु-ताम् अबोधत्-त, बोधेत्-त, बुबोध बुबुधे, बोधिता, बोधिष्यति-ते, बुध्यात् षीष्ट यासुटि कित्वान्न गुणः, लुङि परस्मैपदे इरित्वादङ् वा, दीपजनेत्यत्र पूर्वोत्तरसा दैवादिकस्यैव ग्रहान्नात्र चिण्, अबुधत्-धताम्-धन्, अबोधीत्-धिष्टाम् धिषुः, अबोधि ताम्-षत, अबोधिष्यत्-त। कर्मादौ-बुध्यते अबोधि, बोधयति-ते अबूबुधत्-त बुबोधिषति-ते। बोधनं बोधनीयं बोधितः बोधित्वा प्रबुध्य बोधन् बोधमानः बोधितुम्। खनु अवदारणे खनति-ते तु-ताम्, अखनत्-त खनेत्-त। लिटि चखान, अजादिक्ङित्सु गमहनजनखनघसां

क्ङित्यनङि (६-४-९८) एषामुपधाया लोपः स्यादजादौ क्ङिति अनङि। इत्युपधालोपे चख्नुः चखनिथ चख्नथुः चख्न चखा-खन चख्निव म, चख्ने चख्नाते चख्निरे, खनिता खनि ते। **आशिषि यासुटि ये विभाषा** (६-४-४३) जनसनखनामात्वं वा स्याद्यादौ क्ङिति। कारस्य पक्षे आत्वे खायात्-यास्ताम् यासुः, खन्यात्-न्यास्ताम्-न्यासुः, खनिषीष्ट-षीयास्ताम् अखानीत् अखनीत् अतोहलादेरिति वा वृद्धिः, अखनिष्ट-निषाताम्-षत, अखनिष्यत्-त। उप नति, कर्मादौ-खायते खन्यते अखानि खानयति-ते अचीखनत्-त चिखनिषति-ते। कृत्सु-खननं तव्यं खननीयं यत्-खेयं, ण्वुन्-खनकः, खनित्वा खात्वा उदित्वाद्वेट् इडभावे जनसनेत्या निखाय निखन्य येविभाषेत्यात्वं वा, खातः वेट्क्त्वान्नेट्, खनन् खनमानः खनितुम्, निकः, ड-परिखा, इत्र-खनित्रम्, उ-टिलोपः-आखुः, अच्-मुट् टिलोपः-मुखम्। व्यय गतौ व्ययति-ते तु-ताम्, अव्ययत्-त व्ययेत्-त, वव्याय वव्ययतुः-युः वव्यये-याते-यिरे व्ययिता व्यय्यात् व्ययिषीष्ट, अव्ययीत् अव्ययिष्ट, अव्ययिष्यत्-त। उप-अपव्ययति-ते। कर्मादौ व्याययति-ते। विव्ययिषति-ते। कृत्सु-अच्-व्ययः अपव्ययः णिनि-मितव्ययी, व्ययित्वा व्ययितुं व्ययन् व्ययमानः। धावु गतिशुद्ध्योः। गतावक० शुद्धौ सक०। धावति-ते-तु-ताम् अधावत्-त, दधाव दधावे धाविता-ष्यति-ते, धाव्यात् धाविषीष्ट, अधावीत्-विष्ट अधाविष्यत्-त।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिधावति-ते। भावकर्मादौ-धाव्यते अधावि धावयति-ते दिधाविषति-ते। कृत्सु-धावनं धावितव्यं धावक-धावन् धावमानः धावित्वा धौत्वा उदित्वाद्वेट् इडभावे छ्वोरित्यूठि वृद्धिः, प्रधाव्य धौतः धौतवान् वेट्कत्वान्नेट् ऊठि वृद्धिः, यस्यविभाषेत्यस्यानित्यत्वपक्षे धावितः-तवान् धावितुम् उपपदेन क्रियाफले कर्तृगे वोधितेत्वस्य विभाषोपपदेनेति परस्मैपदमेव स्वार्थं धावति। लष कान्तौ (इच्छायाम्) सक०। प्रायेणायमभिपूर्वः वाभ्राशेतिश्यन्वा। अभिलष्यति-ते-तु-ताम् अभिलषति-ते-तु-ताम्, अभ्यलष्य-षत्-त अभिलष्ये-षेत्-त। अभिललाष-लेषतुः-षुः, अभिलेषे-षाते-षिरे, अभिलषिता-ष्यति-ते। अभिलष्यात् लषिषीष्ट, अभ्यल-लाषीत् अतोहलादेरिति वा वृद्धिः, अभ्यलषिष्ट, अभ्यलषिष्यत्-त। कर्मादौ-अभिलष्यते अभ्यलाषि अभिलाषयति-ते। कृत्सु-घञ्-अभिलाषः अभिलषणीयः अभिलषिता अभिलषितः- अभिलष्य अभिलष्य-षन् अभिलष्य-षमाणः उकञ्-अभिलाषुकः, णिनि-अभिलाषी, सन् अभिलालसा। गुहू संवरणे (गोपने आच्छादने च) सक० ऊदित्वाद्वेट्। **ऊदुपधाया गोहः** (६-४-८९) गुह उपधाया ऊत् स्याद्गुणहेतावजादौ प्रत्यये परे। इत्यूत्वे गूहति-ते-तु-ताम् अगूहत्-त गूहेत्-त। जुगूह-हतुः-हुः जुगूहिथ-व-म, इडभावे हस्य ढत्वे थस्य भत्वे ष्टुत्वे ढलोपे गुणे जुगोढ जुगुह्व-ह्म, गूहिता-ष्यति-ते इडभावे ढत्व-धत्व-ष्टुत्व-ढलोपेषु गोढा-रौ-रः, ढत्वकत्वषत्वभष्भावगुणेषु घोक्ष्यति-ते। अजादिप्रत्ययाभावान्नोत्वम्- गुह्यात्, गूहिषीष्ट घुक्षीष्ट कित्वान्न गुणः, लुङि इट्पक्षे सिज्लोपे ऊत्वे अगूहित्-हिष्टाम्-हिषुः. इडभावे शलइगुपधादिति क्से ढत्वभष्भावकत्वषत्वेषु अघुक्षत्-ताम्-क्षन्, तङि इटि अगूहिष्ट-हिषाताम्-षत, इडभावे क्से, **लुग्वादुहदिहलिहगुहामात्मनेपदे दन्त्ये** (७-३-७३) एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि। इति लोपपक्षे हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे दीर्घे अगूढ, लोपाभावे ढत्वभष्भावकत्वषत्वेषु अघुक्षत, आतामादावजादौ क्सस्य कित्वेन गुणहेतुत्वाभावादूत्वाभावे ढत्वभष्भावकत्वषत्वेषु **क्सस्याचि** (७-३-७२) अजादौ तङि क्सस्य लोपः स्यात्। इत्यन्ताकारस्य लोपे अघुक्षाताम्-क्षत, थासि दन्त्यपरत्वेन पक्षे क्सस्य लोपे ढत्वादौ अगूढाः, लोपाभावे अघुक्षथाः, अघुक्षाथाम्, ध्वमि क्सलोपे ढत्वादौ ढलोपे दीर्घे अगूढम्, लोपाभावे अघुक्षध्वम्, अघुक्षि, वहेर्दन्त्यादित्वात्पक्षे क्सलोपे अगूह्वहि अघुक्षावहि-महि, अगूहिष्यत्-त अघोक्ष्यत्-त। उप-निगुह,गोपने, उपगुह-आलिङ्गने। कर्मादौ-गुह्यते अगूहि, गोहयति-ते। सनि रुदविदमुषग्रहिस्वपिप्रच्छ इति कित्वे ... ग्रहगुहोश्चेतीणिनिषेधे जुघुक्षति-ते। कृत्सु-गूहनं गूहितव्यं, क्यप्-गुह्यं, ण्यत्-गोह्यं गूहित्वा गूढ्वा निगुह्य उपगुह्य, गूढः उपगूढः वेट्कत्वान्नेट्, गुहन् गूहमानः गूहितुं गोढुम्, गिर्यौषधयोरित्यङि गुहा।

वि० हिक्क अव्यक्ते शब्दे अक०। हिक्कति-ते अ-हिक्का। **अञ्चु** गतौ याचने च सक०। अञ्चति-ते, अञ्चु गतिपूजनयोरिति पूर्वं गतौ पाठः। क्रियाफलस्य कर्तृगामित्वे परस्मैपदार्थः। **वेणृ** गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु सक०। वेणति-ते, इन्-वेणिः ङीषि वेणी, उ-वेणुः। **चते** याचने परिभाषणे च सक०। चतति-ते, उरच्-चतुरः, वालच्-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चात्वालः (याज्ञिकगर्तविशेषः), वरच्-चत्वरम् , उरन्-चत्वारः । **प्रोथृ** पर्याप्तौ अक० । प्रोथति-ते घञ्-प्रोथः (... **मेधृ** सङ्गमे च अक० । मेधति-ते, अङ्-मेधा, गृहं मेधते इति गृहमेधी । **चायृ** पूजानिशामनयोः सक० । चायति-... निष्ठायां पक्षे नेट् चिभावश्च अपचितः (पूजितः) अपचायितः, क्तिनि नित्यं चिभावः अपचितिः (पूजा)। दाशृ दाने सक० । दाशति-ते, सम्प्रदाने अच्-दाशः (धीवरः) पुरोदाश्यते इति पुरोडाशः (हविर्विशेषः) अच् डत्वं च, ... दाश्वान् । **स्पश** बाधनस्पर्शनयोः सक० । स्पशति-ते, अच्-स्पशः (चरः), यङ्लुङन्तादचि पस्पशः टापि पस्... (उपोद्घातग्रन्थः)। **चष** भक्षणे सक० । चषति-ते, क्वुन्-चषकः (पानपात्रम्) चाषः। **झष** आदानसंवरणयोः सक० झषति-ते, अच्-झषः (मत्स्यः)। **दासृ** दाने सक० । दासति-ते, सम्प्रदाने अच्- दासः (भृत्यः)।

प्रयोगाः—राज्ञो धनं याचते। याचितारश्च नः सन्तु। आयादल्पतरो व्ययः। यद्गुहं ... लोके। वस्त्रान्तेन निगूहति। कृषकः खनति क्षेत्रम्। यथा खनन् खनित्रेण। अभिलष्यामहे वयम्। ... धर्ममञ्जसा। उपगूहति बालकम्। पूर्तं खातादिकर्म च। निगूढं मन्त्रयेद्गृहः। पृथ्वी खातनिखातेन ध... धनिनो वयम् ।

सन्नन्ताः अनुदात्तेतः (आत्मनेपदिनः) उदात्तेतः (परस्मैपदिनः)—गुप्तिज्किद्भ्यः ... (३-१-५) एभ्यः सन्स्यात्। **मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य** (३-१-६) एभ्यः सन्... दभ्यासेकारस्य दीर्घश्च । **गुपेर्निन्दायाम्, तिजेः क्षमायाम्, कितेर्व्याधिप्रतीकारे** निग्रहेऽपनय... **नाशने संशये च, माने र्जिज्ञासायाम्, बधेश्चित्तविकारे, दानेरार्जवे, शानेर्निशाने** (वा)। गुपू ... तिज निशाने (तीक्ष्णीकरणे) । कित निवासे रोगापनयने च । मान पूजायाम् । बध बन्धने। द... खण्डने। शान निशाने। एते नित्यं सन्नन्ताः। गुप्तिज्मानबधाश्चत्वार आत्मनेपदिनः, कितप... पदी, दानशानावुभयपदिनौ, सर्वे सकर्मकाः। एते निन्दाद्यर्थेष्वेव सन्नन्ताः, अर्थान्तरेषु तु ध... पाठोक्तेष्वन्यत्र चाऽननुबन्धकाश्चुरादयः, अनुबन्धस्य केवलेऽचरितार्थत्वात्। एभ्योऽर्थविशेषे स... **सन्यङोः** (६-१-९) सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तो ऽजादेस्तु द्वितीयस्य। इति प्रथमैका... द्विर्भावेभ्यासकार्यें हलादिशेषे ह्रस्वे चर्त्वे, **सन्यतः** (७-४-७९) अभ्यासस्यात इकारः स्यात्स... इति इत्वम्, मानादावभ्यासस्य दीर्घोलघोरिति दीर्घश्च। धातोरित्यधिकृत्याविहितत्वादत्र सन ... धातुकत्वाभावादिड्गुणौ । तिजेर्जस्य व्रश्चेतिषत्वे षढोरिति कत्वे सनः षत्वं च, बधेरुत्तरव... भष्भावः। ततश्च जुगुप्स- तितिक्ष- चिकित्स- मीमांस- बीभत्स- दीदांस- शीशांस इत्येतेषाम् सना... इति धातुत्वाल्लडादयः। पूर्ववत्सन इति सन्नन्ते मूलधातुवत्पदम्। गुप- (आ०)-जुगुप्सते-ताम् ... प्सत जुगुप्सेत, लिटि कास्प्रत्ययादित्यामि जुगुप्साञ्चक्रे, जुगुप्सिता-प्यते जुगुप्सिषीष्ट अजुगुप्सिष्ट ... कर्मादौ- जुगुप्स्यते जुगुप्सयति-ते। कृत्सु-जुगुप्सनं जुगुप्सनीयं जुगुप्सितः जुगुप्समानः जुगु...

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जुगुप्सितुम्, अङ्-जुगुप्सा। तिज- (आ०)-तितिक्षते-ताम् अतितिक्षत तितिक्षेत, तितिक्षाञ्चक्रे तितिक्षिता-ष्यते-षीष्ट अतितिक्षिष्ट-क्षिष्यत। कित- (प०)-चिकित्सति-तु अचिकित्सत् चिकित्सेत् चिकित्साञ्चकार चिकित्सिता-ष्यति चिकित्स्यात् अचिकित्सीत्-त्सिष्यत्। उप-विचिकित्सति। सन्देग्धिकर्मादौ-चिकित्स्यते विचिकित्स्यते चिकित्सयति-ते। कृत्सु-चिकित्सनं चिकित्सितव्यं चिकित्सनीयः चिकित्सन् चिकित्सितः विचिकित्सित्वा विचिकित्स्य चिकित्सितुम्, अङ्-चिकित्सा विचिकित्सा, चिकित्सकः। मान- (आ०)-मीमांसते-ताम् अमीमांसत मीमांसेत मीमांसाञ्चक्रे मीमांसिता- ष्यते- षीष्ट अमीमांसिष्ट-सिष्यत। कर्मादौ-मीमांस्यते मीमांसयति- ते कृत्सु- मीमांसनं मीमांसितव्यं मीमांसनीयः मीमांस्यः मीमांसकः मीमांसमानः मीमांसित्वा मीमांसितुम्, अङ्- मीमांसा। बध- (आ०)-बीभत्सते-ताम् अबीभत्सत बीभत्सेत बीभत्साञ्चक्रे बीभत्सित्वा- ष्यते-षीष्ट अबीभत्सिष्ट-त्सिष्यत। कर्मादौ-बीभत्स्यते बीभत्सयति-ते। कृत्सु-बीभत्सनं बीभत्सकः बीभत्समानः बीभत्सितः बीभत्सित्वा बीभत्सितुम्, अङ्-बीभत्सा, उ-बीभत्सुः, अच्-बीभत्सः।

वि० दान- (उभ०) दीदांसति-ते। शान (उभ०) शीशांसति-ते। एतावव्यावहारिकौ। गुपादीनामर्थान्तरेषु सनो-गुपादिणिजन्तः प्रयोगः- गोपयति-ते, तेजयति-ते उत्-समुत् तेजयति-ते, केतयति-। (मन्त्रयते) अधिकरणे ल्युटि निकेतनं सङ्केतितः (निमन्त्रितः), मानयति बधयति दानयति शानयति।

प्रयोगाः—मीमांसमानस्य मतिर्विसर्पति। बीभत्सदृश्यमभितो विकलीचकार। न तितिक्षासममस्ति साधनम्। ततश्च न विचिकित्सति। चिकित्साशास्त्रं प्रत्यक्षफलम्। मीमांसितमिदं शास्त्रे। व्याकुलो विचिकित्सया। जुगुप्सितं कर्म न कार्यम्। चिकित्सित ज्यौतिषमन्त्रवादाः पदे पदे प्रत्ययमावहन्ति।

भ्वादिषु अनुदात्ताः (अनिटः)-

अनुदात्तेतः (आत्मनेपदिनः)- ष्वञ्ज परिष्वङ्गे सक०। दंशसञ्जस्वञ्जां शपि (६-४-२५) एषां शपि नलोपः स्यात्। इति नलोपे स्वजते-ताम् अस्वजत स्वजेत लिटि संयोगात्परत्वेन कित्वाप्राप्तौ श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा (वा) इति कित्वपक्षे नलोपः सस्वजे-जाते-जिरे-जिषे-जिवहे महे, सस्वञ्जे-ञ्जाते-ञ्जिरे-ञ्जिषे-वहे-महे। क्रादिनियमादिट्। तासि जस्य कुत्वेन गत्वे श्चुत्वसम्पन्नञकारनिवृत्तौ नस्यानुस्वारे परसवर्णे ङकारे गस्य चर्त्वे स्वङ्क्ता-रौ-रः, एवं स्यसीयुटोः सकारस्य षत्वे च स्वङ्क्ष्यते-क्ष्येते-क्ष्यन्ते, स्वङ्क्षीष्ट-क्षीयास्ताम् ङ्क्षीरन्। लुङि सिचि तथास्ध्वंसु, झलोझलीति सलोपे कुत्वादौ अस्वङ्क्त अस्वङ्क्षाताम् ङ्क्षत अस्वङ्क्थाः अस्वङ्क्षाथाम् अस्वङ्ग्ध्वम् अस्वङ्क्षी अस्वङ्क्ष्वहि-क्ष्महि अस्वङ्क्ष्यत। उप-परिष्वजते (आश्लिष्यति) परिनिविभ्य इति षत्वम्, लिटि सदेः परस्य लिटीत्यत्र स्वञ्जेरुपसंख्यानम् (वा) इत्यभ्यासात्परस्य षत्वनिषेधे परिषस्वजे, पर्यष्व- स्वजत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्यष्व-स्वङ्क्त सिवादीनांवेति षत्वविकल्पः। कर्मादौ-परिष्वज्यते पर्यष्वञ्जि परिष्वजयति-ते, घञ्-परिष्वङ्गः परिष्वक्तः परिष्वज्य परिष्वङ्क्तुम्। परिपूर्वः प्रायिकोयम्। हद पुरीषोत्सर्गे अक॰ हदते-ताम् अहदत हदेत, जहदे-दिषे-वहे-महे, हत्ता हत्स्यते हत्सीष्ट अहत्त अहत्साताम्-सत अहत्था अहत्स्यत। हद्यते हदयति जिहत्सते, हदनम्। रभ राभस्ये (आरम्भे) सक॰। प्रायेणाङ्पूर्वः आरभते-ताम् आरभत आरभेत, लिट्येत्वाभ्यासलोपौ क्रादिनियमाद्वलादाविट् आरेभे-भाते-भिरे-भिषे तासि तस्य धत्वे भस्य जश्त्वे आरब्धा रौ-रः, स्ये, सीयुटि च भस्य जश्त्वचर्त्वयोः आरप्स्यते आरप्सीष्ट सीयास्ताम् सीरन्, लुङि तथास्ध्वंसु झलोझलीति सलोपे तथयोर्धत्वे भस्य जश्त्वे आरब्ध आरप्साताम्-सत आरब्धाः आरप्साथाम् आरब्ध्वम् आरप्सि-प्स्वहि-स्महि। आरप्स्यत उप-प्रारभते समारभते, परिरभ-आलिङ्गने संरभ्-कोपे। कर्मादौ-आरभ्यते आरम्भि आरम्भयति रभेरशब्लिटोरिति शब्लिड्वर्जमजादौ नुम्, आरम्भत्-त, प्रारिप्सते सनिमीमेतीत्वमत्रलोपोऽभ्यासलोपः। कृत्सु-आरम्भणम् आरब्धव्यम् आरम्भणीयम् आरब्धा आरभमाणः आरब्धः घञ्-आरम्भः परि-री रम्भः संरम्भः आरभ्य आरब्धुम्, सन्- क्त-प्रारीप्सितः सन्- उ-प्रारीप्सुः अच्- टापि रम्भा, अभच्-रभसः बाहुलकान्न नुम्। डुलभष् प्राप्तौ सक॰। रभवत्। लभते-ताम् अलभत लभेत- लेभे-भाते-भिरे, लब्धा लप्स्यते, लप्सीष्ट- अलब्ध अलप्साताम्-सत अलब्धाः अलप्साथाम्-ब्ध्वम् अलप्सि-प्स्वहि-स्महि अलप्स्यत। उप-आलभ्-स्पर्शे, उपालभ्-भर्त्सने, समालभ्-अनुलेपने, उपलभ्-प्राप्तौ, विप्रलभ्-प्रतारणे। कर्मादौ-लभ्यते अलम्भि अलाभि चिणि घञ् लम्भयति लभेश्चेत्यचि नुम् अललम्भत्-त लिप्सते इत्वाभ्यासलोपौ। कृत्सु-लम्भनं लब्धव्यं लम्भनीयं लाभः लभ्यं लब्धः विप्रलब्धः (वञ्चितः) लब्ध्वा आलभ्य लब्धुं, खल्-सुलभः दुर्लभः सोपसर्गादच्- नुम् विप्रलम्भः (वियोगः) उपालम्भः णौ-लम्भितः ट्वित्वात्त्रिम्-लब्धिमम्।

प्रयोगाः—अनारम्भो। मनुष्याणां प्रथमं बुद्धिलक्षणम्, आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम्। परिष्वक्तोभिवादितः। लभन्ते ब्रह्मनिर्वाणम्। सुलभो दुर्लभोपि वा। सखायं पस्वजे। यज्ञकर्म समारेभे। अलब्ध मित्रं सद्भावात्। प्रारभन्तेल्पमेवाज्ञाः।

उदात्तेतः (परस्मैपदिनः)—त्यज हानौ सक॰। त्यजति-तु अत्यजत् त्यजेत् तत्याज तत्यजतुः-तुः थलि भारद्वाजनियमाद्वेट् तत्यजिथ तत्यक्थ तत्यजथुः तत्यज तत्या-त्यज तत्यजिव-म, हलन्त-नियमादिट् एवमुत्तरत्राप्यनिड्धातुषु ज्ञेयम्। त्यक्ता त्यक्ष्यति त्यज्यात्, लुङि सिचि हलन्तलक्षणायां वृद्धौ कुत्वषत्वयोः, झलि सलोपे अपृक्तस्येडागमे अत्याक्षीत्- अत्याक्ताम् अत्याक्षुः अत्याक्षीः अत्याक्तम्-क्त अत्याक्षम्-क्ष्व-क्ष्म, अत्यक्ष्यत्। उप-परि संत्यजति। कर्मादौ-त्यज्यते अत्याजि त्याजयति अतित्यजत्-त तित्यक्षति। कृत्सु-त्यक्तव्यं त्यागः त्यजन्-न्ती त्यक्तः त्यक्त्वा सन्त्यज्य त्यक्तुम्, घिनुण-त्यागी, ण्यत्-त्याज्यः। स्कन्दिर् गतिशोषणयोः सक॰। इदित्वान्नुम्। स्कन्दति-तु अ॰

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कन्देत्, चस्कन्द-न्दतुः-दुः चस्कन्दिथ चस्कन्त्थ चस्कन्दिव-म, स्कन्ता स्कन्त्स्यति स्कद्यात् इरः समुदायस्यैवेत्वेनानिदित्वान्न लोपः, लुङि इरित्वात्पक्षेऽङ् अस्कदत्-दताम्-दन्, अङोभावे सिच्यने-कहल्व्यधानेपि हलन्तलक्षणवृद्धौ अस्कान्त्सीत् अस्कान्ताम् सलोपे चर्त्वम् अस्कान्त्सुः अस्कान्त्सीः अस्कान्तम्-न्त अस्कान्त्सम्-न्त्स्व-स्म, अस्कन्त्स्यत् । उप-अव स्कन्द-उपरोधे, आस्कन्द-अश्वगतौ, अभिस्कन्द-पीडने विस्कन्द-परिभ्रमणे । कर्मादौ-अवस्कन्द्यते, अभिस्कन्दयति-ते । कृत्सु-अवस्कन्दनं क्त-अवस्कन्नः स्कन्त्वा अवस्कन्द्य, घञ्-उत्कन्दः (रोगविशेषः) आस्कन्दितम् (अश्वगतिविशेषः)। तप सन्तापे सक० । तपति-तु अतपत् तपेत्, तताप तेपतुः-पुः तेपिथ ततप्थ तेपथुः-प तता-तप तेपिव-म, तप्ता तप्स्यति तप्यात्, लुङि सिचि हलन्तलक्षणवृद्धौ झलि सलोपे च अताप्सीत् अताप्ताम् अताप्सुः अताप्सीः अताप्तम्-त अताप्स्म्-स्व-स्म, अतप्स्यत् । उप-प्र-संतपति, उद्विपूर्वत्वेऽकर्मका-त्स्वाङ्गकर्मकात् उद्विभ्यांतप इति तङ् उत्तपते वित्तपते पाणिम्, अवतपति अनुतपति (पश्चात्तप्यते । निसस्तपतावनासेवने (८-३-१०२) निसः सस्य षः स्यात्तपतौ परे अनासेवने (पौनः पुन्येन सेवना-दन्यत्र)। निष्टपति (निष्कृष्यतपति) कर्मादौ-तप्यते अतापि तापयति-ते अतीतपत्-त संतापयति-ते, कर्मकर्तरि-तप्यते । कृत्सु-ल्यु-तपनः घञ्-तापः सन्तापः अनुतापः प्रतापः उपतापः (रोगः) तपनीयं (सुवर्णं) तापकः तपन् कर्मकर्तरि-तप्यमानः, तप्त्वा प्रतप्य णौ-प्रताप्य तप्तुम्, असुन्-तपः घिनुण्-परितापी तप्तः निष्टप्तः, खश्-ललाटन्तपः, खच्-परन्तपः । गम्लृ सृप्लृ गतौ सक० । सार्वधातुकेषु शपि इषुगमियमां छः (७-३-७७) एषां छः स्यात् शिति परे । इति मस्य छत्वे गच्छति-तु अग-च्छत् गच्छेत् । जगाम जग्मतुः जग्मुः गमहनेत्युपधालोपः, जगमिथ जगन्थ जग्मथुः जग्म जगा-गम जग्मिव म, गन्ता, स्ये-गमेरिट् परस्मैपदेषु (७-२-५८) गमेः परस्य सकारादेरिट् स्यात्परस्मैपदेषु । इतीटि गमिष्यति, गम्यात्, लुङि लृदित्वादङि अनङीत्युक्त्या उपधालो-पाभावे अगमत्-मताम्-मन्, अगमिष्यत् । उप-आगम्-आगमने, सङ्गम- सङ्गमने, निर्गम-निर्गमने, अनुगम-अनुगमने, अव-अधिगम्-प्राप्तौ ज्ञाने च, उद्गम्-उद्गमने-अभिगम्-अभियाने, उप-अभ्यागम्-समीपागमने, अपगम्-अपसरणे, विगम्-त्यागे, अतिगम्-अतिक्रमणे, प्रत्या-पर्यागम्-प्रत्यागमने, सङ्गम्-सङ्गमने समोगमृच्छिभ्यामिति तङि सङ्गच्छते । कर्मादौ-गम्यते अवगम्यते अगामि गमयति-ते मित्वाद्ध्रस्वः अजीगमत् जिगमिषति सादिपरत्वादिट्, संजिगांसते तङि नेट् । कृत्सु-गमनं गन्तव्यं गमनीयं यत्-गम्यं गन्ता गमकः गच्छन्-न्ती संगच्छमानः गत्वा निर्गत्य निर्गम्य अनुनासिकलोपपक्षे तुक्, कर्मणि अवगम्यमानः, अप्-निर्गमः सङ्गमः अवगमः गतः आगतः गतं गतिः सङ्गतिः गन्तुं सन् उ-जिगमिषुः, सन् अ-जिगमिषा, खल्-सुगमः दुर्गमः, खच्-विहङ्गमः, क्वरप् गत्वरः, क्विप्-जगत्, णिनि-आगामी, ष्ट्रन्-गात्रं, डोः-गौः, त्र-गोत्रा, गन्-गङ्गा । सृपेः शपि लघूपधगुणः सर्पति-तु असर्पत् सर्पेत्, ससर्प ससृपतुः-पुः कित्वान्न गुणः, अजन्ताका-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रवत्वाभावेन भारद्वाजनियमाप्रवृत्तेः क्रादिनियमेन थल्यपि नित्यमिट् ससर्पिथ-ससृपथुः-प ससृ
ससृपिव-म । स्यतासोः **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्** (६-१-५९) उपदेशेऽनुदात्तो य ऋ
पधस्तस्य अम्वा स्याज्झलादावकिति परे। इति ऋकारोत्तरममि यण् अमोभावे गुणः स्रप्ता-रौ-र
सर्प्ता-रौ-रः, स्रप्स्यति सर्प्स्यति सृप्यात्, लुङि-लृदित्वादङि अगुणे असृपत्-पताम्-पन्
अस्रप्स्यत् असर्प्स्यत् । उप प्र-विसृप्-प्रसरणे, उपसृप्-समीपगमने, अपसृप्-दूरगमने । कर्मादौ-सृप्य
असर्पि, सर्पयति अपसर्पत् असीसृपत्, सिसृप्सति हलन्ताच्चेति कित्वान्न गुणो नाप्यम्। कृत्सु
अवसर्पणं अच्-सर्पः विसर्पः (रोगः) सृप्तः णिनि पीठसर्पी, इस्-सर्पिः सृप्त्वा प्रसृप्य । णम
प्रह्वत्वे शब्दे च अक०, नतौ सक० । नमति-तु अनमत्-नमेत् , ननाम नेमतुः-मुः नेमिथ ननन्थ नेमथु
म नना-नम नेमिव-म, नन्ता नंस्यति नम्यात् । लुङि यमरमनमेति इट्सकोः अनंसीत् अनंसिष्टा
सिषुः, अनंस्यत् । उप-प्रणम्-सक० प्रणामे, अवनम् अक० अवनमने, परिणम्-परिणमने, विपरिण
विपरिणामे, उपनम्-उपस्थितौ, उन्नम्-उन्नतौ । भावादौ-नम्यते प्रणम्यते प्राणंसि, नमयति नामय
अनुपसर्गे मित्वविकल्पाद्ध्रस्वो वा सोपसर्गे तु नित्यं मित्वे प्रणमयति परिणमयति, अनीनमत् निन
सति । कृत्सु-नमनं नन्तव्यं नमनीयं प्रणामः परिणामः नत्वा प्रणम्य प्रणत्य अनुनासिकलोपप
नुक्, नतः प्रणतः नमन् नन्तुं नतिः उन्नतिः परिणतिः, र-नम्रः, फिक्-नेमि, असुन्-नमः, तृन् न
पत्वे-नप्ता । यम उपरमे (निवर्तने) अक० । शपि इषुगमियमामिति छः । यच्छति-तु अयच्छ
यच्छेत्, ययाम येमतुः-मुः येमिथ ययन्थ येमिव-म, यन्ता यंस्यति यम्यात्, अयंसीत्-सिष्टाम्-सि
यमरमेतीट्सकौ, अयंस्यत् । उप-प्रयम्-दाने, नियम्-नियमने, समुदाङ्भ्योयमोऽग्रन्थे इति समा
पूर्वकत्वे तङ् संयच्छते उद्यच्छते आयच्छते, उपयम्-विवाहे तङ् उपयच्छते । कर्मादौ-नियम्यते न्यय
यमयति नियामयति यमोऽपरिवेषणे इति मित्वनिषेधे दीर्घः आयामयति, यियंसति । कृत्सु-नियम
नियन्तव्यं । नियमनीयः यन्ता नियन्ता, अच्-यमः नियमः संयमः, घञ्-आयामः, खच्-वाचंय
(मौनी), यत्-यम्यः, सोपसर्गाण्ण्यत् प्रयाम्यः, त्वया नियम्या इति तु नियमशब्दात्करोत्यर्थे
यति उपपाद्यम्, नियच्छन् नियतः प्रयतः (पूतः) संयतः (बद्धः) आयतः (दीर्घः) यत्वा नियम
नियत्य नियन्तुम्, उनन्-यमुना-त्र-यन्त्रम् । क्तिन्-संयत् (युद्धं) । दंश दंशने (दंष्ट्रा व्यापा
सक० । शपि दंशसञ्जेति नलोपः दशति-तु अदशत् दशेत्, ददंश-शतुः-शुः, ददंशिथ ददंष्ठ व्रश्चे
षत्वे ष्टुत्वम् ददंशिव-म । दंष्टा षत्वे ष्टुत्वम्, दङ्क्ष्यति शस्य षत्वे कत्वे सस्य षत्वेनुस्वा
परसवर्णौ, दश्यात् अनिदितामिति नलोपः, लुङि सिचि हलन्तलक्षणवृद्धौ षत्व-कत्वा-नुस्वा
परसवर्णषत्वेषु अदाङ्क्षीत् अदांष्टाम् झलि सलोपः षत्वष्टुत्वे, अदाङ्क्षुः अदाङ्क्षीः अदांष्ट
अदाङ्क्षम्-क्ष्व-क्ष्म, अदङ्क्ष्यत् । उप-सं-निर्दशति । कर्मादौ- दश्यते अदंशि, दंशयति-ते अददंश
त, दिदङ्क्षति । कृत्सु-दंशनं, करणे ल्युटि पृषोदरादित्वान्नलोपे दशनः (दन्तः), दष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शनीयः द्रष्टा दंशकः दशन् कर्मणि- दश्यमानः, दष्टः दष्ट्वा सन्दश्य दष्टुम् अच्-दंशः संदंशः
संदंशः-ष्ट्रन् दंष्ट्रा। दृशिर् प्रेक्षणे सक०। सार्वधातुकेषु शपि पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशद-
सदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (७-३-७८) पादीनां पिबादय आदेशाः
स्युरित्संज्ञकशकारादौ प्रत्यये परे। इति दृशः पश्यादेशो अतोगुण इति पररूपे पश्यति-तु अपश्यत्
पश्येत्। ददर्श ददृशतुः-शुः कित्वान्न गुणः, थलि अजन्ताकारवत्वाभावेन भारद्वाजनियमाप्रवृत्तौ
विभाषा सृजिदृशोः (७-२-६५) आभ्यां थल इड्वा स्यात्। इति इट्पक्षे ददर्शिथ, इडभावे सृजि-
दृशोर्झल्यमकिति (६-१-५८) अनयोरमागमः स्याज्झलादावकिति। इत्यमागमे यणि व्रश्चेति षत्वे

ष्टुत्वे दद्रष्ठ ददृशथुः-थ ददर्श ददृशिव-म क्रादिनियमादिट्। तास्यमागमे यणि षत्वे ष्टुत्वे द्रष्टा-रौ-रः,
स्येऽमि यणि शस्य षत्वे कत्वे सस्य षत्वे द्रक्ष्यति, दृश्यात् कित्वान्न गुणः। लुङि इरित्वादङ्पक्षे
ऋदृशोऽङिगुण इति गुणे अदर्शत्-र्शताम्-र्शन् अङोभावे शलइगुपधादिति क्सस्य नदृश इति निषेधे
सिचि अमागमे यणि हलन्तलक्षणवृद्धौ शस्य षत्वे कत्वे सिचः षत्वे अपृक्तस्येटि अद्राक्षीत्, झलि
सलोपे षत्वे ष्टुत्वे च अद्राष्टाम् अद्राक्षुः अद्राक्षीः अद्राष्टम्-ष्ट अद्राक्षम्-क्ष्व-क्ष्म, अद्रक्ष्यत्।
उत्पश्यति (तर्कयति) परिपश्यति, संपूर्वादकर्मकात्तङि संपश्यते कर्मादौ-दृश्यते अदर्शि
दर्शयति-ते प्रनि-उपदर्शयति-ते अदीदृशत्-त अददर्शत्-त उऋद्वा, सनि ज्ञाश्रु इति तङि
दिदृक्षते। कृत्सु-दर्शनं, णौ-निदर्शनं प्रदर्शनं, द्रष्टव्यं दर्शनीयः दृश्यः द्रष्टा दर्शकः पश्यन्-
न्ती कर्मणि दृश्यमानः णौ दर्शयन्, कर्मणि लृशान-द्रक्ष्यमाणः दृष्टः णौ-दर्शितः दृष्ट्वा प्रदृश्य
प्रदर्श्य, द्रष्टुं, णौ-दर्शयितुम्, खश्-असूर्यंपश्याः क्विन्-तादृक् कीदृक्, कञ्-तादृशः यादृशः,
क्स-तादृक्षः, युच्-सुदर्शनः, क्विप्-दृक् क्तिन्-दृष्टिः, क्वनिप्-पारदृश्वा, णिनि-पारदर्शी, सन् अ-दिदृक्षा
उ-दिदृक्षुः उ-पशुः। कृष विलेखने (आकर्षणे) सक०। शपि लघूपधगुणे कर्षति-तु अकर्षत्
कर्षेत्, चकर्ष चकृषतुः-षुः थलि निषेधाविषयत्वेन भारद्वाजनियमाप्रवृत्तेः क्रादिनियमादिट् चकर्षिथ-
चकृषिव-म स्यतासोः अनुदात्तस्यचर्दुपधस्येति पक्षेऽमि यणि अमोऽभावे गुणे क्रष्टा-रौ-रः कर्ष्टा-रौ-रः,
क्रक्ष्यति कर्क्ष्यति षस्य कत्वे सस्य षत्वम्। कृष्यात्, लुङि क्सादेशो प्राप्ते स्पृशमृषकृषेति सिच्पक्षे
अमि यणि हलन्तलक्षणवृद्धौ कत्वे षत्वे अक्राक्षीत् अक्राष्टाम् झलि सलोपः, अक्राक्षुः अक्राक्षीः
अक्राष्टम्-ष्ट अक्राक्षम् क्ष्व-क्ष्म अमोऽभावे सिचि वृद्धौ कत्वषत्वयोः झलिसलोपे च अकार्क्षीत् अकार्ष्टाम्
अकार्क्षुः अकार्क्षीः अकार्ष्टम्-ष्ट अकार्क्षम्-क्ष्व-क्ष्म; सिजभावे क्से कित्वात् गुणवृद्ध्यभावे कत्वषत्वयोः
अकृक्षत्-क्षताम्-क्षन्-क्षः-क्षतम्-त क्षम्-क्षाव-म। अक्रक्ष्यत् अकर्क्ष्यत्। उप-प्र-आवि-उद्-अप-परिकर्षति।
कर्मणि-कृष्यते अकर्षि, कर्षयति-ते अचीकृषत्-त अचकर्षत्-त उऋद्वा, चिकृक्षति। कृत्सु-आकर्षणं
क्रष्टव्यं कर्ष्टव्यं कर्षणीयः क्यप्-कृष्यः, घञ्-कर्षः प्रकर्षः उत्कर्षः निष्कर्षः अपकर्षः क्रष्टा कर्ष्टा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्षकः कर्षन् कर्मणि-कृष्यमाणः कृष्टः उत्कृष्टः कृष्ट्वा विकृष्य आकृष्य क्रष्टुं कर्ष्टुम्, णमुल्-कर्षं कर्षम्। दह भस्मीकरणे सक०। दहति-तु अदहत् दहेत्, ददाह देहतुः-हुः देहिथ ददग्ध इडभावे दादेर्धातोरिति हस्य घत्वे जश्त्वे थस्य धत्वम्, देहथुः-ह ददा-दह देहिव-म, दग्धा-रौ रः तस्य धत्वं हस्य घत्वगत्वे। धक्ष्यति हस्य घत्वे जश्त्वचर्त्वयोर्दस्य भष्भावे सस्य षत्वम्। दह्यात् लुङि सिचि हलन्तलक्षणवृद्धौ हस्य घत्वे गत्वे कत्वे च दस्य धत्वे सस्य षत्वे अपृक्तस्येटि अधाक्षीत् अदाग्धाम् झलोझलीति सलोपे न भष्भावः अधाक्षुः अधाक्षीः अदाग्धम्-ध अधाक्षम्-क्ष्व-क्ष्म अधक्ष्यत्। उप-प्र-सं-परिदहति। कर्मादौ-दह्यते अदाहि दाहयति-ते अदीदहत्-त दिधक्षति। कृत्सु दहनं दग्धव्यं दहनीयं, ल्यु-दहनः ण्यत्-दाह्यं, घञ्-दाहः संज्ञायां निदाघः न्यङ्कादित्वात्कुत्वम् दग्धा दाहकः दहन् कर्मणि-दह्यमानः दग्धः दग्ध्वा प्रदह्य दग्धुं, घिनुण्-परिदाही, लृट्-शतृ धक्ष्यन् कर्मणि धक्ष्यमाणः।

वि० षञ्ज सङ्गे अक०। दंशसञ्जेति नलोपः सजति ससञ्ज व्यतिषजति (संबध्नाति) घञ्-कुत्वं सङ्गः अभिषङ्गः (पराभवः) प्रसङ्गः-प्रासङ्गः (उत्तरीयं) निषङ्गः- (इषुधिः) क्त-सक्तः प्रसक्तः, ल्यप्-प्रसज्य। **यभ** मैथुने अक० यभति-तु घञ्-याभः यत्-यभ्यम्। **घस्लृ** अदने सक०। लिट्यदेर्घस्लादेशविकल्पविधानसामर्थ्यादयं न सार्वत्रिकः यत्र लिङ्गं वचनं वा तत्रैवास्य प्रयोगः घसति-तु अघसत् घसेत् जघास घस्ता घत्स्यति घस्यात् अघसत् लृदित्वादङ् अघत्स्यत्। जिघत्सति, क्मरच्-घस्मरः, घञ्-घासः। **मिह** सेचने-सक०। मेहति अच्-कुत्वं-मेघः, किरच्-मिहिरः (सूर्यः) ष्ट्रन्-मेढ्रम्-क्त-मीढः, क्वसु-मीढ्वान्।

प्रयोगाः-पार्वतीशं नमामि। आपादपद्मप्रणताः। सङ्गच्छते युक्तिरियम्। यन्ता नियमयत्यश्वम्। तपस्तेपे सुदारुणम्। नामं नामं घनश्यामम्। नाग्नौ प्रतापयेत्यादौ। कृष्णसर्पोदशत्यहिम्। चकर्ष महतीं सेनाम्। त्यज दुर्जनसंसर्गम्। अद्राक्षीद्बालको नृत्यम्। जगाम दिशमुत्तराम्। ददाह विपिनं वह्निः। ददर्श देवं नरदेवसंभवः। अतितीक्ष्णा दृष्टिरस्य।

स्वरितेतः (उभयपदिनः)—डुपचष् पाके सक०। पचति-ते, पचतु-ताम्, अपचत्-त, पचेत्-त, पपाच पेचतुः-चुः पेचिथ पपक्थ भारद्वाजनियमाद्वेट् चोः कुः पेचिव-म क्रादिनियमादिट् पेचे पेचाते-चिरे। पक्ता पक्ष्यति-ते चस्य कुत्वे सस्य षत्वम्। पच्यात् पक्षीष्ट। लुङि सिचि हलन्तलक्षणवृद्धौ कुत्वषत्वयोः अपृक्तस्येटि, झलि सलोपे च अपाक्षीत् अपाक्ताम् अपाक्षुः अपाक्षीः अपाक्तम्-क्त अपाक्षम्-क्ष्व-क्ष्म; अपक्त अपक्षाथाम्-क्षत अपक्थाः अपक्षाथाम् अपग्ध्वम् अपक्षि-क्ष्वहि, क्ष्महि, अपक्ष्यत्-त। उप-प्र-परि-वि पचति-ते। कर्मादौ-पच्यते अपाचि, कर्मकर्तरि-विपच्यते, पाचयति-ते अपीपचत्-त पिपक्षति-ते कृत्सु-पचनं पक्तव्यं पचनीयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पचन्-न्ती पचमानः कर्मणि-पच्यमानः, स्य शतृ-पक्ष्यन्, कर्मणि-पक्ष्य-
…पाच्यं पक्ता पाचकः पक्त्वा विपच्य पक्वः क्ते तस्य वः पक्ववान् पक्तुं पक्तिः क्यप्-कृष्टपच्यः,
…घञ्-पाकः-परिपाकः कर्मण्यणि न्यङ्क्वादिकुत्वे श्वपाकः, खच्-मितंपचः, इष्णु-उत्पचिष्णुः, केलिमर-पचेलिमः,
…क्त्रिः-पक्त्रिमम्, पाकेन निर्वृत्तं पाकिमम् घञन्तादिमप्। भज सेवायाम् सक०। भजति-ते-तु
…अभजत्-त भजेत्-त, तृफलेत्वेत्वाभ्यासलोपयोः बभाज भेजतुः-जुः भेजिथ बभक्थ चोः कुः भेजथुः-
…बभा-भज भेजिव-म, भेजे भेजाते-जिरे, भक्ता भक्ष्यति-ते भज्यात् भक्षीष्ट अभाक्षीत् अभाक्ताम्
…अभाक्षीः अभाक्तम्-क्त अभाक्षम्-क्ष्व-क्ष्म; अभक्त क्षाताम्-क्षत अभक्थाः अभक्षाथाम् अभ-
…, अभक्षि-क्ष्वहि-क्ष्महि। अभक्ष्यत्-त। उप-विभजति-ते (विभागं करोति)। कर्मादौ-भज्यते
…भाजयति-ते अबीभजत्-त बिभक्षति-ते। कृत्सु-भजनं विभजनं भक्तव्यं भजनीयं, ण्यत्-
…, घञ्-भागः विभागः भक्ता भाजकः भजन् भजमानः भक्तः भक्त्वा विभज्य भक्तुं भक्तिः
…जन्मभाक्, घिनुण्-भागी, घ-भगः, तृनि आदेशो भ्राता। रञ्ज रागे सक०। शपि रञ्जेश्च
(६-४-२६) रञ्जेः शपि न लोपः स्यात्। इत्यनुनासिकलोपे रजति-ते-तु-ताम् अरजत्-त रजेत्-त,
…रञ्जतुः-ञ्जुः, ररञ्जिथ ररङ्क्थ इडभावे जस्य कुत्वेन गत्वे, ञकारनिवृत्त्यानुस्वारे गस्य चर्त्वे पर-
…ङः, ररञ्जथुः-ञ्ज-ञ्ज-ञ्जिव-म; ररञ्जे-ञ्जाते-ञ्जिरे, रङ्क्ता रङ्क्ष्यति-ते, रज्यात् कित्वादनु-
…सिकलोपः, रङ्क्षीष्ट; अराङ्क्षीत् सिचि हलन्तलक्षणवृद्धौ कुत्व-चर्त्व-ङकार-षत्वानि, अराङ्क्ताम्
…लोपः, अराङ्क्षुः अराङ्क्षीः अराङ्क्तम्-क्त अराङ्क्षम्-क्ष्व-क्ष्म; अरङ्क्त अरङ्क्षाताम्-क्षत अर-
…थाः अरङ्क्षाथाम् अरङ्ग्ध्वम् अरङ्क्षि-क्ष्वहि-क्ष्महि, अरङ्क्ष्यत्-त। कर्मादौ-रज्यते अरञ्जि
…कर्तरि-वि-अनु-उप-अपरज्यते, णौ मृगरमणे मित्वाद्ध्रस्वः नलोपः रजयति मृगान् अरीरजत् अन्यत्र
…रञ्जयति अररञ्जत्, रिरङ्क्षति-ते। कृत्सु-रञ्जनं रञ्जनीयं ण्वुलि नलोपे रजकः-की ष्वुन्-रजनं,
…-रजनी, घिनुण्-रागी घञि नलोपः-रागः विरागः अनुरागः उपरागः अपरागः, अधिकरणे घञि-
…; असुन्-रजः, अतच्-रजतम् रङ्क्त्वा रक्त्वा विरज्य रक्तः विरक्तः अनुरक्तः विरक्तिः अनु-
…। शप आक्रोशे (विरुद्धानुष्ठाने) सक०। शपति-ते- तु-ताम् अशपत्-त, शपेत्-त शशाप
…तुः-पुः शेपिथ शशप्थ शेपिव-म, शेपे-पाते-पिरे, शप्ता शप्स्यति-ते, शप्यात् शप्सीष्ट, अशाप्सीत्
…आप्ताम् अशाप्सुः, अशप्त अशप्साताम् प्सत, अशप्स्यत्-त। कर्मादौ-शप्यते अशापि, शाप-
…ते अशीशपत्-त शिशप्सति-ते। कृत्सु-शपनं शप्तव्यं शपनीयं, घञ्-शापः अभिशापः शप्ता शपन्
…मानः कर्मणि-शप्यमानः शप्त्वा अभिशप्य शप्तः शप्तुम्, कल बत्वं च-शबलः (चित्रः), दन् बत्वं
…; शपथार्थस्त्वात्मनेपदी।

…षच समवाये, सचति-ते अस्येहपाठे पदविशेषे च मतभेदः। त्विष दीप्तौ अक०। त्वेषति-ते, क्विप्-त्विट्,
…अत्वं च-त्वष्टा।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—हरिं भजति धार्मिकः। रजकस्य वस्त्रं ददाति। प्रस्थम्पचे पाचय। विभक्ता भ्रातरः सर्वे। विरक्तानां मनः शान्तम्। अभिशापेन दूषितः। गुणहीनादपरज्यते जनः। द्राक्षा पाकः प्रियः पथ्यः। अकृष्टपच्याः शालयः। धनं विभजामहे। भक्तिर्भवे न विभवे। परानुरक्तिरीश्वरे

भ्वादिष्वजन्ताः प्रायोऽनुदात्ताः (तृस्त्वृवर्जमनिटः)—

उदात्ताः (परस्मैपदिनः) सेटौ-तॄ प्लवनतरणयोः सक०। ऊदृदन्तैरिति पर्युदासात्सेडयम्। शपि ऋतइद्धातोरिति इत्वे प्राप्ते **इत्वोत्वाभ्यां गुणवृद्धी पूर्वविप्रतिषेधेन** (वा) इति गुणे तरति-तु अतरत् तरेत्। ततार, अतुसादौ ऋच्छत्यॄतामिति गुणे तॄफलेत्येत्वाभ्यासलोपयोः तेरतुः-रुः तेरिथ तेरथुः-र तता-तर तेरिव-म। लुडादाविटि **वृतो वा** (७-२-३८) वृङ्वृञ्भ्यामृदन्ताच्च इटो दीर्घो वा स्यान्नतु लिटि। इति पक्षे दीर्घे तरीता तरिता तरीष्यति तरिष्यति। आशिषि कित्वेन गुणनिषेधे ऋतइद्धातोरिति इत्वे रपरत्वे हलिचेति दीर्घे तीर्यात्-र्यास्ताम्-र्यासुः। लुङि सिचि वृद्धौ प्राप्ते ईटि च सलोपे अतारीत्, तामादौ सिचि वृद्धाविटि वृतोवेति दीर्घे प्राप्ते **सिचि च परस्मैपदेषु** (७-२-४०) वृङ्वृञ्भ्यामृदन्ताच्च इटो दीर्घो न स्यात्परस्मैपदे परे सिचि। इति निषेधे अतारिष्टाम् रिषुः अतारीः रिष्टम्-ष्ट अतारिषम्-ष्व-ष्म। अतरीष्यत् अतरिष्यत्। उप-वितॄ-दाने निस्तॄ-निस्तरणे अवतॄ-अवतरणे, उत्तॄ-उत्तरणे, सन्तॄ-सन्तरणे, कर्मादौ-तीर्यते उत्तीर्यते अतारि, तारयति- अतीतरत्-त, तितीर्षति तितरी-रिषति इट्सनिवेति विकल्प, दीर्घविकल्पश्च। कृत्सु-तरणम् अवतरणम् अवतरणिका करणे ल्युटि स्त्रियां कः, अवतरी-रितव्यम् सन्तरणीयः घञ्-अवतारः, अप्-आतरः (तरपण्यम्) तीर्णः उत्तीर्णः श्रयुकः कितीति नेट्, तीर्त्वा उत्तीर्य, उनन्-तरुणः उ-तरुः, उण् लत्वं तालु, थक्-तीर्थम्, अनि-तरणिः (सूर्योनौश्च), सन् उ-तितीर्षुः।

अथानिटः—घ्रा गन्धोपादाने सकर्मक। शपि पाघ्रेति जिघ्रादेशः। जिघ्रति-जिघ्रतु अजिघ्रत् जिघ्रेत्। लिटि द्वित्वादौ जघ्रा-अ इत्यत्र **आत औ णलः** (७-१-३४) आदन्ताद्धातोर्णल औकारादेशः स्यात्। इत्यौकारे वृद्धौ जघ्रौ, अजादौ क्ङिति **आतो लोप इटि च** (६-४-६४) अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात्। इत्याकारलोपे जघ्रतुः-घ्रुः द्वित्वात्परत्वाल्लोपे प्राप्ते द्विर्वचनेचीति निषिद्धे द्वित्वाद्युत्तरमाकारलोपः। थलि भारद्वाजनियमादिट्पक्षे आकारलोपे जघ्रिथ जघ्राथ जघ्रथुः-घ्र जघ्रौ जघ्रिव-म क्रादिनियमादिटि आकारलोपः। घ्राता घ्रास्यति। आशिषि यासुटि **वाऽन्यस्य संयोगादेः** (६-४-६८) घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। इत्येत्वविकल्पे घ्रेयात्-यास्ताम्-यासुः, घ्रायात्-यास्ताम्-यासुः। लुङि सिचि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभाषा घ्राधेट्शाच्छासः (२-४-७८) एभ्यः सिचो लुग्वा स्यात् परस्मैपदे परे। इति सिचो लुकि अघ्रात्-ताम्-अघ्रुः, अघ्राः-घ्रातम्-त अघ्राम्-व-म, लुगभावे यमरमेति इट्सकोः अघ्रासीत्-सिष्टाम्-सिषुः अघ्रासीः-सिष्टम्-ष्ट-सिषम्-ष्व-ष्म, अघ्रास्यत्। उप-आ-समा-उपाजिघ्रति। कर्मादौ-घ्रायते अघ्रायि घ्रापयति-ते अजिघ्रि-घ्रपतत्-त उपधाया इत्वं वा, जिघ्रासति। कृत्सु-आघ्राणम् घ्रातव्यं, करणे ल्युट् घ्राणः, जिघ्रन् कर्मणि आघ्रायमाणः क्त-घ्राणः घ्रातः नुदविदेति नत्वं वा, घ्रात्वा उपाघ्राय आघ्रातुम्, क-व्याघ्रः। दाण् दाने सक०। शपि पाघ्रेति यच्छादेशो यच्छति-तु अयच्छत् यच्छेत्, ददौ दाता दास्यति आशिषि यासुटि दाधाघ्वदाप् (१-१-२०) दारूपा धारूपाश्च षड्धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना। डुदाञ् दाने, दाण् दाने, दो अवखण्डने, देङ् रक्षणे इति दारूपाः, डुधाञ् धारणपोषणयोः। धेट् पाने इति धारूपौ। इति घुसंज्ञया एर्लिङि (६-४-६७) घुसंज्ञानां मास्थागापाजहातिसां च एत्वं स्यादार्धधातुके किति लिङि। इत्येत्वे देयात्। गातिस्थेति सिचो लुकि अदात् अदाताम् अदुः आत इति झेर्जुसि उस्यपदान्तादिति पररूपम्, अदाः- दातम्-त अदाम्-व-म, अदास्यत्। उप-प्रयच्छति नियच्छति (रुणद्धि) प्रणियच्छति घुत्वान्नेर्गदेति णत्वम्। कर्मादौ-दीयते अदायि दापयति-ते दित्सति सनिमीमेतीत्वेऽभ्यासलोपः। कृत्सु-दानं, क-गोदः गोप्रदः, देयम् इत्येवं घञ्-दायः आतोयुक्, दत्वा दोदद्घोरिति ददादेशः प्रदाय दत्तः प्रदत्तः यच्छन् दातुम् रु-दारु, नु देष्णुः। पा पाने सक०। शिति पाघ्रेति पिबादेशो तस्यादन्तत्वेनोपधागुणाभावे पररूपे पिबति-तु अपिबत् पिबेत्। लिडादौ पूर्ववत् पपौ-पतुः-पुः पपिथ-पाथ पपथुः-प पपौ पपिव-म, पाता पास्यति पेयात् एर्लिङीत्येत्वम्, अपात् अपाताम् अपुः गातिस्थेति सिचो लुक्, अपास्यत्। कर्मादौ-पीयते अपायि पाययति-ते अपीप्यत्-त पिपासति। कृत्सु-पानं पातव्यं पानीयं पाता पेयं पिबन् कर्मणि-पीयमानः क्त-पीतः पीत्वा घुमास्थेतीत्वम् प्रपाय नल्यपीति नेत्वम् निपीयेति तु पीङः, पातुम्, टक्-सुरापः मद्यपः-क-द्विपः कच्छपः, उण्-पायुः प- पापम्, असुन् थुक्-पाथः (जलं) असुन्नित्वं च-पयः, कन्-पाकः (अर्भकः) ष्ट्रन्-पात्रं, घञर्थे कः प्रपा, णमुल्-पायं पायम्। म्ना अभ्यासे सक०। प्रायेणायमाङ्पूर्वः शिति पाघ्रेति मनादेशः आमनति-तु नत्-नेत्, आमम्नौ आम्नाता स्यति, संयोगदित्वादाशिष्येत्वं वा आम्नेयात् आम्नायात् आम्नासीत् इट्सकौ, आम्नास्यत्। उप-समाम्नाति। कर्मादौ-आम्नायते आम्नापयति-ते। कृत्सु-आम्नानं समाम्नातव्यम् आम्नातः, घञि-युकि आम्नायः (वेदः) आमनन् आम्नाय आम्नातुम् क-निम्नं द्युम्नं (धनं) सुम्नं (सुखम्)। ष्ठा गतिनिवृत्तौ अक०। सत्वे गतिनिवृत्तिः शिति तिष्ठादेशः तिष्ठति-तु अतिष्ठत् तिष्ठेत्, तस्थौ तस्थतुः-स्थुः स्थाता-स्यति संयोगादित्वादेत्वे स्थेयात् स्थायात्, गातिस्थेति सिचो लुकि अस्थात् अस्थाताम् अस्थुः, अस्थास्यत्। उप-समवप्रविस्थः उदोनूर्ध्वकर्मणि उपान्मन्त्रकरणे प्रकाशनस्थेयाख्ययोश्चेति समा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दियोगे आत्मनेपदम्। संस्था-पर्यवसाने, अवस्था-अवस्थाने, प्रस्था-प्रयाणे, उप-उपस्थितौ अनुष्ठा-करणे, उद्स्था-उत्थाने, आस्था-आग्रहे, अधिष्ठा-आश्रये, प्रतिष्ठा स्थितौ, व्युत्था-व्युत्थाने, व्यवस्था-व्यवस्थाने, सम्-अव-प्र-वि-वि-उद्-व्युद्-उपतिष्ठते, अन्यत्र अनु-अधि-आतिष्ठति विशेषः पश्चात्। भावादौ-स्थीयते अस्थायि, स्थापयति-ते अतिष्ठिपत्-त उत्थापयति तिष्ठासति उपतिष्ठासते, कृत्सु उत्थानं स्थातव्यम् अधिकरणे ल्युट्-स्थानम् आस्थानं (सभा) णौ स्थापनं-स्थापनीयं, स्था तिष्ठन् स्थितः उत्थितः उतिष्ठमानः स्थित्वा उत्थाय स्थातुं, णिनि-स्थायी, विषमस्थः, अङ्-संस्था व्यवस्था प्रतिष्ठा स्नु-स्थास्नुः, उक-स्थायुकः (ग्रामाधिकृतः) वरच्-स्थावर कृत्सु-तस्थिवान्-तस्थुषी, सन उ-तिष्ठासुः, णियुच्-स्थापना, किरच्-स्थिरः। इ ई गतौ सक०। किटकटीत्यत्र प्रश्लिष्टाविमाविति केचित्। द्वयोः शप्गुणायादेशेषु अयति तु आयत्-यताम्-यन् अये येताम्-येयुः। लिटि ह्रस्वस्य णलि द्वित्वे वृद्ध्ययादेशयोः **अभ्यासस्यासवर्णे** (६-४-७८) इवर्णोव न्तस्याभ्यासस्य इयङुवङौ स्तोऽसवर्णेऽचि परे। इति इयङि इयाय, अतुसादौ इकारस्य द्वित्वे स र्णपरत्वेनेयङभावे वार्णादाङ्गं वलीय इति सवर्णदीर्घं बाधित्वा उत्तरेकारस्य यणि यकारे इयु इयुः, थलि भारद्वाजनियमादिटि पित्वेन गुणायादेशयोरभ्यासस्येयङि इययिथ, इडभावे गु भ्यासस्येयङि इयेथ, इयथुः-थ इया-यय इयिव-म क्रादिनियमादिट्। दीर्घस्य तु इजादेश्चेत्या अयाञ्चकारेत्यादि, लुडादौ द्वयोः एता एष्यति, आशिषि ह्रस्वस्याप्यकृदितिदीर्घे ईयात्, लु आटि सिचि वृद्धौ ऐषीत्-षिष्टाम्-षिषुः। ऐष्यत्। उप-उदयति कर्मादौ-ईयते उदीयते। कृत्सु-अ नम् इतः उदितः प्रेतः, अच्-अयः उदयः इत्वा उदित्य प्रेत्य उदेतुम्। आभ्यामेव उदयति य भानुः, उपेयमिति च सिद्धयति, इण् गतावित्यस्य एतीत्यादि। अय गतावित्यस्य अयते इत्यादि

जि जये (उत्कर्षप्राप्तौ) अक०। शपि गुणायादेशयोः जयति-तु अजयत् जयेत्। लिटि द्वित्वे वृ

सन्लिटोर्जेः (७-३-४७) जयतेः सन्लिण्निमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात्। इत्युत्तरज रस्य गत्वे सन्धिकार्ये जिगाय जिग्यतुः-ग्युः जिगयिथ जिगेथ भारद्वाजमते इट्, जिग्यथुः जिगा-गय जिग्यिव-म क्रादिनियमादिट् एरनेकाच इति यण्। जेता जेष्यति, जीयात्-यास्ताम्-या अकृत्सार्वधातुकयोरितिदीर्घः। लुङि सिचिवृद्धिरिति वृद्धौ षत्वे अजैषीत्, अजैष्टाम्-षुः अजै ष्टम्-ष्ट अजैषम्-ष्व-ष्म, अजेष्यत्। उप-विपराभ्यांजेरिति तङ् विजयते पराजयते (पराजितोभवति विजिग्ये व्यजेष्ट पराजेष्ट। भावादौ-जीयते, णौ-क्रीङ्जीनामित्यात्वे पुकि जापयति-ते, सनि द्वि कत्वे दीर्घे जिगीषति विजिगीषते कृत्सु-जेतव्यम् अच्-जयः विजयः पराजयः जयन् न्ती विजयमा जितः जित्वा विजित्य जेतुम्, जेतुं शक्यं जय्यम्। जि अभिभवे न्यूनीकरणं अविभवो न्यूनीभव च आद्ये सक० शत्रुन् जयति, द्वितीये अक० अध्ययनात्पराजयते। पूर्ववद्रूपाणि सकर्मकत्वाकर्मकत्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव विशेषः। उक्तंच-जयिर्जयाभिभवयोराद्येर्थे सावकर्मकः, उत्कर्षप्राप्तिराद्यार्थो द्वितीयेर्थे सकर्मकः। पूर्वोयमप्यात्मनेपदी। कर्मणि- जीयते, कृत्सु- जितः निर्जितः, ग्स्नुक्-जिष्णुः, इनि-जयी, क्वरप्- त्वरः, अण्-जैत्रम्। क्षि क्षये अक०। अन्तर्भावितण्यर्थो नाशनार्थस्त्वयं सकर्मकः। क्षयति-तु क्षयेत् क्षयेत्। लिटि णिति द्वित्वाभ्यासकार्यवृद्ध्यादेशाः क्त्स्वगुणे अचिश्नुधात्विति इयङ् चिक्षाय चिक्षियतुः-युः चिक्षयिथ चिक्षेथ चिक्षियथुः-य चिक्षा-क्षय चिक्षियिव-म, क्षेता क्षेष्यति क्षीयात् अकृदिति दीर्घः, लुङि सिचि वृद्धिः अक्षैषीत् अक्षैष्टाम् अक्षैषुः-षीः-ष्टम्-ष्ट अक्षैषम्-ष्व ष्म, अक्षेष्यत्। कर्मकर्तरि च क्षीयते क्षाययति चिक्षीषति। कृत्सु-क्षेतव्यं यत्-क्षय्यं (क्षेतुंशक्यं) अच्-क्षयः क्रियां नत्वं दीर्घश्च क्षीणः क्षीणवान् भावकर्मणोस्तु क्षितमनेन, क्षित्वा प्रक्षीय क्षेतुम्। गतौ-सक०। द्रवति-तु अद्रवत् द्रवेत्, दुद्राव दुद्रुवतुः-वु दुद्रोथ दुद्रुव-म क्रादित्वात्थल्यपि नेट्। द्रोता द्रोष्यति द्रूयात् अकृदिति दीर्घः। लुङि णिश्रिद्रुस्रुभ्य इति चङि द्वित्वादौ अदुद्रुवत् वताम्-वन्, अद्रोष्यत्। उप-प्र-विद्रवति (पलायते), उपद्रवति (उपद्रवं करोति)। कर्मादौ- द्रूयते अद्रावि द्रावयति द्रावयति बुधयुधेति परस्मैपदमेव। कृत्सु-णि विद्रावणम्, अच्-विद्रवः उपद्रवः द्रवः घञ्-प्रद्रावः क्त- द्रुतः उपद्रुतः द्रुत्वा विद्रुत्य- इनन् द्रविणं (धनम्) न-द्रोणः (परिमाणविशेषः) द्रुतिः निपातनात् ...। श्रु श्रवणे सक०। सार्वधातुकेषु शपोपवादेन श्रुवः शृ च (३-१-७४) श्रुवः शृ इत्यादेशः स्यात् श्नु प्रत्ययश्च। इति श्नौ आदेशे श्नोर्ङित्वाद्धातोरगुणे पित्सु नोर्गुणे णत्वे च शृणोति शृणुतः ...न्तादेशे उवङि प्राप्ते हुश्नुवोः सार्वधातुके (६-४-८७) जुहोते श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य च संयोगपूर्वोवर्णस्य यण्स्यादजादौ सार्वधातुके। इति यणि शृण्वन्ति शृणोषि शृणुथः-थ शृणोमि शृण्वः-शृणुवः-म-लोपश्चेति पक्षे उकारलोपः। शृणोतु शृणुतात्-ताम् शृण्वन्तु, शृणु उतश्चेतिहेर्लुक्, शृणुतात्-तम्-त शृणवानि-वाव-म आटः पित्वाद्गुणावादेशौ। अशृणोत् अशृणुताम्-ण्वन् - अशृणोः-...तम्-त, अशृणवम् अशृण्व-म अशृणुव-म पक्षे उलोपः। शृणुयात्-याताम्-युः। लिटि शुश्राव शुश्रुवतुः-...असंयोगादिकित्सु उवङ्, शुश्रोथ शुश्रुवथुः-व, शुश्रा-श्रव शुश्रुव-म क्रादित्वात्थल्यपि नेट्। श्रोता श्रोष्यति, श्रूयात्-यास्ताम्-यासुः अकृदिति दीर्घः। लुङि सिचि वृद्धिः अश्रौषीत् अश्रौष्टाम्-अश्रौषुः ...षीः-ष्टम्-ष्ट-षम्-ष्व-ष्म। अश्रोष्यत्। उप- संपूर्वत्वे अर्तिश्रुदृशिभ्यश्चेति तङ् संशृणुते, आ-प्रति-...णोति (प्रतिजानाति)। श्रूयते श्रावयति-ते अशुश्रुवत्-त शुश्रूषते सनि तङ्, श्रवणं श्रवणीयं ...तव्यं ण्यति श्राव्यं, करणे ल्युटि श्रवणं (कर्णः) ल्युः श्रवणः श्रोता श्रावकः श्रुतः णौ-श्रावितः ...न्-ती कर्मणि-श्रूयमाणः श्रुत्वा प्रतिश्रुत्य श्रोतुं णमुलि श्रावं श्रावम् सन् अ-शुश्रूषा, उ-शुश्रूषुः, ...श्रोणिः (कटिः) असुन्-श्रवः (कर्णः) बाहुलकात्कर्मणि क्तिन्-श्रुतिः (वेदः)। स्रु गतौ अक०। ...-तु अस्रवत् स्रवेत्। सुस्राव सुस्रुवतुः- वुः कित्वादगुणे उवङ्, सुस्रोथ सुस्रुव- म क्रादि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वान्नेट् स्रोता स्रोष्यति स्रूयात् अकृदितिदीर्घः। लुङि: च्लेः णिश्रिद्रु स्रुभ्य इति चङि चङीति द्वित्वे अभ्यासकार्ये लघूपधगुणादन्तरङ्गत्वादुवङ् असुस्रुवत् वताम्-वन्, असोष्यत्। प्रस्रवति स्रु प्रस्रावयति वुधयुधेति परस्मैपदमेव, सुस्रूषति। प्रस्रवणम् ण-आस्रावः संस्रावः, अप्-संस्रव घञ्-प्रस्रावः, घिनुण प्रस्रावी, स्रवत्यस्माद्घृतमिति किच्-स्रुक्, कच्-स्रुवः, असुन्तुट् च स्रोत (प्रवाहः) स्रुतः प्रस्रुत्य। ऋ गतिप्रापणयोः सक०। पाघ्रेति ऋच्छादेशः ऋच्छति-तु आर्च्छ आटि वृद्धिरार्, ऋच्छेत्। लिटि णलि द्वित्वे उरदत्वे हलादिशेषे आदेरतो दीर्घे ऋच्छत्यृ तामित्युत्तरऋकारस्य गुणे रपरे अतउपधाया इत्युपधावृद्धौ सवर्णदीर्घे आर, ऋतुसादावुपधा द्ध्यभावे आरतुः आरुः, थलि इडत्यर्तीति नित्यमिट आरिथ आरथुः आर आर आरिव म अर्ता अरिष्यति ऋद्धनोरिति इट् अर्यात्-यास्ताम्-यासुः गुणोर्तीतिगुणः। लुङि सिचि सर्तिशास्त्यर्तीत्यत्रास्याग्रहणादङोऽभावेन वृद्धि आर्षीत् आर्ष्टाम् आर्षुः आर्षीः-ष्टम्-ष्ट आर्षम्-ष्व-ष्म। आरिष्यत् कर्मादौ-अर्यते अर्ययति। कृत्सु-यत् अर्यः (स्वामी वैश्यो वा) ण्यत्-आर्यः, इत्र, अरित्रम् (नौकाया पृष्ठदण्डः) अङ्-आरा (प्रनोदः) क्त-ऋतम् ऋणम्, उस्-अरुः (मर्म) असुन् शतवं च-अर्श भन्-अर्भः (बालः) स्वार्थे के अर्भकः, थन्-अर्थः, मिन् उत्वं च उर्मिः (तरङ्गः,) वनिप्-अर्वा (अश्व अनि-अरणिः (मन्थकाष्ठं) ऊनन् अरुणः, तुन्-ऋतु, अर-अररं (कपाटम्) इन्-इरिणः (ऊषर असुन् नुट् च अर्णः व-अर्णवः, क्तिन् आऋति आर्तिः आऋत-आर्तः पीडितः)। सृ गतौ सक०। सर तु असरत् सरेत् ससार सस्रतुः सस्रुः असंयोगादित्वादगुणे यण्। ससर्थ सस्रथुः सस्र ससार ससृव-म क्रादित्वान्नेट्। सर्ता सरिष्यति ऋदन्तत्वादिट्। स्रियात्-यास्ताम्-यासुः ऋतो ह्रस्वविधिसामर्थ्यान्न दीर्घः। लुङि सर्तिशास्त्यर्तिभ्यश्चेत्यत्र लुक्शपः शासेः साहचर्येण सर्तेः जौहोत्यादिकयोरेव ग्रहादङभावे सिचि वृद्धिः असार्षीत् असार्ष्टाम्-सार्षुः, असरिष्यत्। सृधा गतिसामान्यार्थे इमानि रूपाणि, शीघ्रगत्यर्थे तु शित्सु पाघ्रेति धौरादेशः धावति-तु अधावत् धाव धावन् इति विशेषः। उप-प्रसृ-प्रसरणे, संसृ-संसरणे, उत्सृ-अपसृ-अपसरणे, उपसृ-समीपगम अभिसृ-अभिसारे, निसृ-निःसरणे, प्रसरतीत्यादि। सर्यते असारि, सारयति प्रसारयति अपसारय णौ कर्मणि उत्सार्यते अपसार्यते। संसरणं निःसरणम् अपसरणीयम् अपसृतः णौ-अपसारि प्रसरन्, णौकर्मणि प्रसार्यमाणः सृत्वा प्रसृत्य णौ-प्रसार्य अपसार्य, क्यप् सूर्यः ट-पुरस्सर अग्रेसरः, णिनि, विसारी, क्मरच् विसृमरः, क्वरप्-विसृत्वरः, घञ्-अति-तीसारः सारः (बल आसारः (प्रवेशः) प्रसारः (निर्गमः) घ-परिसरः (पर्यन्तभूः) थण्-सार्थः, वन्-सर्वः, अयु-सर अनि-सरणिः, इत्-सरित्, नि-सृणिः (अङ्कुशः) असुन्-सरः, अथिन्-सारथिः। स्मृ चिन्तायाम् सक० गुणे रपरत्वम्। स्मरति-तु स्मरत् स्मरेत्। लिटि स्मृ इत्यस्य द्वित्वेऽभ्यास

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संयोगादेरित्युत्तरस्य गुणे रपरत्वे णलि उपधावृद्धौ सस्मार सस्मरतुः-रुः ऋदन्त-
नीति नेट् सस्मर्थ सस्मरिव- म क्रादिनियमादिट्। स्मर्ता स्मरिष्यति ऋद्धनोरितीट्।
किित्वेन गुणनिषेधे प्राप्ते गुणोर्तिसंयोगाद्योरिति गुणे स्मर्यात्-र्यास्ताम्-र्यासुः। लुङि सिचि
रपरत्वे पत्वे च अस्मार्षीत् अस्मार्ष्टाम् अस्मार्षुः अस्मार्षीः-ष्टम्-ष्ट-र्षं-ष्व ष्म, अस्मरिष्यत्।
संस्मृ-प्रस्मृ-विस्मरणे, संस्मरति अनुस्मरति, स्मर्यते विस्मर्यते, अस्मारि, स्मारयति, आध्याने
स्मरयति असस्मरत् अत्स्मृदृत्वरेत्यत्वम्, सनि ज्ञाश्रुस्मृदृशामिति तङि सुस्मूर्षते अज्झनेति
उदोष्ठ्येत्युत्वे हलिचेति दीर्घः। स्मरणं स्मर्तव्यं स्मरणीयं स्मर्ता स्मारकः स्मरन्-न्ती, कर्मणि
स्मारः स्मृतः स्मृत्वा विस्मृत्य स्मर्तुं स्मृतिः विस्मृतिः णमुल्-स्मारं स्मारम्, णौ-स्मारयन्
स्मारयितुं स्मारयित्वा स्मारितः। धेट् पाने सक०। शपि अयादेशः। धयति-तु अधयत् धयेत्। लिटि
उपदेशेऽशिति (६-१-४५) उपदेशे एजन्तस्य धातोरात्वं स्यान्नतु शिति। इत्यशिद्विवक्षायामेव
आत्वे धाइत्यस्य द्वित्वेऽभ्यासह्रस्वे चत्वें दधा अ-इति जाते आतऔणल इत्यौत्वे वृद्धौ दधौ,
क्ङिति आतोलोपइटिचेत्याकारलोपे दधतुः दधुः। द्वित्वात्परत्वाल्लोपे प्राप्तेपि द्विर्वचनेचीति
द्वित्वाद्युत्तरमाकारलोपः। थलि भारद्वाजनियमादिट्पक्षे आकारलोपः दधिथ दधाथ,
दध, दधौ दधिव- म, क्रादिनियमादिटि आकारलोपः। धाता धास्यति। आशिषि यासुटि
एर्लिङीत्येत्वे धेयात्-यास्ताम्-यासुः। लुङि च्लेःसिचि प्राप्ते विभाषाधेडिति पक्षे चङि
द्वित्वेऽभ्यासकार्ये आकारलोपे अदधत्-धताम्-धन्-धः-धतम्-त-धम्-धाव-म। चङोभावे सिचि
स्येति बाधित्वा विभाषाघ्राधेडिति पक्षे लोपे अधात् अधाताम् अधुः आत इति झेर्जुसि उस्यपदा-
न्तादिति पररूपम्। लुगभावे यमरमेतीट्सकोः सिच इटि अपृक्तस्येटि च सलोपे अधासीत्-सिष्टाम्-
अधासीः-सिष्टम्-ष्ट-सिषम्-ष्व-ष्म। अधास्यत्। धीयते अधायि धापयति- ते आत्वेपुक्, धित्सति
मीमेतीसि सस्येति तत्वे अत्रलोप इत्यभ्यासलोपः। धयनं, श-धयः, खश्-स्तनन्धयः, ष्ट्रन्-धात्री,
घुमास्थेतीत्वं, प्रधाय नल्यपीतीत्वनिषेधः, कि-सन्धिः, न-धाना, नु-धेनुः। गै शब्दे सक०।
गायति-तु अगायत् गायेत्। जगौ जगतुः-गुः जगिथ जगाथ। गाता-स्यति गेयात् अगासीत् अगास्यत्।
निगायति (निन्दति) उद्गायति। गीयते गापयति अजीगपत् जिगासति। गानं गातव्यं
गेयं गाता गायकी गायन्-न्ती गीतः विगीतः, भावे गीतं, गीत्वा विगाय ल्यपि घुमास्थेतीत्वं
गीतिः गातुम्, थन्-गाथा, थकन्-गाथकः, ण्युट्-गायनः, टक्-सामगः, कथन्-उद्गीथः।
ग्लै हर्षक्षये अकर्मकः। ग्लायति-तु अग्लायत्, ग्लायेत्, जग्लौ जग्लतुः-ग्लुः जग्लिथ-ग्लाथ
जग्लिम ग्लाता-स्यति ग्लायात् ग्लेयात् वान्यस्येत्येत्वं वा, अग्लासीत् अग्लास्यत्। ग्लायते
अग्लायि, ग्लापयति ग्लपयति ग्लास्नेत्यनुपसृष्टस्य मित्त्वविकल्पे ह्रस्वो वा, अजिग्लपत्। क्त-ग्लानः,
ग्लानिः, डौ-ग्लौः, क्स्नु-ग्लास्नुः। म्लायति-तु अम्लायत्, म्लायेत्, मम्लौ म्लाता-स्यति म्लायात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म्लेयात् अम्लासीत्-स्यत् । प्रम्लायति, म्लायते अम्लायि, म्लापयति । म्लानः म्लानि म्लायन् म्लात्वा प्रम्लाय । द्रै स्वप्ने अक०। प्रयेणायं निपूर्वः । निद्रायति, निदद्रौ निद्राता-स्यति दिद्रे-द्रायात् न्यद्रासीत्-स्यत् । निद्रायते न्यद्रायि निद्रापयति निदिद्रासति , निद्राणं निद्राणः निद्राय निद्रायन्, अङ् निद्रा, इतचि-निद्रितः, आलु-निद्रालुः । ध्यै चिन्तायाम् सक० । ध्यायति- तु अध्यायत् ध्यायेत् दध्यौ ध्याता-स्यति ध्ये-ध्यायात् अध्यासीत्-स्यत् । निध्यायति (स्मरति), अभिध्यायति-ध्यायते अध्यायि, ध्यापयति- ते निदिध्यासति । ध्यानं निध्यानं ध्यातव्यं ध्याता ध्यायन्-न्ती ध्यातः ध्यात्वा निध्याय ध्यातुं, यत्-ध्येयः, क्विप्-सुधीः, क्वनिप्-धीवा । स्त्यै ष्ट्यै शब्दसङ्घातयोः अक० षोपदेशस्यापि सत्वे रूपं तुल्यम्। स्त्यायति-तु अस्त्यायत् स्त्यायेत् तस्त्यौ स्त्याता-स्यति स्त्ये-स्त्यायात् अस्त्यासीत्-स्यत् । स्त्यायते स्त्यायति, सनि षोपदेशस्य षत्वे तिष्ट्यासति । स्त्यानं, निष्ठायां प्रपूर्वस्य सम्प्रसारणे पक्षे मत्वे प्रस्तीमः प्रस्तीतःअन्यत्र नत्वे स्त्यानः (संहतः), स्त्यायति-संहन्यतेस्यां गर्भ इत्यर्थे ड्रटि स्त्रियां स्त्री, प-उत्वं दीर्घश्च स्तूपः (चैत्यम्) ।

वि० दु गतौ सक० । दवति, अच्-दवः (वनं) घञ्-दावः (वनाग्निः) क्त-दूनः, तन् दीर्घश्च-दूतः, ध्रु स्थैर्ये अक० ध्रवति क- ध्रुवः(नित्यः) । ध्रुवा (स्रुवविशेषः) । गृ घृ सेचने सक० । गरति, तन्-गर्तः, अप्-गरः (विषम्) । घरति घृतम् घञ्-मन्-घर्मः । ध्वृ हूर्छने (कौटिल्ये हिंसायां च) ध्वरति, अप्-ध्वरः अध्वरः (हिंसाहीनो यज्ञः) । स्वृ शब्दोपतापयोः । स्वरति सूतीति वेट् सक० । स्वरति सस्वार सस्वरिथ सस्वर्थ सस्वरिव-म क्रादिनियमादिट्, स्वर्यते, अप्-स्वः, घञ्-अनुस्वारः उ-स्वरुः (वज्रम्) । कै शब्दे सक० । कायति, कन्-काकः । क्षै क्षये अक० । क्षायति, णौ- क्षपयति मित्वाद्ध्रस्वः- क्त-क्षामः (दुर्बलः) । दैप् शोधने सक० । दायति, अवदातः (शुक्लः) । रै शब्दे अक० । रायति, कीति रायतीति क-कीरः (शुकः) । श्रै पाके अक० । श्रायति, णौ-श्रपयति पाके मित्वाद्ध्रस्वः, अन्यत्र श्रापयति (स्वेदयति), क्त-शृतं क्षीरम् पाके शृभावः, अन्यत्र श्राणा यवागूः, णौ-श्रपिता यवागूः ।

प्रयोगाः—न बाहुभ्यां नदीं तरेत् , हितान्नयः संशृणुते स किम्प्रभुः । दोर्भ्यामब्धि तितीर्षामि तथापि शुश्रूषुरहं वचांसि । जयति देवः । हरिः पापं द्रावयति । विजयते नृपतिर्यशसा श्रिया । अ... णमर्धभोजनम् । जनः किलाचारमुचं विगायति । ततः प्रतस्थे कौबेरीम् । उत्तिष्ठमानस्तु परो नोपे... पथ्यमिच्छता । ध्यात्वा पूजय देवताः । उपतस्थे सरस्वती ।

अनुदात्ताः (डीङ्वर्जमनिटः) **ङितः** (आत्मनेपदिनः)— डीङ् विहायसा गतौ ऊदृदन्तैर्... पर्युदासात्सेट् अक० । प्रायेणायमुत्पूर्वः । शपि गुणायादेशौ, उड्डयते-ताम् उदडयत उड्डयेत, उड्डि... डयाते-डियरे, उड्डयिता-ष्यते उड्डयिषीष्ट उदडयिष्ट-यिषाताम्-षत, उदडयिष्यत । अव-प्र-डयते । उड्डी... उदडीडयत्, उड्डिडयिषते । उड्डयनम् उड्डयितव्यम् , भावे क्त-उड्डीनं प्रडीनं संडीनम् अवडीनम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(...नविशेषाः) कर्तरि उड्डीनः, उड्डीय उड्डयितुम् उड्डयमानः, उड्डीयते इति दिवादौ। अथानिटः– ...ङ् प्लुङ् गतौ (भ्रंशे)। च्यवते-ताम् अच्यवत च्यवेत, चुच्युवे च्योता-ष्यते-षीष्ट, अच्योष्ट षातां षत अ-...ष्यत। प्र-वि-परिच्यवते, च्यावयति-ते। च्यवनं च्युतः अच्युतः च्युतिः। प्लवते-ताम् अप्लवत प्लवेत, ...ुवे प्लुवाते-विरे प्लोता-ष्यते-षीष्ट अप्लोष्ट-षातां-षत अप्लोष्यत। उप-उत्-अव-आ-विप्लवते, प्लूयते ...यति आप्लावयति (आर्द्रयति), कृत्सु प्लवनं णौ-आप्लावनं प्लुतः आप्लुतः आप्लवमानः प्लुतिः प्लुत्वा ...प्लुत्य, अप्-उपप्लवः विप्लवः। त्रैङ् पालने सक०। आदेचइत्यात्वं न तस्याशिद्विषयत्वात् शपि ...यादेशः त्रायते-ताम् अत्रायत त्रायेत। लिटि एशि आत्वे तल्लोपः तत्रे तत्राते तत्रिरे, त्राता त्रास्यते-सीष्ट ...त्रास्त-साताम्-सत अत्रास्थाः-साथाम्-ध्वम् अत्रासि-स्वहि-स्महि, अत्रास्यत। उप-परित्रायते। त्रायते ...णि त्रापयति अतित्रपत् तित्रासते। कृत्सु-त्राणं परित्रातव्यं त्राता त्रायमाणः त्रातः त्राणः नुद विदेति ...तवम्, त्रात्वा परित्राय त्रातुम्। ष्मिङ् ईषद्धसने अक०। षः स शपि गुणायादेशौ। स्मयते-ताम् ...स्मयत स्मयेत, सिस्मिये-याते-यिरे क्त्वादगुणे इयङ्, स्मेता स्मेष्यते-षीष्ट-षीयास्ताम्-षीरन्, ...स्मेष्ट अस्मेषाताम्-षत अस्मेष्ठाः-षाथाम्-ध्वम् अस्मेषि-ष्वहि-ष्महि, अस्मेष्यत, उप विस्मयते (चित्री-...यति)। स्मीयते अस्मायि, णौ हेतुभये तङ् मुगडो विस्मापयते, अन्यत्र-रूपेण विस्मापयति, सिस्म-...यते। कृत्सु-अच्-स्मयः विस्मयः भावे क्तः स्मितम्, विस्मयमानः विस्मितः स्मित्वा विस्मित्य, णौ-...स्मापयन् र-स्मेरः।

...० पूङ् पवने सेट् सक०। पवते, पूयते पावयति, ष्ट्रन्-पोत्रम्, इत्र-पवित्रः। **अथानिटः–गाङ्** गतौ सक०। ...ते गाते गासे-थे-ध्वे गै गावहे-महे, गाताम्-गाताम्-गास्व-थाम् ध्व गै गावहै-महै, अगात-ताम्-अगात अगाथाः थाम् ...ध्वं अगावहि-महि। गेत गेयाताम् गेरन्, गेथाः गेयाथाम् गेध्वम् गेय गेवहि महि। गाता-स्यते-सीष्ट अगास्त-साताम्-...कुङादिभ्य इत्यत्रङादेशस्यैव गाङोग्रहणात् अस्याङित्वेन घुमास्थेतीत्वं न अगास्यत। गीयते गानम्। **गुङ्** ...शब्दे अक०। गवते, त्र-गोत्रम्, अल-गवलम् (माहिषशृङ्गम्) **प्यैङ्** वृद्धौ अक०। प्यायते, आप्याययति ...नम् आप्यायितः। **श्यैङ्** गतौ सक०। श्यायते, ण-अवश्यायः (नीहारः), प्रतिश्यायः (पीनसः) क्त-शीनः ...(शीनः)।

प्रयोगाः–विस्मापयन्विस्मितमात्मवृत्तौ। त्रायते महतो भयात्। च्यवते कर्मणः शठः। उपप्लुतं ...नुमदो मदोद्धतैः। सोप्युत्प्लुत्य विवेद ताम्। विसिस्मिये तद्वचसेङ्गितेन च। जवेन पीठादुदतिष्ठद-...च्युतः। उड्डयन्ते पतत्रिणः। प्रडीनोड्डीन संडीनाः। परित्रातासि लोकानाम्। उपर्येव प्लवसे ...नोदन्वतः।

अनुदात्ताः (श्रिञ्वर्जमनिटः) ञितः (उभयपदिनः)–श्रिञ् सेवायाम् सेट् सक०। श्रयति-ते-तु-...म् अश्रयत्-त, श्रयेत्-त, शिश्राय शिश्रियतुः-युः क्त्वादगुणे इयङ्, उदृदन्तैरितिपर्युदासादिट् शिश्र-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यिथ शिश्रियथुः-य, शिश्रा-श्रय शिश्रियिव-म, शिश्रिये-याते-यिरे, श्रयिता श्रयिष्यति-ते श्रीयात्-यास्ताम् यासुः अकृदिति दीर्घः श्रयिषीष्ट, लुङि णिश्रीति चङि द्वित्वादि अशिश्रियत्-यताम्-यन्, अशिश्रियत येताम्-यन्त, अश्रयिष्यत्-त। उप प्रश्रि-प्रह्वीभावे, सम् आ-समाश्रि-आश्रयणे, अधिश्रि-अधि रोपणे, कर्मादौ-श्रीयते आश्रीयते श्राययति अशिश्रियत्, कृत्सु-आश्रयणम्, आश्रयितव्यम् आश्रियणीयम् अच्-आश्रयः प्रश्रयः श्रितः श्रितवान् श्रित्वा श्र्युकःकितीतिनेट् आश्रित्य श्रयन्-श्रयमा श्रयितुम्, घञ्-उच्छ्रायः (उच्चता) समुच्छ्रय इति तु बाहुलकात्, नि-श्रे णिः-णी, क्विप्-श्रीः

अथानिटः—णीञ् प्रापणे सक०। णो नः शपि गुणायादेशौ नयति-ते-तु-ताम्-अनयत्-त नयेत् नि निनाय निन्यतुः-न्युः थलि भारद्वाजनियमाद्वेट् निनयिथ निनेथ निन्यथुः निन्य निना निन्यिव म, निन्ये-न्याते-न्यिरे, नेता नेष्यति नीयात् नेषीष्ट अनैषीत् अनैष्टाम्-षुः, अनेष्ट-षाताम्-ष अनेष्यत्-त। उप-आनी-आनयने, उपानी-समीपानयने, प्रणी-रचने, निर्णी-निर्णये, विनी-शिक्षणे, उन्नी उन्नयने, अपनी-अपसारणे, समानी-योजने, प्रत्यानी-प्रत्यानयने, परिणी-विवाहे आचार्यकरणाद्यर्थे नियः आत्मनेपदमेव उपनयते विनयते इत्यादिर्विशेषो वक्ष्यते, कर्मादौ-नीयते अनायि, नाययति अनीनयत्-त निनीषति-ते, कृत्सु-नयनम् आनयनम् नेतव्यं नयनीयं नेता नायकः नयन्-न्ती नयमा कर्मणि नीयमानः नीतः विनीतः नीत्वा अपनीय आनेतुं नीतिः अच्-निर्णयः विनयः परिणयः प्रण (प्रेम) घञ्-आनायः (जालम्)। धृञ् धारणे सक०। शपि गुणः धरति-ते-तु-ताम् अधरत्-त धरेत् दधार दध्रतुः-ध्रुः दधर्थ-ध्रिव-म, -दध्रे ध्राते-ध्रिरे, धर्ता धरिष्यति-ते ऋदन्तत्वादिट् ध्रियात् धृषी उश्चेति कित्वान्न गुणः अधार्षीत्-र्ष्टाम्-र्षुः, तङि सिचि ह्रस्वादङ्गात् (८-२-१७) ह्रस्वादङ्गात्परस्य सिच लोपः स्याज्झलि। इति सिचो लोपः, उश्च (१-२-१२) ऋवर्णात्परौ झलादी लिङ् तङ्परः सिच्येतौ कि स्तः। इति कित्वान्न गुणः अधृत-षाताम्-षत अधृथाः-षाथाम्-ढ्वम् अधृषि-ष्वहि-ष्महि, अधरिष्यत प्रत्युद्धरणे, अभ्युद्धृ-अभ्युद्धरणे, कर्मादौ-ध्रियते कर्मकर्तरि-ध्रियते अधारि, धारयति, अव-निर्-सम् धारयति (निश्चिनोति), अदीधरत्-त, दिधीर्षति-ते उद्दिधीर्षति-ते। कृत्सु-उद्धरणं धर्तव्यं समुद्ध णीयः घञ्- उद्धारः उद्धर्ता उद्धारकः धृतः उद्धृतः उद्धरन्-रमाणः, कर्मणि-उद्ध्रियमाणः धृ उद्धृत्य णौ-अवधार्य निर्धार्य निर्धारणं निर्धारितः, उद्धर्तुम् सन् अ-उद्दिधीर्षा, सन् उद्दिधीर्षुः, अङ्-धारा क्तिन्-धृतिः, मन्-धर्मः, खच्-वसुन्धरा। भृञ् भरणे सक०। भरति-ते-तु ताम् अभरत्-त भरेत्-त, बभार बभ्रतुः कित्वादगुणे यण् बभर्थ बभृव-म क्रादित्वादृदन्तत्वाच्च नेट् बभ्रे-भ्राते-भ्रिरे, भर्ता भरिष्यति-ते भ्रियात् रिङ्-शयेति रिङ्। भृषीष्ट अभार्षीत्-र्ष्टाम्-र्षुः, अभृ सिचो लोपः कित्वं च, अभरिष्यत्-त। कर्मादौ-भ्रियते अभारि, संभारयति-ते, बुभूर्षति-ते बिभरिषति-ते सनीवन्तेति वेट् इडभावे उदोष्ठ्येत्युत्वम्। कृत्सु-भरणं भरणीयं भर्तव्यं क्यप्-भृत्यः, घञ्-भारः सम्भारः, स्त्रियां भावे क्यप्-भृत्या, ण्यत्-भार्यः भर्ता सम्भृतः सं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरमाणः भृत्वा सम्भृत्य भर्तुं भृतिः, खच्-विश्वम्भरः, इन्-कुक्षिम्भरिः, कु-बभ्रुः, अतच्-भरतः, भरतीति क-अभ्रम्। हृञ् हरणे सक० (प्रापणे स्वीकारे स्तेये नाशने च) हरति-ते-तु-ताम् हरतु हरेत्-त, जहार जहतुः-हुः जहर्थ ऋदन्तत्वान्नेट् जह्रिव-म क्रादिनियमादिटि यण्, हर्ता हरिष्यति-ते ह्रियात् हृषीष्ट, अहार्षीत्-र्ष्टाम्-र्षुः, अहृत-षाताम्-षत, अहरिष्यत्-त। उप-प्रहृ-प्रहारे, अपहृ-अपहरणे, विहृ-विहारे, संहृ-संहारे, अनुहृ-अनुकरणे, निस्-निर्हृ-निष्कासने, आहृ-आनयने, परिहृ-परिहारे, व्यवहृ-व्यवहरणे, अभ्या-समभ्याहृ-संमुखानयने, अभ्यवहृ-भोजने, उदाहृ-उदाहरणे, प्रत्युदाहृ-प्रत्युदाहरणे, उपसंहृ-उपसंहारे, व्याहृ-कथने, सम्प्रहृ-सम्प्रहारे, व्यतिहृ-विपर्यये, समाहृ-संग्रहे, समभिव्याहृ-सहोच्चारणे, उपहृ-उपहारे। कर्मादौ-ह्रियते अहारि, हारयति-ते, जिहीर्षति-ते। अनुहरणं विहरणं प्रहर्तव्यम् आहरणीयं हर्ता प्रहर्ता घञ्-हारः संहारः हृतः हरन् हरमाणः कर्मणि-ह्रियमाणः हृत्वा अपहृत्य हर्तुं जिहीर्षा जिहीर्षुः अप्-हरः अच्-अंशहरः, इन्-हरिः, इटिलोपः ह्रदः (कूपः) क्यप् तुक्-हृदयम्, इनच्-हरिणः, तन्-हरितः।

प्रयोगाः—अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य। अनुहरन्ते मातृकं गावः सुमस्त्राः। जहार भार्यां रामस्य रावणो लोककण्टकः। दध्रे मणिर्दीधितिदीपिताशः। कार्यभारं ...। आश्रित्य नूनममृतद्युतयः पदं ते। कर्तव्यो महदाश्रयः। समुद्दिधीर्षुः पृथिवीम्। आहारे व्यवहारे च त्यक्तलज्जः सुखीभवेत्। अविनयमपनयविष्णो। गावो घासमभ्यवहरन्ति। चौरेण हृतं धनम्।

अन्तर्गणिकाः—

द्युतादय उदात्ताः (सेटः) अनुदात्तेतः (आत्मनेपदिनः)–द्युत दीप्तौ अक०। द्युतादिभ्य आत्मनेपदिष्वपि लुङि वा परस्मैपदं, तत्र च्लेरङ् च विशेषः। द्योतते-ताम् अद्योतत द्योतेत। लिटि द्वित्वे हलादिशेषे प्राप्ते द्युतिस्वाप्योः सम्प्रसारणम् (७-४-६७) अनयोरभ्यासस्य सम्प्रसारणं स्यात्, यस्य इकारे सम्प्रसारणाच्चेति पूर्वरूपे हलादिशेषे दिद्युते-ताते-तिरे, द्योतिता-ष्यते-षीष्ट। लुङि द्युद्भ्यो लुङि (१-३-९१) द्युतादिभ्यो लुङः परस्मैपदं वा स्यात्, इति पक्षे तिबादौ पुषादीति च्लेरङि अद्युतत्-तताम्-तन्, तङ्पक्षे अद्योतिष्ट-तिषाताम्-षत, अद्योतिष्यत। उप-वि-प्र-उत्-अभिद्योतते, भावादौ द्युत्यते अद्योति द्योतयति-ते अदिद्युतत्-त दिद्यु-द्योतिषते रलोव्युपधादिति वा कित्वम्। कृत्सु-द्योतनं द्योतनीयं द्योतकः द्युतितः द्योतितः द्युतित्वा द्योतित्वा वा कित्वम्, अभिद्युत्य णौ-अभिद्योत्य, द्योतितुं द्योतमानः घञ्-उद्योतः, क्विप्-विद्युत्, इ-द्युतिः, इसन् जत्वं च ज्योतिः। क्षुभ सञ्चलने (प्रकृतिविपर्यये गमने च) अक०। क्षोभते-ताम् अक्षोभत क्षोभेत, चुक्षुभे क्षोभिता-ष्यते-षीष्ट अक्षुभत् अक्षोभिष्ट-ष्यत। उप-वि-प्र-अभि-सम् क्षोभते, भावादौ-क्षुभ्यते अक्षोभि क्षोभयति-ते चुक्षु-क्षोभिषते। कृत्सु-क्षोभणः क्षोभमाणः कर्मकर्तरि-क्षुभ्यमाणः, घञ्-क्षोभः विक्षोभः, क्त-क्षुब्धः (मन्थः) अन्यत्र क्षु-क्षोभितः क्षु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षोभित्वा प्रक्षुभ्य। रुच दीप्तावभिप्रीतौ च अक०। रोचते-ताम् अरोचत रोचेत रुरुचे-चाते-चि
रोचिता-ष्यते-षीष्ट, अरुचत् अरोचिष्ट-ष्यत। उप-प्र-वि-सम्-अभिरोचते। भावादौ-रुच्यते अरोचि
रोचयति-ते अरूरुचत्-त रुरुरु-रोचिषते। कृत्सु-रोचनं रोचनीयं ल्यु-विरोचनः क्यप्-रुच्यः रोच
रोचमानः रुचितः रोचितः, रुचित्वा रोचित्वा संरुच्य रोचितुं, युच्-रोचना, इष्णु-रोचिष्णुः, घञ्-रो
(छिद्रं) इस्-रोचिः, मन्-रुक्मं, क्वुन्-रोचकः, इ-रुचिः, क्विप्-रुक्। शुभ दीप्तौ अक०। शोभते-
अशोभत शोभेत, शुशुभे शोभिता-ष्यते-षीष्ट अशुभत् अशोभिष्ट-ष्यत, उप-प्र-आ-सम्-अभि-परिशोभ
भावादौ-शुभ्यते अशोभि शोभयति-ते अशूशुभत्-त शुशु-शोभिषते। कृत्सु-ल्यु-शोभनः शोभमानः श
शोभा, शुभित्वा शोभित्वा शोभितुम्। स्रंसु ध्वंसु भ्रंसु अवस्रंसने अक०। स्रंसते-ताम् अस्रंसत स्रं
सस्रंसे स्रंसिता-ष्यते-षीष्ट अस्रसत् अङि नलोपः, अस्रंसिष्ट-ष्यत, उप-वि-अभि-परि-अवस्रंसते। भाव
स्रस्यते अस्रंसि स्रंसयति-ते सिस्रंसिषते, कृत्सु-स्रंसनं स्रंसनीयं स्रंसमानः स्रंसित्वा स्रस्त्वा उदित्वा
स्तुभावे क्त्वान्नलोपः, स्रस्तः वेट्क्तवान्नेट्, विस्रस्य स्रंसितुम्। ध्वंसते-ताम् अध्वंसत ध्वंसेत द
ध्वंसिता-ष्यते-षीष्ट अध्वसत् अध्वंसिष्ट-ष्यत। प्र-वि-परि अवध्वंसते, ध्वस्यते अध्वंसि ध्वंसय
दिध्वंसिषते। ध्वंसनं ध्वंसनीयं ध्वंसमानः ध्वंसित्वा ध्वस्त्वा ध्वस्तः विध्वस्य ध्वंसितुं घञ्-ध्वंस
भ्रंसते-ताम् अभ्रंसत भ्रंसेत बभ्रंसे भ्रंसिता-ष्यते-षीष्ट अभ्रसत् अभ्रंसिष्ट-ष्यत। प्र० वि-भ्रं
भ्रस्यते अभ्रंसि भ्रंसयति-ते बिभ्रंसिषते। भ्रंसनं भ्रंसनीयं भ्रंसकः भ्रंसः भ्रंसित्वा भ्रष्ट्वा भ्रष्टः
भ्रस्य भ्रंसितुं भ्रंसमानः। स्रम्भु विश्वासे सक०। प्रायेणायं विपूर्वः, विस्रम्भते-ताम् व्यस्रम्भत वि
म्भेत विसस्रम्भे विस्रम्भिता-ष्यते-षीष्ट व्यस्रभत् व्यस्रम्भिष्ट-ष्यत। विस्रभ्यते विस्रम्भयति-ते। विस्र
विस्रम्भणीयं, घञ्-विस्रम्भः विस्रम्भकः विस्रम्भित्वा विस्रब्ध्वा विस्रब्धः विस्रम्भितुं, घिनुण्-विस्र

वि० घुट परिवर्तने सक०। घोटते अघुटत् अघोटिष्ट, घोटनं घुटित्वा घोटित्वा, अच-घोटः, क-घोटकः,
घुटिका। णभ हिंसायाम् सक०। नभते अनभत् अनभिष्ट असुन्-नभः। लुट लुठ प्रतिघाते अक०। लोटते अलुटत्
टिष्ट लुटित्वा लोटित्वा विलुट्य। लोठते अलुठत् अलोठिष्ट लुठित्वा लोठित्वा विलुठ्य। श्विता वर्णे अक०। श्वेतते अ
तत् अश्वेतिष्ट, घञ्-श्वेतः, त्र-श्वित्रं (श्वेतकुष्ठम्)। ञिमिदा स्नेहने सक०। मेदते अमिदत् अमेदिष्ट, मिदित्वा मेदि
दीतः क्तः-मिन्नः प्रमिन्नः, घुरच्-मेदुरः, असुन्-मेदः। ञिष्विदा गात्रप्रस्रवणे अक०। स्वेदते अस्विदत् अस्वेदिष्ट,
कर्तरि च स्विद्यते स्वेदनं घञ्-स्वेदः स्विदित्वा स्वेदित्वा स्विन्नः प्रस्वेदितः।

प्रयोगाः—व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी। नरोचतेऽस्मै विषयाभिषङ्गः। रोचम
समन्तात्। भ्रष्टस्य कान्या गतिः। विस्रब्धघातदोषः स्ववधाय खलस्य वीरकोपकरः। स्रस्तां नितम्
दवरोप्य काञ्चीम्। शुशुभे राजसत्तमः। न शोभते वृद्धसभासु धृष्टः, विक्षोभो मनसि बभूव भूयसो
अशुभद्विद्युतो ज्योतिः। चुक्षुभे लवणार्णवः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...षु वृतादयः—

वृतु वर्तने। सेट्० अक० आ०। वृतादौ स्ये सनि च वा परस्मैपदं विशेषान्तरम्, लुङि द्युतादि-
...दस्त्येव। वर्तते वर्तेते वर्तन्ते-से-तेथे-र्तध्वे वर्ते-र्तावहे-महे, वर्तताम् अवर्तत वर्तेत। लिटि कित्वान्न
...द्वित्वे उरदत्वे हलादिशेषे ववृते-ताते-तिरे, वर्तिता-रौ-रः। लृटि स्ये- वृद्भ्यः स्यसनोः (१-३-९२)
...दिभ्यः परस्मैपदं वा स्यात्स्ये सनि च। इति परस्मैपदपक्षे, न वृद्भ्यश्चतुर्भ्यः (७-२-५९) वृता-
...श्चतुर्भ्यः सादेरार्धधातुकस्य इण्न स्यात्तङानयोरभावे। इतीण्निषेधे गुणे रपरत्वे वर्त्स्यति-र्त्स्यतः-
...न्ति, पक्षे तङि इटि वर्तिष्यते-ष्येते-ष्यन्ते। वर्तिषीष्ट-षीयास्ताम्-षीरन्। लुङि द्युद्भ्य इति परस्मैपदपक्षे
... अवृतत्-तताम्-तन्, तङ्पक्षे अवर्तिष्ट-र्तिषाताम्-षत। लृङि स्ये परस्मैपदपक्षे इण्निषेधः, तङि
..., अवर्त्स्यत्-र्त्स्यताम्-र्त्स्यन्, अवर्तिष्यत-ष्येताम्-ष्यन्त। उप-प्रवृत्-प्रवृत्तौ, निवृत्-निवृत्तौ, परा-
...परावर्तने, अनुवृत्-अनुसरणे, उद्वृत्-उद्वर्तने, आवृत्-आवर्तने, प्रत्यावृत्-प्रत्यावर्तने, अभ्यावृत्-
...ावर्तने, अपवृत्-अपवर्तने। भावादौ- निवृत्यते न्यवर्ति, आवर्तयति-ते प्रवर्तयति-ते प्रावृतत्-त।
...-प्रवर्त्यते, सनि परस्मैपदं वा विवृत्सति विवर्तिषते। कृत्सु- वर्तनं निवर्तनं प्रवर्तितव्यं निवर्त-
...ं वर्तिता प्रवर्तकः उदित्वाद्वेट् वर्तित्वा वृत्त्वा प्रवृत्य निवृत्य, णौ निवर्त्य आवर्त्य, वेट्क्त्वान्नेट्
...त्तः निवृत्तः, णौ-प्रवर्तितः वर्तमानः, स्ये निवर्त्स्यन्-निवर्तिष्यमाणः, वृत्तिः प्रवृत्तिः निवृत्तिः करणे
...टि-वर्तनं (जीवका), इष्णु-वर्तिष्णुः। वृधु वृद्धौ। सेट्० अक० आ०। वृतुवत्। वर्धते-ताम् अवर्धत
...ते ववृधे वर्धिता वर्त्स्यति वर्धिष्यते वर्धिषीष्ट अवृधत् अवर्धिष्ट अवर्त्स्यत् अवर्धिष्यत। उप-प्र वि सम्
...वर्धते। भावादौ- वृध्यते अवर्धि वर्धयति-ते अवीवृधत्-त, विवर्ध्यते, विवृत्सति विवर्धिषते। कृत्सु-
...ं वर्धितव्यं वर्धकः वर्धित्वा वृद्ध्वा प्रवृद्ध्य, णौ प्रवर्ध्य प्रवृद्धः णौ संवर्धितः वर्धितुं वृद्धिः वर्धमानः
...ष्णुः, ल्यु-वर्धनः वर्धनी (भृङ्गारः) विवर्धिषु। स्यन्दू प्रस्रवणे। ऊदित्वाद्वेट् अक० आ०। स्यन्दते-
... अस्यन्दत स्यन्देत, सस्यन्दे-न्दाते-न्दिरे स्यन्दिता स्यन्ता स्यन्दिष्यते स्यन्त्स्यते, लट् लृङ् लुङ्सु
... परस्मैपदं न वृद्भ्य इत्यत्र चतुर्ग्रहणसामर्थ्याद्विकल्पं बाधित्वा तत्र नेट् स्यन्त्स्यति स्यन्दिषीष्ट
...सीष्ट, लुङि परस्मैपदपक्षे अङि ङित्वेन नलोपः अस्यदत्-दताम्-दन् तङि इट्पक्षे अस्यन्दिष्ट-
...षत, इडभावे तादौ झलोझलीति सलोपः अस्यन्त-न्त्साताम्-न्त्सत, अस्यन्थाः-अस्यन्त्साथाम्
...ध्वम् अस्यन्त्सि-न्त्स्वहि-न्त्स्महि, अस्यन्त्स्यत् अस्यन्दिष्यत अस्यन्त्स्यत। उप-अनु-वि-परि-
...ष्यन्दते अनुविपर्यभिनिभ्य इति षत्वम्। भावादौ-स्यन्द्यते अस्यन्दि स्यन्दयति-ते सिस्यन्त्सति
...न्दिषति-ते। कृत्सु-स्यन्दनं स्यन्दितव्यं स्यन्तव्यं, घञ्-निष्यन्दः स्यन्दित्वा स्यन्त्वा परिष्यन्द्य
... वेट्क्त्वान्नेट्, स्यन्दितुं स्यन्तुं युच्-स्यन्दनः (रथः) उ-सम्प्रसारणं धत्वं च सिन्धुः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृपू सामर्थ्ये ऊदित्वाद्वेट् अक० । **कृपो रो लः** (८-२-१८) कृप उ र ल इति च्छेदः। कृपो योरेफस्तस्य लः स्यात्, ऋकारस्यावयवो यो रेफसदृशस्तस्य च लकारसदृशः स्यात्। तेन गुणेनाभिनि-रस्य लत्वं, गुणाभावे ऋकारस्य लृकारत्वं च। कल्पते-ताम् अकल्पत कल्पेत, चक्लृपे-पाते-पिरे चक्लृपिषे चक्लृप्से-पाथे चक्लृपिध्वे-पृध्वे चक्लृपे चक्लृपिवहे-महे-प्वहे-प्महे, **लुटि च क्लृपः** (१-३-९३) लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात्। कल्पिता-रौ-रः, **तासि च क्लृपः** (७-२-६०) क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात् तङानयोरभावे। कल्प्तासि कल्पितास्थः-स्थ कल्पितास्मि-स्वः-स्मः, तङि सर्वत्र वेट् कल्पिता कल्प्ता-रौ-रः। लृटि लृङि च पक्षे परस्मैपदे नवृद्भ्य इति नेट् कल्प्स्यति-स्यतः-स्यन्ति, तङि वेट् कल्पिष्यते कल्प्स्यते, कल्पिषीष्ट क्लृप्सीष्ट इडभावे लिङ् सिचावितिकित्वान्न गुणः। लुङि परस्मैपदपक्षे अङि इडभावे अक्लृपत्-पताम्-पन्, तङि वेट् अकल्पिष्ट-ल्पिषाताम्-षत, इडभावे झलोझलीति सलोपः अक्लृप्त अक्लृप्साताम्-प्सत, अकल्प्स्यत अकल्पिष्यत अकल्प्स्यत। उप-सङ्कल्पते विकल्पते प्रकल्पते। कर्मादौ- कल्प्यते अकल्पि कल्पयति-ते सङ्कल्पयति-ते विकल्पयति-ते। क्लृप्सु-कल्पनं प्रकल्पितव्यं विकल्पनीयं कल्पकः घञ्-कल्पः विकल्पः सङ्कल्पः, करणे घञ्-आकल्पः (नेपथ्यं) क्लृप्तः वेट्क्त्वान्नेट्, णौ-कल्पितः, क्लृप्त्वा कल्पित्वा प्रकल्प्य कल्पितुं णौ-कल्पयितुं, युच-कल्पना।

वि॰ शृधु शब्दकुत्सायाम् अक॰। शर्धते, प्रहसने चुरादावप्ययम्। वृतादयस्त्रय उदितः क्लृपिस्यन्दी तु ऊदितौ।

इति वृतादयो द्युतादयश्च

प्रयोगाः—सङ्कल्पयामास चिरेण कार्यम्। सत्वं निवर्तस्व विहाय लज्जाम्। कार्यं सम्यक्प्रवर्तते। निवर्त्य राजा दयितां दयालुः। ववृधे राजवेश्मनि। अभिष्यन्दितं घृतम्। प्रवृत्तिरेव भूतानां निवृत्तिस्तु महाफला। कथं कल्पेत कार्याय। संवर्धयामो भवन्तम्। सङ्कल्पयति विकल्पयति च मनः।

घटादयो व्यामिश्राः (हलन्ता अजन्ताः सेटोऽनिटः अनुदात्तेत उदात्तेतश्च) घटादयो मित (गणः) घटादयो मित्संज्ञकाः, तत्फलं तु तेषां प्रेरणार्थे णिचि घटयतीत्यादावुपधाह्रस्वः, णयन्तानि णमुलोः स्यादिषु चिण्णवदिट्यपि अघाटि अघटि, घाटं घाटं घटं घटं, घटिष्यते घाटिष्यते इत्यादौ दीर्घश्च, सोयं विशेषः। घटादयःषितश्च, तत्फलं तु घटा इत्यादौ षिद्भिदादिभ्य इत्यङ्।

वि॰ ये धातवो गणान्तराधीता घटादौ पठ्यन्ते तेषामिहोपात्त एवार्थे मित्वम्, येत्वपूर्वाः पठ्यन्ते तेषामुपात्तेऽनुपात्ते चार्थे मित्वम्। तदुक्तं न्यासे—"केचिदिहैव पठ्यन्ते तेषामुपसर्गादिनाऽर्थान्तरेपि सानुबन्धत्वं (मित्वं) यथा विघटयति अपरे गणान्तराधीता इह पठ्यन्ते, तेषामर्थेन नियमः, यथा स्मृ चिन्तायामन्यत्र पठितोत्र स्मृ आध्याने, आध्यानमुत्कण्ठापूर्वकं स्मरणं, स्मरयति, अन्यत्र स्मारयति" इति हरदत्तः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उदात्ताः (सेटः) अनुदात्तेतः (आत्मनेपदिनः)—घट चेष्टायाम् अक० । घटते-ताम् अघटत
…जघटे-टाते-टिरे घटिता-ष्यते-षीष्ट, अघोटिष्ट-ष्यत । उप-सङ्घटते (युज्यते) विघटते (वियुज्यते)
…दौ-घट्यते अघटि घटयति णिचि-मित्वाद्ध्रस्वः अजीघटत्, कर्मणि-अघटि अघाटि, जिघटिषते।
…सु-घटनं सङ्घटनं विघटनं घटितव्यं घटनीयं घटमानः घटितः घटित्वा सङ्घट्य, णमुल्-घटंघटं घाटं
…म्, अच्-घटः, अङ्-घटा (गजसमूहः) । व्यथ भयसञ्चलनयोः अक० । व्यथते-ताम् अव्यथत
…त । लिटि व्यथो द्वित्वे व्यथो लिटि (७-४-६८) व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि । इति
…स्य इकारे पूर्वरूपे हलादिशेषे विव्यथे-थाते-थिरे, व्यथिता-ष्यते-षीष्ट अव्यथिष्ट-ष्यत । भावादौ
…यते अव्यथि व्यथयति-ते विव्यथिषते । कृत्सु-व्यथनं व्यथितव्यं व्यथितः व्यथमानः व्यथित्वा
…थितुं अङ्-व्यथा, इनि-अव्यथी, उरच् सम्प्रसारणं थस्य धत्वं च विधुरः । प्रथ प्रख्याने अक० ।
…ते-ताम् अप्रथत प्रथेत पप्रथे प्रथिता-ष्यते-षीष्ट अप्रथिष्ट-ष्यत । भावादौ-प्रथ्यते अप्रथि प्रथयति-ते अपप्र-
…त, कृत्सु-प्रथनं प्रथनीयं प्रथितः प्रथमानः प्रथित्वा प्रथितुम् अङ्-प्रथा, षिवन्-ङीप् पृथिवी, कुः
…सारणं च पृथुः, ङी-पृथ्वी । ञित्वरा सम्भ्रमे अक० । त्वरते-ताम् अत्वरत त्वरेत तत्वरे त्वरिता-
…षीष्ट अत्वरिष्ट-ष्यत, भावादौ-त्वर्यते अत्वरि त्वरयति-ते अतत्वरत्-त । कृत्सु-त्वरितव्यं त्वरित्वा
…रमाणः तूर्णः त्वरितः रुष्यमत्वरेति वेट् इडभावे ज्वरत्वरेत्यूठ्, अङ्-त्वरा ।

वि० म्रद मर्दने सक० । म्रदते, म्रदयति, कु— मृदुः, ङी-मृद्वी, कन् मृद्वीका, इमन्-म्रदिमा । दक्ष गति शासनयोः
…दक्षते, दक्षयति, अच्-दक्षः । क्रप कृपायां गतौ सक० । क्रपते क्रपयति, अङ्-कृपा, आनच्-कृपाणः, क्वुन्-कृपणः,
…कृपीटयोनिः (अग्निः) ऊर-कर्पूरः । कदि क्रदि वैक्लव्ये अक० । कन्दते, कन्दयति, अच्-कन्दः अल-
…ङी-कन्दली कदली । क्रन्दते क्रन्दयति; अच्-आक्रन्दः ।

उदात्ताः (सेटः) उदात्तेतः (परस्मैपदिनः)-ज्वर रोगे अक० । ज्वरति-तु अज्वरत् ज्वरेत्
…ज्वार जज्वरतुः-रुः ज्वरिता-ष्यति ज्वर्यात् अज्वारीत् अतोल्रान्तस्येति वृद्धिः, अज्वरिष्यत् । ज्वर्यते
…ज्वारि ज्वरयति-ते कर्मणि-अज्वारि अज्वारि । ज्वरितव्यं ज्वरितः, अच्-ज्वरः, घिनुण्-संज्वारी,
…ज्वरा । णट नृत्तौ अक० । पूर्वं पठितस्य नाट्यमर्थः, वाक्यार्थाभिनयो नाट्यम्, अत्र तु नृत्तं
…चार्थः, पदार्थाभिनयो नृत्यं, गात्रविक्षेपमात्रं नृत्तम् । नटति-तु अनटत् नटेत् ननाट नेटतुः-टुः-
…म, नटिता-ष्यति नट्यात् अनटीत् अनाटीत् अतोहलादेरिति वा वृद्धिः, अनटिष्यत् । नट्यते
…ति-ते, पूर्वपठितस्य तु नाटयति । कृत्सु -नटनं नटनीयं, ण्यत्-नाट्यं नटिता नाटकः नटन् नटित्वा
…तुम्, अच्-नटः । लगे सङ्गे अक० । लगति-तु अलगत् लगेत् ललाग लगिता-ष्यति लग्यात् अला-
…अलगिष्यत् । लग्यते लगयति । कृत्सु-लगनं लगितव्यं लगित्वा लग्नः संलग्नः क्षुब्धस्वान्तेति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निपातनान्नेट्। ष्ठगे संवरणे सक०। सत्वे ष्टुत्वनिवृत्तिः। स्थगति-तु अस्थगत् स्थगेत् तस्या स्थगिता-ष्यति स्थग्यात् अस्थगीत् एदित्वात् हम्यन्तेति वृद्धिनिषेधः, अस्थगिष्यत्। स्थग अस्थ-स्थागि-स्थगयति-ते अतिष्ठगत्-त। कृत्सु-स्थगनं स्थगितव्यं स्थगनीयं स्थगितः स्थगि स्थगितुम्।

घटादौ अनुवादरूपाः—ज्वल दीप्तौ सेट् अक०। ज्वल दीप्तावित्यत्रैव पठिष्यमाणस्य मित्वा यमनुवादः, इदमपिमित्वं सोपसर्गविषयम्, अनुपसृष्टे ज्वलह्वलेति मित्वविकल्पनात्। णौ- प्रज्वल अभिज्वलयति। स्मृ आध्याने (उत्कण्ठापूर्वकस्मरणे) अनिट् सक०। अत्रैव चिन्तायां पठिष्यमा मित्वार्थोयमनुवादः, णौ-स्मरयति। अनाध्याने तु मित्वाभावात् स्मारयति। श्रा पाके अनिट् सक श्रै इति कृतात्वस्य भौवादिकस्य, श्रा इत्यादादिकस्य च मित्वार्थोयमनुवादः, णौ-श्रपयति अर्ति पुक्, पाकादन्यत्र तु स्रापयति (स्वेदयति)। मारणतोषणनिशामनेषु ज्ञा, अनिट् सक०। निशा चाक्षुषज्ञानमिति माधवः, ज्ञापनमात्रमित्यन्ये। एष्वेवार्थेषु जानातिर्मित्, णौ-ज्ञापयति विज्ञप (बोधयति), संज्ञपयति (मारयति), अन्यत्र ज्ञापयति। ज्ञपमिच्चेति चुरादौ, तस्य ज्ञापनं णादिकं चार्थः, तदादाय बोधनेप्यर्थे ज्ञपयतीति ह्रस्वप्रयोग उपपद्यते। कम्पने चलिः,(ग०)सेट् चल कम्पने इत्यत्रैव पठिष्यमाणस्य मित्वार्थोयमनुवादः, णौ- चलयति (कम्पयति) शाखाम्, क दन्यत्र तु न मित्वं, शीलं चालयति (अन्यथा करोति), सूत्रं चालयति (क्षिपति) धातूनामनेकार्थ र्थान्तरम्, छदि रूर्जने (प्राणने बलने च) अनिट् सक०। छद अपवारणे इति चौरादिकस्य णिजभावे मित्वार्थोयमनुवादः, अनेकार्थत्वादूर्जने इति वृत्तिः। णौ छदयति (बलवन्तं प्राणवन्तं वा करो अन्यत्र तु छादयति (अपवारयन्तं प्रेरयति)। स्वार्थे णिचि तु छादयति (बलीभवति, प्राणी अपवारयति वा)। जिह्वोन्मथने लडिः सेट् सक०। लड विलासे इति पूर्वपठितस्य जिह्वोन्म मित्वार्थोयमनुवादः। उन्मथनं क्षोभणम्। जिह्वां लडयति (क्षोभयति)। अन्यत्र तु पुत्रं लाड (क्रीडयति)। डलयोरैक्यात् लालयेत्पञ्चवर्षाणीति। मदी हर्षग्लेपनयोः ग्लेपनं दैन्यम्, सेट् अ माद्यतीति दैवादिकस्य मित्वार्थोयमनुवादः, णौ-मदयति (हर्षयति ग्लेपयति वा)। अन्यत्र तु माद (चित्तविकारमुत्पादयति)। ध्वन शब्दे सेट् अक०। ज्वलादौ पठिष्यमाणस्य ध्वन्यातम मित्वार्थोयमनुवादः। णौ-घण्टां ध्वनयति (शब्दापयति)। अन्यत्र तु ध्वानयति (अस्पष्टा रयति)। दलि-वलि-स्खलि-रणि-ध्वनि-स्वनि-त्रपि-क्षपयश्चेति भोजः पपाठ। दल विदारणे संवरणे, स्खल सञ्चलने, त्रपूष् लज्जायामिति गताः, तेषां णौ-दलयति वलयति स्खलयति त्र क्षपीति क्षैत्ये इति वक्ष्यमाणस्य कृतात्वस्य पुकि निर्देशः क्षपयति। स्वन अवतंसने इति शब्दे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...स्यानुवादः स्वनयति (भूषयति), अन्यत्र स्वानयति (शब्दाययति), ध्वनयति (रणयति), ...नुक्नसुरञ्जोऽमन्ताश्च (गण), जनी प्रादुर्भावे, जॄष् वयोहानौ, क्नसु ह्वरणदीप्त्योः एते दि- ..., रञ्ज रागे इति भौवादिकः, अमन्ताः सर्वगणाश्च एते मितो भवन्ति। णौ-जनयति (उत्पा- ...), जरयति (जीर्णं कारयति), रञ्जयति पक्षिणः, रजयति मृगान् रञ्जेर्णौ मृगरमणे इति ...। अमन्ताः-गमयति रमयति दमयति। ज्वलह्वलह्मलनमामनुपसर्गाद्वा (गण) अनुपसृष्टाना- ...मित्वं वा स्यात्। प्राप्तविभाषेयम्। णौ-ज्वलयति ज्वालयति, नमयति नामयति। उपसृष्टे तु नित्यमेव, ...यति अभिज्वलयति अवनमयति प्रणमयति। ग्लास्नावनुवमां च (गण) अनुपसृष्टानामेषां मित्वं ...स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषेयम्। णौ- ग्ला-ग्लपयति, स्ना-स्नपयति, वा-वनयति, वा- ...ति। उपसृष्टे तु विग्लापयति, संस्नापयति इत्यादौ न मित्वम्, संवनयति उद्वमयति इत्यादौ नित्यं ...म्। न कम्यमिचमाम् (गण) अमन्तत्वात्प्राप्तं मित्वमेषां न स्यात्। णौ-कामयते आमयति ...मयति। शमो दर्शने (गण) शाम्यतिर्दर्शने मिन्न स्यात्। रूपं निशामयति (पश्यति) उपशमार्थ- ...नेकार्थत्वाद्दर्शनेवृत्तिः। अन्यत्र तु प्रणयिनो निशमय्य (श्रावयित्वा) वधूः कथाः। यमोऽपरिवेषणे ...) यच्छतिर्भोजनादन्यत्र मिन्न स्यात्। आयामयति (द्राघयति व्यापारयति वा), परिवेषणे तु ...यमयति (भोजयति)। स्खदिरवपरिभ्याश्च (गण) स्खदेर्घटादिपाठात्प्राप्तं मित्वमवपरि- ...न स्यात्। परिस्खादयति अवस्खादयति।

...ट चेष्टायामित्यस्य मित्वेन णौ ह्रस्वे कर्तव्ये द्वारमुद्घाटयति, कमलवनोद्घाटनं कुर्वते ये, प्रविघाटयिता समुत्पत- ...चक्रानिव, मञ्जूषामुद्घाट्येत्यादि तु घट सङ्घाते इति चौरादिकस्य धातूनामनेकार्थत्वात्स्वार्थे णिचि ज्ञेयम्, ...नोऽहेताविति ज्ञपादिपञ्चकभिन्नानां मित्वाभावेन ह्रस्वाभावः। ज्वलतेर्नमतेश्चानुपसर्ग एव मित्वविकल्पेन सोप- ...मन्तनमतेश्च नित्वं मित्वेन दीपं प्रज्वालयति काष्ठमुन्नामयतीत्यादिकं तु प्रज्वलनं प्रज्वालः उन्नमनमुन्नाम इति ...तीति णिच्युपपादनीयम्, तेन दीपं प्रज्वाल्य धुरमुन्नाम्येत्याद्यप्युपपद्यते, इदं विज्ञापयामीत्यादिकं तु निशामनं ...ति माधवमते अचाक्षुषज्ञाने मित्वाभावेनोपपद्यते, निशामनं ज्ञापनमात्रमिति मते तु ज्ञानियोगइति चौरादिकधा- ...र्प्रयोग इत्युपपाद्यम्, क्रमोमन्तत्वेन मित्वाद्ध्रस्वे कर्तव्ये सङ्क्रामयतीति प्रयोगस्तु नोदात्तोपदेशस्येति वृद्धिनिषे- ...म इत्यस्मात्तत्करोतीतिणावप्यनुपपत्त्या मितां ह्रस्व इत्यत्र वा चित्तविरागे इत्यतो वा कारमनुवर्त्य व्यवस्थितवि- ...षाद्य इति वृत्तिकृत्, एवं न्यायेन रजोविश्रामयन्राज्ञां, धुर्यान्विश्रामयेति स इत्यप्युपपाद्यम्, शमोदर्शनएव मित्व- ...न्तत्वेन मित्वाद्ध्रस्वे कार्ये निशामय तदुत्पत्तिं विस्तराद्गदतोममेति प्रयोगः शम आलोचने इति चौरादिकस्यार्थो- ...र्थनीयः। अमन्तस्य यमः परिवेषणादन्यत्र मित्वनिषेधेन पर्यवसितं नियमयन्निति प्रयोगस्तु नियमनं नियम ...नियमन्नान्नियमवच्छन्दात्तत्करोतीति णौ विन्मतुपोर्लुगिति लुकि उपपाद्यम्। स्वामी तु नकम्यमीति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवमुत्तरत्रिसूत्र्यामनुवर्त्य शमः अदर्शने इति चिच्छेद, यमस्त्वपरिवेषणे मित्वमाह, तन्मते सम्यगेव, इत्येवं रीत्यान्यत्रापि अन्यथा प्रयोगाः समर्थनीयाः। **इति घटादयः।**

प्रयोगाः-अत्युत्कृष्टमिदं तीर्थं भारद्वाज निशामय (पश्य)। द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोप्यन्तात्-आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः। नियमयसि कुमार्गप्रस्थितानात्तदण्डः। व्यथयति मुनीनामपि मनः। यज्ञकर्मणि त्वरयामहे। स्थगय तावत्कार्यम्। ज्ञपयामि भूतार्थम्। चरुं श्रपयित्वा जुहुयात्।

फणादय उदात्ताः (सेटः) उदात्तेतोनुदात्तेतः स्वरितश्च (नानापदिनः)—फण गतौ सक० प०। फणादीनां फणाञ्च सप्तानामिति लिट्येत्वाभ्यासलोपौ विकल्पितौ। फणति-तु अफणत् फणेत् पफाण फेणतुः-णुः-णिथ-व-म, पफणतुः णुः-णिथ-व-म, फणिता-ष्यति-फण्यात् अफा-फणीत् अफणिष्यत्। फाणयति। फणिरपि घटादौ कैश्चित्पठ्यते, तन्मते फणयति। क्षुब्धस्वान्तेति निपातनान्नेट् फाण्टः (औषधस्य रसः शृतः शीतः क्वाथ इति पञ्चसु कल्पनासु चूर्णमौषधमुदके रात्रावधिवास्य प्रातः पीयमानं शीतं, तदोष्णोदके सद्योनिधाय पूत्वा पीयमानो रसः फाण्टः)। अप्रचुरेपि प्रयोगे गणकारानुरोधेनायं धातुरिहोपन्यस्तः। **राजृ** दीप्तौ स्वरितेत् अक० उ०। राजति-ते-तु-ताम् अराजत्-त राजेत्-त। लिटि फणाञ्चसप्तानामित्यत्र अत इत्यनुवृत्तावपि विधानसामर्थ्यादाकारस्याप्येत्वाभ्यासलोपौ वा रराज रेजतुः-जुः-जिथ-व-म, रराजतुः-जुः-जिथ-व-म, रेजे-जाते-जिरे, रराजे-जाते-जिरे, राजिता-ष्यति-ते। राज्यात्-राजिषीष्ट-अराजीत्-अराजिष्ट, अराजिष्यत्-त उप-वि-संराजति-ते भावादौ राज्यते अराजि, राजयति-ते अरीरजत्-त, रिराजिषति-ते। कृत्सु-राजितव्यं राजितः राजन् राजमानः राजितुं, णियुच्-नीराजना, कर्मणिशान-नीराज्यमानः, क्त-नीराजितः, क्विप्-सम्राट् विराट् ष्ट्रन्-राष्ट्रं, कनिन्-राजा, ङीप्-राज्ञी। **टुभ्राजृ** दीप्तौ अनुदात्तेत् अक० आ०। भ्राजते-ताम् अभ्राजत भ्राजेत, भ्रेजे बभ्राजे भ्राजिता-ष्यते-षीष्ट अभ्राजिष्ट-ष्यत। उप-वि-संभ्राजते। भावादौ-भ्राज्यते अभ्राजि भ्राजयति-ते विभ्राजिषते। कृत्सु-भ्राजितः भ्राजमानः भ्राजितुं ष्ट्रन्-भ्राष्ट्रम्, इष्णुच्-भ्राजिष्णुः, ट्वित्वादथुच्-भ्राजथुः, क्विप्-विभ्राट्। **स्वन** शब्दे उदात्तेत अक० प०। स्वनति-तु अस्वनत् स्वनेत् सस्वान स्वेनतुः सस्वनतुः स्वनिता-ष्यति स्वन्यात् अस्वा-स्वनीत् अस्वनिष्यत्। प्रतिस्वनति, स्वन्यते घटादिपाठाण्णौ स्वनयति। कृत्सु-अप्-स्वनः निस्वनः, घञ्-निस्वानः, क्षुब्धस्वान्तेतिनिपातनात् स्वान्तं (मनः), भावेक्त-स्वनितं (वस्त्रपर्णादिशब्दः) स्वनितुम्। **इति फणादयः।**

ध्वन शब्दे उदात्तेत अक० प०। ध्वनति-तु अध्वनत् ध्वनेत्, ध्वनतेः फणादिवद्बहिर्भावान्नेत्वाभ्यासलोपौ दध्वान दध्वनतुः-नुः, ध्वनिता-ष्यति ध्वन्यात् अध्वा-ध्वनीत् अध्वनिष्यत्। प्रतिध्वनति निध्वनति ध्वन्यते अध्वनि, शब्दे घटादिपाठात् ध्वनयति, अन्यत्र ध्वानयति। कृत्सु-ध्वननं क्षुब्धस्वान्तेति निपातनात् ध्वान्तं (तमः), भावेक्त-ध्वनितं, कर्तरिध्वनितः प्रतिध्वनितः, इ-ध्वनिः प्रतिध्वनिः, घञ्-ध्वानः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—विराजति व्योमसरः सरोजम्। विभ्राजते यद्यतयो विशन्ति। भ्राजिष्णु द्युतिभासुरः। ध्वनेः प्रतिध्वनिर्महान्। मन्दानिलापूरकृतं दधानो निध्वानमश्रूयत पाञ्चजन्यः। रराज राजा यशसोज्ज्वलेन। घोरोधनुर्निस्वनः। भ्राजमानो यथा रविः।

ज्वलादय उदात्ताः (सेटः) अनुदात्ताः (अनिटः) उदात्तेतः (परस्मैपदिनः) अनुदात्तेतः (आत्मनेपदिनः) श्च- ज्वल दीप्तौ सेट् अक० प०। ज्वलादीनां ज्वलितिकसन्तेभ्योण इत्यनुपसृष्टत्वे पाक्षिको णो विशेषः, एतदर्थमेवास्य पुनः पाठः। ज्वलति-तु अज्वलत् ज्वलेत्, जज्वाल जज्वलतुः-लुः-लिथ-व-म, ज्वलिता-ष्यति ज्वल्यात् अज्वालीत् अतोल्रान्तस्येति वृद्धिः, अज्वलिष्यत्। उप-प्र-अभि-परि समुद् ज्वलति। भावादौ-ज्वल्यते णावनुपसृष्टस्य मित्वं वा ज्वा-ज्वलयति, उपसृष्टस्य तु प्रज्वालयति उज्ज्वालयति। कृत्सु-ज्वलनं ज्वलितव्यं, अच्-ज्वलः, ण-ज्वालः, स्त्री-ज्वाला, ज्वलन्-न्ती ज्वलित्वा प्रज्वल्य ज्वलितुम्। चल कम्पने सेट् अक० प०। चलति-तु अचलत् चलेत् चचाल चेलतुः-लुः-लिथ-व-म, चलिता-ष्यति चल्यात् अचालीत् अचलिष्यत्। उप-प्र-वि-सम्-परि-उद्-अभिचलति। भावादौ-चल्यते अचालि, णौ-कम्पने मित्वेन चलयति अन्यत्र चालयति अचीचलत्, कृत्सु-चलनं चलितव्यं चलनीयं, णौ-चालनीयं, अच्-चलः, ण-चालः, अच् द्वित्वं च चलाचलः, युच्- चलनः, चलितः चलन् चलित्वा चलितुम्। पत्लृ गतौ सेट् अक० प०। पतति-तु अपतत् पतेत् पपात पेततुः-तुः-तिथ-व-म, पतिता-ष्यति पत्यात्, लुङि लृदित्वाच्च्लेरङि पतः पुम् (७-४-१९) पतेः पुमागमः स्यात् अङि परे। इति तात्पूर्वं पुमि अपप्तत्-प्तताम्-प्तन्, अपतिष्यत्। उप-प्रपतति, निपत्-निपतने, उत्पत्-उत्पतने, आपत्-आपत्तौ, सम्पत्-सम्पत्तौ, निष्पत्-सिद्धौ, विपत् विपत्तौ, पर्यापत् सर्वतःप्राप्तौ, अभ्युपपत्-शरणागतौ, उपपत्-उपपत्तौ, अभ्यापत्-अभ्यापत्तौ, समुत्पत्-उद्गमने। भावादौ-पत्यते अपाति पातयति-ते अपीपतत्, सनि इड्विकल्पः इडभावेऽभ्यासलोपश्च पिपतिषति पित्सति। कृत्सु-पतनं पतितव्यं, ण-पातः पतिता पातकः पतन् पतित्वा उत्पत्य पतितुम्, उक-पातुकः, अत्रन् पतत्रं, इन्-पतत्री, आलच् वृद्धिश्च पातालम्, आकन्-पताका, इन् थ च-पन्थाः, णिचि वुन्-पातकं, क्त-पातितः, ल्यप्-निपात्य, इष्णुच्-उत्पतिष्णुः, सनुउ-पिपतिषुः। क्वथे निष्पाके सेट् अक० प०। क्वथति-तु अक्वथत् क्वथेत् चक्वाथ क्वथिता-ष्यति क्वथ्यात् अक्वथीत् एदित्वात् ह्म्यन्तेति वृद्ध्यभावः, अक्वथिष्यत्। क्वथ्यते घटादिपाठाण्णौ क्वथयति। क्वथनं क्वथितव्यं, ण-क्वाथः क्वथितः क्वथित्वा क्वथितुम्। टुवमु उद्गिरणे सेट् सक० प०। वमति-तु अवमत् वमेत्, ववाम ववमतु-मुः नशसददेत्येत्वाभ्यासलोपनिषेधः, भागवृत्तौ तु वेमतुरित्युक्तम् वेमुश्केचिद्रुधिरमितित्वार्षः प्रयोगः, वमिता-ष्यति वम्यात् अवमीत् ह्म्यन्तेति वृद्धिनिषेधः, अवमिष्यत्। उद्वमति, वम्यते अवामि, णौ ग्लास्नेति मित्वं वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वमयति वामयति, विवमिषति, वमनं वमितव्यं वमनीयम्, अच्-वमः घञ्- वामः नोदात्तोपदेशेति वृद्धिनिषेधस्य आचमिकमिवमीनामिति निषेधः, वान्तः वान्तवान् आदितश्चेति चकारस्यानुक्तसमुच्चयार्थत्वान्नेडिति वृत्तौ, ट्विवत्वादथुच् वमथुः (गजशुण्डाशीकरः) वमित्वा उद्वम्य वमितुम्। भ्रमु चलने (भ्रमणे) सेट्-सक० प० । सार्वधातुकेषु वाभ्राशेति श्यन्वा, भ्रम्यति-तु भ्रमति-तु अभ्रम्य-मत् भ्रम्येत्-मेत्, लिटि वाजॄभ्रमुत्रसामित्येत्वाभ्यासलोपो वा बभ्राम बभ्रमतुः-मुः, भ्रेमतुः-तुः, भ्रमिताष्यति भ्रम्यात् अभ्रमीत् ह्म्यन्तेति वृद्धभावः अभ्रमिष्यत् । प्र-परि सम्-उद्-विभ्राम्यति, भ्रम्यते अभ्रामि, णावमन्तत्वान्मित्वेन ह्रस्वः भ्रमयति-ते अबिभ्रमत्-त बिभ्रमिषति, भ्रमणं भ्रमितव्यं घञ्-विभ्रमः भ्रमः सम्भ्रमः नोदात्तेति वृद्धिनिषेधः, भ्रमन् भ्रम्यन् भ्रमित्वा भ्रान्त्वा उदित्वाद्वेट्, विभ्रम्य भ्रान्तः वेट्क्त्वान्नेट् घिनुण् - भ्रमी, भावेक्त-भ्रान्तं, भ्रमितुं- डू-भ्रूः, अर-भ्रमरः । दिवादौ भ्राम्यतीति। क्षर सञ्चलने (स्रवणे) सेट् अक०प०। क्षरति-तु अक्षरत् क्षरेत् चक्षार चक्षरतुः-रुः-रिथ-व-म, क्षरिताष्यति क्षर्यात् अक्षारीत् हलन्तलक्षणवृद्धेर्नेटीति निषेधे अतोल्रान्तस्येति वृद्धिः, अक्षरिष्यत्। क्षर्यते अक्षारि क्षारयति-ते अचिक्षरत्-त। क्षरणं क्षरितव्यं क्षरणीयं क्षरितः क्षरन् क्षरित्वा क्षरितुं, ण-क्षारः, अच्-क्षरः, णिक्त-क्षारितं घृतम्। षद्लृ विशरणगत्यवसादनेषु अनिट् अक० प० । षः सः, शपि पाघ्रेति सीदादेशः सीदति-तु असीदत् सीदेत्, ससाद सेदतुः-दुः सेदिथ ससत्थ भारद्वाजनियमाद्वेट् अनिट्त्वम् सेदिव-म क्रादिनियमादिट्। सत्ता सत्स्यति सद्यात्, लृदित्वादङ् असदत्-दताम्-दन् असत्स्यत्। उप-आ-प्रत्या उपसद्-सन्निधाने, निषद्-उपवेशने, प्रसद्-प्रसादे, विषद्-विषादे, अवसद्-ग्लाने, निषीदति विषीदति सदिरप्रतेरिति षत्वम् न्यषीदत् व्यषीदत् प्राक्सितादिति षत्वम्। भावादौ-विषद्यते व्यषादि, सादयति-ते आसादयति- ते (प्राप्नोति) न्यषीषदत् स्थादिष्वित्युभयत्र षत्वम्, सिषत्सति। कृत्सु-भावे करणे वा ल्युटि सदनं, णौ-आसादनं, घञ्-विषादः प्रसादः, अवसादः अच्-सदः, अधिकरणे घञि-निषादः (वन्यजातिः) सीदन्, सत्त्वा, प्रसद्य विषद्य, णौ-आसाद्य- क्यप् निषद्या (आपणः), असुन्-सदः (सभा), त्र-सत्रं (यागः), इन्-सादिः मनिन्-सद्म, क्त-प्रसन्नः विषण्णः आसन्नः, णिक्त-आसादितः। क्रुश आह्वाने रोदने च- अनिट् अक० प० । क्रोशति- तु अक्रोशत् क्रोशेत् चुक्रोश चुक्रुशतुः-शुः चुक्रोशिथ चुक्रुशिव-म अजन्ताकारवत्वाभावेन भारद्वाजनियमाप्रवृत्तेः क्रादिनियमात्थल्यपि नित्यमिट्, क्रोष्टा व्रश्चेतिषत्वे ष्टुत्वम्, क्रोक्ष्यति शस्य षत्वे षढोरिति कत्वे षत्वम्। क्रुश्यात् कित्वान्न गुणः। लुङि शलइगुपधादिति क्से शस्य षत्वे कत्वे कित्वादगुणे सस्य षत्वे अक्रुक्षत्-क्षताम्-क्षन्, अक्रोक्ष्यत्, उप-आ-वि-उद्क्रोशति। क्रुश्यते अक्रोशि क्रोशयति-ते अचुक्रुशत्-त चुक्रुक्षति। क्रोशनम् आक्रोशनं क्रोष्टव्यं क्रोशनीयं क्रोष्टा क्रोशकः क्रोशन् आक्रुष्टः क्रुष्ट्वा आक्रुश्य आक्रोष्टुम्, उपसर्गयोगे ताच्छील्ये वुन् आक्रोशकः घञ्-क्रोशः। रुह बीजजन्मनि प्रादुर्भावे च अनिट् अक० प०। रोहति-तु अरोहत् रोहेत्, रुरोह रुरुहतुः-हुः रुरोहिथ रुरुहिव-म क्रादिनियमात्थल्यपि नित्यमिट्, लुटि ह्रस्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ढत्वे तस्य धत्वे ष्टुत्वे ढलोपः रोढा-रौ-रः, रोढ्यति हस्य ढत्वे कत्वे सस्य षत्वम्, रुह्यात्, लुङि शलइगुपधादिति क्से हस्य ढत्वे कत्वे सस्य षत्वे अरुक्षत्-क्षताम्-क्षन्, अरोक्ष्यत्, उपप्र-विरुह उत्पत्तौ, आरुह सक० आरोहणे, अवरुह अवरोहणे। भावादौ-रुह्यते आरुह्यते अरोहि, णौ- रुहःपोन्य-तरस्यामिति पक्षे पत्वे आरोपयति-ते आरोहयति ते, आरुरुक्षति, कृत्सु-आरोहणम् आरोढव्यम् आरोह-णीयम् आरोढा, आरोहन् आरूढः, घञ्-आरोहः आरोपः, अवरोहः प्ररोहः (अङ्कुरः) रूढ्वा आरुह्य आरोढुम्, इन लत्वं वा रोहितः लोहितः (रक्तः)। रमु क्रीडायाम् अनिट् अक० आ०। रमते-ताम् अरमत रमेत, लिटयेत्वाभ्यासलोपौ रेमे रेमाते-मिरे-मिषे-षहे-महे, क्रादिनियमादिट्, रन्ता रंस्यते-षीष्ट अरंस्त अरंसाताम्-सत अरंस्थाः-साथाम् अरन्ध्वम् अरंसि-स्वहि-स्महि, अरंस्यत। उप-अभि-अनुरमते-व्याङ्परिभ्योरमः परस्मैपदम्, अकर्मकत्वे उपयोगेपि विरमति उपरमति (निवर्तते) आ-परिरमति, भावादौ-रम्यते उपरम्यते रमयति-ते मित्वाद्ध्रस्वः अरीरमत्-त रिरंसते विरिरंसति, कृत्सु-रमणं ल्यु-रमणः णे घञ् वा रामः विरामः अधिकरणे घञ्-आरामः (उपवनम्) अच्-स्तम्बेरमः रममाणः विरमन् क्त:रतिः, भावे-रतम् अनुनासिकलोपः, रमित्वा रन्त्वा उदित्वाद्वेट्, विरम्य विरत्य वा ल्यपीत्यनुनासिक-लोपपक्षे तुक्, सुरतः सूरतः (कृपावान्) क्ते पूर्वपददीर्घः, न तत्वं च रत्नं थन्-रथः। षह मर्षणे सेट् सक० आ०। षः सः सहते-ताम् असहत सहेत सेहे-हाते-हिरे एत्वाभ्यासलोपौ, लुटि तादौ तीष-सहेति इड्वा सहिता-रौ-रः, इडभावे ढत्वधत्वष्टुत्वढलोपेषु सहिवहोरोदवर्णस्य (६-३-११२) अनयो-रवर्णस्य ओत्स्यात् ढलोपे सति। इत्योत्वे सोढा-रौ-रः, सहिष्यते सहिषीष्ट असहिष्ट-षाताम्-षत असहि-ष्यत। उप-परि-षिषहते परिनिविभ्य इति षत्वम्, उत्सहते (उद्यतते) कर्मादौ-सह्यते असाहि उत्साह-यति-ते सिसहिषते। कृत्सु-सहनं सहितव्यं सोढव्यं तादौ वेट्, ण्यत्-सह्यं खच्-सर्वंसहः, ण-साहः अच्-सहः, इष्णुच्-सहिष्णुः, युच्-सहनः, सहित्वा सोढ्वा सहितुं सोढुम् तीषसहेति वेट्, सोढः वेट्क-त्वान्नेट्, उत्सहमानः।

वि० जल घातने सेट् अक० प०। घातनं तैक्ष्ण्यमिति स्वामी। जलति, अच्-जलम्, डलयोरैक्यात् जडः, ण-जालः। [हल] विलेखने सेट् अक० प०। हलति, अच्-हलः, ण-हालः-ला, इन्-हलिः। णल बन्धने सेट् अक प०। नलति अच्-[नलः], क-नलिका, डलयोरैक्यात् नडः, इन्-नली, क-नलिका, ण-नालः। पल गतौ सेट् अक० प०। पलति, अच्-पलम् ([मा]नविशेषः), अल-पललं (मांसम्), आल-पलालम्। बल प्राणने धान्यावरोधे च सेट् अक० प०। बलति अच्-[बलम्], ण-बालः, इन्-बलिः। पुल महत्वे सेट् अक० प०। पोलति, क–विपुलः, क्वुन्-पुलकम् (रोमाञ्चः), इन-पुलिनम्, [ण]-पुलाकः (तुच्छधान्यम्)। कुल संस्त्याने बन्धुषु च, सन्तान इत्यपि क्वचित् सेट् अक० प०। कोलति, अच्-कुलम्, [क-कुल]कम् (श्लोकपञ्चकम्)। शल गतौ सेट् अक० प०। शलति, ण-शालः शाला। पथे गतौ सेट् सक० प०।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पथतिः, अच्-पथः, ण-पाथः। **मथे** विलोडने सेट् सक० प०। मथति अच्-मथः, ण-माथः। **शद्लृ** शातने अनिट् अक० प०। पाघ्रेतिशीयादेशः शीयते, घञ्-शादः (घासः), त्रुन्-शत्रुः। **कुच** सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु सेट् अक० प०। कोचति, ण-उत्कोचः। **बुध** अवगमने सेट् सक० प०। बोधति बुबोध अबोधीत् बोधिता बोद्धेति वोपदेवः। **कस** वातौ सेट् सक० प०। कसति, घञ्- णौ वा-कासः विकासः विकसितः, णौ- निष्कासितः, वरच्-विकस्वरः।

एतदन्ता ज्वलादयः।

प्रयोगाः—प्रज्वालितः स्नेहमयः प्रदीपः। कार्याद्विरराम। समुत्पतति मेदिन्याः। कृत्वा पुम्वत्पातमुच्चैर्भृगुभ्यः। भर्जिताः क्वथिता धानाः। ते निपत्य ददुस्तस्मै। रात्रिरेव व्यरंसीत्। न प्ररोहन्ति तण्डुलाः। रेमे वध्वा सहोदके। चक्रं भ्रमति मस्तके। निष्पपात महाभटः। न विषीदन्ति धीमन्तः। आरुरोह महाशैलम्। न प्रसेहे रिपुं वीरः।

यजादयो व्यामिश्राः (प्रायोऽनिटः केचित्सेटः हलन्ता अजन्ताश्च विभिन्नपदिनः) यज देवपूजासङ्गतिकरणदानेषु त्रयः स्वरितेतः अनिट् सक० उ। यजादीनां कित्सु सम्प्रसारणं विशेषः। यजति-ते-तु-ताम् अयजत्-त यजेत्-त। लिटि णलि द्वित्वेऽभ्यासकार्ये य यज् इति जाते **लिट्यभ्यासस्योभयेषाम्** (६-१-१७) वच्यादीनां (वचिस्वपियजादीनां) ग्रहयादीनाञ्चाभ्यासस्य सम्प्रसारणं स्याल्लिटि। इति पूर्व यस्य इकारे सम्प्रसारणाच्चेति पूर्वरूपे उपधावृद्धौ इयाज। अतुसादौ किति द्वित्वात्पूर्वमेव **वचिस्वपियजादीनां किति** (६-१-१५) वचिस्वप्योर्यजादीनां च सम्प्रसारणं स्यात्किति। इति सम्प्रसारणे पूर्वरूपे पुनःप्रसङ्गविज्ञानात् इज् इत्यस्य द्वित्वेऽभ्यासजलोपे सवर्णदीर्घे ईजतुः ईजुः। थलि द्वित्वोत्तरमभ्याससम्प्रसारणे पूर्वरूपे भारद्वाजनियमादिट् पक्षे इयजिथ, इडभावे व्रश्चेति जस्य षत्वे ष्टुत्वे इयष्ठ, ईजथुः-थ इया-यज ईजिव-म। तङि असंयोगादिति कित्वे वचिस्वपीति सम्प्रसारणोत्तरं द्वित्वादौ ईजे-जाते-जिरे क्रादिनियमादिट्। तासि इडभावे षत्वष्टुत्वयोः यष्टा-रौ-रः, लृटि षत्वकत्वषत्वेषु यक्ष्यति-ते। आशिषि यासुटि कित्वाद्वचिस्वपीतिसंप्रसारणे इज्यात्, तङि सीयुटि षत्वकत्वषत्वेषु यक्षीष्ट-क्षीयास्ताम्-क्षीरन्। लुङि सिचि हलन्तलक्षणवृद्धौ षत्वकत्वादिषु अयाक्षीत्, तासि झलोझलीति सलोपे अयाष्टाम् अयाक्षुः-क्षीः अयाष्टम्-ष्ट अयाक्षम्-क्ष्व-क्ष्म, तङि ते झलोझलीति सलोपः अयष्ट-क्षाताम्-क्षत अयष्ठाः-क्षाथाम्-ड्ढ्वम् अयक्षि-क्ष्वहि-क्ष्महि, अयक्ष्यत्-त। कर्मादौ-इज्यते अयाजि, याजयति-ते अयीयजत्-त यियक्षति-ते। कृत्सु-यजनं यष्टव्यं यजनीयं, ण्यत्-याज्यम् यजयाचेति कुत्वनिषेधः, घञ्-कुत्वं यागः अधिकरणे घञि प्रयागः, यष्टा याजकः यजन् यजमानः इष्ट्वा समिज्य यष्टुम्, णिनि-सोमयाजी, ङ्वनिप्-यज्वा, क्तिन्-इष्टिः, क्त-इष्टः, यङन्तादूकः यायजूकः, सन-उ-यियक्षुः। **टुवप्** बीजसन्ताने (क्षेत्रे विकिरणे गर्भाधाने च) क्वचिच्छेदनेपि केशान्वपति, अनिट् सक० उ०। वपति-ते-तु-ताम् अवपत्-त-वपेत्-त।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१२

लिटि पित्सु द्वित्वोत्तरमभ्याससम्प्रसारणादौ, कित्सु सम्प्रसारणोत्तरं द्वित्वादौ उवाप ऊपतुः-पुः उवपिथ उवप्थ भारद्वाजनियमाद्वेट् ऊपथुः ऊप उवा-वप ऊपिव-म क्रादिनियमादिट्। ऊपे-पाते-पिरे, वप्ता वप्स्यति-ते उप्यात् कित्वात्सम्प्रसारणम्, वप्सीष्ट, अवाप्सीत् अवाप्ताम् झलोझलीति सलोपः, अवाप्सुः अवाप्सीः अवाप्तम्-प्त अवाप्सम्-प्स्व-प्स्म, अवप्त-प्सताम्-प्सत, अवप्स्यत्-त। प्रणिवपति नेर्गदेति णत्वम्, उप्यते अवापि- वापयति-ते अवीवपत्-त, विवप्सति-ते, कृत्सु-वपनं वप्तव्यं वपनीयं वप्ता उप्त्वा प्रोप्य उप्तिः उप्तः कित्सु सम्प्रसारणम्, वप्तुम्, ण्यत्-वाप्यम्, इनि-वापी, ड्वित्वात्त्रिम् उप्त्रिमम्। वह प्रापणे अनिट् सक० उ०। वहति-ते-तु-ताम्, अवहत्-त वहेत्-त, लिटि पित्सु द्वित्वोत्तरमभ्या-सस्य कित्सु द्वित्वात्पूर्वं सम्प्रसारणम् क्रादिनियमादिट् थलि वेट् उवाह ऊहतुः-हुः, उवहिथ उवोढ इडभावे हस्य ढत्वे थस्य धत्वे ष्टुत्वे ढलोपे पूर्वदीर्घं बाधित्वा सहिवहोरित्योत्वम्, ऊहतुः-ह उवाह-वह ऊहिव-म, तासि ढत्वधत्वष्टुत्वढलोपौत्वेषु वोढा-रौ-रः, स्ये ढत्वकत्वषत्वेषु वक्ष्यति-ते, उह्यात्, तङि सीयुटि ढत्वादौ वक्षीष्ट-क्षीयास्ताम्-क्षीरन्, लुङि ढत्वादेरसिद्धत्वात्पूर्वमेव हलन्तलक्षणवृद्धौ ततो ढत्वकत्वषत्वादौ ईटि अवाक्षीत्, तामि वृद्धौ सलोपे ढत्वधत्वष्टुत्वढलो-पौत्वेषु अवोढाम्, जुसि वृद्धौ ढत्वकत्वषत्वेषु अवाक्षुः अवाक्षीः अवोढम्-ढ अवाक्षम्-क्ष्व-क्ष्म, तङि अवोढ अवक्षाताम्-क्षत अवोढाः अवक्षाथाम्-ढ्ध्वम् अवक्षि क्ष्वहि-क्ष्महि, अवक्ष्यत्-त। प्र-प्रवह-प्रवाहे अक० प्राद्वह इति परस्मैपदमेव प्रवहति, अधिवह-धारणे, उद्-विवह-विवाहे, निर्वह निर्वाहे। कर्मादौ-उह्यते वाहयति-ते अवीवहत्-त, संवाहयति-ते (मर्दयति), विवक्षति-ते। कृत्सु-वहनं, णौ-संवाहनम्, ण्यत्-वाह्यः, घञ्-वाहः प्रवाहः विवाहः निर्वाहः परीवाहः (जलनिर्गमः) वोढा वाहकः संवाहकः वहन् वहमानः क्त-प्रौढः, क्तिन्-प्रौढिः, ऊढ्वा उदूह्य वोढुम्, ऊ धत्वं च-वधूः, अनस्-वह क्विप्-अनड्वान्, णौ-करणे ल्युटि वाहनम्। वेञ् तन्तुसन्ताने द्वौ ञितौ अनिट् सक० उ०। शपि अयादेशः वयति-ते-तु-ताम् अवयत्-त वयेत्-त। लिटि वेञो वयिः (२-४-४१) वेञो वयिर्वा स्याल्लिटि। इकार उच्चारणार्थः। इति वयादेशे पित्सु पूर्वं द्वित्वे यजादित्वादभ्यासवकारसम्प्रसारणे उकारे पूर्वरूपे उपधावृद्धौ उवाय, कित्सु ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च (६-१-१६) एषां किति ङिति च सम्प्रसारणं स्यात्। इति यस्य सम्प्रसारणे प्राप्ते, लिटि वयो यः (६-१-३८) वयो यस्य सम्प्रसारणं न स्याल्लिटि। इति निषेधे वचिस्वपीति वकारस्य सम्प्रसारणे पूर्वरूपे उय् इत्यस्य द्वित्वेऽभ्यासकार्ये सवर्णदीर्घे ऊयतुः-युः, वश्चास्यान्यतरस्यां किति (६-१-३९) वयो यस्य वो वा स्यात्किति लिटि। इति पक्षे वत्वे ऊवतुः-वुः, थल्यभ्यासस्य सम्प्रसारणे उवयिथ ऊयथुः-वथुः ऊय-व, उवा-वय ऊयि-विव-म वयस्तासावभावान्निषेधाप्रवृत्या थल्यपि नित्यमिट्। वयेः स्थानिवद्भावेन ञित्वात्तङपि, वश्चास्यामिति वा वत्वम्, तदभावे लिटिवय इति यस्य सम्प्रसारण-निषेधे वकारस्य ग्रहिज्येति वचिस्वपीति वा सम्प्रसारणम्, ऊये-याते-यिरे-यिषे-यिवहे-महे, ऊवे-वाते-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विरे, वयादेशाभावे पित्सु लिट्यभ्यासस्येति कित्सु वचिस्वपीति सम्प्रसारणे प्राप्ते, वेञः (६-१-४०) वेञः सम्प्रसारणं न स्याल्लिटि । इति निषेधे आदेच इत्यात्वे वाशब्दस्य द्वित्वेऽभ्यासह्रस्वे आतऔणल इत्यौत्वे ववौ, ववतुः-वुः आतो लोपः, थलि भारद्वाजनियमादिट्पक्षे आतो लोपः वविथ ववाथ ववथुः वव ववौ वविव-म क्रादिनियमादिट् । तङि आत्वे आकारलोपे ववे-वाते-विरे । स्यतासोरात्वे वाता-तौ-रः, वास्यति-ते । आशिषि यासुटः कित्वाद्वचिस्वपीति सम्प्रसारणे पूर्वरूपे अकृदिति दीर्घे ऊयात्-यास्ताम्-यासुः, तङि सीयुटथात्वे वासीष्ट-सीयास्ताम्-सीरन्, लुङि तिपि आत्वे कृते यमरमेति इट्सकोः ईटि च सलोपे अवासीत्-सिष्टाम्-सिषुः, तङि अवास्त अवासाताम्-सत अवास्थाः-साथाम् अवाध्वम् अवासि-स्वहि-स्महि, अवास्यत्-स्यत । कर्मादौ-ऊयते अवायि वाययति-ते अवीवयत्-त विवासति-ते । कृत्सु-वयनं वातव्यं वयनीयं वाता वायकः, अण्-वायकः, क्तिन्-ऊतिः, क्त-ऊतः प्रोतः उत्वा प्रवाय वातुम्, नवं वासः प्रोयतेऽस्यामिति प्रवाणी (तन्तुवायशलाका), निर्गताः प्रवाण्यो यस्मादिति बहुव्रीहौ निष्प्रवाणिः पटः । ह्वेञ् स्पर्द्धायां शब्दे च अनिट् स्पर्द्धायामक० उ० । शप्ययादेशः ह्वयति-ते-तु-ताम् अह्वयत्-त ह्वयेत्-त, लिटि णलि आत्वे अभ्यस्तस्य (६-१-३३) अभ्यस्तीभविष्यतो ह्वेञः सम्प्रसारणं स्यात् । इति पूर्वमेव सम्प्रसारणे पूर्वरूपे हु इत्यस्य द्वित्वे वृद्धावावादेशे चुत्वे जुहाव, कित्सु आते आकारलोपं बाधित्वा सम्प्रसारणे पूर्वरूपे द्वित्वे चुत्वे उवङ् जुहुवतुः-वुः, थलि भारद्वाजनियमादिट् जुहविथ जुहोथ जुहुवथुः-व जुहाव-हव जुहुविव-म क्रादिनियमादिट्, जुहुवे-वाते-विरे, लुडादावात्वे ह्वाता ह्वास्यति-ते, आशिषि कित्वात्सम्प्रसारणे अकृदिति दीर्घे हूयात्, तङि ह्वासीष्ट, लुङि च्लेः लिपिसिचिह्वश्चेत्यङि आतो लोपे अह्वत् अह्वताम्-ह्वन्-ह्वः- ह्वतम्-त अह्वम्-ह्वाव -म, तङि आत्मनेपदेष्वन्यतरस्यामित्यङ्पक्षे आतो लोपे अह्वत अह्वेताम् अह्वन्त अह्वथाः-थाम्-ध्वम् अह्वे य-ह्वे वहि-महि, अङभावे अह्वास्त-साताम्-सत अह्वास्थाः-साथाम्-ध्वम् अह्वासि-स्वहि-स्महि, अह्वास्यत्-त । उप-आह्व समाह्व निसमुपविभ्यो ह्वः स्पर्द्धायामाङः इति नित्यमात्मनेपदम्, सम्-उप-निह्वयते कृष्णश्चाणूरमाह्वयते आह्वाने तु आह्वयति-ते । कर्मादौ-आहूयते आह्वायि आह्वाययति-ते आजुहूषते । कृत्सु-आह्वानम् आह्वातव्यम् आह्वाता आह्वयन्-यमानः, कर्मणि- आहूयमानः आहूतः ह्वात्वा आहूय आह्वातुम् आहूतिः, संहूतिः (बहुभिः कृतमाह्वानम्), अङ्-आह्वा (नाम) अप् ह्वःसम्प्रसारणं च न्यभ्युपविषु आङि च युद्धे इति सम्प्रसारणे निहवः अभिहवः अपहवः आहावः (युद्धम्) आहाव इति निपाने निपात्यते (उपकूपजलाशयः) । वद व्यक्तायां वाचि चत्वार उदात्तेतः सेट् सक० प० । वदति-तु अवदत् वदेत्, लिटि पित्सु द्वित्वेऽभ्याससम्प्रसारणं कित्सु सम्प्रसारणोत्तरं द्वित्वादि पूर्ववत् । उवाद ऊदतुः-दुः उवदिथ ऊदथुः ऊद उवाद-वद ऊदिव-म, वदिता-ष्यति उद्यात् कित्वात्सम्प्रसारणम्, लुङि वदव्रजेति नित्यं वृद्धौ अवादीत्-दिष्टाम्- दिषुः अवादीः-दिष्टम्-ष्ट, अवादिषम्-ष्व-ष्म, अवदिष्यत् । उप-प्रवद-प्रवदते संवद्-संवादे प्रतिवद्-प्रतिवादे, विसंवद्-विसंवादे, विवद्- विवादे, भासनोपसंभाषेति तङि विवदते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वदते, संप्रवद्-संप्रवादे व्यक्तवाचामिति तङि सम्प्रवदन्ते राजानः, अव्यक्तवचने तु सम्प्रवदन्ति कुटाः, अनुवद्- अनुवादे अकर्मकत्वे अनोरकर्मकादिति तङि अनुवदते कठः कलापस्य, सकर्मके तु पाठमनुवदति, अपवद्-अपवादे अपाद्वद इति तङि अपवदते न्यायम्। कर्मादौ-उद्यते अनूद्यते अवादि, वादयते नपादस्याङिति तङेव, अभिवादयते (वन्दते), विवदिषति। कृत्सु-वदनं, घञ्-विवादः संवादः अनुवादः परिवादः (निन्दा), यत्-अवद्यं (पापम्), क्यप्-ब्रह्मोद्यम् (ब्रह्मवादः), णि यत्-वाद्यं वदनीयम्, अच्- वदावदः, खच्- प्रियंवदः, घिनुण्-प्रवादी, णि वुञ्-परिवादकः, ऊक- वावदूकः (अतिवक्ता), णिनि-वादी प्रतिवादी, क्त-उदितः अनूदितः, उदित्वा अनूद्य, स-वत्सः लच्-वत्सलः, ष्टर-वत्सरः वत्सतरः, णि इच्-वादित्रं (वाद्यम्), आन्य-वदान्यः। वस निवासे अनिट् अक० प०। वसति-तु अवसत् वसेत्, लिटि पित्सु कित्सु च पूर्ववत्सम्प्रसारणम्, उवास ऊषतुः-षुः शासिवसिघसीनाञ्चेति षत्वम्, उवसिथ उवस्थ भारद्वाजनियमाद्वेट्, ऊषिव-म क्रादिनियमादिट्। वस्ता-रौ-रः, वत्स्यति सः स्यार्धधातुके इति सस्य तः, उष्यात् कित्वात्सम्प्रसारणं शासिवसीति षत्वम्, अवात्सीत् हलन्त-लक्षणवृद्धिः सस्य तः, अवात्ताम् वृद्धौ झलोझलीति सलोपे सस्य तः- अवात्सुः अवात्सीः अवात्तम्-त्त अवात्सम्-त्स्व-त्स्म, अवत्स्यत्। उप-प्रवस्-प्रवासे, उपवस् -उपवासे, अधिवस्-रात्रिवासे, निवस्-निवासे, आवस्-आवासे, निर्वस्-निर्वासे। भावादौ-उष्यते अध्युष्यते, वासयति-ते निर्वासयति-ते अवीवसत् विव-त्सति। कृत्सु-वसनं, णौ- अधिवासनम् वसनीयं वस्तव्यं कर्तरि वास्तव्यः, घञ्-वासः प्रवासः उपवासः, उषित्वा वसन्, क्त-उषितः-तवान् वसतिक्षुधोरितीट् उषित्वा प्रोष्य, कित्सु सम्प्रसारणम्, वस्तुम्, घिनुण्-वासी, अथ-आवसथः (ग्रामः), अति-वसतिः, अन्तच्-वसन्तः, ति-वस्तिः, तुण्- वास्तु, ष्ट्रन्-वस्त्रम्, वसु, करणे ल्युट्-वसनं, सर-वत्सरः संवत्सरः, क्वसु-अध्यूषिवान्। टु ओश्वि गतिवृद्ध्योः सेट् अक० प०। गुणायादेशौ श्वयति-तु अश्वयत् श्वयेत्। लिटि, विभाषा श्वेः (६-१-३०) श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च'। पित्सु द्वित्वात्प्रागप्राप्तस्य कित्सु द्वित्वात्प्राग्वचिस्वपीति प्राप्तस्य च सम्प्रसारण-स्यायं विकल्पः। णल्यपि द्वित्वात्प्रागेव विभाषाश्वेति वस्य सम्प्रसारणे उकारे पूर्वरूपे शु इत्यस्य द्वित्वे वृद्ध्यावादेशौ शुशाव शुशुवतुः-वुः उवङ्, शुशविथ शुशुवथुः-व शुशा- शव शुशुविव-म। विभाषाश्वेरित्यत्र तिपक्षे श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः (वा) इत्यभ्याससम्प्रसारणस्यापि निषेधे श्वि इत्यस्य द्वित्वादौ शिश्वाय शिश्वियतुः-युः शिश्वयिथ शिश्वियथुः-य शिश्वा-श्वय शिश्वियिव-म, श्वयिता-ष्यति, आशिषि यासुटः कित्वाद्वचिस्वपीति सम्प्रसारणे पूर्वरूपे अकृदिति दीर्घे शूयात् यास्ताम्-यासुः, लुङि च्लौ जॄस्तम्भ्वति पक्षे अङि अश्विअत् इत्यत्र श्वयतेरः (७-४-१८) श्वयतेरिकारस्य अकारः स्यादङि। इत्यत्वे पररूपे-अश्वत् अश्वताम्-श्वन् अश्वः-श्वतम्-त अश्वम्-श्वाव-म, अङोऽभावे विभा-षा धेट्श्व्योरिति चङि द्वित्वादावियङि अशिश्वियत्-यताम्-यन्-यः-यतम्-त-यम्-याव-म, चङोऽप्यभावे सिचि ईट्-त इत्यत्र ह्म्यन्तेति वृद्धिनिषेधेन गुणायादेशयोः अश्वयीत्-यिष्टाम्-यिषुः, अश्वयीः-यिष्टम्-ष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अश्वयिषम्-यिष्व-ष्म, अश्वयिष्यत्। भावादौ-शूयते श्वाययति-ते। शिश्वयिषति। क्त-शूनः उच्छूनः सम्प्र-सारणम् श्वीदित इति निष्ठायां नेट्, ट्वित्वादथुच्-श्वयथुः, उदकेन श्वयति (वर्द्धते) इति क्विप् उदश्वित् (तक्रविशेषः), निपातनात् श्वा स्त्री-शुनी, श्वयित्वा उच्छूय श्वयितुम्। इतियजादयः। श्वादिस्त्वाकृतिगणः तेन चुलुम्पतीत्यादीनां संग्रहः।

प्रयोगाः—आह्वास्त मेरावमराघर्तीं या। आहूतो न निवर्तेत। अश्वमेधमियाज सः। वहति विकल-कायो मोहम्। न वोढा वधूः। भारं वोढुं न शक्नोमि। वृथोच्छूनैः किमेभिर्भुजैः। माभूत्परीवाद-वावतारः। श्वयथुना पीडितोसौ। सखायः प्रोषिता गृहात्। वादिप्रतिवादिनौ विवदेते। संवदन्त्यक्ष-राणि। तन्तुवायो वस्त्रं वयति। आहूयमानो जनैः। त्वया सह निवत्स्यामि।

प्रश्नाः—भ्वादिषु किं विकरणम्, तत्र भिन्नविकरणं केषु धातुषु। उदात्तानुदात्तस्वरितवतामुदात्तानुदात्तस्वरितेतां च धातूनां के विशेषाः। घटादि-फणादि-द्युतादि-यजादि-धातुषु के विशेषाः। लुङि च्लेः कीदृशा विकारविशेषाः। लिटि आम् एत्वाभ्यासलोपौ च केषु धातुषु। लुङि वृद्धेर्विधिनिषेधविकल्पाः कीदृशस्थलेषु। वाच्यपुरुषवचनलकाराणां को विशेषः। षत्वणत्वव्यवस्था कीदृशी। इडयवस्था कीदृशी। अधस्तनवाक्यगतान्याख्यातरूपाणि व्याकुरुत, कृदन्तशब्दांश्च परिचिनुत—अनुभवति हि मूद्ध्र्ना पादपस्तीव्रमुष्णम्। महति जीवितसंशये वर्तते। स्थापय तावद्रथं यावदहमवतरामि। पार्थः कौँस्ततो जेतुं प्रतस्थे स्थलवर्त्मना। सन्तः परीक्ष्यान्यतरद्भजन्ते। मृदु व्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते। जुगोपात्मान-मत्रस्तो भेजे धर्ममनातुरः। शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने। अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते। साहसे श्रीः प्रतिवसति। दिष्ट्या पुनर्भवान्वर्धते। नखलु बहिरुपाधीन्प्रीतयः संश्रयन्ते। व्यजेष्ट षड्वर्गमरंस्त नीतौ। इतिभ्वादयः।

२ अथ अदादयः।

उदात्तेतः (परस्मैपदिनः) प्रायोऽनुदात्ताः (अस् मृजवर्जमनिटः)—अद भक्षणे सार्वधातुके शपि **अदिप्रभृतिभ्यः शपः (२-४-७२)** एभ्यः शपो लुक्स्यात्। इति लुकि चर्त्वेन तः, अत्ति अत्तः अदन्ति अत्सि अत्थः-थ अद्मि अद्वः-द्मः। अत्तु अत्तात्-ताम् अदन्तु, सिपो ह्यादेशे **हुझल्भ्यो हेर्धिः (६-४-१०१)** होर्झलन्तेभ्यश्च हेर्धिः स्यात्। इति ध्यादेशे अद्धि अत्तात्-त्तम्-त्त अदानि-दाव-म। लङि शपो लुकि आडागमे वृद्धौ तिप इकारलोपे **अदः सर्वेषाम् (७-३-१००)** अदः परस्यापृक्तसार्वधातुकस्य अडागमः स्यात्। इति तकारात्पूर्वमडागमे आदत् आत्ताम् आदन् आदः आत्तम्-त्त आदम् आद्व-द्म। लिङि शपो लुकि अतः परत्वाभावेन यासुटो नेयः अद्यात् अद्याताम् अद्युः अद्याः-द्यातम्-त अद्याम् अद्याव-म। लिटि **लिट्यन्यतरस्याम् (२-४-४०)** अदो घस्लृ वा स्याल्लिटि। इति पक्षे घसादेशे तस्य द्वित्वादौ जघास, अपित्सु असंयोगादिति कित्वेन गमहनेत्युपधालोपे तस्य चर्विधिं प्रति स्थानिवद्भावनिषेधाद्घस्य चर्त्वेन कत्वे शासिवसीति सस्य षत्वे जक्षतुः-क्षुः, घसेस्तासावभावात्थलि नित्यमिट्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जघसिथ जक्षथुः-क्ष जघा-घस जक्षिव-म। घसादेशाभावे अदो द्वित्वे हलादिशेषे आदेरत आत्वे सवर्णदीर्घे आद-दतुः-दुः, थलि भारद्वाजनियमाद्विकल्पे प्राप्ते इडत्यर्तीति नित्यमिट् आदिथ आदथुः-द आद-दिव-म क्रादिनियमादिट्। अत्ता-रौ-रः, अत्स्यति, अद्यात्-द्यास्ताम्-द्यासुः। लुङि लुङ्सनोर्घस्लृ (२-४-३७) अदो घस्लृ स्याल्लुङि सनि च। इति नित्यं घसादेशे लृदित्वात्पुषादीति च्लेरङि अघसत्-ताम्-सन्, आत्स्यत्। कर्मादौ-अद्यते अघासि, आदयति-ते आदिदत्-त सनि घसादेशे जिघत्सति। क्त्वातुमुन्-अदनम् अत्तव्यम् अदनीयम् अत्ता अदन्-ती, अदोजग्धिर्ल्यप्तिकितीति जग्ध्यादेशे जग्धः-धवान् जग्ध्वा प्रजग्ध्य जग्धिः, घञ्-घासः घञपोश्चेति घसादेशः, सनि घसादेशे अ-जिघत्सा, उ-जिघत्सुः, कर्मण्यण्-अन्नादः, क्रव्यादः, विट्-क्रव्यात्, कमरच्-अद्मरः, असुन्नुम् धश्च-अन्धः (अन्नम्), त्रि-अत्रिः, किन्-अद्रिः, कनिप्-अध्वा। हन हिंसागत्योः सक०। शपो लुकि हन्ति, झलादौ क्ङिति अनुदात्तोपदेश-वनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति (६-४-३७)। अनुनासिक इति लुप्तषष्ठीकं पदं वनतीतरेषां विशेषणम्। अनुनासिकान्तानामनुदात्तोपदेशानां (यमरमनमगमहनमनां), तनो-त्यादीनां (तनुक्षणुक्षिणुऋणुतृणुघृणुवनुमनूनां) वनतेश्चान्तलोपः स्याज्झलादौ क्ङिति परे। इति न-लोपः हतः, झावन्तादेशे गमहनेत्युपधालोपे होहन्तेरिति हस्य कुत्वेन घत्वे-घ्नन्ति, हंसि हथः-थ हन्मि हन्वः-न्मः। हन्तु हतात्-ताम् घ्नन्तु उपधालोपे कुत्वम्, हौ हुझल्भ्य इति धित्वे प्राप्ते हन्तेर्जः (६-४-३६) हन्तेर्जः स्यात् हौ परे। इति जादेशे तस्याभीयत्वेनासिद्धत्वाददन्तत्वाभावेन हेर्न लुक् जहि हतात्-ताम्-त हनानि-व-म, अहन् अहताम् अघ्नन् अहः-हतम्-त-अहनम्-न्व-न्म। हन्यात्-न्याताम्-न्युः। लिटि द्वित्वादौ णिति किति च परे होहन्तेरिति कुत्वम् किति उपधालोपश्च जघान जघ्नतुः-घ्नुः जघनिथ जघन्थ जघ्नथुः-घ्न जघा-घन जघ्निव-म क्रादिनियमादिट् थलि वेट्। हन्ता हनिष्यति ऋद्धनोरितीट्। हन्यात्-आशिषि आर्धधातुके (२-४-३५) इत्यधिकृत्य, हनो वध लिङि (२-४-४२) लुङि च (२-४-४३) हनो वधादेशः स्याल्लिङि लुङि च। वधादेशोऽदन्तः आर्धधातुक इति विषयसप्तम्या आर्धधातुके विवक्षिते वधादेशेनार्धधातुकोपदेशोऽकारान्तत्वादतोलोप इत्यलोपः वध्यात्-ध्यास्ताम्-ध्यासुः। लुङि वधादेशे सिच्यलोपे एकाच्त्वेऽप्युपदेशोऽनेकाच्त्वादेकाचउपदेश इति निषेधाप्रवृत्या सिच इट् अल्लोपस्य स्थानि-वत्त्वादतो हलादेरेति न वृद्धिः अपृक्तस्येटि सलोपः अवधीत्-धिष्टाम्-धिषुः। अहनिष्यत्, उप-निहन्ति प्रणिहन्ति नेर्गदेति णत्वम् वमोर्वा (८-४-२३) उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः। प्रहण्मि प्रहन्मि प्रहण्वः-ण्मः-न्वः-न्मः, हन्ते (८-४-२२) उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य-णत्वं स्यात्। प्रहण्यात्, अभिहन्-अभिघाते, अवहन्-अवघाते, आहन्-आघाते आङोयमहन इति तङि आहते, कर्मादौ-हन्यते अवधि. घातयति-ते हनस्त इति होहन्तेरिति च तत्वघत्वे, अजीघतत्, कर्मणि घात्यते, जिघांसति। कृत्सु-हननं हन्तव्यं हननीयम् ण्यत्-वध्यः, भावे क्यप्-हत्या, हन्ता वधकः, णौ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घातयिता घातकः, निघ्नन्-ती, कर्मणि-हन्यमानः, घञ्-घातः आघातः सङ्घातः (समूहः) हतः- नवान् हत्वा निहत्य हतिः हन्तुम्, क्वसु-जघ्निवान्, ड-तमोपहः, टक्-ब्रह्मघ्नः, क्विप्-भ्रूणहा, ति-हेतिः, उकञ्-घातुकः, घञर्थे क-निघ्नः, अप्-वधः। हन् हिंसार्थे सार्वत्रिकः गत्यर्थे तु पद्धतिरित्यादौ क्वचित्। असँ भुवि सेट् अक०। शपो लुकि अस्ति, तसादौ क्ङिति श्नसोरल्लोपः (६-४-१११) श्नस्यास्तेश्चा-कारस्य लोपः स्यात्सार्वधातुके क्ङिति। इत्यकारलोपे स्तः सन्ति असि तासस्त्योरिति सलोपः, स्थः स्थ असिम स्वः स्मः। अस्तु स्तात् स्ताम् सन्तु, हौ हुझल्भ्य इति धित्वं बाधित्वा घ्वसोरेद्धावभ्यासलोपश्च (६-४-११९) घोरस्तेश्च एत्वं स्याद्धौ परेऽभ्यासलोपश्च। इति सस्यैत्वे आभीयत्वेनैत्वस्यासिद्धत्वाज्झ-लन्तात्परत्वेन हेर्धौ श्नसोरित्यल्लोपे एधि स्तात् स्तम् स्त, मिवादावाडागमे पित्वादल्लोपो न असानि-साव-म। लङि तिप्सिपोरिकारलोपे आटि वृद्धौ अस्तिसिच इति ईटि आसीत्, तामादौ ङिति परत्वादाटः प्रागल्लोपेपि तस्याभीयत्वेनासिद्धत्वादाट् आस्ताम् आसन् आसीः आस्तम्-स्त आसम् आस्व-स्म। लिङि यासुटो ङित्वादल्लोपः स्यात् स्याताम्-स्युः स्याः स्यातम्-त स्याम् स्याव-म। आर्धधातुकेषु अस्तेर्भूः (२-४-५२) अस्तेर्भू भावः स्यादार्धधातुके। इति भ्वादेशे भूधातुवद्रूपाणि-बभूव भविता-ष्यति भूयात् अभूत् अभविष्यत्, लुङि सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादस्तिसिचोपृक्त इतीण्न। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः (८-३-८७) उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्यात्। इति पत्वे निष्यात् प्रादुःष्यात् निषन्ति प्रादुःषन्ति। भावणिच्सन्नादौ कृत्सु च शतृवर्जमार्धधातुकत्वेन भूभावा-द्भवतेरिव रूपाणि, शतरि अकारलोपे सन् सती। अस्ति नास्तीति विभक्तिप्रतिरूपकौ निपातावपि, अस्ति-क्षीरा नास्तिक्षीरा आस्तिकः नास्तिकः। एधामासेत्यादौ लिट्यामन्तादस्तेरनुप्रयोगविधानसामर्थ्याद्भू-भावाभावेन आस आसतुः-सुः आसिथ आसथुः आस आस आसिव-म इत्यनुप्रयुज्यमानरूपाणि भवन्ति। वच परिभाषणे (कथने) सक०। अयमन्तिपरो न प्रयुज्यते, बहुवचनपर इत्येके, झिपर इत्यन्ये। शपो लुकि चोः कुः वक्ति वक्तः वक्षि वक्थः-क्थ वच्मि वच्वः-च्मः। वक्तु वक्तात्-ताम् वग्धि हेर्धिः, वक्तात्-क्तम्-क्त वचानि-व-म, अवक् अवक्ताम्-अवक्-अवक्तम्-क्त अवचम्-च्व-च्म, वच्यात्-च्याताम्-च्युः। लिटि अकिति द्वित्वोत्तरं लिट्यभ्यासस्येत्यभ्याससम्प्रसारणे पूर्वरूपे वृद्धिः, किति वचिस्वपीति सम्प्रसारणे पूर्वरूपे द्वित्वे हलादिशेषे सवर्णपरत्वेनाभ्यासस्यासवर्णे इत्युवङोऽभावे सवर्णदीर्घः उवाच ऊचतुः-चुः थलि भारद्वाजनियमाद्वेट् इडभावे कुत्वम् उवचिथ उवक्थ ऊचथुः-च उवा-वच ऊचिव-म, वक्ता-रौ-रः, स्ये कुत्वे षत्वे वक्ष्यति, आशिषि कित्वेन सम्प्रसारणे उच्यात्-च्यास्ताम्-च्यासुः। लुङि अस्यतिवक्ति-ख्यातिभ्य इति च्लेरङि वच उम् (७-४-२०) वच उमागमः स्यादङि परे। इत्युमागमे गुणे अवोचत् अवोचताम्-चन्, अवक्ष्यत्। उप-प्रवच-प्रवचने, प्रतिवच्-प्रत्युक्तौ निर्वच्-निर्वचने, अनुवच्-अनूक्तौ। कर्मादौ-उच्यते अवोचि, वाचयति-ते अवीवचत्-त कर्मणि वाच्यते, विवक्षति। कृत्सु-वचनं प्रतिवचनं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिर्वचनं वक्तव्यं वचनीयं, ण्यत्-वाच्यं वक्ता वाचकः वचन्, कर्मणि-उच्यमानः, लृटि-वक्ष्यन् कर्मणि-वक्ष्यमाणः उक्तः-क्तवान् उक्त्वा प्रोच्य वक्तुम् उक्तिः, क्विप्-वाक्, त्र-वक्त्रम्, थक्-उक्थम्। विद ज्ञाने सक०। लटि शपो लुकि विदो लटो वा (३-४-८३) वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः। इति ते तिबादीनां णलाद्यादेशेषु द्वित्वविनाभूतानि लिडाकाररूपाणि वेद विदतुः-दुः, वेत्थ विदथुः-द, वेद विद्व-द्म। णलाद्यभावपक्षे वेत्ति वित्तः विदन्ति वेत्सि वित्थः-त्थ वेद्मि विद्वः-द्मः। लोटि विदाङ्कुर्वन्त्वित्यन्यतरस्याम् (३-१-४१) वेत्तेर्लोटि आम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते। विदाङ्कुर्वन्त्विति प्रकारवाचिना इति शब्देन निर्देशनात्पुरुषवचनयोरविवक्षया लोडन्तस्य कृञः सर्वाणि रूपाण्यनुप्रयुज्यन्ते। कृञो लोटि तिपि एरुरित्युत्वे तनादिकृञ्भ्य उरिति शपोपवादेन उप्रत्यये ऋकारस्य उप्रत्ययस्यापि गुणे विदाङ्करोतु। तातङादौ उप्रत्यये ऋकारस्य अर्गुणे तदकारस्य अत उत्सार्वधातुके (६-४-११०) उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति। इत्युत्वे इति तपरकरणसामर्थ्याद्गुणाभावे ङित्वादुप्रत्ययस्यापि गुणाभावे विदाङ्कुरुतात्-ताम् विदाङ्कुर्वन्तु तौ परे यण्, नभकुर्छुरामिति निषेधेन हलिचेति दीर्घो न, हेः उतश्चेति लोपे तस्याभीयत्वेनासिद्धत्वा-त उत्वम् विदाङ्कुरु-तात्-तम्-त मिबादौ आटः पित्वेन उकारस्य गुणेऽवादेशः विदाङ्करवाणि-वाव-म। आमोऽभावे वेत्तु वित्तात्-ताम् विदन्तु विद्धि वित्तात्-त्तम्-त्त वेदानि-दाव-म। अवेत् अवित्ताम् अविदुः सिजभ्यस्तेति झेर्जुस्, सिप इकारलोपे हल्ङ्यादिलोपे च, दश्च (८-२-७५) धातोर्दान्तस्य पदस्य सिपि परे रुर्वा स्यात्। इति दस्य रुत्वविकल्पे अवेः अवेत् अवित्तम्-त्त अवेदम् अविद्व-द्म। विद्यात्-विद्याताम्-युः ङित्वान्न गुणः। लिटि उषविदेति पक्षे आमि अत्रास्विधौ विदेत्यकारान्तनिर्देशादतोलोपेपि स्थानिवत्त्वेन लघूपधगुणाभावे कृञादेरनुप्रयोगः विदाञ्चकार-चक्रतुः-क्रुः-विदाम्बभूव विदामास। आमोऽभावे विवेद विविदतुः-दुः विवेदिथ विविदिव-म। वेदिता-ष्यति, विद्यात्-द्यास्ताम्-द्यासुः, लुङि नेटीति लक्षणवृद्धिनिषेधे अवेदीत्-दिष्टाम्-दिषुः, अवेदिष्यत्। उप-संविद्-प्रतिज्ञाने अकर्मकतया समोग-वृच्छिभ्याम् विदिप्रच्छिस्वरतीनामुपसंख्यानमिति तङ् झे वा रुडागमः संवित्ते संविदाते-दते संविद्रते। विद्यते अवेदि वेदयति-ते अवीविदत्-त आ-निवेदयति-ते (ज्ञापयति) विवेदिषति। कृत्सु-वेदनं निवेदनं वेदितव्यं वेदनीयं, ण्यत्-वेद्यं वेदिता निवेदकः विदन्-ती, शतृ वसु-विद्वान् विदुषी, विदितः-विदित्वा, णौ-आवेद्य निवेदितः, क्विप्-वेदवित्, कुरच्-विदुरः, घञ्-वेदः, वित्तिः संवित्तिः, क्यप्-विद्या, युच्-वेदना, वेत्तुम्, सन् अ-विविदिषा, सन् उ-विविदिषुः, निवेद्यमेव नैवेद्यम्, विद्यां वेत्ति वैद्यः। मृजू शुद्धौ ऊदित्वाद्वेट् सक०। मृजेर्वृद्धिः (७-२-११४) मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे। क्ङित्यजादौ वेष्यते (वा०) तेन हलादौ क्ङिति न वृद्धिः, अजादौ वा, हलादौ अजादौ च पिति नित्यं वृद्धिः। लटि तिपि शपो लुकि वृद्धौ व्रश्चेति षत्वे ष्टुत्वे मार्ष्टि मृष्टः मार्जन्ति मृजन्ति मार्क्षि मृष्ठः-ष्ठ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्ज्मि मृज्वः-ज्मः। मार्ष्टु मृष्टात्-ष्टाम् मृजन्तु मार्जन्तु, हौ ङित्वान्न वृद्धिः, हेर्धिः, जस्य षत्वे जश्त्वेन डः, धस्य ष्टुत्वेन ढः मृड्ढि, मृष्टात्-ष्टम्-ष्ट, आटः पित्वाद्वृद्धौ मार्जानि-व-म। लङि तिप्सिपोरिकारलोपे वृद्धावटि हल्ङ्यादिलोपे जस्य षत्वजश्त्वचर्त्वेषु अमार्ट् अमृष्टाम् अमृजन् अमार्जन्, अमार्ट् अमृष्टम्-ष्ट अमार्जम् अमृज्व-ज्म। मृज्यात्-ज्याताम्-ज्यासुः यासुटो ङित्वान्न वृद्धिः। ममार्ज ममार्जतुः-र्जुः ममृजतुः-र्जुः, ममार्जिथ ममार्ष्ठ ममार्जथुः ममृजथुः ममार्ज ममृज, ममार्ज ममार्जिव-म ममृजिव-म। मार्जिता-रौ-रः मार्ष्टा- रौ -रः मार्जिष्यति मार्क्ष्यति इडभावे जस्य षत्व कत्वे सस्य षत्वम्। आशिषि ङित्वान्न वृद्धिः मृज्यात्-ज्यास्ताम्-ज्यासुः, लुङि वृद्धाविट्पक्षे अमार्जीत्-जिष्टाम्-जिषुः, इडभावे जस्य षत्व कत्वे सिचः षत्वम् अमार्क्षीत् अमार्ष्टाम् झलोझलीति सलोपः, अमार्क्षुः अमार्क्षीः अमार्ष्टम्-ष्ट अमार्क्षम्-क्ष्व-क्ष्म। अमार्जिष्यत् अमार्क्ष्यत्। उप-संमृज्-संमार्जने, परिमृज्-परिमार्जने प्रमृज्-प्रमार्जने। कर्मादौ-मृज्यते अमार्जि, मार्जयति-ते अमीमृजत्-त मिमार्जिषति मिमृक्षति। कृत्सु-मार्जनं, करणे- संमार्जनी, मार्जितव्यं मार्ष्टव्यं मार्जनीयं मार्जकः मार्जित्वा मृष्ट्वा प्रमृज्य, णौ- संमार्ज्य, मृष्टः-ष्टवान् वेट्कत्वान्नेट्, णौ- मार्जितः मार्जितुं मार्ष्टुं, क्यप्-मृज्यः, क-तुन्दपरिमृजः (अलसः) क्तिन्-मृष्टिः, अङ्-मृजा, आर-मार्जारः, घञ् कुत्वं-मार्गः अपामार्गः उपसर्गदीर्घः। **इण् गतौ** सक०। शपो लुकि पित्सु गुणो ङिति न एति इतः भावन्तादेशे गुणाभावे इयङि प्राप्ते **इणो यण्** (६-४-८५) इणो यण्स्यादजादौ प्रत्यये परे। इतीकारस्य यणि यन्ति, एषि इथः-थ एमि इवः-मः। एतु इतात्-ताम् यन्तु, इहि अपित्वाद्गुणो न। एहि इति त्वाङ्पूर्वकस्य ज्ञेयम्, इताम्-तम् त अयानि अयाव-म आटि गुणेऽयादेशः। लङि गुणे आटि वृद्धिः ऐत् ऐताम् आयन् झेरन्तादेशे इकारलोपे संयोगान्ततकारलोपे इणो यणि तस्यासिद्धत्वादाट्, ऐः इकारलोपे आटि वृद्धिः, ऐतम् ऐत, आयम् इणोयण् आट्, ऐव-म। लिङि ङित्वान्न गुणः सार्वधातुकत्वान्न दीर्घः इयात् इयाताम्-युः। लिटि द्वित्वे इ इ अ इत्यत्र उत्तरेकारस्य वृद्धावायादेशे अभ्यासस्यासवर्णे इति पूर्वस्य यङि इयाय, अतुसादौ द्वित्वे कित्वेन गुणाभावे द्वितीयेकारस्य यणि, **दीर्घ इणः किति** (७-४-६९) इणोभ्यासस्य दीर्घः स्यात्किति लिटि। इति पूर्वेकारस्य दीर्घे ईयतुः-युः, थलि भारद्वाजनियमादिट्पक्षे इ-इ-इ-थेति जाते द्वितीयेकारस्य पित्वेन गुणेऽयादेशे ऽभ्यासेकारस्य इयङि इययिथ इडभावे उत्तरस्य गुणे पूर्वस्येयङि इयेथ ईयथुः ईय इयाय-य ईयिव-म क्रादिनियमादिट्। स्यतासोर्गुणे एता-रौ-रः एष्यति। आशिषि अकृदिति दीर्घे ईयात्-यास्ताम्-यासुः। लुङि **इणो गा लुङि** (२-३-४७) इणो गादेशः स्याल्लुङि। इति गादेशे गातिस्थेति सिचो लुकि अगात् अगाताम् अगुः, आत इति झेर्जुस्यातोलोप इति चेति पररूपम्, अगाः अगातम्-त अगाम्-गाव-म, ऐष्यत्। उप-प्र-परा-इ मरणे-प्रैति परैति, उप-अभि-इ समीपगतौ उपैति अभ्येति, उद्-इ-उद्गमने, अनु-इ अनुगतौ सम्बन्धे च, अति-इ-अतिक्रमे, प्रति-इ-प्रतिगतौ प्रतीतौ च, परि-विपरि-इ-विपर्यये, निर्-इ-निर्गमे, वि-इ-व्यये, अव-इ-अवगमे, अप-इ-अपसरणे। कर्मादौ-ईयते प्रतीयते प्रत्याययति प्रतीयिषति, बोधनभिन्नार्थे णौ सनि च गमादेशे गमयति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जिगमिषति। कृत्सु-अयनम्, अच्-प्रत्ययः व्यत्ययः उदयः विपर्ययः, घञ्-उपायः अपायः आयः व्ययः न्यायः पर्यायः, शतृ-अयन् उदयन्, क्त-उदितः अतीतः, इत्वा-प्रेत्य उपेत्य, णौ- प्रत्याय्य, एतुम्-प्रत्येतुम्, उस्-आयुः, असुन्-अपराधे गादेशः आगः, वन्-एवम्, कन्-एकः, अदि तुट् च-एतत्, भन्-इभः, क्वरप्-इत्वरः। या प्रापणे (गतौ) सक०। याति-तः-न्ति, यातु-तात्-ताम् यन्तु याहि-तात्-तम्-त यानि-व-म, अयात् अयाताम्, झौ- लङः शाकटायनस्यैव (३-४-१११) आदन्तात्परस्य लङो झेर्जुस्वा स्यात्। इति जुसपक्षे उस्यपदान्तादिति पररूपम् अयुः, जुसोऽभावेऽन्त्यादेशे इकारसंयोगान्ततकारलोपे अयान् अयाः-तम्-त अयाम् अयाव-म। यायात्-याताम्-युः। लिटि णलि द्वित्वेभ्यासह्रस्वे आतऔणल इत्यौत्वे वृद्धिः ययौ, ययतुः ययुः आतोलोपइटिचेत्याकारलोपः, थलि भारद्वाजनियमादिट्पक्षे आकारलोपः ययिथ ययाथ ययथुः यय, ययौ ययिव-म, याता यास्यति यायात्-यास्ताम्-यासुः। लुङि सिचि यमरमे-नमातां सक्चेति सगिटौ, इट ईटि इति सिज्लोपः, ईडभावस्थले न सलोपः अयासीत् अयासिष्टाम्-सिषुः, अयास्यत्। उप-प्रया-प्रयाणे, अभिया-अभियाने, अनुया-अनुयाने, निर्या-निर्गमने, आया-आगमने, उपया-समीपगमने-अपया-अपसरणे, प्रणियाति नेर्गदेति णत्वम्। कर्मादौ-यायते अयायि, यापयति-ते यियासति। कृत्सु, यानम् अभियानम् करणे यानं (वाहनम्) यातव्यः याता यातः यात्वा निर्याय यातुम्, शतृ-यान्-न्ती-ती, सन् शतृ-यियासन्, सन् अ-यियासा, सनुउ-यियासुः, लृट् शतृ-यास्यन्, वरच्-यायावरः (अनिकेतो-मुनिः), त्र- यात्रा, तुन्-यातुः, मन्-यामः, उ द्वित्वं च-ययुः (अश्वमेधाश्वः)। भा दीप्तौ अक०। पूर्ववत् भाति-तु अभात् भायात् बभौ भाता-स्यति भायात् अभासीत्-अभास्यत्। विभा-आभा-प्रकाशे, प्रतिभा-प्रतिभाने। भावादौ-भायते भाययति विभासति। कृत्सु-भानं भातः प्रतिभातः भान्-न्ती-ती भात्वा विभाय भातुम्, अङ्-आभा प्रभा प्रतिभा विभा, नु-भानुः, भावे क्त-प्रभातम्, क-भम् (नक्षत्रम्)। ष्णा शौचे अक०। षस्य सः स्नाति-तु अस्नात् स्नायात् सस्नौ स्नाता-स्यति स्नायात् अस्नासीत्-अस्नास्यत्। स्नायते अस्नायि स्नापयति-ते सिस्नासति। स्नानं स्नातव्यं, करणेऽनीयः स्नानीयं जलम्, स्नाता स्नातः स्नान्-न्ती-ती स्नास्यन् स्नात्वा संस्नाय स्नातुम्, णिनि-स्नायी, उण्-स्नायुः, क्त-क-स्नातकः (समाप्ताध्ययनः) निष्णातः (कुशलः) नदीष्णः (कुशलः)। पा रक्षणे सक०। पाघ्रा-एर्लिङि-अन्यस्येत्यादौ पिबतेरेव ग्रहादस्य यातिवद्रूपाणि। पाति-तु अपात् पायात् पपौ पाता-स्यति-यात् अपासीत्-स्यत्। सं-परिपाति। पायते अपायि, णौ-लुगागमे पालयति-ते अपीपलत्, पिपासति। पानं पातव्यं पाता इत्वे-पिता, पात्वा, णौ-परिपाल्य पातुम्, डति-पतिः। मा माने अक०। माति-तु अमात् मायात् ममौ माता-स्यति-यात् अमासीत्-स्यत्। उप-सक-प्रमा-प्रमाणे, अनुमा-अनुमाने, उपमा-उपमाने, निर्मा-निर्माणे, उन्मा-उन्माने। मीयते अनुमीयते मापयति-ते निर्मापयति-ते, मित्सति सनिमीमेत्यभ्या-सलोपः। मानम् अनुमानम्, करणे प्रमाणम् प्रमाता निर्मितः उपमेयम् मात्वा निर्माय नल्यपीतीत्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निषेधः, मातुं मान्-न्ती-ती, ण-माया, अङ्-प्रमा उपमा, प्रमितिः अनुमितिः। सर्वेषु माग्रहणेषु मा-मेङ्-माङां ग्रहः गामादाग्रहणेष्वविशेष इत्युक्तेः। ख्या प्रकथने सक०। सस्थानत्वं नमः ख्यात्रे इति वार्तिके भाष्ये च निर्देशेनायं सार्वधातुकमात्र विषयः, केचिदविशेषं वदन्ति, संपूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः। ख्याति-तु अख्यात् ख्यायात्। उप-आख्या-समाख्या-कथने, व्याख्या-व्याख्याने, प्रत्याख्या-प्रत्याख्याने, उपाख्या-उपाख्याने। संख्या इति तु चक्षिङः ख्याञादेशस्य। ख्यायते आख्यायते अख्यायि ख्यापयति-ते चिख्यासति। आख्यानम्। करणे-उपाख्यानम् आख्यातव्यम् ख्यातः ख्यातिः ख्यात्वा आख्याय आख्यातुम्, कर्मणि शान- आख्यायमानः, समानः ख्यायते इत्यर्थे इनि-सखा।

वि० यु मिश्रणे अमिश्रणे च सेट् सक० प०। हलादौ पिति सार्वधातुके उतो वृद्धिर्लुकिहलीति उकारस्य वृद्धि यौति युतः युवन्ति, संयौति (संयुनक्ति), वियौति (वियुनक्ति) घ-यवः, ल्यु-यवनः, घञ्-संयावः (भक्ष्यविशेषः), क्त-संयुतः वियुतः अयुतं नियुतं प्रयुतम्, प दीर्घः-यूपः, कन् दीर्घः-यूका अस्-यवसः (तृणम्), कनिन्-युवा। **रु** शब्दे सेट् अक० प०। तुरुस्तुशम्यम इति हलादेः पितः सार्वधातुकस्य पक्षे इट् रवीति रौति रुतः रुवन्ति, विरौति, णौ-रावयति अप्-रवः घञ्-रावः विरावः, इ-रविः, ल्यु- रवणः स्वार्थेऽणि रावणः। **णु** स्तुतौ सेट् सक० प०। नौति नुतः नुवन्ति, क्त्वा-नुत्वा। **टुक्षु** शब्दे सेट् सक० प०। क्षौति क्षुतः क्षुवन्ति, अथुच्-क्षवथुः, मनिन्-क्षुमा (अतसी), क्रन्-क्षुरः। **ष्णु** प्रस्रवणे सेट् सक० प०। स्नौति स्नुतः स्नुवन्ति, क्त-प्रस्नुता गौः, क्स-स्नुषा। **कु** शब्दे अनिट् अक० प०। कौति कुतः कुवन्ति, इ-कविः। **इक्** स्मरणे अनिट् सक० प०। अयमधिपूर्व एव प्रयुज्यते इण्वद्रूपाणि अध्येति अधीतः अधीयन्ति। पितुः पितरं वा अध्येति (स्मरति) ससीतयो राघवयोरधीयन्। **वी** गतिप्रजनकान्त्यसनखादनेषु अनिट् सक० प०। वेति वीतः वियन्ति, क्त-वीतः, त्र-वेत्रम्। **वा** गतिगन्धनयोः अनिट् अक० प०। वाति वातः वान्ति वातु अवात् वायात् ववौ वाता-स्यति वायात् अवासीत् अवास्यत्। क्त-वातः, अवाते नत्वं निर्वाणो दीपः, वाते तु निर्वातः वायुः, उण्-वायुः। **श्रा** पाके अनिट् सक० प०। श्राति, णौ-श्रापयति (स्वेदयति), क्त-पाके-निपातनात् श्रृतं क्षीरं हविर्वा, अन्यत्र तु श्राणा यवागूः। **द्रा** कुत्सायां गतौ (पलायने स्वापे च) निपूर्वःस्वापे अनिट् अक० प०। निद्राति निद्रातः निद्रान्ति, निद्रातु न्यद्रात् निद्रायात् निदद्रौ निद्राता-स्यति-यात् न्यद्रासीत्-स्यत्। आलु-निद्रालुः, तत् द्रा-तन्द्रालुः, अङ्-निद्रा तन्द्रा। **रा** दाने अनिट् सक० प०। राति, क्तिच्-राः (धनम्) कन्-राका (पूर्णिमा) त्रिप्-रात्रिः। **ला** आदाने अनिट् सक० प०। लाति, णौ-विलाल्यति विलापयति, क-व्यालः कृपां लातीति कृपालुः, बहूनर्थान् लातीति बहुलम्। **दाप्** लवने अनिट् सक० प०। दाति, करणे ष्ट्रन्-दात्रम्।

रुदादयो जक्षादयश्च व्यामिश्राः (सेटोनिटश्च) उदात्तेतः (परस्मैपदिनः)—रुदिर् अश्रुविमोचने इरित् सेट् अक०। रुदादीनां सार्वधातुकेषु शपो लुकि रुदादिभ्यः सार्वधातुक इति वलादेः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

डिट्, पित्सु गुणो ङित्सु न। रोदिति रुदितः रुदन्ति रोदिषि रुदिथः-थ रोदिमि रुदिवः-मः। रोदितु रुदितात्-ताम् रुदन्तु, हौ परत्वादिटि धित्वं न हेरपित्वान्न गुणः रुदिहि रुदितात्-तम्-त, रोदानि-व-म आटः पित्वात्गुणः। लङि- रुदश्च पञ्चभ्यः (७-३-९८) रुदादिभ्यो हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्। अड्गार्ग्यगालवयोः (७-३-९९) रुदादिभ्यो हलादेः पितः सार्वधातुकस्यापृक्तस्य अट् स्याड्गार्ग्यगालवमते। इति तिप्सिपोरिट् अट् वा, अन्यत्र वलादविट् पित्सु गुणः अरोदीत् अरोदत् अरुदिताम् अरुदन्, अरोदीः अरोदः अरुदितम्-त, अरोदम् अरुदिव-म। लिङि प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट् रुद्यात्-द्याताम्-द्युः। रुरोद रुरुदतुः-दुः रुरोदिथ रुरुदथुः-द रुरोद रुरुदिव-म। रोदिता-ष्यति रुद्यात्-द्यास्ताम्-द्यासुः। लुङि इरितोवेति पक्षे अङ् अरुदत्-दताम्- दन्, अङोभावे सिचि इट् अरोदीत् अरोदिष्टाम्-दिषुः अरोदिष्यत्। भावादौ-रुद्यते अरोदि, रोदयति-ते अरूरुदत्-त रुरुदिषति रुदविदेति क्त्वासनोः कित्वान्न गुणः। कृत्सु-रोदनं रोदितव्यं रोदिता रुदन्-ती रुदितः-तवान् रुदित्वा प्ररुद्य रोदितुम्, असुन्-रोदसी (द्विवचनमेव), रक्-रुद्रः-द्राणी। ञिष्वप् शये अनिट् अक०। ञि-इट्, सत्वम्। रुदिवदिडादयः स्वपिति-तः-पन्ति, स्वपितु-तात्-ताम्-पन्तु स्वपिहि-तात्-तम्-त स्वपानि-पाव-म। अस्वपत् अस्वपिताम्-पन् अस्वपीः-पः अस्वपितम्-त अस्वपम्-पिव-म। स्वप्यात्-प्याताम्-प्युः। लिटि पित्सु द्वित्वोत्तरं लिट्यभ्यासस्येति अभ्यासस्य सम्प्रसारणे कित्सु वचिस्वपीति सम्प्रसारणोत्तरं द्वित्वादौ इणः परस्य द्वित्वादेशसस्य षत्वम् सुष्वाप सुषुपतुः-पुः सुष्वपिथ सुष्वप्थ सुषुपथुः-प सुष्वा-ष्वप सुषुपिव- म क्रादिनियमादिट थलि वेट्। स्वप्ता स्वप्स्यति, आशिषि कित्वाद्वचिस्वपीति सम्प्रसारणे सुप्यात्-यास्ताम्-प्यासुः। लुङि हलन्तलक्षणवृद्धौ अस्वाप्सीत् अस्वाप्ताम् झलोझलीति सलोपः, अस्वाप्सुः अस्वाप्सीः-प्तम्-प्त अस्वाप्सम्-स्व-स्म, अस्वप्स्यत्। उप- सुविनिर्दुर्भ्यः सुपिसूतिसमाः (८-३-८८) एभ्यः सुप्यादेः सस्य षः स्यात्। पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति किति लिटि परत्वात्सम्प्रसारणे षत्वे च कृते द्वित्वं, पिति तु पूर्वं द्वित्वेनाभ्यासस्य सम्प्रसारणे षत्वस्यासिद्धत्वात्ततः पूर्वं हलादिशेषे सुपिस्वरूपाभावान्न षः सुस्वप् सुसुस्वाप सुषुषुपतुः-पुः सुस्वप्ता। भावादौ-सुप्यते अस्वापि स्वापयति-ते असूषुपत्-त सुषुप्सति। कृत्सु-स्वपनं स्वप्तव्यं स्वपनीयं, घञ्-स्वापः स्वप्ता स्वपन्-ती सुप्त्वा प्रसुप्य स्वप्तुं सुप्तिः सुप्तः, नन्-स्वप्नः, नजिङ्- स्वप्नक् (शयालुः)। श्वस प्राणने (जीवने श्वासे) सेट् अक०। श्वसिति-तः-न्ति, श्वसितु-तात्-ताम्-सन्तु श्वसिहि-तात्-तम्-त श्वसानि-व-म, अश्वसीत् अश्वसत् अश्वसिताम् अश्वसन् अश्वसीः-सः अश्वसितम्-त अश्वसम्-सिव-म, श्वस्यात्, शश्वास शश्वसतुः-सुः शश्वसिथ-व-म, श्वसिता-ष्यति, श्वस्यात्, लुङि अतोहलादेरिति वृद्धेर्ह्म्यन्तक्षणेति निषेधः अश्वसीत्-सिष्टाम्-सिषुः, अश्वसिष्यत्। उप-निश्वस्-बहिर्मुखश्वासे, उच्छ्वस्-अन्तर्मुख-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्वासे, प्रश्वस्-अधिकश्वासे, विश्वस्-विश्वासे, आश्वस्-समाश्वस्-समाश्वासने। भावादौ-श्वस्यते निश्वस्यते निरश्वासि, आश्वासयति-ते आशिश्वत्-त निश्वसिषति। कृत्सु-श्वसनं निश्वसितव्यं विश्वसनीयम्, घञ्-श्वासः विश्वासः श्वसिता निश्वसन्-ती, निष्ठायामादितश्चेति चकारादत्रेटं नेच्छन्त्याचार्याः विश्वस्तः आश्वस्तः, णौ-समाश्वासितः श्वसित्वा निश्वस्य निश्वसितुम्। अन प्राणने सेट् अक०। प्रायेणायं प्रपूर्वः रुदिवदिडादि। अनितेरिति णत्वे प्राणिति-तः-न्ति, प्राणितु प्राणिहि, प्राणीत् प्राणत्-णिताम्-णन् प्राणीः-णः, प्राण्यात्, प्राण प्राणतुः-णुः प्राणिथ-व-म, प्राणिता-ष्यति प्राण्यात्, प्राणीत्-णिष्टाम्-णिषुः, प्राणिष्यत्। अनुप्राणिति दुष्प्राणिति। प्राण्यते अप्राणि प्राणयति-ते प्राणिणिषति प्राणनं प्राणितव्यं प्राणन्-ती, करणे घञ्-प्राणः प्राण्य प्राणितुम्। जक्ष भक्ष हसनयोः सेट् सक०। रुदिवदिडादि। जक्षादीनां झस्यादादेशो विशेषः। जक्षित्यादयः षट् (६-१-६) षड्धातवोऽन्ये जक्षितिश्च सप्तमः (जक्ष जागृ दरिद्रा शास चकास्र दीधीङ् वेवीङ्) एतेऽभ्यस्तसंज्ञाः स्युः। इत्यभ्यस्तसंज्ञायाम्- अदभ्यस्तात् (७-१-४) एभ्यो झस्य अत्स्यात्। अन्तापवादः। इति झस्यादादेशः जक्षिति जक्षितः जक्षति जक्षिषि क्षिथः-थ-मि-वः-मः, जक्षितु-तात्-ताम्-क्षतु जक्षिहि-तात्-तम्-त जक्षाणि-व-म। अजक्षीत्-अजक्षत्-अजक्षिताम्-अजक्षुः सिजभ्यस्तेति झेर्जुस्, अजक्षीः अजक्षः-क्षितम्-त अजक्षम्-क्षाव-म, जक्ष्यात्-क्ष्याताम्-क्ष्युः, जजक्ष-क्षतुः-क्षुः जजक्षिथ-व-म। जक्षिता-ष्यति, जक्ष्यात्-क्ष्यास्ताम्-क्ष्यासुः, अजक्षीत्-क्षिष्टाम्-क्षिषुः, अजक्षिष्यत्। जक्ष्यते अजक्षि जक्षयति-ते जिजक्षिषति। जक्षणं जक्षितः जक्षित्वा जक्षत्-ती जक्षितुम्। जागृ निद्राक्षये (जागरणे) सेट् अक०। रुदादयो वृत्ताः, जक्षादयोऽनुवर्तन्ते। शपो लुकि पित्सु गुणः जागर्ति जागृतः जाग्रति जागर्षि जागृथः-थ जागर्मि जागृवः मः, जागर्तु जागृतात्-ताम् जाग्रतु, जागृहि हेरपित्वान्न गुणः, जागृतात्-तम्-त जागराणि-राव-म आटः पित्वाद्गुणः। लङि गुणे तिप्सिपोरिकारलोपे हल्ङ्यादिलोपे अजागः अजागृताम् झौ अदादेशं बाधित्वा सिजभ्यस्तेति जुसि, जुसि च (७-३-८३) अजादौ जुसि इगन्ताङ्गस्य गुणः स्यात्। इति ऋकारस्य गुणे अजागरुः अजागः अजागृतम्-त अजागरम्-गृव-म। जागृयात्-याताम्-युः जुसोऽजादित्वाभावान्न गुणः। लिटि उषविदेत्याम्पक्षे ऋकारस्य गुणे कृञाद्यनुप्रयोगः जागराञ्चकार, बभूव आस, आमोऽभावे जागृ इत्यस्य द्वित्वेऽभ्यासकार्ये वृद्धौ जजागार, अतुसादौ कित्वाद्गुणनिषेधे प्राप्ते- जाग्रोऽविचिण्णल्ङित्सु (७-३-८५) जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योन्यस्मिन्वृद्धिविषये गुणवृद्धिप्रतिषेधविषये च। इति गुणे जजागरतुः-रुः-रिथ-व-म, जागरिता-ष्यति। आशिषि कित्वेन गुणनिषेधे प्राप्ते जाग्रोविचिण्णलिति गुणे जागर्यात्-यास्ताम्-यासुः। लुङि सिचि इटि जागृ-इस्-ईत्-इत्यत्र यणोपवादेन सार्वधातुकेति गुणं बाधित्वा सिचि वृद्धौ प्राप्तायां तां बाधित्वा जाग्रोविचिण्णलिति गुणे अजागर् इत्यत्र अतो हलन्तलक्षणवृद्धेर्नेटीति निषेधे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोहलादेरिति बाधित्वा अतोल्रान्तस्येति प्राप्ताया वृद्धेर्ह्म्यन्तेति निषेधे इट-ईटीति सलोपे सवर्णदीर्घे अजागरीत्। गुणोवृद्धिर्गुणोवृद्धिः प्रतिषेधो विकल्पनम्, पुनर्वृद्धिर्निषेधोतो यरापूर्वाः प्राप्तयो नव। इत्यत्र प्रतिसङ्ग्रहः। अजागरिष्टाम्-रिषुः अजागरीः-रिष्टम्-ष्ट-रिषम्-रिष्व-ष्म, अजागरिष्यत्। जागर्यते जागरयति-ते जिजागरिषति। जागरणं जागरितव्यं जागरितः जागरित्वा जाग्रत्-ती, घञ्-जागरः जागरितुम् जागर्तिः तितुत्रेतिनेट्, ऊक-जागरूकः, अ-जागर्या जागरा, क्विन्-जागृविः। दरिद्रा दुर्गतौ (दारिद्र्ये) सेट् अक०। दरिद्राति, तसि श्नाभ्यस्तयोरित्याकारलोपे प्राप्ते—**इद्दरिद्रस्य** (६-४-११४) दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके। इति इत्वे दरिद्रितः, झौ अदादेशे- **श्नाभ्यस्तयोरातः** (६-४-११२) अनयोरातो लोपः स्यात्क्ङिति सार्वधातुके। इत्याकारलोपे दरिद्रति दरिद्रासि दरिद्रिथः-थ दरिद्रामि द्रिव-म। दरिद्रातु दरिद्रितात्-ताम् दरिद्रतु, दरिद्रिहि-द्रितात्-तम्-त दरिद्राणि-द्राव-म। अदरिद्रात्-द्रिताम्-द्रुः अभ्यस्ताज्जुसि उस्यपदान्तादिति पररूपम्, अदरिद्राः- द्रितम्-त अदरिद्राम्-द्रिव-म। दरिद्रियात्-याताम्-युः। लिटि अनेकाच्त्वादामि कृञ्नुप्रयोगे दरिद्राञ्चकार बभूव-आस, आतऔणल इत्यत्र औ इत्येव सिद्धे औविधानं दरिद्रातेरालोपे कृते श्रवणार्थमत एव ज्ञापकादाम्नेत्येके, तन्मते आमोऽभावे ददरिद्रौ। **दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः** (वा) **लुङि वा** (वा) **सनिण्वुलिल्युटि न** (वा) इत्याकारलोपे ददरिद्रतुः-द्रुः-द्रिथ-द्रथुः-द्र ददरिद्रौ-द्रिव-म। दरिद्रिता-ष्यति, दरिद्र्यात्-द्र्यास्ताम् द्र्यासुः, लुङि आतो लोपपक्षे अदरिद्रीत्-द्रिष्टाम्-द्रिषुः अदरिद्रीः-द्रिष्टम्-ष्ट-द्रिषम् ष्व-ष्म, लोपाभावे यमरमेतीट्सकौ: अदरिद्रासीत्-सिष्टाम्-सिषुः-सीः-सिष्टम्-ष्ट-षम्-ष्व-ष्म, अदरिद्रास्यत्। दरिद्र्यते दरिद्रयति-ते दिदरिद्रासति दिदरिद्रिषति सनीवन्तेति इड्विकल्पः। कृत्सु-दरिद्रितः अच्-दरिद्रः दरिद्रित्वा दरिद्रातुम्, ऊ-दर्द्रूः। **चकासृ दीप्तौ** सेट् अक०। चकास्ति-स्तः- सति चकास्सि-स्थः-स्थ चकास्मि-स्वः-स्मः। चकास्तु स्तात्-स्ताम्-सतु, हेर्धित्वे धिचेति सलोपे चकाधि, सिच एव तेन लोप इति मते तु सस्य जश्त्वे चकाद्धि-स्तात्-तम्-त चकासानि-साव-म। लङि तिपि इकारतकारयोर्लोपे अचकास् इत्यत्र रुत्वापवादेन- **तिप्यनस्तेः** (८-२-७३) पदान्तस्य सस्य दः स्यात्तिपि नत्वस्तेः। इति दत्वे अचकाद्-त् अचकास्ताम्-कासुः, **सिपि धातो रुर्वा** (८-२-७४) पदान्तस्य धातोः सस्य रुः स्याद्वा पक्षे दः। इति रुत्वे पक्षे दत्वे च अचकाः-कात्-द् अचकास्तम्-स्त अचकासम्-स्व-स्म। चकास्यात्-स्याताम्-स्युः। लिट्यनेकाच्त्वादामि चकासाञ्चकार-बभूव-आस। चकासिता-ष्यति चकास्यात्-स्यास्ताम्-स्यासुः। अचकासीत्- सिष्टाम्-सिषुः, अचकासिष्यत्। चकास्यते चकासयति-ते। चकासनम् चकासितः चकासत् चकासित्वा चकासितुम्। **शासु अनुशिष्टौ** (विविच्यज्ञापने) सेट् सक०। शास्ति, तसादौ- **शास इदङ्हलोः** (६-४-३४) शास उपधाया इत्स्यादङि हलादौ क्ङिति च। इतीत्वे शासिवसीति षत्वे ष्टुत्वे शिष्टः शासति शास्सि शिष्ठः-ष्ठ शास्मि शिष्वः-ष्मः। शास्तु शिष्टात्-ष्टाम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शासतु। शा हौ (६-४-४५) शास्तेः शा आदेशः स्याद्धौ परे। इति शादेशे तस्याभीयत्वेनासिद्धत्वाज्झ-लन्तत्वेन हेर्धिः शाधि शिष्टात्-ष्टम्-ष्ट, शासानि-साव-म, लङि तिप्यनस्तेरिति दत्वे अशात्-द् अशिष्टाम् अशासुः अभ्यस्तत्वाज्जुसि अजादित्वान्नेत्वम्। सिपिधातोरुर्वेति पक्षे रुत्वे पक्षे दत्वे अशाः अशात्-द् अशिष्टम्-ष्ट अशासम् अशिष्व-ष्म। लिङि शासइदिति इत्वे शासिवसीति षत्वे शिष्यात्-ष्याताम्-ष्युः। शशास शशासतुः-सुः सिथ-व-म, शासिता-ष्यति। शिष्यात्-ष्यास्ताम्-ष्यासुः। लुङि सर्तिशास्त्यर्तिभ्य-श्चेत्यङि शासइदितीत्वे अशिषत्-षताम्-षन् अशिषः षतम्-त-षम्-ष्व-ष्म अशासिष्यत्। उप-अनुशास्-शिक्षणे, आशास्-इच्छायाम्। कर्मादौ-अनुशिष्यते अन्वशासि अनुशासयति-ते शिशासिषति। ल्युटि-अनुशासनम् शासितव्यं शासनीयम्, ण्यत्-शास्यं, क्यप्-शिष्यः कित्वादित्वम्, शासिता शासकः, तृचि-शास्ता (बुद्धः) प्रशास्ता (ऋत्विग्विशेषः) शिष्ट्वा शासित्वा उदित्वाद्वेट्, इटि नल्पीत्यनित्यम्। शिष्टः वेट्कत्वान्नेट्, शासितुम् क्तिन्-शिष्टिः तितुत्रेति नेट्, शास्तिरिति तु अस्माद्धिंसार्थाद्वा क्तिनि, युच्-दुःशासनः, क्विपि इत्वे दीर्घे आशीः।

वि० षस स्वप्ने सेट् अक०। सस्ति, य-सस्यम्, निपातनात् सास्ना (गलकम्बलः)। वश कान्तौ (इच्छायाम्) सेट् सक०। व्रश्चेति षत्वे ष्टुत्वे वष्टि वष्टः उशन्ति ग्रहिज्येतिसम्प्रसारणम्, अच् टाप्-वशा (वन्ध्यागौः), भावे अप्-वशः वशं गतो वश्यः, इनर-उशीनरः, कनस्-उशनाः, विवशः (अरिष्टदुष्टधीः) परस्य वशः-परवशः।

प्रयोगाः-शिष्यं धर्ममनुशास्ति, हन्यतामयं द्विषन्। अथ शब्दानुशासनम्। चकासयामासतुस्तत्र सन्ती। उदियाय तनुश्रिया परम्। माति मातुमशक्योपि। उदरं परिमाति मुष्टिना। जाग्रत्स्वप्नसुषुप्तयः। जागर्ति रामध्वनिः। मारोदीदस्य जननी। जहि शत्रून् रणाङ्गणे। सन्तः सन्ति कियन्तः। वेवेष्टि सर्वं भवान्।

उदात्ताः-(चक्षिङ् इङ् वर्जं सेटः) ङितो नुदात्तेतश्च (आत्मनेपदिनः)-चक्षिङ् व्यक्तायां वाचि अनिट् सक०। प्रायेणायमाङ्पूर्वः। इकारोनुदात्तो युजर्थः, इदित्वेपि नात्रनुम् अन्तेदित इति व्याख्यानात् अनुदात्तेत्त्वेनात्मनेपदसिद्धौ ङकारोनुदात्तेत्घलक्षणमात्मनेपदमनित्यमिति ज्ञापनार्थः। लटि शपो लुकि स्कोरिति कलोपे ष्टुत्वे आचष्टे आचक्षाते-क्षते आत्मनेपदेष्वनत इति झस्यात्। थासः सेभावे स्कोरिति कलोपे षढोरिति षस्य कत्वे सस्य षत्वे आचक्षे-क्षाथे, ध्वमि कलोपे षस्य जश्त्वेन डत्वे ष्टुत्वे आचढ्ढे आचक्षे-क्ष्वहे-क्ष्महे। आचष्टाम् आचक्षाताम्-क्षताम् आचक्ष्व आचक्षाथाम् आचढ्ढ्वम् आचक्षै-क्षावहै-महै। आचष्ट आचक्षाताम्-क्षत आचष्ठाः आचक्षाथाम्-आचढ्ढ्वम् आचक्षि क्ष्वहि-क्ष्महि, आचक्षीत-क्षीयाताम् क्षीरन्-क्षीथाः-क्षीयाथाम्-क्षीढ्वम्-क्षीय-क्षीवहि-महि, आर्धधातुकेषु चक्षिङः ख्याञ् (२-४-५४) चक्षिङः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ख्याञादेशः स्यादार्धधातुके। वा लिटि (२-४-५५) चक्षिङः ख्याञादेशो वा स्याल्लिटि। इति ख्याञा-देशो ञित्वादुभयपदम्। आकारान्तत्वाणणल औ आतोलोपइटिचेत्यजादौ क्ङिदिटोराकारलोपः, चख्यौ-ख्यतुः-ख्युः-ख्यिथ-व-म क्रादिनियमादिट्, तङि आचख्ये-ख्याते-ख्यिरे, ख्याञादेशाभावे आचचक्षे-क्षाते-क्षिरे ख्याता ख्यास्यति-ते, ख्यायात् ख्येयात् वान्यस्येत्येत्वविकल्पः, ख्यासीष्ट-सीया-स्ताम्-सीरन्। लुङि अस्यतिवक्तीत्यङि आतो लोपः आख्यत्-ख्यताम्-ख्यन् आख्यत-ख्येताम्-ख्यन्त। आख्यास्यत्-त। उप-समाख्या-संज्ञाने, व्याख्या-व्याख्याने, उपाख्या-उपाख्याने। कर्मादौ आख्यायते आख्यायि ख्यापयति-ते चिख्यापयिषति-ते कृत्सु-आख्यानम् उपाख्यानं व्याख्यानम् आख्यातव्यम् ख्यातः आख्यातः ख्यात्वा व्याख्याय व्याख्यातुम्, अङ्-व्याख्या आख्या संख्या, शान- व्याचक्षाणः, युच्-विचक्षणः, उस्-चक्षुः। ईश ऐश्वर्ये सेट्-सक। लटि तिपि व्रश्चेति षत्वे ष्टुत्वे ईष्टे ईशाते-शते, ईशः से (७-२-७७) ईड्जनोर्ध्वे च (७-२-७८) ईशीड्जनां सेध्वेशब्दयोः सार्वधातुकयोरिट् स्यात्। इति सेध्वयोरिट्, ईशिषे-शाथे-शिध्वे ईशे-श्वहे-श्महे। ईष्टाम् ईशाताम्-शताम् ईशिष्व ईशाथाम्-शिध्वम् सेध्वयोरिट्, ईशै शावहै-महै। ऐष्ट ऐशाताम्-शत ऐष्ठाः ऐषाथाम् ऐढ्वम् ऐशि-श्वहि-श्महि। ईशीत-ईशीयाताम्-शीरन्। लिटि इजादेश्चेत्यामि कृञाद्यनुप्रयोगः ईशाञ्चक्रे, ईशिता-शिष्यते-शिषीष्ट। ऐशिष्ट ऐशिषाताम्-षत ऐशिष्ठाः-शिषाथाम्-शिढ्वम् ऐशिषि-श्वहि-महि, ऐशिष्यत। ईश्यते ऐशि, ईशयति-ते ईशिशिषते। ईशनम् ईशितव्यम् ईशिता ईशानः ईशित्वा ईशितुम्, क-ईशः, वरच्-ईश्वरः-री। आस उपवेशने सेट् अक०। आस्ते आसाते-सते आस्से आसाथे आध्वे धिचेति सलोपः आसे-स्वहे-स्महे। आस्ताम्-साताम् सताम् आस्व-साथाम् आध्वम् आसै-सावहै-महै। आस्त आसाताम्-सत आस्थाः आसाथाम् आध्वम् आसि-स्वहि-स्महि। आसीत-सीयाताम्-सीरन्। लिटि दयायासश्चेत्यामि कृञाद्यनुप्रयोगः आसाञ्चक्रे, आसिता-ष्यते आसिषीष्ट-षीयास्ताम्-षीरन्। आसिष्ट आसिषाताम्-षत आ-सिष्ठाः-सिषाथाम्-सिध्वम् आसिषि-ष्वहि-ष्महि। आसिष्यत। उप-उपास्-उपासने, अध्यास-उपवेशने, अन्वास्-समीपावस्थाने, उदास्-उदासने। भावादौ-आस्यते आसि, आसयति-ते आसिषिषते, कृत्सु-आसनम् उपासनम्, करणे ल्युट्- आसनम्, आसितव्यम्, शान-आसीनः उपासीनः ईदास इतीत्वम् आसितः उपासितः आसित्वा उपास्य उपासितुम्; युच-उपासना, केलिः प्रयोजन मस्येति कैलः, आस्यतेस्मिन्नित्यासः, कैलश्चासौ आसः कैलासः। आङः शासु इच्छायाम् आङ्पूर्वोयम् सेट् सक०। आशास्ते-साते-सते आसास्ते-साथे-ध्वे आशासे-स्वहे-स्महे। शास इदङ्हलोरित्यत्र परस्मैदिन एव शास्तेर्ग्रहणादिह नेत्वम्। आसास्ताम्-साताम्-सताम् आशास्व-साथाम्-साध्वम् आशासै-स्वहै-स्महै। आशास्त आशासाताम्-सत आशास्थाः-साथाम्-साध्वम् आशासि-स्वहि-स्महि, आशासीत-सीयाताम्-सीरन्, आशशासे-साते-सिरे, आशासिता-ष्यते। आशासि-षीष्ट-सीयास्ताम्-सीरन्, आशासिष्ट आशासिषाताम्-षत आशासिष्ठाः-सिषाथाम्-सिध्वम् आशासिषि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्वहि-ष्महि, आशासिष्यत, आङ्पूर्वत्वं प्रायिकं तेन नमोवाकं प्रशास्महे इत्यादि । आशास्यते आशासि आशासयति-आशासयते । आशासनम् आशासितव्यम् , ण्यत्-आशास्यम् आशासमानः आशास्य आशासितुम् शासित्वा शास्त्वा उदित्वाद्वेट् आशास्तः वेट्क्त्वान्नेट् अ-आशासा, क्विप्-आशीः आशिषिचेति ज्ञापकादीत्वम् । षूङ् प्राणिगर्भविमोचने वेट् सक० । सूते सुवाते सुवते सूषे सुवाथे सूध्वे सुवे सूवहे-महे अजादावुवङ्, सूताम् सुवाताम् सुवताम् सूष्व सुवाथाम् सूध्वम् सुवै-वावहै-महै । असूत असुवाताम्-वत असूथाः असुवाथाम् असूध्वम् असूवि-हि-महि । सुवीत-वीयाताम्-वीरन्, सुषुवे-वाते-विरे सुषुविषे-विवहे-महे स्वरतिसूतीति विकल्पं बाधित्वा श्र्युकः कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् स्वरतिसूतीति वेट् सविता सोता, सविष्यते सोष्यते, सविषीष्ट सोसीष्ट, असविष्ट-विषाताम्-षत, असोष्ट-सोषाताम्-षत । असविष्यत असोष्यत । प्रसूते, सूयते असावि, सावयति-ते सुषूषते । कृत्सु-अप्- सवः प्रसवः प्रसुवानः, वेट्क्त्वान्नेट् सूतः प्रसूतः, सविता सोता सूत्वा सवित्वा सवितुम् सोतुम् , सूतिः, क्री-सूरिः, क्रन्-सूरः, नु-सूनुः, डुम्सुन्पत्वंच पुमान्, क्त क-सूतकं सूतिका । शीङ् स्वप्ने सेट् अक० । सार्वधातुकेषु—**शीङः सार्वधातुके गुणः** (७-४-२१) शीङः सार्वधातुके परे गुणः स्यात् । क्ङितिचेत्यस्यापवादः । शेते शयाते गुणेऽयादेशः, झस्यादादेशे गुणे- **शीङो रुट्** (७-१-६) शीङः परस्य झादेशस्यातो रुडागमः स्यात् । इति रुटि शेरते शेषे शयाथे शेध्वे शये शेवहे-महे । शेताम् शयाताम् शेरताम् शेष्व शयाथाम् शेध्वम् शयै शयावहै-महै । अशेत अशयाताम् अशेरत अशेथाः अशयाथाम् अशेध्वम् अशयि अशेवहि-महि । शयीत-याताम्-रन् । शिश्ये-श्याते-श्यिरे, शयिता शयिष्यते शयिषीष्ट अशयिष्ट-यिषाताम्-षत अशयिष्ठाः- यिषाथाम्-यिढ्वम् अशयिषि-यिष्वहि-ष्महि, अशयिष्यत उप-सकं संशी-सन्देहे, अतिशी-अतिशये, अधिशी-अधिष्ठाने, अनुशी-द्वेषे तापे च । भावादौ-शय्यते अशायि शाययति-ते अशीशयत शिशयिषते । कृत्सु-शयनं शयितव्यं शयनीयं शयिता शयानः संशयानः, अप्-संशयः अतिशयः अनुशयः, शयित्वा संशय्य शयितुम्, अच्-उत्तानशयः, ड-गिरौ शेते गिरिशः, घ-शयः (हस्तः) क्यप्-शय्या, अधिकरणेनीयः शयनीयम्, धुक्-शीधुः (मद्यं) लक्-शीलम्, वल वाल-शैवलम् शैवालम्, आलु-शयालुः, ख-शिखा, उ-शयुः (अजगरः) । इङ् अध्ययने अनिट् सक० नित्यमयमधिपूर्वः सार्वधातुकेष्वपित्वान्न गुणः सवर्णदीर्घः अजादौ इयङ् अधीते अधीयाते-यते अधीषे अधीयाथे अधीध्वे अधीये अधीवहे-महे । अधीताम् अधीयाताम्-यताम् अधीष्व अधीयाथाम्-धीध्वम् अध्ययै-यावहै-महै । लङि आटि पूर्वं धातुरुपसर्गेण युज्यते इत्यन्तरङ्गत्वाद्गुणात्पूर्वं सवर्णदीर्घप्राप्तावपि णेरध्ययने इति निर्देशाद्गुणायादेशयोरुपसर्गेकारस्य यण् । अध्यैत अध्यैयाताम्-यत आटः प्रागेव परत्वादिकारस्येयङि तत आटि वृद्धौ यण् झस्यादादेशः । अध्यैथाः-याथाम्-ध्वम् अध्यैयि अध्यैवहि-महि । अधीयीत-धीयाताम्-रन् अधीयीथाः- याथाम्-धीध्वम् अधीयीय-यीवहि-महि । लिटि, **गाङ् लिटि** (२-४-४९) इङो गाङ् स्याल्लिटि लावस्थायां विवक्षिते वा । इति गादेशे द्वित्वादौ आतो लोपे अधिजगे-गाते-गिरे-गिषे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१४ यादिनियमादिट् अध्येता अध्येष्यते अध्येषीष्ट। लुङि आटि अधि-आ-इ-त इति स्थिते- विभाषा-लुङ्लृङोः (२-४-५०) इङो गाङ् वा स्याल्लुङ्लृङोः। इति गादेशे सिचि गाङ्कुटादिभ्योऽञ्णिन्ङित् (१-२-१) गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः। इति ङित्वे घुमास्थागापाजहातिसां हलि (६-४-६६) एषामात ईत्स्याद्धलादौ क्ङित्यार्धधातुके। इत्यात ईत्वे यणि सिचः षत्वे अध्यगीष्ट तङि गातिस्थेति सिचो लुग्न अध्यगीषाताम्-षत अध्यगीष्ठाः-गीषाथाम्-गीढ्वम्, अध्यगीषि-गीष्वहि-ष्महि। गादेशाभावे अधि-आ-इस्-त इत्यत्र इकारस्य गुणे आटो वृद्धौ यणि षत्वे ष्टुत्वे अध्यैष्ट अध्यैषाताम्-षत अध्यैष्ठाः अध्यैषाथाम् अध्यैढ्वम् धिचेति सलोपः, अध्यैषिष्वहि-ष्महि। लृङि गादेशे ईत्वे अध्यगीष्यत-ष्येतां-ष्यन्त, गाङभावे अध्यैष्यत। अधीयते अध्यायि अध्यापयति अध्यजीगपत् अध्यापिपत् लुङि गाङ् वा, कर्मणि-अध्याप्यते अध्यापि अध्यगापि, अधिजिगांसते इङश्चेति गम्यादेशः णौ सनि अधिजिगापयिषति अध्यापिपयिषति णौचसंश्चङोरिति गाङादेशो वा। कृत्सु-अध्ययनम् अध्येतव्यम्, यत्-अध्येयः अध्येता, कर्मणि घञ्- अध्यायः स्वाध्यायः अपादाने उपाध्यायः, शान-अधीयानः, कर्मणि-अधीयमानः, लृटि अध्येष्यमाणः अधीतः, भावे क्त इन्-अधीती अधीत्य अध्येतुम्, णौ-अध्यापनम् अध्यापकः अध्यापितः अध्याप्य अध्यापयितुम्।

आ० **ईर** गतौ कम्पने च सेट् सक०। ईर्ते ईराते ईरते, णौ-प्रेरयति उदीरयति (कथयति), युच्-समीरणः, क-नीरम् । स्वैरेरितुं शीलमस्य स्वैरी स्वैरिणी, क्त-प्रेरितः उदीरितः। **ईड** स्तुतौ सेट् सक०। ईडे ईडाते ईडते, क्त-ईडितः, ईड्यः, अ-ईडा (हुतशेषचरुः)। **वस** आच्छादने सेट् सक०। वस्ते वसाते वसते, वसित्वा, करणे ल्युट्-वसनम्, वस्त्रम्, असुन्-वासः (पटः), अच् टाप्-वसा (शारीरस्नेहः), वस्त्रेणाच्छादयति संवस्त्रयति। **शिजि** अव्यक्ते शब्दे अ०। शिङ्क्ते शिञ्जाते, शिञ्जते, णिनि-शिञ्जिनी (ज्या,) क्त-शिञ्जितम् (भूषणशब्दः,) शान-शिञ्जानः। **पिजि** ... अक०। पिङ्क्ते घञ्-पिङ्गः अर-पिञ्जरः, अल-पिङ्गलः, उल-पिञ्जुली। **वृजी** वर्जने सेट् सक०। वृक्ते-जाते-जते, णौ-वर्जयित्वा वर्जितः, इन्-वृजयः (जनपदविशेषः), घञ्-वर्गः वर्ग्ये भवः वर्ग्यः वर्गीयः, क्यप्-वृज्यः, इनच्-वृजिनम् । **पृची** सम्पर्चने (सम्बन्धे) सेट् सक०। सम्पृक्ते मधुना चूर्णम्, घञ्-सम्पर्कः, क्त-सम्पृक्तः, ल्यप्-सम्पृच्य। **न्हुङ्** ... (अपन्हवे गोपने च) अनिट् सक०। प्रायेणायं नि-अपपूर्वः निन्हुते-वाते-वते अपन्हुते, अच्, निह्नवः अपन्हवः ... अपन्हुतः निन्हुतिः। अपन्हुतिः निन्हूय अपन्हूय।

प्रयोगाः—आचचक्षे विचक्षणः। अन्वास्य गोप्ता गृहिणीसहायः। दयते जगदीश्वरः। अध्यासामासुस्तुङ्ग हेमपीठानि। उदास्ते कर्मणि शठः। जगतामीशोऽसि किं ब्रूमहे। अध्याप्या धर्मतः शक्तभक्ताप्तज्ञानवित्तदाः। राजा सर्वस्येष्टे। सोऽध्यैष्ट वेदाँस्त्रिदशानयष्ट। संशयो नात्र कश्चन। किं निःशङ्कं शेषे। अधीष्व भो माणवक। शेरते तेऽभिमारुतम्। व्याख्याता सर्वशास्त्राणाम्। स्वाध्यायोऽध्येतव्यः। आशास्महे कल्याणम्। शास्ति शिष्यान्गुरुः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुदात्ताः (अनिटः) स्वरितेतो ञितश्च (उभयपदिनः)— द्विष अप्रीतौ सक०। शपो लुकि पित्सु गुणस्तथयोः ष्टुत्वम् द्वेष्टि द्विष्टः द्विषन्ति द्वेक्षि षस्य कत्वे सस्य षत्वम्, द्विष्ठः-ष्ठ द्वेष्मि द्विष्वः-ष्मः, द्विष्टे द्विषाते-षते द्विक्षे द्विषाथे द्विड्ढ्वे द्विषे द्विष्वहे-ष्महे। द्वेष्टु द्विष्टात्-ष्टाम् द्विषन्तु द्विड्ढि पक्ष जश्त्वे हेर्धित्वे ष्टुत्वम्, द्विष्टात्-ष्टम्-ष्ट द्वेषाणि-षाव-म, द्विष्टाम्-षाताम्-षताम् द्विष्व द्विषाथाम् द्विड्ढ्वम् द्वेषै-षावहै-महै, लङि तिप्सिपोर्गुणे इकारतकारयोर्लोपे षस्य जश्त्वचर्त्वयोः अद्वेट् अद्विष्टाम्, द्विषश्च (३-४-११२) द्विषो लङो झेर्जुस्वा स्यात्। इति पक्षे जुस् अद्विषुः अद्विषन्, अद्वेट्, अद्विष्टम्-ष्ट अद्वेषम् अद्विष्व-ष्म, अद्विष्ट अद्विषाताम्-षत अद्विष्ठाः-षाथाम् अद्विड्ढ्वम् अद्विषि-ष्वहि-ष्महि। द्विष्यात्-ष्याताम्-ष्युः, द्विषीत-षीयाताम्-षीरन्। दिद्वेष दिद्विषतुः-षुः दिद्वेषिथ दिद्विषथुः-ष दिद्वेष दिद्विषिव-म, दिद्विषे-षाते-षिरे-षिषे क्रादिनियमादिट्। द्वेष्टा द्वेक्ष्यति-ते कत्वषत्वे। द्विष्यात्-ष्यास्ताम्-ष्यासुः, द्विक्षीष्ट-क्षीयास्ताम्-क्षीरन्। लुङि च्लेः क्से षस्य कत्वे सस्य षत्वम् अद्विक्षत्-क्षताम्-क्षन्, अद्विक्षत क्सस्याचीत्यल्लोपे अद्विक्षाताम्-क्षन्त अद्विक्षथाः-क्षाथाम्-क्षध्वम् अद्विक्षि-क्षावहि-महि। अद्वेक्ष्यत्-त। द्विष्यते अद्वेषि द्वेषयति-ते अदिद्विषत्-त, दिद्विषति-ते। द्वेष्टव्यं, घञ्-द्वेषः विद्वेषः देष्टा द्विषन्-ती द्विष्टः द्विष्ट्वा विद्विष्य द्वेष्टुम्, क्विप्-द्विट्, घिनुण्-द्वेषी, कर्तरिल्यु-द्वेषणः, कर्मणिशान-द्विष्यमाणः। दुह प्रपूरणे (ऊधसःप्रपूरणाभावे) सक०। झलि पदान्ते च दादेर्धातोरिति हस्य घः, झषस्तथयोर्धः, घस्य जश्त्वे गः, पित्सु गुणश्च। दोग्धि दुग्धः दुहन्ति धोक्षि हस्य घश्चत्वेन कः षत्वं भष्भावश्च, दुग्धः-ध दोह्मि दुह्वः-ह्मः। दुग्धे दुहाते-हते धुक्षे दुहाथे धुग्ध्वे दुग्धे दुह्वहे-ह्महे। दोग्धु दुग्धात्-धाम् दुहन्तु दुग्धि- दुग्धात्-ग्धम्-ग्ध दोहानि-व-म। दुग्धाम् दुहाताम्-हताम् धुक्ष्व दुहाथाम् धुग्ध्वम् दोहै-हावहै-महै। लङि तिस्योर्हल्ङ्यादिलोपे हस्य घत्वजश्त्वचर्त्वानि भष्भावः प्रत्ययलक्षणेन लघूपधगुणश्च अधोक् अदुग्धाम् अदुहन् अधोक् अदुग्धम्-ध अदोहम् अदुह्व-ह्म। अदुग्ध अदुहाताम्-हत अदुग्धाः अदुहाथाम् अधुग्ध्वम्, अदुहि-ह्वहि-ह्महि। दुह्यात्-याताम्-ह्युः। दुहीत-हीयाताम्-हीरन्। दुदोह दुदुहतुः-हुः दुदोहिथ दुदुहिव-म। दुदुहे-हाते-हिरे दुदुहिषे-वहे-महे क्रादिनियमादिट्। दोग्धा, धोक्ष्यति-ते, दुह्यात् धुक्षीष्ट। लुङि क्से घत्वजश्त्वचर्त्वषत्वभष्भावाः अधुक्षत्-क्षताम्-क्षन्, दन्त्यादौ तङि तथासध्वंवहिषु लुग्वादुहदिहेति क्सस्य लोपपक्षे लङ्वदपि रूपम्- अधुक्षत अदुग्ध अधुक्षाताम्-क्षत क्सस्याचीत्यल्लोपः, अधुक्षथाः अदुग्धाः अधुक्षाथाम् अधुक्षध्वम् अधुग्ध्वम् अधुक्षि अधुक्षावहि अदुह्वहि अधुक्षामहि, अधोक्ष्यत्-त। दुह्यते अदोहि, दोहयति-ते अदूदुहत्-त, दुधुक्षति-ते। दोहनं दोग्धव्यं दोहनीयं, क्यप्-दुह्यं, ण्यत्-दोह्यं, दोग्धा दोहकः दुहन्-ती दुहानः दुग्धः-ग्धम् दुग्धवान् दुग्ध्वा प्रदुह्य दोग्धुम्, घिनुण्-दोहि, कप्-कामदुघा, क्विप्-गोधुक्, तृचि इटि गुणाभावनिपातनात् दुहिता, घञ्-दोहः। दिह उपचये (वृद्धौ उपलेपे च) सक०। दिहे दुहिवत् उकारेकारौ विशेषः। देग्धि दिग्धे, देग्धु दिग्धाम्, अधेक् अदिग्ध, दिह्यात् दिहीत।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिदिहे, देग्धा, धेक्ष्यति-ते, दिह्यात् धिक्षीष्ट, अधिक्षत् अधिक्षत अदिग्ध, अधेक्ष्यत्-त। उप-उपदिह-ते, सन्दिग्ध-सन्देहे। कर्मादौ-सन्दिहयते समदेहि, सन्देहयति-ते समदीदिहत्-त, सन्दिधिक्षति-ते। कृत्सु-सन्देहनं सन्देग्धव्यं सन्देहनीयं, ण्यत्-सन्देह्यं, घञ्-सन्देहः उपदेहः, दिग्धः सन्दिग्धः सन्देग्धा सन्दिहन्-ती सन्दिहानः, कर्मणि-सन्दिह्यमानः दिग्ध्वा सन्दिह्य सन्देग्धुम्, कर्मणि घञ्-देहः, इनि-देही, कर्मणि ल्युट् लत्वं च-देहली। लिह आस्वादने सक०। शपो लुकि झलि पदान्ते च होढ इति ढत्वं, झषस्तथयोर्धत्वं ष्टुत्वं ढोढ इति पूर्वढलोपः, पित्सु गुणः, कित्सु ढलोपे पूर्वदीर्घः, सेपरे हस्य ढत्वे षढोरिति कत्वे सस्य षत्वं विशेषः। लेढि लीढः लिहन्ति लेक्षि लीढः-ढ लेह्मि लिह्वः-ह्मः। लीढे लिहाते-हते लिक्षे लिहाथे लीढ्वे लिहे-ह्वहे-ह्महे। लेढु लीढात्-ढाम् लिहन्तु, हेर्धौ हस्य ढत्वे धस्य ष्टुत्वे ढलोपे गुणः लेढि लीढात्-ढम्-ढ लेहानि-व-म। लीढाम् लिहाताम्-हताम् लिक्ष्व लिहाथाम् लीढ्वम् लेहै-हावहै-महै। लङि तिस्योर्हल्ङ्यादिलोपे हस्य ढत्वे जश्त्वे चर्त्वं प्रत्यय लक्षणेन गुणश्च अलेट् अलीढाम् अलिहन् अलेट् अलीढम्-अलीढ अलेहम् अलिह्व अलिह्म। अलीढ अलिहाताम्-अलिहत अलीढाः अलिहाथाम् अलीढ्वम् अलिहि अलिह्वहि अलिह्महि। लिह्यात् लिहीत। लिलेह लिलिहतुः-हुः लिलेहिथ लिलिहिव-म क्रादिनियमादिट्, लिलिहे-हाते-हिरे, लेढा लेक्ष्यति-ते, लिह्यात् लिक्षीष्ट, अलिक्षत्, अलिक्षत अलीढ अलिक्षाताम्-क्षन्त अलिक्षथाः अलीढाः अलिक्षाथाम् अलिक्षध्वम् अलीढ्वम् अलिक्षि अलिक्षावहि-लिह्वहि अलिक्षामहि, अलेक्ष्यत्-त। उप-वि-सम्-अव-आलेढि-लीढे। कर्मादौ-लिह्यते अलेहि लेहयति-ते अलीलिहत्-त लिलिक्षति-ते। कृत्सु-लेहनं लेहनीयं लेढव्यं, ण्यत्-लेह्यं, घञ्-लेहः अवलेहः लेढा लेहकः लिहन्-ती लिहानः, कर्मणि-लिह्यमानः लीढ्वा अवलिह्य लीढः लेढुम्, क्विप्-अभ्रंलिहः, क्स-लिक्षा, यङ्लुकि शान- लेलिहानः। ष्टुञ् स्तुतौ सक०। षस्य सत्वे ष्टुत्वनिवृत्तिः। सार्वधातुकेषु शपो लुकि **तुरुस्तुशम्यमः सार्वधातुके** (७-३-९५) एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात्। नाभ्यस्तस्येत्यतोनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणं पितीत्यस्याननुवृत्त्यार्थमपि। इति पक्षे ईटि पित्सु गुणावादेशौ स्तवीति, ईडभावे **उतो वृद्धिर्लुकि हलि** (७-३-८९) लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके नत्वभ्यस्तस्य। इति गुणापवादेन वृद्धिः स्तौति, कित्सु ईटि गुणवृद्ध्योरप्राप्त्या उवङ् स्तुवीतः स्तुतः स्तुवन्ति अजादौ नेट्। स्तवीषि स्तौषि स्तुवीथः-थ स्तुथः-थ स्तवीमि स्तौमि स्तुवीवः-मः स्तुवः-मः। स्तुवीते स्तुते स्तुवाते-वते स्तुवीषे स्तुषे स्तुवाथे स्तुवीध्वे स्तुध्वे स्तुवे स्तुवीवहे-महे स्तुवहे-महे। स्तवीतु स्तौतु स्तुवीतात्-ताम् स्तुतात्-ताम् स्तुवन्तु, स्तुवीहि स्तुहि स्तुवीतात्-तम्-त स्तुतात्-तम्-त स्तवानि-व-म आटि पित्वाद्गुणः अजादित्वान्नेट्। स्तुवीताम् स्तुताम् स्तुवाताम्-वताम् स्तुवीष्व स्तुष्व स्तुवाथाम् स्तुवीध्वम् स्तुध्वम् स्तवै स्तवावहै-महै। अस्तवीत् अस्तौत् अस्तुवीताम् अस्तुताम् अस्तुवन्, अस्तवीः अस्तौः अस्तुवीतम्-त अस्तुतम्-त अस्त-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वम् अस्तुवीव-म अस्तुव-म। अस्तुवीत अस्तुत अस्तुवाताम्-वत अस्तुवीथाः अस्तुथाः अस्तुवाथाम् अस्तु-
वीध्वम् अस्तुध्वम् अस्तवि अस्तुवीवहि-महि अस्तुवहि-महि। स्तुवीयात्-याताम्-युः स्तुयात्-याताम्-
युः। तङि सीयुटि अजादित्वान्नेट् स्तुवीत-वीयाताम्-वीरन्। लिडादौ नेट् तुष्टाव तुष्टुवतुः-वुः तुष्टोथ
तुष्टुवथुः-व तुष्टाव-ष्टव तुष्टुव-म क्रादित्वान्नेट्, पुरस्तात्प्रतिषेधसामर्थ्यात्थल्यपि भारद्वाजनियमस्य
बाधः। तुष्टुवे-वाते-विरे तुष्टुषे-वाथे-ध्वे तुष्टुवे-वहे-महे। स्तोता स्तोष्यति-ते। स्तूयात्-यास्ताम्-यासुः
अकृदिति दीर्घः। स्तोषीष्ट-षीयास्ताम्-षीरन्। लुङि सिचि स्तुसुधूञ्भ्यःपरस्मैपदेष्विति इडागमे
सिचिवृद्धिरिति वृद्धिः तिप्सिपोरीटि सलोपः अस्तावीत्-विष्टाम्-विषुः अस्तावीः-विष्टम्-ष्ट अस्ताविषम्-
विष्व-ष्म। तङि इडभावे अस्तोष्ट-षाताम्-षत अस्तोष्ठाः-षाथाम्-ढ्वम् अस्तोषि-ष्वहि-ष्महि। अस्तो-
ष्यत्-त। उप-प्रस्तु-प्रस्तावे, संस्तु-परिचये, अभिष्टौति उपसर्गात्सुनोतीति षत्वम्। कर्मादौ-स्तूयते
प्रस्तूयते अस्तावि, स्तावयति-ते अतुष्टुवत्-त, तुष्टूषति-ते स्तौतिण्योरेवेति षत्वम्। कृत्सु-स्तवनं स्त-
वनीयः स्तोतव्यः, अप्-स्तवः संस्तवः (परिचयः) स्तवमर्हति स्तव्यः, घञ्-प्रस्तावः (प्रसङ्गः) स्तोता
स्तावकः स्तुवन्-ती स्तुवानः, कर्मणि-स्तूयमानः स्तुतः स्तुत्वा प्रस्तूय स्तोतुं स्तुतिः, क्विप्-अग्निष्टुत्,
मन्-अग्निष्टोमः, ष्ट्रन्-स्तोत्रम्। **ब्रूञ्** व्यक्तायां वाचि सक०। लटि शप्लुकि **ब्रुवः पञ्चानामादित आहो
ब्रुवः** (३-४-८४) ब्रुवो लटः परस्मैपदानां पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्च आहादेशः। आकार उच्चार-
णार्थः। **आहस्थः** (८-२-३५) इति थलि हस्य थश्चर्त्वम्। आह आहतुः आहुः आत्थ आहथुः इति
विशेषरूपाणि पञ्च। **ब्रुव ईट्** (७-३-९३) ब्रुवः परस्य हलादेः पितः ईट् स्यात्। इति पित्सु ईटि गुणे
वादेशौ ब्रवीति ब्रूतः ब्रुवन्ति ब्रवीषि ब्रूथः-थ ब्रवीमि ब्रूवः-मः। ब्रूते ब्रुवाते ब्रुवते ब्रूषे ब्रुवाथे ब्रूध्वे ब्रुवे
ब्रूवहे-महे, ब्रवीतु ब्रूतात्-ताम् ब्रुवन्तु ब्रूहि ब्रूतात्-तम्-त ब्रवाणि वाव-म। ब्रूताम् ब्रुवाताम्-वताम् ब्रूष्व
ब्रुवाथाम् ब्रूध्वम् ब्रवै-वावहै-महै। अब्रवीत् अब्रूताम् अब्रुवन् अब्रवीः अब्रूतम्-त अब्रवम् अब्रूव-म। अब्रूत
अब्रुवाताम्-वत अब्रूथाः अब्रुवाथाम् अब्रूध्वम् अब्रुवि अब्रूवहि-महि। आर्धधातुकेषु- **ब्रुवो वचिः**
(२-४-५३) ब्रुवो वच्यादेशः स्यादार्धधातुके। इति वच्यादेशः। लिटि अकिति द्वित्वोत्तरमभ्यासस्य सम्प्रसा-
रणे पूर्वरूपे वृद्धौ, किति सम्प्रसारणोत्तरं द्वित्वादौ सवर्णपरत्वादभ्यासस्यासवर्ण इत्युवङ-
भावेन सवर्णदीर्घः उवाच ऊचतुः-चुः, थलि भारद्वाजनियमाद्वेटि इडभावे चोःकुरिति कुत्वे उवचिथ
उवक्थ ऊचथुः ऊच उवाच-वच ऊचिव-म। तङि कित्वेन सम्प्रसारणोत्तरं द्वित्वादौ ऊचे-चाते-चिरे,
वक्ता वक्ष्यति-ते वच्यादेशे नेट् कुत्वम्। उच्यात्-च्यास्ताम्-च्यासुः कित्वात्सम्प्रसारणम्। तङि सीयुटः
कित्वादसम्प्रसारणे कुत्वषत्वयोः वक्षीष्ट-क्षीयास्ताम्-क्षीरन्। लुङि वच्यादेशे अस्यतिवक्तीति च्लेरङि
वच उमित्युकारे गुणैकादेशे अवोचत्-चताम्-चन्। अवोचत-चेताम्-चन्त, अवक्ष्यत्-त, उप-प्रब्रू-प्रवचने
अनुब्रू-अनुक्तौ, विब्रू-विरुद्धोक्तौ, प्रतिब्रू-प्रतिवचने, कर्मादौ-उच्यते प्रोच्यते अवोचि, वाचयति-ते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवीवचत्-त, विवक्षति-ते। कृत्सु-वचनं प्रवचनं वक्तव्यं वचनीयं वाच्यं, शब्दसंज्ञायां वाक्यं, वक्ता वाचकः ब्रुवन्-ती ब्रुवाणः उक्तः उक्त्वा प्रोच्य वक्तुम् उक्तिः, क्विप्-वाक्, अचि निपातनात् विदुषिब्रुवा।

ऊर्णुञ् आच्छादने सक०। उर्णोतेर्विभाषा इति हलादौ पिति सार्वधातुके वृद्धिर्वा ऊर्णोति ऊर्णौति ऊर्णुते। ऊर्णोतेर्नुप्रत्यये नुलोपे ऊरुः (सक्थि) ह्रस्वे उरुः (श्रेष्ठः) अतिशयेनोरुः वरिष्ठः वरीयान्, ड-ऊर्णा, युस्-ऊर्णायुः।

प्रयोगाः--अवेहि मां कामदुघां प्रसन्नाम्। प्रत्यब्रवीदिदं भूपः। स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती। इति ब्रुवाणं तमुवाच स व्रती। दुग्धं वल्यं तर्पणं प्रीणनं च। सेनान्यमालीढमिवासुरास्त्रैः। नावलेहः घृते। सन्दिहानस्य न स्फुरति। योस्मान्द्वेष्टि यच्च वयं द्विष्मः। अथैनां तुष्टुवुर्देवाः। मा ब्रूहि दीनं वचः। सत्यं ब्रूयात्प्रियं ब्रूयात्।

प्रश्नाः--अदादिषु को विकरणः। भ्वाद्यदाद्योः शतरि स्त्रियां को विशेषः। अदादिष्वात्मनेपदिन उभयपदिनश्च धातवः के। अदादिषु केषां धातूनां क्व धात्वन्तरादेशाः। जक्षित्यादिषु रुदादिषु च धातुषु के विशेषाः। लटि रूपाणि क्व। सार्वधातुकेषु क्व ईट्। अधस्तनवाक्यगतानदादिधातुनिष्पन्नान् शब्दान्विवृणुत, कृदन्तशब्दाँश्च ...-चन्द्रोदये रोदिति चक्रवाकी। य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्, उभौ तौ न विजानीतो नायं हन्ति न ...। स ययौ प्रथमं प्राचीम्। एवमुक्तो मन्त्रिमुख्यै रावणः प्रत्यवोचत। आवेदयामः प्रियमात्मनीनम्। विद्वान् विदामास ...तम्। न प्रत्येति तथापि मुग्धहरिणी। न सा सभा यत्र न सन्ति वृद्धाः। आश्वसीन्त्यश्वसीच। बन्धवो मां द्विषन्ति। ...धातुरिवेहितं फलैः। संशयानस्य नो धृतिः। सा ब्रूते यं स धर्मः स्यात्। आख्याहि मे को भगवानुग्ररूपः। दारिद्र्या-...रम्। उदासीनस्य का व्यथा। अदुहत्सकलौषधीः। तुष्टाव देवं स्तवैः। इत्यदादयः।

३ अथ जुहोत्यादयः।

अनुदात्ताः (अनिटः) उदात्तेतः (परस्मैपदिनः)—हु दानादनयोः (वैधे आधारे हविः प्रक्षेपे) सकर्मकः। सार्वधातुकेषु शपि जुहोत्यादिभ्यः श्लुः (२-४-७५) एभ्यः शपः श्लुः स्यात्। इति ...रे, श्लौ (६-१-१०) श्लौ धातोर्द्वे स्तः। इति द्वित्वे कुहोश्चुरित्यभ्यासस्य झकारे अभ्यासेचर्चेति ...त्वे सार्वधातुकेति उत्तरोकारस्य गुणे जुहोति जुहुतः ङित्वान्न गुणः, झो अदभ्यस्तादित्यति उवङप-वादेन हुश्नुवोरित्यजादौ यणि जुह्वति, जुहोषि जुहुथः-थ जुहोमि जुहुवः-मः। जुहोतु जुहुतात्-ताम् जुह्वतु, हुझल्भ्यइति हेर्धौ जुहुधि जुहुतात्-तम्-त जुहवानि-वाव-म पित्वाद्गुणेऽवादेशः। अजुहोत् अजुहुताम् अजुहवुः सिजभ्यस्तेति झेर्जुसि यणोपवादेन जुसिचेति गुणेऽवादेशः, अजुहोः अजुहुतम्-त अजुहवम्-...व-म। जुहुयात्-याताम्-युः। लिटि भीह्रीभृहुवामित्यामि श्लुवत्वेन द्वित्वादौ गुणावादेशयोः कृञ्चानु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगे जुहवाञ्चकार-बभूव-आस; आमोऽभावे अजादौ क्ङित्युवङ् अन्यत्र गुणवृद्धी जुहाव जुहुवतुः-वुः जुहविथ जुहोथ जुहुवथुः-व जुहा-हव जुहुविव-म क्रादिनियमादिट् थलि भारद्वाजनियमाद्वेट्। होता होष्यति, हूयात्-यास्ताम्-यासुः अकृदिति दीर्घः, लुङि सिचि वृद्धिः अहौषीत् अहौष्टाम् अहौषुः अहौषीः अहौष्टम्-ष्ट अहौषम्-ष्व-ष्म। अहोष्यत्। कर्मादौ- हूयते अहावि हावयति-ते अजूहवत्-त जुहूषति अज्झनेति दीर्घः। कृत्सु-हवनं होतव्यं हवनीयं यत्-हव्यं होता हावकः हुतः हुत्वा प्रहूय जुह्वत्-ती, कर्मणि-हूयमानः, क्तिन्-आहुतिः, इस्-हविः, हविषे हितं हविष्यम्, क्विपि दीर्घे द्वित्वे च जुहूः (स्रुग्भेदः), कर्मण्यनीयर्-आहवनीयः, स्मराग्नौ जुह्वाना इति तु चानशि। ञिभी भये अक०। शपः श्लौ द्वित्वादौ बिभेति। **भियोऽन्यतरस्याम्** (६-४-११५) भिय इकारो वा स्याद्धलादौ क्ङिति सार्वधातुके। इति तसादौ इत्वं वा बिभितः-भीतः बिभ्यति बिभेषि बिभि-भीथः-बिभि-भीथ बिभेमि बिभि-भीवः-मः बिभेतु बिभि-भीतात्-ताम् बिभ्यतु बिभि-भीहि क्ङित्वान्न गुणः, बिभि-भीतात्-तम्-त बिभयानि याव-म आटि गुणायादेशौ। अबिभेत् अबिभि-भीताम् अबिभयुः अबिभेः अबिभि-भीतम्-त अबिभयम् अबिभि-भीव-म। बिभि-भीयात्-याताम्-युः यासुटो ङित्वात्पक्षे इत्वम्। लिटि भीह्रीभृहुवामित्यामि श्लुवत्त्वेन द्वित्वादि कृञाद्यनुप्रयोगश्च बिभयाञ्चकार-बभूव-आस। आमोऽभावे बिभाय बिभ्यतुः-भ्युः बिभयिथ बिभेथ बिभ्यथुः-भ्य बिभा-भय बिभ्यिव-म। भेता भेष्यति भीयात्। लुङि सिचि वृद्धिः षत्वम् अभैषीत् अभैष्टाम्-षुः अभैषीः-ष्टम्-ष्ट अभैषम्-ष्व-ष्म। अभेष्यत्। माभैषीरित्यत्र माभैरित्यपि केचित्, तेन माभैः शशाङ्क मम सीधुनि नास्ति राहुरित्यपि प्रयोगः। भीयते अभायि, णौ- बिभेतेर्हेतुभय इत्यात्वे पुकि भापयते, आत्वाभावे भियो हेतुभये इति षुकि भीषयते, हेतुभये तङ् अहेतुभये तु भाययति कुञ्चिकया, बिभीषति। कृत्सु-ल्यु-भीषणः भेतव्यम्, अच्-भयम्, भेता बिभ्यत्-ती, भीतः भीत्वा विभीय भेतुं भीतिः क्विप्-भीः, क्रु-भीरुः, क्रुकन्-भीरुकः, मक्-भीमः भीष्मः, आनकन्-भयानकः। ह्री लज्जायाम् अक० पूर्ववत् अजादौ संयोगपूर्वत्वेन यणोऽभावादियङ् विशेषः। जिह्रेति जिह्रीतः जिह्रियति जिह्रेषि जिह्रीथः जिह्रेमि जिह्रीवः-मः। जिह्रेतु जिह्रीतात्-ताम् जिह्रियतु जिह्रेहि जिह्रीतात्-तम्-त जिह्रयानि-याव-म। अजिह्रेत् अजिह्रीताम् अजिह्रयुः अजिह्रेः-ह्रीतम्-त अजिह्रयम्-ह्रीव-म। जिह्रीयात्-याताम्-युः। लिटि भीह्रीतिपक्षे आम् जिह्रयाञ्चकार-बभूव-आस, जिह्राय जिह्रियतुः-युः जिह्रयिथ जिह्रेथ जिह्रियथुः-य जिह्रा-ह्रय जिह्रियिव-म। ह्रेता ह्रेष्यति ह्रीयात्, अह्रैषीत्-ष्टाम्-षुः, अह्रेष्यत्। ह्रीयते, ह्रेपयति-ते अजिह्रिपत्-त, जिह्रीषति। ह्रेतव्यं, क्त-ह्रीणः ह्रीतः जिह्रियत्-ती ह्रीत्वा प्रह्रीय ह्रेतुम् क्विप्-ह्रीः। ओहाक् त्यागे सक०। श्लौ द्वित्वेऽभ्यासकार्ये जहाति। **ई हल्यघोः** (६-४-११३) श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि नतु घुसंज्ञकस्य। **जहातेश्च** (६-४-११६) जहातेरिद्वा स्याद्धलादौ क्ङिति सार्वधातुके। इति सार्वधातुकेषु पित्सु आकार एव, अपित्सु हलादिषु आत इत्वं पक्षे ईत्वम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नादिषु श्नाभ्यस्तयोरित्यातो लोपः, जहितः जहीतः जहति जहासि जहि-हीथः-थ जहामि जहि-हीवः-म। जहातु जहि-हीतात्-ताम् जहतु। **आ च हौ** (६-४-११७) जहातेर्हौ परे आत्स्यात् चादिदीतौ। जहाहि जहिहि जहीहि, जहि-हीतात्-तम्-त जहानि-हाव-म आटः पित्वान्नेत्वम्। अजहात् अजहि-ताम् अजहुः श्नाभ्यस्तयोरित्यातो लोपे अकारान्तत्वाभावाल्लङः शाकटायनस्येति जुस्विकल्पाभावेन अभ्यस्तेति नित्यं जुस्, अजहाः अजहि-हीतम्-त अजहाम् अजहि-हीव-म। लिङि यासुटि **लोपो यि** (६-४-११८) जहातेरातो लोपः स्याद्यादौ सार्वधातुके। इति लोपे जह्यात्-ह्याताम्-ह्युः। लिटि द्वित्वादौ आत औ णल इत्यौत्वे जहौ, अजाद्यार्धधातुकयोः क्ङिदिटोः आतोलोपइटिचेत्यालोपे जहतुः जहुः, थलि इडभावे जहाथ जहथुः-ह जहौ जहिव-म क्रादिनियमादिट्। हाता हास्यति, हेयात् एर्लिङीत्येत्वम्। लुङि यमरमेति इट्सकोः अपृक्तस्येडागमे सिचः सलोपे अहासीत् अहासिष्टाम्-सिषुः अहासीः-ष्टम्-ष्ट अहासिषम्-सिष्व-ष्म, अहास्यत्। प्र-विजहाति। हीयते अहायि, हापयति-ते जिहासति। हानं हेयं हातव्यं, यत्- हेयं जहत्-ती, कर्मणि- हीयमानः, हित्वा विहाय, ओदित्वान्निष्ठानत्वे हीनः हानं, नि-हानिः।

पृ पालनपूरणयोः सेट् सक०। **अर्तिपिपर्त्योश्च** (२-४-७७) अनयोरभ्यासस्य इकारोऽन्तादेशः स्याच्छ्लौ। इत्येकारे उदोष्ठ्यपूर्वस्येति ऋकारस्य उर्भावः, पिति परत्वाद्गुणः पिपर्ति पिपूर्तः उपधायांचेतिदीर्घः, पिपुरति। क्विप्-पुरुषः, क्रु-पुरुः, षन्-पुरीषः, न-पूर्णः, वनिन्-पर्व, उषच्-परुषः। **घृ** क्षरणदीप्त्योः अनिट् अक०। जिघर्ति, घञ्-आघारः। **भस** भर्त्सने सेट्० सक०। बभस्ति, मन्-भस्म, त्रन्-भस्त्रा, नञि क्विप्-नभः।

प्रयोगाः—सुतनु जहिहि कोपम्। यज्जुहोषि ददासि च। भस्मनीव हुतं हविः। न बिभेति कुतश्चन। मुण्डो भीषयते बालान्। ह्रिया नासां निगूहते। जटाधरः सञ्जुहुधीह पावकम्। भयेन च व्यथितं मनो मे।

अनुदात्तः (अनिट्) ङित् (आत्मनेपदी)—**माङ्** माने शब्दे च सक०। शपः श्लौ द्वित्वे **भृञामित्** (७-४-७६) भृञ् माङ् ओहाङ् एषां त्रयाणामस्य इत्स्याच्छ्लौ। इत्यभ्यासाकारस्य इत्वम्, हलादौ क्ङिति ईहल्यघोरित्यन्ताकारस्य ईत्वम्, अजादौ श्नाभ्यस्तयोरित्यातो लोपः। मिमीते मिमाते मिमते मिमीषे मिमाथे मिमीध्वे मिमे मिमीवहे-महे। मिमीताम् मिमाताम् मिमताम् मिमीष्व मिमाथाम् मिमीध्वम् मिमै मिमावहै-महै। अमिमीत अमिमाताम्-मताम् अमिमीथाः अमिमाथाम् अमिमीध्वम् अमिमि अमिमीवहि-महि। लिङि सीयुटो ङित्वादीत्वमपि मिमीत मिमीयाताम्-यीरन् मिमीथाः-मीयाथाम्-मीध्वम् मिमीय-मीवहि-महि। लिडादौ नेत्वम् ममे ममाते ममिरे, माता, मास्यते मासीष्ट। अमास्त-मासाताम्-सत अमास्थाः-मासाथाम्-माध्वम् अमासि-मास्वहि-स्महि, अमास्यत। उप-प्रमा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमाणे, उपमा-उपमाने, अनुमा-अनुमाने, संमा-संमाने, निर्मा-निर्माणे। कर्मादौ-मीयते निर्मीयते अमायि, मापयति-ते मित्सते। कृत्सु-मानम् अनुमानम् उपमानम् मातव्यं, यत्-मेयं प्रमेयं, माता मितः प्रमितः उपमितः अनुमिमानः, मित्वा प्रमाय मातुम्, उपमितिः अनुमितिः, अङ्-प्रमा उपमा अनुमा, ण युक्-माया, रु-मेरुः।

वि० ओहाङ् गतौ अनिट् सक०। भृञामिदित्यभ्यासस्येत्वं, सार्वधातुके हलादौ क्ङिति ईहल्यघोरितीत्वम्, अजादौ वातोलोपः जिहीते जिहाते जिहते, उज्जिहीते (उदेति) ण्युट्-हायनः, शान-उज्जिहानः।

प्रयोगाः—नहि करिणि दृष्टे चीत्कारेण तमनु मिमतेऽनुमातारः। वेदाः प्रमाणम्। उपमानोपमेययोः साम्यवर्णने उपमा। शिल्पी निर्माति क्रीडनकम्। असंमिमानो हृदये प्रहर्षः। मुखं केनोपमीयते। अमास्त पात्रेण पयः। निर्ममे भवनं भव्यम्। निर्मीयते चारु चित्रम्।

अनुदात्ताः (अनिटः) ञितः (उभयपदिनः)— डुभृञ् धारणपोषणयोः सक०। श्लौ द्वित्वे भृञामिदित्यभ्यासस्येत्वम्, पित्सु गुणः अजादौ यण्। बिभर्ति बिभृतः बिभ्रति बिभर्षि बिभृथः-थ बिभर्मि बिभृवः-मः। बिभृते बिभ्राते बिभ्रते बिभृषे बिभ्राथे बिभृध्वे बिभ्रे बिभृवहे-महे। बिभर्तु बिभृतात् बिभृताम् बिभ्रतु बिभृहि-भृतात्-तम्-त बिभराणि-राव-म पित्वाद्गुणः। बिभृताम्-आताम्-भ्रताम् बिभृष्व बिभ्राथाम्-भृध्वम् बिभरै-रावहै-महै। लङि पित्सु गुणे रपरत्वं, तिप्सिपोरिकारलोपे हल्ङ्यादिलोपे रेफस्य विसर्गश्च अबिभः अबिभृताम् अबिभरुः अभ्यस्तत्वाज्जुसि जुसिचेति गुणः, अबिभः अबिभृतम्-त अबिभरम् अबिभृव-म अबिभृत-भ्राताम्-भ्रत, अबिभृथाः-भ्राथाम्-भृध्वम्, अबिभ्रि अबिभृवहि-महि। बिभृयात्-याताम्-युः यासुटो ङित्वान्न गुणः। बिभ्रीत-भ्रीयाताम्-भ्रीरन्। लिटि भीह्रीभृहुवामित्यामि श्लुवत्त्वेन द्वित्वे अभ्यासस्येत्वे गुणे कृञाद्यनुप्रयोगः बिभराञ्चकार-चक्रे बभूव-आस, आमोऽभावे बभार बभ्रतुः-भ्रुः बभर्थ बभ्रथुः-भ्र बभार-भर बभृव-म क्रादित्वान्नेट् ऋदन्तत्वात्थल्यपि नेट्। बभ्रे-भ्राते-भ्रिरे। भर्ता भरिष्यति-ते ऋद्धनोरितीट्, भ्रियात् ऋतोरिङ् रिङ्विधिसामर्थ्यान्न दीर्घः भृषीष्ट उश्चेति कित्वान्न गुणः। लुङि सिचि वृद्धिः अपृक्तस्य ईट् षत्वम् अभार्षीत् अभार्ष्टाम्-र्षुः अभार्षीः-र्ष्टम्-र्ष्ट अभार्षम्-र्ष्व-र्ष्म। तङि सिचि ह्रस्वादङ्गादिति झलादौ सलोपः अभृत अभृषाताम्-षत अभृथाः-भृषाथाम्-भृढ्वम् अभृषि-ष्वहि-ष्महि। अभरिष्यत्-त। सं-प्रविभर्ति बिभृते भ्रियते अभारि भारयति-ते अबीभरत्-त, बुभूर्षति-ते उदोष्ठ्यपूर्वस्येत्युत्वे अज्झनेति दीर्घः। भरणं भर्तव्यं भरणीयं, क्यप्-भृत्यः, ण्यत्-भार्या भर्ता, घञ्-भारः सम्भारः बिभ्रत्-ती बिभ्राणः भृतः सम्भृतः भृत्वा सम्भृत्य ह्रस्वस्येति तुक्, भर्तुम्, ड्वित्वात्त्रिमप्-भृत्रिमम्। डुदाञ् दाने सक०। श्लौ द्वित्वेऽभ्यासह्रस्वे ददाति। तसादौ क्ङिति द्वित्वादौ घुत्वादीहल्यघोरितीत्वाभावे श्नाभ्यस्तयोरित्यातो लोपे चर्त्वे दत्तः ददति झावति आकारलोपः, ददासि दत्थः-त्थ, ददामि दद्वः-द्मः। दत्ते ददाते ददते दत्से दधाथे दद्ध्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ददे दद्वहे-द्महे। ददातु दत्तात्-त्ताम् ददतु, हौ घ्वसोरेद्धावित्येत्वाभ्यासलोपयोः देहि दत्तात्-त्तम्-त्त ददानि ददाव-म, दत्ताम् ददाताम् ददताम् दत्स्व ददाथाम् दद्ध्वम् ददै-दावहै-महै। अददात् अदत्ताम् अददुः सिजभ्यस्तेति नित्यं जुस्, अददाः अदत्तम्-त्त अददाम् अदद्व-द्म। अदत्त अददाताम् अददत अदत्थाः अददाथाम् अदद्ध्वम् अददि अदद्वहि-द्महि। दद्यात्-द्याताम्-द्युः, ददीत ददीयाताम् ददीरन् ददीथाः-दीयाथाम्-दीध्वम् ददीय-दीवहि-महि। लिटि द्वित्वादौ णल औत्वे, अजादौ क्ङिति आतो लोपे ददौ ददतुः-दुः ददिथ-ददाथ ददथुः दद ददौ ददिव-म क्रादिनियमादिट् थलि वेट्। ददे ददाते ददिरे ददिषे-दाथे-दिध्वे ददे-दिवहे-महे। दाता दास्यति-ते। देयात् एर्लिङीत्येत्वम्, दासीष्ट-सीयास्ताम्-सीरन्, लुङि गातिस्थेति सिचो लुक् अदात् अदाताम् अदुः अदाः अदातम्-त अदाम्-दाव म, तङि सिचि स्थाघ्वोरितीत्वे सिचः कित्वाद्गुणाभावे झलि ह्रस्वादङ्गादिति सिचो लोपे अदित अदिषाताम्-षत अदिथाः अदिषाथाम् अदिद्ध्वम् अदिषि-ष्वहि-ष्महि। अदास्यत्-त। उप-प्रदा-प्रदाने, आदा-उपादा-समादा-ग्रहणे, व्यादा-व्यादाने, प्रत्यादा-प्रत्यादाने, प्रतिदा-प्रतिदाने। कर्मादौ-दीयते अदायि दापयति-ते अदीदपत्-त, दित्सति-ते। कृत्सु-दानम्, आदानम् प्रदानं (स्वाम्यं) दातव्यं, सम्प्रदाने-दानीयः, यत्- देयम्, दाता-ददत्-ती ददानः, घञ्-दायः, ड-धनदः धनप्रदः, दत्वा आदाय दत्तः दातुम्, सन् अ-दित्सा, सन् उ-दित्सुः, त्रिमम्- दत्रिमम्, कि-आदिः। डुधाञ् धारणपोषणयोः सक०। पूर्ववत् दधयोरेव विशेषः। दधस्तथोश्च (८-२-३८) द्विरुक्तस्य झषन्तस्य धाञ् धातोर्वशोः भष् स्यात् तथयोः स्ध्वोश्चपरयोः। इति त-थ-स-ध्वेषु परेषु अभ्यासे जश्त्वेन जातस्य दस्य धः, परस्य धस्य जश्त्वचर्त्वे, पूर्वत्रासिद्धे न स्थानिवदित्याकारलोपे न स्थानिवत्त्वम्। दधाति धत्तः दधति दधासि धत्थः-थ दधामि दध्वः-ध्मः। धत्ते दधाते-धते धत्से दधाथे धध्वे दधे दध्वहे-ध्महे। दधातु धत्तात्-त्ताम् दधतु धेहि धत्तात्-त्तम्-त्त दधानि-व-म। धत्ताम् दधाताम्-धताम् धत्स्व दधाथाम् धध्वम् दधै-धावहै-महै। अदधात् अधत्ताम् अदधुः अदधाः अधत्तम्-त्त अदधाम्-ध्व-ध्म। अधत्त अदधाताम्-धत अधत्थाः अदधाथाम् अधध्वम् अदधि-ध्वहि-ध्महि। दध्यात्-ध्याताम्-ध्युः, दधीत दधीयाताम्-धीरन्। लिटि दधौ दधतुः-धुः दधिथ दधाथ दधथुः-ध दधौ दधिव-म। दधे-धाते-धिरे, दधिषे-धाथे-धिध्वे दधे दधिवहे-महे। धाता धास्यति-ते, धेयात्-यास्ताम्-यासुः, धासीष्ट-सीयास्ताम्-सीरन्। अधात् अधाताम् अधुः अधाः अधातम्-त अधाम्-धाव-म। अधित अधिषाताम्-षत अधिथाः अधिषाथाम् अधिढ्वम् अधिषि-ष्वहि-ष्महि। अधास्यत्-त। उप- अवधा-अवधाने, परिधा-परिधाने, निधा-आधा-स्थापने, व्यवधा-व्यवधाने, विधा-करणे, अपिधा-पिधाने, समाधा-समाधाने, अभिधा-कथने, प्रणिधा-प्रणिधाने, प्रतिधा-प्रत्याधा-प्रतिनिधाने, प्रतिविधा-प्रतीकारे, सन्धा-सन्धाने, सन्निधा-सन्निधाने, अनुसन्धा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुसन्धाने, अभिसन्धा-अभिसन्धौ, अन्वाधा-अन्वाधाने, उपधा-छलने, पुरोधा-पुरःस्थापने, अन्तर्धा-अन्तर्धाने, श्रद्धा-श्रद्धाकरणे; प्रणिदधाति प्रणिधत्ते नेर्गदेति णत्वम् । कर्मादौ-विधीयते व्यधायि परिधापयति-ते पर्यदीधिपत्-त, धित्सति-ते । कृत्सु-आधानं सन्धानं विधानं विधातव्यं परिधानीयं (वस्त्रं), यत्-परिधेयं, धाता परिधायकः परिहितः सन्निहितः तादौ किति दधातेर्हिः, हित्वा विधाय निधाय, पिधाय अपेरकारलोपः अन्तरङ्गानपि विधीन्बहिरङ्गो बाधते इति पूर्वमेव ल्यपि तादिकित्वाभावेन न हिः, धातुं विधातुं, नन्-धाना । (भृष्टयवः) । वन्-धीवा धीवरः, तुन्-धातुः, कि-विधिः सन्निधिः आधिः व्याधिः, अङ्-विधा उपधा (छद्म), सन् अ-विधित्सा, सन्-उ-विधित्सुः, किं किं दधाति क-किंकिरधा, कर्मणि ष्ट्रन्-धात्री, अधिकरणे कि-जलधिः, क्युन्-निधानम् ।

वि० **णिजिर्** शौचपोषणयोः अनिट् सक०उ० । **निजां त्रयाणां गुणः श्लौ** (७-४-७५)णिजिर् विजिर् विष् एषामभ्यासस्य गुणः स्यात् श्लौ । इत्यभ्यासस्य गुणे पिति लघूपधगुणे च नेनेक्ति नेनिक्तः नेनिजति, नेनिक्ते नेनिजाते नेनिजते **नाभ्यस्तस्याचिपिति सार्वधातुके** (७-३-८७) लघूपधगुणो न स्यात् । इति निषेधे नेनिजानि-जाव-म । ल्युट्-अवनेजनं प्रत्यवनेजनं निर्णेजनं (शोधनं), ण्वुल्- निर्णेजकः निर्णिक्तः (शोधितः), निर्णिज्य । **विजिर्** पृथग्भावे अनिट् अक० उ० । वेवेक्ति वेविक्ते विविक्तः (पृथग्भूतः) । **विष्लृ** व्याप्तौ अनिट् सक० उ० । वेवेष्टि वेविष्टे, घञ्-वेषः (नेपथ्यम्), यत्-वेष्यः (नटः), घञ्-परिवेषः (परिधिः), क-विषम् , णु-विष्णुः, णिचि- परिवेषणं परिविष्टः ।

प्रयोगाः--**प्रियमाधाय नुनुत्सुरस्मि तत् । निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् । रूपं देहि जयं देहि । परिधेहि नवं वासः । विधेहि देवि कल्याणम् । संहितायां सन्धिर्विधीयते । मुखं व्याददाति बिभर्मि तपसा विश्वम् । अभिहितं निहितं हृदये मया । नैव दित्सति वेतनम् । आदानं हि विसर्गाय सम्भारान्सन्भृत्य कार्यं विधेहि । पिधेहीदं पिधानेन । सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः । बिभ्राणोभिनवं वासः । हरिः सन्निधत्ते ।**

प्रश्नाः--जुहोत्यादिषु को विकरणः को वा विशेषः । जुहोत्यादिषु नानोपसर्गयोगेन बह्वर्था धातवः के । दाधाधात्वोरुपसर्गयोगे केऽर्थाः । अत्रोभयपदिनः के । अधोनिर्दिष्टवाक्यगतानि जौहोत्यादिकधातुरूपाणि विवृणुत, कृदन्तशब्दांश्च परिचिनुत-भिया देयं, ह्रिया देयं, श्रद्धया देयम् । हव्यं देवेभ्यः कव्यं पितृभ्यो दद्यात् । धैर्येण विजहौ शुचम् । आयुष्मतीदं परिधत्स्व वासः । विश्वम्भरो रक्षति । श्रान्तो भुजमुपधाय शिश्ये । आददीत निजं दायम् । अग्निहोत्रं जुहुयात्स्वर्गकामः । दधौ सम्भृत्य सम्भारम् । न बिभेति कुतश्चन । झटिति प्रतिवक्तव्यं समाधातुं परोदितम् । न भेतव्यं नभेतव्यम् । वसानः कौशेयं शिरसि निदधानोऽञ्जलिपुटम् । नजातु कामान्नभयाद्धर्मं जह्याज्जीवितस्यापि हेतोः । **इतिजुहोत्यादयः ।**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ दिवादयः।

उदात्ताः (सेटः) उदात्तेतः (परस्मैपदिनः)–दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु (व्यवहारः क्रयविक्रयरूपः, कान्तिरिच्छा) सक० अक०। सार्वधातुकेषु शपोपवादेन दिवादिभ्यः श्यन् (३-१-६९) एभ्यः श्यन्स्यात्सार्वधातुके। इति श्यनि य शेषे श्यनोऽपित्वेन ङित्वाद्गुणाभावे हलिचेति दीर्घः दीव्यति दीव्यतः दीव्यन्ति दीव्यसि थः-थ दीव्यामि-वः-मः। दीव्यतु-तात्-ताम् दीव्यन्तु दीव्य दीव्यतात्-तम्-त दीव्यानि-व्याव-म। अदीव्यत्-व्यताम्-व्यन्। दीव्येत्-व्येताम्-व्येयुः। दिदेव दिदिवतुः-वुः दिदेविथ दिदिवथुः-व दिदेव दिदिविव-म। देविता देविष्यति, दीव्यात्-व्यास्ताम्-व्यासुः हलिचेति दीर्घः। लुङि इटि नेटीति हलन्तलक्षणवृद्धिनिषेधे लघूपधगुणः अदेवीत्-विष्टाम्-विषुः, अदेविष्यत्। उप-प्रतिदीव्यति (प्रतिक्रीडति), प्र वि अभिदीव्यति। कर्मादौ दीव्यते अदीवि, देवयति-ते अदीदिवत्-त, दिदेविषति दिद्यूषति उदित्त्वेन क्त्वासनोर्वेट् इडभावे ...त्वेन छ्वोरित्यूठ् अज्झनेति दीर्घः। कृत्सु-देवनं देवितव्यम्, अच्-देवः-वी, ल्यु-देवनः देवकः दीव्यन्-न्ती देवित्वा द्यूत्वा प्रदीव्य द्यूतं वेट्कत्वान्नेट्, डिव्-द्यौः निष्ठानत्वे आद्यूनः (औदरिकः) देवितुम्। नृती गात्रविक्षेपे (नर्तने) अक०। श्यन्यपित्वान्न गुणः नृत्यति अनृत्यत् नृत्येत् लिटि तु गुणः कित्सु न ननर्त ननृततुः-तुः ननर्तिथ ननृतथुः-त ननर्त ननृतिव-म। नर्तिता। लृटि स्ये, सेऽसिचि कृतचृतछृदतृदनृतः (७-२-५७) एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्येड्वा स्यात्। इड्विकल्पे गुणः नर्तिष्यति नर्त्स्यति नृत्यात्, अनर्तीत्-र्तिष्टाम्-तिषुः, अनर्तिष्यत् अनर्त्स्यत्। नृत्यते नर्ति नर्तयति-ते अनीनृतत्, निनर्तिषति निनृत्सति सनि वेट् नर्तनं नर्तितव्यं नर्तनीयं, क्यप्-नृत्यं नर्तिता नर्तकः नृत्यन्-न्ती नर्तित्वा प्रनृत्य नर्तितुम् नृत्तम् ईदित्वान्नेट्। त्रसी उद्वेगे अक०। सार्वधातुकेषु वाभ्राशेति श्यन्वा श्यनोभावे शप् त्रस्यति त्रसति त्रस्यतु त्रसतु अत्रस्य-सत् त्रस्येत्-त्रसेत्। लिटि वाजॄभ्रमुत्रसामित्येत्वाभ्यासलोपौ वा तत्रास तत्रसतुः-तत्रसुः त्रेसतुः-सुः तत्रसिथ त्रेसिथ तत्रसथुः-स त्रेसथुः-स तत्रा-त्रस तत्रसिव-म त्रेसिव-म। त्रसिता-ष्यति त्रस्यात्। लुङि अतो हलादेरिति वा वृद्धिः अत्रासीत् अत्रसीत्-सिष्टाम्-सिषुः। अत्रसिष्यत्। सं-वि-परित्रस्य-सति। त्रस्यते अत्रसि त्रासयति-ते अतित्रसत्-त तित्रसिषति। त्रसनं त्रसितव्यं, घञ्-त्रासः, त्रसित्वा प्रत्रस्य त्रसितुम् त्रस्तः ईदित्वान्नेट् त्रस्यन् त्रसन्-न्ती, णौ-त्रासनं त्रासितः त्रासितुम्, क्नु-त्रस्नुः। जृष् जॄ वयोहानौ अक०। श्यनि ऋत इद्धातोरितीत्वे रपरत्वे हलिचेति दीर्घः जीर्यति-र्यतः-र्यन्ति जीर्यतु अजीर्यत् जीर्येत्। लिटि णलि द्वित्वादौ वृद्धौ जजार। अतुसादौ ऋच्छत्यॄतामिति गुणे रपरत्वे वा जॄभ्रमुत्रसामित्येत्वाभ्यासलोपविकल्पे जजरतुः-रुः जेरतुः-रुः जज-जेरिथ-रथुः-र जजा-जर जज-जेरिव-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म। स्यतासोरिति वृतोवेति इटो वा दीर्घः जरि-रीता जरि-रीष्यति। जीर्यात् ऋतइद्धातोरिति इर्भावे हलिचेति दीर्घः। लुङि जृस्तम्भुघति अङ्पक्षे ऋदृशोऽङिगुण इत्यगुणे अजरत् अजरिष्टाम्-रिषुः, अङोऽभावे सिचि इटि वृतोवेत्यस्य सिचि च परस्मैपदेष्विति निषेधे सिचिवृद्धिरिति वृद्धिः अजारीत्-जारिष्टाम्-रिषुः। अजरिष्यत् अजारिष्यत्। जीर्यते जरयति-ते अजीजरत्-त, सनि इट्सनि-वेति वेट् इटो वा दीर्घः जिजोर्षति जिजरि-रीषति। शतृ जीर्यन्-न्ती, अतृन्-जरत्-ती, यत्-अजर्यम्, क्त-जीर्णः, णौकर्तरि घञ्-जारः, षित्वादङ् जरा। एवं झृषः झीर्यतीत्यादि, अप्-झरः निर्झरः, औणादिकः-झर्झरः (वाद्यविशेषः)।

त्रि० **षिवु** तन्तुसन्ताने सक०। षः सः दीव्यतिवत् सीव्यति-तु असीव्यत् सीव्येत् सिषेव सीविता-ष्यति सीव्यात् असेवीत् असेविष्यत्। परिषीव्यति परिनिविभ्य इति षत्वम्, पर्यषीव्यत् पर्यसीव्यत् सिवादीनामिति वा षः, ल्युट्-सीवनं सीवनी (शिराविशेषः) सूत्वा सेवित्वा उदित्वाद्वेट्, स्यूतं वेट्क्त्वान्नेट् ष्ट्रन्-सूत्रम्, घञन्तात्कन्-प्रसेवकः (वीणाप्रान्तवक्रकाष्ठम्)। **ष्ठिवु** निरसने सक०। पूर्ववत् ष्ठीवतीत्यादि। निष्ठीवति, ल्युट्-ष्ठीवनम्, क्त-निष्ठ्यूतः। **प्लुष** दाहे सक०। प्लुष्यति अप्लोषीत्, क्त-प्लोषितः प्लोषणम्। **गुध** परिवेष्टने सक०। गुध्यति, अङ्-गोधा, कन्-गोधिका, ऊम-गोधूमः। **पुष्प** विकसने सक०। पुष्प्यति, अच्-पुष्पम्, कन्-पुष्पकम्। **तिम स्तिम** आर्द्रीभावे अक०। तिम्यति इन्-तिमिः (मत्स्यः) किरच्-तिमिरम् (तमः)। स्तिम्यति, क्त-स्तिमितः (आर्द्रः निश्चलः)। **व्रीड** चोदने लज्जायां च अक०। व्रीड्यति अव्रीडीत्, क्त-व्रीडितः, अ-व्रीडा (लज्जा)। **इष** गतौ सक०। इष्यति, घञ्-प्रैषः (नियोगः) ण्यत्-प्रेष्यः (नियोज्यः), युच्-अन्वेषणा पर्येषणा, ईकन्-इषीका (तृणगर्भः), तकन्-इष्टका। **षुह** चक्यर्थे (तृप्तौ) अक० सुह्यति, क्त-सुहितः (तृप्तः) सुहितस्य भावः सौहित्यम् (तृप्तिः)।

प्रयोगाः—अक्षैर्मा दीव्यः। नर्तक्यो ननृतुर्जगुः। दन्ता जीर्यन्ति जीर्यतः। त्रासेन व्याकुलं मनः। बालान्व्यत्रासयत्कपिः। नृत्यन्ति प्राङ्गणे बालाः। अक्षैर्दीव्यन्ति कितवाः। साङ्गहारं ननर्त रङ्गे नृत्यं प्रवर्तते। त्रस्यन्ती चलशफरीविघट्टितोरूः। जराजीर्णकलेवरः। तृष्णा न जीर्णा वयमेव जीर्णाः। द्यूते मनो मा कृथाः।

अनुदात्ताः (अनिटः) उदात्तेतः (परस्मैपदिनः)—व्यध ताडने (पीडने वेधने च) सक०। सार्वधातुकेषु श्यनो ङित्वाद्ग्रहिज्येति सम्प्रसारणम्। विध्यति विध्यतु अविध्यत् विध्येत्। लिटि पित्सु द्वित्वोत्तरं लिट्यभ्यासस्येति कित्सु द्वित्वात्पूर्वं ग्रहिज्येति सम्प्रसारणम् विव्याध विविधतुः-धुः विव्यधिथ विव्यद्ध भारद्वाजनियमाद्वेट् इडभावे झषस्तथोरिति थस्य धत्वं पूवधस्य जश्त्वम्, विविधयुः-ध विव्याध-व्यध विविधिव-म क्रादिनियमादिट्। व्यद्धा व्यत्स्यति विध्यात् ङित्वात्सम्प्रसारणम्। लुङि सिचि हलन्तलक्षणवृद्धौ धस्य जश्त्वचर्त्वयोः अपृक्तस्येटि अव्यात्सीत्, तामादौ तथयोर्धत्वे झलि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...लोपः धस्य जश्त्वं चर्त्वं अव्याद्धाम् अव्यात्सुः अव्यात्सीः अव्यात्तम्-त्त अव्यात्सम्-स्व-स्म, अव्यत्स्यत् । ...विध्यते अवेधि वेधयति-ते अविव्यधत्-त विव्यत्सति । व्यधनं वेद्धव्यं व्यत्-वेध्यं, वेद्धा, अप्-...व्यधः, ण-व्याधः व्यधः विध्यन् विद्धः विध्वा प्रविध्य वेद्धुम्, क्विप्-मृगावित्, कु-विधुः । राध वृद्धौ ...सक० । राध्यति-तु अराध्यत् राध्येत् रराध रराधतुः-धुः रराधिथ रराद्ध रराधिव-म, राद्धा रात्स्यति ...राध्यात् अरात्सीत् अरात्स्यत् । उप- विराध-विरोधे, अपराध-द्रोहे । राध्यते आराधयति आरिरात्सति । ...ल्युट्-विराधनम् अपराधनीयम् विराध्यन्, घञ्-अपराधः, तृच्-विराद्धा अपराद्धा, क्त-विराद्धः अप-...राद्धः विराद्धुम् अपराद्धुम्, णौ-आराधितव्यम् आराधितः ।

...वि० क्षिप प्रेरणे सक० । दीर्घवर्जं दीव्यतिवत् । क्षिप्यति अक्षैप्सीत्, क्षिप्त्वा प्रक्षिप्य क्षिप्तः प्रक्षेप्तुम्, रक्-क्षिप्रम् । शो ...सक० । ओतः श्यनि (७-३-७१) ओकारस्य लोपः स्यात् श्यनि । इत्योकारलोपः श्यति श्यतः श्यन्ति, श्यतु ...श्येत् । शशौ शाता शास्यति शायात् । लुङि विभाषाघ्राधेडिति सिचो लुक्पक्षे अशात् अशाताम् अशुः, लुगभावे ...सिचः अशासीत्-सिष्टाम्-सिषुः अशास्यत् । शाच्छोरन्यतरस्यामिति तादौ किति इत्वविकल्पः शात्वा शीत्वा ...निशितः (तीक्ष्णः), कन्-शाकः, दन्-शादः (घासः), ल्युट्-निशानं (तेजनम्) । छो छेदने सक० । श्यतिवत्, ...छ्यतः छ्यन्ति, य-छाया, क्त-छातः (अमांसो दुर्बलः) छितः (छिन्नः) । षोऽन्तकर्मणि (नाशने) पूर्ववत् स्यति, ...ति (परिणमति) अध्यवस्यति (निश्चिनोति) व्यवस्यति (उद्युङ्क्ते), णौ-अवसाययति (समापयति) पर्यवसाययति । ...यति), ल्युट्- अवसानं पर्यवसानं प्रत्यवसानं (भक्षणं), ण-व्यवसायः (उद्योगः) अध्यवसायः (निश्चयः) । ...खण्डने सक० । द्यति, लुङि अदात् गातिस्थेति सिचो लुक् । णौ-दापयति, ल्युट्-अवदानं (खण्डनं) ल्यप्- अवदाय ...त्वनिषेधः, क्त-अवत्तं हविः अचउपसर्गात्तः ।

प्रयोगाः—शरैर्विव्याध सारथिम् । विराद्ध एवं भवता विराद्धा बहुधा च नः । अपराद्धः क्षम्य-...ताम् । बाणेन हृदये विद्धः । व्याधो विध्यति पक्षिणः । मर्षणीयोयमज्ञस्यापराधः । क्रियासमभिहारेण ...राध्यन्तं क्षमेत कः ।

उदात्ताः- (सेटः) ङितोनुदात्तेतश्च (आत्मनेपदिनः)—षूङ् प्राणिप्रसवे वेट् सक० । श्यनि ...त्वादगुणो न सूयते सूयेते सूयन्ते सूयसे सूयेथे सूयध्वे सूये सूयावहे-महे । सूयताम्-येताम्-यन्ताम् ...स्व-येथाम्-यध्वम् सूयै-यावहै-महै । असूयत-येताम्-यन्त असूयथाः-येथाम्-यध्वम् असूये-यावहि-महि । ...येत-येयाताम्-येरन् सूयेथाः- येयाथाम्-येध्वम् सूयेय-येवहि-महि । लिटि द्वित्वादावुवङि द्वितीयसस्य ...त्वम् सुषुवे-वाते-विरे सुषुविषे-वाथे-विध्वे सुषुवे-विवहे-महे स्वरतिसूतीति विकल्पं बाधित्वा श्र्युकः ...कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । लुडादौ स्वरतिसूतीति वेट् सविता सोता, सविष्यते ...सोष्यते, सविषीष्ट सोषीष्ट । असविष्ट असोष्ट असवि-असोषाताम्-षत असविष्ठाः असोष्ठाः असवि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असोषाथाम्-ढ्वम् असविषि असोषि-ष्वहि-ष्महि। असविष्यत असोष्यत। कर्मादौ-सूयते असवि, सावयति-ते सुसूषते सनि ग्रहगुहोश्चेति कित्वान्न गुणः स्तौतिण्योरेवेत्यभ्यासस्य न षत्वम्। प्रसवितव्यं प्रसोतव्यम्, अप्-सवः (यागः) प्रसवः (उत्पत्तिः) प्रतिप्रसवः (पुनर्विधानम्) सूयमानः सूत्वा श्र्युकः क्तिीति नेट्, प्रसूय तृच्-सविता, सूतः स्वादय ओदित इत्योदित्वान्निष्ठानत्वं वेट्कत्वान्नेट्, प्रसूनम् (पुष्पम्)। दूङ् परितापे अक०। सूयतिवत् इट् तु नित्यम्। दूयते-ताम् अदूयत दूयेत दुदुवे दूयिता-ष्यते, दविषीष्ट अदविष्ट अदविष्यत। दूयते। दूयमानः दूनः श्र्युकः क्तिीति नेट्, क्तिन्-दूतिः, ल्यप्- विदूय। डीङ् विहायसा गतौ अक०। प्रायेणायमुत्पूर्वः। उड्डीयते-ताम् उदडीयत उड्डीयेत उड्डिड्ये उड्डयिता-ष्यते-षीष्ट, उदडयिष्ट-यिषाताम्-षत, उदडयिष्यत। भावादौ-उड्डीयते उड्डाययति-ते उड्डिडयिषते। उड्डयनम् उड्डयितव्यम् उड्डीयमानः उड्डीय उड्डीनः उड्डयितुम्, भावे क्त-प्रडीनम् उड्डीनं संडीनम् (उड्डयनगतिविशेषाः)। जनी प्रादुर्भावे (उत्पत्तौ आविर्भावे वा) अक०। श्यनि ज्ञाजनोर्जा (७-३-७९) अनयोर्जादेशः स्यात् शिति। इति जादेशे जायते-येते-यन्ते, जायतां-येतां-यन्ताम्। अजायत-येताम्-यन्त। जायेत-येयाताम्-रन्। लिटि जनेर्द्वित्वेऽभ्यासकार्ये गमहनेत्युपधालोपे नस्य श्चुत्वेन ञः जज्ञे-ज्ञाते-ज्ञिरे जज्ञिषे-ज्ञाथे-ज्ञिध्वे जज्ञे-ज्ञिवहे-महे। जनिता-ष्यते-षीष्ट। लुङि ते दीपजनबुधेति च्लेः पक्षे चिणि अतउपधाया इति वृद्धिप्राप्तौ जनिवध्योश्च (७-३-३५) अनयोरुपधाया वृद्धिर्न स्याच्चिञ्णिति कृिङति च। इति निषेधे चिणोलुगिति तलोपे अजनि, चिणोऽभावे सिचि इटि षत्वे ष्टुत्वे अजनिष्ट, आतामादौ सिचि इटि षत्वे अजनिषाताम्-षत अजनिष्ठाः-निषाथाम्-निढ्वम् अजनिषि-ष्वहि-ष्महि। अजनिष्यत। प्र-सं-विजायते। भावादौ-जायते जन्यते येविभाषेत्यात्वविकल्पः, अजनि जनयति अजीजनत् जिजनिषते। कृत्सु-जननं जनितव्यं जननीयम्, यत्-जन्यम्, अच्-जनः जनिता जनित्वा प्रजाय कित्वाज्जादेशः, जातः जातिः जनितुम् जायमानः जनिष्यमाणः, यक्-जाया, णौ-जनयिता जनकः जनितः जनयित्वा जनयन् कर्मणि-जन्यमानः। दीपी दीप्तौ अक०। दीप्यते-ताम् अदीप्यत दीप्येत, दिदीपे-पाते-पिरे, दीपिता-पिष्यते-पिषीष्ट। लुङि ते दीपजनेति पक्षे चिणि तलोपः अदीपि अदीपिष्ट-पिषाताम्-षत, अदीपिष्यत। प्र-सम्-उद्दीप्यते। भावदौ-दीप्यते अदीपि, दीपयति-ते अदिदीपत्-त दिदीपिषते, यङि- देदीप्यते। कृत्सु-दीपनं दीपितव्यं दीपनीयं दीपिता दीपकः दीपिका, क-दीपः प्रदीपः ल्यु-दीपनः दीपित्वा प्रदीप्य, ईदित्वान्निष्ठायां नेट् प्रदीप्तः उद्दीप्तः दीप्यमानः, यङ्-शानच्-देदीप्यमानः, णि क्त-उद्दीपितः, क्तिन्-दीप्तिः दीपितुम्। पूरी आप्यायने (प्रीणने) सक०। पूर्यते-ताम् अपूर्यत पूर्येत पुपूरे पूरिता-ष्यते-षीष्ट। लुङि ते दीपजनेति वा चिण् अपूरि अपूरिष्ट-रिषाताम्-षत, अपूरिष्यत। आ-सं-प्र-परिपूर्यते। कर्मादौ पूर्यते अपूरि, पूरयति-ते अपुपूरत्-त, कृत्सु-पूरणं पूरितव्यं पूरकः, क-पूरः (प्रवाहः) पूर्यमाणः पूरित्वा आपूर्य पूर्णः श्वीदित इति नेट्, पूरितुम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृ-पूरणः, णौ-पूरयितव्यं पूरितः पूरयितुम्, उ-पूरुः, इ-पूर्णिः पूर्णिं मिमीते इति पूर्णिमा, क्तिन्-पूर्तिः भावे क्त-पूर्तम् (खातादि)।

दि० तूरी गतित्वरणहिंसनयोः अक०। तूर्यते, क्त-तूर्णः, भावे-तूर्णम् (सत्वरम्), ण्यत्-तूर्यम् (वाद्यम्)। क्लिशू उपतापे सक०। क्लिश्यते क्लिश्यताम् चिक्लिशे अक्लेशिष्ट, क्लेशयति क्लिष्ट्वा क्लिशित्वा क्लिशितः क्लिष्टः क्त्वानिष्ठयोरिति वेट्, घञ्-क्लेशः। क्लिश्नातीति क्र्यादौ।

प्रयोगाः—न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति। जायेत मृत्योरपि पक्षपातः। अजनिष्ट सुतस्थिरेण नः। आपूर्यमाणे पक्षे कुर्यात्। प्रदीपं दीपय सखे। उड्डीयन्ते पतत्रिणः।सूयते वीररत्नम्। दूयमानेन मनसा। किमर्थं दूयसे वृथा। वसन्ते सर्वसस्यानां जायते पत्रशातनम्।

अनुदात्ताः (अनिटः) ङितोनुदात्तेतश्च (आत्मनेपदिनः)-लीङ् श्लेषणे (विलये) अक०। लीयते-ताम् अलीयत लीयेत, लिल्ये-ल्याते-ल्यिरे लिल्यिषे-वहे-महे क्रादिनियमादिट्। लुङादौ विभाषा लीयतेः (६-१-५१) लीलीङोरात्वं वा स्यादेज्विषये (अशिति) ल्यपि च। इति पक्षे आत्वं तदभावे गुणः लाता लेता, लास्यति लेष्यते, लासीष्ट लेषीष्ट, अलास्त अलासाताम्-सत अलास्थाः अलासाथाम् अलाध्वम् अलासि-स्वहि-स्महि, अलेष्ट-लेषाताम्-षत अलेष्ठाः-षाथाम्-ढ्वम् अलेषि-ष्वहि-ष्महि। अलास्यत अलेष्यत। प्र-सम्-नि-विलीयते। भावादौ-लीयते, णौ-लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने इत्यात्वाभावे नुग्विकल्पेन नुगभावे वृद्धावायादेशे च विलीनयति विलाययति, आत्वपक्षे लुग्विकल्पेन लुगभावे अर्तिह्रीति पुकि विलालयति विलापयति वा घृतम्, अन्यत्र तु नित्यमात्वे पुकि- लोहं विलापयति। कृत्सु-अच्-लयः विलयः प्रलयः, अधिकरणे-निलयः आलयः, खलचोरात्वप्रतिषेधः, ल्यप्-विलीय निलीय, क्त-विलीनः, लीनः, शान-निलीयमानः। प्रीङ् प्रीतौ अक०। प्रीयते-ताम् अप्रीयेत प्रीयेत पिप्रिये-याते यिरे-यिषे-यिवहे-महे क्रादिनियमादिट्। प्रेता-ष्यते-षीष्ट, अप्रेष्ट अप्रेषाताम्-षत अप्रेष्यत। भावादौ-प्रीयते प्राययति प्रीणातेरेव नकारागमः। कृत्सु-क-प्रियः प्रियशब्दात्तद्धितेषु प्रेमा प्रेष्ठः प्रेयान् प्रियस्थिरेति प्रादेशः, क्तिन्-प्रीतिः, ल्यप्-संप्रीय, शान-प्रीयमाणः। पद् गतौ सक०। पद्यते-ताम् अपद्यत पद्येत। लिट्येत्वाभ्यासलोपौ पेदे पेदाते-दिरे-दिषे-दिवहे -महे क्रादिनियमादिट्। पत्ता पत्स्यते पत्सीष्ट। लुङि चिण्ते पदः (३-१-६०) पदश्चेश्चिण्स्यात्तशब्दे परे। इति चिणि उपधावृद्धौ चिणोलुगिति तलोपे अपादि, अन्यत्र सिचि अपत्साताम्-त्सत अपत्थाः-पत्साथाम्-पद्ध्वम् अपत्सि-त्स्वहि-त्स्महि। अपत्स्यत। प्र पद्-शरणागतौ, सम्प्रपद्-सम्प्रतिपद्-स्वीकारे, विप्रतिपद्-सन्देहे, उपपद्-अभ्युपपद्-उपपत्तौ, व्युत्पद्-व्युत्पत्तौ, उत्पद्-उत्पत्तौ, निष्पद्-सम्पद्-सम्पत्तौ, विपद्-विपत्तौ, आपद् आपत्तौ। सोपसर्गस्यास्य प्रायिकः प्रयोगः सम्पद्यते उत्पद्यते इत्यादि। कर्मादौ-प्रतिपद्यते प्रत्यपादि, प्रतिपादयति-ते,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यापादयति (मारयति) प्रत्यपीपदत्-त, प्रतिपित्सते अभ्यासलोप इत्वं च। कृत्सु-णौ ल्युट् उपपादनं प्रतिपादनं प्रतिपादयितव्यं निष्पादनीयं, ण्यत्-प्रतिपाद्यम्, प्रतिपत्तव्यं प्रतिपत्ता सम्पादकः उत्पद्य विपद्य उत्पद्यमानः सम्पद्यमानः उत्पत्तिः सम्पत्तिः लृट्शान- सम्पत्स्यमानः, क्विप्-सम्पत् आपत् विपत्, मन्-पद्मम्। खिदु दैन्ये अक०। खिद्यते-ताम् अखिद्यत खिद्येत, चिखिदे-दाते-दिरे-दिषे-दिवहे-महे। खेत्ता खेत्स्यते खित्सीष्ट। लुङि-अखित्त झलोझलीति सलोपः अखित्साताम्-त्सत अखित्थाः-त्साथाम्-ध्वम् अखित्सि-त्स्वहि-त्स्महि, अखेत्स्यत। भावादौ-खिद्यते अखेदि खेदयति-ते अचीखिदत्-त चिखित्सते। कृत्सु- खेदनीयं, घञ्-खेदः, क्त-खिन्नः रदाभ्यामिति नत्वम्, खिद्यमानः यत्-खेद्यं, णौ-खेदितः। विद सत्तायाम् अक०। विद्यते-ताम् अविद्यत विद्येत विविदे-दाते-दिरे-दिषे-दिवहे-महे क्रादिनियमादिट्। वेत्ता वेत्स्यते वित्सीष्ट, अवित्त अवित्साताम्-त्सत अवित्थाः-त्साथाम्-द्ध्वम् अवित्सि-त्स्वहि-त्स्महि, अवेत्स्यत। विद्यते अवेदि वेदयति-ते वित्सते। कृत्सु-वेदनं, शान-विद्यमानः वेत्तुम् वित्तिः। वेत्तीति ज्ञाने अदादौ। बुध अवगमने सक०। बुध्यते-ताम् अबुध्यत बुध्येत बुबुधे-धाते-धिरे-धिषे-धिवहे-महे। बोद्धा तस्य धः भोत्स्यते भुत्सीष्ट भष्भावश्चर्त्वं च। लुङि दीपजनेति पक्षे चिणि तलोपे अबोधि, पक्षे सिचि झलोझलीति सलोपः, तस्य धत्वं, लिङ्सिचाविति कित्वान्न गुणः अबुद्ध, से ध्वे परे भष्भावः अभुत्साताम्-त्सत अबुद्धाः अभुत्साथाम् अभुद्ध्वम् अभुत्सि-त्स्वहि-त्स्महि अभोत्स्यत। उप-प्रबुध्-प्रबोधे, उद्बुध-उद्बोधे। कर्मादौ-बुध्यते अबोधि, बोधयति बुधयुधेति णौ परस्मैपदमेव अबूबुधत्, बुभुत्सते। कृत्सु-बोधनं बोद्धव्यं बोधनीयं, ण्यत्-बोध्यं घञ्-बोधः बोद्धा बोधकः बुध्यमानः बुद्ध्वा प्रबुद्ध्य बोद्धुम् बुद्धः प्रबुद्धः, णौ-बोधितः प्रबोद्ध्यमानः बोधयित्वा सम्बोध्य। बोधति-ते इति भ्वादौ, बोधयतीति चुरादौ। युध सम्प्रहारे अक०। युध्यते-ताम् अयुध्यत युध्येत युयुधे-धाते-धिरे-धिषे, योद्धा योत्स्यते, युत्सीष्ट, अयुद्ध झलोझलीति सलोपः लिङ्सिचाविति कित्वान्न गुणः, अयुत्साताम्-त्सत अयुद्धाः-त्साथाम्-ध्वम्, अयुत्सि-त्स्वहि-त्स्महि, अयोत्स्यत। सं-प्र-सम्प्र-नियुद्ध्यते। युध्यते अयोधि योधयति बुधयुधेति णौ परस्मैपदमेव, अयूयुधत्, युयुत्सते। कृत्सु-योधनं योद्धव्यं योधनीयं, ण्यत्-योध्यं योद्धा योधकः, ल्यु-सुयोधनः, अच्-योधः, भावे क्त-युद्धं नियुद्धं (बाहुयुद्धम्) युध्यमानः युद्ध्वा, नियुध्य, क्वनिप्-सहयुद्ध्वा, करणे क-आयुधम्, क्विप्-युत्, आनचि द्वित्वं-युयुधानः, सन् अ- युयुत्सा, सन् उ-युयुत्सुः। युधमिच्छतीत्यर्थे क्यचि युध्यति। अनुरुध कामे (इच्छायामनुरोधे) सक०। अनुरुध्यते-ताम् अन्वरुध्यत अनुरुध्येत अनुरुरुधे अनुरोद्धा रोत्स्यते-रुत्सीष्ट अन्वरुद्ध-रुत्साताम्-त्सत अन्वरोत्स्यत। अनुरुध्यते अन्वरोधि अनुरोधयति अनु-रुरुत्सते। अनुरोद्धव्यम् घञ्-अनुरोधः अनुरुध्यमानः अनुरुद्धः अनुरुध्य अनुरोद्धुम्, रुणद्धीति रुधादौ। मन ज्ञाने सक०। मन्यते-ताम् अमन्यत मन्येत मेने-नाते-निरे-निषे-निवहे-महे। मन्ता मंस्यते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१६
मंसीष्ट, अमंस्त अमंसाताम्-सत अमंस्थाः-मंसाथाम्-न्ध्वम् अमंसि-स्वहि-स्महि, अमंस्यत। उप-संमन्-संमतौ विमन्-विमतौ, अनुमन्-अनुमतौ, अवमन्-अनादरे, कर्मादौ-मन्यते अमानि मानयति-ते मीमांसते। कृत्सु-मननं मन्तव्यं मननीयं, एयत्- मान्यः, घञ्-मानः अवमानः संमानः, मन्यमानः मतः संमतः मत्वा अवमत्य मतिः अनुमतिः सम्मतिः संमन्तुम् णिनि-पण्डितमानी, खश्-पण्डितंमन्यः, क्यप्-मन्याः (गलशिरा), असुन्-मनः, उ-धादेशः-मधु, उ-मनुः, इन्-उत्वं च-मुनिः। युज समाधौ अक०। युज्यते-ताम् अयुज्यत युज्येत युयुजे-जाते-जिरे, योक्ता योक्ष्यते युक्षीष्ट, अयुक्त-अयुक्षाताम्-क्षत अयुक्थाः अयुक्षाथाम् अयुग्ध्वम् अयुक्षि-क्ष्वहि-क्ष्महि, अयोक्ष्यत। उप-प्रयुज्-प्रयोगे, संयुज्-संयोगे, वियुज्-वियोगे। भावादौ-युज्यते योजयति-ते युयुक्षते। कृत्सु-योजनं घञ्-योगः, घिनुण्-योगी, युक्तः युञ्जानः युक्तिः युक्त्वा संयुज्य। नैतद्युज्यते इति तु युनक्तेः कर्मकर्तरि। सृज विसर्गे अक०। सृज्यते-ताम् असृज्यत सृज्येत ससृजे-जाते-जिरे, लुटि सृजिदृशोरित्यमि ऋकारस्य यणि व्रश्चेति जस्य षत्वे ष्टुत्वे स्रष्टा-रौ-रः, लृटि अमि यणि षत्वे कत्वे सस्य षत्वम् स्रक्ष्यते। आशिषि लिङ्सिचाविति कित्वान्न गुणो सृक्षीष्ट-क्षीयास्ताम्-क्षीरन्। लुङि झलो झलीति सलोपे जस्य षत्वे ष्टुत्वे असृष्ट असृक्षाताम्-क्षत असृष्ठाः-क्षाथाम्-ग्ध्वम् असृक्षि-क्ष्वहि-क्ष्महि। अस्रक्ष्यत। सं-वि सृज्यते। संसृज्यते विसर्जयति विसृक्षते। सर्जनं स्रष्टव्यं सर्जनीयं, घञ्-सर्गः विसर्गः उपसर्गः सृज्यमानः स्रष्टा सृष्टः विसृष्टः सृष्ट्वा विसृज्य स्रष्टुं, करणेऽनीय-विसर्जनीयः।

दि० दीङ् क्षये अक०। दीयते, क्त-दीनः ओदित्वातिदेशान्नत्वम्। धीङ् आधाने सक०। धीयते, क्त-धीनः, न धीनः-। रीङ् स्रवणे सक०। रीयते, क्त-रीणः (स्नुतः) क्तिन्-रीतिः, असुन् तुट्-च रेतः। पीङ् पाने सक०। पीयते, आपीय निपीय, पिबतेस्तु निपायेत्येव, पीतः णौ-पाययति निगरणेति परस्मैपदम्, पिबतेस्तु नपादम्येति परस्मैपद-निषेधे पाययते। ईङ् गतौ सक०। ईयते, ल्यप्-प्रेय प्रतीय, यत्-उपेयम्। तप ऐश्वर्ये वा अक०। वाकारात्पक्षे शप्-लुक् च। तप्यते-ताम् अतप्यत तप्येत, तपति तेपे-पाते-पिरे, तताप तेपतुः-पुः, तप्त्वा प्रतप्य तपनः। तपतीति सन्तापे। लिशु अल्पीभावे अक०। लिश्यते, घञ्-लेशः क्स- लिक्षा।

प्रयोगाः-प्रतिपेदे जयश्रियम्। निलीयमाना विहगाः। प्रकाममप्रीयत यज्वनां प्रियः। बोद्धारो मत्सरग्रस्ताः। सविता बोधयति पङ्कजान्येव। क्रमादमुं नारद इत्यबोधि सः। अमानि तत्तेन निजाय-शोयुगम्। चन्द्रो मेघे निलीयते। सम्पत्तौ च विपत्तौ च। सोतीव खिद्यते। को विद्यमानगति-र्मासितुमुत्सहेत। मानावमानयोस्तुल्यः।

उदात्ताः (सेट्) स्वरितेत् (उभयपदी)-मृष तितिक्षायाम् (क्षान्तौ) सक०। मृष्यति-ते-तु-ताम् अमृष्यत्-त मृष्येत्-त, ममर्ष ममृषतुः-षुः ममर्षिथ ममृषिव-म, ममृषे-षाते-षिरे, मर्षिता मर्षिष्यति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ते मृष्यात् मर्षिषीष्ट अमर्षीत् अमर्षिष्ट अमर्षिष्यत्-त । परिमृष-परेर्मृष इति परस्मैपदमेव परिमृष्यति। मृष्यते अमर्षि मर्षयति-ते मिमर्षिषति-ते । मर्षणं मर्षितव्यं मर्षणीयं, मर्षिता मृष्यमाणः मर्षित्वा प्रमृष्य मर्षितुम्, तितिक्षायां मर्षितः, अन्यत्र अपमृषितं वाक्यम् (अविस्पष्टम्), युच्-दुर्मर्षणः ।

वि० **शुचिर्** पूतीभावे सक० अक० । शुच्यति-ते, लुङि इरित्वादङ् वा अशुचत् अशोचीत्, अशोचिष्ट, क्त-शुक्तं (रसान्तरं गतम्) क्तिन्-शुक्तिः, संज्ञायां कन् शुक्तिका । **णह** बन्धने अनिट् सक० । नह्यति-ते नद्धा नत्स्यति-ते अनात्सीत् अनद्ध, क्त-नद्धः (अ) पिनद्धः, क्विप्-उपानत्, इञ्-नाभिः, ष्ट्रन् ङीप्-नद्ध्री (वरत्रा) **रञ्ज** रागे अनिट् अक० । रज्यति-ते, अनु- विरज्यति-ते, क्त-रक्तः विरक्तः । **शप** आक्रोशे अनिट् सक० । शप्यति-ते अभिशप्तः (आक्रुष्टः) घञ्-अभिशापः ।

प्रयोगाः--न मृष्यामहे वयम् । मर्षणीयोयमपराधः । दुर्मर्षणो मृष्यति नैव युष्मान् ।

दिवादिषु पुषादय उदात्तेतः (परस्मैपदिनः)—

अनुदात्ताः (अनिटः)-पुष पुष्टौ सक० । पुषादीनां लुङि अङ् विशेषः । पुष्यति-तु अपुष्यत् पुष्येत् पुपोष पुपुषतुः-षुः पुपोषिथ पुपुषिव-म क्रादिनियमदिट् । पोष्टा पोक्ष्यति पुष्यात्, लुङि पुषादीत्यङि ङित्वान्न गुणः अपुषत्-षताम्-षन्, अपोक्ष्यत् । पुष्यते अपोषि पोषयति-ते अपूपुषत्-त पुपुक्षति । पोषणं पोषणीयं, ण्यत्-पोष्यं पोषकः, घञ्-पोषः पुष्यन्-न्ती पुष्ट्वा प्रपुष्य पोष्टुम् पुष्टि- क्यप्-पुष्यः, णौ-पोष्यमाणः प्रपोष्य पोषयितुम् । **शुष** शोषणे अक० । शुष्यति-तु अशुष्यत् शुष्येत् शुशोष शोष्टा शोक्ष्यति शुष्यात् अशुषत् अशोक्ष्यत् । प्र-सं-परिशुष्यति । शुष्यते अशोषि शोषयति-ते अशूशुषत्-त शुशुक्षति । शोषणं शोषणीयं शोष्यं शोषकः शोषः शुष्यन् शोष्टुं क्त-शुष्कः, णौ-शोषितः तुष प्रीतौ अक० । तुष्यति-तु अतुष्यत् तुष्येत् तुतोष तुतुषतुः-षुः तोष्टा तोक्ष्यति तुष्यात् अतुषत् अतोक्ष्यत् । प्र-सं-परितुष्यति । तुष्यते अतोषि तोषयति-ते अतूतुषत्-त तुतुक्षति । तोषणं सन्तोषणं तोषणीयः तोष्यः तोषः सन्तोषः तोषकः तुष्यन्-न्ती तुष्ट्वा सन्तुष्य तुष्टः तोष्टुं, णौ- तोषितः प्रतोष्य। **दुष** वैकृत्ये (विकारे) अक०। दुष्यति-तु अदुष्यत् दुष्येत् दुदोष दोष्टा दोक्ष्यति दुष्यात् अदुषत् अदोक्ष्यत्। दुष्यते अदोषि दोषयति दूषयति वा चित्तविकारे इति वोत्वम्, दूषणं, णौ- उत्वं वा दूषणं, दोषणं दूष्यः दो-दूषणीयः दोषः दूषकः दुष्यन् दुष्टः प्रदुष्य, घिनुण्-दोषी, ईकन्-दूषिका (नेत्रमलम्)। **श्लिष** आलिङ्गने सक० । श्लिष्यति-तु अश्लिष्यत् श्लिष्येत् । शिश्लेष श्लेष्टा श्लेक्ष्यति श्लिष्यात् । लुङि

श्लिष आलिङ्गने (३-१-४६) श्लिषश्च्लेरालिङ्गन एव क्सो नान्यत्र । शलन्तत्वात्प्राप्तं क्सं बाधित्वा परत्वात्पुषादित्वादङि प्राप्ते तद्बाधनाय पुनः क्सो विधीयते, योगविभागादालिङ्गन एव क्सो नान्यत्र, भाव- कर्मणोश्चिणस्तु पुरस्तादपवादन्यायान्न बाधः । आलिङ्गने-अश्लिक्षत्-क्षताम्-क्षन्, अन्यत्र अङि समाश्लि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृ० (समयुज्यत) जतु काष्ठम् । अश्लिषत्-षताम्-षन्, अश्लेक्ष्यत् । उप-आश्लिष्-आलिङ्गने, संश्लिष् सम्बन्धे, प्रश्लिष्-गौणसम्बन्धे । श्लिष्यते अश्लेषि श्लेषयति-ते । श्लेषणम् आश्लेष्टव्यम्, घञ्-श्लेषः आश्लेषः प्रश्लेषः श्लिष्टः आश्लिष्टः श्लिष्ट्वा, आश्लिष्यन्-ती आश्लेष्टुम्, मन्-श्लेष्मा (कफः)। ष्विदा गात्रप्रक्षरणे (घर्मस्रुतौ) अक०। स्विद्यति-तु अस्विद्यत् स्विद्येत् सिस्वेद स्वेत्ता स्वेत्स्यति स्विद्यात् अस्विदत् अस्वेत्स्यत्। प्र-अभिस्विद्यति। स्विद्यते अस्वेदि स्वेदयति-ते असिस्विदत्-त। स्वेदनं स्वेदनीयं स्वेद्यः, घञ्-स्वेदः प्रस्वेदः प्रस्विन्नः प्रस्विद्य प्रस्वेत्तुम्। द्युतादित्वादङ्विद्धावप्यर्थभेदात्पुषादौ पुनः पाठः। क्रुध क्रोधे अक०। क्रुध्यति-तु अक्रुध्यत् क्रुध्येत् चुक्रोध-चुक्रुधतुः-धुः-धिथ चुक्रुधिव-म। क्रोद्धा क्रोत्स्यति क्रुध्यात् अक्रुधत् अक्रोत्स्यत्। क्रुध्यते अक्रोधि क्रोधयति-ते अचुक्रुधत्-त चुक्रुत्सति। क्रोधनं क्रोद्धव्यं क्रोधः, युच्-क्रोधनः, क्रुध्यन्-न्ती क्रुद्धः क्रुद्ध्वा संक्रुध्य क्रोद्धुम्। क्षुध बुभुक्षायाम् अक०। क्षुध्यति-तु अक्षुध्यत् क्षुध्येत् चुक्षोध क्षोद्धा क्षोत्स्यति क्षुध्यात् अक्षुधत् अक्षोत्स्यत्। क्षुध्यते क्षोधयति-ते। क्विप्-क्षुत् टापि क्षुधा, क्षुध्यन्-न्ती क्त्वानिष्ठयोर्वसतिक्षुधोरितीट् क्षुधित्वा क्षुधितः-तवान् प्रक्षुध्य। शुध शौचे अक०। शुध्यति-तु अशुध्यत् शुध्येत् शुशोध शोद्धा शोत्स्यति शुध्यात् अशुधत् अशोत्स्यत्। प्र-वि-परि-अभि-संशुध्यति। शुध्यते अशोधि शोधयति-ते अशूशुधत्-त शुशुत्सति। शोधनं शोधनीयं शोध्यं शोधकः शुद्धः, अ-शुद्धः विशुद्धः शोद्धुम् शुद्धिः णौ-संशोध्य परिशोधितः परिशोधयितुम्। षिधु संराद्धौ अक०। सिध्यति-तु असिध्यत् सिध्येत्, सिषेध सिषिधतुः-धुः सिषेधिथ सिषिधिव-म। सेद्धा सेत्स्यति सिध्यात् असिधत् असेत्स्यत्। प्र-संसिध्यति। सिध्यते, णौ सिध्यतेरपारलौकिके इत्यात्वम् अन्नं साधयति, पारलौकिके तु तपः सेधयति तापसः। घञ्-आसेधः (बन्दीकरणम्), क्त-सिद्धः प्रसिद्धः सिधित्वा सेधित्वा सिध्वा उदित्वाद्वेट् इटि रलोव्युपधादिति वा कित्वम्, सिद्धिः संसिद्धिः।

वि० कृश तनूकरणे सक०। कृश्यति, निष्ठायामनुपसर्गात्फुल्लेति निपातनात् कृशः कशयति, आनुक्-कृशानुः।

उदात्ताः—(सेटः)-असु क्षेपणे सक०। अस्यति-तु आस्यत् अस्येत् आस आसतुः-सुः आसिथ-व-म असिता-ष्यति अस्यात्। लुङि पुषादित्वादङि अस्यतेस्थुक् (७-४-१७) अस्यतेस्थुगागमः स्यादङि परे। इति थुकि आस्थत्-स्थताम्-स्थन्-आस्थः-स्थतम्-त आस्थम्-स्थाव-म। आसिष्यत्। अस्य पुषादित्वादेव अङि सिद्धे अस्यतिवक्तिख्यातिभ्योऽङित्यत्रास्यतिग्रहणं तङर्थम्-तङ् तु उपसर्गादस्यत्यूह्योरिति वक्ष्यते, परस्मैपदिन एव पुषाद्यङ्। उपसर्गादस्यत्यूह्योर्वेति वाच्यमित्युपसर्गयोगे आत्मनेपदविकल्पेनोभयपदम्, निरस्-निरसने, प्रास्-प्रक्षेपे, समस्-संक्षेपे, व्यस्-विस्तारे, अभ्यस्-अभ्यासे, न्यस्-विन्यस्-स्थापने, विपर्यस्-विपर्यये, निरस्यति-ते निरास्थत्-त इत्यादि। कर्मादौ-अस्यते निरस्यते न्यरासि, आसयति-ते, निरसिषिषति-ते। कृत्सु-निरसनं व्यसनं, घञ्-समासः व्यासः। अभ्यासः विपर्यासः, कर्मणि घञ्-प्रासः (खड्गः), समस्तः व्यस्तः विपर्यस्तः वेट्कत्वान्नेट् निर-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यन्-न्ती, कर्मणि- अभ्यस्यमानः; असित्वा अस्त्वा उदित्वाद्वेट् निरस्य निरसितुम्; ण्यत्-टाप्-समस्या, उरन्-असुरः, सावसेर्क्रन्-स्वसा। यसु प्रयत्ने अक०। यसोऽनुपसर्गात् (३-१-७१) संयसश्च (३-१-७२) अनुपसर्गात्सम्पूर्वाच्च यसः श्यन्वा स्यात्। पक्षे शप् यस्यति यसति, संयस्यति संयसति। प्रायेणायं सोपसर्गः प्रयुज्यते प्रयस्यति-तु प्रयस्येत्। प्रययास प्रयसतुः-सुः-सिथ व-म। प्रयसिता-सिष्यते प्रयस्यात् प्रायसत् प्रायसिष्यत्। आयस्- आयासे, निर्यस्-निर्गमे, प्रयस्यते प्रायासि, प्रयासयति-ते आयासयति-ते आयियिसिषते। कृत्सु-प्रयसनं प्रयसितव्यम्, घञ्-प्रयासः आयासः, कर्मणि-निर्यासः (वृत्तरसः) प्रयस्यन्-न्ती, उदित्वाद्वेट् यस्त्वा यासित्वा प्रयस्य, वेट्कत्वान्नेट् प्रयस्तः। णौ-आयासनम् आयासितः आयास्य आयासयितुम्। भ्रंशु अधःपतने अक०। श्यनि ङित्वादनिदितामिति नलोपः भ्रश्यति-तु अभ्रश्यत् भ्रश्येत्। बभ्रंश-शतुः-शुः-शिथ-व-म। भ्रंशिता-ष्यति भ्रश्यात् कित्वान्नलोपः अभ्रशत् अङि ङित्वान्नलोपः अभ्रंशिष्यत्। प्र-वि-परिभ्रश्यति। भ्रश्यते अभ्रंशि, भ्रंशयति-ते। भ्रंशनं भ्रंशितव्यं, घञ्-भ्रंशः भ्रश्यन्-न्ती, भ्रंशित्वा भ्रष्ट्वा उदित्वाद्वेट् अनिटि कित्वान्नलोपः, परिभ्रश्य, भ्रष्टः वेट्कत्वान्नेट् भ्रंशितुम्। भृशु अधः पतने इत्यपि भृश्यतीत्यादि, क-भृशम् (अत्यन्तम्)। ञितृष पिपासायाम् अक० तृष्यति-तु अतृष्यत् तृष्येत् ततर्ष ततृषतुः-षुः ततर्षिथ ततृषिव-म। तर्षिता-ष्यति तृष्यात् अतृषत् अतर्षिष्यत्। तृष्यते अतर्षि तर्षयति-ते। कृत्सु-तर्षणं तर्षितव्यं, तृष्यन्-न्ती, ञित्वात्कर्तरि क्तः तृषितः तृषित्वा तर्षित्वा तृषिमृषीति वा कित्वाद्गुणविकल्पः। क्विप्-तृट्, अङ्- तृषा, न-तृष्णा, घञ्-तर्षः। हृषु तुष्टौ अक०। हृष्यति-तु अहृष्यत् हृष्येत्। जहर्ष जहृषतुः-षुः जहर्षिथ जहृषिव-म। हर्षिता-ष्यति हृष्यात् अहृषत् अहर्षिष्यत्। प्रहृष्यति। हृष्यते अहर्षि हर्षयति-ते जिहर्षिषति। हर्षणं हर्षितव्यं, घञ्-हर्षः हृष्यन्-न्ती हर्षितः हर्षित्वा प्रहृष्य हर्षितुम्। कुप क्रोधे अक०। कुप्यति-तु अकुप्यत् कुप्येत् चुकोप चुकुपतुः-पुः चुकोपिथ चुकुपिव-म, कोपिता-ष्यति-कुप्यात् अकुपत् अकोपिष्यत्। प्र-परि-अभिकुप्यति। कुप्यते अकोपि, कोपयति-ते चुकोपिषति। कोपनं कोपितव्यं, घञ्-कोपः कुप्यन्-न्ती कुपितः कुपित्वा कोपित्वा वा कित्वम्, प्रकुप्य, णौ-प्रकोप्य, कोपितुं, ल्यु-कोपनः। लुभ गार्ध्ये (आकाङ्क्षायाम्) अक०। लुभ्यति-तु अलुभ्यत् लुभ्येत्, लुलोभ लुलोभिथ लुलुभिव-म, तादौ तीषसहेति वेट् लोभिता लोब्धा लोभिष्यति लुभ्यात् अलुभत् अलोभिष्यत्। प्र-परिलभ्यति। लुभ्यते अलोभि, लोभयति-ते अलूलुभत्। लोभनं प्रलोभनं लोभितव्यं लोब्धव्यं लोभनीयं, घञ्-लोभः लुभ्यन्-न्ती लोभित्वा लुभित्वा लुब्ध्वा कित्वस्य इटश्च विकल्पः प्रलुभ्य लोभितुं लोब्धुम् लुब्धः वेट्कत्वान्नेट्, णौ-प्रलोभितः प्रलोभ्य लोभयितुम्। क्षुभ सञ्चलने अक०। क्षुभ्यति-तु अक्षुभ्यत् क्षुभ्येत् चुक्षोभ क्षोभिता-ष्यति क्षुभ्यात्- अक्षुभत् अक्षोभिष्यत्। प्र-परि-संक्षुभ्यति क्षुभ्यते अक्षोभि क्षोभयति-ते अचुक्षुभत्-त चुक्षुभिषति। क्षोभणं क्षोभणीयं घञ्-क्षोभः विक्षोभः क्षुभ्यन्-ती क्षुभित्वा क्षोभित्वा क्षुब्धः (मन्थः) क्षुब्धस्वान्तेति निपातनान्नेट् अन्यत्र क्षुभितः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शोभितः। **क्लिदू** आर्द्रीभावे ऊदित्वाद्वेट् अक०। क्लिद्यति-तु अक्लिद्यत् क्लिद्येत् चिक्लेद चिक्लिदतुः-दुः चिक्लिदिथ चिक्लेत्थ चिक्लिदिव-म चिक्लिद्व-द्म। ऊदित्वाद्वेट् क्लेदिता-दिष्यति, क्लेत्ता-त्स्यति क्लिद्यात् अक्लिदत् अक्लेदिष्यत् अक्लेत्स्यत्। वि-सं-परिक्लिद्यति। क्लिद्यते अक्लेदि क्लेदयति-ते। क्लेदनं क्लेदनीयं क्लेदितव्यं क्लेत्तव्यं, घञ्-क्लेदः धिक्लेदः उत्क्लेदः क्लिन्नः वेट्क्तवान्नेट्, क्लेदित्वा क्लिदित्वा क्लित्वा क्त्वेटौ वा क्लेदितुं क्लेत्तुम्, क्तिन्-विक्लित्तिः।

वि० जसु मोक्षणे सक०। जस्यति, नञि रः-अजस्रम्। **दसु** उपक्षये सक०। दस्यति, र-दस्रौ (आश्विनेयौ) नित्यं ...। **वसु** स्तम्भे अक०। वस्यति, क्त-वस्तः (छागः)। **प्लुष** दाहे सक०। प्लुष्यति प्लोषितः अप्लुषदित्यङर्थोऽत्र भौवादिकस्य तु अप्लौषीत्। **बिस** प्रेरणे सक०। बिस्यति, क-बिसम् (मृणालम्), तन्-बिस्तः (मानविशेषः)। ...त्सर्गे सक०। बुस्यति, क-बुसम् खलेबुसम्। **मुस** खण्डने सक०। मुस्यति, कल-मुसलम्, ङी-मुसली (गृहगोधा), तन्-...कन्-मुस्तकम्। **मसी** परिणामे सक०। मस्यति, क्त कन्-मस्तकम् (शिरः), तु-मस्तु (मण्डः), ऊर-मसूरः। **लुट** ...ने अक०। लुट्यति लुलोट अलुटत्, भौवादिकस्य तु अलोटीत्। **उच** समवाये (मिश्रणे) अक०। उच्यति, क्त-...ष्यञि-औचित्यम् ती,असुन्-ओकः (गृहम्), व लत्वंच-उल्वम् (अन्त्रम्)। **रुष** रोषे सक०। रुष्यति रुरोष रोषिता ...तीषसहेति वेट् घञ्-रोषः रोषित्वा रुषित्वा रुष्ट्वा, वेट्क्तवान्नेट् रुष्टः रोषितुं रोष्टुम्। **ञिमिदा** स्नेहने अक०। मेद्यति ...मेदः (वसा)। **ऋधु** वृद्धौ अक०। ऋध्यति क्त-ऋद्धः समृद्धः, क्तिन्-ऋद्धिः समृद्धिः, क्यप्-ऋध्यम्। **गृधु** अभि-...कांक्षायाम् सक०। गृध्यति, अङ्-गर्धा, क्नु-गृध्नु, क्रन्-गृध्रः, गर्धित्वा गृध्वा वेट्क्तवान्नेट् गृद्धः।

प्रयोगाः- क्लिन्नगात्रश्चकरूपे। पुनः पुनः प्रायसदुत्प्लवाय सः। लोभः पापस्य कारणम्। ...यास्थं नैकतया स्थितं श्रुतिगणम्। अष्टस्य कान्या गतिः। शक्तिर्निपुणताभ्यासः। क्षुधया तृषया पीडितः। प्रौढिर्व्यासमासयोः। कुप्यन्ति हितवादिने। लोभाद्मतिः क्षुभ्यति। प्रस्विन्नगात्रोतिशयेन ...ष्यति। अभ्यस्यन्ति वटवो वेदम्।

पुषादिषु रधादय उदात्ताः (वेटः)-**रध** हिंसासंराद्ध्योः (संराद्धिः पाकः) रधादिषु वेट्कत्वं विशेषः। रध्यति-तु अरध्यत् रध्येत्। लिटि **रधिजभोरचि** (७-१-६१) एतयोर्नुमागमः स्यादचि। ...त्यजादिषु नुमि ररन्ध ररन्धतुः-न्धुः एत्वाभ्यासलोपौ बाधित्वा परत्वान्नुमि संयोगात्परत्वेनाकित्वान्न नलोपः। थलि द्वित्वादौ रधादिभ्यश्चेति विकल्पेन इटि अजादित्वान्नुमि ररन्धिथ, इडभावे नुम्न थस्य धत्वे पूर्वधस्य जश्त्वे ररद्ध ररन्धिव-म, इडभावे एत्वाभ्यासलोपौ रेध्व-ध्म। लुडादाविट्पक्षे नुमि प्राप्ते **नेट्यलिटि रधेः** (७-१-६२) लिड्वर्जे इटि रधेर्नुम्न स्यात्। इति निषेधे रधिता रद्धा, रधिष्यति रत्स्यति रध्यात्। लुङि अङि नुमि अनिदितामिति नलोपः अरधत् अरधिष्यत् अरत्स्यत्। रध्यते रन्ध-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यति (पाचयति) । रन्धनं रन्धकः रधित्वा रध्वा रधितुं रद्धुम् । णश अदर्शने (नाशे) अक० । नश्यति-तु अनश्यत् नश्येत् । ननाश नेशतुः-शुः एत्वाभ्यासलोपौ, नेशिथ इडभावपक्षे मस्जिनशोर्झलि (७-१-६०) अनयोर्झलि नुम्स्यात् । इति नुम्यनुस्वारे व्रश्चेति षत्वे ष्टुत्वे ननंष्ठ नेशथुः नेश ननाश-नश नेशिव-म नेश्व-श्म । नशिता नंष्टा, नशिष्यति नङ्क्ष्यति षत्वकत्वे नश्यात् । लुङ्यङि इडभावे अनशत् अनङ्क्ष्यत् अनशिष्यत् । प्र-विनश् प्रणाशे, प्रणश्यति उपसर्गादसमासेपीति णत्वम् । नशेः षान्तस्य (८-३-३६) षान्तस्य नशेर्णत्वं न स्यात् । तेनेह न-प्रनंष्टा, भूतपूर्वषत्वेपि न- प्रनङ्क्ष्यति । भावादौ नश्यते अनशि, नाशयति-ते अनीनशत्-त निनशिषति निनङ्क्ष्यति । घञ्-नाशः प्रणाशः, क्त-नष्टः प्रणष्टः वेट्कत्वान्नेट्, नशित्वा नंष्ट्वा विनश्य नशितुं नष्टुम् नश्यन्-न्ती, णौ-नाशनं विनाश्य विनाशितः नाशयितुं घरच्-नश्वरः । तृप प्रीणने वेट् तृप्तौ अक० तर्पणे सक० । तृप्यति-तु अतृप्यत् तृप्येत् ततर्प ततृपतुः-पुः ततर्पिथ ततर्प्थ तत्रप्थ इडभावे अनुदात्तस्यचर्दुपधस्येति पक्षे अमि यण्, ततृपथुः-प ततर्प ततृपिव-म ततृप्व-प्म । तर्पिता तर्प्ता त्रप्ता, तर्पिष्यति तर्प्स्यति त्रप्स्यति, तृप्यात् । लुङि स्पृशमृशेति सिच्पक्षे रधादित्वादिड्विकल्पेन इट्पक्षे नेटीति वृद्धिनिषेधे अतर्पीत्-र्पिष्टाम्-र्पिषुः अतर्पीः-र्पिष्टम्-ष्ट अतर्पिषम्-ष्व-ष्म, इडभावे अमि यणि वृद्धौ अत्राप्सीत् अत्राप्ताम् झलोझलीति सलोपः, अत्राप्सुः अत्राप्सीः अत्राप्तम्-प्त अत्राप्सम्-प्स्व-प्स्म, अमोऽभावे हलन्तलक्षणवृद्धौ अतार्प्सीत् अतार्प्ताम् प्सुः अतार्प्सीः- प्र्तम्-प्र्त अतार्प्सम्-प्स्व-प्स्म, सिजभावे पुषादित्वादङ् ङित्वान्न गुणः अतृपत्-पताम्-पन्, अतर्पिष्यत् अत्रप्स्यत् अतर्प्स्यत् । तृप्यते अतर्पि, तर्पयति-ते अतीतृपत्-त, तितर्पिषति तितृप्सति, तर्पकः तर्पित्वा तृप्त्वा सन्तृप्य तृप्तः वेट्कत्वान्नेट् , तृप्यन्-न्ती, णौ- तर्पितः तर्पयितुम् । दृप हर्षमोहनयोः (मोहनं गर्वः) अक० । तृप्यतिवत्सर्वम् । दृप्यति-तु अदृप्यत् दृप्येत्,ददर्प, दर्पिता दृप्ता दर्प्ता, दर्पिष्यति द्रप्स्यति दर्प्स्यति, दृप्यात् , अदर्पीत् अद्राप्सीत् अदार्प्सीत् अदृपत् , अदर्पिष्यत् अद्रप्स्यत् अदर्प्स्यत् । दृप्यते दर्पयति-ते दिदर्पिषति दिदृप्सति, ल्युट्-दर्पणः, अप्-दर्पः दृप्यन् दृप्तः । द्रुह जिघांसायाम् सक० । द्रुह्यति-तु अद्रुह्यत् द्रुह्येत् दुद्रोह दुद्रुहतुः-हुः दुद्रोहिथ इडभावे वाद्रुहमुहस्निहामिति पक्षे हस्य घत्वे जश्त्वे थस्य धत्वे दुद्रोग्ध, घत्वाभावे होढ इति ढत्वे थस्य धत्वे ष्टुत्वे पूर्वढलोपे दुद्रोढ दुद्रुहथुः-ह दुद्रोह दुद्रुहिव-म दुद्रुह्व-ह्म । द्रोहिता, घत्वे द्रोग्धा, ढत्वे द्रोढा, द्रोहिष्यति, इडभावे घत्वे जश्त्वचर्त्वाभ्यां कत्वे, घत्वाभावे ढत्वे कत्वे च षत्वे भष्भावे ध्रोक्ष्यति । द्रुह्यात् लुङ्यङि अद्रुहत् , अद्रोहिष्यत् अध्रोक्ष्यत् । द्रुह्यते अद्रोहि, द्रोहयति-ते अदुद्रुहत्-त, दुद्रोहिषति दुद्रुहिषति । घञ्-द्रोहः घिद्रोहः, घिनुण्-विद्रोही, तृच्-द्रोहिता द्रोग्धा द्रोढा, द्रुह्यन्-न्ती, द्रुग्धः द्रोहित्वा द्रुहित्वा द्रुग्ध्वा द्रूढ्वा, इट्कित्वघत्वानां विकल्पः, द्रोहितुं द्रोग्धुं द्रोढुम्, द्रुग्धः द्रूढः वेट्कत्वान्नेट् , क्विप्-मित्रध्रुक् । मुह वैचित्त्ये अक० । पूर्ववत् मुह्यति-तु अमुह्यत् मुह्येत्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुमोह मुमुहतुः-हुः मुमोहिथ मुमोढ मुमुहिव-म-ह्व-ह्म। मोहिता मोग्धा मोढा, मोहिष्यति मोक्ष्यति, मुह्यात् अमुहत्, अमोहिष्यत् अमोक्ष्यत्। सं-वि- प्रमुह्यति। मुह्यते अमोहि मोहयति-ते अमूमुहत्-त, मुमुहिषति मुमोहिषति। मोहनं मोहः, क्त-मुग्धः मूढः मोहित्वा मुहित्वा मुग्ध्वा मूढ्वा विमुह्य, मुह्यन्, ख-मूर्धदेशश्च- मूर्खः।

ष्णुह उद्गिरणे सक० स्नुह्यति, स्नोहः स्नुग्धः। ष्णिह प्रीतौ अक०। स्निह्यति-तु अस्निह्यत्-स्निह्येत्, स्नेहिता स्नेग्धा स्नेढा, स्नेहिष्यति स्नेक्ष्यति स्निह्यात् अस्निहत् अस्नेहिष्यत् अस्नेक्ष्यत्। घञ्-स्नेहः, क्त-स्निग्धः, उत्स्निह क्विप्-उष्णिक् (छन्दोविशेषः) इति रधादयः।

प्रयोगाः-त्रातः काकोदरो येन द्रोग्धापि करुणात्मना। पितॄनताप्सीत्समसंस्त बन्धून्। न क्रोत्स्यसि विनङ्क्ष्यसि। ननु हालाहल मास्म तात दृप्यः। नाग्निस्तृप्यति काष्ठानाम्। मद्येन मुमुहुर्मुहुः। दर्पो भ्रंशयति श्रियः। रन्धनाय स्थाली। महत्त्वं वृथा द्रुह्यति। शुचा मुह्यति मे मनः। द्रोह आत्मविनाशाय।

पुषादिषु शमादय उदात्ताः (सेटः)—शमु उपशमे अक०। शमादीनां नित्येट्कत्वं दीर्घश्च विशेषः। **शमामष्टानां दीर्घः श्यनि** (७-४-७४) शमादीनामष्टानां दीर्घः स्याच्छ्यनि। इति श्यनि दीर्घः शाम्यति-तु अशाम्यत् शाम्येत् शशाम शेमतुः-मुः शेमिथ-व-म, शमिता-ष्यति शम्यात्। लुङि पुषादित्वा-दङ् अशमत् अशमिष्यत्। शम्यते अशमि शमयति प्रशमयति अमन्तत्वेन मित्वाद्ध्रस्वः, रूपं निशामयति (पश्यति) शमोऽदर्शने इति दर्शने मित्वाभावान्न ह्रस्वः, अशीशमत् शिशमिषति। शमनं शमनीयं, ल्यु-शमनः, शाम्यन्-न्ती, शमित्वा शान्त्वा उदित्वाद्वेट्, अनिटि अनुनासिकस्यक्विझलोरिति दीर्घः, शान्तः उदित्त्वान्नेट्, शमितुम् निशम्य, घिनुण्-शमी, अच्-शमः, णौ-शमितः शान्तः वादान्तस्वान्तेति पक्षे णि लुगनिट्त्वं च, कल-शमलं (पापं) क्तिन्-शान्तिः तितुत्रेति नेट् अनुनासिकस्येति दीर्घः। दमु उपशमे अक०। पूर्ववद्दीर्घः दाम्यति-तु अदाम्यत् दाम्येत् ददाम देमतुः-मुः-मिथ-व-म, दमिता-ष्यति दम्यात् अदमत्-मिष्यत्। दम्यते दमयति-ते अणावकर्मकादित्यस्य नपादम्येति निषेधात्पदद्वयं मित्वाद्ध्रस्वः, अदीदमत्-त दिदमिषति। दमनं दमितव्यं दमनीयम्, अच्-दमः दाम्यन्-न्ती दमित्वा दान्त्वा दान्तः दमितुं दान्तिः, उनस्-दमुनाः (अग्निः) ड-दण्डः। श्रमु तपसि खेदे च अक०। श्राम्यति-तु अश्राम्यत् श्राम्येत् शश्राम शश्रमतुः-मुः-मिथ-व-म। श्रमिता-ष्यति श्रम्यात् अश्रमत्-मिष्यत्। वि-परिश्राम्यति। श्रम्यते अश्रमि श्रमयति वृत्तिकृन्मते श्रामयति, शिश्रमिषति। ल्यु-श्रमणः, अच्-श्रमः, घञ्-विश्रमः विश्रामः परिश्रमः, अधिकरणे आश्रमः श्रमित्वा श्रान्त्वा श्रान्तः श्रमितुं श्रान्तिः विश्राम्यन्-न्ती। भ्रमु अनवस्थाने (भ्रमणे) अक०। वाभ्राशेति वा श्यन् पक्षे शप्। श्यनि शमामष्टानामिति दीर्घः। भ्राम्यति-तु भ्रमति-तु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभ्राम्यत् अभ्रमत् भ्राम्येत् भ्रमेत् । बभ्राम बभ्रमतुः-मुः बभ्रमिव-म । भ्रमिता-ष्यति भ्रम्यात् अभ्रमत्-मिष्यत् । विभ्रम-विभ्रमे, परिभ्रम-परितो भ्रमणे, संभ्रम-संभ्रमे, उद्भ्रम-उद्भ्रमणे । भ्रम्यते अभ्रमि भ्रमयति-ते बिभ्रमिषति । भ्रमणं भ्रमितव्यं भ्रमणीयम्, अच्-भ्रमः संभ्रमः विभ्रमः भ्राम्यन् भ्रमन् भ्रमित्वा भ्रान्त्वा उदित्वाद्वेट्, भ्रान्तः सम्भ्रान्तः वेट्कत्वान्नेट् भ्रमितुम्, घिनुण्-भ्रमी, सन् उ-विभ्रमिषुः। क्षमू सहने ऊदित्वाद्वेट् सक० । क्षाम्यति-तु अक्षाम्यत् क्षाम्येत् । चक्षाम चक्षमतुः-मुः चक्षमिथ-व-म चक्षन्थ-व-म, स्वरतिसूतीति वेट् म्वोश्चेति पक्षे णत्वे चक्षण्व-एम । क्षमिता क्षन्ता क्षमिष्यति क्षंस्यति, क्षम्यात् अक्षमत् अक्षमिष्यत् । क्षम्यते-अक्षमि, क्षमयति मित्वाद्ध्रस्वः, चिक्षमिषति । क्षमितव्यं क्षन्तव्यम् अच्-क्षमः (समर्थः), ण्यत्-क्षम्यः क्षमित्वा क्षान्त्वा क्षान्तः वेट्कत्वान्नेट् क्षाम्यन् क्षान्तिः अषित्वान्नास्य अङ् । क्लमु ग्लानौ अक० । वाभ्राशेति श्यन्वा, पक्षे शप् , श्यनि शपि च ष्ठिवुक्लमुचमां शितीति दीर्घः क्लाम्यति-तु क्लामति-तु अक्लाम्य-मत् क्लाम्ये-मेत् चक्लाम चक्लमतुः-मुः चक्लमिथ-व-म, क्लमिता-ष्यति क्लम्यात् अक्लमत्-मिष्यत् । क्लम्यते अक्लमि । क्लमयति । अच्-क्लमः क्लमित्वा क्लान्त्वा उदित्वाद्वेट् , क्लान्तः वेट्कत्वान्नेट्, क्लान्तिः तितुत्रेति नेट् , क्लमितुम्, घिनुण्-क्लमी । शपीव श्यन्यपि ष्ठिवुक्लमीति दीर्घे सिद्धेस्य शमादिपाठो घिनुणर्थः । मदी हर्षे अक० । माद्यति-तु अमाद्यत् माद्येत् । ममाद मेदतुः-दुः-दिथ-व-म, मदिता-ष्यति मद्यात् अमदत्-दिष्यत् । प्रमद्-प्रमादे, उन्मद् उन्मादे । मद्यते अमादि, मदीहर्षग्लेपनयोरिति घटादिपाठात्तत्र ह्रस्वे मदयति, अन्यत्र मादयति ल्यु-मदनः, प्रमदितव्यं, गदमदेत्यनुपसर्गे यत्-मद्यम्, मदोनुपसर्गे इत्यप्-मदः प्रमदसंमदौ हर्षे इत्यप् घञ्-प्रमादः उन्मादः माद्यन् मदित्वा, मत्तः ईदित्वान्नेट् नध्याख्येति नत्वनिषेधः मदितुम्, इष्णुच् उन्मदिष्णुः, घिनुण्-उन्मादी, किरच्-मदिरा, खश्- इरम्मदः (मेघज्योतिः) ।

वि० तमु काङ्क्षायाम् (ग्लानौ) अक० । ताम्यति, क्त-तान्तः, उलच् वुक् च- ताम्बूलम् , रक्-ताम्रम् असच्-तमसः असुन्-तमः, क्तिन्-तान्तिः । **इति शमादयः पुषादयश्च वृत्ताः ।**

प्रयोगाः—शशाम वृष्ट्यापि विना दवाग्निः। चक्रं भ्रमति मस्तके । नक्षाम्यन्तीदं मनीषिणः। शमो दमस्तपः शौचं क्षान्तिरिन्द्रियनिग्रहः । भ्रमयति चक्रं कुलालः । शान्तो दान्तस्तितिक्षुः । नश्यन्त्यर्थाः प्रमाद्यतः । नायं कार्यक्षमः । विश्राम्यन्ति मनीषिणः । आश्रमोपरोधो माभूत् । व्यर्थं परिश्राम्यति सम्भ्रान्तो बटुः । क्षान्तिरत्र गरीयसी ।

प्रश्नाः--दिवादिषु को विकरणः । पुषादिषु रधादिषु शमादिषु च के विशेषाः । दिवादिषु वैकल्पिकः श्यन् केषु धातुषु । उपसर्गयोगे नानार्था धातवः के । सेटो नेटो वेट्काश्च धातवः के । धातुषु उदित्वे ऊदित्वे ईदित्वे च के विशेषाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधस्तनवाक्यगतानि दैवादिकधातुरूपाणि विवृणुत, कृदन्तशब्दाँश्च परिचिनुत—शेते शुष्यति ताम्यति प्रलपति ...ति प्रेङ्खति भ्राम्यत्युल्लुठति प्रणश्यति गलत्युन्मूर्छति त्रुट्यति। भ्रम धार्मिक निःशङ्कम्। जातस्य हि ध्रुवो मृत्युर्ध्रुवं ...तस्य च। मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः। दूयते मानसं मे। विशश्रमुर्न मेरूणां छायास्वध्यास्य सैनिकाः। ...ते विषं विद्या। देवाँस्तोषय पूजया। पापं नश्यति कीर्तनात्। पितरस्तर्पितास्तेन। कानने पुष्पिता लताः। नृत्य...तो दिवि। नियुद्धे जयमीहते। धुर्यान्विश्रामय क्षणम्। वसन्ते भ्रमणं पथ्यम्। प्रतिपेदे जयश्रियम्। **इति दिवादयः।**

अथ स्वादयः।

अनुदात्ताः (अनिटः) ञितः (उभयपदिनः)—षुञ् अभिषवे (अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च)। स्नाने अक० अन्यत्र सक०। षस्य सः। सार्वधातुकेषु शपोपवादेन स्वादिभ्यः श्नुः (३-१-७३) एभ्यः श्नुः स्यात्सार्वधातुके। इति श्नौ नुशेषे तस्यापित्वेन ङित्वाद्धातोर्गुणाभावे ...त्सु नोर्गुणः सुनोति सुनुतः सुन्वन्ति अन्तादेशो उवङं बाधित्वा हुश्नुवोः सार्वधातुक इति यण्, सुनोषि सुनुथः-थ सुनोमि सुनुवः-मः सुन्वः-न्मः लोपश्चास्यान्यतरस्यामिति वोकारलोपः। तङि श्नावु...यतो गुणाभावः अजादौ हुश्नुवोरिति यण् सुनुते सुन्वाते-न्वते सुनुषे-न्वाथे-नुध्वे सुन्वे सुनुवहे-महे सुन्वहे-न्महे उकारलोपविकल्पः। सुनोतु सुनुतात्-ताम् सुन्वतु सुनु उतश्चेति हेर्लुक् सुनुतात् ...म्-त सुनवानि-वाव-म आटः पित्वेन हुश्नुवोरिति यणं बाधित्वा गुणेऽवादेशः। सुनुताम्-न्वाताम्-न्वताम् सुनुष्व-न्वाथाम्-नुध्वम् सुनवै-वावहै-महै। असुनोत्-नुताम्-न्वन् अन्तादेशो उवङं बाधित्वा हुश्नुवोरिति यणि इकारसंयोगान्तकारयोर्लोपः, असुनोः-नुतम्-त असुनवम्, ...नुव-म-न्व-न्म। असुनुत-न्वाताम्-न्वत असुनुथाः-न्वाथाम्-नुध्वम् असुन्वि-नुवहि-महि-न्वहि-न्महि। सुनुयात्-याताम्-युः झेर्जुसि यासुटि सलोपे येननाप्राप्तिन्यायेन अपित्सार्वधातुक ङित्वाश्रयस्य निषेधस्य जुसिचेति गुणेन बाधेपि यासुटो ङित्वाश्रयस्य निषेधस्य बाधाभावेन गुणाभावे ...पदान्तादिति पररूपम्। सुन्वीत-न्वीयाताम्-न्वीरन्। सुषाव सुषुवतुः-वुः इणः परत्वेन द्वितीय...स्य षत्वम्, सुषविथ सुषोथ सुषुविव-म क्रादिनियमादिट् थलि वेट्। सुषुवे-वाते-विरे सुषुविवहे-...हे। सोता सोष्यति-ते, सूयात्-कित्वेनागुणे अकृदिति दीर्घः, सोषीष्ट-षीयास्ताम्-षीरन्, लुङि ...ः सिचि स्तुसुधूञ्भ्य इति इटि अपृक्तस्येडागमे सलोपे भूसुवोस्तिङीति गुणनिषेधे सिचिवृद्धिरिति ...आवादेशे असावीत्-विष्टाम्-विषुः, तङि सिचि गुणे षत्वादौ असोष्ट असोषाताम्-षत असोष्ठाः-...थाम्-सोढ्वम् असोषि-ष्वहि-ष्महि। असोष्यत्-त। प्रायेणायमभिपूर्वः प्रयुज्यते अभिषुणोति उप...र्गात्सुनोतीति षत्वम्, अभ्यषुणोत् प्राक्सितादिति षत्वम्, अभिसुषाव स्थादिष्वभ्यासेनेति नियमा...भ्यासस्य न षत्वम्। **सुनोतेः स्यसनोः** (८-३-११७) स्ये सनि च परे सुञः षो न स्यात्। अभिसो-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्यति विसोष्यति । सूयते असावि, सावयति-ते असूषुवत्-त, सुसूषति-ते । सवनं (यागविशेषः) अभि-षोतव्यम्, अप्-सवः (यागः) अभिषवः, सुन्वन्-न्ती सुन्वानः, सुतः सुत्वा अभिषूय सोतुम्, ङ्वनिप्-सुत्वा (सोमयाजी), क्यन्-सुरा । षिञ् बन्धने सक० । सुनोतिवत् उकारेकारौ विशेषः । सिनोति सिनुते, सिनोतु सिनुताम्, असिनोत् असिनुत, सिनुयात् सिन्वीत, सिषाय सिष्यतुः-ष्युः सिषयिथ सिषेथ सिष्यिव-म, सिष्ये-ष्याते-ष्यिरे, सीयात् सेषीष्ट, असैषीत्-सैष्टाम्-षुः असैषीः-सैष्टम्-ष्ट असैषम्-ष्व-ष्म, असेष्ट-षाताम्-षत असेष्ठाः-षाथाम्-सेढ्वम् असेषि-ष्वहि-ष्महि, असेष्यत्-त । सीयते साययति-ते सिषीषति-ते । क्त-सितः (बद्धः) प्रसितः (तत्परः), संज्ञायां सितः (शुक्लः) सितस्य भावः सितिमा (श्वैत्यम्), सिता (शर्करा), तुन्-सेतुः, क्रिन् दीर्घश्च-सीरम् (हलम्), सिनाति-सिनीते इति क्र्यादौ । चिञ् चयने (रचनायाम्) सक० । पूर्ववत् चकारो विशेषः । चिनोति चिनुते, चिनोतु चिनुताम्, अचिनोत् अचिनुत, चिनुयात् चिन्वीत । लिटि द्वित्वाद्युत्तरम्

विभाषा चेः (७-३-५८) अभ्यासात्परस्य चिञः कुत्वं वा स्यात् । इति वा कुत्वम् । चिकाय-क्यतुः-क्युः चिचाय-च्यतुः-च्युः चिक-चयिथ चिके-चेथ चिक्यिव-म-च्यिव-म । चिक्ये-क्याते-क्यिरे चिच्ये-च्याते-च्यिरे । चेता चेष्यति-ते, चीयात् चेषीष्ट, अचैषीत्-चैष्टाम्-चैषुः, अचेष्ट-चेषाताम्-षत । अचेष्यत्-त । उप प्रचि-व्याप्तौ, उपचि-अक-वृद्धौ, अपचि अक-क्षये, सञ्चि-समूहने, अवचि-आहरणे, निश्चि-निश्चये उच्चि-संग्रहे, परिचि-परिचये, प्रणिचिनोति नेर्गदेति णत्वम्, कर्मादौ-चीयते परिचीयते उपचीयते अचायि, परिचाययति-ते निश्चाययति-ते अचीचयत्-त चिकी-चिचीषति-ते वा कुत्वम् । कृत्सु-चेतव्यम् चयनीयं चयनं, यत्-चेयम्, अप्-चयः निश्चयः परिचयः उपचयः चेता-परिचायकः चिन्वन्-ती चिन्वानः चित्वा निश्चित्य अवचित्य चेतुम् चितः परिचितः उपचितिः अपचितिः (पूजा), आचितम् (दश भाराः) क्त्र-चित्रम् । स्तृञ् आच्छादने सक० । कित्वादगुणे नस्य णत्वे स्तृणोति स्तृणुते, स्तृणोतु स्तृणुताम्, अस्तृणोत् अस्तृणुत, स्तृणुयात् स्तृण्वीत । लिटि धातोर्द्वित्वे अभ्यासऋकारस्य अभ्यासे शर्पूर्वाः खय इति तकारशेषे णलि परे उत्तरऋकारस्य अचोञ्णितीति वृद्धौ तस्तार, अतुसादौ ऋतश्च संयोगादेरिति गुणः तस्तरतुः-रुः, थलि-ऋदन्तत्वान्नेट् गुणः तस्तर्थ-स्तरथुः-र तस्ता-स्तर तस्तरिव-म क्रादिनियमादिट् । तस्तरे-राते-रिरे-रिवहे-महे । स्तर्ता स्तरिष्यति-ते ऋद्धनोरितीट् । स्तर्यात्-र्यास्ताम्-र्यासुः गुणोर्तिसंयोगाद्योरिति गुणः, तङि सीयुट्सुटोः ऋतश्चसंयोगादेरिति इटि सलोपे गुणोर्तीति गुणे षत्वष्टुत्वयोः स्तरिषीष्ट-षीयास्ताम्-षीरन्, इडभावपक्षे उश्च (१-२-१२) ऋवर्णात्परौ झलादी लिङ्-तङ्परः सिच्चेत्येतौ कितौ स्तः । इति कित्वेनागुणे स्तृषीष्ट-षीयास्ताम्-षीरन् । लुङि परस्मैपदे सिचि इडभावे सिचिवृद्धौ अपृक्तस्येडागमे षत्वे अस्तार्षीत् अस्तार्ष्टाम्-स्तार्षुः अस्तार्षीः-ष्टम्-ष्ट अस्तार्षम्-र्ष्व-र्ष्म, तङि सिचि ऋतश्चेति इड्विकल्पे गुणादौ अस्तरिष्ट-रिषाताम्-षत-रिष्ठाः-रिषाथाम्-रिढ्वम्-रिषि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...वहि-ष्महि, इडभावपक्षे उश्चेति कित्वादगुणे तथासोऽध्वमि च ह्रस्वादङ्गादिति सलोपे अस्तृत अस्तृषा-ताम्-षत अस्तृथाः- स्तृषाथाम्-ढ्वम् अस्तृषि-ष्वहि-ष्महि, अस्तरिष्यत्-त। आस्तृ संस्तृ-आस्तरणे, विस्तृ-विस्तारे। स्तीर्यते विस्तीर्यते अस्तारि, विस्तारयति-ते कर्मणि विस्तार्यते, तिस्तीर्षति-ते। कृत्सु-विस्तर-णम् विस्तरणीयम्, घञ्-विस्तारः प्रस्तारः (क्रमपरिवर्तनम्), अच्-विस्तरः आस्तरः, विस्तृणवन्-ती विस्तृणवानः, विस्तृतः स्तृत्वा विस्तृत्य विस्तर्तुम्, क्र्यादेर्दीर्घान्तस्य विस्तीर्णः विस्तीर्य। वृञ् वरणे सक०। पूर्ववत्, वृणोति वृणुते, वृणोतु वृणुताम्, अवृणोत् अवृणुत, वृणुयात् वृण्वीत। ववार ववतुः-व्रुः यण्, बभूथाततन्थजगृम्भववर्थेति निगमे इति वेदे इडभावनिपातनाद्भाषायां थलि इट् वरिथ ववृव-म क्रादिपाठान्नेट्, वव्रे-व्राते-व्रिरे ववृषे-वहे-महे। लुडादाविटि वृतोवेति वा दीर्घः वरिता वरीता, वरि-रीष्यति-ते, व्रियात्-यास्ताम्-यासुः रिङ्शयेति रिङ्, तङि लिङ्सिचोरात्मनेपदेष्विति इट्पक्षे वृतोवेति दीर्घे प्राप्ते नः लिङि (७-२-३९) वृङ् वृञ्भ्यामृदन्ताच्च लिङ इटो दीर्घो न स्यात्। इति निषेधे वरिषीष्ट-षीयास्ताम्-षीरन्, इडभावपक्षे उश्चेति कित्वादगुणे वृषीष्ट-षीयास्ताम्-षीरन्। लुङि सिचि इटि सिचिवृद्धौ अवारीत्-रिष्टाम्-रिषुः-रीः-रिष्टम्-ष्ट-रिषम्-ष्व-ष्म, सिचिचपरस्मैपदेष्विति इटो दीर्घनिषेधः। तङि लिङ्सिचोरिति इट्पक्षे वृतोवेति दीर्घविकल्पे अवरिष्ट अवरीष्ट अवरि-रीषा-ताम्-षत, इडभावे ह्रस्वादङ्गादिति सलोपे अवृत अवृषाताम्-षत अवृथाः-षाथाम्-ढ्वम्, अवृषि-ष्वहि-ष्महि। अवरि-रीष्यत्-त। प्र-सम्-आवृणोति वृणीते। व्रियते अवरि, वारयति-ते निवारयति-ते, विवरि-षति-ते। कृत्सु-वरणं वरितव्यं वरणीयं, क्यप्-वृत्यः, ण्यत्-वार्यः, घञ्-नीवारः (अकृष्टधान्यम्) प्रावारः (उत्तरासङ्गः) अन्यत्र-प्रवरः, वरि-रीता वृणवन्-ती वृण्वानः, वृतः वेट्क्त्वान्नेट् वृत्वा संवृत्य, वरि-रीतुम्, मनिन्-वर्म, ऊथन्-वरूथः (रथगुप्तिः) इनि वरूथिनी (सेना), ...वर्यम्, न-वर्णः, ऊनन्-वरुणः, नु-वर्णुः (नदविशेषः) अत्रन्-वरत्रा (वर्धी)। वृङ् संभक्तौ क्र्यादौ, वृञ् आवरणे चुरादौ। धुञ् कम्पने सक०। धुनोति धुनुते, धुनोतु धुनुताम्, अधुनोत् अधुनुत, धुनुयात् धुन्वीत। दुधाव दुधुवतुः-वुः दुधविथ दुधोथ दुधुविव-म, दुधुवे-वाते-विरे, धोता धोष्यति-ते, धूयात् धोसिष्ट, लुङि सिचि स्तुसुधूञ्भ्य इत्यत्र दीर्घान्तस्यैव ग्रहणेन इडभावे वृद्धौ षत्वम् अधौषीत् अधौष्टाम्-षुः, अधोष्ट-षाताम्-षत अधोष्यत्-त। वि-आ-परिधुनोति धुनुते। धूयते धावयति-ते अदूधवत्-त, दुधूषति-ते। धूननं धुन्वन्-ती धुन्वानः विधुतः धुत्वा विधूय। धूञ् कम्पने सक०। स्वरतिसूतीति वेट् दीर्घान्तत्वं विशेषः। धूनोति धूनुते, धूनोतु धूनुताम्, अधूनोत् अधूनुत, धूनुयात् धून्वीत। दुधाव दुधविथ दुधोथ दुधुविव-म श्र्युकः क्कितीति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट्। दुधुवे-विषे-विवहे-महे। धविता धोता, धवि-धोष्यति-ते धूयात् धवि-धोषीष्ट। लुङि परस्मैपदे स्तुसुधूञ्भ्य इति नित्यमिट् अधावीत्-विष्टाम्-विषुः तङि स्वरतीति वेट् अधविष्ट-विषाताम्-षत, अधोष्ट-धोषा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ताम्-षत, अधवि-धोष्यत्-त। वि-उद्-आधूनोति धूनुते। आधू-विधूयते, णौ- धूञ्प्रीञोर्नुग्वक्तव्य इति नुकि धूनयति-ते दुधूषति-ते। धूननं विधूननम् उद्धूतः विधूतः वेट्कत्वान्नेट् धूत्वा धवित्वा विधूय।

वि० **शिञ्** निशाने (तीक्ष्णीकरणे) शिनोति शिनुते, क्त-शितः निशितः (तीक्ष्णः)। **डुमिञ्** प्रक्षेपणे सक०। मिनोति मिनुते, प्रमिणोति हिनुमिनेति णत्वम्। **कृञ्** हिंसायाम् सक०। कृणोति कृणुते।

अनुदात्ताः (अनिटः) उदात्तेतः (परस्मैपदिनः)—हि गतौ वृद्धौ च सक०। प्रायेणायं प्रपूर्वः प्रेषणे। प्रहिणोति हिनुमिनेति णत्वम्, प्रहिणोतु प्राहिणोत् प्रहिणुयात्। लिटि द्वित्वेऽभ्यासजश्त्वे हेरचङि (७-३-५६) अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्नतु चङि। इति कुत्वे वृद्ध्यायादेशौ प्रजिघाय प्रजिघ्यतुः-घ्युः प्रजिघयिथ जिघेथ जिघा-घय जिघ्यिव-म क्रादिनियमादिट् थलि वेट्। प्रहेता प्रहेष्यति प्रहीयात् यास्ताम्-यासुः अकृदिति दीर्घः, सिचिवृद्धिः प्राहैषीत्-हैष्टाम्-षुः-हैषीः-ष्टम्-ष्ट-हैषम्-ष्व-ष्म, प्राहेष्यत्। प्रहीयते प्राहायि प्रहाययति-ते प्रजिहाययिषति। क्त-प्रहितः संहितः सहितः समो वा हिततयोरिति वा मलोपः हित्वा प्रहीय, अच्-हयः, तु-हेतुः, ति-हेतिः (आयुधम्)। **आप्लृ** व्याप्तौ सक०। आप्नोति आप्नुतः आप्नुवन्ति संयोगपूर्वत्वात् हुश्नुवोरिति न यण् उवङ्, आप्नोषि आप्नुथः-थ आप्नोमि आप्नुवः-मः संयोगपूर्वत्वाल्लोपश्चास्येति नोकारलोपः। आप्नोतु आप्नुतात्-ताम् आप्नुवन्तु आप्नुहि संयोगपूर्वत्वात् हुतश्चेति न हेर्लुक्, आप्नुतात्-तम्-त आप्नवानि-वाव-म, आप्नोत् आप्नुताम्-आप्नुवन् आप्नोः आप्नुतम्-त आप्नवम् प्नुव-म। आप्नुयात् याताम्-युः। लिटि द्वित्वे हलादिशेषे सवर्णदीर्घे आप आपतुः आपुः आपिथ-पथुः-प आप-पिव-म। आप्ता आप्स्यति आप्यात्-प्यास्ताम्-प्यासुः लुङि लृदित्वात्पुषादीत्यङि आपत्-पताम्-पन् आपः-पतम्-त आपम्-पाव-म। आप्स्यत्। प्र अवाप्-प्राप्तौ, समाप्-समाप्तौ, व्याप्-व्याप्तौ, पर्याप्-पूर्तौ रक्षणे च। आप्यते प्राप्यते प्रापि, प्रापयति-ते समापयति-ते प्रापिपत् सनि आप्ज्ञप्यृधामितीत्वेऽभ्यासलोपे ईप्सति। कृत्सु-प्रापणम् समापनम् ण्यत्-प्राप्यं समापनीयम् आप्नुवन्-ती आप्तः समाप्तः आप्त्वा समाप्य प्राप्तुम्, क्विप्-आपः, प्राप्तिः समाप्तिः व्याप्तिः णौ-प्रापितः समापितः समापयितुम्, सन् उ-ईप्सुः। **शक्लृ** शक्तौ अक०। शक्नोति शक्नुतः- क्नुवन्ति, शक्नोतु-क्नुतात्-ताम्-वन्तु शक्नुहि-क्नुतात्-तम्-त शक्नवानि-वाव-म, अशक्नोत् क्नुताम्-क्नुवन्, शक्नुयात् याताम्-युः। लिटि एत्वाभ्यासलोपौ शशाक शेकतुः-कुः शेकिथ शशक्थ शेकथुः-क-शशा-शक शेकिव-म क्रादिनियमादिट् थलि वेट्। शक्ता शक्ष्यति शक्यात्, लृदित्वादङि अशकत् कताम्-कन्, अशक्ष्यत्। शक्यते अशकि, शाकयति-ते, सनिमीमेति इत्वाभ्यासलोपौ शिक्षेजिज्ञासायामिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...ङ् शिदते, यत्-शक्यं शक्नुवन्-ती शक्तः शक्त्वा शक्तिः शक्तुम्, र-शक्रः, कल-शकलः, क्लृ-...क्लः (प्रियंवदः) ।

...१-टुदु उपतापे सक० । दुनोति-तु अदुनोत् दुनुयात् दुदाव दुदविथ दुदोथ दुदुविव-म दोता दोष्यति दूयात् ...दे अदोष्यत् । कर्तरि ण- दावः (वनाग्निः) अच्-दवः (वनम्) ट्वित्वादथुच्-दवथुः (पीडा) क्त-दुतः । **राध साध** ...क० । राध्नोति राध्नुतः राध्नुवन्ति, आराध्-आराधने, विराध-विरोधे, अपराध-अपराधे, आराधनम् आराद्धः ...। साध्नोति, णौ युच्-साधना साधितः साधयितुम्, उण्-साधुः ।

...२- **उदाता अनुदात्ताश्च** (सेटोनिटश्च) **अनुदात्तेतः** (अश्वर्जं परस्मैपदिनः)—**अशू** व्याप्तौ संघाते ...त्वाद् ट् सक० आ० । अश्नुते-ताम् आश्नुत अश्नुवीत, आनशे अशिता अष्टा अशिष्यते अक्ष्यते अशिशीष्ट अक्षीष्ट, ...आष्ट, आशिष्यत आक्ष्यत । **व्यश्** व्याप्तौ, व्यश्नुते व्यानशे, युच् रसादेशः रसना, उण्-आशुः (व्रीहिः) शु उरन्- ...सरन्-अक्षरम्, कनिन्-अष्ट, क्वन्-अश्वः स-अक्षः, कि-अक्षि। **ञिधृषा** प्रागल्भे सेट् अक० प० । धृष्णोति, क्यप्-प्रधृष्यः, ...ऋक्, युच्-दुर्धर्षणः, धर्षित्वा, ञित्वाद्वर्तमाने क्त-धृष्टः धृषिशसीवैयात्य इत्यनिट्, अन्यत्र धर्षितः, खल्-दुष्प्रधर्षः । ...दम्भने सेट् सक० प० । दभ्नोति, अच्-दम्भः । **ऋधु** वृद्धौ सेट् सक० प० । ऋध्नोति-तु आर्ध्नोत् ऋध्नुयात् शेषं ...वत्, क्तिन्-ऋद्धिः समृद्धिः ऋध्यन्-ती, क्त-ऋद्धः समृद्धः । **क्षि** हिंसायाम् अनिट् सक० प० । क्षिणोति, क्त-क्षितः, न ...वज्रभृतां क्षिणोति ।

प्रयोगाः–**नैव शक्नोति बालिशः । स कार्याणि समापयत् । तस्तार सरघाव्याप्तैः स क्षौद्रपटलैः** ...रैः । सञ्चिनोति **धनं बहु । नच खलु परिभोक्तुं नैव शक्नोमि हातुम् । प्राप तालीवनश्यामम् उपकण्ठं** ...मोदधेः । श्रीर्वृणोति **विवेकिनम् । धूनोति चम्पकवनानि धुनोत्यशोकम् । राजा दूतं प्रहिणोति । पुष्पा-**...पचिनोति सः ।

प्रश्नाः–स्वादिषु को विकरणः । स्वादिषूभयपदिनः परस्मैपदिनश्च प्रसिद्धधातवः के । केषु धातुषु ऌदित्त्वं तेन च को ... । केषु धातुषूपसर्गयोगेन नानार्थाः । अधस्तनवाक्यगतान्स्वादिधातुनिष्पन्नान् शब्दान्व्याकुरुत–

...न्तीर्य सोऽशेत । स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः । उपचयापचयौ वस्तुधर्मौ । सम्प्राप्य तीर्थं मुमुदे ... । अनेकधा छन्दसां प्रस्ताराः । चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः । दमयन्ती पतिं वव्रे । प्रतापः पृथिवीं ... । अभिद्विषन्तं प्रजिघाय दूतम् । वायुर्विधूनयति चम्पकपुष्परेणून् । चन्द्रो न निर्वापयितुं शशाक । धूयमाना वैज-...यन्ता शक्तिरेतस्य । **इति स्वादयः ।**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ तुदादयः।

अनुदात्ताः (अनिटः) स्वरितेतः (उभयपदिनः)—तुद व्यथने सक०। सार्वधातुकेषु शपोप- वादेन तुदादिभ्यः शः (३-१-७७) कर्त्रर्थे सार्वधातुके तुदादिभ्यः शः स्यात्। शस्यापित्वेन ङित्वाद्धा- तोर्लघूपधगुणो न। भ्वादेः शपि तुदादेः शे गुणभावाभावौ विशेषौ। तुदति-तः-न्ति, तुदते-देते-दन्ते, तुदतु-ताम्, अतुदत्-त, तुदेत्-त तुतोद तुतुदतुः-दुः तुतोदिथ तुतुदिव-म, तुतुदे-दाते-दिरे-दिवहे-महे क्रादिनियमादिट्, तोत्ता तोत्स्यति-ते, तुद्यात् तुत्सीष्ट, लुङि सिचि अनिटि हलन्तलक्षणवृद्धौ अतौत्सीत् अतौत्ताम् झलोझलि सलोपः अतौत्सुः अतौत्सीः अतौत्तम्-त्त अतौत्सम्-त्स्व-त्स्म, अतुत्त अतुत्साताम्- त्सत अतुत्थाः अतुत्साथाम् अतुद्ध्वम् अतुत्सि-स्वहि-स्महि, अतोत्स्यत्-त। प्र सम्-वितुदति-ते। तुद्यते अतोदि तोदयति-ते अतूतुदत्-त, तुतुत्सति-ते हलन्ताच्चेति सनः कित्त्वान्न गुणः। कृत्सु-तोदनं तोत्तव्यं तोदनीयं, करणे घञ्-प्रतोदः (कशा), तुदन्-न्ती-ती तुदमानः तुत्त्वा प्रतुद्य तोत्तुम् तुत्तः, खश्-विधुन्तुदः (राहुः) अरुन्तुदः (मर्मभेदी), थक्-तुत्थम्, ष्ट्रन्-तोत्रम् (अङ्कुशः)। णुद प्रेरणे सक०। पूर्ववत् तकारनकारयोरेव विशेषः। नुदति-ते-तु-ताम् अनुदत्-त, नुदेत्-त। नुनोद नुनुदे, नोत्ता नोत्स्यति-ते नुद्यात् नुत्सीष्ट, अनौत्सीत् अनुत्त, अनोत्स्यत्-त। प्रणुद्-प्रेरणे प्रणुदति-ते उपसर्गादसमासेपीति णत्वम्, अपनुद्-अपनोदने, निर्णुद्-प्रत्याख्याने। नुद्यते प्रणुद्यते अनोदि, नोदयति-ते अनूनुदत्-त विनोद- यति-(आनन्दयति) ते। नुनुत्सति-ते। नोदनं विनोदनं नोदकः नुदन्-न्ती-ती नुदमानः, घञ्-विनोदः नुत्त्वा प्रणुद्य नोत्तुम्, णौ-विनोदकः, विनोदयिता विनोदयन् विनोदितः विनोदयितुम्। दिश अतिसर्जने (दाने) सक०। दिशति-ते-तु-ताम् अदिशत्-त दिशेत्-त, दिदेश दिदिशतुः-शुः दिदेशिथ दिदिशिव-म दिदिशे-शाते-शिरे क्रादिनियमादिट्। देष्टा व्रश्चेति षत्वम् देक्ष्यति-ते षत्वकत्वषत्वानि, दिश्यात् दिक्षीष्ट लिङ्सिचाविति कित्वान्न गुणः दिक्षीयास्ताम्-क्षीरन्, लुङि शलइगुपधादिति च्लेः क्सादेशे व्रश्चेति षत्वे षढोरिति कत्वे षत्वे, अजादौ क्सस्याचीत्यकारलोपे अदिक्षत्-क्षताम्-क्षन्-क्षः-क्षतम्-त-क्षम्-क्षाव-म अदिक्षत-क्षाताम् क्षत-क्षथाः-क्षाथाम्-क्षध्वम्-क्षि-क्षावहि-महि, अदेक्ष्यत्-त, उप-प्रदिश् निर्दिश्-निर्देशने आदिश-आज्ञायाम्, उद्दिश्-उद्देशने, सन्दिश्-सन्देशने, उपदिश्-उपदेशने, अपदिश्-छले, प्रत्यादिश् प्रत्या- ख्याने व्यपदिश्-व्यवहारे, अतिदिश्-अतिदेशने। कर्मादौ-दिश्यते आदिश्यते अदेशि, देशयति-ते अदीदिशत्-त दिदिक्षति-ते। कृत्सु-देशनम् निर्देशनम् निर्देष्टव्यं सन्देशनीयम्, घञ्-आदेशः सन्देशः उपदेशः प्रत्या- देशः, अधिकरणे देशः प्रदेशः विदेशः, करणे दीर्घे प्रादेशः आदेष्टा आदेशकः सन्दिशन्-न्ती-ती सन्दिश- मानः सन्दिष्टः दिष्ट्वा सन्दिश्य आदेष्टुम् क्विप्-दिक्। क्षिप प्रेरणे सक०। क्षिपति-ते तु-ताम्, अक्षि- पत्-त क्षिपेत्-त। चिक्षेप चिक्षिपतुः-पुः चिक्षेपिथ चिक्षिपिव-म, चिक्षिपे-पाते-पिरे-पिवहे-महे क्रादि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विचमादिट्, क्षेप्ता क्षेप्स्यति-ते क्षिप्यात् क्षिप्सीष्ट, लुङि सिचि अनिटि हलन्तलक्षणवृद्धौ झलो झलि
सलोपे च अक्षैप्सीत् अक्षैप्ताम् अक्षैप्सुः अक्षैप्सीः-क्षैप्तम्-प्त अक्षैप्सम्-प्स्व-प्स्म, तङि लिङ्सिचाविति
कित्वादगुणे झलि सलोपे अक्षिप्त अक्षिप्साताम्-प्सत अक्षिप्थाः-क्षिप्साथाम्-क्षिब्ध्वम् अक्षिप्सि-प्स्वहि-
प्स्महि, अक्षेप्स्यत्-त। उप-प्रक्षिप्-प्रक्षेपणे, विक्षिप्-विक्षेपणे, उत्क्षिप्-उत्क्षेपणे, अवक्षिप्-अधःक्षेपणे,
आक्षिप्-आक्षेपे, संक्षिप्-संक्षेपे, अधिक्षिप्-निन्दने, उपक्षिप्-उपन्यासे, निक्षिप-न्यासे। कर्मादौ-क्षिप्यते
अक्षेपि, क्षेपयति-ते अचिक्षिपत्-त चिक्षिपिषति-ते कित्वान्न गुणः। कृत्सु-क्षेपणम् उत्क्षेपणम् प्रक्षेप्तव्यं
विक्षेपणीयं क्षेप्ता क्षेपकः आक्षेपकः, घञ्-विक्षेपः संक्षेपः आक्षेपः क्षिपन्-न्ती-ती क्षिपमाणः क्षिप्तः
निक्षिप्तः क्षिप्त्वा प्रक्षिप्य क्षेप्तुं संक्षेप्तुम्। कृष विलेखने सक०। ङित्वान्न गुणः कृषति-ते-तु-ताम् अकृषत्-
त कृषेत्-त। चकर्ष चकृषतुः-षुः चकर्षिथ चकृषिव-म क्रादिनियमादिट्, चकृषे-षाते-षिरे। स्यतासोः
झलादावकिति अनुदात्तस्य चर्दुपधस्येति पक्षे अमागमे यण्, तदभावे लघूपधगुणः क्रष्टा-रौ-रः-कर्ष्टा-
रौ-रः क्रक्ष्यति-ते कर्क्ष्यति-ते षस्य कत्वे सस्य षत्वम्, कृष्यात् कृक्षीष्ट लिङ्सिचाविति कित्वान्न गुणो
त्ययम्। लुङि परस्मैपदे स्पृशमृषकृषेति सिच्पक्षे अनुदात्तस्येत्यमागमे यणि हलन्तलक्षणवृद्धौ अपृक्त-
ईडागमे झलादौ सलोपेपि अक्राक्षीत् अक्राष्टाम् अक्राक्षुः अक्राक्षीः-क्राष्टम्-ष्ट अक्राक्षम्-क्ष्व-क्ष्म, अमोऽ
भावे हलन्तलक्षणवृद्धौ अकार्क्षीत् अकार्ष्टाम् अकार्क्षुः अकार्क्षीः-र्ष्टम्-र्ष्ट अकार्क्षम्-क्ष्व-क्ष्म, सिचोऽभावे
इगुपधादिति च्लेःक्सादेशो कित्वादम्गुणाभावे कत्वषत्वादौ अजादौ क्सस्याकारलोपे अकृक्षत् क्षताम्-
क्षन्-क्षः-क्षतम्-त-क्षम्-क्षाव-म। तङि स्पृशमृषेति सिच्पक्षे। लिङ्सिचाविति कित्वादमोगुणस्य चाभावे
झलि सलोपे ष्टुत्वे च अकृष्ट अकृक्षाताम्-क्षत अकृष्ठाः-क्षाथाम्-कृढ्वम् अकृक्षि-क्ष्वहि-क्ष्महि, सिजभाव-
े क्से अकृक्षत-क्षाताम्-क्षत-क्षथाः-क्षाथाम्-क्षध्वम्-क्षि-क्षावहि-महि। अक्रक्ष्यत्-त अकर्क्ष्यत्-त।
वि- आ-परिकृषति-ते। कृष्यते अकर्षि कर्षयति-ते अचकर्षत्-त अचीकृषत्-त उर्ऋद्वा, चिकृक्षति ते।
रणं क्रष्टा कर्ष्टा कर्षकः कृषन्-न्ती-ती कृषमाणः कृष्टः कृष्ट्वा कर्ष्ट्वा विकृष्य क्रष्टुम् कर्ष्टुम्।
भ्रस्ज पाके सक०। सार्वधातुके शे ङित्वाद्ग्रहिज्येति सम्प्रसारणेन ऋकारस्य रेफे पूर्वरूपे भृस्जेति
स्य श्चुत्वेन शे जश्त्वेन जः भृज्जति-तः-न्ति, भृज्जते-ज्जेते-ज्जन्ते। भृज्जतु-ताम् अभृज्जत्-त।
आर्धधातुके लिटि णलि **भ्रस्जो रोपधयोरमन्यतरस्याम् (६-४-४७)** भ्रस्जो रेफस्योपधायाश्च स्थाने
रमागमो वा स्यादार्धधातुके। इति मित्वादन्त्यादचः परं रमि स्थानषष्ठीनिर्देशाद्रेफस्योपधासस्य
निवृत्तौ भर्ज् अ इत्यत्र द्वित्वाभ्यासकार्येषु बभर्ज-र्जतुः-र्जुः, थलि भारद्वाजमते इटि बभर्जिथ इडभावे
श्चेति जस्य षत्वे थस्य ष्टुत्वे बभर्ष्ठ बभर्जथुः-र्ज-र्जिव-म क्रादिनियमादिट्। रमोऽभावे भ्रस्जे-
त्यस्य द्वित्वेभ्यासकार्ये संयोगात्परत्वेनाकित्वात्सम्प्रसारणाभावे व्रश्चेतिसस्यषत्वे जश्त्वे बभ्रज्ज-
तुः-ज्जुः बभ्रज्जिथ, इडभावे स्कोरिति सलोपे व्रश्चेति जस्य षत्वे ष्टुत्वे बभ्रष्ठ बभ्रज्जथुः-ज्ज-ज्जिव-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बभ्रज्जिम। लुटि तासि रमागमे जस्य षत्वे तस्य ष्टुत्वे भर्ष्टा-रौ-रः, रमोऽभावे स्कोरिति सलोपे जस्य षत्वे ष्टुत्वे भ्रष्टा-रौ-रः। लृटि स्ये रमि षत्वकत्वादौ, रमोऽभावे स्कोरिति सलोपे षत्वे कत्वे च भर्क्ष्यति-ते भ्रक्ष्यति-ते। आशिषि यासुटि किङति रमागमं बाधित्वा सम्प्रपूर्वविप्रतिषेधेन (वा०) इति ग्रहिज्येति सम्प्रसारणे भृस्ज-याति इत्यत्र सस्य श्चुत्वेन शत्वे जश्त्वेन जत्वे भृज्ज्यात्-ज्ज्यास्ताम्-ज्ज्यासुः। तङि सीयुटि पक्षे रमि जस्य षत्वे कत्वे सस्य षत्वे भर्क्षीष्ट-क्षीयास्ताम्-क्षीरन्। लुङि सिचि रमि सिचिवृद्धिरिति वृद्धौ जस्य षत्वे कत्वे सस्य षत्वे अभार्क्षीत् अभार्ष्टाम् झलोझलीति सलोपः, अभार्क्षुः, अभार्क्षीः-भार्ष्टम्-र्ष्ट अभार्क्षम्-क्ष्व-क्ष्म, रमोऽभावे संयोगादिसलोपे सिचि वृद्धौ जस्य षत्वकत्वयोः सस्य षत्वे अभ्राक्षीत् अभ्राष्टाम् सलोपः अभ्राक्षुः-अभ्राक्षीः-ष्टम्-ष्ट अभ्राक्षम्-क्ष्व-क्ष्म। तङि सिचि रमि झलो झलीति सलोपे जस्य षत्वे ष्टुत्वे अभर्ष्ट अभर्क्षाताम्-क्षत जस्य षत्वकत्वे सस्य षत्वम्, अभर्ष्ठाः-र्क्षाथाम् भड्ढ्वम्, अभर्क्षि-क्ष्वहि-क्ष्महि, रमोऽभावे संयोगादिसलोपे सिज्लोपे जस्य षत्वे ष्टुत्वे अभ्रष्ट अभ्रक्षाताम्-क्षत अभ्रष्ठाः क्षाथाम्-भ्रड्ढ्वम् अभ्रक्षि-क्ष्वहि-क्ष्महि। अभर्क्ष्यत्-त अभ्रक्ष्यत्-त। कर्मणि भृज्ज्यते अभर्जि, भर्जयति-ते भृज्जयति-ते अबभर्जत्-त अबभ्रज्जत्-त, सनीवन्तेति इटो रमश्च विकल्पे बिभर्जिषति-ते बिभ्रज्जिषति-ते बिभर्क्षति-ते बिभ्रक्षति-ते। कृत्सु-भर्जनं भ्रज्जनं भर्ष्टव्यं भ्रष्टव्यं ण्यत् भृष्ट्वा संभृज्य भ्रष्टुं भर्ष्टुं, णौ-भर्जितव्यं भर्जितः, उ-भृगुः (प्रपातः), घञ्-भर्गः, क्तिन्-भृष्टिः, ष्ट्रन्-भ्राष्ट्रम्।

प्रयोगाः—आधयो मां तुदन्ति। भ्राष्टे भृष्टा इमे यवाः। गुरुः शिष्यमुपादिशत्। साधवो निर्दिशन्ति। नुनुदे तनुकण्डुपण्डितः। तोत्राहत इव द्विपः। अकृष्टपच्या इव सस्यसम्पदः। कृषकः कृषति क्षेत्रम्। प्रक्षिप्तोयं पाठः। संक्षिप्य वद सन्देशम्। विनोदयन्त्यमी बालाः। स कन्दुकमुदक्षिपत्। आदिदेश प्रभुर्भृत्यान्। सर्वान्निर्णुद मे गृहात्। वृथा क्षिपति सम्पदम्।

अनुदात्ताः (अनिटः) **ङितः** (आत्मनेपदिनः) पृङ् व्यायामे अक०। प्रायेणायं व्याङ्पूर्वः प्रयुज्यते। सार्वधातुकेषु शे रिङ्शयेति रिङि इयङ् व्याप्रियते-येते-यन्ते, व्याप्रियताम् व्याप्रियत व्यापप्रे-प्राते-प्रिरे वलादौ क्रादिनियमादिट् अजादौ यण्, व्यापर्ता व्यापरिष्यते ऋद्धनोरिति इटि गुणः व्यापृषीष्ट। लुङि झलि ह्रस्वादङ्गादिति सलोपः उश्चेति लिङ्सिचोः कित्वान्न गुणः व्यापृत व्यापृषाताम्-षत व्यापृथाः-षाथाम्-ध्वम् व्यापृषि ष्वहि ष्महि, व्यापरिष्यत। भावादौ-व्याप्रियते व्यापारयति-ते व्यापुपूर्षते इकोझलीति कित्वादज्झनेति दीर्घे उदोष्ठ्येत्युत्वे हलिचेति दीर्घः। कृत्सु-व्यापृतवान् व्यापृतः व्याप्रियमाणः व्यापृत्य व्यापर्तुम् व्यापृतिः, णौ-व्यापारणं व्यापारः व्यापारितः व्यापारयितुम्। मृङ् प्राणत्यागे अक०। म्रियतेर्लुङ्लिङोश्च (१-३-६१) लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। तेन लिट्लुट्लृट्लृङ्नु परस्मैपदमन्यत्रैवात्मनेपदम्। शेरिङि इयङि म्रियते-ताम् अम्रियत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म्रियेत, मृषीष्ट, लुङि झलि ह्रस्वादङ्गादिति सलोपः अमृत अमृषाताम्-षत अमृथाः-मृषाथाम्-ढ्वम् अमृषि-ष्वहि-ष्महि। अन्यत्र ममार मम्रतुः-म्रुः ममर्थ मम्रथुः-म्र ममा-मर मम्रिव-म ऋदन्तत्वात्थलि नेट् क्रादिनियमादिट्, मर्ता मरिष्यति ऋदन्तत्वादिट् अमरिष्यत्। अनुमृ-अनुमरणे। म्रियते अमारि मारयति अमीमरत्, सनि कित्वेन अज्झनेति दीर्घे उदोष्ठ्येत्युर्भावे दीर्घे मुमूर्षति मृङ्मात्रस्य आत्मनेपद निमित्तत्वाभावात् न तङ्। मरणं मर्तव्यं मृतः म्रियमाणः मृत्वा अनुमृत्य मर्तुं, घञ्-मारः, सन्-अ-मुमूर्षा, सन् उ-मुमूर्षुः, नञि पचाद्यच्-अमरः, नञि वर्तमाने क्ते अमृतम्, युक्-मृत्युः, त्यप्-मर्त्यः। दृङ् आदरे सक०। अयमाङ्पूर्वः प्रयुज्यते। शेरिङि इयङ् आद्रियते-ताम् आद्रियत आद्रियेत। आदद्रे-द्राते-द्रिरे-वहे-महे, आदर्ता आदरिष्यते स्ये इट्, आदृषीष्ट, लुङि झलि सलोपे आदृत-दृषाताम्-षत आदृथाः-दृषाथाम्-ध्वम् आदृषि-ष्वहि-ष्महि, आदरिष्यत। समादृ-समादरे। आद्रियते आदरयति आदिदरिषते किरश्चेति सनि इट्, आदरणम् आदर्तव्यम् आदरणीयः, क्यप्-आदृत्यः, घञ्-आदरः आदृतः आद्रियमाणः आदृत्य आदर्तुम् आदृतिः। धृङ् अनवस्थाने अक०। पूर्ववत् ध्रियते-ताम् अध्रियत ध्रियेत। दध्रे धर्ता धरिष्यते धृषीष्ट अधृत-षाताम्-षत, अधरिष्यत। ध्रियते अधारि, धारयति-अदीधरत्-त, दिधीर्षते। धरणं धर्तव्यं, घञ्-धारः, अधिकरणे-आधारः, ण्यत्-धार्यः धर्ता धारकः धृतः धृत्वा विधृत्य ध्रियमाणः धर्तुम् धृतिः, मन्-धर्मः।

प्रयोगाः-अत्यादरः शङ्क्यते। ध्रियते यावदेकोपि। श्वा मुमूर्षति। म्रियमाणो हरिं स्मरेत्। कर्मसु व्याप्रियामहे। आद्रियन्ते ह्य्‌ ‍‍ ‍‍ ‍जनाः। न जायते म्रियते वाऽन्तरात्मा। धर्मो विश्वस्य जगतः प्रतिष्ठा। आव्यापारेषु व्यापारः। व्याप्रियध्वं स्वकर्मसु। धार्मिकानाद्रियामहे। व्यापारयामास सर्वं समन्तात्। सद्भिराद्रियते बुधः।

अनुदात्ताः (अनिटः) उदात्तेतः (परस्मैपदिनः) प्रच्छ ज्ञीप्सायाम् सक०। शे ङित्वात् ग्रहि-ज्येति सम्प्रसारणे पृच्छति-तु अपृच्छत् पृच्छेत्। लिटि संयोगपूर्वकत्वेनाऽकित्वान्न सम्प्रसारणम् पप्रच्छ-च्छतुः-च्छुः पप्रच्छिथ पप्रष्ठ भारद्वाजनियमादिडभावपक्षे व्रश्चेति छस्य षत्वे ष्टुत्वम्, पप्रच्छ-च्छिव-म क्रादिनियमादिट्। प्रष्टा छस्य षत्वे ष्टुत्वम्, प्रक्ष्यति छस्य षत्वे कत्वे सस्य षत्वम्, पृच्छ्यात्-पृच्छ्यास्ताम्-च्छ्यासुः सीयुटः कित्वात्सम्प्रसारणम्। लुङि सिचि छस्य षत्वे कत्वे हलन्तलक्षणवृद्धौ सस्य षत्वं झलि सलोपः छस्य षत्वं ष्टुत्वम् अप्राक्षीत् अप्राष्टाम् अप्राक्षुः अप्राक्षीः-ष्टम्-ष्ट अप्राक्षम्-क्ष्व-क्ष्म, अप्रक्ष्यत्। सम्-परिपृच्छति आङिनुप्रच्छ्योरिति तङ् आपृच्छते। पृच्छ्यते अपृच्छि, प्रच्छयति अपप्रच्छत्, पिपृच्छिषति किरश्चेतीटि रुदविदेति कित्वात्सम्प्रसारणम्, कृत्सु-प्रष्टव्यं प्रष्टा पृच्छकः पृच्छन्-न्ती-ती पृष्ट्वा आपृच्छ्य प्रष्टुं, अङ्-पृच्छा नङ्-प्रश्नः क्विप्-प्राट्। (पृच्छकः) प्राड्विवाकः (प्रष्टा विवेचकश्च-न्यायाधीशः)। सृज विसर्गे (सृष्टौ निर्माणे) सक०। सृजति-तु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असृजत् सृजेत्, ससर्ज ससृजतुः-जुः ससर्जिथ सस्रष्ठ विभाषासृजिदृशोरिति वेट्, इडभावे सृजिदृशोरित्यमि यण्, ससृजथुः-ज ससर्ज ससृजिव-म क्रादिनियमादिट्। तासि अम्यणोः जस्य षत्वे ष्टुत्वे स्रष्टा-रौ-रः। स्ये अम्यणोः जस्य षत्वे कुत्वे सस्य षत्वे स्रक्ष्यति-तः-न्ति। आशिषि कित्वान्नाम् सृज्यात्-ज्यास्ताम्-ज्यासुः। लुङि सिच्यम्यणोः हलन्तलक्षणवृद्धौ जस्य षत्वे कुत्वे सिचः षत्वम् झलि सलोपे तस्य ष्टुत्वम् अस्राक्षीत् अस्राष्टाम्-क्षुः अस्राक्षीः-स्राष्टम्-ष्ट अस्राक्षम्-क्ष्व-क्ष्म। अस्रक्ष्यत्। उत्सृज् विसृज्-त्यागे, उपसृज्-समीपयोगे संसृज्-सम्बन्धे। सृज्यते असर्जि, सर्जयति-ते असीसृजत्-त असससर्जत्-त सिसृक्षति, कृत्सु-सर्जनं स्रष्टव्यं ण्यत्-सृज्यं, स्रष्टा सर्जकः सृजन्-न्ती-ती, कर्मणि-सृज्यमानः सृष्टः सृष्ट्वा संसृज्य स्रष्टुं, घिनुण्-संसर्गी, घञ्-सर्गः विसर्गः उत्सर्गः उपसर्गः, क्विप्-स्रक्, उ असुक् जत्वं च रज्जुः। टुमस्जो शुद्धौ अक०। सार्वधातुकेषु मस्जेति सस्य जश्त्वेन दत्वे श्चुत्वेन जत्वे मज्जधातुः। मज्जति-तु अमज्जत् मज्जेत्। ममज्ज-ज्जतुः-जुः ममज्जिथ ममङ्क्थ इडभावपक्षे मस्जेर्द्वित्वे हलादिशेषे स्कोरिति सलोपे जस्य चोःकुरिति गत्वे मस्जिनशोर्झलीति नुमि, मस्जेरन्त्यात्पूर्वो नुम्वाच्यः (वा) इति जकारात्पूर्वं जाते अनुस्वारपरसवर्णाभ्यां ङकारे गस्य चर्त्वम्। ममज्जथुः-ज्ज-ज्जिव-म क्रादिनियमादिट् थलि वेट्। तासि जस्य कुत्वचर्त्वयोः नुम्यनुस्वारपरसवर्णसलोपेषु मङ्क्ता-रौ-रः स्ये जस्य कुत्वचर्त्वयोः नुमनुस्वारपरसवर्णसलोपेषु स्यस्य षत्वे मङ्क्ष्यति-तः-न्ति। आशिषि सस्य जश्त्वश्चुत्वाभ्यां जत्वे मज्ज्यात्-स्ताम्-सुः, लुङि सिचि स्कोरिति सलोपे जस्य कुत्व-चर्त्वयोः नुमनुस्वारपरसवर्णेषु हलन्तलक्षणवृद्धौ सिचः षत्वे अमाङ्क्षीत् अमाङ्क्ताम् झलोझलीति सलोपः, अमाङ्क्षुः-क्षीः अमाङ्क्तम्-क्त अमाङ्क्षम्-क्ष्व-क्ष्म अमङ्क्ष्यत्। निमस्ज-निमज्जने, उन्मस्ज-उन्मज्जने। मज्ज्यते अमज्जि, मज्जयति-ते अममज्जत्-त मिमङ्क्षति। उन्मज्जनं निमज्जनं मङ्क्तव्यं मज्जकः मग्नः निमग्नः उन्मग्नः अनिदितामिति नलोपः सलोपः जस्य कुत्वमोदितश्चेति निष्ठानत्वम्, मज्जन्-न्ती-ती मङ्क्त्वा मक्त्वा जान्तनशामिति वाऽनुनासिकलोपः, ट्वित्वादथुच्-मज्जथुः, उ-मद्गुः (कारण्डवः), कनिन्-मज्जा। स्पृश संस्पर्शने सक०। सृजतिवत्। स्पृशति-तु अस्पृशत् स्पृशेत्, पस्पर्श शर्पूर्वाः इति पकारशेषः, पस्पृशतुः-शुः पस्पर्शिथ पस्पृशथुः-श पस्पर्श पस्पृशिव-म थल्यपि निषेधाविषयत्वेन भारद्वाजनियमाप्रवृत्तेः क्रादिनियमादिट्। स्यतासोः अनुदात्तस्येत्यम्पक्षे यण् तदभावे गुणः शस्य षत्वं सेपरे कत्वं च स्प्रष्टा-रौ-रः स्पर्ष्टा-रौ-रः, स्प्रक्ष्यति स्पर्क्ष्यति-तः-न्ति। आशिषि कित्वान्नाम् स्पृश्यात्। लुङि स्पृशमृशेति सिच्पक्षे अमि यणि हलन्तलक्षणवृद्धौ शस्य षत्वे कत्वे सिचः षत्वम्, झलि सलोपः ष्टुत्वम्। अस्प्राक्षीत् अस्प्राष्टाम्-क्षुः अस्प्राक्षीः अस्प्राष्टम्-ष्ट अस्प्राक्षम्-क्ष्व-क्ष्म, अमोऽभावे सिचि वृद्धौ अस्पार्क्षीत्-अस्पार्ष्टाम्-र्क्षुः अस्पार्क्षीः-र्ष्टम्-र्ष्ट अस्पार्क्षम्-र्क्ष्व-क्ष्म सिजभावे शलइगुपधादिति क्से

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षत्वकत्वयोः सस्य षत्वे कित्वादगुणे अस्पृक्षत्-क्षताम्-क्षन्-क्षः-क्षतम्-त- क्षम्-क्षाव-म । अस्प्रक्ष्यत् अस्पर्क्ष्यत् । उप-सम्-परि-अभिस्पृशति उपस्पृशति (आचामति)। कर्मादौ-स्पृश्यते अस्पर्शि स्पर्शयति स्पृशति) अपस्पृशत् पिस्पृक्षति । कृत्सु- स्पर्शनं स्प्रष्टव्यं स्पर्ष्टव्यं स्प्रष्टा स्पर्ष्टा स्पर्शकः घञ्-स्पर्शः स्पृश्यं, स्पृशन्-न्ती-ती स्पृष्टः-ष्टवान् स्पृष्ट्वा संस्पृश्य स्प्रष्टुं स्पर्ष्टुम्, क्विप्-स्पृक् । मृश आमर्शने (स्पर्शे) सक० । स्पृशतिवत् । मृशति-तु अमृशत् मृशेत् , ममर्श ममृशतुः ममर्शिथ ममृशिव- म नियमादिट् । म्रष्टा मर्ष्टा, म्रक्ष्यति मर्क्ष्यति मृश्यात् , लुङि स्पृशमृशेति सिच्पक्षे वाऽम् सिजभावे अम्राक्षीत्- अम्राष्टाम्-क्षुः अमार्क्षीत्-र्ष्टाम्-र्क्षुः, अमृक्षत्-क्षताम्-क्षन् , अम्रक्ष्यत् अमर्क्ष्यत् । विमृश्-विचारे, आमृश्-आक्रमणे । मृश्यते अमर्शि मर्शयति अमीमृशत् अममर्शत् मिमृक्षति । कृत्सु-मर्शनं विम्रष्टव्यं विमर्ष्टव्यं विमर्शनीयं म्रष्टा मर्ष्टा विमर्शकः घञ्-विमर्शः परामर्शः विमृष्टः मृष्टः मृष्ट्वा विमृश्य परामृश्य म्रष्टुं मर्ष्टुं परामृशन्-न्ती-ती । विश प्रवेशने सक० । विशति-तु अविशत् विशेत् , विवेश विविशतुः-शुः विवेशिथ विविशिव-म, वेष्टा वेक्ष्यति व्रश्चति षत्वे कत्वं षत्वं विश्यात् । लुङि क्सः षत्वकत्वे षत्वं च अविक्षत्-क्षताम्-क्षन् , अवेक्ष्यत् । उपविश्-आसने, प्रविश्-प्रवेशने, संविश्-स्वापे, निविश्-स्थितौ, निर्विश्-भोगे, आविश्-आवेशे, अभिनिविश्-आग्रहे नेर्विश आत्मनेपदे निविशते अभिनिविशते । कर्मादौ-प्रविश्यते प्रावेशि प्रवेशयति-ते प्रावीविशत् , प्रविविक्षति विविक्षते । कृत्सु-प्रवेशनं प्रवेष्टव्यं प्रवेशनीयं, घञ्-प्रवेशः आवेशः अभिनिवेशः उपवेष्टा प्रवेशकः प्रविष्टः प्रविशन्-न्ती-ती, णौ-प्रवेशितः विष्ट्वा प्रविश्य, णौ-प्रवेश्य, प्रवेष्टुं, णौ-प्रवेशयितुम् , क्विप्-विट्, मन्-वेश्म (गृहम्), झच्-वेशन्तः (अल्पसरः)।

षद्लृ विशरणगत्यवसादनेषु अ०स० । सार्वधातुकेषु शे पाघ्रेति सीदादेशे भौवादिकवत् सीदति-तु असीदत्; ससाद सेदतुः सत्ता सत्स्यति सद्यात् असदत् लृदित्त्वादङ्, असत्स्यत् । निषीदति अवसीदति आसीदति सादयति, सदनम् आसादनम् भौवादिकवत् , केवलं शतरि सीदती सीदन्तीति नुम्विकल्पो विशेषः । एवं शद्लृ शातने इत्यप्यत्र पठ्यते, तत्र शीयादेशः शित्यात्मनेपदमन्यत्र परस्मैपदमित्यादि सर्वं भौवादिकवत् , अस्य शतरि प्रयोगाभावेनात्र पाठो न केवलं स्वरार्थः । क्षि निवासगत्योः सक० । इयङ् क्षियति, ल्यपि-क्षिय इति दीर्घे प्रक्षीय, गत्यर्थे कर्तरि क्ते क्षितः इनि-क्षयी । षू प्रेरणे सक० । उवङ् सुवति, क्त-सूतः (सारथिः), क्यप् रुट् सूर्यः, इन्-प्रसवी, क्तन्-रुजो भङ्गे सक० । रुजति, पदरुजेति कर्तरि घञ्-रोगः, क्त-रुग्णः रुग्णवान् ओदित्वान्नत्वम्, क्विप्-रुक्, भुजो कौटिल्ये अक० । भुजति, भुग्नः भुग्नवान् ओदित्वान्नत्वम् ।

प्रयोगाः–निमज्ज्योन्मज्ज्याचामेत् । स निर्विश्य यथाकामम् । प्रविशन्ति निजं गृहम् । निविशते यदि शूकशिखापदे सृजति सा कियतीमिव न व्यथाम् । कर्माकर्म विमर्शयेत् । असृजद्विश्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मीश्वरः। अस्प्राक्षीच्चरणौ पितुः। विससर्ज प्रभुर्भृत्यान्। तीर्थे मज्जन्ति यात्रिणः। पृच्छामि त्वां धर्मसंमूढचेताः। अत्र सर्गो विसर्गश्च। विममर्श गभीरोक्तिम्। उपविश्यासने जपेत्। स्पृशन्ति शरवत्तीक्ष्णाः।

उदात्ताः (सेटः) अनुदात्तेतः (आत्मनेपदिनः)-जुषी प्रीतिसेवनयोः सक०। जुषते-ताम् अजुषत जुषेत, जुजुषे-षाते-षिरे, जोषिता-ष्यते-षीष्ट अजोषिष्ट-षिषाताम्-षत अजोषिष्यत। कर्मादौ-जुष्यते अजोषि जोषयति-ते अजूजुषत्-त जुजु-जुजोषिषते रलोव्युपधादिति वा कित्वम्। कृत्सु-जोषणं जोषणीयं जुषमाणः जुष्टः ईदित्वान्नेट् जुषित्वा जोषित्वा कित्वं वा, घञ्-जोषः जोषं (तूष्णीम्), क्यप्-जुष्यः। ओविजी भयसञ्चलनयोः अक०। प्रायेणायमुत्पूर्वः उद्वेगे। जुषिवत्। उद्विजते-ताम् उदविजत उद्विजेत उद्विविजे-जाते-जिरे। विज इट् (१-२-२) विजेः पर इडादिप्रत्ययो ङिद्वत्स्यात्। तेन इटि न गुणः उद्विजिता-ष्यते-षीष्ट उदविजिष्ट-जिषाताम्-षत, उदविजिष्यत। उप-प्रोद्विजते पर्युद्विजते। भावादौ-उद्विज्यते उदवेजि, उद्वेजयति-ते उदवीविजत्-त, उद्विविजिषते। कृत्सु-उद्वेजनम् उद्वे[illegible]यम् उद्वेगः, णि-तृच्-उद्वेजयिता, उद्वेजकः उद्विजमानः उद्विग्नः प्रोद्विग्नः ईदित्वान्नेट्, णौ-उद्वेजितः उद्विज्य उद्विजितुम्। ओलस्जी व्रीडायाम् अक०। भ्रस्जवत् सस्य श्चुत्वेन शे तस्य जश्त्वेन जे लज्जधातुः लज्जते-ताम् अलज्जत लज्जेत, ललज्जे-ज्जाते-ज्जिरे, लज्जिता-ष्यते-षीष्ट, अलज्जिष्ट-ज्जिषाताम्-षत, अलज्जिष्यत। भावादौ-लज्ज्यते अलज्जि, लज्जयति-ते अललज्जत्-त लिलज्जिषते। कृत्सु-लज्जितव्यं लज्जिता लज्जमानः लज्जितः लज्जित्वा लज्जितुम् अङ्-लज्जा। ओलजी व्रीडायामित्यपि तस्य एक एव जकारः लजते लेजे इत्यादि।

प्रयोगाः-उद्वेजयति तद्वचः। कर्मणा लज्जिता वयम्। जुषते पर्वतकन्दरां यतिः। कीटजुष्टं न गृह्णीयात्। उद्विग्नमानसोस्मि। अस्योद्वेगो भृशायते। लज्जानम्रमुखी वधूः। उदविजन्त ते तस्य साहसात्। पापाल्लज्जामहे वयम्। उभयतश्चव्यवते जुषतेप्यघम्। लज्जा तिरश्चां यदि चेतसि स्यात्। उद्वेगो मनो भ्रंसयति।

उदात्ताः (सेटः) उदात्तेतः (परस्मैपदिनः) ओव्रश्चू छेदने ऊदित्वाद्वेट् सक०। सार्वधातुकेषु शस्यापित्वेन ङित्वाद्ग्रहिज्येति रेफस्य सम्प्रसारणे ऋकारे पूर्वरूपे व्रश्चेति सस्य श्चुत्वेन शः वृश्चति-तु अवृश्चत् वृश्चेत्। लिटि संयोगात्परत्वेन कित्वाभावात्पूर्वं न सम्प्रसारणं, द्वित्वोत्तरं लिट्यभ्यासस्येति अभ्यासरेफस्य सम्प्रसारणे पूर्वरूपे वृश्च व्रश्च इति जाते ऋकारस्य उरदित्वे रपरत्वे तस्याचःपरस्मिन्निति स्थानिवद्भावेन सम्प्रसारणपरत्वान्न सम्प्रसारणे इति निषेधेन व्रस्य सम्प्रसारणाभावे हलादिशेषे ववश्च-श्चतुः-श्चुः ऊदित्वात्सर्वत्रेड्विकल्पः क्रादिनियमस्य प्रतिषिद्ध-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...प्रत्ययत्वात्पल्यपि वेट् वव्रश्चिथ, इडभावे वव्रश्च-थेत्यत्र श्चुत्वस्यासिद्धत्वात्स्कोरिति सलोपे व्रश्चेति ...स्य षत्वे थस्य ष्टुत्वे वव्रष्ठ वव्रश्चथुः-श्च वव्रश्च-श्चिव-म। लुटि इडभावपक्षे स्कोरिति सलोपे ...स्य षत्वे ष्टुत्वं व्रश्चिता व्रष्टा-रौ-रः। लृटि इडभावपक्षे सलोपे षत्वे षढोरिति कत्वे स्यस्य ष्यत्वं ...श्चिष्यति व्रक्ष्यति। आशिषि कित्वात्सम्प्रसारणे वृश्च्यात्-च्यास्ताम्-च्यासुः। लुङि इट्पक्षे नेटीति ...हलन्तलक्षणवृद्धिनिषेधे अव्रश्चीत् श्चिष्टाम्-श्चिषुः। इडभावे अव्रश्च्सीत् इत्यत्र हलन्तलक्षणवृद्धौ ...सुत्वासिद्ध्या स्कोरिति सलोपे व्रश्चेति षत्वे कत्वे सस्य षत्वम् अव्राक्षीत् अव्राष्टाम् झलोझलीति सिचो ...लोपे वर्णाश्रये प्रत्ययलक्षणाभावेन षढोरिति कत्वं न, अव्राक्षुः अव्राक्षीः अव्राष्टम्-ष्ट अव्राक्षम्-क्ष्व-क्ष्म, ...व्रश्चिष्यत् अव्रक्ष्यत्। कर्मादौ-वृश्च्यते अव्रश्चि व्रश्चयति-ते विव्रश्चिषति विव्रक्ष्यति। कृत्सु-व्रश्चनम् ...व्रश्चिता व्रष्टा वृश्चकः व्रश्चित्वा जॄव्रश्च्योः क्त्वीति नित्यमिट् न क्त्वासेडित्यकित्वेन न सम्प्रसारणम्, ...वृक्णः वृक्णवान् यस्यविभाषेति नेट् ओदित्त्वान्निष्ठानत्वं, तस्यासिद्धत्वेन झल्परत्वात्स्कोरिति सलोपः ...चोःकुरिति कुत्वं च। व्रश्चितुम् व्रष्टुम्, सक्-वृक्षः, करणे ल्युटि इध्मप्रव्रश्चनः कुठारः। उज्झ उत्सर्गे सक०। उज्झति-तु औज्झत् आटि वृद्धिः, उज्झेत्, लिटि इजादेश्चेत्याम् उज्झाञ्चकार उज्झिता-ष्यति उज्झयात् औज्झीत्-ज्झिष्टाम्-ज्झिषुः औज्झिष्यत्। कर्मादौ उज्झते औज्झि उज्झयति-ते, कृत्सु-उज्झनम् उज्झि-तव्यम् उज्झिता उज्झितः उज्झित्वा उज्झितुम्, क्यप् उध्यः नदविशेषः। गुम्फ ग्रन्थे सक०। गुम्फति-तु अगुम्फत् गुम्फेत् जुगुम्फ-म्फतुः-म्फुः-म्फिथ-व-म, गुम्फिता-ष्यति गुम्फ्यात् अगुम्फीत् अगुम्फिष्यत्। कर्मादौ-गुम्फ्यते अगुम्फि गुम्फयति-ते अजुगुम्फत्-त जुगुम्फिषति, कृत्सु-गुम्फनं गुम्फितव्यं गुम्फनीयं गुम्फिता गुम्फकः गुम्फितः गुम्फन्-न्ती-ती गुम्फित्वा विगुम्फ्य, घञ्-गुम्फः। कॄ विक्षेपे सक०। ॠतइद्धातोरितीत्वे रपरत्वम् किरति-तु अकिरत् किरेत्। लिटि कित्वेपि ॠच्छत्यॄतामिति पूर्वविप्रतिषेधेन गुणे णिति उपधावृद्धिः चकार चकरतुः-रुः चकरिथ-रथुः-र चका-कर चकरिव-म। ...श्वतासोरिटि ॠच्छत्यॄतामिति गुणे वृतोवेति इटो वा दीर्घः करिता करीता करिष्यति करीष्यति आशिषि ॠतइद्धातोरिति इर्भावे हलिचेति दीर्घे कीर्यात्-र्यास्ताम्-र्यासुः। लुङि सिचि वृद्धिः इट् ...सिचिपरस्मैपदेष्विति निषेधाद् वृतोवेति न दीर्घः अकारीत्-रिष्टाम्-रिषुः अकारीः-रिष्टम्-ष्ट-रिषम्-ष्व-ष्म, अकारिष्यत् अकरीष्यत्। उप-प्र-विकॄ-विकिरणे, उत्कॄ-उत्किरणे। किरतौ लवने (६-१-१४०) उपात्किरतेः सुट् स्याच्छेदेऽर्थे। उपस्किरति (छिनत्ति)। अडभ्यासव्यवायेपि सुट्कात्पूर्व इति वक्तव्यम् (वा०) उपास्किरत् उपचस्कार। हिंसायां प्रतेश्च (६-१-१४१) उपात्प्रतेश्च किरतेः सुट् स्याद्धिंसायाम्। उपस्किरति प्रतिस्किरति (हन्ति)। किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(वा) इत्यात्मनेपदे, अपाच्चतुष्पाच्छकुनिष्वालेखने (६-१-१४२) अपात् किरतेः सुट् स्यादालेखनेऽर्थे चतुष्पात्सु शकुनिषु च गम्येषु। सुडपि हर्षादिष्वेव वक्तव्यः (वा) अपस्किरते वृषो हृष्टः, कुक्कुटो भक्ष्यार्थी, श्वा आश्रयार्थी। कर्मादौ-कीर्यते प्रतिचस्करे, कारयति चिकरिषति। कृत्सु-विकिरणम् उत्किरणम् उपस्किरणम्, क-विस्किरः विकिरः, घञ्-धान्यस्य निकारः अन्यत्र उत्करः निकरः कीर्त्वा विकीर्य प्रकीर्णः विकीर्णः उत्कीर्णः विकिरन्-न्ती-ती, उ-कुरुः, अप्-अवस्करः (वर्चस्कम्) अन्यत्र अवकरः। गॄ निगरणे सक०। किरतिवत्। अचि विभाषा (८-२-२१) गिरते रेफस्य लत्वं वा स्यादजादौ। इति पक्षे लः गिरति गिलति-तु अगिर-लत् गिरे-लेत्, जगार-ल जगर-लतुः-रुः-लुः जगरि-लिथ-थ-म, गरि-लिता-ष्यति, गीर्यात् इर्भावे दीर्घः, अगारी-लीत् अगारि-लिष्टाम्-षुः, अगरि-लिष्यत्। उप-निगिर-लति, उद्गॄ-उद्गरणे, संगॄ-प्रतिज्ञायाम् समश्चप्रतिज्ञायामिति तङ् संगिरते, अवाद्ग्र इति तङ् अवगिरते। कर्मादौ-उद्गीर्यते निगीर्यते उदगारि, उद्गारयति उज्जिगरिषति सञ्जिगरिषते। कृत्सु-निगिरणम् उद्गिरणम् उद्गीर्णः निगीर्णः उद्गिरन्-न्ती-ती गीर्त्वा उद्गीर्य निगीर्य उद्गरितुम्, अच्-मुद्गरः गलः (कण्ठः) गरः (विषम्), घञ्-उद्गारः, उ-गुरुः भन्-गर्भः। कॄ गॄ अनयोः पूर्वोक्तानां दृङ् धृङ् प्रच्छ एषां च पञ्चानां किरश्चपञ्चभ्य इति सनि इट्। इष इच्छायाम् सक०। केचिदिषु इति उदितं पठन्ति। सार्वधातुकेषु शे इषुगमीति षस्य छत्वं तुगागमश्च, इच्छति-तु ऐच्छत् इच्छेत् लिटि इष इत्यस्य द्वित्वेभ्यासकार्यं पिति परत्वाद्गुणे अभ्यासस्यासवर्णे इति इयङ् अन्यत्र गुणाभावे सवर्णदीर्घः इयेष ईषतुः-षुः इयेषिथ ईषथुः-ष इयेष ईषिव-म, लुटि तादेरार्धधातुकस्य तीषसहेति वेट् एषिता एष्टा एषिष्यति इष्यात्, लुङि आदिवृद्धौ इट् ऐषीत् ऐषिष्टाम्-षिषुः ऐषीः-षिष्टम्-ष्ट ऐषिषम्-ष्व-ष्म, ऐष्यत्। कर्मादौ-इष्यते ऐषि एषयति ऐषिषत् स्पष्ट इच्छार्थत्वान्नेह सन्। कृत्सु-एषणम् एषितव्यम् एषणीयम् एषिता एष्टा वेट् इच्छन्-न्ती-ती, कर्मणि-इष्यमाणः एषित्वा इष्ट्वा तीषसहेति वेट् इटि न क्त्वासेडिति अकित्वाद्गुणः एषितुम् एष्टुम् इष्टः इष्टवान् वेट्कत्वान्नेट्, श-इच्छा छत्वम् क्तिन्-इष्टिः तितुत्रेति नेट् उ-इच्छुः एषणा। मिष स्पर्द्धायाम् अक०। मिषति-तु अमिषत् मिषेत् मिमेष मिमिषतुः-षुः मिमेषिथ मिमिषिव-म, मेषिता-ष्यति मिष्यात् अमेषीत् अमेषिष्यत्। उप-उन्मिष-उन्मेषणे, निमिष-निमेषणे। भावादौ-मिष्यते अमेषि उन्मेषयति-ते उन्मिमेषिषति। कृत्सु-उन्मेषणं निमेषणम् उन्मेषितव्यम्, घञ्-उन्मेषः निमेषः, अच्-मेषः मिषित्वा मेषित्वा उन्मिष्य उन्मिषन्-न्ती-ती उन्मेषितुम्। मिल श्लेषणे अक०। मिलति-तु अमिलत्-मिलेत् मिमेल मेलिता-ष्यति मिल्यात् अमेलीत् अमेलिष्यत्। उप-संमिलति। भावादौ-मिल्यते अमेलि मेलयति अमीमिलत् मिमि-मेलिषति रलोव्युप-धादिति वा कित्वेन गुणो वा, कृत्सु-मेलनं मिलितव्यं मिलितः मिलन्-न्ती-ती मिलित्वा संमिल्य संमिलितुम्। मिल सङ्गमे इत्युभयपदिष्वप्ययं पठ्यते, तेन मिलते इत्याद्यपि, परं प्रायिकः परस्मैपदी।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिख अक्षरविन्यासे सक० । लिखति-तु अलिखत् लिखेत् लिलेख लिलिखतुः-खुः लिलेखिथ लिलिखिव -म, लेखिता-ष्यति लिख्यात् अलेखीत् अलेखिष्यत् । उप-विलिख-विलेखने, उल्लिख्-उल्लेखने आलेख-चित्रीकरणे । कर्मादौ-लिख्यते अलेखि लेखयति-ते अलीलिखत्-त लिलि-लेखिषति रलोव्युपधादिति वा कित्वम् । कृत्सु-लेखनं लिखितव्यं लेखनीयं लेख्यं लेखिता लेखकः लिखन्-न्ती-ती, कर्मणि-लिख्यमानः लिखित्वा लेखित्वा वा कित्वम् विलिख्य, घञ्-लेखः उल्लेखः, ण्यत्-आलेख्यम् (चित्रं), करणे ल्युटि लेखनी, अङ्-लेखा रेखा, लेखितुम् , णौ-लेखितः ।

टि० १ धातुपाठे लिखकुटयोः क्रमविन्यासेन कुटस्यादिरित्यर्थे लिखतेरपि कुटादित्वं स्वीकृत्य गाङ्कुटादिभ्य इत्यञ्णितां ङित्त्वे लिखिता लिखिष्यति लिखितुं लिखनम् इति रूपाणि केचिन्मन्यन्ते, अतः लिखितुं विश्वसृजोपि शक्तिः लिखिष्यते इति प्रयोगान्समर्थयन्ति, वस्तुतस्तु लिखित्वा लेखित्वा लिलि-लेखिषति इति वृत्तिग्रन्थे क्त्वासनोरेव पधादिति वा कित्वेन गुणविकल्पनिर्देशनात् अपाच्चतुष्पाच्छकुनिष्वालेखने इति सूत्रनिर्देशनाच्च तद्विरोधापत्तेः कुटादिभ्य इत्यनुक्त्वा कुटादिभ्य इति निर्देशाच्च कुट आदिर्येषामित्येवार्थः तेन लिखतेः क्त्वासनोरेव कित्वविकल्पेन सनोर्द्विधा प्रयोग उचितः, अन्यत्र तु लेखिता लेखिष्यति लेखनं लेखितुमित्यादय एव साधवः, अत एव मनोरमायां लिखतीति प्रयोगः अपनमापः लिखस्यापस्तं करोतीत्यर्थे उपपादित इत्यनुसन्धेयम् ।

२ ऋषी गतौ अक० । ऋषति, अभच्-ऋषभः (वृषः), सक्-ऋक्षः (भल्लूकः) । उछि उञ्छे सक० । उञ्छति, उञ्छनम् , अ-उञ्छः भौवादिकस्यास्य शतरि उञ्छन्तीत्येव, अस्य तु उञ्छतीत्यपि । त्वच संवरणे सक० । त्वचति, त्वचः, क्विप्-त्वक् । ऋच स्तुतौ सक० । ऋचति, ण्यत्-अर्च्यः यजयाचेति कुत्वनिषेधः क्विप्-ऋक् ऋचोर्धम्-अर्धर्चम् । उब्ज आर्जवे अक० । उब्जति, घञि-निपातनात् न्युब्जः (रोगविशेषः) असुन्, वलोपो गुणश्च ओजः (बलम्) । जर्ज झर्झ परिभर्त्सनयोः सक० । जर्जति झर्झति, रक्-जर्जरः झर्झरः । उभ उम्भ पूरणे सक० । उभति उम्भति, क-उभौ द्विवचनान्तः, केन (जलेन) उभ्यते इति घञि कुम्भः । दृभी ग्रन्थे सक० । दृभति सन्दृभति, क्त-दृब्धः सन्दृब्धः गुणे घञ्-दर्भः सन्दर्भः । मृड सुखने सक० । मृडति, क-मृडः (शिवः), कीकन्-मृडीकम् (सुखम्) । पृण प्रीणने सक० । पृणति, क-लोकम्पृणः (लोकप्रीणकः) । मृण हिंसायाम् सक० । मृणति, आलच्-मृणालम् (पद्मनालः) । पुण कर्मणि शुभे अक० । पुणति, क-निपुणः । शुन गतौ अक० । शुनति, क्वन्-शुनकः । द्रुण हिंसागतिकौटिल्येषु सक० । द्रुणति, ङीष्: द्रोणी (काष्ठाम्बुवाहिनी) । घूर्ण भ्रमणे अक० । घूर्णति घूर्णनम् घूर्णितः घूर्णन् , भौवादिकस्त्वात्मनेपदी । खुर छेदने सक० । खुरति, क-खुरः । क्षुर विलेखने सक० । क्षुरति, क-क्षुरः क्षुरस्येदं क्षौरम् । घुर भीमार्थशब्दयोः अक० । घुरः-घोरः द्वित्वे घुर्घुरः । पुर अग्रगमने सक० । पुरति, क-पुरम् , क्विप्-पूः, असुन्-पुरः (अव्ययम्) । किल श्वैत्ये

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अक०। किलति, टिष् वुक् च-किल्विषम् (पापम्)। **तिल** स्नेहने सक०। तिलति, क-तिलम्। **चिल** वसने सक०। चिलति, करणे घञ्-चैलम् (वस्त्रम्)। **इल** स्वप्नक्षेपणयोः अक०। इलति, क-टाप्-इला (पृथ्वी)। **विल** संवरणे सक०। विलति, क-आविलः (मलिनः)। **बिल** भेदने सक०। बिलति, क-बिलम्। **शिल** उञ्छे सक०। शिलति, क-शिलम्। उञ्छः कणशआदानं कणिशाद्यर्जनं शिलम्।

प्रयोगाः—लिखन्नास्ते भूमिम्। अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः। सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार। वृक्षान्वव्रश्च भूयशः। सरसानां गिरां गुम्फः। उरोविदारं प्रतिचस्करे नखैः। उन्मिषन्निमिषन्नपि। यस्योन्मेषनिमेषयोः। चलन्तु गिरयो मिलन्तु वारिधयः। उच्छ्वर्तुमैच्छत्प्रसभोद्धृतारिः। वलीयसी विधेरिच्छा। उत्कीर्णलेखावली। उत्सवे सममिलन्स्वबान्धवाः।

तुदादिषु कुटादयः उदात्ताः (सेटः) उदात्तेतः (परस्मैपदिनः)—कुट कौटिल्ये अकर्मकः। कुटादिषु ञित्णिद्भिन्नप्रत्ययानां ङित्त्वेन तत्र गुणवृद्ध्यभावो विशेषः। कुटति-तु अकुटत् कुटेत् चुकोट णित्वान्न ङित्वम् चुकुटतुः-टुः चुकुटिथ-व-म पित्यपि गाङ् कुटेति ङित्वान्न गुणः कुटिता-ष्यति कुट्यात् अकुटीत् अकुटिष्यत्। ञित्णिद्वर्जे न क्वापि गुणवृद्धी, कृत्सु-कुटनं कुटितव्यं कुटित्वा कुटितुम्, घञ्-कोटः ञित्वाद्गुणः, अर-कुटरः (मन्थविष्कम्भः), कोटरः वनं पुरगेत्यत्र कोटरनिर्देशाद्गुणः, इलच् कुटिलः, इन्-कुटिः-टी,-र-कुटीरः, (ह्रस्वा कुटी)। **कुच** सङ्कोचने अक०। प्रायः सम्पूर्वः प्रयुज्यते, कुटिवत्, सङ्कुचति-तु समकुचत् सङ्कुचेत्, सञ्चुकोच सङ्कुचिता-ष्यति सङ्कुच्यात् समकुचीत् समकुचिष्यत्। भावादौ-सङ्कुच्यते समकोचि सङ्कोचयति। कृत्सु-सङ्कुचनं सङ्कुचितव्यं, घञ्-सङ्कोचः सङ्कुचिता सङ्कोचकः णित्वाद्गुणः सङ्कुच्य सङ्कुचितुम्, णौ-सङ्कोचयितव्यं सङ्कोचितव्यं सङ्कोचितः सङ्कोचयितुम्। **स्फुट** विकसने अक०। स्फुटति-तु अस्फुटत् स्फुटेत्, पुस्फोट स्फुटिता-ष्यति स्फुट्यात् अस्फुटीत् अस्फुटिष्यत्। प्र-वि-सं-परिस्फुटति। भावादौ-स्फुट्यते अस्फोटि स्फोटयति-ते अपुस्फुटत्-त। कृत्सु-स्फुटनं स्फुटितव्यं स्फुटितः प्रस्फुटन्-न्ती-ती, घञ्-स्फोटः स्फुटित्वा स्फुटितुम्, णौ-प्रस्फोटनं प्रस्फोटितः। **स्फुर** सञ्चलने अक०। स्फुरति-तु अस्फुरत् स्फुरेत् पुस्फोर स्फुरिता-ष्यति स्फूर्यात् अकदिति दीर्घः अस्फुरीत् अस्फुरिष्यत्, प्र वि-सम्-परिस्फुरति। भावादौ-स्फूर्यते अस्फोरि स्फोरयति-ते स्फारयति-ते चिस्फुरोर्णाविति आत्वं वा, अपुस्फुरत्-त अपस्फरत्-त पुस्फुरिषति। कृत्सु-स्फुरणं स्फुरितव्यं स्फुरितः स्फुरन्-न्ती-ती स्फुरित्वा प्रस्फूर्य स्फुरितुम्, णौ-स्फोरयितुम् स्फोरितः। **त्रुट** छेदने अक०। वाभ्राशेति श्यन्वा त्रुटति-तु त्रुट्यति-तु अत्रुटत्-त्यत् त्रुटेत्-ट्येत्, तुत्रोट त्रुटिता-ष्यति त्रुट्यात् अत्रुटीत् अत्रुटिष्यत्, भावादौ त्रुट्यते अत्रोटि त्रोटयति-ते अतुत्रुटत्-त। कृत्सु-त्रुटनं त्रुटितव्यं त्रुटितः त्रुटन्-त्रुट्यन्-न्ती-ती त्रुटित्वा त्रुटितुम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० पुट संश्लेषणे अक० । पुटति, क-पुटः-सम्पुटः पुटी पुटिका सम्पुटकः सम्पुटितः । गुड रक्षायाम् सक० । गुडति, (इक्षुविकारः-संनाहश्च) टाप्-गुडा (स्नुही) तत्प्रायाः केशा अस्य गुडाकेशः (अर्जुनः) । छुर छेदने सक० । छुरा-छुरिका, निष्ठान्तात्संज्ञायां कन्-आच्छुरितकम् (सस्मितहासः) । घुट प्रतिघाते सक० । घुटति, घञ्-घोटः, ण्वुल्-कुटादौ त्वात्मनेपदी । णु स्तवने सक० । नुवति, नुत्वा नुतः नुतिः । धू विधूनने सक० । धुवति, करणे इत्र-(व्यजनम्) । कुटेः किच्चेति कुटादेर्ङित्वस्यानित्यत्वज्ञापनाद्गुणः । ध्रुव गतिस्थैर्ययोः अक० । ध्रुवति, अच्-ध्रुवः । उद्यमने अक० । आत्मने० । गुरते, उद्गुरते, उद्गूर्णः उद्गूर्णवान् ईदित्वान्नेट् । इति कुटादयः ।

प्रयोगाः—सङ्कुचन्ति सरोजानि स्फुटन्ति कुटजोद्गमाः । विस्फुरन्तिधनुर्घोषाः । हारास्त्रुटन्ति केलिषु कामिनीनाम् । परिस्फुरति मन्दिरम् । सङ्कोचयति दुष्कर्म । मुनिः कुटीरमध्यास्ते । विस्फार-मुद्गरम् । स्फुटिताः कुटजाङ्कुराः । समकुचद्हृदयं वचसाऽमुना । स्फुरत्यास्फोटयन्धनुः ।

तुदादिषु मुचादयः अनुदात्ताः (अनिटः) स्वरितेतः (उभयपदिनः)—मुच्लृ मोचने सक० । मुचादीनां शे नुम् विशेषः । सार्वधातुके शे, शे मुचादीनाम् (७-१-५९) मुचादीनां शेपरे नुम्स्यात् । अनुस्वारपरसवर्णौ, मुञ्चति-ते मुञ्चतु-ताम् अमुञ्चत्-त मुञ्चेत्-त, मुमोच मुमुचतुः-चुः मुमोचिथ मुमुचिव-म क्रादिनियमादिट्, मुमुचे-चाते-चिरे, मोक्ता-सि-से लघूपधगुणे चोःकुः, मोक्ष्यति-ते गुणः षत्वम्, मुच्यात् कित्वान्न गुणः, मुक्षीष्ट, लुङि परस्मैपदे लृदित्वादङ् अमुचत्-चताम्-चन्, सिचि झलि परे झलोझलीति सलोपः अमुक्त अमुक्षाताम्-क्षत अमुक्थाः-क्षाथाम् अमुग्ध्वम् अमुक्षि-वहि-क्ष्महि, अमोक्ष्यत्-त । प्र-विमुच्-त्यागे, आमुच्-परिधाने, उन्मुच्-उन्मोचने, प्रतिमुच्-प्रत्यर्पणे, कर्मणि-मुच्यते अमोचि, मोचयति-ते अमूमुचत्-त मुमुक्षति-ते । कृत्सु-मोचनम् उन्मोचनम् मोक्तव्यं मोचनीयम्, ण्यत्-मोच्यम् मोक्ता मोचकः मुक्तः विमुक्तः मुञ्चन्-न्ती-ती मुञ्चमानः कर्मणि-मुच्यमानः मुक्त्वा उन्मोच्य मोक्तुम् मुक्तिः, सन् अ-मुमुक्षा, सन् उ-मुमुक्षुः, सन्नन्ताद्घञ्-मोक्षः, क्विप्-जलमुक् । लुप् छेदने सक० । लुम्पति-ते-तु-ताम् अलुम्पत्-त लुम्पेत्-त, लुलोप लुलुपतुः-पुः लुलोपिथ लुलुपिव-म, लुलुपे-पाते-पिरे, लोप्ता-सि-से, लोप्स्यति-ते लुप्यात् लुप्सीष्ट, लृदित्वादङ् अलुपत्-पताम्-पन्, अलुप्त अलुप्साताम्-प्सत अलुप्थाः-प्साथाम्-ध्वम् अलुप्सि-प्स्वहि-प्स्महि, अलोप्स्यत्-त । प्र-वि लुम्पति-ते । लुप्यते अलोपि लोपयति-ते अलूलुपत्-त, लुलुप्सति-ते । कृत्सु-लोपनं लोपनीयं लोप्यं लोप्ता लोपकः लोपः लुम्पन्-न्ती-ती लुप्यमानः लुप्तः लुप्त्वा विलुप्य लोप्तुम्, णौ-विलोपितः विलोप्य । लिप उपदेहे (लेपने) लिम्पति-ते-तु-ताम् अलिम्पत्-त लिम्पेत्-त, लिलेप लिलिपतुः-पुः लिलेपिथ लिलिपिव-म, लिलिपे लेप्ता-सि-से, लेप्स्यति-ते लिप्यात् लिप्सीष्ट, लुङि परस्मैपदे लिपिसिचिह्वश्चेति च्लेरङ्, तङि आत्मनेपदेष्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यतरस्यामित्यङ् वा अलिपत्-पताम्-पन्, अलिपत-पेताम्-पन्त अलिपथाः-पेथाम्-पध्वम् अलिपे-पावहि-महि, अङोभावे सिचि झलि सलोपे अलिप्त अलिप्साताम्-प्सत अलिप्थाः-प्साथाम्-पध्वम् अलिप्सि-प्स्वहि-प्स्महि, अलेप्स्यत्-त। उप-प्र-वि-संलिम्पति-ते अवलिप्-अक० गर्वे। कर्मादौ-लिप्यते अलेपि लेपयति-ते अलीलिपत्-त लिलिप्सति-ते। कृत्सु-लेपनं लेप्तव्यं लेपनीयं लेप्यं, घञ्-लेपः प्रलेपः अवलेपः (गर्वः) लेप्ता लेपकः लिम्पन्-न्ती-ती लिम्पमानः, कर्मणि-लिप्यमानः, लिप्त्वा विलिप्य लेप्तुम्, इ-लिपिः लिविः, श-निलिम्पाः (देवाः)। षिच क्षरणे (सेचने) सक०। सिञ्चति-ते-तु-ताम् असिञ्चत्-त सिञ्चेत्-त, सिषेच सिषिचतुः-चुः सिषेचिथ सिषिचिव-म, सिषिचे, सेक्ता-सि-से, सेक्ष्यति-ते कृत्वे षत्वम्, सिच्यात् सिक्षीष्ट, लुङि लिपिचत्परस्मैपदे नित्यं, तङि विकल्पेनाङ् असिचत् असिचत असिक्त असिक्षाताम्-क्षत असिक्थाः-क्षाथाम् असिग्ध्वम् असिक्षि-क्ष्वहि-क्ष्महि, असेक्ष्यत्-त। नि-परि-अभिषि-ञ्चति-ते। कर्मादौ-सिच्यते असेचि सेचयति-ते असीसिचत्-त सिसिक्षति-ते। कृत्सु-सेचनं सेक्तव्यं सेचनीयं सेच्यं सेकः अभिषेकः सिञ्चन्-न्ती-ती सिञ्चमानः, कर्मणि-अभिषिच्यमानः सिक्तः अभि-षिक्तः सिक्त्वा अभिषिच्य अभिषेक्तुम्। विद्लृ लाभे सक०। विन्दति-ते-तु-ताम् अविन्दत्-त विन्देत्-त, विवेद विविदतुः-दुः विवेदिथ विविदिव-म, विविदे वेत्ता वेत्स्यति-ते विद्यात् वित्सीष्ट, अविदत्, लृदि-त्वादङ्, अवित्त-त्साताम्-त्सत अवेत्स्यत्-त। अधिविद्-अधिवेदने, परिविद्-परिवेदने (ज्येष्ठमतिक्रम्य दाराणामग्नेर्वा ग्रहणे)। विद्यते अवेदि वेदयति-ते अवीविदत्-त विवित्सति-ते। कृत्सु-वेदनम् अधिवेद-नम् वेत्ता परिवेत्ता परिवेदकः विन्दन्-न्ती-ती विन्दमानः वित्तः (प्रसिद्धः) परिविन्ना वित्वा परिविद्य वित्तं (धनं) परिवेत्तुम्। विन्दतिरयं सेडिति व्याघ्रभूत्यादयः, तन्मते वेदिता वेदिष्यतीत्यादि, परि-वेत्ता परिविन्ना अधिविन्ना इति तु वेत्तेर्विद्यतेर्वैति तन्मतम्, भाष्यादिमते त्वयमनिडेव।

वि० कृती च्छेदने सेट् सक० पर०। मुचादित्वादत्रापि शे नुम् कृन्तति-तु अकृन्तत्-कृन्तेत् चकर्त-चकृततुः-तुः चकर्तिथ चकृतथुः-थ चकर्त चकृतिव-म, कर्तिता कर्तिष्यति कर्त्स्यति सेऽसिचीति स्ये वेट्, कृत्यात् अकर्तीत् अकर्तिष्यत्। निकृन्तति कृत्यते अकर्ति कर्तयति-ते कर्तनं कर्तनीयं, ल्यु-विकर्तनः (सूर्यः), कर्तित्वा निकृत्य कृत्तः कर्तितुम् कृत्तिः कर्तरी। पिश अवयवे सेट् सक० प०। पिंशति, क्त-पिशितं (मांसम्) अङ्गच्-पिशङ्गः, अच्-ङीष् पेशी (गर्भकोषः) इति मुचादयः।

प्रयोगाः—मस्या मुखं लिम्पति। वृक्षान्सिञ्चति मालिकः। अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत्। सा मुञ्च मुञ्चेति कलप्रभाषिणी। दुःखादेनममूमुचत्। अविदन्नृपतेर्धनम्। यशोधनो धेनुमृषेर्मुमोच। परिवेत्ताऽनुजो गर्ह्यः। क इदं लुम्पति बलात्। विलुप्तवित्तः सदनं विमुञ्चति। अभ्यषिच्यत राघवः। गोमयेनोपलिप्ताङ्गः। चौरो धनं लुम्पति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रश्नाः--तुदादिषु को विकरणः। भौवादिकेभ्यस्तौदादिकेषु को विशेषः। कुटादिषु मुचादिषु च किं विशेषकार्यम्। भ्रस्ज व्रश्च धातुषु के विकाराः। तुदादिषु उपसर्गयोगेन नानार्था धातवः के। तुदादिधातुषु किं पदम्। तुदादयः ...वा। अधस्तनवाक्यगताँस्तौदादिकधातुनिष्पन्नान् शब्दान्व्याकुरुत—

...विशते सन्मार्गम्। निमग्नः शोकसागरे। उपविश्य सभामध्ये परामर्शं चकार सः। श्वशुराल्लज्जते वधूः। कर्मसु ...ते। उपदिशति कामिनीनां यौवनमद एव ललितानि। विन्देयं बहुला श्रियम्। परिविन्दन्हि दुष्यति। चौरः श्रियं ...। स्फुटति हृदयं शोकोद्वेगात्। दक्षिणाक्षि स्फुरति मे। विधिर्लिलेख दुःखानि। **इति तुदादयः।**

अथ रुधादयः।

अनुदात्ताः (अनिटः) स्वरितेतः (उभयपदिनः)—**रुधिर्** आवरणे सक०। इरित्, सार्वधातुकेषु शपोऽपवादेन **रुधादिभ्यः श्नम्** (३-१-७८) रुधादिभ्यः श्नम् स्यात्। शमावितौ मित्वादन्त्यादचः परो नकारः। रुध् ति इत्यत्र नित्यत्वाद्गुणं बाधित्वा श्नमि लघूपधत्वाभावात्ततः पूर्वमिगन्तस्याङ्गत्वाभावाच्च न गुणः, झषस्तथोरिति तस्य धत्वे प्रत्ययावयवस्य नस्य णत्वे धस्य जश्त्वे रुणद्धि। तसि श्नमि श्नसोरल्लोप इत्यकारलोपे रुन्ध्-तस् इत्यत्र णत्वस्यासिद्धत्वान्नपदान्तेत्यल्लोपस्य स्थानिवद्भावनिषेधान्नस्यानुस्वारपरसवर्णयोः परसवर्णस्यासिद्धया णत्वाभावे तस्य धत्वे पूर्वधस्य झरोझरीति लोपे रुन्धः। झावन्तादेशे रुन्धन्ति। रुन्धसि इत्यत्र णत्वे धस्य जश्त्वचर्त्वयोः रुणत्सि, थस्थयोस्थस्य धत्वे पूर्वधलोपे रुन्धः रुन्ध रुणध्मि रुन्ध्वः रुन्ध्मः अल्लोपः। तङि तस्य धत्वे पूर्वधलोपे रुन्धे रुन्धाते रुन्धते आत्मनेपदेष्वनत इति झस्य अत्। रुन्त्से धस्य जश्त्वचर्त्वे रुन्धाथे रुन्ध्वे पूर्वधलोपः रुन्धे रुन्ध्वहे-न्ध्महे, रुणद्धु रुन्धाम् रुन्धन्तु रुणद्धि हेर्धित्वे जश्त्वम् रुन्धम्-न्ध, रुणधानि-धाव-म, रुन्धाम्-न्धाताम्-न्धताम्, रुणत्स्व रुन्धाथाम् रुन्ध्वम्, रुणधै-धावहै-महै; लङि अरुणध्-ति इत्यत्रेकारलोपे हल्ङ्यादिलोपे धस्य जश्त्वे चर्त्वविकल्पे अरुणत्-द् अरुन्धाम् अरुन्धन् अन्तेरिकारतकारलोपौ, सिपि इकारस्य हल्ङ्यादि सस्य च लोपे धस्य जश्त्वे दस्य दश्चेति रुत्वविकल्पः रुत्वाभावे वा चर्त्वम् अरुणः अरुणत्-द् अरुन्धम्-न्ध अरुन्धम्-न्ध्व-न्ध्म क्ङित्सु अल्लोपः, अरुन्ध-न्धाताम्-न्धत, अरुन्धाः थस्य धत्वं पूर्वधलोपः, अरुन्धाथाम् अरुन्ध्वम्, अरुन्धि-न्ध्वहि-न्ध्महि; रुन्ध्यात्-ध्याताम्-न्ध्युः, रुन्धीत-न्धीयाताम्-न्धीरन्; लिटि द्वित्वेभ्यासकार्ये पित्सु गुणः रुरोध रुरुधतुः-धुः रुरोधिथ रुरुधिथ-म; क्रादिनियमादिट्, रुरुधे-धाते-धिरे; रोद्धा-सि-से गुणे तस्य धत्वं धस्य जश्त्वम्, रोत्स्यति-ते, रुन्ध्यात्-ध्यास्ताम्-ध्यासुः; रुन्त्सीष्ट-न्त्सीयास्ताम्-न्त्सीरन् धस्य जश्त्वचर्त्वे; लुङि इरित्वात्पक्षे अङ्, तदभावे सिचि हलन्तलक्षणवृद्धौ धस्य जश्त्वचर्त्वे अरुधत्-धताम्-धन्, अरौत्सीत् अरौद्धाम् झलोझलि सलोपः अरौत्सुः अरौत्सीः अरौद्धम्-द्ध अरौत्सम्-त्स्व-त्स्म; अरुद्ध अरुत्साताम्-त्सत, अरुद्धाः अरुत्साथाम् अरुद्ध्वम्, अरुत्सि अरुत्स्वहि-त्स्महि; अरोत्स्यत्-त। उप-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुरुध्-अनुरोधे, उपरुध्-निर्बन्धे, अव-निरुध् निरोधने, विरुध्-विरोधे । कर्मादौ-रुध्यते अरोधि रोधयति-ते अरूरुधत्-त रुरुत्सति-ते । कृत्सु-रोधनं रोद्धव्यं रोधनीयं रोध्यं, घञ्-विरोधः अनुरोधः, कर्मणि घञ्- अवरोधः (अन्तःपुरम्) रोद्धा रोधकः रुन्धन्-ती रुन्धानः निरुद्धः रुद्ध्वा विरुध्य रोद्धुम्, असुन्-रोधः (तीरम्), किरच्-रुधिरम्, क्विप्-मार्गरुत्, सन्-अ रुरुत्सा, सन् उ-रुरुत्सुः। भिदिर् विदारणे सक० । रुधिवत्, झषः परत्वाभावेन धत्वाभावो विशेषः भिनत्ति भिन्तः भिन्दन्ति, भिनत्सि भिन्थः-न्थ भिनद्मि भिन्द्वः-न्द्मः, भिन्ते भिन्दाते-न्दते भिन्त्से भिन्दाथे भिन्ध्वे भिन्दे भिन्द्वहे-न्द्महे; भिनत्तु भिन्ताम् भिन्दन्तु भिन्धि भिन्तम्-न्त भिनदानि-व-म, भिन्ताम्-न्दाताम्-न्दताम् भिन्त्स्व-न्दाथाम्-न्ध्वम् भिनदै-दावहै-महै; अभिनत् अभिन्ताम् अभिन्दन्, अभिनः अभिनत् अभिन्तम्-न्त अभिनदम् अभिन्द्व-न्द्म; अभिन्त-न्दाताम्-न्दत, अभिन्थाः-न्दाथाम्-न्ध्वम् अभिन्दि-न्द्वहि-न्द्महि; भिन्द्यात् न्द्याताम्-न्द्युः, भिन्दीत-न्दीयाताम्-रन्; बिभेद बिभिदतुः-दुः बिभेदिथ बिभिदिव-म, बिभिदे-दाते-दिरे; भेत्ता-सि-से, भेत्स्यति-ते, भिद्यात्-द्यास्ताम्-द्यासुः, भित्सीष्ट-भित्सीयास्ताम्-रन्, अभिदत्-दताम्-दन्, अभैत्सीत् अभैत्ताम् अभैत्सुः अभैत्सीः अभैत्तम्-त्त अभैत्सम्-त्स्व-त्स्म इरित्वादङ् वा, अभित्त-त्साताम्-त्सत अभित्थाः-त्साथाम्-द्ध्वम् अभित्सि-त्स्वहि-त्स्महि; अभेत्स्यत्-त । उप-उद्भित्-उद्भेदने, निर्भिद्-प्रकाशने, संभिद्-मिश्रणे, प्रतिभिद्-निराकरणे । कर्मादौ-भिद्यते अभेदि, भेदयति-ते अबीभिदत्-त बिभित्सति-ते । कृत्सु-भेदनं भेत्तव्यं भेदनीयं भेद्यं भेदः भेत्ता भेदकः भिन्दन्-ती भिन्दानः भिन्नः विभिन्नः भित्वा विभिद्य भेत्तुम्, खल्-दुर्भेदः सुभेदः, सन्-अ-बिभित्सा, सन् उ-बिभित्सुः कुरच्-भिदुरः, अङ्-भिदा, क्विप्-मर्मभित् । छिदिर् द्वैधीकरणे सक० । पूर्ववत् छिनत्ति छिन्ते, छिनत्तु छिन्ताम्, अछिनत् अच्छिन्त, छिन्द्यात् छिन्दीत, चिच्छेद चिच्छिदे छेत्ता-सि-से, छेत्स्यति-ते छिद्यात् छित्सीष्ट, अच्छिदत् अच्छैत्सीत् अच्छिन्त, अच्छेत्स्यत्-त । उप-विच्छिद् आच्छिद्-विभेदे, परिच्छिद् विवेके । कर्मादौ-छिद्यते अच्छेदि छेदयति-ते अचिच्छिदत्-त । चिच्छित्सति-ते, कृत्सु-छेदनं छेत्तव्यं छेदनीयं छेद्यं विच्छेदः परिच्छेदः छेत्ता छेदकः छिन्दन्-ती छिन्दानः, कर्मणि-छिद्यमानः छिन्नः छित्वा परिच्छिद्य छेत्तुम्, अङ्-छिदा, कुरच्-छिदुरः, रक्-छिद्रं, क्विप्-काष्ठच्छित् । युजिर् योगे सक० । चोःकुः युनक्ति युङ्क्तः युञ्जन्ति युनक्षि युङ्क्थः-थ युनज्मि युञ्ज्वः-ञ्ज्मः, युङ्क्ते युञ्जाते-ञ्जते युङ्क्षे युञ्जाथे युङ्ग्ध्वे युञ्जे-ञ्ज्वहे ञ्ज्महे, युनक्तु युङ्क्ताम् युञ्जन्तु युङ्ग्धि युङ्क्तम्-क्त युनजानि-जाव-म, युङ्क्ताम् युञ्जाताम्-ञ्जताम् युङ्क्ष्व युञ्जाथाम् युङ्ग्ध्वम् युनजै-जावहै-महै, अयुनक् अयुङ्क्ताम् अयुञ्जन् अयुनक् अयुङ्क्तम्-क्त अयुनजम्-ञ्ज्व ञ्ज्म, अयुङ्क्त-ञ्जाताम्-ञ्जत अयुङ्क्थाः अयुञ्जाथाम् अयुङ्ग्ध्वम् अयुञ्जि-ञ्ज्वहि, ञ्ज्महि, युञ्ज्यात् युञ्जीत; युयोज युयुजे योक्ता-सि-से, योक्ष्यति-ते युज्यात् युक्षीष्ट, अयुजत् अयुजताम्-जन्, अयौक्षीत् अयौक्ताम् अयौक्षुः अयौक्षीः अयौक्तम्-क्त अयौक्षम्-क्ष्व-क्ष्म;

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युञ्जाताम्-अयुञ्जत अयुङ्क्थाः-अयुञ्जाथाम् अयुग्ध्वम् अयुञ्जि-युञ्ज्वहि-युञ्ज्महि; अयोक्ष्यत्-त। उप-प्रयुज्-प्रयोगे, नियुज्-नियोगे, उपयुज्-उपयोगे, संयुज्-संयोगे, वियुज्-वियोगे उद्युज्-उद्योगे अभियुज्-अभियोगे, अनुयुज्-पर्यनुयुज्-प्रश्ने, प्रयुज्-अनुयुज्-एतौ प्रोपाभ्यामित्यात्मनेपदिनावेव। कर्मादौ-युज्यते अयोजि योजयति-ते नियोजयति-ते अयूयुजत्-त युयुक्षति-ते। कृत्सु-योजनं योक्तव्यं योजनीयं योज्यं योगः संयोगः वियोगः प्रयोगः योक्ता योजकः युक्तः नियुक्तः युञ्जन्-ती युञ्जानः युक्त्वा नियुज्य योक्तुम्, क्विप्-कर्मयुक्, घञ्-युगं (रथाङ्गे) न गुणः, सन् उ-युयुक्षुः। भुज पालनाभ्यवहारयोः सक०। भुजोऽनवने इति रक्षणभिन्ने भोजनादावात्मनेपदं रक्षणे तु परस्मैपदम् मोदकं भुङ्क्ते महीं भुनक्ति। युजिवत्। भुनक्ति भुङ्क्ते, भुनक्तु भुङ्क्ताम्, अभुनक् अभुङ्क्त, भुञ्ज्यात् भुञ्जीत, बुभोज बुभुजे, भोक्ता-सि-से, भोक्ष्यति भोक्ष्यते, भुज्यात् भुक्षीष्ट, इरित्वाभावाल्लुङि अङ् न, सिचि वृद्धिः अभौक्षीत् अभौक्ताम् अभौक्षुः, अभुक्त-भुक्षाताम्-क्षत, अभोक्ष्यत् अभोक्ष्यत। उप-संभुज् उपभुज्-उपभोगे। कर्मादौ-भुज्यते अभोजि भोजयति-ते अबूभुजत्-त बुभुक्षति-ते हलन्ताच्चेति सनः कित्वान्न गुणः। कृत्सु-भोजनं भोक्तव्यं भोजनीयं भोज्यं भोग्यं भोगः उपभोगः संभोगः भोक्ता भोजकः भुञ्जन्-ती भुञ्जानः भुक्तः भुक्त्वा उपभुज्य भोक्तुं भुक्तिः, अच्-भोजः, करणे घञि निपातनात् भुजः, सन्-अ-बुभुक्षा, सन्-उ-बुभुक्षुः।

टि० रिचिर् विरेचने सक०। युजिवत्। रिणक्ति रिङ्क्ते, कर्मणि भावे-विरिच्यते अतिरिच्यते व्यतिरिच्यते (अतिशेते) विरेचकः घञ्-विरेकः उद्रेकः व्यतिरेकः अतिरिक्तः विरिक्तः, थक्-रिक्थम् (धनम्)। विचिर् पृथग्भावे प्रायेणायं विवेके सक०। विविनक्ति, विविच्यते, घञ्-विवेकः क्त-विविक्तः, घिनुण्-विवेकी। क्षुदिर् संप्रेषणे सक०। क्षुणत्ति क्षुन्ते, क्षुद्यते अक्षोदि, णौ- क्षोदयति-ते, घञ्-क्षोदः, क्त-क्षुण्णः, रक्-क्षुद्रः, क्षुद्राभिः कृतं क्षौद्रम् (मधु)।

परस्मैपदिनः–

पिषॢ सञ्चूर्णने सक०। पिनष्टि पिष्टः पिंषन्ति पिनक्षि पिंष्ठः-ष्ठ पिनष्मि पिंष्वः-ष्मः, पिनष्टु अपिनट् पिंषेत् पिपेष पेष्टा पेक्ष्यति पिष्यात् अपिषत् इरित्वादङ्, अपेक्ष्यत्। कर्मादौ-पिष्यते अपेषि पेषयति-ते अपीपिषत्-त पिपिक्षति, कृत्सु-पेषणं पेषणीयं पेष्यं पेष्टव्यं पेषकः पेष्टा पिंषन्-ती पिष्टः पिष्टम् पिष्ट्वा निष्पिष्य पेष्टुं, णमुल्-चूर्णपेषं पिनष्टि। शिषॢ विशेषणे सक०। प्रायेणायं विपूर्वः विशिनष्टि विशिंष्टः विशिंषन्ति, कर्मादौ-विशिष्यते विशेषयति-ते। कृत्सु-विशेषणं विशेष्यं विशेषः विशेषकः विशिंषन्-ती शिष्टः विशिष्टः अवशिष्टः विशेष्टुम्।

टि० भञ्जो आमर्दने (भञ्जने) सक०। भनक्ति भनक्तु अभनक् भञ्ज्यात् बभञ्ज भङ्क्ता भङ्क्ष्यति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भज्यात् अभाङ्क्षीत् अभाङ्क्ताम् अभाङ्क्षुः, अभङ्क्ष्यत् । कर्मादौ-भज्यते, विभज्यते । कृत्सु-भञ्जनं भङ्गः भङ्गी भग्नः भङ्क्त्वा विभज्य, घुरच्-भङ्गुरः । **सेटः**—**हिंसि** हिंसायाम् सेट् सक० प० । हिनस्ति-स्तु अहिनत् हिंस्यात् जिहिंस हिंसिता-ष्यति हिंस्यात् अहिंसीत् अहिंसिष्यत् , कर्मादौ-हिंस्यते अहिंसि, कृत्सु-हिंसनं हिंसकः हिंसितः, अङ्-हिंसा । **उन्दी** क्लेदने सेट् सक० पर० । उनत्ति उनत्तु औन्दत् उन्देत् उन्दाञ्चकार उन्दिता-ष्यति उद्यात् औन्दीत् औन्दिष्यत् । उद्यते उन्दयति उन्दनम् उन्दित्वा, क्त-उन्नः उत्तः ईदित्वान्नेट् नुदविदेति निष्ठानत्वं वा । **वृजी** वर्जने सेट् सक० पर० । वृणक्ति, णौ वर्जयति, कृत्सु-वर्जनं वर्जितः वर्जित्वा । **पृची** सम्पर्के सेट् सक० पर० । पृणक्ति, घञ्-सम्पर्कः, क्त-पृक्तः संपृक्तः, घिनुण् सम्पर्की । **अञ्जू** व्यक्तिम्रक्षणकान्तिगतिषु ऊदित्वाद्वेट् सक० पर० । अनक्ति व्यनक्ति अभिव्यनक्ति, व्यज्यते व्यञ्जयति अञ्जनं व्यञ्जनं, ण्यत्-व्यङ्ग्यं, क्त-अक्तः व्यक्तः अभिव्यक्तः अङ्क्त्वा अभिव्यज्य, णौयुच्-व्यञ्जना (वृत्तिविशेषः) **ञिइन्धी** दीप्तौ सेट् सक० आत्मने० । इन्धे-न्धाते-न्धते, इन्धाम् ऐन्धत् इन्धीत इन्धाञ्चक्रे इन्धिता-ष्यते-षीष्ट ऐन्धिष्ट ऐन्धिष्यत । समीन्धे, समिध्यते समिन्धयति समिन्धनम् , ञित्वाद्वर्तमानेक्तः ईदित्वान्नेट् समिद्धः, करणे ल्युट्-इन्धनम् (दारु) घञ्-एधः (दारु) क्विप्-समित् , उ इत्वं च-इन्दुः, कुन्-उदकम् । **विद** विचारणे अनिट् सक० आत्मनेपदी । विन्ते विन्ताम् अविन्त विन्द्यात्, विविदे वेत्ता वेत्स्यते अवित्त अवेत्स्यत, क्त-विन्नः वित्तः (विचारितः) ।

प्रयोगाः—**न रोधयति मां योगः । उपरुन्धन्तु दाशार्हाः । छेत्तुं भेत्तुं च शक्यते । बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् । दिवं मरुत्वानिव भोक्ष्यते भुवम् । मणिमाच्छिद्य केसरी । नोपरुणद्धि चेद्भवन्तं कार्यभारः । न विरोधो बलवता । न निरोधो न चोत्पत्तिः । विभित्सया संप्रयुक्तः स च्छिन्नबन्धद्रुतयुग्यशून्यः । भिन्दानं सन्ततं तमः । महीं भुनक्ति सकलाम् । ओदनं पयसा भुङ्क्ते । तक्षा काष्ठं छिनत्त्ययम् । भिनत्ति तपनस्तमः । विरुणद्धि वृथा भवान् । सुगन्धं पुष्पं विशिनष्टि ।**

प्रश्नाः—रुधादौ विकरणः कः, स च विकरणः कस्मिन्नंशे भवति । एषु लघूपधगुणः कथं न, अत्र इरितो धातवः के तेन च को विशेषः । रुधादिषु पदव्यवस्था का । अत्र इट् भवति न वा । अधस्तन वाक्यगतान्रुधादिधातुनिष्पन्नान् शब्दान्व्याकुरुत—उपरुन्धन्तु दाशार्हाः । पुरीं माहिष्मतीं द्विषः । इमे हि हृदयमर्मच्छिदः संसारभावाः । परिच्छेदो हि पाण्डित्यम् । निर्भिनत्ति शठो मर्म । कथं कमलनालस्य नैव स्युर्भङ्गुरा गुणाः । संयोगा विप्रयोगान्ताः । न निरोधो न चोत्पत्तिः । वरं विरोधोऽपि समं महात्मभिः । तृष्णां छिन्धि भज क्षमाम् । विरुणद्धि वृथैव दुर्विधस्तान् । अस्थानेऽयं पर्यनुयोगः । नियुज्य तं होमतुरङ्गरक्षणे । व्यनक्ति वचनं मनः । उद्युञ्जतेऽमी स्वकर्मसु । विधिर्युनक्ति भूतानि स एव वियुनक्ति च । रुरोध परितो रिपून् । अरुणद्यवनः साकेतम् । **इति रुधादयः ।**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ तनादयः।

तनु विस्तारे सेट् सक० उभयपदी। सार्वधातुकेषु शपोऽपवादेन तनादिकृञ्भ्य उः (३-१ ७९)
तनादेः कृञश्च उप्रत्ययः स्यात्। इत्युप्रत्यये पित्सु लघूपधगुणः अजादौ परे यण्-तनोति तनुतः तन्वन्ति
तनोषि तनुथः-थ तनोमि तन्वः-न्मः तनुवः-मः लोपश्चास्यान्यतरस्यामिति वा उकारलोपः, तनुते तन्वाते-
ते तनुषे तन्वाथे तनुध्वे तन्वे तन्वहे-न्महे तनुवहे-महे, तनोतु तनुताम् तन्वन्तु, तनु उतश्चेति हेर्लुक्
तनुतम्-त, तनवानि-वाव-म, तनुताम्-न्वाताम्-न्वताम् तनुष्व-न्वाथाम्-नुध्वम् , तनवै-वावहै-महै;
अतनोत्-नुताम्-न्वन् अतनोः-नुतम्-त, अतनवम्-न्व-न्म-नुव-म, अतनुत-न्वाताम्-न्वत, अतनुथाः-न्वाथाम्-
नुध्वम्, अतन्वि-न्वहि-न्महि-नुवहि-महि; तनुयात्-याताम्-युः; तन्वीत-न्वीयाताम्-रन् ; लिटि द्वित्वा-
भ्यासकार्येषु पित्सु उपधावृद्धिः, कित्सु थलि च सेटि एत्वाभ्यासलोपौ ततान तेनतुः-नुः तेनिथ-
थुः-न तता-तन तेनिव-म, तेने-नाते-निरे; तनिता-सि-से, तनिष्यति-ते, तन्यात्-न्यास्ताम् न्यासुः,
तनिषीष्ट-षीयास्ताम्-षीरन्; अतानीत्-निष्टाम्-निषुः अतनीत्-निष्टाम्-निषुः अतोहलादेरिति वा वृद्धिः,
के तनादिभ्यस्तथासोः (२-४-७९) तनादेः सिचो वा लुक्स्यात्तथासोः। इति सिचो लोपे अनुदात्तो-
पदेशेति अनुनासिकस्यापि लोपे अतत सिचोऽलोपे अतनिष्ट-निषाताम्-षत, अतथाः अतनिष्ठाः-
षाथाम्-निध्वम् अतनिषि-ष्वहि-ष्महि; अतनिष्यत्-त। उप-प्र-वि-सम्-आ परितनोति-तनुते। कर्मादौ-
तायते प्रतन्यते तनोतेर्यकीत्यात्वविकल्पः, अतनि, तानयति-ते अतीतनत्-त, सनि तनिपतिदरिद्रातिभ्य
इति इड् वा इडभावे तनोतेर्विभाषेत्यात्वं वा तितनिषति-ते तितांसति-ते तितंसति-ते। कृत्सु-तनितव्यं
तननीयं, घञ्-तानः (रागावयवः) प्रतानः (लतातन्तुः) सन्तानः (परम्परा) तनित्वा तत्वा उदित्वा-
दिडभावे अनुनासिकलोपोवनतितनोत्यादीनामित्यनुनासिकलोपः, वितत्य संतत्य, क्त-विततः सन्ततः
क्तवान्नेट् अनुनासिकलोपश्च संज्ञायां ततं (वीणादि) सततं सन्ततम् समोवाहितततयोरिति वा
लोपः, ततिः सन्ततिः विततिः तितुत्रेतिनेट् अनुनासिकलोपः, तन्वन्-ती तन्वानः तनितुम् , उ-तनुः
(शरीरं कृशश्च), ङी-तन्वी, ऊङ्-तनूः (देहः), ष्ट्रन्-तन्त्रम्, ङी-तन्त्री, तातः क्तेऽनुनासिकलोपे द्रुत-
तायामिति पूर्वदीर्घः, डउः-सन्वत्त्वं च-तितउः (परिवपनम्) सूत्रे व्यस्तोच्चारणान्न सन्धिः। डुकृञ्
करणे अनिट्-सक० उभय०। ड्वित् ञिच्च। सार्वधातुकेषु उप्रत्यये तदाश्रयेण ऋकारस्य गुणे पित्सु
तदाश्रयेण उकारस्यापि गुणः करोति, तसादावुप्रत्यये गुणे अरि अत उत्सार्वधातुके (६-४-११०)
उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति। इत्युत्वे उदिति तपरकरणसामर्थ्यात्तस्य गुणा-
भावे उप्रत्ययस्यापि क्ङिति गुणाभावे कुरुतः, झावन्तादेशे उप्रत्यये ऋकारस्य गुणे अत उत्वे यणि नभ-
कुरछुरामिति निषेधेन हलिचेति दीर्घाभावे कुर्वन्ति, करोषि कुरुथः-थ करोमि, नित्यं करोतेः (६-४-१०८)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

करोतेः प्रत्ययोकारस्य नित्यं लोपः स्याद्वमयोः परयोः। इत्युकारलोपे नभकुर्छुरामिति दीर्घनिषेधे कुर्वः-र्मः; तङि उप्रत्यये ऋकारस्य गुणे अत उत्वे प्रत्ययोकारस्य गुणे कुरुते, अजादौ यणि कुर्वाते कुर्वते झस्य अत्, कुरुषे कुर्वाथे कुरुध्वे कुर्वे कुर्वहे-र्महे वमयोरुकारलोपः, एवं न्यायेन करोतु कुरुताम् कुर्वन्तु, उतश्चेति हेर्लुकि कुरु कुरुतम्-त करवाणि-वाव-म आटः पित्वात्प्रत्ययोकारस्य गुणावादेशौ, कुरुताम् कुर्वाताम्-र्वताम् कुरुष्व कुर्वाथाम् कुरुध्वम् करवै-वावहै-महै; अकरोत् अकुरुताम् अकुर्वन् इकारतकारयोर्लोपः, अकरोः अकुरुतम्-त, अकरवम् अकुर्व-र्म, अकुरुत अकुर्वाताम्-र्वत, अकुरुथाः अकुर्वाथाम् अकुरुध्वम्, अकुर्वि-र्वहि-र्महि; लिङि कुरु-यात् इत्यत्र ये च (६-४-१०९) कृञ उलोपः स्याद्यादौ प्रत्यये परे। इति लोपे कुर्यात्-र्याताम्-र्युः, कुर्वीत-र्वीयाताम्-र्वीरन्। लिटि णलि द्विर्वचनेचीति यणादेशनिषेधे धातोर्द्वित्वे उरदित्यभ्यासस्य अभावे हलादिशेषे कुहोश्चुरिति चत्वे चकृ अ इति जाते अचोञ्णितीति वृद्धौ चकार, अजादौ यणि चक्रतुः क्रुः, थलि वमयोरपि क्रादित्वाद्दन्तत्वाच्च नेट्, चकर्थ पित्वाद्गुणः, चक्रथुःक्र चका-कर चकृव-म; तङि अजादौ यणि चक्रे-क्राते-क्रिरे चकृषे-क्राथे-कृढ्वे, चक्रे-कृवहे-महे; तासि इडभावे गुणे कर्ता-रौ-रः सि-से, स्ये ऋद्धनोरिति इटि करिष्यति-ते, आशिषि रिङ्शयेति रिङि क्रियात्-यास्ताम्-यासुः; कृषीष्ट-षीयास्ताम्-षीरन् उश्चेति कित्वान्न गुणः; लुङि सिचि वृद्धिः षत्वम् अकार्षीत् अकार्ष्टाम् अकार्षुः, अकार्षीः अकार्ष्टम्-ष्ट, अकार्षम्-ष्व-ष्म, तङि झलि ह्रस्वादङ्गादिति सिचो लोपः अकृत अकृषाताम्-षत, अकृथाः अकृषाथाम् अकृढ्वम्, अकृषि-ष्वहि-ष्महि; अकरिष्यत्-त ऋदन्तत्वादिट्। उप-प्रकृ-प्रकरणे, परा-निरा-अपाकृ-निराकरणे, अधिकृ-अधिकारे, उपकृ-उपकारे, अपकृ-अपकारे, अनुकृ-अनुकरणे, विकृ-विकारे, प्रतिकृ-प्रतीकारे, संस्कृ-संस्कारे, निकृ-पराभवे, एषु अनुपराभ्यांकृञ इति अनुपरापूर्वत्वे परस्मैपदमेव, अन्यत्र तूभयम्, अनुकरोति पराकरोति, प्रकरोति प्रकुरुते। **संपरिभ्यां करोतौ भूषणे** (६-१-१३७) **समवाये च** (६-१-१३८) सम्परिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे। इति सुटि संस्करोति संस्कुरुते (अलङ्करोति), संस्कुर्वन्ति (सङ्घीभवन्ति) संस्कृतं भक्षा इति ज्ञापकात्क्वचिदभूषणेपि सम्पूर्वस्य सुट्। परिष्करोति परिष्कुरुते (अलङ्करोति) सिवादीनां वाड्व्यवायेपीति षत्वविकल्पेन पर्यष्कार्षीत् पर्यस्कार्षीत्। **उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु** (६-१-१३९) उपात्कृञः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोरर्थयोः। प्रतियत्नो गुणाधानम्, वैकृतं विकारः, वाक्याध्याहार आकाङ्क्षितैकदेशपूरणम्। कन्या उपस्कृता (अलङ्कृता), ब्राह्मणा उपस्कृताः (समुदिताः), एधा उदकस्योपस्कुरुते (गुणमाधत्ते), उपस्कृतं (विकृतं) भुङ्क्ते, उपस्कृतं (वाक्याध्याहारेण) भुङ्क्ते। **सुट् कात्पूर्वः** (६-१-१३५) कात्पूर्वः सुट् स्यात्। संचस्कार समस्करोत्। कर्मादौ-क्रियते अकारि, कारयति-ते, अचीकरत्-त, चिकीर्षति-ते, कृत्सु-करणं संस्करणं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तव्यं करणीयं कार्यं, क्यप्-कृत्यं-टाप्-कृत्या, घञ्-संस्कारः विकारः प्रकारः अधिकारः उपकारः अपकारः प्रतीकारः कर्ता कारकः कुर्वन्-ती कुर्वाणः कृतः उपकृतः अपकृतः संस्कृतः संस्कृतम्, कर्मणि-क्रियमाणः करिष्यमाणः; कृत्वा उपकृत्य परिष्कृत्य कर्तुं संस्कर्तुम् कृतिः प्रकृतिः संस्कृतिः, श-क्रिया, ल्युट्-आकारणम् कारितः कारयन्-न्ती कार्यमाणः कारयित्वा संस्कार्य कारयितुम्, सन्-अ-चिकीर्षा, सन् उ-चिकीर्षुः सन् क्त-चिकीर्षितः, मनिन्-कर्म, ड्वित्वात्क्त्रिः-पक्त्रिमम्, उण्-कारुः, कतु-क्रतुः (यज्ञः) स्वरण्-कार्पासः, क-कृकः।

---

१. कृञोपि तनादित्वादेव सिद्धे तनादिकृञ्भ्य इति कृञो ग्रहणं गणकार्यस्यानित्यत्वे लिङ्गं तेन न विश्वसेद-दित्यादौ आदादिकत्वेपि श्वसः शपो न लुक्। वस्तुतस्तु भाष्ये कृञ्ग्रहणस्य प्रत्याख्यातत्वेन तदज्ञापना-त्यसम्बद्धमेव, विश्वस्तमिति त्वागमशास्त्रस्यानित्यत्वान्नेत्याहः। संचस्कारेत्यत्र पूर्वं धातुरुपसर्गेण युज्यते त्वात्पूर्वं सुटि द्वित्वेनैवोपपत्तौ सुट्कात्पूर्वं सुटि द्वित्वेनैवोपपत्तौ सुट्कात्पूर्व इति नावश्यकमिति भाष्ये तम्।

२. **क्षिणु** हिंसायाम् सेट् सक० उभय०। क्षिणोति क्षिणुते, क्त-क्षितः, क्तिन्-क्षितिः। **ऋणु** गतौ सेट् सक० उ०। अर्णुते, अच्-गुणः स्वर्णम्, उपसर्गस्योवङि-सुवर्णम्, असुन्-अर्णः (जलम्), मत्वर्थे वः-अर्णवः। **तृणु** अदने उ०। तर्णोति तर्णुते, घवर्थे क-तृणम्। **घृणु** दीप्तौ सेट् अक० उ०। घर्णोति घर्णुते, इ-घृणिः (किरणः), अङ्-**वनु** याचने सेट् सक० आ०। वनुते, वनी वाञ्छा तामिच्छतीति क्यजन्ताण्वुल्-वनीयकः (याचकः)। **मनु** सेट् सक० आ०। मनुते अनुमनुते (अनुमन्यते), लिटि अनुमेने, क्तिन्-अनुमतिः संमतिः विमतिः।

प्रयोगाः—वितत्य जालं शकुनीन्बबन्ध। यैः कृतं कारितं वा। मातुरनुकरोति वत्सः। तेने हृदा य आदिकवये। कार्यं कुरु यथोचितम्। शत्रून्निराकृत्य ततान कीर्तिम्। विकारहेतौ सति क्रियन्ते येषां न चेतांसि त एव धीराः। तत्संस्कुरुत सर्वथा। कृत्वा पुंवत् पातमुच्चैर्भृगुभ्यः। उपकारापकारौ हि मूलं लक्षणमेतयोः।

प्रश्नाः—तनादिषु को विकरणः। तनादिधातवः सेटो न वा। कृधातोः क्वचन पदनियमः कीदृशः। कृञः सुडागमः ... भवति। कृञः उपसर्गयोगवशेन कतिविधा अर्थाः। अधस्तनवाक्यगतान् तानादिकधातुनिष्पन्नान् शब्दा-...

... वाग्जालपरम्परां सः। सखा गरीयान् शत्रुश्च कृत्रिमस्तौहि कार्यतः। उपकृतं बहु तत्र किमुच्यते। संस्कृतं ...म्। तेन कीर्तिः प्रतन्यते। क्रिया हि वस्तूपहिता प्रसीदति। तद्दर्शनं पापमपाकरोति। भवादृशाश्चेदधिकुर्वते ...कुर्वन्त्वर्थान्सहृदयधुरीणाः कतिपये। शास्त्रेण बुद्धिः परिष्क्रियते। अतत वितत यशः सततम्। **इति तनादयः।**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ क्र्यादयः ।

अनुदात्ताः (अनिटः) ञितः (उभयपदिनः)—डुक्रीञ् द्रव्यविनिमये सक० । डुञावितौ । क्र्यादिभ्यः श्ना (३-१-८१) क्र्यादिभ्यः श्ना स्यात्सार्वधातुके परे । शपोपवादः । लटि श्ना (ना) प्रत्यये तस्यापित्सार्वधातुकत्वेन ङित्वाद्धात्वीकारस्यागुणे णत्वे क्रीणाति । हलादौ क्ङिति सार्वधातुके ईहल्यघोरिति श्नाकारस्य ईत्वं क्रीणीतः झौ परत्वान्नित्यत्वादन्तरङ्गत्वादीत्वात्पूर्वमन्तादेशे श्नाभ्यस्तयोरात इत्याकारलोपे क्रीणन्ति । क्रीणासि क्रीणीथः-थ, क्रीणामि क्रीणीवः-मः । तङि हलादावीत्वे आजादावातो लोपे क्रीणीते क्रीणाते क्रीणते ईत्वात्पूर्वमत् । क्रीणीषे क्रीणाथे क्रीणीध्वे, क्रीणे क्रीणीवहे-महे । एवं लोडादौ पित्सु नेत्वं क्ङित्सु हलादावीत्वमजादावातो लोपः क्रीणातु क्रीणीताम्-णन्तु क्रीणीहि-णीतम्-त, क्रीणानि-व-म आटः पित्वान्नेत्वम् । क्रीणीताम्-णाताम्-णताम् क्रीणीष्व-णाथाम्-णीध्वम्, क्रीणै-णावहै-महै । अक्रीणात्-णीताम्-णन् अन्तेरिकारतकारयोरातश्च लोपः, अक्रीणाः-णीतम्-त अक्रीणाम्-णीव-म; अक्रीणीत-णाताम्-णत अक्रीणीथाः-णाथाम्-णीध्वम्, अक्रीणि-णीवहि-महि । लिङि यासुटो ङित्वादीत्वम् क्रीणीयात्-याताम्-युः, क्रीणीत-णीयाताम्-णीरन्, लिटि द्वित्वाभ्यासकार्येषु णलि वृद्धावायादेशः, अतुसादौ गुणवृद्ध्यविषये अजादावियङ् चिक्राय चिक्रियतुः-युः, थलि भारद्वाजनियमाद्विकल्पेन वस्मस्सोः क्रादिनियमान्नित्यनिट् चिक्रयिथ चिक्रेथ चिक्रियथुः-य, चिक्रा-क्रय चिक्रियिव-म । क्रेता-सि-से, क्रेष्यति-ते, क्रीयात्-यास्ताम्-यासुः, क्रेषीष्ट-षीयास्ताम्-षीरन्, लुङि सिचि इडभावे सिचि वृद्धौ अक्रैषीत् अक्रैष्टाम् अक्रैषुः अक्रैषीः-क्रैष्टम्-ष्ट अक्रैषम्-ष्व-ष्म, तङि गुणः अक्रेष्ट अक्रेषाताम्-षत अक्रेष्ठाः-क्रेषाथाम्-क्रेढ्वम्, अक्रेषि-ष्वहि-ष्महि; अक्रेष्यत्-त । उप-परिव्यवेभ्यः क्रियः तङेव, अन्यत्रोभयम् परिक्रीणीते अवक्रीणीते विक्रीणीते, संक्रीणाति-णीते । कर्मादौ-क्रीयते विक्रीयते अक्रायि, क्रापयति-ते अचिक्रपत् क्रीङ्जीनांणौ इत्यात्वे पुक्, चिक्रीषति-ते । कृत्सु-क्रयणं क्रेतव्यं क्रयणीयं, यत्-क्रय्यं (क्रयणार्थम्) क्रेयं (क्रेतुं योग्यम्) अच्-क्रयः विक्रयः क्रीणन्-ती क्रीणानः विक्रीणानः क्रीतः विक्रीतः क्रीत्वा विक्रीय क्रेतुं विक्रेतुम्, इकन्-क्रयिकः । प्रीञ् तर्पणे कान्तौ (इच्छायां) च सक० । क्रीणातिवदेव । प्रीणाति प्रीणीते प्रीणातु प्रीणीताम् अप्रीणात् अप्रीणीत प्रीणीयात् प्रीणीत, पिप्राय पिप्रिये, प्रेता-सि-से, प्रेष्यति-ते प्रीयात् प्रेषीष्ट, अप्रैषीत् अप्रेष्ट, अप्रेष्यत्-त । कर्मादौ-प्रीयते अप्रायि प्रीणयति-ते अपिप्रीणत्-त धूञ्प्रीञोरिति नुक्, पिप्रीषति-ते । कृत्सु-प्रीणनं क-प्रियः, क्तिन् प्रीतिः, प्रीत्वा सम्प्रीय प्रीणन्-ती प्रीणानः, णौ- प्रीणयन् प्रीणयितुम् ।

वि० श्रीञ् पाके सक० । श्रीणाति श्रीणीते, अधिश्री-पाकाय उपर्यारोपणे, अवश्री-पाकेनाधोऽवरोपणे, ल्युट्- अधिश्रयणम् अधःश्रयणम् । मीञ् हिंसायाम् सक० । मीनाति मीनीते, क्त-प्रमीतः (हिंसितः) णौ-प्रमापणम् (मारणम्) । षीञ् बन्धने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिनाति सिनीते, क्त-सितः (बद्धः) प्रसितः (तत्परः), तु-सेतुः, अच्-विषयः। युञ् बन्धने सक० युनाति युनीते ...नीते, क्त-संयुतः वियुतः।

उदात्ताः (सेटः) ञितः (उभयपदिनः)—पूञ् पवने सक० । श्नाप्रत्यये प्वादिनां ह्रस्वः (७-३-८०) एषां शिति परे ह्रस्वः स्यात्। इति ह्रस्वे हलादौ क्ङिति ईत्वे अजादौ त्वातो लोपे पूर्ववत् ...नाति-नीतः-नन्ति, पुनीते-नाते-नते, पुनातु पुनीताम् अपुनात् अपुनीत, पुनीयात् पुनीत, लिटि ...जादौ गुणवृद्ध्यभावे उवङ् पुपाव-पुपुवतुः-वुः पुपविथ पुपुविव-म, पुपुवे-वाते-विरे, पविता-सि-से, ...विष्यति-ते पूयात् अशित्वाद्ध्रस्वाभावः, पविषीष्ट, लुङि सिचि वृद्धौ अपावीत्-विष्टाम्-विषुः, अपविष्ट-...षाताम्-षत, अपविष्यत्-त। उप-उत्पू-उत्पवने, परिपू-परितः-पवने। कर्मादौ-पूयते अपावि, पावयति-ते ...पीपवत्-त पुपूषति-ते श्र्युकः क्कितीति नेट्। कृत्सु-पवनम् उत्पवनं पविता पावकः पुनन्-ती पुनानः ...तः पूत्वा श्र्युकः किंतीति नेट् उत्पूय, णौ-पावितः पावयित्वा पावयितुम्, इत्र-पवित्रम्। लूञ् छेदने ...सक०। पुञ्वत्। लुनाति लुनीते, लुनातु लुनीताम्, अलुनात् अलुनीत, लुनीयात् लुनीत, लुलाव लुलुवे, ...विता-सि-से, लविष्यति-ते, लूयात् लविषीष्ट, अलावीत् अलविष्ट, अलविष्यत्-त। उत-सम्-परिलुनाति-...ते। लूयते अलावि, लावयति-ते अलूलुवत्-त, लुलूषति-ते। लवनं लवितव्यं, यत्-लव्यं, ण्यत्- लाव्यं ...विता लावकः लुनन्-ती लुनानः लूनः लूत्वा उल्लूय लवितुम्, वुन्-लवकः, इत्र-लवित्रम्। धूञ् कम्पने ...सक०। धुनाति धुनीते, धुनातु धुनीताम्, अधुनात् अधुनीत, धुनीयात् धुनीत, दुधाव दुधुवतुः-वुः ...दुधविथ दुधुविव-म स्वरतिसूतीति विकल्पापवादेन श्र्युकः किंतीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्, ...दुधुवे-वाते-विरे, लुडादौ स्वरतिसूतीति वेट् धविता धोता-सि-से, धविष्यति-ते धोष्यति-ते धूयात् ...धविषीष्ट धोषीष्ट, लुङि परस्मैपदे स्तुसुधूञ्भ्य इति नित्यमिट् सिचि वृद्धिः अधावीत्-विष्टाम्-विषुः, ...स्वरतिसूतीति वेट् अधविष्ट-विषाताम्-षत, अधोष्ट अधोषाताम्-षत, अधविष्यत्-त अधोष्यत्-त। ...उद्धू-उत्कम्पने, निर्धू-विधू-अवधू-निरासे। कर्मादौ-धूयते उद्धूयते अधावि, धूनयति-ते धूञ्प्रीञो-...नुक्, अदूधुवत्-त, दुधूषति-ते सनिग्रहगुहोश्चेति इण्निषेधः। कृत्सु-धूननं धवितव्यं धोतव्यं ...उद्धूतः अवधूतः वेट्त्वान्नेट् धुनन्-ती धुनानः धूत्वा श्र्युकः किंतीति नेट् उद्धूय निर्धूय। स्तॄञ् ...आच्छादने सक०। सार्वधातुकेषु ह्रस्वः स्तृणाति-णीते, स्तृणातु-णीताम्, अस्तृणात्-णीत, स्तृणीयात् ...णीत, तस्तार तस्तरतुः-रुः तस्तरिथ-व-म, तस्तरे-राते-रिरे वृद्ध्यविषये ऋच्छत्यॄतामिति गुणः, ...इटि वृतोवेति इटो वा दीर्घः स्तरिता स्तरीता-सि-से, स्तरि-रीष्यति-ते, स्तीर्यात् ॠत इद्धातोरिति इर्भावे ...इति दीर्घः, तङि लिङ्सिचोरात्मनेपदेष्विति वेट् न लिङीति इटो दीर्घविकल्पनिषेधः स्तरिषीष्ट-...षीयास्ताम्-षीरन्, इडभावे उश्चेति कित्वान्न गुणः स्तृषीष्ट-षीयास्ताम्-षीरन्, लुङि इटि सिचि वृद्धौ ...इति दीर्घविकल्पस्य सिचिचपरस्मैपदेष्विति निषेधः अस्तारीत्-रिष्टाम्-रिषुः, तङि लिङ्सिचो-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रितीड्विकल्पेन इटि वृतोवेति वा दीर्घः अस्तरीष्ट-रीषाताम्-षत, अस्तरिष्ट-रिषाताम्-षत, इडभावे ॠतइदितीत्वे हलिचेति दीर्घः अस्तीर्ष्ट अस्तीर्षाताम्-षत अस्तीर्ष्ठाः अस्तीर्षाथाम् अस्तीर्ध्वम् अस्तीर्षि-ष्वहि-ष्महि, अस्तरी-रिष्यत्-त। उप-विस्तॄ-विस्तारे, प्रस्तॄ-प्रस्तारे, संस्तॄ-आस्तॄ-आस्तरणे। कर्मादौ-स्तीर्यते अस्तारि विस्तारयति-ते व्यतस्तरत्-त, तिस्तीर्षति-ते तिस्तरिषति-ते तिस्तरीषति-ते इट्सनि-वेति वेट्, इटो वा दीर्घः। कृत्सु-करणे ल्युटि आस्तरणम्, घञ्-विस्तारः प्रस्तारः (अयज्ञे) यज्ञविषये तु अप्-प्रस्तरः, अप्-आस्तरः विस्तरः विष्टरः (आसनम्), विस्तीर्णः आस्तीर्णः ऋल्वादिभ्य इति नत्वम्, स्तीर्त्वा श्र्युकः क्कितीति नेट् आस्तीर्य आस्तरि-रीतुम्। वृञ् वरणे (प्रार्थने भरणे च) सक०। प्वादित्वाद्ध्रस्वः। वृणाति-णीते वृणातु-णीताम्, अवृणात्-णीत वृणीयात्-णीत, ववार ववरतुः-रुः ववरिथ व-म, ववरे-राते-रिरे, इटो दीर्घविकल्पे वरि-रीता-सि-से, वरि-रीष्यति-ते, आशिषि उदोष्ठ्यपूर्वस्येति उर्भावे हलिचेति दीर्घः वूर्यात्-र्यास्ताम्-र्यासुः, तङि लिङ्सिचोरिति इट्पक्षे न लिङीति दीर्घनिषेधे वरिषीष्ट-षीयास्ताम्-षीरन्, इडभावे उर्भावे दीर्घः वूर्षीष्ट-र्षीयास्ताम्-र्षीरन् लुङि इटि सिचिचपरस्मै-पदेष्विति दीर्घनिषेधे सिचि वृद्धौ अवारीत्-रिष्टाम्-रिषुः, तङि लिङ्सिचोरिति इट्पक्षे वृतोवेति वा दीर्घः अवरीष्ट-रीषाताम्-षत, अवरिष्ट-रिषाताम्-षत, इडभावे उर्भावे दीर्घः अवूर्ष्ट-र्षाताम्-षत, अवरी-रिष्यत्-त। उप-विवृ-विवरणे, सम्-आवृ-आवरणे। कर्मादौ-व्रियते अवारि, वारयति-ते अववरत्-त विवरी-रिषति-ते वुवूर्षति-ते सनिवेट् वा दीर्घः। कृत्सु वरणं संवरणम् आवरणं विवरणम् वूर्णः वूर्त्वा श्र्युकः क्कितीति नेट् ऋल्वादिभ्य इति नत्वम्, संवूर्य वरि-रीतुम्, घञ्-संवारः विवारः प्रावारः।

अनुदात्तः (अनिट्) परस्मैपदी—ज्ञा अवबोधने (ज्ञाने) सक०। शिति ज्ञाजनोर्जेति जादेशः प्वादित्वेपि दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः जानाति-नीतः-नन्ति, जानातु अजानात् जानीयात्, आर्धधातुकेषु जादेशो न लिटि णल औत्वं, अतुसादौ आतोलोपइटिचेत्याकारलोपः जज्ञौ जज्ञतुः-ज्ञुः जज्ञिथ जज्ञाथ जज्ञिव-म क्रादिनियमादिट् थलि भारद्वाजनियमाद्वेट्, ज्ञाता ज्ञास्यति ज्ञायात् ज्ञेयात् वान्यस्य संयोगादेरिति एत्वं वा, लुङि सिचि यमरमनमातामिति इट्सकौ अज्ञासीत्-सिष्टाम्-सिषुः, अज्ञास्यत्, अकर्मकत्वे अकर्मकाच्चेति, अपपूर्वत्वे अपह्नवार्थे अपह्नवेज्ञ इति, समर्कत्वेऽप्यनुपसर्गे अनुपसर्गाज्ज्ञ इत्यात्मनेपदम् जानीते-नाते-नते, जानीताम्-नाताम्-नताम्, अजानीत-नाताम्-नत, जानीत-नीयाताम्-नीरन्, जज्ञे-ज्ञाते-ज्ञिरे ज्ञाता-से ज्ञास्यते ज्ञासीष्ट लुङि सिच् नेट् अज्ञास्त-साताम्-सत अज्ञास्थाः ज्ञासाथाम्-ज्ञाध्वम् अज्ञासि-स्वहि-स्महि अज्ञास्यत। उप-प्रज्ञा-विज्ञा-प्रज्ञाने, अनुज्ञा-अनुमतौ नानोर्ज्ञ इति परस्मैपदी, अनुजानाति, संज्ञा-प्रतिज्ञा-प्रतिज्ञाने सम्प्रतिभ्यामनाध्याने इति तङ् सञ्जानीते प्रतिजानीते, अवज्ञा-अनादरे, अभिज्ञा प्रत्यभिज्ञा-पुनर्ज्ञाने, अभिजानाति प्रत्यभिजानाति, अपज्ञा-अपह्नवे, अपह्नवेज्ञ इत्यात्मनेपदम् अपजानीते (अपलपति)। कर्मादौ-ज्ञायते अज्ञायि, ज्ञापयति अजिज्ञपत्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञापणादौ घटादित्वान्मित्वे ह्रस्वः ज्ञपयति, सनि ज्ञाश्रुस्मृदृशामिति सकर्मकत्वे तङ् धर्मं जिज्ञासते, ज्ञानोर्ह इत्यात्मनेपदनिषेधे पुत्रमनुजिज्ञासति, अकर्मकत्वे पूर्ववत्सन इति जिज्ञासते। कृत्सु-ज्ञानं ज्ञातव्यं, यत्-ज्ञेयं, ज्ञाता ज्ञातः जानन्-ती जानानः, ज्ञात्वा विज्ञाय ज्ञातुम्, अङ्-संज्ञा आज्ञा अवज्ञा प्रतिज्ञा अनुज्ञा, सन्-अ-जिज्ञासा, सन् उ-जिज्ञासुः, णौ-ज्ञापनं विज्ञाप्य ज्ञापितः विज्ञापयितुम्।

वि० १. ज्ञाधातुः पाठतः परस्मैपदी, परमकर्मकत्वे उपसर्गे सत्यसति चात्मनेपदम्- सर्पिषो जानीते अनुजानीते, सकर्म- अपह्नवार्थे संप्रतिपूर्वत्वे अनाध्यानेर्थे आत्मनेपदम् शतमपजानीते (अपह्नुते) प्रतिजानीते (अङ्गीकरोति), संजानीते (अवेक्षते), आध्याने तु सकर्मकत्वेऽकर्मकत्वेपि परस्मैपदम् मातरं मातुर्वा संजानाति (सोत्कण्ठं स्मरति), उपसर्गान्तरे सति तु सकर्मके परस्मैपदं स्वर्गं लोकं प्रजानाति, ततोऽनुजज्ञे गमनं सुतस्य इति तु कर्मणि लिट्, अन्विति उपसर्गप्रतिरूपकमव्ययमेव नतूपसर्ग इति वा, सनि अनुयोगे परस्मैपदमन्यत्रात्मनेपदम् अनुजिज्ञासति जिज्ञासते, णौ मित्व- विकल्पभावौ पूर्वोक्तौ इत्यत्र निष्कर्षोऽनुसन्धेयः।

वि० २. ज्या वयोहानौ (अनिट्-अक० पर०) ग्रहिज्येति सम्प्रसारणम् जिनाति जिनीतः जिनन्ति, क्त-जीनः (जीर्णः), ज्यानिः। री गतिरेषणयोः रेषणं वृकशब्दः (अनिट्-सक० प०) रिणाति, क्त-रीणः, नु-रेणुः (धूलिः)।

वि० ३. उदात्ताः (सेटः) परस्मैपदिनः—शॄ हिंसायाम् सक०। प्वादित्वाद्ध्रस्वः शृणाति, आरु-शरारुः-(हिंस्रः), शरीरम्, अदि-शरत्, निष्ठा-शीर्णः शीर्णवान्, शीर्त्वा विशीर्य। पॄ पालनपूरणयोः सक०। शिति ह्रस्वः पृणाति, कर्मणि-पूर्यते, क्त-पूर्तम्। दॄ विदारणे सक०। शिति ह्रस्वः दृणाति ददार, विट्-विददार, कर्मणि-विदीर्यते, णि-विदारयति, घञ्-दाराः, क्त-विदीर्णः विदीर्णवान् दृत्वा विदीर्य, णौ-विदार्य, अच्-दरः (भयम्), अदि-दरद् (जनपदविशेषः) दृषत् (शिला)। गॄ शब्दे सक०। शिति ह्रस्वः गृणाति गृणीतः गृणन्ति, उद्गृणाति उज्जगार, क्विप्-गीः, क्त-उद्गीर्णः, गुरुः च-गुरुः। जॄ वयोहानौ अक०। जृणाति क्त-जीर्णः। ॠ गतौ सक०। शिति ह्रस्वः ऋणाति, ईर्त्वा-प्रेर्य, क्त-समीर्णः ... (विवृद्धः)।

प्रयोगाः—नाकस्माच्छाण्डिलीमाता विक्रीणाति तिलैस्तिलान्। धर्मं जिज्ञासते साधुः। आसनमा- स्तृणाति। धुनाति काननं वात्या। वायुर्विधूनयति चम्पकपुष्परेणून्। जानीहि रागादिदमेव बिम्बम्। सस्यं लुनाति कृषकः। प्रीणाति पितरं पुत्रः। क्रीणीहि भोः फलानीति। ऋत्विजो वृणीते यज्वा। आस्तीर्य कम्बलं शेते। धूलिर्नभसि विस्तीर्णा। पुनाति भुवनं गङ्गा। अनुजानाति मां गुरुः। विक्रीते करिणि किमङ्कुशे विवादः।

हलन्ताः उदात्ताः (बन्धवर्जं सेटः) उदात्तेतः (ग्रहवर्जं परस्मैपदिनः)—ग्रह उपादाने सेट्० सक० उभय०। श्नो ङित्वाद्ग्रहिज्येति रेफस्य सम्प्रसारणे ऋकारे अकारस्य पूर्वरूपे गृहधातुः-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋकारैकदेशरेफात्परत्वेन नस्य णत्वम्, हलादौ क्ङिति ईहल्यघोरितीत्वम्, अजादौ क्ङिति श्नाभ्यस्तयोरित्यातो लोपः गृह्णाति-ह्णीतः-ह्णन्ति, गृह्णीते-ह्णाते-ह्णते, गृह्णातु-ह्णीताम्-ह्णन्तु। हौ हलः श्नः शानज्झौ (३-१-८३) हलः परस्य श्नः शानजादेशः स्याद्धौपरे। इति श्नः शानजादेशे गृहाण-ह्णीतम्-त गृह्णानि-ह्णीव-म, गृह्णीताम्-ह्णाताम्-ह्णताम्। अगृह्णात्-ह्णीताम्-ह्णन्, अगृह्णीत-ह्णाताम्-ह्णत, गृह्णीयात्-याताम्-युः, गृह्णीत-ह्णीयाताम्-रन्। लिटि णलि द्वित्वे लिट्यभ्यासस्येत्यभ्याससम्प्रसारणे पूर्वरूपे उरदिति अभ्यासऋकारस्य अभावे हलादिशेषे अभ्यासचुत्वे उपधावृद्धिः, अतुसादौ क्ङिति परत्वाद्ग्रहिज्येति सम्प्रसारणोत्तरं गृह इत्यस्य द्वित्वादि, जग्राह जगृहतुः-हुः जग्रहिथ जगृहथुः-ह-जग्रा-ग्रह जगृहिव-म, जगृहे-हाते-हिरे, लुडादौ इटि ग्रहोऽलिटि दीर्घः (७-२-३७) ग्रहेर्विहितस्य इटो दीर्घः स्यान्नतु। लिटि इति दीर्घे ग्रहीता-रौ-रः-सि-से, ग्रहीष्यति-ते, आशिषि कित्वात्सम्प्रसारणे गृह्यात्-ह्यास्ताम्-ह्यासुः, तङि कित्वाभावेन सम्प्रसारणाभावे इटो दीर्घः ग्रहीषीष्ट-षीयास्ताम्-षीरन्। लुङि इटि सम्प्रसारणाभावे ह्म्यन्तेति वृद्धिनिषेधे इटो दीर्घे अग्रहीत् अग्रहीष्टाम्-हीषुः अग्रहीः-हीष्टम्-ष्ट अग्रहीषम्-ष्व-ष्म, तङि अग्रहीष्ट-हीषाताम्-षत अग्रहीष्ठाः-हीषाथाम्-हीढ्वम् अग्रहीषि-ष्वहि-ष्महि, अग्रहीष्यत्-त। उप-अनुग्रह-अनुग्रहे, निग्रह-निरोधे, अवग्रह-अनादरे, निग्रह-पीडने, आग्रह-आग्रहे, परिग्रह-स्वीकारे, प्रतिग्रह-दानग्रहणे, संग्रह-संग्रहे। कर्मादौ-गृह्यते अग्राहि ग्राहयति-ते अजिग्रहत्-त, कर्मणि-ग्राह्यते, जिघृक्षति-ते सनिग्रहगुहोश्चेतीण् निषेधः, रुदविदेति सनः कित्वात्सम्प्रसारणम्। कृत्सु-ग्रहणं ग्रहीतव्यं ग्रहणीयं, क्यप्-गृह्यं, ण्यत्-ग्राह्यं, घञ्-उद्ग्राहः ण-ग्राहः, अच्-ग्रहः संग्रहः विग्रहः आग्रहः अनुग्रहः परिग्रहः ग्रहीता ग्राहकः गृह्णन्-ती गृह्णानः गृहीतः गृहीत्वा संगृह्य अनुगृह्य ग्रहीतुम्, गृह्णाति धान्यादिकमिति क-गृहम्, सन् अ-जिघृक्षा, सन् उ-जिघृक्षुः। बन्ध बन्धने अनिट् सक० पर०। अनिदितामिति नलोपः ईत्वाकारलोपादि पूर्ववत् बध्नाति-ध्नीतः-ध्नन्ति, बध्नातु-ध्नीताम्-ध्नन्तु, हौ शानचि बधान-ध्नीतम्-त बध्नानि-ध्नाव-म, अबध्नात्-ध्नीताम्-ध्नन्, बध्नीयात्-याताम्-युः। बबन्ध बबन्धतुः-न्धुः, बबन्धिथ बबन्ध भारद्वाजनियमादिडभावपक्षे थस्य धत्वे पूर्वधलोपः बबन्धथुः-न्ध बबन्ध- न्धिव-म क्रादिनियमादिट्। बन्धा-रौ-रः- तस्य धत्वे पूर्वधस्य जश्त्वेन दत्वे झरोझरीति पक्षे लोपः लोपाभावे बन्द्धा-रौ-रः, भन्त्स्यति-न्त्स्यतः-न्त्स्यन्ति बस्य भष्भावः धस्य जश्त्व-चर्त्वे, आशिषि कित्वान्नलोपः बध्यात्-ध्यास्ताम्-ध्यासुः। लुङि सिचि इडभावे हलन्तलक्षणवृद्धौ बस्य भष्भावे धस्य चर्त्वे अपृक्तस्येडागमे अभान्त्सीत् तामि सिचि पूर्वत्रासिद्धमिति भष्भावात्प्राक् झलोझलीति सलोपे तस्य सिद्धतया प्रत्ययलक्षणाभावेन सादिप्रत्ययपरत्वाभावादसति भष्भावे वृद्धौ तस्य धत्वे पूर्वधस्य जश्त्वे अबान्धाम् सिजलोपे भष्भावे अभान्त्सुः अभान्त्सीः तादौ पूर्ववत् अबान्धम्-न्ध अभान्त्सम्-न्त्स्व-न्त्स्म, अभन्त्स्यत्-न्त्स्यताम्-न्त्स्यन्। उप-प्रबन्ध-प्रबन्धने, संबन्ध-संबन्धने, अनु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्ध-अनुवर्तने, निर्बन्ध-आग्रहे, निबन्ध-निबन्धने, प्रतिबन्ध-निरोधे। कर्मादौ-बध्यते अबन्धि, बन्धयति-ते अबन्धयत्-त, बिभन्त्सति। कृत्सु-बन्धनं बन्धनीयं बद्धव्यं बद्धा बन्धकः प्रतिबन्धकः, ण्यत्-प्रतिबध्यः, घञ्-बन्धः प्रबन्धः निर्बन्धः, क्त-बद्धः सम्बद्धः बध्नन्-ती बद्ध्वा निबध्य बन्धुम् निबन्धुम्, उ-बन्धुः बन्धुरेव बान्धवः, उरच्-बन्धुरः (उन्नतानतः), नक् बुधादेशः बुध्नः (मूलम्), किरच्- बधिरः। मन्थ विलोडने सकर्मकः। नलोपः पूर्ववत् सेट्कत्वं विशेषः मथ्नाति मथ्नातु मथान, अमथ्नात् मथ्नीयात्, ममन्थ-न्थतुः-न्थुः ममन्थिथ-व-म, मन्थिता मन्थिष्यति मथ्यात् अमन्थीत्-न्थिष्टाम्-न्थिषुः अमन्थिष्यत्। प्र-सं-परि- निर्मथ्नाति। मथ्यते अमन्थि मन्थयति अममन्थत् मिमन्थिषति। मन्थनं मन्थितव्यं, घञ्-मन्थः ल्युट्-ङी मन्थनी, मथ्नन्-ती मथितः क्त्वान्नलोपः मथित्वा प्रमथ्य मन्थितुम्। ग्रन्थ सन्दर्भे सक०। ग्रथ्नाति ग्रथ्नातु ग्रथान, अग्रथ्नात् ग्रथ्नीयात् जग्रन्थ-न्थिथ-व-म, ग्रन्थिता ग्रन्थिष्यति ग्रथ्यात् अग्रन्थीत् अग्रन्थिष्यत्। ग्रथ्यते अग्रन्थि ग्रन्थयति जिग्रन्थिषति ग्रन्थनं ग्रन्थितव्यं ग्रन्थनीयं ग्रन्थः ग्रन्थिता ग्रथ्नन्-ती ग्रथितः ग्रथित्वा संग्रथ्य ग्रन्थितुम्, इ-ग्रन्थिः। मृद क्षोदे सक०। मृद्नाति मृद्नातु मृदान, अमृद्नात् मृद्नीयात्, ममर्द ममृदतुः-दुः ममर्दिथ ममृदिव-म, मर्दिता मर्दिष्यति मृद्यात् क्त्वान्न गुणः अमर्दीत्-र्दिष्टाम्-र्दिषुः अमर्दिष्यत्। प्र-सम्-परि-उप-विमृद्नाति। मृद्यते अमर्दि मर्दयति-ते अममृदत्-त अममर्दत्-त उर्त्वद्वा, मिमर्दिषति। मर्दनं मर्दितव्यं मर्दनीयं संमर्दः मर्दिता मर्दकः मर्दितः मृद्नन्-ती मृदित्वा मृडमृदेति सेटः क्त्वः क्त्वं, संमृद्य मर्दितुम्, क्विप्-मृत्, स्ना-मृत्स्ना, तिकन्-मृत्तिका, क्यप्-मृद्यः। क्लिशू विबाधने ऊदित्वाद्वेट् सक०। क्लिश्नाति क्लिश्नातु क्लिशान अक्लिश्नात् क्लिश्नीयात् चिक्लेश चिक्लिशतुः-शुः चिक्लेशिथ चिक्लेष्ठ चिक्लिशिव-म चिक्लिश्व-श्म स्वरतीति वेट् क्लिशिता क्लेष्टा क्लेशिष्यति क्लेक्ष्यति व्रश्चेति षत्वे कत्वं सस्य षत्वम्। क्लिश्यात्, लुङि इटि अक्लेशीत्-शिष्टाम्-शिषुः, इडभावे शलइगुपधादिति क्से व्रश्चेति षत्वे कत्वे षत्वं क्सेन न गुणः अक्लिक्षत्-क्षताम्-क्षन्, अक्लेशिष्यत् अक्लेक्ष्यत्। सम्-परिक्लिश्नाति, क्लिश्यते अक्लेशि क्लेशयति-ते अचिक्लिशत्-त चिक्लेशिषति चिक्लिशिषति चिक्लिक्षति इट्पक्षे क्त्वं वा क्लेशनं क्लेशितव्यं क्लेष्टव्यं क्लेशनीयः क्लेशिता क्लेष्टा, घञ्-क्लेशः क्लिश्नन्-ती क्लिशित्वा क्लिष्ट्वा क्लिशितः क्लिष्टः क्लिशः- क्त्वानिष्ठयोरिति इड्विकल्पः, क्लेशितुं क्लेष्टुम्। अश भोजने सक०। अश्नाति अश्नातु अशान, आश्नात् आश्नीताम् आश्नन्, अश्नीयात्। आश आशतुः-शुः आशिथ-व-म, अशिता अशिष्यति अश्यात्, आशीत् आशिष्टाम्-शिषुः आशिष्यत्। प्राश्नाति प्राश्यते प्राशि, प्राशयति-ते प्राशिषत्-त अशिशिषति। अशनं प्राशनम् अशितव्यम् अशनीयम् अश्नन्-ती अशितः प्राशितः अशित्वा प्राश्य अशितुम्, घञ्-प्रातराशः। पुष पुष्टौ सक०। पुष्णाति-तु पुषाण, अपुष्णात् पुष्णीयात्, पुपोष पुपुषतुः-षुः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुपोषिथ पुपुषिव-म, पोषिता पोषिष्यति पुष्यात् अपोषीत् अपोषिष्यत्। प्र-सम्-परिपुष्णाति। पुष्यते अपोषि पोषयति-ते अपूपुषत्-त पुपोषिषति पुपुषिषति रलोव्युपधादिति वा कित्वम्। पोषणं पोषितव्यं पोषणीयं पोष्यं पोषकः पुष्णन्-ती पोषितः पोषित्वा परिपोष्य पोषितुम्। मुष स्तेये सक०। मुष्णाति-तु मुषाण अमुष्णात् मुष्णीयात् मुमोष मुमोषिथ मुमुषिव-म, मोषिता मोषिष्यति मुष्यात् अमोषीत् अमोषिष्यत्। प्र-परिमुष्णाति। मुष्यते अमोषि मोषयति अमूमुषत् मुमुषिषति रुदविदेति क्त्वासनोः कित्वान्न गुणः। मोषणं मोषितव्यं मोषणीयं मोष्यं मोषकः, घञ्-मोषः मुष्णन्-ती मुषितः मुषित्वा प्रमुष्य।

वि० १. **श्रन्थ** विमोचनप्रतिहर्षयोः सेट् सक० प०। श्रथ्नाति, घञि नलोपो वृद्ध्यभावश्च प्रश्रथः हिमश्रथः (हिमप्रपातः)। **कुष** निष्कर्षे सेट् अक० प०। कुष्णाति, क्त-निष्कुषितः, क्थन्-कुष्ठः, क्सि-कुक्षिः। **क्षुभ** सञ्चलने सेट् सक० प०। क्षुभ्नाति क्षोभणम् क्षोभः विक्षोभः विक्षुब्धः।

वि २. **स्तम्भु-स्तुम्भु-स्कम्भु-स्कुम्भु-स्कुञ्भ्यः-श्नुश्च** (३-१-८२) एभ्यः श्नुः स्यात् चात् श्ना। एते सौत्रा धातवः सर्वे रोधनार्थाः। विष्टभ्नोति विष्टभ्नाति अवष्टभ्नोति अवष्टभ्नाति स्तम्भेः अवाचालम्बनाविदूर्ययोरिति षत्वम्। लुङि जृस्तम्भु इति अङ् वा व्यष्टभत् व्यष्टम्भीत्, अच्-स्तम्भः विष्टम्भः अवष्टम्भः, क्त-स्तब्धः अवष्टब्धः। विस्कभ्नाति, अच्-विष्कम्भः (अर्गला) वेःस्कभ्नातेर्नित्यमिति षत्वम्।

प्रयोगाः—मुषाण रत्नानि हरामराङ्गनाः। पयः पुष्णाति बालकम्। पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम्। ग्रथान काव्यं सरसं नवीनम्। चौरो मुष्णाति तद्धनम्। वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। नचेद्ब्रवीषि प्रश्नानश्नामि त्वाम्। गृहाण शस्त्रं यदि सर्ग एष ते। निगृह्णीषे हितं वचः।

प्रश्नाः—क्र्यादिषु को विकरणविशेषः। क्र्यादिषूभयपदिधातवः के। क्र्यादिगणस्थ हलन्तेषु क्व को विशेषः। तत्र प्रसिद्धाः सेटोऽनिटो वेटश्च धातवः के। श्नाप्रत्ययाकारस्य ईत्वं कुत्र, कुत्र वा लोपः।

अधस्तनवाक्यगतानि क्रैयादिकधातुरूपाणि तदीयकृदन्तशब्दाँश्च विवृणुत—

बलिर्बबन्धे जलधिर्ममन्थे। भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः। विस्तीर्णा पृथिवी जनोपि विविधः किं किं न सम्भाव्यते। तमार्यगृह्यं निगृहीत धेनुः। प्रीतास्मि ते पुत्र वरं वृणीष्व। वासेन तीर्थानि पुनन्ति सन्तः। पापं धुनानो हृदयं पुनानः। निग्रहानुग्रहप्रभुः। त्रिः प्राश्यापो द्विरुन्मृज्य। अपोशान। न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो। शत्रूनप्युपकारेण सन्तः क्रीणन्ति साधवः। बधान धैर्यं निगृहाण चेतः। श्रियं मुष्णन्ति तस्कराः। लोकान्प्रीणान्ति वाग्मिनः। उत्कर्षं पुपुषुर्गुणाः। तन्निबध्नाति भारत। कौन्तेय प्रतिजानीहि। **इति क्र्यादयः।**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ चुरादयः ।

हलन्ताः सेटः उभयपदिनः—

चुर स्तेये सक० । अकार उच्चारणार्थः प्रयोजनान्तराभावात् । णयन्ताः प्रायेणोभयपदिनः सेटश्च, विशेषो वक्ष्यते । **सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्** (३-१-२५) एभ्यो णिच्स्यात् । सत्यादिभ्यश्चूर्णान्तेभ्यो द्वादशेभ्यः करोत्याचष्टे इत्याद्यर्थे प्रातिपदिकाद्धात्वर्थे इति वक्ष्यमाणेनैव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम्, चुरादिभ्यस्तु स्वार्थे णिच् । चुर धातोः स्वार्थे णिचि चुर्-इ इति जाते आर्धधातुके णौ परे लघूपधगुणे चोरि इत्यस्य सनाद्यन्ता इति धातुत्वे **णिचश्च** (१-३-७४) णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । इति कर्तृगे फले तङ् अकर्तृगे तु परस्मैपदमित्युभयपदम् । चोरेः सार्वधातुके तिङि शपि इकारस्यगुणेऽयादेशे चोरयति-तः-यन्ति, चोरयसि-यथः-थ चोरयामि-यावः-मः, चोरयते-येते-यन्ते चोरयसे-येथे-यध्वे चोरये-यावहे-महे। चोरयतु चोरयताम्, अचोरयत् अचोरयत, चोरयेत् चोरयेत । लिटि कास्प्रत्ययादित्यामि इकारस्य गुणेऽयादेशे आम इति लस्य लुकि कृञ्चानुप्रयुज्यते लिटीति कृभ्वस्तीनामनुप्रयोगे आम्प्रत्ययवदिति कृञ उभयपदे भ्वस्त्योः परस्मैपदे लिटि द्वित्वादयः चोरयाञ्चकार-चक्रतुः-क्रुः-चोरयाञ्चक्रे-क्राते-क्रिरे । चोरयांबभूव चोरयामास । चोरयिता-रौ-रः-सि-से चोरयिष्यति-ते । आशिषि यासुटि अनिटीति णिलोपे चोर्यात्-यास्ताम्-यासुः, तङि सीयुटि इटि णिलोपाभावे सुडिटौ चोरयिषीष्ट-यास्ताम्-षीरन्, लुङि णिश्रिद्रुस्रुभ्य च्लेश्चङि णौचङ्युपधाया इति ह्रस्वे णिलोपे चङीति चुर् इत्यस्य द्वित्वे हलादिशेषे सन्वल्लघुनीति सन्वद्भावेन दीर्घोलघोरित्यभ्यासस्य दीर्घे अचूचुरत्-रताम्-रन्, अचूचुरः-रतम्-त, अचूचुरम्-राव-म; अचूचुरत-रेताम्-रन्त, अचूचुरथाः-रेथाम्-रध्वम् अचूचुरि-रावहि-महि अचोरयिष्यत्-त । कर्मणि-चोर्यते अचोरि, सनि-चुचोरयिषति-ते । कृत्सु-चोरणं चोरयितव्यं चोरणीयं, ण्यत्-चोर्यं चोरयिता चोरयन्-न्ती चोरयमाणः चोरितः चोरयित्वा प्रचोर्य चोरयितुम्, अच्-चोरः, स्वार्थेऽणि चौरः, ण्यासश्रन्थेति युचि, चोरणा, कर्मणि शानच्-चोर्यमाणः ।

चिति स्मृत्याम् सक० । इदित्वान्नुमि णिचि चिन्तिधातुः । चिन्तयति-ते चिन्तयतु-ताम् अचिन्तयत्-त चिन्तयेत्-त, चिन्तयाञ्चकार-चक्रे-बभूव-आस, चिन्तयिता-सि-से चिन्तयिष्यति-ते चिन्त्यात् इदित्वान्नलोपो न, चिन्तयिषीष्ट, अचिचिन्तत्-त अभ्यासस्यालघुत्वान्न दीर्घः, अचिन्तयिष्यत्-त । प्र-वि-सम्-परिचिन्तयति-ते । चिन्त्यते अचिन्ति चिचिन्तयिषति-ते । कृत्सु-चिन्तनं चिन्तयितव्यं चिन्तनीयं चिन्त्यं चिन्तयिता चिन्तकः चिन्तयन्-न्ती चिन्तयमानः चिन्तितः चिन्तयित्वा विचिन्त्य चिन्तयितुम्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्मणि शान-चिन्त्यमानः, चिन्तिपूजीत्यङ् चिन्ता, युच्-चिन्तना। चिन्त इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम् तेन चिन्त्यात् चिन्त्यते इत्यादौ नलोपो न, चिन्तति चिचिन्त चिन्तिता अचिन्तीत् चिन्तित्वा इत्याद्यपि। पीड अवगाहने (पीडने) सक०। पीडयति-ते-तु-ताम् अपीडयत्-त पीडयेत्-त, पीडयाञ्चकार-चक्रे-बभूव-आस, पीडयिता-सि-से, पीडयिष्यति-ते, पीड्यात् पीडयिषीष्ट। लुङि भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् (७-४-३) एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। इत्युपधाह्रस्वविकल्पे अपीपिडत्-त, ह्रस्वाभावपक्षे लघुपरकत्वाभावेन सन्वत्त्वाभावान्नाभ्यासदीर्घः अपिपीडत्-त, अपीडयिष्यत्-त। नि-परिपीडयति-ते, आपीड-शिरोभूषणे आपीडयति-ते। पीड्यते अपीडि पिपीडिषति-ते। पीडनं पीडयितव्यं पीडनीयं पीडयिता पीडकः पीडयन्-न्ती पीडयमानः, कर्मणि-पीड्यमानः पीडितः पीडयित्वा निपीड्य, भिदादित्वादङ्-पीडा, घञ्-आपीडः (शिरोभूषणम्), पीडयितुम्, णमुल्-स्तनोपपीडं परिरम्भः। वर्ण चूर्ण प्रेरणे, वर्ण वर्णने इत्येके सक०। वर्णयति-ते-तु-ताम् अवर्णयत्-त वर्णयेत्-त, वर्णयाञ्चकार-चक्रे-बभूव-आस, वर्णयिता-सि-से वर्णयिष्यति-ते वर्ण्यात् वर्णयिषीष्ट अववर्णत्-त अवर्णयिष्यत्-त। निर्वर्ण-विचारे निर्वर्णयति-ते। वर्ण्यते अवर्णि विवर्णयिषति-ते। वर्णनं वर्णनीयं वर्ण्यं वर्णयिता वर्णयन्-न्ती वर्णयमानः, कर्मणि-वर्ण्यमानः वर्णितः वर्णयित्वा निर्वर्ण्य वर्णयितुम्, अच्-वर्णः। एवं चूर्णयति-ते-तु-ताम् अचूर्णयत्-त चूर्णयेत्-त चूर्णयाञ्चकार-चक्रे-बभूव-आस, चूर्णयिता चूर्णयिष्यति-ते चूर्ण्यात् चूर्णयिषीष्ट अचुचूर्णत्-त अचूर्णयिष्यत्-त। वि-सम्-चूर्णयति-ते चूर्ण्यते अचूर्णि। चूर्णनं चूर्णयितव्यं चूर्णयन्-न्ती चूर्णयमानः चूर्णितः चूर्णयित्वा सञ्चूर्ण्य अच्-चूर्णः। सत्यापपाशेति वर्णचूर्णाभ्यां प्रातिपदिकाभ्यां ग्रहणावध्वंसनयोर्णिच् वर्णं गृह्णाति वर्णयति, चूर्णैरवध्वंसयति अवचूर्णयति। भक्ष अदने सक०। भक्षयति-ते-तु-ताम् अभक्षयत्-त भक्षयेत्-त भक्षयाञ्चकार-चक्रे-बभूव-आस, भक्षयिता-यिष्यति-ते भक्ष्यात् भक्षयिषीष्ट अबभक्षत्-त अभक्षयिष्यत्-त। भक्ष्यते अभक्षि। भक्षणं भक्षयितव्यं भक्षणीयं भक्ष्यं भक्षकः भक्षयन्-न्ती भक्षयमाणः भक्ष्यमाणः भक्षितः भक्षयित्वा भक्षयितुम्। लुण्ठ स्तेये सक०। लुण्ठयति-ते-तु-ताम् अलुण्ठयत्-त लुण्ठयेत्-त लुण्ठयाञ्चकार-चक्रे बभूव आस लुण्ठयिता-यिष्यति-ते लुण्ठ्यात् लुण्ठयिषीष्ट अलुलुण्ठत्-त अलुण्ठयिष्यत्-त। वि-आ-प्रलुण्ठयति-ते। लुण्ठ्यते अलुण्ठि लुलुण्ठिषति-ते। लुण्ठनं लुण्ठनीयं लुण्ठकः लुण्ठितः लुण्ठयित्वा विलुण्ठ्य लुण्ठयितुम्, षाकन्-लुण्ठाकः। षान्त्व सामप्रयोगे सक०। सान्त्वयति-ते-तु-ताम् असान्त्वयत्-त सान्त्वयेत्-त सान्त्वयाञ्चकार-चक्रे-बभूव-आस, सान्त्वयिता-यिष्यति-ते सान्त्व्यात्-न्त्वयिषीष्ट अससान्त्वत्-त असान्त्वयिष्यत्-त। परिसान्त्वयति-ते। सान्त्वनं सान्त्वयितव्यं सान्त्वितः सान्त्वयित्वा परिसान्त्व्य सान्त्वयितुम्, युच्-सान्त्वना। तड ताडने सक०। णौ अतः उपधाया वृद्धिः ताडयति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ते-तु-ताम् अताडयत्-त ताडयेत्-त ताडयाञ्चकार-चक्रे-बभूव-आस, ताडयिता-यिष्यति-ते ताड्यात्-डयिषीष्ट। लुङि सन्वद्भावेन सन्यत इतीत्वे लघोर्दीर्घे उपधाह्रस्वः अतीतडत्-त अताडयिष्यत्-त। सं-परिताडयति-ते। ताड्यते अताडि तिताडयिषति-ते। ताडनं ताडयितव्यं ताडनीयं ताडयिता ताडितः ताडयन्-न्ती ताडयमानः, कर्मणि-ताड्यमानः, ताडयित्वा सन्ताड्य ताडयितुम्, युच्-ताडना। खडि भेदने सक०। इदित्वान्नुम् खण्डयति-ते-तु-ताम् अखण्डयत्-त खण्डयेत्-त खण्डयाञ्चकार-चक्रे, खण्डयिता-यिष्यति-ते खण्ड्यात् खण्डयिषीष्ट अचखण्डत्-त अखण्डयिष्यत्-त। अवखण्डयति-ते खण्ड्यते। खण्डनं खण्डनीयं खण्डितः खण्डयित्वा खण्डयितुम्, अच्-खण्डः। मडि भूषयां हर्षे च सक०। मण्डयति-ते-तु-ताम् अमण्डयत्-त मण्डयेत्-त मण्डयाञ्चकार-चक्रे-बभूव-आस, मण्डयिता-ष्यति-मण्ड्यात्-यिषीष्ट अममण्डत्-त अमण्डयिष्यत्-त। मण्ड्यते अमण्डि। मण्डनं करणे मण्डनं (भूषणम्) मण्डनीयं मण्डितः मण्डयित्वा मण्डयितुम्। चुद सञ्चोदने (प्रश्ने प्रेरणे च) सक०। चोदयति-ते-तु-ताम् अचोदयत्-त चोदयेत्-त चोदयाञ्चकार-चक्रे-बभूव-आस, चोदयिता-ष्यति-ते चोद्यात्-दयिषीष्ट अचूचुदत्-त अचोदयिष्यत्-त। प्र-सम्-परिचोदयति-ते चोद्यते अचोदि चुचोदयिषति-ते। चोदनं चोदनीयं चोद्यं चोदकः प्रचोदितः चोदयित्वा चोदयितुम्, युच्-चोदना। क्षल शौचकर्मणि सक०। क्षालयति-ते-तु-ताम् अक्षालयत्-त क्षालयेत्-त क्षालयाञ्चकार-चक्रे-बभूव-आस, क्षालयिता-ष्यति क्षाल्यात्-क्षालयिषीष्ट अचिक्षलत्-त अक्षालयिष्यत्-त। प्र-सम्-परिक्षालयति-ते। क्षाल्यते अक्षालि चिक्षालयिषति-ते। प्रक्षालनं प्रक्षालयितव्यं क्षालयन्-न्ती क्षालयमानः, कर्मणि-प्रक्षाल्यमानः प्रक्षालितः प्रक्षाल्य प्रक्षालयितुम्। तुल उन्माने सक०। तोलयति-ते-तु-ताम् अतोलयत्-त तोलयेत्-त तोलयाञ्चकार-चक्रे-बभूव-आस, तोलयिता-ष्यति तोल्यात्-तोलयिषीष्ट अतूतुलत्-त अतोलयिष्यत्-त। उप-सम्-उत्-समुत् तोलयति-ते। कर्मादौ-उत्तोल्यते उदतोलि तुतोलयिषति-ते। कृत्सु-तोलनं समुत्तोलनं तोलनीयं समुत्तोलयन्-न्ती-यमानः, कर्मणि-उत्तोल्यमानः तोलयित्वा उत्तोल्य उत्तोलयितुम्, अतुलोपमाभ्यामितिनिर्देशेन पचाद्यचि निपातनाण्णिलोपे तुला, तुलया सम्मितं-तुल्यम्, तुलां करोत्याचष्टे वेत्यर्थे णिचि तुलयति, ततो युचि-तुलना इत्युपपाद्यम्। पाल रक्षणे सक०। पालयति-ते-तु-ताम् अपालयत्-त पालयेत्-त पालयाञ्चकार-चक्रे-बभूव-आस, पालयिता-ष्यति-ते पाल्यात् पालयिषीष्ट अपीपलत्-त अपालयिष्यत्-त। सम्-परिपालयति-ते। पाल्यते अपालि पिपालयिषति-ते। पालनं पालयितव्यं पालनीयं पाल्यं पालयिता पालकः पालयन्-न्ती-यमानः, कर्मणि-पाल्यमानः पालितः पालयित्वा परिपाल्य पालयितुम्। पूज पूजायाम् सक०। पूजयति-ते-तु-ताम् अपूजयत्-त पूजयेत्-त पूजयाञ्चकार-चक्रे-बभूव-आस पूजयिता-यिष्यति-ते पूज्यात्-जयिषीष्ट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपूपुजत्-त अपूजयिष्यत्-त। प्र-परि सम्पूजयति-ते। पूज्यते-अपूजि पुपूजयिषति-ते। पूजनं पूजयितव्यं पूजनीयः पूज्यः पूजकः पूजयन्-न्ती-यमानः, कर्मणि-पूज्यमानः पूजितः पूजयित्वा सम्पूज्य पूजयितुम्, चिन्तिपूजीत्यङ् पूजा, युच्-पूजना। कृत संशब्दने सक०। उपधायाश्चेति ऋत इत्वे रपरत्वे उपधायाञ्चेति दीर्घे कीर्तधातुः कीर्तयति-ते-तु-ताम् अकीर्तयत्-त कीर्तयेत्-त कीर्तयाञ्चकार-चक्रे-बभूव-आस, कीर्तयिता-ष्यति-ते कीर्त्यात् कीर्तयिषीष्ट अचीकृतत्-अचिकीर्तत्-त अकीर्तयिष्यत्-त। सङ्कीर्तयति-ते। कीर्त्यते अकीर्ति चिकीर्तिषति-ते। कीर्तनं कीर्तयितव्यं कीर्तनीयं कीर्तयन्-न्ती-यमानः, कर्मणि-कीर्त्यमानः कीर्तितः कीर्तयित्वा सङ्कीर्त्य कीर्तयितुम्, क्तिन्-कीर्तिः, युच्-कीर्तना। घुषिर् विशब्दने (शब्देन स्वाभिप्रायाविष्करणे प्रतिज्ञाने च) सक०। घोषयति-ते-तु-ताम् अघोषयत्-त घोषयेत्-त घोषयाञ्चकार-चक्रे-बभूव-आस, घोषयिता-ष्यति-ते घोष्यात्-षयिषीष्ट अजूघुषत्-त अघोषयिष्यत्-त। उद् आघोषयति-ते। घोष्यते उद्घोष्यते उदघोषि। घोषणम् उद्घोषणीयम् उद्घोषकः घोषयित्वा उद्घोष्य उद्घोषयितुम् युच्-घोषणा। घुषिरविशब्दने इति सूत्रे अविशब्दने इति लिङ्गादनित्योऽस्य णिच्, णिजभावे घोषति लुङि इरित्वादङ् वा अघुषत् अघोषीत्। आङः-क्रन्द सातत्ये (आह्वानसातत्ये) सक०। आक्रन्दयति-ते-तु-ताम् आक्रन्दयत्-त आक्रन्दयेत्-त आक्रन्दयाञ्चकार-चक्रे-बभूव-आस, आक्रन्दयिता-ष्यति आक्रन्द्यात्-न्दयिषीष्ट आचक्रन्दत्-त आक्रन्दयिष्यत्-त। आक्रन्दनम् आक्रन्दितः आक्रन्द्य। भूष अलङ्कारे सक०। भूषयति-ते-तु-ताम् अभूषयत्-त भूषयेत्-त भूषयाञ्चकार-चक्रे-बभूव-आस, भूषयिता-ष्यति-ते, भूष्यात् भूषयिषीष्ट अबुभूषत्-त अभूषयिष्यत्-त। वि-आ-सम्भूषयति-ते। भूष्यते अभूषि बुभूषयिषति-ते। भूषणं करणे-विभूषणम् आभूषणम् (अलङ्कारः) भूषयितव्यं भूषणीयं भूषयन्-न्ती-यमाणः, कर्मणि-भूष्यमाणः भूषितः भूषयित्वा विभूष्य भूषयितुम्, अङ्-भूषा। अर्ह पूजायाम् सक०। अर्हयति-ते-तु-ताम् आर्हयत्-त अर्हयेत्-त अर्हयाञ्चकार-चक्रे-बभूव-आस, अर्हयिता-यिष्यति-ते, अर्ह्यात्-र्हयिषीष्ट आर्जिहत्-त आर्हयिष्यत्-त। समर्हयति-ते। अर्ह्यते अर्हणम् अर्हणीयः अर्ह्यः अर्हितः अभ्यर्हितः अर्हयित्वा समर्ह्य अर्हयितुम्, युच्-अर्हणा। ज्ञा नियोगे सक० स्वभावादथमाङ्पूर्वः। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ (७-३-३६) एषां पुक् स्याण्णौ। इत्यादन्तत्वात्पुगागमः आज्ञापयति-ते-तु-ताम् आज्ञापयत्-त आज्ञापयेत्-त आज्ञापयाञ्चकार-चक्रे-बभूव-आस, आज्ञापयिता-ष्यति-ते, आज्ञाप्यात्-पयिषीष्ट, आजिज्ञपत्-त आज्ञापयिष्यत्-त। समाज्ञापयति। आज्ञाप्यते आज्ञापि आजिज्ञापयिषति-ते। आज्ञापनम् आज्ञापनीयम् आज्ञाप्यम् आज्ञापितः आज्ञाप्य आज्ञापयितुम्, अङ्-आज्ञापना। बोधने तु ज्ञपयति विज्ञापयतीति घटादौ। मुच मोचने सक०। मोचयति-ते-तु-ताम् अमोचयत्-त मोचयेत्-त मोचयाञ्चकार-चक्रे बभूव आस, मोचयिता-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यति-ते, मोच्यात्-चयिषीष्ट, अमूमुचत्-त अमोचयिष्यत्-त। निर्मुच् प्रतिदाने ऋणं निर्मोचयति, मोच्यते अमोचि मुमोचयिषति-ते। मोचनं मोचयितव्यं मोचनीयः मोच्यः मोचयिता मोचयन्-न्ती-मानः मोचितः मोचयित्वा निर्मोच्य मोचयितुम्। क्लृप अवकल्पने सक०। उपधागुणः कल्पयति-ते-तु-ताम् अकल्पयत्-त कल्पयेत्-त कल्पयाञ्चकार-चक्रे-बभूव-आस, कल्पयिता-ष्यति-ते, कल्प्यात् कल्पयिषीष्ट, अचकल्पत्-त अकल्पयिष्यत्-त। उप-सङ्कल्प-सङ्कल्पने, विकल्प-विकल्पने, आकल्प-भूषणे, प्र कल्प-प्रकल्प-सम्पादने। कल्प्यते अकल्पि चिकल्पयिषति-ते। कृत्सु-कल्पनं कल्पयितव्यं कल्पनीयं कल्प्यं, घञ्-कल्पः विकल्पः सङ्कल्पः आकल्पः (नेपथ्यं) कल्पयिता कल्पकः कल्पयन्-ती कल्पयमानः, कर्मणि-कल्प्यमानः कल्पितः कल्पयित्वा प्रकल्प्य कल्पयितुम्, युच्-कल्पना विकल्पना। **आस्वद** आस्वादे सक०। सकर्मकादेवास्माण्णिच्। आस्वादयति-ते-तु-ताम् आस्वादयत्-त आस्वादयेत्-त आस्वादयाञ्चकार-चक्रे-बभूव-आस, आस्वादयिता-ष्यति-ते आस्वद्यात्-दयिषीष्ट आसिस्वदत्-त आस्वादयिष्यत्-त। समास्वादयति-ते। आस्वाद्यते आस्वादि आसिस्वादयिषति-ते। आस्वादनम् आस्वादनीयः आस्वाद्यः आस्वादयिता आस्वादितः, घञ-आस्वादः आस्वादयन्-न्ती-यमानः, कर्मणि-आस्वाद्यमानः आस्वाद्य आस्वादयितुम्। **पूरी** आप्यायने सक०। पूरयति-ते-तु-ताम् अपूरयत्-त पूरयेत्-त पूरयाञ्चकार-चक्रे-बभूव-आस, पूरयिता-ष्यति ते पूर्यात्-रयिषीष्ट अपूपुरत्-त अपूरयिष्यत्-त। प्र- आ-सम्-परिपूरयति-ते। पूर्यते अपूरि पुपूरयिषति-ते। पूरणं पूरयितव्यं पूरणीयं पूरयिता पूरकः पूरयन्-न्ती-यमाणः, कर्मणि-पूर्यमाणः, घञ्-पूरः आपूरः (प्रवाहः) पूरयित्वा प्रपूर्य पूरयितुम्। लोकृ लोचृ भाषार्थे सक०। **लोकृ** दर्शने **लोचृ** विचारेपि। लोकयति-ते-तु-ताम् अलोकयत्-त लोकयेत्-त लोकयाञ्चकार-चक्रे-बभूव-आस, लोकयिता-ष्यति-ते लोक्यात्-लोकयिषीष्ट। लुङि चङि द्वित्वादौ नाग्लोपिशास्वृदिताम् (७-४-२) णिचि अग्लोपिनः शास्तेः ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्-परे णौ। इत्युपधाह्रस्वनिषेधे लघुपरकत्वाभावान्न दीर्घः। अलुलोकत्-त अलोकयिष्यत्-त। वि-आ-अवलोकयति-ते। लोक्यते अलोकि लुलोकयिषति-ते। विलोकनम् आलोकनीयं, विलोकयन्-न्ती-यमानः विलोक्य आलोकयितुम्, घञ्-आलोकः (प्रकाशः) एवम् आलोचयति-ते-तु-ताम् इत्यादि चकार एव विशेषः, करणे ल्युट्-लोचनं विलोचनम् आलोचितः आलोच्यमानः आलोचयितुम्।

वि० **यन्त्र** सङ्कोचने सक०। इदित्करणाद्वा णिच् तेन यन्त्रतीत्यपीति माधवः। यन्त्रयति-ते नियन्त्रयति-ते न्ययन्त्रत्-त ...नः। नियन्त्रितः नियन्त्रणम् अच्-यन्त्रम्। युच्-यन्त्रणा। **लक्ष** दर्शनाङ्कयोः सक०। लक्षयति-ते अललक्षत्-त, कर्मणि,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लक्ष्यते संलक्ष्यते, करणे ल्युट्-लक्षणम् उपलक्षणम्, ण्यत्-लक्ष्यः, क्त-लक्षितः, ई मुट्-लक्ष्मीः । **लड** उपसेवायाम् सक० । लाडयति-ते अलीलडत्-त, लाडितः लाडयितुम्, डलयोरैक्यात् लालना लालयेत्पञ्चवर्षाणीत्यादि । **नट** अवस्यन्दने (नाट्ये) सक० । नाटयति-ते अनीनटत्-त । कर्मणि-नाट्यते, नाट्यं नाटितः नाटकम् । **बध** संयमने सक० । बाधयति-ते अबीबधत्-त । बाधनं बाधा बाधकः बाधितः । **ऊर्ज** बलप्राणनयोः सक० । ऊर्जयति-ते और्जिजत्-त । क्त-ऊर्जितः, क्विप्-ऊर्क् । **पक्ष** परिग्रहे सक० । पक्षयति-ते अपपक्षत्-त । अच्-पक्षः प्रतिपक्षः विपक्षः । **कुट्ट** छेदनभर्त्सनयोः सक० । कुट्टयति-ते अचुकुट्टत्-त । कुट्टनं कुट्टितः कुट्टयित्वा सङ्कुट्य, षाकन्-कुट्टाकः, घञ्-कुट्टः, कुट्टेन निर्वृत्तं कुट्टिमं (निबद्धा भूः) । **स्निह** सेचने सक० । स्नेहयति-ते असिस्निहत्-त । स्नेहनम्, घञ्-स्नेहः स्नेहितः स्नेहयित्वा, प्रीतौ स्निह्यतीत्युक्तम् । **श्लिष** श्लेषणे सक० । श्लेषयति-ते अशिश्लिषत्-त । घञ्-श्लेषः संश्लेषः प्रश्लेषः श्लेषितः । आश्लेषे श्लिष्यत्युक्तम् । **छदि** संवरणे सक० । छन्दयति-ते अचच्छन्दत्-त । छन्दः । **श्रण** दाने सक० । प्रायेणायं विपूर्वः विश्राणयति-ते व्यशिश्रणत्-त । विश्राणनम् विश्राणितः । **गुडि** वेष्टने सक० । गुण्डयति-ते अजुगुण्डत्-त । गुण्डनं गुण्डितः, अङि कन्-गुण्डिका । **वटि** विभाजने सक० । वण्टयति-ते अववण्टत्-त । वण्टनं वण्टितः । **वडि** इति शाकटायनः तेन । वण्डयति-ते । वण्डनं वण्डितः । **छर्द** वमने सक० । छर्दयति-ते अचछर्दत् त । छर्दनं छर्दितः छर्दित्वा, इन्-छर्दिः । **पुस्त** आदरानादरयोः सक० । पुस्तयति-ते, अपुपुस्तत्-त । घञ्-पुस्तम्, के-पुस्तकम् । **तल** प्रतिष्ठायाम् सक० । तालयति-ते अतीतलत्-त । अच्-तलम्, घञ्-तालः उत्तालः ताली तालिका । **दुल** उत्क्षेपे सक० । दोलयति-ते अदूदुलत्-त । भिदादित्वादङि-दोला, क-दोलिका, क्त-दोलितः । **पुल** महत्त्वे सक० । पोलयति-ते, अपूपुलत्-त । निपातनात् विपुलम् । **चुल** समुच्छ्राये सक० । चोलयति-ते अचूचुलत्-त । घञ्-चोलः निचोलः (प्रच्छदपटः) । **मूल** रोहणे अक० । मूलयति-ते अमूमुलत्-त । अच्-मूलम् । **कल विल** क्षेपे सक० । कालयति-ते अचीकलत्-त । कालयिता कालयितुम्, घञ्-कालः । वेलयति-ते अवीविलत्-त । अङ्-वेला । **तिल** स्नेहने सक० । तेलयति-ते अतीतिलत्-त । अच्-तिलः तिलस्येदं तैलम् । **शूर्प** माने सक० । शूर्पयति-ते । अच्-शूर्पः । **शुल्क** अतिस्पर्शने सक० । शुल्कयति-ते । अच्-शुल्कम् (घट्टादिदेयम्) **चपि** गत्याम् सक० । चम्पयति-ते । वुन्-चम्पकः । **घट्ट** चलने सक० । घट्टयति-ते अजघट्टत्-त । सङ्घट्टयति (योजयति) विघट्टयति (वियोजयति) घञ्-सङ्घट्टः सङ्घट्टनं सङ्घट्टितः विघट्टितः सङ्घट्य विघट्य । **टकि** बन्धने सक० । टङ्कयति-ते । अच्-टङ्कः (पाषाणदारणः) विटङ्कः- (निर्यूहः) । **शुठि** शोषणे सक० । शुण्ठयति-ते । अच्-ङी-शुण्ठी । **पचि** विस्तारवचने सक० । प्रपूर्वः प्रायिकः प्रपञ्चयति-ते । घञ्-प्रपञ्चः प्रपञ्चितः । **तिज** निशाने सक० । तेजयति-ते उत्तेजयति-ते । उत्तेजनम् उत्तेजकः उत्तेजितः उत्तेजना । **वर्ध** छेदनपूरणयोः सक० । वर्धयति-ते । कि-वर्धकिः (तक्षा) । **ईड** स्तुतौ सक० । ईडयति-ते । इड्यः ईडितः । **जसु** हिंसायाम् सक० । प्राय उत्पूर्वः उज्जासयति-ते । उज्जासनम् उज्जासितः उज्जासयितुम् । **पिडि** सङ्घाते सक० । पिण्डयति-ते । अच्-पिण्डः पिण्डितः इदित्वाण्णिजभावपक्षे पिण्डति । **चर्च** अध्ययने सक० । चर्चयति-ते । अङ्-चर्चा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कण निमीलने सक०। काणयति-ते। घञ्-काणः। **पश** बन्धने सक०। पाशयति-ते। घञ्-पाशः। **चट स्फुट** सक०। प्राय उत्पूर्वः, उच्चाटयति-ते। उच्चाटनम् उच्चाटितः उच्चाटयितुम् उच्चाटना। स्फोटयति-ते अपुस्फुटत्-त, ...यति-ते। आस्फोटनम् आस्फोटितः। **तसि** अलङ्कारे सक०। अवतंसयति-ते उत्तंसयति-ते इदित्वाण्णिजभावपक्षे अवतं-सति। घञ्-अवतंसः (कर्णभूषणम्) उत्तंसः (शिरोभूषणम्) अवतंसनम् उत्तंसनम्। **मोक्ष** असने सक०। मोक्षयति-ते घञ्-मोक्षः। **यत** निकारोपस्कारयोः सक०। यातयति-ते अयीयतत्-त। युच्-यातना निर्यत्-वैरशुद्धौ प्रतिदाने च ...ति-ते। निर्यातनम् निर्यातितः निर्यातयितुम्। **अञ्चु** विशेषणे (व्यावर्तने) सक०। उदिन्निर्देशाद्वा णिच् अञ्चयति-ते ...ते उदञ्चयति-ते (उद्गमयति)। करणे ल्युट्-उदञ्चनः (घटः) उदञ्चितः। **भू** अवकल्कने (मिश्रीकरणे) सक०। ...ते। भावनं भावना भावितः भावयितुम्। **तर्क** भाषायाम्, ऊहे इति मैत्रेयः सक०। तर्कयति-ते तर्कना तर्कितः ...म् तर्कयित्वा, घञ्-तर्कः।

प्रयोगाः—अचूचुरच्चन्द्रमसोऽभिरामताम्। चिन्ताकुलं मानसम्। गुरोः सदारस्य निपीड्य पादौ। निर्वर्ण्य पत्युर्मुखम्। कुलायकूलेषु विलुण्ठ्य तेषु ते। भक्षयामास भक्ष्यम्। पालयामास भूतलम्। कीर्तनं कलिनाशनम्। साधवः कीर्तयन्ति। कुचोद्यं ब्रवीति। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्। शिरस्यताडयद्दुष्टः। अपीपलद्धर्मराजः। प्रक्षाल्य मनोमलम्। त्वद्यशः कीर्त्यते जनैः। पूरयामास विश्वम्। आज्ञापयति नः प्रभुः। काव्यं समालोचय। सङ्कल्पयति सत्कर्म। विभूषयति कन्यकाः। चोदनालक्षणोऽर्थो धर्मः।

मितश्चुरादयः—

ज्ञप ज्ञाने ज्ञापने च मित्- सक०। प्रच्छ ज्ञीप्सायामिति ज्ञाने श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इत्यत्र ज्ञापने चास्य प्रयोगः। नान्ये मितोऽहेतौ (गण) अहेतौ स्वार्थे णिचि ज्ञपादिभ्यः (ज्ञप यम चह बल चिञ्भ्यः पञ्चभ्यः) अन्ये मितो न स्युः। इति ज्ञपादिपञ्चवर्जं शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न। मितां ह्रस्वः (६-४-९२) मितामुपधाया ह्रस्वः स्याण्णौ परे। इति ज्ञपादेर्णिचि उपधावृद्धौ ह्रस्वः। ज्ञपयति-ते-तु-ताम् अज्ञपयत्-त ज्ञपयेत्-त ज्ञपयाञ्चकार चक्रे-बभूव-आस, ज्ञपयिता-ष्यति-ते ज्ञप्यात्-पयिषीष्ट अजिज्ञपत्-त अज्ञपयिष्यत्-त। उप-अनुज्ञपयति-ते विज्ञपयति-ते संज्ञपयति (मारयति)। कर्मादौ-ज्ञप्यते अज्ञपि, जिज्ञपयिष्यति ज्ञीप्सति सनीवन्तेति पक्षे इडभावः। कृत्सु-ज्ञपनं ज्ञपितः ज्ञप्तः वादान्तेत्यत्र निपातनान्निष्ठामिडभावोपि, ज्ञपयितुं ज्ञपयित्वा विज्ञप्य विज्ञप्तिः। विज्ञापना भर्तृषु सिद्धिमेति ज्ञापयत्याचार्यः इत्यादि तु माधवमते अचाक्षुषज्ञाने मित्वाभावेन ह्रस्वाभावे, ज्ञापनमात्रे मित्वमिति मते ज्ञा नियोग इति चौरादिकस्यानेकार्थत्वं स्वीकृत्योपपादनीयम्, तेन मित्वाभावमादाय विज्ञापयती-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्याद्यपि साधुः । **यम** परिवेषणे मित् (वेष्टने) सक० । मित्त्वे ह्रस्वः यमयति चन्द्रम् (परिवेष्टने) अन्यत्र तु न, नियामयति । यमयति-ते-तु-ताम् अयमयत्-त यमयेत्-त यमयाञ्चकार-चक्रे-बभूव आस, यमयिता-ष्यति-ते यम्यात्-यमयिषीष्ट अयीयमत्-त अयमयिष्यत्-त ।

वि० १. **चह** परिकल्पने मित् अक० । चहयति-ते अचीचहत्-त, कथदौ पठिष्यमाणस्य तु अदन्तत्वेनाऽग्लोपित्वाद्दीर्घ सन्वद्भावौ न अचचहत् । **चह** स्थाने **चप** इत्येके चपयति । **रह** त्याग इत्येके रहयति अरीरहत्, कथादौ वक्ष्यमाणस्य तु अररहत् । **बल** प्राणने मित् अक० । बलयति-ते अबीबलत्-त । अच्-बलम् । **चिञ्** चयने मित् सक० । **चिस्फुरोर्णौ** (६-१-५४) अनयोर्णौ आत्वं वा स्यात् । इत्यात्वपक्षे अर्तिह्रीति पुकि मित्वेन ह्रस्वे चपयति-ते, आत्वाभावे वृद्ध्यायादेशयोर्ह्रस्वे चपयति-ते अचीचप-यत्-त । नित्करणसामर्थ्यादस्य णिज्विकल्पे चपति-ते इत्यन्यपि ।

वि० २. चुरादिषु स्वार्थणिजन्तेषु ज्ञानज्ञापनार्थो ज्ञपधातुः, परिवेषणार्थो यमधातुः, त्यागार्थो रहधातुः, मतान्तरे चप-चह धातुर्वा, प्राणनार्थो बलधातुः, चयनार्थश्चिञ्धातुः एते पञ्चैव मितस्तेषां ह्रस्वः, अन्ये स्वार्थणिजन्ता न मित स्तेषां न ह्रस्वः, तेन शमादीनाममन्तत्वेप्यमित्वान्न ह्रस्वः शामयतीत्यादि । प्रेरणार्थकणिचि मित्वेन ह्रस्ववन्तस्तु घटादौ प्रदर्शिता एव तेन घटादिपठितानां प्रेरणाणिच्येव मितां ह्रस्व इति ह्रस्वः ।

आधृषीया वैकल्पिकणिचः—

युज संयमने सक० । **आधृषाद्वा** (गण) इत ऊर्ध्वं धृषधातुमभिव्याप्य विभाषितणिचः । योजयति-ते-तु-ताम् अयोजयत्-त योजयेत्-त योजयाञ्चकार-चक्रे-बभूव-आस, योजयिता-ष्यति-ते योज्यात् योजयिषीष्ट अयूयुजत्-त अयोजयिष्यत्-त । उप-अनु-सम्-प्र-वि-आ-अभि पर्यनुयोजयति-ते । कर्मादौ-योज्यते अयोजि । कृत्सु-योजनं संयोजनं वियोजनं योजनीयं योज्यं योगः वियोगः प्रयोगः योजितः योजयित्वा संयोज्य योजना आयोजना, णिजभावपक्षे नेट् शपि योजति-तु अयोजत्-योजेत् युयोज योक्ता योक्ष्यति युज्यात् अयौक्षीत् अयोक्षत् । **अर्च** पूजायाम् सक० । अर्चयति-ते-तु-ताम् आर्चयत्-त अर्चयेत्-त अर्चयाञ्चकार-चक्रे-बभूव-आस, अर्चयिता-ष्यति-ते अर्च्यात् र्चयिषीष्ट आर्चिचत्-त आर्चयिष्यत्-त । समर्चयति-ते अर्च्यते अर्चनम् अर्चितः अर्चयन्-न्ती-यमाणः, कर्मणि-अर्च्यमाणः अर्चयित्वा समभ्यर्च्य अर्चयितुम्, णिजभावे अर्चतीत्यादि । **ईर** क्षेपे सक० । ईरयति-ते-तु-ताम् ऐरयत्-त ईरयेत्-त ईरयाञ्चकार-चक्रे-बभूव-आस, ईरयिता-ष्यति-ते ईर्यात्-रयिषीष्ट ऐरिरत्-त ऐरयिष्यत्-त । प्रेरयति-ते, उदीरयति-समीरयति-ते (कथयति) ईर्य्यते । प्रेरणं प्रेरितः प्रेर्य्य उदीरितः प्रेरयन्-न्ती-यमाणः, कर्मणि-प्रेर्यमाणः उदीरयितुम् । णिजभावे ईरतीत्यादि । **वृजी** वर्जने सक० । वर्जयति-ते-तु-ताम् अवर्जयत्-त वर्जयेत्-त वर्जयाञ्चकार-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चक्रे-बभूव-आस, वर्जयिता-ष्यति-ते वर्ज्यात्-वर्जयिषीष्ट अवीवृजत्-त अवर्जयिष्यत्-त आवर्जयति-आवर्जयति-ते (रेचयति), वर्ज्यते अवर्जि। वर्जनं वर्जनीयं वर्ज्यं वर्जितः वर्जयित्वा समावर्ज्य वर्जयितुम्। णिजभावे अनिट् वर्जतीत्यादि व्यपवृक्तः। शिष असर्वोपयोगे सक०। शेषयति-ते-तु-ताम् अशेषयत्-त शेषयेत्-त शेषयाञ्चकार-चक्रे-बभूव-आस, शेषयिता-ष्यति-ते शेष्यात्-षयिषीष्ट अशीशिषत्-अशेषयिष्यत्-त। विशिष्-विशेषणे। शिष्यते विशिष्यते अशेषि। विशेषणम् शेषणीयं शेषः विशेषः शेषितः शेषयित्वा विशेष्य विशेषयितुं, ण्यत्-विशेष्यः। णिजभावे अनिट् शेषति शेष्टा अशिषत्। शिष्टः विशिष्टः। तप दाहे सक०। तापयति-ते-तु-ताम् अतापयत्-त तापयेत्-त तापयाञ्चकार-चक्रे-बभूव-आस, तापयिता-ष्यति-ते ताप्यात्-पयिषीष्ट अतीतपत्-त अतापयिष्यत्-त। प्र-सम् अनु-तापयति-ते तप्यते अतापि तितापयिषति-ते। तापनं तापयितव्यं तापनीयं, घञ्-तापः प्रतापः सन्तापः अनुतापः तापकः तापयन्-न्ती-यमानः तापयित्वा प्रताप्य तापयितुम्, णिजभावेऽनिट् तपति तप्त इत्यादि। अर्द याचायाम् सक०। अर्दयति-ते-तु-ताम् आर्दयत्-त अर्दयेत्-त अर्दयाञ्चकार-चक्रे-बभूव-आस, अर्दयिता-ष्यति-ते अर्द्यात्-अर्दयिषीष्ट आर्दिदत्-त आर्दयिष्यत्-त। अर्द्यते आर्दि। अर्दनम् अर्दयितव्यम् अर्दयिता अर्दयन्-न्ती-यमानः, कर्मणि-अर्द्यमानः अर्दयित्वा, युच्-जनमर्दयति-जनार्दनः। णिजभावे अर्दतीत्यादि। छद आवरणे सक०। छादयति-ते-तु-ताम् अच्छादयत्-त छादयेत्-त छादयाञ्चकार-चक्रे-बभूव-आस, छादयिता-ष्यति-ते छाद्यात्-दयिषीष्ट अचिच्छदत्-त अच्छादयिष्यत्-त। आ-सम्-समाच्छादयति-ते छाद्यते आच्छादि चिच्छादयिषति-ते। छादनं छादयितव्यम् आच्छादनीयं छाद्यम् आच्छादकः आच्छादितः। छादयित्वा समाच्छाद्य आच्छादयितुम्। णिजभावे अनिट् छदति आच्छन्नः इत्यादि।

वृञ् आवरणे सक०। वारयति-ते। निवारयति-ते। वारितः निवारणम्, णिजभावे वरतीत्यादि। रिच् वियोजनसम्पर्चनयोः। रेचयति-ते विरेचयति-ते। घञ्-विरेकः, णिजभावे अनिट् रेचति रेक्ता रिक्तः। दृभ सन्दर्भे सक०। संपूर्वः प्रायिकः सन्दर्भयति-ते, घञ्-सन्दर्भः सन्दर्भितः, णिजभावे अनिट् सन्दर्भति सन्दब्धः। ग्रन्थ सन्दर्भे सक०। ग्रन्थयति-ते। अच्-ग्रन्थः, णिजभावे ग्रन्थतीत्यादि। तृप तृप्तौ सक०। तर्पयति-ते। तर्पणं तर्पितः। णिजभावे तर्पतीत्यादि। आङः सद पद्यर्थे सक०। आसादयति-ते। आसादितः आसादनम् णिजभावे पाघ्रेति सीदादेशः आसीदतीत्यादि। शुन्ध शौचकर्मणि सक०। शुन्धयति-ते। णिजभावे शुन्धतीत्यादि। धूञ् कम्पने सक०। धूञ्प्रीञोरिति नुक् धूनयति-ते विधूनयति-ते, णिजभावे धूवति इत्यादि। प्रीञ् तर्पणे सक०। नुक् प्रीणयति-ते। प्रीणनम्, णिजभावे प्रयति प्रयते इत्यादि। आप्लृ लम्भने सक०। प्रापयति-ते। णिजभावे प्रापति। वच परिभाषणे सक०। वाचयति-ते, णिजभावे वचति वक्तीत्यादि। मान पूजायाम् सक०। मान

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यति-ते, संमाननं संमानः संमानितः णिजभावे मानतीत्यादि । **भू** प्राप्तावात्मनेपदी सक० । भावयते । **गर्ह** विनिन्दने सक० । गर्हयति-ते । गर्हणा, अङ्-गर्हा गर्हितः, णिजभावे गर्हतीत्यादि । **मार्ग** अन्वेषणे सक० । मार्गयति-ते । मार्गणम् णिजभावे मार्गतीत्यादि । **मृजू** शौचालङ्कारयोः सक० । मार्जयति-ते । मार्जयिता मार्जकः मार्जितः परिमार्जितः । णिजभावे ऊदित्वाद्वे मार्जति मार्जिता मार्ष्टा इत्यादि । **मृष** तितिक्षायाम् सक० । मर्षयति-ते । मर्षयितुम्, णिजभावे मर्षतीत्यादि । **धृष** प्रसहने सक० । धर्षयति-ते । धर्षयित्वा धर्षयितुम्, णिजभावे धर्षतीत्यादि । **इत्याधृषीयाः ।** पूर्वोक्तानामपि णिज्विकल्पार्थमि पुनः पाठः तेनैषां णिजभावेपि साधुत्वं सिद्ध्यति ।

आकुस्मीया उदात्ताः (सेटः) आत्मनेपदिनः–चित सञ्चेतने (संज्ञाने) अक० । एष्वकर्तृगेऽपि फले नियमेन तङ् । चेतयते-ताम् अचेतयत चेतयेत चेतयाञ्चक्रे चेतयिता-से-ष्यते-यिषीष्ट अचीचितत अचेतयिष्यत । प्र-सञ्चेतयते । चेत्यते अचेति । चेतनं चेतयितव्यं चेतनीयं चेतयिता चेतयमानः चेतयित्वा, युच्-चेतना, ल्यु-चेतनः गुणवचने चैतन्यम् । **दशि** दंशने सक० । दंशयते-ताम् अदंशयत दंशयेत दंशयाञ्चक्रे दंशयिता-ष्यते-षीष्ट अददंशत अदंशयिष्यत । संदंशयते, दंश्यते अदंशि दिदंशयिषते । दंशनं दंशनीयं, घञ्-दंशः सन्दंशः दंशयमानः दंशितः दंशयित्वा संन्दंश्य दंशयितुम् । इदित्वा णिजभावे दंशति, आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनैवेति व्याख्यातारः । **मन्त्रि** गुप्तभाषणे सक० । मन्त्रयते-ताम् अमन्त्रयत मन्त्रयेत मन्त्रयाञ्चक्रे मन्त्रयिता-ष्यते-षीष्ट अममन्त्रत अमन्त्रयिष्यत । सम्-अभि-आ-निमन्त्रयते, मन्त्र्यते, अमन्त्रि मिमन्त्रयिषते । आ-नि-अभि-मन्त्रणम् मन्त्रयितव्यं मन्त्रयिता संमन्त्र्य घञ्-मन्त्रः । **तर्ज भर्त्स** भर्त्सने सक० । तर्जयते-ताम् अतर्जयत तर्जयेत तर्जयाञ्चक्रे तर्जयिता-ष्यते-षीष्ट अततर्जत अतर्जयिष्यत । सन्तर्जयते, तर्ज्यते अतर्जि तितर्जयिषते । तर्जनं तर्जयितव्यं तर्जितः तर्जयमानः तर्जयित्वा तर्जयितुम्, करणे ल्युट् ङी तर्जनी, युच्-तर्जना । भर्त्सयते-ताम् अभर्त्सयत भर्त्सयेत भर्त्सयाञ्चक्रे भर्त्सयिता-ष्यते-षीष्ट अबभर्त्सत अभर्त्सयिष्यत । भर्त्स्यते अभर्त्सि बिभर्त्सयिषते । भर्त्सनं भर्त्सयितव्यं भर्त्सितः भर्त्सयित्वा भर्त्सयितुम्, युच्-भर्त्सना । **कुत्स** अवक्षेपणे (निन्दने) सक० । कुत्सयते-ताम् अकुत्सयत कुत्सयेत कुत्सयाञ्चक्रे कुत्सयिता-ष्यते-षीष्ट अचुकुत्सत अकुत्सयिष्यत । कुत्स्यते अकुत्सि, कुत्सनं कुत्सनीयं कुत्सितः कुत्सयमानः कुत्सयितुम्, अङ्-कुत्सा । **वञ्चु** प्रलम्भने सक० । वञ्चयते-ताम् अवञ्चयत वञ्चयेत वञ्चयाञ्चक्रे वञ्चयिता-ष्यते-षीष्ट अववञ्चत अवञ्चयिष्यत । वञ्च्यते अवञ्चि । वञ्चनं वञ्चयितव्यं वञ्चकः वञ्चयमानः वञ्चितः वञ्चयितुम्, युच्-वञ्चना । उदित्वस्य क्त्वायामिड्विकल्पार्थत्वेन णिचः पाक्षिकत्वात् वञ्चतीत्यादि, क्त्वायामिड्विकल्पेन वञ्चित्वा वञ्चिलुञ्चीति सेटः क्त्वः कित्वविकल्पेन तत्पक्षे नलोपः, इडभावे नित्यं नलोपः

CC-0. Digitized by eGangotri and MIDF- Delhi

...दित्वा वक्त्वा। **विद** चेतनाख्यातनिवासेषु सक०। वेदयते-ताम् अवेदयत वेदयेत वेदयाञ्चक्रे ...दयिता-ष्यते-षीष्ट अवीविदत अवेदयिष्यत। वेद्यते अवेदि विवेदयिषते। वेदनं वेदनीयं वेदयिता ...यमानः वेदितः वेदयित्वा वेदयितुं, युच्-वेदना। सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे। ...न्दते विन्दति प्राप्तौ श्यन् लुक् श्नम् शेषु च क्रमात्॥

... **तत्रि** कुटुम्बधारणे सक०। तन्त्रयते इदित्वाण्णिजभावपक्षे तन्त्रति, घञ्-तन्त्रम्। **णिष्क** परिमाणे सक०। ...। अच्-निष्कः (चतुःसौवर्णिको निष्कः)। **कूण** सङ्कोचने सक०। कूणयते। कूणनं कूणितः कूणितनयनः, इ-कूणिः ... बाहुः)। **तूण** पूरणे सक०। तूणयते। अच्-तूणः (बाणः)। बाहुल्कादीरण्-तूणीरः (निषङ्गः)। **भ्रूण** ...न् सक०। भ्रूणयते। अच्-भ्रूणः (गर्भः)। **शठ** श्लाघायाम् सक०। शाठ्यते, अच्-शठः (धूर्तः)। **यक्ष** ...न सक०। यक्षयते। अच् यक्षः (देवविशेषः)। **गूर** उद्यमने सक०। गूरयते। क्त-उद्गूर्णः (उत्थापितः), **त्रुट** ...क०। त्रोटयते। त्रोटनं त्रोटितः, इ-त्रोटिः (अग्रम्)। **भल** आमण्डने सक०। भालयते निभालयते (पश्यति ...ते)। **मद** तृप्तियोगे अक०। मादयते। **कुस्म** कुत्सितस्मये अक०। कुस्मयते। **कुस्मनाम्नो वा** (गण) कुस्म ...: किंवा नाम, तस्माण्णिच्। **इत्याकुस्मीयाः**।

प्रयोगाः—दुःखं तदग्रे जपयाञ्चकार। विज्ञप्तिरेषा भवता निशम्यताम्। वात्यया प्रेर्यमाणः। ...रोरधिगता विद्या विशेषयति मानसम्। आच्छादयति मेघोऽर्कम्। अर्चयिष्यन्ति लोकास्त्वाम्। ...र्जय घटं वृक्षे। चिराय सञ्चेतयते। तर्जयन्ते भर्त्सयन्ते कुत्सयन्ते च नास्तिकाः। अमात्या ...मन्त्रत। वञ्चयन्ते शठा वाग्भिः। दुष्टो लोकानर्दयते। समर्चय जनार्दनम्। निमन्त्रितोऽस्म्यहं ...। नैव वेदयते मूढः।

...न्ता उभयपदिनः सेटः—

कथ वाक्यप्रबन्धे सक०। कथादयः समाप्त्यन्ता धातवोऽदन्ताः, अन्ताकारो नोच्चारणार्थो ...रोरसंज्ञकः, तत्फलं तु लोपेपि स्थानिवद्भावेन वृद्ध्यभावादि। कथादिभ्यो णिचि अतो लोप इत्यकार- ...रे अचःपरस्मिन्निति अल्लोपस्य स्थानिवद्भावान्न गुणवृद्धी, णिजन्ताल्लडादयः पदद्वयम्। कथयति- ...ते-ताम् अकथयत्-त कथयेत्-त कथयाञ्चकार-चक्रे-बभूव-आस, कथयिता-ष्यति-ते कथ्यात् कथ- ...षीष्ट, लुङि चङि द्वित्वादौ णिलोपे अग्लोपित्वात्सन्वद्भावाभावेन सन्यत इतीत्वं दीर्घोलघोरिति ...दीर्घश्च न अचकथत्-त, अकथयिष्यत्-त। प्र-सम् कथयति-ते, कथ्यते अकथि। कथनं कथयितव्यं ...नीयं कथ्यं कथयिता कथकः कथयन्-न्ती-यमानः कर्मणि-कथ्यमानः भविष्यति कथयिष्यन्-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्यमाणः, कथितः कथितवान्-वती कथयित्वा प्रकथ्य कथयितुम्, अङ्-कथा सङ्कथा (मिथोभाषणम्) उपकथा (अवान्तराप्रधान कथा)। एवमुत्तरत्र। वर ईप्सायाम् सक०। पूर्ववदल्लोपः वरयति-ते-तु-ताम् अवरयत्-त वरयेत्-त वरयाञ्चकार-चक्रे-बभूव-आस, वरयिता-ष्यति-ते वर्यात्-रयिषीष्ट अववरत्-त अवरयिष्यत्-त। वर्यते अवरि, विवरयिषति-ते। वरणं वरणीयं वरयिता वरितः वरयित्वा वरयितुम्, अच्-वरः। गण संख्याने सक०। गणयति-ते-तु-ताम् अगणयत्-त गणयेत्-त गणयाञ्चकार-चक्रे-बभूव-आस, गणयिता-ष्यति-ते गण्यात् गणयिषीष्ट, लुङि **ई च गणः (७-४-९७)** गणेरभ्यासस्य ईत्स्यात् चङ्परे णौ चादत्। अजीगणत्-त अजगणत्-त अगणयिष्यत्-त। विगण-अवगण-अनादरे। गण्यते अगणि जिगणयिषति-ते। गणनं गणयितव्यं गणनीयः गण्यः गणयिता गणकः गणयन्-न्ती-यमानः कर्मणि-गण्यमानः गणयित्वा विगण्य गणयितुम् गणितः-तम् अवगणितः, युच्-गणना, अच्-गणः। रच प्रतियत्ने (गुणाधाने निर्माणे) रचयति-ते-तु-ताम् अरचयत्-त रचयेत्-त रचयाञ्चकार-चक्रे-बभूव-आस, रचयिता-ष्यति-ते रच्यात् रचयिषीष्ट अररचत्-त अरचयिष्यत्-त। वि-आरचयति-ते, रच्यते अरचि रिरचयिषति-ते। रचनं रचयितव्यं रचनीयं रचयिता रचयन्-न्ती-यमानः रचितः रचयित्वा विरच्य रचयितुम् रचना। कल गतौ संख्याने च सक०। कलयति-ते-तु-ताम् अकलयत्-त कलयेत्-त कलयाञ्चकार-चक्रे-बभूव-आस, कलयिता-ष्यति-ते कल्यात् कलयिषीष्ट अचकलत्-त अकलयिष्यत्-त उप-सङ्कल-सङ्कलने, अवकल-आकल-विचारे, व्यवकल-व्यवकलने, विकल-विकलने। सङ्कल्यते समकलि सञ्चिकलयिषति-ते। सङ्कलनं व्यवकलनं सङ्कलनीयः सङ्कलयिता कलयन्-न्ती-यमानः कलितः कलयित्वा सङ्कल्य कलयितुम् अङ्-कला कलयतेर्यथौचित्यमर्थभेदेन कलतिः कामधेनुरित्युच्यते। स्पृह ईप्सायाम् सक०। स्पृहयति-ते-तु-ताम् अस्पृहयत्-त स्पृहयेत्-त स्पृहयाञ्चकार-चक्रे-बभूव-आस, स्पृहयिता-ष्यति-ते स्पृह्यात्-हयिषीष्ट अपस्पृहत्-त अस्पृहयिष्यत्-त। स्पृहयितव्यं स्पृहणीयः स्पृहयिता स्पृहयन्-न्ती-यमाणः स्पृहयित्वा संस्पृह्य स्पृहयितुम् अङ्-स्पृहा, आलु-स्पृहयालुः। सूच पैशुन्ये सक०। सूचयति-ते-तु-ताम् असूचयत्-त सूचयेत्-त सूचयाञ्चकार-चक्रे-बभूव-आस, सूचयिता-ष्यति-ते सूच्यात् सूचयिषीष्ट असुसूचत्-त असूचयिष्यत्-त। सम्-आसूचयति-ते, सूच्यते असूचि। सूचनं सूचयितव्यं सूचनीयं, सूच्यं, सूचयिता सूचकः सूचयन्-न्ती-यमानः, कर्मणि-सूच्यमानः सूचितः-तवान् सूचयित्वा संसूच्य सूचयितुम्, युच्-सूचना। शील उपधारणे (अभ्यासे) सक०। शीलयति-ते-तु-ताम् अशीलयत्-त शीलयेत्-त शीलयाञ्चकार-चक्रे-बभूव-आस, शीलयिता-ष्यति-ते शील्यात्-लयिषीष्ट अशिशीलत्-त अशीलयिष्यत्-त। परिशील-विशेषाभ्यासे, अनुशील-विचारे। शील्यते अशीलि शिशीलयिषति-ते। परिशीलनं परिशीलनीयः परिशीलयन्-न्ती-यमानः परिशीलितः अनुशील्य परिशीलयितुम्, अच्-शीलम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० रह त्यागे सक० । रहयति-ते । अररहत्-त, क्त-रहितः अच्-विरहः । **स्तन** देवशब्दे अक० । स्तनयति-ते स्तनत्-त, भावे क्तः-स्तनितं (मेघगर्जितं), इत्नु-स्तनयित्नुः (मेघः) **पत** गतौ अक० । वा णिच्-पतयति-ते अपपतत्-त, अपतीत् ऌदित्वाभावान्नाङ् सिचि इट्, आलु-पतयालुः । वा अदन्त इति पक्षे पातयति-ते अपीपतत्-त । **स्वर** सक० । स्वरयति-ते असस्वरत्-त । **मह** पूजायाम् सक० । महयति-ते अममहत्-त । क्त-महितः, इल-महिला । **भाम** अक० । भामयति-ते । णिनि-भामिनी, घञ्-भामः, सत्यः भामो यस्याः सा सत्यभामा । **कुमार** क्रीडायाम् अक० । यति-ते अचुकुमारयत्-त । अच्-कुमारः-री । **वेल** कालोपयोगे अक० । वेलयति-ते अविवेलत्-त । अङ्-वेला । **काल** धातुरिति केचित् कालयति-ते अचकालत्-त । घञ्-कालः, युच्-कालना (प्रेरणा) । **गवेष** मार्गणे सक० । गवेषयति-ते । गवेषणं गवेषणा गवेषितः गवेषयितुम् । **वास** उपसेवायाम् सक० । वासयति-ते अववासत्-त । वास्यते वासना । **भाज** णि सक० । प्रायेणायं विपूर्वः विभाजयति-ते व्यवभाजत्-त, विभाज्यते, विभाजनं विभाजितः विभाज्य विभाजयितुम् घञ्-गः, युच्-विभाजना । **सभाज** प्रीतिदर्शनयोः सक० । सभाजयति-ते अससभाजत्-त, सभाज्यते सभाजनं (आनन्दनं) नीयः सभाजितः सभाजयित्वा सभाजयितुम् । प्रेमादरेप्ययं लोके प्रयुज्यते । **ऊन** परिहाणे सक० । ऊनयति-ते औन-ना । अच्-ऊनः ऊनयित्वा ऊनयितुम् । **ध्वन** शब्दे अक० । ध्वनयति-ते अदध्वनत्-त । इ-ध्वनिः घञ्-ध्वानः । **सङ्केत** **गुण** चामन्त्रणे सक० । सङ्केतयति-ते अससङ्केतत्-त । घञ्-सङ्केतः सङ्केतितः सङ्केतयित्वा सङ्केतयितुम् । ग्रामयति-ते ग्रामः (समूहः) । गुणः प्राय आवृत्तौ प्रयुज्यते गुणयति-ते अजुगुणत्-त । गुणनं गुणकः गुण्यः गुणितः गुणयित्वा गुणयितुं -ना । **स्तेन** चौर्ये सक० । स्तेनयति-ते अतिस्तेनत्-त । अच्-स्तेनः, यति नलोपे स्तेयम् (चौर्यम्) । **केत** श्रावणे -णे च सक० । केतयति-ते निकेतयति-ते । केतितः (निमन्त्रितः) ।

आत्मनेपदिनः सेटः--

मृग अन्वेषणे सक० । अल्लोपस्य स्थानिवद्भावान्न गुणः मृगयते-ताम् अमृगयत मृगयेत मृगयाञ्चक्रे मृगयिता-ष्यते-षीष्ट अममृगत अग्लोपित्वान्न सन्वत्त्वम् अमृगयिष्यत । मृग्यते । मृगयित्वा मृगितः मृगयितुम् । अर्थ उपयाच्ञायाम् सक० । अर्थ इत्यत्र वृद्धेर्लोपो बलीयानिति अचोञ्णितीति वृद्धिं बाधित्वा अतोलोपः, अर्थवेदयोरित्यत्र प्रातिपादिकग्रहणान्नात्राऽऽपुक् अर्थयते-ताम् आर्थयत अर्थयेत अर्थयाञ्चक्रे अर्थयिता-ष्यते-षीष्ट आर्तथत अभ्यासस्य चर्त्वम् , आर्थयिष्यत । उप-प्रार्थयते अभ्यर्थयते समर्थयते (साधयति) । अर्थ्यते । प्रार्थनं प्रार्थना प्रार्थयितव्यं प्रार्थनीयः प्रार्थ्यः प्रार्थयमानः प्रार्थितः प्रार्थ्य प्रार्थयितुम् समर्थ्य समर्थयितुम् णिनि-अर्थी । प्रार्थयन्ति शयनोत्थितं प्रिया इत्यादि परस्मैपदप्रयोगस्तु अर्थनमर्थः तं करोतीत्यर्थे कृदन्ताण्णिच्युपपादनीयम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घि० गृह ग्रहणे सक० । गृहयते । क्त-गृहीतः, आलु-गृहयालुः । **कुह** विस्मापने सक० । कुहयते, अच्-कुहः, कनि-कुहकम् (अद्भुतम्) ऊ-कुहूः (नष्टेन्दुकलाअमा) । **शूर वीर** विक्रान्तौ अक० । शूरयते वीरयते । अच्-शूरः वीरः, ष्यञ् शौर्यं वीर्यम् । **स्थूल** परिबृंहणे सक० । स्थूलयते । अच्-स्थूलः, ष्यञ् स्थौल्यम् । **सत्र** सन्तान (निरन्तर) क्रियायाम् सक० । सत्रयते । अच्-सत्रम् (यज्ञविशेषः) । **गर्व** माने अक० । गर्वयते । गर्वितः, घञ्-गर्वः ।

अदन्ताः परस्मैपदिनः सेटः (मैत्रेयमते उभयपदिनः)–

सूत्र वेष्टने सक० । सूत्रयति-तु असूत्रयत् सूत्रयेत् सूत्रयाञ्चकार-बभूव-आस, सूत्रयिता-ष्यति सूत्र्यात् असुसूत्रत् असूत्रयिष्यत् । सूत्र्यते असूत्रि । सूत्रणं सूत्रितः सूत्रयित्वा सूत्रयितुम् , अच्-सूत्रम् । **मूत्र** प्रस्रवणे सक० । मूत्रयति-तु अमूत्रयत् मूत्रयेत् मूत्रयाञ्चकार-बभूव-आस, मूत्रयिता-ष्यति मूत्र्यात् अमुमूत्रत् अमूत्रयिष्यत् । मूत्र्यते अमूत्रि । मूत्रणं मूत्रितः मूत्रयित्वा मूत्रयितुम् , अच्-मूत्रम् । **रूक्ष** पारुष्ये अक० । रूक्षयति-तु अरूक्षयत् रूक्षयेत् रूक्षयाञ्चकार बभूव-आस, रूक्षयिता-ष्यति रूक्ष्यात् अरुरूक्षत् अरूक्षयिष्यत् । रूक्ष्यते अरूक्षि, रूक्षयित्वा रूक्षयितुम् , अच्-रूक्षः । **पार** कर्मसमाप्तौ सक० । पारयति-तु अपारयत् पारयेत् पारयाञ्चकार-बभूव-आस, पारयिता-ष्यति पार्यात् अपपारत् अपारयिष्यत् । पार्यते अपारि । पारणं पारितः पारयन्-न्ती, कर्मणि-पार्यमाणः पारयित्वा पारयितुम् , घञ्-पारः, युच्-पारणा (व्रतान्तभोजनम्) । **चित्र** चित्रकरणे (आलेख्यकरणे अद्भुतदर्शने च) सक० । चित्रयति-तु अचित्रयत् चित्रयेत् चित्रयाञ्चकार-बभूव-आस, चित्रयिता-ष्यति चित्र्यात् अचिचित्रत् अचित्रयिष्यत् । चित्र्यते अचित्रि । चित्रणं चित्रयितव्यं चित्रयिता चित्रितः चित्रयित्वा चित्रयितुम् , अच्-चित्रम् । **मिश्र** सम्पर्के सक० । मिश्रयति-तु अमिश्रयत् मिश्रयेत् मिश्रयाञ्चकार-बभूव-आस, मिश्रयिता-ष्यति मिश्र्यात् अमिमिश्रत् अमिश्रयिष्यत् । संमिश्रयति, मिश्र्यते अमिश्रि, मिमिश्रयिषति । मिश्रणं मिश्रयितव्यं मिश्रणीयं मिश्रयिता मिश्रयन्-न्ती मिश्रितः मिश्रयित्वा संमिश्र्य मिश्रयितुम्, अच्-मिश्रः । **दण्ड** दण्डनिपातने सक० । दण्डयति-तु अदण्डयत् दण्डयेत् दण्डयाञ्चकार-बभूव-आस, दण्डयिता-ष्यति दण्ड्यात् अददण्डत् अदण्डयिष्यत् । दण्ड्यते अदण्डि दिदण्डयिषति । दण्डनं दण्डयितव्यं दण्डनीयः दण्ड्यः दण्डयिता दण्डयन्-यन्ती दण्डितः दण्डयित्वा दण्डयितुम्, घञ्-दण्डः । **अङ्क** पदे लक्षणे च सक० । अङ्कयति-तु आङ्कयत् अङ्कयेत् अङ्कयाञ्चकार-बभूव-आस, अङ्कयिता-ष्यति अङ्क्यात् आञ्चिकत् आङ्कयिष्यत् । अङ्कनम् अङ्कयितव्यम् अङ्कनीयः अङ्क्यः अङ्कयिता-न्ती अङ्कितः अङ्कयित्वा समङ्क्य अङ्कयितुम् , अच-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अङ्कः। सुख दुःख तत्क्रियायाम् सक०। सुखयति-तु असुखयत् सुखयेत् सुखयाञ्चकार-बभूव-आस, सुखयिता-ष्यति सुख्यात् असुसुखत् असुखयिष्यत्। सुखितः सुखयन्-न्ती सुखयित्वा-सुखयितुम्, अच्-सुखम्। दुःखयति-तु अदुःखयत् दुःखयेत् दुःखयाञ्चकार-बभूव-आस, दुःखयिता-ष्यति दुःख्यात् अदुदुःखत् अदुःखयिष्यत्। दुःखितः दुःखयन्-न्ती दुःखयित्वा दुःखयितुम्, अच्-दुःखम्। **रूप** रूपक्रियायाम् (दर्शने) सक०। रूपयति, निरूप-निरूपणे निरूपयति-तु न्यरूपयत् निरूपयेत् निरूपयाञ्चकार-बभूव-आस, निरूपयिता-ष्यति निरूप्यात् न्यरुरूपत् न्यरूपयिष्यत्। निरूप्यते न्यरूपि निरुरूपयिषति। निरूपणं निरूपयितव्यं निरूपणीयं निरूप्यं निरूपयिता निरूपकः निरूपयन्-न्ती, कर्मणि-निरूप्यमाणः निरूपितः निरूप्य निरूपयितुम्, अच्-रूपम्। **वर्ण** वर्णक्रिया विस्तार गुणवचनेषु सक०। वर्णयति-तु अवर्णयत् वर्णयेत् वर्णयाञ्चकार-बभूव-आस, वर्णयिता-ष्यति वर्ण्यात् अववर्णत् अवर्णयिष्यत्। वर्ण्यते अवर्णि विवर्णयिषति। वर्णनं वर्णयितव्यं वर्णनीयं वर्ण्यं वर्णयिता वर्णकः वर्णयन्-न्ती, कर्मणि-वर्ण्यमानः वर्णितः वर्णयित्वा निर्वर्ण्य वर्णयितुम्, युच्-वर्णना, अच्-वर्णः। सुवर्णं वर्णयति (वर्णयुक्तं करोति), कथां वर्णयति (विस्तारयति) राजानं वर्णयति (गुणान्कीर्तयति)।

वि० १. **छिद्र** कर्णभेदने सक०। छिद्रयति छिद्रयित्वा छिद्रितः, अच्-छिद्रम्। **कर्ण** इति धात्वन्तरमिति केत् तेन-कर्णयति आकर्णयति। आकर्ण्यते, आकर्णनम् आकर्णितः आकर्ण्य आकर्णयितुम्, अच्-कर्णः। **अन्ध** उपघाते सक०। अन्धयति। अन्धितः, अच्-अन्धः। **रस** आस्वादनस्नेहनयोः सक०। रसयति-तु अरसयत् …न् अररसत्। रस्यते, रसनं करणे ल्युट्-रसना (जिह्वा), रसयन् रसितः रसयित्वा रसयितुम्, अच्-रसः, …सिकः। **अंस** समाघाते अक०। अंसयति। अच्-अंसः (स्कन्धः)। **स्तोत्र** श्लाघायाम् सक०। स्तोत्रयति। अच्-…त्रः (स्तवः) अग्निष्टोमः (यागविशेषः) अग्नेः ष्टुदिति षत्वम्। **व्रण** गात्रविचूर्णने सक०। व्रणयति अव्रणयत्-…व्रणत्। व्रणयितुम् व्रणयित्वा, अच्-व्रणः व्रणितः। **छेद** द्वैधीकरणे सक०। छेदयति। छेद्यते छेदयन् छेदितः छेदयित्वा …यितुम्, अच्-छेदः। **संग्राम** युद्धे अक० आत्मने०। संग्रामयते। परस्मैपदमित्येके संग्रामयति। घञ्-संग्रामः।

वि० २. **बहुलमेतन्निदर्शनम्** (गण)चुरादावदन्तधातुनिर्देशनं बहुलं वेदितव्यम्। तेनेहानुक्ता अपि धातवो ज्ञेयाः, …र्ण हरितभावे अक०। पर्णयति। अच्-पर्णः। **क्षप** प्रेरणे सक०। क्षपयति। क्षपणम्, अङ्-क्षपा, एवम आन्दोलयति प्रेङ्खो-…ति विडम्बयति अवधीरयति दलयति स्फुटयति द्रव्यादयो यथाभिधानमिति मैत्रेयादयः। अन्येतु भूवादिष्वेतदन्तासु दश-…सु धातूनां पाठो निदर्शनाय, तेन स्तम्भुप्रभृतयः सौत्राः, चुलुम्पादयो वाक्यकारीयाः, प्रयोगसिद्धा विक्लवत्यादयश्च गृह्यन्ते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति विगलन्त्याशु जीमूताः, विक्लवन्ते दिविग्रहाः, क्षयन्ति विद्युतः प्रावृट्, क्षीयन्त कामविग्रहाः इत्यादयः प्रयोगा उपपद्यन्ते इति माधवः। केचित्तु नवगणीपाठो बहुलं, तेनापठितेभ्योपि क्वचित् स्वार्थे णिच्, अतो रामो राज्यमचीकरदिति यथेत्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये, इतीदृशाः पक्षभेदाः प्राचां ग्रन्थेषु। वस्तुतो भूवादिसूत्रे पाठेन धातुसंज्ञेति भाष्यप्रतीकमादाय स पाठो नोपलक्षणार्थः किन्त्वियत्ताप्रतिपादनार्थ इति कैयटोक्त्या बहुलमेतनन्निदर्शनमितिं गणसूत्रमनार्षमिति शेखरकारः।

प्रयोगाः—लीलाकमलपत्राणि गणयामास पार्वती। चित्रार्थां न बृहत्कथामचकथम्। कलयति जगदेष कालोतः। नास्मै स्पृहयामि दुर्ललिताय। कन्या वरं वरयति। हलाग्राहव्ये रचयति विधिं पीठकोलूखलाद्यैः। अभ्यर्थये भगवतीं सततं सुखाय। सूचयत्येतदुक्तिः। उपवर्ण्य शान्तिदां कथाम्। पारयेयमिदं कार्यम्। चित्रांकनमिवाभवत्। अदण्ड्य दण्डनं हेयम्। सुखयेति भवदीयं सूचनं स्नेहमिश्रम्। शिल्पिनश्चित्रयन्ति। निरूपय विशुद्धयर्थम्। मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।

प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च (गणसू०) प्रातिपदिकाद्धात्वर्थे बोध्ये णिच्स्यात्, इष्ट प्रत्यये यथा प्रातिपदिकस्य पुम्वद्भाव-रभाव-टिलोप-विन्मतुब्लोप-यणादिलोप-प्रस्थस्फाद्यादेश-भसंज्ञाः तद्वण्णावपि स्युरित्यर्थः। **तत्करोति तदाचष्टे (गणसू०)** पूर्वस्यैव प्रपञ्चोयमर्थ निर्देशः, करोत्याचष्टे इति धात्वर्थमात्रं णिजर्थः, लडर्थस्त्वविवक्षितः, तेन भूतभविष्यद्वित्वबहुत्वादिष्वपि प्रत्ययः। पटुमाचष्टे करोति वेत्यर्थे पटुशब्दाण्णिचि इष्ठवत्वेन भत्वाट्टेरिति टिलोपे पटि इत्यस्य धातुसंज्ञया लडादयः, पटयति-तु अपटयत् पटयेत् पटयाञ्चकार-बभूव-आस, पटयिता-ष्यति पटय्यात्। लुङि णिचि टिलोपात्परत्वेनाचोञ्णितीत्युकारस्य वृद्धौ आवादेशात्परत्वेन वार्णादङ्गस्य बलीयस्त्वेन च टेरौकारस्य लोपे अनग्लोपित्वात्सन्वत्वेनाभ्यासस्येत्वे दीर्घे च अपीपटत्, णौ चङीतिसूत्रभाष्ये वृद्धेर्लोपो बलीयानित्युक्तेर्वृद्धेः पूर्वमेव टेरुकारस्य लोप इति मते तु अग्लोपित्वेन सन्वत्वाभावे अपपटत् इत्युभयथा रूपम्, अपटयिष्यत्। एवं लघुमाचष्टे करोति वा लघयति इष्ठवत्वेन दृढमाचष्टे करोति वा दढयति, मृदुमाचष्टे करोति वा म्रदयति रऋत इति रभावः, एनीं-एतयति पुंवद्भावः, स्थूलं-स्थवयति, दूरं-दवयति स्थूलदूरेति यणादिलोपः, स्रग्विणं-स्रजयति, गोमन्तं-गवयति विन्मतोरिति लुक्, प्रियं-प्रापयति। स्थिरं-स्थापयति प्रियस्थिरेति प्रस्थाद्यादेशः। **तेनातिक्रामति (ग० सू०)** पूर्वस्यैव प्रपञ्चोऽर्थनिर्देशः अश्वेनातिक्रामति अश्वयति, हस्तिनातिक्रामति हस्तयति भत्वाट्टिलोपः। **धातुरूपं च (ग० सू०)** णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते, चकारोऽनुक्तसमुच्चयार्थः, तथात्र वार्तिकम्- **आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्चकारकम्** (वा) कंसवधमाचष्टे इत्यर्थे णिचि कृतः अपो लुकि, वधेर्हन्प्रकृतिरूपत्वे, कारकस्य कंसस्य तथैवावस्थाने, **हनस्तोऽचिण्णलोः** (७-३-३२) हन्तेस्तकारोन्तादेशः स्यात् चिण्णल्वर्जे ञिति णिति च। इति नस्य तत्वे होहन्तेरिति हस्य घत्वे उपधावृद्धौ घाति इत्यस्माल्लडादौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कंसं घातयति-तु अजीघतत् इत्यादि। एवं राजागमनमाचष्टे राजानमागमयति, पुष्पेण योगमाचष्टे पुष्पेण योजयति। **कर्तृकरणाद्धात्वर्थे** (ग० सू०) कर्तुर्व्यापारार्थं यत्करणं न तु चक्षुरादिमात्रं तस्माद्धात्वर्थे णिच्स्यात्। पूर्वस्यैव प्रपञ्चः। असिना हन्ति असयति, परशुना छिनत्ति परशयति, दात्रेण लुनाति दात्रयति।

वि० कंसमजीघतदित्यत्र कंसवधशब्दाण्णिचि तस्यैव विशिष्टस्याङ्गसंज्ञाया धातुसंज्ञायाश्च प्राप्तेः कंसशब्दात्पूर्वमट् तस्यापि द्विर्वचनं स्यात्, कंसं घातयतीत्यत्र धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति परिभाषया वधेति प्रातिपदिकात्प्रत्ययेन धातुकार्ये कुत्वं तत्वं च न स्यादित्याशङ्कायां प्रकृतिवच्च कारकमित्यत्र कारकञ्चेति चकारक्रमं परिवर्त्य ...मिति हेतुमण्णिच्प्रकृतेर्हन्त्यादेर्हेतुमण्णौ यादृशं कारकं धातावनन्तर्भूतं द्वितीयान्तं यादृशं च कार्यं कुत्वतत्वादि तदि-... भवतीत्यर्थेनेष्टसिद्धिः, हन्धातोः कारकातिदेशेन कृदन्तवधस्य कर्मतामादाय कंसशब्दे षष्ठीप्रसङ्गोपि वार्यते।

सत्यापपाशादिभ्यः सूत्रोक्तेभ्योपि धात्वर्थे णिच्। सत्यस्यापुक्निर्देशात्। सत्यं करोत्याचष्टे वा-सत्यापयति। **अर्थवेदयोरापुग्वक्तव्यः** (वा) अर्थं करोत्याचष्टे करोति वा अर्थापयति, वेदमाचष्टे-वेदापयति, पाशं विमुञ्चयति-विपाशयति, रूपं पश्यति-रूपयति, वीणयोपगायति-उपवीणयति, तूलेनानुकुष्णाति-अनुतूलयति, श्लोकैरुपस्तौति-उपश्लोकयति, सेनयाऽभियाति-अभिषेणयति, लोमान्यनुमार्ष्टि-अनुलोमयति, त्वचं गृह्णाति-त्वचयति, वर्मणा संनह्यति-संवर्मयति, वर्णं गृह्णाति-वर्णयति, चूर्णैरवध्वंसयति-अवचूर्णयति, सूत्रं करोति-सूत्रयति।

वि० **णिगङ्गान्निरसने** (ग० सू०) अङ्गवाचिनः प्रातिपदिकान्निरसनेर्थे णिङ् स्यात्। ङित्वात्तङ्। हस्तौ निरस्यति-हस्तयते, पादौ निरस्यति-पादयते। **श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च** (ग० सू०). श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते णिङ् च धात्वर्थे। श्वेताश्वमाचष्टे श्वेताश्वेनातिक्रामति वा-श्वेतयते, अश्वतरमाचष्टे अश्वयते, गालोडितं वाचां विमर्शस्तत्करोति—गालोडयते, आह्वरकमाचष्टे—आह्वरयते। **पुच्छादिषु धात्वर्थ इत्येव सिद्धम्** (वा० सू०) पुच्छादिषु धात्वर्थे णिजन्तादेव बहुलवचनादात्मनेपदमस्तु, मास्तु पुच्छभाण्डचीवराण्णिङिति विधिः। उत्पुच्छं करोति-उत्पुच्छयते, भाण्डानि समाचिनोति—संभाण्डयते, चीवराण्यर्जयति परिधत्ते वा—संचीवरयते। सिद्धशब्दो धातुपाठे मङ्गलार्थः।

प्रयोगाः—द्रढयति शिथिलं म्रदयति परुषम्। लघयति भारं गुरुतरमेषः। घातयत्यद्य रावणम्। उपश्लोकयति राजानं कविः। विजिगीषुररीनभिषेणयति। अष्टाध्यायीमसूत्रयत्। अर्थापयन्ति विद्वांसः। वेदापयति वैदिकः। सत्यापयति वाचं सः। संवर्मयन्ति वीरास्ते। लघयित्वा कार्यभारमनुलोमय दुःस्थितिम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रश्नाः—चुरादिषु को विकरणविशेषः। चुरादिणिचो हेतुमण्णिचश्च को विशेषः। आकुस्मीयेषु आधृषीयेषु च को विशेषः। चुरादयः सेटोऽनिटो वा। चुरादिषु किं पदम्। अदन्ता धातवः के। अदन्तेषु को विशेषः। प्रातिपदिकेभ्यो णिच् कस्मिन्नर्थे, इष्ठवत्त्वातिदेशेन कानि कार्याणि सत्यापपाशादिभ्यः केष्वर्थेषु णिच्। अधस्तनवाक्येषु चुरादिधातु-सिद्धशब्दान्विवृणुत—कः सिन्धुराजमभिषेणयितुं समर्थः। मन्त्रयन्ति मनीषिणः। किं चिन्तयति मामन्तरेण वैशम्पायनः। शैलेन्द्रं वरयामास। अचिन्तनीयस्तु तव प्रभावः। सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्। मान्यान्मानय विद्विषो-प्यनुनय प्रच्छादय स्वैर्गुणैः। वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्। भद्रमुपवर्णयेदानीं कुसुमपुरवृत्तान्तम्। वाचं न मिश्रयति यद्यपि मद्वचोभिः। कथयिष्यामि ते भूतार्थम्। बालं तर्जयसे वृथा। धूर्तो वञ्चयते साधुम्। समालोचय नाटकम्। मनोरथान्पूरयति कः। प्रतिपक्षमखण्डयत्। ध्वजान्समुदतोलयत्। संयोजय यशः श्रिया। रविर्लोकमतीतपत्। धीरा अचकथन्कथाः। यशः शुभं सूचयति। परिशील्य शास्त्राणि प्रक्षालय मनोमलम्। इति चुरादयः।

अथ ण्यन्तप्रक्रिया।

तत्प्रयोजको हेतुश्च (१-४-५५) कर्तुः प्रयोजको हेतुसंज्ञः स्यात्कर्तृसंज्ञश्च। **हेतुमति च** (३-१-२६) प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्। भवन्तं प्रेरयतीत्यर्थे प्रेरकस्य हेतुसंज्ञया कर्तृ-संज्ञया च तदीयव्यापारे प्रेषणादौ वाच्ये भूधातोर्णिचि इकारशेषे अचोञ्णितीति धातूकारस्य वृद्धावावादेशे भावीत्यस्य सनाद्यन्ता इति धातुत्वे णिचश्चेति कर्तृगे फले बोध्ये आत्मनेपदमन्यत्र परस्मैपदं चुरादिप्रक्रियया रूपाणि। भावयति-ते-तु-ताम् अभावयत्-त भावयेत्-त, भावयाञ्चकार-चक्रे-बभूव-आस, भावयितासि-से-ष्यति-ते, भाव्यात्-णेरनिटीति णिलोपः भावयिषीष्ट, लुङि णिश्रीति च्लेश्चङि भू इ अत् इत्यत्र वृद्ध्यावादेशाभ्यां प्रागेव चङीति भूधातोर्द्वित्वेऽभ्यासचर्त्वे उत्तरोकारस्य वृद्धावावादेशे णौचङीत्युपधाह्रस्वे णिलोपे सन्वद्भावे अभ्यासेऽकाराभावेन सन्यत इत्यस्याप्रवृत्तौ **ओः पुयण्ज्यपरे** (७-४-८०) सनि परे यदङ्गं तदवयवाभ्यासोकारस्य इत्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः। इत्यभ्यासोकारस्येत्वे दीर्घोलघोरिति दीर्घे अबीभवत्-वताम् वन्, अबीभवत-वेताम्-वन्त, अभावयिष्यत्-त। सम्-अनु-उद्-परिभावयति-ते, भाव्यते अभावि बिभावयिषति-ते। भावनं भावनीयं भावयन्-न्ती-यमानः भावितः भावयित्वा सम्भाव्य। कुर्वन्तं प्रेरयतीत्यर्थे कृ धातोर्णिचि ऋकार-वृद्धौ कारीत्यस्य धातुत्वाल्लडादयः कारयति-ते-तु-ताम् अकारयत्-त कारयेत्-त कारयाञ्चकार-चक्रे-बभूव-आस, कारयिता-ष्यति-ते कार्यात्-रयिषीष्ट, लुङि चङि द्वित्वाभ्यासार्त्वहलादिशेषचर्त्वोत्तरऋकार-गुणणिलोपेषु सन्वद्भावेनाभ्यासेत्वदीर्घादौ अचीकरत्-रताम्-रन्, अचीकरत-रेताम्-रन्त अकारयि-ष्यत्-त। अनु उप-अपकारयति-ते कार्यते अकारि चिकारयिषति-ते कारणं कारयितव्यं कारितः कारयित्वा,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं हृञ् हरणे-हारयति-ते अजीहरत्-त। पुञ् पवने-पावयति-ते अपीपवत्-त। यु मिश्रणे-यावयति-ते अयीयवत्-त। रु शब्दे-रावयति-ते अरीरवत्-त। लूञ् छेदने-लावयति-ते अलीलवत्-त। एवमन्येषामेवैव प्रक्रिया, लुङि अन्यत्र च वक्ष्यमाणा विशेषाश्च। **स्रवति-शृणोति-द्रवति-प्रवति-प्लवति-च्यवतीनां वा** (७-४-८१) एषामभ्यासोकारस्य इत्वं वा स्यात्सनि अवर्णपरे धात्वक्षरे परे। इत्येषां लुङ्यभ्यासोकारस्य इत्वं वा। स्रु स्रवणे-स्रावयति-ते असिस्रवत्-त असुस्रवत्-त। द्विहल्व्यवधानेन लघुपरकत्वाभावान्नात्र सन्वत्त्वम्। श्रु श्रवणे-श्रावयति-ते अशिश्रवत्-त अशुश्रुवत्-त्। द्रु गतौ-द्रावयति-ते अदिद्रवत्-त। प्लुङ् गतौ-प्लावयति-ते अपि-पुप्लवत्-त। च्युङ् गतौ-च्यावयति-ते अचि-चुच्यवत्-त। नाग्लोपिशास्वृदितामिति णिच्यग्लोपिनः शास्तेः ऋदिताश्च चङि णावुपधाह्रस्वनिषेधः। शासु अनुशिष्टौ-शासयति-ते अशशासत्-त। ढौकृ गतौ-ढौकयति-ते अडुढौकत्-त। चकासृ दीप्तौ-चकासयति-ते अचीचकासत्-त। सन्वल्लघुनीत्यत्र अङ्गं यत्र द्विरुच्यते चङ्परे णौ यल्लघु तत्परो योऽङ्गस्याभ्यास इति मते तु सन्वत्त्वाभावेनेत्वाभावे अचचकासत्-त। ण्यन्ताच्चुरादेः प्रेरणार्थे णिचि पूर्वविप्रतिषेधेऽपवादेन वा वृद्धिं बाधित्वा पूर्वणिलोपे चोरि इत्येव हेतुमण्णिजन्तं, तस्यापि चोरयतीत्यादिरूपाणि। लुङि चङि अ-चोर-इ-अत् इत्यत्र णौचङ्युपधाह्रस्वे हेतुमण्णिलोपे चुर् इत्यस्य द्वित्वे हलादिशेषे सन्वद्भावेन दीर्घोलघोरिति दीर्घे अचूचुरत्-त।

टि० ण्यन्ताण्णिचि चङ्परे णौ विहितं उपधाह्रस्वोभ्यासदीर्घश्चेति द्वयं प्रत्ययलक्षणेन प्रथमणिचमादाय न संभवति, णिचा व्यवधानेन चङ्परकत्वाभावात्, नापि द्वितीयणिचमादाय, द्वितीयणिच्प्रकृतेः प्रथमणिजन्तस्य णिलोपमाश्रित्याभावादिति तु न शङ्क्याम्, चङ्परे णौ इति णित्वजात्याश्रयनिर्देशेन णिद्वयस्य चङ्परकत्वाभावेपि णित्वाश्रयस्य तथात्वदीर्घयोः प्रवृत्तिसम्भवात्।]

टुओश्वि गति वृद्ध्योः—श्वाययति-ते, लुङि चङि **णौ च संश्चङोः** (६-१-३१) सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात्। सम्प्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात्सम्प्रसारणे पूर्वरूपम् अशूशवत्-त, सम्प्रसारणाभावे अलघुत्वान्नदीर्घः अशिश्वयत्-त। उन्दी क्लेदने-उन्दयति-ते औन्दिदत्-त। **नन्द्राः संयोगादयः** (६-१-३) अचः पराः संयोगादयो नदरा द्विर्न भवन्ति। इति संयोगादिदकाराणां द्वित्वनिषेधेन दकारस्यैवात्र द्वित्वम्। अर्च पूजायाम्-अर्चयति-ते आर्चिचत्-त चकारस्यैवात्र द्वित्वम्। उब्ज आर्जवे-उब्जयति-ते न्युब्जयति-ते, उपदेशे दकारोपधस्यास्य भुजन्युब्जाविति निर्देशादस्य वः, सचान्तरङ्गोपि द्वित्वविषये नन्द्रा इति निषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्तते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नतु ततः प्राक्, दकारोच्चारणसामर्थ्यात्, तेन लुङि औब्जिजत्-त। **रभेरशब्लिटोः** (७-१-६३) रभेर्नुम् स्यादचि नतु शब्लिटोः। **लभेश्च** (७-१-६४) लभेश्च नुम् स्यादचि नतु शब्लिटोः। **रभ** राभस्ये-प्रारम्भयति-ते प्रारम्भत्-त। **डुलभष्** प्राप्तौ-लम्भयति-ते अललम्भत्-त। **स्मृ** आध्याने-मित्वाद्ध्रस्वः स्मरयति, अनाध्याने तु स्मारयति-ते, लुङि चङि द्वित्वादौ सन्यत इतीत्वे प्राप्ते **अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्** (७-४-९५) एषामभ्यासस्याकारोऽन्तादेशः स्याच्चङ्परे णौ। इत्यत्वे असस्मरत्। **प्रथ** विस्तारे-प्रथयति अपप्रथत्। **ञित्वरा** सम्भ्रमे-त्वरयति-ते अतत्वरत्-त। **म्रद** मार्दवे-म्रदयति अमम्रदत् एषु मित्वाद्ध्रस्वः। **स्तृञ्** आच्छादने-विस्तारयति-ते व्यतस्तरत्-त। **स्पश** बाधनस्पर्शनयोः स्पाशयति अपस्पशत्। **विभाषा वेष्टिचेष्ट्योः** (७-४-९६) अनयोरभ्यासस्य अत्वं वा स्याच्चङ्परे णौ। **वेष्ट** वेष्टने-वेष्टयति-ते अववेष्टत्-त अविवेष्टत्-त। **चेष्ट** चेष्टायाम्- चेष्टयति-ते अचचेष्टत्-त अचिचेष्टत्-त। **भ्राजृ** दीप्तौ-भ्राजयति-ते, लुङि चङि द्वित्वादौ भ्राजभासेत्युपधाह्रस्वपक्षे लघुपरत्वेन सन्वत्त्वादभ्यासेत्वम्, दीर्घो लघोरिति दीर्घस्तु न, संयोगपरत्वेनालघुत्वात् अबिभ्रजत्-त अबभ्राजत्-त। **भासृ** दीप्तौ-भासयति-ते अबीभसत्-त अबभासत्-त। **भाष** व्यक्तायां वाचि- भाषयति-ते अबीभषत्-त अबभाषत्-त। **दीपी** दीप्तौ- दीपयति-ते अदीदिपत्-त अदिदीपत्-त। **जीव** प्राणधारणे-जीवयति-ते अजीजिवत्-त अजिजीवत्-त। **मील** निमेषणे- निमीलयति-ते न्यमीमिलत्-त न्यमिमीलत्-त। **पीड** अवगाहने- पीडयति-ते अपीपिडत्-त अपिपीडत्-त। **काण्यादीनां वेति वक्तव्यम्** (वा) णौ चङ्युपधायाह्रस्वो वा। ण्यन्ताः **कण रण भण श्रण लुप हेठ** षट् काण्यादयो भाष्ये उक्ताः, ह्वायि वाणि **लोटि** लोपयश्चत्वारोऽधिका न्यासे, **चाणि लोटि** इत्यप्यन्यत्र इत्थं द्वादश। **कण** निमीलने- काणयति अचीकणत् अचकाणत्। उपधाह्रस्वे सन्वत्वदीर्घौ ह्रस्वाभावे न। **रण** शब्दे-राणयति अरीरणत् अरराणत्। **भण** शब्दे-भाणयति अबीभणत् अबभाणत्। **श्रण** दाने-विश्राणयति व्यशिश्रणत् व्यशश्राणत्। **लुप्लृ** छेदने- लोपयति अलूलुपत् अलुलोपत्। **लुठ** स्तेये-लोठयति अलूलुठत् अलुलोठत्। **लप** व्यक्तायां वाचि-विलापयति व्यलीलपत् व्यललापत्। **लुट** प्रतिघाते-लोटयति अलूलुटत् अलुलोटत्। **स्वापेश्चङि** (६-१-१८) ण्यन्तस्य स्वापेश्चङि सम्प्रसारणं स्यात्। **ञिष्वप्** शये-स्वापयति, लुङि सम्प्रसारणं तदाश्रयं च कार्यं बलवदिति पूर्वं सम्प्रसारणे पूर्वरूपे च कृते द्वित्वसन्वत्त्वदीर्घषत्वानि असूषुपत्। **शाच्छासाह्वाव्यावेपां युक्** (७-३-३७) एषां युगागमः स्याण्णौ परे। अर्तिह्रीतिपुकोपवादः। **शो** तनूकरणे-णौ आत्वे युगागमः शाययति अशीशयत्। **छो** छेदने-छाययति अचिच्छयत्। **षो** अन्तकर्मणि-साययति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असीसयत्। ह्वेञ् स्पर्द्धायाम्- ह्वाययति, लुङि चङि ह्वः सम्प्रसारणम् (६-१-३२) सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं स्यात्। इति सम्प्रसारणे पूर्वरूपे हु इत्यस्य द्वित्वे चर्त्वे उत्तरभागे वृद्ध्यावादेशयोः काण्यादित्वादुपधाह्रस्वे सन्वत्त्वे दीर्घे अजूहवत् ह्रस्वाभावे अजुहावत्। व्येञ् संवरणे व्याययति अविव्ययत्। वेञ् तन्तुसन्ताने-वाययति अवीवयत्। पा पाने-पाययति पायीत्यस्माल्लुङि चङि द्वित्वादौ लोपः पिबतेरीच्चाभ्यासस्य (७-४-४) पिबतेरुपधालोपः स्यादभ्यासस्य ईदन्तादेशश्च। इत्युपधालोपे अभ्यासान्त्यस्य ईत्वे अपीप्यत्। अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुग्णावित्येषां पुगागमः। ऋ गतौ-वृद्धिं बाधित्वा नित्यत्वात्पुकि गुणे अर्पयति आर्पिपत्। ह्री लज्जायाम्-ह्रेपयति अजिह्रपत्। ष्ठा गतिनिवृत्तौ-स्थापयति स्थापेर्लुङि चङि द्वित्वादौ अभ्यासस्येत्वे उपधाह्रस्वे। तिष्ठतेरित् (७-४-५) तिष्ठतेरुपधाया इत्वं स्याच्चङ्परे णौ। इतीत्वे अतिष्ठिपत्। घ्रा गन्धोपादाने-घ्रापयति। जिघ्रतेर्वा (७-४-६) जिघ्रतेरुपधाया इत्वं वा स्याच्चङ्परे णौ। इति इत्वविकल्पे अजिघ्रिपत् अजिघ्रपत्। कॄत संशब्दने-णौ उपधायाश्चेति ॠत इर्भावे उपधायाश्चेति दीर्घे कीर्तयति, लुङि चङि उर्ऋत् (७-४-७) उपधाया ऋवर्णस्य स्थाने ऋत्स्याद्वा चङ्परे णौ। इति ॠकारस्य ऋत्वपक्षे कृत् इत्यस्य द्वित्वे उरदिति ऋत अत्वे हलादिशेषे चर्त्वे उपधायाश्चेत्युत्तरदीर्घे अचीकृतत्, ऋत्वाभावे उपधायाश्चेति ऋत इर्भावे किर्त इत्यस्य द्वित्वादौ उपधायाश्चेत्युत्तरदीर्घे अचिकीर्तत्। वृतु वर्तने-णौ गुणे वर्तयति लुङि चङि लघूपधगुणापवादेन उर्ऋदिति ऋत्वे वृत् इत्यस्य द्वित्वे उरदत्वे सन्वत्त्वादित्वदीर्घौ अवीवृतत्, ऋत्वाभावे वृत् इत्यस्य द्वित्वे उरदत्वादौ अलघुपरत्वेन सन्वत्त्वदीर्घयोरभावे उत्तरत्र लघूपधगुणे अववर्तत्। एवं वृधु वृद्धौ-वर्धयति अवीवृधत् अववर्धत्। मृजू शुद्धौ-मृजेर्वृद्धिः मार्जयति, लुङि चङि उपधाया ऋत्वपक्षे अमीमृजत्, ऋत्वाभावे द्वित्वे उरदत्वमुत्तरत्र मृजेर्वृद्धिः अममार्जत्। पा रक्षणे-णौ पुकि प्राप्ते पातेर्णौ लुग्वक्तव्यः (वा) इति लुगागमे पालयति, लुङि चङि पाल इत्यस्य द्वित्वादौ सन्वत्त्वेनेत्वदीर्घयोः अपीपलत्। ओवै शोषणे आत्वे णौ पुगपवादेन वो विधूनने जुक् (७-३-३८) वातेर्जुक्स्यात् णौ कम्पेर्थे। इति जुकि वाजयति, अर्थान्तरे केशान् वापयति (शोषयति) अवीवजत्, अवीवपत्। विभाषालीयतेरिति एज्विषये ल्यपि च पक्षे आत्वम्, लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने (७-३-३९) लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ वास्तो णौ स्नेहद्रवे। इति लीयतेर्नुक् लातेर्लुक्, ली ई इति इकारप्रश्लेषादात्वपक्षे नुग्न । लीङ् श्लेषणे दिवादौ, ली श्लेषणे क्र्यादौ, ला आदाने अदादौ। लीलीङोरात्वाभावपक्षे नुकि विलीनयति, नुगभावे वृद्ध्यायादेशौ विलाययति,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लीलीङोरात्वपक्षे लातेश्च लुकि विलालयति, आत्वपक्षे नुग्लुकोरभावे पुकि विलापयति घृतम्। स्नेहद्रवाभावे तु नुग्लुकोरभावादात्वपक्षे पुकि विलापयति, आत्वाभावे वृद्ध्यायादेशौ विलाययति लाहम्। लुङि यथायथं व्यलीनयत्, व्यलीलपत्, व्यलीलयत्। प्रलम्भनाभिभवपूजासु लियो नित्यम्। वमशिति वाच्यम् (वा) लियः संमाननशालिनीकरणयोश्च (१-३-३९) लीङ्लीयोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेपि फले पूजाभिभवयोः प्रलम्भने चार्थे। जटाभिर्लापयते (पूजामधिगच्छति), श्येनो वर्तिकामुल्लापयते। (अभिभवति) बालमुल्लापयते (वञ्चयते) लुङि अलीलपत्। बिभेतेर्हेतुभये (६-१-५६) बिभेतेरेच आत्वं वा स्यात्प्रयोजकाद्भयं चेत्। भीस्म्योर्हेतुभये (१-३-६८) आभ्यां ण्यन्ताभ्यामात्मनेपदं स्याद्धेतोः (प्रयोजकात्) चेद्भयस्मयौ। सूत्रे भयग्रहणं धात्वर्थोपलक्षणं, तेन स्मयस्यापि संग्रहः। ञिभी भये-णिचि आत्वे पुकि तङि गुणायादेशौ मुण्डो भापयते, आत्वाभावपक्षे तु भियो हेतुभये षुक् (७-३-४०) भी ई इति इकारः प्रश्लिष्यते, इकारान्तस्य भियः षुक्स्यात् णौ हेतुभये। इति षुकि भीषयते। लुङि पुकि अबीभपत, षुकि अबीभषत। अहेतुभये तु णौ वृद्ध्यादेशौ कुञ्चिकया बालं भाययति अबीभयत्। नित्यं स्मयतेः (६-१-५७) स्मयतेरेचो नित्यमात्वं स्याण्णौ हेतोः स्मये। ष्मिङ् ईषद्धसने-हेतुभये णावात्वे पुकि तङि जटिलो विस्मापयते व्यसिस्मयत, अहेतुभये तु वाचा विस्माययति व्यसिस्मयत्। रुहः पोऽन्यतरस्याम् (७-३-४३) रुहः पो वा स्याण्णौ। रुह बीजजन्मनि प्रादुर्भावे च-णौ हस्य वा पत्वे गुणः रोपयति रोहयति अरूरुपत् अरूरुहत्। क्रीङ्जीनां णौ (६-१-४८) एषामेच आत्वं स्याण्णौ। डुक्रीञ् द्रव्यविनिमये-णौ वृद्धावैकारस्यात्वे पुक् क्रापयति अचिक्रपत्। जि जये-णौ वृद्धावात्वे पुक् जापयति अजीजपत्। इङ् अध्ययने-णौ वृद्धावात्वे पुक् अध्यापयति, लुङि चङि णौ च संश्चङोः (२-४-५१) सन्परे चङ्परे च णौ इङो गाङ् वा स्यात्। इति गाङादेशे पुकि उपधाह्रस्वे गप् इत्यस्य द्वित्वे हलादिशेषे चुत्वे सन्वत्त्वादित्वे दीर्घे अध्यजीगपत् बुधयुधेति परस्मैपदमेव, गाङादेशाभावे वृद्धौ क्रीङ्जीनामित्यात्वे पुकि पि इत्यस्य द्वित्वे णिलोपे अध्यापिपत्। सिद्ध्यतेरपारलौकिके (६-१-४९) ऐहलौकिकेऽर्थे विद्यमानात्सिध्यते रेच आत्वं स्याण्णौ। षिधु संराद्धौ-णावुपधागुणे एकारस्यात्वे अन्नं साधयति (निष्पादयति), असीसधत्, पारलौकिके तु सेधयति तापसं तपः (तत्त्वं निश्चाययति)। गुहू संवरणे-णौ ऊदुपधाया गोह इत्यूत्वे गूहयति अजूगुहत्। दोषो णौ (६-४-९०) दुष्यतेरुपधाया ऊत्स्याण्णौ। दुष वैकृत्ये-दूषयति। वा चित्तविरागे (६-४-९१) दुष्यतेरुपधाया ऊद्वा स्याच्चित्तविरागे। विरागोऽप्रीतता। चित्तं दूषयति दोषयति वा कामः, अदूदुषत्। मितां ह्रस्वः भ्वादौ चुरादौ च मित उक्ताः। घट चेष्टायाम्--घटयति अजीघटत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनी प्रादुर्भावे-जनयति अजीजनत्। जृष् वयोहानौ-जरयति अजीजरत्, जॄणातेस्त्वमित्वात् जार-यति। रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः (वा) मृगरमणमाखेटकम्, रञ्ज रागे-रजयति अरीरजत् मृगान्। अन्यत्र तु रञ्जयति पक्षिणः, रञ्जयति मृगाँस्तृणदानेन अररञ्जत्। चिञ् चयने-चुरादौ-ततो णौ चिस्फुरोर्णावित्यात्वपक्षे पुकि चापयति, आत्वाभावे वृद्ध्यायादेशौ चाययति, अची-चपत् अचीचयत्। स्फुर सञ्चलने-णावुकारस्यात्वे स्फारयति, आत्वाभावे स्फोरयति अपस्फुरत् अपुस्फुरत्। उभौ साभ्यासस्य (८-४-२१) साभ्यासस्यानितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति। अन प्राणने-प्राणयति अनितेरिति णत्वम्, प्राणिणत् द्वयोर्णत्वम्। णौ गमिरबोधने (२-४-४६) णौ गमिः स्याण्णौ अबोधनेऽर्थे। इण् गतौ-णौ गमादेशे गमयति (प्रापयति)। अजीगमत्, बोधने तु वृद्ध्यावायादेशः प्रत्याययति प्रत्यायियत्। इण्वदिकः (वा), इक् स्मरणे-गमादेशे अधिगमयति (स्मारयति), अध्यजीगमत्। गच्छतेरपि गमयति अजीगमत्। हन हिंसायाम्-णौ हनस्तोऽचिण्णलो-रिति नस्य तत्वे होहन्तेरिति कुत्वे उपधावृद्धौ घातयति अजीघतत्।

वि० १. भीस्म्योर्णौ हेतुभय एवात्वविधानेन विस्मापयन्विस्मितमात्मवृत्तौ इत्यत्र मनुष्यवाचेति करणादेव स्मयेन तदभावात् विस्माययन्नित्येव पाठो युक्तः, किंवा मनुष्यवाक्प्रयोजककर्त्री, मनुष्यवाग्राजानं विस्मापयते, तया सिंहो विस्मापयन्निति ण्यन्ताण्णौ शतरि प्रयोगः, आत्वे आत्मनेपदप्रसक्तिस्तु भीस्मीप्रकृतिकण्यन्तादेव, नतु ण्यन्तप्रकृतिकण्यन्ता-च्छतृप्रत्ययोप्युपपद्यते।

वि० २. स्फायो वः (७-३-४१) स्फायो वः स्याण्णौ। स्फायी वृद्धौ-णौ यस्य वः स्फावयति। शदेरगतौ (७-३-४२) शदेर्णौ तोन्तादेशः स्यान्नतु गतौ। शद्लृ शातने-णौ दस्य तः शातयति (नाशयति) अशीशतत् सक्तून्, गोविन्दो गाः शादयति (गमयति) अशीशदत्। प्रजने वीयतेः (६-१-५५) अस्यैव आत्वं वा स्याण्णौ (गर्भग्रहणे) अर्थे। वी गत्यादौ-णावात्वे पुक्, आत्वाभावे वृद्ध्यायादेशौ, वापयति वाययति वा गाः पुरोवातः (ग्राहयति)। ईर्ष्य ईर्ष्यायाम्-ईर्ष्ययति, लुङि चङि ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्। (वा) तृतीयव्यञ्जनस्य एकाचो वा द्वित्वमित्यर्थः। आद्यपक्षे षकारस्य द्वित्वं वारयितुमिदम्, द्वितीयपक्षे तु अजादेर्द्वितीयस्येत्यपवादतया प्रवर्तते। ईर्ष्ययति ऐर्ष्यियत्, सनि ऐर्ष्यिष्यत्।

वि० ३. प्रार्थयन्ति शयनोत्थितं प्रिया इति माघप्रयोगे प्रार्थयन्तीति न चौरादिक स्वार्थणिजन्तं तथात्वे तस्य गर्वीयत्वे-नैव प्रसङ्गात्, नापि हेतुमण्णिजन्तं, स्वाभीष्टं याचन्ते इत्यर्थे तदसम्भवात्, नहि प्रयोजकव्यापाराभावे तत्प्रवृत्ति-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रित्याशङ्कायां निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे तदिष्यते इति वचनात्प्रार्थनानुकूलव्यापाररूपमूलधात्वर्थगतमनुकूलव्यापाररूप-प्रेषणांशमविवक्षित्वा प्रार्थनामात्रमादाय ततो हेतुमण्णिचि मूलधातुसाम्येन प्रार्थनानुकूलव्यापारमात्रार्थे णिजन्तपर्यवसानेन साधुत्वमुपपादनीयम्। एवं न्यायेन सकर्मकेष्वन्यत्रापि हेतुमण्णिजन्तस्य मूलधातुसमानार्थत्वमुपपादनीयमिति वदन्ति। केचित्तु प्रार्थनं प्रार्थ इति घञन्तात्तंकरोतीत्यर्थे णिचि प्रार्थयन्तीति निष्पादयन्ति, तत्तु न युक्तं, तथात्वे धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते उपसर्गाणां पृथक्करणस्य वक्ष्यमाणतया अर्थवेदेत्यापुगागमस्य दुर्वारत्वात्।

प्रयोगाः—धेनवः पाययन्ति नः। राजा पालयति प्रजाः। नरो धयति मां योगः। स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि। स्थापयामास भाजने। वेदमध्यापिपद्वटुम्। प्रेषयामास सुग्रीवो वानरान्वानरर्षभः। भयान्दुःखमसस्मरत्। अश्रुधारा असुस्रवत्। व्यद्रावयद्भूतगणान्। रूपं साधय बोधय। धर्मः स्वर्गमनीनयत्। पयोबालमपाययत् 'दुखेन गमयाञ्चक्रे वर्षाणि कतिचिन्नरः। तत्रोपाय-मचीकरत्। नहि शूरा विकत्थन्ते दर्शयन्त्येव पौरुषम्। शेषान्मासान्गमय चतुरो लोचने मीलयित्वा।

प्रश्नाः—स्वार्थे हेतुमति च णिचि कोऽर्थविशेषः। हेतुमण्णिचि स्मिङ् भी ली जी इङ् इक् क्रीञ् धातुषु के विशेषाः। प्रयोजकणिचि मित्वेन ह्रस्ववन्तो धातवः के। गम दृश वृध छिद ज्ञा श्रु पठ पच लिख धातूनां णिचि लटि लुङि च रूपाणि निरूपयत। णौ कस्मिंल्लकारे विशेषेण विधयः। अधस्तनवाक्यगताण्णिजन्तप्रयोगानुपपादयत—

प्रार्थ्यमानः सुरासुरैः। मथ्यमाने महासिन्धौ हरिः सर्वानमोहयत्। सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन्। जयोदाहरणं बाह्वोर्गापयामास किन्नरान्। प्रस्थापयामास वशी वसिष्ठः। शल्यं निरवातमुदहारयतामुरस्तः। परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्। राजानः परिपालयन्तु वसुधां शश्वत्स्वधर्मे स्थिताः। शिष्यः पाठं श्रावयति गुरुरध्यापत्यमुम्। सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते। फलैः संवर्धयाञ्चक्रुः। संमान्यन्ते गुराः सद्भिः। पाठयित्वा सुतानेतान्दर्शयस्व कृपां मयि। **इति णिजन्तप्रक्रिया।**

अथ सन्नन्तप्रक्रिया।

धातोः कर्मणः समानकर्तृकादिच्छायां वा (३-१-७) इषिकर्मणः इषिणैककर्तृकाद्धातोः सन्प्र-त्ययो वा स्यादिच्छायाम्। पठितुमिच्छतीत्यर्थे पठ धातोरिच्छार्थे सनि सकारशेषे धातोर्विहितत्वेन तस्यार्धधातुकत्वेन इडागमे सन्यङोरिति पठ इत्यस्य द्वित्वे हलादिशेषे सन्यत इत्यभ्यासस्यात इत्वे षत्वे पिपठिष इत्यस्य सनाद्यन्ता इति धातुसंज्ञायाम् पूर्ववत्सनः (१-३-६२) सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। इति पूर्वधातुवत्परस्मैपदे लडादयः पिपठिषति-षतः-षन्ति, पिपठिषतु अपिपठिषत् पिपठिषेत्, लिटि कास्प्रत्ययादिति सन्नन्तादामि कृञादेरनुप्रयोगे आम्प्रकृत्य-नुसारेण परस्मैपदे पिपठिषाञ्चकार-बभूव-आस, पिपठिषिता पिपठिषिष्यति पिपठिष्यात्, अपिपठिषीत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिपठिषाम्-षिषु:, अपिपठिषिष्यत्। सन्नन्तादपि भावकर्मवाच्यान्तरप्रत्ययाः कृत्प्रत्ययाश्च यथास्वं भवन्ति। पिपठिष्यते, अ-पिपठिषा, उ-पिपठिषुः, पिपठिषन्-न्ती, कर्मणि-पिपठिष्यमाणः पिपठिषितुम् इत्यादि बोध्योपयोगम्। एवं गम्- जिगमिषति। भू -बुभूषति। आत्मनेपदिभ्यः सनि पूर्ववत्सन इति तङ् एध-एदिधिषते। वृध-विवर्धिषते। बाध-बिबाधिषते। अत्तुमिच्छतीत्यर्थे अदेः सनि लुङ्सनोर्घस्लृ इति घस्लादेशे एकाचउपदेशेनुदात्तादिदीणिनषेधे घसो द्वित्वाभ्यासकार्येषु सस्यार्धधातुक इति सस्य तत्वे जिघत्सति। कृञः सनि उगन्तत्वेन इडभावे कृञो द्वित्वे उरदित्यभ्यासस्य अत्वे हलादि-शेषचर्त्वयोः सन्यत इतीत्वे ऋतइद्धातोरिति ऋकारस्य इर्भावे हलिचेति दीर्घे चिकीर्ष इत्यस्माद्धातो-र्लडादयः मूलधातुवदुभयपदम्। चिकीर्षति चिकीर्षते। चिकीर्ष्यते चिकीर्षन्-न्ती-षमाणः, कर्मणि-चिकीर्ष्यमाणः चिकीर्षितः चिकीर्षा चिकीर्षुः।

... इच्छासमानकर्तृकत्वे सति इच्छाकर्मी (विषयी) भूतव्यापारवाचकाद्धातोरिच्छार्थे सन्वेति सूत्रार्थः। पठितु-मित्यत्र अव्ययकृतोभाव इत्युक्तेर्भावस्तुमुन्नर्थः तेन पठितुमित्यस्य पठनक्रियैवार्थः, पठने इच्छा कर्मत्वं (विषयत्वं) समानकर्तृत्वं च सना गम्यते, ज्ञानेच्छाकृतीनां सविषयिकाणां कर्मत्वं विषयत्वम्। कर्मण इत्युक्त्या गमनेनेच्छतीति न सन्, समानकर्तृकादित्युक्त्या शिष्याः पठन्त्विति इच्छति गुरुरित्यत्र भिन्नकर्तृत्वे न सन्। सनि सेडनिड्-अनुसारेण इट् तदभावौ, विशेषो वक्ष्यते। सन्नन्तधातोर्मूलधातुवत्परस्मैपदमात्मनेपदमुभयं वा भवति। सन्नन्तधातो-सार्वधातुके शपि अतोगुण इति पररूपम्, लिट्यनेकाच्त्वादाम् सर्वत्र। सन्विधौ वाग्रहणाद्वाक्यमपि। सामर्थ्यं ...ते, तेन गच्छामि पठितुमितीच्छति स इत्यादौ सामर्थ्या (एकार्थीभाव) भावान्न सन्।

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च (१-२-८) एभ्यः सन् क्त्वा च कितौ स्तः। इति कित्वे न गुणः, रोदितुमिच्छति-रुरुदिषति। वेत्तुमिच्छति-विविदिषति। मुषितुमिच्छति-मुमुषिषति। ग्रहीतुमिच्छतीत्यर्थे ग्रहेः सनि ग्रहगुहोश्च (७-२-१२) ग्रहेर्गुहेरुगन्ताच्च सन इट् न स्यात्। इति इण्निषेधे रुदविदेति कित्वाद्ग्रहिज्येति सम्प्रसारणे ऋकारे द्वित्वार्त्वहलादिशेषजश्त्वेषु सन्यत इतीत्वे हस्य ढत्वकत्वयोः सस्य षत्वे तस्यासिद्धत्वाद्धकारस्य भष्भावे जिघृक्ष इत्यस्य धातुत्वाल्लडादौ जिघृक्षति। गुहेः सनि हलन्ताच्च (१-२-१०) इक्समीपाद्धलः परो झलादिः सन् कित्स्यात्। इति कित्वेनागुणे गुहेर्द्वित्वादौ जुघुक्षति। स्वपेः सनि इडभावे। कित्वेन वचिस्वपीति सम्प्रसारणे लघूपधगुणाभावे सुपो द्वित्वादौ सुषुप्सति। प्रच्छेः सनि किरश्च पञ्चभ्यः (७-२-७५) कॄ गॄ दृङ् धृङ् प्रच्छ एभ्यः सन इट् स्यात्। सनि इटि रुदविदेति कित्वाद्ग्रहिज्येति सम्प्रसारणे पृच्छेत्यस्य द्वित्वादौ पिपृच्छिषति। कॄ क्षेविपे,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यस्मात्सनि इटि कृ इत्यस्य द्वित्वादौ चिकरिषति। गॄ निगरणे-जिगरिषति, अचिविभाषेति लत्वे जिगलिषति। अत्रेटो दीर्घो नेष्ट इति वृतोवेति दीर्घो न। दृङ् आदरणे-आदिदरिषते। धृङ् अनवस्थाने दिधरिषते, उद्दिधीर्षुरिति तु भौवादिकयोर्धृङ्धृञोः, तेन नेट्। बुध-बुभुत्सति। युध-युयुत्सते। भिद विभित्सति हलन्ताच्चेति कित्वान्न गुणः। भू धातोः सनि **इको झल्** (१-२-९) इगन्ताज्झलादिः सन् कित्स्यात्। इति कित्वेनागुणे बुभूषति। दातुमिच्छतीति दीङः सनि कित्वादगुणे दिदीषते एज्विष यत्वाभावान्मीनातिमिनोतीत्यात्वं न, अत एव सनिमीमेत्यत्र माधातोः पृथक् मीग्रहणम्। इव इत्युक्त्या मृजेः सनि कित्वाभावान्न सम्प्रसारणं मिमृक्षते झलादिरित्युक्त्या वृधेः सनि कित्वाभावे गुणे विवर्धिषते। जेतुमित्यर्थे सनि द्वित्वे **अज्झनगमां सनि** (६-४-१६) अजन्तानां हन्तेरजादेशगमेश्च दीर्घः स्याज्झलादौ सनि। इति दीर्घे अभ्यासात्परस्य सन्लिटोर्जेरिति कुत्वे जिगीषते विजिगीषते चिञः सनि द्वित्वे अज्झनेति दीर्घे विभाषाचेरित्यभ्यासात्परस्य घा कुत्वे चिकीषति-ते चिचीषति-ते हन्तेः सनि द्वित्वादौ अज्झनेति दीर्घे अभ्यासाच्चेति कुत्वे नस्यानुस्वारे जिघांसति। इण् गतावित्य स्मात्सनि **सनि च** (२-४-४७) इणो गमिः स्यात्सनि न तु बोधने। इति गमादेशे गमेरिट्परस्मै पदेष्विति इटि द्वित्वादौ जिगमिषति, बोधने तु गमादेशाभावे इस इत्यत्र अजादेर्द्वितीयस्येति सकार द्वित्वे अभ्यासेत्वे प्रतियोगे सकारयोः षभावे प्रतीषिषति (ज्ञातुमिच्छति)। इक् स्मरणे इत्यस्मात्स इण्वदिकः (वा) अधिजिगमिषति। इ धात्वोः सनि कर्मणि तङि तु परस्मैपदाभावेन इडभावे अज्झनेति दीर्घे जिगांस्यते अधिजिगांस्यते। अजादेशस्येत्युक्त्या गच्छतेस्तु न दीर्घः गन्तुमिच्छति-जिगमिषति **इङश्च** (२-४-४८) इङो गमिः स्यात्सनि। अधिजिगांसते अज्झनेति दीर्घः तङि नेट्। **रलो व्युपधाद्ध लादेः संश्च** (१-२-२६) उश्च इश्च वी, ते उपधे यस्य तस्माद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। द्युतेः सनि इटि वा कित्वेन गुणविकल्पे द्वित्वादौ कित्वपक्षे द्युतिस्वाप्योरिति अभ्यास सम्प्रसारणे दिद्युतिषते दिद्योतिषते। रुचेः सनि रुरुचिषते रुरोचिषते। लिख-लिलिखिषति लिलेखिषति रल इत्युक्त्या नेह—दिव् दिदेविषति, व्युपधादित्युक्त्या नेह वृत्- विवर्तिषते, हलादेरित्युक्त्या नेह-इष एषिषिषति।

वि० एषिषिषतीत्यत्र नित्यमपि द्वित्वं गुणेन बाध्यते उपधाकार्यस्य द्वित्वात्प्रबलत्वात्, तत्र च ओणेः ऋदित्करण ज्ञापकम्, उपधाह्रस्वनिषेधार्थे हि तत्र ऋदित्करणम्, अन्यथा प्रागेव द्वित्वे ओकारस्य उपधात्वाभावेन गुणाप्रसक्तेस्तद्वार- णार्थमृदित्करणस्य वैयर्थ्यापत्तेः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् (७-२-४९) इवन्तेभ्य ऋधादिभ्यश्च सन इड् वा स्यात्। दिवु-इट्पक्षे गुणे दिदेविषति, इडभावे हलन्ताच्चेति सनः कित्वेन च्छ्वोः शूडिति वस्य ऊठि यणि द्यु इत्यस्य द्वित्वेऽभ्यासकार्ये अज्झनेति दीर्घे दुद्यूषति। एवं षिवु-सिसेविषति सुस्यूषति, स्तौतिण्योरेवेति नियमान्न षः। आप्ज्ञप्यृधामीत् (७-४-५५) एषामच ईत्स्यात्सादौ सनि। अत्र लोपोऽभ्यासस्य (७-४-५८) सनिमीमेत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छतीत्यर्थे आप्नोतेः सनि आकारस्येत्वे अजादेर्द्वितीयस्येति प्स इत्यस्य द्वित्वे अभ्यासलोपे ईप्सति। अर्धितुमिच्छतीत्यत्र ऋधेः सनि इडभावपक्षे ऋकारस्येत्वे नन्द्रा इति रेफवर्जं द्वितीयस्य त्सइत्यस्य द्वित्वेऽभ्यासलोपे ईर्त्सति, इट्पक्षे तु सनोऽसादित्वेनेत्वाभावे लघूपधगुणे अर्धिस् इत्यत्र धिस् इत्यस्य द्वित्वादौ अर्दिधिषति। भ्रस्ज पाके-सनि सनीवन्तेति इट्पक्षे भ्रस्जोरोपधयोरिति सकारात्प्रागमागमे सकारोत्तररेफसकारकोः स्थानिनोर्निवृत्तौ भर्ज इस इत्यत्र भर्ज इत्यस्य द्वित्वादौ बिभर्जिषति, रमोऽभावे सस्य श्चुत्वजश्त्वाभ्यां जत्वे क्ङिदभावेन ग्रहिज्येत्यप्रवृत्तौ बिभ्रज्जिषति, इडभावे रमागमे बिभर्जति जस्य कुत्वे सस्य षत्वे बिभर्क्षति, रमोऽप्यभावे स्कोरिति सलोपे व्रश्चेति षत्वे कत्वे सनः षत्वे बिभ्रक्षति। दम्भेः सनि इटि दिदम्भिषति, इडभावे दम्भ इच्च (७-४-५६) दम्भेरच इत्स्यात् ईच्च सादौ सनि। इति इत्वे पक्षे ईत्वे दिम्भेत्यस्य द्वित्वेऽभ्यासलोपे हलन्ताच्चेत्यत्र हल्ग्रहणस्य जातिपरत्वेन सनः कित्वान्नलोपे दस्य भष्भावे भस्य जश्त्वचर्त्वयोः धिप्सति धीप्सति। श्रिञः सनि सनीवन्तेति इट्पक्षे श्रियो द्वित्वादौ शिश्रयिषति, इडभावे इकोझलिति कित्वादगुणे अज्झनेति दीर्घे शिश्रीषति। स्वृ धातोः सनि इट्पक्षे स्वृ इत्यस्य द्वित्वादौ सिस्वरिषति इडभावे उदोष्ठ्यपूर्वस्येति उत्वे उपधायाश्चेति दीर्घे सुस्वूर्षति। एवं यु-युयविषति युयूषति। भृञ्-बिभरिषति बुभूर्षति। ज्ञपि ज्ञान्तो मित्संज्ञकः पकारान्तश्चौरादिकश्च णिजन्तः द्वयोः सनि सनीवन्तेत्यत्र ग्रहादिट्पक्षे ज्ञप इत्यस्य द्वित्वादौ जिज्ञपयिषति, इडभावे णेः परस्य सन इकोझलिति कित्वाद्गुणाभावे अज्झनेति दीर्घात्परत्वेन णिलोपे आप्ज्ञपिति ईत्वे ज्ञीप् इत्यस्य द्वित्वादावभ्यासलोपे ज्ञीप्सति। मारणाद्यन्यार्थकस्य घटादिकस्य हेतुमण्णिजन्तस्य, ज्ञा नियोग इति चौरादिकणिजन्तस्य चामितः उपधाह्रस्वाभावे सनि सनीवन्तेत्यत्र ज्ञपीत्यग्रहणान्नित्यमिटि ज्ञाप् इत्यस्य द्वित्वादौ जिज्ञापयिषति। तनोतेः सनि तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्यः (वा) इति पक्षे इटि, तदभावे तु तनोतेर्विभाषा (६-४-१७) अस्योपधाया दीर्घो वा स्याज्झलादौ सनि। इति वा दीर्घे द्वित्वादौ नस्यानुस्वारे तितनिषति, तितांसति,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तितंसति। **आशङ्कायां सन् वक्तव्यः (वा)** इति म्रियतेः शङ्कायां सनि इकोझलिति कित्वे अज्झनेति दीर्घे उदोष्ठ्येत्युर्भावे द्वित्वादौ उपधायाश्चेति दीर्घे मुमूर्षति (शङ्कितमरणो भवति)। अत्र पूर्ववत्सन इत्यात्मनेपदं तु न, शदेः शित इत्यादिसूत्रद्वये सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्येयमिति वक्ष्यमाणत्वात्। पतेराशङ्कायां सनि तनिपतीति इट्पक्षे द्वित्वादौ पिपतिषति, इडभावे **सनिमीमाघुरभलभशकपतपदामच इस् (७-४-५४)** एषामच इत्स्यात्सादौ सनि। इत्यकारस्य इसादेशे पित्स स इत्यत्र पिस्तेत्यस्य द्वित्वे अत्रलोप इत्यभ्यासलोपे स्कोरिति सलोपे पित्सति, **दरिद्रातेः** सनि तनिपतीतीट्पक्षे दर इति प्रथमैकाचो द्वित्वे हलादिशेषेभ्यासेत्वे आतोलोपइटिचेत्यालोपे षत्वे दिदरिद्रिषति, इडभावे आतो लोपस्य षत्वस्य चाभावे दिदरिद्रासति। **डुमिञ्** धातोः सनि अज्झनेति दीर्घे, मीञ् हिंसायामिति दीर्घान्ताच्च सनि मीरूपतया सनिमीमेति इसि मिस्स इत्यत्र द्वित्वेभ्यासलोपे सस्यार्धधातुक इति सस्य तत्वे मित्सति-ते, **मा माने** इत्यस्य मित्सति। **माङ्मेङोस्तु** मित्सते, मेङो ण्यात्वे मारूपतया इस्। **एवं दोदाणोः** दित्सति। **देङो** दित्सते। **दाञो** दित्सति-ते। **दोदेङोरप्यात्वेन** दारूपतया घुत्वादिस्। **धेटो** धित्सति आत्वेन धारूपत्वेन घुत्वादिस्। **धाञो** धित्सति-ते। **रभिलभि**भ्यां सनि इसादेशे द्वित्वाभ्यासलोपजश्त्वचर्त्वेषु रिप्सते प्रारिप्सते, लिप्सते। **शक्नोतेः** सनि इसि द्वित्वाभ्यासलोपषत्वेषु शिक्षति। **शक मर्षणे** इति स्वरितेतस्तु शिक्षति-ते। **पद्यतेः** सनि इसि द्वित्वाभ्यासलोपजश्त्वचर्त्वैः पित्सते। **कर्मकर्तर्यकर्मकान्मुचेः** सनि हलन्ताच्चेति कित्वेन गुणनिषेधे प्राप्ते। **मुचोऽकर्मकस्य गुणो वा (७-४-५७)** अकर्मकस्य मुचेर्गुणो वा स्यात्सादौ सनि। इति गुणे मोच् इत्यस्य द्वित्वाभ्यासलोपादौ मोक्षते, गुणाभावे अभ्यासलोपाप्रवृत्तेः मुमुक्षते वत्सः स्वयमेव सकर्मकत्वे तु गुणाभ्यासलोपयोरभावेन मुमुक्षति वत्सं कृष्णः।

वि० सनिमीमेत्यारभ्य अत्रलोपपर्यन्तं सनिमीमा-आप्ज्ञप्-दम्भ-मुचोकर्मकस्येति सूत्रचतुष्कप्रवृत्तिविषये अत्रलोप इत्यभ्यासलोपो विधीयते, तत्र सनिमीमेति सूत्रेऽभ्यासलोपश्चेत्युक्तौ लाघवेप्यत्रलोप इति पृथक्सूत्रमत्रैवाभ्यासलोप इत्यवधारणार्थम्, तेन सन्वद्भावविषये नाभ्यासलोपः अमीमपत् अदीदपत् सर्वस्यैवाभ्यासस्य लोपः।

वृतेः सनि वृद्भ्यःस्यसनोरिति परस्मैपदविकल्पेन न वृद्भ्यश्चतुर्भ्य इति परस्मैपदे इडभावे द्वित्वादौ इत्वे कित्वेन गुणाभावे विवृत्सति, तङि तु इटि द्वित्वादौ लघूपधगुणे विवर्तिषते। **नृतेः** सनि सेसिचीति वा इटि द्वित्वादौ लघूपधगुणे षत्वे निनर्तिषते, इडभावे हलन्ताच्चेति कित्वेनागुणे निनृत्सति। **तॄ** धातोः सनि **इट् सनि वा (७-२-४१)** वृङ्वृञ्भ्यामृदन्ताच्च सन इड् वा स्यात्। इति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इट्पक्षे द्वित्वादावुपधागुणे वृतोवेति इटो दीर्घविकल्पेन तितरीषति-रिषति, इडभावे इकोझलिति कित्वादगुणे ऋत इद्धातोरिति इर्भावे हलिचेति दीर्घे तितीर्षति। वृञः सनि इट्पक्षे दीर्घविकल्पे विवरी-रिषति, इडभावे उदोष्ठ्यपूर्वस्येति उर्भावे हलिचेति दीर्घे द्वित्वादौ वुवूर्षति। वृङस्तु तङि विवरी-रिषते वुवूर्षते। कृञः सनि अज्झनेति दीर्घे वृतोवेत्यत्रौपदेशिकऋदन्तस्यैव ग्रहादिडभावे ऋत इद्धातोरिति इर्भावे द्वित्वादौ हलिचेति दीर्घे चिकीर्षति-ते, एवं हृ-जिहीर्षति-ते। **स्मयतेः** सनि **स्मिपूङ्रञ्ज्वशां सनि** (७-२-७४) स्मिङ् पूङ् ऋ अञ्जू अशू एभ्यः सन इट् स्यात्। इति इटि द्वित्वादौ गुणायादेशयोः सनः षत्वे स्तौतिण्योरेवेति नियमाद्धातोः षत्वाभावे सिस्मयिषते। **पूङः** सनि द्वित्वादौ ओः पुयणित्यभ्यासेत्वे गुणावादेशयोः पिपविषते, पूञस्त्वत्राग्रहणेन सनिग्रहगुहोश्चेति इण्निषेधे इको झलिति कित्वेनागुणे पुपूषते। ऋ धातोः सनि इटि गुणे अजादित्वाद्रिस् इत्यस्य द्वित्वादौ अरि-रिषति। अञ्जू-अञ्जिजिषति, अशू व्याप्तौ-सनि ऊदित्वाद्विकल्पस्यापवादेन स्मिपूङिति नित्यमिटि शिष् इत्यस्य द्वित्वादौ अशिशिषते। अश भोजने इत्यस्य तु परस्मैपदे अशिशिषति। **शृणोतेः** सनि अज्झनेति दीर्घे इडभावे इकोझलिति कित्वादगुणाभावे द्वित्वादौ षत्वे ज्ञाश्रुस्मृदृशामिति तङि शुश्रू-षते। **जानातेः** सनि द्वित्वादौ इत्वे तङि जिज्ञासते। **स्मरतेः** सनि उदोष्ठ्येत्युर्भावे उपधादीर्घे द्वित्वादौ तङि सुस्मूर्षते। **दृशेः** सनि कित्वादगुणे द्वित्वादौ व्रश्चेति षत्वे षस्य कत्वे सनः षत्वे तङि दिदृक्षते। **तिष्ठतेः** सनि द्वित्वादावभ्यासेत्वे षत्वष्टुत्वयोः तिष्ठासति प्रतिष्ठासते। **सिचः** सनि द्वित्वादौ स्तौतिण्योरेवेति षत्वाभावे कुत्वे सनः षत्वे सिसिक्षति।

वि० सनि ज्ञाश्रुस्मृदृशांसन इत्येषामेव मूलधातुवैसादृश्येन तङ्विधिः, तत्रापि नानोर्ज्ञः प्रत्याङ्भ्यां श्रुव इति सूत्रेणाधातोः प्रत्याङ्पूर्वश्रु धातोः तङ्निषेधेन प्रतिप्रसवः तेन जिज्ञासते अनुजिज्ञासति, शुश्रूषते प्रतिशुश्रूषति आशुश्रू-षति सुस्मूर्षते दिदृक्षते इति विशेषः, अन्यत्र सोपसर्गस्यानुपसर्गस्य वा मूलधातोर्यत्पदं तदेव सन्नन्तस्य पूर्ववत्सन इति सांगिकं पदमनुसन्धेयम्।

ण्यन्तादिङः सनि विवक्षिते णौचसंश्चङोरिति पक्षे गाङादेशे पुकि गापि इत्यस्मात्सनि अधि-जिगापयिषति, गाङोऽभावे क्रीङ्जीनांणावित्यात्वे पुकि आपि इत्यस्मात्सनि अध्यापिपयिषति। श्विधातोर्ण्यन्तात्सनि इटि सम्प्रसारणतदाश्रयकार्ययोर्बलवत्त्वेन णौचसंश्चङोरिति षाष्ठेन सम्प्रसारणे पूर्वरूपे शु इत्यस्य द्वित्वे उत्तरोकारस्य वृद्ध्यायादेशयोः णिचो गुणावादेशयोः शुशावयिषति, सम्प्र-सारणाभावे श्वेर्णौ वृद्ध्यायादेशयोः श्वायि इत्यस्मात्सनि द्वित्वादौ शिश्वाययिषति। **ह्वेञो** ण्यन्तात्सनि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इटि ह्वःसम्प्रसारणमिति सम्प्रसारणे पूर्वरूपे हु इत्यस्य द्वित्वे जश्त्वे उकारस्य वृद्ध्यावादेशयोर्णिचो गुणायादेशयोः जुहावयिषति। स्फुरतेर्ण्यन्तात्सनि इटि णौद्धित्वात्प्रागचआदेशोनेति चिस्फुरोर्णावित्यतः प्रागेव स्फुर इत्यस्य द्वित्वे हलादिशेषे चिस्फुरोर्णावित्युत्तरस्यात्वे णेर्गुणायादेशयोः पुस्फारयिषति। पू भू यु रु लू एभ्यो णयन्तेभ्यः सनि इटि द्वित्वे कार्ये णावच आदेशनिषेधादुघर्णान्तानामेव द्वित्वे ओःपुयण्जीति अभ्यासोवर्णस्येत्वे उत्तरोकारस्य वृद्धावावादेशे णिचो गुणेयादेशे पिपावयिषति, बिभावयिषति, यियावयिषति, रिरावयिषति, लिलावयिषति। पुयण्जीत्युक्तेर्नेहेत्वम्। णु धातोर्ण्यन्तात्सनि नुनावयिषति, अपरे इत्युक्तेर्नेहेत्वम्-बुभूषति। स्रु श्रु द्रु प्रु प्लु च्यु एभ्यो णयन्तेभ्यः सनि इटि द्वित्वे स्रवतिशृणोतीत्यभ्यासेत्वविकल्पे सिस्रावयिषति सुस्रावयिषति, शि-शुश्रावयिषति, दि-दुद्रावयिषति, प्रि-प्रुप्रावयिषति, प्लि-प्लुप्लावयिषति, चि-च्युच्यावयिषति। स्वपेद्युतेर्ण्यन्तात्सनि इटि द्वित्वे द्युतिस्वाप्योरित्यभ्याससम्प्रसारणे पूर्वरूपहलादिशेषगुणादौ सुस्वापयिषति दिद्योतयिषति। साधेर्ण्यन्तात्सनि इटि द्वित्वादौ अभ्यासेत्वगुणायादेशेषु सनः स्तौतिण्योरित्यभ्यासेणः परस्यापि षत्वे सिषाधयिषति, अ-सिषाधयिषा, उ-सिषाधयिषुः। एवमन्यत्रापि सन्नन्तात् अ-उ प्रत्यययोः प्रत्ययान्तरेष्वपि रूपाणि निष्पादनीयानि।

वि० शैषिकान्मतुबर्थीयाच्छैषिकौ मतुबर्थिकः। सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते॥ इत्युक्तेः शैषिकात्सरूपः शैषिको न, तेन शालीये भव इत्यर्थे वाक्यमेव न पुनश्छः, विरूपस्तु भवति, आहिच्छत्रे भव आहिच्छत्रीयः अणन्ताच्छः। एवं मत्वर्थीयात्सरूपो मत्वर्थीयो न, तेन धनवानस्यास्तीत्यर्थे पुनर्न मतुप्, विरूपस्तु भवति दण्डिमान्देशः। सन्नन्तादित्यत्रापि सरूप इत्यनुषज्यते अर्थद्वारा सादृश्यम्, तेन इच्छासन्नन्तात्पुनर्नेच्छायां सन्, स्वार्थसन्नन्तात्तु इच्छासन्भवत्येव जुगुप्सिषते, मीमांसिषते, चिकित्सिषति।

प्रयोगाः—न त्वां दिदृक्षते देवः। दोर्भ्यामब्धिं तितीर्षति। दित्सते द्रविणं नृपः। लिप्से धर्मं श्रीमतः। गुरुं शुश्रूषते शिष्यः। धर्मं जिज्ञासते साधुः। शुश्रूषो श्रद्दधानस्य। गुरोः काव्यं पिपठिषुः। मीमांसमानस्य वचांसि भूयशः। बालः सायं सुषुप्सति। किं चिकीर्षन्ति सुधियः। प्रारिप्सते कार्यमसौ मनीषी। वीरः शत्रूञ्जिगीषति। विजिगीषुरसौ राजा। जिघांसन्तं जिघांसीयात्। इमे ज्ञानं पिपासवः।

प्रश्नाः—सम्प्रत्ययः कस्मिन्नर्थे भवति। सनि कित्वेन गुणाभावः केषु धातुषु। सनि केषामिण्निषेधः केषामनिड्धातूनां सनि इड्विधीयते। सनि कित्वविकल्पः क्व। सनि वेट्कत्वं केषाम्। सनि अभ्यासलोपः कीदृशस्थलेषु। सनि षत्वव्यवस्था कीदृशी। अधस्तनवाक्यगतान्सन्नन्तप्रयोगानुपपादयत—तथापि शुश्रूषुरहं। यियक्षमाणेनाहूतः। आर्तो जिज्ञासुरर्थार्थी।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...गीडितोऽस्म्यहम् । दिदेविषति पाशकैः । मुमूर्षुं श्रावयेद्गीताम् । वीरः शत्रूञ्जिघांसति । लिलेखयिषति द्रुतम् । भवन्त-...पुनर्दिदृक्षे । विभावयिषतां सताम् । मीमांसा स्फुटयत्यर्थम् । ब्राह्मणा विविदिषन्ति । अहं शीघ्रं प्रतिष्ठासे । किं न ...वि पुस्तकम् । विवर्धयिषवो धनम् । सिस्नासति महातीर्थे । इति सन्नन्तप्रक्रिया ।

अथ यङन्तप्रक्रिया

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (३-१-२२) पौनः पुन्यं भृशार्थ (अतिशयार्थः) ...श्च क्रियासमभिहारः, तस्मिन्द्योत्ये एकाचो हलादेर्धातोर्यङ् स्यात् । पुनः पुनरतिशयेन वा भवतीत्यर्थे पुनःपुनर्भवने अतिशयेन भवने वा द्योत्ये भूधातोर्यङ्प्रत्यये वलादित्वाभावेनेडभावे भूय इत्यस्य सन्यङोरिति द्वित्वे हलादिशेषजश्त्वादौ **गुणो यङ्लुकोः (७-४-८२)** अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च । इत्यभ्यासस्य गुणे यङोङित्त्वेनोत्तरोकारस्य गुणाभावे बोभूय इत्यस्य सनाद्यन्ता इति धातुत्वे ङिदन्तत्वात्तङि एधतिवद्रूपाणि । सार्वधातुकेषु शपि अतोगुण इति पररूपम् बोभूयते-...येते-यन्ते, बोभूयताम् अबोभूयत बोभूयेत, लिटि कास्प्रत्ययादित्यामि कृञोनुप्रयोगः बोभूयाञ्चक्रे बोभूयिता बोभूयिष्यते बोभूयिषीष्ट अबोभूयिष्ट-यिषाताम्-षत, अबोभूयिष्यत । भावे-बोभूय्यते, शान-बोभूयमानः । एवं दीप-देदीप्यते देदीप्यमानः, बुध-बोबुध्यते बोबुध्यमानः, रुद्-रोरुद्यते रोरुद्यमानः, गै-जेगीयते जेगीयमानः । स्तु- तोष्टूयते तोष्टूयमानः, कर्मणि-तोष्टूय्यमानः । दा-देदीयते देदीयमानः घुमास्थेतीत्वे द्वित्वम् । पा- पेपीयते पेपीयमानः, भिद्-बेभिद्यते बेभिदिता, वक्ष्यमाणयलोपेसत्यल्लो-पस्य स्थानिवद्भावान्नोपधागुणः बेभिद्यमानः ।

वि० एकाचो हलादेरेव धातोर्यङ्विधानात् पुनःपुनर्जागर्तीत्यादावनेकाचः, भृशमीक्षते इत्यादावजादेश्च न यङ् । ...समभिहार इत्यत एव धातुलाभेपि धातोरित्युच्चार्य विहितस्यैव प्रत्ययस्यार्धधातुकत्वेन यङ आर्धधातुकत्वसिद्धये ...रित्युपात्तम्, तेन ब्रुवोवचिः, वेञोवयिः, चक्षिङःख्याञ् इत्यादय आदेशाः ततश्च वावच्यते चाख्यायते इत्यादयः ...न्ति । क्रियासमभिहारस्य वाच्यत्वाभ्युपगमे प्रत्ययवाच्यस्य पौनःपुन्यादेः प्रधानतया सन्नन्ते इच्छाया इव विशेष्य-...त्वेः द्योत्यत्वमुक्तम्, तेन यङन्तस्य पौनःपुनिकमतिशयितं वा भवनादेवार्थः । द्योतनं तूक्तस्यापि भवतीति भृशं पुनः ...इत्यादि शब्दप्रयोगेपि यङ् भवति । भृशं शोभते, भृशं रोचते इत्यत्र यङ् न, अनभिधानादिति भाष्यम्, तेनात्रभृश-...समभिहारे यङ् न तत्रापि पौनःपुन्ये तु पुनःपुनः शब्दसमभिहारेपि रोरुच्यते शोशुभ्यते इति यङ् भवत्येव, ...यं एवानभिधानोक्तेः । यङन्तानां सर्वेषां ङित्वेनात्मनेपदमेव । यङो ङकारस्य गुणप्रतिषेधार्थत्वेनावयवे चरितार्थ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वान्न समुदायार्थत्वमिति यङन्तस्य धातोरङित्वात्कथमात्मनेपदमिति न शङ्क्यम् , तत्र धातुग्रहणाभावेन ङिन्मात्रात्परस्य तद्विधेरिति माधवीये। क्रियासमभिहारे द्वे वाच्ये इति यङन्तशब्दानां पुनर्द्वित्वं तु न, तस्य क्रियासमभिहार इति विहित लोडन्तमात्र विषयत्वात्। पौनःपुन्ये यङि नित्यवीप्सयोरित्यपि न द्विर्वचनम् , क्रियासमभिहारे द्वे इत्यनेन पौनःपुन्ये लोडन्तद्वित्वविधानेन पौनःपुन्यस्यान्यतो लाभे सौत्रद्वित्वाप्रवृत्तेर्ज्ञापनात्।

सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः (वा) आद्यानां त्रयाणां चुरादावदन्तत्वेनोक्तानामनेकाच्त्वात् उत्तरेषामजादित्वादप्राप्तौ वचनम्। सूच-सोसूच्यते, सूत्र-सोसूत्र्यते, मूत्र-मोमूत्र्यते। लिडादावार्धधातुके **यस्य हलः** (६-४-४६) यस्येति सङ्घातग्रहणम् , हलः परस्य यशब्दस्य लोपः स्यात्। इत्यादेः परस्येति यकारस्य अतोलोपइत्यकारस्यापि लोपः सोसूचाञ्चक्रे सोसूचिता, सोसूत्राञ्चक्रे सोसूत्रिता, सोसूत्र्यमाणः सोसूच्यमानः। अटतेर्यङि अजादित्वाद्वितीयैकाचो द्व्य इत्यस्य द्वित्वे हलादिशेषेणाभ्यासपकारनिवृत्तौ **दीर्घोऽकितः** (७-४-८३) अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च। इत्यभ्यासदीर्घे अटाट्यते, अ-अटाट्या। पठ-पापठ्यते, लिख-लेलिख्यते, **नित्यं कौटिल्ये गतौ** (३-१-२३) नित्यशब्द एवार्थे गत्यर्थात्कौटिल्य एव यङ् स्यान्नतु क्रियासमभिहारे। कुटिलं व्रजति वाव्रज्यते दीर्घोऽकित इत्यभ्यासदीर्घः। **लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्** (३-१-२४) एभ्यो धात्वर्थगर्हायामेव यङ् स्यात्। गर्हितं लुम्पति-लोलुप्यते लोलुप्यमानः, सद्-सासद्यते। गर्हितं चरतीत्यर्थे चरतेर्यङि द्वित्वादौ **चरफलोश्च** (७-४-८७) अनयोरभ्यासस्यातो नुग्स्याद्यङ्यङ्लुकोः। नुगित्यनुस्वारोपलक्षणम्। **सच पदान्तवद्वाच्यः** (वा) तेन वा पदान्तस्येति पक्षे परसवर्णः। **उत्परस्यातः** (७-४-८८) चरफलोरभ्यासस्याऽत उत्स्यात् यङ्यङ्लुकोः। इत्यभ्यासोत्वे हलिचेतिदीर्घे चञ्चूर्यते चंचूर्यते। एवं गर्हितं फलति पं-पम्फुल्यते, चञ्चूर्यमाणः पम्फुल्यमानः। **जपजभदहदशभञ्जपशां च** (७-४-८६) एषामभ्यासस्य नुक्स्यात् यङ् यङ्लुकोः। गर्हितं जपतीत्याद्यर्थे यङि द्वित्वादौ नुकि जञ्जप्यते, दह-दन्दह्यते, दश-दंदश्यते, भञ्ज-बम्भज्यते, शान-जञ्जप्यमानः दन्दह्यमानः दन्दश्यमानः बम्भज्यमानः। **रीगृदुपधस्य च** (७-४-६०) ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्यङ्लुकोः। पुनःपुनरतिशयेन वा वर्तत इत्यर्थे वृतेर्यङि द्वित्वादौ अभ्यासस्य रीगागमे वरीवृत्यते, नृत-नरीनृत्यते, ग्रह-जरीगृह्यते यङिग्रहिज्येति सम्प्रसारणे द्वित्वादौ रीक्। **रीगृत्वत इति वक्तव्यम्** (वा) पृच्छतेर्यङि ग्रहिज्येति सम्प्रसारणे दित्वादौ रीक् परीपृच्छ्यते, व्रश्च-वरीवृश्च्यते। **स्वपिस्यमिव्येञां यङि** (६-१-१६) एषां सम्प्रसारणं स्याद्यङि। स्वपेर्यङि सम्प्रसारणे दित्वादावभ्यासगुणे सोसुप्यते-प्यमानः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रो यङि (८-२-२७) गिरते रेफस्य लत्वं स्याद्यङि। गर्हितं **गिरति** जेगिल्यते लुपसदेति गर्हायां यङि लत्वम्। …तिशयेन वा **स्मरति** सास्मर्यते दीर्घोऽकित इत्यभ्यासदीर्घः। पुनःपुनरतिशयेन वा **करोती**त्यर्थे यङि रीगृत्वत …ग्रागमस्य रीङादेशे द्वित्वादावभ्यासगुणे चेक्रीयते, सम्युपपदे सम्परिभ्यामिति सुटि सञ्चेस्क्रीयते। **नकवतेर्यङि** (…) कवतेरभ्यासस्य चुत्वं न स्यात्। इति चुत्वनिषेधे कोकूयते। **नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्** (…) एषामभ्यासस्य नीगागमः स्याद्यङ्यङ्लुकोः। पुनःपुनरतिशयेन वा **वञ्चते** इत्यर्थे यङि द्वित्वादौ नीगागमे …इत्युक्त्या दीर्घाभावे अनिदितामिति नलोपे वनीवच्यते, **स्रंसु**-सनीस्रस्यते, **ध्वंसु**-दनीध्वस्यते, **पत्**-पनीपत्यते, …यते। **नुगतोऽनुनासिकान्तस्य** (७-४-८५) अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक्स्यात्। …तो लक्ष्यत इत्युक्तम्। अतिशयेन **गच्छति** जङ्गम्यते-म्यमानः, अच्-जङ्गमः, पुनःपुनरतिशयेन वा **जायते** इत्यर्थे …ये विभाषेत्यात्वविकल्पे आत्वाभावे नुकि जाजायते जंजन्यते। **हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः** (वा) हन्तेर्यङि …द्वित्वादौ जेघ्नीयते। **ई घ्राध्मोः** (७-४-३१) अनयोरिकारः स्याद्यङि। **घ्रा**-जेघ्रीयते, **ध्मा**-देध्मीयते। **अयङ् …ङिति** (७-४-२२) शीङोऽयङादेशः स्याद्यादौ क्ङिति परे। **शीङो** यङि ईकारस्याऽयादेशे द्वित्वाभ्यासदीर्घयोः …। यङन्तादूकः यलोपाल्लोपौ **वद्**-वावदूकः (अतिवक्ता), **यज**-यायजूकः (अतियज्वा), **जप**-जञ्जपूकः (गर्हितजापी), …दन्दशूकः (गर्हितदंशी)।

प्रयोगाः–**बोभूयतां मङ्गलम्। चञ्चूर्यमाणो भवकाननेस्मिन्। पापठ्यते व्याकरणम्। तोष्टूय्य-…नोप्यगुणो विभुर्विजयतेतराम्। यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम्। दन्दश्यन्ते दंशाः। …नीयते हरेर्नाम। देदीप्यमानः श्रिया। राजा शोशुभ्यते कीर्त्या धर्मः संसूच्यते स्मृतौ। दन्दह्यतेऽमी …सांसारिका भावाः।**

…नाः–यङ् प्रत्ययः कीदृशधातुभ्यः कस्मिन्नर्थे भवति। यङन्ता धातवः किम्पदिनः। गर्हार्थे यङ् केषु धातुषु। यङि …स्य दीर्घादयः के विशेषाः। यङि अभ्यासस्यागमविशेषाः के क्व भवन्ति। अधोनिर्दिष्टवाक्यगतान्यङन्तशब्दा-…न–

…ज्वल्यमाना जगतः शान्तये समुपेयुषी। तातप्यमानमकरोरगनक्रचक्रः। नरीनृत्यमाना वनान्ते मयूराः। देदीप्यन्ते …नास्तारकाः स्फाररूपाः। धनं लोलुप्यते चौरैः। शुभं वो बोभूयिषीष्ट। मान्यः स मे स्थावरजङ्गमानाम्। चेकीर्त्यमानाः …लिवः। वाव्रज्यन्ते दन्दशूकाः।

इति यङन्तप्रक्रिया।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ यङ्लुक्प्रक्रिया ।

यङोऽचि च (२-४-७४) यङोऽच्प्रत्यये लुक्स्यात् , चकारात्प्रत्ययाभावेपि बहुलं लुक्स्यात् अनैमित्तिकोयमन्तरङ्गत्वादादौ भवति । भूधातोः पौनःपुन्ये भृशार्थे वा धातोरेकाच इति यङि यङो चिचेति तल्लुकि यङन्तकार्यस्य द्वित्वस्य यङ्निमित्तकत्वाभावेन नलुमतेति निषेधाप्रवृत्त्या प्रत्यय लक्षणेन यङन्तत्वाद्भूधातोर्द्वित्वेऽभ्यासकार्ये गुणोयङ्लुकोरित्यभ्यासगुणे बोभू इत्यस्य सनाद्यन्त इति धातुसंज्ञायां लडादौ, यत्र प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव प्रत्ययलक्षणमिति ङित्वस् प्रत्ययाप्रत्ययसाधारण्येन प्रत्ययलक्षणाप्रवृत्त्या अनुदात्तङित इत्यस्याप्रवृत्तेः शेषादिति परस्मैप तिबादयः । श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च, यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि इति स्पर्द्धशीङादिष्वप्यनुदात्तङितः स्वरितञित इत्यनुबन्धनिर्दशिशास्त्राणामप्रवृत्त्या सर्वेषु धातु विशेषविधिं विना यङ्लुकि परस्मैपदमेव, गणैर्निर्दिश्यमानाः श्यन्नादयो विकरणा अपि न, सर्व साधारणः शबेव सार्वधातुकेषु, किन्तु चर्करीतं चेति यङ्लुगन्तशब्दानुकारेणाऽदादौ पाठात्सर्वत्र श लुक् । यङो वा (७-३-९४) यङन्तात्परस्य हलादेः पितः सार्वधातुकस्येड् वा स्यात् । इति पित पक्षे इटि, बोभूतु तेतिक्ते इति छन्दसि निपातनाल्लोके भूसुवोस्तिङीतिनिषेधाप्रवृत्त्या गुणेऽवादेश इडभावेपि गुणः बोभवीति बोभोतु । तसादौ ङिति इटो गुणस्य चाभावे बोभूतः । झौ अदभ्यस्तादि अति ङित्वाद्गुणाभावे उवङि बोभुवति । बोभवीषि बोभोषि बोभूथः-थ, बोभवीमि बोभोमि बोभूव मः । बोभवीतु बोभोतु बोभूतात्-ताम् बोभुवतु, बोभूहि हेरपित्वान्नेट् बोभूतात्-तम्-त, आ पित्वेनाङित्वान्न गुणावादेशौ बोभवानि-वाव-म । अबोभवीत् अबोभोत् अबोभूताम् अबोभवुः सिजभ्य स्तेति जुसि गुणावादेशौ, अबोभवीः अबोभोः अबोभूतम्-त, अबोभवम् अबोभूव-म । बोभूयात्-याताम् युः, बोभूयाः-यातम्-त, बोभूयाम्-याव-म यासुटो ङित्वान्नेड्गुणौ । लिटि कास्यनेकाच इत्यामि कृञ द्यनुप्रयोगः बोभवाञ्चकार-बभूव-आस, बोभविता-रौ-रः, बोभविष्यति-ष्यतः-ष्यन्ति, बोभूयात्-यास्ताम् यासुः । लुङि सिचि गातिस्थेति सिचो लुकि इकारलोपे पित्सु यङोवेति इट्पक्षे गुणापवादेन नित्य त्वाद्भुवोवुगिति वुकि, इडभावे गुणे अबोभुवीत् अबोभोत् अबोभूताम् अबोभुवुः अभ्यस्तत्वेन जुसि नित्यत्वाद्वुक् , अबोभुवीः अबोभूतम्-त अबोभूवम्-व-म । अबोभविष्यत्-ष्यताम्-ष्यन् । एवं रु शब्दे रोरवीति, रोरोति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

९० यङोचिचेत्यत्र छन्दसीत्यनुवर्त्य छन्दस्येव यङ्लुगन्तं केचिदिच्छन्ति तन्न, भूसुवोस्तिङीति गुणनिषेधे सिद्धेऽपि बोभूतु इति गुणाभावनिपातनस्य व्यर्थतापत्त्या छन्दस्येवायं गुणनिषेधो नान्यत्रेति ज्ञापनेन भाषायामपि तत्प्रयोगस्य न्यात्। बोभू इत्यस्य धात्वन्तरत्वेन भूसुवोरित्यप्राप्त्या गुणाभावश्छन्दसि निपातितस्तत्कथमर्थान्तरज्ञापनमिति तु न द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तेन भूग्रहे बोभू इत्यस्यापि तत्प्राप्तेः, इदमेव प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणे ज्ञापकम्। हलादेरेकाच एव यङो विधानात्तथाविधस्यैव यङ्लुक्यपि प्रयोगः। बहुलग्रहणानुवृत्त्या वैकल्पिकोयं यङि तल्लुकि चोभयथा प्रयोगः। श्तिपाशपानुबन्धेनेति अनुबन्धादिनिर्देशवतामनुदात्तङितइत्यादीनां गणनिर्देश- दिवादिभ्यः श्यन्नित्यादीनां चात्राप्रवृत्त्या यङ्लुकि सर्वत्र परस्मैपदम्, आङोयमहनइत्यादिविशेषविधिस्थलेष्वेवात्मने- चर्करीतगणधातुषु शप् तस्यापि चर्करीतमिति यङ्लुगन्तानुकरणस्यादादिगणपाठेन अदादित्वाल्लुक्, एकाचोद्वेप्रथमस्येति द्वित्वस्य यत्रैकाज्ग्रहणं चैवेति निषेधेन यङ्लुकि कथंप्रवृत्तिरिति तु न वाच्यम्, गुणोयङ्लुकोरित्यभ्यासकार्य- द्वित्वनिषेधाभावस्य ज्ञापनात्। श्तिपा निर्दिष्टाः भवतेरः इत्यादयः, शपा निर्दिष्टाः सनीवन्त -भरेत्यादयः, निर्दिष्टाः क्ङिति चेत्यादयः, गणेन निर्दिष्टाः दिवादिभ्यः श्यन्नित्यादयः, एकाज्ग्रहणेन निर्दिष्टाः एकाचउपदेशेनु- दात्तादयश्च विधयो यङ्लुकि न प्रवर्तन्ते।

दध धातोर्यङ्लुकि दध इत्यस्य द्वित्वे हलादिशेषे दीर्घोकित इत्यभ्यासदीर्घे इट्पक्षे दादधीति, इडभावे झषस्तथोरिति तस्य धत्वे पूर्वधस्य जश्त्वे दादद्धि, दादद्धः दादधति, दादधीषि दादद्धि दादत्थः-त्थ, दादधीमि दादध्मि दादध्वः-ध्मः। दादधीतु दादद्धु, अदादधीत्, अदाधत् दादध्यात्, दादधाञ्चकार, दादधिता दादधिष्यति दादध्यात्, लुङि अतोहलादेर्लघोरिति इड्विकल्पे अदादाधीत्-दाधिष्टाम्-धिषुः, अदादधीत्-दधिष्टाम्-धिषुः, अदादधिष्यत्। मुद्धातो- र्यङ्लुकि द्वित्वादावभ्यासगुणे पित्सु इड्विकल्पे मोमुदीति मोमोत्ति मोमुत्तः मोमुदति, मोमुदीषि मोमोत्सि मोमुत्थः-त्थ मोमुदीमि मोमोद्मि मोमुद्वः-द्मः, मोमुदीतु मोमोत्तु, अमोमुदीत् अमोमोत्, मोमुद्यात्, मोमोदाञ्चकार, मोमोदिता मोमोदिष्यति मोमुद्यात् अमोमोदीत् अमोमोदिष्यत्।

९० वञ्चुधातोर्यङ्लुकि द्वित्वादौ नीग्वञ्चु इति नीगागमे इट्पक्षे वनीवञ्चीति, इडभावे चस्य कुत्वे नस्थानिका- परसवर्णे वनीवङ्क्ति, वनीवक्तः वनीवचति अनिदितामिति नलोपः, लङि तिपि इटि अवनीवञ्चीत्, इडभावे हल्ङ्यादितलोपे संयोगान्तचलोपे अवनीवन्। **गमे**र्यङ्लुकि द्वित्वादौ नुगतोनुनासिकान्तस्येति नुकि इटि जङ्गमीति जङ्गन्ति अनुदात्तोपदेशेत्यनुनासिकलोपः, जङ्गमति जङ्गमीषि जङ्गंसि जङ्गथः-थ-जङ्गमीमि जङ्गन्मि जङ्गन्वः-न्मः म्वोश्चेति नः। जङ्गमीतु जङ्गन्तु जङ्गतात्-ताम् जङ्गमतु जङ्गहि अनुनासिकलोपस्याभीयत्वेनासिद्धत्वान्न हेर्लुक्, जङ्गतात्-तम्-त,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जङ्गमानि-माव-म । अजङ्गमीत् अजङ्गताम् अजङ्गन्, जङ्गम्यात् जङ्गमाञ्चकार जङ्गमिता गमेरनिट्त्वेन प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणेपि एकाच इति विहितस्य निषेधस्याप्रवृत्त्या इट्, जङ्गमिष्यति जङ्गम्यात्, लुङि पुषादिद्युताद्लृदित इत्यनुबन्धनिर्देशविहितत्वान्न च्लेरङ् ह्म्यन्तेति वृद्धिनिषेधः अजङ्गमीत्-मिष्टाम्-मिषुः अजङ्गमिष्यत् । **हन्ते**र्यङ्लुकि द्वित्वादौ अभ्यासाच्चेत्यत्र होहन्तेरित्यनुवृत्त्या हन्तेरिति तिपानिर्देशेपि श्तिपाशपेतिनिर्देशस्यानित्यत्वेन कुत्वे इड्विकल्पे जङ्घनीति जङ्घन्ति, अनुनासिकलोपे जङ्घतः जङ्घ्नति गमहनेत्युपधालोपः, जङ्घनीषि जङ्घंसि जङ्घथः-थ, जङ्घनीमि जङ्घन्मि जङ्घन्वः-न्मः, जङ्घनीतु जङ्घन्तु, जङ्घहि तिपानिर्देशात् हन्तेर्ज इति जादेशो न, अजङ्घनीत् अजङ्घन् जङ्घन्यात् जङ्घनाञ्चकार जङ्घनिता एकाच इति इण्निषेधो न, जङ्घनिष्यति, आशिषि प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति जङ्घन्यात् इत्यस्य स्थाने हनोवधेति वधादेशे वध्यात्, एवं लुङि अवधीत्-धिष्टाम्-धिषुः वधादेशस्य द्वित्वं तु न, तस्य साभ्यासस्थानिकत्वेन अनभ्यासस्येति निषेधात्, अजङ्घनिष्यत् । आङ्पूर्वात्तु आङोयमहनइति तङि आजङ्घते ।

चरतेर्गर्हायां यङि लुकि द्वित्वादौ चरफलोश्चेत्यभ्यासस्य नुकि उत्परस्यात इत्युत्तराकारस्योत्वे भाव्यमानस्याणः सवर्णाग्राहकत्वेपि उदितितपरकरणस्य सामर्थ्याल्लघूपधगुणाभावे चञ्चुरीति, इडभावे उत्वे हलिचेति दीर्घे चञ्चूर्ति चञ्चूर्तः चञ्चुरति, चञ्चुरीषि चञ्चूर्षि चञ्चूर्थः-थ चञ्चुरीमि चञ्चूर्मि चञ्चूर्वः-र्मः, चञ्चुरीतु चञ्चूर्तु, अचञ्चुरीत् अचञ्चूः, चञ्चूर्यात् चञ्चूर्याञ्चकार चञ्चुरितारिष्यति चञ्चूर्यात् अचञ्चुरीत् अचुञ्चुरिष्यत् । खनतेर्यङ्लुकि चङ्खनीति चङ्खन्ति चङ्खातः जनसनखनेत्यात्वम्, चङ्ख्नति गमहनेत्युपधालोपः, चङ्खनीषि चङ्खंसि चङ्खाथः-थ, चङ्खनीमि चङ्खन्मि चङ्खन्वः न्मः, चङ्खनीतु चङ्खन्तु, चङ्खाहि हेर्ङित्त्वाज्जनसनेत्यात्वम्, चङ्खनानि-नाव-म, अचङ्खनीत् अचङ्खन् चङ्खायात् चङ्खन्यात् येविभाषेत्यात्वविकल्पः, अचङ्खानीत् अचङ्खनीत् अतोहलादेरिति वा वृद्धिः अचङ्खनिष्यत् । स्वपेर्यङ्लुकि लुका लुप्ते प्रत्ययलक्षणाभावाद्रुचिस्वपीति संप्रसारणाभावेभ्यासदीर्घे इट्पक्षे सास्वपीति, इडभावे रुदादिभ्यइति गणनिर्देशादीटोप्यभावे सास्वप्ति सास्वप्तः सास्वपति, सास्वपीतु सास्वप्तु, असास्वपीत् असास्वप्, सास्वप्यात्, सास्वपाञ्चकार सास्वपिता सास्वपिष्यति, आशिषि वचिस्वपीत्युत्तरवकारस्य सम्प्रसारणे सासुप्यात्, लुङि अतोहलादेरिति वृद्धिविकल्पे असास्वापीत्-पिष्टाम्-पिषुः असास्वपीत्-पिष्टाम्-पिषुः, असास्वपिष्यत् । वृतधातोर्यङ्लुकि द्वित्वादौ, रुग्रीकौ च लुकि (७-४-९१) ऋदुपधस्य धातोरभ्यासस्य रुक रीक् रिक् एते आगमाः स्युर्यङ्लुकि । इत्यागमविकल्पेन इट्पक्षे वर्वृतीति वरीवृतीति वरिवृतीति, इडभावे वर्वर्ति वरीवर्ति वरिवर्ति, इट्पक्षे नाभ्यस्तस्याचिपितीति निषेधान्न लघूपधगुणः, वर्वृत्तः वरीवृत्तः वरिवृत्तः, वर्वृतति वरीवृतति वरिवृतति, एवं वर्वृतीतु वरीवृतीतु वरिवृतीतु वर्वर्तु वरीवर्तु वरिवर्तु, लङि-अवर्वृतीत् अवरीवृतीत् अवरिवृतीत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवर्वर्त् अवरीवर्त् अवरिवर्त्, सिपि दश्चेति इडभावपक्षे रुत्वे रोरीति रेफलोपे अवर्वाः अवरीवाः अवरिवाः, रुत्वाभावे अवर्वः अवरीवः अवरिवः, इट्पक्षे अवर्वृतीः अवरीवृतीः अवरिवृतीः। वर्वृत्यात् वरीवृत्यात् वरिवृत्यात्, वर्वर्तामास वरी-रिवर्तामास वर्-वरी-वरिवर्तिता, वर्-वरी-वरिवर्तिष्यति, गण-निर्देशान्नवृद्भ्य इतीण्निषेधो न। वर्-वरी-वरिवृत्यात्, लुङि गणनिर्देशात्पुषादीत्यङ् न अवर्वर्तीत् अवरीवर्तीत् अवरिवर्तीत्, अवर्-वरी-वरिवर्तिष्यत्। एवं—नृत्—नर्-नरी-नरिनृतीति, नर्-नरी-नरिनर्ति; वृधु- वर्-वरी-वरिवृधीति, वर्-वरी-वरिवर्द्धि। गृहू ग्रहणे-जर्-जरी-जरिगृहीति, जर्-जरी-जरिगर्ढि। गृह्णातेस्तु जाग्रहीति जाग्राढि जागृढः जागृहति, इडभावे हस्य ढत्वं तस्य धत्वं ष्टुत्वं पूर्वढलोपः पूर्वस्य दीर्घः, तस्मादौ ङिन्निमित्तं सम्प्रसारणं, तस्यासिद्धत्वान्न रुगादयः। कृञ्धातोर्यङ्लुकि चकृ इति जाते। ऋतश्च (७-४-९२) ऋदन्तधातोरपि रुक् रीक् रिक् इत्यागमाः स्युर्यङ्लुकि। इति रुगादिषु चर्करीति चरीकरीति चरिकरीति चर्कर्ति चरीकर्ति चरिकर्ति, चर्-चरी-चरिकृतः, चर्-चरी चरिक्रति ऋकारस्य यण्; चर्-चरी-चरिकरीतु, चर्-चरी-चरिकर्तु; अचर्-चरी-चरिकरीत् अचर्-चरी-चरिकर्त्; चर्-चरी-चरिकृयात्; सार्वधातुकत्वादकृदिति न दीर्घः; चर्करां-चरीकरां-चरिकराञ्चकार-बभूव-आस, चर्-चरी-चरिकरिता-ष्यति, चर्-चरी-चरिक्रियात् रिङ्शयेतिरिङ्, अचर्-चरी-चरिकारीत्; अचर्-चरी-चरिकरिष्यत्। एवं भृञः वर्-वरी-वरिभरीति, वर्-वरी-वरिभर्ति। सृ धातोः सर्-सरी-सरिसरीति सर्-सरी-सरिसर्ति। ऋतइत्युक्तेर्नेह कॄ विक्षेपे-चाकरीति चाकर्ति चाकृतः चाक्रति; तॄ-तातरीति तातर्ति तातृतः तातिरति।

प्रयोगाः—वर्वर्तु सर्वोपरि। सरीसर्ति वायुः, नरीनर्ति पक्षी। चरीकर्ति शीतम्। चरीकर्तु भव्यम्।

प्रश्नाः—कीदृशेषु धातुषु यङ्लुक्। यङ्लुकि किं पदम्। रुरीग्रिकः कुत्र भवन्ति। यङ्लुकि कीदृशा विधयो न भवन्ति। इडागमः क्व भवति। चरधातोर्यङ्लुकि को विशेषः।

अधस्तनवाक्यगतान्यङ्लुगन्तप्रयोगानुपपादयत—

त्रिधा बद्धो वृषभो रोरवीति। नवरीभरीति कवरीभरे स्रजो नचरीकरीति मृगनाभिचित्रकम्। नदरीधरीति बहुशो विवरीवरीति नच मतिप्रियं प्रिया। इति यङ्लुक्प्रक्रिया।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ नामधातुप्रक्रिया।

सुप आत्मनः क्यच् (३-१-८) इषिकर्मण एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्ययो वा स्यात्। आत्मनः पुत्रमिच्छतीत्यर्थे द्वितीयान्तपुत्रशब्दादिच्छार्थे क्यचि यशेषे तदन्तस्य सनाद्यन्ता इति धातुत्वे तदन्तर्गतद्वितीयायाः सुपोधातुप्रातिपदिकयोरिति लोपे, क्यचि च (७-४-३३) क्यचि परे अस्य ईत्स्यात्। इति ईत्वे पुत्रीयधातोर्लडादयः क्यचि आत्मनेपदनिमित्ताभावात्परस्मैपदम्। पुत्रीयति-यतः-यन्ति, पुत्रीयतु अपुत्रीयत् पुत्रीयेत्, लिट्यनेकाच्त्वादामि कृञाद्यनुप्रयोगः पुत्रीयाञ्चकार पुत्रीयिता पुत्रीयिष्यति पुत्रीय्यात् अपुत्रीयीत् अपुत्रीयिष्यत्। आत्मनो गामिच्छतीत्यर्थे द्वितीयान्त-गोशब्दात्क्यचि धातुत्वेन सुब्लोपे वान्तोयिप्रत्यये इत्यवादेशे, अन्तर्वर्तिविभक्तिमादाय पदत्वेन लोपः शाकल्यस्येति वलोपे प्राप्ते नःक्ये इति नान्तेतरस्य पदत्वनिषेधेन तदभावे लडादौ गव्यति। तथा आत्मनो नावमिच्छति नाव्यति, लिटि गव्याञ्चकार नाव्याञ्चकार। आम आर्धधातुकत्वेन तस्मिन्परे यस्यहल इति यलोपस्तु न, सन्निपातपरिभाषया यनिमित्तकावादेशवकारस्य यलोपे निमित्तत्वाभावात्। गव्यिता नाव्यितेत्यादि। आत्मनो राजानमिच्छतीत्यर्थे राजन्शब्दात्क्यचि सुब्लोपे नःक्ये इति पदत्वेन नलोपःप्रातिपदिकान्तस्येति नलोपे अस्येत्वे राजीयति, अत्र नलोपःसुप्स्वरेतिनियमादीत्वे-कर्तव्ये नलोपो नासिद्धः। त्वामिच्छति मामिच्छतीत्यर्थे युष्मदस्मद्भ्यां क्यचि सुब्लोपे प्रत्ययलक्षणा-भावेन त्वमावेकवचने इत्यप्रवृत्तावपि प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वमादेशयोर्लडादयः। त्वद्यति मद्यति। आत्मनो गिरं पुरमिच्छतीत्यर्थे क्यचि सुब्लुकि हलिचेत्युपधादीर्घे गीर्यति पूर्यति। दिव-मिच्छति दिव्यति, दिवित्यव्युत्पन्नं प्रातिपदिकं, न धातुस्तेन हलिचेति दीर्घो न। दीव्यतीति प्राचां दीर्घपाठस्तु प्रामादिकः। अमुमिच्छति अदस्यति। कर्तारमिच्छति कर्त्रीयति रीङृत इति ऋकारस्य रीङादेशः। गार्ग्यं वात्स्यमिच्छतीत्यर्थे क्यचि सुब्लोपे क्यच्व्योश्चेति यलोपे अस्येत्वे गार्गीयति वात्सीयति। कविमिच्छति कवीयति अकृत्सार्वधातुकयोरिति दीर्घः। वाचमिच्छति वाच्यति नःक्ये इति पदत्वाभावान्न कुत्वम्। समिधमिच्छति समिध्यति पदत्वाभावान्न जश्त्वम्। लुटि तासि इटि यस्यहल इति नित्यं यलोपे प्राप्ते क्यस्य विभाषा (६-४-५०) हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्धधातुके परे। इति आदेःपरस्येति पक्षे यकारस्य अतोलोप इत्यकारस्य च लोपे अल्लोपस्य स्थानिवत्त्वेन लघूपधगुणाभावे समिधिता समिध्यिता। मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यज्न (वा) इति निषेधे वाक्यमेव किमिच्छति इदमिच्छति स्वरिच्छति उच्चैरिच्छति, नीचैरिच्छति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० इहात्मशब्दः परव्यावृत्तिवचनः स्वशब्दपर्यायो वा न चेतनद्रव्यवचनः स्वश्चेच्छायां सन्निधायितत्वादेषितैव, त स्वस्मै यदिष्यते कर्मकारकं तद्वृत्तेः सुबन्तादिच्छायां क्यज्वा स्यादिति फलति, तेन एषित्रा स्वार्थं यदिष्यते कर्म-कं तद्वाचकात्सुबन्तात्क्यच्। आत्मन इत्युक्त्या परस्य पुत्रमिच्छति, वृक्षस्य फलमिच्छति, आत्मनः पुत्रं परस्य दास-ति इत्यादौ न क्यच्। अस्य पदविधित्वेन समर्थपरिभाषाप्रवृत्तेः महान्तं पुत्रमिच्छतीत्यत्र पुत्रशब्दान्न क्यच्, महा-च्छतीत्यर्थे तु महापुत्रीयतीति भवत्येव। पुत्रमात्मन इच्छति पुत्रीयतीत्यादौ अकृतव्यूहाः पाणिनीयाः, कृतमपि ं निवर्तयन्तीति, अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति वा पुत्र अमिति सन्धिकार्यरहिताया द्वितीयायाः सुपोधातु-दिकयोरिति लुकि अस्य ईत्वे सनाद्यन्ता इति धातुत्वेन लडादीति माधवः।

अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु (७-४-३४) एते क्यजन्ता निपात्यन्ते बुभुक्षा-द्यर्थेषु। अश्यते इत्यशनमन्नं तद्भोक्तुमिच्छतीत्यर्थे अशनमित्यस्मात्क्यच्, इत्वाभावो निपातनात्, अकृत्सार्वधातुकयोरिति दीर्घः अशनायति। उदकं पातुमिच्छतीत्यर्थे उदकमित्यस्मात्क्यच्, उदकस्यो-दन्नादेशो नलोपाभावश्च निपात्यते। सत्यपि धने लोभादधिकमिच्छतीत्यर्थे धनमित्यस्मात्क्यच्, इत्वाभावो निपातनात् अकृदिति दीर्घः धनायति। बुभुक्षादिभ्योऽन्यत्र अशनीयति (वैश्वदेवाद्यर्थ-मन्नं संग्रहीतुमिच्छति), उदकीयति (सस्यादिसेचनार्थमुदकमिच्छति), धनीयति (जीवनार्थं धन-मिच्छति) **अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि** (७-१-५१) एषां क्यचि असुगागमः स्यात्। **अश्ववृषयोर्मैथुनेच्छायाम्** (वा) मैथुनार्थमश्वमिच्छति अश्वस्यति वडवा, क्यचि यात्पूर्वमसागमे अतोगुण इति पररूपम्। एवं वृषस्यति गौः। **क्षीरलवणयोर्लालसायाम्** (वा) क्षीरं विशेषत इच्छति क्षीरस्यति बालः, एवं लवणस्यति उष्ट्रः। **सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ** (वा) दधि अतिशयेनेच्छतीत्यर्थे क्यचि सुकि दधिस्यति, असुकि दध्यस्यति। एवं मधुस्यति मध्वस्यति। **काम्यच्च** (३-१-९) पूर्वोक्तविषये काम्यच्स्यात्। आत्मनः पुत्रमिच्छतीत्यर्थे काम्यच्प्रत्यये सुब्लुकि धातुत्वाल्लडादयः पुत्रकाम्यति। काम्यचो यस्यानर्थकतया यस्येति सङ्घातग्रहणमित्युक्त्या यस्य हल इति लोपो न। एवं वस्त्रकाम्यति धनकाम्यति यशस्काम्यति सोऽपदादाविति सत्वम्, सर्पिष्काम्यति इणः षः इति षत्वम्। काम्यजन्तधातोः कृत्प्रत्ययेऽकारे पुत्रकाम्या धनकाम्या यशस्काम्या। मान्ताव्यये-भ्योऽप्ययं स्यादेव निषेधाभावात् किङ्काम्यति इदङ्काम्यति स्वःकाम्यति, किङ्काम्या स्वःकाम्या।

वि० इति रामो वृषस्यन्तीमिति मनुष्यविषये प्रयोगस्तु अश्ववृषरूपप्रकृत्यर्थपरित्यागे मैथुनेच्छार्थमेवादायोपपादनीयः। ं च माधवेन 'अन्येतु परित्यक्तप्रकृत्यर्थामैथुनेच्छैवार्थ इत्याहुः तथाच भट्टिः इति रामो वृषस्यन्तीमिति, निघण्टुश्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(कोषः) "वृषस्यन्ती तु कामुकीति"। अत्रान्ये अशनायतीत्यादीनां प्रकृत्यर्थमनपेक्ष्य केवलं बुभुक्षादिकमेवार्थं मन्यन्ते, अत्र भारविरमुमेव पक्षं प्रतिपेदे, तदाह किमु धनं धनायितुमिति, निघण्टुश्च उदन्या तु पिपासा तृडिति, क्यजन्तादप्रत्यये अशना उदन्या धनाया इति। क्षीरलवणयोरिति कात्यायनीयं वार्तिकम्, सर्वप्रातिपदिकानामिति मतान्तरीयम् तेनोत्तरेण पूर्वस्य न गतार्थता।

उपमानादाचारे (३-१-१०) क्यजनुवर्तते, उपमानात्कर्मणः सुबन्तादाचारेर्थे क्यच् स्यात्। पुत्रमिवाचरति (व्यवहरति) इत्यर्थे क्यचि सुब्लुकि ईत्वे लडादौ पुत्रीयति छात्रम्। एवं विष्णूयति द्विजम् अकृदिति दीर्घः, लोष्टीयति द्रव्यम्, प्रावारीयति कम्बलम्। **अधिकरणाच्चेति वक्तव्यम्** (वा) प्रासादे इवाचरति प्रासादीयति कुट्यां भिक्षुः, एवं पर्यङ्कीयति मञ्चके, कुटीयति प्रासादे। **कर्तुः क्यङ् सलोपश्च** (३-१-११) उपमानात् कर्तुः सुबन्तादाचारेर्थे क्यङ् वा स्यात्, सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात्। क्यङ् वेत्युक्तेः पक्षे वाक्यम्, सान्तस्य लोपस्तु क्यङ्सन्नियोगशिष्टः। क्यङन्तं ङित्वादात्मनेपदि। कृष्ण इवाचरति कृष्णायते प्रथमान्तकृष्णशब्दात्क्यङि धातुत्वेन सुपो लुकि अकृदिति दीर्घे कृष्णायेत्यस्माल्लडादयः। एवं श्येन इवाचरति श्येनायते, काक इवाचरति काकायते, राजेवाचरति राजायते नलोपे तस्यासिद्धत्वाभावाद्दीर्घः। तथा देवायते दरिद्रायते धनीयते कवीयते हंसायते चन्द्रायते मूर्खायते। सान्तेष्वन्तलोपोपि स च व्यवस्थितः। **ओजसोऽप्सरसो नित्यमितरेषां विभाषया** (वा) ओजःशब्दो वृत्तिविषये तद्वति वर्तते। ओजः इवाचरति ओजायते सलोपे अकृदिति दीर्घः, अप्सरा इवाचरति अप्सरायते, यशः (यशस्वी) इवाचरति यशायते यशस्यते सलोपो वा, सलोपे अजन्ताङ्गत्वाद्दीर्घः, तदभावे न। विद्वानिवाचरति विद्वायते विद्वस्यते नान्तस्यैव पदत्वात्सस्य रुत्वं न, पयायते, पयस्यते सर्पियते सर्पिष्यते दधि नःक्ये इत्यपदान्तत्वात्प्रत्ययावयवसस्य षत्वम्। त्वमिवाचरति त्वद्यते अहमिवाचरति मद्यते, यूयमिवाचरति युष्मद्यते, वयमिवाचरति अस्मद्यते। एकत्वे प्रत्ययोत्तरपदयोश्चेति त्वमादेशौ। कुमारीवाचरति कुमारायते क्यङ्मानिनोश्चेति पुम्वद्भावेन ङीषो निवृत्तौ दीर्घः। हरिणीवाचरति हरितायते पुम्वद्भावेन वर्णादनुदात्तादिति ङीषो नत्वस्य च निवृत्तौ दीर्घः। गुर्वीवाचरति गुरूयते पुंवत्वेन ङीपो निवृत्तौ दीर्घः। सपत्नीवाचरतीत्यर्थे शत्रुपर्यायसपत्नशब्दात् शार्ङ्गरवादित्वेन ङीनन्तात्क्यङि पुंवत्वेन ङीनो निवृत्तौ दीर्घे सपत्नायते, समानः पतिः (स्वामी) यस्या इति बहुव्रीहौ नत्वे ङीपि निष्पन्नात्सपत्नीशब्दात्क्यङि तुअस्य नित्यस्त्रीलिङ्गत्वेन पुंवत्वाभावात् सपत्नीयते। युवतिरिवाचरति युवायते युवत्त्वेन प्रत्ययनिवृत्तौ नलोपे दीर्घः। पट्वीवाचरति पटूयते, मृद्वीवाचरति मृदूयते क्यङि पुंवत्त्वे दीर्घः। पट्वीमृद्व्यौ इवाचरतीत्यर्थे क्यङि पूर्वस्य क्यङः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परत्वाभावेन उत्तरस्यैव पुंवत्त्वे दीर्घे च पट्वीमृदूयते। पाचिकेवाचरति पाचिकायते नकोपधाया इति पुंवत्त्वनिषेधः।

वि० १. "पुत्रीयति माणवकम् द्वे ह्यत्र कर्मणी उपमानकर्म उपमेयकर्म च, उपमानकर्माऽन्तर्भूतम्, उपमेयेन कर्मणा कर्मी भवति। काकः श्वेतायते अत्र द्वौ कर्तारौ उपमानकर्ता उपमयेकर्ता च, उपमानकर्ताऽन्तर्भूतः, उपमेयेन कर्त्रा कर्त्री भवति। मुण्डयति माणवकम् अत्रापि द्वे कर्मणी सामान्यकर्म विशेषकर्म च, सामान्यकर्माऽन्तर्भूतं, विशेषकर्मणा कर्मी भवति" इति भाष्यकारः।

वि० २. उपमानादाचारे इत्यत्राचारक्रियायाः सान्निध्ये तदपेक्षया कर्मण उपमानात्सुबन्तादाचारेऽर्थे क्यजित्यर्थः। उपमानेनोपमेयमाक्षिप्यते तत्र प्रत्यासत्त्या साधारणधर्मभूताचारक्रियापेक्षया कर्मता, उपमानकर्मवत्प्रत्ययान्ते धाता-वर्थावादनभिहितत्त्वात्तत्र द्वितीया। तथा पुत्रीयते इति कर्मणि यगादयोपि भवन्ति। पुत्रविषयिकायाश्छात्रविषयिका-चारक्रियाया भेदेप्याचरितुरेकत्वेनाभेदोपचारः, अन्यथा सर्वत्रैवोपमानोपमेयगतधर्मभेदादौपम्यव्यवहारोच्छेदः स्यादिति भावः। आचारसदृशाचारः क्यजर्थः, प्रथमाचारे कर्मतया पुत्रादेरन्वयः द्वितीयाचारे छात्रादेरन्वय इति व्युत्पत्तिवादे स्पष्टः। ततश्च क्यङादेः केवलाचारार्थत्वे छात्रवृत्तिपुत्रविषयकाचारकर्त्रेति, सदृशाचारार्थत्वे पुत्रबिषयकाचारसदृशछात्र-वृत्त्याचारकर्त्रेति बोधभेदः।

सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः (वा) प्रातिपदिकग्रहणादिह सुप इति न सम्बद्ध्यते तेन पदकार्यं न। कृष्ण इवाचरतीत्यर्थे कृष्णशब्दात्क्विपि ककारस्य लशक्वतद्धिते इति, पकारस्य हलन्त्य-मिति, इकारस्योपदेशेजनुनासिक इतीत्संज्ञया सर्वापहारिलोपे, क्विबन्तत्वेन कृष्ण इत्यस्य सनाद्यन्ता इति धातुसंज्ञया लडादौ सार्वधातुकेषु शपि पररूपे कृष्णति-तु अकृष्णत् कृष्णेत् कृष्णाञ्चकार कृष्णिता-ष्यति कृष्ण्यात् अकृष्णीत् अकृष्णिष्यत्। मालेवाचरति मालति-तु मालाशब्दस्य टाबन्तत्वेनाऽ प्रातिपदिकत्वेपि प्रातिपादिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया एकादेशस्य पूर्वान्तत्वेन मालाशब्दात्क्विप् वा। लङि अमालात् ङीप्साहचर्यादापोपि सोरेव लोपविधानात्तकारस्य हल्ङ्याादि लोपो न। मालाञ्चकार मालिता-ष्यति। लुङि आदन्तत्वेन इट्सकौ अमालासीत्-स्यत्। कविरिवा-चरति कवयति, आशिषि कवीयात् अकृदिति दीर्घः। लुङि सिचिवृद्धिरित्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नामधातोर्नवृद्धिरिति कैयटादिमते अकवयीत्, माधवमते तु वृद्धौ अकवायीत्। विरिवाचरति वयति विवाय विव्यतुः-व्युः अवयीत् अवायीत्। श्रीरिवाचरति श्रयति शिश्राय शिश्रियतुः-युः एकाच्त्वान्नाम्। भूरिवाचरति भवति बुभाव बुभुवतुः-वुः, अभावीत्। अत्र भुवोवुक् भवतेरः गाति-स्थेति च न प्रवर्तते, अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात्। द्रुरिवाचरति द्रवति दुद्राव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अद्रावीत् धातुपाठोक्तस्यैव ग्रहणान्नात्र णिश्रिद्रु इति चङ्। **अनुनासिकस्य क्विझलोः क्ङिति** (६-४-१५) अनुनासिकान्तस्योपधाया दीर्घः स्यात्क्वौ झलादौ क्ङिति च। इति दीर्घं इदमिवाचरति इदामति, राजेवाचरति राजानति, पन्था इवाचरति पथीनति।

वि० आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा (वा) वाग्रहणात्क्यङपि। गल्भ धार्ष्ट्ये, क्लीब अधार्ष्ट्ये, होडृ अनादरे एषामवगल्भादयः पचाद्यजन्ताः क्विप्सन्नियोगेनानुदात्तत्वमनुनासिकत्वं चाच्प्रत्ययस्य प्रतिज्ञायते, तेन तङ् अन्त्याकारस्येत्संज्ञा च। सर्वप्रातिपदिकेभ्य इत्येव क्विपः सिद्धावेतद्वार्तिकं क्विबनुपहितानुबन्धाकारस्येत्संज्ञा सिद्ध्यर्थम्। अवगल्भः (धृष्टः) इवाचरति अवगल्भते, क्यङि अवगल्भायते। क्लीब इवाचरति क्लीबते क्लीबायते, होडः (अनादृतः) इवाचरति होडते होडायते। उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते इत्युक्तेरन्त्याकारस्येत्वेन लोपेनापगमादनेकाच्त्वाभावेपि धातूनामनेकार्थत्वेन केवलस्याप्याचारे वृत्त्या अवगल्भते इत्यादिसिद्धावेतद्वार्तिकारम्भसामर्थ्याद्भूतपूर्वगत्याश्रयेणानेकाच्त्वाल्लिट्याम्-अवगल्भाञ्चक्रे क्लीबाञ्चक्रे होडाञ्चक्रे। आबन्तेभ्य आचारे क्विब्नास्तीति विश्वपाशब्दावसरे उक्तत्वाद्वस्तुतो मालातीत्यादयः प्रयोगा नोचिताः।

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः (३-१-१२) अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात् हलन्तानामेषां लोपश्च। अच्वेरिति पर्युदासबलादभूततद्भावे इति लब्धम्। अभृशो भृशो भवतीत्यर्थे भृशशब्दात्क्यङि अकृदिति दीर्घं धातुत्वाल्लडादौ ङित्वात्तङि भृशायते-ताम् भृशायाञ्चक्रे भृशायिता-ष्यते-षीष्ट अभृशायिष्ट-ष्यत। एवं शीघ्र-शीघ्रायते, मन्द-मन्दायते, चपल-चपलायते, पण्डित-पण्डितायते, उत्सुक-उत्सुकायते, उन्मनस्-उन्मनायते, अभिमनस्-अभिमनायते, सुमनस्-सुमनायते, दुर्मनस्-दुर्मनायते, ओजस्-ओजायते, हलन्तेष्वन्तहलो लोपे दीर्घः। अच्वेरित्युक्त्या च्विप्रत्यये न क्यङ् भृशीभवति। ग्रामशब्दपाठेपि संग्रामशब्दलाभे सिद्धे संग्रामशब्दस्य चुरादौ पाठेन उपसर्गसमानाकारपूर्वपदस्य धातुसंज्ञाप्रयोजकप्रत्यये कार्ये पृथक्करणज्ञापनात् सुमन उन्मनादौ स्वाद्युत्तरमडागमेन स्वमनायत उदमनायतेत्यादि। **लोहितादिडाज्भ्यः क्यष्** (३-१-१३) लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे क्यष् स्यात्। **वा क्यषः** (१-३-९०) क्यषन्तात्परस्मैपदं वा स्यात्। तेन क्यषि उभयपदम्, अत्र क्यष्विधानेऽच्वेरित्यनुवृत्या अभूततद्भावे इति लभ्यते, तच्च लोहितशब्दस्यैव विशेषणं, नतु डाचोऽसम्भवात्, नाप्यादिपदग्राह्याणाम् आदिशब्दस्य प्रत्याख्यानात्। अलोहितो लोहितो भवति लोहितायति लोहितायते। लोहित शब्द एव क्यष् लोहितादिपठितश्यामादीनां तु भृशादिपाठेन पूर्वेण क्यङेव, तेन तङेव। श्यामो भवति श्यामायते, सुख-सुखायते (सुखीभवति), दुःख-दुःखायते (दुःखी-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवति) सुखादयः शब्दा वृत्तिविषये तद्वति वर्तन्ते। डाजन्तेषु क्यषो विधानसामर्थ्यात्कृभ्वस्तियोगं विनापि डाच् , डाचि बहुलं द्वे भवत इति द्विर्भावे पटत्पटदित्यत्र पूर्वतकारोत्तरपकारयोः पररूपे पकारे ङित्वादुत्तरटिलोपे पटपटाशब्दात् डाजन्तात्क्यषि धातुत्वेन लडादौ पटपटायते (पटपटशब्दवान्भवति) एवं चटचटायते झणझणायते सिमसिमायते इत्यादि।

वि० लोहितादयस्तु— लोहितश्यामदुःखानि हर्षगर्वसुखानि च। मूर्छानिद्राकृपाधूमाः करुणानित्यचर्मणी॥ हर्षायते ते मूर्छायते निद्रायते कृपायते धूमायते करुणायते नित्यायते चर्मायते। केचित्तु श्यामादिभ्योपि क्यषिति पदद्वयमुदा- ते, तद्भाष्यवार्तिकविरुद्धम्। तथा च वार्तिकम्- लोहितडाज्भ्यः क्यष्वचनं भृषादिष्वितराणीति। तेन लोहितशब्दे क्यषि ग्रम्, लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष् लोहिनीयति। श्यामादिभ्यस्तु भृशादित्वात्क्यङि तङेव।

कष्टाय क्रमणे (३-१-१४) चतुर्थ्यन्तात्कष्टशब्दादुत्साहेर्थे क्यङ् स्यात्। कष्टाय क्रमते (उत्सहते) कष्टायते (पापं कर्तुमुत्सहते)। **सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्** (वा) कण्वं पापम्। सत्रादयो वृत्तिविषये पापार्थाः तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ्। पापं चिकीर्षतीत्यस्वपदविग्रहे सत्रायते कक्षायते कष्टायते कृच्छ्रायते गहनायते। **कर्मणो रोमन्थतपोभ्यां वर्तिचरोः (३-१-१५)** आभ्यां कर्मभूताभ्यां क्रमेण वर्तने चरणे चार्थे क्यङ् स्यात्। रोमन्थं वर्तयति (आवर्तयति) रोमन्थायते, शानचि रोमन्थायमानः। **हनुचलन इति वक्तव्यम्** (वा) चर्वितस्याकृष्य पुनश्चर्वण इत्यर्थः, तेनेह न, कीटो रोमन्थं वर्तयति। अपानप्रदेशान्निःसृतं द्रव्यमिह रोमन्थस्तदश्नातीत्यर्थ इति कैयटः, वर्तुलं करोतीत्यर्थ इति न्यासहरदत्तौ। **तपसः परस्मैपदं च** (वा) तपश्चरति तपस्यति, अङि-तपस्या। **बाष्पोष्मभ्यामुद्वमने (३-१-१६)** आभ्यामुद्वमनेऽर्थे क्यङ् स्यात्। बाष्पमुद्वमति बाष्पायते, ऊष्ममुद्वमति ऊष्मायते। **फेनाच्चेति वक्तव्यम्** (वा) फेनमुद्वमति फेनायते। **शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे (३-१-१७)** एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्। शब्दं करोति शब्दायते, वैरं-वैरायते, कलहं-कलहायते, अभ्रं-अभ्रायते, मेघं-मेघायते। पक्षे तत्करोतीति णिजपीष्यते इति न्यासः, णिचि शब्दयतीत्यादि। **सुदिनदुर्दिननीहारेभ्यश्च** (वा) सुदिनं करोति सुदिनायते, दुर्दिनं-दुर्दिनायते, नीहारं-नीहारायते। **सुखादिभ्यः कर्तृवेदनायाम् (३-१-१८)** एभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः। सुखं वेदयते सुखायते। एवं दुःखायते, गहनायते, कृच्छ्रायते, अस्तायते, अलीकायते, प्रतीपायते, करुणायते, कृपणायते। **नमोवरिवश्चित्रङः क्यच् (३-१-१९)** करण इत्युक्तेः क्रियाविशेषे क्रमात्पूजायां परिचर्यायामाश्चर्ये च एभ्यः क्यच्स्यात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवान्नमस्यति (पूजयति), गुरुन्वरिवस्यति (शुश्रूषते), चित्रीयते (विस्मयते विस्मापयते वा), चित्रङो ङित्वात्तङ्। अङि—नमस्या वरिवस्या, शतृ- नमस्यन् वरिवस्यन्, शानच्-चित्रीयमाणः, क्त-नमसितः वरिवसितः, कर्मणि-नमस्यमानः वरिवस्यमानः। **पुच्छभाण्डचीवराण्णिङ्** (३-१-२०) करण इति वर्तते, एभ्यः कर्मभ्यो णिङ् स्यात्। **पुच्छादुदसने व्यसने पर्यसने च** (वा) विविधं विरुद्धं वोत्क्षेपणं व्यसनम्। पुच्छमुदस्यति उत्पुच्छयते, पुच्छं व्यस्यति विपुच्छयते, पुच्छं पर्यस्यति परिपुच्छयते। **भाण्डात्समाचयने** (वा) भाण्डानि समाचिनोति (राशीकरोति) संभाण्डयते। **चीवरादर्जने परिधाने च** (वा) चीवराण्यर्जयति परिधत्ते वा संचीवरयते भिक्षुः लङादावुपसर्गस्य पृथक्कारेण पुच्छादेः प्रागट् उदपुच्छयत, समभाण्डयत, समचीवरयत। **मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्** (३-१-२१) एभ्यः करणेऽर्थे णिच्स्यात्। मुण्डं करोति मुण्डयति, मिश्रं-मिश्रयति, श्लक्ष्णं-श्लक्ष्णयति, लवणं-लवणयति। **व्रताद्भोजनतन्निवृत्त्योः** (वा) पयो व्रतयति (भुङ्क्ते) शूद्रान्नं व्रतयति (वर्जयति)। **हल्यादिभ्यो ग्रहणे** (वा) **हलिकल्योरदन्तत्वं च निपात्यते** (वा) महद्धलं हलिः हलिं गृह्णाति हलयति, कलिं गृह्णाति कलयति इष्ठवत्त्वेन णौ टिलोपः, लुङि चङि अग्लोपित्वात्सन्वद्भावदीर्घौ न, अजहलत् अचकलत्। कृतं गृह्णाति (उपकारं स्वीकरोति) कृतयति, तूस्तं (केशाः, जटीभूतकेशाः, पापं वा) विहन्ति तूस्तयति। मुण्डादयः सत्यापपाशेत्यत्रैव पठितुं युक्ताः, सत्यापादीनां णिच्यर्थविशेषाः पूर्वं निर्दिष्टा एव। प्रातिपदिकाद्धात्वर्थं इत्येव सिद्धे मुण्डादीनामिह ग्रहणं सापेक्षेभ्योपि णिजर्थम्, तेन मुण्डयति माणवकम्, मिश्रयत्यन्नम्, श्लक्ष्णयति (निर्मलीकरोति), लवणयति व्यञ्जनमित्याद्युपपद्यते। हलिकल्योर्ग्रहणमदन्तत्वार्थम्।

वि० स्थूलमाचष्टे करोति वेत्याद्यर्थे स्थूलादिशब्दात्तत्करोति तदाचष्टे इति णिचि इष्ठवत्त्वात्स्थूलदूरेति यणादिलोपोकारगुणयोरवादेशो स्थवि इत्यादिभ्यो लडादयः स्थूलमाचष्टे करोति वा स्थवयति, एवं दूरं दवयति, युवानं-यवयति कनयति युवाल्पयोरिति वा कनादेशः, ह्रस्वं-ह्रसयति, क्षिप्रं-क्षेपयति, क्षुद्रं-क्षोदयति, अन्तिकं-नेदयति, बाढं-साधयति अन्तिकबाढयोर्नेदसाधौ। प्रशस्यं-प्रशस्ययति अत्रोपसर्गपृथक्कृतेः प्राप्ततया प्रशस्यस्य श्रः ज्यच इति श्रज्यादेशौ न। प्रियमाचष्टे करोति वा प्रापयति प्रियस्थिरेत्यादिना प्रादेशः, एवं स्थिरं-स्थापयति, उरुं-वरयति वारयति वरादेशे संज्ञापूर्वकविधेरनित्यत्वादुपधावृद्धिविकल्पः, बहुलं-बंहयति, गुरुं-गरयति, वृद्धं-वर्षयति, तृप्रं-त्रपयति संज्ञापूर्वकत्वान्न वृद्धिः, दीर्घं-द्राघयति, वृन्दारकं-वृन्दयति इष्ठवत्वेन प्रियस्थिरादीनां प्रस्थाद्यादेशाः। विद्वांसमाचष्टे इत्यर्थे विद्वस् शब्दाण्णौ टिलोपे अङ्गवृत्तेपुनर्वृत्तावविधिरिति संप्रसारणाभावे विद्वि इत्यस्य धातुत्वाल्लडादयः विद्वयति। पयस्विनीमाचष्टे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इष्ठवत्वाद्विनो लोपः टिलोपस्तु न, तदपवादेन विनो लोपात्। उदञ्चमाचष्टे इत्यर्थे उदच्शब्दाण्णौ भत्वेन अल्लोपं बाधित्वा उदईदितीत्वे उदीचि इत्यस्य धातुत्वाल्लडादयः उदीचयति, प्रत्यञ्चमाचष्टे इत्यर्थे णौ अल्लोपे चाविति दीर्घे प्रतीचि इत्यस्माल्लडादयः प्रतीचयति, सम्यञ्चमाचष्ट इत्यर्थे णौ समः समि इति सम्यादेशे अल्लोपे चाविति दीर्घे समीचि इत्यस्माल्लडादयः समीचयति।

प्रयोगाः—**चन्द्रायते शुक्लरुचापि हंसो, हंसायते चारुगतेन कान्ता। कान्तायते स्पर्शसुखेन वारि, वारीयते स्वच्छतया विहायः। फेनायमानं पतिमापगानाम्। दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि। श्यामायमानानि वनानि पश्यन्। नमस्यामो मुहुर्मुहुः। उच्चैः शब्दायते भिक्षुः। रङ्को राजायते मत्तः। वने सन्तस्तपस्यन्ति। कवयति पण्डितराजो कवयन्त्यपि विद्वांसः। अन्तःपुरीयति रणेऽपि धीरः। व्याकुलो धनकाम्यया। पुत्रीयति दयालुस्तम्।**

प्रश्नाः—क्यच्क्यङ्काम्यचः केष्वर्थेषु भवन्ति। णाविष्ठवद्भावेन के विशेषाः। क्यच्क्यङादिषु किं पदं भवति। अर्थे कः प्रत्ययः। किम्प्रत्ययः कस्मिन्नर्थे। कष्टायते सुखायते फेनायते रोमन्थायते कलहायते। दुर्मनायते इत्येषु के प्रत्ययाः। परकीयपुत्रेच्छायां क्यज्न वा। सपत्नीशब्दात्क्यङि कानि रूपाणि। अधस्तनवाक्यगतान्नामपदान् विवृणुत—

निरस्तपादपे देशे एरण्डोऽपि द्रुमायते। धूमायमाना दिशः। सुजनो दुर्जनायते। विद्यायामुन्मनायते। जामातो मित्रमन्यथा दुर्मनायते। गुरुः पुत्रीयति छात्रान्। नृपतिकीर्तिं द्रढयति कविः। श्यामायन्ते दिशः सर्वाः। यां कुरु प्रभोः। काष्ठं श्लक्ष्णय सर्वतः। वाचं न मिश्रयति वधूः। गौरुत्पुच्छयते भृशम्। सुखायते जनः कीर्त्या। ढीयति द्रव्यम्। **इति नामधातुप्रकरणम्।**

अथ आख्यातविशेषप्रकरणम्।

कण्ड्वादयः—

कण्ड्वादिभ्यो यक् (३-१-२७) **कण्ड्वादिधातुभ्यो नित्यं यक्स्यात्स्वार्थे। धातुभ्य इत्युक्त्या प्रातिपदिकेभ्यो न भवति। द्विविधा हि कण्ड्वादयः धातवः प्रातिपदिकानि च। कण्डूञ् गात्रविघर्षणे** (सेट् सक० उभय०) **कण्डूधातोर्यकि यगन्तत्वेन सनाद्यन्ता इति धातुत्वे लडादयः ञित्वापदद्वयम् कण्डूयति-ते-तु-ताम् अकण्डूयत कण्डूयेत कण्डूयाञ्चकार-चक्रे बभूव-आस कण्डूयिता-ष्यति-ते कण्डूय्यात्-यिषीष्ट अकण्डूयीत् अकण्डूयिष्ट-यिष्यत्-त। कण्डूयते, कण्डूयनं कण्डूयितव्यं कण्डूयन्-यन्ती-यमानः कण्डूयित्वा कण्डूतिः। मन्तु अपराधे** (सेट् अक० पर०) **मन्तूयति अकृदिति दीर्घः। वल्गु पूजा-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माधुर्ययोः (सेट् अक० प०) यकि दीर्घः वल्गूयति। **असु** उपतापे (सेट् सक० प०) असूयति, अङ्-असूया, उ-असूयुः। **उषस्** प्रभातीभावे (सेट् अक० प०) उषस्यति रात्रिः। **लेला** दीप्तौ (सेट् अक० प०) लेलायति। **मेधा** आशुग्रहणे (सेट् सक० प०) मेधायति, अङ्- मेधा। **सुख दुःख** तत्क्रियायाम् (सेट् अक० प०) सुख्यति दुःख्यति (सुखं दुखमनुभवति)। **सपर** पूजायाम् (सेट् सक० प०) सपर्यति, अङ्-सपर्या। **भिषज** चिकित्सायाम् (सेट् सक० प०) भिषज्यति, क्विप्-भिषक् भिषजः, कर्म-भैषज्यम्। **इषुध** शरधारणे (सेट् अक० प०) इषुध्यति, इ-इषुधिः **गद्गद** वाक्स्खलने (सेट् अक० प०) गद्गद्यति, अच्-गद्गदः। **खेला** विलासे (सेट् अक० प०) खेलायति, अङ्-खेला। **तिरस्** अन्तर्धौ (सेट् अक० प०) तिरस्यति। **अगद** नीरोगत्वे (सेट् अक० प०) अगद्यति, अच्-अगदम्। (औषधम्)। **उरस्** बलार्थे (सेट् अक० प०) उरस्यति (बलवान् भवति)। **सम्भूयस्** प्रभूतभावे (सेट् अक० प०) सम्भूयस्यति। **हृणीङ्** रोषणे लज्जायां च (सेट् अक० आ०) ङित्वात्तङ् हृणीयते (लज्जते)। **महीङ्** पूजायाम् (सेट् अक० आ०) महीयते महीयमानः। आकृतिगणोयम्।

वि० १. कण्डूप्रभृतयः शब्दाः प्रातिपदिकान्यपि, धातुमात्रत्वे ह्रस्वान्तपाठेपि अकृदिति दीर्घेण कण्डूयतीत्यादिसिद्धेः दीर्घपाठो व्यर्थः आपद्येत, धातुत्वेन यकि गुणनिषेधे कित्वं सार्थकम्, एषां प्रातिपदिकत्वेन च दीर्घान्ता ह्रस्वान्ता वा यथा पठितास्तथैव, तदर्थकेभ्यः प्रातिपदिकेभ्यः स्वादौ कण्डूः (कण्डूतिः), मन्तुः (अपराधः), वल्गु (सुन्दरम्), मेधा (धारणावती बुद्धिः), सुखं दुःखम्, भिषक् (वैद्यः), गद्गदः (स्खलद्वाक्), खेला (विलासः), तिरः (अन्तर्धिः), अगदः (औषधम्), उरः (बलम्) इत्यादयः।

वि० २. केचन धातुपाठे अपठिताः सौत्रा अपि धातवः। **ऋतेरीयङ्** (३-१-२९) ऋतेरीयङ् स्यात्स्वार्थे। जुगुप्सायामयं धातुरिति बहवः, कृपायांचेत्येके। **ऋते** रीयङि सनाद्यन्ता इति धातुत्वम् ऋतीयते ऋतीयाञ्चक्रे। **स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यःश्नुश्च** (३-१-८२) एभ्यः कर्त्रर्थे सार्वधातुके श्नुः स्यात् चात् श्ना। स्तन्भ्वादयश्चत्वारः सौत्राः सर्वे रोधनार्था इत्येके, प्रथमतृतीयौ स्तम्भार्थौ, द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इति माधवः। सर्वे परस्मैपदिनः, उदित्वं क्त्वायामिड्विकल्पार्थम् स्तभ्नोति स्तभ्नाति अवष्टब्धा (आसन्ना) सेना, उत्तम्भः, स्तुभ्नोति स्तुभ्नाति, विष्कभ्नोति विष्कभ्नाति, अच्-विष्कम्भः (अर्गला), स्कुभ्नोति स्कुभ्नाति। **सातिः** सुखे, अनुपसर्गाल्लिम्पेति शे शपि गुणायादेशयोः सातयः। जु वेगितायां गतौ, जवति ऊतियूतिजूतीति निपातनात् क्तिन् जूतिः, अच्-जवः, ल्युः–जवनः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः—कण्डूयमानेन कटं कदाचित्। आगोऽपराधो मन्तुश्च। कथं न पत्या धरणी हृणीयते। सपर्यां कुरु देवानाम्। महीयमानश्चरति क्षितौ सः। सम्भूयभावः सुधियां बभूव। प्रेत्य स्वर्गे महीयते। दुर्गाऽसूयति बालेषु। सरस्वती श्रुतिमहती महीयताम्।

समयमाला—

कण्डूयतेर्यगन्तात्सनि इटि अतो लोपे सन्यङोरिति प्रथमैकाचो द्वित्वे प्राप्ते कण्ड्वादेस्तृतीयस्येति वाच्यम् (वा) इति इष् इत्यस्य तृतीयैकाचो द्वित्वे हलादिशेषे कण्डूयियिषति। पुत्रीयेति क्यजन्तात्सनीट्यतोलोपे यथेष्टं नामधातुषु (वा) आद्यानां त्रयाणामन्यतमस्य द्वित्वमजादेस्तु आद्येतरस्य द्वित्वमित्यर्थः। इति पुकारस्य द्वित्वे पुपुत्रीयिषति, त्रीयेत्यस्य द्वित्वे पुतित्रीयिषति, यिसित्यस्य द्वित्वे पुत्रीयियिषति। इन्द्रशब्दात्क्यजन्तादिन्द्रीयतेः सनि इटि नन्द्राः संयोगादयः (६-१-२) संयोगादयो नदरा द्विर्न भवन्ति। इति नकारस्य द्वित्वनिषेधेन द्रीन्त्यशब्दयोरन्यतरस्य द्वित्वे इन्दिद्रीयिषति, इन्द्रीयियिषति। चन्द्रशब्दात्क्यजन्तात्सनि इटि अचः परत्वाभावेन प्रथमस्य द्वितीयस्य तृतीयस्य वैकाचो द्वित्वे चिचन्द्रीयिषति, चन्दिद्रीयिषति, चन्द्रीयियिषति। प्रियमाख्यातुमिच्छतीत्यर्थे प्रियशब्दादाख्यानार्थे णिजन्तात्सनीटि णाविष्ठवत्वात्प्रियस्थिरेति प्रियस्य प्रादेशे वृद्धौ पुकि णिचो गुणायादेशयोः प्रापेत्यस्य द्वित्वादौ अभ्यासेत्वे पिप्रापयिषति। प्रियमाचक्षाणं प्रेरयितुमिच्छतीत्यर्थे प्रापीत्याख्यानार्थकण्यन्ताद्धेतुमण्णौ तदन्तात्सनि इटि द्वितीयणिचमाश्रित्य प्रथमणिचो लोपे गुणायादेशयोः प्रापयिषेति सन्नन्तधातौ यथेष्टं नामधातुष्विति आद्यनां त्रयाणामेकाचामन्यतमस्य द्वित्वे पिप्रापयिषति, प्रापिपयिषति, प्रापयियिषति। बाढमाख्यातुमिच्छतीत्यर्थे बाढशब्दादाख्यानार्थणयन्तात्सनि इटि णाविष्ठवद्भावादन्तिकबाढयोरिति बाढशब्दस्य साधादेशे णिचो गुणायादेशयोः साधेत्यस्य द्वित्वादौ सिसाधयिषति। बाढमाचक्षाणं प्रेरयितुमिच्छतीत्यर्थे साधीत्याख्यानार्थकण्यन्तात्प्रेरणार्थे णिचि तदन्तात्सनि इटि प्रथमणिचो लोपे गुणायादेशयोः साधयिषेति सन्नन्ते त्रयाणामेकाचामन्यतमस्य द्वित्वादौ सिषाधयिषति, साधिधयिषति साधयियिषति। भूधातोर्यङन्ताद्बोभूयेत्यतः सनि सन्नन्तात् प्रेरणार्थे णिचि तदन्तात्सनि बोभूयियिषति यङ्निमित्तकद्वित्वे कृते अभ्यासगर्भतया पुनः सन्निमित्तकद्वित्वं न, ईदृशे वारणायैव लिटिधातोरित्यत्रानभ्यासस्येति, प्रवेशितम्, तदेव सन्यङोरित्यत्राप्यनुवर्तते। लक्ष्ये लक्षणं सकृदेव प्रवर्तते इत्यनभ्यासग्रहणप्रत्याख्यानं भाष्ये प्रौढिवाद एव। भूधातोर्यङन्ताण्णिचि बोभूयीत्यतः सनीटि अतो लोपे ततो णिचि बोभूययिषयति। इत्येवं दिशा प्रत्ययान्तात्प्रत्ययेषूपपादनीयम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयोगाः–गुरुभरमधः प्रापिपयिषुः । दिदर्शयिषुरात्मानम् । निनर्तयिषति प्रभुः । माता पिपाचयिषति । पिपालयिषति प्रजाः । पत्रं लिलेखयिषति । पिपाठयिषति स्वामी । कोस्मान् रिरक्षयिषति ।

प्रश्नाः—कण्डूवादिषु को विशेषः । कण्डूवादीनां धातुप्रातिपदिकोभयत्वं कुतः । प्रत्ययान्ताद्धातोः प्रत्ययान्तरं भवति न वा । कण्डूवादिषु नामधातुषु च नानाप्रत्ययान्तेषु द्वित्वे को नियमः । गमधातोर्णिचि सनि, सनि णिचि च को विशेषः । कीदृशानां वर्णानां द्वित्वं न भवति । अधस्तनवाक्यगताः धातुप्रत्ययपरम्पराः निरूपयत—

संसारादुत्तितारयिषुरात्मानम् । दिदर्शयिषन्ति कन्दुकक्रीडितं युवानः । लिलेखयिषामि छात्रान्निबन्धान् । पितास्मान्पिपाठयिषति विचिचारयिषन्ति सन्तः शास्त्रार्थम् । यियावयिषुरात्मानं संयुयोजयिषतीश्वरे । पारितोषिकलाभो स्मान्पिपाठयिषति ध्रुवम् देदीप्यिषति भूषणैः । जिगमिषयत्यस्मानयं प्रभुः । इत्याख्यातविशेषप्रक्रिया ।

अथ पदव्यवस्थाप्रकरणम् ।

आत्मनेपदम्—

अनुदात्तङित आत्मनेपदम् (१-३-१२) आस्ते एधते शेते सूते । **भावकर्मणोः** (१-३-१३) भावकर्मणोरात्मनेपदं स्यात् । भावे-भूयते शय्यते, कर्मणि-क्रियते लिख्यते पठ्यते । **कर्तरि कर्मव्यतिहारे** (१-३-१४) कर्मव्यतिहारः क्रियाविनिमयः, अन्यस्य क्रियाया अन्येन करणम् । क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात् । सर्वेषु धातुषु व्यतियोगे क्रियाविनिमयो द्योत्यते तत्रात्मनेपदम् । व्यतिभवन्ते (अन्यस्य योग्यं भवनमन्यः करोति), एवं व्यतिलुनीते व्यतिपद्यते व्यतिलिखते व्यतिभाते । **न गतिहिंसार्थेभ्यः** (१-३-१५) गत्यर्थेभ्यो हिंसार्थेभ्यश्च कर्मव्यतिहारे आत्मनेपदं न स्यात् । पूर्वेण प्राप्ते निषेधः । व्यतिगच्छति, व्यतिसर्पति, व्यतिहन्ति व्यतिहिंसन्ति । **प्रतिषेधे हसादीनामुपसंख्यानम्** (वा) हसादयो हसप्रकाराः शब्दक्रियाः । व्यतिहसन्ति व्यतिजल्पन्ति व्यतिपठन्ति । **हरतेरप्रतिषेधः** (वा) सम्प्रहरन्ते (परस्परं प्रहरन्ति) राजानः । **इतरेतरान्योन्योपपदाच्च** (१-३-१६) इतरेतरान्योन्योपपदाद्धातोः कर्मव्यतिहारे आत्मनेपदं न स्यात् । **परस्परोपपदाच्चेति वक्तव्यम्** (वा) इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनन्ति ।

वि॰ परस्परकरणमपि कर्मव्यतिहार इति कैयटः, तेन संप्रहरन्ते राजान इत्यत्राप्यात्मनेपदम् । गतिहिंसार्थेभ्य इत्यत्रार्थग्रहणसामर्थ्याद्ये शब्दान्तरमनपेक्ष्य गतिहिंसयोर्वर्तन्ते त एवेह गृह्यन्ते, हरतिस्तूपसर्गवशाद्धिंसायां प्रवर्तत इति तस्याऽप्रतिषेधमाह हरतेरप्रतिषेध इति । इतरेतरादियोगे तैरेव शब्दैः कर्मव्यतिहारस्य बोधितत्वात्तद्योतकमात्मनेपदं कथं प्राप्नोतीति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...त्राहुः लौकिके व्यवहारे लाघवानादरादात्मनेपदं प्रसज्येतेति निषेधारम्भः, अतएव व्यतिलुनीते कर्मव्यतिहारबोधनाय ...त्युपसर्गाद्वात्मनेपदं च समुच्चित्य प्रयुज्यते इति।

नेर्विशः (१-३-१७) नेः परस्माद्विशतेरात्मनेपदं स्यात्। निविशते अभिनिविशते। नेत्युपसर्गग्रहान्नेह मधूनि विशन्ति भ्रमराः। **परिव्यवेभ्यः क्रियः** (१-३-१८) परिव्यवेभ्य उत्तरात्क्रीणातेरात्मनेपदं स्यात्। ञित्त्वात्कर्त्रभिप्राये तङि सिद्धे अकर्त्रभिप्रायार्थमिदम् परिक्रीणीते विक्रीणीते अवक्रीणीते। **विपराभ्यां जेः** (१-३-१९) विपरापूर्वाज्जयतेरात्मनेपदं स्यात्। विजयते (उत्कृष्टो भवति)। पराजयते (निकृष्टो भवति)। **आङो दोऽनास्यविहरणे** (१-३-२०) आङ्पूर्वाद्ददातेर्मुखविकसनादन्यत्रार्थे वर्तमानादात्मनेपदं स्यात्। विद्यामादत्ते (गृह्णाति), आस्यविहरणे तु नेह–मुखं व्याददाति। आस्यग्रहणमविवक्षितं, तेनेहापि न विपादिकां व्याददाति (पादस्फोटं क्षारादिना विदारयति), नदीकूलं व्याददाति (भिनत्ति)। **पराङ्गकर्मकान्न निषेधः** (वा) पिपीलिकाः पतङ्गस्य मुखं व्याददते (विकासयन्ति)। **क्रीडोऽनुसंपरिभ्यश्च** (१-३-२१) अनुसंपरिभ्यः चादाङ उत्तरात्क्रीडतेरात्मनेपदं स्यात्। अनुक्रीडते परिक्रीडते, आक्रीडते।

वि० १. इत्युक्त्वा मैथिलीभर्तुरङ्के निविशती भयादित्यत्र तु अङ्गानि विशती भयादिति पाठ्यम् अन्यथा शतुरनुपपत्तेः स्यात्, पदसंस्कारपक्षे न दोष इति तु न वाच्यम्, तथात्वे त्वं करोति भवान् करोषीत्यादेरपि साधुत्वापत्तेः। ...न्युदस्यामतनुर्न्यविक्षत इत्यत्र कथमात्मनेपदमटा व्यवधानात्, नच स्वाङ्गमव्यवधायकम्, अङ्गभक्तस्याटो विकरणस्येवास्यावयवत्वेपि धातोरनवयवत्वादिति चेदत्राहुः लावस्थायामडागम इति भाष्यमते न कश्चिद्दोषः, मतान्तरे तु ...व्यवायेप्युपसंख्यानमिति वार्तिकमिति तत्त्वबोधिनीकारः।

वि० २. अनोः कर्मप्रवचनीयत्वे क्रीडतेर्नात्मनेपदमुपसर्गेण समा साहचर्यात्, माणवकमनु (माणवकेन सह) ...ति। **समोऽकूजने** (वा) संक्रीडते। कूजने तु चक्रं संक्रीडति (कूजति)। **आगमेः क्षमायाम्** (वा) ण्यन्तस्येदं ...म्। आगमयस्व तावत् (मा त्वरिष्ठाः)। **शिक्षेर्जिज्ञासायाम्** (वा) **शिक्ष** विद्योपादाने इत्यस्यानुदात्तेत्त्वात्मनेपदसिद्धेः शिक्षेरिति शक्नोतेः सन्नन्तस्येह ग्रहः। धनुषि शिक्षते (धनुर्विषयज्ञाने शक्तो भवितुमिच्छति)। **...शिषि नाथः** (वा) आशिष्येवेति नियमार्थमिदम् सर्पिषो नाथते (सर्पिर्मे स्यादित्याशास्ते), नाथसे किमुपतिं नभूभुजामित्यत्र ...नाथसे इति पाठ्यम्। **हरतेर्गतताच्छील्ये** (वा) गतं प्रकारः। पैतृकमश्वा अनुहरन्ते मातृकं गावः (पितुर्मातुः प्रकारं ...परिशीलयन्ति), अताच्छील्ये तु न, मातुरनुहरति। **किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्** (वा) ...षो विषयाः, तत्र हर्षो विक्षेपस्य कारणमितरे फले। अपाच्चतुष्पाच्छकुनिष्वालेखने, सुडपि हर्षादिष्वेव वक्तव्य इति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुट् अपस्किरते वृषो हृष्टः (हर्षाद्भूमिं लिखन्धूल्यादि क्षिपति) अपस्किरते कुक्कुटो भक्ष्यार्थी, अपस्किरते श्वा आश्रयार्थी। हर्षादिष्वित्युक्तेर्नेह तङ् सुट् च अपकिरति कुसुमम्। (विक्षिपति)। हर्षादिमात्रविवक्षायां तङ् प्राप्तोपि सुडभावे नेष्यत इत्याहुः, तेनेह न-गजोऽपकिरति। **आङि नुप्रच्छ्योः** (वा) आनुते शृगालः (उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थ इति कैयटः) आपृच्छते। **शप उपालम्भे** (वा) शपतेराक्रोशार्थात्स्वरितेतोऽकर्तृगेपि फले शपथरूपेर्थे आत्मनेपदमित्यर्थः। कृष्णाय शपते (उपालभते) नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामि इत्यत्र तु स्वाशयं प्रकाशयामीत्यत्यर्थो नतु शपथ इति न तङित्याहुः।

समवप्रविभ्यः स्थः (१-३-२२) एभ्यस्तिष्ठतेरात्मनेपदं स्यात्। सन्तिष्ठते (समाप्यते), लुङि समस्थित-स्थिषाताम्-षत स्थाघ्वोरिच्चेतीत्वम्। अवतिष्ठते वितिष्ठते (वर्तते) प्रतिष्ठते (गच्छति)। **आङः प्रतिज्ञायामुपसंख्यानम्** (वा) शब्दं नित्यमातिष्ठते (नित्यत्वेन प्रतिजानीते)। **प्रकाशनस्थेयाख्ययोश्च** (१-३-२३) स्वाभिप्रायकथनं प्रकाशनम्, स्थेयो विवादपदनिर्णीतस्याख्यानम्। अनयोरर्थयोस्तिष्ठतेरात्मनेपदं स्यात्। गोपी कृष्णाय तिष्ठते (आशयं प्रकाशयति) संशय्य कर्णादिषु तिष्ठते यः (कर्णादीन्निर्णेतृत्वेनाश्रयति)। **उदोऽनूर्ध्वकर्मणि** (१-३-२४) उत्पूर्वात्तिष्ठतेरनूर्ध्वकर्मणि वर्तमानादात्मनेपदं स्यात्। मुक्तावुत्तिष्ठते, कुटुम्बे उत्तिष्ठते (तदर्थं यतते)। **ईहायामेव** (वा) ईहा परिस्पन्दः, नेह ग्रामाच्छतमुत्तिष्ठति (उत्पद्यते)। अनूर्ध्वेत्युक्तेर्नेह—पीठादुत्तिष्ठति। **उपान्मन्त्रकरणे** (१-३-२५) उपपूर्वात्तिष्ठतेर्मन्त्रकरणेर्थे वर्तमानादात्मनेपदं स्यात्। आग्नेय्या आग्नीध्रमुपतिष्ठते। ऐन्द्र्या गार्हपत्यमुपतिष्ठते (मन्त्रेण स्तौति)। मन्त्रकरण इत्युक्तेर्नेह-भर्तारमुपतिष्ठति यौवनेन। **उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्** (वा) आदित्यमुपतिष्ठते (स्तुत्यादिभिः पूजयति), गङ्गा यमुनामुपतिष्ठते (उपश्लिष्यति), रथिकानुपतिष्ठते अश्वारोहानुपतिष्ठते (मित्रीकरोति), पन्थाः स्रुघ्नमुपतिष्ठते (प्राप्नोति)। **वा लिप्सायामिति वक्तव्यम्** (वा) भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा (लिप्सयोपगच्छति)। **अकर्मकाच्च** (१-३-२६) उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्। भोजनकाले उपतिष्ठते। (सन्निहितो भवति), यावदोदनमुपतिष्ठते (ओदनसत्तापर्यन्तं सन्निधत्ते)। अकर्मकादित्युक्तेर्नेह-राजानमुपतिष्ठति।

चि० श्लोकै राजानमुपतिष्ठति (स्तौति) इत्यत्र मन्त्रकरणकत्वाभावान्न तङ्। स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती इति तु देवतात्वारूपत्वात्, नाविष्णुः पृथिवीपतिरिति नृपस्य देवांशत्वाद्वा देवपूजायामात्मनेपदम्। "बहूनामप्यचित्तानामेको भवति चित्तवान्, पश्य वानरसैन्येस्मिन्यदर्कमुपतिष्ठते, मैवं मंस्थाः सचित्तोयमेषोपि हि यथा वयम्, एतदप्यस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदर्कमुपतिष्ठते'' इति भाष्ये उदाहृतम्; ''पूर्वत्र देवपूजां मत्वात्मनेपदं कृतम्, चापलमेतन्न पूजनमिति न परत्र'' इति कैयटः।

उद्विभ्यां तपः (१-३-२७) उद्विभ्यामुत्तरात्तपतेरकर्मकादात्मनेपदं स्यात्। उत्तपते वितपते (दीप्यते)। **स्वाङ्गकर्मकाच्चेति वक्तव्यम्** (वा) स्वमङ्गं स्वाङ्गं, न त्वद्रवमिति परिभाषितम्, उत्तपते वितपते पाणिम् (स्वं पाणिं तापयति), स्वाङ्गकर्मकत्वाभावान्नेह–सुवर्णमुत्तपति (सन्तापयति विलापयति वा), चैत्रो मैत्रस्य पाणिमुत्तपति (तापयति)। **आङो यमहनः** (१-३-२८) आङ्पूर्वाभ्यामाभ्याम-कर्मकाभ्यां स्वाङ्गकर्मकाभ्यां चात्मनेपदं स्यात्। आयच्छते (दीर्घीभवति) रज्जुः, आहते (पीडयति) स्वोदरम्। नेह–परस्य शिर आहन्ति, आयच्छति कूपाद्रज्जुम्। आहनो लुङि तङि **आत्मनेपदेष्वन्यतरस्याम्** (२-४-४४) हनो वधादेशो वा स्याल्लुङि आत्मनेपदेषु परेषु। आवधिष्ट-धिषाताम्-षत। वधादेशाभावे **हनः सिच्** (१-२-१४) हनः सिच् कित्स्यात्। इति कित्त्वे अनुदात्तोपदेशेत्यनुनासिक-लोपः आहत-हसाताम्-सत। यमो लुङि तङि **यमो गन्धने** (१-२-१५) गन्धनं सूचनं परदोषाविष्करणम्, तत्र यमः सिच् कित्स्यात्। इति कित्त्वेनुदात्तोपदेशेति मकारलोपः उदायत (परदोषमाविश्चक्रे), गन्धनाभावान्नेह–पादमुदायत (आकृष्टवान्)।

वि० आजघ्ने विषमविलोचनस्य वक्षः इति भारवेः, आहध्वं मा रघूत्तममिति भट्टेः पराङ्गकर्मकत्वे आत्मनेपद-प्रयोगस्तु प्रमाद इति भागवृत्तिकारः; किंवा प्राप्येत्यध्याहारेण वक्षः प्राप्य रघूत्तमं प्राप्येति प्राप्तिक्रियां प्रत्येव तस्य कर्मत्वेन हनोऽकर्मकत्वात्, वस्तुतो हननक्रियां प्रति तयोः कर्मत्वेपि तस्या विवक्षयाऽकर्मकत्वात्; सकर्मकस्याप्यविवक्षयाऽकर्मकत्वं भवत्येवेति आत्मनेपदं समर्थनीयम्। प्राप्येत्यध्याहारे प्रासादात्प्रेक्षते इत्यादाविव ल्यब्लोपे पञ्चमीप्रसङ्गस्तु न यत्र ल्यबन्तं विना तदर्थावगतिस्तादृशेऽर्थाध्याहारस्थले एव ल्यब्लोपे पञ्चमी, अत्र तु शब्दाध्याहारेण तदप्रसङ्गात्, किंवा भेत्तुमिति तुमुन्नन्ताध्याहारेण समर्थनीयम्, किंवा समीपमेत्येत्यध्याहृत्य विषमविलोचनस्य समीपमेत्य स्वस्यैव वक्ष आजघ्ने इति अकर्मकत्वेनोपपादनीयम्।

समो गम्यृच्छिभ्याम् (१-३-२९) सम्पूर्वकाभ्यामकर्मकाभ्यां गम्यृच्छिभ्यामात्मनेपदं स्यात्। सङ्गच्छते (सङ्गतो भवति)। आशिषि लुङि च, **वा गमः** (१-२-१३) गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः। इत्याशिषि कित्वपक्षेऽनुनासिकलोपः सङ्गसीष्ट सङ्गंसीष्ट-सीयास्ताम्-सीरन्, लुङि कित्वपक्षे मकारलोपे ह्रस्वादङ्गादिति सिचो लोपः समगत-गसाताम्-सत, समगंस्त-गंसाताम्-सत। समृच्छते। अकर्मकादित्युक्तेर्नेह तङ् ग्रामं सङ्गच्छति। **विदिप्रच्छिस्वरतीनामुपसंख्यानम्** (वा) विदीति लुग्विकरणस्य वेत्तेरेवेह ग्रहो व्याख्यानात्। संवित्ते संविदाते **वेत्तेर्विभाषा** (७-१-७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात्। इति पक्षे रुडागमे संविद्रते। सम्पृच्छते। संस्वरते। अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् (वा) तङ्-संशृणुते संपश्यते।

वि० १. समोगम्यृच्छिभ्यामित्यत्र अकर्मकादित्यनुवृत्तेस्तदनुगतवार्तिकोपि तद्युज्यते, तेन रक्षांसीति पुरापि संश्रुणुमहे इतिमुरारिप्रयोगस्तु प्रामादिक इत्याहुः, इति कथयद्भ्य इत्यध्याहारेण वाऽकर्मकत्वमुपपादनीयम्।

वि० २. अस्मिन्नकर्मकाधिकारे हनिगम्यादीनां सकर्मकाणामकर्मकत्वे इयं व्यवस्था—धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्, प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया। तेन सकर्मकाणामप्येवमकर्मकत्वं भवति। यथा-अर्थान्तरे-वहति भारमिति प्रापणे सकर्मको वहिः स्यन्दनेऽकर्मकः, नदी वहति; कर्मणो धात्वर्थान्तर्भावे-प्राणानां धारणे जीवति, अङ्गानां विक्षेपे नृत्यति; प्रसिद्धेः-मेघो वर्षति अत्र प्रसिद्धतयाऽनुपात्तं कर्मजलम्; अप्रसिद्धं तु प्रयोज्यं-रुधिरं वर्षति, शरान्वर्षति; अविवक्षया-हितान्न यः संश्रुणुते स किम्प्रभुः, अत्र स्वहितं कर्म प्रतीयमानतया न विवक्ष्यते; एवं च हनिगम्यादीनां सतोपि कर्मणोऽविवक्षयाऽकर्मकत्वं सम्पद्यते। उक्तं च भाष्यकृता उद्विभ्यां तप इत्यत्र—"अन्तरेणापि कर्म सकर्मका अकर्मका भवन्ति, तद्यथा नदी वहतीत्यकर्मकः भारं वहतीति सकर्मकः" इति।

उपसर्गादस्यत्यूह्योर्वेति वाच्यम् (वा) अकर्मकादिति निवृत्तम्, सोपसर्गयोरनयोः सकर्मकत्वनियमात्। बन्धं निरस्यति निरस्यते वा, पाठमभ्यस्यति अभ्यस्यते वा, अग्निं समूहति समूहते वा (संमार्ष्टि)। **उपसर्गाद्ध्रस्व ऊहतेः** (२-४-२३) सोपसर्गस्योहतेर्ह्रस्वः स्याद्यादौ किङ्ति। ब्रह्म समुह्यात् (सम्यग्विचारयेत्), अग्निं समुह्य (संमृज्य)। **निसमुपविभ्यो ह्वः** (१-३-३०) एभ्यो ह्वयतेरात्मनेपदं स्यात्। कर्त्रभिप्राये फले ञित्वादेव सिद्धेरकर्त्रभिप्रायार्थोयमारम्भः। निह्वयते संह्वयते उपह्वयते विह्वयते। **स्पर्धायामाङः** (१-३-३१) आङ्पूर्वात् ह्वयतेरात्मनेपदं स्यात्स्पर्द्धायाम्। अकर्त्रभिप्रायार्थोयम्। कृष्णश्चाणूरमाह्वयते, छात्रश्छात्रमाह्वयते (स्पर्द्धयाऽऽकारयति)। स्पर्धायामित्युक्तेर्नेह-पुत्रमाह्वयति। **गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः** (१-३-३२) गन्धनादिषु वर्तमानात्कृञ आत्मनेपदं स्यात्। अकर्त्रभिप्रायार्थमिदम्, गन्धने (हिंसायाम्)—उत्कुरुते (सूचयति-दोषमाविष्करोति) सूचनं प्राणवियोगानुकूलत्वाद्धिंसैव। अवक्षेपणे (भर्त्सने)-श्येनो वर्तिकामुदाकुरुते (भर्त्सयति) सेवने हरिमुपकुरुते (सेवते)। साहसिक्ये-परदारान्प्रकुरुते (तेषु सहसा-प्रवर्तते)। प्रतियत्ने (गुणाधाने)—एधोदकस्योपस्कुरुते, भाण्डं गुडस्योपस्कुरुते (गुणमाधत्ते)। उपात्प्रतियत्नेति सुट्। प्रकथने-गाथाः प्रकुरुते। उपयोगे-शतं प्रकुरुते (धर्मार्थं विनियुङ्क्ते)। गन्धनेत्याद्युक्तेर्नेह-कटं करोति। **अधेः प्रसहने** (१-३-३३) प्रसहनार्थादधिपूर्वात्करोतेरात्मनेपदं स्यात्। प्रसहनं क्षमाऽभिभवश्च। शत्रुमधिकुरुते (क्षमतेऽभिभवति वा)। **वेः शब्दकर्मणः** (१-३-३४) शब्दकर्मकाद्वि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वात्क्रम आत्मनेपदं स्यात्। स्वरान्विकुरुते (उच्चारयति)। अशब्दकर्मत्वे तु न-चित्तं विकरोति कामः। **अकर्मकाच्च** (१-३-३५) अकर्मकाद्विपूर्वात्कृञ आत्मनेपदं स्यात्। छात्रा विकुर्वते, (विकृता भवन्ति), विकुर्वते सैन्धवाः। **संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः** (१-३-३६) एष्वर्थेषु नयतेरात्मनेपदं स्यात्। अत्रोत्सञ्जन-ज्ञान-विगणन-व्यया नयतेर्वाच्या, इतरे प्रयोगनिमित्त-तया द्योत्या उपाधयः; अकर्त्रभिप्रायार्थमिदम्। संमानने (पूजने)-शास्त्रे नयते (शास्त्रसिद्धान्तं शिष्येभ्यः प्रतिपादयति), तेन शिष्यसंमाननं फलति। उत्सञ्जने (उत्क्षेपणे)-दण्डमुन्नयते (उत्क्षिपति) आचार्यकरणे-माणवकमुपनयते (विधिनात्मसमीपं प्रापयति), उपनयनपूर्वकेणाध्यापनेनोपनेतरि आचार्यत्वं क्रियते। ज्ञाने-तत्वं नयते (निश्चिनोति), भृतौ-कर्मकरानुपनयते (भृतिदानेनात्मसमीपं प्रापयति)। विगणने (ऋणादेर्निर्यातने)-करं विनयते (राज्ञे देयं भागं परिशोधयति) व्यये (धर्मादिषु विनियोगे)-शतं नयते (धर्मार्थं विनियुङ्क्ते)।

टि० उपनयनं बटुसंस्कारः नह्युपनयनमात्रेणाचार्यत्वं भवति किन्तु तत्पूर्वकेणाध्यापनेत्याचार्यकरणस्य प्रयोगोपाधित्वं ... ज्ञेयम्, विधिनोपनीयाध्यापनादाचार्यत्वं सम्पद्यते, उक्तं च "उपनीयतु यः शिष्यं वेदमध्यापयेद्द्विजः, सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इति। **कर्तृस्थे चाशरीरे कर्मणि** (१-३-३७) नियः कर्तृस्थे कर्मणि यदात्मनेपदं तच्छरीरावयवभिन्न एव स्यात्। शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते (अपगमयति) तत्फलस्य चित्त-... कर्तृगतत्वात्स्वरितञित इत्येव सिद्धे नियमार्थमिदम्, तेनेह न-गडुं विनयति, गडोः शरीरावयवत्वान्नेह तङ्। ... नयन्ति पौरुषमिति तु कर्तृगामित्वाविवक्षयोपपादनीयम्।

वृत्तिसर्गतायनेषु क्रमः (१-३-३८) वृत्त्यादिष्वर्थेषु क्रमेरात्मनेपदं स्यात्। वृत्तिरप्रतिबन्धः। ... ऋचि क्रमते बुद्धिः (न प्रतिहन्यते)। सर्ग उत्साहः अध्ययनाय क्रमते (उत्सहते)। तायनं वृद्धिः अस्मिन् शास्त्राणि क्रमन्ते (स्फीतानि भवन्ति)। अन्यत्र तु अवक्रामति। **उपपराभ्याम्** (१-३-३९) वृत्त्यादिषु उपपरापूर्वादेव सोपसर्गात्क्रमेरात्मनेपदं स्यान्नतूपसर्गान्तरपूर्वात्। उपक्रमते पराक्रमते। अन्यत्र तु न-संक्रामति। **आङ उद्गमने** (१-३-४०) आङ्पूर्वात्क्रमेरुद्गमनेऽर्थे आत्मनेपदं स्यात्। सूर्य आक्रामते (उदयते)। **ज्योतिरुद्गमन इति वाच्यम्** (वा) नेह-आक्रामति (उद्गच्छति) धूमो हर्म्यतलात्। **वेः पादविहरणे** (१-३-४१) विपूर्वात्क्रमेः पादविहरणेऽर्थे आत्मनेपदं स्यात्। वाजी साधु विक्रमते (सम्यक्पदानि विक्षिपति), अन्यत्र न-सन्धिर्विक्रामति (द्विधाभवति-स्फुटति)। **प्रोपाभ्यां समर्थाभ्याम्** (१-३-४२) समर्थौ तुल्यार्थौ शकन्ध्वादित्वात्पररूपम्, प्रारम्भेऽनयोस्तु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यार्थता। प्रारम्भेऽर्थे वर्तमानात्प्रोपपूर्वात्क्रमेरात्मनेपदं स्यात्। प्रक्रमते उपक्रमते (प्रारभते), अर्था-न्तरे तु न-प्रक्रामति (गच्छति), उपक्रामति (आगच्छति)। **अनुपसर्गाद्वा (१-३-४३)** अनुपसर्गा-त्क्रमेरात्मनेपदं वा स्यात्। क्रामति क्रमते। अप्राप्तविभाषेयम् वृत्त्यादौ पूर्वविप्रतिषेधान्नित्यमेव।

वि० क्रमेर्वृत्तिसर्गतायनेषु अनुपसर्गादुपपरापूर्वाच्च, ज्योतिरुद्गमने आङ्पूर्वात्, पादविहरणे विपूर्वात्, प्रारम्भे प्रोपपूर्वाच्च नित्यमात्मनेपदं, वृत्त्यादिभ्योन्यत्रानुपसर्गादात्मनेपदं वा, अन्यत्र शेषात्कर्तरीति परस्मैपदमेवेति विवेकः। क्रमेः पादविक्षेपार्थ एव पाठेपि धातूनामनेकार्थत्वादुपसर्गयोगेऽर्थान्तरत्वाच्च यथाव्यवहारमर्थविशेषाः।

अपन्हवे ज्ञः (१-३-४४) जानातेरपन्हवेर्थे वर्तमानादात्मनेपदं स्यात्। शतमपजानीते (अप-लपति), सहस्रमपजानीते। **अकर्मकाच्च (१-३-४५)** अकर्मकाज्जानातेरात्मनेपदं स्यात्। अकर्त्रभिप्रा-यार्थमिदं, कर्त्रभिप्राये त्वनुपसर्गाज्ज्ञ इति वक्ष्यते। सर्पिषो जानीते (सर्पिषोपायेन प्रवर्तते), सकर्मके तु परस्मैपदम्, स्वरेण पुत्रं जानाति। **संप्रतिभ्यामनाध्याने (१-३-४६)** आध्यानमुत्कण्ठापूर्वकं स्मरणम्, अनाध्यानेर्थे वर्तमानात्संप्रतिपूर्वाज्जानातेरात्मनेपदं स्यात्। सकर्मकार्थमिदम्। शतं संजानीते (अवेक्षते) शतं प्रतिजानीते (अङ्गीकरोति) **अनुपसर्गाज्ज्ञः (१-३-७६)** अनुपसर्गाज्जानातेः कर्त्रभिप्राये फले आत्मनेपदं स्यात्। गां जानीते अश्वं जानीते। अनुपसर्गादित्युक्तेर्नेह-स्वं लोकं प्रजानाति।

वि० अनुपर्गाज्ज्ञ इत्येव सिद्धे अकर्मकाच्चेति सोपसर्गार्थम्, तेन सर्पिषोनुजानीते इति कश्चित्। सम्प्रतिभ्यामित्यत्र अनाध्यान इतियोगो विभज्यते, तत्सामर्थ्यादकर्मकाच्चेति प्राप्तिरपि बाध्यते, मातरं मातुर्वा सञ्जानाति कर्मणः शेषत्वविवक्षायां षष्ठी। अनुपूर्वकजानातेः सकर्मकतया अकर्मकाच्च अनुपसर्गाज्ज्ञ इत्यनयोरप्रवृत्त्या इत्थं नृपः पूर्वमवालुलोचे ततोनुजज्ञे गमनं सुतस्येति भट्टिप्रयोगस्तु नृपइत्यस्य नृपेणेति विपरिणामेन कर्मणि लिटोपपाद्यम्।

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (१-३-४७) एषु वदेरात्मनेपदं स्यात्। उपसंभाषोपमन्त्रणे धातोर्वाच्ये इतरे प्रयोगोपाधयः। भासने (आक्षेपसमाधानाय नवयुक्त्युल्लेखे)-शास्त्रे वदते (भासमानो ब्रवीति), उपसम्भाषायाम् (उपसान्त्वने)-भृत्यानुपवदते (सान्त्वयति), ज्ञाने-शास्त्रे वदते (ज्ञात्वा व्यवहरति), यत्ने-क्षेत्रे वदते (सयत्नं ब्रवीति), विमतौ-क्षेत्रे विवदन्ते (विरुद्धं वदन्ति), उपमन्त्रणे (उपच्छन्दने)-उपवदते (प्रार्थयते)। **व्यक्तवाचां समुच्चारणे (१-३-४८)** मनुष्यादीनां व्यक्तवाचां समुच्चारणे (सम्भूयोच्चारणे) वर्तमानाद्वदेरात्मनेपदं स्यात्। संप्रवदन्ते ब्राह्मणाः, संप्रवदन्ते क्षत्रियाः। व्यक्तवाचामित्युक्तेर्नेह-वरतनु संप्रवदन्ति कुक्कुटाः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुच्चारण इत्युक्ता बहुत्व एवेदम्, नेह-ब्राह्मणो वदति। अनोरकर्मकात् (१-३-४६) व्यक्तवाग्वि-षयादनुपूर्वाद्वदेरात्मनेपदं स्यात्। अनुवदते कठः कलापस्य। अनुः सादृश्ये, यथा कलापोऽधीयमानो वदति तथा कठ इत्यर्थः। अकर्मकादित्युक्तेर्नेह-उक्तमनुवदति। व्यक्तवाचामित्युक्तेर्नेह-अनुवदति वीणा। विभाषा विप्रलापे (१-३-५०) विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे आत्मनेपदं वा स्यात्। विप्रवदन्ते विप्रवदन्ति वा वैद्याः। युगपत्परस्परविप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः। अपाद्वदः (१-३-७३) कर्त्रभिप्राये अपाद्वदेरात्मनेपदं स्यात्। न्यायमपवदते (वदनेन निरस्यति)। अकर्त्र-भिप्राये तु अपवदति।

---

१० व्यक्तवाचो हि मनुष्याः प्रसिद्धाः, तेषां वाग्वर्णात्मकत्वादर्थावगतिहेतुत्वाच्च व्यक्ततरा भवति, शुकसारिकादीनां प्रयत्नवशेन क्वाचित्कमेव व्यक्तवाक्त्वं न स्वाभाविकमिति न तेषां ग्रहणमिति पदमञ्जरीकारः।

अवाद्ग्रः (१-३-५१) अवपूर्वाद्गिरतेरात्मनेपदं स्यात्। अवगिरते, "गृणातिस्त्ववपूर्वो न प्रयुज्यते" इति भाष्यम्। समः प्रतिज्ञाने (१-३-५२) प्रतिज्ञानार्थात्संपूर्वाद्गिरतेरात्मनेपदं स्यात्। शब्दं नित्यं संगिरते (प्रतिजानीते)। अर्थान्तरे तु संगिरति ग्रासम्। उदश्चरः सकर्मकात् (१-३-५३) सकर्मकादुत्पूर्वा-च्चरतेरात्मनेपदं स्यात्। धर्ममुच्चरते गुरुवचनमुच्चरते (उल्लङ्घ्य गच्छति)। सकर्मकादित्युक्तेर्नेह-वाष्प-मुच्चरति (उद्गच्छति)। समस्तृतीयायुक्तात् (१-३-५४) तृतीयायुक्तात्संपूर्वाच्चरतेरात्मनेपदं स्यात्। रथेन सञ्चरते। अश्वेन सञ्चरते। दाणश्च सा चेच्चतुर्थ्यर्थे (१-३-५५) संपूर्वाद्दाणस्तृतीयायुक्तादात्मने-पदं स्यात्, सा तृतीयाचतुर्थ्यर्थे चेत्। दास्या संयच्छते (दास्यै ददाति) अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्येति तृतीया। समस्तृतीयायुक्तात् दाणश्च साचेदिति सूत्रद्वयं व्यवहितेपि प्रवर्तते रथेन समुदाचरते, दास्या संप्रयच्छते। उपाद्यमः स्वकरणे (१-३-५६) स्वकरणे (स्वीकारे) वर्तमानादुपपूर्वाद्यमः आत्मनेपदं स्यात्। भार्यामुपयच्छते (भार्यात्वेन स्वीकरोति) लुङि-विभाषो-पयमने (१-२-१६) यमः सिच् किद्वा स्यात् विवाहे। इति कित्वपक्षेऽनुनासिकलोपे रामः सीता-मुपायत, उपायंस्त वा (उदवोढ), गन्धनाङ्गे उपयमे (हिंसापूर्वकराक्षसविवाहे) तु पूर्वविप्रतिषेधेन यमो गन्धन इति नित्यं कित्वम्। समुदाङ्भ्यो यमोऽग्रन्थे (१-३-७५) समुदाङ्पूर्वकाद्यच्छतेरात्मने-पदं स्यात् ग्रन्थविषयकः प्रयोगो न चेत्। व्रीहीन्संयच्छते (संगृह्णाति), भारमुद्यच्छते (उद्गृह्णाति) वस्त्रमायच्छते (कट्यादौ निबध्नाति)। ग्रन्थे तु न उद्यच्छति वेदम् (अधिगन्तुमुद्युङ्क्ते)। कर्त्र-भिप्राय इत्येव, नेह व्रीहीन्संयच्छति (परार्थं संगृह्णाति। आङोयमहन इत्येव सिद्धे आङ्ग्रहणं सकर्मकार्थम्, तस्य अकर्मकादेव प्रवृत्तेः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० स्वकरण इति पाणिग्रहणविशिष्टं स्वकरणं गृह्यते, न स्वकरणमात्रमिति काशिकाकारः, भाष्यकारस्तु अस्वं यदा स्वं करोति तदा भवितव्यमित्येवाह, तेन उपायंस्त महास्त्राणीति प्रयोग उपपद्यते।

शदेः शित इति शदेः शित्सु, म्रियतेर्लुङ्लिङोश्चेति म्रियतेः शित्सु लुङ्लिङोश्चात्मनेपदं विहितमन्यत्र परस्मैपदमेव, शीयते, म्रियते मृसीष्ट अमृत। आम्प्रत्ययवत्कृञोनुप्रयोगस्येति आम्प्रकृतितुल्यमनुप्रयुज्यमानात्कृञोप्यात्मनेपदं विहितम् एधाञ्चक्रे। **प्रोपाभ्यां युजेरयज्ञपात्रेषु** (१-३-६४) प्रोपपूर्वाद्युजेरात्मनेपदं स्याद्यज्ञपात्रविषयेऽसति,प्रयुङ्क्ते उपयुङ्क्ते। स्वरितत्वादकर्त्रभिप्रायार्थमारम्भेयम्। **स्वराद्यन्तोपसर्गादिति वक्तव्यम्** (वा) उद्युङ्क्ते नियुङ्क्ते अनुयुङ्क्ते। नेह संयुनक्ति। यज्ञपात्रविषये तु न, द्वन्द्वं न्यञ्चि (न्युब्जानि) पात्राणि प्रयुनक्ति। **समः क्ष्णुवः** (१-३-६५) सम्पूर्वात्क्ष्णुधातोरात्मनेपदं स्यात्। शस्त्रं संक्ष्णुते (तेजयति)। **भुजोऽनवने** (१-३-६६) अपालनेवर्तमानाद्भुजेरात्मनेपदं स्यात्। ओदनं भुङ्क्ते (खादति)। अनवने इत्युक्तेर्नेह-महीं भुनक्ति (पालयति)।

वि० भुजपालनाभ्यवहारयोरिति रौधादिकस्यैव भुजेरिह ग्रहो नतु भुजो कौटिल्ये इति तौदादिकस्यापीति भाष्यम्, तेनेह न, पाणिं विभुजति (कुटिलयति)। बुभुजे पृथिवीपाल पृथिवीमेव केवलाम्, वृद्धो जनो दुःखशतानि भुङ्क्ते इत्यादावुपभोग एव भुजेरर्थो नतु पालनमिति तङ्।

प्रयोगाः—निविशते यदि शूकशिखा पदे। आदत्ते हि रसं रविः। सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः। जानेऽतिरागादिदमेव विम्बम्। दिवं मरुत्वानिव भोक्ष्यते भुवम्। ईहाञ्चक्रे जनो हितम्। रामः सीतामुपायंस्त। मिथोविवदमानयोः। पराक्रमन्ते वीरास्ते। वीरो वीरमाह्वयते। मूलस्योपस्कुरुते व्याख्या। सङ्गच्छते वायुना। आदित्यमुपतिष्ठते। ततः प्रतस्थे कौवेरीम्।

परस्मैपदम्—

शेषात्कर्तरि परस्मैपदम् (१-३-७८) याति भवति विशति गच्छति। अत्र कर्तरीत्यनुवृत्तेः कर्तैव यः कर्ता इति व्याख्यानात्कर्मकर्तरि न परस्मैपदम्। **अनुपराभ्यां कृञः** (१-३-७९) अनुपरापूर्वात्कृञः कर्तरि परस्मैपदं स्यात्। कर्तृगेपि फले, गन्धनादौ च परस्मैपदार्थमिदम्। अनुकरोति पराकरोति। **अभिप्रत्यतिभ्यः क्षिपः** (१-३-८०) एभ्यः परस्मात्क्षिपतेः परस्मैपदं स्यात्। अभिक्षिपति प्रतिक्षिपति अतिक्षिपति। अन्यत्र तु आक्षिपति-ते। **प्राद्वहः** (१-३-८१) प्राद्वहतेः परस्मैपदं स्यात्। प्रवहति कर्त्रभिप्रायार्थमिदम्। **परेर्मृषः** (१-३-८२) परिपूर्वान्मृष्यतेः परस्मैपदं स्यात्। परिमृष्यति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याङ्परिभ्यो रमः (१-३-८३) एभ्यो रमेः परस्मैपदं स्यात्। विरमति आरमति परिरमति। उपाच्च (१-३-८४) उपाद्रमतेः परस्मैपदं स्यात्। उपरमति। अन्यत्र तु संरमते। विभाषाऽकर्मकात् (१-३-८५) उपपूर्वादकर्मकाद्रमतेः परस्मैपदं वा स्यात्। यावद्भुक्तमुपरमति उपरमते वा (निवर्तते)। वा क्यषः (१-३-९०) क्यषन्तात्परस्मैपदं वा। लोहितायति लोहितायते वा।

वि० कर्मवत्कर्मणेत्यतिदेशः-आत्मनेपदरूपकार्यातिदेश भावकर्मणोरिति विधायकशास्त्रातिदेश इति पक्षद्वये शास्त्राति- कार्यातिदेशार्थत्वेन कार्यातिदेशस्यैव मुख्यतया तत्पक्षे कर्मकर्तरि कर्मवत्कर्मणेति विहितेन परेणात्मनेपदेन अनुपराभ्या- परस्मैपदस्य बाधान्नास्य प्रवृत्तिः, शास्त्रातिदेशपक्षे तु भावकर्मणोरिति शास्त्रेणैव तत्राप्यात्मनेपदविधानात्तदपेक्षया राभ्यामित्यस्य परत्वेन तद्बाधकत्वापत्त्या कर्तरिकर्मव्यतिहारे शेषात्कर्तरीत्यनयोरनुवर्तनेन कर्तैव यः कर्तेति व्याख्याना- न्तरे न परस्मैपदम्।

प्रयोगाः—भागीरथी प्रवहति। अगच्छन्वैनतेयोपि पदमेकं न गच्छति। स ययौ प्रथमं प्राचीम्। कर्मणोस्माद्विरमामि। कार्यादस्माद्विरम विरमातः परं न क्षमं ते। अभिक्षिपति सर्वतः करमसौ व्यथा व्याकुलः। अनुकरोति सुतः पितरं गुणैः। प्रविश झटिति गेहे मा बहिस्तिष्ठ कान्ते।

पदम्—

स्वरितञितः कर्त्रभिप्राये क्रियाफले (१-३-७२) यजति यजते, पचति पचते, करोति कुरुते, ददाति दत्ते। यदर्थं क्रियारम्भस्तदेव प्रधानभूतं क्रियाफलं कर्तरि यदा विवक्ष्यते तदात्मनेपदं यदान्यस्मिन्विवक्ष्यते तदा परस्मैपदम्, क्वचिद्व्यत्ययदर्शनेपि प्रयोगानुसारेण फलविशेषं प्रकल्प्य पदविशेषः सङ्गमनीयः। विभाषोपपदेन प्रतीयमाने (१-३-७७) स्वरितञितः, अपाद्वदः, णिचश्च, समुदाङ्भ्योयमोऽग्रन्थे, अनुपसर्गाज्ज्ञः इति पञ्चसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं यज्ञं यजति यजते वा, स्वं कटं करोति कुरुते वा, स्वं पुत्रमपवदति अपवदते वा, स्वं यज्ञं कारयति कारयते वा, स्वं भारमुद्यच्छति उद्यच्छते वा, स्वां गां जानाति जानीते वा। स्वनिजात्मादिना सन्निहितपदेन क्रियाफलस्य कर्तृगतत्वे बोधिते स्वरितञित इति नित्यमात्मनेपदमपोद्यानेन पदद्वयं विधीयते।

प्रयोगाः—पुत्रार्थमोदनं पचति माता। यः पचत्यात्मकारणात्। यज्वानो यजन्ते। स्वं काव्यं पाठयत्यसौ। अतिथीन्प्रीणयितुं पायसं पचति। यजन्ते नामयज्ञैस्ते। हरिं भज यजामरान्। स्वं पुत्रमपि न परिचिनोति।

नेषु पदम्—

णिचश्च (१-३-७४) णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। तेनाकर्तृगे फले शेषादिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परस्मैपदेन वक्ष्यमाणविशेषवर्जं णावुभयपदम् । कारयति–ते, भावयति-ते । **भीस्म्योर्हेतुभये** (१-३-६८) ण्यन्ताभ्यामाभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ, अकर्त्रभिप्रायार्थमिदम् । मुण्डो भापयते भीषयते वा । बिभेतेर्हेतुभय इत्यात्वपक्षे पुक्, आत्वाभावे भियोहेतुभय इति षुक् । जटिलो विस्मापयते, नित्यं स्मयतेरित्यात्वे पुक् । **गृधिवञ्च्योः प्रलम्भने** (१-३-६९) प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यामात्मनेपदं स्यात् । माणवकं गर्धयते वञ्चयते वा । अप्रलम्भने तु न–श्वानं गर्धयति (अभिकाङ्क्षामुत्पादयति), अहिं वञ्चयति (वर्जयति) । **लियः संमाननशालीनीकरणयोश्च** (१-३-७०) लीङ्लीञोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले, पूजाभिभवयोः, प्रलम्भने चार्थे । जटाभिर्लापयते (पूजामधिगच्छति) श्येनो वर्तिकामुल्लापयते (अभिभवति) बालमुल्लापयते (वञ्चयते) । पूर्वोक्तमपि प्रकरणशुद्धये दृढीकाराय च पुनरुच्यते । **मिथ्योपपदात्कृञोऽभ्यासे** (१-३-७१) ण्यन्तात्कृञो मिथ्योपपदात्मनेपदं स्यादभ्यासे । अकर्त्रभिप्रायार्थमिदम् । पदं मिथ्या कारयते (स्वरादिदुष्टमसकृदुच्चारयति) । मिथ्योपपदाभावे तु न–पदं सुष्ठु कारयति अनभ्यासेऽपि न–सकृत्पदं मिथ्या कारयति ।

वि० **णेरणौ यत्कर्म णौ चेत्सकर्ताऽनाध्याने** (१-३-६७) ण्यन्तादात्मनेपदं स्यात्, अणौ या क्रिया सैव ण्यन्तेनोच्येत, अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यात्, न त्वाध्याने । णिचश्चेति सिद्धे अकर्त्रभिप्रायार्थमिदम्, कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पे अणावकर्मकादिति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमुच्यते । अपरिस्पन्दनसाधनसाध्यो दर्शनश्रवणादिधात्वर्थो भावः, सपरिस्पन्दनसाधनसाध्यः पाकादिधात्वर्थः क्रिया, कर्तृस्थभावकाः कर्तृस्थक्रियाश्चास्योदाहरणानि । कर्तृस्थभावको यथा--पश्यन्ति भवं भक्ताः (चाक्षुषज्ञानविषयं कुर्वन्ति) दृशेश्चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारोऽर्थः, व्यापाराश्रयो भक्तः कर्ता, विषयत्वरूपफलाश्रयो भवः कर्म, इत्येका कक्षा । तत्र सौकर्यातिशयबोधनायाऽनुकूलव्यापारांशस्याऽविवक्षया चाक्षुषज्ञानविषयत्वस्यैव धात्वर्थत्वे तदाश्रयस्य भवस्य कर्तृत्वेन पश्यति भव इति द्वितीया कक्षा । ततो हेतुमण्णिचि दर्शयन्ति भवं भक्ताः (पश्यन्तीत्यर्थः) इति तृतीया कक्षा । णिजन्तार्थे चाक्षुषज्ञानविषयत्वापादनरूपे आपादनांशस्याऽविवक्षायामनेन सूत्रेणात्मनेपदे दर्शयते भव इति चतुर्थी कक्षा । आसु प्रथमतृतीययोश्चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारबोधने, द्वितीयचतुर्थयोश्चाक्षुषज्ञानविषयत्वमात्रबोधेन तुल्योऽर्थः । तत्र तृतीयकक्षायां णिचि प्रथमक्रियासाम्येऽपि अणौ कर्मकारकस्य भवस्य णौ कर्तृत्वाभावान्न तङ् चतुर्थकक्षायां तु णिज्विनाभूतद्वितीयक्रियासाम्यात् प्रथमायां कर्मणो भवस्य कर्तृत्वाच्चानेनात्मनेपदं भवति । कर्तृस्थक्रियो यथा—आरोहन्ति हस्तिनं हस्तिपकाः (न्यग्भावयन्तीत्यर्थः), आरुहेरुपरिभागाक्रमणानुकूलव्यापारो न्यग्भावरूपोऽर्थः, व्यापाराश्रयो हस्तिपकः कर्ता, न्यग्भवनरूपफलाश्रयो हस्ती कर्म, ततोऽनुकूलव्यापारांशत्यागे न्यग्भवनरूपधात्वर्थाश्रयस्य हस्तिनः कर्तृतया आरोहति हस्ती, ततो हेतुमण्णिचि आरोहयन्ति हस्तिनं हस्तिपकाः (आरोहन्तीत्यर्थः), ततो न्यग्भवनानुकूलव्यापाररूपणिजन्तार्थेऽनुकूलव्यापारांशस्याऽविवक्षया न्यग्भवनस्यैव बोधेन तत्र प्रथमक्रियाकर्मणो हस्तिन एव कर्तृतया णिज्विनाभूतद्वितीयकक्षाक्रियासाम्येन चानेनात्मनेपदे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...ह्यते हस्ती। एवमन्यत्राप्यूह्यम्। अनाध्यान इत्युक्त्या नेह—स्मरति वनगुल्मं कोकिलः स्मरयति वनगुल्मः। उक्तं ...निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्। निवर्तमाने कर्मत्वे स्वकर्तृत्वेऽवतिष्ठते इति।

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः (१-३-८६) एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्। णिचश्चेत्यस्यापवादः। तेन कर्तृगेपि क्रियाफले परस्मैपदम्। येऽत्राकर्मकास्तेषामणावकर्मकाच्चित्तवत्कर्तृकादित्येव सिद्धे वचनमिदमचित्तवत्कर्तृकत्वार्थम्। पद्मं बुध्यते-बोधयति पद्मम्। युध्यन्ते काष्ठानि—योधयन्ति काष्ठानि। नश्यति दुःखं—नाशयति दुःखम्। सुखं जायते-जनयति सुखम्। अध्यापयति वेदम्। ये चलनार्थास्तेषां निगरणचलनार्थेभ्यश्चेति सिद्धे यदा न चलनार्थास्तदेदं वचनम्। प्रावयति (प्रापयति) आपो द्रवन्ति द्रावयति अपः। कुण्डिका स्रवति-स्रावयति (स्यन्दयति)। **निगरणचलनार्थेभ्यश्च (१-३-८७)** एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्। कर्त्रभिप्रायार्थम्। निगरणमभ्यवहारः। चलनं कम्पनम्। निगारयति, आशयति, भोजयति, चलयति, कम्पयति। अयमप्यकर्मकार्थोऽचित्तवत्कर्तृकार्थश्च। **अदेः प्रतिषेधः (वा)** निगरणेति प्राप्तस्य निषेधः। आदयते देवदत्तेन। शेषादित्यकर्त्रभिप्राये परस्मैपदं स्यादेव आदयत्यन्नं बटुना। **अणावकर्मकाच्चित्तवत्कर्तृकात् (१-३-८८)** अणावकर्मकाच्चित्तवत्कर्तृकात् ण्यन्तात्परस्मैपदं स्यात्। शेते कृष्णः-तं गोपी शाययति। आस्ते देवदत्तः-तमासयति जनः। चित्तवत्कर्तृकादित्युक्तेर्नेह-शुष्यन्ति व्रीहयः-शोषयते व्रीहीनातपः। अकर्मकादित्युक्तेर्नेह-कटं कारयते। **न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः (१-३-८९)** एभ्यो ण्यन्तेभ्यः परस्मैपदं न स्यात्। कर्तृगे फले पूर्वसूत्रद्वयेनात्मनेपवादपरस्मैपदस्य विधेः प्रतिषेधोयम्। पाययते दमयते आयामयते आयासयते परिमोहयते रोचयते नर्तयते वादयते वासयते। **धेट उपसंख्यानम् (वा)** धापयेते शिशुमेकं समीची। अकर्त्रभिप्राये शेषादिति परस्मैपदं भवत्येव-वत्सान्पाययति पयः, दमयन्ती कमनीयतामदम्, भिक्षा वासयति।

वि० एतेन णिजन्तेषु भीस्म्योर्हेतुभये, गृधिवञ्च्योः प्रलम्भने, लियः संमाननशालीनीकरणयोः, मिथ्योपपदात्कृञोभ्यासे ...भिप्राये कर्त्रभिप्रायेपि तङेव, अणावकर्मकाच्चित्तवत्कर्तृकात् अतथाभूतेभ्योपि बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यः, पा-दम-...यम-आयस-परिमुह-रुचि-नृति-वद-वस-एतद्वर्जं निगरणचलनार्थेभ्यः अणावकर्मकाच्चित्तवत्कर्तृकाच्च कर्तृगेपि फले ...तु सुतरां परस्मैपदमेव, एभ्योन्यत्र णिचश्चेति कर्तृगेफल आत्मनेपदमकर्तृगे परस्मैपदमित्युभयपदमिति निष्कर्षः।

प्रयोगाः—सविता बोधयति पङ्कजान्येव। कुब्जे भोजय माम्। धूर्तो वञ्चयते जनान्। पयः पायय बालकम्। सूर्यस्तमो नाशयति। प्राकम्पयन्मस्तकम्। वाद्यानि वादयाञ्चक्रे। कः स्वां नर्तयते ...प्रियम्। अध्यापयन्ति गुरवः। मुखं शोषयते शुण्ठी। आसयत्सलिले पृथ्वीम्। घृतं वह्नौ द्रावयति। ...जनयन्ति सुतान्गावः। कालो जनान्योधयति। गुरुरस्मान्पाठयते। पित्रे पत्रं प्रेषयामः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्नन्तेषु पदम्—

ज्ञाश्रुस्मृदृशां सनः (१-३-५७) सन्नन्तानामेषामात्मनेपदं स्यात्। धर्मं जिज्ञासते। शुश्रूषते, सुस्मूर्षते, दिदृक्षते। जानातेरपन्हवेञ इत्यादिभिस्त्रिभिः, श्रुदृशोरर्तिश्रुदृशिभ्यश्चेति तङो विधानात्त-द्विषये पूर्ववत्सन इत्येव सिद्धेस्ततोऽन्यत्रानेन विधीयते, स्मरतेस्त्वप्राप्तौ विधिः। **नानोर्ज्ञः** (१-३-५८) अनुपूर्वाज्जानातेः सन्नन्तादात्मनेपदं न स्यात्। पुत्रमनुजिज्ञासति। पूर्वसूत्रोक्तस्यैवायं निषेधोऽनन्त-रस्येति न्यायात्, तेनेह न-सर्पिषोऽनुजिज्ञासते अकर्मकाच्चेति केवलात्तङो विधानात्पूर्ववत्सन इति तङ्। **प्रत्याङ्भ्यां श्रुवः** (१-३-५९) प्रत्याङ्पूर्वकाच्छ्रृणोतेः सन्नन्तादात्मनेपदं न स्यात्। प्रतिशुश्रूषति आशुश्रूषति। प्रत्याङौ उपसर्गाविवेह गृह्येते तेन कर्मप्रवचनीयस्थले स्यादेव देवदत्तं प्रतिशुश्रूषते। **पूर्ववत्सनः** (१-३-६२) सनः पूर्वो यो धातुरात्मनेपदी तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। एदिधिषते शिशयिषते, निविविक्षते, आत्रिकंसते। पूर्ववदित्युक्तेर्नेह-बुभूषति पिपासति। शदेःशितः म्रियतेर्लुङ्लिङोश्चेति तङ्विध्योः सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्यानान्नेह-शद-शिशत्सति, मृङ् मुमूर्षति।

वि० एतेन सन्नन्तेषु अनुपूर्वकभिन्नज्ञा-प्रत्याङ्पूर्वकेतर श्रु-दृशधातुषु तङेव, शदेःशितः म्रियतेर्लुङ् लिङोश्च सनि परस्मैपदमेव, अन्यत्र मूलधातोर्यथापदमेकमनेकं वा तथैव सन्यपीति निष्कर्षः।

प्रयोगाः—शुश्रूषे वचनं हितम्। माधवस्त्वां दिदृक्षते। गार्हस्थ्ये निविविक्षते। यियासति वनं मुनिः। पिपठिषामि व्याकरणम्। पत्रं लिलेखिषति सः। धनी बुभूषामि चिरं श्रमेण। लिप्सते याचको धनम्। को दित्सति जलं तस्मै। अनुजिज्ञासति गुरुः। जिगामिषति पुरात्पुरं दिदृक्षुः। जिघांसन्न जिघासति। कण्ठे वाचं रुरुत्सति। ब्रह्म जिज्ञासते योगी। आरुरुक्षति मूर्धानम्।

प्रश्नाः—णिजन्तेषु सन्नन्तेषु च किं पदम्। कर्मव्यतिहारः कः तत्र किं पदम्। निविश्-पराजि-सङ्गम् संश्रु-आहन्-आङ्-उपनी-प्रस्था-विरम्-अनुकृञ् धातुषु किं पदम्। स्था-नी-वदधातुषूपसर्गयोगवशेन कीदृशः पदविशेषः। उभयपदं केषु धातुषु। अधस्तनवाक्याख्याते पदविशेषमुपपादयत—जवेन पीठादुदतिष्ठदच्युतः। श्रुतमप्यधिगम्य येरिपून्विनयन्ते न शरीरजन्मनः। प्रियपाणिं मन्दमाक्षिपति। आदित्यमुपतिष्ठते। वसन्ते ब्राह्मणमुपनयीत। ततः प्रतस्थे सौवीरः। व्याददाति मुखं सर्पः। आपृच्छामो वयं गन्तुम्। देवा जानन्ति तद्वृत्तम्। हितान्न यः संश्रृणुते स किं प्रभुः। दैवीं वाचमुपास्महे। माता किञ्चि-द्विवक्षति। लाभाल्लोभो विवर्द्धते। वीरो भटान्योधयति। गुरुरस्मान् प्रबोधयेत्। विवदन्ते पथि छात्राः। वचो नावरुरुत्सति। लाभाल्लोभो विवर्धेत। ते व्यजिज्ञासन्त सद्धर्मम्। हितं शुश्रूषितास्महे। **इति पदव्यवस्थाप्रकरणम्।**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ भावकर्मतिङ्प्रकरणम् ।

सकर्मकेभ्यः कर्तरि कर्मणि च, अकर्मकेभ्यो भावे कर्तरि च वाच्ये लकारा विहिताः, तेषु कर्तरि निरूपिताः, भावकर्मणोरथ निरूप्यन्ते। भूधातोर्भावे लकारे भावकर्मणोरिति तङ् **सार्वधातुके यक्** (३-१-६७) धातोर्यक्प्रत्ययः स्याद्भावकर्मवाचिनि सार्वधातुके परे। इति सार्वधातुके यक्। भावो भावना उत्पादना क्रिया, सा च धातुत्वेन सकलधातुवाच्या भावार्थकलकारेणानूद्यते । तत्र युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् शेषे प्रथमपुरुष एव, तिङ्वाच्यभावनाया असत्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि, किन्त्वेकवचनमेव, तस्यौत्सर्गिकत्वेन संख्यानपेक्षित्वात्। तेन भावे वाच्ये सर्वेषु लकारेषु प्रथमपुरुषैकवचनमेव, तिङा कर्तुरनभिधानादनभिहिते कर्तरि तृतीया। त्वया मया तेन, युवाभ्यामावाभ्यां ताभ्यां, युष्माभिरस्माभिस्तैर्वा भूयते भूयताम् अभूयत भूयेत यकः क्ङित्वान्न गुणः। लिटि द्वित्वादौ वुकि बभूवे। लुटि तासि **स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च** (६-४-६२) उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः, स्यादीनामिट् च। अयमिट् चिण्वद्भावसंनियोगशिष्टत्वात्तदभावे न। इहाऽऽर्धधातुके इत्यधिकृतं सीयुटो विशेषणं, येन विधिलिङि न प्रसङ्गः, नेतरेषामव्यभिचारात्। इति चिण्वद्भावपक्षे इटि च अचोञ्णितीति वृद्धावावादेशेः भाविता, चिण्वद्भावाभावे वलादिलक्षणे इटि गुणावादेशयोः भविता। एवं स्ये आशिषि सीयुटि च भाविष्यते भविष्यते, भाविषीष्ट भविषीष्ट। लुङि च्लौ **चिण्भावकर्मणोः** (३-१-६६) च्लेश्चिण्स्याद्भावकर्मवाचिनि तशब्दे परे। इति चिणि वृद्ध्यावादेशयोः चिणो लुगिति तलोपे अभावि। अभाविष्यत अभविष्यत।

वि० १. भावो नाम फलोत्पत्त्यनुकूलव्यापारः। उक्तं च—व्यापारो भावना सैवोत्पादना सैव क्रियेति। पचादयः धातवो धातुत्वेनोत्पत्त्यनुकूलव्यापाररूपामुत्पादनां, पचित्वादिविशेषरूपेण विक्लित्यादिफलांशमाहुः, तेनोभयमादाय विक्लित्याद्यनुकूलव्यापाराः पचाद्यर्थाः। अकर्मकधातुषु भावे लकारेण स एव धात्वर्थोऽनूद्यते, यथा द्वौ त्रय इत्यादौ संख्यार्थ एव प्रत्ययेनानूद्यते। युष्मदस्मदोस्तिङ्सामानाधिकरण्ये मध्यमोत्तमयोर्विषयतया वाच्यकर्तृकर्मरूपयोरेव तयोस्तत्सामानाधिकरण्येन भावे वाच्ये तदभावाच्छेषेप्रथम इति प्रथम एव पुरुषः, लिङ्गसंख्यान्वययोग्यं द्रव्यं सत्त्वमित्युक्त्याऽसत्त्वरूपायाः क्रियायास्तदन्वयायोग्यतया, भाष्ये द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमिति सूत्रन्यासं भङ्क्त्वा एकवचनं द्विबहुषु द्विबहुवचने इति न्यासेन द्वित्वबहुत्वयोर्द्विबहुवचने अन्यत्रैकवचनमिति द्विबहुवचनाविषये एकत्वाभावेप्यौत्सर्गिकैकवचनविधानेन भावे एकवचनमेव च सर्वेषु लकारेषु भवति।

वि० २. स्यसिचिति चिणि यदङ्गाधिकारविहितं कार्यं तस्यैवातिदेशो न तु चिणि दृष्टमात्रस्य, तेन घानिष्यते इत्यत्र हनो दृष्टो वधादेशः, अध्यायिष्यते इत्यत्र इङो गाङादेशश्च न। साप्तमिके वलादिलक्षणे इटि कृतेपि तस्यासिद्ध्याऽकृतेपि षाष्ठेनानेन विहित इट नित्यो वलादित्वविघातकस्यानित्यस्य वलादिलक्षणेटो बाधकः सन्सर्वत्रानिट्कधातुष्वपि चिण्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्भावस्थलेषु भवति, वलादिलक्षणस्तु चिण्वद्भावाभावे सेट्केष्वेव भवति। चिण्वद्भावे भावीन्यङ्गकार्याणि तु भाविता भाविष्यते इत्यादावचोञ्णितीति वृद्धिः, दायिता दायिषीष्टेत्यादौ आतोयुक्चिण्कृतोरिति युक्, घानिता घानिष्यते इत्यादौ होहन्तेर्ञ्णिन्नेष्विति घत्वं, शामिष्यते शमिष्यते इत्यादौ चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति मितामुपधाया दीर्घविकल्पश्च, शामितेत्यादौ चिण्वदिटोऽसिद्ध्या णेरनिटीति णिलोपः। अयमिट् नित्यो वलादिलक्षणस्य बाधकश्च एतदुक्तं वार्तिककृता—"चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति। इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती" इति। एष इट्सहकृतश्चिण्वद्भावः सूत्रार्थतोऽजन्तधातुषु हलन्तहन्ग्रहदृशधातुष्वेव स्यसिच्सीयुट्तासिषु परेषु भवति नान्यत्र।

अनुभुवः सकर्मकतया कर्मणि वाच्ये भावकर्मणोरिति तङि सार्वधातुकेषु यक्, कर्मणो वाच्यतया तथाभूतयोर्युष्मदस्मदोरपि सामानाधिकरण्यात्पुरुषत्रयं, कर्मणः सत्वरूपत्वेन संख्यान्वयितया वचनत्रयं च। अनुभूयते-येते-यन्ते, अनुभूयताम्-येताम्-यन्ताम्, अन्वभूयत येताम्-यन्त, अनुभूयेत-येयाताम्-येरन्। अनुबभूवे-वाते-विरे, तासादौ चिण्वदिट्, तेन वा दीर्घः। अनुभाविता-अनुभविता-रौ-रः, अनुभाविष्यते-अनुभविष्यते-ष्येते-ष्यन्ते, अनुभाविषीष्ट-अनुभविषीष्ट-षीयास्ताम्-षीरन्, लुङि ते च्लेश्चिणि इटि वृद्ध्यावादेशयोः तलोपः, अन्यत्र सिच् चिण्वदिड्भावौ वृद्धिविकल्पः अन्वभावि अन्वभाविषाताम्-षत, अन्वभविषाताम्-षत; अन्वभाविष्यत-अन्वभविष्यत-ष्येताम्-ष्यन्त। णिजन्ताद्भाविधातोः सकर्मकात्कर्मणि वाच्ये यकि णेरनिटीति णिलोपे भाव्यते-व्येते-व्यन्ते, भाव्यताम्-व्येताम्-व्यन्ताम् अभाव्यत-व्येताम्-व्यन्त, भाव्येत-व्येयाताम्-व्येरन्, भावयाञ्चक्रे-क्राते-क्रिरे भावयाम्बभूवे भावयामासे, इह तस्य एशि इट एत्वे हएतीति सस्य हत्वं तु न, तासि साहचर्यादस्तेरपि व्यतिहे इत्यादौ सार्वधातुक एव तत्प्रवृत्तेरित्याहुः। भाविता चिण्वदिट आभीयत्वेनासिद्धत्वाण्णिलोपः, चिण्वद्भावाभावे इटि भावयिता-रौ-रः, भावयिष्यते-ष्येते-ष्यन्ते, भाविषीष्ट-भावयिषीष्ट-षीयास्ताम्-षीरन्, अभावि चिणि तलोपः, अभाविषाताम्-अभावयिषाताम्-षत, अभाविष्यत-अभावयिष्यत-ष्येताम्-ष्यन्त। एवम् अनुभाव्यते इत्यादि।

वि० एवं सन्नन्तादकर्मकाद**बुभूष**धातोर्भावे वाच्ये यकि सनोऽकारस्य अतोलोप इति लोपे बुभूष्यते-ताम् अबुभूष्यत बुभूष्येत बुभूषाञ्चक्रे-बभूवे-आसे बुभूषिता-ष्यते-षीष्ट अबुभूषि-षिष्यत। सकर्मकादनुबुभूषधातोः कर्मणि वाच्ये अनुबुभूष्यते-ष्येते-ष्यन्ते इत्यादि। यङन्ताद्**बोभूय**धातोरकर्मकाद्भावे बोभूय्यते, सकर्मका**दनुबोभूय**धातोः कर्मणि वाच्ये अनुबोभूय्यते-य्येते-य्यन्ते इत्यादि, सन्नन्ताणिजन्तात्सकर्मकात्कर्मणि वाच्ये बोभूष्यते-ष्येते-ष्यन्ते इत्याद्यपि यथायथमूहनीयम्।

दाधातोः कर्मणि यकि घुमास्थेतीत्वे दीयते-येते-यन्ते, दीयताम् अदीयत दीयेत, ददे ददाते ददिरे, तासादौ चिण्वदिटि आतो युक् चिण्कृतोः (७-३-३३) आदन्तानां युगागमः स्यात् चिणि ञिति णिति कृति च। इति युगागमः, चिण्वदिडभावे युगभावः दायिता दाता-रौ-रः, दायिष्यते दास्यते-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

य्येते-ष्यन्ते, दायिषीष्ट दासीष्ट-षीयास्ताम्-षीरन्, लुङि ते चिणि युकि त लोपः, आतामादौ सिचि चिण्वदिट्पक्षे युक्, तदभावे स्थाघ्वोरितीत्वे कित्वान्न गुणः अदायि अदायिषाताम्-षत, अदिषाताम्-षत अदायिष्यत-अदास्यत-ष्येताम्-ष्यन्त। एवं धाधातोः कर्मणि धीयते-ताम् अधीयत धीयेत दधे-धाते-धिरे, धायिता धाता धायिष्यते धास्यते धायिषीष्ट धासीष्ट, अधायि अधायिषाताम्-षत अधिषाताम्-षत अधायिष्यत अधास्यत। स्थाधातोर्भावे-स्थीयते-ताम् अस्थीयत-स्थीयेत तस्थे स्थायिता-स्थाता-ष्यते-षीष्ट अस्थायि- यिष्यत। पाधातोः कर्मणि घुमास्थेतीत्वे-पीयते-येते-यन्ते, पीयताम्, अपीयत पीयेत, पपे पपाते पपिरे, पायिता-ष्यते-षीष्ट पाता-स्यते-सीष्ट, अपायि अपायिषाताम्-षत अपासाताम्-सत, अपायिष्यत अपास्यत। ग्लै—भावे यकि आदेच इत्यात्वे युकि तद्वत् ग्लायते-ताम् अग्लायत ग्लायेत् जग्ले ग्लायिता-ष्यते-षीष्ट ग्लाता-स्यते-सीष्ट, अग्लायि अग्लायिष्यत अग्लास्यत। म्लै—भावे म्लायते-ताम् अम्लायत म्लायेत मम्ले म्लायिता-ष्यते-षीष्ट म्लाता-स्यते-सीष्ट अम्लायि-यिष्यत-म्लास्यत। शीङ्—भावे यकि अयङ्यि-क्ङितीत्ययङ् शय्यते-ताम् अशय्यत शय्येत, शिश्ये, शायिता-ष्यते-षीष्ट शयिता-ष्यते-षीष्ट चिण्वदिट्-पक्षे वृद्धिः, तदभावे गुणः, अशायि अशा-शयिष्यत। ष्टुञ्-कर्मणि यकि अकृदिति दीर्घः स्तूयते-येते-यन्ते, स्तूयताम् अस्तूयत स्तूयेत, तुष्टुवे-वाते-विरे, तासादौ चिण्वदिडभावपक्षे अनिट्कत्वान्नेट् गुणः स्ताविता ष्यते-षीष्ट स्तोता-ष्यते-षीष्ट, अस्तावि अस्ताविषाताम्-षत अस्तोषाताम्-षत अस्ताविष्यत अस्तोष्यत। स्मृ-कर्मणि यकि गुणोर्तीति गुणः स्मर्यते-ताम् अस्मर्यत स्मर्येत सस्मरे-राते-रिरे, तासादौ परत्वान्नित्यत्वाच्च गुणे रपरत्वे अजन्तत्वाभावेऽप्युपदेशेऽजन्तत्वात्पक्षे चिण्वदिट् तदभावेऽनिट्क-त्वान्नेट्, स्ये ऋद्धनोरिति इट् स्मारिता-ष्यते-षीष्ट स्मर्ता स्मरिष्यते स्मृषीष्ट कित्वान्न गुणः, अस्मारि-रिषाताम्-षत, चिण्वदिडभावे उश्चेति लिङ्सिचोः कित्वान्न गुणः अस्मृषाताम्-षत, अस्मा-स्मरिष्यत। ऋ-कर्मणि यकि गुणोर्तीऽति गुणः अर्यते-ताम् आर्यत अर्येत आरे-राते-रिरे, आरिता अर्ता आरि-अरिष्यते आरिषीष्ट अर्षीष्ट, आरि-आरिषाताम्-षत अरिषाताम्-षत कित्वाभावाद्गुणः, आरि-अरिष्यत। कृधातोः कर्मणि यकि रिङ्शयेति रिङि क्रियते-येते-यन्ते, क्रियताम्-येताम्-यन्ताम् अक्रियत-येताम् यन्त, क्रियेत-येयाताम्-येरन्, चक्रे-क्राते-क्रिरे, कारिता-ष्यते-षीष्ट कर्ता करिष्यते कृषीष्ट उश्चेति कित्वान्न गुणः, अकारि-अकरिषाताम्-षत, अकृषाताम्-षत अकारि-करिष्यत। संकृञः संपरिभ्यां करोतौभूषणे इति सुटि संयोगादित्येपि गुणोर्तीत्यत्र नित्यमित्यनुवर्त्य नित्यं यः संयोगादिरिति व्याख्यानेनात्र धातोर्नियमेन संयोगादित्वाभावाद् गुणाभावे रिङि संस्क्रियते-येते-यन्ते, संस्क्रियताम् समस्क्रियत संस्क्रियेत सँश्चक्रे संस्कारिता-ष्यते-षीष्ट संस्कर्ता संस्करिष्यते संस्कृषीष्ट, समस्कारि-रिषाताम्-षत समस्कृषाताम्-षत समस्कारि-स्करिष्यत। एवं परिष्क्रियते इत्यादि। गृ—कर्मणि यकि ऋृतइद्धातोरिति इर्भावे हलिचेति दीर्घे गीर्यते-ताम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अगीर्यत गीर्येत, जग्रे, ग्राते-ग्रिरे। तासादौ चिण्वदिटि वृद्धिः चिण्वदिटो दीर्घोनेत्युक्तत्वान्न दीर्घः, चिण्वत्त्वाभावे वलादिलक्षणेटि अर्गुणे वृतोवेति इटो वा दीर्घः गारिता-ष्यते, गरीता-ष्यते, गरिता-ष्यते, आशिषि चिण्वदिटि गारिषीष्ट, तदभावे लिङ्सिचोरात्मनेपदेष्विति इड्विकल्पेन इट्पक्षे नलिङीति निषेधाद्वृतोवेति इटो दीर्घाभावे गरिषीष्ट, इडभावे उश्चेति कित्वादगुणे ॠतइद्धातोरिति इर्भावे हलिचेति दीर्घे षत्वे गीर्षीष्ट, लुङि ते चिणि वृद्धौ तलोपे अगारि, आतामादौ सिचि चिण्वादिटि वृद्धौ, तदभावे लिङ्सिचोरिति इट्पक्षे गुणे वृतोवेति इटो वा दीर्घः अगरीषाताम्-षत अगरिषाताम्-षत, इडभावपक्षे उश्चेति कित्वादगुणे ॠत इर्भावे हलिचेति दीर्घे अगीर्षाम् अगीर्षुः अगीर्ष्ठाः-गीर्षाथाम्-गीर्ढ्वम् अगीर्षि-ष्वहि- ष्महि, अगारिष्यत अगरीष्यत अगरिष्यत।

वि० गिरतेर्लुङि ध्वमि चिण्वदिटो दीर्घाभावे अगारिध्वम्, चिण्वत्त्वाभावे इट्पक्षे वृतोवेति दीर्घविकल्पेन अगरीध्वम् अगरिध्वम् इति त्रयाणां मध्ये एकैकस्मिन् रेफस्य अचिविभाषेति लत्वं, विभाषेट इति धस्य ढत्वं च वा, धढयोर्मस्य च अनचिचेति द्वित्वविकल्पः, वकारस्यमय इति पञ्चमीपक्षमादाय यणोमयोद्वे वाच्य इति द्वित्वविकल्पः इति ढधयोरेकत्वाभिप्रायेण वैकल्पिकं द्वित्वत्रयमित्येवं पञ्चभिर्वैकल्पिकभेदैः षण्णवतिः, इडभावे कित्वेत्वरपरत्वदीर्घेषु इणःषीध्वमिति नित्यं ढत्वे आगीर्ढ्वम्, अत्र ढवमानां द्वित्वविकल्पेष्टाविति षण्णवत्या सह सङ्कलने प्रस्तारभेदेन चतुरधिकं शतं रूपाणि भवन्तीति प्रक्रियाकौतुकम्।

हन्तेः कर्मणि यकि हन्यते-ताम् अहन्यत हन्येत, जघ्ने-घ्नाते-घ्निरे, तासादौ चिण्वदिटि वृद्धौ अचिण्णलोरित्युक्त्या हनस्त इत्यप्रवृत्तौ होहन्तेरिति कुत्वे घानिता, चिण्वत्त्वाभावे हन्ता, घानिष्यते हनिष्यते ऋद्धनोःस्ये इति इट्, आशिषि आर्धधातुके सीयुटोति विशेषविधानाद्वधादेशापवादेन चिण्वदिटि वृद्धौ घत्वे घानिषीष्ट, चिण्वत्त्वाभावे वधादेशो हन्तेरेकाच्त्वेपि उपदेशेऽदन्तस्य वधादेशस्याऽनेकाच्त्वेनानिषेधादिटि वधिषीष्ट। लुङि ते चिणि वृद्धौ होहन्तेरिति कुत्वे तलोपे अघानि, आतामादौ सिचि चिण्वदिटि वृद्धौ कुत्वे अघानिषाताम्-षत, चिण्वत्वाभावे हनःसिजिति सिचः कुत्वेन अनुदात्तोपदेशेत्यनुनासिकलोपे अहसाताम्-सत अहथाः-हसाथाम्-हध्वम् अहनि अहन्वहि-न्महि। आत्मनेपदेष्वन्यतरस्यामिति लुङि पक्षे वधादेशे चिणि वधेत्यस्याल्लोपे तस्य स्थानिवत्त्वेन उपधाविघटनाद्वृद्ध्यभावे तलोपे अवधि अवधिषाताम्-षत्। अघानिष्यत अहनिष्यत। चिण्वद्भावस्थले अङ्गकार्यस्यैवातिदेशाच्चिणि दृष्टोपि वधादेशो नातिदिश्यते। गृह्णातेः कर्मणि यकि ग्रहिज्येति सम्प्रसारणे गृह्यते-ताम्-अगृह्यत गृह्येत, जगृहे-हाते-हिरे, तासादौ पक्षे चिण्वदिटि वृद्धौ, तदभावे वलादिलक्षणेटो ग्रहोऽलिटि दीर्घ इति दीर्घः ग्राहिता-ष्यते-षीष्ट ग्रहीता-ष्यते-षीष्ट। लुङि ते चिणि वृद्धौ तलोपे अग्राहि, अन्यत्र चिण्वदिट्पक्षे वृद्धिः पक्षान्तरे वलादीटो दीर्घः अग्राहिषाताम्-षत अग्रहीषाताम्-षत, अग्राहिष्यत अग्रहीष्यत। दृशेः कर्मणि यकि कित्वाद्गुणाभावे दृश्यते-ताम् अदृश्यत दृश्येत, ददृशे-शाते-शिरे।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तासादौ चिण्वदिट्पक्षे लघूपधगुणः, तदभावे सृजिदृशोरित्यम् दर्शिता द्रष्टा, दर्शिष्यते द्रक्ष्यते, दर्शिषीष्ट दृक्षीष्ट-क्षीयास्ताम्-क्षीरन् , चिण्वत्त्वाभावे लिङ्सिचोरिति कित्वेनामो लघूपधगुणस्य चाभावः ढस्य षत्वकत्वे सस्य षत्वं च। लुङि ते चिणि लघूपधगुणे तलोपः, अन्यत्र न दृश इति क्सस्य निषेधात्सिचि चिण्वदिटि लघूपधगुणः, तदभावे लिङ्सिचोरिति कित्वादम्गुणाभावः अदर्शि-षाताम्-षत अदृक्षाताम्-क्षत, अदर्शिष्यत अद्रक्ष्यत।

वि० अजन्ताः सर्वे हलन्तेषु हनादयस्त्रय एव स्यसिजिति चिण्वदिटो विषयाः, एषां लुट्लृट्लृङ्क्षु आशिषि लुङ्गादिषु च पक्षे चिण्वदिट्, लुङि ते सर्वत्रैव चिण् ण्यन्तानां सर्वेषामजन्तत्वेन चिण्वदिट् भवत्येव।

शमधातोर्हेतुमण्णावुपधावृद्धौ अमन्तत्वेन मित्वाद्ध्रस्वे शमि इत्यस्मात्कर्मणि यकि णिलोपे शम्यते-ताम् अशम्यत शम्येत, शमयाञ्चक्रे-बभूवे-आसे। तासादौ ण्यन्तस्य कृतवृद्धेः शामीत्यस्याजन्तत्वेन चिण्वदिटि मित्वेन नित्यमुपधाह्रस्वे प्राप्ते **चिण्णमुलोर्दीर्घोऽन्यतरस्याम्** (६-४-९३) चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात्। इति दीर्घविकल्पे चिण्वदिट आभीयत्वेनासिद्धया णिलोपे शामिता शमिता चिण्वत्त्वाभावे वलादिलक्षणेटि णेरलोपे मित्वेन नित्यं ह्रस्वे गुणायादेशयोः शमयिता। शामि-शमि-शमयिष्यते-षीष्ट। लुङि ते णिलोपे चिणि दीर्घविकल्पे प्राप्ते, **नोदात्तोपदेशस्य मान्तस्यानाचमेः** (७-३-३४) उदात्तोपदेशस्य मान्तस्य आचामिभिन्नस्योपधाया वृद्धिर्न स्यात् चिणि ञिति णिति कृति च। इति वृद्धिनिषेधे अशमि आतामादौ चिण्वदिट्पक्षे दीर्घविकल्पेन तदभावे नित्यं ह्रस्वेन णिलोपाभावेन च अशामिषाताम् अशामिषत अशमिषाताम् अशमिषत अशमयिषाताम्-षत, अशामि-शमि-शमयिष्यत। एवं दमेर्ण्यन्तात्कर्मणि यकि दम्यते ताम्-अदम्यत दम्येत, दमयाञ्चक्रे, दामि-दमि-दमयिता-ष्यते-षीष्ट, अदमि अदामि-दमि-दमयिषाताम्-षत अदामि-दमि-दमयिष्यत। उदात्तोपदेशस्येत्युक्त्या नेह वृद्धिनिषेधः अगामि, मान्तस्येत्युक्त्या नेह-अवादि, अनाचमीत्युक्त्या नेह-आचामि। **अनाचमिकमिवमीनामिति वक्तव्यम्** (वा) उपधावृद्धेः प्रतिप्रसवः। कमेर्णिङन्तात्कर्मणि यकि अमित्वेन ह्रस्वाभावे काम्यते-ताम् अकाम्यत काम्येत कामयाञ्चक्रे णिङन्तस्याजन्तत्वेन तासादौ पक्षे चिण्वदिटि तदसिद्धया णिलोपे पक्षान्तरे तदभावे कामिता कामयिता कामि-कमयिष्यते-षीष्ट, लुङि ते चिणि अनाचमिकमीति वृद्धेरनिषेधे तलोपे अकामि। अन्यत्र चिण्वदिटो विकल्पेन अकामिषाताम्-षत अकामयिषाताम्-षत, अकामि-कामयिष्यत। कृधातोर्ण्यन्तात्कारीत्यस्मात्कर्मणि यकि णिलोपे कार्यते-ताम्-अकार्यत कार्येत कारयाञ्चक्रे, तासादौ चिण्वदिट्पक्षे णिलोपे पक्षान्तरे तदभावे कारि-कारयिता-ष्यते-षीष्ट, लुङि चिणि णिलोपे तस्यापगमे अकारि आतामादौ चिण्वत्त्वविकल्पे अकारि-कारयिषाताम्-षत, अकारि-कारयिष्यत।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० १. एवं न्यायेन ण्यन्तानां मितां ह्रस्व चिण्वद्भावे उपधादीर्घविकल्पं, मान्तसेट्कानां आचम्यादिभिन्नानां मितामभितामपि चिणि उपधावृद्धिनिषेधं, मिद्भिन्नानां ण्यन्तानां यकि वृद्धिं चिण्वदिटं चानुसन्धाय रूपाण्यूह्यानि।

वि० २. चिण्णमुलोरिति मितामुपधाह्रस्वविधाविष्टसिद्धावपि ण्यन्ताण्णौ णिचोलोपो न स्थानिवदिति दीर्घविकल्पसिद्धेः ह्रस्वविधौ स्थानिवत्वस्य दुर्वारत्वाद्ध्रस्वविकल्पं विहाय दीर्घविकल्पो विहितः। शमेर्ण्यन्तस्य शम्यते मोहो मुकुन्देनेति कर्मणि प्रयोगः, अण्यन्तस्य तु शम्यते मुनिनेति भावे प्रयोगः।

स्रंसधातोर्भावे यकि अनिदितामिति नलोपे स्रस्यते-ताम् अस्रस्यत स्रस्येत सस्रंसे, तासादौ चिण्वदिडभावेन वलादिलक्षणेऽटि स्रंसिता-स्यते-षीष्ट अस्रंसि-सिषाताम्-षत अस्रंसिष्यत। **नदे**र्भावे यकि इदित्वेन नलोपाभावे नन्द्यते-ताम् अनन्द्यत नन्द्येत ननन्दे नान्दिता-ष्यते-षीष्ट अनन्दि अनन्दिषाताम्-षत अनन्दिष्यत। **यजेः** कर्मणि यकि कित्वेन वचिस्वपीति सम्प्रसारणे इज्यते-ताम् ऐज्यत इज्येत, ईजे जाते-जिरे, अकिति न सम्प्रसारणम् यष्टा यक्ष्यते यक्षीष्ट अयाजि अयक्षाताम्-क्षत, अयक्ष्यत। **वसे**र्भावे यकि यजादित्वात्सम्प्रसारणे षत्वे उष्यते-ताम् औष्यत उष्येत ऊषे, अकित्स्वसम्प्रसारणे वस्ता वत्स्यते, सस्य तः, वत्सीष्ट अवासि अवत्स्यत। **पचेः** कर्मणि पच्यते-ताम् अपच्यत पच्येत पेचे-चाते-चिरे पक्ता पक्ष्यते पक्षीष्ट अपाचि अपक्षाताम्-क्षत, अपक्ष्यत। **पठेः** कर्मणि पठ्यते-ताम् अपठ्यत पठ्येत पेठे-ठाते-ठिरे पठिता-ष्यते-षीष्ट अपाठि-षाताम्-षत अपठिष्यत। **लिखतेः** कर्मणि लिख्यते-ताम् अलिख्यत लिख्येत लिलिखे लेखिता-ष्यते-षीष्ट अलेखि-षाताम्-षत अलेखिष्यत। **तनोतेः** कर्मणि यकि

तनोतेर्यकि (६-४-४४) तनोतेर्यकि अकारोऽन्तादेशो वा स्यात्। इति पक्षे आत्वे तायते-ताम् अतायत तायेत तन्यते-ताम् अतन्यत तन्येत,। तेने तनिता-ष्यते-षीष्ट अतानि अतनि-षाताम्-षत अतनिष्यत। **जने**र्भावे यकि ये विभाषेत्यात्वविकल्पे जायते-ताम् अजायत जायेत, जन्यते-ताम् अजन्यत जन्येत, जज्ञे जनिता-ष्यते-षीष्ट लुङि। चिणि जनिवध्योश्चेति वृद्धिनिषेधे अजनि-षाताम्-षत, अजनिष्यत। हिंसार्थस्य **वधेः** कर्मणि वध्यते-ताम् अवध्यत वध्येत ववधे वधिता-ष्यते-षीष्ट चिणि जनिवध्योश्चेति वृद्धिनिषेधे अवधि-धिषाताम्-षत् अवधिष्यत। **तपेः** कर्मणि तप्यते-ताम् अतप्यत तप्येत तेपे तप्ता-प्स्यते-प्सीष्ट अतापि अतप्साताम्-प्सत, अतप्स्यत। **अनुतपे**स्तु लुङि ते चिणः प्राप्तौ **तपोऽनुतापे च** (३-१-६५) तपश्च्लेश्चिण् न स्यात्कर्मकर्तरि अनुतापे च। इतिनिषेधे अन्वतप्त पापेन अन्वतप्साताम्-प्सत कर्मणि लुङ् पापं कर्तृतेनाभ्याहत इत्यर्थः, किंवा भावे पापेन पुंसा कर्त्रा अन्वशोचीत्यर्थः। भञ्ज्धातोः कर्मणि यकि अनिदितामिति नलोपे भज्यते-ताम् अभज्यत भज्येत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भञ्जे भङ्क्ता भङ्क्ष्यते भङ्क्षीष्ट, लुङि ते चिणि भञ्जेश्च चिणि (६-४-३३) भञ्जेश्चिणि नलोपो वा स्यात्। इति नलोपपक्षे उपधावृद्धिः अभाजि अभञ्जि अभङ्क्षाताम्-क्षत, अभङ्क्ष्यत। लभेः कर्मणि लभ्यते-ताम् अलभ्यत लभ्येत लेभे-भाते-भिरे लब्धा लप्स्यते लप्सीष्ट, लुङि ते चिणि विभाषा चिण्णमुलोः (७-१-६९) लभेर्नुमागमो वा स्याच्चिण्णमुलोः। इति नुम्पक्षे उपधाविघटनेन न वृद्धिः, अलम्भि अलाभि अलप्साताम्-प्सत, अलप्स्यत। व्यवस्थितविभाषया प्रादेर्नित्यं नुम् प्रालम्भि।

वि० चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति मितामुपधाह्रस्वविकल्पः, नोदात्तोपदेशेति आचमादिभिन्नसेट्कमान्तेषु वृद्धि-, विभाषाचिण्णमुलोरिति लभेर्नुम्विकल्पः, अन्यत्र णित्वाद्गुणवृद्धी च णमुल्यप्यनुसन्धेयाः, नमं नमं नामं नामं, दमं, दमं दमं, लम्भं लम्भं, लाभं लाभं, कारं कारं, पाठं पाठमित्यादि।

भावे वाच्येऽनभिहिते कर्तरि तृतीया प्रथमपुरुषैकवचनमाख्यातम्, कर्मणि वाच्येऽनभिहिते कर्तरि तृतीया, अभिहिते कर्मणि प्रथमा, वाच्यकर्मानुसारिपुरुषवचनमाख्यातमिति साधारणो विधिः। द्विकर्मकस्थले त्वेकतरस्सेव कर्म वाच्यं प्रथमान्तं तदनुसारिपुरुषवचनमाख्यातम्, कर्मान्तरं त्वनभिहितं सद्द्वितीयान्तं भवति। तत्र क्व कतरत्कर्म वाच्यमित्यपेक्षायामुच्यते-गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्। बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया। प्रयोज्य कर्मण्यन्येषां ण्यन्तानां लादयो मताः। इति। अकथितं चेति कर्मसंज्ञितं गौणं, तदन्यन्मुख्यं कर्म, दुह्यादेर्गौणं कर्म वाच्यं भवति यथा—गौर्दुह्यते पयः, बलिर्याच्यते वसुधाम्, क्षीरनिधिः सुधां मथ्यते; तण्डुला ओदनं पाच्यन्ते; गर्गाः शतं दण्ड्यन्ते; वृक्षः फलान्यवचीयते; माणवको धर्ममुच्यते; साधुर्धर्मं पृच्छ्यते। न्यादेः प्रधानं वाच्यं भवति यथा—अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते वा। गतिबुद्धीति कर्मसंज्ञितं प्रयोज्यकर्म। ज्ञानार्थकेषु भक्षणार्थकेषु शब्दकर्मकेषु च ण्यन्तेषु यथेच्छं प्रयोज्यकर्म मूलकर्म वा एकतरं वाच्यं भवति यथा—बोध्यते माणवको धर्मम्, धर्मो माणवकमिति वा, भोज्यते बालक ओदनम्, ओदनो बालकमिति वा, वेदो ब्राह्मणमध्याप्यते वेदं ब्राह्मण इति वा। अन्येषु ण्यन्तेषु प्रयोज्यकर्मैव वाच्यं भवति यथा—रामो ग्रामं गम्यते, बालकः शाय्यते, भृत्यः कार्यं कार्यते।

वि० द्विकर्मकधातूनामप्येकमात्रकर्मोल्लेखे तु गौणं प्रधानं वा तदेकं वाच्यं भवतीत्यादिकं कारकप्रकरणेऽप्युक्तम्। अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यमिति अकर्मकधातुस्थले देशकालादीनां कर्मत्वे अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते।" यथा-मासो मासे वा आस्यते देवदत्तेन, क्रोशः क्रोशे वा शय्यते तेन। एवमपि णिजन्तेषु तु प्रयोज्यकर्म वाच्यं भवति। यथा-मासमास्यते देवदत्तः, क्रोशं शाय्यते बालः। लादयो इति आदिशब्देन कृत्यक्तखलर्था ग्राह्याः तेष्वप्येवंन्यायेन कर्म वाच्यं भवति। यथा-गौः पयो दोग्धव्या दोहनीया दोह्या वा, गौः पयो दुग्धा सुदोहा दुर्दोहा वा, अजा ग्रामं नेतव्या नयनीया नेया नीता वा; गुरुणा वेदमध्यापितो बटुः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याचकेन धनं याचितो राजा। प्रकृतिविकृतिरूपोभयकर्मकस्थले तु उभयमपि कर्मणिप्रयोगे वाच्यं सत्प्रथमान्तं भवति, आख्याते वचनं तु प्रकृतिकर्मानुसार्येव भवति। यथा—काष्ठानि भस्म क्रियन्ते, सुवर्णं कुण्डलानि क्रियते इत्यादि पूर्वोक्तमनुसन्धेयम्।

प्रयोगाः--सेवया दीयते कलौ। हन्यतां हन्यतामेष पापः प्रकृतिदारुणः। तद्भवता निशम्यताम्। अमानि तत्तेन निजायशोयुगम्। वस्त्राणि परिधीयन्ताम्। अदर्शि रूपेण समः स मत्प्रियः। हरेर्यद-क्रामि पदैककेन खम्। प्रेम्णा क्षणं स्थीयताम्। दुदुहे धरणी वसु। बभूवे तेन विदुषा। पापं क्षय-मनीयत। अलम्भि शूरेण महद्यशो रणे। भवता सुखमास्यताम्।

प्रश्नाः—भावे कर्मणि च लकाराः कीदृशेभ्यो धातुभ्यो भवन्ति। भावकर्मणोः पुरुषवचनयोः को विशेषः। भावे कर्मणि च किं पदं भवति। कीदृशेषु धातुषु चिण्वदिड्विधिः चिण्वत्वेन च कानि कार्याणि भवन्ति। उपधाया ह्रस्वदीर्घ-व्यवस्था केषु धातुषु। द्विकर्मकेषु ण्यन्तेषु कीदृशं कर्म वाच्यं भवति। गौणमुख्यप्रयोज्यकर्मसु क्व कतरद्वाच्यं तेन च को लाभः। अधस्तनवाक्यगतभावकर्मप्रयोगान्निरूपयत—

न्यधायिषातामभि देवकीसुतं सुतेन धातुश्चरणौ भुवस्तले। दाप्यते तेन तद्धनम्। अपात्रेभ्यो न दीयताम्। वसने परिधाप्येते वधूः। सङ्क्रम्यतेऽनेन जनेन बन्धुभिः। दीयतामर्जितं वित्तं देवाय ब्राह्मणाय वा। अकारि पद्मेषु तदङ्घ्रिणा घृणा। यशांसि तेनासाद्यन्ते। अहन्यन्ताखिलादैत्याः। उत्थीयतामग्रतः। भवद्भिर्लभ्यते यशः। पत्राण्यलेखिषत मया। क्षणं विश्रम्यतामिह। इति **भावकर्मप्रकरणम्।**

अथ कर्मकर्तृतिङ्प्रकरणम्।

कारकाणि यथास्वं व्यापारद्वारा क्रियायाः साधनानि, तेषु कर्ता प्रधानेन स्वव्यापारेण सर्वेष प्रवर्तकः स्वतन्त्रः। परं कर्तुर्व्यापारमविवक्षित्वा करणाधिकरणादेः कारकस्य व्यापारो यदा प्रधानत्वेन विवक्ष्यते तदा कारकान्तरमपि कर्तृस्थानीयं भवति। तत्र कर्मवर्जं करणादीनां कर्तृत्वेन विवक्षणे करणादिरेव कर्तृभूतः प्रथमान्तः आख्यातं कर्तृवाच्यकमेवेति न कोपि विशेषः, तत्रार्थतः कार्यसौ-कर्यातिशयः प्रतीयते, यथा असिश्छिनत्ति पुरुषप्रयत्नविशेषमनपेक्ष्य तैक्ष्ण्यादिना असिः स्वयमेव छिनत्तीत्यर्थः, काष्ठानि पचन्ति अतिशुष्कतया धमनफूत्कारादिपुरुषप्रयत्नं विनैव काष्ठानि पचन्तीत्यर्थः, स्थाली पचति अतिलघुतयाऽविलम्बश्रपणेन पुरुषप्रयत्नविशेषं विनैव स्थाली पचतीत्यर्थः। यदा तु कर्मण एव प्राधान्यमनुसन्धाय कर्तृत्वं विवक्ष्यते तदा कर्मैव कर्तृस्थानीयं प्रथमान्तम्, आख्यातं तु प्रायः कर्मवाच्यानुरूपं कर्मकर्तरि प्रयुज्यते, साध्यस्यापि कर्मणः साधकत्वेन विवक्षणे स्वत इवायत्न-सिद्धता सुकरतातिशयश्च क्रियायाः प्रतीयते, येन तद्द्योतनाय स्वयमेवेत्यादि प्रायः प्रयुज्यते; यथा पच्यते ओदनः स्वयमेव, भिद्यते काष्ठं स्वयमेव। सकर्मकक्रियाणामेव कर्मकर्तरि प्रयोगः, तत्र कर्मणः कर्तृत्वेन कर्मान्तराभावादकर्मकता भवति, तेनासां पच्यते ओदनेन स्वयमेव, भिद्यते काष्ठेन स्वय-मेवेति भावेऽपि प्रयोगः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० उपपादितं चैतत् **भाष्य**कृता–"कर्मकर्तरि कर्तृत्वमस्ति, कुतः, स्वातन्त्र्यस्य विवक्षितत्वात्, स्वातन्त्र्येणैवात्र विवक्षितः। किं पुनः सत एव स्वातन्त्र्यस्य विवक्षा, आहोस्विद्विवक्षामात्रं, सत इत्याह। कथं ज्ञायते इह भिद्यते कुसूलेनेति। नचान्यः कर्ता दृश्यते क्रिया चोपलभ्यते। किं च भो विग्रहवतैव क्रियायाः कर्त्रा भवितव्यं न पुनर्वातातपा अपि कर्तारः स्युः। भवेत्सिद्धं यदि वातातपकालानामन्यतमः कर्ता स्यात्, यस्तु खलु निर्वाते निरभिवर्षेऽचिरकालः कुसूलः स्वयमेव भिद्यते तस्य नान्यः कर्ता भवत्यन्यदतः कुसूलात्। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्यः कर्ता नास्ति, इह तु कथं स्यात् लूयते केदारः स्वयमेवेति, यत्रासौ देवदत्तो दात्रहस्तः समन्ततो विपरिपतन्दृश्यते, अत्रापि सौकरता नाम तस्या नान्यः कर्ता भवत्यन्यदतः केदारात्" इति। "हन्त्यात्मानमित्यत्रात्मेति कर्ताऽन्तर्हितः, हन्त्यात्मात्मा आत्मना हन्यते आत्मेति, कः पुनरात्मानं हन्ति को वात्मना हन्यते। द्वावात्मानौ अन्तरात्मा शारीरात्मा च, अन्तरात्मा तत्कर्म करोति, येन शारीरात्मा सुखदुःखे अनुभवति, शारीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति। सकर्मकाणां प्रतिषेधो वक्तव्यः अन्योन्यमाश्लिष्यतः अन्योन्यं संस्पृशतः अन्योन्यं गृह्णीतः" इति च तत्रैव। तेनात्र ...ः कर्तुश्च भेदात्सकर्मकस्थले निषेधाच्च न कर्मकर्तरि लकारः। कर्मकर्तरि प्रयुज्यमानाः क्रियाः सकर्मिका अपि प्रायेणाकर्मिका भवन्ति, तेनासां कर्मकर्तरि ओदनः पच्यते इतिवत् ओदनेन पच्यते इति भावेपि लकारः, द्विकर्मके त्वेकस्य कर्मणः ...त्वेपीतरेण कर्मणा सकर्मकत्वं भवति, तेषां कर्तरि-सुधां क्षीरसागरो मथ्नाति, कर्मणि-सुधां क्षीरसागरो मथ्यते इति।

एककर्मकेषु कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारेऽयं विशेषः—कर्मवत्कर्मणा तुल्यक्रियः (३-१-८७) कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात्। कार्यातिदेशोयम्, तेन यगात्मनेपदचिण्वदिटः स्युः, कर्तुरभिहितत्वात्प्रथमा। पच्यते ओदनः भिद्यते काष्ठम्। भेदिता भेत्ता चिण्वदिट्। अभेदि अपाचि चिण्। भावे तु पच्यते ओदनेन भिद्यते काष्ठेन। कर्मकर्तुस्तिङाऽनभिहिततया कर्मवत्त्वातिदेशाद् द्वितीया स्यादिति तु न, व्यत्ययो बहुलम् लिङ्याशिष्यङ् इति सूत्रयोर्लकारद्वयमध्ये प्रश्लिष्टस्य ल इत्यस्यात्रानुवृत्त्या लः कर्ता लकारवाच्यः कर्ता एव कर्मवदिति विधानेन भावे प्रत्यये लकारेणानुपस्थितस्य कर्तुः कर्मवत्त्वानतिदेशात्, अतएव कर्मणि विहिताः कृत्यक्तखलर्थाः कर्मकर्तरि न भवन्ति, लकारावाच्यत्वेन तत्र कर्मवत्त्वानतिदेशात्, किन्तु भाव एव भेत्तव्यं कुसूलेनेति।

वि० कर्मणा कर्मस्थक्रियया तुल्यक्रियः समानाधिकरणक्रियः कर्ता कर्मवद्भवतीति सूत्रार्थः। यस्मिन् कर्तृभूते कर्मणीव क्रिया लक्ष्यते स कर्ता कर्मवद्भवति, कर्माश्रयाणि कार्याणि प्रतिपद्यते, यगात्मनेपदचिण्वद्भावाः प्रयोजनानि। पचेः कर्मस्था क्रिया विक्लितिर्द्विधाभवनं, सैवेदानीं कर्तृस्था, तथापि कर्तृत्वकर्मत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य तुल्यत्व व्यवहारः। करणाधिकरणाभ्यां तुल्यक्रियस्य कर्तुस्तु नैवं भवति असिश्छिनत्ति स्थाली पचत्येव। कर्मस्थभावानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवति न कर्तृस्थक्रियाणाम्। कर्मस्थः पचतेर्भावः कर्मस्था च ...ः क्रिया। मासासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया। नेतरत्र, नहि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते, प्रत्युत गमनारोहणादौ घर्मादिवैलक्षण्यं कर्तर्येवोपलभ्यते, तेन गच्छति ग्रामः आरोहति हस्तीति कर्तृस्थक्रिया,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईदृशेषु कर्मकर्तुः कर्मवद्भावो नेतिं गच्छति आरोहतीत्येव । क्वचित्तु करणेनापि तुल्यक्रियस्य कर्मवद्भाव इष्यते । यदाह करणेन तुल्यक्रियः कर्ता बहुलमिष्यते, परिवारयति कण्टकैर्वृक्षम् परिवारयन्ति कण्टका वृक्षम् । इति पदमञ्जर्याम् ।

सकर्मकाणां प्रतिषेधो वक्तव्यः (वा) अन्योन्यं स्पृशतः । अत्र द्वयोः स्पर्शनकर्मणोः कर्तृत्वेऽपि कर्मघत्त्वाभावान्न यगादि । अजा ग्रामं नयति—अजा स्वयमेव ग्रामं प्राप्नोतीत्यर्थः । अत्र नयनकर्मणोऽजायाः कर्तृत्वेपि न कर्मवद्भावः । वस्तुतोऽत्र कर्मस्थक्रियाया अभावेनैवाऽप्राप्तिः, **दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्** (वा) अनयोर्द्विकर्मकतया एकस्य कर्मणः कर्तृत्वविवक्षणेपि कर्मान्तरेण सकर्मकतया निषेधे प्राप्ते प्रतिप्रसवोयम् । **न दुहस्नुनमां यक्चिणौ** (३-१-८९) एषां कर्मकर्तरि यक्चिणौ न स्तः । दुहेरनेन यक एव निषेधः, तङ् तु भवति, चिण् विकल्पिष्यते । यकोऽभावेन शपि अदिप्रभृतिभ्य इति लुक् गौः पयो दुग्धे, गौणे कर्मणि दुह्यादेरिति गौणकर्मण एव कर्तृत्वेन कर्मवद्भावः, अजा ग्रामं नयतीत्यत्र तु मुख्यकर्मणः कर्तृत्वं, परं नात्र कर्मवद्भावः । **अचः कर्मकर्तरि** (३-१-६२) अजन्तात् च्लेश्चिण् वा स्यात्कर्मकर्तरि तशब्दे परे । क्रियते कटः स्वयमेव, लुङि चिणि तलोपः, तदभावे ह्रस्वादङ्गादिति सलोपः, कटः स्वयमेव अकारि अकृत वा । **दुहश्च** (३-१-६३) दुहश्च्लेश्चिण्वा स्यात्कर्मकर्तरि तशब्दे परे । लुङि पक्षे चिणि तलोपः पक्षान्तरे शलन्तत्वात्क्सः, तस्य लुग्वादुहदिहेति पक्षे लुक् , लुगभावे हस्य ढत्वकत्वे सस्य षत्वं भष्भावश्च । स्वयमेव गौः अदोहि अदुग्ध अधुक्षत । उदुम्बरः फलं पच्यते । प्रस्नुते गौः स्वयमेव, प्रास्नोष्ट गौः स्वयमेव । नमते दण्डः स्वयमेव, अनंस्त दण्डः स्वयमेव । यक्चिणोः प्रतिषेधात्तङेव ।

वि० १. उदुम्बरवृक्षं फलं पचति कालविशेष इति द्विकर्मकः पचिः, वृक्षस्य पाकमन्तरेण फलस्य पाकाभावात् वृक्षोऽकथितं कर्म । उदुम्बरः फलं पच्यते इत्यस्य उदुम्बरो वृक्षः कालविशेषमनपेक्ष्य स्वयमेव फलं पचतीत्यर्थः । अत्रोदुम्बरस्य गौणकर्मणः कर्तृत्वेन विवक्षणे फलेन कर्मणा सकर्मकतया निषेधे प्राप्ते प्रतिप्रसवाद्यगादि । वस्तुतस्तु भाष्ये पचेर्द्विकर्मकेष्वगणनान्न तथात्वम्, फलस्यैव कर्मणः कर्तृत्वविवक्षायामकर्मकत्वेनैव प्राप्तेर्न प्रतिप्रसवाकाङ्क्षा, तथाप्येतन्मते उदुम्बरः फलं पचतीत्यत्र कर्तृस्थक्रियत्वेन कर्मस्थक्रियत्वाभावात्कर्मवत्त्वाप्राप्तौ दुहिपच्योरित्यपूर्वविधिर्वक्तव्य इत्यन्यत्र विस्तरः ।

वि० २. **सृजियुज्योः श्यँस्तु** (वा) अनयोः सकर्मकयोः कर्ता बहुलं कर्मवत् यगपवादश्च श्यन्वक्तव्य इत्यर्थः । **सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम्** (वा) सृज्यते स्रजं भक्तः श्रद्धया निष्पादयतीत्यर्थः । अत्र मुख्यकर्तरि लकारः कर्मवत्वात्तङ् यगपवादः श्यन् । असर्जि स्रजं भक्तः । श्रद्धामविवक्षित्वा निष्पादनमात्रेर्थे तु सृजति स्रजमित्येव । युज्यते ब्रह्मचारी योगम् , योगो ब्रह्मचारिणं युनक्तीति कर्मणो ब्रह्मचारिणः कर्तृत्वविवक्षायां कर्मवत्वम् । सृज विसर्गे इति तौदादिकः युजिर् योगे इति रौधादिक इह गृह्यते । **भूषाकर्मकिरादिसनामन्यत्रात्मनेपदात्** (वा) भूषावाचिनां, किरादीनां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तानां यक्चिणौ चिण्वदिट् च न, केवलमात्मनेपदमित्यर्थः। अलंकुरुते कन्या स्वयमेव, अलमकृत, अवकिरते हस्ती अवाकीर्ष्ट तमवकिरति कुसुमादिः तत्र कर्मणो हस्तिनः कर्तृत्वविवक्षायां कर्मवत्त्वेन तङ्, पुरुषादिप्रयत्नं विना वृक्षादिसमीपं गच्छ-सुमादिभिरवकीर्णो भवतीत्यर्थः। चिकीर्षते कटः अचिकीर्षिष्ट, इच्छायाः कर्तृस्थत्वेपि करोतिक्रियापेक्षमिह कर्मस्थक्रियत्वम्। स्वेव कर्तुमिच्छाविषय इत्यर्थः। **यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम्** (वा) स्वयं कारयते कटः, कारत। उच्छ्रयते दण्डः, उदशिश्रियत। ब्रूते कथा अवोचत। चिण्वदिट् तु स्यादेव कारिष्यते। **णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम्** (वा) इति भारद्वाजीयाः। उत्पुच्छयते गौः, उदपुपुच्छत, श्रन्थते मेखला, अश्रन्थिष्ट, ग्रन्थते ः, अग्रन्थिष्ट, विकुर्वते सैन्धवाः व्यकारिषत व्यकृषत।

न रुधः (३-१-६४) रुधश्च्लेश्चिणन्न स्यात्कर्मकर्तरि। रुध्यते गौः स्वयमेव, अवारुद्ध गौः। कर्मणः कर्तृत्वाविवक्षणे तु अवारोधि गौर्गोपेन। **तपस्तपः कर्मकस्यैव** (३-१-८८) तपधातोस्तपः कर्मकस्यैव कर्ता कर्मवत्स्यात्। तप्यते तपस्तापसः अर्जयतीत्यर्थः। लुङि तपोनुतापेचेति चिणो निषेधात्सिच् अतप्त। तपः कर्मकस्यैवेत्युक्तेर्नेह उत्तपति सुवर्णं सुवर्णकारः। अर्जनरूपसम्पादनस्य कर्तृस्थक्रियत्वेन कर्मवत्कर्मणेत्यप्राप्तौ वचनम्। **कुषिरञ्जोः प्राचां श्यन्परस्मैपदं च** (३-१-९०) अनयोः कर्मकर्तरि न यक् किन्तु श्यन्परस्मैपदं च। तङोपवादः। प्राचां ग्रहणाद्विकल्पः। कुष्यति कुष्यते वा पादः। रज्यति रज्यते वा वस्त्रम्।

प्रयोगाः—स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी। तत्फलं परिपच्यते। स्वयमेवाभेदि भाण्डम्। स्वयमेवोन्मुच्यते उपानत्।

प्रश्नाः—कर्मकर्तरि लकारस्य को विषयः। कर्मकर्तरि को विशेषः। कर्मकर्तरि यक्चिणादीनां क्व निषेधः। अधो र्दिष्टान्कर्मकर्तरिप्रयोगानुपपादयत—

शरदि पच्यन्ते शालयः। अदुग्ध गौः स्वयमेव। भिद्यते भाण्डम्। रुध्यते गौर्गृहद्वारि। नृत्यते स्वयमेव वल्लरी।

इति कर्मकर्तरितिङ्प्रक्रिया।

अथ लकारार्थप्रकरणम्।

लकारविषयाः सामान्यतः पूर्वमुक्ताः विशेषा अत्रोच्यन्ते। भूत इत्यधिकारे **लुङ्** (३-२-१०२) भूतार्थवृत्तेर्धातोर्लुङ् स्यात्। बाधकानाक्रान्ते सामान्ये, अद्यतने, व्यामिश्रे च भूते औत्सर्गिको लुङ्। अगमाम घोषान्। अद्य अपाम पयः। अद्य श्वश्च अभुङ्क्ष्महि। शय्यायामशयिष्महि। **वसेर्लुङ् रात्रिशेषे जागरणसन्ततौ वक्तव्यः** (वा) रात्रेश्चतुर्थयामे प्रबुद्धः क्व भवानुषित इति पृष्टो ब्रवीति इह अवात्सम्। अत्रानद्यतने लङ् प्राप्तौ लुङ्। सर्वां रात्रिं जागरणेपि इह अवात्सम्, मुहूर्तमात्रमपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वापे तु इहाऽवसमिति लङेव। **अनद्यतने लङ्** (३-२-१११) अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्। अकरोत् ह्योऽगच्छत् परुदपश्यत् पूर्वेद्युरपठम्। अनद्यतन इति बहुव्रीहिणा निर्देशादविद्यमानाद्यतन इत्यर्थस्तेन व्यामिश्रे न लङ्। किन्त्वौत्सर्गिको लुङेव। **परोक्षे लोकविज्ञाने प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः** (वा) लिटोऽपवादेन वचनम्। अरुणद्यवनः साकेतम्। अरुणद्यवनो मध्यमिकाम्। दर्शनाविषये तु लिडेव जघान कंसं किल वासुदेवः। आशंसायां भूतवच्चेत्यतिदिष्टस्तु गौणभूतः।

टि० साकेतोऽयोध्याप्रदेशः, माध्यमिका तत्कालप्रसिद्धा नगरी (वर्तमानः मउ. जि. आजमगढ इति गौडाः)। प्रयोक्तुर्दर्शनविषय इत्युक्त्वा भाष्ये तदुदाहरणदानेन भाष्यकृतः समये यवनेन साकेतमाध्यमिकयोराक्रमणं दूरतया परोक्षं लोकप्रसिद्धं सामयिकतया दर्शनयोग्यं बभूवेति ज्ञायते। भारताक्रामको यवनेशोऽलेक्जेण्डरो नाम विक्रमशकारम्भ २६७ वर्षपूर्वं पाञ्चालेभ्य एव प्रतिययौ, तत्समयतः...वर्षपूर्वं मिलण्डरनाम्ना यवनेन साकेतस्याक्रमणं पूर्वेतिहासे श्रूयते तदेवानेन वाक्येन सूचितं स्यात्। एवं च भाष्यकृतः स एव समयः प्रतीयते। वर्तमाने लडित्यत्र पुष्यमित्रं याजयाम इति वैक्रमाब्दारम्भतः...वर्षपूर्ववर्तिनः पुष्यमित्रस्य वर्तमानत्वेन निर्देशनमपि तमेव पुष्णाति।

अभिज्ञावचने लृट् (३-२-११२) स्मृतिरभिज्ञा, तद्बोधके उपपदे भूतानद्यतने धातोर्लृट् स्यात्। लङोऽपवादः। स्मरसि कृष्ण गोकुले वत्स्यामः (गोकुले अवसाम तत्स्मरसि किमित्यर्थः)। वचनग्रहणं पर्यायार्थम्। अभिज्ञायते गोविन्द काश्मीरान्गमिष्यामः (अगच्छाम)। एवं बुध्यसे चेतयसे इत्यादीनामपि प्रकरणादिवशेन स्मृतिबोधकतया तद्योगेपि लृट् बुध्यसे चेतयसे वा सखे काश्यां वत्स्यामः। **न यदि** (३-२-११३) यच्छब्दयोगे अभिज्ञावचने उपपदे भूतानद्यतने लृट् न स्यात्। पूर्वसूत्रापवादः। यद्योगे निषेधेनौत्सर्गिको लङ्—अभिजानासि कृष्ण यद्वने अभुञ्ज्महि। स्मरसि सखे यत्काश्यामवसाव। स्मर्यते यदावां सह पांशुक्रीडामकुर्व। **विभाषा साकाङ्क्षे** (३-२-११४) यच्छब्देन सहिते रहिते वा अभिज्ञावचने उपपदे लृड् वा स्यात् लक्ष्यलक्षण (ज्ञाप्यज्ञापक) भावेन साकाङ्क्षश्चेद्धात्वर्थः। पूर्वसूत्रद्वयविषये उभयत्र विभाषेयम्। एको धात्वर्थो लक्षणमपरो लक्ष्यमित्यर्थतो वाक्यद्वयम्। लृडभावपक्षे लङ्। अभिजानासि कृष्ण यद्वने वत्स्यामः तत्र गाश्चारयिष्यामः, अवसाम आचारयामेति वा। वासो लक्षणं चारणं लक्ष्यम्। स्मरसि गोपाल काश्यां वत्स्यामः शास्त्राणि पठिष्यामः, अवसाम अपठामेति वा। अभिजानीहि देवदत्त काश्मीरान्गमिष्यामस्तत्र द्राक्षा भोक्ष्यामः, अगच्छामः अभुञ्ज्महीति वा।

टि० एतेन अनद्यतनभूते अभिज्ञावचने उपपदे लक्ष्यलक्षणभावाभावे यच्छब्दे असति लृट्, सति तु लङेव, लक्ष्यलक्षणभावे तु यच्छब्दे सत्यसति वा लृट् लङ् वा भवतीति निष्कर्षो भवति।

परोक्षे लिट् (३-२-११५) साधनपरोक्षता पारोक्ष्यम्। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लङोऽपवादः। चकार चक्रे जहास। बभूव योगी किल कार्तवीर्यः। उत्तमपुरुषे स्वस्यापि चित्तविक्षेपादिना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३०

परोक्ष्यम्। सुप्तोहं किल विललाप। वहु जगद पुरस्तात्तस्य मत्ता किलाहम्। **अत्यन्तापन्हवे लिड् वक्तव्यः** (वा) कलिङ्गेष्ववात्सीः ? नाहं कालिङ्गान् जगाम। वासप्रश्ने गमनस्यैवापलापादत्यन्तापन्हवः। दक्षिणापथं गत्वाऽयाज्ययाजन प्रश्ने प्रत्याह नाहं दक्षिणापथं प्रविवेश। **हशश्वतोर्लङ् च** (३-२-११६) अनयोरुपपदयोर्लिड्विषये लङ् स्याच्चाल्लिट्। इतिह अकरोत् चकार वा। शश्वदकरोत् चकार वा। **प्रश्ने चासन्नकाले** (३-२-११७) प्रष्टव्यः प्रश्नः, आसन्नकाले पृच्छ्यमानेर्थे लिड्विषये लङ्लिटौ स्तः। अगच्छत्किम्, जगाम किम्। अयजद्देवदत्तः?, इयाज देवदत्तः ? । अप्रश्ने तु लिडेव- जगाम देवदत्तः, अनासन्नकालेपि लिडेव भवन्तं पृच्छामि, जघान कंसं किल वासुदेवः। पञ्चवर्षाभ्यन्तरमासन्नकालं, तदतीतं विप्रकृष्टकालमिति हरदत्तः। **लट् स्मे** (३-२-११८) स्मे उपपदे भूतानद्यतनपरोक्षे लट् स्यात्। लिटोपवादः। नलेन स्माधीयते। यजति स्म युधिष्ठिरः। **अपरोक्षे च** (२-३-११९) अपरोक्षेपि भूतानद्यतने लट् स्यात्स्मयोगे। एवं स्म पिता ब्रवीति। इति कथयति स्म गुरुः।

वि० अत्यन्तापन्हवे नो खण्डिकां जगाम, नो कलिङ्गान् जगामेति भाष्योदाहरणे अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति इति वचनात्तीर्थयात्रोद्देशेनैव गमनानुज्ञया तदात्वे अनार्यनिवासस्थलतया चिरवासस्य गर्हिततया तत्रोषितस्त्वं न सह वासार्ह इत्यभिप्रायेण कलिङ्गेष्ववात्सीः ? किमिति प्रश्ने कलिङ्गे वासमात्रन्हूय तद्धेतुभूतगमनस्यैवापलापेनाऽत्यन्तापन्हवः, वासमात्रस्यापन्हवे तु नात्यन्तापन्हव इति न लिट् किन्तु लङेवानुसन्धेयम्।

ननौ पृष्टप्रतिवचने (३-२-१२०) अनद्यतने परोक्षे इति निवृत्तं, भूतमात्रे विधिरयम्। ननु शब्दे उपपदे प्रश्नपूर्वके प्रतिवचने भूते लट् स्यात्। लुङोपवादः। अकार्षीः कटम् ? ननु करोमि भोः (अकार्षम्)। तत्र किञ्चिदवोचः किम् ? ननु ब्रवीमि भोः (अवोचम्)। पृष्टप्रतिवचनाभावे तु लुङेव नन्वकार्षम्। **नन्वोर्विभाषा** (३-२-१२१) नशब्दे नुशब्दे चोपपदे प्रश्नप्रतिवचने भूते लड् वा स्यात्। पक्षे लुङ्। अकार्षीः किम् ? न करोमि नाकार्षम् वा, अहं नु करोमि, अहं नु अकार्षम् वा। **पुरि लुङ् चास्मे** (३-२-१२२) अनद्यतनग्रहणं मण्डूकप्लुत्याऽनुवर्तते। पुराशब्दयोगे भूतानद्यतने लुङ् वा स्यात् चाल्लट्, नतु स्मयोगे। पक्षे यथाप्राप्तं परोक्षत्वे लिट्, तदविवक्षायां लङ्। वसन्तीह पुरा छात्राः, अवात्सुः, अवसन्, ऊषुर्वा। अस्मे इत्युक्तेर्नेह-यजति स्म पुरा।

वि० विरुद्धं वचनं, वचनाभिमुखं च प्रतिवचनं, नोत्तरमात्रम् तेन प्रश्नपूर्वकत्वलाभाय पृष्टप्रतिवचनेति। अत्यसन्नकाले चायं विधिरिष्यते, निर्वृत्तायामपि पाकादिक्रियायां तत्कृतश्रमादेरनुवृत्या सैव क्रिया वर्तत इति वक्तुं शक्यतया वर्तमाने लडित्येव सिद्धेः ननौपृष्टप्रतिवचनमित्यशिष्यं क्रियासमाप्तेरविवक्षितत्वादिति भाष्ये प्रत्याख्यातमिदम्। पुरिलुङ्चास्मे न पक्षे यथाप्राप्तमित्युक्त्वा लट्लिटाविव अभिज्ञावचने सति लृडपि–अभिजानासि देवदत्त वत्स्यन्तीह पुरा छात्राः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्तमाने लट् (३-२-१२३) प्रारब्धोऽपरिसमाप्तो वर्तमानस्तत्रार्थे वर्तमानाद्धातोर्लट् स्यात्। पचति पठति भवति। अधिश्रयणादिरधःश्रयणान्त ओदनफलावच्छिन्नः परस्परितो व्यापारनिचयः पचेरर्थः, स यावता कालेन निर्वर्तते स कालो वर्तमानः, तद्योगाद्धात्वर्थो वर्तमानः, तेन निष्पन्नस्याऽतीतत्वादनिष्पन्नस्य च भावित्वात्तदुभयव्यतिरेकेणान्यस्याभावाद्वर्तमानाभाव इत्याशङ्काऽपैति। प्रवृत्तस्याऽविरामे, इहाधीमहे, इहवसामः; नित्यप्रवृत्ते तिष्ठन्ति पर्वताः, स्रवन्ति नद्यः इत्युभयोरारम्भानपवर्गतया वर्तमानत्वेन संग्रहः। वर्तमाने लटः शतृशानचावपि विहितौ—पचन्तं पचमानं जनं पश्येति, तत्राप्येवमेव वर्तमानता। वर्तमानसमीपे वर्तमानवद्वा इत्यतिदिष्टस्तु गौणो वर्तमानः।

वि० क्रियाया आरम्भादपवर्गान्तं मध्ये भोजनादिकं विना नाऽध्ययनादिनिर्वाह इति नान्तरीयकैः क्रियान्तरैर्व्यवधानेपि न वर्तमानत्वहानिः। उक्तं च भाष्यकृता—"सोपिह्यवश्यं हसति वा जल्पति वा पानीयं वा पिबति" इति। कैयटेनाप्युक्तम्—"अध्ययनं यदा प्रवृत्तं न चोपरतं तदा तस्य भोजनादिक्रियानान्तरीयकत्वादव्यवधायिका, अथवाऽध्ययनस्यैवावयवक्रिया" इति। उक्तं च हरिणा "व्यवधानमिवोपैति निवृत्त इव दृश्यते क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः। नच विच्छिन्नरूपोपि स विरामान्निवर्तते। सर्वैव हि क्रियाऽन्येन सङ्कीर्णैवोपलभ्यते। तदन्तरालदृष्ट्या वा सर्वैवावयव क्रिया। साहश्यात्तु भेदे तु तदङ्गत्वेन गृह्यते, इति। तिष्ठन्ति पर्वताः स्रवन्ति नद्य इत्यादौ पर्वतादीनां सदावस्थानादिना भूतभविष्यत्वाभावेन तत्प्रतिद्वन्द्विवर्तमानस्याभावात्कथं लडित्याशङ्कायां कालत्रयवर्तिनां राज्ञां याः क्रियाः पालनादिका भूतादिभेदेन भिन्नास्ताभिः पर्वतादिस्थितीनामपि भेदेन भूतभविष्यत्कालयोगोप्युपपद्यते, तस्थुः पर्वता नलदुष्यन्तादिकाले, स्थास्यन्ति पर्वताः कल्किविष्णुकाले इत्यादिव्यवहारेण तद्वद्वर्तमानव्यवहारोपीत्युक्तं भाष्यकृता। उक्तं च हरिणा—"परतो भिद्यते सर्वमात्मा तु न विकल्पते। पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते। प्रसिद्धभेदा व्यापारा विरूपावयवक्रियाः। साहचर्येण भिद्यन्ते सरूपावयवक्रियाः" इति।

भविष्यतीत्यनुवृत्तौ **यावत्पुरानिपातयोर्लट्** (३-३-४) यावत्पुराशब्दयोर्निपातयोरुपपदयोर्भविष्यति लट् स्यात्। लुडाद्यपवादः। निपातावेतौ निश्चयं द्योतयतः। यावद्भुङ्क्ते पुरा भुङ्क्ते। (भुङ्क्त एव) निपातयोरित्युक्त्या नेह-यावद्दास्यते तावद्भोक्ष्यते, पुरा (नगरमार्गेण) यास्यति। **विभाषा कदाकर्ह्योः** (३-३-५) अनयोरुपपदयोर्भविष्यति लड् वा स्यात्। पक्षे यथाप्राप्तं लुट्लटौ। कदा भुङ्क्ते, कदा भोक्ष्यते, कदा भोक्ता वा। कर्हि ददाति दाता वा। अनद्यतनेर्हिलप्रत्ययात्कर्हियोगे लट् नेत्याहुः। **किंवृत्ते लिप्सायाम्** (३-३-६) किंशब्दनिष्पन्नं विभक्त्यन्तं, डतरडतमप्रत्ययान्तं च किंवृत्तम्। किंवृत्ते उपपदे लिप्सायां भविष्यति लड् वा स्यात्। पक्षे यथाप्राप्तं लुट्लटौ। कं कतरं कतमं वा भोजयसि, भोजयिष्यसि, भोजयितासि वा। भोजनं लिप्स्योः पृच्छेयम्। कः कतरः कतमो वा भिक्षां ददाति दास्यति दाता वा। कः पारितोषिकं ददाति दास्यति दाता वा। **लिप्स्यमानसिद्धौ च** (३-३-७) लिप्स्यमानेनान्नादिना स्वर्गादिः सिद्धौ गम्यमानायां भविष्यति लड् वा स्यात्। पक्षे यथाप्राप्तं लुट्लटौ। अकिंवृत्तार्थोयमारम्भः। योऽन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा। य उपकारं करोति करिष्यति कर्ता वा स

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यशस्वी भवति भविष्यति भविता वा। **लोडर्थलक्षणे च** (३-३-८) लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लङ् वा स्यात्। पक्षे लुट्लटौ। कृष्णश्चेद्भुङ्क्ते भोक्ष्यते भोक्ता वा त्वं गाश्चारय। अत्र भोजनं लोडर्थगोचारणप्रैषस्य लक्षणम्। **लिङ् चोर्ध्वमौहूर्तिके** (३-३-९) ऊर्ध्वं मुहूर्ताद्भव और्ध्वमौहूर्तिकः, ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्षणे वर्तमानाद्धातोर्लिङ्लटौ वा स्तः। पक्षे लुट्लटौ यथाप्राप्तम्। मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा अथ त्वं छन्दोऽधीष्व। **लृट् शेषे च** (३-३-१३) भविष्यतीत्येव। भविष्यदर्थवृत्तेर्धातोर्लृट् स्यात्क्रियार्थायां क्रियायां सत्यामसत्यां च। बाधनाक्रान्ते सामान्येऽद्यतने व्यामिश्रे च भविष्यति लृट्। क्रियार्थोपपदे· करिष्यामीति व्रजति, हरिष्यामीति पश्यति। इतिशब्दः परस्पराभिसम्बन्धार्थः। तदभावे करिष्यति हरिष्यति। अद्य सायं गमिष्यति अद्य श्वो वा गमिष्यति। भविष्यति लृटः शतृशानचावपि विहितौ-करिष्यन्तं करिष्यमाणं वा जनं पश्य। **अनद्यतने लुट्** (३-३-१५) भविष्यतीत्येव। भविष्यदनद्यतनेर्थे वर्तमानाद्धातोर्लुट् स्यात्। लृटोपवादः। श्वः कर्ता परेद्युर्भोक्ता। अनद्यतन इति बहुव्रीहिनिर्देशाद् व्यामिश्रे न लुट् किन्तु लृडेव-अद्य श्वश्च करिष्यामि। **परिदेवने श्वस्तनी भविष्यदर्थे वक्तव्या** (वा) श्वस्तनीति लुटः, भविष्यन्तीति लृटः भवन्तीति लटः पूर्वाचार्याणां संज्ञाः। परिदेवनमनुशोचनम्। इयं नु कदा गन्ता या एवं पादौ निदधाति। अयं नु कदाऽध्येता य एवमनभियुक्तः (आचारहीनः)।

वि० तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति क्रियार्थक्रियायाः प्रकरणाल्लृट्शेषेचेत्यत्र क्रियार्थोपपदादन्यः शेषः तस्मिन् भविष्यति, चकारात्क्रियार्थक्रियास्थलेपि, इति क्रियार्थायां क्रियायां सत्यामसत्यां चेत्युक्तम्। तत्रानद्यतनभिन्ने ऽद्यादौ लृट्, अनद्यतने तु तद्बाधको लुट्। अत्र शेष इत्यनुक्तावपि क्रियार्थायामित्यननुवृत्तौ शेषे स्यादेव, अशेषे क्रियार्थोपपदस्थलेपि बाधकौ तुमुन्ण्वुलौ वासरूपविधिना लृडपि भविष्यतीति फलभेदाभावेन शेषेचेति चिन्त्यप्रयोजनमिति हरदत्तः।

वर्तमानसामीप्ये वर्तमानवद्वा (३-३-१३१) समीपमेव सामीप्यम्। वर्तमाने लडित्यारभ्य उणादयो बहुलमिति यावत् वर्तमाने येभ्यो यथा ये प्रत्यया विहितास्तेभ्यस्तथा ते वर्तमानसमीपे भूते भविष्यति च वा स्युः। पक्षे यथाप्राप्तम्। भूते-कदाऽऽगतोसीति प्रश्ने अयमागच्छामि, आगच्छन्तमेव मां विद्धि; पक्षे अयमागमम्; अयमागतः। भविष्यति-कदा गमिष्यसीति प्रश्ने एष गच्छामि, गच्छन्तमेव मां विद्धि; पक्षे एष गच्छामि एष गन्तास्मि। एवमेष पचामि, एषोस्मि पचमानः। सामीप्योक्तेर्विप्रकर्षे न- परुदगच्छत्पाटलिपुत्रम्, वर्षेण गमिष्यति।

वि० लड्वेत्यनुक्त्वा वर्तमानवद्वेत्यतिदेशेन वर्तमानाधिकारे याभ्यः प्रकृतिभ्यो येन विशेषेण ये ये प्रत्यया विहिताभ्यः प्रकृतिभ्यस्तेन विशेषेण ते प्रत्यया वर्तमानसमीपे भूते भविष्यति च भवन्तीत्यर्थलाभेन शत्रादयोपि तथा भवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उक्तं च भाष्ये–वर्तमानवद्वचनं शत्राद्यर्थमिति । तेन एषोऽस्मि पचन् पचमानः, एषोऽस्मि अलङ्करिष्णुः पवमानः यजमानः। भूतभविष्यतोः कालविशेषयोर्बोधाय प्रश्ननिर्देशः, न त्वावश्यकः सः । अत्र काशिकाकारः-"यो मन्यते गच्छामीति पदं वर्तमानकाल एव प्रवर्तते, कालान्तरावगतिस्तु वाक्याद्भवति, न च वाक्यगम्यः कालः पदसंस्कारवेलायामुपयुज्यते इति, तादृशं वाक्यार्थज्ञं प्रतिपत्तारं प्रति प्रकरणमिदं (वर्तमान सामीप्य इत्यारभ्य परस्मिन्विभाषेतिपर्यन्तमष्टसूत्रीरूपं) नारभ्यते, तथाच श्वः करिष्यति, वर्षेणागमिष्यतीति सर्वमुपपद्यते" इति । एवमभ्युपगमे बहुविप्लवापत्तेर्वाक्यसंस्कारपक्ष एव ग्रहीतुमुचितः । "गङ्गासमीपे गङ्गात्वारोपवद्वर्तमानसमीपे वर्तमानत्वारोपसंभवादेतत्सूत्रमाकरे प्रत्याख्यात"मिति तत्त्वबोधिनी।

आशंसायां भूतवच्च (३-३-१३२) **अप्राप्तस्य प्रियार्थस्य प्राप्तुमिच्छा आशंसा, तस्याश्च भविष्यत्कालो विषयः। भविष्यति काले भूतवद्वर्तमानवच्च प्रत्यया वा स्युराशंसायां गम्यमानायाम्। देवश्चेदवर्षीत्, वर्षति, वर्षिष्यति वा धान्यमवाप्स्म, वपामो, वप्स्यामो वा । उपाध्यायश्चेदागमत्, आगतः, आगच्छति, आगमिष्यति वा एते वयं व्याकरणमध्यगीष्महि, अधीतवन्तः, अधीमहे, अध्येष्यामहे वा । सामान्यातिदेशे विशेषानतिदेशाल्लङ्लिटौ न । क्षिप्रवचने लृट्** (३-३-१३३) **क्षिप्रपर्याय उपपदे आशंसायां गम्यमानायां भविष्यति लृट् स्यात् । पूर्वसूत्रापवादः । वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वाऽऽयास्यति शीघ्रं वप्स्यामः । उपाध्यायश्चेत्क्षिप्रमागमिष्यति क्षिप्रं व्याकरणमध्येष्यामहे। नेति वक्तव्ये लड्ग्रहणं लुटोपि विषये यथा स्यात् । श्वः शीघ्रं वप्स्यामः । आशंसावचने लिङ्** (३-३-१३४) **आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्नतु भूतवत् । भूतवच्चेत्यस्यापवादः । गुरुश्चेदुपेयादाशंसे अधीयीय, आशंसे क्षिप्रमधीयीय ।**

वि० १. एतेन आशंसायामाशंसावाचिन्युपपदे भविष्यति लिङ्, क्षिप्रपर्याये उपपदे लड्विषये लुड्विषयेपि लृट्, अन्यत्र भूतवल्लुङ्, वर्तमानवल्लट् सामान्यतो लृट् च भवति ।

वि० २. अनद्यतने हि भूते लङ्लिटौ विधीयेते, नचात्राद्यतनः कालो विवक्षितः कस्तर्हि भूतसामान्यमिति भाष्ये, "भूतवदित्यत्र भूतशब्देन भूतमात्रमुच्यते न तु तद्विशेषोऽद्यतनः, सामान्यातिदेशे विशेषो नातिदिश्यते, ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमित्युक्ते ब्राह्मणमात्रप्रयुक्तं कार्यं गम्यते, नतु माठरादिविशेषप्रयुक्तं, तेनानद्यतनत्वप्रयुक्तौ लङ्लिटौ न भवतः" इति **पदमञ्जर्याम्** ।

वि० ३. अत्र भाष्यम्–"अनिष्पन्ने निष्पन्नशब्दः शिष्योऽनिष्पन्नत्वात्, देवश्चेद्वृष्टो निष्पन्नाः शालयः, तत्र भवितव्यं सम्पत्स्यन्ते शालय इति । अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्तुर्विद्यमानत्वात् कूपोस्ति कूपो भविष्यति कूपो भविता कूपोभूत् कूप आसीत् कूपो बभूवेति···।···इहहि किञ्चिदिन्द्रियकर्म, किञ्चिद्बुद्धिकर्म, इन्द्रियसमासादनं बुद्धिकर्म व्यवसायः एवं हि कश्चित्पाटलिपुत्रं जिगमिषुराह योयमध्वा गन्तव्य आपाटलिपुत्रादेतस्मिन्कूपो भविष्यति, अनद्यतने कूपो भवितेति समासाद्य कूपोस्तीति, समासाद्यातिक्रम्य कूपोभूदिति, समासाद्यातिक्रम्योषित्वा कूप आसीदिति, समासाद्यातिक्राम्योषित्वा विस्मृत्य कूपो बभूवेति, तद्यदैन्द्रियकर्म तदैता विभक्तयः, यदाहि बुद्धिकर्म तदा वर्तमाना भवि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...नी" इति। हरिरप्याहः-सतामिन्द्रियसम्बन्धात्सैव सत्ता विशेष्यते। भेदेन व्यवहारोहि वस्त्वन्तरनिबन्धनः। अस्तित्वं ...मात्रस्य बुद्ध्या तु परिगृह्यते। यः समासादनाद्भेदः स तत्र न विवक्षितः" इति।

नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः (३-३-१३५) क्रियाणां प्रबन्धः सातत्येनानुष्ठानं, कालानां सामीप्यं तु तुल्यजातीयेनाऽव्यवधानम्। क्रियायाः सातत्ये सामीप्ये च गम्ये लङ्लुटौ न। सातत्य-सामीप्ययोर्भूतानद्यतन-भविष्यदनद्यतनयोर्लङ्लुटोः प्रतिषेधेन लुङ्लृटावेव। सातत्ये-यावज्जीवमन्न-मदात् दास्यति वा। यावज्जीवं पुत्रोऽध्यापिपत् अध्यापयिष्यति वा। सामीप्ये-येयं पौर्णमास्यति-क्रान्ता तस्यामग्नीन् आधित, सोमेनायष्ट, गामदित। येयममावास्याऽऽगामिनी तस्यामग्नीनाधास्यते, सोमेन यक्ष्यते, गां दास्यते।

वि० **भविष्यति मर्यादावचनेऽवरस्मिन्** (३-३-१३६) भविष्यति काले मर्यादोक्तौ अवरस्मिन् प्रविभागे ...द्यतनवन्न स्यात्। अक्रियाप्रबन्धसातत्यार्थं वचनम्। अनद्यतनवल्लुटः प्रतिषेधाल्लृडेव। योयमध्वा गन्तव्य आपाटलि-...त्तस्य यदवरं (पूर्वप्रदेशः) तत्र सक्तून् (श्वः प्रभृति) पास्यामः, द्विरोदनं भोक्ष्यामहे। भविष्यतीत्युक्त्या भूते त्वनद्य-...नवाल्लङ्, योयमध्वा गत आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्याः तत्र युक्ता अध्यैमहि, द्विरोदनमभुञ्जमहि, ...तूनपिबाम। मर्यादोक्त्या तदभावे लुट् योयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्तास्महे, ...क्तूनपातास्मः। अवरस्मिन्नित्युक्त्या परविभागेऽपि लुट्-योयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यत्परं (पश्चिमप्रदेशः) ...शाम्ब्यास्तत्र द्विरोदनं भोक्तास्महे, सक्तून्पातास्मः। इह सूत्रे देशमर्यादा, उत्तरत्र तु कालमर्यादा। **कालविभागे चानहोरात्राणाम्** (३-३-१३७) भविष्यति मर्यादावचनेऽवरस्मिन्नित्यनुवर्तते। कालमर्यादाविभागे सत्यवरस्मिन्प्रविभागे ...विष्यति कालेऽनद्यतनवन्न, नचेदहोरात्रसम्बन्धी विभागः। पूर्वेणैव सिद्धे वचनमिदमहोरात्रनिषेधार्थम्। योगविभाग ...त्तरार्थः। योयं वत्सर आगामी तस्य यदवर-(पूर्वं) माग्रहायण्यास्तत्र युक्ता अध्येष्यामहे, ओदनं भोक्ष्यामहे। भविष्यती-...त्युक्त्या भूते तु लङ्,-योयं वत्सरोऽतीतस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्यैमहि ओदनमभुञ्जमहि। मर्यादोक्त्या तदभावे लुट्-योयं निरवधिकाल-आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे, ओदनं भोक्तास्महे। अनहोरात्रा-णामित्युक्त्याऽहोरात्रविभागे लुट्, योयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे, सक्तून्पातास्महे। सर्वथा-होरात्रस्पर्शे प्रतिषेधः। अवरस्मिन्नित्येव, परस्मिन्विभाषां वक्ष्यति। **परस्मिन्विभाषा** (३-३-१३८) भविष्यति मर्यादावचने कालविभागे चानहोरात्राणामिति सर्वमनुवर्तते। कालमर्यादाविभागे भविष्यति काले परस्मिन्प्रविभागे विभाषा-नद्यतनवत्प्रत्ययविधिर्न, नचेदहोरात्रसम्बन्धी प्रविभागः। अप्राप्तविभाषेयम्। योयं वत्सर आगामी तस्य यत्परमाग्रहायण्या-स्तत्र युक्ता अध्येष्यामहे अध्येतास्महे वा भविष्यतीत्युक्त्या भूते तु लङ्-योयं वत्सरोतीतस्तस्य यत्परमाग्रहायण्यास्तत्र युक्ता अध्यैमहि। मर्यादोक्त्या तदभावे लुट्- योयं निरवधिकः काल आगामी तस्ययत्परमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे। अनहोरात्रेत्युक्त्याऽहोरात्रविभागे लुट्- योयं त्रिंशद्रात्र आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे। काल-विभाग इत्युक्त्या देशविभागेपि लुट्- योयमध्वागन्तव्य आपाटलिपुत्रात्तस्ययत्परं कौशाम्ब्यास्तत्र युक्ता अध्येतास्महे।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्निमित्ते लृङ् क्रियातिपत्तौ (३-३-१३९) हेतुहेतुमद्भावादिके लिङ्निमित्ते भविष्यति काले लृङ् स्यात्क्रियातिपत्तौ गम्यमानायाम्। कुतश्चिद्वैगुण्यात्क्रियाया अनभिनिर्वृत्तिः क्रियातिपत्तिः। दक्षिणेन चेद्यास्यन्न शकटं पर्याभविष्यत् (न यास्यत्यतः पर्याभविष्यति) यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यत् (नाह्वास्यत्यतः पर्याभविष्यति)। अभोक्ष्यत भवान्घृतेन यदि मत्समीपमागमिष्यत् (नागमिष्यत्यतो न भोक्ष्यते)। **भूते च** (३-३-१४०) लृङ्क्रियातिपत्ताविति सर्वमनुवर्तते। हेतुहेतुमद्भावादौ भूतेपि लृङ् स्यात्क्रियातिपत्तौ। भूतेचेति योगविभाग उत्तरार्थः। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् (वृष्टिर्नाभूदतः सुभिक्षं नाभूत्)। यदि स तेन दृष्टोऽभविष्यत्तदाऽभोक्ष्यत (न च दृष्टोन्येन पथा गतस्ततो न भुक्तवान्)।

वि० लिङ्गिलिङ्गे बुध्वा तदतिपत्तिं प्रमाणान्तरादवगम्य वाक्यं प्रयुङ्क्ते। दक्षिणमार्गस्य ऋजुत्वात्स्थाण्वादेरभावाच्च ततो गमनमपर्याभवने (अभङ्गे) हेतुः, कमलकः कश्चित्पुरुषः शकटादीनां विषमेष्वपि स्थानेषु सम्यङ् नेता तदाह्वानमभङ्गे-हेतुः, सुवृष्टिः सुभिक्षे हेतुः, दर्शनं भोजने हेतुः, हेतोरभावेन हेतुमतोऽप्यभावः। भूत इव भविष्यत्यपि प्रमाणान्तराद्धेतु-हेतुमतोरतिपत्तिज्ञाने लृङः प्रयोगः। लृङः प्रयोगे हेतुहेतुमत्क्रिययोरनभिनिर्वृत्तिरवगम्यते।

वोताप्योः (३-३-१४१) वा आ उताप्योरिति छेदः। भूते लिङ्निमित्ते लृङ् क्रियातिपत्तावित्य-नुवर्तते। तेन उताप्योः समर्थयोर्लिङ् इत्यतः प्राक् लिङ्निमित्ते क्रियातिपत्तौ भूते लृङ् वा इत्यधि-क्रियते। अयमधिकारो यत्रोत्तरसूत्रेषु लिङ्विधिस्तत्रैव प्रवर्तते, नतु लडादिविधौ, तत्र लिङ्निमित्ता-भावात्। **गर्हायां लडपिजात्वोः** (३-३-१४२) आभ्यां योगे लट् स्यात्कालत्रये गर्हायां गम्यमाना-याम्। वर्तमाने लडुक्तः कालसामान्ये न प्राप्नोतीति विधीयते, कालविशेषविहिताल्लुँङादीन्प्रत्ययानयं परत्वादस्मिन्विषये बाधते। अपि जायां त्यजसि, जातु गणिकामाधत्से, गर्हितमेतत्। अपि जातु वा तत्र भवान्वृषलं याजयति, अन्याय्यमेतत्। अपि जातु शब्दौ गर्हाबोधकौ। अत्र लड्विधौ लिङ्निमि-त्ताभावाद्भूते लिङ्निमित्ते क्रियातिपत्तौ लृङ् वेति न सम्बध्यते। **विभाषा कथमि लिङ् च** (३-३-१४३) कथंशब्दे उपपदे गर्हायां कालत्रये वा लिङ् स्याच्चाल्लट्। विभाषाग्रहणं यथास्वं काल-विशेषे विहितानामबाधनार्थम्। कथं नाम भवान्वृषलं याजयेत् याजयति वा पक्षे अयाजयत् याजयि-ष्यति याजयिता याजयाञ्चकार अयीयजत्। कथं धर्मं त्यजेः त्यजसि वा, पक्षे अत्यजः त्यक्ष्यसि त्यक्तासि तत्यजिथ अत्याक्षीः। अत्र लिङ्निमित्तसत्त्वात्क्रियातिपत्तौ भूते वा भविष्यति नित्यं लृङ्। कथं नाम भवान् धर्ममत्यक्ष्यत् (नात्यजन् न त्यक्ष्यति)। **किंवृत्ते लिङ्लृटौ** (३-३-१४४) गर्हाया-मित्येव, विभाषा तु नानुवर्तते। किमो निष्पन्ने शब्दे उपपदे गर्हायां लिङ्लृटौ स्तः। सर्वलकारापवादः। कः कतरः कतमो वा हरिं निन्देत् निन्दिष्यति वा। कतरः कतमो वा वृषलं याजयेत् याजयिष्यति वा। अत्रापि लिङ्निमित्तसत्त्वात्क्रियातिपत्तौ भूते वा भविष्यति नित्यं लृङ्। कं कतरं कतमं वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृषलमयाजयिष्यत्। **अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि** (३-३-१४५) गर्हायामिति निवृत्तम्। अनवक्लृप्ति-रसंभावना, अमर्षोऽक्षमा । किंवृत्तेऽकिंवृत्ते चोपपदे अनवक्लृप्त्यमर्षयोर्लिङ्लटौ स्तः। सर्वलकारा-पवादः। न संभावयामि न मर्षये वा भवान्हरिं निन्देत् निन्दिष्यति वा। कः कतरः कतमो वा हरिं निन्देत् निन्दिष्यति वा। नावकल्पयामि न श्रद्दधे वा तत्रभवान्वृषलं याजयेत् याजयिष्यति वा। अत्रापि क्रियातिपत्तौ पूर्ववल्लृङ्। **किंकिलास्त्यर्थेषु लृट्** (३-३-१४६) अनवक्लृप्त्यमर्षयोरिति वर्तते। किंकिलेति समुदायः क्रोधद्योतकः, अस्त्यर्था अस्तिभवतिविद्यतयः। किंकिलास्त्यर्थेषूपपदेषु अनवक्लृप्त्य-मर्षयोर्लृट् स्यात्। पूर्वसूत्रोक्तलिङोऽपवादः। न श्रद्दधे न मर्षये वा किंकिल त्वं शूद्रान्नं भोक्ष्यसे। अस्ति भवति विद्यते वा त्वं शूद्रां गमिष्यसि । अत्र लिङ्निमित्ताभावान्न लृङ्। **जातुयदोर्लिङ्** (३-३-१४७) अनवक्लृप्त्यमर्षयोरित्येव। जातु यदित्युपपदयोरनवक्लृप्त्यमर्षयोर्लिङ् स्यात्। लटोऽ-पवादः। **यदायद्योरुपसंख्यानम्** (वा) जातु यत् यदा यदि वा भवान्वृषलं याजयेत् न श्रद्दधे न मर्षयामि। अत्र लिङ्निमित्तसत्वात्पूर्ववल्लृङ् जातु भवान्वृषलमयाजयिष्यत् (नायाजयत् नयाजयि-ष्यति वा)। **यच्चयत्रयोः** (३-३-१४८) यच्चयत्रेत्युपपदयोरनवक्लृप्त्यमर्षयोर्लिङ् स्यात्। लटोऽपवादः। योगविभाग उत्तरार्थः। यच्च यत्र वा भवान् वृषलं याजयेत्, यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे, न मर्षयामि, अत्रापि पूर्ववल्लृङ् यच्च यत्र वा वृषलमयाजयिष्यत् (नायाजयत् नयाजयिष्यति वा)। **गर्हायां च** (३-३-१४९) अनवक्लृप्त्यमर्षयोरिति निवृत्तम्। यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात्। सर्वलकारापवादः। यच्च यत्र वा त्वं शूद्रं याजयेः अन्याय्यं तत्। यच्च यत्र वा भवान्वृद्धो वृद्धो ब्राह्मणः सन्वृषलं याजयेत् गर्हामहे तत्। क्रियातिपत्तौ पूर्ववल्लृङ्। यच्च यत्र वा वृषलमयाजयिष्यत्। **चित्रीकरणे च** (३-३-१५०) यच्चयत्रयोरुपपदयोः आश्चर्ये बोध्येऽपि लिङ् स्यात्। सर्वलकारापवादः। यच्च यत्र वा भवान् शूद्रं याजयेः चित्रमेतत्। अत्रापि क्रियातिपत्तौ लृङ्। **शेषे लृडयदौ** (३-३-१५१) यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये लृट् स्यात् नचेद्यदिशब्दः प्रयुज्यते। सर्वलकारापवादः। आश्चर्यं चित्रमद्भुतं वा अन्धो नाम पर्वतमारोक्ष्यति, बधिरो नाम व्याकरणमध्येष्यते। आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति। नात्र लिङ्निमित्तम्। यदियोगे तु पूर्वेण लिङेव-आश्चर्यं यदि मूकोऽधीयीत।

वि० एतावत्पर्यन्तं वोताप्योरिति वाकाराधिकारेण लिङ्विधिस्थलेषु क्रियातिपत्तौ गम्यमानायां भूते विकल्पेन, भवि-ष्यति नित्यं लृङ्, लट्लृट्मात्रविधिविषये तु न लृङः प्रसङ्गः। इत उत्तरमुताप्योः समर्थयोरित्यारभ्य समानकर्तृकेषु ...न्निति विहाय लिङ् चेतिपर्यन्तं सप्तसूत्र्यां क्रियातिपत्तौ लिङ्निमित्ते भूते भविष्यति च नित्यं लृङित्यनुवर्तते।

उताप्योः समर्थयोर्लिङ् (३-३-१५२) समर्थत्वं तुल्यार्थत्वम्, बाढमित्यर्थेऽनयोस्तुल्यार्थता। तुल्यार्थयोरुताप्योर्योगे लिङ् स्यात्। सर्वलकारापवादः। उत अपि वा (बाढं) हन्यादघं हरिः। उतार्यं कुर्यात्। अपि स पश्येत्। अप्यधीयीत बाढमित्यर्थः। अर्थान्तरे तु तद्योगेऽपि न, उत (किन्तु)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दण्डः पतिष्यति, द्वारमपिधास्यति (पिधास्यति) अपि (किन्तु) गच्छसि। क्रियातिपत्तौ भूतभविष्यतोर्नित्यं लृङ् उताऽधमकरिष्यत् (न करिष्यति), अप्ययमध्येष्यत (नाध्यैष्ट)। **कामप्रवेदनेऽकच्चिति** (३-३-१५३) स्वाभिप्रायाविष्करणे गम्ये लिङ् स्यात् नतु कच्चिति सति। सर्वलकारापवादः। अभिलापो मे अधीयीत भवान्। कामो मे भुञ्जीत् भवान्। कच्चिद्योगे तु कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता। क्रियातिपत्तौ लृङ्। **संभावनेऽलमितिचेत्सिद्धाप्रवेदने** (३-३-१५४) संभावनं क्रियासु योग्यताध्यवसानम् अर्थमर्थ प्रौढिः (पर्याप्तिः), संभावन इति प्रथमया अलमिति सप्तम्या च विपरिणम्यते संभावनेऽलमर्थस्य विशेषणतया पर्याप्तसंभावन इत्यर्थः। सिद्धाप्रयोगः अप्रयोगेपि गम्यमानत्वं तच्चालमो विशेषणम्। पर्याप्त सम्भावनेऽर्थे लिङ् स्यादलमोऽप्रयोगे। सर्वलकारापवादः। अपि गिरिं शिरसा भिन्द्यात् (प्रायेण शिरसा गिरिं भेत्तुं समर्थोयम्) अपि द्रोणपाकं भुञ्जीत। सामर्थ्यद्योतकोपिशब्दः। सिद्धाप्रयोग इत्युक्त्या नेह-अलं कृष्णो हस्तिनं हनिष्यति। क्रियातिपत्तौ भूतभविष्यतोर्नित्यं लृङ्-अपि गिरिं शिरसाऽभेत्स्यत् (नाभिनद् न भेत्स्यति वा)। **विभाषा धातौ संभावनवचनेऽयदि** (३-३-१५५) पूर्वसूत्रमनुवर्तते। संभावनार्थे उपपदे यच्छब्दवर्जिते उक्तार्थे लिङ् वा स्यात्। पूर्वेण नित्यं प्राप्ते वचनमिदम्। तेन संभावनार्थकधातावुपपदेऽनेन विकल्पस्तदभावे पूर्वेण नित्यं लिङ्। सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान्। अवकल्पयामि श्रद्दधे वा भवान् कुर्वीत करिष्यते वा। यद्योगे तु पूर्वेण नित्यं लिङ्-सम्भावयामि यद् भुञ्जीत भवान्। क्रियातिपत्तौ पूर्ववल्लृङ्। **हेतुहेतुमतोर्लिङ्** (३-३-१५६) हेतुः कारणं, हेतुमत्फलम्। हेतुभूते फलभूते चार्थे वर्तमानाद्धातोर्लिङ् स्यात्। सर्वलकारापवादः। विभाषा चायमिष्यते, तेन पक्षे लृट्। कृष्णं नमेच्चेत्सुखं यायात्-नंस्यति चेद्यास्यति वा। देवश्चेद्वर्षेत्सस्यमुत्पद्येत-वर्षिष्यति उत्पत्स्यते वा। दक्षिणेन चेद्यायान्नशकटं पर्याभवेत्-यास्यति-न पर्याभविष्यति। अत्र क्रियातिपत्तिर्न विवक्षिता। तद्विवक्षायां तु लृङेव। भविष्यत्येवेष्यते (वा) नेह हन्तीति पलायते, वर्षतीति धावति। **इच्छार्थेषु लिङ्लोटौ** (३-३-१५७) इच्छार्थेषु धातुषूपपदेषु लिङ्लोटौ स्तः। सर्वलकारापवादः। इच्छामि भुञ्जीत भुङ्क्तां वा भवान्। कामये अधीयेथाः अधीष्व वा त्वम्। एवं प्रार्थये इत्यादि योगेपि। क्रियातिपत्तौ तु लृङ्। **कामप्रवेदने इति वक्तव्यम्** (वा) नेह इच्छन्करोति, नात्र स्वस्य कामप्रवेदनम्। **लिङ् च** (३-३-१५९) समानकर्तृकेषु इच्छार्थेषूपपदेषु लिङ् स्यात्। भुञ्जीय इति इच्छति अधीयीयेति कामयते। क्रियातिपत्तौ तु लृङ्। एतावत्पर्यन्तमेव लृङो विषयः।

वि० इच्छार्थेषूपपदे इच्छार्थेषु लिङ्लोटाविति लिङः सिद्धावपि तस्य समानकर्तृकेषु तुमुना बाधः स्यात्, वासरूपविधिन्यायश्च क्त्ल्युट्तुमुन्खलर्थेषु प्रतिषिद्धस्तेन बाधाल्लोडिव लिङपि न स्यात्, वासरूपविधेरभ्युपगमेपि लिङेव स्यान्न-लोट् इत्यर्थं लिङ्चेति सूत्रमारब्धमिति **पदमञ्जर्याम्**।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३१

इच्छार्थेभ्यो विभाषा वर्तमाने (३-३-१६०) इच्छार्थेभ्यो धातुभ्यो वर्तमाने लिङ् वा स्यात्। पक्षे लट्। इच्छेत् इच्छति वा। कामयेत कामयते वा। काङ्क्षेत् काङ्क्षति वा। **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्** (३-३-१६१) एष्वर्थेषु लिङ् स्यात्। सर्वलकारापवादः। **लोट् च** (३-३-१६२) विध्यादिष्वर्थेषु लोट् च स्यात्। योगविभाग उत्तरार्थः। विधौ (प्रेरणे)—कटं कुर्याः कुरु वा। अहरहः सन्ध्यामुपासीत उपास्ताम् वा। भवान्गच्छेत् गच्छतु वा। निमन्त्रणे (नियोगकरणे)—श्राद्धीयं भवान् भुञ्जीत भुङ्क्तां वा। आमन्त्रणे (कामचरानुज्ञायाम्)—विवाहोत्सवे भवान् भुञ्जीत भुङ्क्तां वा। अधीष्टे (सत्कारपूर्वक व्यापारे)—अधीच्छामो भवन्तं मा... कं भवानुपनयीत उपनयतां वा। सम्प्रश्ने (सम्प्रधारणे)-किन्नु खलु भो व्याकरणमधीयीय अध्ययै वा। प्रार्थने (याञ्चायाम्)—भवति मे प्रार्थना व्याकरणमधीयीय अध्ययै वा। भिक्षां लभेय लभै वा।

वि० असौ विध्यादि-प्रकृत्यर्थः प्रत्ययार्थः प्रकृत्यर्थविशेषणं, प्रत्ययार्थविशेषणं चेति चत्वारः पक्षाः। आद्ये पक्षे विध्या- ...भ्यो धातुभ्यः विदध्यान्निमन्त्रयेतामन्त्रयेतसंपृच्छेत्प्रार्थयेतेत्यादावेव स्यात्; द्वितीये नाप्राप्तेषु भावकर्मकर्तृषु विध्यादयोर्था ...श्यमानास्तेषां बाधकाः स्युरिति तिङा कर्त्रादीनामभिधानं न स्यात् द्विबहुवचनाद्यनुपपत्तिश्च विध्यादीनामेकत्वात्; ...ये तु यत्र प्रकृतिरेव विध्यादीनाचष्टे विद्ध्यान्निमन्त्रयेतेत्यादौ न स्यात्, नह्यत्र प्रकृत्यर्थादन्ये तद्विशेषणभूता विध्यादयः ...; चतुर्थे तु विध्यादीनां ...दीनां च स्पष्ट एव भेद इति दोषाभाव इति तमेवाश्रयति विध्यादयश्च प्रत्ययार्थविशेषणा- ...ति पदमञ्जरीकारः। विधिश्च त्रिधा, अत्यन्ताप्राप्तस्य विधिरपूर्वविधिः सन्ध्यामुपासीतेति; पक्षे प्राप्तस्याप्राप्तांशपूरणरूपो ...यमविधिः, व्रीहीनवहन्तीति, तुषविमोकार्थमवहननस्य पक्षे प्राप्तेः; सर्वथाप्राप्तस्येतरनिवृत्तिफलको विधिः परिसंख्याविधिः, ...तौ दारानुपेयादिति, दारोपगमस्य रागतः प्राप्तेः अनृतूपगमस्य अदारोपगमस्य च निवृत्त्यर्थः।

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च (३-३-१६३) प्रैषो विधिः। प्रेषणं प्रैषः, अज्ञातज्ञापनं विधिरिति केचित् भेदमाहुः। अतिसर्गः कामचारानुज्ञा। प्राप्तकालः प्राप्तावसरता। एष्वर्थेषु धातोः कृत्यप्रत्ययाः स्युः चाल्लोट्। भवता यष्टव्यं यजनीयम्, भवान्यजताम्। चकारेण लोटोनुकर्षणं प्राप्तकालार्थं, प्रैषातिसर्गयोः पूर्वेणैव प्राप्तेः। गुरुर्भुङ्क्ताम् (भोजनं प्राप्तावसरम्)। **लिङ् चोर्ध्वमौहूर्तिके** (३-३-१६४) प्रैषादयोऽनुवर्तन्ते। प्रैषादिषु गम्येषु ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोर्लिङ् स्यात् चाद्यथाप्राप्तं लोट् कृत्याश्च। मुहूर्तादूर्ध्वं यजेत यजतां यष्टव्यं वा। प्रैषातिसर्गयोर्विध्यादिसूत्रेणैव सिद्धेः प्राप्तकालेऽप्राप्तस्य लिङो विधिः, लिङ एवात्र विधौ तेन लोटः कृत्यानाञ्च बाधः स्यादिति चकारेण तेषामपि विधिः। **स्मे लोट्** (३-३-१६५) स्मे उपपदे प्रैषादिषूर्ध्वमौहूर्तिकेर्थे लोट् स्यात्। लिङः कृत्यानां चापवादः। ऊर्ध्वं मुहूर्ताद्यजतां स्म। ऊर्ध्वं मुहूर्तात्कटं करोतु स्म। **अधीष्टे च** (३-३-१६६) स्मे उपपदे अधीष्टे गम्यमाने लोट् स्यात्। लिङोपवादः। त्वं स्माध्यापय। ब्रह्मन्नग्नि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

होत्रं जुहुधि स्म। **लिङ् यदि** (३-३-१६८) कालसमयवेलास्वित्यनुवर्तते। यच्छब्दे उपपदे कालसमयवेलासूपपदेषु लिङ् स्यात्। कालसमयवेलासु तुमुन्नित्यस्यापवादः। कालो यद्भुञ्जीत भवान्। वेला समयो यदधीयीत भवान्। **अर्हे कृत्यतृचश्च** (३-३-१६९) योग्ये कर्तरि बोध्ये धातोः कृत्यतृचः प्रत्ययाः स्युः चाल्लिङ्। भवता कन्या वोढव्या वाह्या, भवान् कन्याया वोढा, भवान् कन्यां वहेत्। त्वं वहेः। विवाहयोग्य इत्यर्थः। लिङा बाधो माभूदिति कृत्यतृचामपि विधिः। **शकि लिङ् च** (३-३-१७२) शकीति प्रकृत्यर्थविशेषणम् शक्नोत्यर्थोपाधिके धात्वर्थे लिङ् स्यात् चात्कृत्याः। भवान् खलु भारं वहेत्। भवान् भारं वोढुं शक्त इत्यर्थः। भवता खलु भारो वोढव्यो वहनीयो वाह्यो वा। लिङा बाधो माभूदिति सामान्यतो विहितानां कृत्यानां पुनर्विधिः। **आशिषि लिङ्लोटौ** (३-३-१७३) आशीर्विशिष्टेर्थे वर्तमानाद्धातोर्लिङ्लोट् च स्यात्। चिरं जीव्यात् जीवतु वा भवान्। त्वं चिरं जीव्याः जीव वा। यूयं सुखिनो भूयास्त भवत वा। **माङि लुङ्** (३-३-१७५) माङ्युपपदे धातोर्लुङ् स्यात्। सर्वलकारापवादः। माकार्षीत् माहासीः मागमः। माङो योगे अडाटौ न। माभवतु माकुरु धनजनयौवनगर्वमित्यादिषु तु न माङ्, किन्तु निषेधार्थो मा शब्द एव। **स्मोत्तरे लङ् च** (३-३-१७६) स्मशब्दोत्तरे माङ्युपपदे धातोर्लङ् स्याच्चाल्लुङ्। मास्मकरोत् मास्मकार्षीद्वा। मास्मभवः मास्मभूर्वा। मास्महरत् मास्महार्षीद्वा।

वि० वर्तमानेलडित्यादीनां केषाञ्चिल्लकारविधीनां पूर्वोक्तानामपि प्रकरणशुद्धये दृढीकाराय क्वचन विशेषावबोधनाय पूर्वापरानुसंधानाय चास्मिन्प्रकरणे पुनर्निर्देशः।

धातुसम्बन्धे प्रत्ययाः (३-४-१) धात्वर्थानां सम्बन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः। यत्र गौणमुख्ययोर्धात्वर्थयोः सम्बन्धस्तत्र गौणक्रियाया मुख्यानुसारितया कालान्तरविहिता अपि गौणक्रियाप्रत्ययाः मुख्यक्रियाकालेष्वनेन विधीयन्ते। वसन्ददर्श अत्र वर्तमाने लटो विहितोपि शतृप्रत्ययः मुख्याख्यातकालानुसारेण भूते। तेन अतीतवासकर्तृकर्तृकमतीतदर्शनमित्यर्थः। सोमयाज्यस्य पुत्रो भविता। अत्र यजेर्भूतेविहितोपि णिनिर्मुख्याख्यातकालानुसारेणानद्यतनभविष्यति, तेन भविष्यत्सोमयागकर्तृकर्तृकं भविष्यद्भवनमित्यर्थः। एवमेव सर्वे गौणकृदन्तक्रियाप्रत्ययाः कालान्तरविहिता अपि मुख्यक्रियाकालेष्वनेन विधीयन्ते, अन्यथा मुख्यगौणक्रिययोर्यथास्वं विभिन्नकालावबोधे कालसामानाधिकरण्यं नोपपद्येत।

वि० १. धात्वोर्मिथो विशेष्यविशेषणभावादिसम्बन्धाभावेन धातुशब्देन धात्वर्थो विवक्ष्यते, धात्वर्थयोर्विशेष्यविशेषणभावरूपे सम्बन्धे कालान्तरविहितैरप्यप्रधानक्रियाप्रत्ययैः प्रधानक्रियायाः काल एव बोध्यत इत्यर्थः। प्रधानक्रियाकालानुसारेणैवाप्रधानक्रियाकालस्यान्यथात्वं, नत्वप्रधानानुसारेण प्रधानस्य सङ्गमनं कार्यम्, गौणस्यैवप्रधानानुसरणे न्याय्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...त्। उक्तं च भाष्ये—"भूतकालो भविष्यत्कालेनाभिसम्बध्यमानो भविष्यत्कालः सम्पद्यते, उपपदस्य तु कालान्यत्वम्" ...। कैयटेनाप्युक्तम्-"विशेष्याया आख्यातादिपदवाच्यायाः क्रियायाः प्राधान्यात् स्वकाल एवावस्थानं, विशेषण-...त्वात्तु क्रियाया उपलक्षणभावेनोपादानाद्भाविभूतव्यपदेशविषयताप्रतिपादनात्कालान्यत्वावगमः" इति। प्रत्ययग्रहणेन ...त्वधिकारोक्ता अपि प्रत्यया गृह्यन्ते, तेन गोमानासीदित्यत्र गौरस्यास्तीति वर्तमानसत्ताक्रियायां विहितोऽपि मतुप् ...दिति मुख्यक्रियानुसारेण गौरस्यासीदिति भूतक्रियायां, गोमान्भवितेत्यत्र भविष्यत्क्रियायां, गोमानस्तीत्यत्र वर्तमान-...यां बोध्यः। एवं प्रत्ययान्तरेष्वपि कालविशेषार्थविहितेषु धात्वर्थसम्बन्धे मुख्यक्रियाकालः प्रतीयते। अत्र "अग्निष्टोम-...ति भूत एव णिनिः, जनितेत्येतत्सम्बन्धात्तु केवलं व्यपदेशस्य भावित्वप्रतीतिः, अस्य सूत्रस्य शाटकं वयेतिवत्, ...भाविव्यपदेशविज्ञानाद्विशेषणस्य कालान्यत्वं व्यपदेशवृत्त्याऽर्थवशादसत्यपि सूत्रारम्भे प्रत्येष्यते, अवश्यं च स्वकाल ...प्रत्ययविधिरेष्टव्यः, अन्यथा भाविकृत्यमासीदित्यत्र भाविशब्दस्य भूतकालार्थत्वे भाव्यासीच्छब्दयोः पर्यायत्वाद्युग-...योगो न स्यात्, तस्मादिदानीमासीदित्येव तच्चार्थः, गोमानासीदित्यत्रापि देवदत्तस्य विद्यमानत्वेपि गोमद्रूपस्यातीतत्वाद् ...त्ययः, तत्रार्थाद्गवामप्यतीतत्वं प्रतीयते; गोमच्छब्दस्तु स्वमहिम्ना वर्तमानसत्ताविशिष्टमेव प्रकृत्यर्थमाह।" इत्येत-...द्व्याख्यानं **पदमञ्जर्यां** निरूपितम्।

वि० २. **क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः** (३-४-२) पौनःपुन्ये भृशार्थे च द्योत्ये ...लोट् स्यात्, तस्य च हिस्वौ स्तः, तौ च क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः, तध्वमोर्विषये तु हिस्वौ वा स्तः। सर्वलका-...तिङां चापवादः। तेन क्रियासमभिहारबोधने सर्वेषु कालेषु सर्वलकारापवादेन लोट्, लोटः स्थाने तिङामपवादेन ...स्मैपदे हिः, आत्मनेपदे स्वः तयोस्तिङ्संज्ञा च, तध्वमोर्विषये तु हिस्वौ वा भवतः, तेन पक्षे तध्वमावपि। तिङ्संज्ञा तु ...न्तत्वेन पदत्वसिद्धयर्था। पुरुषैकवचनसंज्ञे तु नातिदिश्येते हिस्वविधानसामर्थ्यात्, अतः सकलपुरुषवचनविषये परस्मै-...भ्यो हिः कर्तरि, आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु। **समुच्चयेऽन्यतरस्याम्** (३-४-३) समभिहारे इति वर्जं ...पूर्वं सर्वमनुवर्तते। क्रियेति लुप्तषष्ठीकं समुच्चयेऽन्वेति। अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्। पूर्वत्र तध्वमो-...र्विकल्पः अत्र तु सर्वत्र। **यथाविध्यनुप्रयोगः पूर्वस्मिन्** (३-४-४) आद्ये समभिहारे लोड्विधाने लोट्प्रकृतिभूत ...धातुरनुप्रयोज्यः। **समुच्चये सामान्यवचनस्य** (३-४-५) समुच्चये लोड्विधौ सामान्यार्थकस्य धातोरनुप्रयोगः ...। अनुप्रयुज्यमानाद्यथायथं लडादयस्तिबादयश्च। ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः। **क्रियासम-...हारे द्वे वाच्ये** (वा) इति समभिहारक्रियाया द्विरुक्तिः। समभिहारे परस्मैपदे-याहि याहीति याति। पुनः पुनरति-...न वा यानं ह्यन्तस्य, एककर्तृकं वर्तमानयानं यातीत्यस्यार्थः इतिशब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति। एवं याहि ...हीति यातः—यान्ति यासि याथः याथ यामि यावः यामः, यातु अयात् यायात् ययौ याता यास्यति यायात् अयासीत् अया-...त्। तद्विषये तु वा-याहि याहीति यात यातेति वा यूयं यात। आत्मनेपदे-अधीष्व अधीष्वेति अधीते अधीयाते अधीयते, ...याम् अध्यैत अधीयीत अधिजगे अध्येता अध्येष्यते अध्येषीष्ट अध्यैष्ट अध्यैष्यत। ध्वमो विषये तु वा- अधीष्वाधीष्वेति ...ध्वमधीध्वमिति वा यूयमधीध्वम्। समुच्चये परस्मैपदे सक्तून् पिब (अतोहेर्लुक्), धानाः (भृष्टयवान्) खादेति अभ्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वहरति। तद्विषये तु वा- सक्तून् पिब, धानाः खादेति, सक्तून् पिबत धानाः खादतेति वा यूयमभ्यवहरत। आत्मनेपदे- अन्नं भुङ्क्ष्व दाधिकमास्वादयस्वेति अभ्यवहरते। ध्वमो विषये तु वा-अन्नं भुङ्क्ष्व दाधिकमास्वादयस्वेति, अन्नं भुङ्ग्ध्वं दाधिकमास्वादयध्वमिति वा यूयमभ्यवहरध्वम्। समुच्चये समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येन सहाभेदान्वयः समुच्चये हिस्वयोर्विकल्पेन पक्षे सक्तून् पिबति धानाः खादति अन्नं भुङ्क्ते दाधिकमास्वादयते। यथा वा पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः, विगृह्य चक्रे नमुचिद्द्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः इति माघः। अवस्कन्दनलवनादिरूपा भूतानद्यतनपरोक्षा अस्वास्थ्यक्रियेत्यर्थः। इह पुनः पुनश्चस्कन्देत्यादिरर्थ इति भ्रममूलकमेव। द्वितीयसूत्रे क्रियासमभिहारे इत्यस्याननुवृत्तेः, लोडन्तस्य द्वित्वापत्तेश्च। पुरीमवस्कन्देत्यादिर्मध्यमपुरुषैकवचनमित्यपि केषाञ्चिद्भ्रमएव, पुरुषवचनसंज्ञे इहनेत्युक्तत्वात्। इति दिक्।

प्रयोगाः—अपि जीवेदसौ। सर्वे भवन्तु सुखिनः। मा कश्चिद्दुःखभाग्भवेत्। अकरिष्यदसौ- पापं नाभविष्यमहं यदि। अस्त्युत्तरस्यां प्रथितो हिमालयः। यावद्गृहिणीमाहूय सङ्गीतकं करोमि। कथं नु गुणवद्विन्देयं कलत्रम्। ततः प्रविशति कञ्चुकी। यद्भावि तद्भवतु। कथं नाम भवान्धर्मं त्यजेत्। को वहेद्भारमेनं मे। अपि स पश्येत्। सम्भावयामि त्वमुत्तीर्णो भविष्यसि। भवति भिक्षां मे देहि। अस्ति कर्पूरतिलको हस्ती। पञ्चषैरहोभिर्वयमेव तत्र गन्तास्मः। माभूद्वृथा व्ययः। वीरोसौ विजयी भवेत्। परीक्षामुत्तरिष्यसि चेत्पारितोषिकं लप्स्यसे। शुभं भूयात्।

प्रश्नाः—सामान्यतो लकाराः केष्वर्थेषु। व्यामिश्रयोर्भूतभविष्यतोः को लकारः। गौणौ भूतवर्तमानौ कौ। स्मृति- वाचके उपपदे को लकारः। यावत् पुरा स्म माङ् कदा कर्हि योगे के लकाराः। क्रियातिपत्तौ के लकाराः। आशंसार्थे आशंसावाचिन्युपपदे सति इच्छार्थे इच्छार्थकोपपदे च सति को लकारः। क्रियातिपत्तौ भूते क्व विकल्पेन क्व नित्यं लङ् प्रेषार्हत्वशक्तिषु को लकारः। अधस्तनवाक्याख्यातेषु लकारानुपपादयत—

रत्नं समागच्छतु काञ्चनेन। माभूत्परीवादनवावतार। कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनान्ये। कच्चिद्भर्तुः स्मरसि रसिकं त्वं हि तस्य प्रियेति। उत्सीदेयुरिमेलोकानकुर्यां कर्मचेदहम्। क्लैब्यं मास्मगमः पार्थ। प्रसह्य सिंहः किल तां- चकर्ष। लभेत वा प्रार्थयिता नवा श्रियम्। यदिसुरभिरवाप्स्यस्त्वन्मुखोच्छ्वासगन्धं तव रतिरभविष्यत्पुण्डरीके किमस्मिन्। किं वा भविष्यदरुणस्तमसां विभेत्ता तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्। दिशः प्रसेदुर्मरुतो ववुः सुखाः। पुत्रमध्यापयतु भवान्। नावकल्प्यमिदं ग्लायेद्यत्कृच्छ्रेषु भवानपि। सदा भवतु मङ्गलम्। **इति लकारार्थप्रकरणम्।**

अथ कृदन्तप्रकरणम्।

संज्ञापरिभाषम्—

धातोः (३-१-९१) आतृतीयाध्यायसमाप्तेरधिकारोयम्। इत उत्तरं विधीयमानाः तव्यादयः प्रत्यया धातोर्भवन्तीति वेदितव्यम्। **तत्रोपपदं सप्तमीस्थम्** (३-१-९२) अस्मिन्धात्वधिकारे कर्मणी-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यादि सप्तमीनिर्दिष्टमुपपदसंज्ञं स्यात्। **कृदतिङ्** (३-१-९३) अस्मिन्धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्। **वाऽसरूपोऽस्त्रियाम्** (३-१-९४) परिभाषेयम्। अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात्स्त्र्यधिकारोक्तं विना। अपवादेन नित्यं बाधे प्राप्ते क्वचिदुत्सर्गस्यापि प्रवृत्त्यर्थमिदम्।

वि० १. तृतीयाध्यायस्यादितः प्रत्ययः परश्चेत्युपक्रम्य कतिपयप्रत्ययविध्युत्तरं धातोरित्यारभ्य कृत्संज्ञकाः प्रत्यया उच्यन्ते। कृदतिङिति धातूत्तरतिङ्भिन्नप्रत्ययानां कृत्संज्ञाकरणेन तिङ्प्रकरणोत्तरं कृत्प्रकरणमवसरप्राप्तम्। धातोः धातोः धातोरेकाच इति धात्वधिकारे सत्यप्यसावन्यो धात्वधिकारः, अस्मिन्नेव धात्वधिकारे कृत्संज्ञोपपदसंज्ञा च स्यातां विधानादित्यर्थः। अविशेषे तु च्लिलुङीत्यत्र लुङन्त उपपदे च्लिः स्यादित्यर्थः, करिष्यसीत्यादौ धातोः स्यतासीति विहितस्य स्यापि कृत्त्वेन तदन्तात्स्वाद्युत्पत्तिश्च स्यात्।

वि० २. समीपोच्चारितं पदमुपपदमित्यन्वर्थेयं संज्ञा। उक्तं च भाष्यकृता–"उपपदमिति महती संज्ञा क्रियते, संज्ञा च नाम यतो लघीयः, लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनमन्वसंज्ञार्थ यथा विज्ञायते उपोच्चारितं पदमुपपदमिति"। पदविधित्वेन च सामर्थ्यमपेक्ष्यते, सामर्थ्ये सत्येव कर्मण्यण् इत्यादि प्रवृत्तिः, तेन नेह–पश्य कुम्भं, करोति कटम्। महान्तं कुम्भं करोतीत्यादावपि इतरसाकाङ्क्षत्वेनासामर्थ्यान्न। महाँश्चासौ कुम्भो महाकुम्भस्तं करोतीत्यादौ तु सामर्थ्यात् महाकुम्भकार इत्यादि भवत्येव। सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि, तद्वाचकं पदमुपपदमुच्यते। सन्निहितेस्मिन्धात्वधिकारे निर्दिष्टमेवोपपदं भवति। सप्तम्यामित्यनुक्त्वा सप्तमीस्थमिति कथनेन 'सप्तम्यां जनेर्डः, कर्मण्यण्' इत्यादि श्रूयमाणाश्रूयमाणसप्तम्यन्तपदबोध्यानां सर्वेषां ग्रहः। उपपदसंज्ञाविधानेन कुम्भं करोति कुम्भकार इत्यादौ कुम्भ-अस् कार इत्यवस्थायामुपपदमतिङिति नित्यसमासे अन्तर्विभक्तेर्लोपेन कुम्भकारः इत्यादिसिद्धिः।

वि० ३. असरूपप्रत्ययापवादस्य स्त्र्यधिकारवर्जं वैकल्पिकत्वेनोत्सर्गस्यापि प्रवृत्त्यर्थं वासरूपसूत्रं, तेन अचोयत् ऋहलोर्ण्यदित्याद्यपवादविषये औत्सर्गिकास्तव्यदादयोपि भवन्ति। सारूप्ये सत्येवापवाद उत्सर्गस्य नित्यं बाधकः। सारूप्यासारूप्ये प्रत्ययानां विवक्षिते, यथा ण्वुल्तृचावित्युत्सर्गस्य इगुपधज्ञाप्रीकिरःक इत्यपवादस्य च प्रत्ययासारूप्येण कविषये ण्वुल्तृचावपि भवतः- क्षिपः क्षेपकः क्षेप्ता इति। प्रत्ययसारूप्येण कर्मण्यणित्युत्सर्गस्य आतोनुपसर्गेक इत्यपवादो नित्यं बाधकः, गोद इति क एव, न त्वण्। नानुबन्धकृतमसारूप्यम्, तेन काणोरप्यकारावशेषात्सारूप्यम्। अस्त्रियामिति स्त्र्यधिकारभिन्नपरम्, अन्यथा स्त्रियां वाच्यायां नेत्यर्थे लव्या लवितव्येति स्त्रीलिङ्गे तव्यो न स्यात्; स्त्रियामित्युक्तौ नेत्यर्थे व्यावक्रोशीति व्यतिहारेणाच्स्त्रियामित्येतद्विषये क्तिन्न स्यात्। स्त्र्यधिकारे नेत्युक्त्वा तु स्त्रियां क्तिन्नित्यस्य अप्रत्ययादिति नित्यं बाधकः, जिहीर्षा चिकीर्षेति अ एव, नत्वत्रक्तिन्नपि।

कृत्यप्रत्ययाः—

कृत्याः (३-१-९५) ण्वुल्तृचावित्यतः प्रागधिकारोयम्। ण्वुलः प्राक्तनास्तव्यानीयादयः प्रत्ययाः कृत्यसंज्ञाः स्युः। **कर्तरि कृत्** (३-४-६७) कृत्प्रत्ययः कर्तरि स्यात्। इति कर्तरि प्राप्ते, तयोरेव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्यक्तखलर्थाः (३-४-७०) एते भावकर्मणोरेव स्युः। **तव्यत्तव्यानीयरः** (३-१-९६) धातोरेते प्रत्ययाः स्युर्भावकर्मणोः। तव्यदनीयरोरन्त्यौ तकाररेफौ स्वरार्थौ। अकर्मकाद्भावे-एध-एधितव्यम् एधनीयं त्वया। तव्यस्य वलाद्यार्धधातुकत्वेन सेट्कधातुष्विडागमः। भावे औत्सर्गिकमेकवचनं क्लीबत्वं च, कर्तुरनुक्ततया तृतीयान्तता। एवं त्वया युवाभ्याम् युष्माभिः, मया आवाभ्याम् अस्माभिः, तेन ताभ्याम् तैर्वा-जीव-जीवितव्यम्, जीवनीयम्, वृध्-वर्धितव्यम्, वर्धनीयम्, स्था-स्थातव्यं स्थानीयम्, अनिट्कत्वान्नेट्, भी-भेतव्यं भयनीयम्, भू-भवितव्यं भवनीयम्, शी-शयितव्यं शयनीयम्, क्रीड-क्रीडितव्यं क्रीडनीयम्। सकर्मकात्कर्मणि विशेष्यभूतकर्मानुसारिण्यो लिङ्गवचनविभक्तयः। चि-चेतव्यः चयनीयः धर्मस्त्वया, गम्-गन्तव्याः गमनीयाः ग्रामाः, श्रु-श्रोतव्या श्रवणीया कथा, दृश-द्रष्टव्यानि दर्शनीयानि वस्तूनि, कृ-कर्तव्यं करणीयं कार्यम्। कर्मणोऽविवक्षायां भावे-त्वया कर्तव्यं, मया करणीयम्। **वसेस्तव्यत्कर्तरि णिच्च** (वा) वसतीति वास्तव्यः (निवासी) णित्वादुपधावृद्धिः। **केलिमर उपसंख्यानम्** (वा) कर्मणि, पच्-पचेलिमाः (पक्तव्याः) माषाः, भिद्-भिदेलिमाः (भेत्तव्याः) वृक्षाः कित्वान्न गुणः।

वि० १. करोति कृदिति कृच्छब्दसाधनोपयोगि क्विबादिप्रत्ययवर्गपातिनः प्रत्ययाः कृतः, तदन्ताः कृदन्ताः, क्रियते इति कृत्यमिति कृत्यशब्दसाधनोपयोगि क्यन्नादिप्रत्ययवर्गपातिनः प्रत्ययाः कृत्याः, तदन्ताः कृदन्ताः कृत्यानाञ्चेति औपचारिके अन्वर्थप्राये इमे नामनी।

वि० २. ण्वुल्तृचोः प्राक्कृत्याधिकारे ज्ञापकं तु अर्हेकृत्यतृचश्चेति कृत्यात्पृथक्तृचो ग्रहणम्। तयोरेवेति भावकर्मणोरेव ग्रहः कर्तृयोगव्यवच्छेदार्थः, तक्रकौडिन्यन्यायेनैवावधारणे लभ्ये एवकारः स्पष्टप्रतिपत्त्यर्थः। अकर्मके सकर्मकेष्वपि कर्माविवक्षायां भावे, तत्रासत्त्ववाचित्वाल्लिङ्गसंख्यान्वयाभावेपि 'एकवचनं द्विबहुषु द्विबहुवचने' इति सूत्रपाठमभ्युपेत्य द्वित्वबहुत्वाभावे एकवचनमिति भाष्यसिद्धान्तादेकवचनम्, अलिङ्गसर्वनामनपुंसकमिति दाण्डिनायनसूत्रभाष्योक्तेः क्लीबत्वं च। सकर्मके कर्मणि, सत्वाचित्वाद्विशेष्यसमा लिङ्गवचनविभक्तयः।

णत्वविषये विशेषः—

कृत्यचः (८-४-२९) उपसर्गस्थान्निमित्तात्परस्य अच उत्तरस्य कृत्स्थस्य नस्य णः स्यात्। प्रया-प्रयाणीयम्, परिहा-परिहाणीयम्। अच इत्युक्त्या नेह-प्रमग्नः। **निर्विण्णस्योपसंख्यानम्** (वा) निर्-विद् क्त-निर्विण्णः परस्य णत्वे पूर्वस्य ष्टुत्वम्। **णेर्विभाषा** (८-४-३०) उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात्। प्रयाणि-प्रयापणीयं प्रयापनीयं वा। विहितविशेषणाद्यका व्यवधानेपि भवति-प्रयाप्यमाणं-नं पश्य। णत्वे दुर उपसर्गत्वं नेत्युक्तं, तेनेह न-दुर्यानं दुर्यापनम्। **हलश्चेजुपधात्** (८-४-३१) हलादेरिजुपधात्परस्याचः परस्य कृन्नस्य णो वा स्यात्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकुप्-प्रकोपणी-नीयम्। **इजादेः सनुमः** (८-४-३२) सनुमश्चेद्भवति इजादेर्हलन्ताद्विहितो यः कृत्तत्स्थस्यैव नस्य णत्वं स्यात्। कृत्यच इति सिद्धे नियमार्थमिदम्। नुम्ग्रहणमनुस्वारोपलक्षणम्, प्रइखि-प्रेङ्खणीयम्। **वा निंसनिक्षनिन्दाम्** (८-४-३३) एषां नस्य णो वा स्यात्कृति परे। प्रणिसि-प्रणि-निंसितव्यम्, प्रणिदि-प्रणि-निन्दितव्यम्। **न भाभूपूकमिगमिप्यायिवेपाम्** (८-४-३४) एभ्यः परस्य कृन्नस्य णो न स्यात्। प्रभानीयम्, प्रभवनीयम्, प्रपवनीयम्, प्रकमनीयम्, परिगमनीयम्, प्रप्यायनीयम्, प्रवेपनीयम्।

वि० अष्टमाध्यायस्य चतुर्थपादे रषाभ्यां नो णः समानपदे, अट्कुप्वाङ्नुम्व्यवायेपीत्युपक्रान्ते णत्वप्रकरणे समासाद्युपयोगिनो णत्वविधयः प्रागुक्ताः, कृत्प्रत्यये तद्विधयः प्रसङ्गादत्रोक्ताः। उपसर्गाणां पृथक्पदत्वेन समानपदत्वाभावात् वचनानि।

अचो यत् (३-१-९७) अजन्ताद्धातोर्यत्स्यात् भावकर्मणोः। चि-चेयम् सार्वधातुकार्धधातुकयोरिति गुणः। वासरूपविधिना पक्षे चेतव्यं चयनीयम्। एवं जि-जेयं जेतव्यं जयनीयम्, नी-नेयं नेतव्यं नयनीयम्, लू-लव्यम् गुणे वान्तोयीत्यवादेशः, लवितव्यं लवनीयम्। **ईद्यति** (६-४-६५) यति परे आत ईत्स्यात्। दा-देयम् यति आत इत्वे गुणः, दातव्यं दानीयम्। गै-गेयम् यति आदेचउपदेशेऽशितीत्यात्वे ईत्वे गुणः, गातव्यं गानीयम्। **तकिशसिचतियतिजनिभ्यो यद्वाच्यः** (वा) तक्यं शस्यं चत्यम्। यति-यत्यं यतितव्यं यतनीयम्। जन-जन्यं जनितव्यं, जननीयम्। जनेर्यद्विधिः स्वरार्थः, ण्यतापि जनिवध्योश्चेति वृद्धिनिषेधेन रूपसिद्धेः। **हनो वा यद्वधश्च वक्तव्यः** (वा) हन्-वध्यः हन्तव्यः, हननीयः। पक्षे वक्ष्यमाणे ण्यति हनस्तोऽचिण्णलोरिति नस्य तत्वे हन्तेरिति कुत्वे णित्वादुपधावृद्धौ घात्यः। **पोरदुपधात्** (३-१-९८) पवर्गान्तादुपधाद्धातोर्यत्स्यात्। ण्यतोऽपवादः। नानुबन्धकृतमसारूप्यमिति वासरूपविधिनाऽपि न ण्यत्, तव्यानीयौ तु भवत एव। शप्-शप्यं शप्तव्यं शपनीयम्। लभ्-लभ्यं लभनीयं लब्धव्यम् झषस्तथोरिति तस्य धत्वे भस्य जश्त्वम्। **आङो यि** (७-१-६५) आङः परस्य लभेर्नुम्स्याद्यादौ प्रत्यये विवक्षिते। आलभेः पूर्वं नुमि कृतेऽदुपधत्वाभावान्न यत् ण्यदेव। आलभ्यः (वध्यः स्पृश्यो वा) गौः। **उपात्प्रशंसायाम्** (७-१-६६) उपात्परस्य लभेर्नुम्स्याद्यादौ प्रत्यये विवक्षिते प्रशंसायां गम्यमानायाम्। उपलम्भ्यः (समीपे प्राप्यः) साधुः। अस्तुतौ तु लभ्यः (उपलब्धुं शक्यः), प्रशंसायां नुमि ण्यत्, अन्यत्र यदेव। **शकि सहोश्च** (३-१-९९) आभ्यां यत्स्यात्। ण्यतोऽपवादः। शक्-शक्यं शक्तव्यं शकनीयम्। सह-सह्यं सहनीयं सहितव्यं सोढव्यम् तीषसहेति विकल्पेन इट्, इडभावे होढ इति हस्य ढत्वे झषस्तथोरिति तस्य धत्वे ष्टुत्वे पूर्वढलोपे सहिवहोरित्योत्वम्। **गदमदचरयमश्चानुपसर्गे** (३-१-१००) एभ्योऽनुपसर्गेभ्यो यत्स्यात्। ण्यतोऽप-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वादः। गद-गद्यम्, मद-मद्यम्, चर-चर्यम्, यम-यम्यम्। सोपसर्गात्तु ण्यदेव-प्रगाद्यम् प्रमाद्यम्। चरेराङि चागुरौ (वा) आचर्यः (गन्तव्यः) देशः। गुरौ तु ण्यदेव-आचार्यः (सेव्यः-गुरुः)। पोरदुपधादित्येव सिद्धे यमेर्ग्रहणं सोपसर्गाद्यत् माभूदिति नियमार्थं, तेन सोपसर्गे ण्यदेव-प्रयाम्यम्। निपूर्वात्तु यमेर्यद्भवति, तेन तत्र न भवेद्विनियम्यमिति वार्तिकप्रयोगात्, तेन-अनियम्यस्य नायुक्तिः त्वया नियम्या ननु दिव्यचक्षुषा इत्याद्युपपद्यते; नियमे साधुर्नियम्य इति तद्धितयता घोपपाद्यम्।

वि० अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु (३-१-१०१) अवद्यादयो निपात्यन्ते क्रमाद्गर्ह्याद्यर्थेषु। वदेर्नञ्युपपदे वदःसुपीति यत्क्यपोः प्राप्तौ यदेव, सच गर्ह्यायामेवेत्युभयार्थं निपातनम्। अवद्यं पापम्, अगर्ह्ये तु अनुद्यं गुरुनाम, नञ्युपपदे वदःसुपीति क्विन्वेन वचिस्वपीति सम्प्रसारणम्, तद्धि न गर्ह्यं वचनानर्हमेव, आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः। इति स्मृतौ निषेधात्। पण्या गौः (व्यवहर्तव्या-क्रेतव्या) प्रणेर्यत्। अन्यत्तु पाण्यम् (स्तुत्यर्हम्)। अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृङो यति शतेन वर्या कन्या। अनेनैव वरणीयेति नियमाभावात्पुरुषशतेन परिग्रहीतुमर्हेत्यर्थः। अन्यत्र तु क्यपि तुकि-अनेन वृत्या। **वह्यं करणम्** (३-१-१०२) वहेः करणे यन्निपात्यते। वहन्त्यनेनेति वह्यं शकटम्। अन्यत्र तु वाह्यम्। तव्ये ढत्वधत्वष्टुत्वढलोपौत्वेषु वोढव्यम्। **अर्यः स्वामिवैश्ययोः** (३-१-१०३) स्वामिनि वैश्ये चाभिधेये अर्य इति ऋधातोर्यति गुणे निपात्यते। ण्यतोऽपवादः। अर्यः स्वामी वैश्यो वा। अन्यत्र तु ण्यति वृद्धौ आर्यो ब्राह्मणः, प्राप्तव्य इत्यर्थः। **उपसर्या काल्या प्रजने** (३-१-१०४) उपसर्येति निपात्यते प्रजने (गर्भग्रहणे) प्राप्तकाला स्त्रीपशुर्विवक्षिता चेत्। उपपूर्वात्सृधातोर्यति गुणे उपसर्या गौः। गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः। अन्यत्र तु ण्यति उपसार्या (प्राप्तव्या) काशी। **अजर्यं सङ्गतम्** (३-१-१०५) अजर्यमिति नञ्पूर्वाज्जीर्यतेर्यन्निपात्यते सङ्गतं विशेष्यं चेत्। न जीर्यतीत्यजर्यं सङ्गतम्। तेन सङ्गतमार्येण रामाऽजर्यं कुरु द्रुतमिति भट्टिः। मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्धेत्यत्र तु सङ्गतमिति विशेष्यमध्याहार्यम्।

वदः सुपि क्यप्च (३-१-१०६) उत्तरसूत्रादिह भाव इत्यपकृष्यते। वदेर्भावे क्यप्स्यात्, चाद्यत् अनुपसर्गे सुप्युपपदे। ब्रह्म वेदस्तस्य वदनं ब्रह्मोद्यं, ब्रह्मवद्यम्। क्यपि वचिस्वपीति सम्प्रसारणं, यति तु न। उपसर्गे तु ण्यदेव अनुवाद्यम् (अनुवदनीयम्), अपवाद्यम् (अपवदनीयम्)। **भुवो भावे** (३-१-१०७) अनुपसर्गे सुपीत्यनुवर्तते यत्तु न। भूधातोरनुपसर्गे सुप्युपपदे भावे क्यप्स्यात्। ब्रह्मणो भवनं ब्रह्मभूयम्, देवस्य भवनं देवभूयम् कित्वान्न गुणः। ब्रह्मत्वं देवत्वमित्यर्थः। सुबभावे सोपसर्गे च यदेव भव्यं प्रभव्यम्। **हनस्त च** (३-१-१०८) अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप्स्यात्तकारश्चान्तादेशः। ब्रह्मणो हननं ब्रह्महत्या, शूद्रस्य हननं शूद्रहत्या, गोर्हननं गोहत्या स्त्रीत्वं लोकात्। **एतिस्तुशास्वृदृजुषः क्यप्** (३-१-१०९) एभ्यः क्यप्स्यात्। **ह्रस्वस्य पिति कृति तुक्** (६-१-७१) ह्रस्वस्य पिति कृति परे तुक्स्यात्। इण्-इत्यः (प्राप्यः), स्तु-स्तुत्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(स्तवनीयः), शास-शिष्यः (शिक्षणीयः) शासइदङ्हलोरितीत्वम्। वृ इति वृञेव नतु वृङ्, वृ-वृत्यः (वरणीयः) वृङस्तु ण्यति वार्या ऋत्विजः। आदृ-आदृत्यः (आदरणीयः), जुष्-जुष्यः (सेव्यः)। पूर्वानुवृत्त्यैव सिद्धौ पुनः क्यबुक्तिः परस्यापि ण्यतो बाधनार्था। अवश्यस्तुत्यः। **आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्** (वा) अञ्जू व्यक्तिम्रक्षणादौ बाहुलकात्करणे क्यप् अनिदितामिति नलोपः आज्यम्। **ऋदुपधाच्चाक्लृपिचृतेः** (३-१-११०) ऋकारोपधाद्धातोः क्यप् स्यात्क्लृपिचृती वर्जयित्वा। वृत्-वृत्यम् कित्वान्न गुणः तुक्। वृध्-वृध्यम्, वृष-वृष्यम्, दृश्-दृश्यम्। क्लृपिचृत्योस्तु यति गुणे कल्प्यं चर्त्यम्। तपरकरणात्कृतेः कीर्त्यम्। **ई च खनः** (३-१-१११) खनेः क्यप्स्यात् ईकारश्चान्तादेशः। खनतेः क्यपि नस्येत्वे आद्गुणे खेयम्। **भृञोऽसंज्ञायाम्** (३-१-११२) भृञोऽसंज्ञायां क्यप्स्यात्। भृत्याः (भरणीयाः) कर्मकराः। क्रियाशब्दोयं यौगिको न संज्ञारूपः। संज्ञायां तु भार्या नाम क्षत्रियाः। अत्र भृञ इति सानुबन्धकग्रहणे नानुबन्धकस्य ग्रहणमिति परिभाषया भौवादिकस्यैव ग्रहः। भार्या वधूरिति तु जौहोत्यादिकात् भृ इति दीर्घान्तात्क्रैयादिकाद्वा ण्यति उपपादनीयम्। **मृजेर्विभाषा** (३-१-११३) मृजेः क्यप् वा स्यात्पक्षे ण्यत्। ऋदुपधत्वात्प्राप्तविभाषेयम्। क्यपि-मृज्यः (मार्जनीयः)। ण्यति तु। **चजोः कु घिण्यतोः** (३-३-५२) चस्य जस्य च कुत्वं स्यात् घिति ण्यति च प्रत्यये परे। जस्य कुत्वेन गः मृजेर्वृद्धिरिति वृद्धिः मार्ग्यः। **निष्ठायामनिट इति वक्तव्यम्** (वा) तेनेह न—गर्ज्यम्। **राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः** (३-१-११४) एते सप्त क्यबन्ता निपात्यन्ते। राज्ञा सोतव्यः (क्षत्रियेण अभिषव-कुट्टनद्वारा निष्पादयितव्यः), किंवा राजा (लतात्मकः सोमः) सूयते-कण्डयतेत्रेत्यर्थे राजोपपदात्सुञः क्यपि निपातनाद्दीर्घे राजसूयः—यम् (यज्ञविशेषः) अर्धर्चादित्वादुभयोर्लिङ्गयोः। सरत्याकाशे इति सूर्यः सरतेः कर्तरि क्यब्निपातनादुत्वे रपरत्वे हलिचेति दीर्घः। मृषोपपदाद्वदेः कर्मणि क्यपि वचिस्वपीति सम्प्रसारणे मृषोद्यम् (मिथ्यावाच्यम्) विशेष्यनिघ्नोयम्। रोचते इति कर्तरि क्यपि रुच्यः (सुन्दरः)। गुपेः क्यपि गस्य कत्वे च संज्ञायां कुप्यम् (सुवर्णरजतभिन्नं द्रव्यम्)। अन्यत्र तु गोप्यम्। कृष्टे (क्षेत्रे) स्वयमेव पच्यन्ते इति कर्मकर्तरि क्यपि कृष्टपच्याः शालयः। केवलं कर्मणि तु ण्यति उपधावृद्धौ चजोरिति कुत्वे कृष्टपाच्याः। न व्यथते इति कर्तरि क्यपि-अव्यथ्यः।

वि० **भिद्योद्ध्यौ नदे** (३-१-११५) भिदेरुज्झेश्च कर्तरि क्यप् उज्झेर्धत्वं च निपात्यते नदेऽभिधेये। भिनत्ति कूलं भिद्यः, उज्झति उदकमुद्ध्यः। पाश्चात्यौ नदविशेषावेतौ। **पुष्यसिध्यौ नक्षत्रे** (३-१-११६) अनयोरधिकरणे क्यब्निपात्यते नक्षत्रेऽभिधेये। पुष्यन्त्यस्मिन्नर्थाः-पुष्यः, सिध्यन्त्यस्मिन्कार्याणि-सिध्यः। **पदास्वैरिबाह्यापक्ष्येषु च** (३-१-११९) एष्वर्थेषु ग्रहेः क्यप्स्यात्। अवगृह्यं (समासान्तर्विच्छेद्यं) पदम्। प्रगृह्यं (प्रगृह्य परिभाषितं) पदम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्वैरी परतन्त्रः, गृह्यकाः (पञ्जरादिबन्धेन परतन्त्रीकृताः) शुकाः। ग्रामगृह्या (ग्रामबहिर्भूता) सेना। पक्षे भवः पक्ष्यः आर्याणां गृह्याः (पक्ष्याः) आर्यगृह्या जनाः। **विभाषा कृवृषोः** (३-१-१२०) आभ्यां क्यब्वा स्यात्। कृत्यम् वृष्यम्। **अमावस्यदन्यतरस्याम्** (३-१-१२२) अमोपपदाद्वसतेरधिकरणे ण्यत् वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते। अमा (सह) वसतोस्यां चन्द्रार्काविति–अमावस्या, अमावास्या।

ऋहलोर्ण्यत् (३-१-१२४) ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्याद्भावकर्मणोः। कृ-कार्यम् णित्वाद-चोञ्णितीति वृद्धिः। हृ-हार्यम्, तृ-तार्यम्, ग्रह-ग्राह्यम् अत उपधाया इत्युपधावृद्धिः, स्वद-स्वाद्यम्, पठ-पाठ्यम्, लिख-लेख्यम् पुगन्तेति गुणः। **ण्यत्प्रकरणे लपिदभिभ्याञ्चेति वक्तव्यम्** (वा) लाप्यम् अभिलाप्यम्, दाभ्यम्। पच्-पाक्यम् चजोरिति कुत्वम्।

कुत्वनिषेधः—न क्वादेः (७-३-५९) कादेर्धातोश्चजोः कुत्वं न स्यात्। गर्ज-गर्ज्यम्। **अजिव्रज्योश्च** (७-३-६०) अनयोः कुत्वं न स्यात्। सम्-अज-घञ्-समाजः, परि-व्रज घञ्-परिव्राजः (भिक्षुः)। **भुजन्युब्जौ पाण्युपतापयोः** (७-३-६१) उपतापो रोगः। एतयोरर्थयोर्भुजन्युब्जौ निपात्येते। भुज्यतेनेनेति भुजेर्हलश्चेति घञि निपातनात्कुत्वाभावे भुजः (पाणिः) न्युब्जन्त्यस्मिन्निति निपूर्वोब्जधातोर्घञि निपातनात्कुत्वाभावे न्युब्जः, (रोगविशेषः)। **प्रयाजानुयाजौ यज्ञाङ्गे** (७-३-६२) अनयोः कुत्वाभावो निपात्यते यज्ञाङ्गेऽभिधेये। यज-घञ्-पञ्च प्रयाजाः, त्रयोऽनुयाजाः यज्ञाङ्गविशेषा इमे। यज्ञाङ्गभिन्ने तु कुत्वे प्रयागः अनुयागः। **ण्य आवश्यके** (७-३-६५) आवश्यकार्थे ण्ये परे चजोः कुत्वं न स्यात्। अवश्यपाच्यम् कृत्याश्चेत्यावश्यकार्थे ण्यत्। **यजयाचरुचप्रवचर्चश्च** (७-३-६६) एभ्यो ण्ये कुत्वं न स्यात्। यज-याज्यम्, रुच्-रोच्यम्, प्रवच-प्रवाच्यम् (ग्रन्थविशेषः), ऋच्-अर्च्यम् पुगन्तेति गुणः, ऋदुपधत्वेप्यत एव ज्ञापकात् ण्यत्। **त्यजिपूज्योश्च** (वा) त्यज-त्याज्यम्, पूज-पूज्यम्। **वचोऽशब्दसंज्ञायाम्** (७-३-६७) वचो ण्ये कुत्वं न स्यात् शब्दसंज्ञां वर्जयित्वा। वाच्यं (कथनीयम्)। शब्दसंज्ञायां तु कुत्वे वाक्यम्। **प्रयोज्यनियोज्यौ शक्यार्थे** (७-३-६८) अनयोः कुत्वाभावो निपात्यते शक्यार्थे ण्ये। प्रयोक्तुं शक्यः प्रयोज्यः। नियोक्तुं शक्यः नियोज्यः भृत्यः, शकिलिङ्चेति ण्यत्। **भोज्यं भक्ष्ये** (७-३-६९) भोज्यमिति कुत्वाभावो निपात्यते भक्ष्येऽभिधेये। भुज-भोज्यम् (भक्षणीयम्), अन्यत्र तु भोग्यम्।

वि० वार्तिककारस्तु चजोरिति सूत्रे निष्ठायामनिट इति पूरयित्वा नक्वादेरिति सूत्रं प्रत्याचख्यौ। तेनार्जितर्जिप्रभृतीनां न कुत्वं निष्ठायां सेट्कत्वात्। ग्रुचुग्लुञ्चुप्रभृतीनां क्वादित्वेपि कुत्वं स्यादेव, सूत्रमते वैपरीत्यप्राप्तावपि यथोत्तरं मुनीनां प्रामाण्यमित्युक्तम्। आवश्यक इति अर्थद्योतनार्थ एव न प्रयोगार्थः तेन अशोच्यानन्वशोचस्त्वमित्यादावप्यावश्यकार्थकण्यतं स्वीकृत्य कुत्वाभाव उपपादनीयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ओरावश्यके (३-१-१२५) उवर्णान्ताद्धातोर्ण्यत्स्यादवश्यम्भावे द्योत्ये। लू-लाव्यम् (अवश्य लवितव्यम्) ण्यति वृद्धौ धान्तोयीत्यवादेशः। पू-पाव्यम्। अनावश्यके तु अचोयत् लव्यम्। **आसुयुवपिरपित्रपिचमश्च** (३-१-१२६) आङ्पूर्वात्सुनोतेर्य्वादिभ्यश्च ण्यत्स्यात्। सु-आसाव्यम्, यु-याव्यम् (मिश्रणीयम्)। वप्-वाप्यम्, चम्-आचाम्यम्। **आनाय्योऽनित्ये** (३-१-१२७) आनाय्य इति निपात्यते अनित्येभिधेये। आनी-आनाय्यः (दक्षिणाग्निः) सततमप्रज्वलनादनित्यः। ण्यदायादेशश्च निपातनात्। अन्यत्र तु यदेव-आनेयः घटादिः।

वि० **पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु** (३-१-१२९) मानादिष्वभिधेयेषु पाय्यादयो निपात्यन्ते। पा-पाय्यं मानम्। पेयमन्यत्। संनि-सान्नाय्यं दधिपयोरूपं हविः संनेयमन्यत्। निचि-निकाय्यः निवासः। चेयमन्यत्। धै-धाय्या सामिधेनी (अग्निसमिन्धनमन्त्राः)। धेयमन्यत्। **चित्याग्निचित्ये च** (३-१-१३२) चित्याग्निचित्याशब्दौ निपात्येते। चीयतेसौ-चित्यः अग्निः। अग्नेश्चयनम्-अग्निचित्या। **भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा** (३-४-६८) एते कृत्यान्ताः कर्तरि वा निपात्यन्ते। भवतीति-भव्यः, भव्यमनेनेति वा। प्रवक्तीनि प्रवचनीयः गुरुः। जायते इति जन्यः जन्यमनेन वा।

कृत्यल्युटो बहुलम् (३-३-११३) कृत्यप्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति। भावकर्मणोर्विहिताः कृत्याः कारकान्तरेष्वपि भवन्ति। स्नान्त्यनेनेति स्नानीयं चूर्णम् करणेऽनीयः। दीयतेस्मै दानीयः विप्रः सम्प्रदानेऽनीयः। **प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च** (३-३-१६३) एष्वर्थेषु कृत्यप्रत्ययाः स्युश्चाल्लोट्। त्वया गन्तव्यं गमनीयं गम्यम्। गम्यताम्, यथेच्छं गम्यताम्, गमनकालः प्राप्त इति वार्थः। इह लोटा बाधो माभूदित्यर्थं पुनः कृत्यविधिः स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयति; तेन क्तल्युट् तुमुन्खलर्थेषु नेति सिद्धम्। **अर्हे कृत्यतृचश्च** (३-३-१६९) योग्ये कर्तरि वाच्ये कृत्यप्रत्ययास्तृच्च भवन्ति। भवता कन्या वोढव्या वहनीया वाह्या वा (वोढुं योग्या) वहेस्तव्यति ढत्वधत्वष्टुत्वढलोपौत्वाति। स्तोतुमर्हः-स्तुत्यः लिङा बाधो माभूदिति कृत्यतृचोर्विधिः। **शकि लिङ् च** (३-३-१७२) शक्त्यर्थे लिङ् स्याच्चात्कृत्याः। वोढुं शक्यः-वोढव्यः वहनीयः वाह्यः लिङा बाधो माभूदिति कृत्यविधिः।

प्रयोगाः—पुरेस्य वास्तव्यकुटुम्बितां ययुः। न भेतव्यं मनागपि। ब्रह्महत्याव्रतं चरेत्। स्तुत्यः पूज्योभिवन्द्यश्च। न वाच्यं वाक्यमीदृशम्। स्नानीयमानीयताम्। पानीयमानय सखे। अकृत्यं नैव कर्तव्यम्। स्मरणीयः सखा सदा। न श्रव्यं धूर्तवचनम्। त्वयेदं पुस्तकं पाठ्यम्। भार्या पुत्रास्तथा भृत्याः पालनीयाः प्रयत्नतः। निर्विण्णो वनमाश्रयेत्। अयाज्यं नैव याजयेत्। रुच्यानि भोज्यानि भक्ष्याणि। तमार्यगृह्यं निगृहीतधेनुः। तोयदागम इवोध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रश्नाः—कृत्कृत्ययोः को विशेषः। कृत्यप्रत्ययाः केष्वर्थेषु भवन्ति। वासरूपोऽस्त्रियामित्यस्य किं वक्तव्यम्। यत्-ण्यत्-क्यप्-तव्यानीयेषु केषां कैर्बाधः केषां न। अर्यः आर्यः भार्या आचार्यः भृत्यः एषु शब्देषु के विशेषाः। अधस्तनवाक्यगतान्कृत्यान्तानुपपादयत—अकृष्टपच्या इव सस्यसम्पदः। अनवद्यानि कर्माणि सेवितव्यानि। न वाच्यमित्थं पुरुषोत्तम त्वया। देवभूयं गतः सः। भवितव्यं भवत्येव। अदेयमासीत्त्रयमेव भूपतेः। उच्छ्रायसौन्दर्यगुणा मृषोद्याः। कुप्यमित्यभिधीयते। पण्यैर्विपणिरापूर्णा। यद्गुह्यं परमं लोके। नशक्यमेतत्कार्यं कर्तुम्। योग्यं योग्याय दातव्यम्। **इति कृत्यप्रकरणम्।**

अथ पूर्वकृदन्तप्रकरणम्।

ण्वुल्तृजादि—

ण्वुल्तृचौ (३-१-१३३) सर्वधातुभ्यो ण्वुल्तृचौ स्तः कर्तरि। ण्वुलो णलावितौ, युवोरनाकाविति घोरकादेशः। करोतीति कारकः णित्वादचोञ्णितीति वृद्धिः। तृचि कर्ता। स्त्रियां कारिका कर्त्री। एवं हृ-हारकः हर्ता; तृ-तारकः तरिता, भू-भावकः भविता तृचि सेट्कत्वाद्वलादिलक्षण इट्। पू-पावकः पविता, दै-दायकः आतोयुकूचिण्कृतोरिति युगागमः। दाता, गै-गायकः गाता, ध्यै-ध्यायकः ध्याता, शी-शायकः शयिता, हन्-घातकः अत उपधाया इति वृद्धिः हनस्तोचिण्णलोरिति नस्य तः होहन्तेरिति कुत्वम्; हन्ता। जन-जनकः, वध-वधकः जनिवध्योश्चेति वृद्धिनिषेधः। लभ-लम्भकः लभेश्चेति नुम्-नुस्वारपरसवर्णौ, लब्धा तस्य धत्वं भस्य जश्त्वम्। सह-सहिता सोढा तीषसहेति वेट् इडभावे ढत्व-धत्वष्टुत्वढलोपौत्वानि। पच्-पाचकः पक्ता। पठ-पाठकः पठिता। यज्-याजकः यष्टा व्रश्चेति षत्वे ष्टुत्वम्। दृश्-दर्शकः पुगन्तेति गुणः, द्रष्टा सृजिदृशोरित्यम्। लिख्-लेखकः लेखिता। णिजन्तात् ण्वुलि णेरनिटीति णिलोपे णिजभाव इव, कृ- णि-कारकः कारयिता, पच-णि-पाचकः पाचयिता। भू-णि-भावकः भावयिता। ण्वुल्तृचोर्वर्तमानकालिक एव कर्ता बोध्यस्तेन भूते भाविनि वा कर्तरि नेमौ प्रत्ययौ। **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (३-१-१३४) नन्द्यादिभ्यो ल्युः, ग्रह्यादिभ्यो णिनिः, पचादिभ्योऽच्स्यात्कर्तरि। योरनादेशः नन्द्यादिषु केचन णिजन्ताः णेरनिटीति णिलोपः नन्दयतीति नन्दनः, जनमर्दयतीति जनार्दनः, मधुं सूदयतीति (हिनस्ति) मधुसूदनः, विशेषेण भीषयते इति विभीषणः। दूष-दूषणः, शुभ-शोभनः, वृध-वर्धनः, सह-सहनः, क्रुध-क्रोधनः, लु-लवणः गणे निपातनाण्णत्वम्, तप-तपनः, रम-रमणः। ग्रह्यादिषु णिनौ णित्वाद्वृद्धिः गृह्णातीति ग्राही, स्था-स्थायी युक्, मन्त्र-मन्त्री, उत्सह-उत्साही, संमृद्-संमर्दी, अभिभू-अभिभावी, अपराध्-अपराधी, परिभू-परिभवी परिभावी पाक्षिकोवृद्ध्यभावो गणे निपात्यते। पचादेरचि पचतीति पचः, नद-नदः नदी, दिव-देवः देवी, नदट् देवट् इति गणे टित्वनिपातनात्स्त्रियां ङीप्। क्षम-क्षमः। पचादिराकृतिगणः घटते इति घटः, करोतीति करः। स्त्रियां णिन्यन्ता ङीबन्ताः, अच्-ल्युप्रत्ययान्ता आबन्ता भवन्ति। वासरूपविधिना ण्वुल्तृचावपि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० **चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्येति वक्तव्यम्** (वा) आगागमस्य दीर्घत्वसाम-भ्यासह्रस्वो हलादिशेषश्च न। चरति-चराचरः, चलति-चलाचलः, पतति-पतापतः, वदति-वदावदः। **हन्तेर्घत्वं च** (वा) घत्वमभ्यासस्य, उत्तरस्य तु अभ्यासाच्चेति कुत्वम् घनाघनः (मेघः)। द्वित्वाद्यभावपक्षे चरः, चलः, पतः, घनः। रात्रौ चरति-रात्रिञ्चरः, रात्रिचरः, रात्रेः कृतिविभाषेति वा नुम्, एषु पचाद्यच्।

इगुपधज्ञाप्रीकिरः कः (३-१-१३५) एभ्यः कः स्यात्कर्तरि। क्षिपतीति क्षिपः कित्वान्न गुणः। एवं लिख्-लिखः, बुध-बुधः, कृश-कृशः। ज्ञा-ज्ञः आतोलोपइटिचेत्यातो लोपः। प्री-प्रियः इयङ्। क-किरः ॠत इद्धातोरितीत्वम्। वासरूपविधिना ण्वुल्तृचावपि क्षेपकः क्षेप्ता इत्यादि। **आतश्चोपसर्गे** (३-१-१३६) आकारान्तेभ्यो धातुभ्य उपसर्गे उपपदे कः स्यात्। श्याद्व्यधेति णस्यापवादः प्रजानाति-प्रज्ञः, विजानाति-विज्ञः। एवं प्रदा-प्रदः, प्रस्था-प्रस्थः। **पाघ्राध्माधेट्दृशः शः** (३-११३७) एभ्यः कर्तरि शः स्यात्। पा-पिबः, घ्रा-जिघ्रः, ध्मा-धमः शस्य शित्वेन पाघ्रेति पिबाद्यादेशे शपि पररूपम्। धेट्-धयः शे शपि अयादेशे पररूपम्। स्त्रियां धया। धेट्धातुष्टिन्नादन्तः, अदन्तो धमशब्दो नटिदिति ङीबभावेन टाप्। अत्र धेटष्टित्वेन स्तनन्धयीति खशीव ङीप्प्राप्तौ खशोन्यत्रनेत्युक्तत्वान्नेति तु हरदत्तः। दृश्-पश्यः पश्यादेशे शपि पररूपम्। **घ्रः संज्ञायां न** (वा) व्याघ्रादिभिरिति निर्देशात्। तेन शस्याभावे आतश्चोपसर्गे इति के व्याघ्रः। **दुन्योरनुपसर्गे** (३-१-१४२) अनुपसर्गाभ्यामाभ्यां णः स्यात्। दुनोतीति दावः (वनाग्निः)। णित्वाद्वृद्धावावादेशः। नयतीति नायः। दवतेस्तु पचाद्यचि दवः। उपसर्गयोगे त्वचि प्रणयः विनयः। **विभाषा ग्रहः** (३-१-१४३) ग्रहेर्णो वा स्यात्। पक्षेऽच्। व्यवस्थितविभाषेयम्, तेन जलचरे णे ग्राहः, ज्योतिष्मति ग्रहः। भवतेश्च इति काशिका। णो वा भवन्तीति भावाः पदार्थाः, भवः शिवः संसारश्च। भाष्यमते तु प्राप्त्यर्थाच्चुरादेर्ण्यन्तादचि णिलोपे भावः। **गेहे कः** (३-१-१४४) गेहे कर्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहम्। गृहा दाराः इति तु तात्स्थ्यादौपचारिकम्। **शिल्पिनि ष्वुन्** (३-१-१४५) क्रियाकौशलं शिल्पं तद्वत्कर्तरि ष्वुन्स्यात्। **नृतिखनिरञ्जिभ्य एव** (वा) नृत्-नर्तकः वोरकः, स्त्रियां षित्वान्ङीषि नर्तकी। खन्-खनकः-की। **असि अके अने च रञ्जेर्नलोपो वाच्यः** (वा) रञ्ज-रजकः-की। **गस्थकन्** (३-१-१४६) गायतेस्थकन्स्यात् शिल्पिनि कर्तरि। गाथकः आदेच उपदेश इत्यात्वम्। **ण्युट् च** (३-१-१४७) गायतेर्ण्युट् च स्यात् शिल्पिनि कर्तरि। योरनः गायनः आत्वे आतो युक्, स्त्रियां टित्वात् गायनी। **हश्च व्रीहिकालयोः** (३-१-१४८) हाको हाङश्च ण्युट् स्यात् व्रीहौ काले च कर्तरि। जहात्युदकमिति हायनः व्रीहिः, जहाति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भावानिति हायनः वर्षम् । जिहीते प्राप्नोतीति वा, ल्युट्यनादेशो युक् । जाङ्गलदेशोद्भवाः केचिद्व्रीहयो हायना इत्याहुः ।

वि० **अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च** (३-१-१३८) अनुपसर्गेभ्यो लिम्पादिभ्यः शः स्यात् । लिपि-लिम्पः, विदि-विन्दः, धारि-धारयः, पारि-पारयः, वेदि-वेदयः, उदेजि-उदेजयः, चेति-चेतयः, साति-सातयः, साहि-साहयः । **नौलिम्पेर्वाच्यः** (वा) निलिम्पा देवाः । **गवादिषु विन्देः संज्ञायाम्** (वा) गां विन्दति-गोविन्दः (कृष्णः), अराणि (अरसदृशानि दलानि) विन्दति-अरविन्दम् (कमलम्) । **श्याद्व्यधास्रुसंस्रतीणवसावहृलिहश्लिषश्वसश्च** (३-१-१४१) श्यैङ आकारान्तेभ्यो व्यधादिभ्यश्च णः स्यात् । श्यैङोऽवस्यतेश्चाऽऽदन्तत्वादेवसिद्धे पृथग्ग्रहणमुपसर्गे कं बाधितुम् । अवश्यै-अवश्यायः (नीहारः) आत्वे णे युक्, प्रतिश्यायः (पीनसः) । आ-दायः, धायः, व्यध्-व्याधः, आस्रु-आस्रावः, संस्रु-संस्रावः, अति-इण्-अत्यायः, अवसा-अवसायः, अवहृ-अवहारः (ग्राहः), लिह-लेहः, श्लिष-श्लेषः, श्वस्-श्वासः ।

प्रयोगाः—नाम्नापि हाहा हरिगायनोभूत् । धाराधरो जलधरः । ग्राहैः सरः समाकीर्णम् । सर्वे ग्रहाः शान्तिकरा भवन्तु । दर्शकैः सङ्कुला सभा । यः कर्ता स एव भोक्ता । केचिद्विभीषणाः केचिच्छोभना रोचना अपि । जनकस्य सुता सीता । भवो भावैः समाक्रान्तः । आपदामपहर्तारं दातारं सर्वसम्पदाम् । सुहृदामुपकर्तारं वन्देहं यदुनन्दनम् । रात्रिञ्चरा भीषणाः । प्रिया विज्ञा बुधाः कृशाः । नर्तकीनां पदध्वनिः ।

सोपपदकृदन्ताः—

कर्मण्यण् (३-२-१) कर्मण्युपपदे धातोरण् स्यात् । निर्वर्त्यं विकार्यं प्राप्यं चेति त्रिविधं कर्मेह गृह्यते । निर्वर्त्ये-कुम्भं करोतीत्यर्थे कर्मभूते कुम्भशब्दे उपपदे कृञः कर्त्रर्थेऽणि वृद्धौ कर्तृकर्मणोः कृतीति कर्मणि षष्ठ्यां कुम्भ-अस्-कार इत्यलौकिकविग्रहे षष्ठ्यन्तकुम्भशब्दस्योपपदस्य अनुत्पन्नसुपकारशब्देन सह उपपदमतिङिति समासे प्रातिपदिकत्वेनाऽन्तःसुपो लुकि समुदायात्सुबुत्पत्तौ कुम्भकारः । स्त्रियामदन्तत्वान्ङीप् । एवं नगरकारः चर्मकारः लोहकारः । विकार्ये-काण्डं लुनाति-काण्डलावः वृद्धावावादेशः । एवं शरलावः । प्राप्ये-वेदमधीते-वेदाध्यायः वृद्धावायादेशः । एवं चर्चापाठः । ग्रामं गच्छति, आदित्यं पश्यति, हिमवन्तं शृणोतीत्यादौ त्वनभिधानान्नेत्युक्तम् । **शीलिकामिभक्षाचरिभ्यो णः** (वा) अणोपवादः । तेन स्त्रियां न ङीप् । मांसं शीलयते, कामयते, भक्षयते वा मांसशीला, मांसकामा, मांसभक्षा । कल्याणमाचरति कल्याणाचारा । **ईक्षिक्षमिभ्यां च** (वा) सुखं प्रतीक्षते सुखप्रतीक्षा, बहु क्षमते-बहुक्षमा ।

वि० १. कुम्भाद्युपपदे सति विधीयमानस्याणादेरपि पदविधित्वेन सामर्थ्ये सत्येवामी अणादयः, तेन नेह-पश्य कुम्भं,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

...ति कटम् । गङ्गाधरः भूधर इत्यादौ तु धरतीति धर इति पचाद्यचि कर्मणः शेषत्वविवक्षया षाष्ठ्यां गङ्गाया धरः भुवो ... इति षष्ठी समासोऽनुसन्धेयः, अन्यथा कर्मण्यणि गङ्गाधार इत्याद्यापत्तेः । एवं पयोधरः कर्मकरः यशोधर इत्यादि ।

वि० २. ह्वावामश्च (३-२-२) एभ्योऽण्स्यात्कर्मण्युपपदे । कस्यापवादार्थं वचनम् । तन्तून्वयति-तन्तुवायः (...विन्दः) । एवं स्वर्गह्वायः धान्यमायः ।

आतोनुपसर्गे कः (३-२-३) अनुपसर्गेभ्य आकारान्तेभ्यः कर्मण्युपपदे कः स्यात् । अणोपवादः । गां ददाति-गोदः धातोरालोपः । गां पाति- गोपः । पार्ष्णीं त्रायते-पार्ष्णित्रम् । एवं कम्बलदः, क्षीरपः, तनुत्रम्, अङ्गुलित्रम्, सोपसर्गे त्वणि युक्- गोसन्दायः । घृतप्रद इत्यादि प्रेदाज्ञ इति कर्मण्युपपदे के, प्रदशब्देन सह पश्चात् षष्ठीसमासे वोपपादनीयम् । **सुपि स्थः** (३-२-४) सुपीति योगो विभज्यते । सुबन्ते उपपदे आदन्तात्कः स्यात्कर्तरि । द्वाभ्यां पिबति-द्विपः (हस्ती) पादैः पिबति-पादपः (वृक्षः) । कच्छेन पिबति-कच्छपः (कूर्मः) समे तिष्ठति-समस्थः । विषमे तिष्ठति-विषमस्थः । स्थ इति सूत्रान्तरम् । सुप्युपदे तिष्ठतेः कः स्याद्भावे । पूर्वेणैव सिद्धावारम्भसामर्थ्याद्भावेऽयम् । आखूनामुत्थानम्-आखूत्थः । एवं शलभोत्थः । **प्रष्ठोऽग्रगामिनी** (८-३-९२) प्रष्ठ इति षत्वं निपात्यतेऽग्रगामिनि वाच्ये । प्रतिष्ठते इति प्रष्ठः (अग्रगामी) गौः । आतश्चोपसर्ग इति के आतो लोपे पत्वम्, अन्यत्र तु प्रस्थः (मानविशेषः) । **अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः** (८-३-९७) स्थ इति कप्रत्यान्तस्यानुकरणं षष्ठ्यर्थे प्रथमा । एभ्यः परस्य स्थस्य षः स्यात् । अम्बष्ठः आम्बष्ठः (ब्राह्मणाद्वैश्यकन्यायामुत्पन्नो जातिविशेषः) । एवं गोष्ठः भूमिष्ठः सव्यष्ठः कुष्ठः अङ्गुष्ठः मञ्जिष्ठः पुञ्जिष्ठः दिविष्ठः निपातनात्सप्तम्या अलुक्, द्विष्ठः त्रिष्ठः । **तुन्दशोकयोः परिमृजापनुदोः** (३-२-५) इत ऊर्ध्वं कर्मणि सुपीति द्वयमनुवर्तते, तत्र सकर्मकेषु कर्मणीत्यस्य, अकर्मकेषु कर्मणोऽभावात्सुपीत्यस्य सम्बन्धः । तुन्दशोकयोरुपपदयोः आभ्यां कः स्यात् । **आलस्यसुखाहरणयोरिति वक्तव्यम्** (वा) तुन्दं परिमार्ष्टि-तुन्दपरिमृजः (अलसः), शोकमपनुदति-शोकापनुदः (सुखस्याहर्ता) । अन्यत्र त्वणि तुन्दपरिमार्जः (उदरपरिमार्जकः), शोकापनोदः (संसारासारत्वाद्युपदेशेन शोकनिवर्तकः) । **कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्** (वा) मूलानि विभुजति (विमर्दयति) मूलविभुजः रथः । आकृतिगणोयम् । महीं धरति-महीध्रः कित्वान्न गुणः ऋकारस्य यण् रेफः । गिलतीति-गिलः । कौ मोदते-कुमुदम् । सरसि सरस्यां वा रोहति-सरोरुहम् सरसीरुहम् । **प्रे दाज्ञः** (३-२-६) ददातेर्जानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कः स्यात् । अणोपवादः । सर्वं प्रददाति-सर्वप्रदः । पन्थानं प्रजानाति-पथिप्रज्ञः नलोपः । एवं वस्त्रप्रदः अधिकप्रदः मानप्रदः अधिकप्रज्ञः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० गापोष्टक् (३-२-८) अनुपसृष्टाभ्यामाभ्यां टक्स्यात्कर्मण्युपपदे । कस्यापवादः । सामगायति-सामगः टित्वा-त्स्त्रियां ङीप् । एवं छन्दोगः । **पिबतेः सुरासीध्वोरिति वाच्यम्** (वा) सुरां पिबति-सुरापः सुरापी, सीधुपी । अन्यत्र तु के टाप् क्षीरं पिबति-क्षीरपा बथाला । सुरां पाति (रक्षति) सुरापा ।

हरतेरनुद्यमनेऽच् (३-२-९) उद्यमनमुत्क्षेपणम् । अनुद्यमनेऽर्थे वर्तमानाद्धरतेः कर्मण्युपपदे अच्स्यात् । अणोपवादः । अंशं हरति-अंशहरः (दायादः) एवं रिक्थहरः । उद्यमने त्वणेव-भारहारः (भारोत्थापकः) । **शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्** (वा) शक्तिं गृह्णाति-शक्तिग्रहः । एवं लाङ्गलग्रहः अङ्कुशग्रहः तोमरग्रहः यष्टिग्रहः घटग्रहः घटीग्रहः । **सूत्रे च धार्यर्थे** (वा) सूत्रग्रहः (सूत्रधारकः) । केवलं ग्राहिणि आधारके त्वणेव सूत्रग्राहः । **वयसि च** (३-२-१०) वयसि गम्ये हरतेः कर्मण्युपपदे अच्स्यात् । उद्यमनार्थोयमारम्भः । कवचं हरति कवचहरः कुमारः कवचोत्क्षेपणं क्रियमाणं सम्भाव्यमानं वा तदुचितं वयो गमयति, तेनासत्यपि कवचोत्थापने तद्योग्य-वयस्क एवमुच्यते । एवम् अस्थिहरः (प्रौढः) श्वा । **आङि ताच्छील्ये** (३-२-११) आङ्पूर्वाद्धरतेः कर्मण्युपपदे अच्स्यात् ताच्छील्ये गम्ये । ताच्छील्यं तत्स्वभावता । पुष्पाण्याहरति तच्छीलः-पुष्पाहरः । एवं फलाहरः । अताच्छील्ये त्वण् भारमाहरति-भाराहारः । **अर्हः** (३-२-१२) अर्हतेरच्स्यात्कर्मण्युपपदे अणोपवादः । अचि स्त्रियां टाविशेषः । पूजामर्हति-पूजार्हः-र्हा, मानमर्हति-मानार्हः-र्हा । एवं दानार्हः दण्डार्हः । **स्तम्बकर्णयोरमिजपोः** (३-२-१३) एतयोरुपपदयोर्यथासंख्यमाभ्यामच्स्यात् । **हस्तिसूचकयो (र्वाच्ययोः) रिति वक्तव्यम्** (वा) स्तम्बे रमते-स्तम्बेरमः (हस्ती), कर्णे जपति-कर्णेजपः (सूचकः) तत्पुरुषेकृतीति हलदन्तादिति वा सप्तम्या अलुक् ।

वि० शमि धातोः संज्ञायाम् (३-२-१४) शम्युपपदे धातोरच् स्यात्संज्ञायाम् । शं करोति-शङ्करः । **अधिकरणे शेतेः** (३-२-१५) अधिकरणे उपपदे शेतेरच्स्यात् । खे शेते खशयः । **पार्श्वादिषूपसंख्यानम्** (वा) पार्श्वाभ्यां शेते-पार्श्वशयः । एवं पृष्ठशयः उदरशयः । **उत्तानादिषु कर्तृषु** (वा) उत्तानः शेते-उत्तानशयः बालः । अवमूर्धा (अवनतमूर्धा-अधोमुखः) शेते-अवमूर्धशयः । **गिरौ डश्छन्दसि** (वा) वेदे-गिरिशः, लोके तु- गिरिशयः । गिरिशमुपचचार प्रत्यहं सा सुकेशीति कविप्रयोगस्तु गिरिरस्यास्तीत्यर्थे लोमादित्वात् शप्रत्ययेनोपपादनीयः ।

चरेष्टः (३-२-१६) अधिकरणे उपपदे चरेः टः स्यात् । कुरुषु चरति-कुरुचरः स्त्रियां टित्वान्ङीप् कुरुचरी । एवं मद्रचरः भूचरः जलचरः खेचरः सप्तम्या अलुक् । **भिक्षासेनादायेषु च** (३-२-१७) एषूपपदेषु चरेष्टः स्यात् । अनधिकरणार्थ आरम्भः । भिक्षां चरति (चरणेनार्जयति)-भिक्षाचरः । सेनां चरति (प्रापयति प्रविशति वा)-सेनाचरः । आदायेति ल्यबन्तम् आदायचरः (लब्धं द्रव्यं गृहीत्वा यश्चरति)।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेक्ष्य स्थितां सहचरीमिति तु पचादिषु चरडिति पाठेन पचाद्यचि टित्वान्ङीप्युपपादनीयम्। **पुरोग्रतोग्रेषु सर्तेः** (३-२-१८) एषूपपदेषु सर्तेष्टः स्यात्। पुरः सरति-पुरःसरः। एवम् अग्रतः सरः-अग्रेसरः। अग्र इत्येदन्तत्वं निपातनात्। यूथं तदग्रसरगर्वितकृष्णसारमिति तु बाहुलकादिति हरदत्तः। **पूर्वे कर्तरि** (३-२-१९) कर्तृवाचिनि पूर्वशब्दे उपपदे सर्तेः टः स्यात्। पूर्वः सरतीति-पूर्वसरः। **कृञो हेतुताच्छील्यानुलोम्येषु** (३-२-२०) कर्मण्युपपदे करोतेष्टः स्याद्धेतौ ताच्छील्ये-आनुलोम्ये च गम्ये। हेतौ-यशः करोति (यशो हेतुः)-यशस्करी विद्या अतःकृकमीति सः। एवं कुलकरं धनम्, संमानकरो गुणः। ताच्छील्ये-श्राद्धकरः (श्राद्धकर्मशीलः)। एवम् अर्थकरः। आनुलोम्ये-वचनकरः (वचनानुकूलः)। एवं मैत्रकरः, स्नेहकरः। **दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु** (३-२-२१) दिवादिषूपपदेषु कृञष्टः स्याद्धेत्वादिष्वगम्येष्वपि। दिवा करोति-दिवाकरः (सूर्यः), विभां (प्रकाशं) करोति-विभाकरः। एवं निशाकरः (चन्द्रः) प्रभाकरः, भास्करः, कस्कादित्वात्सः, कारकरः (वृत्तविशेषः), अन्तकरः अनन्तकरः आदिकरः बहुकरः नान्दीकरः (मङ्गलपाठकः), लिपिकरः लिविकरः बलिकरः भक्तिकरः कर्तृकरः चित्रकरः क्षेत्रकरः संख्या-एककरः द्विकरः, जङ्घाकरः बाहुकरः अहस्करः कस्कादित्वात्सः, धनुष्करः अरुष्करः नित्यं समासेनुत्तरपदस्येति षः। **किंयत्तद्बहुषु कृञोऽज्विधानम्** (वा) हेत्वादिष्वपि टं बाधित्वा परत्वादच्। स्त्रियां टाप्। किङ्करः किङ्करा यत्करः तत्करः बहुकरः। किङ्करी इति तु पुंयोगे ङीषि। बहुशब्दस्य वैपुल्यार्थकस्येह ग्रहणं, तेन संख्यया गतार्थता न। **कर्मणि भृतौ** (३-१-२२) कर्मशब्दे उपपदे कृञष्टः स्याद्भृतौ गम्यमानायाम्। भृति-वेतनम्। कर्म करोति-कर्मकरः (भृतकः-वेतनं गृहीत्वा परार्थं कर्मकर्ता), अन्यत्र त्वण्-कर्मकारः (कर्मकर्ता)। **न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु** (३-२-२३) शब्दादिषूपपदेषु कृञष्टो न स्यात्। हेत्वाद्यर्थेषु प्राप्तस्य प्रतिषेधः तेनाणेव। शब्दकारः श्लोककारः कलहकारः गाथाकारः वैरकारः चाटुकारः सूत्रकारः मन्त्रकारः पदकारः।

वि० **स्तम्बशकृतोरिन्** (३-२-२४) अनयोरुपपदयोः कृञ इन्स्यात्। **व्रीहिवत्सयोरिति वक्तव्यम्** (वा) स्तम्बं (तृणनिचयं) करोति-स्तम्बकरिः व्रीहिः। शकृतं (मलं) करोति—शकृत्करिः वत्सः। **हरतेर्दृतिनाथयोः पशौ** (३-२-२५) अनयोरुपपदयोर्हृञ इन्स्यात् पशौ कर्तरि। दृतिं (चर्म) हरति-दृतिहरिः श्वा। नाथं (नासारज्जुं) हरति-नाथहरिः वृषः। **फलेग्रहिरात्मंभरिश्च** (३-२-२६) एतौ निपात्येते। फलानि गृह्णाति-फलेग्रहिः उपपदस्य एदन्तत्वं इन्प्रत्ययश्च निपात्यते। आत्मानं बिभर्ति-आत्मम्भरिः आत्मनो मुमागमः भृञ इन्। चात्कुक्षिम्भरिः। चान्द्रास्तु उदरकुक्षिष्विति पेठुः। ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः इति मुरारिः। प्रभुस्तु विबुधाश्रयः कति न सन्ति कुक्षिम्भराः न केषाञ्चित्प्रयोगस्तु प्रामादिक इति तत्वबोधिनीकारः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एजेः खश् (३-२-२८) कर्मण्युपपदे ण्यन्तादेजेः खश् स्यात् । **अरुर्द्विषदजन्तस्य मुम्** (६-३-६७) अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्त उत्तरपदे न त्वव्ययस्य । जनमेजयति (कम्पयति) जनमेजयः । खशः शित्वेन सार्वधातुकत्वात् शपि पुगन्तेति गुणे यादेशे पररूपे उपपदसुपो लुकि मुमागमः । अङ्गमेजयति-अङ्गमेजयः (सर्वाङ्गकम्पकः) । **नासिकास्तनयोर्ध्माधेटोः** (३-२-२९) अनयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् स्यात् । यथासंख्यमत्र नेष्यते । **स्तने धेटो नासिकायां ध्मश्चेति वाच्यम्** (वा) स्तनं धयति (पिबति) स्तनन्धयः (बालः) खशि शबायादेशपररूपेषु सुब्लुकि मुम्यनुस्वारपरसवर्णौ । धेटष्टित्वेन स्त्रियां ङीप् स्तनन्धयी । नासिकां धमति-नासिकन्धमः खशि शपि पाघ्रेति धमादेशः । **खित्यनव्ययस्य** (६-३-६६) खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात् । ह्रस्वे कृते मुम् । नासिकायां ध्मश्चेति चकाराद्धेटोपि- नासिकन्धयः । **नाडीमुष्ट्योश्च** (३-२-३०) अनयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् स्यात् । अत्रापि यथासंख्यं नेष्यते । नाडीं धमति धयति वा-नाडिन्धमः नाडिन्धयः ह्रस्वे कृते मुम् । मुष्टिं धमति धयति वा-मुष्टिन्धमः मुष्टिन्धयः । **उदि कूले रुजिवहोः** (३-२-३१) उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात् । कूलमुद्रुजति (भनक्ति) -कूलमुद्रुजः नदीवेगः । कूलमुद्वहति-कूलमुद्वहः । **वहाभ्रे लिहः** (३-२-३२) अनयोः कर्मणोरुपपदयोर्लिहेः खश् स्यात् । वहं (स्कन्धं) लेढि-वहंलिहो गौः । अभ्रं (मेघं) लेढि-अभ्रंलिहोः वायुः प्रासादो वा । अदादित्वात् शपो लुक् खशोऽपित्सार्वधातुकत्वेन ङित्वान्न गुणः । **परिमाणे पचः** (३-२-३३) परिमाणं प्रस्थादि, तस्मिन्कर्मण्युपपदे पचेः खश् स्यात् । प्रस्थं पचति-प्रस्थम्पचा स्थाली । द्रोणं पचति-द्रोणम्पचः कटाहः । **मितनखे च** (३-२-३४) अनयोः कर्मणोरुपपदयोः पचेः खश् स्यात् । मितं (परिमितं) पचति-मितम्पचा ब्राह्मणी । नखं पचति-नखम्पचा यवागूः नखस्य विक्लित्यभावात्पचिरत्र तापवाची । **विध्वरुषोस्तुदः** (३-२-३५) अनयोः कर्मणोरुपपदयोस्तुदेः खश् स्यात् । विधुं तुदति (पीडयति)–विधुन्तुदः राहुः । अरुः (मर्म) तुदति-अरुन्तुदः दुष्टः । **असूर्यललाटयोर्दृशितपोः** (३-२-३६) अनयोः कर्मणोरुपपदयोर्यथासंख्यं दृशितपिभ्यां खश् स्यात् । सूर्यं न पश्यन्ति-असूर्यम्पश्याः राजदाराः शपि पश्यादेशः । ललाटं तपति-ललाटन्तपः सूर्यः ।

वि० असूर्यमित्यसमर्थसमासः दृशिना सह नञः सम्बन्धात् । एवं नाम राजदारा गुप्ताः यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्ति किं पुनः परपुरुषमिति, तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुध्यते, यदा तु सूर्याभावदर्शनमात्रं सूर्येतरचन्द्रादिदर्शनं वा विवक्ष्यते तदा खश् न भवत्यनभिधानादिति न्यासकारादयः । असूर्यम्पश्य इति प्रयोगस्वारस्येन पाणिनेः तत्पूर्वतश्च समये राजदारादीनामार्यनारीणां परपुरुषादर्शनेन जवनिका प्रथासीदिति गम्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रियवशे वदः खच् (३-२-३८) अनयोः कर्मणोरुपपदयोर्वदेः खच्स्यात्। प्रियं वदति-प्रियम्वदः। वशं वदति-वशम्वदः। खकारो मुमर्थः, चकारो वक्ष्यमाणह्रस्वार्थः, शित्वाभावान्न शबादि। **गमेः सुपि वाच्यः** (वा) संज्ञायां गमश्चेति सिद्धत्वादसंज्ञार्थमिदं वचनम्। मितं गच्छति-मितङ्गमः हस्ती। **विहायसो विह इति वाच्यम्** (वा) **खच्च डिद्वा वाच्यः** (वा) विहायसा (आकाशमार्गेण) गच्छति-विहङ्गः विहङ्गमः (पक्षी) डित्त्वपक्षे अभस्यापि टेर्लोपः। विहायसो विहादेशः मुम् च, खच्च डिद्वेति पृथक्करण-सामर्थ्यादन्यत्रापि क्वचिद्भवति-भुजैर्गच्छति-भुजङ्गः भुजङ्गमः (सर्पः)। तुरेण (त्वरया) गच्छति-तुरङ्गः तुरङ्गमः। वक्ष्यमाणे डे- विहगः, भुजगः, तुरग इत्यपि। **द्विषत्परयोस्तापेः** (३-२-३९) अनयोः कर्मणो-रुपपदयोर्ण्यन्तात्तपेः खच्स्यात्। **खचि ह्रस्वः** (६-४-९४) खच्परे णावुपधाया ह्रस्वः स्यात्। द्विषन्तं तापयति-द्विषन्तपः खच्युपधाह्रस्वे खच आर्धधातुकत्वेन णिलोपे तकारात्प्राक् मुमि अनुस्वारपरसवर्णयोः संयोगान्ततकारलोपः। परं (शत्रुं) तापयति-परन्तपः। शक्तिलाङ्गलेत्यादौ घटघट्योरुभयोर्निर्देशेन उप-पदविधौ लिङ्गविशिष्टपरिभाषाया अप्रवृत्तेर्ज्ञापनादिह न खश्, किन्त्वणेव, द्विषतीं तापयति द्विषतीतापः। **वाचि यमो व्रते** (३-२-४०) वाक्शब्दे कर्मणि उपपदे यमेः खच् स्यात् व्रते गम्ये। वाचं यच्छति-वाचंयमः, (मौनव्रती)। अव्रते त्वणेव-अशक्त्यादि वा वाचं यच्छति-वाग्यामः। **पूःसर्वयोर्दारिसहोः** (३-२-४१) पूःसर्वयोः कर्मणोरुपपदयोर्यथासंख्यं दारिसहोः खच्स्यात्। पुरं दारयति-पुरन्दरः (इन्द्रः) खचि णिलोपे उपधाह्रस्वे सुपो लुकि वाचंयमपुरन्दराविति निपातनादमन्तता। सर्वं सहते-सर्वंसहः अरुर्द्विषदिति मुम्। सर्वंसहा (पृथिवी)। संज्ञायां भृतृवृजीत्यादिना सिद्धे इह सहिग्रहणम-संज्ञार्थम्। **भगे च दारेः** (वा) इति काशिकायाम्। बाहुलकेन लब्धमिदमित्याहुः। भगं दारयति-भगन्दरः (रोगविशेषः)। **सर्वकूलाभ्रकरीषेषु कषः** (३-२-४२) एषु कर्मसूपपदेषु कषेः खच्स्यात्। सर्वं कषति-सर्वङ्कषः खलः। एवं कूलङ्कषा नदी, अभ्रङ्कषः वायुः, करीषङ्कषा वात्या। **मेघर्तिभयेषु कृञः** (३-२-४३) एषु कर्मसूपपदेषु कृञः खच्स्यात्। मेघं करोति-मेघङ्करः। एवम् ऋतिङ्करः (गमनकारकः), भयङ्करः, भयशब्देन तदन्तविधिना अभयशब्दस्यापि ग्रहणात् अभयङ्करः। **क्षेमप्रियमद्रेऽण् च** (३-२-४४) एषु कर्मसूपपदेषु कृञोऽण्स्यात् चात् खच्। क्षेमं करोति-क्षेमकारः क्षेमङ्करः। एवं प्रियकारः प्रियङ्करः, मद्रकारः मद्रङ्करः (भद्रकृत्)। वेति वाच्ये हेत्वादिषु टो माभूदित्यर्थमण्ग्रहणम्, अल्पारम्भः क्षेमकर इति तु कृञः पचाद्यचि शेषषष्ठ्यन्तेन सह समासेनोपपादनीयम्। **संज्ञायां भृतृवृजिधारिसहितपिदमः** (३-२-४६) सोपपदेभ्य एभ्यः खच्स्यात्संज्ञायाम्। विश्वं बिभर्ति-विश्वम्भरः (विष्णुः) विश्वम्भरा (पृथिवी)। रथेन तरति-रथन्तरम् (सामविशेषः)। पतिं वृणोति-पतिम्वरा (कन्या), शत्रुं जयति-शत्रुञ्जयः (कश्चित् हस्ती)। युगं धारयति-युगन्धरः (पर्वतविशेषः) खचि ह्रस्वो णिलोपश्च। शत्रून्सहते-शत्रुंसहः (राजविशेषः)। अरिं दमति-अरिन्दमः (राजविशेषः)।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० रथन्तरशब्दे रथेन तरतीति व्युत्पत्तिमात्रं नतु तत्सामनि अवयवार्थानुगमः, अन्यत्र तु संज्ञात्वेप्यर्थानुगमः। दमिः शमनायाम् तेन सकर्मकः, दमु उपशमे इत्यर्थे तु अन्तर्भावितण्यर्थोऽत्र दमिः। **गमश्च** (३-२-४७) संज्ञायां गमेः खच्स्यात्। सुतङ्गमः (कश्चित्)।

अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः (३-२-४८) संज्ञायामिति निवृत्तम्। एषु कर्मसूपपदेषु गमेर्डः स्यात्। डित्वसामर्थ्यादभस्यापि टेर्लोपः। अन्तं गच्छति-अन्तगः टेरमोलोपः। एवम् अत्यन्तगः अध्वगः नलोपः प्रातिपदिकान्तस्येति नलोपः। दूरगः पारगः सर्वगः अनन्तगः। **सर्वत्रपन्नयोरुपसंख्यानम्** (वा) सर्वत्र गच्छति-सर्वत्रगः, पन्नं (पतितं) यथा तथा गच्छति-पन्नगः (सर्पः)। **उरसो लोपश्च** (वा) उरसा गच्छति-उरगः (सर्पः) सकारलोपः। **सुदुरोरधिकरणे** (वा) सुखेन गच्छत्यत्रेति-सुगः (देशः), दुःखेन गच्छत्यत्रेति-दुर्गः (दुर्गमस्थानम्)। **अन्यत्रापि दृश्यत इति वक्तव्यम्** (वा) ग्रामगः गुरुतल्पगः भुजगः तुरगः। **डे च विहायसो विहादेशो वक्तव्यः** (वा) विहगः। **अपे: क्लेशतमसोः** (३-२-५०) हनइत्यनुवर्तते, अनयोः कर्मणोरुपपदयोरपपूर्वाद्धन्तेर्डः स्यात्। क्लेशमपहन्ति-क्लेशापहः पुत्रः टेरनो लोपः। तमोपहन्ति-तमोपहः सूर्यः। **लक्षणे जायापत्योष्टक्** (३-२-५२) अनयोरुपपदयोर्हन्तेः टक् स्यात् लक्षणवति कर्तरि। जायां हन्ति जायाघ्नः पतिः। पतिं हन्ति-पतिघ्नी स्त्री। एषु गमहनेत्युपधा-लोपः होहन्तेरिति कुत्वं, स्त्रियां टित्वान्ङीप्। **अमनुष्यकर्तृके च** (३-२-५३) अमनुष्यकर्तृकेर्थे वर्तमानाद्धन्तेः कर्मण्युपपदे टक्स्यात्। जायां हन्ति-जायाघ्नः तिलकालकः। पतिं हन्ति पतिघ्नी पाणि-रेखा। एवं पित्तघ्नं घृतम्। शत्रुघ्नः कृतघ्न इत्यादि तु मूलविभुजादित्वात्के बोध्यम्। **राजघ उपसंख्यानम्** (वा) राजानं हन्ति राजघः टकि टिलोपः कुत्वं च निपात्यते।

वि० **शक्तौ हस्तिकपाटयोः** (३-२-५४) अनयोरुपपदयोर्हन्तेष्टक्स्यात् शक्तौ द्योत्यायाम्। मनुष्यकर्तृकार्थमिदम् हस्तिघ्नः पुरुषः, कपाटघ्नः चोरः। **आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्** (३-२-५६) एषु च्व्यर्थेषु अच्व्यन्तेषु कर्मसूपपदेषु कृञः करणकारके ख्युन्स्यात्। अनाढ्यमाढ्यं कुर्वन्त्यनेन-आढ्यङ्करणम्। योरनादेशः मुम्। एवं सुभगङ्करणम्, स्थूलङ्करणम्, पलितङ्करणम्, नग्नङ्करणम्, अन्धङ्करणम्, प्रियङ्करणम्। **कर्तरि भुवः खिष्णुच्खुकञौ** (३-२-५७) आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषूपपदेषु भवतेरेतौ स्तः। अनाढ्य आढ्यो भवति-आढ्यंभविष्णुः, आढ्यंभावुकः। खित्वान्मुमपि। एवं सुभगंभविष्णुः सुभगंभावुकः प्रियंभविष्णुः प्रियंभावुकः।

स्पृशोऽनुदके क्विन् (३-२-५८) कर्मणीति निवृत्तम्। उदकभिन्ने सुप्युपपदे स्पृशेः क्विन् स्यात्। क्विनः सर्वापहारी लोपः। मन्त्रेण स्पृशति-मन्त्रस्पृक्। जलेन स्पृशति-जलस्पृक्। क्विन्प्रत्ययस्य कुरिति कुत्वम्। **ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च** (३-२-५९) ऋत्विगादयः पञ्च क्विन्नन्ता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निपात्यन्ते, अच्वादिभ्यस्तिस्रोपि क्विन्स्यात्। ऋतौ यजति-ऋत्विक्। यजेः क्विनि सम्प्रसारणम्। धृष्णोतीति-दधृक्। सृज्यते इति-स्रक्। दिश्यते इति-दिक्। उष्णिक् (छन्दोविशेषः)। प्र-अञ्चति-प्राङ्। प्रत्यगञ्चति-प्रत्यङ्, उदञ्चति-उदङ्, युनक्ति-युङ्, क्रुञ्चति-क्रुङ्। **त्यदादिषु दृशोऽनालोचने कञ्च (३२-६०)** त्यदादिषूपपदेषु अनालोचनार्थाद्दृशेः कञ्स्यात् चकारात्क्विन्। कञि-तादृशः, क्विनि-तादृक्। आसर्वनाम्न इत्यात्वम्। एवं-यादृक् यादृशः, एतादृक् एतादृशः, त्वादृक् त्वादृशः, मादृक् मादृशः, युष्मादृक् युष्मादृशः, अस्मादृक् अस्मादृशः, युस्मदस्मदोरेकवचनयोस्त्वमादेशौ आत्वं च। भवादृक् भवादृशः, ईदृक् ईदृशः, कीदृक् कीदृशः, इदंकिमोरीश्की। **समानान्ययोश्चेति वाच्यम्** (वा) सदृक् सदृशः, दृग्दृशवतुष्विति समानस्य सादेशः। अन्यादृक् अन्यादृशः। **क्सोपि वाच्यः** (वा) तादृक्षः यादृक्षः कीदृक्षः ईदृक्षः। सदृक्षः। दृशेः शस्य षत्वकत्वे कसस्य षत्वं च। तादृशादयो हि रूढिशब्दप्रकारा नैवात्र दर्शनक्रिया विद्यते इति काशिकाकारः। **सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप् (३-२-६१)** एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे। वेरपृक्तस्येति वस्यापि लोपे क्विपः सर्वापहारः। दिवि सीदतीति-द्युसत् दिवउदिति उकारे यण्। उपनिषीदति-उपनिषत्। अण्डानि सूते-अण्डसूः। प्रसूते-प्रसूः (माता)। मित्रं द्वेष्टि-मित्रद्विट्। मित्रं द्रोग्धि-मित्रध्रुक्। गां दोग्धि-गोधुक्। अश्वं युनक्ति-अश्वयुक्। वेदं वेत्ति वेदवित्। ब्रह्म वेत्ति-ब्रह्मवित्। काष्ठं भिनत्ति-काष्ठभित्। मर्म छिनत्ति-मर्मच्छित्। शत्रूञ्जयति शत्रुजित्। ह्रस्वस्यपितिकृतीति तुक्। सेनां नयति सेनानीः। विशेषेण राजते-विराट्। सम्यक् राजते-सम्राट्। **अग्रग्रामाभ्यां नयतेर्णो वाच्यः** (वा) अग्रे नयति-अग्रणीः। ग्रामं नयति-ग्रामणीः। **भजो ण्विः** (३-२-६२) सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात्। ण्वेरपि सर्वलोपः। अंशं भजति-अंशभाक्। अर्धं भजति-अर्धभाक् णित्वादुपधावृद्धिः। **अदोऽनन्ने (३-२-६८)** अन्नभिन्ने सुप्युपपदे अदो विट् स्यात्। विटोपि सर्वापहारः। आममत्ति-आमात्। सस्यमत्ति-सस्यात्। अन्ने सति तु कर्मण्यण् अन्नमत्ति-अन्नादः। **क्रव्ये च (३-२-६९)** क्रव्ये चोपपदे अदेर्विट् स्यात्। पूर्वेण सिद्धे वचनमण्बाधनार्थम्। क्रव्य-(आममांसं) मत्ति-क्रव्यात् (गृद्ध्रादिः)। क्रव्यादो रूप आसर इति पक्वमांसशब्दे उपपदे अणि पृषोदरादित्वादुपपदस्य क्रव्यादेशेनोपपादनीयम्। **दुहः कब्घश्च** (३-२-७०) दुहेः सुप्युपपदे कप्स्यात् घश्चान्तादेशः। कामं दुग्धे कामदुघा धेनुः। **अन्येभ्योपि दृश्यन्ते** (३-२-७५) मनिन् क्वनिप् विच् प्रत्यया धातोः स्युः। **नेड् वशि कृति** (५-२-८) वशादेः कृत इट् न स्यात्। इति नेट्। शृ-मनिन्-सुशर्मा। इण्-क्वनिप्-प्रातरित्वा-त्वानौ-नः। **विड्वनोरनुनासिकस्यात्** (६-४-४१) अनयोरनुनासिकस्य आत्स्यात्। विजन् वनिप्-विजायते इति-विजावा, वनिपि जनेर्वस्याकारे सवर्णदीर्घः। ओणृ-वनिप् अवावा णस्यात्वम्। रुष्-विच्-रोट्, रिष्-विच्-रेट्। वेरपृक्तस्येति विचः सर्वापहारः। अन्येभ्योपीत्यपि शब्दः सर्वोपाधिव्यभिचारार्थः, तेन निरूपपदादपि-धीवा पीवा। दृशिग्रहणं प्रयोगानुसरणार्थम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्विप्च (३-२-७६) सर्वधातुभ्यः क्विप्स्यात्। सत्सूद्विषेत्यादि त्वस्यैव प्रपञ्चः। उखायाः स्रंसते-उखास्रत्, वाहाद् भ्रश्यति-वाहभ्रट्, पर्णात् ध्वंसते-पर्णध्वत्।

धि० अन्तः (८-४-२०) पदान्तस्यानितेर्नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत्। प्र-अन्-क्विप् णत्वं-हे प्राण्। **आशासः क्वावुपधाया इत्वं वाच्यम्** (वा) आशास्-क्विप्-आशीः आकारस्येत्वम्। गॄ-क्विप्-गीः, ऋत इर्भावः, सोर्लोपे वोरुपधाया इति दीर्घः। पॄ-क्विप्-पूः उदोष्ठ्यपूर्वस्येति ऋत उर्भावः सुलोपे उपधादीर्घः। **इस्मन्त्रन्क्विपु च** (६-४-९७) एषु परेषु छादेराकारस्य ह्रस्वः स्यात्। तनुं छादयति-तनुच्छत्। अक्षैर्दीव्यति-अक्षद्यूः, दिवः क्विपि धातोर्वस्य छ्वोरिति ऊठि यण्। धूः, धुर्वीधातोः क्विपि राल्लोप इति वकारलोपे सुलोपे वोरित्युपधादीर्घः। **गमः क्वौ** (३-४-४०) क्वौ गमोऽनुनासिकलोपः स्यात्। अङ्गम् गच्छति अङ्गगत्-गमेः क्विपि तुकि अनुनासिकलोपः। **गमादीनामिति वक्तव्यम्** (वा) पुरीं तनोति (हृदयमांसखण्डविशेषं छादयति)—पुरीतत् (हृदयकमलाच्छादको मेदोविशेषः) तनोतेः क्विपि नलोपे तुकि नहिवृतीति पूर्वपददीर्घः।

सुप्यजातौ णिनिस्ताच्छील्ये (३-२-७८) अजात्यर्थे सुप्युपपदे धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये। उष्णं भुङ्क्ते तच्छीलः-उष्णभोजी, इन्नन्तत्वात्स्त्रियां ङीप् उष्णभोजिनी। एवं शीतभोजी वेदपाठी, कार्यदर्शी। अजातावित्युक्तेर्नेह-ब्राह्मणानामन्त्रयिता। ताच्छील्योक्तेर्नेह-उष्णं भुङ्क्ते कदाचित्। सुपीत्यनुवर्तमाने पुनस्तद्ग्रहणमुपसर्गनिवृत्त्यर्थमिति व्याख्याय उत्प्रतिभ्यामाङि-सर्तेरुपसंख्यानमिति वृत्तिकारोक्तं भाष्यविरोधादुपेक्ष्यम्। प्रसिद्धश्चोपसर्गेऽपि णिनिः स बभूवोप-जीविनाम्, न्यषेधि शेषोऽप्यनुयायिवर्गः, पतत्यधो धाम विसारि सर्वतः इत्यादौ। **साधु-कारिण्युपसंख्यानम्** (वा) साधु करोति-साधुकारी। **ब्रह्मणि वदः** (वा) ब्रह्म वदति-ब्रह्मवादी, अताच्छील्यार्थमिदं वार्तिकद्वयम्। **कर्तर्युपमाने** (३-२-७९) कर्तृवाचिन्युपमाने उपपदे धातोर्णिनिः स्यात्। उष्ट्र इव क्रोशति-उष्ट्रक्रोशी। ध्वाङ्क्षः (काकः) इव रौति-ध्वाङ्क्षरावी। णित्वाद्वृद्धावावादेशः। अताच्छील्यार्थं जात्यर्थं च वचनम्। कर्तरीत्युक्तेर्नेह-अपूपानिव भक्षयति माषान्। उपमानइत्युक्तेर्नेह-उष्ट्रः क्रोशति। **व्रते** (३-२-८०) व्रते गम्ये सुप्युपपदे धातोर्णिनिः स्यात्। स्थण्डिले (भूमौ) शेते-स्थण्डिलशायी (तद्व्रती)। अश्राद्धं भुङ्क्ते-अश्राद्धभोजी। अव्रते तु न- स्थण्डिले शेते। **बहुलमा-भीक्ष्ण्ये** (३-२-८१) पौनःपुन्ये द्योत्ये सुप्युपपदे धातोर्बहुलं णिनिः स्यात्। क्षीरं पुनः पुनः पिबन्ति-क्षीरपायिण उशीनराः। एवं सौवीरपायिणः-बाह्लीकाः युक् णत्वं च। **मनः** (३-२-८२) सुप्युपपदे मन्यतेर्णिनिः स्यात्। कषायपायिणः गान्धाराः। दर्शनीयं मन्यते-दर्शनीयमानी। एवं वर्णनीयमानी, शोभनमानी। **आत्ममाने खश्च** (३-२-८३) स्वकर्मके मनने वर्तमानान्मन्यतेः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुप्युपपदे खश् स्यात् चाणिनिः। आत्मानं पण्डितं मन्यते-पण्डितंमन्यः पण्डितमानी। खशि शित्वेन सार्वधातुकत्वात् श्यन् अरुर्द्विषदिति मुम्। आत्मानं कालीं मन्यते कालिंमन्या, कालीमानिनी। खित्यनव्ययस्येति खशि पूर्वपदह्रस्वो मुम् च। एवं दर्शनीयंमन्यः दर्शनीयमानी, सुन्दरंमन्यः सुन्दरमानी।

वि० इच एकाचोऽम्प्रत्ययवच्च (६-३-६८) इजन्तादेशस्याचोऽम् स्यात् सच स्वाद्यम्वत् खिदन्ते परे। आत्मानं मन्यते-गांमन्यः, मनेः खशि श्यनि गोशब्दादमि तस्य स्वाद्यम्वत्त्वेन औतोऽम्शसोरित्योकारस्याऽऽकारः। आत्मानं स्त्रियं मन्यते-स्त्रियंमन्यः स्त्रींमन्यः अमः स्वाद्यम्वत्त्वेन वामूशसोरिति इयङ्विकल्पः। एवं नरंमन्यः अम्वत्वे ऋदृशोऽङीति गुणः ...मन्यः अम्वत्वेन अचिश्नुधात्विति उवङ्।

भूते (३-२-८४) अधिकारोयं वर्तमानेलडिति यावत्। करणे यजः (३-२-८५) करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि। सोमेनेष्टवान्-सोमयाजी (सोमयागं कृतवान् द्विजः), एवम् अग्निष्टोमयाजी। अग्निष्टोमः फलभावनायाः करणम्। कर्मणि हनः (३-२-८६) कर्मण्युपपदे भूतार्थाद्धन्तेः णिनिः स्यात्कर्तरि। पितृव्यं हतवान्- पितृव्यघाती हनस्त इति तः, होहन्तेरिति घत्वम्। एवं भ्रातृघाती गोघाती। कुत्सितग्रहणं कर्तव्यम् (वा) नेह-चोरं हतवान्। कर्मणीति सहेचेति यावदधिक्रियते। ब्रह्मभ्रूणवृत्रेषु क्विप् (३-२-८७) एषु कर्मसूपपदेषु हन्तेः क्विप्स्याद्भूते। ब्रह्म हतवान्-ब्रह्महा नान्तः शब्दः। एवं भ्रूणहा (गर्भघाती), वृत्रहा (इन्द्रः)। क्विप्चेत्येव सिद्धे नियमार्थमिदम्। ब्रह्मादिष्वेवोपपदेषु, हन्तेरेव, भूत एव, क्विबेव इति चतुर्विधोत्र नियम इति काशिका। ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यम्। तेन पुरुषं हतवानित्यादौ न क्विप्। सुकर्मपापमन्त्रपुण्येषु कृञः (३-२-८९) सौ कर्मादिषु चोपपदेषु कृञः क्विप्स्यात्। सुष्ठु करोति-सुकृत् ह्रस्वस्येति तुक्। एवं कर्मकृत् पापकृत् मन्त्रकृत् पुण्यकृत्। उपपदनियमवर्जं त्रिविधोत्र नियम इति काशिका। उपपदनियमाभावादन्यस्मिन्नप्युपपदे क्विप्-शास्त्रकृत् भाष्यकृत् ग्रन्थकृत्। क्विबेवेति नियमात्कर्म कृतवानित्यत्राण् न। कृञ एवेति नियमान्मन्त्रमधीतवान्-मन्त्राध्यायः अत्र न क्विप्। भूत एवेति नियमान्मन्त्रं करोति करिष्यति वेति विवक्षायां न क्विप्। सोमे सुञः (३-२-९०) सोमे कर्मण्युपपदे सुनोतेः क्विप्स्यात्। सोमं सुतवान् सोमसुत्। चतुर्विधोत्र नियम इति काशिका। एवमुत्तरसूत्रेपि। अग्नौ चेः (३-२-९१) अग्नौ कर्मण्युपपदे चिनोतेः क्विप्स्यात्। अग्निं चितवान्-अग्निचित्। कर्मण्यग्न्याख्यायाम् ... कर्मणीनि विक्रियः (३-२-९३) कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात्। कुत्सितग्रहणं कर्तव्यम् (वा) सोमं विक्रीतवान्-सोमविक्रयी। एवं घृतविक्रयी रसविक्रयी सोमादयो विक्रीयमाणाः कुत्सामावहन्ति शास्त्रे निषेधात्। अकुत्सितेत्वण्-धान्यविक्रायः। दृशेः क्वनिप् (३-२-९४) कर्मण्युपपदे भूते दृशेः क्वनिप्स्यात्। पारं दृष्टवान्-पारदृश्वा नान्तः शब्दः। एवं परलोकदृश्वा विश्वदृश्वा, अन्येभ्योपिदृश्यन्त इति सिद्धे क्वनिपि पुनर्वचनं प्रत्य-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यान्तरनिवृत्त्यर्थम्। **राजनि युधि कृञः** (३-२-९५) राजन्शब्दे कर्मण्युपपदे युध्यतेः करोतेश्च क्वनिप्स्यात्। युधिरन्तर्भावितण्यर्थः सकर्मकः। राजानं योधितवान्-राजयुध्वा। राजानं कृतवान्-राजकृत्वा ह्रस्वस्येति तुक्। **सहे च** (३-२-९६) सहशब्दे चोपपदे युधिकृञ्भ्यां क्वनिप्स्यात्, सह योधितवान्-सहयुध्वा। सह कृतवान्-सहकृत्वा। **सप्तम्यां जनेर्डः** (३-२-९७) सप्तम्यन्ते उपपदे जनेर्डः स्यात्। सरसि जातं-सरसिजम्। डित्वसामर्थ्यादभस्यापि टेर्लोपः हलदन्तादिति सप्तम्या अलुक्, लुकि तु-सरोजम्। मन्दुरायां जातः मन्दुरजः ङ्यापोरिति ह्रस्वः। **पञ्चम्यामजातौ** (३-२-९८) जातिशब्दभिन्ने पञ्चम्यन्ते उपपदे जनेर्डः स्यात्। संस्काराज्जातः-संस्कारजः। एवम् अदृष्टजः पुण्यजः। **उपसर्गे च संज्ञायाम्** (३-२-९९) उपसर्गे उपपदे संज्ञायां जनेर्डः स्यात्। प्रजायते इति प्रजा (सन्ततिर्जनो वा), समुदायस्य संज्ञात्वम्। **अनौ कर्मणि** (३-२-१००) अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्। पुंमांसमनुरुध्य जाता-पुमनुजा। पुंस् इतिपूर्वपदे संयोगान्तसलोपः। एवं स्त्र्यनुजः। **अन्येष्वपि दृश्यते** (३-२-१०१) अन्येष्वप्युपपदेषु जनेर्डः स्यात्। न जायते-अजः द्विर्जायते द्विजः। ब्राह्मणाज्जातः ब्राह्मणजः अनुजातः-अनुजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः, तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्-परितः खाता-परिखा।

वि० जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते, मातुर्यदग्रे जननं द्वितीयं मौञ्जिबन्धनादिति ब्राह्मणादीनां द्विजत्वम्। पक्षिणोपि गर्भादण्डाच्च द्विर्जाता इति द्विजाः।

प्रयोगाः—नृपोऽर्थिकामादधिकप्रदश्च। स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते। वश्यश्च पुत्रोऽर्थकरी च विद्या। अप्यग्रणीर्मन्त्रकृतामृषीणाम्। अवेहि मां किङ्करमष्टमूर्तेः। गुर्वर्थमर्थी श्रुतपारदृश्वा। प्रकाममप्रीयत यज्वनां प्रियः। सुरापी व्याधिता धूर्ता। विषमस्थं न पीडयेत्। भ्रूणहा मद्यपोऽधमः। अरुन्तुदस्तु मर्मभित्। अभ्रंलिहा भूधराः। ललाटन्तपोयम्।

निष्ठा—

क्तक्तवतू निष्ठा (१-१-२६) संज्ञासूत्रमिदम्। एतौ निष्ठासंज्ञौ स्तः। **निष्ठा** (३-२-१०२) भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र तयोरेवकृत्यक्तखलर्थाः इति अकर्मकेभ्यो भावे सकर्मकेभ्यः कर्मणि क्तः। कर्तरि कृदिति सर्वेभ्यः कर्तरि क्तवतुः। उकावितौ। भावे-स्नातं मया। तेन शयितम्। तैः स्थितम्। द्यतिस्यतिमास्थामित्तिकितीतीत्वम्। कर्मणि-स्तुतस्त्वया विष्णुः। मया दृष्टा जनाः। श्रुता वार्ता। पठितानि शास्त्राणि। कर्तरि-विष्णुर्विश्वं कृतवान्। कार्यं कृतवती नारी उगित्वात्स्त्रियां ङीप्। भुक्तवान् अतिथिः। पठितवत्कुलम्। दृष्टवन्तः पुरुषाः व्रश्चेति षत्वे ष्टुत्वम्। शयितवान्बालः। **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** (८-२-४२) रेफदकाराभ्यां परस्य निष्ठातस्य नकारादेशः स्यात्,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च । शॄ-शीर्णः शीर्णवान् । निष्ठायामॄतइद्धातोरिति ऋकारस्य ईर्भावे रेफात्परस्य तस्य नत्वे णत्वम् । विस्तॄ-विस्तीर्णः-र्णवान् । निगॄ-निगीर्णः-र्णवान् । पॄ-पूर्णः-र्णवान् उदोष्ठ्येति ऋकारस्य ऊर्भावः । छिद्-छिन्नः-न्नवान्, प्रत्ययतकारस्य धातुदकारस्य च नः । भिद्-भिन्नः-न्नवान् । अद्-अन्नम् । क्षुद्-क्षुण्णः-ण्णवान् । उभयतो नत्वे षकारात्परत्वेन णत्वं च । क्लिद्-क्लिन्नः । **संयोगादेरातो धातोर्यण्वतः** (८-२-४३) संयोगादेर्यण्वत आकारान्ताद्धातोः परस्य निष्ठातस्य नकारादेशः स्यात् । ग्लै-ग्लानः-नवान् । निष्ठायामादेच इत्यात्वे नत्वम्, म्लै-म्लानः-नवान् । स्त्यै-स्त्यानः (सङ्घातीभूतः) । **ल्वादिभ्यः** (८-२-४४) लूञाद्येकविंशतिधातुभ्य उत्तरस्य निष्ठातस्य नः स्यात् । लू-लूनः-नवान् । धू-धूनः-नवान् । ज्या-जीनः-नवान् पूर्वं ग्रहिज्येति सम्प्रसारणे आतःपरत्वाभावात्पूर्वेणाप्राप्तौ अनेन नत्वे । **हलः** (६-४-२) अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात् । इति दीर्घः । **दुग्वोर्दीर्घश्च** (वा) दु गतौ-दूनः-नवान्, टुदु उपतापे इत्यस्य तु सानुबन्धत्वेनेहा ग्रहात्-दुतः । मृदुतया दुतयेति माघः । गु-गूनः । **पूञो विनाशे** (वा) पूना यवाः विनष्टा इत्यर्थः । अन्यत्र तु पूतम् (पावितम्) । **ओदितश्च** (८-२-४५) ओदितो धातोरुत्तरस्य निष्ठातस्य नत्वं स्यात् । भुजो-भुग्नः नत्वस्यासिद्धतया पूर्वं जस्य कुत्वे नत्वम् । टुओश्वि-उच्छूनः-नवान् । उत्पूर्वात् श्वयतेर्निष्ठायां यजादित्वाद्वस्य सम्प्रसारणे पूर्वरूपे श्वीदितोनिष्ठायामिति इण्निषेधे हल इति दीर्घे निष्ठानत्वं सन्धिकार्यं च । ओहाक्-प्रहीणः-णवान् घुमास्थेतीत्वे नत्वे कृत्यच इति णत्वम् । दूङ् परितापे-दूनः-नवान् । लीङ्-लीनः-नवान् । स्वादय ओदित इत्युक्तेरनेन नत्वम् । उत्-डीङ्-उड्डीनः-नवान् डीङः सेट्कत्वेपि इटि सति निष्ठातस्य डीङः परत्वाभावेन नत्वाप्राप्तेस्तस्य ओदिन्मध्यपाठस्य वैयर्थ्यप्रसक्तेर्नेट् तेन नत्वम् । ओविजी-उद्विग्नः-ग्नवान् उत्पूर्वाद्विजेः प्रत्यये नत्वं जस्य कुत्वम् । ओप्यायी-पीनः-वान् प्यायः पी । **निष्ठायामण्यदर्थे** (६-४-६०) ण्यदर्थौ भावकर्मणी, ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात् । **क्षियो दीर्घात्** (८-१-४६) दीर्घात्क्षियो निष्ठातस्य नः स्यात् । अकर्मकत्वेन वक्ष्यमाणे कर्तरि क्ते नत्वे क्षीणाः क्लेशाः । क्षीणः तपस्वी क्षीणवान् । भावकर्मणोस्तु क्षितं क्षितः । **निर्वाणोऽवाते** (८-२-५०) निर्वाण इति वातेर्निः पूर्वादुत्तरस्य निष्ठातस्य नत्वं निपात्यते वातः कर्ता न चेत् । निर्वाणः दीपः मुनिर्वा । वाते तु निर्वातो वातः । **शुषः कः** (८-२-५१) शुषो निष्ठातस्य कः स्यात् । शुष्कः शुष्कवान् । **पचो वः** (८-२-५२) पचो निष्ठातस्य वः स्यात् । पक्वः पक्ववान् वत्वस्यासिद्धत्वात्कुत्वम् । **क्षायो मः** (८-२-५३) क्षैधातोर्निष्ठातस्य मः स्यात् । क्षामः क्षामवान् आदेच इत्यात्वम् । **अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः** (८-२-५५) एते निपात्यन्ते उपसर्गादुत्तरा न चेत् । ञिफला विशरणे-फुल्लः क्ते तस्य लत्वं निपात्यते आदितश्चेति इडभावः, तिचेत्युत्वम् । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते फुल्लवान् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः नतु क्तवत्वेकदेशस्यापि, तलोपस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते। क्षीब-क्षीबः (मत्तः), कृश-कृशः (दुर्बलः), उत् लाघ-उल्लाघः (रोगमुक्तः)। **आदितश्च** (७-२-१६) आकारेतो निष्ठाया इण्न स्यात्। **ति च** (७-४-८९) चरफलोरत उत्स्यात् तादौ किति। सोपसर्गे तु प्रफुल्नः प्रक्षीवितः प्रकृशितः प्रोल्लघितः। लोध्रद्रुमं सानुमतः प्रफुल्लमिति तु फुल्ल विकसने इत्यस्मात्पचाद्यचि साधनीयम्, निपातसूत्रं फुल्लादिनिवृत्त्यर्थम्। **उत्फुल्लसंफुल्लयोरुपसंख्यानम्** (वा) सोपसर्गेपि लत्वं निपात्यते। उत्फुल्लः सम्फुल्लः। **नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्** (८-२-५६) एभ्यो निष्ठातस्य नत्वं वा स्यात्। नुद्-नुन्नः नुत्तः। विद विचारणे रौधादिकः विन्नः वित्तः। वेत्तेस्तु विदितः, विद्यतेः विन्नः। त्रै-त्राणः त्रातः। घ्रा-घ्राणः घ्रातः। ह्री-ह्रीणः ह्रीतः। उन्दी-उन्नः उत्तः श्वीदितोनिष्ठायामिति इण्निषेधः। **न ध्याख्यापॄमूर्च्छिमदाम्** (८-२-५७) एभ्यो निष्ठातस्य नत्वं न स्यात्। रदाभ्यां संयोगादेरिति च प्राप्तस्य प्रतिषेधः। ध्यै-ध्यातः-तवान्। ख्या-ख्यातः-तवान्। पॄ-पूर्तः-र्तवान् ऊदोष्ठ्येत्यूर्भावः। मूर्छा-मूर्तः-र्तवान् राल्लोप इति छलोपे रेफान्तत्वात्प्राप्तस्य नत्वस्य निषेधः। मद-मत्तः-त्तवान्। **वित्तो भोगप्रत्यययोः** (८-२-५८) वित्त इति विन्दतेर्निष्ठातस्य नत्वाभावो निपात्यते भोग्ये प्रतीते चार्थे। वित्तं (धनम्-भोग्यम्), वित्तः (प्रसिद्धः)। अन्यत्र तु- विन्नः। **भित्तं शकलम्** (८-२-५९) शकलार्थे भिन्नमिति भिदेर्नत्वाभावो निपात्यते। भित्तम् (शकलम्), भिन्नमन्यत्। **ऋणमाधमर्ण्ये** (८-२-६०) ऋधातोः क्ते नत्वं निपात्यते आधमर्ण्यव्यवहारे। ऋणम्। ऋतमन्यत् (सत्यम्)। **स्फायः स्फी निष्ठायाम्** (६-१-२२) स्फै धातोः स्फीभावः स्यान्निष्ठायाम्। स्फीतः (वृद्धः)। **श्र्युकः किति** (७-२-११) श्रिञ एकाच उगन्ताच्च गित्कितोरिण्न स्यात्। श्रि-श्रितः-तवान्, भू-भूतः-तवान्, नु-नुतः-तवान्, वृ-वृतः-तवान्, कृ-कृतः-तवान्। **यस्य विभाषा** (७-२-१५) यस्य क्वचिद्विभाषया इड् विहितस्ततो निष्ठाया इण्न स्यात्। ओव्रश्चू छेदने इत्यस्मान्निष्ठायां ग्रहिज्येति सम्प्रसारणे ऊदितोवेति वेट्कत्वेनेह इण्निषेधे चस्य कुत्वे ओदितश्चेति तस्य नत्वे तस्यासिद्धत्वेन झल्परत्वात्स्कोः संयोगाद्योरिति शभूतस्य सस्य लोपे णत्वे वृक्णः वृक्णवान्। अत्र नत्वस्यासिद्धत्वेन झल्परत्वाद्व्रश्चेति षत्वप्राप्तौ। **निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः** (वा) इति सिद्धत्वान्न। **इणिनिष्ठायाम्** (७-२-४७) निरः कुषो निष्ठाया इट् स्यात्। यस्यविभाषेति निषेधे प्राप्ते पुनर्विधिः। निष्कुषितः। **वसतिक्षुधोरिट्** (७-२-५२) आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात्। वस्-उषितः-तवान् यजादित्वात्सम्प्रसारणे शासिवसीति षः। क्षुध्-क्षुधितः-तवान्। **अञ्चेः पूजायाम्** (७-२-५३) पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात्। उदितोवेति क्त्वायां विकल्पेन निष्ठायां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्यविभाषेति निषेधे प्राप्ते वचनम्। अञ्चु-अञ्चितः (पूजितः)। गतौ तु अक्तः। **लुभो विमोहने** (७-२-५४) लुभः क्त्वानिष्ठयोर्नित्यमिट् स्याद्विमोहने। लुभितः (विमोहितः) गार्ध्ये तु लुब्धः झषस्तथोरिति धः। **क्लिशः क्त्वानिष्ठयोः** (७-२-५०) अनयोः क्लिश इड् वा स्यात्। क्लिश उपतापे इत्यस्य नित्यं, क्लिशू विबाधने इत्यस्योदित्वेन क्त्वायां निषेधे सिद्धेऽपि निष्ठायां यस्यविभाषेति निषेधे प्राप्ते इड्विकल्पः। क्लिशितः क्लिष्टः व्रश्चेति षत्वे ष्टुत्वम्। **पूङश्च** (७-२-५१) पूङः क्त्वानिष्ठयोरिड् वा स्यात्। **पूङः क्त्वा च** (१-२-२२) पूङः क्त्वानिष्ठा च सेट् किन्न स्यात्। पू-पवितः पूतः-तवान् इटि कित्वाभावेन गुणावादेशौ। **निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः** (१-२-१९) एभ्यः सेण्निष्ठा किन्न स्यात्। शीङ्-शयितः अकित्वेन गुणावादेशौ। **मृषस्तितिक्षायाम्** (१-२-२०) तितिक्षा (क्षमा) थर्न्मृषः सेण्निष्ठा किन्न स्यात्। मर्षितः-तवान्। **उदुपधाद्भावादिकर्मणोः** (१-२-२१) उदुपधात्परा भावादि कर्मणोः सेण्निष्ठा वा किन्न स्यात्। कित्वनिषेधेन गुणविकल्पः। भावे-द्युत्-द्युतितं द्योतितम्। मुद्-मुदितं मोदितं साधुना। आदिकर्मणि-प्रद्युतितः प्रद्योतितः, प्रमुदितः प्रमोदितः। **शब्विकरणेभ्य एवेष्यते** (वा) नेह-गुध्यतेः गुधितम्। **निष्ठायां सेटि** (६-४-५२) णेर्लोपः स्यान्निष्ठायां सेटि। भू-णि-भावितः-तवान्, कृ-णि-कारितः-तवान्। टुओ श्वि-शूनः श्वीदितोनिष्ठायामिति इण्निषेधे वचिस्वपीति सम्प्रसारणे पूर्वरूपे हल इति दीर्घे ओदितश्चेति तस्य नत्वम्। उद्-श्वि-उच्छूनः। दीपी-दीप्तः-तवान् श्वीदित इति इण्निषेधः। गुहू-गूढः-ढवान्, ऊदित्त्वेन वेट्कत्वाद्यस्यविभाषेति इडभावे हस्य ढत्वे तस्य धत्वे ष्टुत्वे ढलोपे पूर्वदीर्घः। तनु-ततः उदित्त्वेन क्त्वायां वेट्कत्वेन निष्ठायामिण्निषेधे अनुदात्तोपदेशेति नकार-लोपः। पत्-पतितः-तवान्। सनि वेट्कत्वाद्यस्यविभाषेति इडभावे प्राप्ते द्वितीयाश्रितेत्यत्र निपातनात् किंवा सेऽसिचीति वेट्कत्वादिण्निषेधे सिद्धे तदर्थं कृन्तत्यादीनामीदित्त्वकरणेन यस्यविभाषेत्यस्या-नित्यत्वज्ञापनात् इट्; तेन सनि वेट्कस्यापि दरिद्रातेरनिषेधात् दरिद्रितः। **क्षुब्धस्वान्तध्वान्त-लग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु** (७-२-१८) क्षुब्धा-दीन्यष्टावनिट्कानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु। द्रवद्रव्यसम्पृक्ताः सक्तवो मन्थः मन्थनदण्डश्च। क्षुभ्-क्षुब्धः मन्थश्चेत् झषस्तथोरिति धत्वम्, अन्यत्र क्षुभितः। स्वन-स्वान्तं मनश्चेत् अनुनासिकस्यक्विझलोरिति दीर्घः। अन्यत्र स्वनितम्। ध्वन-ध्वान्तं तमश्चेत्, अन्यत्र-ध्वनितम्। लग-लग्नं (सक्तम्) निष्ठानत्वं निपातनात्, अन्यत्र लगितम्। म्लेच्छ-म्लिष्टम् (अविस्पष्टम्) व्रश्चेति छस्य षत्वे तस्य ष्टुत्वम्, उपधाया इत्वमपि निपातनात्, अन्यत्र म्लेच्छितम्। विरेभ्-विरिब्धः (स्वर-विशेषः) निपातनादुपधाया इत्वमपि, अन्यत्र विरेभितः। फण-फाण्टः (अनायाससाध्यः कषायविशेष इति वृत्तिकृत्, नवनीतभावात्प्रागवस्थापन्नं द्रव्यमिति वेदभाष्ये माधवः) निष्ठा तस्य टत्वं निपात-नात्। अन्यत्र फणितम्। बाह्-बाढम् (भृशम्) धत्वढत्वष्टुत्वढलोपाः; अन्यत्र बाहितम्। **धृषिशसी**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैयात्ये (७-२-१९) एतौ निष्ठायामविनय एवानिटौ स्तः। धृष-धृष्टः, विशस्-विशस्तः (अविनीतः), अन्यत्र धर्षितः (बलात्कृतः) विशसितः (हिंसितः)। **दृढः स्थूलबलयोः** (७-२-२०) दृढ इति स्थूले बलवति च वाच्ये निपात्यते। दृह दृहि वृद्धौ-दृढः (स्थूलो बलवान्वा) इडभावस्तस्य ढत्वं हस्य लोपः इदितो नलोपश्च निपात्यते। **प्रभौ परिवृढः** (७-२-२१) प्रभौ वाच्ये परिवृढ इति निपात्यते। परि-वृह-वृहि-परिवृढः (प्रभुः) इडभावो ढत्वं हलोपः इदितो नलोपश्च, अन्यः परिवृहितः परिवृंहितः। **कृच्छ्रगहनयोः कषः** (७-२-२२) कषो निष्ठाया इण्न स्यादनयोरर्थयोः। कष-कष्टं (दुःखं तत्कारणं च)। कष्टो मोहः, कष्टं (दुरवगाहं) शास्त्रम्; कषितमन्यत्। **वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः** (७-२-२७) एते णिचि निष्ठान्ता वा निपात्यन्ते। इडभावो निपातनात्। दम-णि-दान्तः अनुनासिकस्येति दीर्घः। शम-णि-शान्तः। पॄ-णि-पूर्णः उदोष्ठ्येत्युर्भावः रात्परत्वान्नत्वं णत्वम् च। दसु-णि-दस्तः, स्पश-णि-स्पष्टः छद्-णि-छन्नः रदाभ्यामिति नत्वम्, ज्ञप्-णि-ज्ञप्तः। उपधावृद्ध्यभावश्च निपात्यते। पक्षे दमितः शमितः पूरितः दासितः स्पाशितः छादितः ज्ञापितः। **हृषेर्लोमसु** (७-२-२९) हृषेर्निष्ठाया इड् वा स्याल्लोमसु विषये। हृष्-हृषितं हृष्टं लोम। **विस्मितप्रतिघातयोश्च** (वा) हृष्टः हृषितः मैत्रः (विस्मितः प्रतिहतो वा)। **प्यायः पी** (६-१-२८) प्यायः पी वा स्यान्निष्ठायाम्। व्यवस्थितविभाषेयम्। तेन स्वाङ्गे नित्यम्, पीनं मुखम् संयोगादेरिति नत्वम्, अन्यत्र वा प्यानः पीनो वा स्वेदः। **आङ्पूर्वस्याऽन्धूधसोः स्यादेव** (वा) आपीन अन्धुः (कूपः) आपीनम् ऊधः। **द्यतिस्यतिमास्थामित्ति किति** (७-४-४०) एषामिकारोऽन्तादेशः स्यात्तादौ किति। घुमास्थेतीत्वस्य दोदद्घोरिति दद्भावस्य च यथा सम्भवमपवादः। दो अवखण्डने दितः, षोऽन्तकर्मणि- सितः, मा माङ् मेङ्-मितः, स्था-स्थितः। **दधातेर्हिः** (७-४-४२) दधातेर्हिः स्यात्तादौ किति। अभिधा-अभिहितम् (उक्तम्) निधा-निहितम् (स्थापितम्) विधा-विहितम् (कृतम्), सन्धा-संहितम् (योजितम्) उपधा-उपहितम्, परिधा-परिहितम्, अवधा-अवहितः, व्यवधा-व्यवहितः, आधा-आहितः। **ददो‌द्घोः** (७-४-४६) घुसंज्ञकस्य दाइत्यस्य दध् स्यात्तादौ किति। दा-दत्तम् जश्त्वचर्त्वम्। **अच उपसर्गात्तः** (७-४-४७) अजन्तादुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति। प्रदा-प्रदत्तः आकारस्य तादेशे दस्य चर्त्वम्। अव दा-अवत्तः। घुमास्थेतीत्वे गै-गीतम्, पा-पीतम्। जनसनेत्यात्वे जन्-जातम्, सन्-सातम्, खन-खातम्।

वि० **अभेश्चाविदूर्ये** (७-२-२५) अभिपूर्वादर्दतेर्निष्ठाया इण्न स्यादाविदूर्यार्थे। अभि-अर्द-अभ्यर्णम् (नातिदूरमासन्नं वा) रदाभ्यामिति तस्य दस्य च नत्वे णत्वम्। **णेरध्ययने वृत्तम्** (७-२-२६) ण्यन्ताद्वृतेः क्तस्य इडभावो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्क् च स्यादधीयमानेर्थे। वृत्-वृत्तं छन्दः (छात्रेण सम्पादितमधीतमिति यावत्)। अन्यत्र तु वर्तिता रज्जुः। **श्रृतं पाके** (६-१-२७) श्रातिश्रपयत्योः क्ते श्रृभावो निपात्यते क्षीरहविषोः पाके। श्रृतं क्षीरं हविर्वा। स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः। अन्यत्तु श्राणं श्रपितं वा। **ह्लादो निष्ठायाम्** (६-४-९५) ह्लादो निष्ठायां ह्रस्वः स्यात्। प्रह्लाद-प्रह्लन्नः रदाभ्यामिति नत्वम्। **शाच्छोरन्यतरस्याम्** (७-४-४१) अनयोरिकारोन्तादेशो वा स्यात् तादौ किति। शो तनूकरणे-शितः शातः (तीक्ष्णः) छो छेदने-छितः छातः (अमांसो दुर्बलः) व्यवस्थितविभाषया व्रतविषये श्यतेर्नित्यम्-संशितं व्रतम् (सम्यक्सम्पादितम्)। **अदो जग्धिर्ल्यप्ति किति** (२-४-३६) अदो जग्धादेशः स्याल्ल्यपि तादौ किति च। अद्-जग्धम् झयस्तथोरिति निष्ठातस्य धत्वे झरोझरीति पूर्वधस्य वा लोपः। **निनदीभ्यां स्नातेः कौशले** (८-३-८९) आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये। निस्ना-निष्णातः (कुशलः) शास्त्रेषु। नद्यां स्नाति-नदीष्णः (नदीस्नातकुशलः) सुपीति योगविभागात्कः।

आदिकर्मणि निष्ठा वक्तव्या (वा) दीर्घकालवर्तिन्याः क्रियाया आरम्भकालविशिष्टोऽश आदिकर्म, आद्येषु क्रियाक्षणेषु भूतेष्वपि क्रियायाः (समस्तायाः) भूतत्वाभावाद् भूते विहिता निष्ठा न प्राप्तेत्यारम्भः। **आदिकर्मणि क्तः कर्तरि च** (३-४-७१) **आदिकर्मणि क्तः कर्तरि स्याच्चाद्भावकर्मणोः।** **विभाषा भावादिकर्मणोः** (७-२-२७) **भावे आदिकर्मणि च आकारेतो निष्ठाया इड् वा स्यात्।** प्रस्विद-प्रस्वेदितश्चैत्रः प्रस्वेदितं तेन, निष्ठाशीङिति कित्वाभावेन गुणः। निष्ठाशीङित्यत्र ञिस्विदेति भ्वादिर्गृह्यते ञीद्भिः साहचर्यात्, स्विद्यतेस्तु स्विदित इत्येव। ञिमिदा ञिक्ष्विदा इति दिवादी भ्वादी च। प्रमेदितः-तवान्। प्रक्ष्वेदितः-तवान्। ञिधृषा-प्रधर्षितः-तवान् धर्षितं तेन। इडभावे कित्वेन गुणो न- प्रस्विन्नः प्रस्विन्नं तेन। **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च** (३-४-२२) एभ्यः कर्तरि क्तः स्यात् भावकर्मणोश्च। कर्तरि-गम्-गतः गङ्गाम् अनुदात्तोपदेशेति मलोपः। प्राप्-गृहं प्राप्तः। म्लै-म्लानः सः, श्लिष- आश्लिष्टो लक्ष्मीं हरिः। अधि-शीङ्-अधिशयितः शेषम्, अधिस्था-अधिष्ठितो वैकुण्ठम्। उप-आस-उपासितः शिवम्। उप-वस्-उपोषित एकादशीम्, यजादित्वात्सम्प्रसारणम्। अनु-जन्-अनुजातो रामम् जनेर्जादेशः। आरुह-आरूढो गरुडम् धत्वढत्वष्टुत्वढलोपदीर्घाः। अनुजॄ-अनुजीर्णो विश्वम्। शीङादीनां सोपसर्गाणां सकर्मकत्वात् कर्तर्यप्राप्तौ वचनम्, केवलानां तु अकर्मकत्वात्प्राप्तिः। पक्षे कर्मणि-गङ्गा प्राप्ता तेन, गतो ग्रामः इत्यादि। भावे-तेन गतं शयितं स्थितमित्यादि। **वर्तमान** इत्यधिकृत्य। **ञीतः क्तः** (३-२-१८७) वर्तमानक्रियावृत्तेर्ञीतः क्तः स्यात्। ञिइन्धी दीप्तौ-इद्धः समिद्धः श्वीदित इति इडभावः धत्वं नलोपः धस्य जश्त्वं च। ञिक्ष्विदा-क्ष्विण्णः आदितश्चेत्यनिट् रदाभ्यामिति नत्वं णत्वं च। **मतिबुद्धिपूजार्थेभ्यश्च** (३-२-१८८) मत्याद्यर्थेभ्यो वर्तमाने क्तः स्यात्। मतिरिहेच्छा, बुद्धेः पृथगुपादानात्। मन्-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्ञां मतः, इष-इष्टः (इष्यमाणः), बुध-बुद्धः, विद-विदितः, पूज-पूजितः, अर्च-अर्चितः। चकारोऽनुक्तसमुच्चयार्थः, तेन शीलितः रक्षितः क्षान्तः आक्रुष्टः जुष्ट इत्यादि। **नपुंसके भावे क्तः** (३-३-११४) क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात्। जल्प-जल्पितम्, शी-शयितम्, हस्-हसितम्, स्था-स्थितम्, गम्-गतम्।

वि० **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः** (३-४-७६) ध्रौव्यं स्थैर्यम्। ध्रौव्याद्यर्थेभ्योऽधिकरणे क्तः स्याच्चाद्यथाप्राप्तम्। मुकुन्दस्यासितमिदमिदं यातं रमापतेः। भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥ आसन-यान-भोजनस्थानमित्यर्थः। पक्षे आसेरकर्मकत्वात्कर्तरि भावे च, आसितो मुकुन्दः, आसितं तेन। गत्यर्थेभ्यः कर्तरि कर्मणि च, रमापतिरिदं यातः, तेनेदं यातम्। भुजेः कर्मणि अनेनेदं भुक्तम्। भुक्ता ब्राह्मणा इति तु भोजनं भुक्तम्, भुक्तमेषामस्तीति मत्वर्थीयेऽच्प्रत्यये उपपाद्यम्।

प्रयोगाः—श्रुतवन्तोपि रजोनिमीलिताक्षाः। जीर्णशीर्णं गृहं नः। वृथोच्छूनैः किमेभिर्भुजैः। उल्लाघो निर्गतो गदात्। ह्रीणह्रीतौ तु लज्जिते। वस्त्रपूतं पिबेज्जलम्। गाढबाढदृढानि च। आपीनभारोद्वहनप्रयत्नात्। सुप्तोत्थितां प्रातरनूदतिष्ठत्। इत्युक्तवन्तं परिरभ्य दोर्भ्याम्। अजीर्णे भोजनं विषम्। तस्या हसितमुद्धतम्। भवनं दृष्टवानहम्। भुक्तवत्स्वहमागतः। बभौ च सा तेन सतां मतेन। गात्र प्रस्वेदितं मम।

ङ्वनिबादि—

सुयजोर्ङ्वनिप् (३-२-१०३) सुनोतेर्यजेश्च ङ्वनिप्स्याद् भूते। शेषे, रन्। सु-सुत्वा पित्वात्तुक्। ङित्वान्न गुणः। यज्-यज्वा (इष्टवान्)। **जीर्यतेरतृन्** (३-२-१०४) जीर्यतेरतृन्स्याद् भूते। जॄ-जरन्तान्तः शब्दः उगित्वान्नुम् जरन्तौन्तः। घासरूपन्यायेन निष्ठापि-जीर्णः जीर्णवान् ऋतइदिति इर्भावः हलिचेति दीर्घः ल्वादित्वान्निष्ठानत्वम्। **छन्दसि लिट्** (३-२-१०५) छन्दसि धातोर्लिट् स्याद्भूते। **लिटः कानज्वा** (३-२-१०६) छन्दसि लिटः कानजादेशो वा स्यात्। **क्वसुश्च** (३-२-१०७) छन्दसि लिटः क्वसुरादेशः स्यात्। इति भूतसामान्ये छन्दसि लिटो विधीयमानौ क्वसुकानजावपि छान्दसावेवेति त्रिमुनिमतम्, कवयस्तु लोकेपि बहुलं प्रयुञ्जते—तं तस्थिवासं नगरोपकण्ठे, श्रेयांसि सर्वाण्यधिजग्मुषस्ते। स्था- तस्थिवान्-वांसौ-सः स्त्रियामुगित्वान्ङीप् तस्थुषी। अधिगम्-अधिजग्मिवान्। लिट् स्थानीयतया द्विर्वचनादि। **भाषायां सदवसश्रुवः** (३-२-१०) सदादिभ्यो भूतसामान्ये भाषायां लिड् वा स्यात्, तस्य च नित्यं क्वसुः। निसद्-निषेदिवान् लिटः क्वसौ द्वित्वे एत्वाभ्यासलोपयोर्वसोः सम्प्रसारणे पूर्वरूपे षत्वम्, सान्तः शब्दः, स्त्रियां-निषेदुषी। अधिवस्-अध्यूषिवान् लिटः क्वसौ यजादित्वाद्वकारस्य सम्प्रसारणपूर्वरूपयोः उस् इत्यस्य द्वित्वे हलादिशेषे सवर्णदीर्घः। एवं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रु-शुश्रुवान्। उपेयिवाननाश्वाननूचानश्च (३-२-१०६) एते निपात्यन्ते। उपपूर्वादिणो भूते भाषायामपि लिटः क्वसौ द्वित्वादौ इडागमे उपेयिवान् (प्राप्तवान्), स्त्रियामुपेयुषी। उपेत्य चिवद्धितं तेन ईयिवान् समीयिवान्। नञ्पूर्वादश्नातेर्लिटः क्वसौ इडभावे अनाश्वान् (अभुक्तवान्), अनुपूर्वाद्वचेः कर्तरि कानचि सम्प्रसारणपूर्वरूपदीर्घेषु अनूचानः (वेदस्यानुवचनं कृतवान्-साङ्गवेदप्रवक्ता)।

वि० **विभाषा गमहनविदविशाम्** (७-२-६८) एभ्यो वसोरिड् वा स्यात्। गम्-जग्मिवान्, जगन्वान् इट्पक्षे इतेयुपधालोपः। हन-जघ्निवान् जघन्वान्। विद-विविदिवान् विविद्वान्। विश-विविशिवान् विविश्वान्। विशिना इर्यादिह विन्देर्ग्रहणम्, वेत्तेस्तु विविद्वान्। नेड्वशीति इण्निषेधः। **दृशेश्च** (वा) ददृशिवान् ददृश्वान्।

शतृशानजादि—

वर्तमाने लट् (३-२-१२३)। **लटः शतृशानचावप्रथमासमानाधिकरणे** (३-२-१२४) लटः शतृशानचावादेशौ स्तः अप्रथमान्तेन सह सामानाधिकरण्ये सति। पचन्तं चैत्रं पश्य। पचेर्लटः शतरि शित्वेन सार्वधातुकत्वाच्छपि पररूपे पचत्-शब्दः स्त्रियामुगित्वेन ङीपि नुमि पचन्तीशब्दः। परस्मैपदे शत्रादेशः आत्मनेपदे शानजादेशः। **आने मुक्** (७-२-८२) अदन्तस्याङ्गस्य मुमागमः स्यादाने परे। पचेर्लटः शानचि मुमि पचमानं चैत्रं पश्य। शानचि शपि पररूपम्। स्त्रियां टापि पचमाना शब्दः। एवं वस्-वसन्तमाह्वय। वृध्-वर्धमानाय देहि। पठ्-पठतश्छात्रस्य। शीङ्-शयानान् बालकान्। कृ-कुर्वन्तं कुर्वाणं पश्य। जी-जयतो राज्ञः। वृत्-वर्तमाने समये। लडित्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्, तेन प्रथमासामानाधिकरण्येपि क्वचिद्भवति। अस्-सन् ब्राह्मणः। शतरि-शपो लुकि श्नसोरल्लोपः। अधिइ-अधीयानाश्छात्राः अदन्ताङ्गाभावान्न मुम्। वसन् ददर्श। लिखन्नास्ते विद्यमानं वस्तु, जुह्वत् मुनिः। क्रीणन् क्रीणानो वा जनः। **माङ्याक्रोश इति वाच्यम्** (वा) मा जीवन् (गर्हितं जीवन्) यः परावज्ञादुःखदग्धोपि जीवति। माङि लुङीति प्राप्ते एतद्वचनसामर्थ्याल्लट्। **संबोधने च** (३-२-१२५) प्रथमासामानाधिकरण्यार्थ आरम्भः। सम्बोधने विषये लटः शतृशानचौ स्तः। हे पचन् हे पचमान, हे शृण्वन्, हे अधीयान, हे गच्छन्, हे पश्यन्। लटीव विकरणकार्याणि आदेशादयश्च। **लक्षणहेत्वोः क्रियायाः** (३-२-१२६) क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्तः। शयाना भुञ्जते यवनाः। भोजनकालीनं शयनं यवनत्वसूचकम्। तिष्ठन्तोनुशासति गणकाः अनुशासनकालिकं स्थानं गणकत्वसूचकम्। हेतुः फलं कारणं च-अर्जयन्वसति अर्जनं वासस्य फलम्। हरिं पश्यन्मुच्यते हरेर्दर्शनं मुक्तेः कारणम्। अधीयानो वसति अध्ययनं वासस्य फलम्। क्रियाया इत्युक्त्या द्रव्यगुणयोर्हेतौ लक्षणे च न। यः कम्पते सोऽश्वत्थः। यदुत्प्लवते तल्लघु। कम्पनमश्वत्थद्रव्यस्य उत्प्लवनं लघुत्वगुणस्य लक्षणं न क्रियायाः। **ईदासः** (७-२-८३) आसः परस्याऽऽत ईत्स्यात्। आस्-आसीनः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शानजाद्याकारस्येकारः। **विदेः शतुर्वसुः** (७-१-३६) वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात्। विद-विद्वान् शतुर्वस्वादेशे विद्वस् शब्दः स्त्रियामुगित्वान्ङीपि विदुषी। **तौ सत्** (३-२-१२७) शतृशानचौ सत्संज्ञौ स्तः। **लृट् शेषे च** (३-३-१३)। **लृटः सद्वा** (३-३-१४) लृटः स्थाने सत्संज्ञौ शतृशानचौ वा स्तः। व्यवस्थितविभाषेयम्। तेन अप्रथमासामानाधिकरण्ये, प्रत्यये उत्तरपदे च परे, संबोधने लक्षण-हेत्वोश्च नित्यम्, करिष्यन्तं करिष्यमाणं पश्य। लृटः परस्मैपदे शतरि स्यतासीति स्ये अतोगुण इति पररूपे स्येट्कृत्वादिटि ऋकारस्य गुणे करिष्यच्छब्दः; आत्मनेपदे शानचि स्ये आनेमुगिति मुकि इटि गुणे षत्वणत्वयोः करिष्यमाणशब्दः। स्त्रियां क्रमान्ङीप्टापोः करिष्यन्ती करिष्यमाणा। एवं दास्यन्तं दास्यमानं पश्य। भविष्यता कार्येण, वर्धिष्यमाणेन जनेन। क्रेष्यते क्रेष्यमाणाय जनाय। भविष्यति काले। प्रत्यये- करिष्यतोऽपत्यं कारिष्यतः, अण्। उत्तरपदे-करिष्यद्भक्तिः। संबोधने हे करिष्यन्-ष्यमाण, लक्षणे-शयिष्यमाणा रुदन्ति बालकाः। हेतौ-अर्जयिष्यन्वसति अध्येष्यमाणो वसति। प्रथमासामानाधि[illegible]ण्येपि क्वचित्-करिष्यमाणः सशरं शरासनम्। अनुयास्यन्मुनितनयाम्। **पूङ्यजोः शानन्** (३-[illegible]८) आभ्यां शानन् स्याद्वर्तमाने। लडिति निवृत्तं, तेन स्वतन्त्रः शानन्प्रत्ययो न तु लादेशः। पू-पवमानः शाननः शित्वेन शपि गुणावादेशयोर्मुमागमः। यज्-यजमानः शपि मुम्। **ताच्छील्यवयोवचनशक्तिषु चानश्** (३-२-१२९) ताच्छील्यादिषु द्योत्येषु धातोश्चानश् स्यात्। भुज्-भुञ्जानो भोगम् (भोगशीलः)। भृ-कवचं बिभ्राणः (युवा) जुहोत्यादित्वाच्छ्लौ द्वित्वादि। हन्-शत्रुं निघ्नानः (हन्तुं शक्तः) गमहनेत्युप-धालोपः अतः परत्वाभावान्न मुक्। चानश्शाननोर्लादेशत्वाभावेनानात्मनेपदत्वात्परस्मैपदेष्वपि प्रवृत्तिः।

वि० **इङ्धार्योः शत्रकृच्छ्रिणि** (३-२-१३०) आभ्यां शतृप्रत्ययः स्यादकृच्छ्रिणि कर्तरि वाच्ये। नायं लादेशः किन्तु स्वतन्त्रः प्रत्ययः। अधि-इ-अधीयन् (सुखेनाध्येता) इयङ्। धारि-धारयन् (सुखेन धारयिता)। **द्विषोऽमित्रे** (३-२-१३१) द्विषः शतृ स्यादमित्रे कर्तरि वाच्ये। द्विष-द्विषन् (शत्रुः)। **सुञो यज्ञसंयोगे** (३-२-१३२) यज्ञसम्बन्धिन्यभिषवे वर्तमानात्सुनोतेः शतृ स्यात्। सर्वे सुन्वन्तः (सर्वे यजमानभूताः सत्रिणः)। **अर्हः प्रशंसायाम्** (३-२-१३३) अर्हतेः प्रशंसाबोधने शतृ स्यात्। अर्हन् (पूज्यः)।

ताच्छीलिकाः—

आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु (३-२-१३४) क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छील-तद्धर्म-तत्साधुकारिषु कर्तृषु बोध्याः। **तृन्** (३-२-१३५) सर्वधातुभ्यस्तृन्स्यात्तच्छीलादिषु कर्तृषु। कृ-कर्ता (करणशीलः), स्वधर्म इति करणे प्रवर्तमानः साधुकर्ता वा। एवं दा-दाता, अधी-अध्येता, यज्-यष्टा। तृन्तृचो रूपसाम्येपि सामान्ये कर्तरि बोध्ये तृच् तच्छीलादिकर्तरि बोध्ये तृन्निति अर्थतो विवेकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृचि कर्मणि षष्ठी- कर्ता कटस्य, तृनि तु- कर्मणि द्वितीया-कर्ता कटम् इति प्रयोगे च विशेषः। **अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्** (३-२-१३६) एभ्यस्तच्छीलादिषु कर्तृषु इष्णुच् स्यात्। अलङ्कृ-अलङ्करिष्णुः (अलङ्करणशील; अलङ्करणधर्मा साध्वलङ्कर्ता वा)। एवं-निराकृ-निराकरिष्णुः प्रजन-प्रजनिष्णुः, उत्पच-उत्पचिष्णुः, उत्पत-उत्पतिष्णुः, उन्मद-उन्मदिष्णुः, रुच-रोचिष्णुः, अपत्रप-अपत्रपिष्णुः, वृत-वर्तिष्णुः, वृध-वर्धिष्णुः, सह-सहिष्णुः, चर-चरिष्णुः, **ग्लाजिस्थश्च ग्स्नुः** (३-२-१३९) एभ्यस्तच्छीलादिषु ग्स्नुः स्यात्। ग्लै-ग्लास्नुः आदेच इत्यात्वम् जि-जिष्णुः क्ङितिचेत्यत्र गकारस्यापि कृतचर्त्वस्य प्रश्लेषेणास्मिन्गिति परेपि न गुणः, स्था-स्थास्नुः कित्वाभावाद् घुमास्थेतीत्वं न। चाद्भुवः-भूस्नुः श्र्युकःकितीत्यत्रापि गकारप्रश्लेषेण गिति परेपि नेट्।

वि० भुवश्चेति भुवश्छन्दस्येवेष्णुज्विधानेपि जगत्प्रभोरप्रभविष्णुं वैष्णवमिति कवेः प्रयोगो निरङ्कुशत्वात्, अप्रसहिष्णु वा पाठः, तेन भुवो ग्स्नुप्रत्यये भूष्णुरित्येव साधुः। **त्रसिगृधिधृषिक्षिपेः क्नुः** (३-२-१४०) एभ्यः क्नुः स्याच्छीलादिषु। त्रस्-त्रस्नुः, गृध्-गृध्नुः, क्षिप-क्षिप्नुः अगृध्नुराददे सोऽर्थान्।

शमित्यष्टाभ्यो घिनुण् (३-२-१४१) शमादिभ्योऽष्टधातुभ्यस्तच्छीलादिषु घिनुणस्यात्। शम-शमी, तम-तमी, दम-दमी, श्रम-श्रमी, भ्रम-भ्रमी, क्षम-क्षमी, नोदात्तोपदेशेति वृद्धिनिषेधः, प्रमद्-प्रमादी, उत्सह-उत्साही। ताच्छीलिकेषु वासरूपविधिर्नास्तीत्यस्य प्रायिकत्वेन उन्मदेः अलङ्कृञित्यादिना इष्णुच् अनेन घिनुणपि। **संपृचा-नुरुधा-ङ्यमा-ङ्यस-परिसृज-संसृज-परिदेवि-संज्वर-परिक्षिप-परिरट-परिवद-परिदह-परिमुह-दुष-द्विष-द्रुह-दुह-युजाक्रीड-विविच-त्यज-रज-भजातिचरा-पचरामुषाभ्याहनश्च** (३-२-१४२) संपृचादिभ्यस्तच्छीलाद्यर्थेषु घिनुण्स्यात्। संपृच्-सम्पर्की चजोरिति कुत्वं लघूपधगुणः। अनुरुध्-अनुरोधी, आयम्-आयामी, आयस्-आयासी, परिसृ-परिसारी, संसृज्-संसर्गी कुत्वं गुणश्च, परिदेवृ-परिदेवी, संज्वर-संज्वारी, परिक्षिप-परिक्षेपी, परिरट्-परिराटी, परिवद्-परिवादी, परिमुह-परिमोही, दुष्-दोषी, द्विष्-द्वेषी, द्रुह-द्रोही, दुह-दोही, युज-योगी कित्वम्, आक्रीड-आक्रीडी, विविच्-विवेकी, त्यज-त्यागी, रज-रागी, भज-भागी चजोः कुत्वम्, अतिचर-अतिचारी, अपचर-अपचारी, आमुष-आमोषी, अभ्याहन्-अभ्याघाती हनस्त इति तः होहन्तेरिति कुत्वम्। एषु णित्वादत उपधावृद्धिः। **वौ कषलसकत्थस्रम्भः** (३-२-१४३) विपूर्वकेभ्य एभ्यो घिनुणस्यात्तच्छीलादिषु। विकष-विकाषी (हिंसाशीलः), विलस्-विलासी, विकत्थ-विकत्थी (आत्मश्लाघाशीलः), विश्रम्भ-विश्रम्भी (विश्वासशीलः)। **प्रे लपसृद्रुमथवदवसः** (३-२-१४५) प्रपूर्वेभ्य एभ्यो घिनुण्स्यात्तच्छीलादिषु। प्रलप-प्रलापी, प्रसृ-प्रसारी, प्रद्रु-प्रद्रावी, प्रमथ्-प्रमाथी, प्रवद्-प्रवादी, प्रवस्-प्रवासी।

वि० १. घिनुणि उकार उच्चारणार्थ इति काशिका, अनुबन्ध इति भाष्यम्, तेन शमिनितरा शमिनीतरेत्यत्र स्त्रियां तल्लृणङीबन्तात्तरबन्ताट्टापि भाष्यमते उगित्त्वादुगितश्चेति ह्रस्वः काशिकामते नेति ह्रस्वविकल्पः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० २. **अपे च लषः** (३-२-१४४) लष कान्तौ, अस्मादपपूर्वाद्विपूर्वाच्च घिनुण्स्यात्तच्छीलादिषु। अपलष्-अपलाषी, विलष्-विलाषी।

निन्द-हिंस-क्लिश-खाद-विनाश-परिक्षिप-परिरट-परिवादि-व्याभाषा-सूयो वुञ् (३-२-१४६) एभ्यस्तच्छीलादिषु वुञ्स्यात्। वोरकः। निन्द-निन्दकः, हिंस-हिंसकः, क्लिश उपतापे, क्लिशू विबाधने इति द्वयोरपीह ग्रहः क्लेशकः, खाद-खादकः, विनाशि-विनाशकः, परिक्षिप्-परिक्षेपकः, परिरट-परिराटकः, परिवादि-परिवादकः, व्याभाष-व्याभाषकः, असूय-असूयकः। ण्वुला सिद्धे वुञो विधानं ताच्छीलिकेषु वासरूपन्यायेन तृजादयो न भवन्तीति ज्ञापनार्थम्। **देविक्रुशोश्चोपसर्गे** (३-२-१४७) सोपसर्गाभ्यामाभ्यां तच्छीलादिषु वुञ्स्यात्। आदेव-आदेवकः, परिदेव-परिदेवकः, आक्रुश्-आक्रोशकः, परिक्रुश्-परिक्रोशकः। **चलनशब्दार्थादकर्मकाद्युच्** (३-२-१४८) चलनार्थाच्छब्दार्थाच्चाकर्मकाद्युच्स्यात्तच्छीलादिषु। योरनः। चल-चलनः, कपि-कम्पनः, शब्द-शब्दनः, रु-रवणः। **अनुदात्तेतश्च हलादेः** (३-२-१४९) अनुदात्तेतः (आत्मनेपदिनः) हलादेरकर्मकाद्युच्स्यात्तच्छीलादिषु। वृत्-वर्तनः, वृध्-वर्धनः। **जु-चङ्क्रम्य-दन्द्रम्य-सृ-गृधि-ज्वल-शुच-लष-पत-पदः** (३-२-१५०) एभ्यो युच्स्यात्तच्छीलादिषु। जु-जवनः, चङ्क्रम-चङ्क्रमणः, दन्द्रम-दन्द्रमणः, सृ-सरणः, गृध्-गर्धनः, ज्वल-ज्वलनः, शुच्-शोचनः, लु-लवणः, पत्-पतनः, पद-पदनः। **क्रुधमण्डार्थेभ्यश्च** (३-२-१५१) एतदर्थेभ्यो युच्स्यात्तच्छीलादिषु। क्रुध-क्रोधनः, रुष-रोषणः, मण्ड-मण्डनः, भूष-भूषणः।

वि० **सूददीपदीक्षश्च** (३-२-१५३) एभ्यो युच् न स्यात्। सूदिता दीपिता दीक्षिता। अनित्योयं निषेधः तेन मधुसूदनः इत्यादि सिद्ध्यति, किंवा नन्द्यादित्वात् ल्युः, कृत्यल्युटोबहुलमिति कर्तरिल्युड् वा। नमिकम्पीति रेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति—ताच्छीलिकेषु वासरूपविधिर्नास्तीति प्रायिकमिति, तेन कम्रा कमना युवतिः, कम्प्रा कम्पना शाखा इति सिद्ध्यति।

लष-पत-पद-स्था-भू-वृष-हन-कम-गम-शृभ्य उकञ् (३-२-१५४) एभ्य उकञ्स्यात्तच्छीलादिषु। अभिलष-अभिलाषुकः, पत-पातुकः, उपपद-उपपादुकः, स्था-स्थायुकः (ग्रामाधिकृतः) आतो युक्। भू-भावुकः, वृष-वर्षुकः, हन्-घातुकः, हनस्तः कुत्वं च, कम्-कामुकः, गम्-गामुकः, शॄ-शारुकः (हिंस्रः)। **जल्पभिक्षकुट्टलुण्टवृङः षाकन्** (३-२-१५५) एभ्यः षाकन्स्यात् तच्छीलादिषु। जल्प-जल्पाकः, भिक्ष-भिक्षाकः, कुट्ट-कुट्टाकः, लुण्ट-लुण्टाकः, वृ-वराकः। षित्वात्स्त्रियां ङीष् वराकी। **प्रजोरिनिः** (३-२-१५६) प्रपूर्वाज्जवतेरिनिः स्यात्तच्छीलादिषु। प्रजु-प्रजवी। **जि-दृ-क्षि-वि-श्रीण्वमा-व्यथा-भ्यम-परिभू-प्रसूभ्यश्च** (३-२-१५७) एभ्य इनिः स्यात्तच्छीलादिषु। जि-जयी, आदृ-आदरी, क्षि-क्षयी, विश्रि-विश्रयी, अतिइण्-अत्ययी, वम्-वमी, अव्यथ-अव्यथी, आयम्-आयमी, अभ्यम्-अभ्यमी, परिभू-परिभवी, प्रसू-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रसवी। **स्पृहि-गृहि-पति-दयि निद्रा-तन्द्रा श्रद्धाभ्य आलुच्** (३-२-१५८) एभ्य आलुचस्यात्तच्छीलादिषु। स्पृह-स्पृहयालुः, गृह-गृहयालुः, पत-पतयालुः, दय-दयालुः, निद्रा-निद्रालुः, तन्द्रा (तच्छब्द-पूर्वो द्राधातुः) तदो नान्तत्वं च निपात्यते। तन्द्रालुः, श्रद्धा (श्रापूर्वो धाधातुः) श्रद्धालुः। शीङो वाच्यः (वा) शयालुः। **सृघस्यदः क्मरच्** (३-२-१६०) एभ्यः क्मरचस्यात्तच्छीलादिषु। विसृ-विसृमरः, घस्-घस्मरः, अद्-अद्मरः (भक्षणशीलः)। **भञ्जभासमिदो घुरच्** (३-२-१६१) भञ्ज-भङ्गुरः स्वभावात्कर्मकर्तरि प्रत्ययः घित्वाच्चजोरिति कुत्वम्। भास-भासुरः, मिद-मेदुरः पशुः। **विदिभिदिच्छिदेः कुरच्** (३-२-१६२) एभ्यः कुरचस्यात्तच्छीलादिषु। कित्वान्न लघूपधगुणः। विद-विदुरः (पण्डितः), भिद्-भिदुरं काष्ठम्, छिद-छिदुरा रज्जुः। भिदिच्छिद्योः कर्मकर्तरि प्रत्ययः। व्यधेः सम्प्रसारणं कुरच्च वक्तव्यः (वा) विधुरः। **इणनशजिसर्तिभ्यः क्वरप्** (३-२-१६३) एभ्यः क्वरप्स्यात्तच्छीलादिषु। पकारस्तुगर्थः। इण्-इत्वरः, नश्-नश्वरः, जि-जित्वरः, सृ-सृत्वरः विसृत्वरः। स्त्रियां ङीप् इत्वरी जित्वरी। **गत्वरश्च** (३-२-१६४) गमेः क्वरप् अनुनासिकलोपश्च निपात्यते। गत्वरः गत्वरी। **जागरूकः** (३-२-१६५) जागर्तेरूकः स्यात्तच्छीलादिषु। जागरूकः। **यजजपदशां यङः** (३-२-१६६) यङन्तेभ्य एभ्य ऊकः स्यात्तच्छीलादिषु। यायज्य-यायजूकः यस्यहल इति यलोपः, जञ्जप्य-जञ्जपूकः, दन्दश्य-दन्दशूकः अतिशयेन यज्ञादिशील इत्यर्थः। **नमिकम्पिस्म्यजसकमहिंसदीपो रः** (३-२-१६७) एभ्यस्तच्छीलादिषु रः स्यात्। नम्-नम्रः (नमनशीलः) जनः, कम्प-कम्प्रा शाखा, स्मि-स्मेरं मुखम्। जसिर्नञ्पूर्वः क्रियासातत्ये वर्तते अजस्रम् (सन्ततम्) कम-कम्रः (सुन्दरः) हिंस-हिंस्रः (हिंसाशीलः), दीप-दीप्रः। **सनाशंसभिक्ष उः** (३-२-१६८) सन्नन्तेभ्य आशंसभिक्ष धातुभ्यश्च उः स्यात्तच्छीलादिषु। कृ-सन्-चिकीर्षुः, हृ-सन्-जिहीर्षुः, भू-सन्-बुभूषुः, दा-सन्-दित्सुः, दृश्-सन्-दिदृक्षुः, गम-सन्-जिगमिषुः पठ-सन्-पिपठिषुः। आशंस-आशंसुः, भिक्ष-भिक्षुः। **विन्दुरिच्छुः** (३-२-१६९) विन्दुरिच्छुरिति वेत्तेरुर्नुम्, इषेरुच्छत्वं च निपात्यते। विन्दुः (वेदनशीलः) इच्छुः (इच्छाशीलः)। **शृवन्द्योरारुः** (३-२-१७३) आभ्यामारुः स्यात्तच्छीलादिषु। शॄ-शरारुः (हिंस्रः) वदि-वन्दारुः (वन्दनशीलः)। **भियः क्रुक्लुकनौ** (३-२-१७४) भियः क्रुक्लुकनौ स्तस्तच्छीलादिषु। क्रुकन्नपि वाच्यः (वा) भी-भीरुः, भीलुकः भीरुकः (भयशीलः)। **स्थेशभासपिसकसो वरच्** (३-२-१७५) एभ्यो वरचस्यात्तच्छीलादिषु। स्था-स्थावरः (स्थितिशीलः), ईश-ईश्वरः, भास्-भास्वरः, पिश-पेश्वरः (गतिशीलः) विकस्-विकस्वरः। **यश्च यङः** (३-२-१७६) यातेर्यङन्ताद्वरच् स्यात्तच्छीलादिषु। यायाय-यायावरः। (यात्राशीलो भिक्षुः)। यङन्ताद्यायायाद्वरचि अतो लोपे तस्य यलोपं प्रति नपदान्तेति स्थानिवद्भावनिषेधे लोपोव्योर्वलीति यलोपः, वरे लुप्तं न स्थानिवदिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निषेधादल्लोपस्य स्थानिवत्त्वमाश्रित्य आतोलोपइटिचेत्याकारलोपो न। **भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्** (३-२-१७७) भ्राजादिभ्यः क्विप्स्यात्तच्छीलादिषु। सर्वापहारी लोपः। वि-भ्राज-विभ्राट्, भास्-भाः भासौ-सः, धुर्वी-धूः धुरौ-रः क्विपिराल्लोप इति धुर्वेर्वलोपः, वि-द्युत्-विद्युत्, ऊर्ज-ऊर्क् ऊर्जौ-र्जः, पॄ-पूः पुरौ-रः उदोष्ठ्यपूर्वस्येति ऋत उर्भावः। जु-जूः जुवौ-वः उत्तरसूत्राद् दृशिग्रहणस्यानुवृत्त्या जवतेर्दीर्घः। ग्रावशब्दस्य स्तुधातुना सह समासः सूत्रे निपात्यते ततः क्विपि ग्रावस्तुत् पित्वात्तुक् (ऋत्विग्विशेषः)। **अन्येभ्योपि दृश्यते** (३-२-१७८)-अन्येभ्योपि धातुभ्यः क्विप्स्यात्तच्छीलादिषु। छिद्-छित् (छेदनशीलः) भिद्-भित्, युज्-युक्। दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम्, तेन क्वचिद्दीर्घः, क्वचिदसम्प्रसारणम्, क्वचिद् द्वित्वं, क्वचिद्ध्रस्वः। तथाच वार्तिकम्। **क्विब्वचिप्रच्छायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च** (वा) क्विब्वचीत्यादिनोणादिसूत्रेण केषाञ्चित् सिद्धे तच्छीलादौ तृना बाधो माभूदिति वार्तिके ग्रहणम्, वासरूपविधिस्तु ताच्छीलिकेषु नेत्युक्तम्। वच्-वक्तीति-वाक्, प्रच्छ-पृच्छतीति-प्राट्, आयतं स्तौति-आयतस्तूः, कटं प्रवते-कटप्रूः, जु-जूः, श्रि-श्रयति हरिं श्रीः। **द्युतिगमिजुहोतीनां द्वे च** (वा) दृशिग्रहणादभ्याससंज्ञया तत्कार्यं हलादिशेषादि। द्यु-दिद्युत्, गम्-जगत् (गतिशीलम्)। **जुहोतेर्दीर्घश्च** (वा) हु-जुहूः (स्रुग्विशेषः)। दॄ भये अस्य ह्रस्वश्च दीर्यतीति दद्रत्। **ध्यायतेः सम्प्रसारणं च** (वा) ध्यै-धीः। **भुवः संज्ञान्तरयोः** (३-२-१७९) भवतेः संज्ञायामन्तरे (मध्यगे) च गम्यमाने क्विप्स्यात्। मित्रभूर्नाम कश्चित्। प्रतिभूः (धनिकाधमर्णयोर्मध्ये विश्वासार्थं वर्तमानः)।

वि० १. यावद् द्रव्यभाविन्यः संज्ञाः, प्रतिभूशब्दस्तु ऋणे प्रतिदत्ते प्रातिभाव्यनिवृत्तेः सत्यपि पुरुषे न प्रवर्तते अतो न संज्ञेति अन्तरस्य पृथगुपादानम्।

वि० २. आक्वेस्तच्छीलादिष्विति भ्राजभासेति सूत्रपर्यन्तमेव तदर्थोपादानेन ततः परं तच्छीलाद्यर्थनिवृत्त्या कर्तृसामान्यमर्थः। ताच्छीलिकाः प्रत्ययाः प्रायेण सोपसर्गेभ्यो नेति आढ्यसुभगेति सूत्रभाष्ये स्पष्टम्।

डुवादि—

विप्रसंभ्यो डुवसंज्ञायाम् (३-२-१८०) विप्रसंपूर्वाद्भवतेर्डुः स्यादसंज्ञायाम्। विभू-विभुः (व्यापकः) डित्वसामर्थ्यादभस्यापि टेर्लोपः। प्रभू—प्रभुः (स्वामी), संभू-सम्भुः (जनिता)। संज्ञायां तु क्विबेव विभूर्नाम कश्चित्। **मितद्र्वादिभ्य उपसंख्यानम्** (वा) मितं द्रवति-मितद्रुः। शतं द्रवति-शतद्रुः (नदीविशेषः), शं भवति-(अन्तर्भावितण्यर्थतया भावयति) शम्भुः (शिवः)। **धः कर्मणि ष्ट्रन्** (३-२-१८१) धेटो धाञश्च कर्मण्यर्थे ष्ट्रन्स्यात्। षित्वात्स्त्रियां ङीप्। धीयते (पीयते भैषज्यार्थं धीयते धार्यते वा) धात्री (स्तनदायिनी आमलकी च)। **दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदश-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नद्दः करणे (३-२-१८२) दाबादिभ्यः ष्ट्रन् स्यात्करणे। दाप्-दान्त्यनेन-दात्रम् (लवनसाधनम्)। नी-नेत्रम् (प्राप्तिसाधनं चक्षुः) शस्-शस्त्रम् (हिंसासाधनम्) पत्-पत्रम् (पतनसाधनं वाहनम्)। शसेः पतेश्च त्रे इटि प्राप्ते। **तितुत्रतथसिसुसरकसेषु च** (७-२-९) एषां दशानां कृत्प्रत्ययाना-मिट् न स्यात्। इति निषेधः। तनेः स्त्रियामिति तिः-तन्तिः सचेस्तनिगमीति तुः-सक्तुः, हसेरौणादि-कस्तः-हस्तः, कुषेरौणादिकः क्थः-कुष्ठम्, कुषेरौणादिकः क्सिः-कुक्षिः, इषेरौणादिकः क्सुः-इक्षुः, अशेः सरन्-अक्षरम्, शलेः कः-शल्कः, वदेः सः-वत्सः, यु ष्ट्रन्-योत्रम् युज-योक्त्रम् (मन्थनरज्जुः), स्तु-स्तोत्रम्, तुद-तोत्रम् (कशा), सिच्-सेक्त्रम्, मिह-मेढ्रम् (शेफः) ढत्वधत्वष्टुत्वढलोपाः, दंश-दंष्ट्रा अजादित्वाट्टाप्, नह-नद्ध्री चर्मरज्जुः नहोधः तस्य धत्वं षित्वान्ङीप्। **हलसूकरयोः पुवः** (३-२-१८३) पूङ्पूञोः करणे ष्ट्रन्स्यात् हलसूकरयोरवयवे करणे वाच्ये। पोत्रम् (हलस्य शूकरस्य वा मुखम्) तितुत्रेति नेट्। **अर्तिलूधूसूखनसहचर इत्रः** (३-२-१८४) एभ्य इत्रः स्यात्करणे। ऋ-अरित्रम् (नौकायाः क्षेनिपातः) गुणः। लू-लवित्रम्; धू-धवित्रम् (तालवृन्तम्), सू-सवित्रम्, खन-खनित्रम् (खननसाधनम्), सह-सहित्रम्, चर-चरित्रम्। **पुवः संज्ञायाम्** (३-२-१८५) पुवः करणे इत्रः स्यात्संज्ञायाम्। पवित्रम् (आज्योत्पवनसाधनमनामिकाधार्यं कौशम्)। **कर्तरि चर्षिदेवतयोः** (३-२-१८६) पुवः इत्रः स्यादृषौ करणे देवतायां कर्तरि च। ऋषिर्वेदमन्त्रः। पूयतेऽनेनेति पवित्रो मन्त्रः, पुनातीति पवित्रम् अग्निः।

प्रयोगाः—सुजीर्णमन्नममृतम्। उपेयुषो मोक्षपथं मनस्विनः। श्रेयांसि सर्वाण्यधिजग्मुषस्ते। योऽनूचानः स नो महान्। इति ब्रुवाणं तमुवाच स व्रती। करिष्यमाणः सशरं शरासनम्। तोत्राहत इव द्विपः। पीनो देवदत्तो दिवा न भुङ्क्ते। शृतशीतं पयः पिबेत्। आपीनभारोद्वहनप्रयत्नात्। बभौ च सा तेन सतां मतेन। जरन्मीमांसकमतम्। स सञ्चरिष्णुर्भुवनेषु सर्वतः। अतिरोषणश्चक्षुष्मानन्ध-न्धएव जनः। विसृत्वरा रवेः किरणाः।

प्रश्नाः—कृदन्तेषु ताच्छीलिकप्रत्ययाः के। क्तप्रत्ययः केष्वर्थेषु। सामान्ये कर्तरि कर्मणि च भूतभवद्भविष्यत्सु ...षु कर्मसु च के प्रत्ययाः। क्त क्तवतु क्वसु शतृ शानच्प्रत्ययान्ताः स्त्रियां कीदृशा भवन्ति। वासरूपन्यायेन किं भवति। ...ष्णुच् इत्र उ तृन् उकञ् एते प्रत्ययाः केष्वर्थेषु केभ्यो भवन्ति। अधस्तनवाक्यगतान्कृदन्तशब्दानुपपादयत—

...मेजेऽभितः पातुकसिद्धसिन्धोरभूतपूर्वा रुचमम्बुराशेः। रोचिष्णुना हैमविभूषणेन। स्रष्टा पाताथ संहर्ता। देवा इन्द्रपुरः ...राः। सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा। अग्रणीर्विदुषामसौ। अवेहि मां कामदुघां प्रसन्नाम्। लोष्टमर्दी तृणच्छेदी ...खवादी न शोभनः। धन्यंमन्यः पावनैर्दृष्टिपातैः। सुत्राम्णो विजयसहकृत्वा दशरथः। पक्वशुष्कानि पर्णानि। गतं ...रस्त्रीनमनूरुसारथे प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः। पवित्रमन्त्रेण समिद्धशक्तिः। प्रकाममप्रीयत यज्वनां प्रियः। मान्यः स मे ...स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः। अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणाः। कालो न यातो वयमेव याताः। ...ति पूर्वकृदन्तप्रकरणम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ उणादिप्रकरणम् ।

उणादयो बहुलम् (३-३-१) उणादयः प्रत्यया धातोर्वर्तमाने कर्तरि संज्ञायां च बहुलं स्युः। बहुलग्रहणाद्यतो विहितास्ततोन्यत्रापि भवन्ति, केचिदविहिता अपि प्रत्ययाः प्रयोगत ऊह्याः । उण्-कृ-कारुः (शिल्पी), स्वद-स्वादुः, साध-साधुः इत्यादि । **भूतेपि दृश्यन्ते** (३-३-२) भूतेपि उणादयः प्रत्ययाः क्वचिद् दृश्यन्ते। पूर्वत्र वर्तमानाधिकाराद्भूतार्थमिदं वचनम्। वृत्तमिति वृत्-मन्-वर्त्म, चरितमिति चर-चर्म, भसितमिति भस्-भस्म। दृशिग्रहणं प्रयोगानुसारार्थम्। **भविष्यति गम्यादयः** (३-३-३) भविष्यति गम्यादयः शब्दाः साधवो भवन्ति । गमिष्यतीति गम् इनि-गमी ग्रामम्, आगम्-आगमी, प्रस्था-प्रस्थायी, आतोयुक्। **दाशगोघ्नौ सम्प्रदाने** (३-४-७३) एतौ सम्प्रदानकारके निपात्यन्ते। दाशन्त्यस्मै इति-दाश-अच्-दाशः (धीवरः), गां हन्त्यस्मै गोघ्नः (अतिथिः)। **भीमादयोऽपादाने** (३-४-७४) भीमादयोऽपादानकारके निपात्यन्ते। बिभेत्यस्मादिति-भी-मक्-भीमः भीष्मः भीस्स्योर्हेतुभय इति वा षुक्। मुह्यत्यस्मादिति-मुह-ख-मूर्खः मुहेः खो मूर्च। स्खलत्यस्मादिति-स्खल-ति-खलतिः (पलितशिराः) सलोपः। **ताभ्यामन्यत्रोणादयः** (३-४-७५) उणादयः सम्प्रदानापादानाभ्यामन्यत्रापि कारके भवन्ति। कर्मणि कृष्यते इति-कृष-इ-कृषिः (क्षेत्रम्) तन्यते इति-तन-तुन्- तन्तुः। उणादयो बहुलमिति बहुलग्रहणस्यैव प्रपञ्चरूपाणि भूतेपीत्यादिपाणिनिसूत्राणि, कृवापेत्यादीनि, शाकटायनसूत्राणि च ।

वि० सूत्रान्तरेभ्योऽनिष्पन्नाः कृदन्तशब्दा उणादयोबहुलमिति समष्ट्या पाणिनिना साध्यन्ते, तेनोणादिप्रत्ययान्तानामपि कृदन्तत्वात्प्रातिपदिकत्वेन स्वादियोगः। तत्र प्रकृतिप्रत्ययादिनियमपरिहाराय बहुलग्रहणम्। बहूनर्थाँल्लाति (आदत्ते) इति बहुलम्। बहवः पुनरर्थाः- क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति। तथाचात्र श्लोकवार्तिकम्—"बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम्। कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु" नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्। यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥" इति। तन्वीभ्यः (अल्पाभ्यः) प्रकृतिभ्य उणादयो दृश्यन्ते न सर्वाभ्यो दृश्यन्ते, प्रायेण ते समुच्चिता न सर्वे, कार्याण्यपि सशेषाणि कृतानि, न सर्वाणि लक्षणेन परिसमाप्तानि, नैगमाः (वैदिकाः) रूढिभवाश्चौणादिकाश्च सुसाधवः, नाम धातुजमिति नैरुक्ता आहुः, व्याकरणे शाकटायनोपि नाम धातुजमित्याह, प्रकृतिप्रत्ययदर्शनेन यन्न व्युत्पादितं तत्र प्रकृतिं दृष्ट्वा प्रत्यय ऊहितव्यः, प्रत्ययं च दृष्ट्वा प्रकृतिरूहितव्या। संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु इति। भाष्यकृता व्याख्यातं च डित्थडवित्थादिशब्देषु धातुरूपाणि प्रत्ययाश्च यथासम्भवमूह्याः गुणनिषेधादिकर्मवशादनूबन्धं विज्ञाय एतदुणादिषु शासितव्यमिति संज्ञास्वित्यादि श्लोकार्थः। तेनाविहितेष्वप्यूह्यम्। यथा दृषेरुलज्विधानेपि शङ्केरुलच्प्रत्ययेन शङ्कुलेति निष्पाद्यम्। पाणिनिना उणादयोबहुलमिति सामान्यतः समष्टिदृष्ट्या विहितस्यैव प्रपञ्चरूपाणि कृवापेत्यादीनि शाकटायनप्रणीतानि पञ्चपादीसूत्राणीति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्वादिशब्दा अपाणिनीया इति न शङ्कनीयम्। सर्वेषां नाम्नां धातुजत्वं कीर्तयता शाकटायनेन कार्वादिशब्दानां प्रकृतिप्रत्ययनिर्देशः प्रपञ्चितः नैतावतापि निरवशेषता भवति, तेषामिवातोऽशिष्टानामपि उणादयो बहुलमिति सङ्ग्रहो ज्ञेयः।

प्रथमपादः—

१ **कृवापाजिमिस्वदिसाध्यशूभ्य उण्।** करोतीति कारुः (शिल्पी) विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः इति मेदिनी। वातीति वायुः आतो युक्। पिबतीति पायुः गुदम्, गुदं त्वपानं पायुर्ना इत्यमरः, स्वदतीति स्वादुः, साध्नोति परकार्यमिति साधुः। अश्नुते इति आशु शीघ्रम्, आशुर्व्रीहिः पाटलः स्यादित्यमरः। ३ **दृसनिजनिचरिचटिभ्यो ञुण्।** दीर्यते इति दारु ञित्वादचो वृद्धिः। सनोति (क्रोशं प्रमाणयति) सानुः (प्रस्थः)। स्नुः प्रस्थः सानुरस्त्रियामित्यमरः। जन-जानुः। अनुबन्धद्वयनिर्देशसामर्थ्याज्जनिवध्योश्चेति वृद्धिनिषेधो न। चर-चारु (रम्यम्), चट-चाटु (प्रियवचनम्)। ४ **किञ्जरयोः श्रिणः।** किं शृणातीति किंशारु (सस्य शूकम्)। जरामेति जरायुः (गर्भाशयः)। गर्भाशयो जरायुः स्यादित्यमरः। ५ **त्रो रश्च लः।** तरन्त्यनेन घर्णा इति तालु (काकुदम्)। ६ **कृके वचः कश्च।** कृकेन (गलेन) वक्तीति कृकवाकुः (कुक्कुटो मयूरो वा) कृकवाकुर्मयूरे च सरटे चरणायुधे इति विश्वः। ७ **भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः।** म्रियन्तेस्मिन्भूतानीति मरुः (निर्जलदेशः) समानौ मरुधन्वानौ इत्यमरः। तरन्त्यनेन नरकं रोपका इति तरुः (वृक्षः)। चरन्ति (भक्षयन्ति) देवता इममिति चरुः (हव्यम्) त्सरति कुटिलं गच्छति इति त्सरुः (खड्गादिमुष्टिः)। तन्यते कर्मपाशोऽनयेति तनुः (शरीरम्)। स्त्रियां मूर्तिस्तनुस्तनू इत्यमरः। तनु (स्वल्पम्) च। धन-धनुः (चापः) उकारान्तोयम्। धनुर्वंशविशुद्धोपि निर्गुणः किं करिष्यति। मि-मयुः (किन्नरः)। मस्ज- मद्गुः (हंसविशेषः) न्यङ्क्वादित्वात्कुत्वं, सस्य जश्त्वेन दश्च। ८ **अणश्च।** अण-अणुः (लेशः)। **चात्कटिवटिभ्याम्।** कटति रसनामिति कटुः। वटति (वदति) इति वटुः (माणवकः)। १० **शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च।** त्रप-त्रपु (सीसम्)। असु-असवः (प्राणाः) बहुवचनान्तः। पुंसि भूम्न्यसवः प्राणा इत्यमरः। वस-वसु (धनम्) वसुर्हदेग्नौ योक्त्रेंशौ वसु तोये धने मणौ। हन-हनुः (वक्त्रैकदेशः)। बन्ध-बन्धुः (बान्धवः)। मन-मनुः (स्वायम्भुवादिः)। चात् विदि अवयवे विन्दुः (विप्रुट्)। ११ **स्यन्देः सम्प्रसारणं धश्च।** सिन्धुः (समुद्रः)। देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् इत्यमरः। १२ **उन्देरिच्चादेः।** उनत्ति (आर्द्रीकरोति) इति इन्दुः (चन्द्रः)। १३ **इषेः किच्च।** उः कित् आदेरित्त्वं च। ईषते (हिनस्ति) इति इषुः (बाणः) इषुर्द्वयोः। १५ **सृजेरसुम्च।** उप्रत्ययः असुमागमश्चात्सलोपश्च। सृज-रज्जुः आगमसकारस्य श्चुत्वेन शः जश्त्वेन जः। रज्जुर्वेण्यां गुणेपि च इति मेदिनी। १६ **कृतेराद्यन्त-**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विपर्ययश्च ककारतकारयोर्विनिमय उश्च। तर्कुः (सूत्रवेष्टनम्)। **१८ फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च**। उप्रत्ययः फलेगुर्क् फल्गु (असारम्)। फल्गवसारेऽभिधेयवत् नदीभेदे मलय्वां-चेति मेदिनी। पाटेः पटिः पाटयतीति पटुः (चतुरः)। मनेर्धोऽन्तादेशः मधु (माक्षिकम्)। मधुश्चैत्रे च दैत्ये च, मद्ये पुष्परसे मधु, जनेस्तकारोन्तादेशः जतु (लाक्षा)। **१९ वलेर्गुक्च**। वल संवरणे वल्गु (सुन्दरम्)। **२० शः कित् सन्वच्च**। श्यतेरुः स च कित् सन्वच्च, तेन द्वित्वमभ्यासेत्वे आतो लोपइटिचेत्यालोपः शिशुः (बालः) प्रागन्नप्राशनाच्छिशुः। **२२ कुर्भूश्च**। भृञः कुर्धातोर्द्वित्वं च। बभ्रुः (पिङ्गलः)। **२३ पृभिदिव्यधिगृधिधृषिभ्यः**। कुः स्यात्। पृ-पुरुः (राजविशेषः) उदोष्ठ्येत्युर्भावः। विरहिणं विध्यतीति विधुः (चन्द्रः) ग्रहिज्येति सम्प्रसारणम्। विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे। **२४ कृग्रोरुच्च**। कुः ऋकारस्योर्भावश्च। करोतीति-कुरुः (देशविशेषो राजविशेषश्च)। गृणाति (उपदिशति) इति गुरुः। **२५ अपदुःसुषु स्थः**। एषूपपदेषु स्थः कुः। सुषामादिषुचेति षत्वम्, अपष्ठु (प्रतिकूलम्)। दुष्ठु (दुःखदम्)। सुष्ठु (अनुकूलम्)। **२६ रपेरिच्चोपधायाः**। अनिष्टं रपति (वक्ति) रिपुः (शत्रुः)। **२७ अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च**। एभ्यः कुः, अर्जिदृश्योः ऋजपशादेशौ, कम्यमोस्तुग्धुगागमौ, पशेर्दीर्घः, बाधेर्हकारोऽन्तादेशश्च। अर्जयति गुणानीति ऋजुः (सरलः)। सर्वानविशेषेण पश्यतीति पशुः। कम्-कन्दुः (कन्दर्पः)। अम्-अन्धुः (कूपः)। पशि नाशने पांशुः (धूलिः)। पांशुर्ना न द्वयो रजः इत्यमरः। तालव्या अपि दन्त्या शम्ब-शूकरपांशवः। बाधते इति बाहुः। स्त्रीपुंसयोर्भुजः। **२८ प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च**। एभ्यः कुः सम्प्रसारणं, भ्रस्जेः सलोपश्च। प्रथ-पृथुः (महान्) म्रद-मृदुः (कोमलः)। भृज्जति तपसा भृगुः (प्रपातः) न्यङ्क्वादित्वात्कुत्वम्। **२९ लङ्घिबंह्योर्नलोपश्च**। लघुः, बहुः। बालमूललघ्वल-मङ्गुलीनां वा लो रत्वमापद्यते (वा) रघुः (राजविशेषः)। **३० ऊर्णोतेर्नुलोपश्च**। ऊरुः (सक्थि)। सक्थि क्लीबे पुमानूरुः इत्यमरः। **३१ महति ह्रस्वश्च**। उरु (महत्)। आङ्परयोः खनिशृभ्यां **डिच्च**। आखनतीति आखुः (मूषकः) कुर्डित्वादिलोपश्च। परं शृणातीति परशुः। पृषोदरादित्वाद-कारलोपे पर्शुः। **३४ हरिमितयोर्द्रुवः**। हरिभिर्द्रूयते इति हरिद्रुः (वृक्षविशेषः), मितं द्रवतीति मितद्रुः (समुद्रः)। **३५ शते च**। शतधा द्रवति शतद्रुः (नदीविशेषः)। बाहुलकात्केवलादपि, द्रवत्यूर्ध्व-मिति द्रुः (वृक्षः शाखा च)। द्युद्रुभ्यां म इति मत्वर्थीय मे द्रुमः (शाखी)। **३६ खरु शङ्कु पीयु-नीलङ्गु लिगु**। पञ्चैते कुप्रत्ययान्ता निपात्यन्ते। खनतेरेफश्चान्तादेशः। खरुः (कामः क्रूरो मूर्खो-श्वश्च)। शकि-शङ्कुः (कीलः), शङ्कुर्ना कीलशल्ययोः। **३७ मृगय्वादयश्च**। एते कुप्रत्ययान्ता निपात्यन्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृगं यातीति-मृगयुः (व्याधः)। पीलुः (वृक्षविशेषः)। पाण्डुः कण्डुः देवयुः (धार्मिकः) मित्रयुः (लोकयात्राभिज्ञः) आकृतिगणोयम्। **३८ मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्।** मदि-मन्दुरा (वाजिशाला)। मथ-मथुरा (नगरीविशेषः)। चत-चतुरः (निपुणः)। अकि-अङ्कुरः (अभिनवोद्भित्)। **४० मुकुरदर्दुरौ।** एतौ निपात्येते। मकि-मुकुरः (दर्पणः) उपधाया उकारश्च। दृ-दर्दुरः (वाद्यविशेषः)। धातोर्द्वित्वमभ्यासस्य रुक् टिलोपश्च। दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। **४१ मद्गुरादयश्च।** एते उरजन्ता निपात्यन्ते। माद्यतेर्गुक् मद्गुरः (मत्स्यविशेषः)। कबृ वर्णे रुगागमः कर्बुरम्। कर्बुरं श्वेतरक्षसोः। बध्नातेः खर्जुरादित्वादूरोपि बन्धुरम् (उन्नतानतम्)। बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु इति रन्तिदेवः। **कोकतेर्वा कुक्च।** (गण) कुक-कुक्कुरः कुकुरः (श्वा)। **४२ असेरुरन्।** अस्यतीति असुरः (दैत्यः) प्रज्ञाद्यणि आसुरः। **४३ मसेश्च।** मसेरूरन्नि-त्यपि वक्ष्यते। मसूरः मसुरः। मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति। मसूरी पादरोगे स्यादुपधाने पुनः पुमान्। **४४ शावशेराप्तौ।** शु इत्याश्वर्थे उपपदे अशेरुरच् प्राप्त्यर्थे। श्वशुरः। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः इत्यमरः। **४५ अविमह्योष्टिषच्।** मह-महिषः (सैरिभः) **४७ रुहेर्वृद्धिश्च।** रौहिषः (मृगविशेषः)। **५० किले बुक्च।** टिषच्प्रत्ययो बुगागमश्च। किल्बिषम् (पापम्)। **५१ इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहि-मुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्।** मद-मदिरा (सुरा)। मदि-मन्दिरम् (गृहम्)। तिम-तिमिरम् (तमोऽक्षिरोगश्च)। मिह-मिहिरः (सूर्यः)। रुच-रुचिरम् (सुन्दरम्)। रुध-रुधिरम् (रक्तम्)। वध-बधिरः। शुष-शुषिरम् (छिद्रम्)। **५३ अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः।** अजे-र्वीभावो न। अजिरम् (अङ्गणम्)। शशेरुपधाया इत्वम् शिशिरम्। (ऋतुविशेषः) शिशिरं स्याद्दतोर्भेदे तुषारे शीतलेऽन्यवत्। श्रथ मोचने उपधाया इत्वं रेफलोपः प्रत्ययरेफस्य लत्वं च शिथिलम् (श्लथम्)। स्थास्फाय्योष्टिलोपः स्थिरम् (निश्चलम्)। स्फिरम् (प्रभूतम्)। तिष्ठतेर्वुक् ह्रस्वत्वं च स्थविरः (वृद्धः)। खद-खदिरः (वृक्षभेदः)। बाहुलकाच्छीङो बुक् ह्रस्वत्वं च शिबिरम् (सेनानिवेशः)। **५४ सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्।** सलति (निम्नं गच्छति) इति सलिलम् (जलम्)। कल-कलिलम् (गहनम्)। अन-अनिलः (वायुः)। मह-महिला (पूज्यनारी) पृषोदरादित्वान्महेलापि। शडि-शण्डिलः (मुनिविशेषः)। तुण्डि-तुण्डिलः (मुखरः)। कुक-कोकिलः (पिकः)। बाहुलकात् कुटिलः (वक्रः)। **५५ कमेः पश्च।** कपिलः (कपिशः)। **५७ मिथिलादयश्च।** मथ्यन्तेऽत्र रिपव इति मिथिला (नगरी भेदः) मन्थेरनुनासिकलोप इत्वं च। पथिलः पथिकः (पान्थः)। **५८ पतिकठिकुठिगडिगुडिदंशिभ्य एरक्।** कठ-कठेरः (कृच्छ्रजीवी)। गड-गडेरः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(मेषः)। ५९ कुम्बेर्नलोपश्च। कुबेरः। ६२ कवेरोतः पश्च। कपोतः (पारावतः)। ६३ भातेर्डवतुः। भातीति भवान् डित्त्वाट्टिलोपः। ६४ कठिचकिभ्यामोरन्। कठोरः। चकोरः (जीवञ्जीवः)। ६५ किशोरादयश्च। किम्पूर्वश्शृणातेरोरन् टिलोपः किमोन्तलोपश्च। किशोरः (अश्वशावः)। कपि ६६ गडिगण्डिकटिपटिभ्य ओलच्। कपीतिनिर्देशान्नलोपः। कपि-कपोलः (गण्डः)। कट-कटोलः (कटुः)। पट-पटोलः (ज्यौत्स्नी)। ६७ मीनातेरूरन्। मयूरः (बर्ही) गुणेऽयादेशः। ६८ स्यन्दे सम्प्रसारणं च। सिन्दूरम् (रक्तचूर्णम्)। ६९ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्। सिनोति (बध्नाति) इति सेतुः (आलिः) तितुत्रेति नेट्। तन-तन्तुः (सूत्रम्)। मस-मस्तु (दधिमण्डम्)। सच्-सक्तुः। अव-ओतुः (बिडालः) ज्वरत्वरेत्यूठ्। धा-धातुः। श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः। इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः इत्यमरः। क्रुश-क्रोष्टा (शृगालः) तृज्वत्क्रोष्टुः। ७१ अर्तेश्च तुः। तुः किच्च। ऋतुः स्त्रीपुष्पकालयोः। ७२ कमिमनिजनिगाभायाहिभ्यश्च। मन-मन्तुः (अपराधः)। जन-जन्तुः (प्राणी)। या-यातुः (रक्षः)। हि-हेतुः (कारणम्)। ७३ चायः किः। धातोः किरादेशः। चाय-केतुः। केतुर्ना रुक्पताकाविग्रहोत्पातेषु लक्ष्मणि इति मेदिनी। ७५ वसेस्तुन् वस्तु (पदार्थः) ७६ अगारे णिच्च। णित्वाद् वृद्धिः वास्तुः (गृहभूः) वेश्मभूर्वास्तुरस्त्रियाम् इत्यमरः। ७७ कृञः कतुः। कृञः कतौ कित्वेन गुणाभावे यणि क्रतुः (यज्ञः)। ७८ जीवेरातुः। जीवातुः (जीवनौषधम्)। जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे। ८० आतृकन्वृद्धिश्च। जीवेरित्येव। जैवातृकः (चन्द्रः) जैवातृकस्त्विन्दुभिषगायुष्मत्सु कृषीवले। ८१ कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः। कृष कर्षूः। कर्षूः पुंसि करीषाग्नौ इति मेदिनी। चम-चमूः (सेना)। तन-तनूः स्त्रियां मूर्तिस्तनुस्तनूः। धन-धनूः (चापः)। खर्ज-खर्जूः (पामा)। ८३ वहोधश्च। वधूः। वधूर्जायास्नुषास्त्रीषु इत्यमरः। ८४ कषेश्छश्च। कच्छूः (पामा)। ८७ नञिलम्बेर्नलोपश्च। अलाबूः (तुम्बी) णित्वेन वृद्धिः। ८८ के श्र एरङ् चास्य। कशब्द उपपदे शृणातेरूः स्यात् धात्वन्तऋकारस्य एरङादेशश्च। कसेरूः (तृणकन्दः)। कसेरूस्तृणकन्दे स्त्री। बाहुलकादुप्रत्यये कसेरुः। ८९ त्रो दुट् च। तरतेरूः तस्य दुट्। तर्दूः (दारुहस्तकः)। ९० दरिद्रातेर्यालोपश्च। इश्च आश्च यौ, तयोर्लोपश्च। दरिद्रा दर्द्रूः (कुष्ठभेदः)। ९३ अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः। एते कूप्रत्ययान्ता निपात्यन्ते। जनेर्बुक् जम्बूः (वृक्षभेदः), बाहुलकाद्ध्रस्वोपि जम्बूः। जम्बूः स्त्री जम्बु जाम्बवम् इत्यमरः। कर्कं दधाति कर्कन्धूः (बदरी) निपातनान्नुम्। दिधिं (स्थैर्यं) स्यति (त्यजति) दिधिषूः (पुनर्भूः) पुनर्भूर्दिधिषूरूढाद्विस्तस्या दिधिषुः पतिः इत्यमरः। ९४ मृग्रोरुतिः। मृ-मरुत् (वायुः)। गृ-गरुत् (पक्षः)। ९७ हृसृरुहि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युषिभ्य इतिः। हृ-हरित् (दिक्) हरित्ककुभि वर्णे च तृणवाजिविशेषयोः इति विश्वः। सृ-सरित् (नदी)। रुह-रोहित् (मृगीभेदः)। युष-योषित् (स्त्री)। ऋष्यस्य रोहित्पुरुषस्य योषित् इति भाष्यम्। ९८ ताडेर्णिलुक्च। ताडयतीति तडित् (विद्युत्)। ९९ शमेर्ढः। बाहुलकात् ढस्येत्संज्ञा एयादेश इट् च न। शण्ढः (क्लीबः)। शण्ढः स्यात्पुंसि गोपतौ, आकृष्टाण्डे वर्षवरे तृतीयाप्रकृतावपि इति मेदिनी। १०० कमेरठः। कमठः (कूर्मः)। कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम् इति मेदिनी। बाहुलकात् जॄ-जरठः (कर्कशः)। १०१ रमेर्वृद्धिश्च। रामठम् (हिङ्गु)। १०२ शमेः खः। शङ्खः। १०३ कणेष्ठः। कण्ठः। १०४ कलस्तृपश्च। तृपतेश्चात्तृफतेः कलप्रत्ययः। तृपला (लता) तृफला। त्रिफलशब्दयोर्द्विगौ तु त्रिफला। १०५ शपेर्वश्च। शबलः (कर्बुरः)। १०६ वृषादिभ्यश्चित्। कलप्रत्ययः स्वरार्थे चित्। वृष-वृषलः (शूद्रः)। पल-पललम् (मांसम्)। सृ-सरलः (वृक्षभेदः अवक्रश्च) बाहुलकाद्गुणः। सरला विरलायन्ते घनायन्ते कलिद्रुमाः, न शमी नच पुन्नाग इह संसारकानने इति सुभाषितम्। तृ-तरलः (चञ्चलः)। कमेर्बुक्च (गण) कम्बलः। मुस-मुसलम्। लङ्गेर्वृद्धिश्च (गण) लाङ्गलम् (हलम्)। कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् च (गण) कुट-कुट्मलः, कुडेरपि कुड्मलः (कोरकः)। कश-कश्मलम् (पापम्)। कु-कोमलम् (मृदु) बाहुलकाद्गुणः। १०७ मृजेष्टिलोपश्च। मलम्। १०८ चुपेरच्चोपधायाः। चपलः (चञ्चलः)। १०९ शकिशम्योर्नित्। शक-शकलम् (खण्डः)। शम-शमलम् (कश्मलम्)। ११० छो गुग्घ्रस्वश्च छो-छा-छगलः (छागः) प्रज्ञादित्वादणि छागलः। १११ अमन्ताड्डः। दम-दण्डः (लगुडः)। रम्-रण्डा (विधवा) खन्-खण्डः (शकल इक्षुविकारश्च)। मन-मण्डः (मस्तु)। वन-वण्डः (छिन्नहस्तः)। अम-अण्डः (प्राण्यवयवः)। षण्-षण्डः (सङ्घातः) बाहुलकात्सत्वाभावः। ताल-व्यादिरित्यपरे। शड-शण्डः। गम-गण्डः (कपोलः)। गण्डः स्यात्पुंसि खड्गिनि। चिन्हवीरकपोलेषु इति मेदिनी। चण-चण्डः (उग्रः) चण्डो ना तिन्तिणीवृक्षे यमकिङ्करदैत्ययोः। चण्डीकात्यायनीदेव्यां हिंस्राकोपनयोषितोः इति मेदिनी। पण-पण्डः (क्लीबः)। पण्डा (बुद्धिः)। ११२ क्वादिभ्यः कित्। कवर्गादिभ्यो डः कित्स्यात्। कित्वान्न गुणः। कुण-कुण्डम्। कुण्डमग्न्यालये मानभेदे देवजलाशये। कुण्डी कमण्डलौ जारापतिवत्नीसुते पुमान्। पिठरे तु न ना इति मेदिनी। अमृते जारजः कुण्डो मृते भर्तरि गोलकः। कमु-काण्डम् अनुनासिकस्यक्विझलोरिति दीर्घः। काण्डोऽस्त्री दण्डवाणार्व वर्गा-वसरवारिषु इत्यमरः। गुड्-गुडः (इक्षुपाकः)। ११३ स्थाचतिमृजेरालज्वालञालीयचः। तिष्ठते रालच्- स्थालम् स्थाली। चतेर्वालञ्-चात्वालः (यज्ञकुण्डम्)। मृजेरालीयच्- मार्जालीयः (बिडालः)। ११४ पतिचण्डिभ्यामालञ्। पत-पातालम्। चडि-चण्डालः प्रज्ञादित्वादणि चाण्डा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोपीत्येके। ११५ तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्। तम-तमालः (वृक्षविशेषः) विश-विशालः (महान्)। बिड-बिडालः। मृण-मृणालम् (विसम्)। कुल-कुलालः (कुम्भकारः)। कपि-कपालम्। कपालोऽस्त्री शिरोऽस्थिन स्याद्घटादेः शकले व्रजे इति विश्वः। पल-पलालम्। पचि-पञ्चालाः (देशविशेषः)। बाहुलकात् श्यतेरपि शाला आदेच इत्यात्वम्। ११६ पतेरङ्गच्पक्षिणि। पतङ्गः (पक्षी)। पक्षिणीत्युपलक्षणम्। पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः इति मेदिनी। ११७ तरत्यादिभ्यश्च। तृ-तरङ्गः (ऊर्मिः)। लू-लवङ्गम् (देवकुसुमम्)। ११८ बिडादिभ्यः कित्। बिड-बिडङ्गः (कृमिघ्नः)। मृद-मृदङ्गः (वाद्यभेदः)। कॄ-कुरङ्गः (मृगः) बाहुलकादुत्वं च। ११९ सृवृञोर्वृद्धिश्च। सृ-सारङ्गः (मृगश्चातकश्च)। १२० गन्गम्यद्योः। गङ्गा अङ्गः (पुरोडाशः)। १२१ छापूखडिभ्यः कित्। छो-छागः (अजः)। पू-पूगः। पूगस्तु क्रमुके वृन्दे इति मेदिनी। खड-खङ्गः। बाहुलकात् षिट अनादरे इत्यस्मात् गन् सत्वाभावश्च षिङ्गः (तरलः)। १२२ भृञः किन्नुट् च। भृञो गन्कित्स्यात्तस्य नुट् च। भृङ्गः भृङ्गाः षिङ्गालिधूम्याटाः। १२३ शृणातेर्ह्रस्वश्च। शृङ्गम् (विषाणं शिखरं च)। १२५ मुदिग्रोर्गग्गौ। मुद्-मुद्गः (धान्यविशेषः) गॄ गर्गः (मुनिभेदः)। १२६ अण्डन्कृसृभृवृञः। कृ-करण्डः (पिटकः)। १२७ शृदृभसोऽदिः। शॄ-शरत्। १२८ दृणातेः षुग्घ्रस्वश्च। दृषत् (शिला)। १२९ त्यजितनियजिभ्यो डित्। एभ्योऽदिर्डित्स्यात्। डित्वाट्टि-लोपः। त्यद् तद् यद् सर्वादयः। १३० एतेस्तुट् च। एतद्। १३३ प्रथः कित्संप्रसारणं च। अजि-प्रत्ययः। पृथक् स्वराद्यव्ययम्। १३५ भियः षुग्घ्रस्वश्च। भिषक् (वैद्यः)। १३६ युष्यसिभ्यां मदिक्। युष-सौत्रधातुः। युष्मद् अस्मद् त्वमहमित्यादिरूपाणि। १३७ अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षनीभ्यो मन्। एभ्यश्चतुर्दशभ्यो मन्। ऋ-अर्मः (चक्षुरोगः)। स्तु-स्तोमः (सङ्घातः)। सु-सोमः (चन्द्रः)। हु-होमः। धृ-धर्मः। क्षि-क्षेमम् (कुशलम्)। क्षु-क्षोमम्; प्रज्ञाद्यणि क्षौमम्। क्षौमं दुकूलेऽस्त्री क्षौमं वल्कलजांशुके, शणजेऽतसिजे इति मेदिनी। भा-भामः। भामः क्रोधे रवौ दीप्तौ। या-यामः (प्रहरः)। वा-वामः। वामः शोभनदुष्टयोः। पद-पद्मम्। यक्ष पूजायाम्-यक्ष्मः (रोगराजः) मनिन्प्रत्यये नान्तः यक्ष्मा। नी-नेमः (अवधिः)। १३८ जहातेः सन्वदालोपश्च। जिह्मः। जिह्मः कुटिलमन्दयोः। १३९ अवतेष्टिलोपश्च। मन्प्रत्ययस्यायं टिलोपो न प्रकृतेः। ज्वरत्वरेत्यूठौ दीर्घे गुणः स्वरादिपाठादव्ययम्। अवतीति ओम्। १४० ग्रसेराच। ग्रामः। १४२ इषियुधीन्धिदसिश्याधूसूभ्यो मक्। इन्ध-इध्मः (समित्)। श्या-श्यामः (कृष्णः)। धू-धूमः। बाहुलकात् ईर-ईर्मम् (व्रणः)। १४३ युजिरुचितिजां कुश्च। मक्प्रत्ययोन्त्यस्य कुत्वं च। युज-युग्मम् (युगम्)। रुच-रुक्मम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(सुवर्णम्)। तिज-तिग्मम् (तीक्ष्णम्)। १४४ हन्तेर्हि च। हिमम्। १४५ भियः षुग्वा। भीमः भीष्मः (भयङ्करो व्यक्तिविशेषो वा)। १४६ घर्मः। घृधातोर्मक् गुणश्च निपात्यते। घर्मः (निदाघः)। १४७ ग्रीष्मः। ग्रसतेर्मक् उपधाया ईत्वं निपात्यते। ग्रीष्मः (ऋतुविशेषः)। १४८ प्रथेः षिवन्सं-प्रसारणं च। षित्वान्ङीप्-पृथिवी। १४९ अशुप्रुषिलटिकणिखटिविशिभ्यः क्वन्। अश-अश्वः। कण-कण्वम् (पापम्) बाहुलकादित्वे किण्वमपि। किण्वं बीजाद्यसीधुषु। खट-खट्वा। शयनं मञ्चपर्यङ्क-पल्यङ्काः खट्वया समाः इत्यमरः। विश-विश्वम् (जगत्)। १५१ सर्वनिघृष्वरिष्वलष्वशिवपटप्रह्वेष्वा-अतन्त्रे। अकर्तरि एते निपात्यन्ते। सृतमनेन विश्वमिति सर्वम्। शेतेस्मिन्सर्वमिति शिवः शीङो ह्रस्वत्वम्। प्रह्वयते इति प्रह्वः। बाहुलकात् ह्रसतेः ह्रस्वः। १५२ शेवयह्वजिह्वाग्रीवाप्वमीवाः। एते निपात्यन्ते। लिहन्त्यनया जिह्वा लस्य जो गुणाभावश्च। गिरन्त्यनया ग्रीवा ईडागमश्च। मीवा (उदरकृमिः)। १५३ कृगशॄदृभ्यो वः। गॄ-गर्वः (अभिमानः)। शॄ-शर्वः (शिवः)। १५४ कनि-न्युवृषितक्षिराजिधन्विद्युप्रतिदिवः। यु-युवा (तरुणः)। वृष-वृषा (इन्द्रः)। तक्ष-तक्षा (वर्धकिः)। राज्-राजा। राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः इत्यमरः। धन्व-धन्वा (मरुभूमिः)। समानौ मरुधन्व-न्वानौ। धन्व (धनुः)। १५५ सप्यशूभ्यां तुट् च। सप्-सप्त। अशू-अष्ट। १५६ नञि जहातेः। अहः (दिनम्)। १५७ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघ-वन्निति। एते त्रयोदशकनिन्प्रत्ययान्ता निपात्यन्ते। श्वयतीति श्वा (कुक्कुरः)। उक्षतीति उक्षा (वृषः) पुष्णातीति पूषा (सूर्यः) प्लीह-प्लीहा (कुक्षि-व्याधिः) इकारस्य दीर्घत्वम्। मुह्यन्त्य-स्मिन्नाहते इति मूर्धा (शिरः)। मुहेरुपधादीर्घो हस्य धो रमागमश्च। मज्जत्यस्थिषु मज्जा (अस्थिसारः)। अर्यपूर्वो माङ्-अर्यमा (सूर्यः)। मातरि (अन्तरिक्षे) श्वयति (वर्धते) इति मातरिश्वा (वायुः)। मह्यते इति मघवा (इन्द्रः) हस्य घो वुगागमश्च।

प्रयोगाः—अशेषवित्पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह। ग्रीष्मे भीष्मेण घर्मेण सन्तप्ते सलिलानले। रुचिररुक्मकृतं शिवमन्दिरम्। इन्दुश्चन्दनबिन्दुवत्। तरलाः सरलद्रुमाः। जरायुषा संवृतस्तु कुक्षौ भ्राम्यति दक्षिणे। श्यामो धूमो ग्राममध्यादुदेति। विशालो बिडालः कुलालस्य गेहे। नदीतरङ्गे पतितः पतङ्गः। तरलाः सरला अपि। तडागे पद्मकुड्मलाः। त्रपुजतुभ्यां छिद्रं पूर्यते। भिषक् यक्ष्मं चिकित्सते।

द्वितीयपादः—

१५८ कृहृभ्यामेणुः। कृ-करेणुः (हस्तिनी)। हृ-हरेणुः (गन्धद्रव्यम्)। १५९ हनिकुषिनीर-मिकाशिभ्यः क्थन्। कुष-कुष्ठम् (रोगविशेषः)। कुष्ठे रोगे सुगन्धे च इति विश्वः। रम्-रथः। काश-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काष्ठम् (दारु) १६० अवे भृञः । अवभृथः (यज्ञसमाप्तिः) । १६१ उषिकुषिगर्तिभ्यः स्थन् । उष-ओष्ठः । कुष-कोष्ठम् (अन्तर्गृहम्) । पुंसि कोष्ठेऽन्तर्जठरं कुसूलोन्तर्गृहं तथा इत्यमरः । कोष्ठं कुक्षि-कुसूलयोः । गै-गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः इति मेदिनी । ऋ-अर्थः (प्रयोजनम्) अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिषु इत्यमरः । बाहुलकात् शु-शोथः (श्वयथुः) १६२ सर्तेर्णित् । सार्थः (समूहः) । १६४ पातॄतुदिवचिरिचिसिचिभ्यस्थक् । तॄ-तीर्थम् । तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भः स्त्रीरजः सु च धिश्रुतम् इति विश्वः । वच्-उक्थम् (सामभेदः) । रिच्-रिक्थम् (धनम्) । रिक्थमृक्थं धनं वसु इत्यमरः । सिच्-सिक्थम् । सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम् इति मेदिनी । १६६ निशीथगोपीथावगथाः । निशी-निशीथः (अर्धरात्रः) । १६९ तिथपृष्ठगूथयूथप्रोथाः । पृषु-पृष्ठम् (देहपश्चाद्भागः) । यू-यूथम् (समूहः) । सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकम् इत्यमरः । प्रु-प्रोथम् । प्रोथमस्त्री-तुरङ्गास्ये । १७० स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक् । द्वात्रिंशतो रक्स्यात् । स्फाय-स्फारम् (भूरि) वलि परे यलोपः । तञ्च-तक्रम् (मथितम्) न्यङ्क्वादित्वात्कुत्वं न लोपः । वञ्च-वक्रम् (कुटिलम्) । शक-शक्रः (इन्द्रः) । क्षिप-क्षिप्रम् (शीघ्रम्) । क्षुद-क्षुद्रः । क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् इति मेदिनी । श्वि-श्वित्रम् (कुष्ठम्) । वृत-वृत्रः (असुरविशेषः) । अजेर्वीभावः । वीरः । नी-नीरम् (जलम्) । मद-मद्रः (देशभेदः) । मुद-मुद्रा (प्रत्ययकारिणी) । छिद-छिद्रम् (रन्ध्रम्) । मन्दि-मन्द्रः (गम्भीरः) । चदि-चन्द्रः (विधुः) । दभ-दभ्रः (अल्पः) । वस-उस्रः (किरणः) कित्वात्सम्प्रसारणम् । ११० न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् । रेफपरस्य सकारस्य सवनादीनां च मूर्धन्यो न स्यात् । पूर्वपदात्-शासिवसीति प्राप्तो निषिध्यते । उस्रः । शुभ-शुभ्रः (श्वेतः) । १७१ चकिरम्योरुच्चोपधायाः । चक-चुक्रम् (अम्लद्रव्यम्) । १७३ अमितम्योर्दीर्घश्च । अम्-आम्रम् (रसालः) । तम-ताम्रम् (धातुविशेषः) । १७४ निन्देर्नलोपश्च । निद्रा । १७५ अदेर्दीर्घश्च । आर्द्रम् (क्लिन्नम्) । १७६ शुचेर्दश्चाशूद्रः । १७७ दुरीणो लोपश्च । दुःखेन ईयते (प्राप्यते) इति दूरम् । १७८ कृतेश्छ क्रू च । कृच्छ्रम् क्रूरः । १७९ रोदेर्णिलुक्च । रोदयतीति रुद्रः (शिवः) । १८२ सुसूधागृधिभ्यः क्रन् । सु-सुरः (देवः) । सू-सूरः (सूर्यः) । धा-धीरः (धैर्यवान्) घुमास्थेतीत्वम् । गृध-गृध्रः । १८३ शुसिचिमीनां दीर्घश्च । शुः सौत्रो धातुः शूरः । सि-सीरम् (हलः) । चि-चीरम् (वस्त्रम्) । १८५ वृधिवपिभ्यां रन् । वृध-वर्ध्री (वरत्रा) । वप-वप्रः (प्राकारः) । वप्रः पितरि केदारे वप्रः प्राकाररोधसोः इति रन्तिदेवः । १८६ ऋज्रेन्द्राग्रवज्र-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विप्रक्षुवचुवक्षुरखुरभद्रगोग्रभेरभेलशुक्रशुक्लगौरवन्नेरामालाः । रन्नन्ता एकोनविंशतिर्निपात्यन्ते । इदि-इन्द्रः । अङ्गेर्नलोपः अग्रम् । अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते स्यात्पुंनपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत् इति मेदिनी । वज-वज्रम् । वज्रोऽस्त्री हीरके पवौ । वप-विप्रः (ब्राह्मणः) उपधाया इत्वम् । क्षुर-क्षुरः रेफलोपः अगुणः । खुर-खुरः रलोपो गुणाभावश्च (शफः) । भदि-भद्रम् (मङ्गलम्) नलोपः । उच-उग्रः चस्य गः । भी-भेरी (दुन्दुभिः) । शुच-शुक्रः चस्य कः । शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोक्षिरुग्भिदोः क्लीबम् इति विश्वः । पक्षे लः शुक्लः (श्वेतः) । गुङ्-गौरः वृद्धिः । गौरोऽरुणे सिते पीते । इण्-इरा (मद्यम्) । इरा मद्ये च वारिणि । गुणाभावः । मा-माला । (स्रक्) । १८९ भियः क्रुकन् । भीरुकः (भीरुः) । १९० क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि । रञ्ज-रजकः (निर्णेजकः) नलोपोऽवादेशः । चर-चरकः (व्यक्ति-विशेषः) । चष-चषकः । चषकोऽस्त्री पानपात्रम् । शुन-शुनकः, भष-भषकः, शुनकोभषकः श्वा स्या-दित्यमरः । १९४ हनो वध च । वधकः (हन्ता) । १९५ बहुलमन्यत्रापि । कुह-कुहकः (विस्मापकः) । कृत-कृतकम् (कृत्रिमम्) । १९६ कृषेर्वृद्धिश्चोदीचाम् । कार्षकः कृषकः (कृषीबलः) १९७ उदकं च । संज्ञात्वात्सिद्धे प्रपञ्चार्थमिदम् । उन्दी-उदकम् (जलम्) । १९८ वृश्चिकृष्योः किकन् । व्रश्च-वृश्चिकः ग्रहिज्येति सम्प्रसारणम् । कृष-कृषिकः । क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः इत्यमरः । १९९ प्राङि पणिकषः । प्रापण्-प्रापणिकः (पण्यविक्रयी) । प्राकष-प्राकषिकः (परदारोपजीवी) । २०० मुषेर्दीर्घश्च । मूषिकः (आखुः) । २०२ क्रिय इकन् । क्रयिकः (क्रेता) । २०३ आङि पणिपनिपतिखनिभ्यः । इकन् आपण्-आपणिकः (विक्रेता) । आखन-आखनिकः (वराहः) । २०४ श्यास्त्याह्वञविभ्य इनच् । श्यै-श्येनः (पक्षिभेदः) । स्त्यै-स्तेनः (चौरः) । हृ-हरिणः (मृगः) । २०५ वृजेः किच्च । वृजिनम् (पापम्) । २०६ अजेरज च । वीभावबाधनार्थम् अजिनम् (चर्म) । अजिनं चर्म कृत्तिः स्त्री इत्यमरः । २०७ बहुलमन्यत्रापि । कठ-कठिनम्, कठिनी (खटिका) । नल-नलिनम् (पद्मम्) । मल-मलिनम् । मलिनं दूषिते कृष्णे इति मेदिनी । कुण्डिनम् (नगरविशेषः) । दो-दिनम् । २०८ द्रुदक्षिभ्यामिनन् । द्रु-द्रविणम् (धनम्) । दक्ष-दक्षिणः दक्षिणा । दक्षिणे सरलोदारौ इत्यमरः । २०९ अर्तेः किदिच्च । ऋ-इरिणम् (उषरम्) इरिणं शून्यमूषणमित्यमरः । २१० वेपितुह्योर्ह्रस्वश्च । वेप-विपिनम् (वनम्) तुह-तुहिनम् (हिमम्) । २११ तलिपुलिभ्यां च । तल-तलिनम् । तलिनं विरले स्तोके स्वच्छेपि तलिनं त्रिषु । पुल-पुलिनम् (सैकतम्) तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् इत्य-मरः । २१२ गर्वेरत उच्च । गौरादित्वान्ङीष् गर्विणी (गर्भिणी) । २१५ क्विन्नचिप्रच्छिश्रिस्तुद्रुप्रु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्वां दीर्घोऽसम्प्रसारणं च। वच्-वाक् (गीः)। प्रच्छ-प्राट् (प्रष्टा)। श्रि-श्रीः (लक्ष्मीः) श्रीर्वेष-रचना शोभाभारतीसरलद्रुमे लक्ष्म्यां त्रिवर्गसम्पत्ति विधोपकरणेषु च विभूतौ च मतौ च स्त्री इति मेदिनी। २१६ आप्नोतेर्ह्रस्वश्च। आपः अपः (जलम्)। २१७ परौ व्रजेः षः पदान्ते। व्रजेः क्विब्दीर्घौ स्तः पदान्ते तु षश्च। परिवाट् परिव्राजौ। २१८ हुवः श्लुवच्च। जुहूः (स्रुवभेदः)। २१९ स्रुवः कः। स्रुवः। ध्रुवोपभृज्जुहूर्नातु स्रुवो भेदा स्रुचः स्त्रियाम् इत्यमरः। २२० चिक्च। इकार उच्चारणार्थं क इत् कुत्वं च। स्रुक्। २२१ तनोतेरनश्च वः। तनोतेश्चिक् अनो वादेशश्च। त्वक् (चर्म)। स्त्रियां तु त्वगसृग्धरा इत्यमरः। २२२ ग्लानुदिभ्यां डौः। ग्लै-ग्लौः (चन्द्रः)। नुद-नौः (तरिः) डित्वाट्टिलोपः। २२४ रातेर्डैः। रै-राः रायौ रायः (धनम्) अर्थरैविभवा अपीत्यमरः। २२५ गमेर्डोः। गौः। गौर्नादित्ये वलीवर्दे किरणक्रतुभेदयोः, स्त्री तु स्यादिशि भारत्यां भूमौ च सुर-भावपि, नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु इति केशवः। बाहुलकाद् द्युतेरपि द्यौः। द्यौः स्त्रीस्वर्गा-न्तरिक्षयोः इति केशवः। २२६ भ्रमेश्च डूः। भ्रूः। ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियामित्यमरः। २२७ दमे-र्डोसिः। दोः दोषौ (बाहुः)। २२८ पणेरिज्यादेश्च वः। इजिप्रत्ययआदेश्च वः। वणिक्। स्वार्थेणि वाणिजः। नैगमो वाणिजो वणिक् इत्यमरः। २३२ सुयुरुवृञो युच्। यु-यवनः। रु-रवणः (कोकिलः) वृ-वरणः (प्राकारः)। प्राकारो वरणशाल इत्यमरः। २३३ अशे रश च। अश्नोतेर्युच् रशादेशश्च। रशना (काञ्ची) जिह्वावाची तु दन्त्यसगर्भः। २३४ उन्देर्नलोपश्च। ओदनः (भक्तम्)। २३५ गमे-र्गश्च। युच् मस्य च गः। गगनम् (आकाशम्)। २३६ बहुलमन्यत्रापि। युच् स्यन्द-स्यन्दनः (रथः)। रुच-रोचना (गोपित्तम्)। २३७ रञ्जेः क्युन्। कित्वान्नलोपः। रजनम्। २३८ भूसूधूभ्र-स्जिभ्यश्छन्दसि। लोकेपि भू-भुवनम् (लोकः)। निधुवनम् (सुरतम्) भृज्जनम् (अम्बरीषम्)। २३९ कॄपॄवृजिमन्दिनीधाञः क्युः। कॄ-किरणः। निधा-निधनम्। निधनं स्यात्कुले नाशे इति मेदिनी। आतोलोप इटि च। २४० धृषेर्धिष् च संज्ञायाम्। धिषणः (बृहस्पतिः)। धिषणा (बुद्धिः)। २४१ वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च। अतिप्रत्ययान्ता एते निपात्यन्ते, शतृवत्वेन उगित्वा-न्नुम्। पृष-पृषत् पृषन्ति (बिन्दुः)। बृह-बृहत् (महत्)। मह-महान्। गमेर्जगादेशः- जगत् (लोकः)। २५० तृन्तचौ शंसि क्षदादिभ्यः संज्ञायां चानिटौ। क्षदिः सौत्रो धातुः क्षत्ता (सारथिः)। क्षत्ता स्यात् सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे, अमरस्तु क्षत्रियायां च शूद्रजे इत्याह। २५१ बहुलमन्य-त्रापि। हन्-हन्ता। मन्-मन्ता। २५२ नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृपितृदुहितृ। तृन्तृजन्ता

.Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एते दश निपात्यन्ते। न पतन्ति पितरो नरकेऽनेनेति नप्ता (पौत्रो दौहित्रश्च)। त्विषेरितोऽत्वम् त्वष्टा (विश्वकर्मा)। नी-नेष्टा, हु-होता, पु-पोता एते ऋत्विग्विशेषाः। भ्राजतेर्जलोपः भ्राता। जायां माति जामाता (दुहितुः पतिः)। मान पूजायाम् नलोपः माता (जननी)। पातेराकारस्येत्वं पिता (जनकः) दुहेस्तृच् इट् गुणाभावश्च दुहिता (पुत्री)। २५३ सुञ्यसेर्ऋन्। स्वसा (भगिनी)। २५४ यतेर्वृद्धिश्च। याता। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् इत्यमरः। २५५ नञि च नन्देः। न नन्दति (कृतायामपि सेवायां न तुष्यति) ननान्दा। इह वृद्धिर्नानुवर्तते इत्येके तेन ननन्दा च। ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सा इति शब्दार्णवः। २५६ दिवेर्ऋः। देवा (देवरः) स्वामिनो देवृदेवरौ इत्यमरः। २५७ नयतेर्डिच्च। ना नरौ नरः। २५९ अर्तिसृधृधम्यम्यश्यवितॄभ्योऽनिः। ऋ-अरणिः। अरणिर्वह्निमन्थे ना द्वयोर्निर्मन्थ्यदारुणि इति मेदिनी। सृ-सरणिः (मार्गः) सरणिः श्रेणिवर्त्मनोः इति रभसः। धृ-धरणिः (पृथ्वी)। धम-धमनिः (शिरा)। अश-अशनिः (वज्रम्)। अव-अवनिः (भूमिः)। तॄ-तरणिः (नौः)। तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम् इति मेदिनी। बाहुलकात् रञ्ज-रजनिः कृदिकारादिति ङीषि धमन्यादयो दीर्घान्ता अपि। २६५ अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः। अर्चिः (ज्वाला)। शुच-शोचिः (दीप्तिः)। हु-हविः (हव्यम्)। सृप-सर्पिः (घृतम्)। छाद-छदिः (पटलम्)। इस्मान्निति ह्रस्वः। छर्द-छर्दिः (वमनव्याधिः) इदन्तोपि। छर्दतीसारशूलवानिति। २६६ बृंहेर्नलोपश्च। बर्हिः कुशम्। २६७ द्युतेरिसिन्नादेश्च जः। द्युत-ज्योतिः। २७२ जनेरुसिः। जनुः (जन्म)। जनुर्जननजन्मानि इत्यमरः। २७४ अर्तिपॄवपियजितनिधनितपिभ्यो नित्। उसि प्रत्ययः नित्यं स्वरार्थम्। ऋ-अरुः (व्रणः) व्रणोऽस्त्रियामीर्ममरुः क्लीबे इत्यमरः। पॄ-परुः (ग्रन्थिः)। वप् वपुः (देहः)। यज्-यजुः (छन्दोविशेषः)। तन-तनुः (शरीरम्)। धन-धनुः (चापः)। २७५ एतेर्णिच्च। इ-आयुः आयुषी णित्वावृद्धौ आय्। २७६ चक्षेः शिच्च। शित्वेन सार्वधातुकत्वात् ख्याञादेशो न। चक्षुः (नेत्रम्)। २७७ मुहेः किच्च। मुहुः (पुनः) अव्ययम्। २७८ कॄगॄशॄवृञ्चतिभ्यः ष्वरच्। शॄ-शर्वरी (रात्रिः)। वॄ-वर्वरः (प्राकृतो जनः)। चत-चत्वरम् (प्राङ्गणम्) प्राङ्गणं चत्वराजिरे इत्यमरः।

प्रयोगाः—तीर्थोदकानि समिधः कुसुमानि दर्भाः। दीर्घमायुरवाप्नुयात्। स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्। आढ्यादिव प्रापणिकात्। पुत्रो रिक्थहरः स्मृतः। कृषक उदकमासिञ्चति। वसानमेणाजिनमञ्जनद्युति। गुणिगणगणनारम्भे न पतति कठिनी सुसंभ्रमाद्यस्य। महदिदं जगतो जठरं परम्। भेरी झाङ्कारिता दिशः। अवनावशनेः पातः। ईहालिहो यातरः। नवारी वर्वरैः क्रान्ता। शूरा वीरा रणाङ्गणे।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयपादः—

२८१ छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः। एकादश वरच्प्रत्ययान्ता निपात्यन्ते। छिद् छदोस्तकारोन्तादेशश्छिदेर्गुणाभावश्च। छिद्-छित्वरः (धूर्तः)। धी-धीवरः (कैवर्तः)। पा-पीवरः (पुष्टः) धापोरात ईत्वम्। चिनोतेर्दीर्घः चीवरम् (भिक्षुप्रावरणम्)। गाहतेर्ह्रस्वः गह्वरम् (गुहा) देवखातबिले गुहा गह्वरमित्यमरः। २८२ इणसिञ्जिदीङुष्यविभ्यो नक्। इण्-इनः (सूर्यः) इनः सूर्ये नृपे पत्यौ। जि-जिनः (अर्हन्)। दीङ्-दीनः (दरिद्रः)। उष-उष्णः (ग्रीष्मः)। उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गक इति मेदिनी। अव-ऊनः (हीनः) ज्वरत्वरेत्यूठ्। २८३ फेनमीनौ। एतौ निपात्येते। स्फाय-फेनः (डिण्डीरः) धातोः फेभावः। मीञ्-मीनः (मत्स्यः)। २८४ कृषेर्वर्णे। कृष्णः। २८६ धापॄवस्यज्यतिभ्यो नः। धा-धाना (भृष्टयवः) धाना भृष्टयवे स्त्रियामित्यमरः। पॄ-पर्णम् (पत्रम्)। पर्णः (पलाशः)। पर्णं पत्रं किंशुके ना इति मेदिनी। अजेर्वी-वेनः (कश्चिद्राजा)। २८७ लक्षेरट् च। लक्षेर्ण्यन्तान्नः स्यात्तस्याडागमश्च। चान्मुडित्येके। लक्षणम् (चिन्हम्) लक्ष्मणः (रामानुजः) लक्षणं नाम्नि चिन्हे च सौमित्रिरपि लक्ष्मणः, लक्षणा हंसयोषायां सारसस्य तु लक्ष्मणा। २९० कॄवॄजॄसिद्रुपन्यनिस्वपिभ्यो नित्। न प्रत्ययः, नित्वं स्वरार्थम्। कॄ-कर्णः। कर्णः पृथाज्येष्ठसुते सुवर्णालौ श्रुतावपि इति विश्वः। वॄ-वर्णः वर्णो द्विजादिशुक्लादियशोगुणकथासु च। स्तुतौ ना न स्त्रियां भेदे रूपाक्षरविलेखने इति मेदिनी। षिञ्-सेना (चमूः)। द्रु-द्रोणः। द्रोणोऽस्त्रियामाढकचतुष्टये, पुमान्कृपीपतौ कृष्णकाके, स्त्रियां काष्ठाम्बुवाहिन्याम्। पन-पन्नः (नीचैर्गतिः) पन्नगः। अन-अन्नम् (ओदनः) स्वप्-स्वप्नः (निद्रा)। २९२ तृषिशुषिरसिभ्यः कित्। कित्वान्न गुणः। तृष-तृष्णा (पिपासा)। २९३ सुञो दीर्घश्च। सूना (वधस्थानम्)। २९४ रमेस्त च। रत्नम् (मणिः)। २९५ रास्नासास्नास्थूणावीणाः। निपात्यन्ते। रस-रास्ना (गन्धद्रव्यम्)। षस-सास्ना (गलकम्बलः)। स्था-स्थूणा (गृहस्तम्भः) उत्वं णत्वं च। वी-वीणा (वल्लकी)। २९७ कृत्यशूभ्यां क्स्नः। कृत-कृत्स्नम् (सम्पूर्णम्)। २९८ तिजेर्दीर्घश्च। तीक्ष्णम् (निशितम्) कुत्वषत्वणत्वानि। २९९ श्लिषेरच्चोपधायाः। श्लक्ष्णम् (मसृणम्)। ३०० यजिमनिशुन्धिदसिजनिभ्यो युच्। मन-मन्युः। मन्युर्दैन्ये क्रतौ क्रुधि। यु वु इत्युकारेत्संज्ञकयोरेव ग्रहणाद्युवोरनाकौ इत्यनादेशो न। दस-दस्युः (चौरः)। ३०१ भुजिमृङ्भ्यां युक्त्युकौ। मृ-मृत्युः (मरणम्)। ३०२ सर्तेरयुः। सृ-सरयुः (नदीविशेषः)। अयूरिति पाठान्तरम् सरयूः। ३०३ पानीविषिभ्यः पः। पाति-रक्षत्यस्मादात्मानमिति पापम् (किल्बिषम्)। तद्योगात्पापः पुरुषः। नी-नीपः (वृक्ष-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषः) बाहुलकान्न गुणः। ३०५ स्तुवो दीर्घश्च। स्तूपः (समुच्छ्रायः)। ३०६ सुशृभ्यां निच्च। चात्कित्। सू-सूपः। सूपो व्यञ्जनसूदयोरिति मेदिनी। शृ-शूर्पम्। प्रस्फोटनं सूर्यमस्त्रीत्यमरः। बाहुलकादुत्वं रपरत्वं दीर्घश्च। ३०७ कुयुभ्यां च। कुवन्ति-शब्दायन्ते मण्डूका अस्मिन्निति कूपः (अन्धुः)। युवन्ति-बध्नन्त्यस्मिन्पशुमिति यूपः (यज्ञस्तम्भः) धातोर्दीर्घः। ३०८ खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः। सप्तैते पप्रत्ययान्ता निपात्यन्ते। शीलनेर्ह्रस्वश्च शिल्पम् (कौशलम्)। शसु-शष्पम् (बालतृणम्)। षत्वं च। बाधतेः षः-बाष्पः। बाष्पो नेत्रजलोष्मणोः वाष्पं च। रौतेर्दीर्घः रूपम्। रूपं स्वभावे सौन्दर्ये इति विश्वः। पृ-पर्पम् (पङ्गु-पीठम्)। तल-तल्पम् चुरादिणिचो लुक्। तल्पं शय्याट्टदारेषु इत्यमरः। ३०९ स्तनिहृषिपुषिगदिमदिभ्योणेरित्नुच्। अयामन्तेति णेरयादेशः। स्तन-स्तनयित्नुः (मेघः)। मद-मदयित्नुः (मद्यम्)। ३१२ दाभाभ्यां नुः। भा-भानुः (सूर्यः)। भानु रश्मिदिवाकरौ इत्यमरः। ३१४ धेट इच्च। धयति तामिति धेनुः। धेनुः स्यान्नवसूतिका इत्यमरः। ३१५ सुवः कित्। सूङ्-सूनुः (पुत्रः)। सूनुः पुत्रेऽनुजे रवौ इति विश्वः। ३१६ जहातेर्द्वे ऽन्तलोपश्च। जन्हुः (राजविशेषः)। ३१७ स्थो णुः। स्थाणुः (शिवः)। स्थाणुः कीले स्थिरे हरे इति विश्वः। ३१८ अजिवृरीभ्यो निच्च। अजेर्वी-वेणुः (वंशः)। वृ-वर्णुः (नदभेदो देशभेदो वा)। री-रेणुः। रेणुर्द्वयोः स्त्रियां धूलिरित्यमरः। ३१९ विशेः किच्च। विष्णुः। ३२० कृदाधारार्चिकलिभ्यः कः। बाहुलकात्कस्येत्वं न। कृ-कर्कः (श्वेताश्वः)। रा-राका (पौर्णमासी)। पूर्णे राका निशाकरे इत्यमरः। अर्च-अर्कः। अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ इति विश्वः। कल-कल्कः। कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि। ३२१ सृवृभूशुषिमुषिभ्यः कक्। वृ-वृकः (श्वापदः काकश्च)। शुष-शुष्कः। मुष-मुष्कः (अण्डकोशः)। ३२२ शुकवल्कोल्काः। शुषेरन्त्यलोपः शुकः (कीरः)। वल-वल्कम्। वल्कं वल्कलमस्त्रियाम्। उषः षस्य लः उल्का। उल्का स्यान्निर्गतज्वाला इत्यमरः। ३२३ इणभीकापाशल्यतिमर्चिभ्यः कन्। इण्-एकः। एके मुख्यान्यकेवलाः इति विश्वः। भी-भेकः। भेको मण्डूकमेषयोरिति मेदिनी। कै-काकः (वायसः)। पा-पाकः (शिशुः)। शल-शल्कम् (शकलम्)। शल्कं तु शकले वल्के इति मेदिनी। ३२५ नौ सदेर्डिच्च। निसद-निष्कः। डित्वाट्टिलोपः सदिरप्रतेरिति षः। निष्कोऽस्त्री हेम्नि तत्पले। ३२७ अजियुधूनीभ्यो दीर्घश्च। यु-यूका। ३२८ शकेरुनोन्तोन्त्युनयः। उन उन्त उन्ति उनि एते चत्वारः प्रत्ययाः। शकुनं (शुभनिमित्तम्) शकुन्तः शकुन्तिः शकुनिः (पक्षी) शकुनस्तु पुमान्पक्षिमात्रप्रश्नविशेषयोः, शुभाशंसिनिमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी। शकुन्ति पक्षिशकुनिशकुन्तशकुनद्विजाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यमरः। ३३० भुवो झिच्। भोन्तः। भवन्तिः (वर्तमानकालः) बाहुलकाद्वेश्च अवन्तिः, वदेः वदन्तिः। कृदिकारादिति ङीषि भवन्ती इत्याद्यपि। किंवदन्ती जनश्रुतिरित्यमरः। ३३३ कृवृदारिभ्य उनन्। कृ-करुणः। करुणो वृक्षभेदः स्यात्करुणा च कृपा मता। वृ-वरुणः। दृ-दारुणम् (भीष्मम्)। ३३४ त्रोरश्च लो वा। तॄ-तरुणः तलुनः (युवा)। ३३५ क्षुधिपिशिमिथिभ्यः कित्। पिश-पिशुनः (दुर्जनः)। मिथ-मिथुनम्। मिथुनं न द्वयो राशिभेदे स्त्रीपुंसयुग्मके इति मेदिनी। ३३६ फलेर्गुक्च। फल्गुनः, प्रज्ञाद्यणि फाल्गुनः (अर्जुनो मासविशेषश्च)। ३३७ अशेर्लशश्च। अश-लशुनम् (रसोनः)। ३३८ अर्जेर्णिलुक्च। अर्जि-अर्जुनः। ३३९ तृणाख्यायां चित्। चित्वमन्तोदात्तार्थम्। अर्जुनम् (तृणम्)। ३४० अर्तेश्च। ऋ-अरुणः। अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ इति मेदिनी। ३४१ अजियमिशीङ्भ्यश्च। यम-यमुना (नदीविशेषः)। ३४२ वृतॄवदिहनिकमिकषिभ्यः सः। वद-वत्सः। पुत्रादौ तर्णके वर्षे वत्सः क्लीबं तु वक्षसि इति त्रिकाण्डशेषः। हन्-हंसः। कम-कंसः। कंसोऽस्त्री पानभाजनम् इत्यमरः। कष-कक्षम् (शुष्कतृणमरण्यं च) षस्य कत्वम्। ३४३ प्लुषेरचोपधायाः। ३४४ मनेर्दीर्घश्च। मांसम् (पललम्)। ३४५ अशेर्देवने। अक्षः (पाशकः) व्रश्चेति षत्वम्। अथाक्षमिन्द्रिये, नाद्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे इत्यमरः। ३४६ स्नुव्रश्चिकृत्यृषिभ्यः कित्। स्नु-स्नुषा। वधूः)। व्रश्च-वृक्षः कित्वाद्ग्रहिज्येति सम्प्रसारणं व्रश्चेति षत्वं स्कोरिति सलोपः चोःकुः। ऋष-ऋक्षम् (नक्षत्रम्)। ऋषेर्जाताविव। ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने, ऋक्षमुक्तं च नक्षत्रे इति विश्वः। ३४९ गृधिपण्योर्दकौ च। दकावादेशौ सः प्रत्ययः। पण्-पक्षः। पक्षो मासार्धके पार्श्वे इति विश्वः। ३५० अशेः सरः। अक्षरम् (वर्णः) व्रश्चेति षः षस्य कः षत्वं च। ३५१ वसेश्च। वत्सरः (वर्षः) सस्यार्धधातुक इति तः। ३५२ संपूर्वाच्चित्। चित्वं स्वरार्थम्। संवत्सरः (वर्षः)। ३५३ कृधूमदिभ्यः कित्। बाहुलकान्न षः। कृ-कृसरः। कृसरः स्यात्तिलौदनमित्यमरः। धू-धूसरः कित्वान्न गुणः। ईषत्पाण्डुस्तु धूसर इत्यमरः। मद-मत्सरः (अन्यशुभद्वेषः)। ३६१ सृयुवचिभ्योन्युजागूजक्नुचः। एभ्यः अन्युच् आगूच् अक्नुच्प्रत्यया यथासंख्यम्। यु-यवागूः। यवागूरुष्णिका श्राणा इत्यमरः। ३६२ आनकः शीङ्भियः। शी-शयानकः (अजगरः)। भी-भयानकः (भीषणः)। ३६३ आणको लूधूशिङ्घिधाञ्भ्यः। शिघि-शिङ्घाणकः (श्लेष्मा), पृषोदरादित्वात्पक्षे ककलोपः शिङ्घाणम् (नासिकामलम्)। ३६४ उल्मुकदर्विहोमिनः। एते निपात्यन्ते। उष दाहे षस्य लो मुकप्रत्ययश्च उल्मुकम् (ज्वलदङ्गारम्)। दृणातेर्विः दर्विः। दर्विः कम्बिः खजाका चेत्यमरः। ३६६ हसि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् । तितुत्रेति नेट् । हस्-हस्तः । हस्तः करे करिकरे सप्रकोष्ठकरेपि च, ऋक्षे केशात्परो व्राते इति मेदिनी । केशहस्तः (केशसमूहः)। मृ-मर्तः (भूलोकः) तत्र भवो मर्त्यः । गृ-गर्तः (अवटः) । इण्-एतः (कर्बुरः) । वा-वातः (वायुः)। अम-अन्तः (नाशः) । दम-दन्तः (रदः)। पू-पोतः । पोतो बालवहित्रयोः इत्यमरः । धुर्व-धूर्तः (शठः) लोपोव्योर्वलीति वलोपः हलिचेति दीर्घः । ३६७ नञ्याप इट् च । न आप्-नापितः (दिवाकीर्तिः)। ३६८ तनिमृङ्भ्यां किच्च । तत्-ततम् (वीणादिवाद्यम्)। मृ-मृतम् (मृत्युः)। ३६९ अञ्जिघृसिभ्यः क्तः । अञ्ज-अक्तम् (परिच्छिन्नम्) नलोपः कुत्वं च । घृ-घृतम् (आज्यम्) । सि-सितम् (बद्धं श्वेतं च)। ३७० दुतनिभ्यां दीर्घश्च । दु-दूतः (सन्देशहरः) । तत्-तातः (पिता) कित्वान्न लोपः । तातोऽनुकम्पे जनके इति विश्वः । ३७१ जेर्मूट् चोदात्तः । जीमूतः (मेघः)। ३७२ लोष्टपलितौ । लुनाते-क्त तस्य सुट् धातोर्गुणः । लोष्टम् । लोष्टानि लेष्टवः पुंसीत्यमरः । पल-पलितम् । पलितं जरसा शौक्ल्यमित्यमरः । बाहुलकात् शीङः क्तः शीता, दन्त्यादिरपि । सीता लाङ्गलपद्धतिः, वैदेही स्वर्गगङ्गा सेति मेदिनी । ३७३ हृश्याभ्यामितन् । हृ-हरितम् हरिता (दूर्वा)। श्यै-श्येतम (शुभ्रम्)। ३७४ रुहेरश्च लो वा । रोहितः (मृगभेदः) रोहितो मृगमत्स्ययोः इत्यमरः । लोहितम् (रक्तम्) । ३७५ पिशेः किच्च । पिशितम् (मांसम्)। ३७८ वृञ एण्यः । वरेण्यः (श्रेष्ठः)। ३८० राजेरन्यः । राजन्यः (वन्हिः)। क्षत्रियवाची तु राजश्वशुरादिति यत्प्रत्यये सिद्धः । ३८२ अर्तेर्निच्च । ऋ-अरण्यम (वनम्)। ३८३ पर्जन्यः । पृषु सेचने षस्य नश्च पर्जन्यः (मेघः) पर्जन्यः शक्रमेघयोः । ३८४ वदेरान्यः । वदान्यः (दानी) वदान्यस्त्यागिवाग्मिनोरित्यजयः । ३८५ अमिनक्षियजिरुधिपतिभ्योऽत्रन् । अम-अमत्रम (पात्रम्)। णक्ष गतौ नक्षत्रम् (तारा) । पत-पतत्रम् (तनुरुहम्)। ३८६ गडेरादेश्च कः । कडत्रम् डलयोरैक्यात् कलत्रम् (भार्या)। कलत्रं श्रोणिभार्ययोरित्यमरः । ३८७ वृञश्चित् । वरत्रा (चर्मरज्जुः)। ३९० भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् । भृ-भरतः (राजविशेषः)। पर्व-पर्वतः (अद्रिः)। ३९१ पृषिरञ्जिभ्यां कित् । पृष-पृषतः (मृगो विन्दुश्च) । रञ्ज-रजतम् (रौप्यम्) नलोपः । ३९२ खलतिः । स्खलतेः सलोपः अतच्प्रत्ययान्तस्येत्वं च । खलतिः (निष्केशशिराः)। ३९३ शीङ्शपिरुगमिवञ्चिजीवप्राणिभ्योऽथः । शप-शपथः (शापः)। बाहुलकात् शमिदमिभ्याम् । शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः इत्यमरः । ३९६ उपसर्गे वसः । आवस्-आवसथः (गृहम्)। संवसथः (ग्रामः)। ३९७ अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच् । अत-अतसी (क्षुमा) गौरादित्वान्ङीष् । चमन्ति-भक्षयन्त्यस्मिन्निति चमसः (सोमपानपात्रम्) ताम्यन्त्यस्मिन्निति तमसः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(अन्धकारः)। रभ-रभसः। रभसो वेगहर्षयोः। पन-पनसः (कण्टकिफलः)। ३९८ वेञ्स्तुट् च। बाहुलकादात्वं न वेतसः। ३९९ वहियुभ्यां णित्। यु-यावसः (तृणसमूहः) णित्वाद्वृद्धिः। ४०० वयश्च। वायसः (काकः)। ४०१ दिवः कित्। दिवसः दिवसम् (दिनम्), वा तु क्लीबे दिवस-वासरौ इत्यमरः। ४०२ कॄशॄशलिकलिगर्दिभ्योऽभच्। कॄ-करभः। करभो मणिबन्धादिकनिष्ठान्तोष्ठ-तत्सुते इति मेदिनी। शॄ-शरभः (अष्टापदपशुविशेषः)। शल-शलभः। समौ पतङ्गशलभावित्यमरः। कल-कलभः। कलभः करिशावक इत्यमरः। गर्द-गर्दभः (रासभः)। ४०३ ऋषिवृषिभ्यां कित्। ऋष-ऋषभः (वृषः)। वृष-वृषभः। ४०५ रासिवल्लिभ्यां च। रास-रासभः (खरः)। वल्ल-वल्लभः (प्रियः)। वल्लभो दयितोऽध्यक्षे सुलक्षणतुरङ्गमे इति मेदिनी। ४०६ जॄविशिभ्यां झच्। झोन्तः विश-वेशन्तः (पल्वलम्)। वेशन्तः पल्वलं चाल्पसर इत्यमरः। ४०८ तॄभूवहिवसिभासिसाधिगडि-मण्डिजिनन्दिभ्यश्च। तॄ-तरन्ती (नौका)। वस-वसन्तः (ऋतुविशेषः)। जि-जयन्तः (इन्द्रपुत्रः)। ४०९ हन्तेर्मुट् हि च। हन्-हेमन्तः। ४१० भन्देर्नलोपश्च। भदन्तः (प्रव्रजितो बौद्धः)। ४११ ऋच्छेररः। ऋच्छरा (सेना)। बाहुलकात् जर्ज-जर्जरम् (जीर्णम्)। झर्झ-झर्झरः (वाद्यविशेषः)। ४१२ अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्। ऋ-अररम् (कपाटम्)। भ्रम-भ्रमरः (भृङ्गः)। चम-चमरः (चामरम्)। देवृ-देवरः (पत्यनुजः)। वसणि-वासरः (दिनम्)। ४१३ कुवः क्ररन्। कुररः (पक्षिविशेषः)। ४१४ अङ्गिमदिमन्दिभ्य आरन्। अगि-अङ्गारः (उल्मुकम्)। मदि-मन्दारः (पारिजातः)। ४१५ गडेः क ड च। कडारः। कडारः कपिलः पिङ्ग इत्यमरः। ४१६ शृङ्गार-भृङ्गारौ। शृभृभ्यामारन्नुग्गुकौ ह्रस्वश्च। शृङ्गारः रसः। भृङ्गारः (कनकालुका)। ४१७ कञ्जि-मृजिभ्यां चित्। मृजेर्वृद्धिः मार्जारः (बिडालः)। ४१८ कमेः किदुच्चोपधायाः। कुमारः कित्वान्न गुणः ४१९ तुषारादयश्च। निपात्यन्ते। तुष-तुषारः (हिमम्)। कासृ-कासारः (सरः) ४२० दीङो नुट् च। दीनारः (सुवर्णमुद्रा)। ४२१ सर्तेरपः षुक्च। सृ-सर्षपः। ४२२ उषिकुटिदलिकचिखजिभ्यः कपन्। कुट-कुटपः (मानभाण्डम्)। ४२३ क्वणेः सम्प्रसारणं च। कुणपः (शवः)। ४२४ विटपविष्टपविशिपोलपाः। विट-विटपः (शाखाविस्तारः)। विशतेरादेः पः तुट् षत्वं च विष्टपम् विष्टपमित्यपि (भुवनम्)। वलतेः सम्प्रसारणं च उलपम् (कोमलतृणम्)। ४२६ वृतेस्तिकन्। वर्तिका (पक्षिविशेषः)। हलोयमामिति तलोपो वा। ४२७ कृतिभिदिलतिभ्यः कित्। कृत-कृत्तिका (नक्षत्रभेदः)। भिद्-भित्तिका (भित्तिः)। ४२८ इष्यशिभ्यां तकन्। इष-इष्टका। अश्-अष्टका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(वित्र्याष्टमी) व्रश्चेति षः। ४३० वीपतिभ्यां तनन्। वी-वेतनम् (भृतिः)। पत्-पत्तनम् (नगरम्)। ४३१ दृदलिभ्यां भः। दृ-दर्भः (कुशः)। ४३२ अर्तिगृभ्यां भन्। ऋ-अर्भः (बालः) संज्ञायां कनि अर्भकः। गृ-गर्भः (भ्रूणः)। ४३३ इणः कित्। इभः (हस्ती)। ४३४ असिसञ्जिभ्यां क्थिन्। अस्-अस्थि (कीकसम्)। सञ्ज-सक्थि (ऊरुः) कित्वान्नलोपः कत्वं च। ४३५ प्लुषिकुषिशुषिभ्यः क्सिः। कुष-कुक्षिः (उदरम्)। ४३६ अशेर्नित्। अक्षि (नेत्रम्)। ४३७ इषेः क्सुः। इक्षुः। ४३८ अवितृस्तृतन्त्रिभ्य ईः। तृ-तरीः (नौः)। तन्त्र-तन्त्रीः (वीणादिगुणः)। ४४० लक्षेर्मुट् च। लक्ष्मीः (श्री)।

प्रयोगाः—उष्णो भानुस्तृष्णां जनयति। श्लक्ष्णं वल्कलमानय। शुष्को दर्भो कर्बुरो भवति। हरितहरिताच्छन्ना भूमिः। अतसीवस्त्रं परिधत्ते। शृङ्गाररसस्य भृङ्गार इवासौ। इभकलभाः शब्दायन्ते। पतत्रिणो नक्षत्रा इव दृश्यन्ते। पर्जन्योऽरण्यमार्द्रयति। संवत्सरस्यादौ वसन्तः। कक्षे वन्हिः प्रदीप्यते। धूसरो रासभोऽसौ। स्नुषा हंसानवेक्षते। वेतसो यमुनातीरे। एको भेको रटत्युच्चैः।

चतुर्थपादः—

४४२ ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुक्रुशिभ्यः कत्निज्यतुजलिजिष्टुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः। ऋतत्यादिभ्यः कत्निज्यतुजादयो द्वादश यथासंख्यं भवन्ति। ऋ-कत्निज्-यण्-रत्निः। बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृताङ्गुलिः इत्यमरः। अञ्ज-अलिच्-अञ्जलिः। वन-इष्टुच्-वनिष्ठुः (स्थविरान्त्रम्)। मद्-स्यन्-मत्स्यः (मीनः)। मत्स्यो मीनेथ पुंभूम्नि देशे इति मेदिनी। अत-इथिन्-अतिथिः (प्राघुणिकः)। अगि-उलि-अङ्गुलिः (करशाखा)। कौतेः असः अच इत्येके कवचम् (घर्म)। कृश-आनुक्-कृशानुः (अग्निः)। ४४३ शः करन्। ककारस्य नेत्वम्। शृ-शर्करा, शर्करा खण्डविकृतौ उपलाशर्करांशयोः, शर्करान्वितदेशे च रुग्भेदे शकलेपि च इति मेदिनी। ४४४ पुषः कित्। पुष्करम्। पुष्करं खेऽम्बुपद्मयोः। तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रकाण्डयोः, कुष्ठौषधिद्वीपतीर्थभेदयोश्च नपुंसकम् इति मेदिनी। ४४५ कलँश्च। पुष्कलम् (पूर्णम्)। ४४६ गमेरिनिः। गमिष्यतीति गमी। ४४७ आङि णित्। आगमिष्यतीति आगामी। ४४८ भुवश्च। भविष्यतीति भावी। ४४९ प्रे स्थः। प्रस्थास्यतीति प्रस्थायी। ४५० परमे कित्। परमेष्ठी (ब्रह्मा) हलदन्तादिति सप्तम्या अलुक्। ४५१ मन्थः। मन्थतेरिनिः कित् कित्वान्नलोपः मन्थाः मन्थानौ-नः (मन्थनदण्डः)। ४५२ पतस्थ च। इनिस्तकारस्य थकारश्च। पन्थाः पन्थानौ-नः (मार्गः)। ४५४ वलाकादयश्च। एते आकप्रत्यये निपात्यन्ते। वल-वलाका। वलाका बकपङ्क्तिः स्याद्बलाका बिसकण्ठिका इति विश्वः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शल-शलाका (अञ्जनयष्टिका)। पत-पताका (वैजयन्ती)। ४५५ पिनाकादयश्च । एते निपात्यन्ते। पातेरित्वं नुम् च पिनाकः (शिवधनुः)। तड-तडाकः (तडागः)। ४५६ कषिदूषिभ्यामीकन्। दूष-दूषिका (नेत्रमलम्)। ४५७ अनहृषिभ्यां किच्च । अन-अनीकम्। अनीकोऽस्त्री रणे सैन्ये इति मेदिनी। हृष-हृषीकम्। हृषीकं विषयीन्द्रियमित्यमरः। ४५८ चङ्कणः कङ्कणश्च । कण शब्दे अस्माद्यङ्लुगन्ताच्चङ्कणधातोरीकन् कङ्कणादेशश्च। कङ्कणिका। घण्टिकायां कङ्कणिका सैव प्रतिसरापि च। ४६० पर्फरीकादयश्च । तिमधातोर्यङ्लुगन्तात्तिन्तिमादीकक् मस्य डः। तिन्तिडीकः (अम्लिकावृक्षः)। चरेर्नुम् च (गण) चञ्चरीकः (भ्रमरः)। कृ-कर्करीका (गलन्तिका)। पुण-पुण्डरीकम्। पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रेऽग्निदिङ्नागे इति मेदिनी। ४६१ इषेः किद्ध्रस्वश्च । इषीका (शलाका)। ४६३ सर्तेर्नुम्च । सृ-सृणीका (लाला)। ४६५ अलीकादयश्च। कीकन्नन्ता निपात्यन्ते। अल-अलीकम् (मिथ्या)। वि अल-व्यलीकम् (अप्रियं खेदश्च)। वल-वलीकम्। वलीकनीध्रे पटलप्रान्ते इत्यमरः। ४६६ कृतॄभ्यामीषन्। कॄ-करीषः। करीषोऽस्त्री शुष्कगोमये। ४६७ शॄपॄभ्यां किच्च । शॄ-शिरीषम् (वृक्षभेदः) ऋृतइद्धातोः। पॄ-पुरीषम् (विष्ठा) उदोष्ठ्यपूर्वस्य। ४६८ अर्जेर्ऋज च । अर्ज-ऋजीषम् (पिष्टपचनम्)। ४६९ अम्बरीषः। निपात्यते। अबि-अम्बरीषः। अम्बरीषः पुमान्भ्राष्ट्रम्। अमरस्तु क्लीबेऽम्बरीषं भ्राष्ट्रो ना। ४७० कॄशॄपॄकटिपटिशौटिभ्य ईरन्। कॄ-करीरः (वंशाङ्कुरः) वंशाङ्कुरे करीरोऽस्त्रीत्यमरः। शॄ-शरीरम् (देहः)। पट-पटीरः (चन्दनः)। शौट्ट-शौटीरः। शौटीरस्त्यागिवीरयोः। ष्यञि शौटीर्य्यम्। ४७१ वशेः कित्। कित्वात्सम्प्रसारणम्। वश-उशीरम् (नलदः)। ४७२ कशेर्मुट् च । कशः सौत्रः-कश्मीरः (देशविशेषः)। ४७४ घसेः किच्च। घस-क्षीरम् (दुग्धम्) गमहनेत्युपधालोपे यस्य चर्त्वे सस्य षत्वम्। ४७५ गभीरगम्भीरौ । गमेर्भः पक्षे नुम् च गभीरः गम्भीरः। निम्नं गभीरं गम्भीरमित्यमरः। ४७८ शीङो धुक्लक्वलञ्वालनः। चत्वारः प्रत्ययाः। धुक्-शीधु (मद्यम्)। लक्-शीलम् (स्वभावः) कित्वाद्गुणो न; वलञ्-शैवलः ञित्वाद् वृद्धिः, वालन् शेवालम्। जलनीली तु शेवालं शैवलोथ कुमुद्वतीत्यमरः। ४८० वलेरूकः। वलूकः (पक्षिभेद उत्पलमूलं च)। ४८१ उलूकादयश्च। वलेः सम्प्रसारणमूकश्च। उलूकः (पेचकः) उलूकाविन्द्रपेचकौ। वदेर्यङ्लुगन्तादूकः वावदूकः। वावदूकोऽतिवक्तरि इत्यमरः। भल्ल-भल्लूकः (ऋक्षः)। शमेर्बुक्च (गण) शम्बूकः (जलशुक्तिः)। ४८२ शलिमण्डिभ्यामूकण्। शल-शालूकम् (कमलकन्दः)। मडि-मण्डूकः (भेकः)। ४८३ नियो मिः। नेमिः (चक्रप्रान्तः)। ४८४ अर्तेरूच । ऋ-ऊर्मिः (तरङ्गः)। ४८५ भुवः कित्। भू-भूमिः (पृथ्वी)। ४८६ अश्नोतेरश्च।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अशू-रश्मिः (किरणो रज्जुश्च)। ४८८ वीज्याज्वरिभ्यो निः। बाहुलकाण्णत्वम्। वी-वेणिः। वेणिः स्यात्केशविन्यास इत्यमरः। ज्या-ज्यानिः (हानिः)। ४८९ सृवृषिभ्यां कित्। सृ-सृणिः (अङ्कुशः)। वृष-वृष्णिः (यादवः)। ४९० अङ्गेर्नलोपश्च। अगि-अग्निः। ४९१ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्। वह-वन्हिः (अग्निः)। श्रि-श्रेणिः (पङ्क्तिः)। श्रु-श्रोणिः (कटिः)। यु-योनिः। द्रु-द्रोणिः (सेचनी)। ग्लै-ग्लानिः। हा-हानिः बाहुलकात् म्लै-म्लानिः। कृदिकारादिति ङीषि श्रेण्यादयो दीर्घान्ता अपि। ४९२ घृणिपृश्निपार्ष्णिचूर्णिभूर्णि। पञ्च निपात्यन्ते। घृ-घृणिः (किरणः)। स्पृशतेः सलोपश्च पृश्निः (अल्पशरीरः)। पृषेर्वृद्धिश्च पार्ष्णिः (पादग्रन्थ्यधरः)। चरेरुपधाया उत्वं च चूर्णिः (कपर्दकशतम्)। ४९३ वृदृभ्यां विन्। दृ-दर्विः कृदिकारादिति ङीषि दर्वी (दारुहस्तः)। ४९६ कृविघृष्विछविस्थविकिकीदिवि। एते निपात्यन्ते। छास्थोर्ह्रस्वत्वं च। छो-छविः (दीप्तिः)। स्था-स्थविः (तन्तुवायः)। किकीपूर्वाद्दीव्यतेः किनि कित्वादगुणे लोपो व्योरिति धातुवकारलोपे ह्रस्व-दीर्घयोर्विनिमये किकीदिविः (चाषः)। ४९७ पातेर्डतिः। डित्वाट्टिलोपः पतिः। पतिर्धवे ना त्रिष्वीशे इति मेदिनी। ४९८ शकेर्ऋतिन्। शकृत् (पुरीषम्)। ५०० वहिवस्यर्तिभ्यश्चित्। अतिः प्रत्ययः। वस्-वसतिः (गृहम्)। ऋ-अरतिः (क्रोधः)। ५०४ सूङः क्रिः। सूरिः (विद्वान्) कित्वान्न गुणः। ५०५ अदिशदिभूशुभिभ्यः क्रिन्। अद्-अद्रिः (पर्वतः)। भू-भूरि (प्रचुरम्)। ५०६ वङ्क्र्यादयश्च। क्रिन्नन्ता निपात्यन्ते। वकि-वङ्क्रिः-गृहदारुः पार्श्वास्थि च। अघि-अङ्घ्रिः (चरणः)। तदिः सौत्रः तन्द्रिः (मोहः)। भी-भेरिः (वाद्यविशेषः) कित्वेपि बाहुलकाद्गुणः। कृदिकारान्ङीषि तन्द्री भेरी। ५०७ राशदिभ्यां त्रिप्। रा-रात्रिः ङीषि रात्री। ५०८ अदेस्त्रिनिश्च। चात्त्रिप्। अत्री-त्रिणौ-णः (भक्षकः), अत्रिः अत्री अत्रयः (मुनिविशेषस्तद्वंश्याश्च)। ५०९ पतेरत्रिन्। पतत्रिः (पक्षी)। ५१० मृकणिभ्यामीचिः। मृ-मरीचिः (किरणः)। ५१२ वेञो डिच्च। डित्वाट्टिलोपः। वीचिः (तरङ्गः)। नञ्समासे अवीचिः (नरकविशेषः)। ५१४ पुरः कुषन्। पुर अग्रगमने-पुरुषः (नरः) अन्येषामपीति दीर्घे पूरुषः। ५१५ पॄनहिकलिभ्य उषच्। पॄ-परुषः (निष्ठुरः)। नह-नहुषः (कश्चिद्राजा)। कल-कलुषम् (पापम्) कलुषं त्वाविलैनसोः इति विश्वः। ५१६ पीयेरूषन्। पीयः सौत्रः-पीयूषम् (अमृतम्)। पीयूषं सप्तदिवसावधि क्षीरे तथाऽमृते इति मेदिनी। बाहुलकाद्गुणे पेयूषः। पेयूषोऽभिनवं पय इत्यमरः। ५१७ मस्जेर्नुम्च। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः स्कोरिति सलोपः। मञ्जूषा (पिटकः)। ५१८ गडेश्च। गण्डूषः (मुखशुद्धिजलम्)। ५२१ शकादिभ्योऽटन्। शक-शकटः (अनः) क्लीबेऽनः शकटोऽस्त्री स्यादित्यमरः। ककिर्गत्यर्थः- कङ्कटः। उरश्छदः कङ्कटक इत्यमरः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रु-करटः (काकः) काकेभगण्डौ करटौ इत्यमरः । ५२२ कृकदिकडिकटिभ्योऽम्बच् । कृ-करम्बम् (मिश्रम्) । कदिकडी सौत्रौ कदम्बः (नीपः) कडम्बः (अग्रम्) । ५२३ कदेर्णित्पक्षिणि । कादम्बः (कलहंसः) णित्वाद्वृद्धिः । ५२४ कलिकर्द्योरमः । कल-कलमः (शालिः) कलमः पुंसि लेखन्यां शालौ पाटच्चरेपि च इति मेदिनी । कर्द-कर्दमः (पङ्कः) । ५२५ कुणिपुल्योः किन्दच् । पुल-पुलिन्दः । किरातशबरपुलिन्दा म्लेच्छजातय इत्यमरः । ५२६ कुपेर्वा वश्च । कुपिन्दः कुविन्दः (तन्तुवायः) । ५२९ सर्तेर्णिच्च । णिन्प्रत्ययः । सारथिः (यन्ता) । ५३० खर्जिपिञ्जादिभ्य ऊरोलचौ । खर्जादिभ्य ऊरः पिञ्जादिभ्य उलच् । खर्ज-खर्जूरः (वृक्षभेदः) । कृप-कर्पूरः (घनसारः) बाहुलकात्कृपोलत्वं न । वल्ल-वल्लूरम् (शुष्कमांसम्) । पिञ्ज-पिञ्जूलम् (कुशवर्तिः) । लङ्गेर्वृद्धिश्च । (गण) लगि-लाङ्गुलम् (पुच्छः) । कुस-कुसूलः (अन्ननिधानम्) । तमेर्बुग्वृद्धिश्च (गण) ताम्बूलम् (नागवल्ली) । शृणातेर्दुग्वृद्धिश्च (गण) शार्दूलः (व्याघ्रः) । दुकोः कुक्च (गण) दु-दुकूलम् (क्षौमम्) । कु-कुकूलम् । (तुषाग्निः) । ५३१ कुवश्चट् दीर्घश्च । कु-कूची (चित्रलेखनी) टित्वान्ङीप् । ५३३ सिवेष्टेरूच । चट् प्रत्ययः टेरूत्वं च । टित्वान्ङीप् । सिव-सूची (सीवनशलाका) । ५३४ शमेर्बन् । शम्ब (मुसलम्) । ५३५ उल्बादयश्च । बन्नन्ता निपात्यन्ते । उच समवाये-चस्य लत्वं गुणाभावश्च उल्व (गर्भाशयः) शुच-शुल्वम् (ताम्रम्) । बिल-बिल्वम् (वृक्षभेदः) । निम-निम्बः (वृक्षभेदः) । बी बिम्बम् । बिम्बस्तु प्रतिबिम्बे स्यान्मण्डले पुंनपुंसकम् इति मेदिनी । ५३६ स्थः स्तोऽम्बजबकौ तिष्ठते अम्बच् अबक एतौ, स्तादेशश्च । स्था-स्तम्बः । स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेपि च इ विश्वः । स्तबकः (पुष्पगुच्छः) । ५३७ शाशपिभ्यां ददनौ । शो-शादः । शादो जम्बालशष्पयोरित्यमरः । शप-शब्दः (ध्वनिः) । ५३८ अब्दादयश्च । अवतीति अब्दः (वत्सरः) । कौतेर्नुम्च (गण कुन्दः (माघ्यपुष्पम्) । ५३९ वलिमलितनिभ्यः कयन् । वल-वलयम् (कङ्कणः) । वलयः कण्ठरोगे ना कङ्कणे पुंनपुंसकम् इति मेदिनी । मल-मलयः (पर्वतभेदः) । तन-तनयः (पुत्रः) । ५४० वृहो पुग्दुकौ च । हृ-हृदयम् (मनः) । ५४१ मिपिभ्यां रुः । मि-मेरुः (सुमेरुः) । ५४२ जत्र्वादयश्च । रुप्रत्ययान्ता निपात्यन्ते । जन-जत्रु तस्य नश्च (स्कन्धसन्धिः) । अशू व्याप्तौ-अश्रु (नेत्रजलम्) ५४३ रुशातिभ्यां क्रुन् । रु-रुरुः (मृगभेदः) । शातयतीति शत्रुः (रिपुः) प्रज्ञादिपाठाद्ध्रस्वत्वम् । ५४४ जनिदाच्युसृवृमदिषमिनमिभृञ्भ्य इत्वन्त्नण्किन्ङ्शक्स्यढडढाटचः । जन्यादिभ्यः क्रमादित्वन्नादयः प्रत्ययाः । सृ-क्विनन्-सृणिः (अङ्कुशः) । मद-स्य-मत्स्यः । अयमन्तोदात्तः ऋतनीत्यादिसाधितस्त्वाद्युदात्तः । षमि ढ-षण्ढः (क्लीबः) । बाहुलकाद्धात्वादेः षः सो न । नम-डट-नटः (शैलूषः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

डित्वाट्टिलोपः । ५४५ अन्येभ्योपि दृश्यन्ते । भृञ्-शक्-भृशम् (अत्यन्तम्) कित्वान्न गुणः । ५४६ कुसेरुम्भोमेदेताः । कुस-उम्भ-कुसुम्भम् (महारजनम्) । उम-कुसुमम् (पुष्पम्)। इद-कुसीदम् (वृद्धिः)। ५४७ सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः । एते निपात्यन्ते। तडेरुलच् नुम्च-तण्डुलः । अङ्केरुशच्-अङ्कुशः (सृणिः)। चषेरालः-चषालः (यूपकटकः)। इलेर्वलच् गुणाभावश्च इल्वलः (दैत्यविशेषः)। पिबतेर्वलच् लमागमो ह्रस्वत्वं च-पल्वलम् (अल्पसरः)। धृषेर्ण्यः ऋत इः-धिष्ण्यम् । धिष्ण्यं स्थाने गृहे भेऽग्नौ इत्यमरः । शलेर्यः-शल्यम् (शङ्कुः)। वा पुंसि शल्यं शङ्कुर्ना इत्यमरः । ५४८ मूशक्यविभ्यः क्लः । मू-मूलम् । मूलं शिफाद्ययोः । मूलं विक्तेन्तिके इति मेदिनी । शक्-शक्लः (प्रियंवदः)। अव्-अम्ब्लः (रसः)। बाहुलकादमेः अम्लः । ५४९ माछाससिभ्यो यः । मा-माया (शाम्बरी)। छो-छाया (अनातपः)। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः इति विश्वः। सस्-सस्यम् (धान्यं तृणं च) वृक्षादीनां फलं सस्यमित्यमरः। बाहुलकात्सुनोतेः सव्यम् गुणेऽवादेशः। सव्यं दक्षिणवामयोः इत्यमरः। ५५० जनेर्यक् । येविभाषेत्यात्वविकल्पः जन्यम् (युद्धम्)। जाया (भार्या)। ५५१ अघ्न्यादयश्च । यगन्ता निपात्यन्ते। हन्तेर्यक् अडागम उपधालोपश्च अघ्न्या, अर्जन्यघ्न्या रोहिणी स्यादित्यमरः। कनी दीप्तौ-कन्या (अनूढा)। वन्ध-वन्ध्या (अप्रजा) बवयोरैक्यम् । ५५२ स्नामदिपद्यर्तिपॄशकिभ्यो वनिप् । ऋ-अर्वा (तुरङ्गः)। पॄ-पर्व (ग्रन्थिः प्रस्तावश्च)। ५५४ ध्याप्योः सम्प्रसारणं च । ध्यै-धीवा (कर्मकरः)। प्यै-पीवा (स्थूलः)। ५५५ अदेर्ध च। अध्वा (मार्गः)। ५५७ सर्वधातुभ्य इन् । पच्-पचिः। वल-वलिः (पूजाद्रव्यम्)। घट-वटिः (गुलिका)। यम-यतिः (विच्छेदः), मल्ल-मल्लिः (मल्लिका)। केल-केलिः (क्रीडा)। मसी-परिणामे-मसिः। कुट-कोटिः बाहुलकाद्गुणः (संख्याविशेषोऽग्रं च)। कोटिः स्त्री धनुषोऽग्रे ऽश्रौ संख्याभेदप्रकर्षयोः इति मेदिनी। बुध-बोधिः (अश्वत्थः)। नदि-नन्दिः (शिवपार्षदः)। कल-कलिः (कलहो युगभेदश्च)। स्त्रीत्वे कृदिकारादिति ङीषि केचन दीर्घान्ता अपि वली (श्रेणी) घटी मल्ली मसी। ५५८ हृपिषिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च । हृ-हरिः। यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु, शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु इत्यमरः। वृत-वर्तिः। वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः, गात्रानुलेपनीदीपदशादीपेषु योषिति इति मेदिनी। विद-वेदिः। वेदिः स्यान्मण्डले पुमान्, स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले इति मेदिनी। कृत-कीर्तिः (यशः), कीर्तिः प्रतापयशसोर्विस्तारे कर्दमेपि च इति विश्वः। ५५९ इगुपधात्कित् । कृष-कृषिः (कर्षणम्)। ऋष-ऋषिः (मन्त्रद्रष्टा)। शुच-शुचिः (पवित्रः)। लिप-लिपिः (वर्णः)। बाहुलकाद्वत्वे लिविः । तूल-तूलिः । तूली (कूचिका)। ५६० अमेः सम्प्रसारणं च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रमिः (वातः) बाहुलकात् भ्रमिः । ५६१ क्रमितमिशतिस्तम्भामत इच्च । क्रम-क्रिमिः (कीटः) सम्प्रसारणानुवृत्तेः कृमिरपि । तम-तिमिः (मत्स्यविशेषः) । शत-शितिः । शितिर्मेचकशुक्लयोः । ५६२ मनेरुच्च । मुनिः । ५६४ वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् । वस-वासिः कृदिकारादिति ङीषि वासी (छेदनवस्तु) । वप-वापी (कूपः) । राज-राजिः राजी (श्रेणी) । सद-सादिः (सारथिः) । वद-वादिः (विद्वान्) । वारि-वारि (जलम्) । वारी (गजबन्धनी) । ५६५ नहो भश्च । नाभिः । नाभिः स्यात्क्षत्रिये पुंसि प्राण्यङ्गे तु स्त्रियां मतः । ५६७ श्रः शकुनौ । शारिः शारिका । शारिर्नाऽक्षोपकरणे स्त्रियां शकुनिकान्तरे इति मेदिनी । ५६८ जनिघसिभ्यामिण् । जन-जनिः (जननम्) । ५७० अज्यतिभ्यां च । अज-आजिः (संग्रामः) । अत-आतिः (पक्षी) । ५७१ पादे च । पादशब्दे उपपदेपि पूर्ववत् । पादस्य पदाज्यातीति पदादेशः पदाजिः पदातिः (पादचारी), पदातिपत्तिपदगपादातिकपदाजयः पद्गश्च पदिकश्चेत्यमरः । ५७२ अशिपणाय्यो रुडायलुकौ च । अशेरुट् राशिः (पुञ्जः) । पणायतेरायलुक् पाणिः (करः) । ५७३ वातेर्डिच्च । विः (पक्षी) । ५७४ प्रे हरतेः कूपे । प्रहिः (कूपः) पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा इत्यमरः । ५७५ नौ व्यो यलोपः पूर्वस्य च दीर्घः । नावुपपदे व्येञ इण् यलोपः नेर्दीर्घश्च । नीविः नीवी (वस्त्रग्रन्थिर्मूलधनं च) । ५७६ समाने ख्यः स चोदात्तः । समाने उपपदे ख्याधातोरिण् स डिच्च यलोपश्च समानस्य सादेशश्च । समानः ख्यायते जनैरिति सखा (मित्रम्) । ५७७ आङि श्रिहनिभ्यां ह्रस्वश्च । इण् स्यात्सच डित् आङो ह्रस्वश्च । आ श्रि-अश्रिः । स्त्रियः पाल्यश्रिकोटयः इत्यमरः । आ हन-अहिः । सर्पे वृत्रासुरेप्यहिः इत्यमरः । ५७८ अच इः । रु-रविः (सूर्यः) । पू-पविः (वज्रम्) तॄ-तरिः (नौः) । कु-कविः (विद्वान् काव्यकर्ता शुक्रश्च) । ऋ-अरिः (शत्रुः) । कपिलकादित्वाल्लत्वपक्षे अलिः (भ्रमरः) । ५७९ खनिकष्यजसिवसिवनिध्वनिग्रन्थिचलिभ्यश्च । खन-खनिः (आकरः) खनिः स्त्रियामाकरः स्यादित्यमरः । अस-असिः (खड्गः) । ध्वन-ध्वनिः (शब्दः) । ग्रन्थः-ग्रन्थिः (बन्धः) । ५८० वृतेच्छन्दसि । बाहुलकाल्लोकेपि । वृत-वर्तिः (दीपदशा) । ५८२ कॄगॄशॄपॄकुटिभिदिच्छिदिभ्यश्च । इः कित् स्यात् । कॄ-किरिः (वराहः) ॠत इत् । गॄ-गिरिः (पर्वतः) । कुट-कुटिः कुटी (शाला) । ५८३ कुटिकम्प्योर्नलोपश्च । कम्प-कपिः (वानरः) । ५८४ सर्वधातुभ्यो मनिन् । क्रियते इति कर्म (कार्यम्) । चर-चर्म (कृत्तिः) । भस-भस्म (भूतिः) । जन-जन्मः (उत्पत्तिः) । शॄ-शर्म (सुखम्) । स्था-स्थाम (बलम्) । छाद-छद्म

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(कपटः) इस्मन्निति ह्रस्वः । सुष्ठु त्रायते इति सुत्रामा (इन्द्रः) । ५८५ बृंहेर्नोच्च । नकारस्याकारः बृंह-ब्रह्म, ब्रह्म तत्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः इत्यमरः । ५८६ अशिशकिभ्यां छन्दसि । लोकेपि, अशू-अश्मा (पाषाणः) । ५८९ वेञः सर्वत्र । छन्दसि भाषायां च । वे-वेमा (वायदण्डः) । ५९० नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्धामन् । सप्त निपात्यन्ते । म्नायते-ऽभ्यस्यतेनेनेति नाम (अभिधानम्) धातोर्नाभावः । सिनोतेर्दीर्घः सीमा-मानौ-नः (मर्यादा) । पक्षे डाप् सीमा-मे-माः । व्येञोऽन्त्यस्योत्वं गुणः व्योम (आकाशः) । रु-रोम, लू-लोम (तनूरुहम्) । पिबतेः पुक् पाप्मा (पापम्) । धा-धाम । धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः इति मेदिनी । ५९२ सातिभ्यां मनिन्मनि णौ । स्यति-दुरध्येयत्वाद्दुःखयति इति साम (वेदगीतिः) । अतति-सततं वर्तते इति आत्मा । आत्मा पुंसि स्वभावे स्यात्प्रयत्नमनसोरपि, धृतावपि मनीषायां शरीर ब्रह्मणोरपि इति मेदिनी । ५९३ हनिमशिभ्यां सिकन् । हन्-हंसिका (हंसी) । मश्-मक्षिका व्रश्चेति षत्वं कत्वं षत्वं च । ५९४ कोररन् । कवरः (पाठकः) कबरी (केशविन्यासः) जानपदेति ङीष्, कवरा (चित्रा) । ५९५ गिर उडच् । गरुडः (गरुत्मान्) । ५९६ इन्देः कमिर्नलोपश्च । इदम् । ५९७ कायतेडिंमि । किम् । ५९८ सर्वधातुभ्यः ष्ट्रन् । वस-वस्त्रम् । अस्-अस्त्रम् (आयुधम्) । शस्-शस्त्रम् । छाद-छत्रम् (आतपत्रम्) इस्मन्निति ह्रस्वः । ५९९ भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च । भ्रस्ज-भ्राष्ट्रः (अम्बरीषम्) संयोगादिलोपः व्रश्चेति षत्वे ष्टुत्वम् । ६०१ उशिखनिभ्यां कित् । उष-उष्ट्रः (क्रमेलकः) । ६०२ सिविमुच्योष्टे रूच । सिव-सूत्रम् (तन्तुः) । मुच-मूत्रम् । ६०३ अमिचिमिदिशसिभ्यः क्त्रः । अम-आन्त्रम् (पुरीतत्) अनुनासिकस्येति दीर्घः । चि-चित्रम् । आलेख्याश्चर्ययोश्चित्रम् इत्यमरः । मिद-मित्रम् (सखा) । शस-शस्त्रम् । ६०४ भुवो ह्रस्वश्च । पू-पुत्रः । ६०५ स्त्यायतेर्ड्रट् । स्त्यै-स्त्री । डित्वाट्टिलोपः टित्वान्ङीप् । ६०६ गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः । गु-गोत्रम् । गोत्रं स्यान्नामवंशयोः । गोत्रा (पृथिवी) । वी-वेत्रम् (वेतसः) । वच्-वक्त्रम् (मुखम्) । यम-यन्त्रम् । सद-सत्रम् सत्रमाच्छादने यज्ञे सदादाने वनेपि च इत्यमरः । क्षद-क्षत्रम् (क्षत्रियः) । ६०७ हुयामाश्रुभसिभ्यस्त्रन् । हु-होत्रम् (आहुतिः) । या-यात्रा (गमनम्) । मा-मात्रा (लेशः परिमाणं च) । श्रु-श्रोत्रम् (कर्णः) । भस-भस्त्रा (चर्मप्रसेविका) । ६०८ गमेराच । गात्रम् (शरीरम्) । ६०९ दादिभ्यश्छन्दसि । बाहुलकाल्लोकेपि । दाप्-दात्रम् (छेदनसाधनम्) । पा-पात्रम् (भाजनम्) । ६१० भूवादिभ्यो णित्रन् । वदणि-वादित्रम् (वाद्यम्) । ६११ चरेर्वृत्ते । चारित्रम् (वृत्तम्) । ६१२ अशित्रादिभ्य इत्रोत्रौ । अश्यादिभ्य इत्रः, त्रादिभ्य उत्रः । अशू-अशित्रम् । वह-वहित्रम् । धृ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धरित्री (पृथ्वी)। त्रै-त्रोत्रम् (प्रहरणम्)। ६१३ अने द्विषति चित्। अमित्रः (शत्रुः)। ६१४ आः समिणनिकषिभ्याम्। सम्पूर्वादिणः निपूर्वात्कषेश्च आ स्यात्। स्वरादित्वादव्ययम् समया निकषा (समीपे)। ६१५ चितेः कणः कश्च। बाहुलकान्न गुणः। चित्-चिक्कणम् (मसृणम्)। ६१६ सूचेः स्मन्। सूक्ष्मम् कुत्वं षत्वं च। ६१७ पातेर्डुम्सुन्। पुमान् (पुरुषः)। ६१८ रुचि-भुजिभ्यां किष्यन्। रुच्-रुचिष्यम् (इष्टम्)। भुज-भुजिष्यः (दासः)। ६१९ वसेस्तिः। वस्तिः (नाभेरधः)। बाहुलकात् शासेः- शास्तिः (राजदण्डः)। विन्ध्याख्यमग मस्यतीति अगस्तिः (मुनिविशेषः), शकन्ध्वादिः। ६२० सावसेः। सु अस्-स्वस्ति स्वराद्यव्ययम्। ६२१ वौ तसेः। वितस्तिः। अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुल इत्यमरः। ६२२ पदिप्रथिभ्यां नित्। पत्तिः (पदातिः) प्रथितिः (ख्यातिः)। तितुत्रेष्वग्रहादीनामितीट्। ६२३ दृणातेर्ह्रस्वश्च। दृतिः (चर्मपुटः)। ६२४ कृतॄकृपिभ्यः कीटन्। कृ-किरीटम् (मुकुटम्) ऋत इर्। कृप-कृपीटम्। कृपीटमुदरे नीरे इति विश्वः। ६२५ रुचिवचिकुचिकुटिभ्यः कितच्। रुच्-रुचितम् (इष्टम्), वच-उचितम् (योग्यम्)। कित्वात्सम्प्रसारणम्। ६२७ कुडिकुषिभ्यां क्मलन्। कुड्मलम्। कुड्मलो मुकुलोऽस्त्रियामित्यमरः। ६२८ सर्वधातुभ्योऽसुन्। चिती-चेतः (चित्तम्)। सृ-सरः (तडागः)। पीङ्-पयः। पयः स्यात्क्षीरनीरयोः इति मेदिनी। सद्-सदः (सभा)। वर्च-वर्चः (तेजः)। रुद-रोदसी (द्यावाभूमी) नित्यं द्विवचनम्। वी-वयः (पक्षी)। तम्-तमः (अन्धकारः)। षह-सहः (बलम्)। तप-तपः (तपस्या) मह-महः। मह उत्सवते जसोरिति मेदिनी। नभ-नभः (गगनम्)। ६३० अशेर्देवने युट् च। देवनं स्तुतिः यशः (कीर्तिः)। ६३१ उब्जेर्बले बलोपश्च। उब्ज-ओजः (बलम्)। ६३३ श्रयतेः स्वाङ्गे शिरः किच्च। श्रयतेः शिरादेशोऽसुन् किच्च। शिरः (मस्तकम्)। घञर्थे के त्वदन्तः। पिण्डं दद्याद्गयाशिरे इति वायुपुराणे, निचकर्त शिरान्द्रौणिरिति महाभारते। ६३४ अर्तेरुच्च। ऋ-उरः (वक्षः)। ६३५ व्याधौ शुट् च। अर्शः (गुदव्याधिः)। ६३६ उदके नुट् च। अर्णः (जलम्)। ६३७ इण आगसि। एनः (पापम्)। ६४१ स्रुरीभ्यां तुट् च। स्रु-स्रोतः (प्रवाहः) री-रेतः (शुक्रम्)। ६४३ उदके थुट् च। पातेरसुन् थुट् च। पाथः (जलम्)। ६४४ अन्ने च। पाथः (भक्तम्)। ६४५ अदेर्नुम्धौ च। अदेर्भक्तेर्थेऽसुन्नुम् धादेशश्च। अन्धः (अन्नम्)। भिस्सा स्त्रीभक्तमन्धोऽन्नमित्यमरः। ६४६ स्कन्देश्च स्वाङ्गे। स्कन्धः (अंसः)। ६४७ आपः कर्माख्यायाम्। कर्माख्यायां ह्रस्वो नुट् च वा। आप-अप्नः अपः। बाहुलकात् आपः। सर्वमापोमयं जगत्। ६४८ रूपे जुट् च। अब्जः (रूपम्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

६४९ उदके नुम्भौ च । अम्भः (जलम्)। ६५० नहेर्दिवि भश्च । नभः । नभः खं श्रावणे नभाः इत्यमरः । ६५१ इण आगोऽपराधे च । इणो सुन् धातोरागादेशश्च । आगः आगः पापापराधयोरित्यमरः । ६५२ अमेर्हुक्च । अंहः (पापम्)। ६५३ रमेश्च । रंहः (वेगः)। ६५४ देशे ह च । रमन्तेऽस्मिन्निति रहः (एकान्तस्थानम्)। ६५५ अञ्च्यञ्जियुजिभृजिभ्यः कुश्च । एभ्योऽसुन् कवर्गश्चान्तादेशः । भृज-भर्गः (तेजः)। ६५६ भूरञ्जिभ्यां कित् । भुवः (अन्तरिक्षम्)। रजः (धूलिः)। ६५७ वसेर्णित् । वासः (वस्त्रम्)। ६५८ चदेरादेश्च छ । छन्दः । छन्दः पद्येथ वेदेपि स्वैराचाराभिलाषयोः इति मेदिनी । ६५९ पचिवजिभ्यां सुट् च । वच्-वक्षः (उरः)। ६६३ नञि हन एह च । असिः प्रत्ययः हन एहादेशः । न हन्-अनेहाः (समयः)। ६६४ विधाञो वेध च । वेधाः (ब्रह्मा)। ६६६ गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च । असिः प्रत्ययः । सुतपाः (कश्चिदृषिः)। जातवेदाः (अग्निः)। ६६७ चन्द्रे मोडित् । चन्द्रमा-अस्-चन्द्रमाः । ६६८ वयसि धाञः । वयोधाः (तरुणः)। ६७० पुरसि च । पुरोधाः (पुरोहितः)। ६७१ पुरूरवाः । पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते । पुरूरवाः (राजविशेषः)। ६७३ उषः कित् । उषः (प्रातःकालः)। ६७४ दमेरुनसिः । दमुनाः (अग्निः) । ६७५ अङ्गतेरसिरिरुडागमश्च । अङ्गिराः (कश्चिदृषिः) । ६७६ सर्तेरप्पूर्वादसिः । अप्-सृ-अप्सराः प्रायेणायं बहुवचने अप्सरसः । ६७८ वशेः कनसिः । सम्प्रसारणम् उशनाः (शुक्रः)।

प्रयोगाः—मेनका नामाप्सरसः । देवानां पुरोधा बृहस्पतिः असुराणामुशनाः । निलीयते पाथसां पूरे । यशसा महसा च शोभनः । पवित्रचारित्र्ययुतो धरित्र्याम् । शुभ्रेण वाससा छन्नः । परुषः कलुषेण पूरुषः हृदये स्कन्धयोरपि । उलूकभल्लूकतरक्षुपूरितम् । अस्त्रैः शस्त्रैश्च भीषणः । सरसि चन्द्रमसः प्रतिरूपकम् । प्रीतिपात्रं सखा मम । स लोहकारभस्त्रेव । चञ्चरीकावृता मल्ली । ओजसा पूरितः पङ्क्तिः । दीप्यते जातवेदाः । रुचितमुचितमेतत् ।

पञ्चमपादः—

६७९ अदिभुवो डुतच् । टिलोपः अद-भू-अद्भुतम् (चित्रम्) । ६८० गुधेरूमः । गोधूमः (अन्नविशेषः)। ६८३ पातेरतिः । पातिः (स्वामी)। संपातिः (गृद्ध्रविशेषः)। ६८५ अर्तेश्च । अरतिः (उद्वेगः)। ६८६ तृहेः क्नो हलोपश्च । कित्वान्न गुणः णत्वम् तृणम् (घासः)। ६८७ वृञ्लुटितनिताडिभ्य उलच् तण्डश्च । व्रियन्ते लुट्यन्ते तन्यन्ते ताड्यते वा तण्डुलाः । ६८८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दंसे ष्टटनौ न आ च । दासः । दासः सेवकशूद्रयोः इत्यमरः । ६८९ दंशेश्च । दाशः (धीवरः)। कैवर्ते दाशधीवरौ इत्यमरः । ६९० उदि चेर्डैसि । उच्चैः । स्वराद्यव्ययम् । डित्वाट्टिलोपः ६९१ नौ दीर्घश्च । निचि-नीचैः (अव्ययम्) । ६९३ पूञो यण्णुग्घ्रस्वश्च । यत्प्रत्ययः पुण्यम् । ६९४ स्रंसेः शिः कुट् किच्च । यत्प्रत्ययः कित् स्रंसेः शिरादेश कुडागमश्च । स्रंसशिक्यम् । ६९५ अर्तेः क्युरुच । ऋ-उरणः (मेषः) । योरनः ऋत उर्भावः णत्वं च । ६९७ उदिद्दृणातेरजलौ पूर्वपदान्त्यलोपश्च । उद्-दृ-अच् दलोपः उदरम् (कुक्षिः) । ६९८ डित्खनेर्मुट् । सचो दात्तः खन-अच् धातोर्मुट्-मुखम् (वदनम्) । ६९९ अमेः सन् । अंसः (स्कन्धः) । ७०० मुहेः खो मूर् च । मूर्खः (अज्ञः) । ७०१ नहेर्हलोपश्च । नखः (नखरः) । ७०२ शीङो ह्रस्वश्च । शिखा (चूडा) । ७०३ माङ ऊखो मय् च । मयूखः (किरणः) धातोर्मयादेशः । ७०४ कलिगलिभ्यां फगस्योच्च । गुल्फः (पाद-ग्रन्थिः) । ७९५ स्पृशेः श्वण्शुनौ पृ च । धातोः पृ आदेशः । स्पृश-श्वण्-पार्श्वम् । पार्श्वोऽस्त्रीकक्ष-योरधः । शुन्-प्रत्यये पर्शुः (परशुः) । ७०६ श्यनि श्रयतेर्डुन् । श्यन्शब्दो मुखवाची श्यनं श्रयते इति श्मश्रु (मुखरोम) । ७०७ अश्र्वादयश्च । निपात्यन्ते । अशेः रुन्-अश्रु (नेत्राम्बु) । ७०८ जने-ष्टन् लोपश्च । नलोपः जटा (सटा) । ७०९ अच्तस्य जङ्घ च । अच्प्रत्ययो जने र्जङ्घादेशः । जङ्घा । ७१० हन्तेः शरीरावयवे द्वे च । अच्प्रत्ययोधातोर्द्वित्वेभ्यासकार्यम् जघनम् । पश्चान्नितम्बः स्त्री-कट्याः क्लीबे तु जघनं पुरः इत्यमरः । ७११ क्लिशेरन् लो लोपश्च । ललोपः केशः (रोम) । ७१२ पलेरितजादेश्च पः । पलितम् (जरसा शौक्ल्यम्) । ७१३ कृञादिभ्यः संज्ञायां वुन् । कृ-करकः (कमण्डलुः) । करकाः (वर्षोपलः) । नृ-नरकः । नरको नारकोपि चेति द्विरूपकोशः । कटे-कटकः । कटको वलये सानौ इति मेदिनी । कुर-कोरकः-कम् (कुड्मलम्) । अप-वृ-अपवरकः (आवरकः) । ७१४ चीकयतेराद्यन्तविपर्ययश्च । कीचकः । वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः इत्यमरः । ७१५ पचिमच्योरिच्चोपधायाः । पच्-पेचकः (उलूकः) । मच-मेचकः । मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान् । तद्वक्ते वाच्यवत्क्लीबं स्रोतोऽञ्जनान्धकारयोः इति मेदिनी । ७१६ जनेररष्ठ च । अरप्रत्ययः नस्य ठ आदेशः जठरम् (उदरम्) । ७२२ हर्यतेः कन्यन्हिरच् । कन्यत्प्रत्ययो हिरजा-देशः । हिरण्यम् (सुवर्णम्) । ७२३ कृञः पासः । कर्पासः बिल्वादित्वादणि कार्पासम् (वस्त्रम्) । ७२५ ऊर्णोतेर्डः । ऊर्णा । ७२६ दधातेर्यन्नुट् च । धान्यम् (व्रीहिः) । ७३० तनोतेर्डउः सन्वच्च । डउः प्रत्ययः सनीवद्धित्वादि टिलोपः तितउः (चालनी) । ७३१ अर्भकपृथुकपाका वयसि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निपात्यन्ते। ऋधु वृद्धौ वुन् भश्चान्तादेशः अर्भकः। प्रथेः कुकन्सम्प्रसारणं च पृथुकः। पिबतेः कन्-पाकः। पोतः पाकोऽर्भको डिम्भः, पृथुकौ चिपिटार्भकौ इत्यमरः। **७३२ अवद्यावमाधमार्वरेफाः कुत्सिते।** कुत्सितार्थे एते निपात्यन्ते। वदेर्नञि यत्-अवद्यम् (पापम्) अवतेरमः-अवमः, वस्य पक्षे धः अधमः। अर्तेर्वन्-अर्वा। रिफतेः अः-रेफः। अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः, रेफो रवर्णे पुंसि स्यात्कुत्सिते पुनरन्यवत् इति मेदिनी। **७३५ अश्नोतेराशुकर्मणि वरट् च।** चादुपधाया ईत्वम्। ईश्वरः। **७३६ चतेरुरन्।** चत्वारः। प्राततेररन्। प्र-अत-प्रातः (उषसि)। **७३८ अमेस्तुट् च।** अन्तः (मध्ये)। **७४० सिचेः संज्ञायां हनुमौ कश्च।** कः प्रत्ययः चस्य हादेशो नुम् च। सिंहः। **७४१ व्याङि घ्रातेश्च जातौ कः।** व्याघ्रः (द्वीपी)। **७४२ हन्तेरच् घुर च।** घोरम् (भीषणम्)। **७४३ क्षमेरुपधालोपश्च।** चादच् क्ष्मा। **७४४ तरतेर्ड्रिः।** त्रयः। **७४५ ग्रहेरनिः।** ग्रहणिः, ङीषि-ग्रहणी (व्याधिविशेषः)। **७४६ प्रथेरमच्।** प्रथमः (आद्यः)। **७४७ चरेश्च।** चरमः। (अन्त्यः)। **७४८ मङ्गेरलच्।** मङ्गलम् (शुभम्)।

प्रयोगाः—सिंहव्याघ्रादयो वने। प्रथमश्चरमोऽथवा। प्रातः स्नानं पुण्यकारि। तितउना पुनाति धान्यम्। धान्यगोधूममसूरादीन्यन्नानि। शिक्ये शिखा लग्ना। जग्राह पृथुकमुष्टिं कृष्णः। ऊर्णावस्त्रं कार्पासं वा परिधेहि। त्रयश्चत्वारो वा जनास्तत्र सन्ति। श्मश्रुन्यस्तं मुखं तस्य। करके जलमानय। भानोर्मयूखास्तीक्ष्णाः। तस्य केशा जटा जाताः। न दूषय मुखमश्रुणा। ईश्वरो मङ्गलं कुर्यात्।

वि० १. उणादिप्रत्ययाः सन्ति पादोत्तरशतत्रयम् (३२५)। तेषां विवेचनं त्वत्र ज्ञानेन्द्रस्वामिभिः कृतम्। प्राचा तु कतिपयानामेवोणादीनामुपन्यासः कृतो न सर्वेषाम्, सोपि नैकप्रघट्टकतया स्वतः किन्तु विच्छिद्येति स्पष्टम्। तत्रापि केचित्प्रमादा मनोरमायां प्रदर्शिता इति तत्वबोधिनीकारः।

वि० २. उणादिप्रकरणोक्तानप्रसिद्धानंशान्विहाय प्रसिद्धानामेव शब्दानां साधनोपयोगीनि सूत्राणि, तेष्वपि व्यवहारप्रसिद्धान्येवोदाहरणान्यत्र प्रदर्शितानि।

वि० ३. पाणिनीयसूत्रैः साधिता अपि केचन शब्दा उणादिसूत्रैः पुनरपि साधिताः दृश्यन्ते, क्वचन प्रकृतिप्रत्ययादिप्रक्रियायामपि विशेषो दृश्यते। तथाहि—

पाणिनीयप्रक्रियायां—लिप्त-क्त-लिप्तः, शुष-क्त-शुष्कः, अञ्ज-क्त-अक्तः, रुच-क्त-रुचितः, यु-ल्यु-यवनः, हन्-तृच्-हन्ता, क्रुश-तृच्-क्रोष्टा, हा-क्तिन्-हानिः, म्ला-क्तिन्-म्लानिः, ग्ला-क्तिन्-ग्लानिः, नट-अच्-नटः, जन-यत्-जन्यः, ईश-वरच्-ईश्वरः, न रतिः-अरतिः, न तिथिर्यस्य-अतिथिः, न मित्रम्-अमित्रः, न क्षरम्-अक्षरम् इत्यादि; उणादिप्रक्रियायान्तु-लिप्-त-लिप्तः शुष-कक्-शुष्कः, अञ्ज-त-अक्तः, रुच्-कितच्-रुचितम्, यु-युच्-यवनः, हन्-तृ-हन्ता, क्रुश-तृ-क्रोष्टा, हा-नि-हानिः, म्ला-नि-म्लानिः, ग्ला-नि-ग्लानिः, नम-डट्-नटः, जन-यक्-जन्यम्, अश-वरट्-ईश्वरः, ऋ-अतिः-अरतिः, अत्-इथिन्-अतिथिः, अम्-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्र-अमित्रम् , अश-सर-अक्षरम् , इति विशेषाः । उणाद्यामपि मद्-स्य-मत्स्यः, मद्-स्यन्-मत्स्यः, तड-डुलच् तण्डुलः । वृल्-लुट्-तन-ताडि वा-डुलच्-तण्डादेशः-तण्डुलः इति पुनः पुनरन्यथा प्रक्रियाविभेदो दृश्यते । तत्रेदं ध्येयम् , साधवः शब्दाः पुराकालादेव सिद्धाः, तेषां प्रकृतिप्रत्ययादिविभागो न वास्तविकः, किन्त्वपोद्धारदृशा बोधसौकर्याय काल्पनिक एव, तेन बालव्युत्पत्तये विभिन्नानामाचार्याणां विभिन्नाप्यपोद्धारकल्पनादृष्टिर्भवति । एवं न्यायेन विभिन्नाचार्यव्याकरणेषु एकस्यापि शब्दस्य साधने विभिन्नापि प्रक्रिया दृश्यते । यथातथापि साधुशब्दानां व्युत्पादनमेव व्याकरणकृतामभिमतं भवति इति आचार्याणां दृष्टिविशेषेण व्युत्पादनप्रक्रियाविभेदेपि साधवस्तदाकारा एव शब्दा निष्पद्यन्ते इति न किमप्यसामञ्जस्यम् । इदमेव शासनमित्यंनभिधाय अथशब्दानुशासनमिति वदतो महाभाष्यकारस्याप्यभिमतमभिसन्धीयते ।

प्रश्नाः—उणादिसूत्राणि कस्य । उणादिसूत्रसाधितानां शब्दानां पाणिनिना कथं साधुत्वं समर्थ्यते । पाणिनीयप्रक्रियायामुणादिप्रक्रियायां च क्वचिद्विभेदो न वा । उणादिसूत्राणि किमर्थमपेक्ष्यन्ते । त्यदादिशब्दानां कथं सिद्धिः । अधस्तनवाक्यगतानौणादिकशब्दानुपपादयत—

सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् । पद्मपत्रमिवाम्भसा । करेणुमारुह्य रराज राजा । पत्तिः पदातिं रथिनं रथेशः । अप्रणोद्योऽतिथिः सायम् । को भेदो दाशदासयोः । उच्चैर्नीचैश्च गच्छति । ईश्वरः सर्वभूतानां हृदये प्रतितिष्ठति । अङ्कुरितः कोरकितः पल्लवितः पुष्पितश्च सहकारः । कलभगर्दभयोर्महदन्तरम् । मुहुर्मुहुरायुराशास्ते । कृष्णाजिनं वसानो मुनिः । अत्युष्णा अश्रुबिन्दवः । सुरासुराणामजनिष्ट जन्यम् । वर्वराश्चत्वरेषु । कृतककुहकलग्नो दृश्यते मूर्खवर्गः । विवेश दण्डकारण्यं सिंहैर्व्याघ्रैर्भयानकम् । जायतां मङ्गलं सदा । **इत्युणादिप्रकरणम् ।**

अथ उत्तरकृदन्तप्रकरणम् ।

तुमुन्ण्वुलौ—

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् (३-३-१०) क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । तुमनो नकार इत् उकार उच्चारणार्थः, मान्तत्वात्तुमुन्तमव्ययम् अव्ययकृतो इति भावे तुम् । ण्वुलो णलावितौ वोरकादेशः, ण्वुल्तु कर्तरि । कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति । अत्र दर्शनार्थायां यानक्रियायामुपपदे भविष्यति दृशेस्तुमुनि भविष्यद्दर्शनार्थं यातीत्यर्थः, ण्वुलि द्रक्ष्यन्सँस्तदर्थं यातीत्यर्थः । नलोकेति अकेनोरिति च कर्मणि षष्ठीनिषेधः । तुमुनि सृजिदृशोरित्यम् । एवं सृज-स्रष्टुं सर्जकः, गम्-गन्तुं गमकः, हन्-हन्तुं घातकः, भू-भवितुं भावकः, पच्-पक्तुम् पाचकः, पठ-पठितुं पाठकः प्रवर्तते इत्यादि । ण्वुलि स्त्रियां दर्शिका पाठिका घातिकेत्यादि । **समानकर्तृकेषु तुमुन्** (३-३-१५८) इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन्स्यात् । भोक्तुमिच्छति, वष्टि, काङ्क्षतेऽभिलषति वाञ्छति कामयते वा । अक्रियोपपदार्थमिदम् । भोजनविषयिणीमिच्छां करोतीत्यर्थः, न तु भोजनार्थेच्छा । एवं गन्तुमिच्छामि, पठितुमभिलषामः । कर्तुं वाञ्छसि । **शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(३-४-६५) शकादिष्वस्त्यर्थेषु चोपपदेषु धातोस्तुमुन्स्यात्। अर्थग्रहणमस्तिनैव सह सम्बध्यते अनन्तरत्वात्, इदमप्यक्रियार्थोपपदार्थम्। भोक्तुं शक्नोति धृष्णोति (प्रगल्भते), जानाति वा। भोक्तुं समर्थ इत्याद्यर्थः। भोक्तुं ग्लायति। अशक्त इत्यर्थः। भोक्तुं घटते अर्हति वा योग्य इत्यर्थः। भोक्तुमारभते प्रक्रमते वा। उपक्रमते इत्यर्थः। भोक्तुं लभते। अप्रत्याख्यातं भोजनं लभते इत्यर्थः। भोक्तुमुत्सहते, भोजने व्याप्रियते इत्यर्थः। भोक्तुमस्ति भवति विद्यते वर्तते वा। भोजनमस्तीत्यर्थः। एवं पठितुमुत्सहते। लिखितुं जानाति। शक्त आरोढुम्। व्याख्यातुं धृष्टः। निर्मातुं घटते। **पर्याप्तिवचनेष्वलमर्थेषु** (३-४-६६) पर्याप्तिः पूर्णता। तद्वाचिष्वलमर्थशब्देषूपपदेषु धातोस्तुमुन्स्यात्। भोक्तुं पर्याप्तः प्रवीणः कुशलः पटुरित्यादि। भोक्तुमन्यूनसामर्थ्यवानित्यर्थः। अलं गन्तुम्। द्रष्टुं पारयति। पठितुं पटुः। **कालसमयवेलासु तुमुन्** (३-३-१६७) पर्यायोपादानमर्थोपलक्षणार्थम्। कालार्थेषूपपदेषु धातोस्तुमुन्स्यात्। कालः समयो वेला अनेहा वा भोक्तुम्। समयोयं पठितुम्। न कालोयं स्थातुम्।

वि० १. क्रियार्थक्रियोपपदस्थले भविष्यतीत्यनुवृत्तेस्तत्रैव तुमुन्ण्वुलौ। क्रियार्थत्वं क्रियोद्देश्यकत्वम्। क्रियायामुपपदे इत्युक्तेर्नेह—भिक्षिष्ये इति जटाः। जटा हि द्रव्यं न क्रिया। भिक्षितुं जटा इति तु धारयतीत्याद्यध्याहारेण समर्थनीयम्। क्रियार्थायामित्युक्तेर्नेह—धावतस्ते पतिष्यति दण्डः। अत्र धावनं दण्डपतने हेतुर्नतु तदुद्देश्यमिति न पतनार्थम्। ण्वुल्तृचाविति सामान्यतोविहितस्य ण्वुलोऽन्यत्रेव क्रियार्थक्रियोपपदस्थलेपि क्रियार्थोपपदेन लृटा बाधेपि वासरूपन्यायेन पक्षे प्राप्तौ पुनर्विधानं क्रियार्थोपपदक्रियास्थले वासरूपविधिर्नेति ज्ञापयति। तेन वासरूपविधिनात्र तृजादयो न किन्तु ण्वुलेव। अतः कारको व्रजतीतिवत् कर्ता व्रजतीति न।

वि० २. समानकर्तृकेष्वित्यत्र समानकर्तृकत्वमेककर्तृकत्वम् पुत्रस्य पठनमिच्छतीत्यादौ भिन्नकर्तृकत्वान्न। पुत्रेण सह पठितुमिच्छतीत्यत्र तु भवत्येव। इच्छार्थेष्वित्यनुवृत्त्या इच्छार्थकमेव तादृशमुपपदमत्र विवक्ष्यते। भोक्तुमिच्छतीत्यत्र भोजनमिच्छाया विषय एव नोद्देश्यमिति पूर्वेणाप्राप्ता इच्छार्थोपपदे पुनर्विधानम्।

वि० ३. अलमर्थशब्दा यदा पूर्णतां बोधयन्ति तदैव एषूपपदेषु तुमुन्। पर्याप्तिवचनेष्वित्युक्तेर्नेह अलंकृत्वा। अत्र-निषेधोऽलमर्थः। अलमर्थेत्युक्तेर्नेह—पर्याप्तं (भूरि) भुङ्क्ते। पूर्वसूत्रे शकिग्रहणमलमर्थाभावस्थलार्थम्। शक्यमेवं कर्तुम् सुकरमेतदित्यर्थः, संभवमात्रं वार्थः। प्रवीणः कुशलो वा भोक्तुमित्यादौ पर्याप्तिविवक्षायामेव तद्योगे तुमुन्।

वि० ४. कालसमयेतिसूत्रे प्रैषातिसर्गेति सूत्रात्प्रैषादिग्रहणमनुवर्तते, तेन तद्बोधएवायं तुमुन्। कालेभोक्तुमित्यादौ भवान्भुङ्क्तामिति प्रैषः अतिसर्गः भोजनकालः प्राप्त इति वा बुध्यते। तेन भूतानि कालः पचतीति वार्ता इत्यत्र लोकवृत्तमात्रबोधेन प्रैषाद्यभावान्न तुमुन्।

भाववचनाश्च (३-३-११) भविष्यतीत्येव। भावे इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः। यागाय (यष्टुं) याति। तुमर्थाच्चेति चतुर्थी। पाकाय (पक्तुं) व्रजति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूतये (भवितुं) सम्पद्यते। पुष्टये (पोष्टुं) ददाति। **अण्कर्मणि च (३-३-१२)** कर्मण्युपपदे क्रियार्थायां क्रियायां भविष्यति धातोरण्स्यात्। ण्वुलोऽपवादः। काण्डलावः (काण्डं लविष्यन्) व्रजति। परत्वादयमातोनुपसर्गे क इत्यादीन्बाधते। कम्बलदायः (कम्बलं दास्यन्) व्रजति। एवं गोदायः, अश्वदायः। **पदरुजविशस्पृशो घञ् (३-३-१६)** भविष्यतीति निवृत्तम्, इत उत्तरं त्रिष्वपि कालेषु प्रत्ययः स च कर्तरि। पदादिभ्यो घञ् स्यात्। पद्यते (चलति) इति पादः (चरणः) करणस्यापि कर्तृत्वेन विवक्षा। रुजतीति रोग (गदः)। विशतीति वेशः ( )। स्पृशतीति स्पर्शः (शीतादिः) **सृ स्थिरे (३-३-१७)** सृ इति लुप्तविभक्तिकम्। स्थिरे कर्तरि सर्तेर्घञ्स्यात्। सरति कालान्तरमिति सारः (स्थिरांशः)। चन्दनसारः, खदिरसारः। **व्याधिमत्स्यबलेषु चेति वाच्यम्** (वा) अतीसारः (प्रवाहिकारोगः) उपसर्गस्येति दीर्घः, सरतिरिहान्तर्भावितण्यर्थः, रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसृ-विसारः (मत्स्यः)। सारः (बलम्)।

वि० भाववचनाश्चेति वचनग्रहणाद्भाव इत्यधिकृत्य घञादयो ये विधास्यन्ते सामान्यतस्ते क्रियार्थायां क्रियायामुपपदे भविष्यति काले विशेषविहितेनापि तुमुना समुच्चिता भवन्तीति बोध्यते। वासरूपविधिना तु नैतत्सिद्धिः, क्तल्युट्तुमुन्खलर्थेषु वासरूपविधेरप्रवृत्तेः।

प्रयोगाः—कालो ह्ययं संक्रमितुं तदङ्गे। करीषानुच्चेतुं दहनमुपनेतुं मुहुरपः समाहर्तुं भिक्षामटितुमथ तां रक्षितुमपि। पिधातुं पक्तुं चाशितुमथ च पातुं क्वचिदथोपधातुं न पात्री चिरमहह चिन्तामणिरभूत्। त्यागाय सम्भृतार्थानाम्। समुच्चलच्चन्दनसारसौरभात्। आह्लादकः प्रोवाच। कुशलो व्याख्यातुमेषः। फलान्याहर्तुं याति। त्यागाय भोगाय वा। विद्या विवादाय धनं मदाय।

घञादि—

भावे (३-३-१८) सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्स्यात्। पच्-पाकः कुत्वमुपधावृद्धिः। त्यज्-त्यागः, भू-भावः, लभ्-लाभः, यज-यागः, दा-दायः आतोयुक्, पठ-पाठः, लिख-लेखः, लुभ्-लोभः, मुह-मोहः। **स्फुरतिस्फुलत्योर्घञि (६-१-४७)** अनयोरेच आत्वं स्याद्घञि। स्फुर-स्फारः, स्फुल-स्फालः गुणोत्तरमात्वम्। परिहृ-परीहारः उपसर्गस्यघञीति दीर्घः। **इकः काशे।** काशे उत्तरपदे इगन्तस्यैव प्रादेर्दीर्घः स्यात्। नीकाशः। इक इत्युक्तेर्नेह-प्रकाशः। शमः नोदात्तोपदेशेति वृद्धिनिषेधः। आचमादेस्तु अनाचमेति पर्युदासान्न वृद्धिनिषेधः। कम-कामः (इच्छा), वम-वामः (वान्तिः), विश्रमः। विश्राम इति त्वपाणिनीयम्।

वि० धात्वर्थः क्रिया, साच पूर्वापरीभूतव्यापारपरम्पराविशेषः, साच साध्यरूपा धातुनोच्यते, आख्यातेऽस्या एव प्राधान्यम्, उक्तं च "भावप्रधानमाख्यात"मिति। घञादिभावकृदन्तेषु धात्वर्थभूतायास्तस्याः साध्यजातीयक्रियायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुद्ध्युपारूढत्वरूपं सिद्धत्वं धर्मविशेषो घञादिकृत्प्रत्ययेन बोध्यते । आख्यातार्थस्याऽद्रव्यरूपत्वेन लिङ्गसंख्याद्यन्वयायोग्यता, तथात्वमेव साध्यत्वम् । कृदन्तार्थस्य सिद्धरूपेण प्रतीत्या द्रव्यत्वं, तेन च लिङ्गसंख्याकारकशक्त्यन्वय योग्यत्वम् , तदेव योग्यत्वं द्रव्यत्वम् । उक्तं च कृदभिहितो भावो द्रव्यवत्प्रकाशते इति । पचतीत्यादौ साध्यरूपाऽद्रव्यभूतैव क्रियोच्यते, तेन तत्र न लिङ्गाद्यन्वयः; पाकादिशब्देषु तु प्रकृत्यंशेन साध्यरूपतया प्रतीयमानायाः क्रियायाः प्रत्ययांशेन सिद्धत्वरूपधर्मविशेषः सत्व (द्रव्यत्व) रूपता प्रतीयते, ततश्च पाकः पक्तिः पचनं पाकौ पाकाः पाकमित्यादि लिङ्गसंख्याकारकशक्तियोग्यतापि । आख्याते क्रियायाः साध्वत्वमेवावगम्यते, कृदन्ते तु प्रकृतिप्रत्ययाभ्यां साध्वत्वसिद्धत्वरूपावस्थाद्वयं प्रतीयते, तत्रापि प्रत्ययार्थस्य प्रधानतया सिद्धरूपता प्रधानीभवति, उक्तं च "सत्वप्रधानानि नामानी"ति । क्रियासामान्यवाचिनो भूधातोर्निष्पन्नोयं भावशब्दः सर्वधात्वर्थविषयो भवति, तेन सर्वधातुभ्यो घञ् । भूधातोर्घञि निष्पन्नेन भावशब्देन घञर्थप्रतिपादनेऽन्योन्याश्रयोपि न, पूर्वसिद्धानामेवभावादिशब्दानामपोद्धारदृशा घञादिप्रतिपादने तदभावात् । उक्तं च "आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता, प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥ साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना, सत्वभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥" इति । "नित्यानामेव शब्दानां साङ्कर्यस्य निवृत्तये, अन्वाख्यानाद्भावशब्दे घञि नान्योन्यसंश्रयः ॥" इति चेत्यादि भाष्यपदमञ्जर्याद्युक्तमिहानुसन्धेयम् ।

अकर्तरि च कारके संज्ञायाम् (३-३-१६) कर्तृभिन्ने कारके धातोर्घञ्स्यात् संज्ञायाम् । प्रास्यन्ते शत्रवोनेनेति प्रासः (खड्गः) । प्रसीव्यन्ति तमिति-प्रसेवः (स्यूतम्) । आहरन्ति तस्माद्रसमिति-आहारः (भोज्यम्) । क्वचिदसंज्ञायामपि-दीयते इति दायः, लभ्यते इति लाभः । कृत्यल्युटोबहुलमिति यावत् भावे अकर्तरिकारके इति द्वयमनुवर्तते । **घञि च भावकरणयोः** (३-४-२७) । भावे करणे च घञि रञ्जेर्नलोपः स्यात् । रञ्जनं रागः (रञ्जनक्रिया) चजोरिति जस्य गः नलोपे उपधावृद्धिः, रज्यतेऽनेनेति रागः (रञ्जनद्रव्यम्) अनयोरित्युक्तेर्नेह रज्यन्त्यस्मिन्निति-रङ्गः (रङ्गभूमिः) । **स्यदो जवे** (६-४-२८) स्यद इति स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते वेगेऽभिधेये । स्यन्दू-स्यदः (वेगः) अन्यत्र तु स्यन्दः (स्यन्दनम्) । **दारजारौ कर्तरि णिलुक्च** (वा) दारयन्तीति-दाराः (भार्या) । जरयतीति-जारः (उपपतिः) । **इङश्च** (३-३-२१) इङो घञ्स्यादकर्तरि कारके । अचोऽपवादः । अधीयते इति अध्यायः (पाठ्यभागः) स्वोऽध्यायः-स्वाध्यायः (वेदः) । उपेत्यास्मादधीयते इति-उपाध्यायः (अध्यापकः) । **अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्** (वा) उपाध्याया उपाध्यायी (अध्यापिका) । उपाध्यायस्य स्त्री तु उपाध्यायी उपाध्यायानी । **श्रिणीभुवोऽनुपसर्गे** (३-३-२४) अनुपसर्गेभ्य एभ्यो घञ्स्यात् । अजपोरपवादः । श्रि-श्रायः, नी-नायः, भू-भावः (आशयः) सोपसर्गे तु अजपावेव—प्रश्रयः (विनयः), आश्रयः (आधारः), विनयः (नम्रता), आनायः (जालम्), प्रभवः (उत्पत्तिः), अनुभवः (अनुभूतिः) । प्रभावः अनुभावः इत्यादिस्तु प्रकृष्टो भावः, अनुगतो भाव इति प्रादिसमासे ज्ञेयः । राज्ञो नयः इति तु बाहुलकात् समर्थनीयः । **प्रे द्रुस्तुस्रुवः** (३-३-२७) प्रपूर्वेभ्य एभ्यो घञ्स्यात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रद्रु-प्रद्रावः, प्रस्तु-प्रस्तावः (प्रसङ्गः) प्रस्नु-प्रस्नावः (मूत्रम्)। निरुपसर्गेऽन्योपसर्गेऽप्यप् द्रवः विद्रवः उपद्रवः स्रवः संस्रवः आस्रवः। **निरभ्योः पूल्वोः** (३-३-२८) निरभिपूर्वाभ्यां पूलूभ्यां घञ्स्यात्। निष्पूयते शूर्पादिभिरिति निष्पावः (धान्यविशेषः)। अभिलावः। निरभ्योरित्युक्तेर्नेह- पवः लवः। **उन्योर्ग्रः** (३-३-२९) उन्नीपूर्वाद्गिरतेर्घञ्स्यात्। उद्गारः (उद्गतः शब्दः) निगारः (भक्षणम्)। अन्यत्र त्वप् गरः (विषम्) सङ्गरः (युद्धम्)। **प्रे स्त्रोऽयज्ञे** (३-३-३२) प्रपूर्वात्स्तॄधातोर्घञ्स्यान्नतु यज्ञप्रयोगे। प्रस्तारः (इष्टकानां वर्णानां वा सन्निवेशविशेषः)। यज्ञे तु बर्हिषः प्रस्तरः (मुष्टिविशेषः) **प्रथने वावशब्दे** (३-३-३३) विपूर्वात्स्तृणातेर्घञ्स्यात् अशब्दविषये प्रथने। पटस्य विस्तारः (तिर्यगायतिः)। शब्दे विस्तारणे तु ग्रन्थविस्तरः। अप्रथनेपि तृणविस्तरः (समूहः)। **उदि ग्रहः** (३-३-३५) उत्पूर्वाद्ग्रह्णातेर्घञ्स्यात्। उद्ग्राहः ग्रहवृदृ इत्यपोपवादः। **समि मुष्टौ** (३-३-३६) संपूर्वाद्ग्रहेर्घञ्स्यात् मुष्टिविषये धात्वर्थे। मुष्टिरङ्गुलिसंनिवेशः। मल्लस्य सङ्ग्राहः (मुष्टेर्दृढग्रहणम्)। अन्यत्र त्वप् द्रव्यस्य सङ्ग्रहः धान्यसङ्ग्रहः। **परिन्योर्नीणोर्द्यूताभ्रेषयोः** (३-३-३७)। परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ्स्यात्क्रमेण द्यूते अभ्रेषे च विषये। अक्षादिभिः क्रीडनं द्यूतं यथाप्राप्तकरणमभ्रेषः। परिणायेत (समन्तान्नयनेन) शारान्हन्ति। एषोत्रन्यायः (उचितम्)। अन्यत्र तु परिणयः न्यथः। **परावनुपात्यय इणः** (३-३-३८) परिपूर्वादिणो घञ्स्यात् अनुपात्यये। क्रमप्राप्तस्यानतिपातोऽनुपात्ययः। तव पर्यायः मम पर्यायः (अनतिक्रमणम्)। उपात्यये त्वच् कालस्य पर्ययः (अतिपातः)। **हस्तादाने चेरस्तेये** (३-३-४०) हस्तादाने गम्ये चिनोतेर्घञ्स्यादचौर्ये। हस्तादान इति आदेयस्य प्रत्यासत्तिर्लक्ष्यते। पुष्पप्रचायः फलप्रचायः (समीपग्रहणम्)। हस्तादान इत्युक्त्या नेह-वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति। चौर्येपि न पुष्पप्रचयश्चौर्येण। **उच्चयस्य प्रतिषेधो वक्तव्यः** (वा) पुष्पोच्चयः (समूहः)। **निवासचितिसमाधानेष्वादेश्च कः** (३-३-४१) एष्वर्थेषु चिनोतेर्घञ्स्यादादेश्च ककारः। उपसमाधानं राशीकरणम् तच्च धात्वर्थः, अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः। निवासे-काशीनिकायः, निचीयते मोक्षोत्रेत्यधिकरणे घञ्। चितौ-आकायमग्निं चिन्वीत, आचीयत इति कर्मणि घञ्। शरीरे-कायः (देहः), चीयतेऽस्मिन्नस्थ्यादिकमित्यधिकरणे घञ्। उपसमाधाने-गोमयनिकायः (राशिः)। अन्यत्र त्वजेव चयः सञ्चयः अवचयः। **सङ्घे चानौत्तराधर्ये** (३-३-४२) अनौत्तराधर्ये सङ्घे वाच्ये चेर्घञ्स्यादादेश्च कः। प्राणिनां समुदायः सङ्घः स च एकधर्मसमावेशेन औत्तराधर्येण चेति द्विधा, तयोराद्यस्यैवात्र ग्रहः। भिक्षुनिकायः ब्राह्मणनिकायः वैयाकरणनिकायः। औत्तराधर्ये तु सूकरनिचयः स्तन्यपानादौ उत्तराधरभावेन शयनात्। अप्राणिसमूहेपि प्रमाणसमुच्चयः ज्ञानकर्मसमुच्चयः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० **अवोदैधौद्मप्रश्रथहिमश्रथाः** (६-४-२९) एते निपात्यन्ते । अव उन्द्-अवोदः (अवक्लेदनम्) घञि न-लोपः । इन्धी-एधः (इन्धनम्) । **परिमाणाख्यायां सर्वेभ्यः** (३-३-२०) सर्वेभ्यो धातुभ्योऽकर्तरि कारके घञ्स्यात् परिमाणाख्यायाम् । अजपोर्बाधनार्थमिदम् । एकस्तण्डुलनिचायः (तण्डुलानामेकत्वेन परिच्छेद्यो राशिः) निचेर्घञि वृद्धिः । द्वौ शूर्पनिष्पावौ (शूर्पेण परिशोध्यौ द्वित्वेन परिच्छेद्यौ तण्डुलराशी । **शवायुवर्णनिवृतेषु** (वा) शॄ इत्यविभक्तिको निर्देशः । शारः (वायुः) अधिकरणे घञ् । शारः (वर्णः) चित्रीकरणमिहधात्वर्थः । निवृतमावरणं, तत्र निश्‍शृ-नीशारः (प्रावरणम्) उपसर्गस्येति दीर्घः । प्रदक्षिणप्रसव्यगामिनां शाराणामिति वार्तिककारप्रयोगादक्षेष्वपि शार इति भवति । **उपसर्गे रुवः** (३-३-२२) सोपसर्गाद्रौतेर्घञ्स्यात् । अपोपवादः । संरावः विरावः (शब्द-अनुपसर्गेत्वप् रवः (शब्दः) । **समि युद्रुदुवः** (३-३-२३) सम्पूर्वेभ्य एभ्यो घञ्स्यात् । संयूयते (मिश्रीयते) गुडादिभिरिति संयावः (पिष्टविकारोऽपूप-विशेषः) । संद्रावः । **वौ क्षुश्रुवः** (३-३-२५) विपूर्वाभ्यामाभ्यां घञ्स्यात् । विक्षावः विश्रावः अन्यत्र तु श्रवः (श्रोत्रम्) संश्रवः (प्रतिज्ञा) आश्रवः (वचने स्थितः) । **अवोदोर्नियः** (३-३-२६) अवोत्पूर्वान्नयतेर्घञ्स्यात् । अवनायः (अधो-नयनम्) उन्नायः (ऊर्ध्वनयनम्) उन्नयः (उत्प्रेक्षा) इति तु बाहुलकात् । **कॄ धान्ये** (३-३-३०) धान्यविषयका-दुन्नीपूर्वकात्कॄधातोर्घञ्स्यात् । धान्यस्य उत्कारः निकारः (विक्षेपः)। अधान्ये तु भिक्षोत्करः पुष्पनिकरः (समूहः)। **यज्ञे समि स्तुवः** (३-३-३१) यज्ञविषयकात्संपूर्वकस्तुधातोर्घञ्स्यात् । छन्दोगाः समेत्य यस्मिन्देशे स्तुवन्ति स देशः संस्तावः । अन्यत्र तु संस्तवः (परिचयः) । **व्युपयोः शेतेः पर्याये** (३-३-३९) व्युपपूर्वात् शेतेर्घञ्स्यात् पर्याये गम्ये । पर्यायः प्राप्ता-वसरता । तव विशायः (पर्यायः) तव राजोपशायः । अन्यत्र तु संशयः विशयः (सन्देहः) उपशयः (समीपशयनम्) ।

णजादि—

कर्मव्यतिहारे णच्स्त्रियाम् (३-३-४३) क्रियायाः परस्परकरणं कर्मव्यतिहारः । तत्र भावे स्त्रीलिङ्गे णच्स्यात् । अत्राकर्तरिकारके इति नानुवर्तते व्याख्यानात् । **णचः स्त्रियामञ्** (५-४-१४) कर्मव्यतिहारे णज्विहितस्तदन्तात्स्त्रियामञ्स्यात्स्वार्थे । **न कर्मव्यतिहारे** (७-३-६) कर्मव्यतिहारे ऐच्न स्यात् । णचोऽतद्धितत्वेपि अत्रस्तद्धितत्वेन नय्वाभ्यामिति प्राप्तस्यैचो निषेधेनादिवृद्धिरेव अञन्तत्वान्ङीप् । वि अव क्रुश-व्यावक्रोशी (परस्परं निन्दकः) । वि अव हस्-व्यावहासी (परस्परं हासकः) । स्त्रियामित्युक्तेर्नेह-णच् किन्तु घञेव व्यतिपाकः (परस्परं पाकः) । कृत्यल्युटोबहुल-मिति नेह भवति व्यतीक्षा, व्यतीहा, व्यात्युक्षी (परस्परसेचनम्) । **अभिविधौ भाव इनुण्** (३-३-४४) अभिविधिरभिव्याप्तिः, क्रियागुणाभ्यां कार्त्स्न्येन सम्बन्धः । अभिविधौ गम्ये धातोर्भावे इनुणस्यात् । **अणिनुणः** (५-४-१५) अभिविधौ इनुण्विहितस्तदन्तात्स्वार्थेऽण्स्यात् । अणस्तद्धितत्वादादिवृद्धिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इनण्यनपत्ये इति नलोपाभावः । स्वभावत इदं क्लीबे । संरु-सांराविणं (समन्ताच्छब्दः) वर्तते। संद्रु-सांद्राविणम् (सर्वतः संद्रवः) । अनभिविधौ तु घञि संरावः संद्रावः ।

वि० **आक्रोशे ऽवन्योर्ग्रहः** (३-३-४५) दृष्टानुवृत्तिसामर्थ्याद्वञनुवर्तते नानन्तर इनुण् । अवनिपूर्वाद्ग्रहेर्घञ्स्याद्भावे । अवग्राहः (अभिभवः), निग्राहः (बाधः) ते भूयात् । अन्यत्र तु अवग्रहः पदस्य (पदच्छेदः) । निग्रहः (निरोधः) चौरस्य । **प्रे लिप्सायाम्** (३-३-४६) प्रपूर्वाद्ग्रहेर्घञ्स्याल्लिप्सायाम् । पात्रप्रग्राहेण चरति भिक्षुः पिण्डार्थी । पात्रं गृहीत्वेति यावत् । अन्यत्र तु पात्रप्रग्रहः ग्रहवृदृइत्यप्, **परौ यज्ञे** (३-३-४७) यज्ञविषये परिपूर्वाद्ग्रहेर्घञ्स्यात् । उत्तरः परिग्रहः (स्फ्येन वेदेः स्वीकरणम्) । अन्यत्र तु परिग्रहः (स्वीकारः) देवदत्तस्य ।

नौ वृ धान्ये (३-३-४८) वृ इति लुप्तपञ्चमीकं वृङ्वृञोर्ग्राहकम् । निपूर्वाद्वृधातोर्घञ्स्याद्धान्यविशेषेऽभिधेये । अपोऽपवादः । नीवाराः (व्रीहिविशेषाः) उपसर्गस्येति दीर्घः । अन्यत्र तु निवरा (नितरां वरणीया) कन्या । स्त्रियां क्तिनो विषयेपि बाहुलकादप् प्रवरा सेना, प्रवरा गौः, स्त्रीलिङ्गतापि लोकात् । **उदि श्रयतियौतिपूद्रुवः** (३-३-४९) उत्पूर्वेभ्य एभ्यो घञ्स्यात् । उद् श्रि-उच्छ्रायः (उच्चता) । उद्यु-उद्यावः, उत्पू-उत्पावः, उद्द्रु-उद्द्रावः । पतनान्ताः समुच्छ्रया इति तु बाहुलकात् । **विभाषाऽऽङि रुप्लुवोः** (३-३-५०) आङ्पूर्वाद्रौतेः प्लवतेश्च घञ्वा स्यात् । पक्षेऽप् । आरु-आरावः आरवः (शब्दः) । संप्लु-संप्लावः संप्लवः (आप्लवनम्) । **अवे ग्रहो वर्षप्रतिबन्धे** (३-३-५१) अवपूर्वाद्ग्रहेर्घञ्वा स्याद्वृष्टिप्रतिबन्धेऽभिधेये । देवस्य अवग्राहः अवग्रहः (देवकृतमवर्षणम्) । ग्रहवृद इति पक्षेऽप् । अन्यत्र तु अवग्रहः पदस्य (समस्तपदद्वयस्य विच्छिद्यपाठः) । **प्रे वणिजाम्** (३-३-५२) प्रपूर्वाद्ग्रहेर्घञ्वा स्यात् वणिजां सम्बन्धीचेत्प्रत्ययार्थः । वणिक्सम्बन्धेन तुलासूत्रं लक्ष्यते । तुलाप्रग्राहः तुलाप्रग्रहः (येन तुला प्रगृह्यते तत्सूत्रम्) । **रश्मौ च** (३-३-५३) प्रपूर्वाद्ग्रहेर्घञ्वा स्याद्रश्मावभिधेये । प्रग्राहः प्रग्रहः (अश्वादिसंयनार्थी रज्जुः-रश्मिः) । **वृणोतेराच्छादने** (३-३-५४) प्रपूर्वाद्वृणोतेर्घञ्वा स्यादाच्छादनविशेषेऽभिधेये । पक्षे ग्रहवृद इत्यप् । प्रावारः प्रवरः (प्रावरणम्) घञि उपसर्गस्येति दीर्घः । **परौ भुवो ऽवज्ञाने** (३-३-५५) परिपूर्वाद्भवतेर्घञ्वा स्यादवज्ञानेर्थे । परिभावः परिभवः (तिरस्कारः) अन्यत्र तु परिभवः (सर्वतो भवनम्) ।

प्रयोगाः—लेखं पाठं समाचर । माभूत्परीवादनवावतारः । सप्तवित्तागमा धर्म्या दायो लाभः क्रयो जयः, प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च । प्रस्तावसदृशं वचः । वचने स्थित आश्रवः । नीवारपाकः सम्पन्नः । प्रभावतः परिभवः । भूतनिकायो देहः । प्रस्तार प्रक्रिया ज्ञेया । प्रग्रहं शिथिलीकरोति । अवग्रहं वारय । व्यात्युक्षीमभिसरणग्रहामदीव्यन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अजादि—

एरच् (३-३-५६) भावे अकर्तरि कारके चेत्यनुवर्तत एव। इवर्णान्ताद्धातोरच्स्यात्। घञोपवादः। गुणायादेशौ। चि-चयः (समूहः)। जि-जयः। नि-नयः (नीतिः)। क्षि-क्षयः। **भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्** (वा) भी-भयम् (भीः)। वृष्-वर्षम् (वृष्टिः)। **ॠदोरप्** (३-३-५७) ऋवर्णान्तादुवर्णान्ताच्च धातोरप्स्यात्। घञोपवादः। कृ-करः (हस्तः)। गृ-गरः (विषम्)। शॄ-शरः (बाणः)। यु-यवः (ओषधिविशेषः)। लू-लवः (लेशः)। स्तु-स्तवः (स्तोत्रम्)। पू-पवः। यथार्हं करणादयोऽर्थाः। **वृक्षासनयोर्विष्टरः** (८-३-९३) अनयोर्विपूर्वस्य स्त्रः षत्वं निपात्यते। विस्तृ-विष्टरः (वृक्ष आसनं वा)। अर्थान्तरे तु विस्तरो वाक्यस्य। **ग्रहवृदृनिश्चिगमश्च** (३-३-५८) एभ्य अप्स्यात्। घञोपवादः निश्चेस्त्वचोपवादः। ग्रह-ग्रहः (ग्रहणं सूर्यादिर्वा)। वृ-वरः (श्रेष्ठः जामाता अर्थनीयो वा)। दृ-दरः (भयम्)। निश्चि-निश्चयः (अवधारणम्)। गम्-गमः (गमनम्)। एवम् आग्रहः आदरः सङ्गमः आगमः प्रवरः। **वशिरण्योरुपसंख्यानम्** (वा) वश्-वशः। रण्-रणः (संग्रामः)। **घञर्थे कविधानम्** (वा) **घञर्थे कविधानं स्थास्नापाव्यधिहनियुद्ध्यर्थम्** (वा) प्रतिष्ठन्तेऽस्मिन्धान्यानीति प्रस्थः (मानविशेषः)। आतोलोप इत्यालोपः। प्रस्थः (कटाहः)। प्रपिबन्त्यस्यामिति प्रपा (पानीयशाला)। विहन्त्यस्मिन्मनांसीति विघ्नः (प्रत्यूहः) गमहनेत्युपधालोपः होहन्तेरिति कुत्वम्। आयुध्यतेऽनेनेति आयुधम् (प्रहरणम्)। **द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम्** (वा) क्रियते शत्रुवधोऽनेनेति चक्रम्। स्थास्नेत्यादेरुपलक्षणतया कृञः के गुणाभावे द्वित्वेभ्यासकार्यम्। क्रम-चङ्क्रमः क्रमेः के द्वित्वेभ्यासकार्यम्। **उपसर्गेऽदः** (३-३-५९) सोपसर्गाददेरप्स्यात्। **घञपोश्च** (२-४-३८) अदेर्घस्लृस्याद्धञि अपि च। प्र अद्यते इति प्रघसः। विघसः (वैश्वदेवशिष्टमन्नम्)। अनुपसर्गे तु घञि घासः (तृणम्)। **व्यधजपोरनुपसर्गे** (३-३-६१) अनुपसर्गाभ्यामाभ्यामप्स्यात्। घञोपवादः। व्यधः (वेधनम्)। जपः (मानसक्रिया)। सोपसर्गे तु घञि उपजापः (भेदनीतिः)। **स्वनहसोर्वा** (३-३-६२) अनुपसर्गाभ्यामाभ्यामप् वा स्यात्। पक्षे घञ्। स्वनः स्वानः (शब्दः)। हसः हासः (हास्यम्)। सोपसर्गे तु प्रस्वानः प्रहासः। **यमः समुपनिविषु च** (३-३-६३) अनुपसर्गात्समुपनिविपूर्वाद्वा यमेरब्वा स्यात्। पक्षे घञ्। यमः (कृतान्तः), यामः (प्रहरः)। संयमः-संयामः (निग्रहः)। उपयमः उपयामः (विवाहः)। नियमः नियामः (व्यवस्था)। वियमः वियामः। **नौ गदनदपठस्वनः** (३-३-६४) निपूर्वेभ्य एभ्योऽब्वा स्यात्। पक्षे घञ्। निगदः निगादः (मूलपाठः) निनदः निनादः (शब्दः)। निपठः निपाठः। निस्वनः निस्वानः (शब्दः)। **क्वणो वीणायाञ्च** (३-३-६५) नौ अनुपसर्गे च वीणाविषयात् क्वणतेरब्वा स्यात्। वीणाग्रहणं प्राद्यर्थम्। क्वणः क्वाणः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निक्वणः निक्वाणः (शब्दः)। प्रक्वणः प्रक्वाणः (वीणाशब्दः)। **नित्यं पणः परिमाणे** (३-३-६६) पणतेर्नित्यमप्स्यात्परिमाणे गम्ये। मूलकपणः (व्यवहारार्थं मूलकादीनां मुष्टिपरिमितो बन्धः) एवं शाकपणः। अन्यत्र पाणः। **मदोऽनुपसर्गे** (३-३-६७) उपसर्गभिन्ने उपपदे मदेरप्स्यात्। घञोपवादः। धनमदः विद्यामदः कुलमदः। उपसर्गे तु घञेव उन्मादः। **प्रमदसंमदौ हर्षे** (३-३-६८) एतौ निपात्येते हर्षेऽभिधेये। प्रमदः संमदः (हर्षः)। अन्यत्र तु घञ् प्रमादः (अनवधानता)। **समुदोरजः पशुषु** (३-३-६९) सम्पूर्वोऽजिः समुदाये उत्पूर्वश्च प्रेरणे वर्तते, तस्मात्पशुविषयकादप्स्यात्। घञोपवादः। अघञपोरित्युक्तेर्वीभावो न। समजः (पशूनां सङ्घः) उदजः (पशूनां प्रेरणम्) अन्यत्र तु घञ्-ब्राह्मणानां समाजः (समूहः) क्षत्रियाणामुदाजः (प्रेरणम्)। **अक्षेषु ग्लहः** (३-३-७०) अक्षशब्देन देवनं लक्ष्यते, तत्र पणरूपेण यद्ग्राह्यं तत्र ग्लह इति निपात्यते। अक्षस्य ग्लहः (पणः)। ग्रहेरप् रेफस्य लत्वं च। अन्यत्र तु ग्रहवृदृइत्यवेव पादस्य ग्रहः (ग्रहणम्)। **हनश्च वधः** (३-३-७६) अनुपसर्गाद्धन्तेर्भावे अप्स्यात् वधादेशश्च। हन्-वधः (हननम्) चाद् घञ् घातः हनस्त-इति तः चजोरिति कुत्वम्। **सङ्घोद्घौ गणप्रशंसयोः** (३-३-८६) समुत्पूर्वाद्धन्तेरप् टिलोपो घत्वं च निपात्यते, यथासंख्यं गणेऽभिधेये प्रशंसायां च गम्यमानायाम्। सङ्घः (संहननम्) भावेऽप्। उद्धन्यते (उत्कृष्टो ज्ञायते) इति उद्घः मनुष्यः (प्रशस्यः)। कर्मण्यप्। मत्यर्थानां बुद्ध्यर्थत्वादत्र हन्तिर्ज्ञाने। **ड्वितः क्त्रिः** (३-३-८८) भावे अकर्तरि च कारके इति वर्तते। ड्वितोर्धातोः क्त्रिः स्यात्। अयं भाव एव स्वभावात्। क्त्रिप्रत्ययान्तान्निर्वृत्तेऽर्थे क्त्रेर्मम्नित्यमिति मप्। नित्यग्रहणात्क्त्रिर्मब्विषयः, अत एव क्त्र्यन्तेन सह न विग्रहः। डुपचष्-पाकेन निर्वृत्तं पक्त्रिमं धान्यम्। डुवप्-वापेन निर्वृत्तम् उप्त्रिमम्। कित्वाद्वचिस्वपीति सम्प्रसारणम्। डुकृञ्-क्रियया निर्वृत्तं कृत्रिमम्। **ट्वितोऽथुच्** (३-३-८९) ट्वितो धातोरथुच्स्यात्। अयमपि स्वभावाद्भाव एव। टुवेप्-वेपथुः (कम्पः)। टुओश्वि-श्वयथुः (शोथः)। टुक्षु-क्षवथुः (छिक्का)। **यजयाचयतविच्छप्रच्छरक्षो नङ्** (३-३-९०) भावेऽकर्तरि कारके च एभ्यो नङ् स्यात्। इज्यतेऽस्मिन्निति यज्-यज्ञः (क्रतुः)। याच-याच्ञा (याचनम्)। यत्-यत्नः (श्रमः)। विच्छ-विश्नः ङित्वान्न गुणः च्छ्वोरिति शः। प्रच्छ-प्रश्नः (पृच्छा)। प्रश्नेचासन्नेति निर्देशाद्ग्रहिज्येति संप्रसारणं न। रक्ष-रक्ष्णः। **स्वपो नन्** (३-३-९१) अस्मान्नन्स्यात्। स्वप्-स्वप्नः (स्वापः)। **उपसर्गे घोः किः** (३-३-९२) सोपसर्गाद्घुसंज्ञकाद्धातोः किः स्यात् भावेऽकर्तरि कारके च। कित्वादातोलोपः। प्रधा-प्रधिः अन्तर्धा अन्तर्धिः (अन्तर्धानम्) किविधावन्तःशब्दस्योपसर्गत्वम्। उपाधीयतेऽनेनेति उपाधिः (स्वधर्माधायकः)। एवं निधिः सन्धिः आधिः व्याधिः। विधिरिति तु विधधातोरिगुपधादिनिः नतु धाञः किः कर्तरि तदभावात्। **कर्मण्यधिकरणे च** (३-३-९३) कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे। जलानि धीयन्ते-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मिन्निति जलधिः (समुद्रः)। एवं वारिधिः नीरधिः अब्धिः क्षीरधिः उदधिः उदकस्योदःसंज्ञाया-मित्युदादेशः। शरधिः इषुधिः (निषङ्गः)।

वि० **प्रजने सर्तेः** (३-३-७१) प्रजनं प्रथमगर्भग्रहणम् तत्र विषये सर्तेरप्स्यात्। गवाम् उपसरः (गर्भाधानार्थमुपसरणम्)। अवसरः प्रसरः इति तु पुंसिसंज्ञायामित्यधिकरणे घे बोध्यम्। **ह्वः सम्प्रसारणं च न्यभ्युपविषु** (३-३-७२) न्यादिपूर्वात् ह्वयतेरप् सम्प्रसारणं च स्यात्। निहवः अभिहवः। **आङि युद्धे** (३-३-७३) आङ्पूर्वाद्ध्वयतेरप्संप्रसारणं च स्याद्युद्धेऽभिधेये। आहूयन्तेऽस्मिन्निति आहवः (युद्धम्)। अन्यत्र घञि आह्वायः। **निपानमाहावः** (३-३-७४) आहाव इत्याङ्पूर्वह्वयतेरप्संप्रसारणं वृद्धिश्च निपात्यते। आहावः (निपानम्-उपकूपजलाशयः)। **मूर्तौ घनः** (३-३-७७) मूर्तिः काठिन्यं, तस्मिन्नभिधेये हन्तेरप्स्यात् घनश्चादेशः अभ्रघनः (मेघस्य काठिन्यम्)। सैन्धवघनमानय इति तु काठिन्यधर्मवति लक्षणया धर्मिपरः। **अगारैकदेशे प्रघणः प्रघाणश्च** (३-३-७९) प्रपूर्वस्य हन्तेरेतौ निपात्येते गृहैकदेशे वाच्ये। प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः प्रघाणः (अलिन्दः-द्वारबाह्यप्रकोष्ठः) कर्मण्यप् णत्वं पक्षे वृद्धिश्च। **उद्घनोऽत्याधानम्** (३-३-८०) उद्घन इति निपात्यतेऽत्याधाने वाच्ये। उपरिस्थापनमत्याधानम्। यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते स उद्घनः अधिकरणेऽप्। अन्यस्तु उद्घातः (उच्चांशः)। **अपघनोऽङ्गम्** (३-३-८१) अपघन इति निपात्यते शरीरावयवेऽभिधेये। अपहन्यतेऽनेनेति अपघनः (पाणिः पादो वा) अन्यत्राऽपघातः। **करणेऽयोविद्रुषु** (३-३-८२) एषूपपदेषु हन्तेः करणेऽप्स्याद्घनादेशश्च। अयोहन्यतेऽनेनेति अयोघनः। द्रुर्हन्यतेनेनेति द्रुघनः (परशुः)। **स्तम्बे क च** (३-३-८३) स्तम्बे उपपदे हन्तेः करणे कः स्यादप् घनादेशश्च। स्तम्बो हन्यतेनेनेति स्तम्बघ्नः के गमहनेत्युपधालोपः चजोरिति कुत्वम्। स्तम्बघनः अपि घनादेशः। **परौ घः** (३-३-८४) परिपूर्वाद्धन्तेः करणेऽप्स्याद्घश्चादेशः। परितो हन्यतेऽनेनेति परिघः (आयुधविशेषः)। **परेश्च घाङ्कयोः** (८-२-२२) परे रेफस्य लो वा स्याद्घशब्देऽङ्कशब्दे च। परिघः पलिघः। पर्यङ्कः पल्यङ्कः। इहतरतमपौघ इति कृत्रिमघस्य ग्रहणं न व्याख्यानात्। **उपघ्न आश्रये** (३-३-८५) उपघ्न इति उपपूर्वाद्धन्तेरप् उपधालोपश्च निपात्यते आश्रयेऽभिधेये। आश्रयशब्देन सामीप्यं लक्ष्यते। पर्वतेन उपहन्यते (सामीप्येन गम्यते) इति पर्वतोपघ्नः कर्मण्यप्।

प्रयोगाः—निग्रहोऽनुग्रहोथवा। गौरिवाकृत नीशारः प्रायेण शिशिरे कृशः। स त्वद्विना मे हृदयं निकारः। प्रतिकारविधानमायुषः सति शेषेहि फलाय कल्पते। उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये। प्रस्तावसदृशं वचः। माभूत्परीवादनवावतारः। मया मायानुभावेन। क्षम्यतां मेऽपराधः। आधिव्याधिप्रपीडितः। परिग्रहोहि दुःखाय। शब्दे निनादनिनदध्वनिध्वानरवस्वनाः। कामःक्रोधस्तथामोहो लोभोऽमर्षश्च शत्रवः। लाभोयमेव भूपालसेवकानां न चेद्वधः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्त्रियां प्रत्ययाः—

स्त्रियां क्तिन् (३-३-९४) स्त्रीत्वविशिष्टे भावे अकर्तरि कारके च धातोः क्तिन्स्यात्। कृत्यल्युटो बहुलमिति यावत्स्त्रियामित्यधिकारः। घञोऽपवादः अजपौ तु परत्वाद्बाधेते। स्त्रीत्वविशिष्टे भावादौ क्तिन्नेव, घञादयः पुंस्त्वविशिष्टे सावकाशाः। वासरूपविधिर्नात्रप्रवर्तते अस्त्रियामित्युक्तेः। कृ-कृतिः (करणम्)। एवं चि-चितिः। स्तु-स्तुतिः। स्फायी-स्फातिः। स्फीतिरिति तु क्तान्ताद्धात्वर्थे णिचि अच इरिति इप्रत्ययेनोपपादनीयं निष्ठायामेव स्फायः स्फीभावविधानात्। मन-मतिः अनुनासिकलोपः, गम्-गतिः, बुध-बुद्धिः, लभ-लब्धिः, वृध-वृद्धिः झषस्तथोरिति तस्य धत्वं जश्त्वं च। **श्रुयजीषिस्तुभ्यः करणे** (वा) करणे ल्युटोपवादः। श्रूयतेनेनेति श्रुतिः (कर्णः)। यजेरिषेश्च इष्टिः (यागः), स्तुतिः (स्तोत्रम्), **चायतेः क्तिनि चिभावो वाच्यः** (वा) चायृ पूजानिशामनयोः-अपचितिः (पूजा)। **ग्लाम्लाज्याहाभ्यो निः** (वा) ग्लानिः म्लानिः ज्यानिः (वयोहानिः) हानिः। **संपदादिभ्यः क्विप्** (वा) क्तिन्नपीष्यते। सम्पद् सम्पत्तिः। विपत् विपत्तिः। आपत् आपत्तिः। प्रतिपत् प्रतिपत्तिः (ज्ञानम्) परिषत् पर्षत् (सभा)। **स्थागापापचो भावे** (३-३-९५) एभ्यः स्त्रियां भावे क्तिन् स्यात्। स्थादिभ्य आतश्चोपसर्ग इति पचेः षिद्भिदादिभ्य इत्यङोपवादः। प्रस्था-प्रस्थितिः (प्रस्थानम्) द्यतिस्यतीतीत्वम्। उपस्था-उपस्थितिः। संगा-सङ्गीतिः। उद्गा-उद्गीतिः। संपा-संपीति घुमास्थेतीत्वम्। पच-पक्तिः (पाकः)। अवस्था संस्था इति तु व्यवस्थायामिति ज्ञापकादङि। **ऊतियूतिजूतिसातिहेतिकीर्तयश्च** (३-३-९७) एते क्तिन्नन्ता निपात्यन्ते। अव-उति-ज्वरत्वरेत्यूठ्। यु-यूतिः। जु-जूतिः अनयोर्दीर्घत्वं च निपात्यते। षो सातिः द्यतिस्यतीतीत्वाभावो निपात्यते। हन्यतेऽनेनेति हेतिः (आयुधम्)। निपातनान्नस्येत्वे गुणः, हिनोतेर्गुणो वा। कृत-कीर्तिः स्वार्थिकण्यन्ताण्यासश्रन्थेति युचं बाधित्वा क्तिन्। **व्रजयजोर्भावे क्यप्** (३-३-९८) आभ्यां भावे स्त्रियां क्यप्स्यात्। क्तिनोपवादः। व्रज-व्रज्या गतिः। यज-इज्या (यागः) वचिस्वपीति संप्रसारणम् स्त्रीत्वाट्टाप्। **संज्ञायां समजनिषदनिपतमदविदषुञ्शीङ्भृञिणः** (३-३-९९) समजादिभ्यः स्त्रियां भावादौ क्यप्स्यात्संज्ञायाम्। **अजेः क्यपि वीभावो नेति वाच्यम्** (वा) समजन्ति (सङ्गीभवन्ति) अस्यामिति समज्या (सभा)। निषीदन्त्यस्यामिति निषद्या (आपणः)। निपतन्त्यस्यामिति निपत्या (पिच्छिलभूमिः) मन्यतेनयेति मन्या (गलपार्श्वशिरा)। विदन्त्यनयेति विद्या (वेदादिः)। सूयतेस्यामिति सुत्या (अभिषवः) ह्रस्वस्येति तुक्। शय्यतेस्यामिति शय्या। भ्रियतेनयेति भृत्या (जीविका)। ईयते (गम्यते) नयेति इत्या (शिविका)। कुमारभृत्या (गर्भिणीपरिचर्या)। **कृञः श च** (३-३-१००) **कृञः** इति योगविभागः कृञः क्यप्स्यात्। कृत्या। **श च**। चात्क्तिन् क्रिया कृञः शेरिङ्शयेति रिङ् शित्वेन सार्वधातुकतया कित्वाद्गुणाभावे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इयङ्। कृतिः। स्त्रियां वासरूपविध्यभावेन क्यप्क्तिनोर्बाधे योगविभागेन पुनर्विधिः। **इच्छा** (३-३-१०१) इच्छेति इषेर्भावे शो यगभावश्च निपात्यते। इष-इच्छा इषुगमीति छः। **परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्** (वा) शो यक्च निपात्यते। परिचर-परिचर्या (सेना)। परिसृ-परिसर्या (परिसरणम्) गुणोपि। मृग अन्वेषणे चुरादावदन्तः अतोलोपाभावोपि, शे यकि णिलोपः मृगया (आखेटः) अटतेः शे यकि टचस्य द्वित्वे पूर्वभागे यकारनिवृत्तिर्दीर्घश्च अटाट्या (भ्रमणम्)। **जागर्तेरकारो वा** (वा) पक्षे शः शे यक् जाग्रोविचिण्णलिति गुणः जागरा जागर्या (जागरणम्) क्तिनो बाधेन जागृतिरिति दुःसाधम्। **अ प्रत्ययात्** (३-३-१०२) प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। क्तिनोपवादः। कृसन्-चिकीर्ष-चिकीर्षा (कर्तुमिच्छा)। एवं हृ-जिहीर्षा, दा-दित्सा, लभ-लिप्सा, भुज-बुभुक्षा, आप्-ईप्सा, पठ-पिपठिषा, पा-पिपासा, कित-चिकित्सा, विकित-विचिकित्सा (संशयः) मान-मीमांसा (विचारः), श्रु-शुश्रूषा (श्रोतुमिच्छा सेवा च), दृश-दिदृक्षा, भू-बुभूषा, पुत्रकाम्य-पुत्रकाम्या (पुत्रेच्छा), कण्डूय-कण्डूया (कण्डूतिः)। **गुरोश्च हलः** (३-३-१०३) गुरुमतो हलन्तात्स्त्रियामकारः स्यात्। क्तिनोपवादः। ईह-ईहा (चेष्टा), ऊह-ऊहा (तर्कः)। **निष्ठायां सेट इति वक्तव्यम्** (वा) नेह अः किन्तु क्तिन् आप्तिः तितुत्रेति नेट्। दीप्तिः। **षिद्भिदादिभ्योऽङ्** (३-३-१०४) षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् स्यात्। षितः-जॄष्-जरा (वार्धक्यम्) ऋदृशोऽङीति गुणः। त्रपूष्-त्रपा (लज्जा)। भिदादयः- भिद-भिदा (विदारणं एवायम्) अन्यत्र तु भित्तिः (कुडचम्) ङित्वान्न गुणः। छिद-छिदा द्वैधीकरणएवायम् अन्यत्र तु छित्तिः (छिद्रम्)। गुह-गुहा गिर्येकदेशौषध्योरेवायम् अन्यत्र तु गूढिः। आऋ- आरा (चर्मप्रसेविका), हृ-हारा, कॄ-कारा (बन्धनस्थानम्), तॄ-तारा (नक्षत्रम्), धॄ-धारा ऋदृशोऽङीति गुणे दीर्घत्वं निपात्यते। **आरा शस्त्र्याम्** (वा) अन्यत्र आर्तिः (पीडा) **धारा प्रपाते** (वा) धृतिरन्या। मृज-मृजा (शुद्धिः) रेखा- लेखा, चूडा, शिखा। **कृपेः सम्प्रसारणं च** (गण) कृपा (दया) पीड-पीडा। **चिन्तिपूजिकथिकुम्बिचर्चश्च** (३-३-१०५) एभ्यः स्त्रियामङ् स्यात्। ण्यासश्रन्थ इति युचोपवादः। चिति-चिन्ता, पूज-पूजा, कथ-कथा, कुबि-कुम्बा (आच्छादनम्) चर्च-चर्चा (अध्ययनम्)। चकाराद्युजपीतिवृत्तिः चिन्तनेत्यादि। **आतश्चोपसर्गे** (३-३-१०६) आकारान्तेभ्य उपसर्गे उपपदे स्त्रियामङ् स्यात्। क्तिनोपवादः। आस्था-आस्था (आदरः)। उप-दा-उपदा (उपायनम्) विश्रवधा- व्यवधा (व्यवधानम्) विधा (प्रकारः) सन्धा (प्रतिज्ञा) उपधा (छलम्)। **श्रदन्तरोरुपसर्गवद्वृत्तिः** (वा) श्रद्धा (आदरः) अन्तर्धा (अन्तर्धानम्)। उपसर्गेघोः किरिति किप्रत्यये अन्तर्धिः। **ण्यासश्रन्थो युच्** (३-३-१०७) ण्यन्तेभ्य आसश्रन्थाभ्यां च स्त्रियां युच्स्यात्। अप्रत्ययस्यापवादः। कृ णि-कारणा। आकारणा (आह्वानम्) एवं हृ-हारणा, धृ-धारणा,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आस-आसना, श्रन्थ-श्रन्थना। आस्या इति तु ऋहलोरिति ण्यति। वासरूपनिषेधस्तु स्त्रीप्रकरणविषयस्यैवोत्सर्गापवादस्य। **घट्टिवन्दिविदिभ्यश्चेति वाच्यम्** (वा) घट्ट-घट्टना। वदि-वन्दना। विद-वेदना। **इषेरनिच्छार्थस्य** (वा) अनुइष-अन्वेषणा (गवेषणम्)। **परेर्वा** (वा) पक्षे क्तिन्। परिइष-पर्यैषणा परीष्टिः (अन्वेषणम्)। **रोगाख्यायां ण्वुल्बहुलम्** (३-३-१०८) रोगाख्यायां गम्यमानायां स्त्रियां धातोर्बहुलं ण्वुल्स्यात्। क्तिन्नादीनामपवादः। प्रच्छर्द-प्रच्छर्दिका (वमिः) प्रत्ययस्थादितीत्वम्। प्रवह-प्रवाहिका (ग्रहणी)। विचर्च-विचर्चिका (पामा)। क्वचिन्न शिरोर्तिः (शिरःपीडा), अर्दक्तिन् तितुत्रेति नेट्। **धात्वर्थनिर्देशे ण्वुल्वक्तव्यः** (वा) आस-आसिका (आसनम्)। शी-शायिका (शयनम्)। **इक्श्तिपौ धातुनिर्देशे** (वा) धातुस्वरूपे निर्देश्ये इक्श्तिपौ भवतः। पच-पचिः पचतिः शित्वेन शप्। भू-भवतिः, भिद्-भिदिः, छिद-छिदिः। **वर्णात्कारः** (वा) वर्णनिर्देशे कारः। अकारः आकारः ककारः। **रादिफः** (वा) रेफः। अत्रस्त्रियामित्यसम्बन्धाद्वासरूपविधिना कारोपि रकारः। **मत्वर्थाच्छः** (वा) बहुलवचनादकारलोपः मत्वर्थीयः। **इणजादिभ्यः** (वा) स्त्रियामित्येव। धात्वर्थनिर्देशे प्राप्तस्य ण्वुलोपवादोयम्। अज-आजिः बाहुलकादजेर्वीभावो न। अत-आतिः। **इञ्वपादिभ्यः** (वा) धात्वर्थनिर्देशे। वप-वापिः, वस-वासिः। **इक्कृष्यादिभ्यः** (वा) धात्वर्थनिर्देशे। कित्वान्न गुणः। गॄ-गिरिः, ऋतइद्धातोः।

वि० १. धातोर्निर्देशोनुकरणम् श्तिप्प्रत्यये अकर्तृवाचकत्वेपि उपसर्गात्सुनोतीत्यादिनिर्देशात् शबादि विकरणाः। बहुलमित्यनुवृत्तेः क्वचिन्न प्रत्ययः गुप्तिज्किद्भ्यःसनित्यादि अत्रास्त्रियामिति न संबध्यते व्याख्यानात्।

वि० २. वर्णात्कारइत्यस्य वर्णानुकरणात्कारइत्यर्थः। वर्णत्वव्याप्यकत्वरवत्वादिधर्मावच्छिन्नबोधकात् कारप्रत्ययो भवति। तेन प्रत्येकवर्णशब्दादेव प्रत्ययो नतु समुदायात्। ककार इत्यादौ अकारस्योच्चारणमात्रार्थतया कादिहल्मात्रबोधः। एवकारः चीत्कारः फूत्कारः इत्यादौ एव इतिकरणमेव कार इति घञा उपपादनीयम्, नत्वयं कारप्रत्ययः। उच्चैस्तरां वा वषट्कार इत्यादिनिर्देशात्क्वचित्सङ्घातादपि भवतीत्याहुः। उक्तं च कैयटेन क्वचिद्वर्णसमुदायानुकरणादपि एवकार इति। रकारादीनि नामानि शृण्वतो मम पार्वतीत्यादिप्रयोगो रादिफ इत्यत्र वासरूपविधिना कारप्रत्यये उपपद्यते। कारप्रत्ययस्य धातोरविहितत्वेपि कृदतिङित्यधिकारोक्तकृत्संज्ञया तदन्तस्य प्रातिपदिकत्वात्स्वाद्युत्पत्तिः।

वि० ३. संज्ञायाम् (३-३-१०९) संज्ञायां धातोर्ण्वुल्स्यात्। उद्दालकस्य (श्लेष्मान्तकस्य) पुष्पाणि भज्यन्ते यस्यां सा उद्दालकपुष्पभञ्जिका (क्रीडाविशेषः)। अभ्यूषः पूरिका (अपूपविशेषः) खाद्यते यस्यां सा अभ्यूषखादिका (उत्सवविशेषः) समितावेसने जीरहिङ्गुमारीचयोजिते, घृताक्तेजलसंयुक्ते पीठस्योपरिवेल्लिते। घृतेन वाथ तैलेन भर्जिता पूरिकामता इति भोजनकौतूहले। सालस्य भञ्जनं यस्यां सा सालभञ्जिका। **विभाषाख्यानपरिप्रश्नयोरिञ्च** (३-३-११०) परिप्रश्ने आख्याने च गम्ये धातोरिञ्स्यात्। चाण्वुल्, विभाषोक्तेर्यथाप्राप्तमन्येपि। पूर्वं परिप्रश्नः पश्चादुक्तकथन-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माख्यानम् । त्वं कां कारिं, कारिकां, क्रियां, कृत्यां, कृतिं वाऽकार्षीः । सर्वां, कारिं, कारिकां, क्रियां, कृत्यां, कृतिं वाऽकार्षम् । एवं गणिं, गणिकां, गणनाम्, पाचिं, पाचिकां, पचां, पक्तिम्, इज्याम् इष्टिमित्यादि । **पर्यायार्हर्णोत्पत्तिषु ण्वुच्** (३-३-१११) पर्यायः परिपाटीक्रमः, अर्हणम् अर्हः योग्यता, ऋणम्, उत्पत्तिः एषु द्योत्येषु धातोर्ण्वुच्स्यात् । पर्याये-भवत आसिका (आसनपर्यायः), मम शायिका (शयनक्रमः), अग्रगामिका (अग्रगमनपरिपाटी) । अर्हे-अर्हति भवानिक्षुभक्षिकाम् । ऋणे-इक्षुभक्षिकां मे धारयसि, पयःपायिकां धारयसि । उत्पत्तौ-इक्षुभक्षिका उपपादि, ओदनभोजनिका उत्पन्ना । **आक्रोशे नञ्यनिः** (३-३-११२) विभाषेति निवृत्तम् । नञ्युपपदे धातोरनिः स्यादाक्रोशे गम्ये । क्तिन्नादीनामपवादः । अजीवनिः (अजननं) शठ ते भूयात् । अकरणिस्ते वृषल भूयात् । अनाक्रोशे तु अकृतिः शठस्य ।

प्रयोगाः— इच्छा मे सत्क्रियायां वः । धारणाध्यानसमाधयः संयमाः । शकारोयं सकारो वा । भवति भावमिवास्तिधातुः । आसिका शायिका वा । प्रग्राहिकातिभीषणा । वेदनानिग्रहो जातः । कीर्त्या प्रोद्भासिता भूमिः । सम्पदि यस्य न हर्षो विपदि विषादो रणे च भीरुत्वम् । लिप्सया व्याकुला मतिः । क्रिया हि वस्तूपहिता प्रसीदति । तस्य निमित्तपरीष्टिः । शास्त्रचर्चां समाचर ।

ल्युडादि—

कृत्यल्युटो बहुलम् (३-३-११३) भावेऽकर्तरि कारके इति स्त्रियामिति संज्ञायामिति च निवृत्तम् । कृत्यप्रत्ययाः ल्युट् च बहुलमर्थेषु भवन्ति । राज्ञा भुज्यन्ते इति राजभोजनाः शालयः कर्मणि ल्युट् । राजा आच्छाद्यते यैरिति राजाच्छादनानि वासांसि करणे ल्युट् । स्नान्त्यनेनेति स्नानीयं चूर्णम् करणेऽनीयः । **नपुंसके भावे क्तः** (३-३-११४) नपुंसकलिङ्गे भावे क्तः स्यात् । **ल्युट् च** (३-३-११५) नपुंसके भावे धातोर्ल्युट् च स्यात् । हस्-हसितं, हसनं छात्रस्य । एवं शयितं शयनम्, आसितम् आसनम्, गतं गमनम् । योगविभाग उत्तरार्थः । **कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्** (३-३-११६) येन कर्मणा संस्पृश्यमानस्य शरीरसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे धातो नपुंसके भावे ल्युट् स्यात् । पूर्वेण सिद्धे नित्यसमासार्थं वचनम् । पयःपानं सुखम् । (पयसा स्पृश्यमानशरीरस्य जनस्य सुखजनकम्) । ओदनभोजनं सुखम् (ओदनेन स्पृश्यमानशरीरस्य सुखकारकम्) । यत्र कर्मणः शरीरे संस्पर्शत एव सुखं न तु स्वरूपत एव पानभोजनादितस्तद्विषयकमिदमिति संस्पर्शग्रहणम् । कर्मणीत्युक्तेर्नेह तूलिकाया उत्थानं सुखम् । संस्पर्शेत्युक्तेर्नेह अग्निकुण्डस्योपासनं सुखम् । कर्तुरित्युक्तेर्नेह गुरोः स्नापनं सुखम् । शरीरेत्युक्तेर्नेह पुत्रस्य परिष्वञ्जनं सुखम् (मनोमोदकम्) । सर्वत्र प्रत्युदाहरणेष्वसमासः । **वा यौ** (२-४-५७) अजेर्वी वा स्याद्यौ । प्रवयणं प्राजनं वा । **करणाधिकरणयोश्च** (३-३-११७) करणेऽधिकरणे च धातोर्ल्युट् स्यात् । इध्मं प्रवृश्च्यतेनेनेति इध्मप्रव्रश्चनः कुठारः । गौर्दुह्यतेस्यामिति गोदोहनी स्थाली । टित्वात्स्त्रियां ङीप् । एवं पलाशशातनः, शक्तुधानी, अङ्गारधानी । **पुंसि संज्ञायां घः प्रायेण** (३-३-११८) पुंलिङ्गयोः करणाधिकरणयोर्धातोर्घः स्यात्संज्ञायाम् । प्रायग्रहण-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मकारात्स्न्यर्थम्। **छादेर्घेऽद्व्युपसर्गस्य** (६-४-९६) द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे। दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छदः (ओष्ठः)। प्रच्छाद्यतेऽनेनेति प्रच्छदः (आच्छादनवस्त्रम्)। एवम् उरच्छदः रदच्छदः। अद्वीत्युक्तेर्नेह-समुपच्छादः। अधिकरणे-आकुर्वन्त्यस्मिन्निति आकरः (खनिः)। आलीयन्तेस्मिन्निति आलयः (गृहम्)। पुंसीत्युक्तेर्नेह-प्रसाधनम्। संज्ञायामित्युक्तेर्नेह-प्रहरणः (दण्डः)। **गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च** (३-३-११९) एते घान्ता निपात्यन्ते। हलश्चेति वक्ष्यमाणस्य घञोपवादः। गावश्चरन्त्यस्मिन्निति गोचरः (देशः)। सञ्चरन्त्यनेनेति सञ्चरः (मार्गः)। वहन्त्यनेनेति वहः (स्कन्धः)। व्रजन्त्यस्मिन्निति व्रजः (गोष्ठम्)। व्यजन्त्यनेनेति व्यजः (व्यजनम्) निपातनादजेर्वीभावो न। आपणन्त्यस्मिन्निति आपणः (पण्यस्थानम्)। निगच्छन्त्यस्मिन्निति निगमः (छन्दः)। चात्कषः निकषन्त्यस्मिन्निति निकषः (शाणः)। **अवे तॄस्त्रोर्घञ्** (३-३-१२०) अव उपपदे आभ्यां करणाधिकरणयोर्घञ्स्यात्संज्ञायाम्। घापवादः। अवतरन्त्यनेनेति अवतारः कूपादेः। अवस्तृणन्त्यनेनेति अवस्तारः (जवनिका)। **हलश्च** (३-३-१२१) पुंसिसंज्ञायां करणाधिकरणयोश्चेत्यनुवर्तते। हलन्ताद्धातोः करणाधिकरणयोः संज्ञायां घञ् स्यात्। घापवादः। रमन्ते योगिनोस्मिन्निति रामः। अपमृज्यतेनेन व्याध्यादिरिति अपामार्गः। विमृज्यतेनेनेति विमार्गः (समूहनी)। एवं लिख-लेखः, विद-वेदः, लिप-लेपः, बन्धः-बन्धः, मृज-मार्गः। **अध्यायन्यायोद्यावसंहाराश्च** (३-३-१२२) एते घञन्ता निपात्यन्ते। अहलन्तार्थं आरम्भः। अधीयतेस्मिन्निति अध्यायः। नीयतेनेनेति न्यायः। उद्युवन्त्यस्मिन्निति उद्यावः। संह्रियन्तेनेनेति संहारः। **अवहाराधारावायानामुपसंख्यानम्** (वा) अवह्रियतेनेनेति अवहारः आध्रियतेस्मिन्निति आधारः।

वि० **उदङ्कोऽनुदके** (३-३-१२३) उदङ्क इति उत्पूर्वादञ्चतेर्घञ् निपात्यते नतूदके। घृतमुदच्यते (उद्ध्रियते)-स्मिन्निति घृतोदङ्कः (चर्ममयं भाण्डम्) चजोरिति कुत्वम्। उदके तु उदकोदञ्चनः घञ इव घस्यापि प्रतिषेधेन ल्युडेव। **जालमानायः** (३-३-१२४) आनाय इत्याङ्पूर्वान्नयतेर्घञ् निपात्यते जाले वाच्ये। आनीयन्ते मत्स्यादयोनेनेति आनायः (जालम्)।

प्रयोगाः—गतं तिरश्चीनमनूरुसारथेः। आधारबन्धप्रमुखैर्विशेषैः। उरच्छदमपावृतं मधुरिमाथ दन्तच्छदे। अपामार्गस्य पत्राणि। अष्टावध्यायाः पाणिनीये व्याकरणे। दशावताराः परमस्य पुंसः। पुस्तकधान्यां पुस्तकं निधेहि। राजभोजनशालयः। पुण्यकृद्गोचरोत्सर्गः। रामनाम मनोहरम्।

खलर्थानि—

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् (३-३-१२६) करणाधिकरणयोरिति निवृत्तम्। एषु दुःखसुखार्थेषूपपदेषु धातोः खलस्यात्। तयोरेवकृत्यक्तखलर्था इति भावे कर्मणि च। दुरिति दुःखार्थे, ईषत् सुरिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुखार्थे । दुःखेन क्रियते इति दुष्करः कटो भवता । सुखेन क्रियते इति ईषत्करः सुकरः । एवं दुष्पठः दुर्लेखः दुर्भोजः ईषत्पठः सुपठः ईषल्लेखः सुलेखः । **उपसर्गात्खल्घञोः** (७-१-६७) उपसर्गात्परस्यैव लभेर्नुम्स्यात्खल्घञोः । लभेश्चेति सिद्धे नियमार्थमिदम् । सुखेन प्रलभ्यते इति ईषत्प्रलम्भः सुप्रलम्भः दुःखेन प्रलभ्यते इति दुष्प्रलम्भः । घञि-आलभ्-आलम्भः (स्पर्शो हिंसा वा) । उपआलभ्-उपालम्भः (आक्षेपः) । विप्रलभ-विप्रलम्भः (वियोगो वञ्चनं वा) । उपसर्गादित्युक्तेर्नेह ईषत्लभः लाभः । **न सुदुर्भ्यां केवलाभ्याम्** (७-१-६८) उपसर्गान्तररहिताभ्यां सुदुर्भ्यां परस्य लभेर्नुमस्यात्खल्घञोः । सुलभः दुर्लभः । केवलोक्तेर्नेह सुप्रलम्भः अतिदुर्लम्भः । यदा तु स्वती पूजार्थकौ कर्मप्रवचनीयौ तदा उपसर्गत्वाभावेन उपसर्गसाहित्याभावान्न नुम् अतिसुलभम् अतिदुर्लभम् । **आवश्यकाधमर्ण्ययोर्णिनिः** (३-३-१७०) अवश्यंभावविशिष्टे आधमर्ण्यविशिष्टे च कर्तरि वाच्ये धातोर्णिनिः स्यात् । अवश्यङ्कारी (अवश्यंकर्ता) । शतन्दायी (शतदानाधमर्णः) अवश्यमित्यव्ययम् मयूरव्यंसकादिसमासः । सहस्रंदायी । **कृत्याश्च** (३-३-१७१) आवश्यकाधमर्ण्ययोरुपाधिभूतयोर्धातोः कृत्यप्रत्ययाः स्युः । अवश्यं हरिः सेव्यः, शतं देयम् ।

वि० **आतो युच्** (३-३-१२८) ईषदादयोनुवर्तन्ते । कृच्छ्राकृच्छ्रार्थेषु ईषदादिषूपपदेषु आकारान्तेभ्यो धातुभ्यो युच्स्यात् । खलोपवादः । सुखेन पीयते ईषत्पानः सोमो भवता । दुष्पानः । **भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः** (वा) दुःशासनः दुर्योधनः दुर्दर्शनः दुर्धर्षणः दुर्मर्षणः ।

प्रयोगाः—दुर्लभं मानुषं जन्म । नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा । ईषत्करः प्रपञ्चो हरिणा । सुलभाः पुरुषाः राजन् । विप्रलम्भ उपालम्भः । दुष्कराणीमानि कार्याणि । सुकरमिदं कार्यम् । दुष्पठो लेखः । अवश्यम्भावि भावानाम् । विप्रलम्भस्त्वया सह्यः ।

क्त्वाप्रत्ययः—

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा (३-४-१८) अलंखल्वेतयोः प्रतिषेधार्थकयोरुपपदयोर्धातोः क्त्वा स्यात् । वासरूपन्यायेन विकल्पसिद्धेः प्राचां ग्रहणं पूजार्थम् । भावे इदम् । अलं कृत्वा (माकुरु) । अलं रुदित्वा । खलु उक्त्वा (माब्रूहि) पक्षे ल्युट् अलं करणेन, अलं रोदनेन । अलंखल्वोरित्युक्तेर्नेह-माकार्षीः । प्रतिषेधार्थोक्त्या नेह अलङ्कारः (भूषणम्) । **उदीचां माङो व्यतिहारे** (३-४-१९) व्यतिहारो विनिमयः । व्यतिहारेर्थे माङः क्त्वा स्यात् । अपूर्वकालार्थमिदम् । **मयतेरिदन्यतरस्याम्** (६-४-७०) मेङ इकारोन्तादेशो वा स्यात् ल्यपि । अपमित्य अपमाय वा गां याचते । त्वया गौर्दीयते चेन्मया महिषादिर्दीयते इत्येवं विनिमयं कर्तुं गां याचते इत्यर्थः । उपसर्गेण सह गतिसमासे समासेऽनञ्पूर्वे इति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्त्वो ल्यप्, इत्वपक्षे ह्रस्वत्त्वात्तुक् तदभावे न, ईद्यतीतीत्वं तु न, नल्यपीति निषेधात्। उदीचां ग्रहणात्पक्षे याचेः पूर्वकालवृत्तितया समानकर्तृकयोरिति क्त्वा याचित्वा अपमयते (विनिमयं करोति)। **परावरयोगे च** (३-४-२०) परेण पूर्वस्य अवरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः, अत्र परनदीयोगः पर्वतस्य। अतिक्रम्य पर्वतं स्थिता नदी, अत्रावरपर्वतयोगो नद्याः। अत्राप्राप्तेरतिक्रमस्य च पूर्वकालिकत्वाभावेन समानकर्तृकयोरित्यप्राप्तौ वचनम्। **समानकर्तृकयोः पूर्वकाले** (३-४-२१) समान (एक) कर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। अव्ययकृतो भाव इति भावार्थकः क्त्वा प्रत्ययः। भुक्त्वा व्रजति (पूर्वं भुङ्क्ते पश्चाद्व्रजति)। पीत्वा भुङ्क्ते। द्विवचनमतन्त्रम् स्नात्वा भुक्त्वा पीत्वा व्रजति।

वि० समानकर्तृकयोः पूर्वकाल इति द्वयोः क्रिययोरेककर्तृकत्व एव क्त्वा, तेन ब्राह्मणे भुक्तवति व्रजति देवदत्त इत्यादौ भिन्नकर्तृकत्वे न क्त्वा। तथा च श्रीशैलशिखरं दृष्ट्वा सर्वपापैः प्रमुच्यते इत्यादयः प्रयोगा न साधवः। श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते, विष्णोः पादोदकं पीत्वा पुनर्जन्म न जायते, स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः, मत्प्रसूतिमनाराध्य प्रजा ते न भविष्यति इत्यादि प्रयोगेषु भिन्नकर्तृकत्वदर्शनस्थलेषु स्थितस्य वर्तमानस्येत्यादि प्रधानक्रियामध्याहृत्य तया सह समानकर्तृकत्वमुपपाद्य क्त्वा समर्थनीयः। पूर्वकालत्वे द्योत्य एवायं प्रत्ययः, पूर्वंभुङ्क्ते पश्चाद्व्रजति, अद्य गच्छति श्व आगन्तेत्यादौ पूर्वादिपदेन पौर्वापर्याभिधाने तु न क्त्वा, तेन पूर्वं भुक्त्वा पश्चाद्व्रजतीत्यादिप्रयोगो न, क्वचन तथा प्रयोगे सर्वेषां भोक्तृपुरुषाणां मध्ये पूर्वं भुक्त्वा सर्वेषां गन्तृपुरुषाणां मध्ये पश्चाद्व्रजतीति कर्तृपौर्वापर्यमेव बोध्यते, नतु भोजनगमनयोः पौर्वापर्यम्। तदेतत्कर्तृपौर्वापर्यमेव नतु क्रियापौर्वापर्यमित्येतत्सूत्रव्याख्यायां भाष्यकृता प्रतिपादितमस्ति। किञ्च समानकर्तृकयोरिति द्विवचनमविवक्षितम्, तेन स्नात्वा भुक्त्वा पीत्वा व्रजतीत्यादयोपि प्रयोगाः इति व्याख्यातारः, परन्तु तत्र स्नात्वा व्रजति, भुक्त्वा व्रजति, पीत्वा व्रजतीति नाना वाक्यानां संक्षेपेण क्रिययोर्द्विकं द्विकमादाय अनेकेषु क्त्वा, न तु तदेकं वाक्यम्, तेन स्नात्वा पीत्वा भुक्त्वा, पीत्वा भुक्त्वा स्नात्वा व्रजतीति विपर्यासोपि भवति किन्तु क्रमिकाणां यथाक्रममेव निर्देशो न्याय्यः। स्नानादीनां व्रजनापेक्षयैव पूर्वत्वं, नतु स्नानभोजनादीनां मिथः पौर्वापर्यं प्रतीयते, प्रधानक्रियां व्रजनं प्रति स्नानादीनां विशेषणत्वेन गुणत्वात्, गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायेनाप्रधानक्रियाणामेकस्या अन्यस्यां सम्बन्धाभावेन तयोः पौर्वापर्यस्य बोधयितुमशक्यत्वात्। एवं याचित्वा प्राप्तं गृहीत्वा ययौ इत्यत्र प्राप्तिक्रियाया ग्रहणापेक्षयाऽप्राधान्येपि याचनं प्रति प्राधान्येन तयोः प्रधानाप्रधानक्रिययोर्द्विकमादाय याचेः, एवं ग्रहणयानयोर्द्विकमादाय ग्रहेरपि क्त्वाप्रत्यय उपपद्यते इति चात्रविशेषोऽनुसन्धेयः। किञ्च मुखं व्यादाय स्वपिति, नेत्रे निमील्य हसतीत्यादौ व्यादानस्वापयोः निमीलनहासयोश्च समानकालत्वेनाप्राप्तिशङ्कया व्यादायस्वपित्युपसंख्यानमपूर्वकालत्वादिति विध्यन्तरमुपन्यस्य तत्रापि स्वापहासयोः पश्चादपि अंशेनानुवृत्तेर्व्यादाननिमीलनयोरांशिकं पूर्वकालत्वमस्त्येवेति विध्यन्तरं नावश्यकमिति च भाष्यपदमञ्जर्यादौ प्रतिपादितमस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्त्वाप्रत्यये विशेषाः—

विष्णुं नत्वा स्तौति अनुदात्तोपदेशेति नमो मलोपः। एवं गत्वा हत्वा। स्वरत्यादेः श्र्युकः कितीति नित्यमिडभावः पूर्वविप्रतिषेधेन। स्वृत्वा सूत्वा धूत्वा। **क्त्वि स्कन्दिस्यन्दोः** (६-४-३१) एतयोर्नलोपो न स्यात्क्त्वि परे। स्कन्द-स्कन्त्वा। स्यन्दू-स्यन्त्वा स्यन्दित्वा ऊदित्वादिड् वा। **न क्त्वा सेट्** (१-२-१८) सेट् क्त्वा किन्न स्यात्। तेन गुणः। शीङ्-शयित्वा। सेडित्युक्तेर्नेह निषेधः कृत्वा। **मृडमृदगुधकुषक्लिशवदवसः क्त्वा** (१-२-७) एभ्यः सेट् क्त्वा कित्स्यात्। तेन न गुणः मृड-मृडित्वा, मृद-मृदित्वा। क्लिश-क्लिशित्वा क्लिष्ट्वा क्लिशःक्त्वेति वेट्। वद-उदित्वा वचिस्वपीति सम्प्रसारणम्। वस-उषित्वा वसतिक्षुधोरितीट् सम्प्रसारणं शासिवसीति षः। रुदविदेति कित्वविधेः रुद-रुदित्वा, विद-विदित्वा, मुष-मुषित्वा। ग्रह-गृहीत्वा ग्रहिज्येति सम्प्रसारणे ग्रहोऽलिटीति इटो दीर्घः। **नोपधात्थफान्ताद्वा** (१-२-२३) नकारोपधात्थकारफकारान्ताच्च सेट् क्त्वा किद्वा स्यात्। श्रन्थ-श्रथित्वा श्रन्थित्वा कित्वपक्षे नलोपः, गुम्फ-गुफित्वा गुम्फित्वा। **वञ्चिलुञ्च्यृतश्च** (१-२-२४) एभ्यः सेट् क्त्वा किद्वा स्यात्। कित्वपक्षे नलोपः, वञ्च-वचित्वा। लुञ्चि-लुचित्वा लुञ्चित्वा। ऋत-ऋतित्वा अर्तित्वा (घृणां कृत्वा)। **तृषिमृषिकृषेः काश्यपस्य** (१-२-२५) एभ्यः सेट् क्त्वा किद्वा स्यात्। कित्वपक्षे न गुणः। तृष-तृषित्वा तर्षित्वा, मृष-मृषित्वा मर्षित्वा, कृष-कृषित्वा कर्षित्वा। रलोव्युपधादिति कित्वविकल्पे द्युत-द्युतित्वा द्योतित्वा, लिख-लिखित्वा लेखित्वा। लुभ-लुभित्वा लोभित्वा। लुभोविमोहने इति इट्। विमोहने तु लुब्ध्वा। क्षुध-क्षुधित्वा क्षोधित्वा वसतिक्षुधोरिति इट्। अञ्चेःपूजायामिति नित्यमिटि अञ्चित्वा। गतौ तु अक्त्वा। **जॄव्रश्च्योः क्त्वि** (७-२-५५) आभ्यां परस्य क्त्व इट् स्यात्। जॄ-जरीत्वा जरित्वा वॄतोवेति इटो दीर्घविकल्पः। व्रश्च-व्रश्चित्वा। **उदितो वा** (७-२-५६) उदितः परस्य क्त्व इड् वा स्यात्। शमु-शमित्वा शान्त्वा इडभावे अनुनासिकस्य क्वीति दीर्घः। दिवु-देवित्वा द्यूत्वा इट्पक्षे नक्त्वासेडिति कित्वनिषेधादुपधागुणः, इडभावे च्छ्वोरिति वस्योठि इकारस्य यण्। **क्रमश्च क्त्वि** (६-४-१८) क्रम-उपधाया वा दीर्घः स्याज्झलादौ क्त्वि परे। क्रमु-क्रान्त्वा क्रन्त्वा, उदित्वादिट्पक्षे तु झलादित्वाभावेन क्रमित्वा। पूङश्चेति इड्विकल्पे पू-पवित्वा पूत्वा। **जान्तनशां विभाषा** (६-४-३२) जान्तानां नशेश्च नलोपो वा स्यात्क्त्वि परे। भञ्ज-भक्त्वा भङ्क्त्वा, रञ्ज-रक्त्वा रङ्क्त्वा, नश्-नंष्ट्वा नष्ट्वा मस्जिनशोरिति नुमि तस्य पक्षे लोपः, रधादिभ्यश्चेति इट्पक्षे नशित्वा। **झलादाविति वाच्यम्** (वा) नेह-अञ्जु-अञ्जित्वा, उदित्वाद्वेट् इडभावे नलोपविकल्पे अक्त्वा अङ्क्त्वा। खनु-खनित्वा खात्वा, उदित्वाद्वेट् इडभावे जनसनेत्यात्वम्। द्यतिस्यतीति इत्वे दा-दत्वा, षो-सित्वा, मा-मित्वा, स्था-स्थित्वा। दधातेर्हिरिति हित्वे धा-हित्वा। **जहातेश्च क्त्वि** (७-४-४३) जहातेर्हिः स्यात् क्त्वि। हा-हित्वा। हाङस्तु हात्वा। अद्-जग्ध्वा अदोजग्धिरिति जग्धादेशे तकारस्य धत्वे झरोझरीति पाक्षिकः पूर्वधलोपः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वि० क्त्वाप्रत्यये धातुविशेषेण इडभावाभावौ कित्वभावाभावौ अनुनासिकलोपादीन्विशेषानन्नोक्तान्पूर्वोक्ताँश्चानुसन्धाय रूपाणि साधनीयानि । भू-भूत्वा, गम्-गत्वा, वृध्-वर्धित्वा, रमु-रन्त्वा रमित्वा, पच्-पक्त्वा इत्यादि ।

ल्यबादेशः—

समासेऽनञ्पूर्वे क्त्वो ल्यप् (७-१-३७) अव्ययपूर्वपदे अनञ्समासे क्त्वो ल्यबादेशः स्यात् । इति सोपसर्गस्थलेषु कुगतीति समासेन क्त्वो ल्यबादेशः, ल्यपः पित्वेन ह्रस्वस्य तुक् च, स्थानिवत्वेन ल्यपोपि कित्वेन गुणाभावश्च । उपकृ-उपकृत्य, आदा-आदाय, अनुभू-अनुभूय, परिभू-परिभूय, आश्रि-आश्रित्य, उद्स्था-उत्थाय उदःस्थास्तम्भोरिति पूर्वसवर्णः । नञो योगे तु न ल्यप् अकृत्वा अदत्वा अभूत्वा । **षत्वतुकोरसिद्धः** (६-१-८६) षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात् । अधिइ-अधीत्य । क्त्वो ल्यपि सवर्णदीर्घस्यासिद्ध्या ह्रस्वदृष्ट्या तुक् । प्र-इ-प्रेत्य गुणस्यासिद्ध्या तुक् । **वा ल्यपि** (६-४-३८) अनुदात्तोपदेशानां वनतितनोत्यादीनामनुनासिकलोपो वा स्याल्ल्यपि । व्यवस्थितविभाषेयम् तेन मान्तानिटां वा, नान्तानिटां वनादीनां च नित्यम् । अनुनासिकलोपे ह्रस्वस्य तुक् च । आगम्-आगत्य आगम्य, प्रणम्-प्रणत्य प्रणम्य । विरम्-विरत्य विरम्य । नियम्-नियत्य नियम्य । निहन्-निहत्य । अनुमन्-अनुमत्य । वितन्-वितत्य । अदोजग्धिरित्यत्र जग्धिविधौ ल्यब्ग्रहणादन्तरङ्गानपिविधीन्बहिरङ्गो ल्यब्बाधते इति ज्ञापनेन हित्वदत्वात्वेत्वदीर्घत्वशूठिटो ल्यपि न भवन्ति । विधा-विधाय दधातेर्हिरिति हित्वं न । आदा-आदाय दोदद्घोरिति दत्वं न । निखन्-निखान्य जनसनेत्यात्वं न । प्रस्था-प्रस्थाय द्यतिस्यतीतीत्वं न । प्रक्रम्-प्रक्रम्य क्रमश्चक्त्वेति दीर्घो न । आप्रच्छ-आपृच्छ्य, प्रदिव्-प्रदीव्य छ्वोरिति शूठौ न । प्रखन्य प्रदीव्येत्यत्र इडपि न । **न ल्यपि** (६-४-६९) ल्यपि परे घुमास्थागापाजहातिसामीत्वं न स्यात् । धेट्-प्रधाय, मा-प्रमाय, गै-प्रगाय, पा रक्षणे-प्रपाय । पीङ्पाने इत्यस्य तु निपीय । हा-विहाय । षो-अवसाय । घुमास्थेतीत्वस्य निषेधः । विभाषालीयतेरित्यात्वविकल्पे विलाय विलीय । विचर णि-विचार्य । उद्तॄ णि-उत्तार्य, णेरनिटीति णिलोपः । **ल्यपि लघुपूर्वात्** (६-४-५६) लघुपूर्ववर्णात्परस्य णेरयादेशः स्याल्ल्यपि । विगण णि-विगणय्य । प्रणम् णि-प्रणमय्य । लघुपूर्वादित्युक्तेर्नेह संप्रधार्य । **विभाषाऽऽपः** (६-४-५७) आप्नोतेर्णेरयादेशो वा स्याल्ल्यपि । प्रआप् णि-प्रापय्य प्राप्य ।

वि० **क्षियः** (६-४-५९) क्षियो ल्यपि दीर्घः स्यात् । प्रक्षि-प्रक्षीय । **ल्यपि च** (६-१-४१) वेञो ल्यपि संप्रसारणं न स्यात् । ग्रहिज्येति प्राप्तौ निषेधः । प्रवेञ्-प्रवाय । आदेच इत्यात्वम् । **ज्यश्च** (६-१-४२) ज्यो ल्यपि संप्रसारणं न स्यात् । प्रज्या प्रज्याय । **व्यश्च** (६-१-४३) व्यो ल्यपि संप्रसारणं न स्यात् । उपव्ये-उपव्याय । **विभाषा परेः** (६-१-४४) परेर्व्येञः संप्रसारणं वा स्याल्ल्यपि । परिव्येञ्-परिवीय परिव्याय (संवृत्य) तुकं बाधित्वा परत्वाद्धल इति दीर्घः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णमुल् क्त्वाच--

आभीक्ष्ण्ये णमुल्च (३-४-२२) आभीक्ष्ण्यं पौनःपुन्यम्, तत्र द्योत्ये समानकर्तृकयोः पूर्वकाले वर्तमानाद्धातोर्णमुल्स्यात् क्त्वा च। आभीक्ष्ण्ये द्वे भवत इत्युपसंख्यानाद्द्विर्वचनम्। द्विर्वचनसहितौ क्त्वाणमुलौ आभीक्ष्ण्यं द्योतयतः, न केवलौ। स्मृ-स्मारं स्मारम्, स्मृत्वा स्मृत्वा नमति शिवम्। पी-पायं पायं, पीत्वा पीत्वा पश्यति। श्रु-श्रावं श्रावं, श्रुत्वा श्रुत्वा वक्ति। गम्-णि-गामं गामं, गमं गमं, गमयित्वा गमयित्वा। चिण्णमुलोरिति णमुल्परे णौ वा दीर्घः। लभ्-लम्भं लम्भं, लाभं लाभं, लब्ध्वा लब्ध्वा। विभाषाचिण्णमुलोरिति णमुलि वा नुम्। व्यवस्थितविभाषया सोपसर्गस्य तु नित्यं नुम् प्रलम्भं प्रलम्भम्। जागृ-जागरम् जागरम् जाग्रोऽविचिण्णल्ङित्सु गुणः। ण्यन्तस्याप्येवम्। न यद्यनाकाङ्क्षे (३-४-२३) यच्छब्दे उपपदे क्त्वाणमुलौ न स्याताम्, यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षते चेत्। आभीक्ष्ण्ये विहितो णमुल्, क्त्वात्वाभीक्ष्ण्येऽनाभीक्ष्ण्येपि विहितोऽनेन निषिध्यते। यदयं भुङ्क्ते ततः पठति। यदयमधीते ततः शेते। इह क्त्वाणमुलौ न। साकाङ्क्षे तु यदयं भुक्त्वा व्रजति ततोऽधीते। अत्र भुजिव्रजिक्रियापदयुक्ते वाक्ये ततोऽधीत इति वाक्यान्तरसाकाङ्क्षतया क्त्वा भवत्येव। विभाषाऽग्रेप्रथमपूर्वेषु (३-४-२४) आभीक्ष्ण्य इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले वर्तमानाद्धातोः क्त्वाणमुलौ वा स्तः। अप्राप्तविभाषेयम्। अग्रेभोजम् अग्रेभुक्त्वा व्रजति। अमैवाव्ययेनेति नियमाद्व्यस्तमेवेदं नतूपपदसमासः। प्रथमंभोजं, प्रथमंभुक्त्वा, पूर्वंभोजं, पूर्वंभुक्त्वा गतः प्रथमंपूर्वमिति क्रियाविशेषणम्। पक्षे लडादयः अग्रे-प्रथमं पूर्वंभुङ्क्ते ततो व्रजति। आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव भवति अग्रेभोजं भोजं, भुक्त्वा भुक्त्वा व्रजति। कर्मण्याक्रोशे कृञः खमुञ् (३-४-२५) कर्मण्युपपदे कृञः खमुञ्स्यादाक्रोशे गम्ये। उपपदसमासे खित्वादरुर्द्विषदिति मुम् चौरङ्कारमाक्रोशति (चौरोसीत्याक्रोशति)। करोतिरुच्चारणे, चौरशब्दमुच्चार्येत्यर्थः। स्वादुमि णमुल् (३-४-२६) स्वादुमीत्यर्थग्रहणम्। स्वाद्वर्थेषूपपदेषु कृञो णमुल्स्यात्समानकर्तृकयोः पूर्वकाले। स्वादुमिति तदर्थकशब्दस्य मान्तत्वं निपात्यते, तेनोदन्तत्वाभावात्स्त्रियां वोतोगुणवचनादिति न ङीप् च्व्यन्तस्यापि मकारो दीर्घाभावश्च। अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते- स्वादुङ्कारं भुङ्क्ते। वासरूपन्यायेन क्त्वापि स्वादुं कृत्वा भुङ्क्ते। अन्यथैवंकथमित्थंसुसिद्धाप्रयोगश्चेत् (३-४-२७) एषूपपदेषु कृञो णमुल्स्यात्, सिद्धोऽप्रयोगो यस्य एवंभूतश्चेत्कृञ्। व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः। अन्यथाकारम्, एवङ्कारम्, कथङ्कारम्, इत्थङ्कारं भुङ्क्ते (अन्यथा एवं कथम् इत्थं-भुङ्क्ते)। सिद्धाप्रयोग इत्युक्त्वा कृञः प्रयोगार्हत्वे तु न णमुल्, किन्तु क्त्वैव शिरोऽन्यथा कृत्वा भुङ्क्ते। भाष्ये अन्यथाकृत्वा चोदितमिति प्रयोगात्समानकर्तृकत्वाभावेपि क्त्वाप्रत्ययो बोध्यः। यथातथयोरसूयाप्रतिवचने (३-४-२८) अनयोरुपपदयोः कृञो णमुल्स्यात् असूययाप्रतिवचने गम्ये

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृञि सिद्धाप्रयोगे। यथाकारमहं भोक्ष्ये, तथाकारं भोक्ष्ये, किन्तवानेन। यथाकारमहं पठामि तथाकारं पठामि। प्रष्टुमनर्हः सन्यदिपृच्छति तदेदमसूयया प्रतिवचनम्। कर्तृकरणेकृतावहुलमिति समासः। वासरूपन्यायेन पक्षे क्त्वापि। असूयाप्रतिवचनाभावे तु न णमुल् यथाकृत्वाहं भोक्ष्ये तथा त्वं द्रक्ष्यसि। सिद्धाप्रयोगत्वाभावेपि न, शिरो यथाकृत्वाहं भोक्ष्ये किंतवानेन। **कर्मणि दृशिविदोः साकल्ये** (३-४-२९) कर्मण्युपपदे साकल्यविशिष्टेर्थे दृशिविदोर्णमुल्स्यात्। कन्यादर्शं (सर्वाः कन्याः दृष्ट्वा) वरयति। ब्राह्मणवेदं भोज-भोजयति (यं यं ब्रह्मणं जानाति, लभते, विचारयति वा तं सर्वं भोजयति)। साकल्याभावे तु न णमुल् ब्राह्मणं दृष्ट्वा भोजयति। **यावति विन्दजीवोः** (३-४-३०) यावच्छब्दे उपपदे विन्दतेर्जीवतेश्च णमुल्स्यात्। यावद्वेदं (यावल्लभते तावत्) भुङ्क्ते। यावज्जीवं (यावन्तं कालं जीवति तावत्कालम्) अधीते। यावज्जीवमुद्युङ्क्ते। **चर्मोदरयोः पूरेः** (३-४-३१) चर्मोदरयोः कर्मणोरुपपदयोः पूरयतेर्णमुल्स्यात्। चर्मपूरं (चर्मपूरयित्वा) स्तृणाति धान्यम्। उदरपूरं (उदरं पूरयित्वा) भुङ्क्ते। एवमादिषु प्रायेण पौर्वकाल्यं नास्ति तस्मात्पूर्वकाल इति न सम्बन्धनीयमित्याहुः। **वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्** (३-४-३२) कर्मण्युपपदे पूरयतेर्णमुल्स्यात् ऊकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये। गोष्पदप्रं गोष्पदपूरं (गोष्पदं पूरयित्वा) वृष्टो देवः। गुल्फप्रं गुल्फपूरं वृष्टो देवः।

वि० णमुलन्तमव्ययं प्रधानक्रियायां विशेषणत्वेनान्वेति। तुमर्थाधिकाराद्भाव एव णमुल्। स्वादुङ्कारं भुङ्क्ते देवदत्त इत्यादौ णमुला कर्तुरनभिधानेपि भुजिप्रत्ययेनाभिहितत्वात् कर्तरिप्रथमैव। प्रधानशक्त्याऽगुणशक्तिरभिहितवत्प्रकाशते इति न्यायात्, उक्तं च हरिणा—प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्, शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते।

तदनुप्रयोगिणमुल्——

निमूलसमूलयोः कषः (३-४-३४) निमूले समूले च कर्मण्युपपदे कषेर्णमुल्स्यात्। इतः प्रभृति कषादिषु यथाविध्यनुप्रयोग इति णमुल्प्रकृतेरनुप्रयोगं वक्ष्यति। अत्र प्रकरणे अयोग्यत्वादप्रतीतेश्च पूर्वकाल इति न सम्बध्यते। निमूलकाषं कषति (निमूलं कषति)। समूलकाषं कषति (समूलं कषति)। **शुष्कचूर्णरूक्षेषु पिषः** (३-४-३५) एषु कर्मसूपपदेषु पिषेर्णमुल्स्यात्। शुष्कपेषं पिनष्टि (शुष्कं पिनष्टि) चूर्णपेषं पिनष्टि (चूर्णं पिनष्टि)। रूक्षपेषं पिनष्टि (रूक्षं पिनष्टि)। **समूलाकृतजीवेषु हन्कृञ्ग्रहः** (३-४-३६) एषु कर्मसूपपदेषु यथासंख्यं हन्कृञ्ग्रहिभ्यो णमुल्स्यात्। समूलघातं हन्ति (समूलं हन्ति)। अकृतकारं करोति (अकृतं करोति)। जीवतीति जीवः इगुपधेति कः। जीवग्राहं गृह्णाति (जीवन्तं गृह्णाति)। **करणे हनः** (३-४-३७) करणे उपपदे हन्तेर्णमुल्स्यात्। पादघातं हन्ति (पादेन हन्ति)। यथाविध्यनुप्रयोगार्थो नित्यसमासार्थोयं योगः। भिन्नधातुसम्बन्धे तु भिन्नार्थानां चेति वक्ष्यते। **स्नेहने पिषः**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(३-४-३८) स्निह्यतेऽनेन तस्मिन्करणे उपपदे पिषेर्णमुल्स्यात्। उदपेषं पिनष्टि (उदकेन पिनष्टि)। तैलपेषं पिनष्टि (तैलेन पिनष्टि)। **हस्ते वर्तिग्रहोः** (३-४-३९) हस्तार्थे करणे उपपदे वर्तिग्रहिभ्यां णमुल्स्यात्। हस्तवर्तं वर्तयति (हस्तेन वर्तयति—गुलिकां करोति)। करवर्तं वर्तयति। हस्तग्राहं गृह्णाति। हस्तेन गृह्णाति। करग्राहं गृह्णाति। पाणिग्राहं गृह्णाति। **स्वे पुषः** (३-४-४०) स्व इत्यर्थ-ग्रहणम्। स्ववाचिनि (स्वरूपे पर्याये विशेषे च) करणे उपपदे पुषेर्णमुल्स्यात्। स्वपोषं पुष्णाति (स्वं पुष्णाति)। एवम् आत्मपोषं, गोपोषं, पितृपोषं, मातृपोषं, धनपोषं पुष्णाति (आत्मानं, गां पितरं, मातरं, धनं पुष्णाति) **अधिकरणे बन्धः** (-४-४१) अधिकरणे उपपदे बध्नातेर्णमुल्स्यात्। चक्रबन्धं बध्नाति (चक्रे बध्नाति)। मुष्टिबन्धं बध्नाति (मुष्टौ बध्नाति)। **कर्त्रोर्जीवपुरुषयोर्न-शिवहोः** (३-४-४३) कर्तृभूतयोर्जीवपुरुषयोरुपपदयोर्यथासंख्यं नशिवहिभ्यां णमुल्स्यात्। जीवनाशं नश्यति (जीवो नश्यति)। पुरुषवाहं वहति (पुरुषः प्रेष्यो भूत्वा वहति)। **ऊर्ध्वे शुषिपूरोः** (३-४-४४) कर्तृभूते ऊर्ध्वे उपपदे शुषिपूरोर्णमुल्स्यात्। ऊर्ध्वशोषं शुष्यति (ऊर्ध्वं शुष्यति)। ऊर्ध्वपूरं पूर्यते (ऊर्ध्वं पूर्यते)। **उपमाने कर्मणि च** (३-४-४५) उपमानभूते कर्मणि कर्तरि चोपपदे धातोर्णमुल्स्यात्। घृत-निधायं निहितं (घृतमिव निहितं) जलम्। सुवर्णनिधायं (सुवर्णमिव निहितं) वस्तु। अजकनाशं नष्टः (अजक इव नष्टः)। दन्तनाशं नष्टः (दन्त इव नष्टः)। **कषादिषु यथाविध्यनुप्रयोगः** (३-४-४६) निमूलसमूलयोरित्यारभ्य एतावत्पर्यन्तं कषादेर्णमुलि स एव धातुरनुप्रयोक्तव्यः स्यात्। पूर्वोक्तान्युदा-हरणानि।

वि० संज्ञायाम् (३-४-४२) बध्नातेर्णमुल्स्यात्संज्ञायाम्। क्रौञ्चबन्धं बद्धः। मयूरिकाबन्धम् अट्टालिकाबन्धं बद्धः। बन्धविशेषाणां संज्ञा एताः। कषाद्यनुप्रयोगणमुल्स्थले णमुलन्तान्निमूलकषणादिविशेषः, अनुप्रयुज्यमानात्सामान्यं कषणाद्यव-बुध्यते, एकस्यापि कषणादेर्निमूलादिविशेषानुप्रवेशाप्रवेशाभ्यां भेदः, तेन सामान्यविशेषभावेन विशेष्यविशेषणभावः, सामान्यं विशेष्यं विशेषो विशेषणं, शिंशपावृक्ष इतिवत् तेन न पौनरुक्त्यदोष इत्यनुसन्धेयम्।

उपदंशस्तृतीयायाम् (३-४-४७) इतः प्रभृति मण्डूकप्लुत्या पूर्वकाल इति सम्बध्यते। उपपूर्वाद्दंश-तेस्तृतीयान्तउपपदे णमुल्स्यात्। तृतीयाप्रभृतीन्यन्यतरस्यामिति वा समासः। मूलकोपदंशं मूलकेनो-पदंशं वा भुङ्क्ते (मूलकेनोपदश्य भुङ्क्ते) मूलकादि उपदंशेः कर्मभुजेः करणम् उपदंशिना सह शाब्दे सम्बन्धेऽसत्यप्यार्थसम्बन्धसत्वेनैतावतापि सामर्थ्येन प्रत्ययः समासश्च तृतीयायामिति वचन-सामर्थ्यात्। **हिंसार्थानाञ्च समानकर्मकाणाम्** (३-४-४८) हिंसा प्राण्युपघातः। तृतीयान्त उपपदे-ऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थाण्णमुल्स्यात्। दण्डोपघातं दण्डेनोपघातं वा गाः कालयति (गाः दण्डेनोपहत्य प्रेरयति। दण्डताडं दण्डेन ताडं वा चौरं कालयति। समानकर्मकेत्युक्तेर्नेह चौरं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दण्डेनोपहत्य गोपो गाः कालयति। **सप्तम्यां चोपपीडरुधकर्षः** (३-४-४९) उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल्स्यात्। पार्श्वोपपीडं पार्श्वयोरुपपीडं पार्श्वाभ्यामुपपीडं वा शेते। व्रजोपरोधं व्रजे उपरोधं व्रजेनोपरोधं वा गाः स्थापयति। पाण्युपकर्षं पाणावुपकर्षं पाणिनोपकर्षं वा धानाः सङ्गृह्णाति। कर्षतेरिह ग्रहो नतु कृषतेः, कृषतेस्तु क्षेत्रे उपकृष्य बीजान्वापयति। **समासत्तौ** (३-४-५०) समासत्तिः सन्निकर्षः। तृतीयासप्तम्योरुपपदयोर्धातोर्णमुल्स्यात्सन्निकर्षे गम्ये। केशग्राहं केशेषु ग्राहं केशैर्ग्राहं वा युध्यन्ते (केशेषु गृहीत्वा अतिसन्निहिता युध्यन्ते)। हस्तग्राहं हस्ते ग्राहं हस्तेन ग्राहं (सन्निहिताः) युध्यन्ते। **प्रमाणे च** (३-४-५१) प्रमाणं दैर्घ्यम्। प्रमाणे गम्ये तृतीयासप्तम्योरुपपदयोर्धातोर्णमुल्स्यात्। द्व्यङ्गुलोत्कर्षं द्व्यङ्गुलेनोत्कर्षं द्व्यङ्गुले उत्कर्षं वा (द्व्यङ्गुलेनोत्कृष्य-परिच्छिद्य) खण्डिकां (स्वल्पखण्डं) छिनत्ति। **अपादाने परीप्सायाम्** (३-४-५२) परीप्सा त्वरा। अपादाने उपपदे धातोर्णमुल् स्यात् त्वरायां गम्यायाम्। शय्योत्थायं (शय्याया उत्थाय) धावति। एवं नाम त्वरतेयदवश्यकर्तव्यमप्यनपेक्ष्य शय्योत्थानमात्रमाद्रियते इति भावः। रन्धावकर्षं (रन्धादवकृष्यैव) पयः पिबति। भ्राष्ट्रापकर्षं (भ्राष्ट्रादपकृष्यैव) अपूपान्भक्षयति। **द्वितीयायाञ्च** (३-४-५३) द्वितीयान्ते उपपदे त्वरायां गम्यायां धातोर्णमुल्स्यात्। यष्टिग्राहं यष्टिं ग्राहं वा (यष्टिं गृहीत्वैव) युध्यन्ते। एवं त्वरते यदायुधग्रहणमप्यनपेक्ष्य यष्ट्यादि यत्किञ्चिदासन्नं गृहीत्वा युध्यन्ते इत्यर्थः। एवं लोष्टग्राहं लोष्टं ग्राहं वा। **स्वाङ्गेऽध्रुवे** (३-४-५४) अध्रुवे स्वाङ्गवाचिनि द्वितीयान्ते उपपदे धातोर्णमुल्स्यात्। अद्रवं मूर्तिमत्स्वाङ्गम्, यस्मिन्नङ्गे छिन्नेपि प्राणी न म्रियते तदध्रुवम्। अक्षिनिकाणम् अक्षिणीनिकाणं (अक्षिणी निमील्य) जल्पति। भ्रूविक्षेपं भ्रुवौ विक्षेपं वा (भ्रुवौ विक्षिप्य) कथयति। ध्रुवे तु न शिर उत्क्षिप्य कथयति। **परिक्लिश्यमाने च** (३-४-५५) सर्वतः पीड्यमाने स्वाङ्गे द्वितीयान्ते उपपदे धातोर्णमुल्स्यात्। ध्रुवार्थ आरम्भः उरः प्रतिपेषं (कृत्स्नमुरो निपीड्य) युध्यन्ते। उरोविदारं (कृत्स्नमुरो विदार्य) प्रतिचस्करे नखैः। शिरःपेषं (कृत्स्नं शिरोनिष्पिष्य) यतते। **नाम्न्यादिशिग्रहोः** (३-४-५८) द्वितीयान्ते नामशब्दे उपपदे आदिशेर्ग्रहेश्च णमुल्स्यात्। नामादेशमाचष्टे (नामनिर्दिश्य कथयति)। नामग्राहमाह्वयति (नाम गृहीत्वाह्वयति)।

वि० **विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः** (३-४-५६) द्वितीयान्ते उपपदे विश्यादिभ्यो णमुल्स्यात् व्याप्यमाने आसेव्यमाने चार्थे गम्ये। गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः, क्रियायाः पौनःपुन्यमासेवा। आभीक्ष्ण्ये णमुल्विधौ सत्यपि उपपदसंज्ञया समासविकल्पार्थमासेवायामिह पुनर्विधिः नित्यवीप्सयोरिति द्वित्वं तु न समासेनैव तयोरुक्तत्वात्। असमासे तु गेहादेर्णमुलन्तस्य च पर्यायेण द्वित्वम्। गेहानुप्रवेशं, गेहं गेहमनुप्रवेशं गेहमनुप्रवेशमनुप्रवेशं वा (सर्वाणि गेहान्यनुप्रविश्य, गेहंगेहं पुनःपुनरनुप्रविश्य वा) अस्ति। एवं गेहानुप्रपातं (गेहानि सर्वाण्यनुप्रपत्य,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गेहं-गेहं पुनः पुनरनुप्रपद्य वा), गेहानुप्रपादं गेहानुस्कन्दम्। **अस्यतितृषोः क्रियान्तरे कालेषु** (३-४-५७) क्रियाव्यवधायके धात्वर्थे वर्तमानादस्यतेस्तृषेश्च कालवाचिनि द्वितीयान्ते उपपदे णमुल्स्यात्। द्व्यहात्यासं द्व्यहमत्यासं वा (द्व्यहमतिक्रम्य) गाः पाययति। द्व्यहतर्षं द्व्यहं तर्षं वा (द्व्यहं तृषावतीः कृत्वा) गाः पाययति।

अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ (३-४-५९) अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनम्। तत्र गम्ये अव्यये उपपदे कृञः क्त्वाणमुलौ स्तः। उच्चैःकृत्य, उच्चैःकृत्वा, उच्चैःकारमप्रियमाचष्टे। नीचैःकृत्य, नीचैःकृत्वा, नीचैःकारं प्रियमाचष्टे। समासपक्षे ल्यप्, असमासे तु क्त्वैव। **तिर्यच्यपवर्गे** (३-४-६०) अपवर्गः समाप्तिः। तिर्यक्शब्दे उपपदे कृञः क्त्वाणमुलौ स्तः समाप्तौ गम्यायाम्। तिर्यक्कृत्य, तिर्यक् कृत्वा, तिर्यक्कारं गतः (समाप्य गतः)। अपवर्गेऽगम्ये तु क्त्वैव, तिर्यक् कृत्वा काष्ठं गतः। **स्वाङ्गे तस्प्रत्यये कृभ्वोः** (३-४-६१) तस्प्रत्ययान्ते स्वाङ्गवाचिन्युपपदे करोतेर्भवतेश्च क्त्वाणमुलौ स्तः। मुखतःकृत्य, मुखतःकृत्वा, मुखतःकारं (मुखे कृत्वा)। मुखतोभूय, मुखतो भूत्वा, मुखतोभावं (मुखे भूत्वा) गतः। इह प्रत्यये यथासंख्यं न, व्याख्यानात्। **नाधार्थप्रत्यये च्व्यर्थे** (३-४-६२) नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभ्वोः क्त्वाणमुलौ स्तः। अनाना नाना कृत्वा-नानाकृत्य, नाना कृत्वा, नानाकारम्। विनाकृत्य, विना कृत्वा, विनाकारम्। नानाभूय, नाना भूत्वा, नानाभावम्। अनेकं द्रव्यमेकं कृत्वा-एकधाकृत्य, एकधा कृत्वा, एकधाकारम्। एकधाभूय, एकधा भूत्वा, एकधाभावम्। द्विधाकृत्य, द्विधा कृत्वा, द्विधाकारम्। त्रिधाभूय, त्रिधा भूत्वा, त्रिधाभावम्। प्रत्ययग्रहणान्नेह- हिरुक्कृत्वा पृथक्कृत्य। **तूष्णीमि भुवः** (३-४-६३) तूष्णींशब्दे उपपदे भुवः क्त्वाणमुलौ स्तः। तूष्णींभूय, तूष्णीं भूत्वा, तूष्णीं भावम् (मौनीभूत्वा)। भूग्रहणं कृञो निवृत्त्यर्थम्।

वि० **अन्वच्यानुलोम्ये** (३-४-६४) अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्ये। अन्वग्भूय अन्वग्भूत्वा अन्वग्भावम् आस्ते (अग्रतः पार्श्वतः पृष्ठतो वा अनुकूलो भूत्वाऽऽस्ते)। आनुलोम्ये इत्युक्तेर्नेह–अन्वग्भूत्वा (पृष्ठतो भूत्वा) तिष्ठति। सप्तम्याद्युपपदमादाय विहिते क्त्वाप्रत्यये तृतीयाप्रभृतीत्युपपदसमासपक्षे ल्यप्, तदभावे क्त्वैव, अनुपपदस्थले त्वसमासः सर्वत्रानुसन्धेयः।

प्रयोगाः—अदत्त्वा मादृशो माभूर्दत्त्वा त्वं त्वादृशो भव। अलं स्थित्वा श्मशानेऽस्मिन्। नामं नामं घनश्यामम्। ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः। मुनित्रयं नमस्कृत्य। प्रणम्य शिरसा देवम्। द्विधा कृत्वाऽऽत्मनो देहम्। नामग्राहं समाह्वय। मूलकोपदंशं लड्डुं भक्षयति। स्तनोपपीडं परिरब्धुकामः। जलविलायं विलीनः। चूर्णपेषं पिनष्टि। जीवग्राहं गृहीतोऽरिः। पप्रच्छ कुशलं पान्थः स्थित्वा स्थित्वा पुनः पुनः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रश्नाः—सोपपदे निरुपपदे च क्त्वा प्रत्यये को विशेषः। सामान्ये कर्तरि कर्मणि, भूतभविष्यद्वर्तमानेषु वा कर्तृकर्मसु के प्रत्ययाः। क्त्वातुमुण्णमुलां कुत्र प्रवृत्तिः। णमुलि तस्यैव धातोरनुप्रयोगः क्व। कृत-कर्म-करिष्यत्-क्रिया-कारित-करण-कारणा-कार्य-कर्तव्य-कारयितव्य-करिष्यमाणशब्दाः केष्वर्थेषु कैः प्रत्ययैः सिद्ध्यन्ति। क्त्वातुमुण्णमुल्प्रत्ययाः केष्वर्थेषु तेषु को विशेषश्च। तृन्तृचोः को विशेषः। अधस्तनवाक्यगतान्कृदन्तशब्दान्व्युत्पादयत—

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः, निर्ममो निरहङ्कारः स शान्तिमधिगच्छति। अश्रद्धया हुतं तप्तं दत्तं भवति निष्फलम्। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तपः। काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम्। स लोहकारभस्त्रेव श्वसन्नपि न जीवति। करिष्यमाणः सशरं शरासनम्। आहूतो न निवर्तेत द्यूतादपि रणादपि। न खलु न खलु बाणः सन्निपात्योयमस्मिन्मृदुनि मृगशरीरे तूलराशाविवाग्निः। पूरोत्पीडे प्रवाहस्य परीवाहः प्रतिक्रिया। सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। उपकृत्य प्रियं कर्तुं सदा वाच्छन्ति सूरयः। न जातु कामान्न भयाद्धर्मं जह्याज्जीवितस्यापि हेतोः। कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्। शङ्करः शं करोतु। **इत्युत्तरकृदन्तप्रक्रियाप्रकरणम्।**

पूर्णा कृदन्तप्रक्रिया।

प्रीणातु श्रीपशुपतिं कला भट्टकलानिधेः।
आवापोद्वापनिकष - प्रतिसंस्कृतकौमुदी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुद्धिपत्रम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुद्धिपत्रम्

(पूर्वार्द्धं)

पृष्ठं	पंक्तिः	अशुद्धिः	शुद्धिः
३	६	कमिते	कर्मिते
५	२१	हशिति	हलिति
१६	२०	यार्योगः	योर्योगः
५६	१८	अम्ब्र	अम्ब्रे
६०	१४	परि	पति
६१	७	भ्रुषु	भ्रूषु
६४	१६	मुखम्	मुखम्)
७४	२३	युजेः	यजेः
७६	७	न्द्रात्	न्द्रान्
९५	१०	अदक्ष	अदस
,,	२३	यय	पय
१०२	१०	हेमनः	हेभवन् (मनः)
१०४	२६	इति	इनि
१०६	१८	स्नान्-तुदन्- लिखन् निघ्नन् इ०	स्नात्-तुदत्- लिखत् निघ्नत् इ०
११३	१५	पङ्क्त्यन्ते त्रुटितं	विशेष्याविवक्षायां प्रधानं, विशेष्यजातीयोपि शब्दो
१३५	६	कालि	काली
१४८	२१	स्पदादिः	स्पन्दादिः
१६१	२६	कारण	करण
१७७	१९	लक्षणा	लक्षण
१८९	७	यस्या	यस्य
१९३	२२	पूर्व्या	पूर्व्यं
१९८	८	पदे	पद
१९९	६	कयोः	कयोरिति
२०३	२०	तक्षानि	तक्षति
,,	२३	भीरिति	भीभिरिति
२०५	३	उद्दाल	उद्दाल
२०६	१४	ओदनं-जन	ओदनस्य जनं
२०९	४	भ्राजने	भ्राजते
२१०	१३	निरि	निर
,,	१८	दः कृत्यः	दःकृत्य
२११	२६	क्त्वाति	त्स्वति
२१२	९	रुण	भ्रूण
२१४	९	भागा-भागा	भगा-भगा
२१५	१०	एष्व	एष
२१६	२०	शीतोस्यो	शीतस्यो
,,	२६	परित	परिवृत
२१७	२९	सारङ्गःकृष्ण.	सारङ्गकृष्णः
२१८	२०	प्रशंसा	प्रशस्ता
२२०	२३	करोतु	दूरीकरोतु
२२१	७	अपर	आपर
,,	२३	गणि	गणी
२२३	१	सखाः	सखः
२२८	२१	अस्ति	अस्ति
२३०	२०	चित्रागुर्वा	चित्रगुर्वा
२३१	२०	भार्या	भार्यो
२३४	१४	उध	ऊध
२३६	१	मधूकः	मधुकः
२३७	७	निमार्थः	नियमार्थः
,,	८	अकृश्य	अकुशा
२३९	१९	वृद्धी	वृद्धि
२४१	७	अमल	आमल
२४२	७	नाधि	नधि
२४५	२३	उदिची	उदीची
२४९	१	पश्यद्भ्योः	पश्यद्भ्यो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृष्ठं	पंक्तिः	अशुद्धिः	शुद्धिः
२४९	३	देनानां	देवानां
२५०	९	शेषाः—	
२५१	१	व्यानां	व्ययानां
२५२	१५	विश्व	विश्वा
२५५	७	भावा	भवा
२५९	१६	सङ्का	सक्त्वा
,,	२८	अधर्मा:	अधर्मा
२६१	१२	भागवत्	भागवतवत्
२६४	२५	पदाश्च	पदाच
२६८	११	त्यनेनेत्यपत्यप	त्यनेनेत्यप
२७५	३	च्णतः	क्षणवतः
२७७	१२	द्रागच	द्रागवाच
२७८	१८	श्रावा	श्राव
२८१	२६	मास	मासा
२८२	१	षितृ	पितृ
२८२	४	स्यातापा	म्पातापा
२८३	९	त्रिका	क्रिका
२८८	१२	रार्थि	रर्थि
२८९	७	ववा	वयवा
२९१	२३	पाच-अपा	वाच-अवा
२९२	१	शाश्वत्	शश्वत्
,,	२३	मधुः	मधु
२९४	३	तत्कालि	तात्कालि
,,	७	अभि	आभि
२९७	७	वाश्या-वाश्य	वास्या-वास्य
३००	३	त्सारि	त्सरि
३०५	११	इति	इनि
,,	२२	शिखालि	शिलालि
३०६	१	एव	स्य

पृष्ठं	पंक्तिः	अशुद्धिः	शुद्धिः
३०८	१६	वययो	वयवो
३११	२२	दीव्यती	दीव्यति
३१२	१४	लावाणिकं	लावणिकं
३१५	१८	समा	सम
३१८	१९	युक्ताः	युक्तः
३१९	१९	बहें उत्पाद	बहँ उत्पाट
३२०	१	वधा	जवा
,,	११	दित्या	वित्या
३२२	१२	सक्तुत्व	सक्त्व
३२३	५	ष्ठत्रधि	ठत्रधि
,,	१५	माप	मान
३२४	७	शतिकं	शतकं
३२९	६	सन्नि	सान्नि
३३२	२३	दरो	दरे
३३३	६	सार्गिकः	सर्गिकः
,,	२१	जन	प्रयोजन
३३४	४	मापारं	मगारं
३३५	७	कर्तृ	कर्तृका
३४०	१६	धेयोः	धेययोः
३५६	३	परारि	परारी
३५७	१३	दणिणा	दक्षिणा
३५८	१६	आकनि	आकिनि
३६४	१४	चतुर्धो	चतुर्धा
३६८	३	समास	समान
३७०	३	पेश्व	पेध्व
,,	१९	वत्वेव	वत्येव
३७२	२	वहु	बहु
२७३	१६	स्वर	स्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(उत्तरार्द्धे)

पृष्ठं	पंक्तिः	अशुद्धिः	शुद्धिः
४	२०	यीगे	योगो
५	३	लङादि	लडादि
६	११	पर	परि
७	२६	विक्षया	विवक्षया
१५	२४	योगा	योगाणा
१७	१३	तद्भावि	न तद्भावि
३१	२७	अबीभ्रजत् अबभ्राजत्	अबीभृजत् अबभर्जत्
३३	१५	वाञ्छति-ते	वाञ्छ्यते
३५	१६	चिचेष्ट	चिचेष्टे
३९	१३	अटि	अचि
४१	११	ययति	ण्यति
,,	१३	प्रशस्यते	प्रशंसति
,,	२९	असैत्स्व	असैत्सम्-स्व
४४	१७	इट	इटोऽ
५०	४	अप्या	आप्या
५२	१०	ऊच्	झच्
५३	८	धुर्विं	धुर्वी
,,	१७	प्राचीकशत्	प्राचकाशत्
५७	१	अर्हेत	अर्हेत्
,,	१९	नक्षम्	नक्षत्रम्
५९	२५	गुहन्	गूहन्
६१	९	त्सित्वा	त्सिता
६८	१९	अजिघ्रेत्	अजिघ्रत्
६९	४	घ्रपतत्	घ्रपत्
७०	८	कृत्सु	क्सु
,,	२७	अवि	अभि
७२	३	सुस्नु	सुस्नू
,,	११	अर्थयति	अर्पयति

पृष्ठं	पंक्तिः	अशुद्धिः	शुद्धिः
७२	२८	स्मरत्	अस्मरत्
७४	२	दिंदे	निंदे
,,	६	ध्यानः	ध्यातः
७६	५	आश्रिय	आश्रय
,,	८	निनान्य	निना-नय
,,	९	नेष्यति	नेष्यति-ते
,,	२०	प्रत्युद्ध	उद्धृ-उद्ध
७९	१५	जीवका	जीविका
८१	२	अघोटिष्ट	अघटिष्ट
,,	११	विनन्	षिवन्
८२	११	ज्ञाप	ज्ञप
८६	६	भ्राम्यति	भ्रम्य-मति
८७	६	इन	इत
९१	८	इच	इत्र
१०२	२६	ख्याञः	ख्याञ्
१०४	२	शासमानः	शासानः
,,	११	की	क्रि
,,	१९	शयत	शयत्-त
१०६	२६	दोहि	दोही
११५	१२	डिव्	दिव्
१२३	३	ती	न्ती
१२४	२८	ती	न्ती
१३६	३	सम्प्रपूव	सम्प्रसारणं पूर्व
१४७	२५	रुन्-रुन्	रु-रु
१४९	४	यूयज	यूयुत्
,,	१५	रच्यते	रिच्यते
१५०	१०	समीन्धे	समिन्धे
१५२	२६	भुङ्क्ते	ब्रूते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृष्ठं	पंक्तिः	अशुद्धिः	शुद्धिः
१५३	१०	सुट्कात्पूर्वं सुटि द्वित्वेनैवोपपत्तौ	
१५४	२७	षीन्	षिव्
१६६	८	त्युक्तम्	तीत्युक्तम्
१६९	५	शिष्य-शिष्य	शेष्य-शेष्य
१६९	२३	धूवति	धुवति
१७२	१	कथ्य	कथय्य
,,	९	गण्य	गणय्य
,,	१३	रच्य	रचय्य
,,	१७	ङ्कल्य	ङ्कलय्य
,,	२०	स्पृह्य	स्पृहय्य
१७६	७	हला	हस्ता
,,	२०	द्दढ	द्रढ
१८१	४	स्मालुङि	स्माल्लुङि
,,	८	तिष्टेतेरित्	तिष्ठतेरित्
,,	११	कृत	कॄत
,,	१३	याञ्चत्यु	याञ्चेत्यु
,,	२४	वास्तो	वा स्तो
१८२	२	लाहम्	लोहम्
१८३	२०	ईष्य	ईर्ष्य
१८५	२५	क्षेविपे	विक्षेपे
१८८	४	सनिमीमा	सनि मीमा
१९०	१४	शैषिकौ	शैषिकी
१९१	५	भशार्थ	भृशार्थ
१९२	१३	गृभ्यो	गॄभ्यो
१९९	२५	अन्येतु	अन्ये तु
२००	१	मनपेद्व	मनपेक्ष्य
,,	२४	तुअस्य	तु अस्य
,,	२६	मृद्रूयते	मृदूयते
२०३	२२	कतृ	कर्तृ
२१५	९	इत्युक्ता	इत्युक्तया
२१६	२५	परेर्मूषः	परेर्मृषः
२१८	९	मिथ्याप	मिथ्योप
,,	१२	चेत्सकर्ता	चेत्स कर्ता
२२६	१९	जज्ञे	जज्ञे
२५१	२०	लोपौत्वाति	लोपौत्वानि
२५३	२४	व्रीहि	व्रीहि
२५५	१२	अखूनां	आखूनां
२५६	३	बथाला	बाला
,,	१४	टाविशेषः	टाब्विशेषः
२६६	४	प्रफुल्नः	प्रफुल्तः
२६८	२०	ददोद्घोः	दोदद्घोः
३१०	१२	परिणायेत	परिणायेन
३११	२०	अत्र	अत्र
३२०	२२	प्रमुखैाव	प्रमुखैर्वि
३२५	२७	ब्रोध्यः	बोध्यः
३२६	२	कर्त	कर्तृ

इत्येवमापाततो दृष्टा अशुद्धयः शुद्ध्या सह प्रदर्शिताः सन्ति, तत्र तत्र पदच्छेदे व्यत्यासः मात्रारेखादि प्रदर्शने पूर्ववर्णानुसन्धानार्थयोगचिन्हलोपश्चेत्यादयो मुद्रादोषा अन्येप्यनवधानजनिता विकृतयः पाठकैः कृपया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपाल एकेडेमी प्रकाशन

१. प्रतिसंस्कृता सिद्धान्तकौमुदी—

(विशेष विवृति सहिता)

सोमनाथ शर्मा

२. साहित्य प्रदीप—

(नेपाली भाषा साहित्य शास्त्र)

सोमनाथ शर्मा

३. अभिज्ञान शाकुन्तल नाटकको भाषानुवाद—

(नेपाली)

लेखनाथ शर्मा

४. राघवालङ्कार—

(नेपाली भाषा-स्तवकाव्य)

कुलचन्द्र शर्मा

एकेडेमी संस्कृतिविभाग प्रकाशन—

५. रघुवंश महाकाव्यम्—

(प्राचीन पुस्तक पाठानुसारेण सम्पादितम् नेपालाभाषा समश्लोकानुवादसहितम्)

अनुवादक कोमलनाथ शर्मा

Jayatu Sanskritam, Kathmandu, Nepal